दशमस्कन्धपूर्वार्द्धे | श्री १०८ श्रीराधारमणो जयति । | चतुर्थखण्डः

महर्षिप्रवरश्रीकृष्णद्वैपायनप्रणीतम्

श्रीमद्भागवतम् ।

श्रीश्रीपाद् श्रीधरस्वामिकृतभावार्थदीपिका, श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी, श्रीमद्विशिष्टाद्वैत-सिद्धान्तप्रतिष्ठापनाचार्यवर्यश्रीसुदर्शनसूरिकृतशुकपक्षीयसमाख्याटीका, तदनुगामिश्रीमद्वीर-राघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका, श्रीमन्माध्वसिद्धान्तधुरन्धरश्रीमद्विजयध्वजतीर्थकृत-पदरत्नावली, श्रीगौडीयवैष्णवाचार्य्यप्रवरश्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भाख्यटीका, श्रीमद्विष्णुस्वामिसिद्धान्तनिर्वाहकाचार्यप्रवरश्रीमद्वल्लभाचार्य्यकृतसुबोधिनी, श्रीमत्-विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी, श्रीनिम्बार्कसम्प्रदायि-श्रीमच्छुकदेव-कृतसिद्धान्तप्रदीपाख्यटीका इति नवभिर्व्याख्याभिर्भाषानुवादेन च

समलङ्कृतम् ॥

तदिदं,

परमहंसपरिव्राजकाचार्य्यपूज्यपादश्रीमत्स्वामिप्रकाशानन्दसरस्वतीप्रवरशिष्येण

श्रीनित्यस्वरूपब्रह्मचारिणा

सम्पादितम् ।

वङ्गदेशान्तर्गत ताडास भूपति श्रीराधाविनोद प्रेम सेवा परायण राजर्षि राय

"श्रीवनमालिराय बहादुरस्य"

सम्पूर्ण साहाय्येन

प्रकाशितञ्च ।

तच्च

वृन्दावन निवासि पं॰श्रीलक्ष्मणाचार्यद्वारा संशोध्य

श्रीवृन्दावनधामनि

स्वकीये "श्रीदेवकीनन्दन" यन्त्रालये

मुद्रापितम् ।

सम्वत् १९६४

कश्चिन्महानहिस्तस्मिन् विपिनेऽतिबुभुक्षितः ॥
यदृच्छयागतो नन्दं शयानमुरगोऽग्रसीत् ॥ ५ ॥
स चुक्रोशाहिना ग्रस्तः कृष्ण ! कृष्ण ! महानयम् ॥
सर्पो मां ग्रसते तात ! प्रपन्नं परिमोचय ॥ ६ ॥
तस्य चाक्रन्दितं श्रुत्वा गोपालाः सहसोत्थिताः ॥
ग्रस्तं च दृष्ट्वा विभ्रान्ताः सर्पं विव्यधुरुल्मुकैः ॥ ७ ॥
अलातैर्दह्यमानोऽपि नामुञ्चत्तमुरङ्गमः ॥
तमस्पृशत्पदाभ्येत्य भगवान् सात्वतां पतिः ॥ ८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

सुनन्दो नन्दानुजः संज्ञायां कन् ॥ ४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

चतुर्स्त्रिंशेऽध्याये अहेः सकाशात् श्रीनन्दविमोचनात्मकं ब्राह्मणशापादहिभूतस्य विद्याधरस्य विमोचनरूपं शङ्खचूडवधादिकं च भगवतः कर्मानुवर्णयति। एकदेति ॥ १ ॥ २ ॥

तदनन्तरं गवादिकं मधु मधुरं मध्वन्नं मधुना सहितमन्नं च ददुः गावः गाः ॥ ३ ॥

ऊषुः न्यवसन् ॥ ४ ॥

भाषा टीका।

श्रीशुकदेवजी बोले एक समय सब ब्रजवासियों को देवता की यात्रा करने में इच्छा भई तब बैलों से युक्त गाडियों पर बैठकर गुजरात में सीतपुर के पास अंबिकावन को सब लोग जाते भये ॥ १ ॥

हे नृपते उहीं पर जाय सरस्वती नदी में स्नानकरके भक्ति पूर्वक अनेकपदार्थों से बिभु पशुपति देव तथा अंबिका देवीका पूजन करते भये ॥ २ ॥

फिर देवता हमारे पर प्रसन्न होवै इस इच्छा से सब ने गऊ सुवर्ण वस्त्र मधुर पदार्थ मधु अन्न आदर पूर्वक ब्राह्मणों को दिये ॥ ३ ॥

फिर जल मात्र पान करके व्रत धारण करके नंद सुनंदादिक सब कोई उस रात भर उस सरस्वती के किनारे निवास करते भये ॥ ४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

महानहिरजगरः उरगः उरसा गच्छन्नित्यलक्षिततत्वमुक्तम् अग्रसीज्जग्रास ॥ ५—६ ॥

विव्यधुस्ताडयामासुः उल्मुकैर्ज्वलत्काष्ठैः ॥ ७ ॥

अलातैस्तैरेवोल्मुकैः ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी।

अथ तत्र तदनन्तरं रजनीवृत्तमाह। कश्चिदिति। कश्चिद्विलक्षण इत्यर्थः यदृच्छया केनापि भाग्योदयेन। शयानमुरग इति पदद्वयमग्राने हेतुः तत्र शयानमिति पूर्वस्यां रात्रौ जागरणोपवासादिना श्रान्तेर्निर्भरनिद्राणमित्यर्थः। उरगागमनं च यात्रिकलोकापगमेन निर्जनप्रायत्वात् अग्रसीत् चरणयोर्ग्रसितुं प्रवृत्तः ॥ ५ ॥

ग्रस्तः पदयोरेव वीप्सा त्रासात् तातेति स्नेहभरात् अतो मे मरणात्त्रासो नास्ति किन्तु त्वद्वियोगादेवेति भावः। त्रासादेवाह प्रपन्नं शरणागतं वृद्धत्वेन पुत्रस्य तव पालनीयवृन्दगतं वा परि सर्वतो भावेन तव मम कस्य चिदन्यस्य च क्लेशं बिनैव मोचय महानित्यात्मना दुष्प्रतिकार्यत्वं तस्य शीघ्रागमनप्रार्थनं च निवेद्यते इदं च कालियदमनादिदृष्टेष्वेति ज्ञेयम् ॥ ६ ॥

आक्रन्दितं करुणदीर्घस्वरं चकाराभ्यां श्रवणदर्शनयोः प्राधान्येन द्वयोरप्येककालीनत्वं तेन च तेषां सावधानत्वं च बोधितम् अजगरस्य ग्रस्तापरित्यागस्वभावाशङ्कया परमदुःसहैः विशेषतस्तिर्य्यग्जातिभीषणैरुल्मुकैरेव विव्यधुः हस्ताभ्यां ध्रियमाणैस्तैस्तदङ्गाङ्गे ताडयामासुः संभ्रान्तास्त्वरान्विताः पाठान्तरे विभ्रान्ता उद्विग्नाः ॥ ७ ॥

संकोचाद्वृद्धानां सङ्गपरित्यागेन निजवयस्यवर्गसङ्गे दूरे वासात् तदनन्तरमेव अभ्येत्य पितृस्नेहमयलीलावेशेन सम्भ्रमादाभिमुख्येनागत्य तं दीर्घपुच्छं पदास्पृशदेव ननु जघान स्पृष्टस्य तातस्य स्वयं पादेन स्पर्शस्याप्यनौचित्येन बुद्धिपूर्वकत्वाभावात्। प्रकारान्तरतोऽपि तच्छापविमोचनसामर्थ्यात् ब्रह्मदण्डाद्विमुक्तोऽहं सद्यस्तेऽच्युत दर्शनादिति वक्ष्यमाणाच्च अबुद्धिपूर्वकत्वेऽपि तत्तत्सम्बोधनासिद्धौ हेतुः भगवान् स्वभावत एव सर्वशक्त्याश्रयः अथ सात्वतां पतिः सर्वभक्तपालकश्चेति तदेवं पूतनायाः सद्वेषग्रहणवत् यथाकथञ्चिद्भक्त्या तद्रूपर्शोऽपि तत्पादस्पर्शफलपर्यवसान इति बोधितम् ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तस्मिन्विपिनेऽम्बिकावने कश्चिन्महाविपुलकायोऽहिः सर्पोऽतीव बुभुक्षितो न्यवसदिति शेषः स चोरगः सर्पः यदृच्छयागतस्तत्र सञ्चरन्नन्दं प्राप्तमग्रसीत् ॥ ५ ॥

सच ग्रस्यमानो नन्दश्चुक्रोश कृष्णमाह च किमिति हे तात ! पुत्र महानयं सर्पो मां ग्रसते प्रपन्नं शरणागतं मां सर्पान्मोचयेति ॥ ६ ॥

तस्य नन्दस्याक्रन्दितं रोदनमाह्वानं चाश्रुत्य गोपालाः सर्वे आशूत्थिताः सर्पेण ग्रस्तं नन्दं दृष्ट्वाच सम्भ्रान्ता व्याकुलचित्ताः सर्पमुल्मुकैः साङ्गारकाष्ठैर्विव्यधुस्ताडयामासुः ॥ ७ ॥

सोऽप्यलातैरुल्मुकैस्ताड्यमानोऽपि तं नन्दं नामुञ्चन्न तत्याज ततः प्रपन्नानां पालको भगवानभ्येत्य गत्वा पदा पादेन तं सर्पमस्पृशत् पस्पर्श ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

यदृच्छया तास्मिन्वने आगतोऽभूत् आगमने निमित्तमाह । अतिबुभुक्षित इति । शयानं निद्रां कुर्वन्तम् ॥ ५ ॥

प्रकर्षेणापन्नं विपदङ्गतं शरणागतं वा ॥ ६—१२ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

अस्पृशन्नतु जघान । स्पृष्टस्य जनकस्य तस्य स्वयं पादस्पर्शानौचित्येन बुद्धिपूर्वकत्वाभावात् ॥ ८—१५ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

एवं सर्वतो धर्मसम्पत्तियुक्तानां भगवद्भावे तिरोभूते निरोधस्य वक्तव्यत्वात् शकटाक्षेपवत् सर्पेण नन्दग्रासमपि भगवान् कारितवानित्याह । कश्चिदिति । महानहिरजगरः सहि क्षुधित एव तिष्ठति कदाचिदेवान्नञ्च प्राप्नोति तत्र दैवगत्या तस्मिन् विपिने आहाराभावात् अतिबभुक्षितो जातः यदृच्छया आकस्मिकविधिना तेन नन्दः प्राप्तः यदृच्छयैव नन्दसमीपमागतः नन्दोऽपि दैवगत्या निद्राणो जातः वस्तुतस्तु जाग्रता स्थातव्यम् अतः शयानं नन्दं सुखमेव उरगः आगमने ज्ञातुमशक्यः अग्रसीत् जग्रास ॥ ५ ॥

ततो यज्जातं तदाह । स चुक्रोशेति । कण्ठादधोभागे अहिना ग्रस्तः पूर्वं केवलं चुक्रोश पश्चान्माहात्म्यं स्मृत्वा कृष्णकृष्णेत्यादरेण भयाद्वा सम्बोधनं कृत्वा स्वानिष्टं निवेदयति । महानयं सर्पो मां ग्रसत इति तातेति सम्बोधनं स्नेहाद्भक्त्यात् परिमोचने हेतुं वदन्नेव प्रार्थयते प्रपन्नं परिमोचयेति ॥ ६ ॥

ततो भगवन्मोचनात् पूर्वमेव अन्ये गोपालाः प्रतिक्रियार्थमुद्यता जाता इत्याह । तस्य चेति । नन्दस्य विश्वतां बोधयितुमन्येषामविज्ञातां च प्रार्थनाप्रतिक्रियये निरूपणं तस्य नन्दस्य आक्रन्दितं श्रुत्वा सहसैव विचारमकृत्वैव भगवन्तमपृष्ट्वैव स्वयमेव उत्थिता नन्दञ्च ग्रस्तं दृष्ट्वा विशेषेण भ्रान्ताः सन्तः शीतार्थं ज्वालितल्मुकैः सर्पं विव्यधुः अनेनोपायेन नन्दोऽपि म्रियेत तथाप्यज्ञानात् भगवति विद्यमाने यात्रावदिदमपि कृतवन्तः ॥ ७ ॥

तथाप्यनुपायत्वान्न फलितमित्याह । अलातैरिति । सहि भक्षयितुमेव जानाति नतु त्यक्तुमतो नामुञ्चत् ततो यदुचितं तमुपायं भगवान् कृतवानित्याह । तमस्पृशदिति । स्वयमभ्येत्य पदा तमस्पृशत् तस्य हि कर्मक्षयः कर्त्तव्यः स ज्ञानेन भक्त्या वा ज्ञाने त्वधिकारिशरीरमपेक्षते भक्तिरप्यत्र प्रमेयलभ्यैव अतस्तस्य भक्तिसिद्ध्यर्थं भगवदीयशरीरप्राप्त्यर्थं पदा अस्पृशत् स्वयमागत्येति तस्यापि साधनापेक्षाऽभावाय तस्य तथा करणसादर्थ्यावश्यकत्वाय सात्वतांपतिरिति वैष्णवानामयं पतिः अतो वैष्णवहितार्थं तथा कृतवान् ॥ ८ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

महानजगरः । उरसा गच्छतीत्युरग इत्यलक्षिततत्त्वज्ञापनार्थं विशेषणम् ॥ ५ ॥

चुक्रोशेति । अनेन सर्वदुर्गाणीति गर्गोक्तिमनुस्मृत्येति भावः ॥ ६ ॥

उल्मुकैर्ज्वलत्काष्ठैः ॥ ७ ॥

अलातैस्तैरेव ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

तस्मिन विपिने कश्चिन् महानहिः आसीत् स उरगः महानहिः यदृच्छया आगतः शयानं नन्दम् अग्रसीत् जग्रास ॥ ५ ॥ ६ ॥

उल्मुकैरलातैर्विव्यधुः ताडयामासुः ॥ ७ ॥ ८ ॥

भाषा टीका ।

उसी वन में रात में सोयेहुये नंदजी के पास में कोई वडा भूखा भारी सर्प दैव योग से आगया उसने नंदजी को पग की तरफ से लील लिया ॥ ५ ॥

सर्प के ग्रास करने से वह नंदजी पुकारने लगे कि हे ! कृष्ण ! हे तात ! यह महा सर्प मेरे को खाता है मैं तुमारे शरणहूं मेरे को छुडाओ ॥ ६ ॥

उन के उस चिल्लाने को सुन कर सब गोपाल जल्दी उठे सर्प को देखकर त्रासित होगये फिर जलती लकडियों से सर्प को मारने लगे ॥ ७ ॥

उन अग्नि के लकडियों से मार ने पर भी सर्प ने उन को नहीं छोडा इतने मे सात्वतों के पति भगवान् ने आकर चरण से उस सर्प को छू दिया ॥ ८ ॥

स वै भगवतः श्रीमत्पादस्पर्शहताशुभः ।
भेजे सर्पवपुर्हित्वा रूपं विद्याधरार्चितम् ॥ ९ ॥
तमपृच्छद्धृषीकेशः प्रणतं समुपस्थितम् ।
दीप्यमानेन वपुषा पुरुषं हेममालिनम् ॥ १० ॥
को भवान् परया लक्ष्म्या रोचतेऽद्भुतदर्शनः[१] । [१]शुभदर्शनेति वीर० पाठः
कथं जुगुप्सितामेतां गतिं वा प्रापितोऽवशः ॥ ११ ॥
॥ सर्प उवाच ॥
अहं विद्याधरः कश्चित् सुदर्शन इति श्रुतः ।
श्रिया स्वरूपसंपत्त्या विमानेनाचरं दिशः ॥ १२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

विद्याधरेष्वर्चितं पूजितम् ॥ ९ ॥ गोपेष्वात्मन ऐश्वर्यं प्रकाशयितुमविद्वानिव तमपृच्छत् दीप्यमानेन वपुषा समवस्थितम् ॥ १० ॥ यः परया प्रकाशते स भवान् क इति ॥ ११-१२ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

वै प्रसिद्धमेवैतदित्यर्थः । भगवतोऽशेषनिजप्रभावान् प्रकटयतः श्रीमतः सर्वमाधुर्यसम्पत्तियुक्तस्य पादस्य स्पर्शेन तत्स्वभावेन हतान्यशुभानि महदपराधलक्षणान्तानि बहुजन्मसञ्चितान्यशेषपापानि यस्य स । अत्र श्रीमदिति कैमुत्यव्यञ्जकम् अत एव गौरवेण श्रीमत्पादस्पर्शेत्येव पुनरुक्तम् । नतु तत्स्पर्श इति मात्रम् । अत एवेदमपि न चित्रमित्याह । भेजे इति । विद्याधरेषु नैर्वार्चितं सुदुर्लभमित्यर्थः । इति पूर्वतोऽपि रूपविशेषप्राप्तिः सूचिता । अन्यत्तैः । अथवा श्लोकद्वयमेवं युज्यते । अलातैर्हन्यमानोऽपि य उरङ्गमस्तं श्रीनन्दनामुञ्चत्तमभ्येत्य पदास्पृशदिति तेन स्पर्शमात्रेणासावुरङ्गमस्तममुञ्चदित्यवगम्यते । प्रविश्य पिण्डीभित्यत्रैवाकाङ्क्षा लब्धत्वात् । भगवान् सात्वतां पतिरिति पदद्वयस्य सामर्थ्यात् । अन्यथा तं तथा परित्यज्य विद्याधरतां प्राप्ते तस्मिन् श्रीभगवतः पृच्छायामयोग्यत्वाच्च । अन्यथा सोऽजगरः कीदृगासीत् तत्राह । स वै इति । सर्पवपुः सर्वाकारं रूपमप्याकारमेव तव हेतुः श्रीमदिति अशुभमेव तस्य हतं नतु वपुरिति तेनैव वपुषा विद्याधराकारं भेजे इत्यर्थः । अत्र चाचिन्त्यशक्तिरेव हेतुरित्याह भगवतः । श्रीमदिति वायकसैरिन्ध्र्यादिषु तथा दर्शनादिति भावः ॥ ९ ॥ हृषीकेशः सर्वेन्द्रियप्रवर्तकत्वेन सर्वज्ञोऽपीत्यर्थः । प्रणतं कृतप्रणामं सम्यक् बद्धाञ्जलित्वादिना अस्थितं दीप्यमानेन वपुषा पुरुषं पुरुषाकारं हेमस्रग्युक्तम् । यद्वा हेम्नो योपलक्षितं पङ्क्तिः तद्वन्तं सौवर्णकिरीटकुण्डलादि दिव्यभूषणमाला विभूषितामित्यर्थः ॥ १० ॥

शुभं सुन्दरं दर्शनं रूपं यस्य स भवान् अद्भुतदर्शन इति वा पाठः । कथं कस्माद्धेतोर्वा एतामाजगरीं गतिं प्रापितः केनेति शेषः । अवशः इच्छारहितः । वश कान्तौ बलादित्यर्थः । अन्यथा एतादृशस्यैतादृश गत्यसम्भवादिति ॥ ११ ॥

ततश्च तत्स्पर्शप्रभावेण तस्य भक्तिरप्युत्पन्नेति तद्वाक्यद्वारा व्यञ्जयितुमाह । सर्प उवाचेति । अत्र च सर्पतानिर्देशः पूर्ववच्छरीराभेदापेक्षया । कश्चिदिति विनयेन श्रुतः संज्ञातः स्वस्य रूपेण सम्पत्तिः सम्पन्नता यस्यास्तया श्रिया शोभया विशिष्टः । दिशोऽचरमितस्ततः क्रीडया भ्रमन्नासम् ॥ १२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

सच सर्पो भगवतः श्रीमतः पादस्य स्पर्शेन हतमशुभं सर्पतापादकं यस्य तथाभूतः सर्पशरीरं त्यक्त्वा विद्याधरैः सम्माननीयं रूपं विद्याधरैरर्चितं प्राप ॥ ९ ॥

ततः प्रणतं कृतप्रणामं पुरतः दीप्यमानेन वपुषा तिष्ठन्तं हेममालाधरं तं पुरुषं भगवान् पप्रच्छ ॥ १० ॥

प्रश्नमेवाह । को भवानिति । अधुना यः परया लक्ष्म्या कान्त्या रोचते प्रकाशते स भवान्कः विद्याधरोऽहमितिचेत्तर्हि हे शुभदर्शन । कथं निन्दितामेतां गतिं सर्पतां प्रापितः विप्रशापादिति चेत्तत्राह । अवशः कथं शापनिमित्तापचारानिमित्तदेहपारवश्यमिति भावः । यद्यपि सर्वज्ञस्य प्रश्नानुपपत्तिः तथाप्यात्मनः प्रभावं प्रकाशयितुमविदुष इव प्रश्नोपपत्तिः अत एव सुदर्शनपदपर्यायेण शुभदर्शनपदेन सम्बोधनं कृतम् ॥ ११ ॥

इत्थमापृष्टः सपूर्ववृत्तं विज्ञापयन्नात्मनः कृतार्थतामाविष्करोति । अहमिति । अहंतावत् कश्चिद्विद्याधरः सुदर्शन इति स्मृतः प्रसिद्धः सोऽहं श्रिया कान्त्या सुरूपसम्पत्त्या सौन्दर्यसमृद्ध्या च उपलक्षितः कदाचिद्विमानेन सर्वा दिशः समन्तात्सञ्चरन् ॥ १२ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

ततो यज्जातं तदाह । सत्वा इति । वै निश्चयेन स सर्पवपुर्हित्वा विद्याधररूपं भेजे परं पूर्वस्माद्विशिष्टं भगवदीयत्वात् तदाह । विद्याधरैरर्चितमिति । विद्याधराणां देवरूपो जातः सर्वापकृष्टा सर्पयोनिः सर्वोत्तमा भगवदीया एवञ्चरणप्रभावः तस्य सर्वाधमस्य सर्वोत्तमत्वप्रापणे प्रमेयबलमेव हेतुरित्याह । भगवत इति देहमात्रे उपपत्तिरुक्ता तस्य लोके सर्वोत्तमत्वाय चरणं विशिनष्टि । श्रीमत्पादेति । तस्य स्पर्शेन हतमशुभं यस्य सर्पवपुःपरित्यागे पापनाशो हेतुः गुणाधानेऽपि तत्स्पर्श एव हेतुः ॥ ९ ॥

यथायोग्यं पदार्थाभिनिवेशः कर्त्तव्यः चरणरज एव सामग्रीसम्पादकमेवमुपकारमग्रके कृतवानिति शङ्कां वारयितुं तस्य भगवत्कृतोपकारज्ञानमप्यस्तीति ज्ञापयितुं भगवांस्तं पृच्छतीत्याह । तमपृच्छदिति । यद्यपि स्वयं तस्यान्तःकरणं सर्वमेव जानाति यतो हृषीकेशः तथापि तत्र शास्त्रीयं सामर्थ्यं स्थापयितुं परिभाषणपूर्वकं तस्यान्तःकरणं बोधयतीत्याह । हृषीकेश इति । तथा करणे हेतुः प्रणतमिति तर्हि पूर्वं कथमन्यथा कृतवानित्याशङ्क्याह । समवस्थितमिति । पूर्वं तु न सम्यगवस्थितः इदानीं तु नम्रभावेन स्थित इति आन्तरमप्यस्य स्वरूपं समीचीनामिति ज्ञापयितुं बहिःकान्तिं वर्णयति । दीप्यमानवपुषेति यथा भगवदीयस्य तेजोवच्छरीरं भवति तथा दीप्यमानेन वपुषा उपलक्षितः उत्कृष्टयोनावपि भगवदीयत्वेऽपि तरतमभावोऽस्तीति कदाचित्तिर्यगादिरूपं वा प्राप्नुयादिति शङ्कां वारयितुमाह । पुरुषमिति । तत्रापि सर्वगुणपूर्णतां ज्ञापयितुमाह । हेममालिनमिति । महानेवालंकृतो भवतीति ॥ १० ॥

प्रश्नमाह । कोभवानिति । क इति जातिनाम्नोः प्रश्नः स्वभावतोऽप्यमहतः सहसैव साधनेन महत्त्वमापद्यत इति भगवानपि तं वर्णयति । परया लक्ष्म्या रोचते भवानिति किञ्च देवादयः सर्व एव समागताः बहुधा दृष्टाः परं भवानद्भुतदर्शनः अद्भुतं दर्शनं यस्येति नैवंविधः कश्चित्तेजस्वी दृष्टपूर्व इत्यर्थः इदम्पूर्वपुण्यानिच व्यतिरेकेण न भवति तस्मिंश्च सति कथंजुगुप्सिता योनिरिति अवश्यं केनाचित्प्रापित इति शाप एव किञ्चित्कारणं भविष्यतीति तथोच्यते तत्रापि वनं केनवा प्रापित इति ॥ ११ ॥

अयं पूर्वमपि सर्प एवास्थितः भगवत्कृपया विद्याधरत्वं प्राप्त इति पुनः सर्प एवायं जातः अतः सर्प उवाचेति स्वस्य पूर्ववृत्तान्तमाह । अहमितिश्लोकद्वयेन विद्याधरा देवविशेषाः कश्चिदित्यप्रसिद्धः सुदर्शन इति विश्रुतः प्रसिद्धः अनेनैव वैष्णवनाम्ना अग्रे भगवत्कृपा जातेति ज्ञापयितुं विश्रुतत्वकथनं तस्य देहकान्तिः धनम् अद्भुतसामर्थ्यं चेति पूर्वमपि गुणत्रयं स्थितमित्याह । श्रिया स्वरूपसम्पत्त्या विमानेनेति दिशः दश आ समन्ताच्चरन् सर्वत्राप्यप्रतिहतगतिः ॥ १२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

विद्याधरैरर्चितमिति तस्य विद्याधर श्रेष्ठत्वात् ॥ ९ ॥

तममपृच्छदिति बहुग्रामनगरेभ्य आगतान् यात्रिकानपि लोकान् ब्राह्मणानादरतो भीषयितुमिति भावः । अत एव हृषीकेशस्तत्रत्यजनान् सर्वानेव सुदर्शनोक्तावेकाग्रीकारयन् ॥ १० ॥

प्रापित इति । केनेति शेषः ॥ ११ ॥

श्रुतः विख्यातत्वात् सर्वलोकैरेव । दिशोऽचरमितस्ततः क्रीडया भ्रमन्नासम् ॥ १२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

विद्याधरेषु अर्चितं पूजितं रूपं भेजे प्राप ॥ ९ ॥

हृषीकाणां सर्वप्राणीन्द्रियाणामीशः सर्वज्ञोऽपि मुग्ध इव तमपृच्छत् कथंभूतं प्रणतं कृतप्रणामं पुरतः दीप्यमानेन वपुषा सम्यगवस्थितम् ॥ १० ॥

लक्ष्म्या शोभया यः रोचते प्रकाशते स भवान् कः ॥ ११ ॥

श्रिया शोभया तत्तदङ्गगतया स्वरूपसंपत्त्या शरीरसौन्दर्यसमृद्धया ॥ १२ ॥

भाषा टीका ।

श्रीभगवान् के पाद के स्पर्श होने से उस सर्प के सब पाप नष्ट होगये तब उसी वखत सर्प शरीर कों छोडकर विद्याधरों के पूजने योग्य रूप को उस सर्प ने धारण किया ॥ ९ ॥

फिर वही पुरुष वडे प्रकाशमान रूप स सुवर्ण की माळा धारण किया हुआ नमस्कार करके आगे खडा भया तब हृषीकेश भगवान् ने उस से पूछा ॥ १० ॥

आप वडी शोभा से प्रकाशमान हो वडा अद्भुत तुमारा दर्शन है फिर तुम किस प्रकार से परवश होकर ऐसी निंदित गति को प्राप्त भये हो ॥ ११ ॥

सर्प बोला मैं कोई सुदर्शन नाम का विद्याधरथा मैं अपनी रूप लक्ष्मी की संपत्ति से विमान मैं वैठ कर दिशाओं में घूमता था ॥ १२ ॥

ऋषीन् विरूपानाङ्गिरसः प्राहसं रूपदर्पितः ।
तैरिमां प्रापितो योनिं प्रलब्धैः स्वेन पाप्मना ॥ १३ ॥
शापो मेऽनुग्रहायैव कृतस्तैः करुणात्मभिः ।
यदहं लोकगुरुणा पदास्पृष्टो हताशुभः ॥ १४ ॥
तं त्वाहं भवभीतानां प्रपन्नानां भयापहम् ।
आपृच्छे शापनिर्मुक्तः पादस्पर्शादमीवहन् ! ॥ १५ ॥
प्रपन्नोऽस्मि महायोगिन् महापुरुष सत्पते ! ।
अनुजानीहि मां देव ! सर्वलोकेश्वरेश्वर ! ।
ब्रह्मदण्डाद्विमुक्तोऽहं सद्यस्तेऽच्युत ! दर्शनात् ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका

प्राहसमुपहसितवानस्मि प्रलब्धैरुपहासितैः मदीयेनैव पापेन निमित्तेन ॥ १३ ॥

यद्यतः शापात् ॥ १४ ॥

आपृच्छे लोकं गन्तुमनुज्ञां याचे हे अमीवहन् दुःखनाशन ! ॥ १५-१९ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

विरूपान् विकृताकारान् तपसा च कार्श्यादि व्याप्तानित्यर्थः अङ्गिरसस्तद्वंश्यान् प्रलम्भे हेतुः स्वेनैव पाप्मनेति । यद्वा । तैः यत् प्रापितस्तत् स्वेनैव पाप्मनेति तेषां दोषः परिहृतः ॥ १३ ॥

अहो किं नाम वक्तव्यो महतां प्रभावो येन मम दुष्कृतमपि परमसुकृततां नीतमित्याशयेनाह । शाप इति । करुणात्मभिरित्यपराधाग्रहणं दीनोद्धारव्यग्रत्वञ्च दर्शितम् । एतेन तत्र श्रीकृष्णपादाब्जस्पर्शाच्चे परममङ्गलं भावीति तैरुक्तमिति ज्ञेयम् अतोऽनुग्रहायैव शापः कृतः । लोकगुरुणा जगदीश्वरेण भवतेति सुदुर्लभत्वमुक्तम् । तत्रापि पदा श्रीचरणेन पादेति क्वचित् पाठः ॥ १४ ॥

ननु स्वलोकं गन्तुमनुज्ञां याचसे कथं न मोक्षमित्यत्राह । भवेति । भवभीतत्वेन प्रपन्नानां मनसापि शरणागतानां तद्भयापहम् । अस्माकन्तु साक्षात् प्राप्तपरमभक्तिनिदानपादस्पर्शानां स्वत एव स इति भावः ॥ १५ ॥

किन्तु यत्र कुत्रापि स्थितौ त्वत्प्रपत्तिरेव ममाभीष्टेत्याह । प्रपन्न इति । त्वामाश्रितोऽस्मि प्रपन्नोऽहमिति पाठेऽपि स एवार्थः । ननु सा सुदुर्लभेति चेत्तत्राह । महायोगिन् हे अनन्ताचिन्त्यैश्वर्ययुक्त ! कुतः महापुरुष हे परमेश्वर त्वत्प्रभावान्न किञ्चिद्दुर्लभमित्यर्थः । विशेषतश्च हे सतां पते पालक ! ततोऽङ्गिरसामङ्गीकारमङ्गीकुर्या एवेति भावः । तत्रापि हे कृष्ण हे पूतनादीनामपि भक्तपदप्रदेत्यर्थः । अतः प्रपन्नमनोरथपरिपूरणं तवोचितमेवेति भावः । देवेति पाठे हे विचित्रक्रीडाकौतुकप्रधानैतादृशाधमोद्धरणमपि तव क्रीडासु योग्यमिति भावः । अतः कृतार्थत्वादधुना मामनुजानीहि मल्लोकगमनायाज्ञामेव देहि । ननु मत्प्रपत्तीच्छालोकान्तरगमनेच्छा चेति विरुद्धमित्याशङ्क्य स लोकोऽपि त्वदीय एवेत्याह । हे सर्वलोकेश्वरेति । किञ्च कर्म फलदात्रान्तर्यामिणा त्वया तथैव प्रेर्योऽहं तत्र किं कर्त्तुं शक्नुयामित्याह । हे ईश्वरेति ॥ १६ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

अमीवहन् पापापह ! ॥ १५-२२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

सौन्दर्येण गर्वितो विरूपानाङ्गिरसः ऋषीन् दृष्ट्वा हसितवानस्मि तदा मदीयेनैव पाप्मना पापेन हेतुना प्रलब्धैरुपहसितैस्तैराङ्गिरोभिः ऋषिभिरिमां योनिं सर्पजन्म प्रापितः ॥ १३ ॥

प्रलब्धैरपि तैराङ्गिरोभिः करुणात्मभिः हेतुगर्भमिदं कारुण्यस्वभावत्वान्मदनुग्रहार्थमेव शापः कृतः कुतः यत् यस्मादहं त्रिलोकगुरुणा त्वया कर्त्रा पदा करणेन स्पृष्टः अन्यथैतन्न सम्भाव्यत इति भावः कथम्भूतः गतमशुभं पापं यस्य तथाभूतोऽहम् ॥ १४ ॥

पादस्पर्शाद्धेतोः शापेन निर्मुक्तः हे अमीवहन्नमीवं पापं दुःखं वा हन्तीति तथाभूत ! त्रिलोकगुरुं भवात्संसाराद्भीतानां प्रपन्नानां भयमपहन्तीति तथाभूतं त्वामापृच्छे स्वलोकं गन्तुमनुज्ञां याचे ॥ १५ ॥

हे महायोगिन् अचिन्त्यविविधविचित्रशक्ते ! हे महापुरुष हे सतां पते त्वां प्रपन्नोऽस्मि मामनुजानीह्याज्ञापय हे अच्युत तव दर्शनाद्धेतोः सद्यः ब्रह्मशापाद्विमुक्तोऽहमित्येतन्न चित्रमिति वाक्यशेषः ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

पाप्मना अपराधेन प्रलब्ध उपलब्धो विप्रलब्धो वा विरूपान्

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली

सौन्दर्यरहितान् "सौन्दर्यंच स्वभावेच रूपशब्दं प्रचक्षते" इति अङ्गिरसः पुत्रा अङ्गिरसः ॥ १३—१४ ॥

आपृच्छे आज्ञां प्रार्थये अमीवहन् दोषनाशन ॥ ॥ १५—१७ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

ब्रह्मदण्डादिति तन्मात्रेण सर्पदेहाध्यासनाच्च विवक्षया स वै भगवत इति तु तद्देहमात्राविवक्षया ॥ १६—१८ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

एवंस्वरूपमुक्त्वा अपराधफले निरूपयति । ऋषीनिति । आङ्गिरसगोत्रे उत्पन्ना ऋषयः अष्टावक्रवत् विरूपाः स्थिताः स्वयन्तु रूपेण दर्पितः प्राहसंयथाबालः प्राकृतो हसति पश्चात् तच्छापेन इमां सर्पयोनिं प्राप्तः सर्पयोनि प्राप्तौ विशेषहेतुमाह । प्रलब्धैरिति । प्रलब्धा वक्रोक्त्या वञ्चिताः उद्वेजिताः स्वरूपतः निष्कारणमुद्वेजकः सर्प एव भवति अत इमां योनिं प्राप्त इति नन्वल्पे अपराधे कथमम्महान् दण्डः तैः कृत इत्याशङ्कयाह । स्वेन पाप्मनेति । पूर्वं हि ब्रह्मवृत्तिरपहृता अतस्तेन भाव्यमेव ऋषिभिः केवलं प्रकटितमित्यर्थः ॥ १३ ॥

एवमपराधशापौ निरूप्य तस्य वैष्णवत्वसिद्ध्यर्थं निर्मत्सरतामाह । शापो म इति । पूर्वंविद्याधरत्वेन कदापि मुक्तिः स्यात् अतोऽयं शापोऽनुग्रहार्थ एव यद्यपि लोके अनिष्टरूपः तथापि मे अनुग्रहार्थएव जातः यतस्ते करुणावन्तः नहि करुणावतां शापोऽन्यथा भवति तत्रापि प्रसिद्धानां तदाह । तैः करुणात्मभिरिति । तस्यानुग्रहरूपत्वमाह । यदहं लोकगुरुणेति । ननु शापः पूर्वसिद्धः सदोषात्मक एव तेन कथमिष्टसिद्धिः तत्राह । कृत इति । अयं शापः तैरेवापूर्वं कृतः भगवद्दर्शनमृषीणामनुग्रहाद्भवति तदत्र शापादेव जातमिति तस्यानुग्रहत्वं किञ्च लोकगुरुणा त्रैलोक्यस्यैव ज्ञानोपदेशकर्त्रा पादेन स्पृष्ट इति गुरुसेवया हि ज्ञानं सिद्ध्यति सा सेवा तदा पुष्टा भवतीति निश्चीयते यदि स्वयम्पदा स्पृशति गुरुः अतिविश्वस्तं प्रीतिमन्तमेव स्वयंपदा स्पृशति तेनैव अपराधः पूर्वपापमपि गतमित्याह । हताशुभ इति । हतमशुभं यस्य ॥ १४ ॥

एवं भगवच्चरणस्पर्शाभिनन्दनं कृत्वा तेनैव जातं फलं प्रार्थनामिषेण कीर्तयति । तं त्वाहमितिसार्द्धैस्त्रिभिः । आदौ फलातुज्ञां प्रार्थयति तं सर्वफलदातारं तुशब्देन कर्मणापि फलमित्यादिपक्षं व्यावर्तयति । तं त्विति त्वा त्वां वा पूर्वार्थे आङ्मध्ये आसमन्तात् भवभीतानामिति ये केचन दुर्लङ्घ्यादपि संसाराद्भीताः तेषामपि भवान् भयं दूरीकरोति प्रपत्तिमात्रेणैव भगवत्सेवार्थं हि संसारे उत्पाद्यन्ते ते सर्वे संसारगतमायया विपरीता एव भवन्ति तथापि कृष्ण तवास्मीत्युक्तः सर्वमेवभयं दूरीकरोति अतोऽस्माकमपि वयं सापराधाः नन्दस्य ग्रासं कृतवन्त किंकरिष्यतीतिशङ्का निवर्तिता अतःआपृच्छे आसमन्तात् पृच्छामि सम्भाषणं करोमि मध्ये समागतोऽप्युपद्रवो नष्ट इति आगन्तुकोऽपि दोषो नास्ति तदाह । शापनिर्मुक्त इति । पादस्पर्शादित्युभयत्र हेतुः तथापि सहजपापस्य जायमानत्वात् कथं सम्भाषणयोग्यतेत्याशङ्कयाह । अमीवहन्निति । अमीवं पापं हन्तीति ॥ १५ ॥

तथाप्यन्यप्रेरणया दण्डं माकुर्यादिति भीतः सन् शीघ्रं गमनं प्रार्थयन् पुनर्विज्ञापयति । प्रपन्नोऽस्मीति । पुनःशरणागतः शरणागतस्य सर्वे अपराधा निवृत्ता भवन्तीति महायोगिन्निति तव नैते पित्रादयः किंत्वतियोगेन तथा विडम्बयसीति केऽपि त्वां न जानन्तीति श्लाघयितुं महायोगित्वमुक्तं किं च अल्प एव हि क्षुद्रस्यापराधं मन्यते त्वन्तु महापुरुषः सतांपतिः सन्तो हि तितिक्षवः तेषां पतिः सुतराम् अतः सर्वप्रकारेण मदपराधसहनं युक्तमिति भावः । अत एव मामनुजानीहि सेवकत्वेन जानीहि देवेति संबोधनात् देवयोनिविद्याधरपक्षपातो युक्तः नतु मानुषपक्षपात इति ननु मदनुज्ञापितोऽपि कथं यमादिभिर्न पीडितो भविष्यसि कालादयो हि मद्भक्तापराधे दण्डं करिष्यन्त्येवेतिचेत्तत्राह । सर्वलोकानां ये ईश्वराः तेषामपि त्वमीश्वर इति अतस्त्वत्कृपायां जातायां न कापि चिन्ता भविष्यतीति भावः ॥ १६ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

प्रलब्धैरुपहासितैर्मदीयेनैव पापेन निमित्तेन ॥ १३ ॥

यत् यतः शापात् ॥ १४ ॥

आपृच्छे स्वलोकं गन्तुमनुज्ञां याचे । अमीवहन् । हे दुःखहन्तः ! ॥ १५ ॥

हे महायोगिन् ? काहमधुनैव महाखलसर्पस्त्वत्पितरमग्रसम । काहमकस्मादधुनैव ॥ लब्धसद्विवेकस्त्वां स्तौमीत्यचिन्त्यम् तव योगैश्वर्यमिति भावः । महापुरुषाणां श्रीमन्नन्दादीनां सतां साधूनां पते इति सर्पदेहान्माममोचयः स्वीयानेतांश्चापालय इत्यपारं तव कृपावैभवमिति भावः । अनु अनुचरमेव मां जानीहि ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

विरूपान् तापसत्वात् सौन्दर्यमदेन मत्तः प्राहसमुपहासितवानस्मि तैः प्रलब्धैरुपहासितैर्मदीयेनैव पापेन निमित्तेन इमामाजगरीं योनिं प्रापितोऽस्मि ॥ १३ ॥

यत् यस्मात् लोकगुरुणा भवता पादस्पृष्टः चरणेन स्पृष्टोऽस्मि ॥ १४ ॥

हे अमीवहन् दुःखघ्न ! पादस्पर्शात् शापनिर्मुक्तः दर्शनात्प्रणामाच्च कृतार्थ एवेति भावः । आपृच्छे भवत्परिचर्यां कर्तुं स्वलोकं गन्तुं वा ब्रूहीत्यर्थः ॥ १५—१६ ॥

भाषा टीका ।

मैं अपने रूपसे गर्वित था तब अंगिरागोत्र वाले ऋषिन को कुरूप देखकर मैंने हंसी करी तब तिनके तिरस्कार करने से अपने पाप से मेरेको उनने इस योनिको प्राप्त कर दिया ॥ १३ ॥

वे ऋषि वडे कृपालु थे उनने मेरे अनुग्रह के वास्ते शाप दिया जिससे कि मेरे को लोक गुरु भगवान् ने पादसे स्पर्श किया तो मेरे सब पाप छूट गये ॥ १४ ॥

यन्नाम गृह्णन्नखिलान् श्रोतॄनात्मानमेव च ।
सद्यः पुनाति किं भूयस्तस्य स्पृष्टः पदा हि ते ॥ १७ ॥
इत्यनुज्ञाप्य दाशार्हं परिक्रम्याभिवन्द्य च ।
सुदर्शनो दिवं यातः कृच्छ्रान्नन्दश्च मोचितः ॥ १८ ॥
निशाम्य कृष्णस्य तदात्मवैभवं व्रजौकसो विस्मितचेतसस्ततः ।
समाप्य तस्मिन्नियमं पुनर्व्रजं नृपाययुस्तत्कथयन्त आदृताः ॥ १९ ॥
कदाचिदथ गोविन्दो रामश्चाद्भुतविक्रमः ।
विजह्रतुर्वने रात्र्यां मध्यगौ व्रजयोषिताम् ॥ २० ॥

भाषा टीका ।

अब हे पापनाशक आपके पाद स्पर्श होने से मैं पापसे छूट गया आप संसार से भीत तथा शरणागत पुरुषों के भयके नाशकरने वाले हो आपसे मैं आज्ञा मांगता हूं ॥ १५ ॥

हे महायोगि महापुरुष ! सत्पति हे सर्व लोकेश्वरेश्वर ! देव मैं आप के शरण हूं मेरे को आज्ञा दीजिये हे अच्युत आपके दर्शन होने से शीघ्र ही मैं ब्रह्म दंड से छूट गया ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अहिदेहं निहत्यैवं प्रागुन्मत्तं सुदर्शनम् ।
तद्वदुन्मादिनं कृष्णः शङ्खचूडमताडयत् ॥
तत्प्रसङ्गमाह । कदाचिदिति ॥ २० ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

त्वन्माहात्म्यं त्वाधुना मयैव विशेषतोऽनुभूतमित्याह । ब्रह्मेत्यर्द्धकेन दर्शनमात्रेण सर्पाकाराध्यासो गतः चरणस्पर्शेन तु सर्पाकारतैव विद्याधराकारतां प्रापेति भावः । विनिर्मुक्तमिति श्रीचित्सुखसम्मतः पाठः । तत्र पूर्वेणान्वयः किञ्च त्वत्पादाब्जेन साक्षात् स्पृष्टोऽहं स्वलोकवर्त्तिनोऽन्यान् गत्वा स्वस्पर्शेन कृतार्थयिष्यामि किमुतात्मानमित्याशयेनाह । यन्नामेति । नामैकमपि गृह्णन् उच्चारयन्नपीति श्रद्धाद्यपेक्षा निरस्ता गृह्णन्निति वर्त्तमानत्वेन सम्पूर्णत्वापेक्षा अखिलानिति अधिकाराद्यपेक्षा सद्य इति कालापेक्षा च । श्रोतॄनिति केवलश्रवणप्राप्तिरेवाभिप्रेता । इवार्थे एव आत्मानमिवेति दृष्टान्तत्वेन श्रवणकीर्त्तनयो रविशेषोक्त्या माहात्म्यविशेषः सूचितः । चकारेण तत्तत्सम्बन्धिनोऽपि तस्य पदा स्पृष्टः सन् भूयोऽधिकं यथा स्यात्तथा सर्वानेव तान् हि निश्चितं पुनातीति किं वक्तव्यमित्यर्थः ॥ १७ ॥

अनुज्ञाप्य मौनं सम्मतिलक्षणमिति न्यायेन पादस्पर्शप्रभावमात्रतः सर्पकवलशैथिल्यापादनेन कृच्छ्रादपादानात् श्रीनन्दश्च मोचितः श्रीकृष्णेनेति पूर्वसूचितार्थ एवात्र स्पष्टीक्रियते उभयोरपि मङ्गलं कृतमिति बोधनाय अत एव चशब्दश्च । तममोचयित्वा विद्याधरेण सङ्कथनं न युक्तमिति ॥ १८ ॥

आत्मवैभवं स्वरूपवैभवं कुतोऽपि विद्यादि प्राप्त्यैव नरलोकात् । विस्मये हेतुः व्रजौकसः तत्प्रेमभरविवशतया मुहुर्दृष्टमपि तादृशत्वमनुसन्धातुमशक्या इत्यर्थः । नियमं शिवरात्रतीर्थवासात्मकम् ॥ १९ ॥

अथ क्रमप्राप्तं देवयोनिमुक्तिदानरूपत्वेनात्मीयरक्षारूपत्वेन च पूर्वलीलासदृशं पूर्वविवक्षितं लीलान्तरमाह । कदाचिदित्यादिना यावत् समाप्ति । अथ तच्छिवरात्र्यनन्तरं कदाचित् होलिकापूर्णिमायाम् । गोविन्दः श्रीगोकुलयुवराजः । रमयति क्रीडयति कृष्णमिति राम इति निरुक्त्या तदानीं सख्यांशस्यैवोदयो ध्वनितः जन्मारभ्य सह विहारात् । वाक्यावशेषाच्च । व्रजे तदंशस्यैव प्राचुर्यदर्शनं राजधान्यामेवाग्रजत्वांशस्येति । अत्रास्य गौणता विवक्षया पश्चान्निर्देशश्चकारात् तदुपलक्षितत्वेन सखायोऽपि ज्ञेयाः मध्यदेशादौ तथैव होरिकाक्रीडाव्यवहारात् । भविष्योत्तरशास्त्राच्च । राजसूयावभृथे चेत्थमेव क्रीडा वर्णयिष्यते । वने व्रजसन्निहिते इति ज्ञेयम् । अद्भुतः अलौकिकः विक्रमः प्रभावो यस्य स इति द्वयोरपि विशेषणम् ॥ २० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एतदेव कैमुत्यनयेन स्पष्टयति । यदिति । यस्य तव नाममात्रमेव गृह्णन्नुच्चरन् पुमानात्मानं श्रोतॄंश्च सर्वान् जनान् सद्यः पुनाति किंपुनः साक्षात्तादृशप्रभाववन्नाम्नस्तव पदा संस्पृष्टः शापाद्विमुक्त इति कियदेतदित्यर्थः ॥ १७ ॥

इत्थमनुज्ञाप्यानुज्ञां गृहीत्वा दाशार्हं कृष्णं प्रदक्षिणीकृत्याभिवाद्य च सुदर्शनः स्वर्गं प्रतिययौ नन्दोऽपि कृच्छ्रात्सर्पग्रासान्मोचितः ॥ १८ ॥

ततो व्रजौकसो गोपाः कृष्णस्य तदात्मवैभवमनितरसाधारणं प्रभावं निशाम्य दृष्ट्वा विस्मितं चेतो येषां तथा भूताः तस्मिन्नम्बिकावने

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

नियमं व्रतं समाप्यादरयुक्ताः कृष्णस्यात्मवैभवमेव कथयन्तो हे नृप ! पुनर्व्रजं प्रत्याजग्मुः ॥ १९ ॥

अथ शङ्खचूडवधतच्छिरोमण्यपहारात्मकं कर्म प्रस्तौति । कदाचिदित्यादिना यावत्समाप्ति । अद्भुतविक्रम इति रामकृष्णयोरुभयोरपि विशेषणम् तावुभौ वने गवां व्रजस्त्रीणां च मध्ये विजह्रतुः ॥ २० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

चात्तं स्तुत्वा दाशार्हं कृष्णम् ॥ १८ ॥

निशाम्य दृष्ट्वा ॥ १९—२० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

कदाचित् होरिकापूर्णिमायां रामश्चेत्युपलक्षणं सखायश्च । तथैव मध्यदेशाचारात् भविष्योत्तरपुराणाच्च । अत एव सम्प्रमत्तवदित्यत्रापि न दोषः ॥ २० ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

नन्वहमुदासीनः सर्वत्र न मे द्वेष्योऽस्ति न प्रिय इति अतोऽनिषिद्धाचरणे कालाद्यो बाधका एवेति चेत्तत्राह । ब्रह्मदण्डादिति । भगवद्दर्शनादेव ब्रह्मदण्डाद्विमोचः प्रत्यक्षसिद्धः यद्यपि त्वमुदासीनः तथापि त्वद्धर्मा नोदासीनाः अन्यथा ते दर्शनादेव ब्रह्मदण्डाद्विमोक्षो न स्यात् तत्रापि सद्यः तत्रापि दर्शनादेव अच्युतेति संबोधनान्न भगवद्धर्माणां कादाचित्कत्वं तेन ये निवर्तितास्ते निवर्तिता एव ननु यावदुपयोगमेव निवर्तितां कथं सर्वानिष्टनिवृत्तिरिति चेत्तत्राह । यन्नामेति । मम सर्वपापनिवृत्तौ न संदेहः यस्य नामग्रहणमात्रेणैव श्रोतॄनात्मानञ्च निष्पापान् करोति तत्रापि नाधिकारिविशेषः किंतु सर्वानेव एवेत्यनेन आत्मशब्दः जीवपरो ज्ञायते न केवलं दैहिका दोषा निवर्त्तन्ते किंत्वज्ञानप्रभृतिसर्वमेव निवर्तते चकारात् श्रोतॄणामपि तथा समुच्चयार्थः सद्यः शुद्धिरिति शुद्धिहेतूनां देशादीनां निरपेक्षतामाह तत्रापि भूयो वारंवारमुच्चारयन् पुनातीति किं वक्तव्यं यत्र नाम्न एवैतादृशं माहात्म्यं तस्य स्वरूपमाहात्म्यं किंवक्तव्यमित्याह । तस्य पदा स्पृष्ट इति पादस्पर्शः सुतरां दुर्लभः तत्रापि भगवत्कर्तृकः तत्रापि चरणकर्तृकः यतश्चरणे तादृशो रेणुः गङ्गादितीर्थानि अमृतरसः भक्ता इति सर्वसान्निध्याद्युक्तमेव सर्वदोषनिवर्तकत्वमित्यर्थः ॥ तत्रापि तस्य ते सर्वदोषनिवारणार्थमेवावतीर्णस्य ॥ १७ ॥

भगवतो वक्तव्याभावात्तूष्णींभावेऽप्यङ्गीकारस्य सिद्धत्वात् भगवन्तमनुज्ञाप्य स्वयमेव गत इत्याह । इत्यनुज्ञाप्येति । यतो दाशार्हः सेव्यः एतज्जाव एव स्वामी सेव्यो भवतीति सर्वपुरुषार्थसिद्ध्यर्थं साधनमपि कृतवानित्याह । परिक्रम्येति । परिक्रम्य प्रदक्षिणीकृत्य सर्वपुरुषार्थास्तेन वेष्टिता इति तत्सिद्धिः स्वाधीना अभिवादनेन स्वतन्त्रतया स्वोपार्जनत्वेन पुरुषार्थानामत्याधिक्यं सूचितं चकारात्स्तुत्वा भगवता चानुज्ञातः तथेत्युक्तो वा यं यथा मां प्रपद्यन्ते इति न्यायेन सर्वपुरुषार्थांस्तस्मै दत्तवानिति वा अतः सुदर्शननामत्वाच्च दिवं यातः विद्याधरलोकमेव गतः कृच्छ्रात् सर्वदोषात् यतो मोचितः नन्दश्च तथा कृच्छ्रान्मोचितः चकाराद्वैभवञ्च ज्ञातवान् ॥ १८ ॥

ततस्ते गोपाः सर्वथा भगवत्परायणा जाता इत्याह । निशाम्येति । कृष्णस्य तद्वैभवं निशाम्य ज्ञात्वा सर्व एव व्रजौकसः विस्मितचेतसो जाताः अलौकिकसामर्थ्यस्य प्रकटितत्वात् नात्र कृतिसाध्यं किंचित् येन पूर्वेण गतार्थता स्यात् अयंत्वनुभावरूपो वैभवः अन्यथा पादस्पर्शः अलातहननोपेक्षयातिसूक्ष्मत्वाच्च तेन कथं कार्यं स्यात् कृष्णस्येति परमानन्दः स्वानुभवसिद्ध इतिधर्म्युत्कर्षः आत्मन एवायं वैभवो नतु शक्तेः अनेन स्वरूपमेव तथाविधमङ्गीकर्त्तव्यं यत्र क्रियाज्ञानादीनामभावः व्रजौकस इति दृष्टप्रत्यय एवातिभरः अत्यन्तविश्वसिताः अतः क्रियया विस्मिता अपि पुनरनुभावेनापि विस्मितचेतसो जाताः ततः तस्मिन् भगवति नियमं समाप्य पुनर्व्रजं ययुः तत्समारब्धं कर्म कृष्ण एव निवेदितवन्तः अन्यथा तेन बन्धः स्यात् पुनर्व्रजमेव ययुः तत्रैव सर्वा सिद्धिरिति मनसाप्यन्यत्र गमनेच्छां न कृतवन्तः नृपेति सम्बोधनं विश्वासार्थं दृष्टे हि राज्ञां विश्वास इति आदृताः सन्तः तदेव कथयन्त इति चित्ते भगवदनुभावाभिनिवेश उक्तः ॥ १९ ॥

एवमनन्यभजनार्थं भगवदनुभावं निरूप्य शब्दब्रह्मानन्दं गोपिकाद्वारा सर्वेषु पूरयितुं पुनर्गोपिकाभिः सह शब्दात्मकेन बलभद्रेणापि सह क्रीडां निरूपयति । कदाचिदिति त्रयोदशभिः । इयं लीला कालप्रधाना अतोऽत्र दैत्यानां बाधकत्वं बाधने भगवत्सामर्थ्येन तन्निराकरणे कृते शब्दस्यैव माहात्म्यं निरूपितं भवतीति मणिदानमग्रजायैव लौकिकालौकिकमाहात्म्ये ज्ञात एव वेदानां स्वतः प्रामाण्यं सिद्ध्यति अन्यथा भ्रान्तमीमांसकानामिव सर्वो वेद उत्प्रेक्षापरः स्यात् कदाचिद्रात्रिकाले अथ भिन्नोपक्रमेण पूर्वोक्तगोपिकाव्यतिरिक्ताभिः सह क्रीडायाः पूर्वं शास्त्रपरा लौकिकधर्मपराश्च स्थितास्तासामप्यनुभावदर्शनात् सर्वस्यापि तदधीनत्वज्ञानात् भगवता बलभद्रेण च सह रमणार्थमिच्छा जाता भगवांश्च गोविन्द इति तासामपीन्द्र इति क्रियाशक्तिप्रधानो रमे रामश्च तेनापि सह रमणे चित्तप्रसादार्थमद्भुतो विक्रमः पराक्रमो यस्येत्युक्तं चकारस्त्वावेशसमुच्चयार्थः अनेन मध्यमाधिकारिणां वेदपरत्वं न दोषायेति निरूपितम् अन्यथा प्रमाणपराणामनन्यभावो भज्येत अद्भुतः पराक्रम इति केवलार्थपराणामेतस्योपयोगः सूचितः अन्यथेतरनिराकरणं स्वार्थनिरूपणञ्चेति भगवति वेदे वा द्विगुणावृत्तिः स्यात् अर्थवदेव शब्दस्यापि लीलेति वने रात्र्यामित्युक्तम् उभावपि विजह्रतुः उभयो रमणार्थं पूर्वगोपिकापेक्षया हीना इति गोव्रजयोषितां मध्य इति उक्तं गोप्राधान्यो व्रजः तत्संबन्धिन्यो योषित इति ॥ २० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

दर्शनादेव विमुक्तः किमुत पदा स्पृष्टः । नामैकमपि गृह्णन् यः कोऽपि किमुताहं दर्शनस्पर्शवानपि ॥ १७—१८ ॥

विस्मितचेतस इति । अहो यो ऽयमस्माकं बाल्य एवास्मान्

उपगीयमानौ ललितं स्त्रीजनैर्बद्धसौहृदैः ।
स्वलंकृतानुलिप्ताङ्गौस्रग्विणौ विरजोऽम्बरौ ॥ २१ ॥
निशामुखं मानयन्तावुदितोडुपतारकम् ।
मल्लिकागन्धमत्तालिजुष्टं कुमुदवायुना ॥ २२ ॥
जगतुः सर्वभूतानां मनःश्रवणमङ्गलम् ।
तौ कल्पयन्तौ युगपत्स्वरमण्डलमूर्च्छितम् ॥ २३ ॥
गोप्यस्तद्गीतमाकर्ण्य मूर्च्छिता नाविदन्नृप ! ।
स्रंसद्दुकूलमात्मानं स्रस्तकेशस्रजं ततः ॥ २४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

विना क्षणमात्रमपि न निर्वृणोति स एव कृष्णः किं परमेश्वर एवञ्चेदेतत्पित्रादयो वयमपि महापुरुषा एव भवामेति धन्यो गर्गमुनिर्येन प्रथमत एवास्य नारायणसाम्यमुक्तम् । तथैव वरुणस्यास्य च विद्याधरस्य मुखादश्रौष्मेति भावः ॥ १९ ॥

कदाचिच्छिवरात्रिव्रतानन्तरं रात्र्यां चन्द्रिकाबहुलायाम् । व्रजयोषितां मध्यगाविति होलिका क्रीडायां तथैव व्यवहार इति वैष्णवतोषिणी ॥ २०—२१ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

ब्रह्मदण्डात् विमुक्तः पादस्पर्शात् दर्शनात् सर्वथा कृतार्थ एवेति शेषः ॥ १७ ॥

इत्येवमनुज्ञाप्य आज्ञां कृष्णात्पृष्ट्वा तेनाप्यक्षिसङ्कोचेनैव तल्लोकं प्रत्याज्ञापितः दाशार्हं कृष्णं परिक्रम्य दिवं यातः ययौ ॥ १८–२० ॥

भाषा टीका ।

जिन आपके नाम लेने से मनुष्य और सबों को तथा अपने को शीघ्रही पवित्र कर सकता है तिन आपने जब पाद से मेरे को स्पर्श किया तो फिर क्या कहना है ॥१७॥

इस प्रकार से दाशार्ह भगवान् से आज्ञा मांगकर प्रणाम कर प्रदक्षिणा करके सुदर्शन विद्याधर स्वर्ग लोक को चला गया नंदजी भी कष्ट से छुडाये गये ॥ १८ ॥

कृष्ण भगवान् के इस वैभवको देखकर ब्रजवासी सब के चित्त विस्मय युक्त होगये फिर उस तीर्थ में नियम को समाप्त करके और आदर युक्त होकर उस कथा को कहते हुये ब्रजकी चले आये ॥ १९ ॥

इसके अनंतर कोइ दिन श्रीबलरामजी तथा कृष्णचंद्रजी अद्भुत पराक्रम वाले होने से ब्रज स्त्रियों के मध्य में वन में जाकर रात्रि में विहार करते भये ॥ २० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

विरजोऽम्बराविति विरजसी निर्मले अम्बरे ययोस्तौ ॥ २१ ॥

किञ्च निशाप्रवेशं सत्कुर्वन्तौ उदित उडुपस्तारकाश्च यस्मिस्तत् मल्लिकागन्धेन मत्ता अळयो यस्मिंस्तत् ॥ २२ ॥

अनिबद्धत्वादन्यैर्युगपत्कल्पयितुमशक्यमपि तौ स्वरमण्डलस्य मूर्च्छितं युगपत्कल्पयन्तौ मनःश्रवणयोर्मङ्गलं यथा भवति तथा जगतुरगायतामिति ॥ २३ ॥

मूर्च्छितास्तद्गीतलीनचित्ताः स्रंसच्च्यवद्दुकूलं यस्मात्तमात्मानं देहम् स्रस्ताः केशेभ्यः स्रजो यस्य तञ्च ततो नाविदन् ॥ २४—२५ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

विहारमेवाह । उपेति त्रिकेण । ललितं गाननर्मादिपरिपाटीभिर्मनोहरं यथा स्यात्तथा उपगीयमानौ होरिकोचितगीतिभिर्वर्ण्यमानौ । तत्र हेतुः बद्धं सौहृदं यैरिति । एतेन श्रीरामस्यापि पृथक् प्रेयसीगणो लक्ष्यते । तद्व्यञ्जितं गोप्यन्तरेण भुजयोरपि यत् स्पृहा श्रीरिति । अत एव गोप्यस्तद्गीतमाकर्ण्येति द्वयोरपि गीतस्य तादृशमोहहेतुत्वं वक्ष्यते । सर्वमेलनन्तु होरिकावसरसंघर्षादिति ज्ञेयम् अतो मिथोऽननुसन्धानमपि ॥ २१

उदितेति । शिशिरान्ते हिमकुज्झटिकापगमादतिशयेन प्राकट्यात् । मल्लिकेति वसन्तप्रवेशात् ॥ २२ ॥

मङ्गलं सुखावहम् । स्वराणां मण्डलं समूहस्तस्य मूर्च्छना तल्लक्षणं चोक्तं सङ्गीतसारे । "क्रमात् स्वराणां सप्तानामारोहश्चावरोहणम् । मूर्च्छनेत्युच्यते ग्रामत्रये ता एकविंशति" रिति ॥२३॥

गोप्यो यथास्वं तयोः प्रेयस्यः । तद्गीतं तयोर्गीतम् आकर्ण्य मूर्च्छिता बभूवुः । ततो हेतोः आत्मानं न स्रंसद्दुकूलमविदन् नच स्रस्तकेशस्रजमविदन् नाविदुरित्यर्थः ॥ २४ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

श्रवणमङ्गलं श्रवणसुखावहम् ॥ २३ ॥

आत्मानं नाविदन्नित्यन्वयः ॥ २४—२८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

कथम्भूतौ बद्धं निश्चलं सौहृदं येषां तैः स्त्रीजनैर्ललितं यथा तथा उपगीयमानौ स्वलंकृतावनुलिप्तानि चाङ्गानि ययोः स्रजावनयोःस्त इति तथाभूतौ विरजसी निर्मले अम्बरे वाससी ययोस्तौ ॥ २१ ॥

पुनरपि तयोरेव वर्णनश्लोकाः । निशेति । उदित उडुपश्चन्द्रस्तारकाश्च यस्मिंस्तन्मल्लिकानां गन्धेन मत्तैरलिभिर्जुष्टं सेवितं स्वहचरितमित्यर्थः । कुमुदगन्धयुक्तेनच वायुना जुष्टं निशामुखं प्रशंसन्तौ ॥ २२ ॥

तौ रामकृष्णौ अनिबद्धत्वादन्यैर्युगपत्कल्पयितुमशक्यमपि स्वरमण्डलस्य मूर्च्छितं युगपत्कल्पयन्तौ मनःश्रवणयोः मङ्गलं यथा तथा जगतुर्गीतवन्तौ स्वरमण्डलमूर्च्छनं षड्जादिस्वरसमुदायस्य मूर्च्छनमारोहणावरोहणप्रकारः ॥ २३ ॥

गोप्य इति । तयोर्गीतमाकर्ण्य मूर्च्छिताः परवशाः ततो हे नृप ! आत्मानं देहं न विदुर्नानुसन्दधुः कथम्भूतं स्रंसद्भ्रंश्यत् दुकूलं यस्मात्स्रस्ताः केशेभ्यः स्रजो यस्य तञ्च तञ्च ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

विरजाम्बरौ धौतवस्त्रौ ॥ २१ ॥

मल्लिकागन्धास्वादनेन मत्ता अलिनो भ्रमराः यस्मिन् मल्लिकागन्धमत्तालि ॥ २२ ॥

जगतुः गानं कृतवन्तौ कथंकारमिति तत्राह । ताविति स्वरमण्डलमूर्च्छनां सप्तानां स्वराणां मण्डलानां समूहानां मूर्च्छनामेकविंशतिलक्षणां कल्पयन्तौ युगपदेकस्मिन् क्षणे यद्वा मण्डलमावृत्तिलक्षणं सप्तस्वरास्त्रयो ग्रामाः एकविंशतिमूर्च्छना इति भरतः ॥ २३—२५ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

बद्धसौहृदैरिति । श्रीरामस्यापि पृथक् प्रेयसीगणो लक्ष्यते । सर्वमेलनन्तु होरिकापर्वत एव ॥ २१—२६ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

तत्र शब्दप्राधान्यं निरूपयितुमाह । उपगीयमानौ ललितमिति । सर्वाः स्त्रियः अन्तःस्नेहसंबद्धाः भगवतो गुणगानपराः जाताः तासामाभ्यन्तरो बाह्यश्च भावो निरूपितः एवं युक्ताभिः सहस्वस्य सर्वोत्कृष्टस्यैव भावो युक्त इति उभयोः षड्गुणान् निरूपयति । अलंकृतेति सार्धैस्त्रिभिः । आदावलंकृतौ सर्वाभरणभूषितौ शब्दे शिक्षादयः अर्थे देशादयश्चोत्कृष्टालंकाराः तदभावे तत्र रतिर्न स्यात् ततः अनुलिप्ताङ्गौ चन्दनादिभिः सद्वासनाव्यतिरेकेणोभयत्रापि रतिर्न स्यादिति अङ्गेष्वपि सर्वेषु सद्वासनार्थमङ्गपदम् । स्रग्विणौ मालायुक्तौ कीर्त्तिरपि सहायत्वेनोभयत्राप्यपेक्ष्यत इति विरजे अम्बरे ययोरिति सर्वदोषाभावः शुद्धा माया चापेक्ष्यत इति॥२१॥

कर्मणां रात्रिरेव प्रधानमिति सन्ध्यायामेव सन्ध्याग्निहोत्रादिकमिति निशामुखस्य सन्माननं तं कालं गुणवन्तं वर्णयति प्रकृतोपयोगाय । उदितोडुपतारकमित्यादिना । उदितः उडुपः ताराश्च यस्मिन् चन्द्रोदयः पर्वसूचकः नक्षत्रोदयो मेघाभावसूचकः प्रमाणं चन्द्रः फलं नक्षत्राणीत्यपि पुण्यो वायुः फलसूचक इति तं वर्णयति । कुमुदवायुर्न जुष्टमिति । कुमुदसम्बन्धी वायुः शीतलो मन्दश्च भवति निशामुखस्य विशेषणम् उत्तमाधिकारिभिरपि सेवितमित्याह । मल्लिकागन्धमत्तालिजुष्टमिति मल्लिकागन्धशोभनवासनारूपः तेनच मत्ताः इतरविस्मारकाः तादृशाः अळयः षट्पदत्वात् सर्वज्ञाः तैः सेवितमिति एवं त्रिधा काल उत्तमो निरूपितः तादृशं कालं मानयन्तौ समीचीनोऽयमिति स्तुवन्तौ अनेनाङ्गेऽपि फलश्रुतिर्युक्तेति निरूपितम् ॥ २२ ॥

तद्वा सर्वप्राणिनामेव मनःश्रवणयोः मङ्गळं जगतुः गानं कृतवन्तौ पर्यवसानोत्तमत्वात् मनोमङ्गलं स्वरूपोत्तमत्वात् श्रवणमङ्गलमिति तत्र गाने विशेषमाह । तौ कल्पयन्ताविति । युगपदेव स्वरमण्डलस्य स्वरसमूहस्य मूर्च्छितं मूर्च्छनां कल्पयन्तौ इति द्वयोरेकमुखता निरूपिता मूर्च्छनाव्यतिरेकेण न मनोलीनं भवति । लयव्यतिरेकेण च सर्वात्मना तत्परता न भवतीति तथा करणम् ॥ २३ ॥

ततः तस्य फळमपि जातमित्याह । गोप्य इति । तयोर्गीतं तादृशमाकर्ण्य मूर्च्छिताः सत्य आत्मानं नाविदन् मूर्च्छायामपि वासना तिष्ठतीति नाविदन्निति तदभावायोक्तं नृपेति संबोधनं गीतरसाभिज्ञत्वाय यो भावः सर्वथा न विस्मृतो भवति तं वर्णयति। स्रंसद्दुकूलमिति । दुकूलमधोवस्त्रं तदप्यधःपततीव स्रस्ताः केशाः तेषु स्रजश्च यासां देहे अतिविस्मरणं निरूपितम् ॥ २४ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

निशामुखं निशारम्भं सत्कुर्वन्तौ । उदित उडुपस्तारका च यत्र तत् । कुमुदवायुना युक्तं युगपदेकदैव स्वरमण्डलानां मूर्च्छितं मूर्च्छनामनिबद्धत्वात् कल्पयितुमशक्यमपि शक्यमिव कल्पयन्तौ ॥ २२ ॥ २३ ॥

गोप्यः यथास्वं तयोः प्रेयस्यः । आत्मानं देहं स्रंसद्दुकूलं स्रस्ताः केशेभ्यः स्रजो यस्य तं नाविदन् नानुसन्दधुः ॥ २४ ॥ २५ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

विरजसी अम्बरे ययोस्तौ विरजोऽम्बरौ विजह्रतुरिति पूर्वेणान्वयः ॥ २१ ॥

किञ्च उदितः उडुपस्तारकाश्च यस्मिंस्तत् मल्लिकागन्धेन मत्ता अळयो यस्मिंस्तत् कुमुदगन्धयुक्तेन वायुना जुष्टम् एवं भूतं निशामुखं रात्रिप्रवेशं मानयन्तौ सत्कुर्वन्तौ ॥ २२ ॥

स्वरमण्डलमूर्च्छितं षड्जादिस्वरमण्डलमूर्च्छितम् युगपत्कल्पयन्तौ अनिबद्धत्वात् अन्यैर्युगपत्कल्पयितुमशक्यमपि युगपत्समर्थयन्तौ मनः श्रवणयोर्मङ्गलं यथा भवति तथा जगतुः अगायताम् ॥ २३ ॥

एवं विक्रीडतोः स्वैरं गायतोः संप्रमत्तवत् ।
शङ्खचूड इति ख्यातो धनदानुचरोऽभ्यगात् ॥ २५ ॥
तयोर्निरीक्षतो राजंस्तन्नाथं प्रमदाजनम् ।
क्रोशन्तं कालयामास दिश्युदीच्यामशङ्कितः ॥ २६ ॥
क्रोशन्तं कृष्णरामेति विलोक्य स्वपरिग्रहम् ।
यथा गा दस्युना ग्रस्ता भ्रातरावन्वधावताम् ॥ २७ ॥
माभैष्टेत्यभयारावौ शालहस्तौ तरस्विनौ ।
आसेदतुस्तं तरसा त्वरितं गुह्यकाधमम् ॥ २८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

हे नृप ! गोप्यः तत्तयोर्गीतमाकर्ण्य मूर्च्छिताः गीताकृष्टचित्ताः ततः स्रंसत् भ्रश्यत् दुकूलं यस्मात् स्रस्ताः केशेभ्यः स्रजा यस्य तमात्मानं देहं नाविदन् ॥ २४—२५ ॥

भाषा टीका ।

स्त्रीजनों के साथ मे अत्यन्त स्नेह को बांधकर मनोहर स्वरों को गान करते सुन्दर अलंकारों को पहर कर चन्दन लगा कर माला पहर कर निर्मळ वस्त्रों को पहर कर विहार करते भये ॥ २१ ॥

तारा तथा चन्द्रमा का जिस मे उदय है ऐसी रात्रि के आरम्भ की वडी प्रसंशा करते भये जिस मे कि मल्लिका पुष्पों के गन्ध से भ्रमर मतवाले होरहे हैं और कुमोदिनी के गन्ध वाला वायु जिस मे चल रहा है ॥ २२ ॥

वे राम कृष्ण दोनों एक साथ मे सात स्वर तथा तीन मण्डल तथा उतार चढाव रूप मूर्छना वाले सर्व भूतों के मन तथा श्रवणों के मङ्गळ कारक गीत को गान करते भये ॥ २३ ॥

हे नृप ! उस गीत को श्रवण करने से गोपी सब मूर्छित होगई उनने शरीर से गिरते हुये माला वस्त्र केशों को खुल ते नहीं जाना अपने स्वरूप को भूलगई ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

निरीक्षतोर्निरीक्षमाणयोः तौ नाथौ यस्य तं प्रमदाजनं कालयामास हठात्प्रेरयामास ॥ २६ ॥
दस्युना व्याघ्रेण ॥ २७ ॥
माभैष्ट भयं न प्राप्नुतेत्यभयवाचौ ॥ २८—३० ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

एवमिति । होरिकोचितमेवं विक्रीडतोर्गायतोश्च । अत एव स्वैरं यथा स्यात्तथा सम्प्रमत्तवच्चेति । भविष्योत्तरविधिना तथा लोकव्यवहारात् । वतिप्रत्ययादन्यो जनो यथा तथैवेत्यर्थः । संशब्दात्तु प्रेममय तद्गीतादि माधुर्येण तत्रापि विशेषत इत्यर्थः । अभ्ययादभ्यगादिति पाठद्वयम ॥ २५ ॥

आभियानादेव निरीक्षमाणयोः अनादरे षष्ठी यतोऽशङ्कितः । उदीच्यां दिशीति गुह्यकानां तस्यां निवासेन एवं तासां पृथक् पङ्क्ति स्थितत्वावगमाद्धोरिकारीतिरेव स्पष्टा ॥ २६ ॥

स्वपरिग्रहं नित्यात्मीयत्वेनाङ्गीकृतमित्यवश्यरक्ष्यत्वं तदर्थं परमवैयग्र्यादिकञ्च ध्वनितम् । भ्रातराविति मिथः स्नेहादिना तत्रैकमत्यादिकं सूचितम् । एकेनानेकासां कालेन तत्पालकानां व्यग्रत्वेन दृष्टान्तः यथा दस्युना हठादपहरता चोरेण ग्रस्ता विद्राव्यात्मसात् कृता । गा विलोक्य गोपी धावन्ति तद्वदित्यर्थः । एतेनास्पर्शोऽपि व्यञ्जितः ॥ २७ ॥

तरसा जवेन त्वरितं यथा स्यात्तथा । यद्वा । त्वरा युक्तं गुह्यकाधमम् आसेदतुर्निकटे गतौ ॥ २८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं स्वैरं यथेष्टं सम्प्रमत्तवद्रामकृष्णयोर्विहरतोर्गायतोश्च कुवेरस्यानुचरः शङ्खचूडाख्य आजगाम ॥ २५ ॥

सच शङ्कारहितः तयो रामकृष्णयोर्निरीक्षमाणयोः सतोः तावेव रामकृष्णौ नाथौ यस्य तं स्त्रीजनम् उदीच्यां दिशि कालयामास हठात्प्रेरयामास ततस्ततो निःसारयामासेत्यर्थः ॥ २६ ॥
कथम्भूतं क्रोशन्तं हे कृष्ण हे रामेति सरोदनमाह्वयन्तं तदेवं दस्युना ग्रस्ता गाव इव व्याघ्रेण गृहीता गाव इव क्रोशन्तं तेनोदीच्यां दिशं प्रति कृष्यमाणं स्वपरिग्रहं स्वपरिगृहीतं स्त्रीजनमवलोक्य भ्रातरौ श्रीकृष्णरामावन्वधावताम् ॥ २७ ॥

शाळा वृक्षौ हस्तयोर्ययोस्तौ भयं मा कार्ष्टेत्येवम्विधो रावः शब्दः ययोस्तथाभूतौ महावलिनौ रामकृष्णौ त्वरितं यथा गुह्यकाधमं शङ्खचूडमासेदतुः ॥ २८ ॥

स वीक्ष्य तावनुप्राप्तौ कालमृत्यू इवोद्विजन् ॥
विसृज्य स्त्रीजनं मूढः प्राद्रवज्जीवितेच्छया ॥ २९ ॥
तमन्वधावद्गोविन्दो यत्र यत्र स धावति ॥
जिहीर्षुस्तच्छिरोरत्नं तस्थौ रक्षन् स्त्रियो बलः ॥ ३० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

तौ नाथौ यस्य स तन्नाथः कालनं द्रावणम् ॥ २६ ॥

स्वपरिग्रहं स्वस्त्रीजनं दस्युना व्याघ्रेण ग्रस्ताः क्रोशन्तीः गा यथा तथा क्रोशन्तं विलोक्य "दस्युतस्करशार्दूलैर्हृतारौ गां नृहिंसकाविति च ॥ २७ ॥

माभैष्ट भीता माभवन्त्वित्यभयवाक्ययुक्तौ तालोगीताङ्गवाद्यविशेषः यद्वा तालस्तृणराजः स हस्ते ययोस्तौ तथा मनस्विनौ विशिष्टमनोयुक्तौ तरसा बलेन तरसी बलरंहसी इति ॥ २८ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

लीलामुपसंहरति । एवंविक्रीडतोरिति । स्वैरं यथा भवति तथा विशेषेण क्रीडतोरिति मूर्च्छिताभिरिव प्रमत्ताभिरिव क्रीडा अत्यन्तं स्वच्छन्दा भवतीति मध्ये क्रीडा मध्ये गानमिति द्वयं निरूपयति क्रीडतोर्गायतोः सतोरिति स्त्रीभिः सह समानधर्मतासिद्ध्यर्थं सम्प्रमत्तवदिति आवेशावतारयोः आवेशदशायां तुल्यतेति ज्ञापयितुं द्वयोः सामान्येन निरूपणं एवं सर्वस्मिन्नेव विकले शङ्खचूडनामा कश्चित् धनदस्य कुवेरस्यानुचरः स्त्रीकामः भगवन्तं प्राकृतं मत्वा स्वयं ता नेतुमागत इत्याह । शङ्खचूड इति शङ्खनिधिः चूडायामवर्तत इति अनेन नारदस्यापि दोषः परिहृतः यथा तौ पूर्वं धनमत्तावेव मयमपि प्राप्तनिधिरिति सम्प्रमत्तः धनद इति नाम्ना च सर्वैव सामग्री श्रीमद्रूपा निरूपिता यत्र धनन्तत्रैव स्त्रिय उचिता इति सर्वा एव श्रुतयो लौकिकाः कर्तव्या इति पाषण्डिनां बुद्धिः ॥ २५ ॥

ततो यत्कृतवांस्तदाह । तयोर्निरीक्षतोरिति । राजन्निति सम्बोधनं शत्रूणां स्त्रीहरणं स्वाभाविकमिति तव सहजदोष इति ख्यापनार्थं सावेव नाथौ यस्य प्रमदाः स्त्रीविशेषाः तेषां जनः समूहः सामान्यशब्दः समूहवाची भवतीति विशेषपराश्चेत् न गच्छेयुरिति ज्ञापयितुं सामान्यवचनं क्रोशन्तमिति तासामनिच्छा तस्य च भयाभावः सूचितः कालयामास यथाकालः अप्रतिहतबलः सर्वानेव कालयति हरति तद्वदित्यर्थः । उदीच्यां दिशीति स्वगृहे बलाधिक्याय अतएवाशङ्कितः किङ्करिष्यति भगवानिति ॥ २६ ॥

ततो भगवद्भ्यां यत्कृतं तदाह । क्रोशन्तमिति । यदि ताः कृष्णरामेत्याक्रोशं न कुर्युः तदा न निवारयेदपि नहि भगवान् स्वतोऽन्यचित्तं निवारयति तत्राप्यन्यस्यचेन्न निवारयेत् किन्तु स्वपरिग्रहं स्वेन पूर्वमेव परिगृहीत इति क्रोशन्तं स्वपरिग्रहं विलोक्य अन्वधावदिति भ्रातरावित्युभयोः परिग्रहः उभाभ्यां रक्षणीय इति अनुग्रहणानन्तरमेवाधा[illegible]म् ॥ २७ ॥

दूरे नीयमानाः दूरादेवाश्वासितवन्तावित्याह । माभैष्टेत्यभयारावाविति । माभैष्टेत्यभयमारावः भयनिवर्तको भवति शालवृक्षौ हस्ते ययोरिति महासामर्थ्यं दूरादेव प्रदर्शितं ननु तयोः कश्चनोपयोगोऽस्ति तरस्विनावतिवेगवन्तौ यथा मध्ये एकामपि गृहीत्वा न गच्छेन्न स्पृशेद्वेति शीघ्रमासेदतुः निकटे गतौ सन्तौ आसेधतुः निवारितवन्तौ वा तं शङ्खचूडं तरसाविचार्यैव देवमनुष्यापेक्षया महाबलो भवतीति विचारप्राप्तिः त्वरितं पलायनार्थं यतो गुह्यकानां यक्षाणां मध्ये अधम आगमने यक्षत्वं प्रयोजकं पलायने अधमत्वम् ॥ २८ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

निरीक्षमाणयोरित्यनादरे षष्ठी क्रोशन्तं हे राम ! हे कृष्ण ! अस्मांस्त्रायस्वेति सक्रन्दनं फूत्कुर्वन्तम् । कालयामास महायष्टिघूर्णनेन भीषयित्वा उदीचीं दिशं प्रति विद्रावयामासेति । तेन स्पर्शस्तासां नाभूदिति ज्ञेयम् । यथा गा इत्यभिमश्लोकोक्तेः ॥ २६ ॥

दस्युना चोरेण ग्रस्ता आत्मसात् कर्त्तुं विद्राव्य स्वदेशं प्रति चालिताः ॥ २७ ॥ २८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

तयोः रामकृष्णयोः निरीक्षमाणयोः सतोः कालयामास बलात् प्रेरयामास ॥ २६—२७ ॥

माभैष्ट भयं माप्राप्नुतेत्येवं विधो रावः शब्दो ययोस्तौ ॥ २८—३० ॥

भाषा टीका ।

इस प्रकार से यथेच्छ प्रमत्त की नाईं उन दोनों के गान करते समय मे धनद कुवेर का अनुचर शंखचूड नाम का यक्ष आगया ॥ २५ ॥

हे राजन् ! उन दोनों के देखते ही वही जिस के स्वामी है ऐसे चिल्लाते हुये सब प्रमदा जनको शंका रहित होकर उत्तर दिशा को खेद लेजाने लगा ॥ २६ ॥

हे कृष्ण हे राम ! इस प्रकार से चिल्लाने वाले अपने कुटुंव को जैसे चोर गउओं को लेजाता हो तैसें जाते देख कर दोनों भाई दौडते भये ॥ २७ ॥

हाथ मे शाल के वृक्ष को लेकर मत डरो ऐसे अभय शब्द को करते हुये वडे वेग से जलदी आकर उस गुह्यकाधम के पास पंहुच गये ॥ २८ ॥

अविदूर इवाभ्येत्य शिरस्तस्य दुरात्मनः ॥
जहार मुष्टिनैवाङ्ग ! सहचूडामणिं विभुः ॥ ३१ ॥
शङ्खचूडं निहत्यैवं मणिमादाय भास्वरम् ॥
अग्रजायाददत्प्रीत्या पश्यन्तीनां च योषिताम् ॥ ३२ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे
पूर्वार्धे शङ्खचूडवधोनाम
चतुस्त्रिंशत्तमोऽध्यायः ॥ ३४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

शिरसा सहचूडामणिं जहारेत्यर्थः ॥ ३१-३२ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
चतुस्त्रिंशोऽध्यायः ॥ ३४ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

कालः प्रेरकः मृत्युश्च तत्प्रेर्यस्ताविति यथाक्रममनुरूपो दृष्टान्तः । मूढः प्रद्रवणेऽपि जीवनासम्भवात् स्ववधे स्वयमेव प्रवृत्तेश्च ॥ यद्वा । कृत्यं किमप्यजानन्नित्यर्थः ॥ २९ ॥

ननु शालप्रक्षेपेण दूरत एव तमधमं किं न हन्यात् तत्राह । जिहीर्षुरिति । मृतस्य सतः स्पर्शायोग्यत्वेन तस्य जीवत एव रत्नग्रहेच्छयेत्यर्थः । श्रीरामाय तद्दानेच्छया तु तस्यैव मुख्यप्रयोजनतया निर्देशः । यद्वा । तन्मणिसङ्गपर्यन्तं तज्जीवननिबन्धात्तज्जिहीर्षा ॥ ३० ॥

अविदूर इव अतिदूरेऽपि किंचिद्दूर इवाभिमुखं गत्वा वेगेन पलायमानस्य पृष्ठे हननायोग्यत्वात् पलायमानस्यापि तस्य वधो युक्त इत्याह । दुरात्मनः दस्योरित्यर्थः । मुष्टिनैव नतु शालेन अन्योपायान्तरेण तत्रापि तेनैकेनैवेति प्रयासाभाव उक्तः । यतो विभुरीश्वरः । अन्यत्तैः । तत्र शिर इति तृतीयायाश्छान्दसो लुक् । यद्वा शिरश्चूडामणिश्च सह एकदैव जहार ॥ ३१ ॥

नितरां हत्वेति निशब्दः सूक्ष्मशरीरस्यापि नाशात् । पश्यन्तीनामिति सर्वासामात्मनि सौभाग्यातिशयाभिमानात् । तथापि ता अनादृत्याग्रजाय अदादिति सर्वासां मातृसमाभावाय तस्य मान्यत्वात् कृतरक्षत्वाच्च । प्रत्युत सन्तोषायैव स्यादित्यभिप्रेत्येति भावः । प्रीत्येति तत्पालके तस्मिन् प्रीत्यतिशयोदयोऽयं सर्वास्वेव तासु पर्यवस्यतीति भावः ॥ ३२ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे
श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिण्यां
चतुस्त्रिंशोऽध्यायः ॥ ३४ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

कालः कालाभिमानि देवता मृत्युः प्राणवियोगकरी देवता ॥ २९ ॥ ३० ॥ पराङ्मुखस्यापि शिरोहरणं प्रतिभटबुद्ध्या अतो नान्यायः ॥ ३१ ॥ ३२ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे
श्रीसुदर्शनसूरिकृतशुकपक्षीये
चतुस्त्रिंशोऽध्यायः ॥ ३४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

स गुह्यकाधमः कालमृत्यू इव प्राप्तौ रामकृष्णाववलोक्य उद्विजन् विभ्यत्स्त्रीजनं विहाय जीवितुमिच्छया मूढः तच्छरणागत्यात्मकजीवनोपायानभिज्ञः केवलं प्राद्रवत् ॥ २९ ॥

स शङ्खचूडो यत्र धावति तत्र तं शङ्खचूडं श्रीकृष्णोऽन्वधावत् किञ्चिकीर्षुस्तस्य शिरोरत्नं हर्तुमिच्छुः बलरामस्तु स्त्रियः स्त्रीः रक्षंस्तत्रैवावतस्थौ ॥ ३० ॥

ततोऽविदूरे समीप एवाभ्येत्य तदभिमुखं गत्वा विभुर्भगवान् मुष्टिनैवाङ्ग हे राजंश्चूडामणिसहितं दुरात्मनस्तस्य शङ्खचूडस्य शिरो मूर्धानं जहार ताडयामास ॥ ३१ ॥

इत्थं शङ्खचूडं हत्वा भास्वरं तेजोयुक्तं मणिमादायागत्य योषितां पश्यन्तीनां प्रीत्या अग्रजाय रामाय दत्तवान् ॥ ३२ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
चतुस्त्रिंशोऽध्यायः ॥ ३४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

मरणकालः कश्चिदसुरो वा मृत्युर्यमः उद्विजन् बिभ्यत् ॥ २९—३२ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
द्वात्रिंशोऽध्यायः ॥ ३२ ॥ ३४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

तच्छिरोरत्नजिहीर्षा तत्पर्यन्तं तज्जीवितानियमादिति तर्क्यते ॥ ३० ॥ ३१ ॥

अग्रजायेति । सर्वासामपि तत्र प्रीतेः । प्रीत्येति विशेषतस्तासां रञ्जनेनेत्यर्थः ॥ ३२ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे
चतुस्त्रिंशोऽध्यायः ॥ ३४ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

पूर्वं ताभिः सहितः शीघ्रं गच्छन् स्थितः इदानीं स्वयमेव पलायितुं विचारितवानित्याह । स वीक्ष्येति । अनुप्राप्तौ भगवन्तौ वीक्ष्य सोऽल्पबुद्धिः स्त्रीजनं विसृज्य प्राद्रवदिति सम्बन्धः तस्य तथा करणे या बुद्धिरासीत्तामाह । कालमृत्यू इवोद्विजन्निति । एकः कालः स्वस्य नाशसमयः अपरो मारक इति एकोऽप्यनिवार्यः तत्रोभयोः किंवक्तव्यमिति पलायने जीवितेच्छैव हेतुः सति जीवने भोग इति ननु शरणं कुतो न गतः जीवेत् ननु पलायनं जीवनसाधनमिति चेत्तत्राह । मूढ इति इममर्थं न जानातीति ॥ २९ ॥

अनुपाये प्रवृत्तस्य न कार्यं सिध्यतीत्याह । तमन्वधावदिति । गोविन्द इति तेषां रक्षार्थं विनियोग आवश्यकः स्वक्रियाया अन्यथेन्द्रत्वं न स्यादिति रक्षा च दोषस्य मूलोच्छेद एव ननु तस्मिन् कथमपि विद्यमाने अतो यत्र यत्रैव स पलायते तत्रैव तमन्वधावत् ननु दूरादपि मरणे सम्भवति भगवान् किमिति धावनं कृतवान् तत्राह । जिहीर्षुस्तच्छिरोरत्नमिति । दूरान्मारणे यक्षास्तदीयास्तं नयेयुः अमारितश्च स्यात् मणौ विद्यमाने मणिरिव शस्त्रैरप्यवध्यः अतः स्वस्यैव गमनं जीवन्नामवध्य इति स्त्रियो रक्षन् बलः जातः अन्यथा ततोऽन्यो हरेत् तदीया हि बहवः ते घातयेयुरेव अत एकेन रक्षितव्याः बल इति बहूनामप्यागमने रक्षार्थमुक्तं स्त्रियो हि रक्षणीया एव ॥ ३० ॥

ततो भगवान् यत् कृतवांस्तदाह । अविदूर इवेति कियद्धावनेनैव सम्प्राप्तः अविदूरे निकट एव वस्तुतस्तु दूरे गतः परं कालविलम्बाभावात् अविदूर इवाभ्येत्य निकटे गत्वा तस्य शिरो जहार ननु पलायितवधो निषिद्धः किमिति भगवान् क्लिष्टं कृतवानित्याशङ्क्याह । दुरात्मन इति । स हि दुरात्मा वध्य एव त्रयीद्विषो हि हन्यन्त एव निमित्तन्तु दारापहारित्वं जातमेव अन्यथा पूर्वमेव हन्यात् अधुना परित्यागे पुनरागच्छेत् केवलबलभद्रक्रीडायां वा समागत्योपद्रवं कुर्यात् यतो दुष्टान्तःकरणः अतो वध्य एव अतस्तस्य शिर एव ज्ञानशक्तिप्रधानं मुष्टिनैव जहार नतु भेदनं कृतवान् किन्तु यथा राशेः सकाशात् मुष्टिना तण्डुलाः ह्रियन्ते तथा राशिभूतास्तस्यावयवाः मुष्टिनैवाहृताः यदैव स गोपिकाहरणार्थमुद्यमं कृतवान् तदैव संयोजका देवा अवयवेभ्यो निर्गताः केवलं मणिप्रभावादवयवी स्थितः भगवान् पुनः चूडामणिसहितं तच्छिरो जहार स्वकर्मणैव विशकलित इति भगवान् अक्लिष्टकर्मैव किञ्च विभुः समर्थः मणेरपि सामर्थ्यं दूरीकर्त्तुम् ॥ ३१ ॥

एवं कृते स हतो जात इत्याह । शङ्खचूडं निहत्येति । एवं प्रकारेण तस्य हननं नतु प्रकारान्तरेण तस्य मुक्तिनिराकरणार्थं निहत्यैवेत्युक्तं मृतद्रव्यं न ग्राह्यमित्यत आह । भास्वरमिति । आस्थानान्मण्युत्तममिति । वाक्यात् मणिग्रहणेन मणिगता देवता ताः कामयन्तीति पक्षे कामना सफला कृता मणिग्रहणेन तस्य मुक्तिर्दैवेति शङ्कां वारयितुम् अग्रजायाददत् तत्रैव स्थित्वा देवताया अप्युपभोगो भवत्विति प्रीत्यैवाददत् नतु याचितः स्त्रीणां प्रार्थनाभावायाह । पश्यन्तीनामिति । चकारात्सर्वाभ्यः प्रदर्श्य तासां स्पर्शानन्तरं योषितामन्येषाञ्च देवानां पश्यतामिति प्रमाणसिद्ध्यर्थं यत्किञ्चित्करोति तत्सर्वं तदधिष्ठातर्य्येव प्रयच्छतीति ज्ञापितं प्रमाणबलमेवात्र मुख्यमिति न प्रमेयविचारेण कोऽप्यर्थः शङ्कनीयः ॥ ३२ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे श्रीलक्ष्मणभट्टात्मज
श्रीमद्वल्लभदीक्षितविरचितायां सुबोधिन्यामेक-
त्रिंशाध्यायविवरणम् ॥ ३१॥३४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

कालमृत्यू कालः प्रेरकः मृत्युः प्रेर्य्यस्ताविव शीघ्रं जहीति रामः प्रेरकः अयमहमिमं हन्मीति कृष्णः प्रेर्य्यस्तौ ॥ २९ ॥

स्त्रियोविद्रावणश्रान्तास्तत्रैव स्थिरीकृत्य आश्वास्य तस्थौ ॥ ३० ॥

अतिदूरेऽपि तत्र अविदूर इवाभ्येत्येत्यर्थः ॥ ३१ ॥

पश्यन्तीनामिति । मह्यमेवातिसुभगायै दास्यति मह्यमेवात्यादरणीयायै दास्यतीत्येवं प्रत्येकमुत्सुकानां तासां मदमत्सराद्युद्गमार्थं कस्यैचिदप्यदत्त्वा रामायादात् सच महाविज्ञः कृष्णाभीप्सितस्थल एव तं मणिं न्यधादिति ज्ञेयम् ॥ ३२ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
दशमस्य चतुस्त्रिंशः सङ्गतः सङ्गतः सताम् ॥ ३४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

विभुः श्रीकृष्णः अविदूरे ततसमीपे अभ्येत्य सहचूडामणिं शिरो जहार ॥ ३१ ॥ ३२ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
चतुस्त्रिंशाध्यायार्थप्रकाशः ॥ ३४ ॥

भाषा टीका ।

उस शंख चूडने काल मृत्यूसरी के दोनों को देखा तव वडा डर गया फिर वह मूर्ख जीने की इच्छा से स्त्रीजनों को छोड कर भगता भया ॥ २९ ॥

गोविंद भगवान उस के शिर के रत्न की हरण करने की इच्छा से जहां जहां वह गया तहां तहां जाते भये और वलदेवजी स्त्रीजन की रक्षा करते रहे ॥ ३० ॥

हे राजन् ! थोडे ही दूर मे जाकर विभु भगवान् ने अपनी मुष्टिके प्रहार से उस दुष्ट के शिरको चूडा मणि के सहित हरण कर लिया ॥ ३१ ॥

इस प्रकार से शंख चूड को मार कर प्रकाश मान मणि को लाकर सव स्त्रीन के देखते ही वडी प्रीति से भगवान् ने वडे भ्राता वलदेवजी को देदिया ॥ ३२ ॥

इति श्रीभागवत दशमस्कन्धपूर्वार्धे चौतीस में अध्याय की भाषाटीका समाप्त ॥ ३४ ॥

इतिश्रीमद्भागवते दशमस्कन्धे पूर्वार्धे चतुस्त्रिंशोऽध्यायः ॥ ३४ ॥

॥ पञ्चत्रिंशोऽध्यायः ॥

श्रीशुक उवाच

गोप्यः कृष्णे वनं याते तमनुद्रुतचेतसः ॥
कृष्णलीलाः प्रगायन्त्यो निन्युर्दुःखेन वासरान् ॥ १ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

पञ्चत्रिंशे वनं याते कृष्णे गोकुलयोषितः ।
युग्मश्लोकानुगीतेन निन्युर्दुःखेन वासरान् ॥

एवं रात्रिषु कृष्णेन स्वैरमभिरमितानां दिवा तद्विरहितानामनुगीतेन दिनानिस्तारप्रकारमाह । गोप्य इति । दुःखेन कृच्छ्रेण ॥ १ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

नन्वेवं श्रीव्रजेन्द्रकुमारेण रात्रिषु रासक्रीडादिना बहुधा रमितानां तासां दिवसेषु तद्विरहेण महद्दुःखं सम्भाव्यत एव उक्तं श्रीपराशरेण । "स तथा सह गोपीभी रराम मधुसूदनः । यथाब्दकोटिप्रतिमः क्षणस्तेन विनाभव"दिति । अतस्तावद्दुःखं वत ताभिः कथं निस्तीर्णमित्यपेक्षायां तादृशरजनीवर्गसम्भोगं पोषयितुं दिनवर्गगतं विप्रलम्भं वर्णयन् तत्कालक्षेपणहेतुं दर्शयति । गोप्य इति । तमनु तेन सह द्रुतं वेगेन गतं चेतो यासां ताः । तं लक्ष्यीकृत्य श्लथितहृदया इति वा तत्र तमनुद्रुतचेतस्त्वेन गृहकृत्याद्युपरतिर्दर्शिता ॥ १ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

॥ १ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रिका ।

अथेत्थं निशासु विहरन्तीनामहःसु तेन विश्लिष्टानां गोपीनां तल्लीलानुवर्णनेन कालनिर्यापणप्रकारमाह पञ्चत्रिंशेन । गोप्य इति । कृष्णे वनं याते ऽहस्सु इति शेषः तं कृष्णमनुद्रुतमनुवृत्तं तदासक्तमिति यावत् तच्चेतो यासां ता गोप्यः कृष्णस्य लीलाः प्रगायन्त्यः वासरानहानि दुःखेन कृच्छ्रेण कथञ्चिन्निन्युर्निर्यापयामासुः ॥ १ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

स्त्रीणामुपासनाप्रकार ईदृश इति दर्शयितुं गोपीनां भगवल्लीलानुस्मरणं कथयत्यस्मिन्नध्याये । तत्र प्रथमतस्तासां कृष्णे भक्तिलक्षणं वक्ति । गोप्य इति । प्रकृष्टगानेनाहृतचेतस्त्वं भक्तेर्लक्षणं सूचयति ॥ १ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

मानासभागतानां श्रीगोपीनां वाक्यसङ्ग्रहोऽध्यायोऽयम् । अतः क्वचित् व्रजदेव्य इति क्वचित्तव सूनुरनघे तव वत्स इति च सम्बोधनेन भेदो दृश्यते । सङ्ग्रहस्तु प्रातरादि सायं पर्यन्त लीलाक्रमेण तत्रादौ वनवर्त्मनि वेणोरीरिते व्योमयानवनितानां सर्वोपरि वर्त्तमानत्वेन प्रथममनुभवन्तीनां मोहमाहुः । वामेति युगलेन । कोमलेनेति प्रयोगः स्नेहेन ईरयति गातुं प्रेरयति ॥ १—३ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

द्वात्रिंशेऽन्तर्गोपिकानां स्वानन्दं भगवान् हरिः ।
पूरयामास येनैव पूर्णानन्द इतीर्यते ॥
अन्तः प्रविष्टो भगवान् मुखादुद्धृत्य कर्णयोः ।
पुनर्निवेश्यते सम्यक् तदा भवति सुस्थिरः ॥
शब्दार्थयोर्मुख्यतात्र युग्माः श्लोकास्ततोऽत्र हि ।
सर्वेषु चैव मासेषु यत्करोत्यच्युतोऽत्र तत् ॥
अतोऽत्र मासयुग्मो हि प्रक्रमः फलमेव च ।
आद्यन्ते चामरं युग्मं त्रयोदश भवन्ति तत् ॥

एवं भगवता सह रात्रौ क्रीडामुक्त्वा दिने तासां संसारप्रवृत्तिर्भविष्यतीत्याशङ्क्य दिवसेषु भगवद्गुणवर्णनपरा जाता इति वदन् गुणवर्णनाया आवश्यकत्वायारम्भे दुःखं पर्यवसाने सुखमिति निरूपयन् प्रथमं प्रथमप्रवृत्तावपि गोपिकानां दिवसेषु परमं दुःखं जातमित्याह । गोप्य इति । केवलपदात् पूर्वोक्ता ग्राह्याः सदानन्दे वनङ्गते तमन्वेव द्रुतं चित्तं यासां वस्त्वन्तरग्रहणाक्षमं चित्तं जातं द्रुतशब्दात् विलय उक्तः । ततः सर्वतः प्रसृतं सूक्ष्मभावापन्नं सदानन्दस्य लीलां गृहीतवत् अतः

॥ गोप्य ऊचुः ॥

वामबाहुकृतवामकपोलो वल्गितभ्रुरधरार्पितवेणुः।
कोमलाङ्गुलिभिराश्रितमार्गं गोप्य ईरयति यत्र मुकुन्दः ॥ २ ॥
व्योमयानवनिताः सह सिद्धैर्विस्मितास्तदुपधार्य सलज्जाः।
काममार्गणसमर्पितचित्ताः कश्मलं ययुरपस्मृतनीव्यः ॥ ३ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी।

कृष्णलीलाः प्रगायन्त्यो जाताः यथास्वरूपं सदानन्दरूपं तथा तल्लीला अपीति तदात्मकत्वञ्च लीलानां ज्ञापयितुं पुनर्नामग्रहणं कृतमन्यथा तत्पदमेव वदेत्तथा सति तत्संबन्धित्वमात्रं प्राप्येत नतु तद्रूपत्वम् अवश्यवाच्यं चैतद्यतः स्वरूपवियोगे तदतिरिक्तस्य न जीवनहेतुत्वं ततो हीनत्वात् ततो यथाकथंचित् महता मानसदुःखेन वासरान् निन्युः यदा पुनस्तच्चित्तं प्रकीर्णे भगवच्चरित्रे विलीनं सत् एकं भावं प्राप्स्यति तदा पूर्णमनोरथा भविष्यन्ति इदानीं सर्वा सामग्री विशकलितेति दुःखेन विनयनं वासरपदात् राज्यर्थं कथञ्चित् प्राणानां धारणं लक्ष्यते ॥ १ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

पञ्चत्रिंशे वेणुगीतं द्वादशश्लोकयुग्मतः।
वर्ण्यते यत्प्रियाः पीत्वा विरहिण्यो ऽनयन् दिनम्।
सम्भोगशैत्यं ज्योत्स्नासु विच्छेदौष्ण्यं दिनेष्वदात्।
प्रेमा ताभ्यः स्वपुष्ट्यर्थं स्वयं तद्द्वितयात्मकः॥

एवं रात्रिषु गोप्यः स्वकान्तेन सह लब्धाङ्गसङ्गा नृत्यगीतनर्माधरामृतादिकं पिबन्त्यः सम्भोगरसनिमग्ना बभूवुरित्युक्तम्। इदानीं दिनेषु तेन सह लब्धमनोमात्रसङ्गास्तद्वेणुगानामृतमात्रं पिबन्त्यो विप्रलम्भरसनिमग्ना बभूवुरित्याह। गोप्य इति। तं वनं गच्छन्तमनुलक्ष्यीकृत्य द्रुतानि वेगेन तेन सह चलितानि चेतांसि यासां ताः ॥ १ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

एवं निशासु भगवता सह विहरन्तीनामहःसु तेन वियुक्तानां तल्लीलानुवर्णनेन दिननिर्यापणप्रकारमाह पञ्चत्रिंशेनाध्यायेन। गोप्य इति ॥ १ ॥

भाषा टीका।

श्रीशुकदेवजी बोले दिन में जब श्रीभगवान् वन को जाते रहे तब सब गोपिन के चित्त उनके सङ्गही चले जाते तब कृष्ण लीलाओं को गान करके दुःख से दिनों को बिताती रहीं ॥ १ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

वामबाहुकृतवामकपोल इत्यादीनि द्वादशयुगलानि। हे गोप्यो वामे बाहौ तन्मूले कृतोऽर्पितो वाम कपोलो येन सः वल्गिते नर्तिते भ्रुवौ येन स वल्गितभ्रुर्मुकुन्दः अधरे अर्पितं वेणुं कोमलाभिरङ्गुलिभिराश्रिता मार्गाः सप्तस्वरच्छिद्राणि यस्य तं यत्र यदा ईरयति वादयति ॥ २ ॥

तदा व्योमयानानां सिद्धानां वनिताः सिद्धैः स्वपतिभिः सह वर्तमाना अपि तद्वेणवीरणमुपधार्याकर्ण्य प्रथमं विस्मितास्ततः काममार्गणेभ्यः समर्पितानि चित्तानि याभिस्तास्तत्परवशा इत्यर्थः। सलज्जाः सत्यः कश्मलं मोहं ययुः अत्र लिङ्गम् अपस्मृता विस्मृता नीव्यो याभिरिति अतएवंभूतस्य कृष्णस्य विरहं कथं सहाम इति सर्वत्र वाक्यशेषः ॥ ३ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी।

जयति व्रजदेवीनामपूर्वा महिमावली।
यदालम्बलवादेव तद्गीतं व्याचिकीर्षति।

अथ परः कोटीनां यूथशः एकैकशश्च भिन्नानुभावानामेकस्यां सभायां दुर्घटयुगपत् सर्वसमावेशानामत एव व्रजदेव्य इयि तव सुतः सतीति नानासम्बोधनीयजनानां प्रतिदिनलीलासामान्यवर्णनपराणां सङ्क्षेपेण वाक्यसंग्रहोऽयमध्याय इति यद्यपि न मिथो वाक्यसङ्गतिरपेक्ष्या तथापि श्रीमता कवीन्द्रेण प्रातरादि तत्तल्लीलाक्रमत एव तत्सङ्ग्रहः कृत इति क्वचित् छित्रादिकमपि युगलमेकसभागतमिति च सङ्गतिः कर्त्तव्या। तत्र प्रति नियतयुगलतया वर्णनं प्रतियुगलञ्च लीला तत्पोष्यजनयोः पूर्वापरीभावेनेत्यत्रैवमभिप्रयन्ति यद्यपि श्रीकृष्णलीलैव केवलं पुरुषार्थः तत्पोष्यजनस्तु तदनुगततयैव तथापि तद्युगलतां विना न सुखलाभ इत्यहो कष्टमस्माकमेव तादृश्यां लीलायां प्रवेशो नास्तीति तदेवं गृहाभिःसरणमारभ्य तत्रागमनावधि श्रीभगवतो वन्यक्रीडाः कदाचित् काश्चन काश्चिदनुभूय यथास्वं यथानुभवं गायन्त्यस्तत्रचादौ प्रातर्वहिर्भूय वनवर्त्मनि तेन वेणावीरिते सति सिद्धवनितानां "सार्धं गृहं प्रविष्टं तमपश्यन्तीनां तद्दिदृक्षया नभः व्योम्नि स्थितानां तद्वाद्यस्य तद्वादनमुद्रया तदीय सौन्दर्यलीलाविशेषस्य च तासां व्योमयानत्वादनावृतत्वेन प्रागेवानुभवात् श्रीभगवतश्च वामबाहुकृतवामकपोलत्वेन प्रायो वक्राद्धदृष्टिभङ्गितया स्वविषयकं तद्दृष्टिमननाच्च प्राधान्यतस्तासामेव प्रेममोहमाहुः * वामेति युगलेन। वामशब्दस्यार्थान्तरेण मनोहरता व्यञ्जनात् स एव प्रयुक्तो न सव्यादिशब्दः। वामबाहुकृत वामकपोलत्वेन श्रीभ-

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

वाया ईषत्परिवर्त्तनं तिर्य्यक्त्वञ्च तया वक्रोर्द्ध्वावलोकनं तथा वेणुवादनेऽभिनिवेशस्तथा सुप्रसिद्धत्रिभङ्ग्यनुसारेण श्रीवामजङ्घोपरि, श्रीदक्षिणजङ्घान्तस्य न्यासश्च ज्ञेयः । वल्गितभ्रुरिति ह्रस्वत्वमार्षम् । दीर्घोऽपि पाठः क्वचित् । अधरेऽर्पितो यो वेणुस्तम् । यद्वा । अधरोऽर्पितो न्यस्तो यस्मिन् दत्तो वा यस्मै सचासौ वेणुश्चेति विग्रहः तम् । सदा तस्य संयोगाभिप्रायेण । इदञ्च निष्ठायाः पूर्वनिपाताभावार्थमाहिताग्न्यादौ पठनीयम् । बिम्बादिरूपकाप्रयोग आरुण्यमाधुर्य्यगुणस्फूर्त्तावपि तत्सम्बन्धमात्रेणैव वेणुवाद्यस्य मोहनत्वबोधनाय । किम्वा सदा वेणुसंसर्गेण तस्मिन्नीर्ष्योदयात् । अकर्म कठिनौ हस्तौ पादौ चाध्वनि कोमलाविति महापुरुषलक्षणत्वेऽपि कोमलेति प्रयोगः स्नेहेन । अन्याङ्गापेक्षिककाठिन्यांशमनपेक्ष्य वस्त्वन्तरापेक्षिक कौमल्यांशस्फूर्त्तेः । तथा मात्सर्य्येण तस्यातिकठिनमुरली स्पर्शानौचित्याभिप्रायात् । अतोऽस्मासु कोमलाङ्गिष्वेव तत्स्पर्शोऽपि युक्त इति गूढोऽभिप्रायः । एवं सहजमहासौन्दर्य्यमयस्यापि तस्य वेणुवादने मुद्राविशेषेण सौन्दर्य्यविशेषो दर्शितः । तेन च वेणुवाद्यस्य महामोहनत्वमेवाभिप्रेतम् । हे गोप्य इति परमविदग्धाभिस्तत्तत्त्वं युष्माभिरेव बोद्धुं शक्यते नत्वन्यैर्जनैरिति भावः । यत्र यदेति वक्ष्यमाणमोहप्राप्तौ तत्तत्कालजातत्वं तस्यां वेण्वीरणैकहेतुत्वञ्च आवश्यकत्वादिकमप्यभिप्रेतम् । एवमग्रेऽपि । व्योमयानं विमानं तद्वनिता देव्यः । सिद्धैस्तद्यानैर्देवैरित्यर्थः अपूर्वत्वात्तैरपि सह विस्मिता बभूवुः अतस्तैः स्वपतिभिर्महद्भिश्च सह वर्त्तमाना अपि काममार्गणैः कर्त्तृभिः समर्पितं चित्तम् अर्थात् कृष्णाय यासां तथाभूता बभूवुः ततः सलज्जा बभूवुः एवं लज्जावत्योऽपि तन्मार्गणेन मोहपर्य्यन्तां दशां प्रापुः । यत्रापस्मृता स्खलिता अतिविस्मृता नीव्यो याभिस्तादृश्यो बभूवुरित्यर्थः अन्यत्तैः । यद्वा । विस्मयानन्तरं स्त्रीस्वभावेन कामोदयात् सलज्जा बभूवुः ततश्च काममार्गणैः समर्पितं बलादाच्छिद्य श्रीकृष्णायार्पितं चित्तं यासां तथा भूताः सत्यो मोहं ययुः । तत्रास्तां तावन्मानसविकारमात्रे लज्जा यतस्तेषामग्रतोऽपस्मृतनीविकाश्चापि बभूवुरित्यर्थः । अतो यत्र देव्योऽपि मुह्यन्ति तत्र का वयमिति भावः ॥ २ ॥ ३ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

वामबाहुकृतेत्यादिश्लोकेषु द्वौ द्वौ श्लोकावेकार्थतयान्वितौ यदा आश्रितच्छिद्रं वेणुमीरयति स्वनयति तदा व्योमयानवनिताः कश्मलं मोहं ययुः ॥ २—३ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

कीदृशं तल्लीलाप्रगानं येन वासवान्निन्युरित्यतस्तद्दर्शयति । वामबाहुकृतवामकपोल इत्यादिना अत्र द्वौ द्वौ श्लोकावेकवाक्यतया नेतव्यौ हे गोप्यः ! कृष्णो यत्र यदा वामबाहौ तन्मूले कृतः अर्पितः वामः कपोलो येन वल्गिते नर्तिते भ्रुवौ येन तथाभूतः कोमलाभिरङ्गुलिभिराश्रिता मार्गाः सप्तस्वरच्छिद्राणि यस्य तमधरेऽर्पितं वेणुमीरयति शब्दाययति ॥ २ ॥

तदा व्योमयानानां वनिताः कश्मलं ययुरित्यन्वयः व्योम्नि यान गमनं येषां ते व्योमयानाः व्योम्नि यान्तीतिवा तथासिद्धाः नन्द्यादेराकृतिगणत्वात्कर्तरि ल्युः तेषां वनिताः सिद्धैः स्वपतिभिः सहवर्त्तमाना अपि तद्वेणुगीतमुपधार्याकर्ण्य प्रथमं विस्मिताः ततः कामस्य मदनस्य मार्गणे समर्पितानि चित्तानि याभिस्तास्तत्परवशाः इत्यर्थः सलज्जाः सत्यः कश्मलं मोहं ययुः तत्र लिङ्गं वदन्त्यस्ता विशिषन्ति अपस्मृतनीव्योऽपस्मृता नीव्यः भ्रश्यद्दुकूलवन्धाः याभिस्तथाभूताः एवंविधस्य श्रीकृष्णस्य विश्लेषं कथं सहेमेति सर्वत्र वाक्यशेषः ॥ ३ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

द्वौ द्वौ ग्रन्थौ एकस्या गीतं तद्वाभ्यां द्वाभ्यां श्लोकाभ्यामन्वयः एका गोपी गोप्यन्तराणि संबोधयति । हे गोप्यः शृणुतेति शेषः वामबाहुमूले कृतं वामकपोलं येन स तथा वल्गिता नर्तिता भ्रूर्यस्य स तथा अधरोष्ठे अर्पितो वेणुर्येन स तथा मुकुन्दो यत्र यदा कोमलाङ्गुलिभिः आश्रितमार्गमाच्छादितरन्ध्रं वेणुमीरयति गायतीत्यर्थः ॥ २ ॥

तदा सिद्धैः सह व्योमयानवनिताः विमानस्थाः स्त्रियः तद्गीतमुपधार्य श्रुत्वा विस्मिताः अनन्तरं स्वयमशक्ताः सलज्जाः कामबाणेन समर्पितं विद्धं चित्तं यासां तास्तथा अपस्मृता नीवी वस्त्रग्रन्थि यासां ताः मुच्यमानवस्त्रग्रन्थिस्मरणरहिताः कश्मलं मूर्च्छां ययुरित्यर्थः ॥ ३ ॥

श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी ।

४

सर्वोत्तमा हरेर्लीला वेणुनादपुरःसरा ।
हेतुः सर्वत्र वाच्येऽर्थे प्रथमेषु निरूप्यते ॥
देवस्त्रियस्तथा गावः सरितः पादपा लताः ।
पक्षिणश्च तथा मेघा ब्रह्माद्या गोपिकास्तथा ॥
हरिण्यो देवगन्धर्वा द्विधा च भगवान् हरिः ॥
उत्तरेषु निरूप्यन्ते रसज्ञा वेणुवादने ॥
जानाति भगवानेव जानात्येव हरिः स्वयम् ।
अन्ते च भगवानुक्तो वारद्वयमनन्यधीः ॥
अनुभावस्तु नादस्य स्त्रीषु पूर्वमुदीर्यते ।
त्रिविधासु ततः पुंसु ब्रह्मा गोपी तथा मृगी ॥
त्रयोऽत्र त्रिविधाः प्रोक्ताः प्रकीर्णाः सकलाः सुराः ।
सर्वा एवानभिज्ञा हि वस्तुसामर्थ्यसंयुताः ॥
एवं वेणुर्द्वादशधा फलतीति निरूपितम् ।

तत्र प्रथमस्त्रीप्राधान्यात्देवस्त्रियो मुख्या इति तासु वेणुनादप्रभावं वक्तुं येन प्रकारेण नाद उत्तिष्ठति तं प्रकारमाहुः । वामबाहुकृतवामकपोल इति । यत्र मुकुन्दः अधरार्पितवेणुमीरयति तत्र तस्मिन् क्षणे व्योमयानवनिताः कश्मलं ययुरिति सम्बन्धः वेणुनादः पञ्चधा भवति मुखस्य परितः समतया उपर्यधश्च धारणेन तत्र स्त्रीणां कामोद्बोधकः वामपरावृत्तः स्त्रीणां पुरुषाणां च दक्षिणदेवानामुच्चैः अधस्तिरश्चां समतया सर्वेषामचेतनानां च तत्र देवस्त्रीणां कामोद्बोधकः वामपरावृत्त एवेति तथा निरू-

श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी ।

प्यते मानुषभावात् देवभावो महानिति मानुषनादेन देवस्त्रीणां भ्रमो न भविष्यतीत्याशङ्क्य तद्भ्रूविजृम्भः परमेष्ठिधिष्ण्यमिति वाक्यात् भ्रूविन्यासं नादंयोजितवान् तदाह । वामबाहौ कृतो योजितो वामकपोलो येन वल्गिता भ्रूर्यस्येति भ्रूरत्र दक्षिणा तथैवालिनयभावात् वल्गिता उच्चगीतियुक्ता अधरः पूर्ववर्णितः लोभात्मकः तत्र चेत्समर्पितः परमानन्दं न प्रयच्छति काममेवोद्बोधयति यतः श्रुत्वापि विरहजनितक्लेशमेव प्राप्नुवन्ति नतु परमानन्दं तत्रापि क्रियाशक्तिः पुष्टा चेद्भवेत् तदा लुब्धादपि फलं सिध्येत् तदपि नास्तीत्याह । कोमलाङ्गुलिभिराश्रितो मार्गो यस्य आदौ मन्दप्रकारेणैव वेणुनादस्योचितत्वात मार्गास्तस्य रन्ध्राः तेषां गाढभावेन निष्पीडने तारो नादो भवति मध्यभावे मध्यमः कोमले मन्द इति गोप्य इति सम्बोधनं सर्वानुभवसाक्षिकमेतदिति ज्ञापयितुम ईरणमत्र वादनं प्रयोजनमाह । मुकुन्द इति वेणुनादेन शुद्धं चेत् जगत् तदा मोक्षं दास्यामीति ॥ २ ॥

एवं हितार्थे ऽपि वेणुवादने ये मोक्षानधिकारिणः तेषां काम एव जात इत्याहुः । व्योमयानवनिता इति । व्योमयानाः विमानयानाः सर्वे देवयोनयः तेषां वनिता अधिकारित्वात् स्त्रीत्वात् भोग्यत्वाच्च न मुक्त्यधिकारिण्यः सिद्धैः सहिता अपि भगवद्व्यतिरिक्तं सर्वमेव दातुं शक्ताः स्वयमत्यन्तज्ञाने निपुणाः आदौ वेणुनादं श्रुत्वा विस्मिता जाताः ततोऽल्पकामोद्रेके तद्वेणुनादमुपधार्य सलज्जा जाताः भर्त्तारो ज्ञास्यन्तीति ततोऽत्यन्तमुद्रेके स्वात्मरक्षार्थं कामेन मरणशङ्कया काममार्गणेभ्यः समर्पितं चित्तं याभिः तादृश्यो जाताः यथा मारकाय मारणात् पूर्वं स्वयमेव समर्प्यते भीरुभिः ततः कामेन पीडिताः कश्मलं मूर्च्छां ययुः सा मूर्च्छा अत्यन्तविस्मारिकेत्याह । अपस्मृता नीवी कटिवस्त्रं याभिरिति एवं वेणुनादोऽत्यन्तं कामबोधक इत्यस्माकं मूर्च्छादौ किमाश्चर्यमिति भावः ॥ ३ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

वृन्दावने गाः सञ्चार्य तत्रत्यतरुवल्लिखगमृगादीन् नक्तन्तनस्वविरहखिन्नान् आश्वासयन् स्वागमनमावेदयितुं यदा वेणुना कृष्णः सञ्जगौ तदा तदाकर्णनेनोद्दीप्त भावा गोप्यः स्वस्वयूथस्थाः सखीः प्रत्याहुर्वामेन्यादि द्वादशयुगलानि हे गोप्यः ! वामबाहौ वामबाहुमूले कृतः अर्पितः वामकपोलो येन सः गीतस्यारोहावरोहयोर्गमकमर्याकरणं नेनैव प्रकारेण सम्भवेत् तथैव वामजङ्घोपरि दक्षिणजङ्घाधस्तटन्यासो ऽपि ज्ञेयः तेन त्रिभङ्गललितस्तिर्य्यग्ग्रीवस्त्रैलोक्यमोहन इतिनामत्रयं प्रकटीबभूवेति भावः । वल्गिते नर्तिते भ्रुवौ येनेति सुवलादीन् पुरः स्थितान् गानसौष्ठवे अवधापयितुमिति भावः ह्रस्वत्वमार्षम् अधरे ऽर्पितो न्यस्तोऽधराय दत्तो यो वेणुस्तं यत्र यदा ईरयति कीदृशं कोमलाभिरन्यजनाङ्गापेक्षया सुकुमाराभिः अकर्मकठिनौ हस्ताविति सामुद्रिकात् स्वाङ्गापेक्षयात्वीषत्काठिनाभिरङ्गुलीभिराश्रिताः मार्गाः सप्तस्वरच्छिद्राणि यस्य तं तदा व्योमयानानां सिद्धानां वनिताः सिद्धैः स्वपतिभिः सहिता अपि प्रथमं तद्वेण्वीरणमुपधार्य्य आकर्ण्य विस्मिता अहो वेणुनादस्यैतावन्मोहनत्वमननुभूतचरं यतोऽस्मान् साध्वीरपि मोहयति अस्मान् पुरुषानपि स्त्रीभावयुक्तीकृत्य मोहयतीति प्रथमं विस्मययुक्ताः ततश्च सिद्धैः सहैव सलज्जाः अस्मद्व्यभिचारमस्मत्पतयो वितर्कयेयुरिति तथैवास्मत् पुंस्त्वविपर्य्ययमस्मत्पत्न्यो वितर्कयेयुरिति स्वस्वपतिभ्यः सकाशात् स्वस्वपत्नीभ्यश्च सकाशात् लज्जायुक्ता अभूवन् ततश्च सिद्धैः सहैव कामस्य मार्गणेभ्यः शरेभ्यः समर्पितानि दत्तानि चित्तानि याभिस्ताः आयातान् श्रीकृष्णविषयककामशरानालक्ष्य भोः श्रीकृष्णकामशराः युष्मभ्यमेतानियस्माच्चित्तानि दत्तानि एतानि शीघ्रं विद्धीकुरुत अस्माभिः पातिव्रत्याय जलाञ्जलिर्दत्तः कृष्णोऽस्माभिः सह कृपया रमतामिति तथा अस्माभिरपि स्वपुंस्त्वं देवत्वञ्च त्यक्तं कृष्णो ऽस्मान् सद्यएव स्वयोगेन गोपस्त्रीकृत्यास्माभिः सह रमतामिति समर्पितपदव्यङ्ग्यं ज्ञेयम ततश्च सिद्धैः सहैव कश्मलं कामशरपीडया मोहं मूर्च्छां ययुः प्रापुः कश्मलस्यानुभावं सहैवमाहुः अपस्मृता न स्मृता स्खलिता अपि नीव्यो याभिस्ताः सिद्धैस्तैः शिथिलितवस्त्रबन्धकेशबन्धादिका बभूवुरित्यर्थः । समासान्ताभावः आर्षः अकस्माद्देवीनां देवानांच यद्येतादृश्यवस्था तर्हि वयं मानुष्यस्तत्रापि गोप्यस्तत्राप्येकनगरस्थास्तात्रापि लब्धाङ्गसङ्गाः कथं तं विना स्थास्यामस्तदुत्तिष्ठत सख्यः ! एतान् दग्धमुखान् पश्यतोऽपि पतिश्वशुरादींस्तिरस्कृत्य केनचिन्मिषेण वृन्दावनं प्रविश्य प्राणप्रेष्ठेन सार्धं विलसाम इति ध्वनिः प्रतियुगलान्त एवानुवर्त्तनीयः ॥ २ ॥ ३ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

तल्लीलाप्रगानमेव वर्णयति । वामेति द्वादशभिर्युगलैः हे गोप्यः वामबाहौ तन्मूले कृतो निहितो वामकपोलो येन सः वल्गिते नर्तिते भ्रुवौ येन सः मुकुन्दः कोमलाङ्गुलिभिः आश्रिताः मार्गाः षड्जादिस्वरच्छिद्राणि यस्य तम् अधरार्पितम् अधरे संयोजितं वेणुं यत्र यदा ईरयति वादयति तदा व्योम्नि यानं गमनं येषां ते व्योमयानाः देवाः तेषां वनिताः सिद्धैः स्वर्गार्थकृतैः स्वकर्मभिः सिद्धैर्देवैः स्वभर्तृभिः सह वर्तमाना अपि तदुपधार्य्य मुकुन्दवेणुगीतमाकर्ण्य प्रथमं विस्मिताः तदनन्तरं काममार्गेण समर्पितानि संयोजितानि चित्तानि याभिस्ताः "मार्गणं याचने ऽन्वेषे मार्गणस्तु शरे ऽर्थिनी"ति हैमः अत एव अपस्मृताः विस्मृताः नीव्यो याभिस्ताः भ्रश्यद्दुकूलबन्धा इत्यर्थः । कश्मलं कामसन्तापं ययुः प्रापुः पुनः तत् शान्त्यर्थं श्रीकृष्णसंयोगं लेभिरे अतो धन्या वयमित्येवं वाक्यशेषो यथासम्भवं बोध्यः ॥ २ ॥ ३ ॥

भाषा टीका ।

हे गोपीओं हो ! जिस समय में बायें भुजा पर बांये कपोल को स्थापन करके अपने नेत्र के भौंओं को नचाकर अधर पर वंशी को रखकर अपनी कोमल अंगुळियों से मुकुन्द भगवान् गान को करते हैं तब आकश में विमानों पर अपने पति सिद्धों के सहित बैठी हुई सब देव स्त्री उस गीत को सुन कर लज्जित होजाती हैं फिर उनके मन काम के बाणों से बिधजाते हैं फिर वे मोहित होजाती हैं तो उनकी कौंधनी कटि वस्त्र आदि सब ढीले होजाते हैं ॥ २—३ ॥

हन्त चित्र मबलाः ! शृणुतेदं हारहास उरसि स्थिरविद्युत् ॥
नन्दसूनुरयमार्त्तजनानां नर्मदो यर्हि कूजितवेणुः ॥ ४ ॥
वृन्दशो व्रजवृषा मृगगावो वेणुवाद्यहृतचेतस आरात् ॥
दन्तदष्टकवला धृतकर्णा निद्रिता लिखितचित्रमिवासन् ॥ ५ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

हन्त हे अबला ! इदं चित्रं शृणुत हारहासो हारवद्विशदो हासो यस्य सः यद्वा वेणुवादनेनाधोवदनेन हसतो हारेषु स्फुरन्हासो यस्य सः यद्वा हारवद्वक्षसि शोभमानो हासो यस्य सः यद्वा हाराणां हास इव विशदा स्फूर्तिर्यस्मिन्नुरसीति उरसि स्थिरा विद्युदिव लक्ष्मीर्यस्य सः यर्हि यदा कूजितवेणुर्नादितवेणुर्भवति ॥ ४ ॥

तदा व्रजे वृषा मृगा गावश्च वेणुवाद्येन हृतानि चेतांसि येषां ते आराद्दूरादेव दन्तैर्दष्टाः कवला ग्रासा यैस्ते धृता उत्तम्भिताः कर्णा यैस्ते निद्रिता इव लिखितचित्रमिव चासन् अविदुषां तिरश्चामिदमतोऽचित्रमित्यर्थः ॥ ५ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

ततो वनान्तिकं गच्छन् सर्वगोगोपालसङ्कलनार्थं वन्यमृगादिहर्षणाय स्वानुव्रज्याकरश्रीगोपादीनां ससान्त्वनगृहनिवर्त्तनाय च वेणुमवादयत् तत्रास्तामन्येषां वार्त्ता तस्योभयतो व्रजवनयोः स्थिताः पशवोऽपि मुमुहुरित्याहुः ०ः हन्तेति । हृदयस्थविस्मयचमत्कारद्योतकं तथैव साक्षाद्वदन्ति चित्रमद्भुतम् । हे अबला ! इति तच्छ्रवणेन प्रेमविह्वलतयेन्द्रियादिशक्तिराहित्याभिप्रायेण । अत एव शृणुतेत्यवधापयन्ति स्थिरविद्युदिति वक्षःस्थां रेखारूपां लक्ष्मीमेवोत्प्रेक्षन्ते । प्रसिद्धत्वात्तु नानुवदन्ति । तत्र स्थिरेति चित्रत्वे कारणम् । विद्युत्त्वेनोरसश्च घनत्वं व्यञ्जयन्ति तस्याश्च नायिकात्वमाशङ्क्य तत्रापि स्थिरत्वं विभाव्य मात्सर्यम् । तथापि विद्युद्घनसहयोगेन हारहासयोर्बलाकात्वं तादृशघनत्वेन तापहारित्वञ्च । अत एव नन्दयति जगदिति नन्दस्तस्य सूनुरिति स्वभावेनानन्दकत्वमुक्तम् । अतएवार्त्तजनानां गवादीनां मृगादीनाञ्चानन्ददाता । अयमित्यधुनैव यो गृहान्निर्गतः स इत्यर्थः । साक्षात् सर्वैरनुभूयमान इति वा । कूजितेत्यादि कर्मणि क्तः । अन्यत्तैः । यद्वा । हारो मनोहरो हासो यस्य सः । यद्वा । यस्मिन्नुरसि । अन्यत् समानम् । व्रजे ये निरुध्य पाल्यमानाः शकटवाहो वृषास्ते मृगाः कृष्णसाराः तत्सम्बन्धेन गावो वनगामिन्यस्तदुपलक्षणत्वेनान्येऽपि तत्तज्जातयः दन्तैर्दष्टा एव हृतचेतस्त्वेन न गीर्णा न चर्विता नापि त्यक्ताः कवलास्तृणग्रासा यैः अत एव हृतचेतस्त्वेनेत्यत्र तस्या मुरल्याः शब्दान्तरोत्थानभयेनत्युत्प्रेक्ष्यम् । दन्तैस्तृणधारणे मोहभयान्मागायेति तन्निवेदनव्यञ्जना च । निद्रितानामपि किञ्चिच्चलनादिकमप्यस्तीति तत्परिहारार्थं दृष्टान्तान्तरमाह । लिखितेति । पटादे लिखितं वृषादीनां चित्रमिव । लिखितग्रहणं लिखितचित्रस्योत्कीर्णचित्राच्चमत्कारकरत्वापेक्षया । एकत्वं सङ्घटेनैकतामिव गता इत्यपेक्षया ॥ ४ ॥ ५ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

हारभासः निर्मलभासः उरसि स्थितविद्युत् उरसि स्थितश्रीरित्यर्थः ॥ ४—५ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

हन्तेति । हे अबला ! इदं चित्रं शृणुत हन्तेति आश्चर्यमेतत् अयं नन्दसूनुः हारवद्विशदोऽमलो हासो यस्य यद्वा हारेषु स्फुरद्धासो यस्य उरसि स्थिता विद्युदिव लक्ष्मीर्यस्य तथाभूतः आर्त्तजनानां तद्विश्लेषजदुःखं पीडितानां मादृशां नर्मदो नितरां दुःखकारकः सन् यर्हि कूजितो वादितो वेणुर्येन तथाभूतो भवति ॥ ४ ॥

तदा व्रजे ये वृषा मृगा गावश्च वेणुवाद्येन हृतानि चेतांसि येषान्ते आराद्दूरादेव दन्तैर्दष्टा एव नतु चर्विताः कवलास्तृणग्रासा यैस्ते धृता उत्तम्भिताः कर्णा यैस्ते निद्रिताः सञ्जातनिद्राः इव लिखितचित्रमिव चित्रितवृषादिरिव चासन् तस्थुः अविदुषां तिरश्चामपीदमानन्दपारवश्यजनकं वेणुगीतमतोऽति चित्रमिति भावः ॥ ५ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

हारेण भासत इति हारभासः हारवद्विशदो हासो यस्य स तथेति पाठार्थौ उरसि स्थितविद्युत् विद्युदिव विष्णुं द्योतयति श्रीवत्साङ्कनामेति यर्हि यदा कूजितवेणुर्भवति ॥ ४ ॥

तदा एत्य समेत्य व्रजवृषादयः लिखितचित्रमिव निश्चेष्टा आसन्नित्यन्वयः धृतकर्णाः निश्चलकर्णाः कवलस्तृणग्रासः निद्रिताः कार्यान्तररहिताः ॥ ५ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

ततो वनान्तिकं गच्छन् गोगोपसङ्कलनार्थं वेणुमवादयत् तत्रास्तामन्येषां वार्त्ता पशवोऽपि मुमुहुरित्याहुः । हन्तेति युगलेन । स्थिरविद्युदिति वक्षःस्थां रेखारूपैर्लक्ष्मीमेवोत्प्रेक्षन्ते । प्रसिद्धत्वात्तु नानुवदन्ति व्रजे ये निरुद्धाः पाल्यमाना वृषास्ते तत्तत्सम्बन्धेनान्येऽपि ज्ञेयाः । निद्रितानां किञ्चिच्चलनादिकमप्य-

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

स्तीति दृष्टान्तान्तरं लिखितेति लिखितग्रहणं चोत्कीर्णचित्राच्चमत्कारित्वापेक्षया । एकत्वञ्च एकीभावापेक्षया ॥ ४ ॥ ५ ॥

श्रीमद्वल्लभाचार्यकृतसुवोधिनी ।

गवामपि वेणुनादेन तथा जातमिति वक्तुं प्रकारान्तरेण वेणुरवोद्गममाहुः । हन्त चित्रमिति । हे अवळाः ! इदमाश्चर्यं शृणुत यर्हि नन्दसूनुः कूजितवेणुः तर्हि वृषा गावः दन्तदष्टकवलाः निद्रिता आसन्निति संवन्धः कामः पशुषु सजातीय एव नोत्कृष्टे नापकृष्टे अश्वतरे त्वन्यैव व्यवस्था हीनेषु महतो रमणार्थं संवन्धोऽपि रसाभासजनकः अतः सम्भोगलक्षणं कामं निराकृत्य पशुष्वत्यावश्यकं भक्ष्यं निरुणद्धि पूर्वोक्तं वामवाहुकृतवामकपोलत्वमनुवर्त्तते तत्रैवावान्तरभेदो वक्तव्यः हन्तेति खेदे यत्र गवामपि सर्वक्रिया निवृत्तिः तत्रास्माकं न निवर्त्तेत इति चित्रं पूर्वापेक्षयाप्युत्कृष्ट देवस्त्रियोहि पुरुषोत्तमे कामुक्यो भवन्त्येव इदं त्वत्याश्चर्यमिति अवला इति संवोधनङ्कत्वा दर्शनाभावाय इदं मया प्रोच्यमानं शृणुत अत्र गोपिका नवविधाः गुणातीते प्रकारत्रयमिति कर्मज्ञानभक्तिभिः वक्तृव्यवस्थैषा प्रथमा राजस्यः इयं राजसराजसी अपेक्षितं पूर्वं सर्वमेवानुवर्त्तते सर्वत्र आदौ भगवतः स्वरूपं शृणुतेति तं चतुर्द्धा वर्णयति हारवत् हासो यस्य उरसि स्थिरा विद्युत् यस्य नन्दस्यच सूनुः आर्त्तजनानां सर्वेषामेव नर्मदः तत्र हेतुरयमिति अन्यथेदानीमग्रे प्रकटो न भवेत् द्वितीये मुहूर्त्ते निर्गच्छन्तं वालक्ष्याह तदा प्रतिमुहूर्त्तं युगलानि भवन्ति सन्ध्यासन्ध्यांशयोरन्तरेण द्वादशैव मुहूर्त्ता इति सोमोत्पत्तौ निर्णयः अन्येषां हास्यं किर्मीरितन्तन्त्रातिरज्जुवत् भगवतस्तु दन्तानां कान्त्या विभक्तो हासः मुक्ताहारवद्भवति यथा रत्नैर्व्यवहिता मुक्ता इति अनेन जगतः प्रपञ्चे मोहजनकत्वं स्थिरीकृतं स्नेहकलाभिर्मायाविभक्तेतिश्रुतार्थापत्तिरर्थनिरूपणे मूलं सर्वत्र यथा दृष्टे नानुपपत्तिः दृष्टानुसारेणैव सर्वं व्यवस्थाप्यते नहि दृष्टे अनुपपन्नं नामाव्याघातादिति लौकिकानामेषा व्यवस्था सर्वथा दृष्टविरोधो नाङ्गीक्रियत इति तथा वैदिकानां श्रुतिः यावतैव वोध्यमानः पदार्थः स्थिरीभवति तावांस्तदनुगुण उच्यत इति सर्वत्रैवैषा व्यवस्था न केवलं संसारे पुत्राद्यासक्तिमेव स्थिरीकरोति किन्तु धनासक्तिमपीत्याह स्थिरा लक्ष्मीर्यत्रेति एवम्प्रमाणवलनिराकरणार्थं द्वयं विधाय प्रमेयवलनिराकरणार्थं द्वयं कृतवानित्याह यतः स्वयमेव नन्दस्य सूनुर्ज्जातः आर्त्तानाञ्च स्वयमागत्य सुखं प्रयच्छति परिदृश्यतेच तथेतिच प्रमाणं नहि महानेवं करोति अत इदमाश्चर्यम् एतमेवार्थं प्रकटीकुर्वन् कूजितवेणुर्भवति अथवा पूर्वापेक्षया अधोवक्त्रलीलया वेणुर्वाद्यते हारवद्धासो यस्मिन् उरसि तस्य स्थिरताविभागः स्थैर्यंचाश्चर्यं श्रीवत्सोऽप्युत्कृष्ट इति शोभार्थं तस्य स्थिरत्ववर्णनं तादृशस्य नन्दसूनुत्वे स्नेहो भवेत तत्रापि स्वोपकारक इति कूजितत्वं वादनविशेषधर्मः सर्वेषामान्तरं प्राणधर्ममप्याकर्षति ॥ ४ ॥

यत्र पशूनामपि प्राणादिधर्महारी तत्रान्येषां किं वक्तव्यमिति पशूनां निरूपयति एकस्य तथात्वं हेत्वन्तरसिद्धमपि भवेत् अत उक्तं वृन्दश इति । समूहशः यत्रैव वेणुनादः प्रविष्टः तेषां सर्वेषामित्यर्थः व्रजस्थिता वृषाः ककुद्मिनो मत्ताः उत्सृष्टवृषा इव शकटादिनेतारः ते व्रजसमीप एव तिष्ठन्तीति ग्राम्यपशूपलक्षणार्थं व्रजपदं मृगा गावश्च अरण्ये मिलिता भवन्ति आरण्या ग्राम्याश्चैवं भवन्तीति ज्ञापनार्थं मृगपदं किं वहुना सर्वे एव पशवः वेणुवाद्येन कृत्वा हृतचेतसो भवन्ति नापि भगवत्समीपगमने समर्थाः किन्तु हृतचेतसः दूरादेव भवन्ति अनेन वेणुनादस्य स्वाभाविक एवायं धर्मो नतु भगवत्समीपकृत इति केवलास्तृणरूपाः केवलं दन्तैर्दष्टाः न त्यागे न च भक्षणे समर्थाः दन्तदंशमात्रेणैव प्रयत्नो निवृत्त इति नादस्येतरकार्यनिवर्त्तकत्वमुक्तं पूर्वे क्रियाया अत्यावश्यकत्वाय कवलपदं देवस्त्रीवन्मूर्च्छानिवृत्त्यर्थमाह । धृतकर्णा इति । अन्यत्सर्वं परित्यज्य कर्णमेव साधनं धृतवन्तः ततो वाह्यान्निवृत्ता इत्याह । निद्रिता इति । ततो नादेन सर्वतो व्याप्ताः लिखितं गवादीनां चित्रमिव पश्चात्ते जाताः स्थावरापेक्षयापि स्थिरा जाताः पूर्वोक्तार्थादधिकोऽर्थ इति चित्रता ॥ ५ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

देववनितानां विदग्धप्रवराणां का वार्ता मूढजन्तूनामपि मोहं शृणुतेत्यन्या आहुः । हन्तचित्रमत्यद्भुतादप्यद्भुतमिदामित्यर्थः हे अवलाः स्त्रीणां युष्माकं पातिव्रत्यवलं कृष्णेन प्रथमत एवापहृतमिति भावः । हाराणां वलाकानामिव हासः प्रकाशो यत्र तथाभूते उरसि मेघोपमे स्थिरा विद्युत्तत्रत्यलक्ष्मीरेखेव यस्य सः तेन वलाकाविद्युद्भूषितकृष्णवक्षोमेघेनैव भवतीनां पातिव्रत्यनिदाघो ध्वंसित इति भावः । अतएवायम् आर्तजनानां युष्माकं नर्म सर्वलोककर्तृकमुपहासं ददातीति सः कदा यर्हि कूजितवेणुर्भवति तदेत्यर्थः । वेणुनादश्रवणमात्रेण शिथिलनीवीकवरीकाः प्राप्तोन्मादाः सर्वलोकहास्यास्पदीभूता भवत्यो भवन्तीतिभावः । युष्माकं मानुषीणां का वार्त्ता तिर्य्यग्जातयोऽपि वेणुनादेन मूर्च्छिताः क्रियन्ते इत्याहुः वृन्दशः प्रतियूथमित्यर्थः । व्रजस्थाः वृषा वनस्था मृगाः गावश्च दन्तैर्दष्टाः कवळास्तृणग्रासा यैस्ते इति तृणेषु दन्तैर्दष्टेषु सत्सु तन्निगिळनात् पूर्वमेव आरब्धेन वेणुवाद्येनैव वळात् कर्णमार्गैरेव देहान्तः प्रविष्टं नतु मुखमार्गेण तृणग्रासा देहान्तः प्रविष्टा अतः एव धृता उत्तम्भिताः कर्णा यैस्ते ततश्च तेन हृतानि चित्तानि येषां ते इत्यत एव सर्वेन्द्रियव्यापाराभावान्निद्रिता इव तत एव तृणग्रासास्ते दन्तदष्टत्वस्यानपगमाद्भूमावपि न पतिता इति भावः । ततश्च प्रवलीभूतेन जाड्यसंचारिणा जनिते स्तम्भातिशये सति मूर्च्छायांञ्च सत्यां श्वासस्यापि प्रायस्तब्धीभावाल्लिखितचित्रमिवेत्युपमान्तरं दत्तं तत्रापि लिखितेत्युत्कीर्णचित्रादपि लिखितचित्रस्य चमत्कारत्वातिशयविवक्षयोक्तं केनाप्यद्भुतचित्रकारेणाकाशपटे लिखितानि चित्राणीति विस्मयरसो ध्वनितः ॥ ४—५ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अः वासुदेव एव वलं यासां तास्तथा तासां सम्बुद्धौ हे अवलाः । कृष्णाधाराः हन्तेत्यव्ययं हर्षे हन्त हर्षकरं चित्रमिदं शृणुत यः उरसि आस्माकमहर्निशं वर्तते सोऽयम् हारेषु

वर्हिणस्तबकधातुपलाशैर्बद्धमल्लपरिबर्हविडम्बः ॥
कर्हिचित्सबल आलि ! स गोपैर्गाः समाह्वयति यत्र मुकुन्दः ॥ ६ ॥
तर्हि भग्नगतयः सरितो वै तत्पदाम्बुजरजोऽनिलनीतम् ॥
स्पृहयतीर्वयमिवाबहुपुण्याः प्रेमवेपितभुजाः स्तिमितापः ॥ ७ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

तदीयेषु अधोवदनेन क्वचिद्धसतः अस्मदीयेषु चाभिमुख्येन विहरतः स्फुरद्धासो यस्य सः यद्वा हारवद्विशदो हासो यस्य सः स्थिरा अचला वक्षोगता विद्युदिव भासमाना लक्ष्मीः देहगता कान्तिर्वा यस्य सः आर्तानां संसारतापपीडितानामस्मदादीनां नर्म तदार्तत्वनिराकरणपूर्विकां क्रीडां ददातीति सः द्रवकेलिपरीहासाः क्रीडा खेलादि नर्मचेति कोशात् यर्हि यदा कूजितो वादितो वेणुर्येन स तथाभूतो भवति तदा व्रजसंबन्धिनः वृषा मृगा गावश्च वृन्दशः वेणुवाद्येन हृतान्याकृष्टानि चेतांसि येषां ते दन्तैर्दष्टाः कवलाः ग्रासाः यैस्ते धृताः वेणुगीतश्रवणानुकूलीकृताः कर्णा यैस्ते निद्रिताः सुखातिशयेन संजातनिद्रा इव लिखितचित्रमिवच आरात् केचिद्दूरे केचित्समीपे इत्येवं यथायथमेव आसन् तस्थुरित्यर्थः । आरादित्यव्ययं दूरसमीपयोः तच्चात्रोभयार्थपरत्वविवक्षयोपन्यस्तम् ॥ ४ ॥ ५ ॥

भाषा टीका ।

हे अवला एक बडी आश्चर्य की बात यह सुनो वक्षस्थल में जिनकी स्थिर रहने वाली विजुली सरी की लक्ष्मी रहती है जिनके हृदय की हारों पर हास शोभित होता है सो कृष्ण ऐसे दुःखित जनों के सुख देने वाले यह नंदनंदन जब वंशी को बजाते हैं तब झुंड के झुंड ब्रज के बैल गउ मृग सब वंशी के वाद्य से दूरही से चित्तके हरण होजाने से घास के ग्रास को दांतों में दवाकर कानों को उठाकर सो गये सरी के चित्र में लिखे सरीके होरहते हैं ४—५ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

किञ्च अचेतनासु सरित्सु तदतिव चित्रमित्याहुः । हे आलि ! सखि वर्हिणो मयूरस्तवका मयूरपिच्छा धातवो गैरिकादयश्च पलाशानि पल्लवाश्च तैर्बद्धश्चासौ मल्लानां परिबर्हः परिकरस्तं विडम्बयत्यनुकरोतीति तथा स मुकुन्दो गोपैः सह वेणुनेत्युपरितनमत्रापि ज्ञातव्यं यत्र यदा गाः सम्यगाह्वयति ॥ ६ ॥

तर्हि तदा तद्ध्वनिश्रवणात् अनिलेनानीतं तस्य पदाम्बुजरजः स्पृहयन्त्य इव भग्नगतयः सरितो वै निश्चितं वयमिव ता अप्यबहुपुण्या यतो न प्राप्नुवन्ति केवलं प्रेम्णा वेपिता भुजास्तरङ्गा यासां ताः स्तिमिता निश्चला आपो यासां ताः गोप्योऽपि लोचनयोस्तिमितजला भवन्तीति ॥ ७ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

ततो वनान्तःप्रविष्टस्य मल्लवेशोचितवन्यभूषणैर्भूषितस्य गवादिजलपानाद्यपेक्षया विदूरनदीकसरोवरमयदेशगतस्य गोसमाह्वानार्थवेणुवाद्यविशेषान्नदीनामपि भावविशेषोदयेन मोहं सम्भावयन्ति । वर्हिण इति । स वेणुवाद्यविशारदो मुकुन्दः कर्हिचिद्रवां प्रथमं पानसमये यत्र यदा सम्यक् प्रीतिपूर्वकं तत्तच्चित्रनामभिराह्वयति अप्रधान एव सहार्थे तृतीया विधानात् । श्रीकृष्णनादपोषणार्थ एव श्रीवलादीनां नादो वोध्यते तेन च सरितां श्रीकृष्णनिष्ठ एव भावोद्बोधो व्यज्यते । संहत्य नादश्च तासां सर्वासामेव दुरगत्वात् अत एव गा इति बहुत्वं ततो दूरश्रवणात् सरित इति च वक्ष्यते । आलि ! हे सखीति सरितां तादृशभावे विश्वासार्थम् । यद्वा सख्येनैव स्वसादृश्यं कथयत इति भावः । अन्यत्तैः । अथवा वर्हिणशब्देन कथञ्चिद्वर्हमेवोच्यते । स्तवकाः पुष्पगुच्छाः पलाशाः कोमलपत्राणि । यदा हे गङ्गे हे यमुने हे सरस्वतीति गङ्गादिनाम्नीर्गाः समाह्वयतीति मधुरतम स्वकण्ठेनैवाह्वयतीति विशेषो ज्ञेयः । तदा सरितो माथुर्यो मानसगङ्गायमुनासरस्वत्याद्याः प्रकारान्तरेप्राप्त्ययोग्यता मननेनानिलमात्रप्रापितं रज एकमपि स्पृहयन्त्यो लक्ष्यन्ते "स्पृहेरीप्सित" इति सम्प्रदानत्वेऽपि रजसः कर्मत्वं "कर्तुरीप्सिततमं कर्मे"ति स्मरणादीप्सिततमत्वविवक्षया । यतस्तत्स्पृहाहेतोः स्तब्धप्रवाहतया भग्नगतयो लक्ष्यन्ते । सरित इत्यन्वर्थतया सततप्रवाहवत्योऽपीत्यर्थः । भग्नगतय इति श्लेषेण निजपतिसमुद्रानुसरणभङ्गेन लोकद्वयोपेक्षोक्ता । अतस्तादृश्योऽतस्तदप्राप्त्या वयमिवाबहुपुण्या अप्रचुरशुभादृष्टा एव लक्ष्यन्ते अस्माकमिव तासामिव तासामपि श्रीकृष्णक्रीडाश्रयसजातीयविजातीयगणभेदासंख्यत्वेन विरलावसरत्वादिति भावः । किन्तु केवलं प्रथमतः प्रेम्णा तद्रजः प्राप्तीच्छया वेपिता भुजाः प्रसारितकरा इव तरङ्गा यासां तादृश्यो लक्ष्यन्ते। पश्चात् स्तिमितापो निस्तरङ्गतया स्तब्धसमस्तचेष्टाश्च लक्ष्यन्ते इत्यर्थः । अन्यत्तैः । तत्र गोपीनां लोचनयोः स्तिमितजलत्वं सदा सार्द्रत्वात् । यद्वा सरित्स्वपामङ्गत्वात् स्वपक्षे स्तिमिताङ्गा इत्यर्थः तदेतावानुत्प्रेक्षाक्रमः वस्तुक्रमस्तु प्रथमं तादृशशब्दस्पर्शस्ततः प्रवाहस्तम्भस्ततस्तरङ्गमात्रशेषचलनत्वं ततस्तद्राहित्यमपीति । किञ्चोत्प्रेक्षाक्रम एवं ज्ञेयः । प्रथमं तच्छ्रवणं ततो गतिभङ्गः ततस्तद्रजःकालिङ्गनेच्छया भुजकम्पः ततस्तदप्राप्तिदुःखेन स्तम्भः ततस्तादृशरजोमात्रस्पृहेति । तदेवं तथा तथाभूता अपि तन्मात्रं स्पृहयन्त्य एव लक्ष्यन्ते न तु प्राप्तवत्यः अनिलानुकूल्यात् सुलभत्वात् । यतो वयमिवाबहुपुण्या इत्यन्वयो ज्ञेयः । तदेवमचेतनानामप्येवं वार्त्ता को वा नामास्माकं दोष इति भावः ॥ ६ ॥ ७ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्।

वर्हिणशब्देन पिच्छो लक्ष्यते कर्हि कदाचित् यत्र देशे यस्मिन् देशे इत्यर्थः। तर्हि तदा स्पृहयतीः स्पृहयन्त्यः प्रेमवेपितभुजाः प्रेमचलिततरङ्गाः ॥ ६—९ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचान्द्रिका।

इतोऽप्यतिचित्रं शृणुतेति काश्चिदाहुः। वर्हिण इति। हे आलि! सखि वर्हिणः मयूरस्य स्तवको वर्हः यद्वा वार्हिणशब्देन तत्पिच्छो लक्ष्यते सच स्तवका गुच्छा धातवो गैरिकादयश्च पलाशानि पल्लवाश्च तैर्वद्धश्चासौ मल्लानां परिवर्हः परिकरश्च तं विडम्बयत्यनुकरोतीति तथा स मुकुन्दो वलरामेण सहितः कर्हिचिद्यदा यत्र देशे गोपैः गाः समाह्वयत्यस्य वेणुगीतेनेत्यादिः वेणुगीतेन गोपान् गाश्च समामह्वयति ॥ ६ ॥

तर्हि तदाऽचेतनाः सरितोऽप्यनिलेन नीतं प्रापितं तस्य पदाम्बुजरजः स्पृहयतीः स्पृहयन्त्य इव भग्ना गतिर्यासां तथाभूताः वै निश्चितं भुग्नगतय इति पाठे कुटिलगतयः तथापि ता वयमिवाबहुपुण्या यतो न प्राप्नुवन्ति केवलं प्रेम्णा वेपिताः कम्पिताः भुजास्तरङ्गा यासां स्तिमिता आपो यासां तथाभूताश्च गोप्योऽपि लोचनयोः स्तिमितजला भवन्तीति वयमिवेति दृष्टान्ताभिप्रायः ॥ ७ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

हे आलि! सखि कर्हिचित्कदाचित्। यत्र यदा यस्मिन् देशे स्थित्वा गाः समाह्वयति ॥ ६ ॥

तर्हि तदा तस्मिन् देशे स्थिताः सरितस्तीरे पयसि वाऽनिलनीतं तत्पदाम्बुजरजः आमृशन् अस्पृशन्वे इत्यन्वयः कथंभूतः वर्हिणस्य मयूरस्य स्तवकैः पिच्छवन्धविशेषैः धातुभिर्गिरिसंभवैः मनःशिलादिभिः पलाशैः पल्लवः बद्धस्य मल्लपरिवर्हस्य मल्लपुरुषशिरःपरिकरस्य विडम्बो ऽनुकारो यस्य स तथा मयूरो वर्हिणो वर्हो नीलकण्ठो भुजङ्गभुगित्यमरः किञ्च बहूनि अनेकानि पुण्यानि यासां तास्तथा विपुलानेकयोर्बहुरिति यादवः प्रेम्णा कामोन्नतस्नेहेन वेपिताः कम्पिताः भुजास्तरङ्गलक्षणा यासां तास्तथा अतएव हतवेगाः मन्दीकृतस्यन्दनलक्षणजवाः अतएव भग्नगतयः स्तिमितप्रवाहाः आसन्नित्यनुषङ्गः अनेन सरन्तीति सरित इति सरिच्छब्दार्थो लुप्त इति दर्शितम् ॥ ७ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

ततो वनान्तःप्रविष्टस्य तस्य वन्यभूषणैर्भूषितस्य गवादिप्रथमजलपानायपेक्षया विदूरनदीकसरोवर मयदेशगतस्य गोसमाह्वानार्थं वेणुवाद्यविशेषात् नदीनामपि भावविशेषोदयेन मोदं सम्भावयन्ति। वार्हिणेति युग्मकेन। अप्रधान एव सहार्थे तृतीया विधानात्। श्रीकृष्ण नादपोषणार्थं एव श्रीवलादीनां नादो बुध्यते। तेन च सरितां श्रीकृष्णनिष्ठ एव भावोद्बोधो ज्ञाप्यः तदा सरितः प्रकारान्तर प्राप्त्ययोग्यतामननेनानिलमात्र प्रापितं रज एकमपि स्पृहयन्त्यो लक्ष्यन्ते। यतस्तत्पूर्वप्रवाहतया भग्नगतयो लक्ष्यन्ते। ततस्तादृश्योऽपि तदप्राप्त्या वयमिवाबहुपुण्या अप्रचुरशुभादृष्टा एव लक्ष्यन्ते अस्माकमिव तासामपि श्रीकृष्णक्रीडाश्रय सजातीयबिजातीयगणभेदासङ्कुलत्वेन बिरलावसरादिति भावः किन्तु केवलं प्रथमतः तद्रजः प्राप्तीच्छया वेपिता भुजाः प्रसारितकरा इव तरङ्गा यासां तादृश्यो लक्ष्यन्ते। पश्चात्स्तिमितापो निस्तरङ्गतया स्तब्धचेष्टाश्च लक्ष्यन्त इत्यर्थः। तदेवमुत्प्रेक्षा क्रमः। वस्तुक्रमस्तु प्रथमं तादृशशब्दस्पर्शस्तत्प्रवाहस्तम्भस्ततरङ्गमात्रावशेष चलनत्वं ततस्तद्राहित्यमपीति ॥ ६ ॥ ७ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी।

वेणुनादेन नदीनामतिजडानामपि स्पृहा जायत इति वक्तुं पुनर्वेणुनादं वर्णयन्ति। वर्हिण इति। आवेशो देववेशश्च पूर्वे निरूपितौ लोळावेशोऽद्भुता निरूप्यते निरन्तर क्रियाहि नदीनाञ्चेतनानान्तु निद्रामूर्च्छादौ क्रियानिवृत्तिरपि दृष्टा नदीनान्तु न कदापि निवर्त्तत इति। तत्रापि महतीनां बन्धोऽपि न तासां भवति सापि वेणुनादेन निवृत्ता वर्हिणो मयूरस्य स्तवकाः पुष्पगुच्छानि धातवो गैरिकादयः पत्राणिच धातूनां वा पत्राकारेण लेखाः कमलपत्रस्यापि आकारार्थं वध्यन्त इति तैः कृत्वा मल्लानां परिवर्हः अलङ्करणं वेश इति यावत् स्वयं स्तवकादिभिः वद्धो योऽयं मल्लपरिवर्हस्तं विडम्बयति विडम्बो वावाद्यः अस्वाभाविकं विडम्बनमेव भवति नटमल्लत्वात् अनेनायं नादो नृत्योपयोग्येव निरूपितः तेन क्रियाशक्तिरुक्ता नादस्था निरूपिता नदीनामाकर्षे हेतुर्भवति कर्हिचिदिति यदोत्साहः क्रियाशक्तौ अतएव सबलः बलभद्रसहितः आलीति सम्बोधनं गोप्यतया अयमर्थो निरूपितः अप्रतारणार्थं च प्रायेणैषा तदा दर्शनार्थं गतवती स्नानादिव्याजेन एवं सामग्रीं विधाय सोऽस्माकं भोक्ता वस्तुतो वा जातो वा तादृशो गोपैः सहितः अनेनात्र वैकुण्ठस्थितलीला सूचिता अत्रापि लक्ष्मीः अस्माभिः सहिता रात्रौ गोपैः सहिता दिवसे तिष्ठतीति अतएव संबोधनं रहस्यसूचकम् तदा गाः समाह्वयति वेणुनादेनैव प्रकरणितत्वात् वेणुनाह्वयति इत्यग्रे वक्ष्यति वेणुतुल्यतया निरूपणार्थं वा वेणोरग्रहणं गवामाह्वाने हेतु मुकुन्द इति मोक्षोहि ताभ्यो देय इति स्वतस्तासां साधनाभावादाकार्य प्रयच्छति स्वरसं वा तत्र स्थापयितुमुद्गता क्रियाशक्तिमहदेव कर्म करोतीति गवामाकारणमुक्तम् ॥ ६ ॥

तत्र योगार्थं ज्ञात्वा नद्योऽपि नित्यं गच्छन्तीति ताः स्थगिता जाता इत्याह। तर्हीति। तत्क्षणमेव भग्नगतयो जाताः नहि भगवदाज्ञा केनाप्युल्लङ्घ्या भवति सरित इति प्रवाहैकस्वभावत्वं निरूपितं तासां वैष्णवत्वकामना तासां हि समुद्रोऽधिपतिः यथा भगवान् भूयात् तदर्थं तत्पदाम्बुजरजः स्पृहयतीर्जाताः स्पृहयन्त्यः रजसः संगन्धार्थमुपायमाह। अनिलनीतमिति। अनिलेन वायुना सार्थं नीतं तेन सहप्रत्यासत्तिः जलार्थो सः भगवदीया एव भगवत्संबन्धं प्राप्नुवन्तीति रजःकामना दूराभिप्राया काम एवात्रो देहयः देवतात्वान्नदीनाम् अतएवाग्रे कालिन्दी तथा भविष्यति

अनुचरैः समनुवर्णितवीर्य आदिपुरुष इवाचलभूतिः ॥
वनचरो गिरितटेषु चरन्तीर्वेणुनाह्वयति गाः स यदा हि ॥ ८ ॥
वनलतास्तरव आत्मनि विष्णुं व्यञ्जयन्त्य इव पुष्पफलाढ्याः ।
प्रणतभारविटपा मधुधाराः प्रेमहृष्टतनवः ससृजुः स्म ॥ ९ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

इदानीं तथाभावे भाग्यं नास्तीत्याहुः । अबहुपुण्या इति । न बहु पुण्यं यासां यथा शीघ्रमेव गोरूपत्वं गोपालरूपत्वं दिवसे रात्रौ स्त्रीरूपत्वमिति पुण्यैर्विना समीहितार्थसिद्ध्यभावात् कथं ज्ञायते तासामेवं भाव इति तत्राह । वयमिवेति । यथा वयम् अबहुपुण्याः अन्यथा दिवसे गावो गोपा वा भवेम अतः स्वदृष्टान्तेन ज्ञायते स्पृहामेव कुर्वन्ति न तु तासां कार्यं सिध्यतीति किञ्च तासां सात्त्विकभावादपि हृद्गतो भावो लक्ष्यत इत्याहुः । प्रेमवेपितभुजा इति । प्रेम्णैव भुजानां वेपनं न तु वायुवशात् अतो विरहसन्तापयुक्ताश्च लक्ष्यन्ते किञ्च स्तम्भोऽपि जात इत्याहुः । स्तिमितापः इति । स्तिमिताः स्तब्धा आपो यासाम् एवं रजोभेदास्त्रिविधा निरूपिताः ॥ ७ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

वृषमृगादीनां चेतनानां का वार्ता अचेतनानामपि वेणुश्रवणहेतुकं स्तम्भं शृणुतेत्यन्या आहुः । बर्हिणस्य मयूरस्य स्तवकाः पिच्छानि यद्वा बर्हिणशब्देनैव बर्हिणः पिच्छानि लक्षितानिच स्तवकाः पुष्पगुच्छाश्च धातवो गैरिकादयस्च पलाशानि पल्लवाश्च तैर्बद्धो यो मल्लानां परिबर्हः परिकरस्तं विडम्बयति अनुकरोति स्वशोभया उपहसतीति वा सः बलदेवसहितः स मुकुन्दः गोपैर्युक्तः गाः हिंहो कालिन्दि गङ्गे सरस्वतीति तासां नामभिर्यत्र यदा आह्वयति तर्हि सरितो यमुना मानसगङ्गा सरस्वत्याद्याः सलिलोऽन्यास्च व्रजस्था अचेतना अपि चेतनीं प्राप्य हन्त हन्ताहो अस्माकं भाग्यं यतः स्नानावगाहनाद्यर्थमस्मान् आह्वयति तदितः स्वतीक्ष्णप्रवाहेण तटं भित्वा यामं इति कृष्णपार्श्वं यियासवोऽपि भग्नगतयः अत्यानन्दजाड्येन स्वाभाविकगतेरपि स्तम्भात् विगतप्रवाहा एव भवन्तीति शेषः श्लेषेण कृष्णाङ्गसङ्गसुखप्राप्त्यभावादन्यनदीकृतोपहासाच्च ऐहिकी गतिर्भग्ना पातिव्रत्यलोपात् पारलौकिकीच गतिर्नष्टा अहो तासामभाग्यमिति भावः किंचिद्भाग्यं चाहुः । तस्य पदाम्बुजः अनिलनीतम् अनुकूलपवनेनानीतं स्पृहयन्त्यः प्राप्यापि तृप्त्यभावादेव पुनःपुनरिच्छन्तीत्यर्थः । अतो वयमिव कृष्णसंगाद्यप्राप्तिप्राप्तिभ्याम् अबहुपुण्याः नाप्यपुण्या अल्पपुण्या इत्यर्थः । प्रेम्णा वेपिता भुजास्तरङ्गा यासां ता अस्माकमपि भुजाः प्रेम्णा कम्पन्ते स्तिमिताः जाड्येन कठिनभूयापि पुनरार्द्रीभूता आपो यासां ताः वयमपि नेत्रयोः स्तिमितजला जलैस्तिमिता भवामः महिताम्न्यादिः समासान्ताभाव आर्षः एवं वयमपि पतिमात्रादिभिः कृष्णाभिसारवारणात् भग्नगतयः लोको पहासात् पातिव्रत्यलोपाच्च ऐहिकपारलौकिकगतिरहिताश्च तदङ्गसौरभ्यस्पृहावत्यश्च ॥ ६—७ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अन्याः अतोऽतीव चित्रं शृणुतेत्याशयेनाहुः । बर्हिण इति हे आलि ! बर्हिणो मयूरस्य स्तवकैर्बर्हः इति समासान्तःसार्थे योज्यम् धातुभिर्गैरिकादिभिः पलाशैः पल्लवैश्च बद्धश्चासौ मल्लानां परिबर्हः परिकरः तं विडम्बयति अनुकरोतीति तथा सः सबलः बलेन रामेण सहितः गोपैश्च सहितः सः अस्माकं प्रियो मुकुन्दः कर्हिचित्कस्मिंश्चित्समये यत्र देशे गाः समाह्वयति वेणुगीतेनेति शेषः तर्हि तदा सरितः यमुनाद्याः तत्पदाम्बुजरजोऽनिलनीतं वायुना तासां तटेषु आनीतं वै निश्चितं स्पृहयतीः स्पृहयन्त्यः प्रेम्णा वेपिताः भुजास्तरङ्गा यासां ताः स्तिमिताः निश्चलाः आपो यासां तास्तथाभूता भग्नगतयो भवन्ति अतः वयमिव आ सर्वतो बहुपुण्याः ॥ ६ ॥ ७ ॥

भाषा टीका ।

हे आलि ! जब ये मुकुंद मोरके पंख गेरू आदि धातु वन के पत्रों से मल्लों के पहरने सरी के सिंगार करते हैं और फिर बलदेवजी के सहित गोपों के सहित गउओं को बुलाते हैं तब सब यमुना आदिक नदी चलने से बंद होजाती हैं जल उनके स्थिर होजाते हैं प्रेम से लहर रूपी भुजा उनके कांपते रहते हैं परंतु पवन से लाया जो मुकुंद के चरण का रज तिसको चाहती सरीकी रहती हैं परंतु हम सरी की मंद भागि होने से उनको संग मिलता नहीं है ॥ ६-७ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

इथतोऽप्यतिचित्रं दृश्यत इत्याहुः । अनुचरैर्गोपैर्देवादिभिर्वा मुग्धानां वाक्यमादिपुरुष इवेति अचलभूतिर्निश्चलश्रीः वेणुना तत्तन्नाम्ना गानेन ॥ ८ ॥

तदा प्रणता भारेण विटपाः शाखा यासां ता वनगता लताः स्वस्मिन्विष्णुं प्रकाशमानं सूचयन्त्य इव मधुधारा ववृषुः स्मेति विस्मये तरवश्च तथा तत्पतीनामपि तथैवानन्द इति भावः । एतानि विष्णु व्यक्तिलक्षणानि ॥ ९ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

ततो गाः पाययित्वा स्वयमपि च पीत्वा ताभिः सह सुतरुच्छायां पर्वतभूमिमवगाह्य वत्सवाच्छन्दास्ताश्चारयंस्तत्र तत् निजचरितमयं सखिभिर्गीतं श्रवणावधानेन दूरगतास्ताः स्वयं

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

मेव वेणुना जुहाव यत्र च तत्रास्तां स्वस्वाधिष्ठातृरूपेण परमदे-
वीनां नदीनां वार्त्ता तथा अन्येषां तत्रत्यानां जङ्गमजातीनामहो
स्थावरजातीनामप्येतादृशत्वमित्याहुः । अन्विति । अनुचरैः सदा
सङ्गिभिर्गोपैरिति प्रणयविशेषो दर्शितः । अत एव समिति
सम्यक्तया सर्वांशतः प्रेमविशेषतश्चोत्तमप्रकारेणेत्यर्थः । अन्वि-
त्यनुक्रमेण व्यञ्जितमातापित्रादिस्नेहानुबन्धेन जन्मादिलीलाप्रव-
न्धेनेत्यर्थः । यद्वा । सह भावेन सर्वैर्मिलित्वा इत्यर्थः । यद्वा ।
तत्समीपवर्त्तित्वेन प्रत्येकस्वस्ववैदग्धीज्ञापनपूर्वकत्वेनेत्यर्थः ।
तादृशतया वर्णितं सकौतुकं रसभावालङ्कारगानतालाभि-
नयनादिप्राचुर्येण प्रस्तुतं वीर्यं तत्तत्प्रभावमयं चरितं यस्य
सः असाधारण एव चासावित्याहुः । आदीति । यद्वा । आदि-
पुरुषः आदिनारायणो यथा तथैवाचलश्रीरपि वनचर इत्या-
दिनान्वयः । तेन च परमविनोदित्वादिकमुक्तम् । दृष्टान्तश्च
तादृशत्वनिश्चयार्थः । सर्वोत्तमायामपि तस्यैवादिपुरुषताया-
मिवशब्दप्रयोगस्तासां तादृशकेवलतन्माधुर्यमयभावविशेष-
स्वभावेनाननुसन्धानात् । अचलश्रीत्वनिर्देशस्तु तस्य च्युतिर-
हितोदितरासस्रोतस्वाभाविक तत्तत्सम्पदनुभवात् । एतदचल-
भूतित्वमेवोत्तरोत्तरं दर्शयिष्यते । वनचरः वनेषु चरन्नित्यर्थः ।
इति गवामदृश्यता सूचिता । वस्तुतस्तु नित्यवृन्दावनविहा-
रैव सन्नचलविभूतिरित्यर्थः । गिरितटेषु विषमप्रदेशेषु चरन्ती-
रिति परिश्रान्तिः सूचिता । अत एव वेणुनादेनैव समाह्व-
यति स गोपचूडामणिर्विचित्र तदाह्वानचतुर इत्यर्थः । हि
एव यदैव वनेति सप्तम्या लुक् छान्दसः । तदा वने यावत्यो
लतास्ताः सर्वा अपीत्यर्थः । श्लेषेण वन्यत्वात्तत्रापि लतात्वा-
द्वैदग्ध्यादिरहिता अपीत्युक्तम् । तथा वने यावन्तस्तरवस्ताव-
न्तश्च । तत्र लिङ्गव्यत्ययेन व्यञ्जयन्त इति बोद्धव्यम् । लता-
नामादौ निर्देशः स्त्रीत्वेन स्वतुल्यभावप्राधान्यविवक्षया । विष्णु-
मिति सर्वत्र स्फुरद्रूपत्वाद्व्यापकत्वेन प्रवेशशीलत्वेन वा वर्त्त-
मानतया श्रीकृष्णमित्यर्थः । तमात्मनि स्फुरन्तं व्यञ्जयन्त्यो
बोधयन्त्य इवेति भावपरवशाचेष्टयैव व्यञ्जनेन स्वयमेव दृष्टान्त-
गर्भश्लेषेण विष्णुं श्रीनारायणमिव तमित्यर्थः । दृष्टान्तव्यञ्जना
च आदिपूरुष इवेत्युक्त स्पष्टीकरणाय । तत्र दृष्टान्तपक्षे
लतातरवः स्त्रीपुरुषजातयः पुष्पफलाढ्याः । यस्यास्ति भक्ति-
र्भगवत्यकिञ्चनेति सर्वं मद्भक्तियोगेन मद्भक्तो लभतेऽञ्जसेति
च प्रमाणेन सर्वसाधनसाध्यसम्पन्नाः । तथापि प्रणतभारवि-
टपा नेमुर्निरीक्ष्य परितृप्तदृशो मुदाकैरिति चतुःसनादिवन्नम्राः
मधुधारा अश्रूणि दार्ष्टान्तिकपक्षे लतातरुत्वादि मिषेण तत्तद्रूपा
इत्यर्थः । तत्राङ्कुरोद्भेदमिषेण हृष्टतनवः । ततश्चास्पन्दनं गति-
मतां पुलकस्तरूणामित्यादिभिः श्रीगोकुले प्रसिद्धमेव प्रेमव्या-
प्येति पक्षद्वयेऽपि सर्वत्र सम्बन्धनीयम् । समासप्रविष्टस्यापि
वा प्रेमशब्दस्यार्थवशादन्यत्र सम्बन्धः । ववृषुर्निरन्तरं बहु-
शोऽमुञ्चन् ससृजुरिति सार्वत्रिकमूलपाठे अपूर्वत्वेन प्रवर्त्तया-
मासुः । यद्वा । मधुनो धारा यासु तथाभूताः सत्यः प्रेम
ससृजुः । सार्वदिकेषु च लोकेषु स्ववृत्तान्तेन श्रीकृष्णप्रेमवि-
स्तारयामासुरित्यर्थः । तदेवमुभयत्र विष्णुत्वं तद्व्यक्ति चिह्नानि
च व्याख्यातानि ॥ ८ ॥ ९ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रिका ।

स्थावरेष्वप्यतिचित्रं दृश्यत इत्याहुः । अनुचरैरिति । स कृष्णो यदा
हि वने चरति गिरेस्तटेषु चरन्तीर्गाः वेणुना तन्नामोपेतेन वेणुगीत-
नाह्वयति कथं भूतः अनुचरैर्गोपैर्देवादिभिर्वा सम्यगनुवर्णितं वीर्यं
यस्य तथाभूतः मुग्धानां वचनमादिपुरुष इवेति अचला भूतिर्लक्ष्मी-
र्यस्य सचेति इतरेषु चलापि लक्ष्मीर्न तस्मिंश्चलेति भावः । तथा तदा
प्रणता भारेण विटपा यासां ताः पुष्पैः फलैश्चाढ्याः प्रेम्णा हृष्टा
उदाश्चितास्तनूरुहा यासां ता वनगता लताः स्वस्मिन्विष्णुं प्रकाश-
मानं सूचयन्त्य इव मधुधाराः ववृषुस्तथा तरवश्च तत्पतीना-
मपि तथैवानन्द इति भावः स्म विस्मये ॥ ८—९ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अनुचरैः सनकादिभिः अन्यत्र गोपैः अचलभूतिः स्थिर श्रीः
भूतिः श्रीजन्मभस्मास्विति यादवः वनचरः कक्षे सञ्चरन् । अन्यत्र
वने चरणं शयनं जलशयन इत्यर्थः । यदा वेणुना ध्मातवेणु-
ध्वनिना गिरितटेषु चरन्तीः तृणभक्षणं कुर्वतीः अन्यत्र वायो-
स्तटवद्विस्तृते मुखे वर्तमाना गाः पशून् अन्यत्र वेदवाणीराह्व-
यति सनकादिभिः स्तूयमानो जलशयानः आदिपुरुषो वायु-
मुखे वर्तमानश्रुतीस्तदर्थकथनपूर्वकमुपदिशति ॥ ८ ॥

तदात्मनि स्थितं विष्णुं व्यञ्जयन्त इव पुष्पफलाढ्याः अत
एव प्रणतं प्रणमनं बिभ्रतीति प्रणतभाराः अग्रालयः विटपाः
शाखा येषां तरूणां यासां लतानां वा ते तास्तथा यद्वा पुष्प-
फलभारेण नता विटपा येषां ते तथा प्रेम्णा हृष्टरोमाञ्चितास्तनवो
येषां यासां वा ते तास्तथा एवंविधा वनलतास्तरवश्च मधु-
धारा रसधाराः ससृजुः स्म सृत्वा सृष्टवन्त इत्यर्थः । अन्यत्र
आत्मनि हृदये स्थितं विष्णुं व्यञ्जयन्तः अपरोक्षी कुर्वन्त इव
ज्ञानपुष्पेण जीवन्मुक्त्यवस्थाफलेनाढ्याः प्रणतस्य भारो भरणं
येषां ते प्रणतभाराः ते विटपा भुजा येषां ते तथा मूर्ध्न्यारो-
पिताञ्जलिपुटा इत्यर्थः । अतएव भक्त्युद्रेकेण रोमाञ्चितगात्राः वने
अरण्ये रता निवृत्तिधर्ममनुतिष्ठन्तो वने भासि 'ग्रीष्मे पञ्चा-
ग्निज्वालासेवायां वर्षतौ कानने वने जले हिमतौ कण्ठलग्नस-
लिले वसन्तः वनं भास्यप्सु कानन इति यादवः तरवः संसारत-
रणशीलाः तीर्णसंसारा वा मुमुक्षवो मुच्यमाना मुक्ताश्च यथायो-
ग्यमधिकारिणो मधुधाराः ज्ञानैश्वर्याद्यानन्दाम्बुसन्ततीः ससृ-
जुस्तत्स्वभावा बभूवुरित्यर्थः । धाराः स्यादम्बुसन्तत्यां सैन्याग्रे
स्वर्गतिष्वपीति सर्गः स्वभावनिर्मोकनिश्चयाध्यायसृष्टिष्विति च
अत्र वनचरशब्दसामर्थ्यान्मत्स्याद्यवतारविषयत्वेनापि ज्ञातव्यावेतौ
श्लोकौ शब्दशक्तिविशारदैरिति ग्रन्थबाहुल्यभया—दुपरम्यत
इति ॥ ९ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

ततस्तरुच्छायां पर्वत भूमिमवगाह्य सखिगीतं शृण्वन् अन-
वधानेन दूरगा गाः स्वयमेव वेणुनाह्वयामास तत्र तत्र स्थावरजा-
तीनामप्येतादृशत्वामित्याहुः । अन्विति युगलेन । वने या लतास्ताः
सर्वा आपीत्यर्थः । प्रेम व्याप्य विष्णुमिति सर्वत्र स्फुरद्रूपत्वात्
व्यापकतया श्रीकृष्णमित्यर्थः । दृष्टान्तगर्भश्लेषेण विष्णुं श्रीना-

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

रायणमिवेत्यर्थः । दृष्टान्तव्यञ्जनया च आदिपूरुष इवेत्युक्तस्पष्टीकरणाय । तत्र दृष्टान्तपक्षे लतातरवः स्त्रीपुरुषजातयः पुष्पफलाढ्याः सर्वसाधनसम्पन्ना अपि प्रणतभारविटपाः श्रीचतुःसनादिवत् नम्रा एव बभूवुः । मधुधारा अश्रूणि ॥८॥९॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

सत्त्वभेदान् निरूपयितुं भगवन्तमपि तथा वर्णयन्ति । अनुचरैरिति त्रिभिः । लता विहङ्गमा मेघाः सात्त्विकाः एते वेणुनादेन भक्तिपूर्णा जाताः तत्र प्रथमं वृन्दावनस्था लतास्तरवश्च वैष्णवाः वेणुनादेन उद्गतप्रेमरसा जाता इति तदर्थं प्रकारान्तरेण वेणुनादमाह तदर्थं प्रकारान्तरेण भगवानपि वर्णनीयः स च भक्त्यनुसारेण लोकवेदानुसारेण च वर्णनीयः तत्र भक्त्यनुसारेण प्रथममाह । अनुचरैः सेवकैर्गोपैः सम्यक् अनुवर्णितानि वीर्याणि यस्य आदिपूरुष इव पुरुषोत्तम इव अनुचरैर्वेदैः सम्यक् सर्वोत्तमत्वेन वर्णितानि जगत्कर्तृत्वादीनि वीर्याणि यस्य लोकानुसारेण माहात्म्यमाह सर्वोत्कृष्टम् । आदिपूरुष इवाचलभूतिरिति । अचला विभूतिर्लक्ष्मीर्यस्य अनुचरैः सर्वैरेव देवादिभिस्तथोक्तः लौकिकैः स्वव्यवहार्यत्वात् पुरुषोत्तमतुल्यतामेवाहुः अतो दृष्टान्तभावः मिथतया वर्णनायां हेतुमाह । वनचर इति । वृन्दावनचरः सात्त्विकभावापन्नः सत्त्वभूमौ प्रतिष्ठित इति गिरितटेषु गिरिप्रान्तेषु चरन्तीः विषमस्थानात् समदेशे पशुहिते स्वयं तत्रत्यो भूत्वा समाह्वयति लौकिकत्वाभावाय वेणुनैवाह्वयति वेणुद्वारा तत्र प्रविष्ट इति अग्रिमचरित्रेण ज्ञायते अन्यथा वृक्षाणां तथात्वं न स्यात् स इति येषु वनप्रदेशेषु रेमे यदैव आह्वयन् तदैव मधुधाराः सस्रुजुः रेमेति संबन्धः युक्तश्चायमर्थः अन्यथा वेणुनादाभिज्ञता तत्र च स्वनामसङ्केतो न स्यात् अतस्तद्द्वारा भगवान् प्रविष्ट इत्यग्रेऽपि तथात्वं युक्तमेव ॥ ८ ॥

वनस्था लताः अस्मन्निकटे भगवांश्चरति स्वकीयांश्चाकारयतीति ज्ञात्वा तेषां भोगसिद्ध्यर्थं स्वस्मिन् विद्यमानमानन्दं प्रकटितवत्यः तथा तरवश्च यथा स्त्रियः पुरुषाश्च भगवदीयाः भगवति भगवदीयेषु च समागतेषु आनन्दयुक्ता भवन्ति भोगार्थं स्वकीयञ्च प्रयच्छन्ति तद्वदेतेऽपि नन्वयं धर्मो जङ्गमानां न स्थावराणामितिचेत्तत्राह । आत्मनि विष्णुं व्यञ्जयन्त्य इति चेतनेष्वेव भगवतः क्रियाज्ञानशक्त्योराविर्भावः सच्चिदानन्दरूपता च क्रमेणाविर्भवति एतत्सर्वं भगवति निविष्टे भवति सोऽपि निविष्टश्चेत् प्रकटीभवति तदैव युज्यत इति ते वृक्षादयः पञ्चधर्मयुक्ताः आत्मनि विष्णुं व्यञ्जयन्त्य इव जाताः तत्र प्रथमं क्रियाशक्त्याविर्भावमाह । पुष्पफलाढ्या इति । यत्र हि भगवान् निविशते तत्रावान्तरफलं परमफलञ्च भवति अतः कार्यात् व्यञ्जयन्त्य इव जाताः पुष्पाण्यवान्तरफलरूपाणि परमफलानि तु फलानि तैः सर्वैराढ्या जाताः भगवदर्थं सदाधिक्यमाहुः । प्रणतभारविटपा इति । भारेणापि नमनं सम्भवतीति तन्निरासायादौ प्रणतत्वमुक्तं प्रकर्षेण नताः भारेण विटपाः शाखा येषाम् । प्रेमहृष्टतनव इति चिदुत्कर्षो ज्ञानरूपो निरूपितः भक्ता एवहि प्रेम्णा हृष्टरोमाञ्चा भवन्ति पूर्वमहर्षितानामपि तथा हर्षितत्वं पूर्वस्मात् सौख्यं प्रत्यवयवमुच्छूनत्वं प्रभाविशेषश्चाय प्रेमहृष्टतनुत्वम् अपरञ्च वेणुनादनिष्ठसुधास्वादवत्यः स्वामिन्य इति तद्धर्मं परिचिन्वन्ति ता एवेति तदुक्तावन्यविचाराक्षमत्वं युक्ततरमिति नाधिकं लेखनीयम् क्रममधुधाराः स्वस्मिन् विद्यमानमानन्दं भगवदर्थं बहिः प्रकटितवन्तः एतत्सर्वपरिज्ञानमेव ज्ञानशक्तिः ॥ ९ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

नदीनामनादि सिद्धानामचेतनत्वेऽपि देवतारूपाणां का वार्ता श्वः परश्वो दृष्टजन्मनामतिनिकृष्टानामपि जडानां रसिकतां वेणुश्रवणहेतुकां पश्यतेत्यन्या आहुः । अनुचरैर्गोपैः आदिपूरुषो नारायण इव निश्चलश्रीः । यदपि वनचरः वन्यजीवेष्वनुरागादिति भावः । तदा गृहस्थवैष्णवाः सस्त्रीका यथा सङ्कीर्तनश्रवणेन भाववन्तो भूत्वा प्रणमन्ति तथैव वनलताः स्त्रियः तरवस्तत्पतयः । आत्मनि मनसि विष्णुं स्फुरन्तं व्यञ्जयन्त्यः ज्ञापयन्त्य इव अश्रुतुल्या मधुनो मकरन्दस्य धाराः सस्रुजुर्मुमुचुः । ववृषुरिति पाठे अश्रूणामाधिक्यम् । पुष्पफलाढ्याः पुष्पेण हर्षसञ्चारिणा फलेन रतिस्थायिना च विराजमानाः । प्रणता भारेण विटपाः शाखा यासामित्यनुभावः प्रणामः प्रेम्णा हृष्टा रोमहर्षयुक्ता स्तनवो येषां ते इति रोमाञ्चः ॥ ८ ॥ ९ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

इतो ऽप्यतिचित्रं शृणुतेति काश्चिदाहुः । अनुचरैरिति । अनुचरैरनुयायिभिः सम्यगनुवर्णितं वीर्यं यस्य सः "कृष्णं विदुः परं कान्तं नतु ब्रह्मतया मुने" इत्यनेन तदुक्तानां श्रीकृष्णे मुग्धानां वाक्यमादिपुरुष इव अचलभूतिरचलश्रीः इति यद्वा इन्दुरिन्दुरिव श्रीमानित्यादिवदनन्वयालङ्कारः सः श्रीकृष्णः यदा गाः वेणुना तद्गीतेन तत्तन्नाम्ना आह्वयति तदा प्रणता भारेण विटपा यासां ताः पुष्पैः फलैश्च आढ्याः प्रेम्णा हृष्टास्तनवो ऽङ्गानि यासां ताः वनगताः लताः स्वस्मिन् विष्णुं प्रकाशमानं व्यञ्जयन्त्यः सूचयन्त्य इव मधुधाराः सस्रुजुः ववृषुः रेमेति विस्मये तथा तरवस्तत्पतयोऽपि अहो तासां तेषां च भाग्यम् ॥ ८ ॥ ९ ॥

भाषा टीका ।

अचल विभूती वाले भगवान् आदि पुरुष नारायण सरीखे अपने अनुचरों से जिनके पराक्रम वर्णन किये गये हैं ऐसे होकर पर्वत तटों पर चरती हुई गउओं को जिस वखत वंशी से बुलाते हैं तब वन के जो लता और वृक्ष सब अपने में व्याप्त विष्णु को जनावते हुये सारी के फूल फलों से युक्त होजाते हैं भारों से नम्र होकर प्रेम से शरीर में हर्ष होने से अश्रुओं की धाराओं की वर्षा करते हैं ॥ ८-९ ॥

दर्शनीयतिलको वनमाला दिव्यगन्धतुलसीमधुमत्तैः ॥
अलिकुलैरलघुगीतमभीष्टमाद्रियन् यर्हि संधितवेणुः ॥ १० ॥
सरसि सारसहंसविहङ्गाश्चारुगीतहृतचेतस एत्य ॥
हरिमुपासत ते यतचित्ता हन्त मीलितदृशो धृतमौनाः ॥ ११ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

किंच सरसि कमलवनेषु विहरतां पक्षिणामपि मनआकर्षणं तद्गीतं किंपुनरन्येषामित्याहुः । दर्शनीयतिलक इति । दर्शनीयस्तिलको यस्य दर्शनीयानां सुन्दराणां मध्ये इति वा वनमालासु या दिव्यगन्धा तुलसी तस्या मधुना मत्तैरलिकुलैरलघु उच्चैरभीष्टमनुकूलं गीतमाद्रियन्नादरेण गृह्णन् यर्ह्यधरे सन्धितवेणुर्भवति ॥ १० ॥

तर्हि ये सरसि सारसा हंसा अन्ये च विहङ्गास्ते चारुणा गीतेन हृतचेतस एत्य तत आगत्य हरिमुपासताभजन्त तत्समीपे उपविविशुर्वा हन्तेति विषादे ॥ ११ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

तदेवं पूर्वं मल्लवेषप्राप्तत्वेन मल्ललीला सूचिता ततश्च गानश्रवणेन भ्रमणम् सम्प्रति तु वेषान्तरादिवर्णनेनेदं लभ्यते ततः परिश्रान्त आसन्ने मध्याह्ने कचिन्महासरसि स्नात्वा द्रुतरचिततिलकवनमालामात्रस्वल्पवन्यवेषपूर्वकं तैः सह तत्कालोपयुक्तवन्यभोजनपूर्वकं च प्रथितोच्चदेशे महातरुतलशिलायामुपविश्य गोसम्भालनाय प्रस्थापितेषु सखिषु नूतनवनमालाकृष्टभ्रमरमात्रपरिवारतया कृततदवधानः सन्नेवं वेणुवाद्यविनोदेन रमत इति वर्णयन्त्यस्तत्र चास्ता सर्वत्र विश्वस्तानां स्थावराणां वार्त्ता तद्विपरीतानां पक्षिणामपि श्रूयतामित्याहुः । दर्शनीयेति । दर्शनीयः सर्वदैव द्रष्टुं योग्यः सन्ततमनोहरो गैरिकादिमयस्तिलको यस्य सः दिव्यातिदिव्यपुष्पगणवनमालायामपि दिव्यः सर्वोत्तमो गन्धो यस्याः सा तुलसीत्यलिकुलानामाकर्षणे हेतुः अत एव तन्मधुनोऽपि तादृशत्वं दर्शितं मदस्य च । अलिकुलैरित्यत्यन्तसङ्कीर्णताशङ्कापरिहाराय पर्य्यायेणैव तत्सान्निध्यं बोद्धव्यं बलिभिर्दुर्बलानामपसारणात् मत्तत्वादेव अलघु तस्मादेव वैशिष्ट्यं च ज्ञेयम् अभीष्टमिति स्वजात्यनुसारेण ते यद्गायन्ति तदेव तस्य परमकौतुकित्वादनुकूलमित्यर्थः यद्वा तेषां श्रीवृन्दावनसम्बन्धिनामलौकिकत्वात्तस्य यदा यदा यद्यदभीष्टं तदा तदा तत्तदेव विचित्ररागेण गायन्तीति तथोक्तम् अत्र चाभीष्टमिति सप्रणयेर्ष्यं सन्त्येव विचित्राणि तदभीष्टानि किन्त्वस्मत्संबन्धं विनेति भावः अभीष्टत्वादेवाद्रियन् यर्हि सन्धितवेणुरिति यद्वा तदीयस्वरोचितद्गानारम्भमात्रमित्यर्थः । तदैव सरसि तस्मिन् स्थिता ये ते सर्वेऽपीत्यर्थः । विहङ्गाश्चक्रवाकादयः एत्य तद्गीताभिमुखमागत्य हरिं मनोहरस्वभावतया तथा प्रसिद्धं श्रीकृष्णमुपलक्ष्यीकृत्यासत तेऽनन्ताः सुखविहारपरा अपि यद्वा परमभागधेयाः तत्र तेषामानन्दमूर्च्छामाहुः । यतचित्ता इत्यादिना । हन्त खेदे तथा निजाभीष्टालाभात् विस्मये वा हरिमिति पूर्ववत् दृष्टान्तगर्भः श्लेषः तत्र पक्षे हरिं विष्णुम् उपासत अभजन्त उपासनालक्षणं यतेत्यादि ॥ १०—११ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

दर्शनीयतिलकः दर्शनीयश्रेष्ठः लक्ष्यते अलिकुलैः सहितमलघुगीतमाद्रियन् आद्रियमाणः संधृतवेणुः हरिमुपासते सानुषु स्थिता इति शेषः ॥ १० ॥ ११ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

कमलवनेषु विहरतां पक्षिणामपि चित्ताकर्षकं तद्गीतं किंपुनरन्येषामित्यभिप्रायेणाहुः । दर्शनीयेति । दर्शनीयानां सुन्दराणां मध्ये तिलकः श्रेष्ठः कृष्णः वनमालायां या दिव्यगन्धा तुलसी तस्या मधुना मत्तैरलिकुलैः क्रियमाणमलघूच्चैरभीष्टमाद्रियन्नादरेण गृह्णन् यर्ह्यधरे संहितवेणुर्भवति ॥ १० ॥

तदा ये सरसि सारसाश्च हंसाश्चान्ये विहङ्गाश्च ते चारुणा गीतेन हृतं चेतो येषां तथाभूता एत्यागत्य हरिं कृष्णमुपासतेऽभजन्त तत्समीपे विविशुर्वा कथम्भूताः यतं विषयान्तरेभ्य आहृतं चित्तं यैस्तं नियतं मौनं संशीलनं येषां तथाभूताश्च हन्तेति भगवद्विरहजखेदे ॥ ११ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

यर्हि यदा सांधितवेणुं स्वरेणेतिशेषः कृष्णः दर्शनीयायाः चक्षुःप्रियायाः विकचैः उत्पलैः नीलोत्पलैः कृताया मालाया दिव्यगन्धाया अमानुषपरिमलायाः तुलस्याश्च मधुना पीतेन मत्तैरलिकुलैः अभीष्टं गातुमुपक्रान्तम् अलघु गम्भीरं गीतमाद्रियत आर्चत् आदृतो सादरार्चितावितिं ॥ १० ॥

तदा सरसि विचरन्तो ये सारसहंसविहंगाः ते पक्षिणः एत्यसंभूय चारुणा गीतेन हृतचेतसः आकृष्टबुद्धयः अतएव यतचित्ताः एकाग्रकृतमानसाः । अर्धनिमीलितनेत्राः धृतमौनाः स्वजातिचापल्यरहिता हरिमुपासते इत्यन्वयः ॥ ११ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

तत आसन्ने मध्याह्ने कचिन्महासरसि स्नात्वा तिलकवनमालाप्रवेशपूर्वकं महावेशपूर्वकं महातरुतलशिलायामुपविश्य गोसम्भालनाय प्रस्थापितेषु सखिष्वेकाकितया कृतभ्रमरगानावधानः सन्नेवं

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

वेणुवाद्यविनोदेन रमत इति वर्णयन्त्यस्तत्र चास्तां सर्वत्र विश्वस्तानां स्थावराणां वार्त्ता तद्विपरीतानां पक्षिणामपि श्रूयतामित्याहुः । दर्शनीयेति युगलेन । अळिकुलानां पर्यायेणैव ततःसान्निध्यं ज्ञेयम् । बलिभिर्दुर्बलानामपसारणात् । अभीष्टमिति परमकौतुकित्वात्तस्य अलौकिकत्वाद्वा तेषां हरिमिति पूर्ववत् दृष्टान्तगर्भः श्लेषः । ततः पक्षे हरिमुपासत उपासनालक्षणं यतेत्यादि ॥ १०—११ ॥

———

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

पक्षिणामपि वेणुनादकार्यं जातमिति तत्रोपयोगिरूपं वेणुनादञ्च वर्णयन्ति । दर्शनीयतिलक इति । यद्यपि पक्षिणो मुनयः न तेषां गीतादिना भगवद्भावो भवति किन्तु स्वभावत एव तथापि लोकदृष्ट्या कदाचिदन्यथाबुद्धिर्भवेत् अतोरूपनादाभ्यां तेषां भजनसिद्धिर्निरूप्यते तत्र रूपं वर्णयन्ति । दर्शनीयतिलक इति । दर्शनीयानां मध्ये तिळकरूपोऽतिसुन्दरः पक्षिणश्च रूपप्रधानाः रूपभेदविदः किञ्च यो वेणुनादः स स्वहितकारी स्वकीयानामपराधमपि न मन्यते तदाह । वनमालादिव्यगन्धतुलसीमधुमत्तैः । अलिकुलैः कृतमलघुगीतमपि आद्रियन् आदरं कुर्वन्नेव कूजितवेणुर्यतः यथैव भ्रमरा झङ्कारं कुर्वन्ति तथैव तन्नादमनुकुर्वन्नेव अनुरणनवदेव वेणुनादं करोति पक्षिणां मध्ये अलयो हीना निकृष्टाश्च तेषामपि कुलानि समूहाः नानाविधजातिभेदाः तैरप्यलघु यथा भवति तथा गीतं तस्याप्यादरं कुर्वन् तत्राप्यलयः मत्ताः मदोऽपि येनानुचितः नहि तुलसी पुष्पान्तरवन्मादहेतुः तत्रापि दिव्यगन्धा तत्रापि भगवद्वनमालागता तेषामप्यादरश्चेत् कुर्यात्तदा सरोवरादिषु ये सरसा रसिकाः क्षीरनीरविवेकिनश्च तेषामादरं कथन्न कुर्यादिति वनमालायाः या दिव्यगन्धतुलसी तस्या मकरन्देन मत्तैः किञ्च आदरोऽपि भ्रमराणां यथाभीष्टं भवति तथा वनमालायां समागतान् भ्रमरान्न दूरी करोति किन्तु ते यथानोपद्रुता भवन्ति तथैवादरं करोति अतो यद्यैव आदरं कुर्वन्नत्र कूजितवेणुः ॥ १० ॥

तदैव सरसि विद्यमानाः जलवासिनः सारसाः सरसानां भक्तानां सम्बन्धिनः हंसाः क्षीरनीरविवेकिनः तेच विहङ्गा उत्कृष्टगतियुक्ताः पुरुषापेक्षया ते पुनर्भगवद्भजनाधिकारिण इति तान् विशिनष्टि । चारुगीतहृतचेतस इति । चारु यथा भवति निष्कामार्थं भगवद्गीतेनैव हृतं वशीकृतं चित्तं येषां तदपि भजनं भक्तिमार्गानुसारेण नतु ध्यानस्थितानामन्तर्यामिरूपे ज्ञानरूपे वा तदाह एत्य आगत्य हरिमुपसमीपे सेवमाना जाताः यतस्ते भगवदुक्ता मुनयः भजने भ्रमराद्विशेषमाह । यतचित्ता इति । यतं नियतं चित्तं येषां चित्तनैयत्येन भगवद्भजनं मुख्यं नतु विक्षिप्तचित्ततया किञ्च हन्त इति हर्षे एतद्भाग्यमेतेषामेव भवतीति बहिर्व्यापाररहिता भजने सर्वोत्तमाः बहिर्व्यापारेषुच नेत्रे वाक्च नियम्या यस्यैतत् द्वयं नियतं वाक् नान्यं वदति चक्षुश्च नान्यत् पश्यति तदाह । मीळितदृशो धृतमौना इति । मीलिता दृक् येषां धृतं मौनव्रतं यैः साम्प्रतमेते नादपराः अतो दृष्ट्या अन्यचित्तता भविष्यतीति नेत्रमीलनम् । दर्शनीयतिलक इति । हृदन्तराकृतम् अतिरसिका एते मुनयः स्वस्य पुरुषत्वेन रसक्रीडायामनुपयोगं मत्वा पक्षीभूय विविधस्वकूजनैर्भगवतो भक्तानाञ्च रसोद्दीपनं कुर्वन्तः स्वकृतार्थतां मन्वानाः शब्दमेवाधिकमभीष्टं मन्यन्ते अतः शब्दप्रधानकीर्तिरूपवनमालाधर्माणामेवात्रोपयोग उच्यते "यथा वृक्षस्य सम्पुष्पितस्य दूराद्गन्धो वात्येवं पुण्यस्य कर्मणो दूराद्गन्धो वाती"ति श्रुत्या कीर्तिगन्धसाम्येन निरूपणं कृतं वनमाळायाः कीर्त्तिरूपत्वात्तन्निरूपकाणि गीतान्यावश्यकानि तानिच तद्रसास्वादं विना न सम्भवन्त्यतो गुणातीतभक्तिरूपवक्ष्यमाणरूपगन्धवती तुलसी तन्मध्वत्यलौकिकभक्तिरसात्मकमितरविस्मारकमतोऽतिमत्ताः स्वदेहाद्यनुसन्धानरहिता ईश्वरधर्माननुसन्धाना अपीति तन्निकट एवालघु गायन्ति वस्तुतस्त्विदमेव महत्तमं समाराधनं प्रभोरलिभिः क्रियते अतएव प्रभोरभिमतम् इष्टं तद्गतम् अपरञ्च चार्वादिपदानि विहाय तत्र भवनार्थकप्रत्ययवत्पदोक्त्या भगवद्वनमालास्थतुलसीगन्धस्य दिवि भवत्वस्य विधिलत्वादग्रे स्वामिनीषु व्रजदेवीत्वस्य वक्ष्यमाणत्वाद्दिवुधातोः क्रीडावाचकत्वाच्च स्वामिनीभिः सहक्रीडाजनितोऽयं गन्ध इति समभिव्याहारादवगम्यते एतेन यथादिविभवोऽर्थो नेतरलोकस्थजनविषयस्तथायमन्तरङ्गतमलीलाप्रपञ्चस्थभक्तैकगम्य इति ध्वन्यते अतएव प्रभोरपि भावोद्बोधस्तेनासीदिति ज्ञापनाय कूजनमुक्तं किञ्च वनमालास्थपुष्पमध्वनुक्त्वा तुलस्या एव तद्यदुक्तं तदपि तद्गन्धतुलस्या इति वाक्याद्वाहं प्रियास इत्युपक्रम्य तुलसिकालिकुलैर्मदान्धैरन्वीयमान इति वाक्याच्च तद्गन्धमध्वादिस्वरूपम्प्रभुरेव वेत्तीति नान्यगम्यः स विशेषस्तद्भोक्तारोऽळयोऽपि न साधारणाः किन्त्वितरेभ्यो विजातीया अत्युत्तमा इति ज्ञापनार्थमेव कुलपदमुक्तम् अतएवालिपदमुक्तम् अलेशब्देषि पूर्णतावाची तथा चतद्वानलिरित्यत्रोच्यते रसो न लीयते न नश्यति यत्र येन वा सोऽलिरित्युच्यते यद्यप्यत्र दीर्घः सम्भवति तथापि "दशहूतो ह वै नामैषः तं वा एतं दशहूतं सन्तं दशहोतेत्याचक्षते परोक्षप्रिया हि देवा" इति श्रुतिन्यायेन परोक्षं ममच प्रियमिति भगवद्वाक्याच्च स्वप्रियार्थस्य गोपनं प्रभोः प्रियमिति ज्ञायते प्रकृतेच स्वान्तरङ्गरसपोषकतैतेषु गोप्येति परोक्षेण ह्रस्वान्तम्पदं प्रभुः प्रकटितवानेवं सत्येत एवालयोऽन्येतु भ्रमरा एव क्वचिदेतेष्वप्यन्यनामप्रयोगस्तात्पर्यविशेषेणेति ज्ञेयं तारत्वञ्चानुक्त्वा लघुत्वाभाव एव उक्तस्तेन तद्गीतरसभरं वोढुं नान्यः शक्तः प्रभुं विनेति ज्ञाप्यते महत्त्वेयत्ता नास्त्येवेत्यपि ज्ञापनाय तथोक्तिः एवं सति तदादरं कथन्न कुर्यात् गृहीति पदात्तद्गीतरसपानपरवशश्चिरं तूष्णीमेव तिष्ठति कदाचिद्रसभरेणैव कूजितवेणुर्भवतीति ज्ञाप्यते अग्रेगीतोक्त्या पूर्वं तद्गीतोद्बुद्धभावेन स्वप्रियाणां भावोद्बोधनाय तथैवाकरोत्ततो यदा पूर्णरसो भूत्तदा जगाविति ज्ञाप्यते अतिसुन्दरत्वनिरूपणे तिलकत्वोक्त्या तद्यथाभाग्यस्थाने भाले तिष्ठति तथेदमपि स्वरूपं परमभाग्यवतीष्वेव तिष्ठतीति ध्वन्यते अत्र कर्मधारयो ज्ञेयः स्वामिनीनां हृदि प्रियातिरिक्ते दर्शनीयत्वास्फूर्तेः अत्र यद्यप्युभयं मुख्यं तथापि नादे विशेषो निरूप्यते अन्यथा मीलितदृक्त्वं नोच्येत तत्र हेतुः सरसि विद्यमानैरेव तैर्वेणुगीतं श्रुतं तच्च चारुत्वेन मनोहरैकस्वभावमतो नादाधीना एव निकटे समागताः आदावेव नादहेतुभूतस्वरूपसौन्दर्यनिरूपणाभावादरस एव स्वरूपरसमप्यनुभवन्तीति ज्ञाप्यते हृदमप्यतिचित्रं यन्मत्तानां गीतानुरणनरूपेण गीतेन यतचित्तत्वं सर्वेन्द्रियवृत्तिनिरोधश्चेति एतेषामियं गीतरसपानदशैत्येवं रूपतैवोपपद्यते

सहबलः स्रगवतंसविलासः सानुषु क्षितिभृतो व्रजदेव्यः ।
हर्षयन् यर्हि वेणुरवेण जातहर्ष उपरम्भति[1] विश्वम् ॥१२॥ [1] उपरम्मित विश्व इति वीरराघ० पाठः ।
महदतिक्रमणशङ्कितचेता मन्दमन्दमनुगर्जति मेघः ॥
सुहृदमभ्यवर्षत्सुमनोभिश्छायया च विदधत्प्रतपत्रम् ॥ १३ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

एतज्जन्यत्वेनैतदुत्तरकाळीनत्वान्मदस्य अलिकुलानामपि तुलसीगन्धमधुपानदशा पक्षितुल्यैव पश्चात्तत्स्वभाव वशादुक्तरूपत्वं परमिति ज्ञायते मुनित्वात्पक्षिणामग्रेऽप्यन्तरेव निरन्तरमेतद्रसमग्नतैवेति न मत्ततोक्ता अथवा प्रभुरसस्वभावादतुक्तसिद्धेवाग्रिमा सेति नोक्ता तदैतेषामप्यालिकुलवद्दशा भविष्यति वस्तुतस्तूक्तरूपरसमत्तालिकुलालघुगीतमभीष्टत्वेनातिचित्तनैयत्येनैवानुभवन्प्रभुर्वेणुकूजनगानं करोतीति तच्छ्रवणे पक्षिणामपि तथात्वमेवेत्यितत्तत्स्मावश्यकं वादिति युक्तमुत्पश्यामः तथाप्यादौ स्वरूपसौन्दर्यमेवोक्तमिति स्वस्य तद्दिदृक्षातिभरेण पक्षिणां तत्प्राप्तिकृतायां तत्प्रतिबन्धस्मरणेन कश्चित्खेदोऽभूदिति हन्तेत्युक्तम् एवमेतेषां भाग्यं सात्त्विकत्वान्निरूपितवत्यः ॥ ११ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

गृहारामाणामिव तरुलतानां वैष्णवतामुक्त्वा आत्मारामाणामिव हंससारसादीनां वेणुश्रवणहेतुकां विष्णूपासनामाहुः । दर्शनीयं द्रष्टुमर्हं तिळकं गैरिकादिमयं यस्य सः दर्शनीयेष्वतिसुन्दरेषु मध्ये तिलकतुल्य इति वा । वनमालासु पञ्चवर्णपत्रपुष्पमयीषु दिव्यगन्धा या तुलसी तस्या मधुना मत्तैः अलिकुलैर्मत्तत्वादेवासंकुचद्भिरलघुगीतमुच्चैर्गीतम् । ननु च कमलमाळती–नागकेशरादि पुष्पाण्येव लोकाः सुसौरभत्वेन ख्यापयन्ति । ननु सर्वतो माहात्म्येनाधिकामपि तुलसीम् । उच्यते तुलस्या गन्धः कश्चित् प्राकृतैर्लोकैर्ग्राह्यो ऽत्यल्पतर एव अप्राकृतलोकैस्तु ततोऽधिकः । भगवद्वनमालाधिकारिभिर्भृङ्गैस्तु ततोऽप्यधिकः । अत्यसाधारणः सर्वाधिकतमस्तु भगवन्नासिकैकमात्र वेद्य एव । अन्यत्र योगमायया आवरणात् । यदुक्तं वैकुण्ठवर्णने । गन्धेऽर्चिते तुलसिकाभरणेन तस्या यस्मिंस्तपः सुमनसो बहुमानयन्तीति । अभीष्टमिति । वेणुगानारम्भे केन स्वरेण गेयमिति विचारे सति तदैव मिलितानां भ्रमराणां झङ्कारे वृत्ते साधु साधु भ्रमर एष एव सरो गृह्यते इति आद्रियन् सम्मानयन् यर्हि अधरे सन्धितवेणुः सम्यग्धृतवेणुर्भवति । सन्धानं सन्धा सा सञ्जाता यस्येति सन्धितः इतच् प्रत्ययान्तः । तदा हरिमेत्य सरसः सकाशात् हरिसमीपमागत्य तमुपासत दर्शन-श्रवण–मननैरभजन् । मीलितदृश इति । दृङ्मीलनं रसास्वादानुभावः ॥ १० ॥ ११ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

काश्चित्पक्षिणामपि वेणुगीतेन श्रवणेन हरिप्रावण्यं भवति किमुतान्येषामित्याहुः । दर्शनीयतिलक इति । दर्शनीयस्तिलको यस्य दर्शनीयानां सुन्दराणां मध्ये तिळको मुख्यो वा श्रीकृष्णः वनमालाया या दिव्यगन्धा तुलसी तन्मधुना मत्तैरलिकुलैः भ्रमरगणैः क्रियमाणमलघुमहदभीष्टमनुकूलं गीतमाद्रियन् आदरेण गृह्णन् यर्हि यदा सन्धितोऽधरे संयोजितो वेणुर्येन स तथा भूतो भवति तदा सरसि ये सारसाः अन्ये च विहङ्गाः ते चारुणा मनोहरेण वेणुगीतेन हृतं चेतो येषां ते एत्य समीपमागत्य हरिं क्लेशहरं श्रीकृष्णमुपासत अभजन्त अहो तेषां भाग्यमिति भावः ॥ १० ॥ ११ ॥

भाषा टीका ।

सुंदर दर्शन करने योग्य तिलक धारण किये हुये भगवान् वनमाला में लगी जो दिव्यगन्ध वाली तुलसी उसका जो मधुगन्ध तिससे मतवाले जो भौंरानके समूह तिनका जो वडा भारी गीत अत्यन्त प्रिय तिसको आदर करके जब वेणुको बजाते हैं तब सरोवरों में जो सारसहंस विहंग पक्षी वे मनोहर गीतके सुननेसे चित्तके हरण होनेसे पासमें आ चित्तको रोककर नेत्रों को मूंदकर चुप होकर हरिकी उपासना करते हैं ॥ १० ॥ ११ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

मेघोऽपि हरिं सेवत इत्याहुः । सहबळ इति । भो व्रजदेव्यो गोप्यः सहबळः सरामः कृष्णः स्रग्भिर्निर्मिताभ्यामवतंसाभ्यां कर्णभूषणाभ्यां विलासो यस्य यद्वा मुक्ताफलस्रगापीडेन विलासो यस्येति क्षितिभृतः सानुषु गिरेस्तटेषु वर्त्तमानः स्वयं जातहर्षो विश्वं हर्षयन् यदा वेणुरवेणोपरम्भति निनादयति नादेन पूरयतीत्यर्थः ॥ १२ ॥

तदा मेघो महतः कृष्णस्यातिक्रमणे शङ्कितं चेतो यस्य स न पुरतो याति नचोच्चैर्गर्जति किन्तु तत्रैव स्थितः सन् वेणुरवमनु मन्दं मन्दं गर्जति किञ्च सुहृदं विश्वार्तिहरणादिसाम्यात्सुहृत्कृष्णस्तं सुमनोभिरभ्यवर्षत् अदृश्यैर्देवैः क्रियमाणं कुसुमवर्षं मेघे कल्पयित्वोक्तं तुषारो वा कुसुमतया कल्पितः । स एव वा देवतारूपो ऽभ्यवर्षदिति प्रतपादातपात्त्रायत इति प्रतपत्रं छत्रं तच्छायया कुर्वन्निति ॥ १३ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

ततश्च मध्याह्ने सखिभिरानीतैः स्रगवतंसादिविचित्रवेषैर्विलसन् गवामनुरोधेन निश्छायेष्वपि गिरेः समभूभागेषु भ्रमन् मेघच्छायेच्छया मल्लाररागङ्गायन् श्रीवलादिसखिभिः प्रतिध्वनिभृद्भिरिसानुभिस्तत्तत्प्रतिध्वानिभृद्भिश्वेन च कृतानुगानस्तादृशतदिच्छया स्वल्पाकर्षणा प्रयोगात्तावन्मात्रमेघागमनेन मन्दमात्रगर्जनजनितवाद्यस्तत्तुमुलशब्देन स्वयमपि हृष्टो विश्वमपि हर्षयन्नत एव मेघाच्छन्नदेवादिभिः कृतपुष्पवृष्टिस्तच्छायायां विक्रीडतिस्म तदेतल्लीलास्फूर्तियुक्तानां तासामभिप्रायेणावतारिकेयम् अहो आस्तां पृथक् पृथक् तदुल्लेखो विश्वस्याप्यानन्दो दृश्यतां तत्र चान्येषां का वार्त्ता दूरस्थाचेतनचलस्वभावस्य मेघस्यापीति वर्णयन्त्यस्तद्रूपगुणचेष्टाभिः श्रीकृष्णेन सौहृद्यमेव सम्भावयन्ति । सहवल इति । श्रीबलभद्रेण सहित इत्युपलक्षणं सख्यन्तराणां सखिसैन्येन सहित इति वा विलासो विनोदः क्षितिभृतः प्राधान्येन गोवर्धनस्य कदाचिदन्यस्यापि सानुषु समभूभागेषु तत्र यौगिकार्थस्तु तत्प्रशंसासूचकः अस्यैव क्षितिभृत्त्वं युक्तमिति भावः । हे व्रजदेव्यः ! परमदिव्यगणस्पृहणीयसौभाग्यस्य व्रजजनस्यापि मध्ये देव्यो दिव्यत्वेनाभिमता इत्यर्थः । अतः परमवैदग्धी च सूचिता । अतस्तद्वेणुगानतत्त्वं युष्माभिरेवावधार्यत इति भावः । तदेवं सपरिकरस्य तस्य विश्वस्यापि परमहर्षे सति नूनं मेघोऽपि° प्रहर्षेणोच्चैर्गर्जितुमिच्छन्नपि महतः श्रीकृष्णस्यातिक्रमेण निजोच्चशब्देन तद्वेणुरवाच्छादनापराधस्तस्मिन् शङ्कितचेताः सन्ननुकूलतया तद्गानपोषायेत्यर्थः । मन्दमन्दं गर्जति परिश्रान्तश्च मत्वा तमाप्याययतीत्याहुः । सुहृदं तद्वर्णाद्यनुकारात् । सखायं श्रीकृष्णम् अभिलक्ष्यीकृत्य सुमनोभिः करणभूतैरभ्यवर्षत् अभ्यषिञ्चदित्यर्थो वा । गर्जनस्य वर्त्तमानप्रयोगेण पौनःपुन्यम् । वृष्टेरतीतप्रयोगेण मुहृत्त्वं बोध्यते । किं कुर्वन् छायया तदुपरिच्छत्रं विदधत् छायां कुर्वता स्ववपुषेत्यर्थः । अन्यत्तैः तत्र स्रग्भिरिति प्रथमार्थे खण्डित नानावर्णपुष्पदलरचितान्तरन्तः सूक्ष्मसूक्ष्मतरसूक्ष्मतममण्डलमयीभिः श्रोणिभिरित्यर्थः । निनादयतीति शब्दार्थस्य रभेरन्तर्भूतण्यर्थताङ्गीकारः । परस्मै पदं नुम् चार्षम् । यद्वा स्रग्भिरवतंसाभ्याञ्च कर्णपूराभ्यां विलासो यस्य । यद्वा । स्रग्भिरवतंसो मौलिविलासश्च विविधक्रीडा यस्य सः ॥ उपरम्भति रभ राभस्य इत्यस्मात् कौतुकी भवतीत्यर्थः ॥ परस्मै पदं नुम् चार्षम् । मन्दमन्दमित्यस्यावर्षदित्यनेनाप्यन्वयः श्लेषेण सुमनोभिरिति शोभनमनोवृत्तिभिश्छायया च निजदेहेन मन्दमन्दगर्जनाख्य वाचापीत्येवं त्रिधा सेवाप्युत्प्रेक्ष्या ॥ १२ ॥ १३ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

उपरन्धित विश्वः उपग्रथित विश्वः ॥ १२—२६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

मेघोऽपि हरिमुपास्ते इत्याहुः । सहबल इति । हे व्रजदेव्यः ! गोप्यः सहबलः सरामः कृष्णः स्रग्भिर्निर्मिताभ्यामवतंसाभ्यां कर्णभूषणाभ्यां विलासो यस्य यद्वामुक्तास्रगापीडेन विलासो यस्य सः क्षितिभृतो गिरेस्तटेषु वर्तमानः स्वयञ्जातहर्षः विश्वं हर्षयन् यदा वेणुरवेण उपरम्भितविश्वः उपग्रथितविश्वः अनुरक्तलोको भवतीत्यर्थः । उपरञ्जितविश्वमिति पाठान्तरं तदा विश्वमुपरञ्जयति नादयति नादेन पूरयतीत्यर्थः ॥ १२ ॥

तदा तस्य स्वतुल्यच्छायत्वेन विश्वार्त्तिहरणादिना च साम्यात्स्वसखः मेघः महतः श्रीकृष्णस्यातिक्रमेण शङ्कितं चेतो यस्य तथाभूतः पुरतो न याति नवोच्चैर्गर्जति किन्तु तत्रैव स्थितः सन् वेणुरवमनु मन्दं मन्दं गर्जति सुहृदं श्रीकृष्णं सुमनोभिरभ्यवर्षच्छायया प्रतपत्रमातपत्रं व्यदधदकरोच्च विदधदिति पाठेत्वडभाव आर्षः शत्रन्तत्वात् प्रतपत्रं कुर्वन् सुमनोभिरभ्यवर्षच्चेत्यर्थः अदृश्यदेवैः क्रियमाणं कुसुमवर्षं मेघकर्तृकं कल्पयित्वेत्थमुक्तं तुषारो वा कुसुमतया कल्पितः ॥ १३ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

हे व्रजदेव्यः ! बलेन सहितः स्रजा मालया ऽवतंसेन कर्णोत्पलेन च विलासः कान्तिविशेषो यस्य तथा यद्वा स्रगवतंसयोर्विलासो यस्य स तथा आत्मशोभा जनकत्वेन भृतयोः स्रगवतंसयोः शोभा जनक इत्यर्थः । क्षितिभृतो गिरेः सानुषु शिखरेषु स्थितः लोकदृष्ट्या तदानीं जातहर्षः आविष्कृतानन्दविशेषः कृष्णो यर्हि यदा वेणुरवेण आह्वयत् मा इति शेषः विश्वं देहमाविश्य वर्तमानं प्राणिजातम् उपरम्भति ऊर्ध्वमुखीकरोति आह्वयति वा नूतनं कर्तुमुपक्रमते वा उपरंभस्तूर्ध्वमुखे प्रक्रमे निर्वृते तथेति च ॥ १२ ॥

तदा मेघः महतो हरेरुच्चैर्गर्जनेन कर्णबाधिर्यजनकातिक्रमणमतिलङ्घनं स्यादिति शङ्कितमनाः मन्दं मन्दम् अनुवेणुरवानुकूलं यथा भवति तथा गर्जति किञ्च सुमनोभिः पुष्पसदृशसलिलबिन्दुभिः श्यामवर्णसाम्यात्सुहृदं मित्रमभ्यवर्षत् किञ्च छायया वितपत्रं वितपात् आतपात् त्रायत इति वितपत्रं विदधेच हरेरीतिशेषः सितपत्रमितिपाठे श्वेतच्छत्रमित्यर्थः । वेणुरवेण व्रजदेवीराह्वयदिति वा ॥ १३ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

ततश्च मध्याह्ने सखिभिरानीतैः स्रगवतंसादिभिर्विलसन् गवामनुरोधेन निश्छायेष्वपि गिरितटेषु भ्रमन् मेघच्छायेच्छया मल्लाररागं श्रीबलादि सखिभिः प्रतिध्वनिभृद्भिरिसानुभिस्तत्प्रतिध्वानिभृद्भिश्चेन च कृतानुगानस्तत्सदृशस्तदिच्छया स्वल्पकर्षण प्रयोगात्तावन्मात्रं मेघागमनेन मन्दमात्रं गर्जनजनित वाद्यस्तत्तुमुलशब्देन स्वयमपि हृष्टो विश्वमपि हर्षयन् अत एव मेघाच्छन्नदेवादिभिः कृतपुष्पवृष्टिस्तच्छायायां विक्रीडति स्म तदेतल्लीलास्फूर्तियुक्तानां तासामभिप्रायेणावतारिकेयम् अहो आस्तां पृथक् पृथक् तदुल्लेखो विश्वस्याप्यानन्दो दृश्यतां तत्र चान्येषां का वार्त्ता दूरस्थाचेतनचलस्वभावस्य मेघस्यापि श्रूयतामिति वर्णयन्त्यस्तद्रूपगुणचेष्टाभिः श्रीकृष्णे सौहृद्यमेव सम्भावयन्ति । सह बल इति युगलेन । श्रीबलभद्रादिभिः सहित इत्यर्थः महतः श्रीकृष्णस्यातिक्रमः तद्वेणुरवाच्छादनापराधस्तस्मिन् शङ्कितचेताः सन् सुहृदं तद्वर्णाद्यनुकारात् सखायं

विविधगोपचरणेषु विदग्धो वेणुवाद्य उरुधा निजशिक्षाः ॥
तव सुतः सति! यदाधरबिम्बे दत्तवेणुरनयत्स्वरजातीः ॥ १४ ॥
सवनशस्तदुपधार्य्य सुरेशाः शक्रशर्वपरमेष्ठिपुरोगाः ॥
कवय आनतकन्धरचित्ताः कश्मलं ययुरनिश्चिततत्त्वाः ॥ १५ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

श्रीकृष्णम् उपरम्भति रभ रामस्य इत्यस्मात् कौतुकी भवतीत्यर्थः ॥ १२-१३ ॥

श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी ।

मेघः सर्वहितकारी तस्यापि वेणुनादजनितभावमाह पूर्ववत् । सहबल इति द्वाभ्याम् । हे व्रजदेव्यः गोप्यः ! व्रजे देवता रूपाः अनेन विश्वासो भविष्यतीति निरूपितं यर्हि वेणुरवेण विश्वमुपरम्भति पूरयति तर्हि महदतिक्रमेण शङ्कितचेताः सुहृदं भगवन्तम् अभ्यवर्षत् स्वदेहच्छाययाच आतपत्रं विदधज्जातः तद्वा कुर्वन् अभ्यवर्षत अयं नादो महाबलयुक्तः विश्वगतान्सर्वानेव धर्मान् दूरीकृत्य स्वयमेव पूर्णस्तदा आभासरूपोऽपि मेघः धूमादिसमूहात्मा विश्वं भगवतैव कृतार्थीभूतमिति स्वयमुपचारितार्थोऽपि स्वजन्मसाफल्याय भगवन्तमेव ववर्ष तत्र यादृशेन वेणुनादेन एतद्भवति तादृशकर्त्तारं भगवन्तं वर्णयति विशेषणचतुष्टयेन अन्यथाउपरम्भणमर्थवादरूपं स्यात् तत्र क्रियाशक्तिः सम्पूर्णेति वक्तुं सहबलो बलभद्रसहित इत्युक्तं सृष्टिकरणक्रियापेक्षयापीयम्महती क्रियेति ज्ञापयितुं स्रग्रूपो योऽयमवतंसः कर्णाभरणं तत्र विलासो यस्येति ललिा निरूपिता मालाकीर्त्तिमयी दश दिशः श्रोत्रं कीर्त्तिर्दिक्षु पूरिता यया सा भवत्येवं सर्वोत्तमा भगवत्कीर्त्तिप्रतिपादकं वा भागवतादिशास्त्रं सर्ववेदेष्वाभरणरूपं तत्र विलासयुक्ता तत्प्रतिपादिका च एवं क्रियायाः स्वरूपतो गुणतश्च माहात्म्यं निरूपितं तस्याः सहकारिण्या इच्छाया माहात्म्यमाह स्वयञ्जातहर्षः सर्वमेव च हर्षयन्निति एवं वेणुनादस्य कारणभूतक्रियोत्कर्षमुक्त्वा देशतोऽप्युत्कर्षमाह । क्षितिभृतः सानुष्विति । सर्वाधारभूतां पृथिवीं ये बिभ्रति तेषामप्युच्चस्थानेषु स नादो जायते कथन्न विश्वं पूरयेत् रवः अनुरणनमतिगम्भीरम् उपरम्भति नादेन पूरयतीति मेघादप्यधिकक्रिया निरूपिता तदैव मेघः महतो वासुदेवस्य उपरिगच्छन् भगवदतिक्रमणे शङ्कितचित्तो भूत्वा उपर्येव तिष्ठन् अग्रे गमनार्थमुद्यतः नीलमेघश्यामं विश्वजीवनं भगवन्तं स्वमित्रं ज्ञात्वा सुहृदमवर्षत् सुमनोभिः पुष्परूपैः स्वबिन्दुभिः अर्थात् पुष्पैः पूजितवान् न केवलं पूजामेव कृतवान् किन्तु राज्यमपि दत्तवानित्याह । आतपत्रन्दधदिति । न केवलं राज्यमेव दत्तवान् किन्त्वात्मनिवेदनमपि कृतवानित्याह । छाययेति सूर्ये अधः स्थिते उपरि स्थितेन न छाया भवतीति पृथक् छायानिर्देशः ॥ १२ ॥ १३ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

भूमिष्ठानामानन्दमनुवर्ण्य आकाशस्थानां जडानामपि वेणुनादहेतुकं तं वर्णयन्ति । सहबलः सहचरसैन्यसहितः । स्रग्भिश्चूडावचस्थलवर्त्तिनीभिः अवतंसाभ्यां कर्णवर्त्तिनीभ्याञ्च विलासः शोभा यस्य सः । सानुषु गिरेर्नितम्बेषु स्थितः स्वयं वेणुरवेण जातहर्षः विश्वं हर्षयन् हर्षयितुं यदा उपरम्भति रलयोरैक्यादन्तर्भावितण्यर्थत्वाच्च वेणुरवमुपलम्भयत्यास्वादयतीत्यर्थः । अत्र कृष्णस्य गिरिनितम्बवर्त्तिमेघत्वे स्रगवतंसानां वलाकात्वं पीताम्बरस्य विद्युत्त्वं वेणुरवस्य वृष्यमाणसुधारसासारत्वं गम्यम् । तत्र मेघ आकाशस्थः महदतिक्रमेण महतः सतः सकाशादतिश्रेष्ठस्य कृष्णमेघस्यातिक्रमणशङ्कितचित्तः । मन्दमन्दमनुगर्जति वेणुरवस्यानुकूल्येनैव न प्रातिकूल्येनेत्यर्थः । सुहृदं विश्वार्त्तिहरणकर्मवर्णादि साम्यात् सखायं सुमनोभिः सूक्ष्मपुष्पतुल्यैर्हिमकणैः अभि परितः सूर्यातपतापनिवृत्त्यर्थमभ्यवर्षत् । प्रतपादातपात् त्रायत इति प्रतपत्रं स्वच्छायया कुर्वन् ॥ १२ ॥ १३ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

कश्चिन्मेघोऽपि श्रीकृष्णं सेवते इत्याहुः । सहबल इति । हे व्रजदेव्यः गोप्यः स्रगवतंसेन मुक्ताफलस्रगापीडेन विलासो यस्य सः क्षितिभृतः गोवर्द्धनस्य सानुषु सहबलः वर्तमानः स्वयं जातहर्षः विश्वं हर्षयन् यर्हि वेणुरवेण उपरम्भति निनादयति नादेन पूरयति तर्हि महदतिक्रमणेन श्रीकृष्णातिक्रमेण शङ्कितं चेतो यस्य सः प्रातिकूल्यगमनभाषणाभ्यां श्रीकृष्णस्योपेक्ष्यो भविष्यामीति व्यवसायवान् मेघः वेणुरवमनु मन्दमन्दं गर्जति किञ्च सुहृदं घनश्यामत्वेन लोकार्त्तिहरत्वेनच स्वसाम्यात्सुहृद्भूतं श्रीकृष्णं सुमनोभिरभ्यवर्षत् प्रतपादातपात् त्रायते इति प्रतपत्रं छत्रं च छायया विदधत् कुर्वन् ॥ १२ ॥ १३ ॥

भाषा टीका ।

हे व्रज देवियो हो ! भगवान् बलदेवजी के सहित दिव्यमाला और कर्णभूषणों को धारण करके विलास करते हुये पर्वत के शिखरों पर सबको आनन्दित करने को वंशी बजाने से हर्षित होकर जब संसारको नादपूरित करते हैं तब मेघभी महान् भगवान् के गीतके विघ्न होने से अपमान होनेके हेतु से चित्त में शंकित होकर छायासे छत्र लगाकर अपने मित्र कृष्णचन्द्र के ऊपर फूलों की वर्षा करता है ॥ १२ ॥ १३ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अपिच महदेतदाश्चर्य्यमित्याहुः । विविधेति । हे सति ! यशोदे तव सुतो नानागोपक्रीडासु विदग्धो निपुणो वेणुवाद्ये विषये निजैव

श्रीधरस्वामिकृतभावार्थदीपिका ।

शिक्षा यासु ताः स्वोत्प्रेक्षिता नत्वन्यतः श्रुता इत्यर्थः स्वर जातीर्निषादर्षभादिस्वरालापभेदाननयदुन्नीतवान् ॥ १४ ॥

तत्ताः स्वरजातीः सवनशो मन्द्रमध्यमतारभेदेन यतो गीतध्वनिरागतस्ततश्चानता कंधरा चित्तं च येषां ते उपधार्य समाकर्ण्य कवयः कोविदा अपि न निश्चितं तत्त्वं तद्भेदो यैस्ते कश्मलं मोहं ययुरिति ॥ १५ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

एवमेकान्तगोष्ठीं संगृह्य श्रीगोष्ठेश्वरी गोष्ठीगतापि गोष्ठी तल्लीलाक्रमप्राप्ततया संगृह्यते । तत्रापि विविधप्रकारविशेषेण तत् कथामेव ताः कुर्वन्तीति विवक्षया तत्रोत्क्रान्ते मध्याह्ने स्वपुत्रागमनविलम्बाशङ्कया तां खिद्यमानां तद्विलम्बहेतूपन्यासमपूर्वकमगोपनीयरसनिबन्धेन निखिलपरमाश्चर्य वैदग्धीमय तत्क्रीडाभिनिवेशवर्णनेन प्रोत्साहयन्त्यः सान्त्वयन्ति । निगूढन्तु स्वासामपि झटिति तदागमनेच्छया तद्द्वारा तदभिनिवेशं वारयितुमभिप्रयन्ति साधारणजनवत् स्पष्टं तद्वार्त्ताकथनेन निजभावगूहनमपि कुर्वन्ति । विविधेति । विविधगोपाच्चरणेषु विदग्ध इति । इति सामान्यतस्तैरेव सर्वमनोहर इत्यर्थः । तत्र चाधरविम्बे दत्तवेणुस्तेनातिविराजमानः सन्नित्यर्थः । यदा विश्वहर्षणादिसमये स्वरजातीरुत्थापितवान् तत्रापि वेण्वित्यादि लक्षणाः उरुधा निजैव शिक्षा यासु ताः तादृशीश्च ताः वेणुवाद्य इति पार्ष्णिकोऽन्वयः । अन्योऽन्यस्वरादावपि निजाशिक्षामयत्वं वेणुवाद्यत्वाधिक्यमिति दर्शितम् । यद्वा स्वरजातीः कथम्भूताः निजशिक्षाः । पुनः कथम्भूताः वेणुवाद्य उरुधा तत्र तु नाना प्रकाराः । तत्रापि पूर्ववत् । हे सति ! जगत्पूज्ये अतस्त्वत्सुतस्यापि तादृशत्वं युक्तमेवेति भावः । उपधार्य श्रुत्वेति स्वस्वस्थानादेव श्रवणं लभ्यते । ततश्च तस्य फलरूपत्वेऽपि सर्वव्यापकत्वं बोधितं तथैव निजशिक्षाविशेषात् सुरेशा गन्धर्वादिद्वारा गीतादिश्रवणसम्पत्तिमन्तोऽपि स्वयं कवयोऽपि शक्रपुरोगास्तत्सहितलोकपालादयो देवजातयः शर्वपुरोगास्तत्सहितदेवीस्कन्दगणेशादयस्तद्गणाः . परमेष्ठिपुरोगास्तत्सहितचतुःसननारदसप्तर्षिप्रजापतिगणादयः । क्रमस्तु शक्रादीनां बहिरिन्द्रियेण प्रथमत एव तच्छ्रवणात् । शर्वस्य कैळासस्थत्वेऽप्यन्तर्निष्ठत्वेतदनन्तरमेव । परमेष्ठिनस्तु दविष्ठत्वेन तदनन्तरमेवेति । चित्तस्य आनतत्वं तत्श्रवणत्वमेकस्य स्वरस्यायं प्रभेदो गीयते इति निश्चयाभावात् । वेणुनादमाधुर्याच्च कश्मलं ययुः । अन्यत्तैः । अथवा स्वरान् जातीश्च सवनशः अनुकालं वारम्बारमपि श्रुत्वेत्यर्थः । यद्वा न निश्चितं तत्त्वं किमद्भुतमाधुरीमयमिदं किम्वा अन्यः परमचमत्कारकारी तावदपूर्वः कर्णग्राह्यः कोऽपि विषयः । किम्वा महामोहनः कोऽप्येष मन्त्र उल्लसतीति वेणुगीतस्य याथार्थ्यं यैः तथाभूताः सन्तः पश्चात् कश्मलं ययुः तदेकलीनचित्तत्वात् सर्वे विस्मृतमरारित्यर्थः । अन्यत् समानम् ॥ १४ ॥ १५ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ब्रह्मादीनामपि पारवश्यजनकं त्वत्सुतवेणुरवमिति यशोदां प्रत्याहुः । विविधेति । हे सति ! यशोदे यदा तव सुतो गोपक्रीडसु निपुणः अधरबिम्बे बिम्बतुल्येऽधरे निहितो वेणुर्येन सः वेणुवाद्यविषये बहुप्रकारा निजैव शिक्षा यासु ताः नत्वन्यतः श्रुता इत्यर्थः । स्वरजातीर्निषादर्षभादिस्वरालापभेदाननयदुन्नीतवान् ॥ १४ ॥

तदा शक्र प्रभृतयः तत्ताः स्वरजातीः सवनशः वारं वारं मन्द्रमध्य तारभेदेन वा क्रमशो वा यतो गीतध्वनिरागतस्तत अनता कन्धरा चित्तं च येषां ते उपधार्य सम्यगाकर्ण्य कवयः कोविदा अप्यनिश्चितं तत्त्वं तद्भेदो यैस्तथाभूताः कश्मलं मोहं प्रापुः इत्याश्चर्यम् ॥ १५ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

हे सति यशोदे विविधानां गवां गीतशब्दानां पतयः गन्धर्वाः तेषां चरणेषु गीतगतिषु विदग्धः समर्थः यद्वा विविधानां स्वस्वजाति स्वभावचेष्टासु नाना विधानां गोपानां चरणेषु कर्मसु विदग्धः कुशलः यद्वा विविधो गोपो रक्षणं तस्य चरणेषु तत्तदापद्रक्षणविधिषु प्रविष्ट इत्यर्थः । अधरविम्बे दत्तवेणुः अधरोष्ठबिम्बफले न्यस्तवेणुः तव सुतः यदा वेणुवाद्यमधुरां वेणुलक्षणवाद्ये कर्णसुखहेतुं निजशिक्षामात्मीयगानाशिक्षां प्रति स्वरजातीः षड्जादिस्वरसामान्यमनयत्प्रापयामास ॥ १४ ॥

तदा सुमनसो देवाङ्गनाः सुरेश्वराश्च गीतविषये कश्मलं मोहं ययुरित्यन्वयः । कीदृशाः आनतकन्धरगात्राः ईषन्नतकण्ठदेहावयवाः कवयः गानपारज्ञा निश्चिता अप्यनिश्चिततत्त्वाः अभूतपूर्वगीतश्रवणात् गीततत्त्वनिश्चयरहिताः किं कृत्वा तद्गानमुपधार्य तात्पर्येण श्रुतिं निधाय ॥ १५ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः

एवमेकान्तगोष्ठीं संगृह्य गोष्ठे श्रीगोष्ठेश्वरी गोष्ठीगतापि तल्लीलाक्रमप्राप्ततया संगृह्यते तत्रापि विशेषेण तत्कथामेव ताः कुर्वन्तीति विवक्षया । तत्रोत्क्रान्ते मध्याह्ने पुत्रागमनविलम्बशङ्कया तां खिद्यमानां तद्विलम्बहेतूपन्यासपूर्वकगोपनीयरसनिबद्धेन निखिळपरमाश्चर्य वैदग्धीमय तत्क्रीडाभिनिवेशवर्णनेन प्रोत्साहयन्त्यः सान्त्वयन्ति । विविधेति युगलेन । उपधार्य श्रुत्वेति कलरूपस्यापि तस्य सर्वव्यापकत्वं बोधितम् । तथैव निजाशिक्षाविशेषात् ॥ १४ ॥ १५ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

उत्तमांस्त्रिविधान् वक्तुं तेषामपि वेणुनादेन किञ्चिज्जातमिति वक्तुं वेणुनादं वर्णयन्ति भगवन्तश्च । विविधगोपचरणेष्विति युग्मत्रयेण । सन्देहो मोहः सर्वपरित्यागश्च ज्ञानिनां श्रुतीनामरण्यवासिनां वेणुनादेन कृतः तत्र ये विश्वगुरवो ब्रह्मादयस्तेषामपि सन्देहार्थं भगवतो वेणुनादं वर्णयन्ति । विविधेति । लोके जायमानः अळौकिकप्रकारः सन्देहमुत्पादयति ननु न तद्रूपमस्तीश्वरे यन्न वेदे श्रुतमस्तीति सर्वविद्यास्थानानां ब्रह्मा अभिज्ञ इति

निजपदाब्जदलैर्ध्वजवज्रनीरजाङ्कुशविचित्रललामैः ।
व्रजभुवः शमयन् खुरतोदं वर्ष्मधुर्यगतिरीडितवेणुः ॥ १६ ॥

श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी ।

कथं तस्य सन्देह इत्याशङ्क्याह । वेणुवाद्य उरुधा निजशिक्षा इति । सुषिरभेदो वेणुः तस्यापि प्रकाराः शास्त्रे निरूपिताः ते ब्रह्मणा ज्ञायन्ते एते तु प्रकाराः उरुधा अनेकधा निजशिक्षाः निजैनैव शिक्षा शिक्षणमभिव्यक्तिप्रकारा यासु अनेन नादब्रह्म नित्यमिति निरूपितं तत्र क्रियाशक्तिः साधनमिति तस्य लौकिकत्वे कथं नादः अलौकिको भविष्यतीत्याशङ्क्य तस्याप्यलौकिकत्वायाह विविधेषु गोप चरणेषु गोपानां सञ्चारविशेषेषु विदग्ध इति गोपसञ्चारा न वेदोक्ताः किन्तु लौकिकाः ब्रह्माण्डान्तरस्थिता अपि भवन्ति न लोकेऽन्यत्र प्रसिद्धाः नापि वेदे भगवांस्तु सर्वत्रैव विदग्धः अतो यं ब्रह्मा प्रकारं न जानाति तमेव प्रकारं कृतवान् ननु ब्रह्मसृष्टावाविर्भूतः कथं ब्रह्मणोऽप्यज्ञातं करोतीति चेत्तत्राहुः । तव सुत इति । यशोदां प्रति वदन्ति स्त्रीमण्डले समागतास्त एवात्र न कामादिवार्त्ता किन्तु अनिषिद्ध एवोत्कर्षो निरूपितः यथा तव पुत्रोऽपि सन् तव मनसाप्याकलितुमशक्यं करोति तथा ब्रह्मणोऽपि ब्रह्माण्डे जातः सतीति संबोधनं विश्वासार्थम् अज्ञाते हेतुमाहुः । अधरबिम्बे दत्तवेणुरिति । लोभात्मकोऽधर इति पूर्वमुक्तमतो न लोके प्रसिद्धः तस्य रसो भगवता न दत्त इति तत्रापि बिम्बरूपः सूर्यवत् प्रकाशकः नहि प्रकाश्याः प्रकाशकस्वरूपं विदुः तत्र च स वेणुः स्थापितः ततोऽप्युत्तमत्वख्यापनाय स्वरजातीः षड्जादिस्वरजातिभेदाननयत् नूतनत्वेनोत्पादितवान् यर्हि तदा तत्परिज्ञानार्थं त्रिगुणप्रधाना अपि देवाः कालत्रयेऽपि समागत्य सोऽपि काल आधिदैविक इति ख्यापयितुं सवनपदं तं वेणुनादं सवनश उपधार्य शक्रः सात्त्विकः शर्वस्तामसः परमेष्ठी राजस इति ते पुरोगमा येषां देवानां सर्व एव देवास्त्रिगुणात्मका भवन्ति कवयो निपुणा अपि नादे इन्द्रो हि त्रैलोक्याधिपतिः सर्वदा नादपरः शर्वस्तु शास्त्रकर्त्ता परमेष्ठी तयोरपि गुरुः अतएव परमेष्ठिपदं तेषामन्यचित्तताभावायाह । आनतकन्धरचित्ता इति । आ समन्तात् नता कन्धरा बाह्याभिनयार्थं चित्तञ्च येषां ग्राहकं चित्तं नमनमत्र सर्वतः तेऽप्यनिश्चिततत्त्वा जाता नाप्योदासीन्येन कियत्कालं विचार्य अज्ञाने तूष्णीं भूता इति मन्तव्यं यतः कश्मलं ययुः चिन्तया मूर्च्छिताश्च जाताः वेणुनादेन वा मोहिताः अतएव आभासत्वपक्षोऽपि निराकृतः अलौकिकरसोत्पादकत्वात् ॥ १४ ॥ १५ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

अथापराह्णे कादचन गोप्य आगमिष्यतः स्वप्रेयसश्चिरदर्शनासिद्ध्यर्थं विचारितयुक्तयः केनचिन्मिषेण व्रजेश्वरीसदनं गतास्तत्र च विविधवृद्धायुवतिबालिकाभिः सम्भूय विस्तार्यमाणाः स्वसुतगुणकर्मप्रभावकथाः शृण्वतीं स्वयञ्च कथयन्तीं सुतविरहविह्वलां तां स्वस्य मनश्च समाश्वासयितुं तां सम्बोध्य वेणुगानगुणप्रभावं वर्णयन्ति । विविधेति । हे सति ! श्रीयशोदे विविधं गोपानां चरणान्याचरणानि गवां कालेन दोहनवशीकरणादीनि तेषु विदग्धः तव सुतः अधरबिम्बे दत्तवेणुः सन् यदा स्वराणां षड्जादीनां जातीरष्टादशमुख्याः अन्याः सहस्रशो वा अनयत् उन्नीतवान् कीदृशीः वेणुवाद्यविषये उरुधा बहुप्रकारा निजात् स्वस्मादेव न तु परस्मात् कस्माच्चिदपि शिक्षा यासु ताः । सवनशः समये तत् स्वरजात्युन्नयनम् उपधार्य शक्रशर्वपरमेष्ठिनः पुरोगा मुख्या येषां ते । शक्रोपेन्द्राग्नियमादयः शर्वकात्यायनी स्कन्दगणेशादयः । ब्रह्म चतुःसननारदादयश्च । कवयः गानतालादिसृष्टिकर्त्तारोऽपि । आनताः कन्धराश्चित्तानि च येषामिति गानमाधुर्यास्वादानुभावः । न निश्चितं रागस्य तालस्य तानस्य स्वरादीनाञ्च तत्त्वं स्वरूपं यैस्ते ततश्चाज्ञानाद्वेणुमाधुर्याच्च मोहं प्रापुरहो जगदीश्वरा यत्र मुमुहुस्तत्र जगदीशितव्यानामन्येषां मोहे को विचार इति आर्ये जगन्मोहनोऽयं तव सुतोऽभूदिति भावः ॥ १४ ॥ १५ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

त्वत्सुतवेणुगीतेन ब्रह्मादयोऽपि मोहं ययुरिति श्रीयशोदां प्रति काश्चिदाहुः । विविधेति । हे सति यशोदे ! तव सुतः विविधेषु गोपचरणेषु गोपविहारेषु विदग्धो निपुणः अधरबिम्बे अधररूपे बिम्बे अरुणबिम्बाकारेऽधरे इत्यर्थः । दत्तो न्यस्तो निहितो वेणुर्येन सः वेणुवाद्यविषये निजैव शिक्षा यासु ताः स्वस्य सर्वकलाकुशलत्वात् स्वरजातीः निषादर्षभादिस्वरभेदान् यदा अनयत् उन्नीतवान् तदा तत् ताः त्वत्सुतोन्नीताः स्वरजातीः सवनशो मन्द्रमध्यतारभेदेन यतो गीतध्वनिरागतस्तत आनता कन्धरा चित्तं च येषां ते उपधार्य्य सम्यगाकर्ण्य कवयः बहुज्ञा अपि ते अनिश्चितं तत्त्वं भगवदुत्प्रेक्षितानां स्वरजातीनां भेदो यैस्ते कश्मलं मोहं ययुः ॥ १४ ॥ १५ ॥

भाषा टीका ।

हे सति ! यशोदाजी आपका पुत्र सब गोपालों की क्रियाओं में बड़ा चतुर है अपनी बनाई हुई गानकी शिक्षाओं को जब वंशी में बजाने को अधर पर वंशी को रखकर स्वरोंका आला पकड़ता है तब संध्या सवेरे महादेव ब्रह्मा इंद्र आदि देवता उन गीतों को सुनकर आप बड़े ज्ञानी होने पर भी मस्तकों को नीचे करके चित्त को लगाकर सुनने से भी उन रागों को नहीं समुझ सकते हैं और मोहित हो जाते हैं ॥ १४ ॥ १५ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अ. माकन्तु मोहं किंब्रूम इत्याहुः । निजपदाब्जदलैरिति । ध्वजादीनि विचित्राणि ललामानि चिन्हानि येषां तैर्निजानि

व्रजति तेन वयं सविलासवीक्षणार्पितमनोभववेगाः ॥
कुजगतिं गमिता न विदामः कश्मलेन कबरं वसनं वा ॥१७॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

पदान्येवाब्जदलानि तैर्व्रजभुवः खुरतोदं खुराक्रमणव्यथां शमयन् वर्ष्मणा देहेन धुर्यो गजस्तद्वद्गतिर्यस्य स कृष्णो वादितवेणुः सन् यद्व्रजति ॥ १६ ॥

तेन निमित्तेन सविलासवीक्षणेनार्पितो मनोभववेगो यासु ता वयं कुजा वृक्षास्तेषां गतिं गमिताः सत्यो मोहेन न विदामः कबरं वा वसनं वेति ॥ १७ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

अथ तदनन्तरजातलीलामयी गोपनीयरसनिबद्धा पुनरेका काचिदेकान्तगोष्ठी संगृह्यते तत्र तादृशनानातत्कथाश्रयेण लङ्घितेऽपि तृतीये यामे नागते श्रीभगवति काश्चिदुत्कण्ठितचित्ता गोपिकाः गोपरावृत्तिसमये तदन्वेषणार्थं पुष्पावचयादिमिषेण कदाचिद्गच्छन्ति च वनमध्यं तत्र दृष्टे दिनान्तरे प्रस्तुवन्ति च तदेव-मवतारिका अहो प्राणसख्यस्तत्र तत्र चान्येषामस्तु मोहकथा स्फुटमस्माकमेव श्रूयतामिति भाववैवश्येनाहुः । निजेति । निजशब्देनासाधारणत्वं व्यज्यते बहुत्वं गौरवेण प्रतिन्यासमपूर्वरूपत्वविवक्षया वा निजत्वादेव ध्वजादीनि विचित्राणि अद्भुतानि ललामानि येषु तैः यद्वा ध्वजादिभिर्विचित्रैः ललामैश्च सुन्दरैः उपलक्षणानि चैतानि प्रसिद्धानां चक्रादीनामनतिप्रसिद्धानामङ्कुशादीनां च व्रजभुवः व्रजसंबन्धिगोप्रचारभूमेः लक्षणया तद्गततृणादीनामित्यर्थः । गवादिखुराक्रमणव्यथां शमयन्निति गवाम्पश्चात्पश्चाद्गच्छतो भगवतः पदाब्जस्पर्शस्वभावत एव सद्यस्तृणाङ्कुरोत्पत्तेः अतएवासंख्यधेनुवृन्दमिश्रचारसमावेशः स्यात् तत्र विलासमाहुः । वर्ष्मधुर्यगतिः गजेन्द्रवच्छनैः शनैर्लीलया चलन्नित्यर्थः । यत ईरितवेणुः श्रीव्रजमभि सख्यवेणुवादनासम्पत्तेः यद्यपि स्वाभाविकमेव तस्य तत्तथापि विलासविशेषेण विशिष्टमपि स्यादिति तथोक्तं ततोऽस्मद्दृष्टिविषये त्वधिकमेव तथा चरितमिति व्यञ्जितं व्रजति इतस्ततो भ्रमतीत्यर्थः । तेन कारणभूतेन यत्सविलासं सलीलं वीक्षणमस्मासु तत्र तत्र च दृष्टिः तेनार्पितोऽन्तर्निहितो मनोभवस्य वेगो यासु ताः इति स्वतोऽतिकातर्यत्वमुक्तं कुजगतिं स्थावरत्वं जाड्यमित्यर्थः । गमिताः प्रापिताः यद्वा तेनेति कुजगतिगमितत्वे सविलासे सति न विदाम इत्यत्र हेतुर्विवेचनीयः तस्य व्रजेनास्माकमगत्वं वैदग्ध्या च मुग्धत्वमिति कारणवैपरीत्येनाद्भुतत्वं ततस्तस्य परमं मोहनत्वं स्वेषां दैन्यं च दर्शितं कबरं वसनं वा न विद्मः स्खलितमिति शेषः । तदनुक्तिर्लज्जया कवरीमिति कियत् वसनमपीत्यर्थः । वा समुच्चये टीकायामपि तथैव ॥ १६—१७ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अस्माकन्तु मोहं किं ब्रूम इत्याहुः । निजेति । ध्वजादीनि विचित्राणि ललामानि चिन्हानि येषां तैर्निजानि पदान्येवाब्जदलानि तैर्व्रजभुवः खुरतोदं खुराक्रमणव्यथां शमयन्वर्ष्मणा शरीरेण धुर्यः धुरं वहतीति तथा सच गजराजस्तद्वद्गतिर्यस्य सः कृष्णः वादितवेणुः सन् व्रजतीति यत् ॥ १६ ॥

तेन निमित्तेन सविलासवीक्षणेनच अर्पितो मनोभववेगो यासु ता वयं कुजा वृक्षास्तेषां गतिं प्रकारं निश्चेष्टतामिति यावत् गमिताः प्रापिताः सत्यो मोहेन कबरं वसनं वा न विदामः ॥ १७ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली

ध्वजादय एव विचित्राणि नानाकाराणि ललामानि लाञ्छनानि येषां तानि तथा यद्वा ललामानि तिलका येषां तानि तथा यद्वा ललामानि भूषणानि येषां तानि तथा तैः "ललामोऽस्त्री ध्वजे श्रेष्ठे भूषायां पुण्ड्रचिह्नयोः" रितिच निजपदाब्जयोर्दलैः अङ्गुलीलक्षणैः यद्वाजानि नित्यानि अन्येनामाऽितानि पदान्येव पादाङ्का एवाब्जानि यानि तेषां दलैर्विभागैः व्रजभुवः गवाङ्खुरतोदं खुरनिखातव्यथां प्रकर्षेण शमयन् परिहरन् वर्ष्मणा महता शरीरेण युक्तो धुर्यो वृषभस्तस्य गतिरिव गतिर्यस्य स वर्ष्मधुर्यगतिः यद्वा वर्ष्मधुर्यो गजराजः तद्वा ईरितवेणुः शब्दितवेणुर्यः ॥ १६ ॥

तेन व्रजमितेन प्राप्तेन कृष्णेन सविलासवीक्षणेन अर्पितो मनोभवस्य कामस्य वेग उद्रेकलक्षणः संस्कारो यासु तास्तथा रात्रिविशेषे वनाद्व्रजगतिं गोष्ठाख्यमन्दिरं गमिताः प्रापिताः वयं कश्मलेन मनोऽनवस्थानलक्षणेन मोहेन स्रस्तं कबरं केशभारं वसनं वस्त्रं वा स्थितिं वा न विदामः न जानीम इत्यन्वयः । कुजगतिमितिपाठे स्थावरस्वभावमित्यर्थः । ब्राह्ममुहूर्तादुत्थाय कृष्णाज्ञया वनात्प्रासव्रजानां पश्चादागतस्य कृष्णस्य पुनर्दर्शनेन मुग्धानां गोपिकानां वचनमिदमिति भावः ॥ १७ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

अथ तदनन्तरं जातलीलामयी गोपनीयरसनिबद्धा पुनरेका काचिदेकान्तगोष्ठी संगृह्यते । तत्र तादृश नाना तत्कथाश्रयेण लङ्घितेऽपि तृतीये यामे नागते श्रीकृष्णे काश्चिदुत्कण्ठितचित्ता गोपरावृत्तिसमये तदन्वेषणार्थं पुष्पावचयादिमिषेण काश्चिद्गच्छन्ति च वनमध्यम् । तत्र दृष्टे दिनान्तरे प्रस्तुवन्ति च तदेवमवतारिका अहो प्राणसख्यस्तत्र तत्र चान्येषामस्तु मोहकथा । स्फुटमस्माकमेव श्रूयतामिति भाववैवश्येनाहुः । निजेति युगलेन । निजत्वसाधारणत्वं व्यज्यते । बहुत्वं गौरवेण प्रतिन्यासमपूर्वरूपत्वविवक्षया दलैरिति क्वचिद्व्रजभुवस्तत्सम्बन्धिभूमेर्लक्षणया तद्गततृणादीमित्यर्थः । गवादिखुरतोदं शमयन्निति गवां पश्चाद्गच्छतः श्रीकृष्णस्य पदाब्जस्पर्शस्वभावत

मणिधरः क्वचिदागणयन् गा मालया दयितगन्धतुलस्याः ॥
प्रणयिनोऽनुचरस्य कदांसे प्रक्षिपन् भुजमगायत यत्र ॥ १८
क्वणितवेणुरववञ्चितचित्ताः कृष्णमन्वसत कृष्णगृहिण्यः ॥
गुणगणार्णमनुगत्य हरिण्यो गोपिका इव विमुक्तगृहाशाः ॥ १९ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

एव सद्यस्तृणाद्यङ्कुरोत्पत्तेः अतएवासंख्यधेनुवृन्दनित्यचारणा-समावेशः स्यात् ॥ १६ ॥ १७ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

अस्त्वन्येषां वार्त्ता वेणुनादोऽस्माकमेवान्यथात्वं सम्पादयतीत्याहुर्द्वयेन पूर्ववत् । निजपदाब्जदलैरिति । यर्हि ईरितवेणुः सन् व्रजति तदा तेन नादेन कुजगतिं स्थावरत्वं गमिता वयं गोप्यः सर्वा एव कश्मलेन मूर्च्छया वसनं परिहितं केशपाशं वा न विदाम इति सम्बन्धः । अयं वेणुनादः अस्मदर्थमेव जायत इति तस्य चेष्टया अनुभवाच्च ज्ञायते तत्र चेष्टा या गोकुलनिवासिनामेवार्थे जायते तया व्याप्तः कथमन्यकार्थे कुर्यात् अतः प्रथमं भगवतो गोकुलहितकर्तृत्वमाहुः । निजस्य स्वस्यैव यत्पदाब्जद्वयं तस्य दलैर्दशाङ्गुलीभिः तलभागैर्वा व्रजभुवः निरन्तरं पश्वाक्रमणेन जातव्यथायाः व्रजभूमेः खुरैर्जातं तोदं शमयन्निति शनैः शनैर्लीलया भगवद्गतिर्निरूपिता क्षतांशः गतिविलासेन पादस्पर्शेन निराकृतः आध्यात्मिकाधंशस्तु ध्वजादिना तामसः भौतिकः ध्वजेन निराक्रियते राजसः आध्यात्मिकः वज्रेण सात्विक आधिदैविकः नीरजाकृतिचिह्नेन तान्येव विचित्राणि ललामानि पदेषु तेन लौकिकालौकिकप्रकारेण व्रजभुवः खुरतोदप्रशमनं व्रजे तिस्रः प्रधानभूताः भूमिः गावो गोप्य इति तत्रभूमेर्दुःखनिवृत्तिं गत्या निरूप्य गत्याकृत्या च गवां दुःखं निवारयतीत्याहुः । वर्ष्मधुर्यगतिरिति । वर्ष्मधुर्यो महावृषभः ककुद्मी स यथा लीलया मन्थरगतिः तथा गच्छन् गवामपि दुःखहारीव निरूपितः ईडितवेणुर्व्रजतीति गोपिकानां तदास्माकं वेणुनादेन जाते कामे स्थावरत्वमधिकं जातमित्याहुः । तेनेति । स्वभावत एव वेणुनादेन जातः कामः तत्रापि सविलासवीक्षणेन अर्पितः मनोभववेगो यासु अतो वेगेन स्तम्भे जाते कुजगतिं वृक्षगतिं गमिता जाताः तेषामन्तर्ज्ञानमस्तीति तदर्थमाहुः । न विदाम इति । सुषुप्तावपि न जानन्तीति तद्व्यावृत्त्यर्थमाहुः । कश्मलेनेति कश्मलेन मूर्च्छया स्त्रीणामत्यावश्यकं वसनज्ञानं कबरज्ञानञ्च वेणुनादप्रस्ताव एवैतज्जातमिति गतिदृष्ट्यादिभिरपि कृतमत्र निरूप्यते ॥ १६ ॥ १७ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

अथान्ययूथस्थाः स्वसखीः प्रति वेणुहेतुकं स्वमोहमेवाहुः । निजपदान्येव अब्जदलानि तैः कीदृशैः ध्वजादीनि विचित्राणि ललामानि चिह्नानि येषां तैः गोष्ठगमनसमये अग्रतो गतानां गवां खुरतोदं खुराक्रमणव्यथां व्रजभुवः शमयन् तदुपरि स्वचरणाब्जन्यासेन शमयितुं यदा वर्ष्मणा देहेन धुर्यो गजस्तद्वद्गतिर्यस्य स कृष्णो व्रजति तदा तेन कृष्णेन सविलासवीक्षणेनैवार्पितो मनोभववेगो यासु ता वयं कुजा वृक्षास्तेषामिव गतिं गमिताः प्रापिताः सत्यो मोहेन कबरं वसनं वा न विदामः । तयोः स्खलनं न जानीम इत्यर्थः । तेन व्रजभुवः खुरतोदं चरणाम्बुजन्यासेन शमयामास । व्रजसुभ्रुवान्तु मनसिजतोदं नयनाम्बुजन्यासेनोत्पादयामासेत्येवमेवास्माकं ललाटमिति द्योतितम् ॥ १६ ॥ १७ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

काश्चित्स्वमोहातिशयमनुवर्णयन्ति । निजपदाब्जदलैरिति । ध्वजादीनि विचित्राणि ललामानि चिह्नानि येषां तैः ध्वजादीन्यन्येषामप्युपलक्षणानि निजपदान्येवाब्जदलानि तैर्बहुवचनं "कृत्वा तावन्तमात्मान"मिति बहुमूर्त्यभिप्रायेण यद्वा पदाब्जयोर्दलैरङ्गुलीभिः व्रजभुवः खुरतोदं गवादिखुराक्रमणव्यथां शमयन् वर्ष्मणा देहेन धुर्य्यः धुरं वहतीति स तथा तद्वद्गतिर्यस्य सः श्रीकृष्णः वादितो वेणुर्येन सः तथाभूतः सन् यद्व्रजति तेन हेतुना सविलासं यत्तदीयं वीक्षणं तेन अर्पितो मनोभववेगो यासु ता वयं कौ पृथिव्यां जायन्ते इति कुजाः वृक्षास्तेषां गतिं निश्चेष्टतां गमिताः सत्यो मोहेन कबरम् वसनं वा न विद्मः ॥ १६ ॥ १७ ॥

भाषा टीका ।

जब भगवान् वज्र कमल अंकुश आदि विचित्र चिन्हों से मनोहर अपने चरण रूप कमल पत्रों से ब्रजकी पृथिवी में गउओं के खुरोंका जो दुःख है उसको दूर करते हुये हस्तीके चालसे चलते हुये वेणुको वजाते हैं और चलते हैं तव उनके विलासों के सहित देखने से हम लोगों को कन्दर्पका वेग होता है तव वृक्ष सरीकी हमारी दशा होजाती है तव मोहित होकर अपने मस्तक के केशवंध अथवा वस्त्रों को खुलते नहीं जान सकती हैं ॥ १६ ॥ १७ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

किञ्च मणिधरो मणीन् ग्रथितान् गोपनार्थं धरतीति मणिधरः क्वचिद्देशे पैतैर्मणिभिर्गा आसमन्ताद्गणयन् तथा दयितगन्धा या तुलसी तस्या मालया सहवर्त्तमानः प्रणयिनः प्रियस्यानुचरस्यांसे भुजं प्रक्षिपन् यत्र यदा कदाचिदगायत ॥ १८ ॥

तदा क्वणितवेणुरवेण वञ्चितान्यपहृतानि चित्तानि यासां ताः

श्रीधरस्वामिकृतभावार्थदीपिका ।

कृष्णस्य हरिणस्य गृहिण्यो भार्या गुणगणार्णं गुणगणसमुद्रं कृष्णमनुगत्य प्राप्य ताः कृष्णमेवान्वसतान्वासत न न्यवर्त्तन्तेत्यर्थः । कुतः यतो विमुक्ता गृहाशा याभिस्ता गोपिका इव ता अपि ह्येवमेवान्वासतेति ॥ १९ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

तथा पराह्णे स्वीकृतवेशान्तरो गृहागमनाय मुहुर्वेणुगानेन गाः समाहरति गणयति च अहो वत तत्र मृग्योऽप्याकृष्यन्ते किमुत वयं गोप्य इत्याहुः । मणीति । मणिमालाधारी सन् गा आगणयन् जगौ क्रमशस्त त्तद्यूथमुख्यमुख्याया नाम वेणुना गायतिस्म तास्तथैव स्वस्वयूथेनागतास्तत्तद्वर्णादिसङ्केतीकृतत्तन्मणिमालया गणयति स्म चेत्यर्थः । यद्यपि कृष्णवत्सैरसंख्यातैरिति पूर्वोक्तं तथापि यूथेशादि गणनाभिप्रायेणैवदमुक्तं तद्बुद्धिप्राबाण्याभिप्रायेण वाऽपर्य्युपरि बुद्धीनां चरन्तीश्वरबुद्धय इति न्यायेन दयितगन्धत्वेन तुलस्या मालया पत्रादिनिर्मितया सदा विशिष्ट इत्यर्थः । यद्वा भ्रमरगानं मालायां प्रकल्प्य सापत्न्येन सेर्ष्यमाहुः तया सहागायतेति तस्या धाष्टर्यं व्यञ्जितङ्कुर्वन्नगायत किञ्चिन्नीचभूमिकास्थितस्य अनुचरस्यांसे भुजं वामं दक्षिणमेव वा कूर्परोर्ध्वभागं प्रक्षिपन् लीलया विन्यस्यन् अतः स एव प्रेमयुक्तसौभाग्यवान् नतु वयमिति भावः । क्वणितवेणुरवेति वक्ष्यमाणत्वाद्वेणुनैवागायदिति सिद्धं क्वणितेति विशेषणेन क्वणनविशेषेण वादितो यो वेणुस्तस्य रवेण वञ्चितानि प्रलम्भितानि तत्पूर्वक्रमपहृतानि चित्तानि यासां ताः कृष्णगृहिण्यः कृष्णेति देशपावनपतिका अपीत्यर्थः । गृहिण्य इति मानुषजातिवत् पत्युः परमप्रेयस्योऽपीत्यर्थः । कृष्णमन्वसत तत्परित्यागेन कृष्णमेवाश्रिता इत्यर्थः । तत्र हेतुः गुणगणार्णमिति कृष्णगृहिण्य इति श्लेषेणापि कृष्णस्य भार्य्यात्वं प्राप्ता नर्म विमुक्तेति तैर्व्याख्यातं यद्वा विमुक्ता गृहाः आशाश्चाशनं याभिस्ताः गृहं पत्यादिपरिकरः वयमित्यनुक्त्वा गोपिका इत्युक्तं गोपिका जातित्वेनैव तदेकस्वभावसिद्धेः तदभावेऽपि तासामित्यभिप्रायेण यद्वा वयमित्युक्तेरपि गोपिका इत्यस्य रसविशेषपोषकत्वं परोक्षवचनात् ॥ १८—१९ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

किञ्च माणिधरः मणीन् ग्रथितान् गोगणनार्थं धरतीति मणिधरः क्वचिद्देशे तैर्मणिभिर्गा आसमन्ताद्गणयन् तथा दयितगन्धा इष्टगन्धा या तुलसी तस्या मालयोपलक्षितः प्रणयिनः प्रियस्यानुचरस्यांसे स्कन्धे भुजं प्रक्षिपन्निदधत् यत् यदा क्वचिदगायत् ॥ १८ ॥

तदा तत्र, क्वणितस्य वादितस्य वेणो रवेण वञ्चितान्यपहृतानि चित्तानि यासां ताः यन्त्रिताचित्ता इति पाठे परवशीकृतानि चित्तानि यासां ताः कृष्णस्य हरिणस्य गृहिण्यो भार्या हरिण्यो गुणगणार्णं गुणगणसमुद्रं कृष्णमनुसृत्य प्राप्य तं कृष्णमेवान्वसत अन्वासत न न्यवर्तन्तेत्यर्थः । कुतः यतो विमुक्ताः त्यक्ताः गृहाशाः याभिः कथं गोपिका इव ता अपि ह्येवमेव तमन्वासन्निति ॥ १९ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

मणिधरः कौस्तुभरत्नधारी दयितगन्धा प्राणप्रियगन्धा तुलसी यस्यां सा तथा तया मालयोपलक्षितः प्रणयिनः स्निग्धतमस्यानुवर्तमानस्य कस्यचिद्गोपस्यांसे भुजशिरसि भुजं प्रक्षिपन्निदधानो गा आगमयन् वनाद्व्रजमावर्तयन् कृष्णः क्वचित्कस्मिंश्चित्काले यत्र यस्मिन्देशे अगायत ॥ १८ ॥

तदा वञ्चितचित्ताः प्रलोभितान्तःकरणाः कृष्णगृहिण्यः कृष्ण मृगपरिग्रहभूताः हरिण्यो गुणगणार्णं गुणगणसमुद्रं क्वणितवेणु ध्मातवेणुं कृष्णमनुगम्य उपान्वीयुः उपासतेत्यन्वयः का इव विमुक्तगृहेशाः परित्यक्तनिजपतयः उभयत्र समानं गोपिका गोपाङ्गना इव अन्यत्र गोपनशीला इव ॥ १९ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

अथापराह्णे स्वीकृतवेशान्तरो गृहागमनाय मुहुर्वेणुगानेन गाः समाहरति गणयति च अहो वत तत्र मृग्योऽप्याकृष्यन्ते किमुत वयं गोप्य इत्याहुः । मणीति युगलेन । मणिमालाधारी सन् ॥ १८ ॥ १९ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

हरिणीनां वेणुनादेन यथाजातं तदुक्तं पूर्ववद्वेणुनादं वर्णयन्ति । मणिधर इति द्वाभ्याम् । गवामाधिदैविकानि रूपाणि मणयः तान् स्वस्मिन् बिभर्तीति मणिधरः अभिज्ञानार्थं वा स्वप्रियाणामभिज्ञापका मणयः अतस्तैः कदाचित्गाः आसमन्तात् गणयन् जातः अनेन ताः तद्गता धर्माश्च समवत्येव प्रतिष्ठिता इति तासां संसाराभावः सूचितः अतएव गोपिकानामपि अत एव हरिणीनामपि पशुत्वाविशेषात् ग्राम्याणांचेदुद्धारकः विशेषतः आरण्यान भविष्यतीति युक्ता कृष्णपरता मालया दयितगन्धतुलस्याः उपलक्षितः यथा भगवतः नीलं रूपं प्रियं स्पर्शः स्त्रीणां शब्दो वेणोः रसो नवनीतस्य तथा गन्धः तुलस्याः तद्गतोत्तमता सात्त्विकानां केषाञ्चिदनुभवसिद्धा तादृशी तुलसी अतस्तस्या मालां बिभर्ति अतो यदा वयमपि प्रिया भविष्यामः तदा अस्मानपि अस्मद्धर्मान् वा धारयिष्यतीति कृष्णसारस्त्रीणां प्रवृत्तिः कृष्णसारस्तु वेदे नियुक्त इति भक्तौ तासां विनियोगार्थं प्रवृत्तिः किञ्च प्रणयिनोऽतिप्रेमवतः अनुचरस्य गोपस्यांसे भुजं प्रक्षिपन्निति कदा कदाचित् “आशंसायां भूतवच्च” इति वा कदा अगायतेति मध्ये गानांश सा यथा गोपालस्य तथा स्नेहसेवाधर्मयोः सद्भावे एवं भविष्यतीति गोपिकानामिव हरिणीनामपि तथात्वाय स्नेहभजनं देहस्फुरणात् न विजातीयत्वेन कामाभावः ॥ १८ ॥

तदेव क्वणितो यो वेणुः आकस्मिकः शब्दविशेषो मनोहारी क्वणनात्मकः स वेणोर्निर्गतस्तत्सम्बन्धादन्योऽपि शब्दाः चित्तवञ्चका इति रवपदं शब्देन मृगाणां वशीकरणं सिद्धमेव स्वामीभेवोपयोगी भविष्यतीति प्रतीतिजननाद्वञ्चकत्वम् अतो रवेण वञ्चितचित्ताः कृष्णमन्वसत कृष्णसमीपे आसत उपविष्टा जाताः यथाप्रायमुपविशति एवं कृष्णमनुपविष्टाः ननु स्त्रियोऽन्यस्य कथमन्यस्य

कुन्ददामकृतकौतुकवेषो गोपगोधनवृतो यमुनायाम् ।
नन्दसूनुरनघे ! तव वत्सो नर्मदः प्रणयिनां विजहार ॥२० ॥
मन्दवायुरुपवात्यनुकूलं मानयन्मलयजस्पर्शेन ।
वन्दिनस्तमुपदेवगणा ये वाद्यगीतबलिभिः परिवव्रुः ॥ २१ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

हे ऽन्यस्य समीपे उपविष्टा इति तत्राह । कृष्णस्य कृष्णसारस्य गृहिण्य इति कृष्ण इति तास्तस्य गृहिण्यो जाताः वञ्चितचित्तत्वाद्वा रूपं विस्मृत्य शब्दमात्राभिनिविष्टा जाताः वेणुनादेन वा सानुभावेन कृष्णसारेऽपि कृष्णमत्या कृष्णमेवान्वासत ननु कृष्णसारेऽपि कृष्णभ्रमात् शब्दोऽपि वर्त्तेत इति तं परित्यज्य कथमागता इत्यत आह । गुणगणार्णमिति । कृष्णसारे एको द्वौ वा गुणौ अतो यत्रैव भगवान् गच्छति तत्रैव तमनुगत्य सर्वा एव हरिण्यः विमुक्तगृहाशा जाताः गृहं गमिष्याम इत्याशामपि त्यक्तवत्यः सान्निध्येन भगवद्रसः पीत इति लब्धस्वादुभावाः गोपिका इव तदेकपरा जाताः एतन्नयनेषु स्वप्रियानयनसादृश्यदर्शनेन यादृशेन भावेन ताः पश्यति तादृशेनैवैता अपि पश्यन्तीत्येतासामपि तत्सजातीयभावोत्पत्तिस्तथैव वेणुकणनञ्च अतएवाग्निबीजामृतबीजात्मकं स्वपदमुक्तं यतस्तच्छ्रवणेऽस्यातिस्तत्तापशमनञ्च सम्पद्येते अतः स्वदृष्टान्तोक्तिर्युक्ता ॥ १९ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

गोष्ठस्थानां स्त्रेषां मोहमिव वनस्थानां मृगीणां वेणुहेतुकं मोहमाहुः । मणिधरः गोगणनसंख्यानमणिमालाधरः । शुक्लरक्तश्यामपीतानां चतुर्णां वर्णानां प्रत्येकं पञ्चविंशतिप्रभेदैः शतं वर्णा भवन्ति । तथैव चित्रितत्वचन्दनतिलकत्वादिवर्णैर्मृदङ्गमुखत्वाद्याकारैश्चान्यैऽप्यष्टप्रभेदा भवन्ति । ततश्च तत्तद्गोकारैरष्टोत्तरशतमणिगोलकैर्गोगणनार्थं कृष्णेन गोजपमालिका कृतास्ति तां मालां गृहीत्वैवासङ्ख्यानामपि गवामष्टोत्तरशतं यूथान् पृथक् पृथक् वर्णान् गणयति । तथाहि । हिंहीं धवलीत्याह्वानेन धवळीयूथो यथा आयाति तथैव हंसी चन्दनी गङ्गे मुक्ते इत्याह्वानेन तत्प्रभेदाश्चतुर्विंशतिरन्येऽपि यूथा आयान्ति । एवमरुणी कुंकुमी सरस्वतीत्यादि संज्ञाः श्यामला धूमला यमुनेत्यादि संज्ञाः पीता पिङ्गला हरितालिकेत्यादि संज्ञाः चित्रिता चित्रतिलका दीर्घतिलका तिर्यक्तिळकेत्यादि संज्ञाः मृदङ्गमुखी सिंहमुखीत्यादि संज्ञाश्च स्वस्व नामभिराहूता आयान्त्यतो वनाद्गोष्ठगमनसमये काश्चनापि गावो विस्मृता माभवेयुरित्येकैकमणिगोलकावर्त्तनेन गा गणयन् दयितगन्धा तुलसी तस्या मालया सह वर्त्तमानः । प्रणयिनः प्रियस्यानुचरस्य स्कन्धे भुजं प्रक्षिपन् यदा अगायत तदा क्वणितस्य वेणी स्वेण वञ्चितान्यपहृतानि चित्तानि यासां ताः कृष्णस्य कृष्णसारस्य गृहिण्यो हरिण्यः कृष्णमन्वसत अन्वासत अन्ववर्त्तन्तेत्यर्थः । यतो गुणगणार्णं गुणसमुद्रं कृष्णमनुगम्य प्राप्य

तद्गुणानास्वाद्येत्यर्थः । विमुक्ता गृहाशा याभिस्ता गोपिका इव वयमप्येवं वृत्ता भवामः ॥ १८ ॥ १९ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

काश्चित्तु नारीणां विमोहस्य का कथा मृगीणां मोहो ऽदृष्टो दृष्ट इत्याहुः । मणिधर इति । दयित इष्टोऽपि गन्धो यस्याः सा दयितगन्धा तुलसी तस्या माळयोपलक्षितः श्रीकृष्णः मणीन् ग्रथितान् गवां गणनार्थं धरतीति मणिधरः क्वचित्तैर्मणिभिर्गाः आसमन्ततो गणयन् प्रणयिनः स्नेहवतो ऽनुचरस्यांशे स्कन्धे भुजं प्रक्षिपन् यत्र यदा अगायत् तदा क्वणितस्य वादितस्य वेणो रवेण वञ्चितानि विमोहितानि चित्तानि यासां ताः कृष्णगृहिण्यः कृष्णहारिणभार्या हरिण्यः गोपिका इव विमुक्तगृहाशाः गुणगणानां कल्याणगुणसमूहानामर्णं समुद्रं श्रीकृष्णमनुगत्य प्राप्य तमेव अन्वसत अन्वासत अन्ववर्तन्तेत्यर्थः ॥ १८ ॥ १९ ॥

भाषा टीका ।

किसी समय में बडी प्रिय गंध वाली तुलसी की माला को पहर कर अपने प्रेमी सखा के कांधे पै हाथ रख-कर हाथ में मणियों की माला से गिनकर गउओं के बुलाते समय जब कृष्ण गान करते हैं तब वीणा के शब्द सरीके बंशी के शब्द को श्रवण करके बडी मोहित होकर कृष्ण-सार मृगों की मृगी हरिणी गुणसागर भगवान के पास में आकर गोपिन सरी कीं घर की आशा को छोडकर श्रीकृष्ण चन्द्र के पास में खडी रहती हैं ॥ १८-१९ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तदेवं वृन्दावनप्रदेशेषु क्रीडित्वा सायाह्ने गोधनानि परावर्त्य यमुनायां क्रीडतस्तस्य सौभाग्यमनुवर्णयन्ति । कुन्ददामकृतकौतुकवेष इति । गोपीनामुत्सवाय कुन्ददामभिः कृतः कौतुकेनोत्सवेन वेषो ऽलङ्कारो येन सः हे अनघे ! यशोदे तव वत्सः पुत्रो नन्दसूनुः कृष्णः यद्वा सहैव बह्व्यः कथयन्त्यः काश्चित्तव वत्स इति काश्चिन्नन्दसूनुरिति ऊचुः नर्मदो हर्षदः सन् यदा विजहार क्रीडति स्म ॥ २० ॥

तदा मलयजस्पर्शेन मलयजस्य चन्दनस्येव सुरभिः शीतश्च यः स्वस्पर्शस्तेन तं कृष्णं मानयन्ननुकूलं यथा तथोपवाति वीजयति यद्वा मलयजो दक्षिणो वायुः यद्वा मलयजस्य कृष्णेन स्वाङ्गेऽनुलिप्तस्य स्पर्शेन मानयन्निति किञ्च वन्दिन इव स्तावकाः सन्तो

श्रीधरस्वामिकृतभावार्थदीपिका ।

गन्धर्वादिगणा वाद्यगातपुष्पवर्षादिभिः परिवव्रुः परित उपासत ॥ २१ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

अथ पुनर्व्रजेश्वरीसभागतम् पूर्वोक्तगोसमाहरणादिसामयिकलीलानन्तरं लीलावर्णनं संगृह्यते । तच्च समाहरणं द्वितीयजलपानसमय एव स्यात् इति व्यज्यते च । तत्र तादृशीञ्च लीलां स्वयमनुभूय कालातिक्रमेणार्तां तन्मातरं तदागमनवार्त्तया स्वस्थयितुमभिगम्य पूर्ववदाहुः । कुन्देति युग्मकत्रयेण। कुन्देति मन्देति च कार्त्तिकमासोऽयमिति लभ्यते वसन्ते कुन्दानर्हत्वात् हेमन्तशिशिरयोर्वायोर्द्वेषाच्च । तत्र च तदीयेन सर्वसुखदळीळत्वेन सर्वसेवासुखपात्रत्वेनच तां स्वस्थयन्ति विलम्बे कारणमपि निवेदयन्ति। कुन्देति । यमुनायां विजहार तस्या जले स्नानकेलिं विधाय तीरे सविलासं चिक्रीडेत्यर्थः । कीदृशः सन् विजहार तत्राहुः । कुन्ददामेति । समस्तादिनभ्रमणश्रान्त्या स्नानस्यापेक्षत्वात् कुन्ददाम्नां जलक्लिन्नतायामरुचिप्रदत्वेन तत्पश्चाद्भावयोग्यत्वाच्च । तत्र सर्वसुखदलीलत्वादिकं वदन्त्यो विळम्बे कारणमपि सूचयन्ति । गोपैत्यादिभिः तस्य च तादृशत्वं युवयोः पुत्रत्वादनुरूपमेवेत्यर्थः । सर्वानन्दकतया तन्नाम्ना प्रसिद्धस्य सूनुः । न विद्यते अघं दुःखं सर्वेषामपि यतः हे तथाभूते इति तथैव सर्वानन्दिन्यास्तव च वत्स इत्यर्थः । तत्र वत्स इति धेनूनां वत्स इव परमस्नेहविषय इत्यर्थः । अतस्तव त्वत्यर्थं वैयग्र्यं युक्तमेवेति भावः । गोपैति । जलादितृप्ततया स्थगितगमनैर्गोपैर्गोधनैश्चावृत इत्यर्थः । तत्रापि प्रणयः सख्यमयस्नेहस्तद्वतां नर्मदः सपरिहासकेलिभिः सुखद इत्यर्थः । कौतुकं क्रीडोत्सवो हर्षो वा । वेशोऽवतंसाद्यलङ्कारः । एवं पूर्ववेशपरित्यागेन वेशान्तरं ज्ञेयम् । अनुकूलं प्रियम् । यद्वा । पृष्ठवायुत्वेन गमनानुकूलं यथा स्यादिति सोऽपि तत्स्वैरचारितायां सहाय इति भावः । अतो मन्दपदं श्लिष्टमपि ज्ञेयम् । तमिति कर्मसम्बन्धात् उपवाति वीजयतीत्यर्थः। यद्वा । उपसमीपे वाति । यत्रादौ तत्रैव तादृशो वायुर्नान्यत्रेत्यर्थः । मानयन् पूजयन् मलयजेति तैर्व्याख्यातम । अत्र मलयजो दक्षिणो वायुरिति पक्षे वैकल्पिको विसर्गलोपः । शरदि तस्य च सद्भावात् तादृशानुकूल्याय तु सुतरां पृष्ठवायुत्वपक्षे सोऽप्यनुकूलं यथा स्यात्तथैवोपवातीत्यर्थः । उपदेवा गन्धर्वादयो ये ते सर्वेऽपीत्यर्थः । वन्दिन इति गीतेति च गीतद्वारा स्तुतिर्बोध्यते । बलिवाद्ययोस्तु तदनुगतत्वम् । बलिरत्र दिव्यवस्त्रालङ्कारभोगादिसामग्रीमयो ज्ञेयः अतो गीतप्राधान्यात् गन्धर्वादिगणा इति तैरप्युक्तम् । परिवव्रुरिति तेऽपि तदागमनविलम्बं चक्रुरित्यर्थः । किन्तु वायोरेषाञ्च प्रस्थानमाङ्गलिकत्वात् शीघ्रसुखागमनं भवेदेवेति भावः ॥ २० ॥ २१ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं वृन्दावनप्रदेशेषु क्रीडतो लीलाः प्रगीताः अथ सायान्हे गोधनानि परावृत्य यमुनायां क्रीडतः सौभाग्यमनु वर्णयन्ति । कुन्देति । कुन्ददामभिः कुन्दकुसुमस्रग्भिः कृतः कौतुकेनोत्सवेन वेषोऽलङ्कारो येन सः हे अनघे ! यशोदे श्रीकृष्णः तव वत्सः पुत्रः नन्दसूनुः यद्वा सहैव बह्व्यः कथयन्त्यः काश्चित्तव वत्स इति काश्चिन्नन्दसूनुरिति चाहुः प्रणयिनां सखीनां नर्मदः हर्षदः गोपैर्गोकुलेनच वृतो यमुनायां विजहार यदेति शेषः ॥ २० ॥

मन्दवायुरित्यस्य तु तदेत्यादिः तदा मन्दवायुर्मलयजस्येव सुरभिः शीतश्च स्पर्शस्तेन कृष्णं सम्मानयन्निति अनुकूलं यथा भवति तथा उपवाति वीजयति यद्वा मलयजो दक्षिणो वायुः यद्वा मलयजस्य कृष्णेनालिप्तस्य स्पर्शेन मानयन्निति किञ्च ये वन्दिनस्तावका उपदेवगणाः सिद्धविद्याधरादयः ते वाद्यगीतपुष्पवर्षादिभिः तं कृष्णं परिवव्रुः परित उपासत ॥ २१ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावळी ।

हे अनघे ! यशोदे कुन्ददाम्ना पुष्पमालयालङ्कृतः कौतुकवेषः विवाहकाले वरस्य हस्ते यत्सूत्रं बध्यते तत्कौतुकं तदीयो वेषः स यस्य स कुन्ददामकृतकौतुकवेषः "कौतुकं विषयाभेदे हस्तसूत्रे कुतूहल" इति यादवः गोपादिभिः परिवृतः प्रणयिनां नर्मदः लीलावचनेन आनन्ददः तव वत्सः बालः नन्दसूनुर्यदा यमुनायां विजहार ॥ २० ॥

तदा मलयजस्पर्शेन चन्दनगन्धदानेन कृष्णं मानयन् वायुर्यथानुकूलो भवति तथा मन्दम्मन्दमुपवाति वीजयतीत्यन्वयः किञ्च तदा ये उपदेवगणाः देवसमीपे वर्त्तमानाः गन्धर्वाः वन्दिनो वन्दमानाः यद्वा मङ्गलपाठकाश्च वाद्येन गीतेन बलिना उपहारेण च तं कृष्णं परिवव्रुः ॥ २१ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

अथ पुनर्व्रजेश्वरीसभागतं पूर्वोक्तगोसमाहरणादि सामयिकलीलानन्तरं लीलावर्णनं सङ्गृह्यते तच्च समाहरणं द्वितीय जलपान समय एव स्यादिति व्यज्यते च तत्र तादृशीञ्च लीलां स्वयमनुभूय कालातिक्रमेणार्त्तां तन्मातरं तदागमनवार्तया स्वस्थयितुमभिगम्य पूर्ववदाहुः । कुन्देति युगलत्रयेण तत्र च तदीयेन सर्वसुखदलीलात्वेन सर्वसेवासुखपात्रत्वेन च तां स्वस्थयन्ति विळम्बे कारणमपि निवेदयन्ति कुन्देति युगलेन यमुनायां विजहार तस्या जले स्नानकेलिं विधाय तस्यास्तीरे सविळासं चिक्रीडे इत्यर्थः । कुन्देति मन्देति च कार्तिकमासो ऽयमिति लभ्यते । वसन्ते कुन्दानर्हत्वात् हेमन्तशिरयोर्वायोर्द्वेषाच्च ॥ २० ॥ २१ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

एवं नवप्रकारं वेणुनादं निरूप्य गुणातीतप्रकारेण त्रिधा निरूपयन् वेणुनादेन भगवान् जगदेव वशीकृतवानित्याहुः । कुन्ददामेतिद्वाभ्याम् । यर्हि भगवान् यमुनायां विजहार तत्रापि पूर्वोक्तरदशायामपेक्षितो वेणुनादः परिगृह्यते प्रकरणित्वात् प्रकारविशेषाभावाच्च न पृथगुक्तः तदा उपदेवगणाः परिवव्रुरिति सम्बन्धः यमुनायामिति सामीप्यसप्तमी अधिकरणसप्तमी वा धर्मे गवां गोपालानाञ्च जले स्थितिः सम्भवति तत्र विहारो गोपैः सहजलक्रीडा गवां प्रक्षालनादिः सर्वत्रोद्वेगशान्त्यर्थं वेणुनादः

वत्सलो व्रजगवां यदगध्रो वन्द्यमानचरणः पथि वृद्धैः ॥
कृत्स्नगोधनमुपोह्य दिनान्ते गीतवेणुरनुगेडितकीर्तिः ॥ २२ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

सहकारी तदानीमनलंकृतत्वमाशङ्क्य अलङ्कारमाह । कुन्ददामेति । वस्त्राभरणाद्यलङ्कारा भविष्यन्त्येव पुष्पालङ्काराः न भविष्यन्तीत्याशङ्क्य तदेव निरूप्यते कुन्ददाम्ना कृतः कौतुकवेशो यस्य दामान्यनेकप्रकाराणि तैस्तथा वेशो निर्मीयते यथा अत्यद्भुतो भवति अत्रतु यथैव हास्यरस उत्पद्यते तथैव निर्मीयते इति नन्वेतादृशीं प्राकृतलीलां भगवान् कथं कृतवान् इत्याशङ्कायामाहुः । नन्दसूनुस्तव वत्स इति । यया लीलया नन्दपुत्रो भवति तयैव लीलया प्राकृतलीलामपि सम्पादयति अनघ इति संबोधनं क्रोधाभावाय विश्वासार्थंच तव च वत्सो जातः अनेन त्वं गोरूपेति सर्वगुणरसानभिज्ञत्वं सूचितम् अन्यथा उलूखलबन्धनलीलां न कुर्यात् मध्ये निर्दोषत्वेन संबोधनादुभयोर्निर्दोषत्वं ज्ञाप्यते तादृश्या वत्सत्वेन भगवत्यपि तथा पूर्णगुणत्वलक्षणमाधिक्यं बोध्यतेऽप्रिमविशेषणेन किञ्च प्रणयिनां नर्मदः ये केचन स्नेहयुक्ताः यथैव ते स्निग्धा भवन्ति तथव लीलां करोति अनेन सर्वत्रैव हेतुरुक्तः यत्रैव लीलासक्त्या क्रीडा सविहारः सोऽत्र जलक्रीडा नृत्यक्रीडा वेणुवादनक्रीडा च ज्ञेया अन्यथा वाद्यादीनामुपयोगो न स्यात् विद्यावन्तो हि वशीकर्तव्याः तत्र विद्योत्पादको वायुः देवाश्च तदाधारभूताः तत्राप्युपदेवगणाः वन्दिनश्च वहिर्विद्याप्रकटनपराः अतो ऽन्यापेक्षया तेषु विशेष उक्तः प्रथमतः कारणभूतं वायुं निरूपयन्ति मन्दो वायुः अनुकूलं यथा भवति तथा उपवातीति अनुकूलं कुलसमीपे हितं च अनेन शैत्यं निरूपितं मलयजस्पर्शेन सहित इति सौरभ्यम् अनेन दाक्षिणात्योऽयं वायुरिति निरूपितं भगवत्स्वरूपे दत्तेन वा मलयजेन सह भावात् अधिकशैत्यनिरूपकत्वेन अनुकूलत्वं मलयजस्येव वा स्पर्शः तथा सति तत्रत्यानां सर्वेषामेव भगवद्भावं सम्पादयिष्यतीति मानयन्निति स्वकीयैस्त्रिभिर्गुणैः यथैव सन्मानं भवति तथैव वातीत्यति वश्यता उपदेवगणाश्च गन्धर्वादयश्च वन्दिनः कीर्त्तिनिरूपका जाताः गायकाश्च सन्तः य इति भगवदीयाः वाद्यगीतपूजासाधनैः तामसराजससात्त्विकैः सहिताः परिवव्रुः सर्वत्रैवापेक्षितं कृतवन्तः ॥ २०–२१ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

अथ व्रजेश्वरीसदनं गता गोप्यस्तामपराह्णे स्वपुत्रागमनविलम्वेन विक्षुभ्यन्तीं तद्विलम्बकारणोक्त्या सान्त्वयन्ति । कुन्ददामेति युगलत्रयेणेति वैष्णवतोषिणी । यमुनायां पर्यटन् श्रमोपशान्त्यर्थं तत्र स्नात्वा तत्तटे उपविश्य कौतुकव्यञ्जकं वेशं परमोत्कण्ठया मिलिष्यतः स्वबन्धून् सुखयितुं कृत्वा यदा विजहार पादविहरणं चकार तदा मन्दवायुरुपवातीत्यन्वयः । प्रणयिनां वयस्यानां नर्मदः परस्परं हासोपहासं इति खण्डयति ददाति चेत्यर्थः । अनघे ! इति तव प्राक्तनमर्वाचीनं वा किमप्यघं नास्ति यतः पुत्रानिष्टं स्यात्तत् किमिति किञ्चिद्विलम्बमात्रेणैवातुरादिहेतुकं तदनिष्टं शङ्कसे इति भावः । यतो नन्दस्य पुण्यवच्छिरोमणित्वेन प्रसिद्धस्य सूनुः । तवच महापुण्ययशस्वित्वेनैव यशोदाया वत्सः महावात्सल्यपात्रीभूतः पुत्रः । लोके हि मातापित्रोरभाग्येनैव वालकस्यानिष्टं भवेदतो न कृष्णस्य किमप्यनिष्टमिति भावः । तद्विलम्बस्य कारणं वयं वालकानां मुखेभ्य एव श्रुत्वा जानीमस्तत् शृणित्याहुः । मन्देति मलयजस्य मलयपर्वतोत्पन्नचन्दनवृक्षस्य स्पर्शेन सौगन्ध्यं शैत्यञ्च गृहीत्वा तयोर्भावेन द्रुतं चालितुमसमर्थो वायुः कृष्णं मानयन्ननुकूलं यथा स्यात्तथा उपवाति । वन्दिनस्तावका ये उपदेवगणा गन्धर्वादयस्तेऽपि स्वस्वगुणान् दर्शयन्तो वाद्यादिभिः परिवव्रुरावृण्वन् अत एव तत्तदनुमोदनहेतुको विलम्बो जायते एवं गुणिनि गुणज्ञो रमत इति न्यायात् । न चात्र खेदः समुचितः । त्वत्पुत्रे ते यदेवं संमानन्त्येतत्तवैव भाग्यमिति भावः ॥२०॥२१॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

तदेवं भगवतः श्रीमद्वृन्दावनप्रदेशेषु क्रीडा अनुवर्णिताः सम्प्रति सायाह्ने गाः परावर्त्य श्रीयमुनायां क्रीडतः सौभाग्यं श्रीयशोदां प्रति वर्णयन्ति । कुन्देति हे अनघे ! यशोदे तव वत्सः नन्दसूनुः श्रीकृष्णः "कौतुकं त्वभिलाषे स्याद्विवाहे नर्महर्षयोरिति" मेदिनीकारः कुन्ददामभिः कुन्दपुष्पमालाभिः कौतुकेन हर्षेण वेषोऽलङ्कारो येन सः नर्मदः केलिप्रदः सन् यदा यमुनायां विजहार क्रीडति स्म तदा मन्दवायुः मलयजस्य चन्दनस्येव सुरभिः शीतलश्च यः स्पर्शस्तेन तं श्रीष्णं मानयन् पूजयन् अनुकूलं यथा भवति तथोपवाति तथा वन्दिनः स्तावकाः सन्तः उपदेवगणाः गन्धर्वादिगणाः वाद्यगीतकुसुमवृष्ट्यादिभिस्तं परिवव्रुः परित उपासते ॥ २० ॥ २१ ॥

भाषा टीका ।

हे यशोदाजी ! तुमारे पुत्र कुंद के फूलों की मालाओं से कौतुकी वेश बना कर गोपाल तथा गऊओं को सङ्ग में लेजाय अपने प्यारेन को सुखदेने को जब यमुना में विहार करते हैं तब उनके अनुकूल मलयाचलके चंदनको स्पर्श करके मंद सुगंध शीतल वायु चलता है और बडा सत्कार करता है उसी समय में जितने उपदेव गण हैं वे सब बंदि होकर स्तुति करते हैं और वाजा गीत भेट इनसे श्रीकृष्ण की उपासना करते हैं ॥ २०–२१ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

आयान्तमालोक्य हृष्यन्त्यः परस्परमूचुः । वत्सल इति । व्रजस्य

उत्सवं श्रमरुचापि दृशीनामुन्नयन् खुररजश्छुरितस्रक् ॥
दित्सयैति सुहृदाशिष एष देवकीजठरभूरुडुराजः ॥ २३ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

गवां च यद्वा व्रजे निबद्धानां गवामनुकम्प्यानामस्माकमित्यर्थः वत्सलो हितकृत् कुतः यद्यस्मादगध्रः अगन्धरतीति गोवर्द्धनोद्धरणः बहुशो रक्षणस्योपलक्षणमेतत् वृद्धैर्ब्रह्मादिभिः पथि वन्द्यमानचरण इति ते सेर्ष्यं सायं शाघ्रमागन्तुं न ददतीत्यर्थः । उपोह्य एकीकृत्य गीतयुक्तो वेणुर्यस्य सः ॥ २२ ॥

श्रमयुक्तयापि कान्त्या नेत्राणां हर्षमुन्नयन्नुच्चैः प्रापयन् खुररजोभिश्छुरिता व्याप्ताः स्रजो यस्य सुहृदामस्माकमाशिषो मनोरथस्य दित्सया दातुमिच्छया देवक्या जठरे भवतीति तथा स एवोडुराजश्चन्द्रो निर्वृतिहेतुत्वेन स एष एतीति ॥ २३ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

ततश्चोत्कण्ठाभिरट्टालिकादिकमारुह्य तदेव दर्शयन्ति । वत्सल इति । तत्र चागमनं वर्णयितुं प्रथमं परमोल्लासेनासाधारणीं तत्कृपामेव तत्र हेतुं व्यञ्जयन्ति । वत्सलो व्रजगवामिति । तत्रोदाहरणमाहुः । यदिति । यद्यस्मात् परमकोमलोऽप्यसौ तदर्थं पर्वतमपि धरतीत्यर्थः । अत्र वर्त्तमान प्रयोगश्चात्यन्तकृतज्ञतया कृतः सदातनत्वेनैव तत्स्फूर्त्तेः । यदेवं तद्विरहेऽपि तद्व्रजदेव निजामार्त्तिं रक्षाञ्च व्यञ्जयन्ति । अथागमनं वर्णयन्ति वन्द्येत्यादिना । तत्र वृद्धैः पथि वन्द्यमानचरण इति व्रजान्तःप्रवेशे तेषां तदप्राप्यत्वात् अत एव वन्द्यमानेति वर्त्तमाननिर्देशेन ; वन्दनादानिवृत्तिर्बोध्यते अतः सङ्कोचेन तदानिच्छायामपि तैस्तत्क्रियत इति व्यक्तम् । अहो एतादृश गुणज्यायस्त्वमिति भावः । गोधनोपवहनार्थं व्रजवर्त्तिषु निजागमनमङ्गलविज्ञापनार्थं च गीतवेणुः तदीयरागतालानुसारेण तद्गानसम्बन्धिषु तदीयानुगानभङ्गयैवानुगैर्गोपैरीडिता कीर्त्तिः पूतनामोक्षादिरूपा एतद्दिनक्रीडात्मिका वा यस्य सः । श्रमस्तज्जनितप्रस्वेदादिस्तदाश्रययापि सहज शोभयेत्यर्थः । यद्वा । श्रमेण या रुक् शोभा तयापि दृशीनां दृङ्मात्राणां किमुतास्मदीयानामित्यर्थः । तत्र तादृशशोभानिदर्शनं गवां खुररजोभिः परागैरिवच्छुरिता कर्बुरिता स्रक् माला यस्य सः स्रज्येव रजोनिर्देशादन्यत्र रजो नास्तीति लभ्यते तच्च सखिभिर्मुहुरङ्कतो निजोत्तरीयेण रजस्यपसारितेऽपि तस्यां तस्य प्रविश्य स्थितत्वात् । परमान्तरङ्गप्रियजनदत्तायास्तस्या दलादिभङ्गशङ्कया तेनैव तन्निवारितत्वाद्वा । दूरतोऽपि रजआदीनां निर्देशस्त्वनुमानप्रेमव्रजतो निकटात् स्फुरणेन वा । पूर्वव्यञ्जितमागमने कृपाया एव कारणत्वं साक्षादप्याहुः । दित्सयेति । अन्यथा श्रीवृन्दावने पूर्वपूर्ववर्णितानुसारेण किम्वा सुखं तस्य नास्तीति भावः । सुहृदामिति सामान्योक्तिर्दर्शनामितिवत् । एष इत्यङ्गुल्या निर्दिशन्ति । देवकीशब्देनात्र श्रीयशोदैव सादरं प्रस्तूयते । व्रजराजत्वात् देव एव देवकः श्रीनन्दस्तत्पत्नी देवकीति तस्या एव सान्त्वनायां प्रवृत्तेर्मातृतया मतत्वात्तव सुतः सतीति नन्दसूनुरयमार्त्तजनानामिति पूर्वसम्वादाच्च । मात्रन्तरसूचने तु प्रत्युत तद्विरोधापत्तेः । सभान्तरवाक्येऽप्यौदासीन्यापत्तेश्च । अतस्तस्यास्तदप्येकं नामेति वा लभ्यते । नाभेरसावृषभ आस सुदेविसूनुरित्यत्र मेरुदेव्या एव सुदेवीति संज्ञावत् । उक्तञ्च द्वे नाम्नी नन्दभार्याया यशोदा देवकीति चेति । उडुराजः दिनतापहरणादिसाम्यात् । उडुस्थानीयाश्चात्र सखायो ज्ञेयाः । इति श्रीकृष्ण जन्मस्थानत्वेन देवकीजठरस्य विशुद्धसत्त्वमयत्वन परमशुभ्रत्वात् क्षीरसमुद्रत्वं ध्वनितम् ॥ २२ ॥ २३ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अथायान्तमवलोक्य हृष्यन्त्यः परस्परमूचुः । वत्सल इति । व्रजस्य गवां च वत्सलः यद्वा व्रजे निबद्धानां गवामनुकम्प्यानामस्माकं च वत्सलः कुतः हितकृत् यद्यस्मादगध्रः अगञ्चोवर्द्धनं धरतीति तथा इदं बहुशो रक्षमाणस्योपलक्षणं वृद्धैर्ब्रह्मादिभिः पथि वन्द्यमानौ चरणौ यस्य सः दिनान्ते सायङ्काळे कृत्स्नं गोधनमुपोह्यैकीकृत्य गीतयुक्तो वेणुर्यस्य सः अनुगैरनुचरैरीडिता कीर्त्तिर्यस्य सः ॥ २२ ॥

स्मररुजा स्मररोगेण अस्ता नष्टप्राया दृशो दृष्टयो यासां तासामस्माकं नेत्राणामुत्सवं हर्षमुन्नयन्नुच्चैः प्रापयन् खुररजोभिर्व्याप्ताः स्रजो यस्य सः सुहृदामस्माकमाशिषः मनोरथस्य दित्सया दातुमिच्छया देवक्या जठरेऽभवदिति देवकीजठरभूः स एष उडुराजश्चन्द्र एत्यागच्छति निर्वृतिहेतुत्वेन स एष एवेत्युक्तम् ॥ २३ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

किञ्चिदुत्पन्नोपमेयक्षामाः वदन्ति । वत्सल इति । व्रजगवां विषये वत्सलः गोष्ठगोषु स्निग्धतमः अगाधः गम्भीरः अन्यैः विज्ञातमहिमा पथि ज्ञानादिवृद्धैर्वन्द्यमानचरणः स्तूयमानपादन्यासः दिनान्ते सन्ध्यायामासन्नायां कृत्स्नं गोधनं समस्तपशुलक्षणं धनमपोह्य व्यावर्त्य गीतवेणुः गातुमुपक्रान्तवेणुः अनुगैर्वयस्यैः उद्धृता मणिरूपङ्कादुद्धृत्येन प्रकाशिता कीर्ति र्यस्य स तथा ॥ २२ ॥

वनपरिभ्रमणोत्पन्नं श्रममपोह्य निरस्य स्वभ्रूहृणां दृशीनामुत्सवं सुखोत्सवमुद्वहन् खुररजश्छुरितस्रक् गोखुरसमुत्पन्नधूल्या मिश्रिता माला यस्य स तथा देवक्या जठरमेव भूर्व्यक्तिस्थानं यस्य स तथा उडुराजश्चन्द्र इव लुप्तोपमेयं स यद्वदं व्रजमेति तदा एष कृष्णः सुहृदामनिमित्तबन्धूनामाशिषः इष्टफलानि दित्सया दातुमिच्छयैवेति इत्यन्वयः । चन्द्रोऽपि व्रजगवामध्वपशूनां पथिकानां वत्सं वर्षसामर्थ्यात् कामोद्रेकं लाति रातीति वत्सलः "वत्सो नाम कुजे वर्षे इति यादवः गोष्ठाध्वनिवहा व्रजा"

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

इति च अगस्य उदयपर्वतस्य अधः शृङ्गे वर्तमानः उदयस्याधित्यकाशृङ्गं चन्द्रमार्गादूर्ध्वमिति ज्योतिषिकाः संगिरन्ते वृद्धैः सप्तर्षिभिः पथि व्योममार्गे दिनान्ते रात्रौ कृत्स्नगोधनं समस्तकलासमेधितचन्द्रिकाख्यधनमपोह्य परिपूर्य गीतवेणुः कविभिः वर्णितस्ववंशः अनुगैः अश्विन्यादिनक्षत्रैः उद्धृतकीर्ती राश्युपरिकृतगणनः रविकिरणसंसर्गसमुत्पन्नश्रमं निर्धूय उत्सवमित्युभयत्र समं जननसमये क्षीराब्धितीरवालुकासु नववीथीषु विक्रमं कुर्वत उच्चैः श्रवसः खुररजश्छुरितस्रक् चन्द्रोऽपि ॥ २३ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

ततश्चोत्कण्ठाभिरट्टालिकादिमारुह्य तदेव दर्शयन्ति । वत्सल इति युग्मेन । देवकीशब्देनात्र श्रीयशोदैव सादरं प्रस्तूयते । व्रजराजत्वात् देव एव देवकः श्रीनन्दः तस्य पत्नी देवकीति । तस्या एव सान्त्वनायां प्रवृत्तेः मातृतया ममत्वात् अभिमतत्वाच्च । मात्रन्तरसूचनेतु प्रत्युत तद्विरोधापत्तेः । सभान्तरवाक्येऽप्यौदासीन्यापत्तेः ॥ २२ ॥ २५ ॥

श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी ।

एवंगुणातीते प्रकीर्णतां निरूप्य युगलद्वयेन केवलं भगवत एव चरित्रमाहुः । वत्सल इति । भगवान् यत् गोकुलं गोष्ठे समानयति तत् कृपया अन्यथा एकस्यामपि लीलायां व्यापृता गावो मुच्येरन् तथा गोपिकाः परं कृपयैव भजनानन्दानुभवार्थं तथा करोति अत्र हेतुः यदगध्र इति । यद्यस्मात् कारणात् अगं पर्वतं धारयतीति यदि भजनानन्दं न दद्यात्तदा गोवर्द्धनोद्धरणं न कुर्यात् एतद्भगवन्माहात्म्यं सर्वजनीनमिति ज्ञापयितुमाहुः । पथि वृद्धैर्वन्द्यमानचरण इति । वृद्धाः सर्वतो निपुणाः बहुक्षैरेव भगवान् सेव्यो भवति अतः कृत्स्नमेव गोधनमुपोह्य ततः पृथक्कृत्य उप समीपे समाहृत्य वा दिनान्त इति अग्रे गानस्थितेरयुक्तत्वात् लीलान्तरस्य च चिकीर्षितत्वात् गीतवेणुर्जातः श्रमापनोदार्थं व्रजस्थानां ज्ञापनार्थं च अस्य नादस्याग्रे कार्यं वक्तव्यं गोपिका एव कृतार्थाः करोतीति न किन्तु गोपानपीति ज्ञापयितुं तत्कृतस्तोत्रमाहुः । अनुगेडितकीर्त्तिरिति । अनुगैः सेवकैरीडिता कीर्त्तिर्यस्य अनेन रात्रौ तेषामपि गानमुक्तं भवति यथा दिवसे गोपिकानाम् अन्यथा सर्वेषां निरोधो न भवेत् ॥ २२ ॥

एतादृशस्य स्वस्य कार्यं स्वयमेव करोतीत्याहुः । उत्सवामिति । श्रमरुचा व्रजस्थदृशामुत्सवमुन्नयन् आशिषो दित्सया एतीति सम्बन्धः श्रमयुक्ता रुक् कान्तिः भगवतः श्रमाभावपक्षे प्रदर्शनमात्रपरत्वम्. अस्ति श्रम इति सिद्धान्तः "भर्त्ता सन्न्भ्रियमाणो बिभर्त्ति एको देवो बहुधा निविष्टः यदाभारं तं द्रयते स भर्तुं निधाय भारं पुनरस्तमेती"ति श्रुतेः सर्वधर्माश्रयत्वाच्च विरुद्धधर्माश्रयत्वादश्रान्तोऽपि नतु केवलमश्रान्त एव श्रमः सुखकारक इत्यपरे तत्संबन्धिनी रुक् श्रमरुक् सा नायकगता स्त्रीणां न हितकारिणी तथाप्यस्माकं हितकारिण्येव जातेत्याहुः । दृशीनामुत्सवमुन्नयान्निति दृशिदर्शनं यदि भगवान् श्रान्तो न भवेत् तदा शीघ्रं गच्छेत् तदा दृष्टीनां परमानन्दसन्ततिर्न स्यात् ऊर्ध्वं नयन्निति संघाते दृशीनां य आनन्दः स्थितः यावान् तदपेक्षया अधिकं कृतवानित्यर्थः । भगवत्कीर्त्तेः सर्वपुरुषार्थदातृत्वाय प्रकारं वदन् श्रममुपपादयति । खुररजश्छुरितस्रगिति । गोखुररजोभिः छुरिताः व्याप्ताः स्रजो माला यस्य वायुवशादुद्गतो रेणुः न स्थिरो नापि नियतः खुरजातस्तु तथा खुराणामेव गोत्वात् प्रकृतत्वाच्च न गोग्रहणं पशवो वा एकशफमित्यत्र तथा निर्णयात् अनेन धर्मोऽयमिति निरूपितं रजोऽर्थः व्याप्तिः काम इति आगमनस्य तु यत् कार्यं तदाहुः । सुहृदां सर्वेषामेव सम्बन्धिनामाशिषः सर्वा एव देया इति उक्तं गोपिकाद्वारा सर्वेष्वानन्दप्रवेश इति एष इति प्रदर्श्याहुः यतः स्वस्मिन् लीला ज्ञापिता भवति साधारण्येन सर्वेषां तापनाशकत्वाय भगवद्गतमसाधारणं धर्ममाहुः । देवकीजठरभूरुडुराज इति । "अदितिर्देवकी अदितिर्द्यौरदितिरन्तरिक्ष" मितिश्रुतेः अदित्यवतारत्वात् द्युरूपा सा तस्यामवश्यं चन्द्रोदयोऽपेक्षित एव सा पुनर्विशेषरूपं गृहीतवतीति चन्द्रोऽपि विशिष्टकार्यं करोति लौकिकस्तापस्त्रिविधः भगवद्विरहजश्च अयं त्रिविधमपि नाशयतीति पूर्वोक्तमानन्ददातृत्वमुपपादितं देवकीजठरे भवतीति देवकीजठरभूः स एव उडुराजः जायते यथा उदयाद्रौ पातिस्तु नक्षत्राणामेव भवति तथा देवक्यां जातः परं सुखदोऽस्माकमेव अथवा एतास्तु भगवद्विरहेणार्ता इति स्वाभिलषितप्रकारेण तदङ्गसङ्गव्यतिरेकेण नैतासामुत्सवो भवतीत्यार्ता एव स्थिताः परं दृशीनां दर्शनं मुख्यमिति तेनैवोत्सवोन्नयनमुच्यते तथाचार्त्तानामस्माकं दृशीनामिति समासो ज्ञेयः आर्त्तशब्दस्य ह्रस्वोऽपि छान्दसः नहि दृशीनामेवार्त्तत्वमत्र विवक्षितं प्रकारान्तरेणापि तत्स्वरूपरसास्वादवत्यः स्वामिन्य इति सर्वेन्द्रियाणामेवार्त्तत्वसम्भवात् तदैव सर्वत्रोत्सवे पुनराशिषो ऽनभीप्सितत्वेनाग्रे तद्दित्सोक्तिरप्यनुपपन्ना स्यात् दृशीनामुत्सवो बहिरेवान्तरुत्सवस्य त्वधिकरणं मनस्तस्यातृप्तत्वान्न स इदानीमपरमग्रे सम्भोगसामयिकदर्शने भविष्यतीति ज्ञापनायोर्ध्वमित्युक्तं यथा गोप्यो दिदृक्षितदृशोऽभ्यगमन्समेता इत्यत्र दर्शनानन्तरमपि दृशां दिदृक्षितत्वमेवमत्रापि ज्ञेयम् अत एव दृशीनामिति सम्बन्धषष्ठ्याप्येतत्सर्वस्य तत्सबन्धित्वमेव प्राप्यते तत्रापि भगवत्कर्तृकनयनोक्त्या तासां बहिरुत्सवोऽपि प्रियप्रापित इति तद्दर्शनस्वभावान्न स्वत इति बोध्यते अतएवोत्सवकरणत्वं श्रमरुचोऽपि युज्यते अन्यथा चिरादुत्कण्ठितानामासां प्रियतमागतश्रमं निरीक्षणेनाग्रिमरसप्रतिबन्धशङ्कया नोत्सवः स्यात्प्रत्युत पूर्वापेक्षयाधिकतरः खेद एव स्यात् किञ्च विनास्माभिरन्येन प्रियः श्रमापनोदं न कारयति वयमतः परं करिष्याम इति श्रमरुचस्तथात्वं युक्तमेव श्रमस्य कान्ति निरूपणेनापि स्वमनोरथाप्रतिबन्धकत्वात्तथेति ध्वन्यते श्रमोऽप्यन्यनायिकाविषयकश्चेत्कथं दृशामुत्सव इतिचेत्तथा नेत्याहुः । खुररजश्छुरितस्रगिति । यद्यन्यनायिकाविषयकः स्यात्तदा स्रजि तदङ्गराग एव स्यान्नतु खुररजः रजोव्याप्तिरागमनसामयिकश्चेत्सम्भवेदपि तथापरं चिरकालीनमिति ज्ञापनाय छुरितत्वमुक्तम् अल्पकालेन तथात्वस्यासम्भवात् किञ्च तथा चेत्स्रगपि न स्यात् क्रीडान्तरायत्तत्वात् अतो ज्ञायते सुहृदामस्माकमाशिषो दित्सया एतीति एतीत्यागमनक्रियायां कर्मानुक्त्यापि तथेति ज्ञायते अयम्भावः "कर्तुरभीप्सिततमं कर्म" भवति तेनात्र भगवतः कर्तृत्वात्तदभीप्सिततमत्वमस्माकमेव नान्यस्य अन्यथा व्रजमेतीत्युक्तं भवेत् यद्यपि सर्वेषामेव निरोधश्चिकीर्षितो भगवत

मदविघूर्णितलोचन ईषन्मानदः स्वसुहृदां वनमाली ।
बदरपाण्डुवदनो मृदुगण्डं मण्डयन् कनककुण्डललक्ष्म्या ॥ २४ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

इति व्रजस्याप्यभीप्सितत्वं तथाप्यभीप्सिततमत्वलक्षणोऽतिशयोऽस्मास्वेवेति तथोक्तं तन्निदर्शनमेवाहुः । एष इति । अन्यथा कथमात्मानं प्रदर्शयेत् दाक्षिणनायकत्वेनान्तर्भाववैषम्याभावायाहुः । देवकीजठरभूरिति । सर्वथा निर्दुष्टा हि देवकी तदुदरे प्रकटस्तथेत्यर्थः । तादृशस्य भवतीषु को विशेष इत्यत आहुः । उडुराज इति । यथा चन्द्रः सर्वेषां तापहारको दूरादेव परम्पतित्वेनातिनिकटे नक्षत्राणामेव तथायमपि सर्वेषां तथा दूरादेव परम्पतित्वेनास्माकमेव तथेति भूयान्विशेषः सम्पद्यते स यथा नक्षत्रमण्डले तिष्ठंस्तैरेव राजमानः सर्वतापनिवर्त्तकस्तथायमप्यस्मन्मण्डले तिष्ठन्नस्माभिरेव राजमानस्तथेत्युडुराजपदेन द्योत्यते इदं सर्वं कार्यं वेणुनादसाध्यमिति प्रकरणितत्वाज्ज्ञेयम् ॥ २३ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

ननु तर्हि कौतुकलोलुपो मत्पुत्रो विलम्बमानः सन्ध्यासमाप्तावपि नैवेष्यति ततश्चाहं मरिष्याम्येवेति तत्र तदीयशीघ्रागमने हेतुमुपन्यस्य तामाश्वासयन्त्य आहुर्वत्सल इति । व्रजगवां व्रजे निवद्धानां वृषाणां वत्सलस्तेषां स्वविरहदुःखमनुस्मृत्य गन्धर्वादीनप्यवमत्य शीघ्रमायास्यत्येवेत्यर्थः । टजभाव आर्षः । नच गोचारकस्य तस्य गवां दर्शनस्पर्शनगात्रकण्डूयनघासप्रदानादिकौतुकात् स्वतोऽति निकृष्टगायक गन्धर्वादिगानकौतुकं चित्ताकर्षकं वाच्यमित्याहुः । यद्यस्मादगध्रः येषां गवां रक्षणार्थम् अगं गोवर्द्धनमपि धृतवान् अतस्तेषु महान् स्वाभाविक एव स्नेहः गन्धर्वादिषु तु गुणोपाधिकोऽपि प्रीतिलेशो न तस्यास्तीति भावः । ननु यद्येवमभविष्यत्तदा एतावत् क्षणपर्य्यन्तं गृहमागमिष्यदेवेति तत्र विलम्बे पुनरपि हेतुमुपन्यस्यन्ति वृद्धैर्ब्रह्मरुद्रादिभिः पथि पथि वन्द्यमानौ चरणौ यस्य सः । वेणुगानाकृष्टैः स्वस्वभवनादागत्य निकटनभसि स्थितैः सर्वमेव दिनं कृष्णं दृष्ट्वा लब्धानन्दैः सम्प्रति गोष्ठागमनसमये स्वस्वभवनगमनोन्मुखैर्नभसो भुवमवतीर्य ब्रह्मरुद्रेन्द्रादिभिः प्रत्येकमेव त्वत्पुत्रस्यानुग्रहमर्थयितुं चरणौ वन्द्येते तेनात्र किं कर्त्तव्यमिति तेषामनुरोध एव विलम्बाधिक्ये हेतुरिति ध्वनिः त्वत्पुत्रस्य चरणौ ब्रह्मादयोऽपि वन्दन्ते इति स्वभाग्यं किं न पश्यसि किमिति खिद्यसीत्यनुध्वनिः । तर्हि भो व्रजबालिकाः ! शीघ्रमट्टालिकापृष्ठमारुह्य पश्यत कियद्दूरे वत्स आयातीति तया साश्रुगद्गदमुक्ताः सर्वोर्द्ध्ववलभीं शीघ्रमारुह्योचैराहुः । कृत्स्नेति । एष कृष्णः सुहृदां स्वबन्धूनामाशिषो मनोरथस्य दित्सया एतीत्यन्वयः । उपोह्य एकीकृत्य गीतयुक्तो वेणुर्यस्य सः श्रमेण या रुक् शोभा तयापि दृशीनां लोकनेत्राणामुत्सवमानन्दमुन्नयन् उच्चैः प्रापयन् खुररजश्छुरिता व्याप्ता स्रक् यस्येति । स्वसङ्गिनीः सखीः प्रत्यपाङ्गभङ्ग्या श्रीयशोदायलक्षितम् किमप्युक्तम् अत्र स्रज्येव खुररजोनिर्देशादन्यत्र रजो नास्तीति लभ्यते । तत्र सखिभिर्मुहुर्निजोत्तरीयेण रजसोऽपसारितत्वात् स्रजि तु रजस्तस्य प्रविश्य स्थितत्वात् अपसारणयत्ने दलभङ्गः स्यात् मणिनापीयं माला यत्र दूरीक्रियते दासधृतवस्त्रसम्पुटस्था नवीनापि अन्या यन्न परिधीयते तस्मादियं माला यया प्रियया स्वहस्तेन संग्रथ्य सखीद्वारा दत्ता ता प्रियामेव स्वकण्ठधृतामेनां दर्शयितुं कृष्णस्य यत्न इति देवकी श्रीयशोदा तस्या जठरमेव क्षीरसमुद्रस्तस्मिन् भवतीति सः । द्वे नाम्नी नन्दभार्य्याया यशोदा देवकीति चेति गणोद्देशदीपिकाधृतादिपुराणवाक्यात् । उडुराजश्चन्द्रः ॥ २२ ॥ २३ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

दिनान्ते आयान्तमवधार्य्य प्रमुदिताः परस्परमूचुः । वत्सल इति । अगध्रः अगमचलं गोवर्द्धनं धरतीति स तथा उपलक्षणमेतदन्येषां रक्षणोपायानाम् पथि मार्गे वृद्धैः ज्ञानेन वयसा च सर्वेभ्यः श्रेष्ठैः ब्रह्मादिभिर्वन्द्यमानौ चरणौ यस्य सः दिनान्ते सायङ्काले कृत्स्नं सकलं गोधनमुपोह्यैकीकृत्य गीतयुक्तो वेणुर्यस्य अनुगैरनुयायिभिर्गीता कीर्तिर्यस्य सः श्रमरुचा श्रमयुक्तया कान्त्या दृशीनां नेत्राणाम् उत्सवं हर्षमुन्नयन्नुच्चैः प्रापयन् खुररजोभिश्छुरिता व्याप्ताः स्रजो यस्य सः सुहृदामस्मदादीनाम् आशिषः कामस्य दित्सया दातुमिच्छया देवकीजठरभूः देवकीगर्भरत्नाकरोद्भूतः स एष उडुराजः श्रीकृष्णापरनामा चन्द्रः पत्यायाति ॥ २२ ॥ २३ ॥

भाषा टीका ।

व्रज मण्डल तथा गउ इनके ऊपर कृपा करने वाले गोवर्धन को उठाने वाले कृष्णचन्द्र जब संध्याकाळ में सब गउन को इकट्ठी करके लाते हैं तब रस्ता में ब्रह्मादिक उनके चरणों की वन्दना करते हैं आप वंशी बजाते हैं अनुचर गोप लोग उनकी कीर्ति को गाते हैं उस समय यह देवकी के चन्द्रमा गो रज से भरी हुई माला को धारण किये परिश्रम से सहित कांती से भी अपने प्रेमी जनों को आनन्द देने की इच्छा से व्रज को चले आते हैं ॥ २२ ॥ २३ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अतिसंभ्रमेण काश्चित्समीपमायान्तं कथयन्ति । ईषन्मदेन विघूर्णिते विह्वलिते लोचने यस्य सः बदरपाण्डुवदनः ईषत्पक्वबदरवत्पाण्डुरं वदनं यस्य सः अत्र हेतुः कनककुण्डलयोर्लक्ष्म्या कान्त्या मृदू कोमलौ गण्डौ यस्मिंस्तद्वदनं मण्डयन्निति कोमलगण्डस्थले वा शोभयन्निति ॥ २४ ॥

यदुपतिर्द्विरदराजविहारो यामिनीपतिरिवैष दिनान्ते।
मुदितवक्त्र उपयाति दुरन्तं मोचयन्व्रजगवां दिनतापम् ॥ २५ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

यदुपतिरिति। देवकीजठरभूरिति च प्रागयं वसुदेवस्य क्वचिज्जातस्तवात्मजः इत्यादिगर्गवाक्यप्रसिद्ध्योक्तं यद्वा सख उदेयिवान् सात्वतां कुले इतिवज्ज्ञात्वा काश्चिद्वदन्तीति गजेन्द्रगतिश्चन्द्र इव प्रसन्नवक्त्रो व्रजगवामस्माकमनन्तं दिनतापं च शमयन्नुपयाति एष समीपमायातीति ॥ २५ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी।

ईषदित्यस्य विशुद्धसत्त्वमयत्वेन विघूर्णितेत्यनेन सम्बन्धः मदो हर्षकृतचित्तविकारः सच स्वभावत एव विशेषतश्च नवयौवनात् ततोऽपि विशेषतः प्रेयसीजनदर्शनाद्विक्षेयः एवं बहुष्वपि व्यङ्ग्येषु तत्तन्मायां तत्तदुपलब्धिस्तु स्वस्ववासनानुसारेणैवेति न रससाङ्कर्यदोषः तेन मदेन मनाकृविविधतयाघूर्णिते लोचने यस्येति श्रीनेत्रयोर्विलासविशेष उक्तः व्रजप्रवेशसमयेऽभिगच्छतां स्वस्य सुहृदां तेभ्यो मानं प्रणामालिङ्गनसस्मितसम्भाषणप्रणयावलोकनर्मावलोककृपावलोकालिलक्षणं यथोचितं ददातीति तथा सः वनमालीति पूर्वोक्तकुन्ददामानुसारेण कुन्दैरेवापादलम्बिकात्वेन रचितया मालया युक्त इति ज्ञेयम्। मृद्विति कैशोरस्वभावेन सुकोमलकान्तित्वात् मण्डयन्निति स्वभावत एव कुण्डलयोर्गण्डाभ्यां संयोगात्विशेषतश्च गजेन्द्रगत्या मन्दमन्दचलनेन मुहुरुपसर्पणापसर्पणाभ्यां शोभाविशेषात् यदुपतिरिति। पूर्वदर्शितस्कान्दोक्त्यनुसारात् यादवेष्वपि सर्वेषु भवन्तो मम वल्लभा इति यदुपुराद्व्रजमागतस्य श्रीरामस्य गोपान् प्रतिहरिवंशप्रसिद्धवचने निर्द्धारणसप्तमी निर्देशाच्च यदूनां गोपानां पतिरिति। सर्वस्यापि गोकुलस्य परमाश्रयत्वेन परमप्रेमास्पदत्वं दर्शितं मुदितवक्त्र इति उपयातीति च दुरन्तमपरिच्छिन्नमपि तदनिष्टाशङ्काहेतुकं तद्विच्छेदहेतुकं च व्रजगवां तापं विमोचयन् तत एव परममानन्दं च ददातीति ज्ञेयम् अन्यत्तैः तत्र व्रजगवामस्माकमिति व्रजस्यास्मद्विशिष्टस्य तज्जनस्य गवां च शकटादीनां व्रजस्थानामित्यस्मत्संवलितत्वादस्माकमेवेत्यर्थः। यद्वा व्रजस्य गवां नेत्राणां "स्वर्गेषु पशुवाग्वज्रदिङ्नेत्र घृणिभूजले लक्ष्यदृष्ट्यां स्त्रियां पुंसि गौ"रिति नानार्थवर्गात् वदरवत्पाण्डुवदन इति निजभावानुसारेण तस्यापि स्वाविरहदुःखनिश्चयात्तथा दृष्टः भावान्तरवर्जनेतु श्रमवैवर्ण्यव्यञ्जनात् यामिनीपतिश्चन्द्रो यथा दिनान्ते उदेति तथेति युग्मकानि पूर्णानि ॥ २४-२५ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

काश्चिदतिसम्भ्रमेण समीपमायान्तं बलरामं कथयन्ति। मदविघूर्णितलोचन इति। ईषन्मदेन वारुणीमदेन विघूर्णिते लोचने यस्य सः स्वसुहृदां मानदः ईषत्पक्वबदरवत्पाण्डुवदनं यस्य सः अत्र हेतुः कनककुण्डलयोर्लक्ष्म्या मृदु गण्डौ यास्मिस्तद्वदनं मण्डयन् कोमलं गण्डस्थलं मण्डयन्निति वा द्विरदराजस्येवागतस्येव विहारो यस्य सः बलभद्रस्य श्वेतवर्णत्वाद्दिनान्ते चन्द्र इव मुदितं प्रसन्नं वक्त्रं यस्य सः व्रजभुवामस्मदादीनां दुरन्तमपारं दिने स्वविश्लेषजं तापं मोचयन्नुपयाति एष समीपमायाति यद्वा इदं श्लोकद्वयं कृष्णपरमेव योज्यं तदा मदेन मन्मथेन विघूर्णिते लोचने यस्य सः द्विरदराजविहारो गजेन्द्रगतिः ॥ २४ ॥ २५ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

श्रीकृष्णं प्रशस्य बलभद्रप्रशंसयोपसंहरति। मदविघूर्णितेति। वारुणीपानोत्पन्नमदेन ईषद्विघूर्णितलोचनः विभ्रान्तनेत्रः अन्यत्र घूर्णप्रकाशः लुषप्रकाशइतिधातुः चन्द्रः कीदृशः स्त्रीणां मानदः अभिमानखण्डनः दो अवखण्डन इति धातुः वनानां भासां कान्तीनां मालास्यास्तीति वनमाली बदरश्चन्द्रः तद्वत्पाण्डुसुन्दरं वदनं यस्य स तथा "मानवो बदरः सिन्धुः शशिनस्तु त्रिनामक"मितिवचनात् बदरफलवद्रागोपेतं वदनमित्यर्थो न शोभते पाण्डुशब्दो व्यर्थः स्यात् बदरो बृहस्पतिः पाण्डुः शुक्रस्तयोर्वदनमिव वदनं यस्य स तथा चन्द्रः कनककुण्डललक्ष्म्या मृदुगण्डं मण्डयन् अलंकुर्वन्नित्युभयत्र समम् ॥ २४ ॥

दुरन्तं व्रजगवां दिनतापं मोचयन्नित्यपि समं द्विरदराजविहारो गमनक्रीडा यस्य स तथा इदमपि पुरुषलक्षणं सममेवं विध एष यदुपतिः बलभद्रः यामिनीपतिश्चन्द्र इव दिनान्ते सायन्तनसमये उदयपर्वतशिखरं व्रजमुपयातीत्यन्वयः उपयातीति लटा गोपस्त्रीणामेवं नित्यमनुस्मरणं न कादाचित्कमिति सूचयति ॥ २५ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी।

साधारणीं लीलामुक्त्वा गोपिकास्वेव वेणुकृतां भगवतैव जनितां लीलामाह। मदेति। यदुपतिः मुदितवक्त्रउपयातीति पूर्वोक्ता एव वेणुनादा अत्र ग्राह्याः दशलीलाः पूर्वं निरूपिताः ताः सर्वाः अस्मदर्थमेवेति दशधा भगवन्तं विशेषयन्ति एक एव भगवानुभयत्रेतियुगलत्वेऽपि नात्यन्तविभागः सर्वत्रैव वेणुनादे रजो गुणः मुख्य इति सोऽस्मदर्थे फलित इत्याहुः। मदेन विघूर्णिते लोचने यस्येति मदोऽत्र स्वानन्दास्थित्या पूर्णाववोधः स ज्ञानमार्ग एवेति प्रकटयितुं सर्वविषयान् व्यावर्त्तयितुं विघूर्णितलोचनत्वमुक्तम् अयं धर्मो भगवन्निष्ठो निरूपितः स्वरूपस्थित्यर्थं तादृशोऽपीषन्मानदः मानं प्रयच्छति सन्माननां करोति तेनास्माकं गम्यो भवतीति ज्ञायते मानमभिमानं रजोगुणप्राकट्यात् प्रयच्छति खण्डयतीति वा ज्ञानप्राकट्यात् प्रयच्छति मानं द्यति खण्डयति त्रिष्वपि षदेव तत्तत्कार्यं ननुपूर्णस्य भवतीत्येवं करणे को हेतुरत्राहुः। स्वसुहृदामिति। स्वपदादसाधारण्यं तेन स्वस्यैव सुहृदस्ताः

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

महतोऽपि क्षुद्रत्कार्यं कर्तव्यमिति साधारणं कार्यमाह । वनमालीति । कीर्तिमयीं वनमालां प्रकटयतीति वदरवत्पाण्डुवदन इति । वदरोऽत्र फलवाचकः सद्धिर्मेण प्रतिक्षणं विसदृशीं कान्ति करोति तत्राप्यर्द्धपक्वः पाण्डुवर्णो भवति अग्रे त्वारक्तः तथेदानीमर्द्धरक्तः अग्रेत्वत्यन्तं रतो भविष्यतीति, ईषन्मानदत्वाद्विशेषः साधनं कीर्तिरिति मध्ये विशेषणान्तरम् अथवात्र पाण्डुशब्देन आरक्त एव गुण उच्यते तदा वदनं वक्त्रम् अधरामृतपानं लक्षितं भवति वनवासिनां वा एतदुपभोग्यमिति वने गत्वा एतदुपभोग्यमिति सर्वाः ज्ञापयन्ति ततोऽपि विशेषमाहुः कनककुण्डललक्ष्म्या मृदुगण्डं मण्डयन्निति श्मश्रूद्गमाभावात् आनन्दनिधानत्वाच्च मृदुत्वं भोगार्थमुपपाद्य गण्ड एव रससमाप्तिरिति कनकपदं वर्णान्तरज्ञापनार्थम् उत्कृष्टेनापि परमानन्देनापि अस्मदर्थं कामरस एवोद्बोध्यत इति सर्वथास्मदर्थमेव भगवदागमनमिति निश्चीयते अन्यथा शिरोभेदात् अस्मत्समक्षं न कुर्यादिति ॥ २४ ॥

ननु यद्यपि महान् तथापि बाल इति नन्दसूनुरिति कथमसाधारणीं लीलां करिष्यतीत्याशङ्कां वारयन्ति । यदुपतिरिति । अयं यादवानां पतिः ते हि बहुस्त्रीका भवन्ति अमर्यादार्थं विशेषणान्तरमाहुः । द्विरदराजविहार इति । महासुरते गजेन्द्र इव महान् तेन विना न पूर्तिरिति तदपेक्षयाप्यादौ पूर्वतापं दूरीकरिष्यतीत्याहुः । यामिनीपतिरिवेति । सम्पूर्णाया यामिन्या अयं पतिः अतस्तद्गतानां विशेषेण सुखदः नत्वहर्पतिरपि कथमुच्यते यामिनीपतिरिवेति तत्राहुः । एष इति । सर्वालंकारभूतस्तत्र अद्भुतातु श्रान्तं तिष्ठति इव दिनान्ते एष यामिनीपतिरिव चन्द्र इव दूरादेव तापनाशकः साम्प्रतम् अग्रेतु यामिनीपतिरिव इममर्थं ज्ञापयतीति लक्ष्यते यतो मुदितवक्त्रः प्रसन्नवदनो भूत्वा उपयाति समीपमागच्छति अयं भावस्तासामेव हितकारीति पूर्वं साधारण्यमुक्तमुपसंहारे पुनराहुः । मोचयन् व्रजगवामिति । व्रजस्य गवां च सम्पूर्णे दिवसे यावांस्तापः तं सर्वमेव मोचयतीति ॥ २५ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

इदानीं तु नगरप्रान्तपर्य्यन्तमागतस्तत्रापि किञ्चिद्विलम्बस्य कारणं ज्ञापयन्त्याहुः । मदेन पित्रादिदर्शनोत्थानन्देन प्रेयसीजनदर्शनोत्थाकामेनत्तया च विघूर्णिते विह्वले लोचने यस्य सः । प्रथमोऽर्थो वात्सल्यरसपरिकरैर्द्वितीयोऽर्थो मधुररसपरिकरैस्तत्त्वैर्बुध्यते इत्येवमग्रेऽपि ज्ञेयम् । स्वसुहृदां पुरोहितादि-मातुलादि-भ्रात्रादि दासादि-ताम्बूलिकादीनां यथोचितमाशीर्वादादिकृतामीषन्मानदः राजपुत्रत्वादल्पवयस्त्वेनानधिगत नीतिशास्त्रत्वाच्च ईषन्मात्रं यथोचितं शिरो नमनादिकं मानं ददातीति सः । द्वयमपि विलम्ब हेतुरिति भावः । पक्षे स्वसुहृदां प्रेयसीनां चन्द्रशालिकामारुह्य हसितापाङ्गनीलोत्पलैः पूजयन्तीनाम् ईषदून्यञ्जनालक्षितं मानममीष्टदानव्यञ्जकैः कटाक्षैर्ददातीति सः । वनपथपर्यटनभ्रमणेन क्षुत्पिपासाभ्याञ्च ईषत्पक्वबदरवत् पाण्डुवदनं यस्य सः । पक्षे स्वाभीष्टप्रेयसीविरहानुभावोऽयम् । वदने पाण्डिमा मृदुगण्डं मृदुगण्डो कनककुण्डलयोश्चञ्चळयोः कान्त्या मण्डयन् । यदुपतिरिति गोपानां यादवत्वस्य प्रतिपादितपूर्वत्वात् द्विरदराजविहारो गजेन्द्रतुल्यमन्दगमनः मुदितवक्त्रः प्रफुल्लितमुखः । उपयाति निकटमायाति व्रजगवां व्रजस्थजननेत्राणाम् ॥ २४ ॥ २५ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

काश्चित्समीपमायान्तमालोक्याति औत्सुक्यादूचुः । मद इति ईषन्मदेन नैसर्गिकेणैव दृष्टीनां वैवश्यापादकेन गुणविशेषेण घूर्णिते विह्वळिते लोचने यस्य सः वदरवत् ईषत्पाण्डुरनीलवर्णातिसुन्दरवदरवत्पाण्डुरं वदनं यस्य सः अत्र हेतुः कनककुण्डलयोर्लक्ष्म्या कान्त्या मृदुगण्डौ यस्मिन् तद्वदनं मण्डयन् द्विरदराजवत् गजराजवत् विहारो यस्य सः यामिनीपतिः कलानिधिः तद्वन्मुदितं वक्त्रं यस्य व्रजगवां व्रजे निवद्धानां गवामनुकम्प्यानामस्माकं दुरन्तमनन्तमन्येनानिवार्यं वा तापं मोचयन् शमयन् उपयाति समीपमागच्छति ॥ २४ ॥ २५ ॥

भाषा टीका ।

आनंद के मद से नेत्र जिनके कुछ घूमते से होरहे हैं ऐसे होकर अपने प्रियजनों को मान देने वाले वनमाला धारण किये हुये गोरज से पकेबेर सरी के कोमल गण्डस्थल को सुवर्ण के कुंडल की शोभा से भूषित करतेहुये यदुपति सायंकाल में गज कीसी चाल से चलते हुये चन्द्रमा सरी के आते समय में आनंदित मुखारविन्द से व्रजवासी मनुष्यों के तथा गउओं के दिन के वियोग के कठिन ताप को दूर करतेहुये चले आते हैं ॥ २४ ॥ २५

॥ श्रीशुक उवाच ॥

एवं व्रजस्त्रियो राजन् ! कृष्णलीलानुगायतीः ।
रेमिरेऽहस्सु तच्चित्तास्तन्मनस्का महोदयाः ॥ २६ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे
पूर्वार्धे युगलगीतवर्णनं नाम
पञ्चत्रिंशत्तमोऽध्यायः ॥ ३५ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

एवं विरहदुःखेनापि नु अहो कृष्णलीला एव गायन्त्यस्त-स्मिंश्चित्तं चेतना जीवितं यासां तास्तस्मिन्नेव मनः सङ्कल्परूपं यासां ता अतो महानुदय उत्सवो यासां ता अहःस्वपि रेमिरे ॥ २६ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
टीकायां पञ्चत्रिंशोऽध्यायः ॥ ३५ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

उपसंहरति । एवमिति । व्रजस्थिता अपि स्त्रियः हे राजन्निति तासां विरहगीते प्रेम्णा मुह्यन्तं राजानं सुस्थयति अहःसु तद्वि-रहमयेष्वपि रेमिरे जातनिर्वृतिप्राया बभूवुः तत्र हेतवः तच्चित्ता इत्याद्याः तस्य परमानन्दघनस्वभावत्वादिति भावः । अन्यत्तैः यद्वा एवमुक्तप्रकारेणेति तत्रैतद्दशलीलान्तरगानमपि बोध्यते तच्चित्तत्वत-न्मनस्कत्वतज्ज्ञानैस्तदेकगतज्ञानेच्छाप्रयत्नत्वमुक्तं महान् तदाविर्भाव-रूपत्वात्सर्वतोऽप्युत्कृष्ट उदयः सत्कर्मसिद्धिर्यासां ताः तदेव-मुत्तरोत्तरमाविर्भाववैशिष्ट्येन रमणस्यापि वैशिष्ट्यं ज्ञेयं तत्र वत्सल इत्यादिषु साक्षादाविर्भावात्साक्षादेव रमणं तत्राप्युत्तरो-त्तरतारतम्यमिति पूर्वत्र तु विरहेऽपि रमणं निजालम्बनस्य मनः स्फुरितत्वादंशेन भवत्येवेति सर्वत्र रेमिर इति श्लिष्टमेव ॥ २६ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे
श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिण्यां
पञ्चत्रिंशोऽध्याय ॥३५॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे
श्रीसुदर्शनसूरिकृतशुकपक्षीये
पञ्चत्रिंशोऽध्यायः ॥ ३५ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

उपसंहरति शुकः । एवमिति । हे राजन्नित्थं कृष्णस्य लीला अनुगा-यन्त्यो गोप्यः अहःस्वपि तस्मिंश्चित्तं चेतना जीवितं यासां तस्मि-न्नेव मनः सङ्कल्पविकल्परूपं यासां ता अत एव महानुदय उत्सवो यासां तास्तथाभूता रेमिरे ॥ २६ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
पञ्चत्रिंशोऽध्यायः ॥३५॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

एवं विधाः कृष्णलीला अनुगायतीः अनुगायन्त्यः अल्लोपश्छा-न्दसो वृत्तभङ्गभयाद्वा कृतः यद्वा एवं वेणुं विकल्प्य "नुविकल्पो नुपृच्छायाम्"इत्यमरः महानुदयः सम्पद्यासां ताः महोदयाः ॥ २६ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥ ३५ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः

रेमिरे जातनिर्वृतिप्राया बभूवुः । अत्र हेतवः तच्चित्ता इत्याद्यास्तस्य परमानन्दघनस्वभावत्वात् ॥ २६ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे
पञ्चत्रिंशोऽध्यायः ॥ ३५ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

एवं निरोधं निरूप्य स्त्रीणामुपसंहरन् प्रकरणस्थानामेव तद्वाक्यमुपसंहरति । एवमिति । राजन्निति संबोधनं विश्वासार्थं व्रजगता अपि स्त्रियः एवंप्रकारेण अहस्सु भगवत्सम्बन्धरहित-

श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी ।

दशायामपि कृष्णलीला एव आनुपूर्व्येण बहुकालानुवृत्त्यर्थमनुगायतीः अनुक्रमेण गायन्त्यः रेमिरे स्वत आनन्दरूपा कीर्तिस्ताः प्रति जातेति तासां क्रिया शक्तिर्ज्ञानशक्तिश्च भगवन्निष्ठैव जातेत्याह । तन्मनस्काः तच्चित्ता इति । चित्तं ज्ञानप्रधानं मनः कर्मप्रधानमिति एवं सर्वप्रकारेण प्रपञ्चविस्मृतिर्भगवदासक्तिश्च निरूपिता नन्वेवङ्कथं तासां निरोधः फलित इति तत्रोपपत्तिमाह । महोदया इति । महानेवाभ्युदयो भाग्यरादियांसामिति सर्वं सुस्थम् ॥ २६ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे श्रीलक्ष्मणभट्टात्मज-

श्रीमद्वल्लभदीक्षितविरचितायां सुबोधिन्याम्

द्वात्रिंशाध्यायविवरणम् ॥ ३२॥३५ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

नु भो राजन् ! गायतीः गायन्त्यः । तस्मिन् श्रीकृष्ण एव चित्तं चेतो यासां ताः । तस्य श्रीकृष्णस्यापि मनो यासु ता इत्यतः कृष्णतत्प्रियाणां परस्परविषयाश्रयत्वात् परस्परमनोग्रहणमतः प्रतिक्षणमनिशरमणात् रेमिरे इति विप्रलम्भप्रेम्णो दुःखमयत्वेन तदाविष्टजनप्रतीतत्वेऽपि परमसुखमयत्वं प्रेक्षावत्प्रतीतमस्त्यतः प्रेम्णः पुरुषार्थचूडामणित्वं व्याञ्जितम् ॥ २६ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम्
पञ्चत्रिंशोऽपि दशमे सङ्गतः सङ्गतः सताम् ॥ ३५ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

उक्तार्थमुपसंहरति । एवमिति । हे राजन् ! एवं कृष्णस्य लीलां जात्याभिप्रायमेकवचनम् अनुगायन्त्यः तस्मिन् चित्तं चेतना जीवितं यासां ताः तस्मिन् मनो यासां ताः अतो महानुदय उत्सवो यासां ताः अहस्स्वपि रेमिरे धन्यास्ता इति भावः ॥ २६ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे

पञ्चत्रिंशाध्यायार्थप्रकाशः ॥ ३५ ॥

भाषा टीका ।

श्रीशुकदेव जी बोले हे राजन् ! इस प्रकार से सब ब्रजवासिनी गोपी श्रीकृष्णचन्द्र की लीलाओं को गाती हुई दिनों में भगवान् में जीवन लगाकर तिन में मन युक्त करके अत्यंत सुकृती होकर दिनो में भी चित्त को रमाती हुई ॥ २६ ॥

इति श्रीभागवत दशमस्कन्धपूर्वार्धे पैतीस में अध्याय

की भाषाटीका समाप्त ॥ ३५ ॥

इतिश्रीमद्भागवते दशमस्कन्ध पूर्वार्धे पञ्चत्रिंशोऽध्यायः ॥ ३५ ॥

॥ षट्त्रिंशोऽध्यायः ॥

॥ श्रीशुक उवाच ॥

अथ तर्ह्यागतो गोष्ठमरिष्टो वृषभासुरः ॥
महीं महाककुत्कायः कम्पयन् खुरविक्षताम् ॥ १ ॥
रम्भमाणः खरतरं पदा च विलिखन् महीम् ॥
उद्यम्य पुच्छं वप्राणि विषाणाग्रेण चोद्धरन् ॥ २ ॥
किंचित्किंचिच्छकृन्मुञ्चन्मूत्रयन् स्तब्धलोचनः ॥
यस्य निर्ह्रादितेनाङ्ग ! निष्ठुरेण गवां नृणाम् ॥ ३ ॥
पतन्त्यकालतो गर्भाः स्रवन्ति स्म भयेन वै ।
निर्विशन्ति घना यस्य ककुद्यचलशङ्कया ॥ ४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

षट्त्रिंशे तु हते ऽरिष्टे नारदोक्त्या बलाच्युतौ ।
वसुदेवसुतौ ज्ञात्वा कंसो ऽक्रूरं समादिशत् ॥
गोपीरासान्तरायान्तं शङ्खचूडं निहत्य सः ।
अहन् गोपीमहानन्दासहं वृषमरिष्टकम् ॥

एवं देवगन्धर्वादिगीतनृत्यवाद्यकुसुमवर्षादिभिः कृष्णं प्राप्तं दृष्ट्वा व्रजस्य परमोत्सवे वर्तमाने तद्विरुद्धार्थान्तराधिकारार्थमथशब्दः तर्हि तदा वृषभाकृतिरसुरः तं वर्णयति सार्धत्रयेण । महान्तौ ककुत्कायौ यस्य खुरैर्विदारितां महीं कम्पयन् ॥ १ ॥

रम्भमाणो वृषभजातिशब्दं कुर्वन् विलिखन् विदारयन् उद्यम्योर्ध्वं कृत्वा वप्राणि तटान्युत्क्षिपन् ॥ २ ॥

किञ्चित्किञ्चिच्छकृन्मध्ये मध्ये ईषदीषत्पुरीषं मुञ्चन् तथा मूत्रयन् मूत्रमुत्सृजन् स्तब्धलोचनो ऽनिमिषलोचनः यस्य ध्वनिना गवां नारीणाञ्च ॥ ३ ॥

तत्र—

आचतुर्थाद्भवेत्स्रावः पातः पञ्चमषष्ठयोः ।
अत ऊर्ध्वं प्रसूतिः स्यादिति विभागः ॥

ककुदि गलपृष्ठशृङ्गे ॥ ४ ॥ ५ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

अथेति सार्द्धद्वयकं तर्हीति पूर्वोक्तप्रकारेण यदा श्रीकृष्णो गोष्ठमागतस्तदानीं प्रदोष इत्यर्थः । तथा च श्रीविष्णुपुराणे । प्रदोषार्द्धे कदाचित्तु रासासक्ते जनार्दने । त्रासयन् समदो गोष्ठमरिष्टः समुपागत इति । एवं प्रायः श्रीहरिवंशेऽपि इति नित्यमेव ताभिर्लीलागानलब्धपराभामन्दां कस्यचिदन्यस्य प्रदोषे तत्पूर्वत एव भोजनादिकं विधाय रासार्थं शय्यागृहान्निर्गत्य गोष्ठाद्बहिर्निर्गते श्रीभगवतीति ज्ञेयम् । अतो व्रजस्य परमोत्सव इति सामान्यत एव तैर्व्याख्यातं गोष्ठमिति गोष्ठनिकटमित्यर्थः । खुरविक्षतामित्यादिकं युद्धोद्यतमहामत्त वृषभस्य स्वाभाविकमेव तत्र खुरविक्षतामिति स्थौल्यादि स्वभावेन खुरपातैरेव ॥ १ ॥

विदारणात् महीं पदा विलिखन्निति च मत्ततया युद्धोद्यमेन । अन्यत्तैः ॥ २ ॥

तत्र मूत्रमुत्सृजन्निति मूत्रयन्नित्यस्य टीका ॥ ३ ॥

भयानकत्वमेवाह । यस्येति सार्द्धद्वयकेन निर्ह्रादितेन वज्रनिष्पेषवद्ध्वनिना । अङ्गेति सभयमिव सम्बोधनं स्म प्रसिद्धौ वै निश्चये महेति सूचितं स्थौल्यं दर्शयति । निर्विशन्तीति अचले ककुदि च प्रवेशो बुद्धिपूर्वकत्वमुत्प्रेक्षत एव अचेतनत्वात् । उभयत्र घनपथपर्यन्तोच्चकायस्तु विवक्षित इति विशेषश्चान्यः श्रीपराशरेणोक्तः । सतोय-तोयदच्छायस्तीक्ष्णशृङ्गोऽर्कलोचनः । लेलिहानः सनिष्पेषं जिह्वयौष्ठौ पुनः पुनः । संरम्भाविद्धलांगूलः कठिनस्कन्धबन्धनः । उदग्रककुदाभोगः प्रमाणाद्दुरतिक्रमः । विण्मूत्रलिप्त सर्वाङ्गो गवामुद्वेगकारकः । प्रलम्बकण्ठोऽतिमुखस्तरुघाताङ्किताननः । मूदयंस्तापसानुग्रो वनान्यटति यः सदेति । उत् उच्चैर्वीक्ष्यात्युच्चतर महाकायत्वात् । अन्यथैं चकारः किं वक्तव्यं स्त्रीस्वभावाद्योन्य इति गोपा अपि तत्रसुः पशवो

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

भीताः तस्य सुदुष्टत्वात् । तथोक्तं श्रीवैशम्पायनेन । "युद्धसज्ज-विषाणाग्रो द्विषद्वृषभसूदनः । अरिष्टो नाम हि गवामरिष्टो दारुणाकृतिः । दैत्यो वृषभरूपेण गोकुलं परिधावति । पात-यानो गवां गर्भान् धृष्टो गच्छत्यनार्त्तवम् । भज्यमानश्च चपलो गोष्ठं सम्प्रचचार ह । श्रृङ्गप्रहरणो रौद्रः प्रहरन् गोषु दुर्मदः । गोष्ठेतु न रतिं लेभे विना युद्धेन गोवृष" इत्यादि । एतावन्तं कालमत्रानागमनं तु कंसानुमत्यैव इति लक्ष्यते । गोकुलं व्रजं सन्त्यज्येति प्रदोषे वाढमत्याज्यस्यापि व्रजस्य त्यागेन महा-भीतत्वं तेन दूरे द्रवणं च सूचितम् अतएव हे राजन्निति विस्मयेन तादृशभावोदयाद्भयेनैव वा ॥४ ॥ ५ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अथ वृषभासुरवधात्मकं भगवतः कर्मानुवर्णयन्नारदस्य मुखा-त्सदा श्रुतवतः कंसस्य भगवद्धननोद्योगमनुवर्णयति षट्त्रिंशेन अथेत्यादिना । इत्थं श्रीकृष्णेन व्रजे हृष्यमाणे सति तर्ह्यथारिष्टाख्यो वृषभासुरो गोष्ठं प्रत्यागतः तं वर्णयति सार्द्धत्रयेण । मही-मित्यादिना । महान्तौ ककुत्कायौ यस्य सः खुरैर्वितरां क्षतां विदारितां महीं कम्पयन् ॥ १ ॥

खरतरं यथा तथा रम्भमाणः वृषभजातिशब्दं कुर्वाणः पदा महीं विलिखंश्च पुच्छमुद्यम्य उन्नमय्य श्रृङ्गाग्रेण वप्राण्युन्न-तस्थालानि उद्धरन्तुत्क्षिपन्मध्ये मध्ये किंचित् किञ्चिच्छकृत्पुरीषं मुञ्चन्मूत्रयंश्च स्तब्धेऽनिमेषे लोचने यस्य सः अङ्ग हे राजन् ! यस्यारिष्टस्य निष्ठुरेण कठिनेन निर्ह्रादेन गवां नारीणाञ्च गर्भा अकालिका अप्राप्तप्रसवकाला अपि भयेन पतन्ति स्रवन्ति च-

आचतुर्थाद्भवेत्स्रावः पातः पञ्चमषष्ठयोः ।
अत ऊर्ध्वन्तु नारीणां प्रसवः परिकीर्त्तित इति ॥

यस्यारिष्टस्य ककुदि गलपृष्ठेऽचलशङ्कया पर्वतश्रृङ्गभ्रान्त्या मेघा निर्विशन्ति विपुलककुद्मानित्यर्थः । तीक्ष्णश्रृङ्गं तमरिष्टमवलोक्य गोप्यो गोपाश्च तत्रसुः त्रासं प्रापुः ॥ २ ॥ ३ ॥ ४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अरिष्टनामासुरहननलक्षणं विक्रमं देवकार्यसिद्धिकामुकेन नारदेनोद्बोधितस्यासुरजातेः कंसस्य सज्जनोपद्रवोद्योगश्च कथयत्य-स्मिन्नध्याये अथ शङ्खचूडवधानन्तरं दैत्यान्तरनिग्रहलक्षणकथा आरभ्यते शङ्खचूडे निहते यदा गोपस्त्रीभिः सह व्रजमागतः श्रीकृष्णस्तर्हि तदा वृषभासुरः वृषभाकारो दैत्यः महान्तौ ककुत् कायश्च यस्य स तथा ॥ १ ॥

रम्भमाणः रवं कुर्वाणः ॥ २ ॥

शकृन्मूत्रमयं स्तब्धे स्थूणीकृते अतिस्थिरे लोचने यस्य स तथा निर्ह्रादितेन गर्जितेन ॥ ३ ॥

मासत्रयादर्वाक् गर्भस्रावः तत आसन्नमात्पतनं ततः प्रसवः स्त्रूणां मनुष्यस्त्रीणाम् अचलशङ्कया पर्वतशङ्कया ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

गोष्ठं तन्निकटम् ॥ १—५ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

गुणातीतस्वरूपेण तामसत्वाद्व्रजस्थिताः ।
निरुद्धास्तत्त्वसंख्यातैरध्यायैरिति वर्णितम् ॥
प्रद्युम्नरूपो भगवान् वसुदेवहिताय हि ।
रजोलीलां तथा चक्रे राजसानां निरोधकृत् ॥
असम्बद्धाः पूर्वमुक्ताः संबद्धा राजसाश्च हि ।
उभयेषां निरोधोऽतः सर्वान्ते फलितो भवेत् ॥
तत्त्वसंख्यैस्तथाध्यायैश्चतुर्द्धा पूर्ववद्धरिः ।
गुणैः स्वरूपतो लीलां क्रमादेव तथाकरोत् ॥
बन्धूनान्तु सुखं दत्त्वा वंशवृद्धिं चकार ह ।
एतावता निरुद्धास्ते खण्डद्वयमतो यदि ॥
उद्यमो मानतो यातः सप्तभिः स निरूपितः ।
सप्तभिः सुखदानञ्च विवाहश्चापि सप्तभिः ॥
त्रिविधोऽन्ये फलांशे हि प्रविशन्ति यथा सुताः ।
उषाहरणपर्यन्तमिदं प्रकरणं मतम् ॥
न कालनियमोऽन्यत्र सात्विकेनापि च क्रमः ।
क्रमः पूर्वत्र संसिद्धः सात्विका विरला यतः ॥
नारदो द्विविधो ह्यत्र प्रमाणे विनिरूप्यते ।
कर्मज्ञानविभेदेन ह्यक्रूरो भक्तिबोधकः ॥
प्रेमार्थबोधिका गोप्यो भगवद्बोधकश्च सः ।
कार्ये च ज्ञापयामास कंसः सम्भूतिबोधकः ॥
एवं सप्तभिरध्यायैः प्रमाणमिह रूप्यते ।
तत्राद्यः कर्ममार्गस्य ततो भक्त्या विरुध्यते ॥
साधनञ्च फलं तस्य त्रयमत्र निरूप्यते ।
लौकिकारिष्टगमने कर्ममार्गः प्रवर्त्तते ॥
अतोऽरिष्टवधो हेतुः सर्वतत्त्वार्थबोधने ।
फलमुद्यम एवास्य कंसस्य व्यग्रभावतः ॥
सात्विकं तामसञ्चैव प्रेषयामास राजसः ।
अत्र वध्या राजसा हि प्रसङ्गादपरेऽपि च ॥
त्रयस्त्रिंशे ततोऽध्याये ह्यरिष्टवध उच्यते ।
नारदोक्तिस्तथाकंसमन्त्रणञ्च रजो महत् ॥
कलाभिः साधिकैराद्यः सार्द्धाभ्यां वचनं तथा ।
त्रयोविंशतिभिः शिष्टविप्राभक्तिकास्तथा ॥

पूर्वं च गोपिकादीनां निरोध उपपादितः अधुनान्येषां निरोधं वक्तुं प्रक्रियान्तरमारभते । अथेति । यदैव भगवता निरोधो जात इति ज्ञातवान् तदैव तदैवारिष्टः समागत इत्यर्थः । वृषो हि गोष्ठमायातीति नाश्चर्यं तथाप्ययमरिष्टो वृषसाकृतिरसुरः महीं कम्पयन् समागत इति राजसे सामर्थ्यविशेषो निरूपितः महान् ककुत्कायश्च यस्य अदृष्टद्वारा कम्पकत्वायाह । खुरवि-क्षतामिति । खुरैर्विक्षतं यथा भवति तथा वा ॥ १ ॥

सार्द्धाभ्यामागमनं निरूप्यत इति तस्य चेष्टामाह । खर-तरमत्यन्तं निष्ठुरं यथा भवति तथा रम्भमाणः रम्भणं तज्जाती-

तं तीक्ष्णशृङ्गमुद्वीक्ष्य गोप्यो गोपाश्च तत्रसुः ।
पशवो दुद्रुवुर्भीता राजन् ! संत्यज्य गोकुलम् ॥ ५ ॥
कृष्णकृष्णेति ते सर्वे गोविन्दं शरणं ययुः ।
भगवानपि तद्वीक्ष्य गोकुलं भयविद्रुतम् ॥ ६ ॥
माभैष्टेति गिराश्वास्य वृषासुरमुपाह्वयत् ।
गोपालैः पशुभिर्मन्द ! त्रासितैः किमसत्तम ! ॥७ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

समस्तशब्दः पदा च एकेन विशेषेण महीं लिखन् चिन्तासमये ह्येवं करोति पश्चात् पुच्छमुद्यम्य मध्ये पशुत्वात् पशुचेष्टां करोतीत्याह । वप्राणि विषाणाग्रेण चोद्धरन्निति । गोकुलनिकटे स्थिताः प्राकाराः उभाभ्यां भेदने बलमत्यन्तं नष्टं भवतीति एकेनैव शूलवत्प्रविष्टेन उद्धरणं करोति चकारात्परिवृत्या अपरेण द्वाभ्यां च कश्चित् अग्रतः पृथक्करणमुद्धरणम् ॥ २ ॥

मत्तस्वभावमाह । किञ्चित् शकृन्मुञ्चन् गोमयं त्यजन् गोमूत्रञ्च स्तब्धलोचनश्च जातः अनिवृत्तक्रोधत्वज्ञापनाय राजसत्वाद्विचारे प्रवृत्तः न सहसा प्रविष्टः भगवदिच्छया गोष्ठाधिष्ठातृदेवेन निरुद्धानामनुभावेनच्च न प्रविष्टः तस्य क्रियया यज्जातं तत्स्पष्टमेवेति रम्भणस्यैव कार्यमाह । यस्य निर्हादितेनेति । निष्ठुरेण अन्तः प्रविश्यापि मारयतीति तेन गवां नृणाञ्च अकालतोऽपि कालस्य निमित्तत्वाभावेऽपि गर्भाः पतन्ति स्रवन्ति च भयेन तृतीये चतुर्थे स्रावः पातः पञ्चमषष्ठयोर्मासयोः ॥ ३ ॥

तत्र हेतुर्भयं ननु तस्य नादः मन्त्रादिष्टवदहष्टद्वारा तथा सति लौकिकोत्कर्षो न स्यादिति तस्य शरीराधिक्यमाह । निर्विशन्तीति । यस्य ककुदि पर्वतबुद्ध्या मेघा उपविशन्ति अनेन देहमहत्त्वं व्याख्यातम् एवं तस्य शरीरक्रियाशब्दानामन्तःकरणस्य च क्रौर्यं निरूप्य ततो यज्जातं तदाह । तं तीक्ष्णशृङ्गमिति । तीक्ष्णे शृङ्गे यस्य ऊर्ध्वं दृष्ट्वा अत्युच्चैरिति उद्वीक्षणात् गोपा गोप्यः पशवश्च तत्रसुः निरुद्धा इति कश्चिद्देहाभिमानाभावात् भयं न भविष्यतीत्याशङ्क्य निरूपितम् ॥ ४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

षट्त्रिंशे निहतेऽरिष्टे पितरौ रामकृष्णयोः ।
ज्ञात्वा कंसो नारदात्तौ बध्वाक्रूरं समादिशत् ॥

तर्हीत्यस्य यत्पदसापेक्षत्वात् प्रदोषे यदा कृष्णो रासार्थमुद्यतोऽभूदिति विष्णुपुराणवाक्यदृष्ट्या शेषो ज्ञेयः । तच्च वाक्यं यथा । प्रदोषार्द्धे कदाचित्तु रासासक्ते जनार्दने । त्रासयन् समदो गोष्ठमरिष्टः समुपागत इति । अत एव रासविरुद्धार्थान्तराधिकारार्थमथशब्दः । महदत्युच्चं ककुत् पृष्ठाग्रशिखा यत्र तथाभूतः कायो यस्य सः । क्षुरविदारितां महीं कम्पयन् खरतरं यथा स्यात्तथा विलिखंश्च । रम्भमाणः वृषभजातिशब्दं कुर्वन् वप्राणि प्राचीरतटानि शकृत् पुरीषम् ॥ १—३ ॥

निर्हादितेन शब्देन । स्रवन्ति पतन्तीति आचतुर्थात् भवेत् स्रावः पातः पञ्चमषष्ठयोरिति स्मृतिः ॥ ४-६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

षट्त्रिंशेऽध्याये वृषासुरवधं देवर्षिवचनाद्रामकृष्णौ वसुदेवसुतौ ज्ञात्वा तदानेतुं कंसेनाक्रूरं प्रति कृताम् आज्ञां चातुर्वर्णयति । अथेति । एवं श्रीकृष्णेन व्रजे आनन्दिते अथानन्तरं तर्हि तदा वृषाकारोऽसुरः अरिष्टो नामतो गोष्ठं व्रजमागतः, तं वर्णयति । महीमिति सार्द्धत्रयेण । महान्तौ अतिस्थूलौ ककुत्कायौ यस्य सः खुरैर्विक्षितां विदारितां महीं कम्पयन् ॥ १ ॥

खरतरं यथा भवति तथा रम्भमाणः वृषभजातिशब्दं कुर्वाणः वप्राणि तटानि उद्धरन् उत्क्षिपन् ॥ २ ॥

शकृत्पुरीषं किञ्चित् किञ्चित् मुञ्चन् ॥ ३ ॥ ४ ॥

भाषा टीका ।

श्रीशुकदेवजी बोले इसके अनन्तर किसी दिन व्रज में बडे भारी शरीर वाला बडे डील वाला पैरों के खुरों से खुदती हुई भूमी को कंपाता हुआ वृषभ की आकृति वाला अरिष्टासुर आता भया ॥ १ ॥

बडे घोर शब्द से रंभाता हुआ पैर से भूमी को खोदता हुआ पूंछ को उठा कर सींगों से नदी आदि के तटों को खोदता हुआ चला आया ॥ २ ॥

आखों को चढाया हुआ कुछ कुछ मूत्र विष्ठा को गिराता हुआ हे परीक्षितजी ऐसा शब्द करने लगा कि जिसके सुनने से गउओं के या मनुष्य स्त्रियों के असमय पर भी डर से गर्भ स्रवित होते थे तथा गिर पडते थे और जिसके डील में पर्वत मानकर मेघ भी बैठ जाते थे इस भयंकर रूप से आया ॥ ३-४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

कृष्णकृष्णरक्षेति वदन्तः ॥ ६ ॥ ७ ॥

आस्फोटय करतलेन बाहुमाहत्य तेन तलशब्देन कोपयन् ॥ ८ ॥

बलदर्पहाहं दुष्टानां त्वद्विधानां दुरात्मनाम् ।
इत्यास्फोटयाच्युतोऽरिष्टं तलशब्देन कोपयन् ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

कृष्णेत्यर्द्धकम् । ततो गोविन्दं श्रीगोकुलेन्द्रतयाभिषिक्तं तमेव शरणं ययुः । कोलाहलश्रवणेन श्रीगोवर्द्धनवासस्थलादभिमुखमायान्तं शरणतयोपसेदुः । अन्यत्तैः । यद्वा । कृष्णकृष्णेत्येतन्मात्रमेव क्रोशन्तः त्रस्तत्वाद्रक्षेत्याद्यन्योक्तावशक्तैः । इत्यन्ते निजकृत्यं चक्रुः । श्रीगोविन्दोऽपि निजकृत्यं चकारेत्याह । भगवानपीति । अथेति पाठे अरिष्टागमनानन्तरमेव वा । तत् स्वपाल्यमानं गोकुलं तत्रत्यान् सर्वानेवेत्यर्थः । वृषरूपमसुरमिति तं तादृशं ज्ञात्वेत्यर्थः । अत उप स्वसमीपे गोष्ठाद्दूर एवाह्वयत् । तत्र युद्धोपद्रववर्ज्जनार्थम् अत एव विवेश गोष्ठमिति वक्ष्यते ॥ ६ ॥

आह्वानप्रकारमाह । सपालैरिति । बुद्धिबलाधिक्यात्त्रासे पालानां गौणत्वं तद्वैपरीत्यात् पशूनां मुख्यत्वमिति तथोक्तम् । गोपालैरिति पाठः क्वचित् । मन्द अल्पबुद्धे ! पशूनां त्रासनात् । त्रासितैः किं स्यादपितु न किमपि फलमित्यर्थः । कुतस्तदाह । मयीति शास्तरि दण्डयितरि सति । पठान्तरे यतो बलदर्पहाहं दुष्टानां दुष्टकर्म्मणां दुरात्मनां दुष्टस्वभावानाम् । अधुनैव मया त्वयि हते सर्वे एवैते निर्भया भविष्यन्तीति भावः । त्वद्विधानामिति त्वं शासनीय इति किं वक्तव्यं त्वद्वद्दुष्टत्वानुकारका अपि शासनीया इत्यर्थः । ननु वृषरूपोऽहं कथं शासनीय इति चेत्तत्राह । असत्तमेति तत्त्वतो दुष्टदैत्य एव त्वमसीत्यर्थः ॥ ७ ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

हे राजन् ! पशवस्तु भीता गोकुलं सन्त्यज्य दुद्रुवुः ते गोपा गोप्यश्च कृष्ण कृष्णेति वदन्तः तं शरणं रक्षितारं प्रापुः ॥ ५ ॥

अथ भगवान् भयेन विह्वलन्तद्गोकुलमवलोक्य माभैष्ट भयं माकार्ष्टेति गिरा आश्वास्य सान्त्वयित्वा वृषासुरमुपाह्वयदाजुहाव ॥ ६ ॥

आह्वानप्रकारमाह । सवालैरिति । हे मन्द ! सवालैः सवत्सैः पशुभिः किन्तेभ्यो भयजननेन तव किम्प्रयोजनमित्यर्थः । हे असत्तम त्वद्विधानां दुरात्मनां बलं दर्पं च हन्तीति तथाभूतोऽहं समवस्थितः ॥ ७ ॥

इतीत्थमाह्वयन्नाश्रितार्तिहरः आश्रितान्न च्यावयते त्यजतीत्यच्युतः आस्फोट्य करतलेन बाहुमाहत्य तलशब्देनारिष्टं कोपयन् कोपयुक्तं कुर्वन्सख्युरंसे स्कन्धे भुज एवाभोगः सर्पदेहस्तं प्रसार्यावस्थितः ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली

तत्रसुः त्रस्ताः भीता आसन् ॥ ५ ॥ ६ ॥

हे मन्द ! निर्भाग्य ॥ ७ ॥

भुजाभोगम् आभोगभुजं पुष्टवृत्तभूतम् ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

सर्वग्रहणात् पशूनामपि कृष्णकृष्णेत्युक्तिर्लभ्यते । उच्चैश्च सुरभिगमने स्वसन्तानैरुपामन्त्रयेति ॥ ६—४० ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

पशुषु विशेषमाह । भीताः सन्तो दुद्रुवुरिति । सावधानार्थसंबोधनं गोकुलं सन्त्यज्येति पुनरागमनापेक्षां त्यक्त्वेति भावः तदा सर्वभयेषु भगवान् शरणमिति ज्ञात्वा ते सर्वे कृष्णकृष्णेति शरणं गताः स तस्य स्वाभाविको हृदि स्थितो धर्मः यो महाभये मुखान्निःसरति व्रजस्थानां पुनः कृष्ण एव निविष्ट इति कृष्णेत्येवाहुः किञ्च गोविन्दो यः स्वेन्द्र इति ॥ ५ ॥

न केवलं तेषां वचनङ्किन्तु भगवानपि तन्निरीक्ष्य वृषासुरमुपाह्वयदिति सम्बन्धः भयेन विह्वलमिति माभैष्टेत्यादौ गोकुलमाश्वास्य मनसा तद्वधं प्रतिज्ञाय पश्चादुपाह्वायत् ननु समाधानार्थं वृष इति दैत्यांशाः सर्व एव वध्याः यथा ब्राह्मणः पौत्राद्यः तथा वृषादयोऽपि देवांशानामेव वधे दोष इति धर्ममर्यादा तदाह । वृषासुरमिति असुरा वध्या एव रोगैर्मलप्रायाः ॥ ६ ॥

राजसत्वादादौ वचनमाह । गोपालैरिति । गोपालाः पशवश्चाल्पसत्त्वाः सजातीयास्तत्पालकाश्च नहि महान् अल्पैः सह युध्यति सजातीयैर्वा अत एव विचाराभावान्मन्देति सम्बोधनं मारयितुं त्वयैव न शक्यते तथा सति शत्रुपक्षापकर्षोऽपि भवेत् केवलं त्रासितैः किं कार्यम् अत एव वृथैव सद्भयजनको मारणीय इति ज्ञापयितुं सम्बोधयति असत्तमेति क्रियया दुष्टोऽसन् अन्तःकरणे नासत्तमः स्वरूपोऽपि क्रूरस्तथा ननु दुष्टानां कार्यमेवमेवेति चेत्तत्राह । बलदर्पहमिति । बलं तज्जनितं दर्पञ्च हन्तीति तथा बहुलं छन्दसीति ब्रह्मभ्रूणवृत्रेष्वेवोपपदेषु न नियमः अहमित्यात्मानं प्रदर्श्याह स्वपौरुषं ख्यापयन्निव दुष्टानामेवाहं सामान्यतो दर्पहा तत्रापि त्वद्विधानामुद्वेजकानां दुरात्मनामित्यन्तःकरणदोषयुक्तानां क्रियया अन्तःकरणेन स्वरूपतश्च दुष्टा वध्या एवेति ॥ ७ ॥

एवमुक्त्वा आस्फोट्य बाहुस्फोटनं मल्लवत् कृत्वा आस्फोटनतलशब्देनैव तं कोपयन् हीनो ऽसि त्वमिति ज्ञापनेन कोपं जनयन् अच्युतत्वात् स्वयन्निर्भयः अवगणनया लीलां कृतवानित्याह । सख्युरंस इति । भुजाभोगं महान्तं भुजं प्रसार्यावस्थितो जातः एवं करणे हेतुमाह । हरिरिति । यथा सोऽप्यरिष्टो लीलासहितं भगवन्तं पश्यन् अन्ते तमेव ध्यायन् ॥ ८ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

पशुभिः गोभिश्च असत्तमेति वृषरूपस्य तव वधे गोवधपापं न स्यादिति भावः ॥ ७ ॥

सख्युरंसे भुजाभोगं प्रसार्यावस्थितो हरिः ।
सोऽप्येवं कोपितोऽरिष्टः खुरेणावनिमुल्लिखन् ।
उद्यत्पुच्छभ्रमन्मेघः क्रुद्धः कृष्णमुपाद्रवत् ॥ ९ ॥
अग्रन्यस्तविषाणाग्रः स्तब्धासृग्लोचनोऽच्युतम् ।
कटाक्षिप्याद्रवत्तूर्णमिन्द्रमुक्तोऽशनिर्यथा ॥ १० ॥
गृहीत्वा शृङ्गयोस्तं वा अष्टादशपदानि सः ।
प्रत्यपोवाह भगवान् गजः प्रतिगजं यथा ॥ ११ ॥
सोऽपविद्धो भगवता पुनरुत्थाय सत्वरः ।
आपतत्स्विन्नसर्वाङ्गो निःश्वसन् क्रोधमूर्च्छितः ॥ १२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

आस्फोट्य करतलेन वामबाहुमाहत्य तेन तलशब्देन स्वशौर्यद्योतकेनेत्यर्थः । सख्युः सुबलस्य स्कन्धे भुजा भुज एव भोगः सर्पदेहस्तं प्रसार्य्यैति सावज्ञत्वं दर्शितम् ॥ ८ ॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

कृष्णकृष्णेतिभाषमाणाः शरणं रक्षितारम् ॥ ६—७ ॥

न च्यवते न क्षरतीत्यच्युतः स्वयमन्यान्दुर्वृत्तांस्तु हरतीति हरिः इत्येवमास्फोट्य करतलेन बाहुमाहत्य तेन तलशब्देन अरिष्टं वृषासुरं कोपयन् भुज एवाभोगोऽहिदेहस्तं सुलक्षणं भोगिभोगाकारं सख्युरंसे प्रसार्य्यावस्थितो बभूव ॥ ८ ॥

———

भाषा टीका ।

उस बड़े तीखे सींग वाले को देख कर हे राजन् ! गोप तथा गोपी सब डर गये और पशु सब गोकुल को छोडकर डर कर भाग गये ॥ ५ ॥

वे गोप सब हे कृष्ण कृष्ण कहकर श्री गोविंद के शरण में गये भगवान् ने भी उस गोकुल को डर से भागता हुआ देखा ॥ ६ ॥

तब मत डरो ऐसी वाणी से उनको धीरज देकर वृषासुर को बुलाकर बोले हे मंद ! हे असत्तम ! गोपाल तथा पशुओं के डराने से क्या होगा ॥ ७ ॥

अरे तेरे सरी के दुरात्मा दुष्टोंके वल तथा दर्प के नाश करने वाला तो मै हूं इतना कह कर अच्युत भगवान् ने ताल फटकार कर अरिष्टासुर को कुपित किया ॥ ८ ॥

———

श्रीधरस्वामिकृतभावार्थदीपिका ।

भुजाभोगं भुजा भुजः स एव भोगः सर्पदेहस्तं सर्पदेहाकारं भुजामित्यर्थः । स्वयमच्युतः अन्यान् दुष्टान् हरतीति हरिः उद्यता ऊर्ध्वं गच्छता पुच्छेन भ्रमन्तो मेघा यस्मिन् ॥ ९ ॥

अग्रे न्यस्ते विषाणाग्रे येन सः स्तब्धे असृक्तुल्ये लोचने यस्य सः कटाक्षिप्य कटाक्षेण तिर्यङ् निरीक्ष्य ॥ १० ॥

प्रत्यपोवाह प्रतिलोमं व्यनुदत् ॥ ११ ॥

अपविद्धोऽपक्षिप्तः आपतदाद्रवत् स्विन्नानि स्वेदयुक्तानि सर्वाङ्गानि यस्य सः क्रोधमूर्च्छितः क्रोधेन व्याप्तः ॥ १२ ॥

———

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

सख्युः श्रीदाम्नोऽसे भुजैव भोगः सुवृत्तत्वपृथुत्वायतत्वादिनाहिदेहस्तं प्रसार्येति सावज्ञत्वं दर्शितम् । सख्युरिति तस्यापि तादृशत्वदर्शनाय भावविशेषेण तत्सख्यभाग्याभिनन्दनाय च । अन्यत्तैः । तत्राच्युत इति तत्स्थानादविचलनाभिप्रायेण । तथाच श्रीवैशम्पायनः । तस्मात् स्थानान्न व्यचलत् कृष्णो गिरिरिवाचल इति । श्रीपराशरश्च । न चचाल ततः स्थानादवज्ञास्मित लीलयेति । हरिरिति तादृशावस्थानेन मनोहरणात् । उद्यता पुच्छेन चलन्तः तस्य स्पर्शाद्वाताद्वा इतस्ततो निपतन्तो मेघा यस्मात् उपाद्रवत् समीपे वेगेनागमत् ॥ ९ ॥

कथं तदाह । अग्रेति । अत्र कटाक्षशब्दैकदेशेन कटाशब्देन स एवोच्यते । कुटाशब्देन गाङ्कुटादित्यादिसूत्रलक्षितपादवत् । ततः कटा कटाक्षेणाक्षिप्य तिर्यग्दृष्ट्या संतर्ज्येत्यर्थः । तूर्णद्रवणे परासह्यत्वे च दृष्टान्तः । इन्द्रेण मुक्तो वज्रात् प्रक्षिप्तोऽशनिर्यथेति अच्युतमिति तत्र तस्य वैयर्थ्यं बोधयति ॥ १० ॥

वै प्रसिद्धौ स परमविनोदशीलः विनोदमेव दृष्टान्तेनाभिव्यञ्जयति गजः स्वप्रतिभटगजं यथेति तद्योग्यमेव बलमाविष्कृत्येत्यर्थः ॥ ११ ॥

सत्वरं यथा स्यात् पाठान्तरे सत्वरः सन् क्रोधेन मूर्च्छितो विस्मृतात्मा स्विन्नसर्वाङ्गः परिश्रान्तत्वात् क्रोधादेव वा ॥ १२ ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ततः सोऽरिष्टोऽरीत्थं कुपितः खुरेण भूमिमुत्क्षिपन्नुद्यताऊर्ध्वङ्गच्छता पुच्छेन भ्रमन्तो मेघा यस्मात्स क्रुद्धः सन् कृष्णमुपाद्रवत् ॥ ९ ॥

तदेवाह । अग्रे न्यस्ते विषाणाग्रे येन स्तब्धे ऽसृग्लोचने रक्तनेत्रे यस्य सः कटाक्षिप्य कटाक्षेण तिर्यङ्निरीक्ष्य यथेन्द्रेण मुक्तोऽशनिर्वज्रस्तद्वत्तूर्णं श्रीकृष्णं प्रत्युपाद्रवत्समीपमगात् ॥ १० ॥

ततः श्रीकृष्णः किं कृतवांस्तदाह । गृहीत्वेति । तदा सोऽच्युतः तमरिष्टं शृङ्गयोर्गृहीत्वा ऽष्टादशपदानि प्रत्यपोवाह प्रत्यगमयत् यथा गजः प्रतिगजं तद्वत् ॥ ११ ॥

ततः सोऽरिष्टो भगवता अपविद्धः अपक्षिप्तः प्रतिगमनेन पातितः सत्वरः पुनरुत्थाय स्विन्नानि प्रस्वेदयुक्तानि सर्वाण्यङ्गानि करचरणादीनि यस्य सः क्रोधेन मूर्च्छितः परवशः निःश्वसन् श्वासं मुञ्चन्नपि पुनराद्रवत् कृष्णं प्रत्याद्रवदित्यर्थः ॥ १२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

उद्यति पुच्छे भ्रमन्तो मेघा यस्य स तथा ॥ ९ ॥

स्तब्धे निश्चले असृक्रुधिरमिव रक्ते लोचने यस्य स तथा कटयाक्षिप्य कटिस्फिजौ आक्षिप्य निःक्षिप्य प्रदर्श्येत्यन्वयः कटाक्षित्वेति पाठे कटाक्षेण निरीक्ष्येत्यर्थः अशनिर्वज्रम् ॥ १० ॥

प्रत्यपोवाह प्रत्यपातयत् अभ्याकृष्य पृष्ठतोऽपनीतवानित्यर्थः तिर्यङ्नीतवान्वा ॥ ११-१२ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

तस्यापि वृत्तान्तमाह । सोऽपीति । एवमाक्षेपैः कोपितः स्वभावतोऽप्यरिष्टरूपः खुरेण अवनिं भूमिमुल्लिखन् पूर्ववन्मारणप्रकारं विचारयन् पश्चादुद्यत्पुच्छो भूत्वा तेनोर्ध्वपुच्छेन भ्रमन्तो मेघा यस्य पुच्छाघातेन मेघा इतस्ततो विक्षिप्ताः ततः क्रुद्धः सन् अयुक्तं करोतीति ज्ञापयितुं कृष्णं सदानन्दमुपसमीपपर्यन्तमाद्रवत ॥ ९ ॥

आद्रवणे प्रकारमाह । अग्रन्यस्ते अग्रे प्रथमतो न्यस्ते स्थापिते विषाणाग्रे येन स्तब्धे असृग्वर्णे लोचने यस्य बहिरन्तर्मारणसाधनपरिग्रह उक्तः तयोरसाधनत्वसूचनायाह । अच्युतमिति । आदौ दृष्टिवेधार्थं कटाक्षीकृत्य वस्तुतस्तु कटाक्षेणापि भगवान् न विद्धः तथापि अकटाक्षमपि कटाक्षीकृत्य तूर्णमाद्रवत् अविचारेण समागमने दृष्टान्तमाह । इन्द्रमुक्त इति । यथा पर्वतपक्षच्छेदने दुष्टानामेव छेदनार्थं प्रवृत्तः अन्यत्रापि गतः एवमयं भगवत्समीपमप्यागतः अत्रैव वा अविचारदशायामिन्द्रेण मुक्तः नमुचिप्रस्तावे वा ॥ १० ॥

तदा भगवता यत् कृतं तदाह । गृहीत्वेति । लोकेति साहसं शृङ्गयोरेव धृत्वा तं प्रसिद्धमरिष्टं वै निश्चयेन अष्टादशविद्यास्थानेषु वृषो न बध्यत इति पश्चाद्भागे अष्टादशपदानि प्रत्यपोवाह यथा महान् छागं नयति तथा करणे सामर्थ्यं भगवानिति ज्ञाने च ननु भगवांश्चेत् स्वबलं प्रदर्शितवान् तदा कथं पुनरागत इत्याशङ्क्य विशेषतो न ज्ञापितवानिति वक्तुं दृष्टान्तमाह । गजः प्रतिगजं यथेति । तद्बलापेक्षया अल्पमेवाधिकं बलं प्रकटितवानित्यर्थः ॥ ११ ॥

न केवलं भगवता नीत एव तावत् दूरं किन्तु भूमौ त्यागसमये निःक्षिप्तः तादृशोऽपि पुनरागत इत्याह । सोऽपीति । महतो भूमौ पतितस्य गात्रभङ्गसम्भवात् कथमागत इत्याशङ्क्य भगवता विद्ध इति तथैव विद्धः यथा पुनः यतोऽयं वध्य एव अतः पुनरुत्थाय पूर्वापेक्षयापि सत्वरः आपतत् आगत एव भगवत्समीपम् अधुनायं मारणीय इति ज्ञापयितुं विशेषणद्वयमाह । स्विन्नानि सर्वाङ्गानि यस्य अनेन देहाभावार्थं मारणपर्यन्तं तेनैव प्रयत्नः कृत इति मारितो वा मारयित्वा वा निवर्त्तेत नान्यथेति ज्ञापितं क्रोधेन मूर्च्छित इत्यन्तःकरणप्रवृत्तिरनिवर्त्या निरूपिता ॥ १२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

उद्यता ऊर्ध्वं गच्छता पुच्छेन भ्रमन्तो मेघा यस्मात् सः ॥ ९ ॥

स्तब्धे असृग्लोचने रक्तनेत्रे यस्य सः कटा कटाक्षस्तया आक्षिप्य तिर्य्यग्दृष्ट्या सन्तर्ज्य इत्यर्थः ॥ १० ॥

प्रत्यपोवाह प्रतिलोमं व्यनुदत् ॥ ११ ॥

अपविद्धः अपक्षिप्तः ॥ १२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

सोऽरिष्टोऽप्येवं कोपितः उद्यता ऊर्ध्वं गच्छता पुच्छेन भ्रमन्तो मेघा यस्मात् सः क्रुद्धः सन् खुरेणावनिमुल्लिखन् कृष्णमुपाद्रवदित्यन्वयः ॥ ९ ॥

तदेव वर्णयति । अग्रे इति । अग्रे न्यस्ते विषाणाग्रे येन सः स्तब्धे असृग्लोचने अरुणनेत्रे यस्य सः कटाक्षिप्य कटाक्षेण तिर्य्यङ्निरीक्ष्य अच्युतं तूर्णमुपाद्रवत् ॥ १० ॥

अष्टादशपदानि प्रत्यपोवाह प्रतिलोमं चालयामास अच्युतेनाष्टादशपदान्तरे ऽपक्षिप्त इति फलितोऽर्थः ॥ ११ ॥

सोऽरिष्टो ऽपविद्धो ऽपक्षिप्तः स्विन्नानि स्वेदयुक्तानि सर्वाण्यङ्गानि यस्य सः क्रोधेन मूर्च्छितो व्याप्तः आपतत् श्रीकृष्णं प्रत्याद्रवत् ॥ १२ ॥

भाषा टीका ।

फिर भगवान् सखा के कांधे पै भुजदण्ड को स्थापन करके खड़े होगये वह अरिष्टासुर भी ऐसे कोपित किया गया तब खुरों से भूमी को खोदने लगा पूंछके उठाने से जिसके मेघ भी घूमने लगते हैं ऐसा क्रोधित होकर श्रीकृष्ण के सामने दौड़ा ॥ ९ ॥

सींगों को आगे रखकर बड़े कठोर लाल नेत्र बनाकर टेढी दृष्टि से भगवान् को देखकर जैसे इन्द्र का छोड़ा वज्र चलै तैसे जल्दी से दौड़ता भया ॥ १० ॥

तमापतन्तं स निगृह्य शृङ्गयोः पदा समाक्रम्य निपात्य भूतले ।
निष्पीडयामास यथार्द्रमम्बरं कृत्वा विषाणेन जघान सोऽपतत् ॥ १३ ॥
असृग्वमन्मूत्रशकृत्समुत्सृजन् क्षिपंश्च पादाननवस्थितेक्षणः ।
जगाम कृच्छ्रं निर्ऋतेरथ क्षयं पुष्पैः किरन्तो हरिमीडिरे सुराः ॥ १४ ॥
एवं ककुद्मिनं हत्वा स्तूयमानः स्वजातिभिः ।
विवेश गोष्ठं सबलो गोपीनां नयनोत्सवः ॥ १५ ॥
अरिष्टे निहते दैत्ये कृष्णेनाद्भुतकर्मणा ।
कंसायाथाह भगवान्नारदो देवदर्शनः ॥ १६ ॥

भाषा टीका ।

भगवान् ने उसको दोनों सींगों में पकडकर अठारा पैंड पीछे को ऐसा हटाकर फेंका जैसे वैरी हाथी को महा हाथी हटा देवै ॥ ११ ॥

भगवान् के ऐसे फेकने से भी फिर वह जल्दी उठकर पसीना जिसके शरीर में होगई है बडा श्वास लेता हुआ क्रोध का मारा फिर दौडा ॥ १२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

कृत्वा विषाणमुत्पाट्य तेनैव जघान स चापतत् ॥ १३ ॥

मूत्रश्च शकृच्च मूत्रशकृत् एकवद्भावः तदुभयं समुत्सृजन्नित्यर्थः । पादांश्च क्षिपन्नितस्ततश्चालयन् अनवस्थितेक्षणः प्रचलितनेत्रः कृच्छ्रं कष्टं जगाम अथ निर्ऋतेर्मृत्योः क्षयं निवासं जगाम कृच्छ्रं यथा भवति तथा मृत इति वा ॥ १४ ॥

नयनोत्सवो नयनानां मूर्त्तिमानुत्सवः ॥ १५ ॥

काम व्रजे वसन्तं तं कृष्णं तेन तु विस्मृतम् ।
नारदः स्मारयामास कंसं दूतागिरेव तु ॥

तदाह । अरिष्ट इति । देवदर्शनो देवर्षिः यद्वा एवं कथिते एवं भविष्यतीति साक्षाद्देववद्दर्शनं ज्ञानं यस्य सः ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

अधुना दुष्टस्य तस्य वधं हर्षेण गायन्निवाह । तमिति द्वाभ्याम् । कृत्वा विषाणमुत्पाट्य । तथा च श्रीविष्णुपुराणे । उत्पाट्य शृङ्गमेकञ्च तेन चाताडयत्तथा इति । श्रीहरिवंशे च । शृङ्गञ्चास्य पुनः सव्यमुत्पाट्य यमदण्डवत् । तेनैव प्राहरद्वक्त्रं स ममार वृषो हत इति । अपतत् मृतः ॥ १३ ॥

तत्प्रकारमेवाह । असृगिति । सम्यगुत्सृजन् मुञ्चन्निति किञ्चित् किञ्चिच्छकृन्मुञ्चन्निति पूर्वोक्तात् विशेषार्थः । निर्ऋतेः क्षयं जगामेति श्रीमुनीन्द्रस्य क्रोधमयमेव वचनम् । वस्तुतस्तु ये च प्रलम्बखरदर्दुरकेश्यरिष्टमल्लादावस्यापि मोक्षश्रवणात् । निर्ऋतेर्मृत्योर्हेतोः क्षयं भगवन्निवासं गत इत्येवार्थः । अथ तन्मरणानन्तरमेव सुरा ईडिरे इति तद्भयेन सद्यस्तेषां तत्राशक्तेः ॥ १४

स्वजातिभिर्गोपैरिति तेषामेवान्तरङ्गत्वं विवक्षितम् । सबल इत्यरिष्टवधेऽनुजस्नेहेन स्वक्रीडातस्तस्याप्यागमनात् । नयनोत्सव इति । स्वाभाविकत्वमुक्तं तदानीन्तु महाशत्रुं मारयित्वागतस्य तस्य वैशिष्ट्यं बोधयति । अत्र यदुक्तं श्रीहरिवंशे स चोपेन्द्रो वृषं हत्वा कान्तचन्द्रे निशामुखे । अरविन्दाभनयनः पुनरेव ररामहेति तत्र गोष्ठप्रवेशानन्तरं पुनर्निर्गत्येति ज्ञेयम् इति श्रीभगवतस्तत्र रागविशेषो दर्शितः यच्चोक्तम् आदिवाराहे श्रीगोवर्द्धनपरिक्रमे—

गङ्गायाश्चोत्तरं गत्वा देवदेवस्य चक्रिणः ।
अरिष्टेन समं यत्र महद्युद्धं प्रवर्त्तितम् ॥
घातयित्वा ततस्तास्मिन्नरिष्टं वृषरूपिणम् ।
कोपेन पार्ष्णिघातेन महास्तीर्थं प्रकल्पितम् ॥
वृषभस्य वधो ज्ञेय आत्मनः शुद्धिमिच्छता ।
स्नातस्तत्र तदा कृष्णो वृषं हत्वा सगोपकः ॥
विपाप्मा राधां प्रोवाच कथं भद्रे भविष्यसि ।
वृषो हतो मया चायमरिष्टः पापसूचकः ॥
तत्र राधा समाश्लिष्य कृष्णमक्लिष्टकारिणम् ।
स्वनाम्ना विदितं कुण्डं कृतं तीर्थमदूरतः ॥
राधाकुण्डमिति ख्यातं सर्वपापहरं शुभम् ।
अरिष्टराधाकुण्डाभ्यां स्नानात् फलमवाप्नुते ॥
राजसूयाश्वमेधाभ्यां नात्र कार्या विचारणा ।
गोहत्या ब्रह्महत्या च पापं क्षिप्रं प्रणश्यतीति ॥

तत्रायमर्थः । गङ्गाया मानसगङ्गायाः चक्रिणः करचरणादि गत तदादि महाभगवल्लक्षणस्य देवदेवस्य दिव्यातिदिव्यैश्वर्यमाधुर्यस्य श्रीकृष्णस्येत्यर्थः । यत्र महद्युद्धं प्रवर्त्तितं प्रवृत्तम् । घातयित्वा कोपेन गोष्ठोपद्रवहेतुककोपविशेषेण यः पार्ष्णिघातस्तेन पृथिव्यास्तद्युद्धप्रपञ्च शुश्रूषामाशङ्क्याह वृषभस्येति मम तल्लीलाकथनावेश सति तीर्थमाहात्म्यकथनं न स्यादिति भावः । वृषानुकर्तृवधात् शुद्धिं तदनुकरणमिच्छता इच्छन्नित्यर्थः । महातीर्थमिदं पातालात् समुत्थितमिति व्याजेन स्वतीर्थमहिमदर्शनाय तत्र स्नातश्च तदेवं स्नानानन्तरं मूलानुसारेण गोष्ठं प्रविश्य द्वित्रिदण्डान् स्थित्वा श्रीहरिवंशानुसारेण पुनरपि

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

रासाय वेणुवाद्यादिसङ्केतेन श्रीराधिकादिभिः सह हतारिष्टे रासवर्त्मनि तत्र सर्वाभ्यः पृथक् गतस्य तां प्रति सनर्मवचनमाह विपाप्मेति । तत्परिहासाशङ्कया विपाप्मत्वं व्यञ्जयन्नित्यर्थः । मम तावत् पापं नोत्पन्नमेव प्रत्युत तीर्थनिर्माणपुण्येन कृतकृत्यः सिद्धसर्वार्थोऽभूवम् । एतादृश तीर्थनिर्माणाभावात् त्वं कथं भद्रे पुण्यविषये भविष्यसीत्यर्थः । विपाप्मत्वमेव व्यञ्जयति वृषो वृषाकारमात्रोऽरिष्टनामा पापसूचकः सुदुश्चारित्रेण निजपापत्वेनासुरत्वमेव यो व्यञ्जयतीत्यर्थः । लब्धचिन्तायाः श्रीराधायास्तु तन्मिलने स्नेह एवोदितवानित्याह–तत्रेति । तत्प्रसङ्गे समाश्लिष्य स्वाभाविकीं लज्जामपि त्यजन्ती सम्यगालिङ्ग्य ततस्तत्सौहार्देन स्वयमपि तत्र कुण्डं कृतवतीत्याह स्वनाम्नेति राधेति राधयेत्यर्थः । स्वयमिति ज्ञेयम् । स्वयं कर्त्रा-कर्तृत्वेनैव तत्कुण्डतुल्यता प्राप्तेः । सखीलक्षसहायत्वात् कुण्डस्य स्वल्पप्रमाणत्वाच्च । अत एव समाश्लिष्य कृतमिति तदेव कारणं बोध्यते । तच्चारिष्टखुरचूर्णित बहुलमृदपसारणया प्रथममीषदेव पश्चात्तु विशेषत इति ज्ञेयम् । अदूरतस्तत्कुण्ड युग्मतयेत्यर्थः । अधुनापि तथा श्रीगोवर्द्धनेशानकोणान्ते दृश्यत इति ॥ १५ ॥

प्रकृतमनुसरामः अरिष्ट इति सार्द्धद्वयकम् । निहत इत्यतीत निर्देशादत्र चिरादिति ज्ञेयं गोवर्द्धनगतरासस्यास्य वसन्तमध्योद्भवत्वेन कंसवधस्य तु शिवरात्रिचतुर्दशीगतत्वेन प्रसिद्धेः गोष्ठे विषयेऽद्भुतकर्मणेति पूतनावधाद्यरिष्टवधान्ताद्भुतकर्मणा कंसं प्रति श्रीनारदेन कथनस्याभिप्रायेण । देवदर्शन इति तैर्व्याख्यातम् अत्र प्रथमार्थे पश्यतीति दर्शनो मन्त्रदर्शीति ऋषिवाचिता । द्वितीये प्रतिकल्पमेव गोकुले प्रकटलीलेयं यादवपाण्डवादिभक्तगणरक्षानुरोधेनैव तावदेव नरलीलेन श्रीभगवता क्रियते नाधिकेति सा समाप्तैव । संप्रति यादवाः परम दुःखिनो देवाश्चोद्विग्नाः अतः श्रीभगवता कंसवधस्याविलम्बकार्यत्वं जातम् । तस्मात्तदवसरोऽयमिति तथा कथयामि यथा कंसस्तमत्रानयेत् ॥ १६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

स भगवान्पुनरागतं तमरिष्टं शृङ्गयोर्गृहीत्वा स्वचरणेन समाक्रम्यावष्टभ्य भूतले निपात्य यथार्द्रमम्बरं वस्त्रं तद्वन्निष्पीडयामास ततः कृत्वा कृतौ छेदने उत्पाट्य विषाणमिति शेषः तेन विषाणेन जघान ताडयामास सच ताडितोऽरिष्ट आपतत् ॥ १३ ॥

मूत्रं शकृच्च तयोः समाहारः तदुत्सृजन्नसृग्रुधिरं वमन्नुद्गिरन् पादान् क्षिपन्नितस्ततश्चालयन्ननवस्थितेक्षणः प्रचलितनेत्रश्च कृच्छ्रं कष्टं प्राणोत्क्रमणात्मकं जगाम अथ निर्ऋतेर्मृत्योः क्षयं निवासञ्च जगाम ततः पुष्पैः किरन्तो हरिं तुष्टुवुः ॥ १४ ॥

इत्थं ककुद्मिनमरिष्टं हत्वा भगवान् स्वज्ञातिभिर्गोपैः स्तूयमानः गोपीनां नयनानां मूर्तिमानुत्सवः स रामो गोष्ठं विवेश ॥१५॥

इत्थं गोष्ठेऽद्भुतकर्मणा कृष्णेनारिष्टे हते सति देवदर्शनो देवर्षिर्नारदः यद्वा यत्रङ्कथिते एवं भविष्यतीति साक्षाद्देवचेष्टिताभिज्ञः कंसालयं गतस्तं प्राह ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अम्बरं वस्त्रं कृत्वा उत्कृष्य विषाणमिति शेषः तेन विषाणेन ॥ १३ ॥

मूत्रशकृती अनिमीलितेक्षणः विवृतनेत्रः निर्गता ऋतिर्यस्मात्स तथा निर्ऋतिर्यमः तस्य क्षयं गृहं यमलोकमित्यर्थः ॥ १४ ॥

ककुद्मिनं वृषासुरं स्वज्ञातिभिः गोपैर्देवैर्वा ॥ १५ ॥

देवो नारायणः तद्विषयं दर्शनं ज्ञानं यस्य स तथा यद्वा देवं दर्शयतीति यद्वा देवानामिव दर्शनं यस्यातीन्द्रियत्वात्स तथा देवानां यद्दर्शनं मतं तदेव यस्य दर्शनं स तथेति वा यथा कंसहननं शीघ्रतमं स्यात्तथाहेति द्योतनार्थः प्रेत्युपसर्गः अनेन देवकार्यमेव नारदेन साध्यते नत्वसुरकार्यमिति ज्ञायते ॥ १६ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

तदा स भगवता मारित इत्याह । तमापतन्तमिति । उपरि पतन्तमरिष्टं शृङ्गयोर्धृत्वा तस्य बलं निगृह्य यथा बलक्षीणो भवति तथा कृत्वा पश्चाद्भूमौ पातयित्वा पादेनाक्रम्य यथा यन्त्रे पशुर्निष्पीड्यते तथा निष्पीडयामास तथा श्वासाभावेऽपि शेषकूपद्वारा रुधिरं निः सारितवानित्यर्थे दृष्टान्तमाह । यथार्द्रमम्बरमिति । तदपि हस्तेन निष्पीडितमम्बरं न सर्वं जलं विमुञ्चति यथा रजकादिभिः काष्ठखण्डैर्निष्पीडितं तदाह । विषाणेन कृत्वेति विपरीतनिर्देशः अग्रिमसंबन्धार्थः विषाणेनच तमघान येनैव मारणार्थं स प्रवृत्तः तेनैव स मारित इति "ये यथा मां प्रपद्यन्त" इत्यर्थ उक्तो भवति विषाणद्वयमेकं वा तदुदरे निवेशितवानित्यर्थः । ततः स अपतत् पुनरुत्थानप्रयत्नं न कृतवानित्यर्थः ॥ १३ ॥

अन्तस्तु प्राणोद्गमनरूपः प्रयत्नो जात इत्याह । असृग्वमन्निति । मुखद्वारा असृक् मूत्रं मध्ये शकृदन्ते एवं सर्वतः सर्वं निःसृतमिति महान् प्रयत्नो मरणात्मकः सूचितः गच्छतः प्राणस्य चेष्टामाह । क्षिपंश्च पादानिति न अवस्थिते ईक्षणे यस्य नेत्रे विपरीते जाते अनेन नेत्रद्वारा प्राणगमनमिति निरूपितं प्रथमतः कृच्छ्रं मूर्च्छां जगाम ततो न पुनरावृत्तः किन्तु अथ निर्ऋतेः क्षयं मृत्युमेव जगाम अथवा प्रथमतो निर्ऋतेः क्षयम् अथ तदनन्तरं क्षयं स्वस्थानमाश्रयभूतं जगाम मुक्तिप्रकरणे गणितत्वात् वृषभवधः कृतिसाम्याद्युक्त इव भविष्यतीत्याशङ्क्य देवानुमोदनेन तद्युक्तमिति समर्थयति । पुष्पैः किरन्त इति । पुष्पवृष्टिं कृत्वा स्तोत्रमपि कृतवन्तः यतः स्वदुःखं दूरीकृतवान् तदर्थपरिज्ञानाय सुरा इति ॥ १४ ॥

उपसंहरति । एवमिति । स्वज्ञातया अपि कठिना इति स्वजातिभिरपि गोपैः स्तूयमानः अत एव ज्ञातिपदं ततो गोष्ठशत्रुं हत्वा गोष्ठं प्रविवेश सबलो बलभद्रसहितोऽपि जातः प्रमाण-

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

सहितत्वात्तस्य गोष्ठे प्रवेशस्य कारणं गोपीनां नयनोत्सवरूपमिति अनेन निरोधस्य सिद्धत्वात् नातः परं संबन्ध इतिसूचितम् ॥ १५ ॥

एवं हेतुभूते अरिष्टवधे जाते तत्फलम् अग्रे निरूपयिष्यन् प्रथमं कार्यमाह सार्द्धाभ्याम् । गोष्ठे अरिष्टे निहते नातः परं गोष्ठे कार्यमिति सर्वमेव दुःखमेतन्मूलकमिति ननु सदानन्दोऽप्यपेक्षित इत्याशङ्क्याह । कृष्णेनेति । साधनत्वमापन्नः सदानन्द एवेति न तदर्थमन्यत्कार्यम् अद्भुतकर्मणेति भगवता अरिष्टो न हतः किन्तु गोकुले स्थापितः यतः तत्प्रभृति गोकुले दुःखमेवेति विपरीतक्रियैव अद्भुतकर्मता तदा भगवानागमिष्यतीति ज्ञात्वा रथादिप्रेषणार्थं नारद उपायं कृतवानित्याह । कंसायाथाहेति । अथ तदनन्तरमेव यदैव भगवान् गन्तुमियेष तदैव देववत् दर्शनं यस्येति भगवत इव तस्य ज्ञानं निरूपितं लोकविरुद्धस्यापि करणे दोषाभावाय देववद्वा आराधितप्रत्यक्षो यथेष्टं भवति तथा नारदस्य दर्शनेन सर्वेष्टं जातमिति ज्ञापितम् अथवा यो देवः पूर्वमाह अस्यास्त्वामष्टमो गर्भ इति तस्मिन् दृष्टे यथा भवति सर्वसन्देहनिवृत्तिः तथा नारदे दृष्टे जातेति ॥ १६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

शृङ्गयोर्निगृह्य नितरां गृहीत्वा आर्द्रमम्बरं कृत्वा यथा कश्चिन्निष्पीडयामास ततश्च विषाणेन उत्पाटितेन तं जघान ॥ १३ ॥

कृच्छ्रं कष्टं जगाम प्राप अथ निर्ऋतेर्मृत्योः सकाशात् स्वयं वधं जगाम निर्ऋतिरेवागत्य तं जघान ननु कृष्ण इत्युत्प्रेक्षा सतु सद्यो मुक्तिं प्राप पुष्पैः पुष्पाणि किरन्तः ॥ १४ ॥

अरिष्टवधान्ते राधाकृष्णयोर्नर्मसंलापमयी तत्कुण्डद्वयोत्पत्तिकथा पौराणिकी विंशत्या श्लोकैर्निबध्यते । यथा । "मास्मान् स्पृशाद्य वृषभार्दन हन्त मुग्धा घोरोऽसुरोऽयमयि कृष्ण तदप्ययं गौः । वृत्रो यथा द्विज इहास्त्ययि निष्कृतिः किं शुध्येद्भवांस्त्रिभुवनस्थिततीर्थकृच्छ्रात् । १ । किं पर्यटामि भुवनतान्यधुनैव सर्वा आनीय तीर्थविततीः करवाणि तासु । स्नानं विलोकयत तावदिदं मुकुन्दः प्रोच्यैव तत्र कृतवान् वत पार्ष्णिघातम् । २ । पातालतो जळमिदं किल भोगवत्या आयातमत्र निखिला अपि तीर्थसङ्घाः । आगच्छतेति भगवद्वचसा त एत्य तत्रैव रेजुरथ कृष्ण उवाच गोपीः । ३ । तीर्थानि पश्यत हरेर्वचसा तवैवं नैव प्रतीम इति ता अथ तीर्थवर्याः । प्रोचुः कृताञ्जलिपुटा लवणाब्धिरस्मि क्षीराधिरस्मि शृणुतामरदीर्घिकास्मि । ४ । शोणोऽपि सिन्धुरहमस्मि भवामि ताम्रपर्णी च पुष्करमहश्च सरस्वती च । गोदावरी रविसुता सरयूः प्रयागो रेवास्मि पश्यत जलं कुरुत प्रतीतिम् । ५ । स्नात्वा ततो हरिरतिप्रजगल्भ एव शुद्धः सरोऽप्यकरवं स्थितसर्वतीर्थम् । युष्माभिरात्मजनुषीह कृतो न धर्मः कोऽपि क्षितावथ सखीर्निजगाद राधा । ६ । कार्यं मयाप्यतिमनोहरकुण्डमेकं तस्मात्स्वमिति तद्वचनेन ताभिः । श्रीकृष्णकुण्डतटपश्चिमदिश्यथ खमिति तद्वचनेन ताभिः । श्रीकृष्णकुण्डतटपश्चिमदिश्यमन्दो गर्त्तः कृतो वृषभदैत्यखुरैर्व्यलोकि । ७ । तत्रार्द्रमृण्मृदुलगोलततीः प्रति स्वहस्तोद्धृता अनतिदूरगता विधाय । दिव्यं सरः प्रकटितं घटिकाद्वयेन ताभिर्विलोक्य सरसं स्मरते स्म कृष्णः । ८ । प्रोचे च तीर्थसलिलैः परिपूरयैतन् मत्कुण्डतः सरसिजाक्षि सहालिभिस्त्वम् । राधा तदा नननेति जगाद यस्मात्त्वत्कुण्डनीरमुरुगोवधपातकाक्तम् । ९ । आहृत्य पुण्यसलिलं शतकोटिकुम्भैः सख्यर्बुदेन सह मानसजाह्नवीतः । एतत् सरः स्वमधुना परिपूरयामि तेनैव कीर्त्तिमतुलां तनवानि लोके । १० । कृष्णेङ्गितेन सहसैत्य समस्ततीर्थसख्यस्तदीय सरसोधृतदिव्यमूर्त्तिः । तुष्टाव तत्र वृषभानुसुतां प्रणम्य भक्त्या कृताञ्जलिपुटः स्रवदस्रधारः । ११ । देवि त्वदीयमहिमानमवैति सर्वशास्त्रार्थविन्न च विधिर्न हरो न लक्ष्मीः । किंत्वेक एव पुरुषार्थशिरोमणिस्त्वत्प्रस्वेदमार्जनपरः स्वयमेव कृष्णः । १२ । यस्यारुयावकरसेन भवत्पदाब्जमारज्य नूपुरमहो निदधाति नित्यम् । प्राप्य त्वदीयनयनाब्जतटप्रसादं स्वं मन्यते परमधन्यतमं प्रहृष्यन् । १३ । तस्याज्ञयैव सहसा वयमाजगाम तत्पार्ष्णिघातकृतकुण्डवरे वसामः । त्वञ्चेत् प्रसीदसि करोषि कृपाकटाक्षं तर्ह्येव तर्षविटपी फलितो भवेन्नः । १४ । श्रुत्वा स्तुतिं निखिलतीर्थगणस्य तुष्टा प्राह स्म तर्षमथि वेदयतेति राधा । याम त्वदीय सरसीं सफला भवाम इत्येव नो वर इति प्रकटं तदोचुः । १५ । आगच्छतेति वृषभानुसुता स्मितास्या प्रोवाच कान्तवदनाब्जधृताक्षिकोणा । सख्योऽपि तत्र कृतसंमतयः सुखाब्धौ मग्ना विरेजुरखिला स्थिरजङ्गमाश्च । १६ । प्राप्य प्रसादमथ ते वृषभानुजायाः श्रीकृष्णकुण्डगततीर्थवराः प्रसह्य । भित्त्वैव भित्तिमतिवेगत एव राधाकुण्डं व्यधुः स्वसलिलैः परिपूर्णमेव । १७ । प्रोचे हरिः प्रियतमे ! तव कुण्डमेतन् मत्कुण्डतोऽपि महिमाधिकमस्तु लोके । अत्रैव मे सलिलकेलिरिहैव नित्यं स्नानं यथा त्वमसि तद्वदिदं सरो मे । १८ । राधाब्रवीदहमपि स्वसखीभिरेत्य स्नास्याम्यरिष्टशतमर्दनमस्तु तस्य । योऽरिष्टमर्दनसरस्युरुभक्तिरत्र स्नायाद्वसन्मम स एव महाप्रियोऽस्तु । १९ । रासोत्सवं प्रकुरुत स्म च एव रात्रौ कृष्णाम्बुदः कृतमहारसहर्षवर्षः । श्रीराधिकाप्रवरविद्युदलंकृतश्रीस्त्रैलोक्यमध्यविततीकृतदिव्यकीर्त्तिरिति । २० । ककुद्मिनं वृषासुरम् ॥ १५ ॥

देवः परमेश्वर इव पश्यति कृष्णळीलातत्त्वं जानातीति सः ब्रजलीलासमाप्तिमवधार्य माथुरीलीळामाविर्भावयितुं कंसद्वारैव कृष्णं मथुरामानेतुं युक्त्युत्थापनविचक्षण इत्यर्थः । किमाहेत्यतआह । देवक्या अष्टमगर्भत्वेन प्रसिद्धां कन्यां यशोदायाः सुतामाह यशोदायाः सुतत्वेन प्रसिद्धं कृष्णं च प्रसिद्धं रामञ्च रोहिण्याः पुत्रमाह ननु तौ वसुदेव सुतौ चेत्केन ब्रजं प्रापितौ तत्राह । वसुदेवेत्यादि ॥ १६-१७ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

कृत्वा कृती छेदने उत्पाट्य विषाणमिति शेषः तेनैव जघान ॥ १३ ॥

असृग्रुधिरं वमन् मूत्रशकृदित्यत्र समाहारद्वन्द्वः तदुभयं समुत्सृजन् पादान् क्षिपन् इतस्ततश्चलयन् अनवस्थिते ईक्षणे नेत्रे यस्य सः अथानन्तरं कृच्छ्रं कष्टं यथा भवति तथा निर्ऋतेः क्षयं निवासं जगाम कृच्छ्रमित्यस्यायमर्थः प्राणवियोगवेलायां भगवत्संसर्गतो लब्धविवेकः वैकुण्ठसुलभमपि हित्वा घोरमात्मव्य-

यशोदायाः सुतां कन्यां देवक्याः कृष्णमेव च ।
रामं च रोहिणीपुत्रं वसुदेवेन बिभ्यता ॥
न्यस्तौ स्वमित्रे नन्दे वै याभ्यां ते पुरुषा हताः ॥ १७ ॥
निशम्य तद्भोजपतिः कोपात्प्रचलितेन्द्रियः ।
निशातमसिमादत्त वसुदेवजिघांसया ॥ १८
निवारितो नारदेन तत्सुतौ मृत्युमात्मनः ।
ज्ञात्वा लोहमयैः पाशैर्बबन्ध सहभार्यया ॥ १९ ॥
प्रतियाते तु देवर्षौ कंस आभाष्य केशिनम् ।
प्रेषयामास हन्येतां भवता रामकेशवौ[1] ॥२०॥ १राममाधवाविति श्रीवल्लभाचार्यपाठः

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

तिक्रमं स्मृत्वा बलादेव निर्ऋतेः क्षयं गत इति ॥ १४ ॥ १५ ॥

देववद्विष्णुवत्तदवतारत्वादर्शनं यस्य सः नारं नराणामधिकारानुरूपं ज्ञानं ददातीति नारदः ॥ १६ ॥

भाषा टीका ।

आते हुये उसको भगवान् ने दोनों सींगों में पकड कर जमीन में गिराकर पांय के नीचे दबाकर जैसे गीले कपडे को निचोडते हैं तैसे मरोड दिया फिर उसी के सींग को उखाडकर उसको मारा सो वह मरकर गिर पडा ॥ १३ ॥

मुख में से रक्त को उगिलता हुआ मूत्र विष्ठा को डालता हुआ कष्ट को पाकर प्राण त्यागकर परलोक को चला गया आकाश में देवता सब फूलों की वर्षा करके भगवान् की स्तुति करते भये ॥ १४ ॥

भगवान् इस प्रकार से उस वृषासुर को मारकर अपने जाति के बन्धुओं से प्रसंसित होकर बलदेवजी के सहित चलते हुये और सब गोपियों के नेत्रों को आनंद देते हुये व्रज में प्रवेश करते भये ॥ १५ ॥

अद्भुत कर्मों वाले कृष्ण भगवान् ने जब अरिष्ट दैत्य को मार दिया तब दिव्य दृष्टि वाले नारदजी ने आकर कंस से आगे की बात कही ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

आप्तेनेव नारदेनोक्तमाह । यशोदाया इति । देवक्या अष्टमगर्भत्वेन प्रसिद्धां कन्यां यशोदायाः सुतामाह । यशोदायाः सुतत्वेन प्रसिद्धं कृष्णं देवक्याः सुतमाह रोहिणीपुत्रं रामञ्च देवक्याः सप्तमं सुतमाह यद्वा नन्दसुतत्वेन प्रसिद्धं रामञ्च वसुदेवभार्याया रोहिण्याः पुत्रमाह तौ वसुदेवसुतौचेत्कथं व्रजं गतौ तत्राह । वसुदेवेनेति ॥ १७-१८ ॥

निवारित इति । हते वसुदेवे तापलायतामतो बध्यतामिति मन्त्रं वदता नारदेन निवारित इति ॥ १९-२२ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

ततश्चैनं स्वयमेवादौ हनिष्यतीति श्रीकृष्णलीलाशैली देववद्ब्रह्मादिवज्ज्ञानन्नित्यर्थः । रामं रोहिण्याः पुत्रमपि देवक्या एवेति गर्भसङ्कर्षणमपि कथयामासेति ज्ञेयम् । बिभ्यता त्वत्त इति श्रीरत्वान्न तव वध्यः स्यादिति भावः । स्वस्य मित्र इत्यसाधारणस्नेहविशेषो बोधितः । स्वो ज्ञातिरसौ मित्रञ्चेति वा । वै प्रसिद्धमेवैतत् सर्वं केवलं त्वमेव मूढो न जानासीत्यर्थः । एतच्चाप्ततार्थमुक्तम् । पुरुषा आप्तजना हता इति लक्षणेन स्वोक्तं दृढीकृतम् । तथा महाबलत्वसूचनया भयञ्च तस्य नितरां जनितम् ॥ १७ ॥

प्रचलितं क्षुभितमिन्द्रियं मनो यस्य सः इति विवेकहानिरुक्ता ॥ १८ ॥

बबन्धेति । हते किल पितरि तन्निवेशायावसरप्रतीक्षामपि कुर्वीयातां बद्धयोस्तु पित्रोर्मोचनार्थमत्राद्य श्वो वागच्छेतामिति श्रीनारदमन्त्रणयैवेति ज्ञेयम् । सह भार्यया देवकीसहितम् एतच्चागमनाविलम्बार्थं परमदुष्टत्वादेव वा ॥ १९ ॥

प्रतियाते त्विति । केशिप्रेषणं मन्त्रभङ्गशङ्कया किं वा तत्प्रेरणस्यापि निवारणाशङ्कया आभाष्य भो भ्रातर्महावीरेत्येवं सम्बोध्य दूतागिरा समादिश्येति श्रीपराशरवैशम्पायनयोर्मतम् ॥ २० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

किमाहेत्यत्राह । यशोदाया इति सार्द्धेन । देवक्याः कन्यामष्टमगर्भत्वेन प्रसिद्धां यशोदायाः सुतामाह । तथा यशोदायाः पुत्रत्वेन प्रसिद्धं कृष्णं देवक्या अष्टमं गर्भमाह । तथा रोहिणीपुत्रत्वेन प्रसिद्धं रामं च देवक्याः सप्तमं गर्भमाहेति सम्बन्धः ननु देवकीसुतौचेत्कथं व्रजगतौ तत्राह वसुदेवेन त्वत्तः बिभ्यता

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

स्वमित्रे नन्दे न्यस्तौ न्यासरूपेण निहितौ याभ्यां रामकृष्णाभ्यां तव पुरुषा भृत्या अरिष्टादयो हताः वसुदेवे हते तु तौ पलायेतामतः स न वध्य इत्यर्थतोऽत्र द्रष्टव्यम् ॥ १७ ॥

तन्नारदोक्तं निशम्याकर्ण्य भोजपतिः कंसः कोपात्प्रचलितानीन्द्रियाणि यस्य स वसुदेवं हन्तुमिच्छया तीक्ष्णं खड्गमाददे ॥ १८ ॥

ततो नारदेन निवारितस्तस्य वसुदेवस्य सुतमेवास्यात्मनः स्वस्य मृत्युं हन्तारं ज्ञात्वा नारदोपदेशादिति शेषः लोहमयैः पाशैर्भार्यया देवक्या सह वसुदेवं बबन्ध ॥ १९ ॥

ततो नारदे गते सति कंसः केशिनं नाम दैत्यमाहूय प्रेषयामासाज्ञापयामास किमिति भवता रामकेशवौ हन्येतामिति ॥२०॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

किमाहेति तत्राह । यशोदाया इति । कन्यां दुर्गां यशोदायाः सुतां कृष्णं देवक्याः पुत्रं रामं बलभद्रं रोहिणिपुत्रमाह वसुदेवेन तौ किंकृतावत्राह । बिभ्यता त्वदिति शेषः ॥ १७ ॥

स्वस्य मित्रे विश्वसनीये सुहृदि याभ्यां कृष्णरामाभ्यां ते तव पुरुषा नियोगकारिणः ॥ १८ ॥

निशातं तेजितमित्यर्थः ॥ १९ ॥

आशास्य सम्यक् शिक्षित्वा भवता मद्भृत्येषु पूज्येन ॥ २०-२२ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

नारदस्य वाक्यान्याह । यशोदायाः सुतामिति । दैवमप्यन्यत् भवतीति तस्य या विपरीतबुद्धिः सा प्रथमतः अपोह्यते कन्या न देवक्याः नापि यशोदायाः पुत्रः किन्तु यशोदायाः कन्या देवक्यास्तु पुत्रः सर्वत्राहेति सम्बन्धः यशोदायाः सुतामाह कन्यां कृष्णं तु देवक्याः पुत्रमाहेति रामश्च देवक्याः पुत्रं रोहिण्याः पुत्रमपि एवकारस्तद्वयावृत्त्यर्थः यथा देवक्या रोहिण्याश्च रामः पुत्रः एवमेव देवक्या यशोदायाः पुत्रो न भवतीति कथमेवं व्यत्यासो जात इति चेत्तत्राह । वसुदेवेन बिभ्यता न्यस्तौ स्वमित्रे नन्द इति । एतावत्यर्थे नारदोऽपि न जानाति यथा नन्दोऽपि न जानाति तथा भगवांस्तत्र तिष्ठतीति परमार्थतो वा न्यासः मित्रपदं ज्ञात्वाप्यन्यथा न करिष्यतीति ज्ञापनार्थं वै निश्चयेन याभ्यां कृष्णरामाभ्यां ते पुरुषाः सर्वे एव प्रलम्बादयो हता इति अन्यथा नान्यो मारयितुं शक्नुयात् एतावदुक्त्वा तूष्णीं तत्रैव स्थितः ॥ १७ ॥

ततो यज्जातं तदाह । निशम्येति । नारदोक्तं तत्प्रमेयं निशम्य अन्यथा करणेसामर्थ्यार्थमाह । भोजपतिरिति । भोजानां पतिः अकस्माज्जातेन कोपेन प्रकर्षेण चलितानीन्द्रियाणि जातानि अन्यायो वसुदेवस्येति ज्ञात्वा तज्जिघांसया निशातं तीक्ष्णं खड्गमाददे ॥ १८ ॥

प्रायेण वसुदेवः सभायामेवास्ते तदा भीतो नारदः निवारयामासेत्याह । निवारित इति । ननु तन्निवारितः कथमसौ न मारयेदिति आशङ्क्याह । नारदेनेति । स हि तेषां मान्यः तुल्यो देवेषु तेषु च तथापि शत्रुरिति बद्ध इत्याह । तत्सुतावात्मनो मृत्यू इति देवकीवसुदेवौ बबन्ध भ्रातॄणामपि स्वमध्यपातात् सेवकानाञ्च सुताविति द्विवचनम् अविशेषकथनात् सन्देहाद्वा लोहमयैः पाशैरिति न पादे शृङ्खला किन्तु सर्वावयवेषु शृङ्खलाभिरिव बन्धनम् एतावदुक्त्वा नारदो निर्गतः केचित्तु बन्धनमपि नारदेनैवोक्तमित्याहुः । मारणे तत्सुतौ पलायनं करिष्यत इति तदुपेक्षणीयमनृतत्वादप्रसक्तात् ॥ १९ ॥

ततो देवर्षौ प्रतियाते पुनस्तस्यान्यथा बुद्धिः पूर्ववद्भविष्यतीत्याशङ्क्य तुशब्दो वारयति यतोऽयं देवानामपि मन्त्रद्रष्टा तदा कंसः स्वनिकटे स्थितं स्वस्य पार्षदरूपं केशिनमाभाष्य हे केशिन्निति संबोध्य गोकुले प्रेषयामास त्वं गच्छ गोकुलमिति अर्थसिद्धत्वान्नोक्तं गतस्य कृत्यमाह । हन्येतामिति गत्यर्थोऽपि हनधातुरिति आनयनार्थमेव घोटकः प्रेषित इति लक्ष्यते सुखासनं तन्न भवतीति पश्चाद्रथप्रेषणं तस्य तथा सामर्थ्यमग्रे वक्ष्यति तस्य हेषितसंत्रस्ता इति माधवपदं मधुवंशोत्पन्नाभिप्रायेण रामस्तु प्रसिद्धः ॥ २० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

असिमाददेति वसुदेवस्य परोक्षमेव ॥ १८ ॥

निवारित इति हते वसुदेवे तौ पलायेतां किञ्चाधुना तज्जिघांसामपि वसुदेवो न ज्ञापनीयः तथा सति स्वमित्रं नन्दं प्रति तेनोक्ते तद्वृत्तान्ते नन्दः सपुत्र एव पलायिष्यत इत्यतो वसुदेवदेवक्योर्बन्धनसेवाधुना कृत्वा केनापि मिषेण रामकृष्णौ मथुरामानीयेतामिति मन्त्रं ददतेति ज्ञेयं नच वसुदेवदेवक्यौ बन्धयता नारदेन तयोर्विप्रियं कृतमिति वाच्यं प्रत्युत प्रियमेव कृतं परमसोत्कण्ठाभ्यां ताभ्यामायत्यां स्वपुत्रमुखदर्शनानन्दलाभेन स मुनिराशीःशतसम्प्रदानपात्रीकरिष्यत एवेति मुनेस्तद्विषयकोऽपराधो नाभूदिति ज्ञेयम् ॥ १९ ॥

वाग्देवीमते हन्येतां माप्येतां तत्र लीयतामित्यर्थः ॥ २०—२२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

किमाहेत्यत्राह । यशोदाया इति सार्द्धेन ॥ १७ ॥

निशातं तीक्ष्णम् ॥ १८ ॥

नारदेन वसुदेवे हते न किञ्चित्प्रयोजनमित्यादि ज्ञानदेन तत्सुताविति राममपि तत्र सहायतया कारणं ज्ञात्वेत्यर्थः ॥ १९—२२ ॥

भाषा टीका।

जो कन्या आकाश को गई थी सो यशोदा की है कृष्ण देवकी के पुत्र हैं बलराम रोहिणी के पुत्र हैं वसुदेव ने डर कर इन दोनों को अपने मित्र नन्द के पास रख दिया है जिन दोनों ने तुमारे बहुत पुरुषों को मारा है ॥ १७ ॥

इस बात को सुन कर कंस क्रोधित भया उस की सब इन्द्रिय चलायमान हो गईं फिर वसुदेव के मार ने

ततो मुष्टिकचाणूरशलतोशलकादिकान् ।
अमात्यान्हस्तिपांश्चैव समाहूयाह भोजराट् ॥ २१ ॥
भो भो निशम्यतामेतद्वीरचाणूरमुष्टिकौ ।
नन्दव्रजे किलासीते सुतावानकदुन्दुभेः ॥ २२ ॥
रामकृष्णौ ततो मह्यं मृत्युः किल निदर्शितः ।
भवद्भ्यामिह संप्राप्तौ हन्येतां मल्ललीलया ॥ २३ ॥
मञ्चाः क्रियन्तां विविधा मल्लरङ्गपरिश्रिताः ।
पौरा जानपदाः सर्वे पश्यन्तु स्वैरसंयुगम् ॥ २४ ॥

भाषा टीका ।

को तीक्ष्ण तरवार को उस ने ग्रहण किया ॥ १८ ॥

फिर नारदजी ने मना कर दिया तब उन के पुत्रों को अपना काल जान कर स्त्री के सहित वसुदेव जी को लोहा की वेडियों मे वांधे कर के रखता भया ॥ १९ ॥

तव नारदजी के चले जाने पर कंस ने केशि को बुला कर व्रज को भेजा कि तुम जाकर वलराम तथा कृष्ण को बुलालाओ कर के ॥ २० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

मह्यं मम निदर्शितो विधात्रा नारदेन वा व्रजं गन्तुमुद्यतौ तावाह । भवद्भ्यामिति ॥ २३ ॥

मञ्चा उत्तुङ्गस्तम्भादिरचितस्थानानि ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

सम्यक् ससम्मानं निभृतमाहूय आह । क्रमेण नियुयोज ॥ २१ ॥

भो भो इति युग्मकम् । वीप्साऽवधानार्थं वीरेति प्रोत्साहनाय प्राधान्येन द्वयोरेव सम्बोधनम् । अयमेकवचनान्त एव पाठः स्वामिसम्मतः । व्रजं गन्तुमित्यादि वक्ष्यमाणात् । वहुवचनान्तपाठस्तु बहुत्र हे वीराः हे चाणूर हे मुष्टिकेत्यर्थः ॥ २२ ॥

किल निश्चितं श्रीनारदोक्तौ प्रामाण्यात् । आनकदुन्दुभेरिति तज्जन्मपूर्ववृत्तेन तदैव प्रमाणितम् । ततस्ताभ्यां सकाशात् किल निश्चये निदर्शित उदाहृतः कथित इत्यर्थः । इह सम्प्राप्ताविति तत्र तस्य स्थानवलेनानिष्टसाधने भवतोरशक्तेरिति भावः । मल्ललीलयेति अन्यथा सावधानत्वे तयोरनिष्टस्य दुःशकत्वादिति भावः । वाग्देवीमते तु हन्येतां प्राप्येतां तयोर्नीयतामित्यर्थः ॥ २३ ॥

अतस्तद्दर्शनार्थं मञ्चाद्युत्सवसामग्री साध्यतामित्याह । मञ्चा इति । विविधाः राजामात्यादियोग्यभेदेन बहुप्रकाराः । मल्लानां रङ्गः क्रीडास्थानं तस्य परितः श्रिताः चतुर्दिक्षु वेष्टनरूपेण स्थिता इत्यर्थः । किमर्थं तदाह । पौरेति । पौराः पुरवर्त्तिनो जना जानपदाश्च देशवर्त्तिनः स्वैरेण स्वच्छन्दतया नतु बलात् प्रवर्त्तिततया संयुगं मल्लयुद्धमिति पौरादीनां वञ्चनप्रकारप्रतिपादनम् ॥ २४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ततो मुष्टिकादीनमात्यांश्च हस्तिपांश्च सामोक्त्याहूयोवाच ॥ २१ ॥

उक्तिमेवाह । भो भो इत्यादिभिः पञ्चभिः । भो भो इति द्विर्वचनं प्रत्येकाभिप्रायकं वीरचाणूरेति कर्मधारयः आनकदुन्दुभेर्वसुदेवस्य सुतौ रामकृष्णौ नन्दव्रजे वर्त्तेते खलु तौ तु मम मृत्यू हन्तारौ दैवेन निदर्शितौ ज्ञापितावतः कथञ्चिदुपायेनेहानीतौ भवद्भ्यां मल्ललीलया हन्येतां हन्तव्यौ ॥ २२-२३ ॥

मञ्चा उत्तुङ्गस्तम्भादिरचितस्थानानि क्रियन्तां कथम्भूताः मल्लयुद्धस्थानपर्यन्तस्थानविशिष्टाः किमर्थं तत्राह । पौराः पुरवासिनो जानपदा देशवासिनश्च सर्वे मञ्चेषूपविश्य स्वैरं यथेष्टं संयुगं युद्धं पश्यन्तु ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

मृत्यू मारकौ कालेन यमेन नितरां दर्शितौ ॥ २३ ॥

मञ्चाः उत्तुङ्गस्तम्भादिरचितस्थानानि मल्लरङ्गस्य परितः सर्वासु दिक्षु श्रिताः स्थिताः स्वैरसंयुगं योधाकाङ्क्षापूर्वकं युद्धम् ॥ २४ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

सोऽपि भक्तो भविष्यतीति साक्षाद्भगवन्नाम न मुखान्निःसृतं हृदये तेन कार्यं सेत्स्यतीति ज्ञात्वा सर्वानेवाहूय मन्त्रयामासेत्याह । तत इति । मुष्टिकादयो मल्लाः अमात्या गृहमन्त्रिणः हस्तिपाः युद्धकुशलाः चकाराद्वन्यांश्च बन्धून् एवकारेण न विपक्षान् समाहूय गृहस्थितानाकारयित्वा आगमनार्थं हेतुमाह । भोजानां राजेति ॥ २१ ॥

समागतेषु तेषु स्ववृत्तान्तमाह । भो भो इति । सामान्यसंबो

श्रीमद्वल्लभाचार्यकृतसुबोधिनी।

धनद्विरुक्त्या सर्वेषामेव संबोधनं लक्ष्यते तेन प्रत्येकं नाम गृहीत्वा कथयतीति ज्ञापितम् एतन्निशम्यतामिति सावधानीकरणं वीरेति विशेषणं प्रकृतोपयोगित्वात् सर्वेषां चाणूरेति भिन्नतया निरूपणे तस्यैव वा वीरो वा कश्चित् मुष्टिकादीनां प्रधानेन ग्रहणात् बहुवचनं वा अज्ञातं वृत्तान्तमाह । नन्दव्रज इति । मन्त्रे वक्तुर्नाम न ग्राह्यमिति किलेत्याह प्रसिद्ध एवायमर्थः आसाते किल नन्दव्रजे किल आनकदुन्दुभेः सुतौ किल ॥ २२ ॥

नाम्ना प्रसिद्ध्यर्थं नामाह । रामकृष्णाविति । किमतो यद्येवमित्याशङ्क्याह । ततो मह्यमिति । मृत्युर्मरणम् अत्रापि पूर्ववत् किलेति निदर्शित इति नितरां दर्शितः प्रत्यक्षतया सर्वैरुक्तः तर्हि किङ्कर्तव्यमित्याकाङ्क्षायामाह । भवद्भ्यामिति । इह सम्यक् प्राप्तौ भवद्भ्यां चाणूरमुष्टिकाभ्यां मल्ललीलया हन्येतामिति प्राप्येतामित्युक्तं भवति यदि लौकिकभाषया स विरुद्धं न वदेत् तदा भगवानपि लोकरीत्या तं न मारयेत् लीलयेति पदं भागिनेयाविति प्रकटतया तथा करणमनुचितमिति अत एव भगवतापि तथैव कृतं नतु शस्त्रेण नापि मुष्टिभिः ॥ २३ ॥

अयम्भावः भगवता तद्धृदये स्थापित इति वालकवञ्चनार्थं मल्लरङ्गप्रकारः । मञ्चाः क्रियन्तामिति विविधा इति । मनोहरत्वाय येनान्यचित्तत्वे मारयितुं शक्येत मल्लानां रङ्गस्थानमाश्रित्य परितस्तिष्ठन्तीति मञ्चानां सर्वतः करणं येनैव सुखेन मल्लैः सह युद्धं तत्रैव भ्रमार्थं केवलैर्भ्रमो न भविष्यतीति तत्र लोकानां निवेशनमाह । पौरा जानपदा इति । पुरवासिनो जनपदवासिनश्च पृथक् पृथक् मञ्चे स्थिताः स्वैरसंयुगं स्वेच्छया युद्धं पश्यन्त्विति तेषां कोलाहलेन वा अन्यचित्ततेति अपकीर्त्यभावश्च फलिष्यतीति ॥ २४ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

मह्यं मम निर्दर्शितो नारदेन ॥ २३ ॥

किञ्च तयोर्वञ्चनार्थमुत्साहवर्द्धनार्थं च महोत्सवप्रसिद्धिः क्रियतामन्यथा तौ पलायिष्येते इत्याह । मञ्चा इति ॥ २४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

ततस्तयोरेकतरात् कृष्णात् मह्यं मम मृत्युर्निदर्शितः अस्या. स्त्वामष्टमो गर्भो हन्तेत्याकाशवाण्येति शेषः ॥ २३ ॥

मल्लरङ्गपरिश्रिताः मल्लयुद्धस्थानस्य परितो वर्तमानाः मञ्चा उत्तुङ्गस्तम्भादिमयानि स्थानानि स्वैरसंयुगं स्वैच्छिकं मल्लयुद्धम् ॥ २४ ॥

भाषा टीका।

तिसके पीछे मुष्टिक चाणूर शल तोसल आदि और मन्त्री हीस्तका माहुत इन सबको कंस बुलाकर कहता भया ॥२१॥

हे वीर चाणूर मुष्टिक ! तुम दोनो इस बातको सुनो नन्दके ब्रज में वसुदेव के पुत्र रहते हैं ॥ २२ ॥

जिनका नाम राम तथा कृष्ण है उन्हीं से मेरा मृत्यु होना देवतों ने कहा है उनके यहां आजाने से उनको तुम मल्लों की लीलासे मारना ॥ २३ ॥

मल्लों की जो रंग भूमी तिसमे विविध प्रकार के मञ्चान बनाओं जिनपर से पुरवासी देशवासी सब खुसी के संग्राम को देखेंगे ॥ २४ ॥

श्रीमद्वीरराघवाचार्यकृतव्याख्यानुसारि-

[मूलम्]

महामात्र ! निबोधेदं वचो मम महामते !।
गजः कुवलापीडः प्रभिन्नकरभामुखः ॥
संस्थाप्यो द्वारि रङ्गस्य करारोपितमुद्गरः ।
तेन तौ तत्र हन्तव्यौ सुतावानकदुन्दुभेः ॥
अथ सोऽपि महामात्रः प्राह व्याकुलमानसः ।
कथं मया निहन्तव्यौ स्वस्रीयौ पृथिवीपतेः ॥
महामात्रेणैवमुक्तः कंसस्तत्रैव दुर्मतिः ।
उवाच भूयो वचनं समेतान् श्रावयन्नृपः ॥

कंस उवाच।

श्रृणुध्वमेतद्वचनं मयोदितं निशम्य सर्वे हृदि धारयन्तु तत्
येनाहमेतेष्वसुहृत्त्वमादितश्चरामि बन्धुष्वपि तत्र कारणम् ॥
माता मम महाभागा कदाचित्कमलेक्षणा ।
विचरन्ती गृहोद्याने मन्दमारुतवीजिते ॥
प्रोत्फुल्लाशोकवकुलपूगपुन्नागशोभिते ।
भ्रमद्भ्रमरसंघाते कूजत्कोकिलसंयुते ॥
नृत्यच्छिखण्डिनिवहमर्कटाटोपसुन्दरे ।
वसन्तसमये रम्ये सालमण्डलमण्डिते ॥
चरन्ती तत्र मे माता चिन्तयामास सुव्रता ।
भर्तारं कामसन्तप्ता ऋतुस्नाता स्वलंकृता ॥
तदैव कश्चिद्गन्धर्वो द्रुमिलो नामनामतः ।
चरन्नन्तर्हितः काले दृष्ट्वा तामेकचारिणीम् ।
विज्ञाय चिन्तितं तस्याः सर्वतत्त्वाशयार्थवित् ।
औग्रसेनं वपुर्बिभ्रत् सस्मितालापवीक्षितम ॥
तामाससाद कामार्तः कामयानां पतिव्रताम् ।
अजानाना तु साभ्येत्य रेमे तेन समं वने ॥
सा तं विदित्वा रमणे रतं सती—
नितान्तखेदोविललोचनाशया ।
उवाच कस्त्वं कितवार्यगर्हितं दुरात्मना—
येन कृतं त्वयेदृशम् ॥
इति ब्रुवन्तीं परिसान्त्वयन् शनैः—
स दीर्घबाहुर्द्रुमिलोऽभ्यभाषत ।
वयं हि गन्धर्वकुलोद्भवाबले !—
गीर्वाणतुल्यामरवल्लभासुराः ॥
भवादृशीनां मनुजाङ्गनानां जानीहि भद्रे !—
सुलभा वयं नच ।

श्रीमद्वीरराघवाचार्यविजयध्वजकृतव्याख्यानुसारि-

[मूळम्]

जनुर्विनाशाद्यखिलाधिभागिनां नृणां सुराणां—
महदन्तरं शुभे ! ॥
इति ब्रुवन्तं साभूयः प्राह क्रोधाकुलेन्द्रिया ।
किं मां सान्त्वयसे भूयः कृत्वेदं दुष्टचेष्टितम् ॥
इमानतिक्रम्य महीजळाग्निसमीरणाकाशनिशेशसूर्यान् ।
दिक्कालधर्मांश्च उभे चसंध्ये दुरात्मनेत्थं मलिनीकृताहम् ॥
गजेनेव मदान्धेन पद्मिनीवनमध्यगा ।
विशृङ्खलेन विमला येनाहं मलिनीकृता ॥
स त्वं किमिति मां भूयः सान्त्वयस्यमराधम ! ।
इति ब्रुवन्तीं सोवाच सभयः शापशङ्कितः ॥
अनुलोमं तु कञ्जाक्षि ! मनुष्यासु दिवौकसाम् ।
नराणां देवकानां तु प्रतिळोमो हि सङ्गमः ॥
जानीहि मामनागस्कं तेन पङ्कज गन्धिनि ! ।
तस्मात्ते जायतां पुत्रो मद्वीर्यं न वृथा भवेत् ॥
श्रीमान् धीमान् महोत्साहो न मेवाग् जायते मृषा ।
इत्येवं वादिनं क्रुद्धा मम माता यशस्विनी ॥
प्राह संत्यज्य सन्तप्ता पातिव्रत्यं सुदुर्लभम् ।
निःसेतोर्भिन्नवृत्तस्य पापस्योन्मार्गवर्तिनः ॥
क्रूरस्ते तनयो भूयात् साहसादिगुणोऽगुणः ।
नानुग्राह्यो देवतानां द्विजानां च तपस्विनाम् ॥
इत्थं वदन्त्यां तस्यां स क्रुद्धायां शापशङ्कितः ।
तापकानां भवेच्छत्रुरित्युक्त्वान्तरधीयत ॥
गते तस्मिन् गृहोद्यानान्माता मम यशस्विनी ।
केनाप्यज्ञातवृत्तान्ता गृहं नेवाभ्यपद्यत ॥
ततः सा गर्भिणी काले कालेनैव सुषाव माम् ।
इति मे नारदः प्राह कदाचिद्भगवानृषिः ॥
ततः प्रभृत्यहं द्वेष्मि तानलान् बन्धुदुर्जनान् ।
यूयमत्र प्रमाणं हि द्विषन्ते तेऽपि मां सदा ॥
उग्रसेनं च दुर्बुद्धिं देवकं च दुराशयम् ।
वसुदेवं च कितवमन्यांश्च तदुपाश्रयान् ॥
हत्वा न जायते दोषो मम गन्धर्वजन्मनः ।
तेनादेक्ष्यामि परुषं हन्येतामिति तावहम् ॥
ताभ्यां हताभ्यां बालाभ्यां कुञ्जरेण बलीयसा ।
कृत्वा पारत्रिकीं पूजां यान्तु तत्पदवीमिमे ॥
वसुदेवोग्रसेनौ च तथा तौ नन्ददेवकौ ।
गोपाला यादवाश्चैव ये चान्ये ताननुव्रताः ॥
पश्यन्तु निभृतैर्नैर्हन्यमानौ स्वदारकौ ।
आहूयन्तां जनपदाः पश्यन्तु खरसंयुगम ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

[टीका]

हे महामात्र ! हस्तिपक तस्यैव सम्बोधनं महामते इति इदं वक्ष्यमाणं वचः शृणु कुवळयापीडाख्यो द्विपो गजो रङ्गस्य युद्धस्थानस्य द्वारि संस्थाप्यः कथम्भूतः प्रभिन्ने विकासिताग्रे करे भा कान्तिर्यस्य तन्मुखं यस्य करे आरोपितो ग्राहितो मुद्गरो यस्य सः तेन कुवळयापीडेन तावानकदुन्दुभेः सुतौ तत्रैव द्वार्येव हन्तव्यौ अथ स महामात्रः व्याकुलचित्तः प्राह किमिति पृथ्वीपते- भोजराजस्य कंसस्य तव भगिनीपुत्रौ रामकृष्णौ कथं मया हन्तव्यौ इत्ययोग्यतासूचनाय स्वकीयावित्युक्तिः तेन महामात्रे- णेत्थमुक्तः स कंसो दुर्मतिर्नृपः समुदितान्सर्वान् श्रावयन् पुनराह कंसवचनमेवाह । शृणुध्वमित्यादिना भूतनाथाय मीढुष इत्यन्तेन । एतद्वक्ष्यमाणं वचः शृणुध्वमिति श्रवणाभिमुख्यप्रार्थनाममोदित- माकर्ण्य तत्सर्वं भवन्तो हृदि धारयन्तु इतिश्रुतस्य चित्ते स्थिरी करणप्रार्थना किन्तदित्यपेक्षायां तावदात्मनो बन्धुषु विद्वेषकारण- परमिति हासं प्रतिजानीते । येनेति । येन हेतुनाहं बन्धुषु असु- हृत्त्वं द्वेषमाश्रितस्तेष्वेव चरामि तस्य विद्वेषपूर्वकचरणस्य कारणं ब्रवीमि इति शेषः तत्परमितिहासमाह । मातेत्यादिना महाभागा सुन्दरी भाग्यशालिनी वा मम माता महत्युद्याने वने कदाचिद्विच- रन्ती बभूव कथम्भूते वने मन्देन मारुतेन वीजिते सञ्चलिते प्रोत्फुल्लैरशोकादाभिर्युते भ्रमतां भ्रमराणां संघातः सङ्घो यस्मिन् कूजद्भिः कोकिलैः संकुले व्याप्ते नृत्यतां शिखण्डिनां मयूराणां निवहः सङ्घो यस्मिन् मर्कटानामाटोपेन सम्भ्रमेण सुन्दरे वसन्तकालसहाचरिते रम्ये । सालानां वृक्षाणां मण्डलेन मण्डिते तत्रैवं भूते महोद्याने चरन्ती सुव्रता पतिव्रता ऋतुस्नाता स्वलंकृता च मे माता भर्तारं चिन्तयामास तदैव कश्चिन्नाम्ना द्रुमिल इति प्रसिद्धः गन्धर्वः इतरैरलक्ष्यमाणश्चरन् तां मम मातर- मसहायचारिणीं दृष्ट्वा तस्याश्चिन्तितं विज्ञाय सर्वेषां तत्त्वतो- ऽभिप्रेतमर्थं वेत्तीति तथाभूतः हेतुगर्भमिदं तत्त्वात् विज्ञाय सस्मिते आलापवीक्षिते यस्य तद्वोग्रसेनम् उग्रसेनसदृशं वपुर्बिभ्राणः कामा- र्तस्तां पतिव्रतां कामयानामिच्छानुरूपं वने चरन्तीमाससाद सस्मितालापवीक्षितमिति क्रियाविशेषणं वा सा त्वजानन्त्यभ्येत्य वने तेन सह रेमे ततः सेङ्गितादिभिः कथञ्चित्पत्युरन्यं विदित्वा सती पातिव्रता हेतुगर्भमिदम् अतो नितान्तोऽपारः खेदो यस्याः आविले व्याकुले लोचने आशयो मनश्च यस्याः तथाभूता प्राह किमिति हे कितव ! धूर्त येन दुरात्मना त्वयेत्थमार्यगर्हितं निन्दितं कृतं स त्वं क इति इत्थं ब्रुवन्तीं तां शनैः परिसान्त्वयन् स दीर्घ- बाहुर्द्रुमिलः प्राह किन्तदाह । वयमिति । वयं तावद्गन्धर्वदेहजा गन्धर्वाः गीर्वाणैर्देवैस्तुल्या अमरवल्लभस्येन्द्रस्यानुचराश्च तुल्या- मरेत्यत्र सन्धिरार्षः कर्मधारयो वा हे भद्रे ! वयं भवादृशानां मनु- जासक्ताशनानां मनुजोपभोग्यानां मानुषीणामिति यावत् नच सुलभाः किन्तु दुर्लभा वयमित्यर्थः । तत्र हेतुमाह । जनुरिति जनुर्विनाशौ जन्ममरणे आदी येषां तानाधिर्मनःपीडा इदं व्या- धीनामुपलक्षणं तान् भजन्तीति तथा तेषां नृणां तद्विपरीतानां सुराणाञ्च महत्तारतम्यमास्ति तस्माद्वयं दुर्लभा इत्यर्थः । इत्थं ब्रुवन्तं द्रुमिलं प्रति सा क्रोधादाकुलानीन्द्रियाणि यस्याः सा पुनराह किमिति इत्थं दुष्टचेष्टितं कृत्वा भूयः किमर्थं मां सान्त्वयसे इमान् दशपुण्यपापसाक्षिणः अतिक्रम्यावधीर्य तिर- स्कृत्य च येन त्वयेत्थमहं मलिनीकृता निशाश्चन्द्रः यथा मदान्धेन गजेन्द्रेण पद्मिनी तद्वत्सरस्तनुमध्यस्था निर्मलाचाहं विशृ- ङ्खलेन लोकवेदमर्यादाविलङ्घिना येन त्वया मलिनीकृता स त्वं मां मलिनीकृता हे अमराधम ! किमिति सान्त्वयसे इत्थं

महामात्र ! त्वया भद्र रङ्गद्वार्युपनीयताम् ।
द्विपः कुवलयापीडो जहि तेन ममाहितौ ॥ २५ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

[टीका]

भवतीं तां स पुनः शापशङ्कितः प्रोवाच तदेवाह । अनुलोम इति । हे सरोजाक्षि ! मनुष्याणां दिवौकसां च सङ्गमोऽनुलोमः क्रमप्राप्तः न्याय्य एवेति भावः । देवकान्तासु नराणान्तु सङ्गमः प्रतिलोमोऽन्याय्य इति जानीहि तेन कारणेन हे पङ्कजगन्धिनि नाहमपराधकृत् किञ्च तस्मादनुलोमात्संगमाच्छ्रीमान्धीमान्महोत्साही च पुत्रो जायतां सर्वथा च मद्वीर्यं न वृथा भवेन्नापि मे वाङ्मृषा भवेत् इत्थं वादिनं प्रति कुब्जा मम माता सुदुर्लभं पातिव्रत्यं सन्त्यज्यात एव सन्तप्ता तमाह । तदेवाह निःसेतोरिति । मर्यादातिलङ्घिनः भिन्नं निरस्तं वृत्तं स्वाचारो येन तस्य पापात्मनः लोकवेदप्रतिषिद्धाचारवर्तिनस्तव जनिष्यमाणः तनयः क्रौर्यादिगुणको भूयात् अगुणः अक्रोधाद्यात्मगुणरहितः देवतानां तपस्विनां द्विजानां च निग्राह्यः इतीत्थं तस्यां मन्मातरि ब्रुवत्यां क्रुद्धायां च सत्यां स द्रुमिलः शापशङ्कितः मह्यमियं शपेतेति शङ्कितस्तर्हि तावकानां त्वद्बन्धूनामेव शत्रुर्भवेदित्युक्त्वान्तर्हितवान् तस्मिन् द्रुमिले तस्मान्महोद्यानाद्गते सति मम माता उद्याने च केनाप्यविज्ञातः स वृत्तान्तो यस्यास्तथाभूता ऽभ्यपद्यत गृहमिति शेषः । ततः सा गर्भं धृत्वा प्रसवकालेनैव सुषाव प्रसूतवती कथमयं वृत्तान्तस्त्वया विज्ञात इत्यत्राह । इतीति । सदा नारद आह तत आरभ्याहं बन्धुषु तांस्तान् दुर्जनान्मम प्रतिकूलान् द्वेष्मि एतेऽपि मां सदा द्विषन्ति तत्र यूयं प्रमाणं खलु भवन्तो जानन्ति खल्वित्यर्थः अत उग्रसेनादीन् हत्वा वर्तमानस्यापि मम दोषो न जायते तत्र हेतुर्गन्धर्वजन्मन इति । गन्धर्वान्नतूग्रसेनाज्जन्मोत्पत्तिर्यस्य तस्य ममेति यतो न दोषस्तेन कारणेनाहमादेक्ष्याम्याज्ञापयामि किमिति तौ रामकृष्णौ पुरुषं यथा तथा हन्येतामिति तावद्बलीयसा कुञ्जरेण कुवलयापीडेन हताभ्यां बालाभ्यां रामकृष्णाभ्यां पूजोपकरणभूताभ्यां पारत्रिकीं परलोकस्य वैवस्वताद्युद्देश्यकपूजां कृत्वा इमे वसुदेवादयोऽपि तयोः पदवीं यान्तु ततस्तावल्लोकान्तरप्राप्तिरेव वसुदेवादिभिः परत्र कर्तव्या पूजेति वा भोः अतो वसुदेवादयस्तदनुव्रताश्च सर्वे हन्यमानौ दारकौ बालकौ वारिभृतैः शोकाश्रुजलपूर्णनेत्रैरित्यर्थः । पश्यन्तु जानपदा देशवासिन आहूयन्तां किमर्थं मम पौरुषं पश्यन्तु ।

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

[टीका]

हे महामात्र ! हस्तिप कुवलयं भूमण्डलमापीडयतीति कुवलयं कैरवमापीडे शेखरे यस्य स तथेति प्रभिन्नकरटामुखः मदस्राविगण्डमुखः ॥

मुद्गरो लोहदण्डः ॥

जगतीपतेः राजप्रधानलोकभर्तुः जगतीराजप्रधानेऽपीति हलधुधः ॥

सालानां सर्जानां मण्डले समूहेनालंकृते ॥

नाम प्रसिद्धः ॥

सर्वेषां सत्त्वानां प्राणिनां आशयार्थम् अभिप्रेतार्थं वेत्तीति सर्वसत्त्वाशयार्थवित् ॥

नितान्तखेदेन अतिमात्रव्यथया आविलौ संकुलौ लोचनाशयौ यस्याः सा तथा ॥

गीर्वाणतुल्यश्चामरवल्लभानुगाश्च अमरवल्लभ इन्द्रः ॥

जरा च विनाशश्च जराविनाशौ तौ आदी येषाम् अखिलानामाधीनां ते जराविनाशाद्यखिलाधयः तान् भजितुं शीलमेषामस्तीति जराविनाशाद्यखिलाधिभागिनः तेषां महान्तरं विशेषः ॥

अस्तु विशेषस्ततः किं दोषः स्यादितिधिया घक्ति इतीति ॥

ननु कथमेतद्दुष्टचेष्टितं किमप्यतिक्रम्याकरणात्प्रोष्यत्वादिति तत्राह । इमानिति । अवधार्य अवज्ञाय ॥

मलिनत्वं सदृष्टान्तमाह । गजेनेति । अमरैरधमः गर्हितः अधमो गर्हितन्यूनाविति च देवयोनिषु नीच इति वा ॥

मया कृतस्य कर्मणः सावद्यत्वे [illegible] पातकं न स्याद्देवयोनित्वेन मम त्वत्सङ्गमोऽनुकूल एव विहितत्वादिति छलाभिसन्धिराह । इतीति । दिवौकसां देवानां मनुष्यासु स्त्रीषु सङ्गमो ऽनुलोमोऽनुकूलः ॥

मनुष्याणां देवस्त्रीषु समः प्रतिलोमो विरुद्धः शन्तन्वादीनां गङ्गादिषु सङ्गमो दृष्टचरोऽतः कथमेतदिति । मन्दाशङ्कां पूर्वाऽवस्थामपेक्ष्य दोषाशङ्का नास्तीति हि शब्देन परिहरति ॥

निस्सेतोरित्यस्य विवरणं भिन्नवृत्तस्येति वृत्तं चरितम् अस्य विवरणम् उन्मार्गवर्तिन इति निर्दयः निर्गता करुणा यस्मात्स तथा अघृणः अकृत्यजुगुप्सारहितः घृणा जुगुप्सा कृपयोरिति च दयदान गतिशोषणादिष्विति धातोः यजनादिधर्मशून्यः घृणा कृपा तया रहितः ॥

तावकानां देवानामिति शेषः ॥

बन्धुषु दुर्जनान् बंधुभूतान् दुर्जनान्वा ॥

के ते इति तत्राह । उग्रसेनमिति ॥

कुतः पितृहत्यादिदोषो नास्तीति तत्राह । ममेति ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अहितौ शत्रू ॥ २५ ॥

आरभ्यतां धनुर्यागश्चतुर्दश्यां यथाविधि ।
विशसन्तु पशून्मेध्यान्भूतराजाय मीढुषे ॥ २६ ॥
इत्याज्ञाप्यार्थतन्त्रज्ञ आहूय यदुपुङ्गवम् ।
गृहीत्वा पाणिना पाणिं ततोऽक्रूरमुवाच ह ॥ २७ ॥
भो भो दानपते ! मह्यं क्रियतां मैत्रमादृतः ।
नान्यस्त्वत्तो हिततमो विद्यते भोजवृष्णिषु ॥ २८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

मीढुषे वरदाय ॥ २६ ॥

अर्थतन्त्रज्ञो ऽर्थसिद्धान्तमेव जानातीति ॥ २७ ॥

हे दानपते ! अक्रूर मैत्रं मित्रकृत्यं त्वया क्रियतां त्वत्तोऽन्य आदृतः आदरी हिततमश्च न विद्यत इति ॥ २८—३० ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

अहो किम्वा मल्लानां प्रियतमानां श्रमोत्पादनेन मत्सहस्तिनैव सुखं तत् साध्यमिति वहिर्व्यञ्जयन्नन्तस्तु विश्यदेवाह । महेति । भद्र ! हे चतुरेति प्रोत्साहयति एतदर्थमेवास्मिन् स्वयमनेन श्रीनारदाच्छ्रुतमात्मजन्म सौभपति द्रुमिलाख्यदानवादुग्रसेनस्य रूपधरात् तत् पत्न्यां स्वदुर्जन्म यथा वृत्तं तथा कथितं तद्विशेषः श्रीहरिवंशे वर्त्तत एव । रङ्गस्य द्वारुप समीपे नीयतां प्रायो राजवाहनहस्तिनो द्वार्येव स्थापनात्तेः सङ्कटस्थानत्वादिति तु गूढो दुष्टभावः । वाम्देवीमते जहीति पूर्ववत् ॥ २५ ॥

न केवलं लौकिक एवोपायः कर्त्तव्यः । किन्तु दैवोऽपि क्रियतां येन तन्मूलकोत्सवे मल्लक्रीडादर्शनव्याजेन तावप्यानेयौ स्यातामित्याशयेनाह । आरभ्यतामिति । भूतराजाय भूतेश्वरसंज्ञाय मथुरापालाय तस्य धनुषोऽपि दैवताय श्रीरुद्राय मीढुषे । मेहति सिञ्चति वरदानेन तर्पयतीति तस्मै । इयमपि श्लेषोक्तिरेव ॥ २६ ॥

अर्थो द्वितीयपुरुषार्थः । तत्र तन्त्रं सिद्धान्तः । किम्वा तस्य शास्त्रमेव नतु धर्मादिशास्त्रं जानातीति तथा सः । यदुपुङ्गवमिति सर्वेषामेव यदूनामयमास्थास्पदं ततोऽस्यैवात्र योग्यता नतु केवलमदीयानामिति तद्विचाराभिप्रायेणोक्तम् । गृहीत्वेति स्नेहप्रदर्शनार्थम् अवश्यमात्मोक्तप्रतिपालनार्थञ्च अत एव तत्र तस्मिन्नेव निजपरिवारगोष्ठीमध्ये तत इति पाठे स एवार्थः ह स्फुटम् ॥ २७ ॥

भो भो इत्यादरे वीप्सा दानपते ! हे वदान्यवरेत्यर्थः । अतो मदर्थितमपि त्वयावश्यं सम्पाद्यमिति भावः । मदर्थं मित्रोचितकृत्यं क्रियताम् । ननु भोजराज ! कुतो मामेव प्रेरयसि सर्वे यादवास्तवाज्ञाकारिणस्तत्राह । आदृत इत्यादिना ॥ २८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

हे महामात्र ! हे भद्र कुवलयापीडाख्यो गजो रङ्गद्वार्युपनीयतां प्राप्यतां तेन कुवलयापीडेन मम शत्रू जहि घातय ॥ २५ ॥

चतुर्दश्यां यथाविधि धनुर्याग आरभ्यतां मीढुषे इष्टवर्षिणे भूतराजाय रुद्राय मेध्यान्पशून् विशसन्तु ॥ २६ ॥

इत्थमाज्ञाप्यार्थतन्त्रज्ञः शास्त्रसिद्धान्ताभिज्ञः कंसः यदुश्रेष्ठमक्रूरमाहूय तस्य पाणिं स्वपाणिना गृहीत्वा अक्रूरं यथा तथोवाच ॥ २७ ॥

तदेवाह । भो भो इति । आदरात्संबोधनद्वयं दानपते महोदार मह्यं किञ्चित्त्वया मैत्रं मित्रकृत्यं क्रियतां यतस्त्वत्तोऽन्यो हिततमो भोजेषु वृष्णिषु च न विद्यते ॥ २८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

विशसन्तु सूदयन्तु भूतराजाय भैरवविग्रहधारिणे रुद्राय मीढुषे समर्थाय अभीष्टदात्रे वा अर्थतत्त्वज्ञं प्रयोजनयाथार्थ्यवेत्तारं यदुपुङ्गवं यदुश्रेष्ठम् ॥ २५—२७ ॥

दानशब्देन वदान्या लक्ष्यन्ते तेषां पते अक्रूर मैत्रं मित्रकर्म ॥ २८ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

भगवदर्थमेवैतज्जातं तत्रापि सन्देहे उपायान्तरमाह । महामात्रेति । महामात्रो महाहस्तिपः कुवलयापीडस्य पट्टहस्तिनो यन्ता तस्य सम्बोधनं प्रोत्साहार्थं त्वया कुवलयापीडः रङ्गद्वारि नेतव्यः न त्वन्येन नाप्यन्यः भद्रेति संबोधनं तव कापि चिन्ता न भविष्यतीति ज्ञापनार्थं सरस्वतीसंवादात् अभद्रेति ज्ञानं कुः पृथिवी तस्याः वलयस्य आपीडं मुकुटरूपं ततः किमत आह मम अहितौ कामक्रोधौ जहीति न त्वन्यः अहितः ॥ २५ ॥

एवं लौकिकमुपायमुक्त्वा अलौकिकमाह । आरभ्यतामिति । अयं विष्णवंश इति तस्य प्रतीतिः अतः शिव आराध्यः स एव तत्प्रतिफलं भवितुमर्हतीति तत्रापि तस्य यामा बहवः तन्मध्ये युद्धजयो ऽभिकाङ्क्षित इति धनुर्याग एव कर्त्तव्यः यत्र धनुषि शिवः पूज्यते स शैवतन्त्रे धनुर्यागः प्रसिद्धः चतुर्दश्यां स कर्त्तव्यः यतश्चतुर्दशी शिवतिथिः यथाविधीति अधिवासनादिपुरःसरं तत्तन्त्रोक्तन्यायेन हिंसाप्रचुरश्च यागः कर्तव्यः

अतस्त्वामाश्रितः सौम्य ! कार्यगौरवसाधनम् ।
यथेन्द्रो विष्णुमाश्रित्य स्वार्थमध्यगमद्विभुः ॥ २९ ॥
गच्छ नन्दव्रजं तत्र सुतावानकदुन्दुभेः ।
आसाते ताविहानेन रथेनानय माचिरम् ॥ ३० ॥
निसृष्टः किल मे मृत्युर्देवैर्वैकुण्ठसंश्रयैः ।
तावानय समं गोपैर्नन्दाद्यैः साभ्युपायनैः ॥ ३१ ॥
घातयिष्य इहानीतौ कालकल्पेन हस्तिना ।
यदि मुक्तौ ततो मल्लैर्घातये वैद्युतोपमैः ॥ ३२ ॥

श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी ।

शैवतन्त्रे शिवभेदा बहवः सन्तीति तदर्थं हिंसाप्रचुरश्चेत् क्रियते तदा तादृश एव देवो भवतीति तदाह । भूतराजायेति । मीढुषे कामपूरकाय सर्वथा फलदात्रे ॥ २६ ॥

एवं दृष्टादृष्टोपायमुक्त्वा समानयनोत्तरकालमेतदिति समानयनार्थमक्रूरं प्रेषयितुं तमाकारितवानित्याह । इत्याज्ञाप्येति । अर्थतन्त्रज्ञः कार्यपरिकराभिज्ञः अक्रूरं विना नान्येन कार्यं सिध्यतीति ज्ञात्वा यदुपुङ्गवं यादवश्रेष्ठं गृहादाहूय पाणिना तस्य पाणिं गृहीत्वा सन्माननार्थं परिगृह्य ततः प्रीतं ज्ञात्वा स्वभावतोऽप्यक्रूरमुवाच इत्याश्चर्यं नहि भगवद्भक्त एवं कार्यार्थं प्रेषयितुमुचित इति ॥ २७ ॥

भोभो इति संबोधने द्विरुक्तिरत्यादरसूचिका दानपत इति तद्धर्मकीर्त्तनं स हि दानमात्रस्वाधिष्ठाता द्वादशसंवत्सरपर्यन्तं प्रत्यहं गोदाने क्रियमाणे जातः तन्मातापि तथा गान्दिनी यथा आर्त्तेभ्योऽन्नदानं तथा मह्यमार्त्ताय भगवान् देय इत्यर्थः । मह्यं मैत्रं मित्रकार्यं क्रियताम् अनेन त्वयि मैत्री स्थाप्यते यथा मित्रस्योचितं तथा कुर्वित्यर्थः । तत्राप्यादृतः आदरयुक्तः कर्त्तरि क्तः मया वा आदृतः आदृतो यतः एतादृशं कर्म अन्येन कारणीयमित्याशङ्क्याह । नान्य इति । त्वत्तः अन्यः मे हिततमो नास्ति अनुवृत्त्या ज्ञायते भोजाः पितृवंश्याः वृष्णयो यादवाः सामान्यविशेषभावे तदुभयमाह अतः सामान्यतो वा विशेषतो वा नान्यो हिततमो वर्तत इत्यर्थः ॥ २८ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

महामात्र ! हे हस्तिनियन्तः अहितौ शत्रू ॥ २५ ॥

ममाभ्युदयार्थं विशशन्तु छित्वा यच्छन्तु भूतराजाय भूतेश्वराय मीढुषे वरदाय ॥ २६ ॥

अर्थतन्त्रं द्वितीयपुरुषार्थस्यैव सिद्धान्तं नतु धर्ममोक्षयोर्जानातीति सः ॥ २७ ॥

मह्यं मां प्रसादयितुं मैत्रं मित्रकृत्यम् ॥ २८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

हे महामात्र ! हस्तिप अहितौ शत्रू ॥ २५ ॥

मीढुषे वरदाय भूतराजाय रुद्राय ॥ २६ ॥

अर्थतन्त्रज्ञः अर्थशास्त्राभिज्ञः नतु मोक्षशास्त्राभिज्ञः ॥ २७ ॥

भोभो दानपते ! यदान्य आदृतः भोजेषु वृष्णिषु च त्वत्तोऽन्यो न विद्यते उभयकुलप्रियोऽसीत्यर्थः । अतो महागुणो भवान्मम हिततमः अतः मह्यं किञ्चिन्मैत्रं मित्रकृत्यं त्वया क्रियतामित्यन्वयः ॥ २८ ॥

भाषा टीका ।

हे भद्र महामात्र ! तुम कुवलयापीडनामा हाथी को रंगभूमी के दरवाजे में लेआना तिससे मेरे शत्रु दोनों को मारना ॥ २५ ॥

चतुर्दशी के दिन विधि पूर्वक धनुर्याग का आरम्भ करो सब मनोरथों के देनेवाले भूतराज महादेव के अर्थ पशुओं को मारें पूजकलोग ॥ २६ ॥

सब नीतिशास्त्र के जानने वाले कंसने इस प्रकार सबको आज्ञा देकर यादवों में श्रेष्ठ अक्रूरजी को बुलाकर हाथ से हाथ पकड कर इस वचन को कहा ॥ २७ ॥

हे दानपति ! अक्रूरजी मेरे एक मित्रताका काम कीजिये आदर में आपसे अधिक मेरा भोज तथा वृष्णि इन मे और कोइ भी प्रिय नहीं है ॥ २८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तौ मे मृत्युर्निसृष्टः स्रष्टः वैकुण्ठसंश्रयैर्विष्णु संश्रयैर्देवैः ॥ ३१ ॥

किं ततस्तत्राह । घातयिष्य इति । कालकल्पेन मृत्युतुल्येन वैद्युतोपमैरशनितुल्यैः ॥ ३२—३४ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

हे सौम्येति । प्रोत्साहनार्थं निजमित्रत्वेन सहजशान्तत्वेन वा आश्रितः शरणं गतोऽहम् । किमर्थं कार्यस्य गौरवं गुरुत्वं

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

तस्य साधनं गुरुप्रयोजनं साधयितुमित्यर्थः । ननु त्वमेव स्वयं सर्वार्थे शक्तः किं मयेति चेत् सत्यं समर्थस्यापि साहाय्येनैव कार्यं किल संसिध्येदिति दृष्टान्तेनाह । यथेति । विभुः समर्थोऽपि इति द्वेषेणेन्द्रादपि विष्णोर्न्यूनत्वं सूचितम् ॥ २९ ॥

एवं प्रोत्साह्य कार्यमाह । गच्छेति । तत्रैवासाते ननु प्रपलाय्यान्यत्र गताविति वक्तव्यमिति भावः । अनेनाधुना सुतिमाय बहुधालङ्कृत्यावस्थापितेनेत्यर्थः । इति निज-यानदानेनानुग्रहविशेषो दर्शितः । सुन्दराभिनव सुपरिस्कृतरथं दृष्ट्वा बालकौ तौ सुखं स्वयमेवारोक्ष्येते इति भावः । वस्तुतस्तु श्रीभगवदिच्छया पुरप्रवेशसामग्री सा ज्ञेया माचिरम् अचिरादेव ॥ ३० ॥

किमर्थं तदाह । निसृष्ट इति द्वाभ्याम् । तयोरेकतरादिति शेषः । वैकुण्ठसंश्रयैरिति । तैर्निसृष्टेन तेन मम किं स्यादिति भावः । तावानयेति एकप्रयत्नत्वाद्द्वयोरिति भावः । अक्रूरप्रवर्त्तनार्थं तयोर्विष्णुत्वं त्वपन्हुतम् । नन्दाद्यैः सममिति अन्यथा शङ्कया तौ नागमिष्येते इति भावः । तेषामप्यनिष्टमत्र करिष्यामीति गूढो दुष्टभावः । साभ्युपायनैर्घृतदध्यादिसहितैः एतत्र धनुर्मखसत्तावोधनार्थम् ॥ ३१ ॥

तत्र किमर्थं तदाह । घातयिष्ये इति । ततस्तदा । अन्यत्तैः । वासुदेवमिति तु यदीह मधुपुर्यामातौ भवतस्तदा स्वपराजयेन तयोर्द्वारान्तः प्रवेशात्साहवर्द्धनत्वाद्धस्तिनैव द्वारभूतेन घातयिष्ये रङ्गान्तः प्रापयिष्यामि । अतः कालकल्पेन मल्लानां मम चेत्यर्थात् । ततस्तदनन्तरं मुक्तौ स्वमुक्तिनिमित्तं पूर्ववन्मल्लैरेव द्वारभूतैर्घातये स्वसमीपमपि प्रापयिष्यामि अतो मम मुक्तिहेतुत्वात् वैद्युतोपमैः क्रममुक्तिमार्गेनेव भगवत्सम्बन्धि विष्णुरूपोपमैरिति ॥ ३२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अतस्त्वामेव हे सौम्याहमाश्रितः कथंभूतं गुरुतरकार्यसाधकं यथा विष्णुमाश्रित्येन्द्रः स्वार्थं स्वाभीष्टमध्यगमत्प्राप्तवांस्तथाहमपि त्वामाश्रितः प्राप्स्यामीति ॥ २९ ॥

अतस्त्वं नन्दव्रजं गच्छ किमर्थं तत्र नन्दव्रजे वसुदेवस्य पुत्रावासाते तावनेन रथेनानय प्रापयाचिरं विलम्बं माकार्षीः ॥ ३० ॥

किमर्थं तत्राह । निसृष्टाविति । संश्रीयत इति संश्रयः वैकुण्ठो विष्णुः संश्रयो येषां तैर्देवैस्तौ मम मृत्यू निसृष्टौ कल्पितौ खल्वतः साभ्युपायनैर्नन्दादिभिर्गोपैः सह ताविहानयानीय दर्शयेत्यर्थः ॥ ३१ ॥

आनीतावेताविनेन मृत्युतुल्येन हस्तिना घातयिष्ये यदि ततो हस्तिना मुक्तौ भविष्यतस्तदाशनितुल्यैर्मल्लैश्चाणूरादिभिर्घातये ॥ ३२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

सौम्य । सुन्दर सौम्यो विप्रे सोमजीवे सुन्दरे सोमदैवते इति च कार्यगौरवसाधनं महतः कार्यस्य साधनम् समर्थनम् ॥ २९-३० ॥

निसृष्टः कल्पतः अभ्युपायनैः सहितैः ॥ ३१ ॥

वैद्युतो विद्युतो निर्गतोऽग्निः तस्योपमा येषां तैः ॥ ३२-३३ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

ततः किमत आह । अतस्त्वामाश्रित इति । एतावत् कालं मां त्वमाश्रितः अधुनातु त्वामहमाश्रितः सौम्येति संबोधनम् आश्रययोग्यार्थं कार्यस्य महद्गौरवं तस्य साधनं प्रति तत्साधयितुं साधने वा साधनार्थं ननु विधेयस्याश्रयः कथं युक्त इति चेत् तत्राह । यथेन्द्र इति । इन्द्रो ज्येष्ठः विष्णुरुपेन्द्रः कनिष्ठः तथापि दैत्यैस्त्रैलोक्ये हृते तल्लिब्ध्यर्थं विष्णुमाश्रित्य कार्यं साधितवान् एवमहमपि साधयितुमुद्युक्तः स्वार्थं गमिष्यामि विभुरुपेन्द्रः अतः कार्यार्थं समाश्रयणे न निन्दितमिति भावः ॥ २९ ॥

तत्कार्यमाह । गच्छ नन्दव्रजमिति । ततः तत्रानकदुन्दुभेः जन्मकालेऽपि भगवदधिष्ठानत्वेन प्रसिद्धस्य सुतौ रामकृष्णौ तत्र व्रजे आसाते ततः किमत आह ताविहानेन रथेन आनय चिरं मा विलम्बो न कर्त्तव्यः ॥ ३० ॥

प्रयोजनाकाङ्क्षायामाह । निसृष्ट इति । किलेति प्रसिद्ध्या एवं न्नारदेणोपनम् उभावेव मृत्यू देवैर्निसृष्टं इत्यनुल्लङ्घ्यः ननु दैत्यानां देवा वध्या इति किन्तैरितिचेत्तत्राह । वैकुण्ठसंश्रयैः वैकुण्ठो विष्णुः स एव सम्यगाश्रयो येषाम् अतो भगवदाश्रयेण देवैः कियत इति नान्यथा सो ऽर्थः सेत्स्यति पूर्वं रथेनानयेत्युक्तत्वात् मृत्युत्वेन निर्देशे नानेष्यतीति पुनराह । तावानयेति । विशेषमाह समं गोपैरिति । सहैव कदाचिन्नायास्यतीति बालकत्वान्न नायास्यतीति पित्रा सखिभिः सहानयेति नन्दाद्यैरित्युक्तं व्याजार्थमाह । साभ्युपायनैरिति । अभ्युपायनं गृहीत्वा समागन्तव्यमिति वक्तव्यम् ॥ ३१ ॥

ततः स्वस्य भगवते निर्दोषार्थमन्तर्गतं भावमाह । इहामिताविति । अयं कुवलयापीडः कालादीषन्न्यूनः अतः कालकल्पः योऽर्थः कालेन साधनीयः सोऽनेनेति कदाचित् कुवलयापीडो मत्तः अनवहितश्चेत् ततोऽन्तः प्रविष्टो भगवान् त्वामेव मारयिष्यतीत्याशङ्कायामाह । यदि मुक्ताविति । ततो यदि मुक्तौ तदा मल्लाः सन्ति ते विद्युदग्नितुल्याः न तेषां प्रतीकारः कश्चन तैः कार्यं साधयिष्यातीति भावः ॥ ३२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

कार्य्यं गौरवेण गुरुतया साधयतीति तं ममात्र बन्धुषु मध्ये त्वत्तोऽन्यो नैपुण्येन कार्य्यसाधकः कोऽपि नास्तीत्यर्थः ॥ २९ ।

अमेनेति तर्जन्या कमपि नवीनं विचित्रं रथं दर्शयति । बालकत्वान्नवीनं चित्रमालोक्य स्वयमेवायातुं शीघ्रमेवं रथ आरोक्ष्यते इति भावः । कंसभुक्तो रथो भगवदारोहणानर्ह इत्यन्येन तत्र गत इति ज्ञेयम् ॥ ३० ॥

तयोर्निहतयोस्तप्तान्वसुदेवपुरोगमान् ।
तद्बन्धून्निहनिष्यामि वृष्णिभोजदशार्हकान् ॥ ३३ ॥
उग्रसेनञ्च पितरं स्थविरं राज्यकामुकम् ।
तद्भ्रातरं देवकं च ये चान्ये विद्विषो मम ॥ ३४ ॥
ततश्चैषा मही मित्र ! भवित्री नष्टकण्टका ।
जरासंधो मम गुरुर्द्विविदो दयितः सखा ॥ ३५ ॥
शम्बरो नरको बाणो मय्येव कृतसौहृदाः ।
तैरहं सुरपक्षीयान् हत्वा भोक्ष्ये महीं नृपान् ॥ ३६ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

तौ मे मृत्युर्नितरां सृष्टः वैकुण्ठो विष्णुस्तदाश्रितः ॥ ३१ ॥ वैद्युतोपमैरशनितुल्यैः ॥ ३२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

यतो भवान्महागुणो ऽतः कार्य्यगौरवसाधनं गुरुतरकार्यसाधकं त्वामहमाश्रितोऽस्मि ॥ २९ ॥ ३० ॥

वैकुण्ठो विष्णुस्तत्संश्रयैर्देवैर्यो मे मृत्युर्नितरां सृष्टः ययोरेकतरः मे मृत्युः कल्पित इत्यर्थः । ततो गोपैः समं सह आनयेत्यन्वयः ॥ ३१ ॥

कालकल्पेन वैद्युतोपमैः अशनितुल्यैः ॥ ३२-३४ ॥

भाषा टीका ।

इससे हे सौम्य ! कार्य गौरव के साधन के लिये हमने तुमारा आश्रय लिया है जैसे इन्द्र विभुने विष्णु भगवान् का आश्रय लेकर सब स्वार्थ का साधन किया है ॥ २९ ॥

आप अब नन्दके व्रजको जाओ वहां पर वसुदेव के दोनों पुत्र रहते हैं तिन दोनों को इस रथके ऊपर बैठाकर यहां ले आओ विलंब मत करो ॥ ३० ॥

विष्णुको आश्रय करने वाले देवतों ने उनहीं से मेरा मृत्यु निश्चय किया है उन दोनों को भेट के सहित नन्दादिगोपों के साथ इहां ले आओ ॥ ३१ ॥

इहां आने पर उन दोनों को काल सरीके हस्ति से मरवा डालेंगे यदि उससे बच जांयगे तो वज्र सरीके तेज वाले मल्लों से मरवावेंगे ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

नष्टकण्टका नष्टशत्रुः ननु कतिपयाक्षुद्रवधेन नष्टकण्टका कथं स्यादिति तत्राह । जरासंध इति ॥ ३५—३६ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

ननु तद्बन्धुभ्यः स्वानिष्टाच्छङ्के तत्राह । तयोरिति द्वाभ्यां, तद्बन्धून् तत्सुहृदो वसुदेवादीनपि हनिष्यामि । ननु कथं तयोः पूर्वमेव न हनिष्यसि चेत्तत्राह । तयो र्निहतयोः सतोरनुतप्तानेव सतः इति क्रोधातिशयो दर्शितः । वाग्देवीमते तु मुक्तौ तयोः प्राप्तयोः सतोस्तद्बन्धूनपि प्राप्स्यामि अविभिन्नाराऽदिति भावः ३३ ॥

अन्ये च तत् पक्षपातिनः ॥ ३४ ॥

तत इत्यर्द्धकं नन्वहमपि भोजेषु किं तद्बन्धुः नेत्याह । हे मित्रेति त्वन्तु मम हितकारी अतस्त्वां प्रति पृथ्वीमपि विभजेयमिति भावः । जरेति सार्द्धकं सुरपक्षीयान् नृपान् कौरवादीन् वाग्देवीमते तु महीं भोक्ष्ये इति मुक्तौ सर्वानन्दान्तर्भावात् ॥ ३५ ॥ ३६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ततस्तयोर्निमित्तयोस्तप्तान् दुःखितान्वसुदेवप्रभृतीन् तद्बन्धूंश्च वृष्ण्यादीन् हनिष्ये ॥ ३३ ॥

ततोऽथातः स्थविरमप्यधुनापि राज्यमेव कामयमानं मत्पितरमुग्रसेनं तस्य भ्रातरं देवकञ्च तथान्येच मम विद्विषस्तान्सर्वान्हनिष्यामीति ॥ ३४ ॥

ततश्चैवं सति हे मित्र ! इयं पृथ्वी नष्टकण्टका नष्टशत्रुर्भविष्यति । कुतस्त्वं सर्वान्हन्तुं प्रभुस्तत्राह । जरासन्ध इति । द्विविदो वानरः प्रियः सखा ॥ ३५ ॥

शम्बरादयोऽसुरा मयैव सहकृतं सौहृदं यैस्तथाभूताः तैर्जरासन्धादिभिः सहितोऽहं सुरपक्षीयान्नृपान्हत्वा महीं भोक्ष्ये अनुभविष्यामि ॥ ३६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

मत्पितर एव पत इति शेषः ॥ ३४ ॥

मे मित्र भवित्री भविष्यति ननु त्वत्तोऽधिका जरासन्धादयः कण्टकाः सन्ति तत्राह । जरासन्ध । इति ॥ ३५ ॥ ३६ ॥

एतज्ज्ञात्वानय क्षिप्रं रामकृष्णाविहार्भकौ ।
धनुर्मखनिरीक्षार्थं द्रष्टुं यदुपुरश्रियम् ॥ ३७ ॥

॥ अक्रूर उवाच ॥

राजन् ! मनीषितं सध्र्यक् तव स्वावद्यमार्जनम् ।
सिद्ध्यसिद्ध्योः समं कुर्याद्दैवं हि फलसाधनम् ॥ ३८ ॥
मनोरथान्करोत्युच्चैर्जनो दैवहतानपि ।
युज्यते हर्षशोकाभ्यां तथाप्याज्ञां करोमि ते ॥ ३९ ॥

श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी ।

ततोऽपि यत्कर्त्तव्यं तदाह । तयोरिति । तत्त्वात्तेषां युद्धादौ न सामर्थ्यं वसुदेवः पुरोगमो येषां तद्बन्धून् वृष्णिभोजादयः सर्वे एव गणिताः ॥ ३३ ॥

तत उग्रसेनोऽपि यद्यपि पिता तथापि स दुष्ट इति वक्तुं तस्य दोषमाह । स्थविरं राज्यकामुकमिति । वृद्धोऽपि भूत्वा राज्यं कामयत इति य एव शत्रुषु स्थास्यति स एवापकरिष्यतीति तद्भ्रातरं देवकञ्च मारयिष्यामि किञ्च ये केचन मम विद्विषः बान्धवाः अन्ये च तान् सर्वानेव निहनिष्यामि तेषां हनने हेतुः विद्विषः इति ॥ ३४ ॥

ननु सर्वेषु हतेषु भोगो न भविष्यतीति किं हननेनेति चेत्तत्राह । ततश्चेति । एषा मही नष्टकण्टका भविष्यति ये केचन राजानः भूमौ चरन्ति पथिका इव तत्र ये प्रतिबन्धकाः ते कण्टकाः तेषु गतेषु नष्टकण्टका भवति अनेनास्याभिनिवेशवर्णनेन यदा भगवानस्मै मुक्तिं दास्यति तदास्य मनोरथः कर्त्तव्य इति भक्तहितार्थं निष्कण्टकं कृतवानिति निरूपितम् । अन्यथास्य मनोरथवर्णनं व्यर्थं स्यात् विपरीतोक्तिरिति विपरीता गतिरग्रे वक्तव्या निष्कण्टकभूमौ भोगः सिध्यति सहायाश्च वर्त्तन्त इत्याह । जरासन्धो मम गुरुरिति । गुरुः श्वशुरः हितोपदेष्टा च द्विविदो वानरः स दयितः प्रियः स्वभावतोऽपि सखा च ॥ ३५ ॥

शम्बरादयश्च तथेत्याह । मय्येव नान्यस्मिन् अन्यथा दैत्येष्वपि परस्परविसम्मतौ भोगो न सेत्स्यतीति तदर्थमेवकारः कृतं सौहृदं यैरिति पूर्वमपि तैरुपकारः कृत इति अग्रेऽपि कर्त्तव्य इत्यर्थः । ननु बहवो देवपक्षाः कथन्त्वयैकाकिना निवार्या इत्याशङ्क्याह । तैरहमिति । भोगेऽपि तेषां सहभावः शत्रुनिवारणेऽपि पूर्वं दैत्यानामेव भूमिः राज्यं स्वर्गश्च अतएव पूर्वदेवास्ते ब्राह्मणावस्थिता देवाः पुरोहिता इव पश्चाद्यज्ञादिभिः तान्निवार्य भगवन्तमाराध्य नित्यसृष्टिप्रकारेण वेदं दृष्ट्वा ततो देवा जाता इति कृत्रिमा एव ते न तु सहजा इति अतएव कालः तेषामपि पक्षपातं करोति तथाधुनापि करिष्यतीति तस्य मनोरथः नृपा युधिष्ठिरादयः अतः शान्तमेव विरोधकार्यं सेत्स्यतीति न भयं त्वया कर्त्तव्यम् ॥ ३६ ॥

———

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

निहतयोः सतोः ॥ ३३ ॥

ये चान्ये तांश्च ॥ ३४ ॥

ननु कथं नष्टकण्टका स्याज्जरासन्धादीनां विद्यमानत्वादेव तत्राह । जरेति गुरुः श्वशुरः ॥ ३५ ॥ ३६ ॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

नष्टकण्टका नष्टाहिता भवित्री भविष्यति ननु कुतः सपक्षाः प्रबलास्ते हन्तुं शक्याः अत आह । जरासन्ध इति ॥ ३५—३६ ॥

———

भाषा टीका ।

उन दोनों के चले जाने पर चिन्ता से तपायमान नन्द आदिक उनके बन्धु जो वृष्णि भोजदशार्हक हैं तिनको फिर मारेंगे ॥ ३३ ॥

फिर राज्य के चाहने वाले वृद्ध पिता उग्रसेन को तथा उसके भ्राता देवक को और भी जो हमारे शत्रु हैं तिनको भी मारेंगे ॥ ३४ ॥

तिनके पीछे हे मित्र ! यह सब पृथिवी शत्रु रहित हो जायगी जरासन्ध हमारा श्वसुर है द्विविद वानर है सो हमारा सखा है ॥ ३५ ॥

शंवर नरक वाणासुर सब मेरेही में प्रेम करने वाले हैं इनको लेकर हम देवता पक्ष वाले राजाओं को मारकर इस पृथिवी का भोग करेंगे ॥ ३६ ॥

———

श्रीधरस्वामिकृतभावार्थदीपिका ।

यदुपुरश्रियन्द्रष्टुञ्चेति ॥ ३७ ॥

तत्र स्वमनीषितं विचारितं सध्र्यक् सम्यक् स्वावद्यं मरणं तन्मार्जनम् तथाप्येतावानभिनिवेशो न कार्य इति भविष्यत्सूचनाह । सिद्ध्यसिद्ध्योरिति ॥ ३८ ॥

॥ श्रीशुक उवाच ॥

एवमादिश्य चाक्रूरं मन्त्रिणश्च विसृज्य सः।
प्रविवेश गृहं कंसस्तथाक्रूरः स्वमालयम् ॥ ४० ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे
पूर्वार्धे अक्रूरसंप्रेषणं नाम
षट्त्रिंशोऽध्यायः ॥ ३६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

पुरुषकारस्य व्यभिचारमाह। मनोरथानिति ॥ ३८-४० ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
टीकायां षट्त्रिंशोऽध्यायः ॥ ३६ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी।

अर्भकाविति त्वया प्रतार्य तावानेतुं शक्याविति भावः। तत्प्रकारं शिक्षयति। धनुरिति। वन्येभ्यस्तत्राप्यर्तकेभ्यो यज्ञोत्सवपुरीशोभादर्शनं नितरां रोचेतेति भावः। तथाच श्रीहरिवंशे।—

धान्यश्च नन्दगोपो वै करमादाय वार्षिकम्।
शीघ्रमागच्छ नगरं गोपैः सर्वैः समन्वितः॥
कृष्णसङ्कर्षणौ चैव वसुदेवसुतावुभौ।
द्रष्टुमिच्छति संको वै सभृत्यः सपुरोहितः॥
एतौ युद्धविदौ रङ्गे कालनिर्वाणयोधिनौ।
दृढौ च कृतिनौ चैव शृणोम्यव्याहतोद्यमौ॥
अस्माकमपि मल्लौ द्वौ सज्जौ युद्धकृतोत्सवौ।
ताभ्यां सह नियोत्स्येते तौ युद्धकुशलावुभौ॥
द्रष्टव्यौ च मयावश्यं बालौ तावमरोपमौ।
पितृस्वसुः सुतौ मुख्यौ व्रजवासौ वनेचरौ॥
वक्तव्यश्च व्रजे तस्मिन् समीपे व्रजवासिनाम्।
राजा धनुर्मखं नाम कारयिष्यति वै सुखी॥
सन्निकृष्टे प्रजास्तत्र निवसन्तु यथासुखम्।
जनस्यामन्त्रितस्यार्थे यथा स्यात सर्वमव्ययम्॥
पयसः सर्पिषश्चैव दध्नो दध्युत्तरस्य च।
यथा कामप्रदानाय भोज्याभिश्रयणा चेति ॥ ३७ ॥

तच्छ्रुत्वा स्वीयभगवद्दर्शनतद्द्वारा तन्मारणलक्षणदीर्घ स्वाभीष्टयुगलसिद्धयाशया तत्तदर्थमेव स्वीय तदात्मीयतां प्रख्यापयितुमिच्छया च तदुक्तं श्लाघते राजन्निति द्वयेन। सध्र्यगित्यत्र हेतुः हे राजन्निति। राज्ञस्तव दण्डनीति शास्त्रानुगामित्वादित्यर्थः। ननु धार्मिकोऽयं कथं केवलां दण्डनीतिमनुमोदते तस्मादस्येदं कूटवाक्यमेवेत्याशङ्क्य स्वाभिप्रायं गोपयन् तदनुवादेनापि श्लाघते कुर्यात् विधिलिङ्ग्रा धर्मशास्त्रमतेऽप्येतादृशसङ्कटप्रतीकारादौ प्रयतेत एवेत्यर्थः। तदुपेक्षायामात्महत्यादि पापापत्तेः। किन्तु सिद्ध्यसिद्ध्योः समो हर्षदुःखरहितः एव सन् कुर्यादिति विशेषः समिति पाठे क्रियाविशेषणत्वं भावमिति शेषो वा ॥ ३८ ॥

निवृत्तधर्मपराणामस्माकं तु तदपि न कर्त्तव्यं किन्तु सर्वदैव मयस्य राज्ञस्त्वाज्ञैव क्रियत इति प्रकारान्तरेणापि स्वाभिप्रायं गोपयितुं तस्मिन् स्वभक्तिं दर्शयितुं चाह। मन इति। अपि शब्दात् किमुत दैवोपकृतान् तस्मात् कृतेऽपि साम्यभावने यथावसरं हर्षशोकाभ्यां युज्यते एव नतु निवृत्तिवदधिकृतं सुखमित्यर्थः। यद्यपि एवमथापि ते तवाज्ञां करोमि करवाणीत्यर्थः। भाविसूचना चेयं स्वावद्यमार्जनमसुरत्वखण्डनं मुक्तिप्राप्तेः कुर्यान्द्वानिति शेषः हि यस्माद्दैवं श्रीकृष्णलक्षण ईश्वर एवात्र फलदाता न तत्र भवत स्वाधीनत्वमिति भावः। जनो भवादृशः यद्यप्येवमीश्वर एवात्र स्वयं कर्त्ता न मादृशस्यात्र किञ्चित्कारत्वम् अथापि तवानुकूल्यरूपेण तद्भक्तजनव्यवहारेणैव करोमीति अत्रारिष्टवधानन्तरं कंसस्य यादवान् प्रति सकपटप्रोत्साहनवाक्यं श्रीवसुदेवं प्रति च निन्दनं तथा कंसं प्रति साक्षात्सौर्धिकारः अन्धकस्य च वाक्यजातमिति श्रीहरिवंशमतम् ॥ ३९ ॥

स्वगृहमन्तःपुरं स्वमालयं पुरम् ॥ ४० ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे
श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिण्यां
षट्त्रिंशोऽध्याय ॥३६॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

एतत्सर्वं मम चिकीर्षितं ज्ञात्वा रामकृष्णावर्भकौ इहानय ननु वां हन्तुं कंस आहूतवानित्युक्ते सति तौ पलायेतां तत्राह। धनुरिति। धनुर्मखनिरीक्षणार्थं मधुपुरश्रियश्च द्रष्टुमाहूतवानिति त्वया वाच्यमित्यर्थः ॥ ३७ ॥

इत्थमुक्तः प्राहाक्रूरः। राजन्निति। स्वावद्यं मरणं तस्य मार्जनं परिहार इति यत्तव मनीषितं विचारितं तत्सम्यगेव तथाप्यत्राभिनिवेशो न कार्य इति भविष्यत्सूचयन्नाह। सिद्ध्यसिद्ध्योरिति। हि यस्माद्दैवं फलभावनं फलदमतः सिद्ध्यसिद्ध्योः समः कर्म कुर्यात् ॥ ३८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

पुरुषकारस्य व्यभिचारमाह । मनोरथानिति । दैवहतानुक्रमेंमनोरथान्करोति जनः स्वसुखार्थकर्मणा दुःखेन युज्येत कदाचित्सुखं न तथापरदुःखार्थेन स्वयमेव दुःखेन युज्यते परस्तु सुखेनैवेति यद्यप्येवं तथापि तवाज्ञां करोमि ॥ ३९ ॥

इत्युक्तस्तमक्रूरमामन्त्र्य पृष्ट्वानुज्ञाप्य मन्त्रिणो विसृज्याज्ञाप्य कंसः स्वगृहं प्रविवेश तथाक्रूरश्च स्वगृहं विवेश ॥ ४० ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्

षट्त्रिंशोऽध्यायः ॥ ३६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

आनयने निमित्तमाह । धनुर्यागलक्षणोत्सवार्थम् ॥ ३७ ॥

मनीषितं मनसा कर्तुमिष्टं मरणं ज्ञात्वापि परिहारप्रयत्नो न कृत इति यदत आत्महत्यालक्षणं यदवद्यं तस्य मार्जनं परिहरणं भवति फलनिष्पत्तिमज्ञात्वा, प्रयत्नो व्यर्थ इति न निरूप्य इत्याह । सिद्धीति । फलसिद्धावसिद्धौच हर्षशोकाभ्यां न विषमो भूत्वा कर्म कुर्यादितिविधिशास्त्रं तर्हि फलावाप्तिः किमधीनेति तत्राह । दैवमिति फलभावनं फलकारणम् ॥ ३८ ॥

तर्हीदं नापेक्षितं किमेत्याह । मनोरथानिति । जनेन क्रियमाणं यत्त्वयाप्यनुष्ठेयमिति भावः । यद्यपि फलसिद्धिः हर्यधीना तथापि ॥ ३९—४० ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्

चतुस्त्रिंशोऽध्यायः ॥ ३४ ॥ ३६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे

षट्त्रिंशोऽध्यायः ॥ ३६ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

किन्त्वेतज्ज्ञात्वा क्षिप्रमानय ननु समर्थौ रामकृष्णौ कथं मया आनेतुं शक्याविति चेत्तदाह । अर्भकाविति । बालकौ हि कौतुकार्थं यत्र क्वचनागच्छतः तयोः स्थाने नास्मदभिप्रेतं वक्तव्यं किन्तु धनुर्मखनिरीक्षार्थं यदुपुरस्य मथुरायाश्च श्रियं द्रष्टुमिति मित्रभेदं न करिष्यतीति सर्वमेतदुक्तवान् अक्रूरोऽयं द्विस्वभावो जीवः सात्त्विकार्थं दैत्याविष्टश्च अन्यथा तं प्रति कंसो न वदेत् नापि दैत्यैः सह प्रीतिः स्यात् तद्दत्तविषयान्वा अनुभूयात् एवंसति तस्य कार्यकर्तृत्वमपि न विरुद्धं भवति स्यमन्तकादिप्रसङ्गश्च न विरुद्धो भवति ॥ ३७ ॥

सांदिग्धन्तं प्रत्युत्तरमाह । द्विस्वभावत्वात् राजन्निति । संबोधनम् आज्ञाकरणावश्यकत्वार्थं स्नेहसूचनार्थं मनीषितं विचारितं सम्यगेव तदपि तव ननु मम विचारस्य सम्यक्त्वे हेतुः स्वावद्यमार्जनमिति । येन स्वस्य लौकिकप्रतीत्यापराधो न भवति अनेन कालो राजा त्वन्तु सेवक इति निरूपितम् अन्यथा कथमयं अतो भवेत् अस्माल्लोकानामन्यथा प्रवृत्तौ कालस्तानेव दुष्टान् जानीयादिति न तव दण्डः स्यात् दैत्यसिद्धान्तश्चावलम्बित इति तच्छास्त्रद्वारापि विरोधः देवानामेवहि राज्ये तेषामधिकारात् तदुक्तरीत्या नरकस्वर्गौ ननु दैत्यानामधिकारे अन्यथा दैवैर्देवपराजयो न स्यात् ग्रहास्तु साधारणाः अतो मनीषितं सम्यगिति न विरुध्यते अयञ्च सर्वसिद्धान्ताभिज्ञः कालस्यैषा व्यवस्था भगवान् सर्वप्रकार इति न भगवच्छास्त्रविरोधः अन्यथा वाचनिकी दैत्यानां मुक्तिर्बाधिता स्यात् विरुद्धेष्वपि मतेष्वनुभावश्च न स्यात् कालग्रहे प्रविष्टश्च भगवान् स्वकीयान् कालस्थानुद्धृत्य नयतीति भगवल्लक्षणो देशः कालादतिरिच्यते अतो व्यवहारार्थं सर्व एव कालात् बिभ्यति भगवांश्च कालं वञ्चयित्वैव भक्तान्नयति कालरूपश्च भवति अतो भगवदवतारः कालाप्रमाणबलं सर्वजनीनम् अन्यथा देवा ब्राह्मणाः धर्मश्च प्रतिष्ठिता न भवेयुः मध्यमकालौ द्विविधाविति देवदैत्यविभागः मूलभूतस्तु समः अतः क्रमार्थ एवेति प्रमेयबलासिद्धिरिति प्रमाणबलन्तु मूलोल्लङ्घनमपि कारयतीति सिद्धान्तरहस्यं यतो दैत्यानां न सिद्धान्तो ऽनेनावलम्बितः अतः सिद्धान्तानुसारेण सम्यगेवावलम्बितम् अतः पक्षद्वये संबन्धात् मूलकालः किमनुगुण इति ज्ञातुमशक्यत्वात् नैकतरसिद्धान्तः सिद्ध्यतीति तं प्रतिसिद्धान्तमाह । सिद्ध्यसिद्ध्योः समः कुर्यादिति प्राणिना सर्वसिद्धान्ताभिज्ञेन यत् कर्तव्यं तत्राग्रहो न कर्तव्यः यतो दैवस्य विद्यमानत्वात् प्रयत्न एव स्वस्य न तु फलं दैवाधीनामित्याह । दैवंहि फलभावनमिति । फलं दैवमेव भावयति अनेन पक्षद्वयं समानमुक्तम् ॥ ३८ ॥

तदन्याद्भवति इदानीन्तु भगवानवतीर्ण इति द्वितीयपक्ष एव मुख्यः अतोऽनेन विचारितमनोरथः वृथैवेति विशेषमाह । मनोरथान् करोतीति । उच्चैः स्वयोग्यैः इदं हि सर्वेश्वरेण विचारयितुं शक्यते अल्पोऽपि मनोरथस्तस्य सिद्ध्यतीत्याह । दैवहतानपीति । यदैव भगवानवतीर्णः तदैव सर्वे कंसादयो मारणीया इति अतो भगवता हता एव मनोरथास्तान् करोतीति भ्रान्त एवायं यतो जनः स्वयमेव जातः यद्यस्य मनोरथः सिद्ध्येत् कदाचिदपि तदा परगर्भे कथं जायेत कस्यचिद्वा मलरूपं रेतः कथं समाश्रयेत् अतो यो मनोरथः कर्तव्यः स आत्मानं विचार्य कर्तव्यः अन्यथा चेत् हर्षशोकाभ्यां युज्यते कदाचिद्भगवान् किञ्चित्करोति किञ्चिच्च न करोतीति यद्यप्येवं ज्ञायते तथापि ते आज्ञां करोमीति अन्यथा स्वस्य तव कार्यं न सेत्स्यतीति ॥ ३९ ॥

एवमन्योऽन्यपरिभाषणमुक्त्वा उभयोः स्वस्थानगतिमाह । एवमिति । अक्रूरोक्तं तेन न विचारितमेव कार्यवैयर्थ्यात् अतस्तस्यैव कृतमनूद्योपसंहरति । एवमादिश्येति । चकारात् केशिनं हस्तिपांश्च जानपदाकरणार्थं प्रवृत्तांश्च मन्त्रिणश्च विसृज्य तान् बहिरेव स्थापयित्वा स्वयमन्तःपुरं गतः तथा अक्रूरः स्वस्यालयं गतः इति न तस्मिन् दिवसे

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

गृहान्निर्गमनं सोऽन्तःस्थितः तमर्थं चिन्तयिष्यति अयमपि स्वगृहं गतः गमनोपायं प्रकारं च अत्रस्थतृतीयाध्याये कृत्यं वक्तव्यं विचारितं च ॥ ४० ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे श्रीलक्ष्मणभट्टात्मज-श्रीमद्वल्लभदीक्षितविरचितायां सुबोधिन्याम् त्रयस्त्रिंशाध्यायविवरणम् ॥ ३३ ॥ ३६ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

इदं रहस्यतत्त्वं न वाच्यं त्वेतदित्याह । धनुरिति ॥ ३७ ॥ मनीषितं सध्र्यक् सम्यक् स्वावद्यं मरणं तन्मार्जनं तदप्यत्र नीतिशास्त्रविधिं शृणिवत्याह । सिद्ध्यसिद्ध्योरिति । मनीषितस्य सिद्धावसिद्धौ च पुमान् समं भावमिति शेषः हि यतो दैवमदृष्टमेव भद्रमभद्रं वा भावयति करोतीति तत् ॥ ३८ ॥

जन्तुर्निकृष्टलोको ननु भवानिति । प्रकटोऽर्थः वस्तुतस्तु त्वं जन्तुरेव पशुनिर्विशेष इत्यर्थः ॥ दैवहतान् अपिकारादुदैव पालितान् मनोरथान् करोति तत्र देवपालितेषु मनोरथेषु हर्षः दैवहतेषु शोकः ताभ्यां जन्तुर्युज्यते युक्तो भवति तथापि एवमपि तवाज्ञां करोमि यतो भवांस्तु भाग्यवान् हर्षमेव प्राप्स्यतीति प्रकटो भावः वस्तुतस्तु अथापि यद्यपि जन्तोर्मुमूर्षोस्तवाज्ञा कर्तुं न युज्यते तदपि करोमि तव राजत्वान्मम तु त्वत्प्रजात्वादिति भावः । यद्वा अथापि तव मनोरथासिद्धावपि मम तु मनोरथः सेत्स्यत्येवेत्याज्ञां करोमीति ॥ ३९ ॥ ४० ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् । षट्त्रिंशो दशमेऽध्यायः सङ्गतः सङ्गतःसताम् ॥ ३६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

स्वस्यावद्यं मरणं तस्य मार्जनं निवर्तकम् तव मनीषितं यद्यपि सध्र्यक् सम्यक् तथापि सिद्ध्यसिद्ध्योः समं यथा भवति तथा कुर्यादाचरेत् हि यतः फलभावनं दैवम् ॥ ३७ ॥ ३८ ॥

दैवमन्तरेण पुरुषकारसिद्धिर्नास्तीत्याह । मनोरथानिति । मनोरथान् करोति यद्यपि तथापि दैवहतान् पश्यामः अतो दैवमेव फलभावनं पुरुषकारस्य तु निमित्तमात्रत्वमिति भावः । हर्षशोकाभ्यां युज्यते ननु हर्षमात्रमेव यद्यपि दैवमन्तरेण मनोरथसिद्धिर्नास्ति तथापि ते आज्ञां करोमि ॥ ३९-४० ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे षट्त्रिंशाध्यायार्थप्रकाशः ॥ ३६ ॥

भाषा टीका ।

इस बात को जान कर तुम राम कृष्ण दोनों बालकों को यहां जल्दी ले आओ धनुर्याग के देखने को यदुपुरी मथुरा की शोभा देखने को ले आओ ॥ ३७ ॥

अक्रूर जी बोले हे राजन् ! यह आप का विचार ठीक है आप के दोष के नाश करने के वास्ते है परंतु सिद्धि असिद्धी दोनों में सम बुद्धि करनी चाहिये क्यों की दैवही फल के सिद्धी करने वाला है ॥ ३८ ॥

सब मनुष्य दैव के नाश किये भी मनो रथों को बड़े जोर से करता है फिर हर्ष शोक से युक्त होता रहता है तौ भी मैं तो आपकी आज्ञा को करूंगा ही ॥ ३९ ॥

श्रीशुकदेवजी बोले कंसासुर इस प्रकार से अक्रूरजी को आज्ञा देकर और सब मंत्रियों को भी विदा करके अपने घर में प्रविष्ट भया अक्रूरजी भी अपने घर को गये ॥ ४० ॥

इति श्रीभागवत दशमस्कन्धपूर्वार्धे छत्तीस में अध्याय की भाषाटीका समाप्त ॥ ३६ ॥

इतिश्रीमद्भागवते दशमस्कन्धे पूर्वार्धे षट्त्रिंशोऽध्यायः ॥ ३६ ॥

॥ सप्तत्रिंशोऽध्यायः ॥

॥ श्रीशुक उवाच ॥

केशी तु कंसप्रहितः खुरैर्महीं महाहयो निर्जरयन्मनोजवः ।
सटावधूताभ्रविमानसंकुलं कुर्वन्नभो हेषितभीषिताखिलः ॥ १ ॥
"विशालनेत्रो विकटास्यकोटरो बृहद्गलो नीलमहाम्बुदोपमः ।
दुराशयः कंसहितं चिकीर्षुर्व्रजं स नन्दस्य जगाम कम्पयन्" [1]॥ ० ॥
तं त्रासयन्तं भगवान् स्वगोकुलं तद्धेषितैर्वालविघूर्णिताम्बुदम् ।
आत्मानमाजौ मृगयन्तमग्रणीरुपाह्वयत्स व्यनदन्मृगेन्द्रवत् ॥ २ ॥
स तं निशाम्याभिमुखो मुखेन खं पिबन्निवाभ्यद्रवदत्यमर्षणः ।
जघान पद्भ्यामरविन्दलोचनं दुरासदश्चण्डजवो दुरत्ययः ॥ ३ ॥
तद्वञ्चयित्वा तमधोक्षजो रुषा प्रगृह्य दोर्भ्यां परिविध्य पादयोः ।
सावज्ञमुत्सृज्य धनुःशतान्तरे यथोरगं तार्क्ष्यसुतो व्यवस्थितः ॥ ४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

सप्तत्रिंशे हते केशिन्यच्युतो भाविकर्मभिः ।
नारदेन स्तुतः क्रीडन् व्योमासुरमथावधीत् ॥
वृषवेषासुरं यद्वत्केशिनं हयवेषिणम् ।
कंसप्राणसखं हत्वा कंसं व्यसुमिवाकरोत् ॥

केशीत्विति प्रथमश्लोकेन य एवं भूतः केशीत्यनूद्य तं भगवानुपाह्वयदिति द्वितीयेनान्वयः महाहयः सन्महीं निर्जरयन् श्लथयन्विदारयन्नित्यर्थः । सटाभिः केसरैरवधूतानीतस्ततः क्षिप्तान्यभ्राणि विमानानि च तैः सङ्कीर्णं नभः कुर्वन् हेषितैरश्वजातिशब्दैर्भीषितमखिलं विश्वं येन सः ॥ १ ॥

तद्धेषितैस्तैरतिनिष्ठुरैर्हेषितैः वालैः पुच्छलोमभिर्विघूर्णिताः परिभ्रामिता अम्बुदा येन तम आजौ सङ्ग्रामार्थश्च आत्मानं कृष्णम् अग्रणीः पुरतो निर्गतः सन्नुपाह्वयत्स्वसमीपमाजुहाव स च केशी तन्निशम्य मृगेन्द्रवन्नादमकरोत् ॥ २ ॥

ततः केशी तं कृष्णं दृष्ट्वा मुखेन खं पिबन्निव मुखं विवृत्याभिमुखः सन्नभिजगाम किंच अत्यमर्षणोऽतिकुपितोऽत्यन्तमसहमानो वा प्रत्यकुपद्भ्यां जघान दुरासदोऽन्यैरभिभवितुमशक्यः दुरत्ययः उद्यतः सन् दुरातिक्रमः अत्र हेतुः चण्डजवश्चण्डस्तीव्रो जवो वेगो धावनं यस्य ॥ ३ ॥

तद्धननं वञ्चयित्वा तच्च हननाय प्रसारितयोः पादयोर्हस्ताभ्यां गृहीत्वा परिविध्य भ्रामयित्वा व्यवस्थितस्तथैव स्थितो बभूव ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

केशीतु नन्दव्रजं जगामेति शेषः । संज्ञाया अन्वर्थतां दर्शयति । सटेति ॥ १ ॥

स्वगोकुलं निजव्रजं त्रासयन्तम् । तच्च श्रीवैशम्पायनेनोक्तं "नृशब्दानुसरः क्रुद्धः स कदाचिद्दिनागमे । जगाम घोषसम्वासं नोदितः कालधर्मणा । तं दृष्ट्वा दुद्रुवुर्गोपाः स्त्रियश्च शिशुभिः सहे"त्यादि । कथम्भूतं स्वगोकुलं तत् तादृशप्रेमास्पदमित्यर्थः यद्वा । तस्य केशिन इव हेषितैरिति समस्तमेव । तैस्तमुपह्वयदित्यन्वयः । तत्राग्रणीरिति भीतान् गोष्ठजनान् पृष्ठीकृत्य यमुनामार्गे निर्गतः सन् स्वसमीपं प्रत्याजुहावेत्यर्थः । श्रीगोविन्दस्थानमुत्तरेण यमुनाघट्टविशेषस्य केशिघट्टतीर्थत्वेन प्रसिद्धेः तथाच वाराहे । यमुनामाहात्म्ये । गङ्गाशतगुणं पुण्या यत्र केशी निपातित इति । अत्र विवरणं श्रीविष्णुपुराणे । त्राहि त्राहीति गोविन्दस्तेषां श्रुत्वा तदा वचः । सतोयजलदध्वानगम्भीरमिदमुक्तवान् । अलं त्रासेन गोपालाः ! केशिनः किं भयातुरैः । भवद्भिर्गोपजातीयैर्वीरवीर्यं विलोप्यते । किमनेनाल्पसारेण हेषिताटोपकारिणा । दैतेयबलवाह्येन वलिना दुष्टवाजिनेति । श्रीहरिवंशे च । --'

तमापतन्तं संप्रेक्ष्य केशिनं हयदानवम् ।
प्रत्युज्जगाम गोविन्दस्तोयदः शशिनं यथा ॥

---

[1] वीरराघव विजयध्वज वल्लभाचार्यशुकदेवानामयं पाठः ।

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

केशिनस्तु तमभ्यासे दृष्ट्वा कृष्णमवस्थितम् ।
मनुष्यबुद्ध्यो गोपाः कृष्णमूचुर्हितैषिणः ॥
कृष्ण तात न खल्वेष सहसा ते हयाधमः ।
उपसर्प्यो भवान् वाळः पापश्चैष दुरासदः ॥
एष कंसस्य सहजः प्राणस्तात बहिश्चरः ।
उत्तमश्च हयेन्द्राणां दानवो ऽप्रतिमो युधि ॥
त्रासनः सर्वदेवानां तुरङ्गाणां महाबळः
अव यः सर्वभूतानां प्रथमः पापकर्मणामिति ॥

तत्र शशिनमित्युक्तेः केशिनः शुक्ल एव वर्णो ज्ञेयः ॥ २ ॥ जघान हन्तुं प्रवृत्तः अरविन्दलोचनमिति प्रफुल्लपद्माभस्मेरनेत्रोन्मीलनेन वीक्षणादिति सावज्ञत्वमुक्तम् । यद्वा । श्रीवादरायणेस्तन्निन्दाकिरियं तादृशसुन्दरसुकुमाराङ्गे दृष्टेऽपि तद्दुष्टभावानपगमात् । निशम्य निशाम्य दृष्ट्वेत्यर्थः । दुरासदो दुर्ग्रहः । यतश्चण्डजवः अत एव दुरत्ययः दुरभिभव इति ॥ ३ ॥ तं तादृशमपि । अधोक्षज इन्द्रियज्ञानाविषयो यः स कथं तत्पादघातविषयः स्यादित्यहो तस्य मूढतेति भावः । अत एव वञ्चयित्वा । रुषा स्वगोकुलत्रासनतः । यद्वा । अकारप्रश्लेषेण अरुषा लीलयैवेत्यर्थः । उत्सृज्य प्रक्षिप्य ततश्च केशी मुमुहे इति ज्ञेयम् ॥ ४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

प्रतियाते तु देवर्षौ कंस आहूय केशिनम् प्रेषयामासेत्युक्तम् । प्रेषितः स किमकरोदित्यत्राह । केशीत्विल्यादि नवभिः । केशी नामासुरः कंसेन प्रेषितः महाश्वः सन् मनस इव जवो वेगो यस्य सः खुरैर्महीं पृथ्वीं निर्जरयन् विदारयन् सटाभिः केसरैवधूतानीतस्ततः क्षिप्तान्यभ्राणि विमानानि च तैः संकीर्णं नभः कुर्वन् हेषितैरश्वजातिशब्दैर्भीषितमखिलं विश्वं येन विशाले नेत्रे यस्य विकटं विशालमास्यविलं यस्य बृहन् पीनो दीर्घश्च गलो यस्य नीलो महांश्च घनो मेघ उपमा यस्य सः दुराशयः दुष्टः आशयः कृष्णजिघांसात्मकः अभिप्रायो यस्य सः प्रसिद्धः कंसस्य हितं कर्तुमिच्छुः नन्दस्य व्रजं कम्पयन् जगाम ॥ १ । ० ॥ हेषितैस्तत्स्वस्य गोकुलं त्रासयन्तं भीषयन्तं वालैः पुच्छरोमभिर्विघूर्णिताः परिभ्रामिता अम्बुदा येन तमाजौ युद्धे निमित्ते आत्मानं कृष्णं मृगयन्तमन्वेषयन्तं केशिनमग्रणीः पुरतो निर्गतः सन् भगवानाह्वयदाजुहाव ॥ २ ॥

स केशी रुषा मृगेन्द्र इव नादमकरोत्ततः स केशी तमाह्वयन्तं कृष्णं निशम्यावलोक्याभिमुखः सन्मुखेन खमाकाशं पिबन्निवात्यमर्षणः अत्यन्तक्रोधयुक्तः अभ्यद्रवदभ्यपतत् किञ्च प्रत्यक्षद्वयमरविन्दलोचनं कृष्णं जघान ताडितवान् कथम्भूतः दुरासदः अन्यैरभिभवितुमशक्यः चण्डः दुरतिक्रमो जवो वेगो यस्य सः ॥३ ॥

तद्वदनं वञ्चयित्वा तं केशिनं हननाय प्रसारितपादयोः हस्ताभ्यां गृहीत्वा परिविध्य भ्रामयित्वा धनुःशतान्तरे धनुःशतपरिमितदूरे सावज्ञं सावहेलनं यथा तथोत्सृज्य पातयित्वा व्यवस्थितः यथा तार्क्ष्यसुतो गरुत्मानुरगमुत्सृज्य व्यवतिष्ठते तद्वत् ॥ ४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

श्रोतॄणां मन्तॄणां प्रवक्तॄणां ध्यातॄणां च बुद्ध्यारोहार्थं सङ्कलय्य भगवद्विक्रमं वर्तमानं वर्तिष्यमाणं च कथयत्यस्मिन्नध्याये तत्रादौ केशिदैत्यवधलक्षणं भगवद्विक्रमं वक्तुमाह । केशीति । निर्दरयन् भिन्दन् मनोजववत् जवो यस्य स तथा अभ्राणि च विमानानि च अभ्रविमानानि सटाभिः स्कन्धदीर्घरोमभिः अवधूतानि अभ्रविमानानि तैः संकुलं हेषितेनाश्वजातिशब्दितेन भीषितमखिलं यस्य स तथा हेषा हेषा च वाजिनामिति हलायुधः ॥ १ ॥

विकटं विस्तृतम् आस्यकोटरं मुखगर्तं यस्य स तथा दुराशयः दुष्टाभिप्रायः कृष्णहननलक्षणो यस्य स तथा ॥ ० ॥

वालेन पुच्छेन विघूर्णितो विभ्रान्तो ऽम्बुदो यस्य स तथा तम् आजौ क्षेपार्थमात्मानं स्वं मृगयन्तं विचिन्वन्तम् अज गतिक्षेपणयोरिति धातुः युद्धे वा इयमपि तादर्थ्ये सप्तमी अग्रणीस्तस्याभिमुखे स्थितः ॥ २ ॥

तं नादम् ॥ ३ ॥

तद्वदनं सावज्ञम् अवमानसहितमिति क्रियाविशेषणम् ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

॥ १—५ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

सप्तत्रिंशे प्रेषितस्य तामसस्य निरूप्यते ।
कार्यं वाक्यानि च ऋषेर्लीलां काश्चिद्धरेः प्रियाम् ॥
हेतुकार्यफलान्यत्र पूर्ववद्बोधितानि हि ।
केश्यागमनकार्यं तु ऋषिवाक्यान्नचान्यथा ॥
वधेन जातेनागच्छेदनर्थं कृतवानिति ।
वधो निदर्शनं तस्मादतो वाक्यानि बोधने ॥
बोधितश्चेद्धरिर्लीलां न कुर्यात् स्वेच्छया मुदा ।
तदा प्रमेयरीतिर्हि दुर्बलैव भवेत्सदा ॥
अतः फलार्थं लीला हि पूर्वजाता निरूप्यते ।
सिंहावलोकनं चापि करिष्यति हरिः स्वयम् ।
अतो न गोकुले चिन्ता कापीत्यपि निरूप्यते ॥
केशी हतो गुणैः कृत्वा तथा व्योम ऋषिः पुनः ।
कळामात्रमुवाचेति नव षोडश वै नव ॥

पूर्वाध्याये केशी प्रेषित इत्युक्तं तस्यागतस्य कृत्यमत्र नवभिरुच्यते पूर्वदैत्यवत् केश्यागमनं न भवतीति वक्तुं भिन्नप्रकारमाह । केशीत्विति । अन्ये पूर्वं साधारण्येन नियुक्ताः केशी तु कंसेन प्रेषितः विशेषाकारेण तदा खुरैः महीं विदारयन् व्योमवदेवागतः निर्दरयन् विदारयन् । ननु केशिनो राक्षसस्य कथं खुरा इत्याशङ्क्याह । महाहय इति । महानयमश्वः ननु संध्यायामात्रासः कथं शीघ्रमागत इति चेत्तत्राह । मनोजव इति । पूर्ववदस्यापि सामर्थ्यमाह । सटाभिरवधूताः अभ्रा विमानानि च तैः संकुलं नभः कुर्वन् इति । तस्य कायिको व्यापार उक्तः

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

वाचनिकमाह । हेषितभीषिताखिल इति । हेषितोऽश्वशब्दः तेनैव भीषितमखिलं येन साधारणप्रयोगः दैत्यानामपि भयजनकोऽयमिति ज्ञापनार्थः ॥ १ ॥

तस्य क्रियाव्यतिरेकेणापि रूपं दृष्ट्वैव बिभ्यतीति ज्ञापयितुं रूपं वर्णयति । विशालनेत्र इति विशाले नेत्रे यस्य इयं विशालता प्रकरणवशात् भयानका ज्ञातव्या विकटमास्यकोटरं यस्य बृहन् गलो यस्य नीलो महान् घनः तस्योपमा यस्य नीलघनापेक्षयाऽधिक इति उपमानत्वनिरूपणार्थमुपमापदं रूपमेकेन गुणत्रयं मुखे वर्त्तत इति तत् ज्ञापनार्थं नेत्रे आस्यं कण्ठश्च वर्णितः अन्तर्दोषानाह । दुराशय इति । स्वभावतोऽप्यन्तःकरणं दुष्टमिदानीं तु सुतरामित्याह । कंसहितं चिकीर्षुरिति । ततो नन्दस्य व्रजं जगाम उपद्रवार्थमेव ॥ ० ॥

स तु शीघ्रमेव कार्यं करिष्यतीति तस्मिन्नागत एव रूपं दृष्ट्वैव त्रासः मारणपरिज्ञानयोः सामर्थ्यज्ञापनार्थं भगवानिति अक्लिष्टकार्योऽपि तथा कृतवानित्यत्र हेतुमाह । स्वगोकुलमिति । स्वस्य गोकुलमिति स्वा गावश्च तेषां कुळमित्यपि तैः प्रसिद्धैर्हेषितैः यानि देवानामपि भयजनकानि शीघ्राकारणे हेतुमाह । वालविघूर्णिताम्बुदमिति पुच्छभ्रामणेन विशेषेण घूर्णिता मूर्च्छिता अम्बुदा यस्य पुच्छभ्रामणमात्रेण यदेवं महाननर्थः तदा किञ्चिद्विलम्बेऽपि महानन्यायो भवेदिति नन्वकस्मादागत्य कथं न गोकुलं मारितवान् तत्राह । आत्मानमाजौ मृगयन्तमिति न स गोकुलमारणार्थमागतः किन्तु भगवता सह युद्धं कर्तुमाजौ सङ्ग्रामे आत्मानं भगवन्तं मृगयन्तमन्वेषयन्तं क्वास्ति कृष्ण इति नन्वेवं कथं धाष्टर्यात् कंसोयस्माद्बिभेति तत्राह । सः प्रसिद्धः केशी अत एव मृगेन्द्रवत् सिंहवत् स ह्यन्यान् गजानिव मन्यते बलभद्रं कथं न प्रेषितवानित्यत्र हेतुरग्रणीरिति भगवानेवाग्रणीः भगवान् अग्र एव उपद्रवान् दूरीकरोतीति ॥ २ ॥

भगवदाह्वानं श्रुत्वा यत्कृतवांस्तदाह । स तमिति । उपाह्वयन्वा स भगवानेव स केशी तद्भगवद्वाक्यं निशम्य मुखेनोच्चैर्व्यनदत अथवा पूर्वं भगवन्तं दृष्ट्वैव गर्जनं कृतवान् पश्चात् वाक्यं श्रुत्वा यत् यत्करिष्यति तदग्रे निरूप्यते स केशी तद्भगवद्वाक्यं निशम्य मुखेनाकाशं पिबन्निव व्यात्ताननः अभिमुखः अभ्यद्रवत् ग्रासार्थीव शीघ्रमागमने आकाशो निविशतीव दृष्ट इति पिबन्निवेत्युक्तं यत्राकाशमेव ग्रसति तत्र तन्मध्यपातिनः सुखग्रासा इति बहिश्चेष्टा निरूपिता अत्यमर्षण इत्यान्तरी तदा निकटे समागत्य परावृत्य पद्भ्यामघान धेनुकवत् ननु सम्मुखमागत्य मुखेनैव मारणसम्भवेऽपि किमिति परावृत्त इति चेत्तत्राह । अरविन्दलोचनमिति । कमलनयनो भगवानिति भगवतः परमसौन्दर्यं दृष्ट्वा साक्षादतिक्रमासमर्थः परावृत्य अपश्यन्नतिक्रमं कृतवानित्यर्थः । ननु पश्चादपि भगवद्रूपं स्मृत्वा कथमतिक्रमः भवतीत्याशङ्क्याह । दुराशय इति । दुष्टान्तःकरणत्वात् तथा कृतवान् दुरासद इति पाठे कथं रामादिभिः अतिक्रमो न निवारित इत्याशङ्क्याह । दुरासद इति । दुःखेनासादो यस्येति न कोऽपि तन्निकटे गन्तुं शक्नोतीत्यर्थः तत्र हेतुमाह । चण्ड जव इति । अतिशीघ्रमागच्छति तस्य प्रतीकारो दूरे तस्मिन्नागते पलायनमप्यशक्यमित्याह । दुरत्यय इति । दुःखेनात्ययो यस्येति ॥ ३ ॥

भगवानतिचतुरः स सुरासुरैः शस्त्रैश्चावध्य इति यस्य प्रकारान्तरेण समाधानं कृतवानित्याह । तद्वञ्चयित्वेति । तत्पादप्रहरणं तिर्यग्भूत्वा वञ्चयित्वा मोघत्वं सम्पाद्य ततः दोर्भ्यां तस्य पादद्वयं धृत्वा परिविध्य भ्रामयित्वा उत्तोल्य धनुःशतान्तरे सावज्ञमुत्सृज्य व्यवस्थित इति संबन्धः ननु शीघ्रमागतो मारयितुं पादप्रसारणं कृतवान् यथा न प्रतिहतो भवति साधनवेगः तत्कथं प्रतिहतो जात इत्याशङ्कायामाह । अधोक्षज इति । इन्द्रियजन्यं तस्य ज्ञानं क्रिया वा तं न विषयीकरोति अतो युक्त एव तस्य पादासंबन्ध इति वञ्चनमपि भगवतो लौकिकसामर्थ्याद्युक्तमिति न किञ्चिदनुपपन्नं संमुखमागतः किमिति परावृत्त इति रोषेण दोर्भ्यां गृहीतः कदाचित्तस्य हृदये भीतः सन् वञ्चनं कृतवानिति शङ्का स्यात् ततो भगवान् निःशङ्कमाप्तमिव दोर्भ्यां परिगृहीतवान् तत उत्तोलनञ्च कृतवान् यौ पादौ भगवते चिक्षेप तत्रैव स्थाने स गृहीत इति दत्तमेव गृह्णातीत्यपि सूचितम् उत्तोलनादिकं सर्वं यथा पुनर्नायाति तथा ज्ञापनार्थं महान् देवलब्धवर इति तस्य वेगनाशार्थं सावज्ञमवज्ञापूर्वकमुत्सर्गः शतशब्दोऽपरिमितवाची धनुःपदं वीरत्वज्ञापनार्थं ननु देहेन महान् सः बालकश्च भगवान् अलौकिकञ्च सामर्थ्यं न प्रकटितवान् तत्कथं तस्योत्तोळनादिकमित्याशङ्क्य दृष्टान्तमाह । यथोरगमिति । गरुडो यथा महान्तमप्युरगं भक्ष्यत्वात् क्लृप्तत्वात् भक्ष्यमाणः बले विद्यमाने पराक्रमं करिष्यतीति बलक्षयार्थं तथा क्रियते तथा भगवानपि असुरो निवार्य एवेति बलक्षयार्थं तथाकरणम् एवं कृत्वा न महत्कर्म कृतमिति मेने किन्तु पूर्ववदेव विशेषेणैव लीळयैव स्थितः ॥ ४ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

सप्तत्रिंशे केशिवधो भाविलीलोक्तिभिः स्तुतिः ।
नारदेन हरेश्चौर्य्यक्रीडाव्योमवधोऽप्यभूत् ॥

केशी तु यः कंसप्रहितस्तं भगवानुपाह्वयदिति द्वितीयेनान्वयः यद्वा नन्दव्रजं जगामेति शेषो देयः निर्जरयन् खुराघातैर्महीं निःशेषेण जीर्णां कुर्वन् सटाभिः केसरैरवधूतानि कम्पितानि अभ्राणि विमानानि च तैः संकुलं व्याप्तं नभः कुर्वन् हेषितमश्वजातिशब्दः ॥ १ ॥

वालाः पुच्छलोमानि स केशी च व्यनदत् ॥ २ ॥

स केशी तं श्रीकृष्णं निशाम्य दृष्ट्वा दुरासदः अन्यैर्निकटमपि गन्तुमशक्यः दुरत्ययः कुतः पुनरतिक्रमितुं शक्य इत्यर्थः ॥ ३ ॥

तत् हननं वञ्चयित्वा तं दोर्भ्यां स्वहस्ताभ्यां हन्तुं प्रसारितयोः पदयोः प्रगृह्य परिविध्य भ्रामयित्वा विशेषेण स्वस्थान एवावस्थितः ॥ ४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

सप्तत्रिंशे केशिवधो देवर्षिकृतभगवत्स्तवो व्योमासुरवधश्चानुवर्ण्यते । केशीति । केशीनामासुरः महाहयाकृतिः कंसप्रहित-

स लब्धसंज्ञः पुनरुत्थितो रुषा व्यादाय केशी तरसापतद्धरिम् ।
सोऽप्यस्य वक्त्रे भुजमुत्तरं स्मयन् प्रवेशयामास यथोरगं बिले ॥५॥
दन्ता निपेतुर्भगवद्भुजस्पृशस्ते केशिनस्तप्तमयस्पृशो यथा ।
बाहुश्च तद्देहगतो महात्मनो यथामयः संववृधे उपेक्षितः ॥ ६ ॥
समेधमानेन स कृष्णबाहुना निरुद्धवायुश्चरणांश्च विक्षिपन् ।
प्रस्विन्नगात्रः परिवृत्तलोचनः पपात लेण्डं विसृजन् क्षितौ व्यसुः ॥ ७ ॥
तद्देहतः कर्कटिकाफलोपमाद्व्यसोरपाकृष्य भुजं महाभुजः ।
[1]अविस्मितोऽयत्नहतारिरुत्स्मयैः प्रसूनवर्षैर्दिविषद्भिरीडितः ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

कंसेन प्रेषितः मही निर्जरयन् श्लथयन् विदारयन्नित्यर्थः । सटाभिः केसरैः अवधूतानीतस्ततः क्षिप्तान्यभ्राणि विमानानि च तैः संकुलं संकीर्णं नभः कुर्वन् हेषितैरश्वजातिशब्दैर्भीषितमखिलं विश्वं येन सः ॥ १ ॥

कराले क्रूरे नेत्रे यस्य सः विकटं भयानकमास्यकोटरं मुखविवरं यस्य सः बृहन् विपुलो गलो यस्य सः नीलमहाम्बुद उपमा यस्य सः दुष्टः आशयो यस्य सः कंसस्य हितं कर्तुमिच्छुः सः प्रसिद्धः केशी नन्दस्य व्रजं कम्पयन् जगाम ॥ ० ॥

तद्धेषितैः तैरतिनिष्ठुरैः हेषितैः स्वगोकुलं त्रासयन्तं वालः पुच्छक्षोभभिर्विघूर्णिताः परिभ्रामिताः अम्बुदा येन तम् आजौ युद्धे युद्धार्थम् आत्मानं मृगयन्तमन्वेषयन्तं भगवान् अग्रणीः पुरोगतः सन् उपाह्वयत् आजुहाव स केशी अपि मृगेन्द्रवत् व्यनदत् ननाद ॥ २ ॥

स च केशी तं श्रीकृष्णं निशम्य अवलोक्य मुखेन समाकाशं पिबन्निव अभिमुखः सन् अभ्यद्रवत् अभिजगाम ततश्च अत्यमर्षणः अत्यन्तक्रोधयुक्तः अत्यन्तमसहमानो वा प्रत्यक् पद्भ्यामरविन्दलोचनं जघान ताडितवान् कीदृशः दुरासदः अन्यैरासादियितुमभिभवितुमशक्यः दुरत्ययो दुर्घटमरणः चण्डजवः प्रचण्डवेगः ॥ ३ ॥

अधोक्षजः अक्षिनिरपेक्षज्ञानवान् सर्वज्ञः तद्धननं वञ्चयित्वा हननाय प्रसारितयोः पादयोस्तं केशिनं हस्ताभ्यां परिगृह्य गृहीत्वा परिविध्य भ्रामयित्वा धनुःशतान्तरे सावज्ञं यथा तथोत्सृज्य पातयित्वा व्यवस्थितस्तत्रैव स्थितो बभूव यथा तार्क्ष्यसुतो गरुडः उरगमुत्सृज्य व्यवतिष्ठते तथा ॥ ४ ॥

भाषा टीका ।

श्रीशुकदेवजी बोले कंस का भेजा हुआ केशीदानव बडे भारी घोडे के रूप वाला मन के बरोबर वेग से चलता हुआ खुरों से पृथिको खोदता हुआ गले के वालों से मेघ तथा विमानों को उडा कर आकाश को व्याप्त करके घोडा के शब्द से सब संसार को डराता हुआ नंदजी के ब्रज को जाता भया ॥ १ ॥

बडे विशाळ जिसके नेत्र हैं बडा मुख का गढेला है जिसको बडा गला है नील वर्ण वाले मेघ सरी का दीखता है बडे दुष्ट चित्त वाळा है कंस के हित करने वाला है इस प्रकार से ब्रज को कंपाता हुआ गया ॥ ० ॥

भगवान् ने देखा कि वह केशी अपने गोकुल को घोडा के शब्द से त्रासित करता है उसके पूंछ के वालों से बडे मेघ घूम रहे हैं और अपने को युद्ध में ढूंढ रहा है तब आगे होकर भगवान् ने उसको बुलाया फिर केशी ने जैसे सिंह गर्जे तैसे गर्जना किया ॥ २ ॥

वह केशी इस वात को देख कर सन्मुख खडा होगया और मुख से आकाश को पीता हुआ सरीका क्रोधित होकर दौडा और बडा भयंकर है प्रचंड वेग वाला है बडा कठिन है फिर दोनों पैरों से कमललोचन भगवान् को प्रहार करता भया ॥ ३ ॥

अधोक्षज भगवान् ने उस लात को बचा लिया फिर रोष से उसके दोनों पैरों को हाथ से पकडकर घुमाकर बडी अवज्ञा से सौधनु पर्यंत उसको फेंक कर जैसे सर्प को फेंक कर गरुड खडा होवे तैसे खडे रहे ॥ ४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

व्यादाय मुखं प्रसार्य वेगेन हरिं प्रत्याद्रवत् सोऽपि हरिर्दृसमुत्तरं सव्यं भुजं निर्भयत्वे दृष्टान्तः यथोरगं बिल इति ॥ ५ ॥

ततः किं तदाह । दन्ता इति । चर्वणाय भगवद्भुजं स्पृशन्तीति तथा ते व्यादानेन ये विवृताः अयो लोहं स्पृशन्तीति स्पृशः यद्वा तप्तमयमतितप्तं लोहादि स्पृशन्तो यथेति आमयो जलोदरम् ॥ ६ ॥

लेण्डं पुरीषमुत्सृजन् ॥ ७ ॥

कर्कटिकाफलं हि विपक्वं सदत्यन्तं विदीर्णं भवति तद्वाद्विदीर्णात्तस्य देहात् व्यसोर्विगतप्राणात् अविस्मितो गर्वरहितः अयत्नेन हतोऽरिर्येन सः ॥ ८ ॥

1 अविस्मितोऽयं निहतारिक्रियैः प्रसूनवर्षैर्वृषद्भिरीडितः । इति विज० पाठः ।

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

स महादुष्टः उत्सृष्टोऽपीति वा यथेति यथा कश्चिदुरगं तत्क्रीडाकौतुकी तदनिष्टशङ्कारहितः केशिप्राणस्थानीयमूषिकविलं प्रवेशयति तद्वदित्यर्थः ॥ ५ ॥

नितरां निर्मूलतया पेतुः । तथाच श्रीहरिवंशे । दशनैर्मूलनिर्मुक्तैरिति । भगवतः सर्वैश्वर्य्ययुक्तस्य भुजस्पृश इति भुजस्याविकृतत्वं स्पर्शमात्रेणैव दन्तानां पतनं चाभिप्रेतं ते वज्रोपमा महास्थूला तथाच श्रीविष्णुपुराणे सिताभ्रावयवा इवेति । अय इति कर्मणि षष्ठ्यभावो धायैरामोदमुत्तमामिति भट्टिकाव्यवत्तदर्हनिर्देशात् । तप्तमिति विशेषणात्तु न समस्तं पक्षे तप्तं तापः भावे क्तः । तन्मयं द्रव्यं लोहादि स्पृशन्तीति तथा ते । अतितप्तलोहादिस्पर्शमात्रेण दन्तानां सद्यो निपातदर्शनात् । वैकल्पिक विसर्गलोपावुभयत्र निर्विसर्गत्वं युक्तं । महात्मनः अपरिच्छिन्नमूर्त्ते इति तद्वाहोर्वृद्धिर्नाम तावद्देशप्राकट्यमेव ततस्तत्र शैघ्र्यमपि नाद्भुतमिति भावः । सम्यक् प्राणादिमार्गसंनिरोधेन ववृधे हि निश्चितं तच्च नान्यैर्लक्षितमिति तद्देहगत इत्यनेन वोधितं एकांशे दृष्टान्तः यथामय इति । तद्विधेषु दुःखरूपत्वेन भानात् । नाशनाय सहसान्तरङ्गेषु वृद्धेश्च ॥ ६ ॥

सम्यगेधमानेनेति । याक्ता तद्देहो विदारितः स्यात्तावत्त्वस्याभिप्रायेण तद्देहविदारणेनैव तन्मृत्योर्विहितत्वात् । तथाच श्रीहरिवंशे श्रीनारदवाक्यम् यत्त्वया पाटितं देहं भुजेनानतपर्वणा । यस्तोऽस्य मृत्युरन्हाय विहितो विश्वयोनिनेति ॥ ७ ॥

कर्कटिकाफलोपमादित्यत्र विशेषः श्रीविष्णुपुराणे । द्विपाद पुच्छपृष्ठार्द्धश्रवणैकाक्षि नासिके । केशिनस्ते द्विधा भूते शकले च विरेजतुरिति । अयत्नहतारिकोऽप्यविस्मितः । अहमेव कर्त्तेति विस्मयात्मकगर्वरहितः । यद्वा । तादृशदुष्टमहाभीषणवधेऽपि अविगतस्मितः । अश्रमेण लीलयैव मारणात् । तदेवाह । अयत्नेति तथा चोक्तं श्रीपराशरेण । अनायस्ततनुः स्वस्थो हसंस्तत्रैव संस्थित इति । प्रसूनवर्षैः कृत्वा वर्षद्भिरिति प्रसूनवर्षाणि बहुशः कुर्वद्भिरित्यर्थः । हतारिरुत्स्मयैरिति पाठे सुरैरित्यध्याहार्य्यम् । एतदनन्तरञ्च श्रीपराशरः । ततो गोपाश्च गोप्यश्च हते केशिनि विस्मिताः । तुष्टुवुः पुण्डरीकाक्षमनुरागमनोरममिति । वैशम्पायनश्च । तं हतं केशिनं दृष्ट्वा गोपा गोपस्त्रियस्तथा । बभूवुर्मुदिताः सर्वे हतविघ्ना हतक्लमाः । दामोदरन्तु श्रीमन्तं यथास्थानं यथावयः । अभ्यनन्दन् प्रियैर्वाक्यैः पूजयन्तः पुनः पुनरिति ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

स केशी लब्धा संज्ञा येन सः मूर्च्छितः पुनर्लब्धस्मृतिरित्यर्थः पुनरुत्थितः रुषा व्यादाय वक्त्रमिति शेषः बलेन पुनर्हरिं प्रत्यभ्यद्रवत्तदा हसन्निर्भयः सोऽपि हरिरप्यस्य केशिनो वक्त्रे सव्यं भुजं प्रवेशयामास निर्भयत्वे दृष्टान्तः । यथोरगं विल इति । यथा सर्पविद्यावित्सर्पं विले प्रवेशयति तद्वत् यद्वा सर्पभोगवद्दीर्घं भुजं विलवद्दुष्प्रवेशे तदास्यकुहरे प्रवेशयामासेति दृष्टान्तार्थः ॥ ५ ॥

ततः किं तदाह । दन्ता इति । भगवद्भुजं संस्पृशन्तीति तथा ते तस्य केशिनो दन्ता निपेतुः यथा तप्तमयस्तप्तं लोहपिण्डं स्पृशन्तो निपतन्ति तद्वत् केशिनो देहे प्रविष्टो महात्मनो भगवतो भुजस्तु ववृधे एधांबभूव यथोपेक्षितोऽचिकित्सितः आमयो जलोदरो वर्द्धते तद्वत् ॥ ६ ॥

स केशी सम्यगेधमानेन कृष्णस्य बाहुना निरुद्धः वायुः श्वासो यस्य स चरणान्विक्षिपन्नितस्ततश्चालयन्प्रस्विन्नं प्रस्वेदयुक्तं शरीरं यस्य परिभ्रमणमाणे लोचने यस्य स विगतप्राणो लेण्डं पुरीषं विसृजन् भूम्यां पपात ॥ ७ ॥

कर्कटिकाफलं हि पक्वं सदत्यन्तं विदीर्णं भवति तद्वद्विदीर्णात्तस्य केशिनो देहाद्व्यसोर्गतप्राणान्महाभुजो भगवान्भुजमाकृष्टवानविस्मितो गर्वरहितोऽयत्नेन हतोऽरिर्येन सः प्रसूनवर्षाणि वर्षद्भिरुत्स्मयैर्देवैरीडितः स्तूयमानः बभूवेति शेषः ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

मुखं व्यादाय विदार्य ॥ ५ ॥

तप्तमयोनाम लोहं स्पृशन्तः तप्तमयं तापात्मानं पदार्थं स्पृशन्तीति तप्तमयस्पृश इति वा उपेक्षितः आमयो व्याधिः ॥ ६ ॥

विक्षिपन्नितस्ततः प्रसारयन् लण्डं शकृत् तुरगस्य शकृल्लण्डं वङ्क्षणप्रकारकोशयोरिति च कोशं वा ॥ ७ ॥

कर्कटी कर्कन्धूलता तत्फलसदृशमुर्वारुकवत् मुकुलमित्यर्थः कर्कट्याः फलं गर्भस्तत्सदृशं प्रसवे स्वयं म्रियते यथा तथा भुजापकर्षेण मृत इत्यर्थः । व्यसोर्मृतस्य उत्स्मयैर्देवैः उत्स्मिया अमरा देवास्त्रिदिवेशा दिवौकस इति च प्रसूनवर्षैः फलपुष्पसमूहैः प्रसूनं फलपुष्पयोरिति च ववृषद्भिरित्यत्र ताच्छीलिकः शतृप्रत्ययः भवेत्यत्र अकारलोपश्च तेन अयं वर्षः औत्पात्तिको गुणो लक्ष्यत इति ॥ ८-९ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः

यथामय इति । तत्र दुःखदतामात्रांशे अन्तरङ्गेषु वर्द्धमानतांशमात्रे च दृष्टान्तः दिव्यज्ञानत्वात् ॥ ६-८ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

प्रक्षिप्तस्य वृत्तान्तमाह । स लब्धसंज्ञ इति । पूर्वं मूर्च्छितः पश्चाल्लब्धसंज्ञस्तथापि न निवृत्तः किन्तु पुनरुत्थितः ततो मुखं व्यादाय यतः केशी तरसा शीघ्रमेव हरिमभ्यापतत् ततो भगवानपि भोजनार्थमिव व्यात्तमुखं भोजितवानित्याह । सोऽपीति । भगवानप्यस्य वक्त्रे उत्तरं वामभुजं स्मयन् हसन् भक्षणार्थमायासि चेत् भक्षयेति वदन्निव प्रवेशयामास वामो हि भुजो दैत्यानामेवेति स निःशङ्कं प्रविष्ट इति वक्तुं दृष्टान्तमाह । यथोरगं विल इति ॥ ५ ॥

भुजप्रवेशनं कथं मारणोपाय इति शङ्कायां प्रकारमाह । दन्ता निपेतुरिति । स भक्षणार्थं प्रवृत्तः दन्तसंबन्धं कारितवान् तदा भगवद्भुजस्पृशो भगवद्भुजं स्पृशन्तीति तथाभूता दन्ता

श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी ।

निपेतुः ते प्रसिद्धा यैर्देवा अपि हन्यन्ते तत्रापि केशिनः अतिप्रसिद्धस्य अलौकिकप्रकारेणौषधादिस्पर्शेनैव दन्ताः पतिता भविष्यन्तीत्याशङ्क्य दृष्टान्तमाह । तप्तमयःस्पृश इति । तप्तमयः अग्निवर्णं ये स्पृशन्ति ते तप्तमयःस्पृशः तप्तमयो वा तप्तलोहं स्पृशः षष्ठ्यर्थे द्वितीयेति ततो बाहुरपि तद्देहान्तः प्रविष्टः ववृधे तस्य वृद्धौ साधनं नापेक्षत इत्यत्र दृष्टान्तमाह । यथामय इति । यदेव किञ्चित्करोति पुरुषस्तद्रोगप्रतीकारमकुर्वन् तेनैव स वर्द्धते नहि देहवृद्धाविव रोगवृद्धौ साधनमपेक्ष्यते ननु वृद्धौ विकारित्वं स्यात् तथाचानुभावो न स्यात् दोषश्च स्यात् इति चेत् तत्राह । महात्मन इति । स हि व्यापकः सर्वतः पाणिपादान्तः यावद्दूरे मायामुद्घाटयते येन तेनैवावयवेन वृद्ध इत्युच्यते महानात्मा स्वरूपं यस्य अस्य च उपेक्षा प्रणिपाताकरणं पलाय्य गमनं वा ॥ ६ ॥

ततो यज्जातं तदाह । समेधमानेनेति । सम्यक्परितः एधमानेन वर्द्धमानेन स केशी कृष्णपदमेतदर्थमेवावतीर्णं इति ज्ञापनार्थं बाहुश्च क्रियाप्रधानः अतोऽसमीचीने बाहुप्रक्षेपणादिकं न विरुध्यते वक्त्रविवरस्य बाहुना पूर्णत्वात् निरुद्धवायुर्जातः तदा व्याकुलः चरणांश्च विक्षिपन् विशेषेण क्षिपन् दूरात्मभिरेवाहमानीतो मारणार्थमिति क्षिपन्निव चकारात् कंसञ्च अन्तः प्रयासात् प्रस्विन्नगात्रो जातः परिवृत्ते लोचने यस्य अन्तर्बहिः क्रियापगमः ज्ञानापगमश्च सूचितः तदा पपात लेण्डं विसृजन्निति पायुद्वारा मलं विसृजन् लेण्डशब्देन शकृदुच्यते क्षितावपतदिति न पातेन कश्चिदुपद्रुत इति सूचितम् ॥ ७ ॥

ततः कार्ये सम्पन्ने भगवान् सर्वैः पूजितो गृहे गत इत्याह । तद्देहत इति । समारब्धा वृद्धिः ततो न निवृत्ता गतेष्वपि प्राणेषु वर्द्धमानो देहस्पक्वकर्कटिकाफलवत् विदीर्णं कृत्वा विदीर्णद्वारा हस्ते निर्गते निवृत्ता मुखतो हस्तनिःसारणे क्रियापरिवृत्ता भवतीति तदर्थं देहविपाटनं व्यसोरिति निष्कासने हेतुः त्यक्तप्राणो देहः अशुचिर्भवतीति कृतकार्यत्वञ्च ज्ञापितम् अपाकर्षणं ततो निःसारणं पूर्ववत् करणञ्च महान् भुजो यस्येति भुजेनापि मुक्तिं दातुं शक्यत इति तस्य मुक्तावपि न सन्देह इत्यर्थः । महती तस्य क्रियाशक्तिरिति च ज्ञापितम् एवमपि कृत्वा अविस्मितः नहि तृणे छिन्ने कस्यचिदभिमानो भवति तदेव ज्ञापयति । अयत्नहतारिरिति । न कोऽपि भगवता प्रयत्नः कृतः अनायासेन हत इति कोचिन्मायापगमः स्वाज्ञयेति न प्रयत्नः ऊर्ध्वस्मयैः हसद्भिः सर्वैरेव देवैः प्रसूनवर्षैः पुष्पवृष्टिभिः सहितैः भगवानीडितः तत्र स्थितवाक्यानि न सन्ति किन्तु पुष्पवृष्टिरेव तदाह । वर्षद्भिरिति । वर्षणमिव स्तोत्रमिति प्रसूनानां वर्षो येषामिति पुष्पवृष्ट्यधिकारिणो देवाः तैर्वर्षद्भिर्यात् पुष्पैरेव ईडित इति स्तोत्रं भिन्नमेव एवं हेतुत्वेन केशिवधो निरूपितः ॥ ८ ॥

———

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

संज्ञा चेतना व्यादाय मुखं प्रसार्य्य हरिं प्रत्यापतदाद्रवत् स हरिरपि स्मयमान इति क्रमिरे ग्रसितुमायातः ग्रसेति वामाङ्गुष्ठं दर्शयित्वा उत्तरं वामं भुजं यथेति मूषकं घातयितुं मूषकबिले यथा कश्चिदुरगं प्रवेशयति तथैव केशिप्राणघातार्थं तस्य वक्त्रे इति उरगश्च संस्पृहमकष्टमेव यथा तत्र प्रविशति तथैव भुजोऽपि प्रविवेश ॥ ५ ॥

हन्त हन्त दंष्ट्राकराले तस्य वक्त्रविवरे नीलोत्पलमृणालसुकुमारस्तस्य भुजः कथं प्रविवेशेति शङ्काकुलं राजानं तत्त्वमाह । दन्ता इति । चर्वणाय भगवद्भुजं स्पृशन्तीति तथा ते दन्ता निपेतुः निर्मूलतया पेतुः तप्तमयः लोहं स्पृशन्तीति स्पृशः पदार्थो यथा अय इति कर्मणि षष्ठ्यभावो धाये रामोदमुत्तममिति निर्देशात् नीलोत्पलसुकुमारशीतलमपि तद्भुजमतिसन्तप्तवज्रनिर्मितमिव केशी स्वदन्तैः स्पृष्ट्वा अमन्यतेति भावः "पित्तेन दूने रसने सितापि तिक्तायते" इति न्यायात् ववृधे इति वृद्धिरघासुरवध इव व्याख्येया आमयो जलोदरम् ॥ ६ ॥

लेण्डं पुरीषम् ॥ ७ ॥

कर्कटिकाफलं हि पक्वमतिविदीर्णं स्यात्तत्तुल्यात् । अविस्मितः तादृशमहासुरहननेनापि विशिष्टगर्वरहितः । यतोऽयत्नेन प्रयासाभावेनैव हतो ऽरिर्येन सः । प्रसूनानि वर्षद्भिः श्रमापनोदनार्थं जलकणा अपि वर्षद्भिः ॥ ८ ॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

स केशी व्यादाय मुखं प्रसार्य हरिमापतत् प्रत्यभ्यद्रवत् स हरिरपि स्मयन् हसन् उत्तरं वामं भुजम् अस्य केशिनो वक्त्रे प्रवेशयामास यथा कश्चित्सर्पं बिले प्रवेशयति तद्वत् उरगबिलमुखस्य सुखदमेव तथा सर्वान्तरात्मनो ऽसुरदेहोऽपि सुखद एवेति फलितोऽर्थः ॥ ५ ॥

केशिनः भगवद्भुजं संस्पृशन्तीति तथा ते दन्ताः निपेतुः यथा तप्तमयः अग्नितप्तं लोहपिण्डं स्पृशन्तो निपतन्ति तद्वत् महात्मनः श्रीमत्पुरुषोत्तमस्य बाहुश्च यथोपेक्षितो ऽचिकित्सित आमयो जलोदरो वर्धते तथा तस्य केशिनो देहगतो ववृधे ॥ ६ ॥

स केशी प्रस्विन्नं गात्रं शरीरं यस्य परिवृत्ते लोचने यस्य सः लेण्डं पुरीषं व्यसृजन् उत्सृजन् व्यसुर्विगतप्राणः सन् पपात ॥ ७ ॥

महान्तौ विश्वपालनपोषणसमर्थौ भुजौ यस्य सः अयत्नेन हतो ऽरिर्येन सः कर्कटिकाफलं पक्वं विदीर्य्यते तद्वदुपमा यस्य तस्मात् व्यसोर्विगतप्राणात् तस्य देहात् भुजमपाकृष्य अविस्मितो गर्वरहितः संस्थितो ऽभूत्तदा प्रसूनवर्षैःप्रसूनानिवर्षद्भिः देवैरीडितो बभूव ॥ ८ ॥

———

भाषा टीका ।

वह केशी मूर्च्छा को छोडकर फिर क्रोध से उठ खडा भया और मुखको फैलाकर भगवान् के ऊपर दौडा उन भगवान् ने भी हंसकर वांये भुजाको उसके मुख में ऐसा प्रवेश कर दिया जैसे कोइ सर्प को बिलेमें प्रवेश करै ॥ ५ ॥

भगवान् के भुजा के स्पर्श होते मात्र उस केशी के सब दांत गिर पडे जैसे गरम लोहा के स्पर्श करने से होजावैं

देवर्षिरुपसंगम्य भागवतप्रवरो नृप ! ।
कृष्णमक्लिष्टकर्माणं रहस्येतदभाषत ॥ ९ ॥
कृष्ण कृष्णाप्रमेयात्मन् ! योगेश जगदीश्वर ! ।
वासुदेवाखिलावास सात्वतांप्रवर प्रभो ! ॥ १० ॥
त्वमात्मा सर्वभूतानामेको ज्योतिरिवैधसाम् ।
गूढो गुहाशयः साक्षी महापुरुष ईश्वरः ॥ ११ ॥
आत्मनात्माश्रयः पूर्वं मायया ससृजे गुणान् ।
तैरिदं सत्यसंकल्पः सृजस्यत्स्यवसीश्वरः ॥ १२ ॥

भाषा टीका ।

तैसे उसके देह में गया भगवान् महात्मा का बाहु वैसा बढा कि जैसे छोड देने से व्याधि वढ जावै तैसे ॥ ६ ॥

बढते हुये उस भगवान् कृष्ण के बाहु से उसका वायु रुक गया फिर वह चरणों को फेंकने लगा उसके देह में पसीना होगई उसके नेत्र घूमने लगे फिर मलमूत्र को गिराता हुआ प्राण को छोडकर पृथिवी में गिर पडा ॥ ७ ॥

महा भुजा वाले भगवान् ने मरे हुये उसके पके ककदी फल सरीके देह से अपने भुजा को निकाल लिया विना यत्न से ही शत्रु को मारकर विस्मित भी नहीं भये फिर देवता सब बडे विस्मित होकर फूलों की वर्षा करके भगवान् की स्तुति करते भये ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

कंसाय कृष्णमादिश्य तद्रहस्यादिपैशुनैः ।
कंसघातादिकृष्णस्य कार्यमावेदयन्मुनिः ॥

तदाह । देवर्षिरित्यादिना । नचायं सूचकः किन्तु सर्वसुहृदित्याह । भागवतप्रवर इति ॥ ९ ॥

अस्मद्रहस्यं वैरिणि कंसे सूचितवानिति माशङ्कीरित्याह । कृष्णकृष्णेत्यादिना । अयम्भावः त्वमीश्वरो भूभारदैत्यसंहारायावतीर्णोऽस्यतस्तदनुरूपाचरणेन विश्वं परिपालयेति तत्र त्वयि तावद्भयशङ्कैव नास्तीत्याह । अप्रमेयात्मन्नपरिच्छिन्नरूप ! योगेशाचिन्त्यप्रभाव जगदीश्वर विश्वनियन्तः वासुदेव सर्वभूतेषु वर्तमान अखिलावास सर्वस्याश्रय संप्रति सात्वतां प्रवर श्रेष्ठ प्रभो सवशीके ! ॥ १० ॥

कथमेवं रूपोऽहमितिचेदत आह । त्वमात्मेति । नहि त्वं जीववत्परिच्छिन्नः किन्तु सर्वभूतानामान्तर एको ऽनुस्यूत आत्मा अन्तरनुस्यूतत्वे दृष्टान्तः एधसां काष्ठानामन्तर्ज्योतिरिवेति भूतेषु स्थितोऽपि तैर्न दृश्यस इत्याह । गूढ इति । अत्र हेतवः गुहाशयो बुद्धेरप्यान्तरः किञ्च साक्षी नहि साक्षी दृश्यते इत्यर्थः । आपिच महापुरुषः अतः परिच्छिन्नमतिभिर्न ज्ञायस इत्यर्थः । तर्हि सर्वान्तरत्वे किंप्रमाणमत आह । ईश्वर इति । नहीश्वरं विना परतन्त्राणां जीवानां प्रवृत्तिर्घटत इत्यर्थः ॥ ११ ॥

अहमीश्वरोऽन्यत्सर्वमीशितव्यमित्येतदेव कुत इत्यत आह । आत्मनेति । साधनान्तरानिरपेक्ष एवात्माश्रयः स्वतन्त्रः मायया शक्त्या भवान् गुणान् ससृजे सृष्टवान् तैः सृष्टैर्गुणैरिदं विश्वं सृजसि अत्सि संहरस्यवसि पालयसि ननु सृष्ट्यादिक्रिया षट्कारकसाध्यैव दृष्टेत्याह । सत्यसंकल्प इति । नहि संकल्पैकसाध्ये बहिः साधनापेक्षेति भावः । अतस्त्वमीश्वर इत्युपसंहारः ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

कृष्णभक्तेरादिगुरुं महाभागवतोत्तमम् ।
देवर्षिं नारदं वन्दे कृष्णलीलाप्रवर्त्तकम् ॥

भाष्यस्य रहस्यत्वाद्रहस्यभाषत । अन्यत्तैः । तत्र सर्वसुहृदिति व्रजेऽपि सेनासहितकंसजरासन्धाद्यागमनभयनिवर्त्तनाय तथाचरणात् । कंसादेरपि मुक्तिपर्य्यवसायकत्वात् । यद्वा दिव्यज्ञानत्वाद् देवश्चासौ ऋषिश्चेति श्रीगोपालमन्त्रगणद्रष्टा च इति परमान्तरङ्गत्वं सूचितम् । भागवतप्रवर इति । भगवतो लीलाधिकारनियुक्तभक्तेषु श्रेष्ठः । ततस्तत्सम्पादनार्थं तस्य तथा चेष्टा रहस्यागत्य निवेदनञ्च युज्यत एवेति भावः ॥ ९ ॥

मया यत्तु कंसं प्रति सूचितं तद्भवदीयतादृशलीलावसरं ज्ञात्वैव यतो भवत्प्रसादेन भवतस्तत्त्वं लीलानुक्रमञ्च जानामीति ज्ञापयन्नाह । कृष्ण कृष्णेत्येकादशभिः । तत्र तत्त्वं तावदाह त्रिभिः । तत्रैव कृष्णेति युग्मकम् । तत्र च श्रीकृष्णरूपत्वमेव मूलमित्याशयेन प्रथमं तन्नाम्ना सम्बोधयति कृष्णेति वीप्सा तन्निर्धारणाय । परममधुरस्वलीलाविष्टस्य तस्य तेनैवात्मन्यवधानस्याद्रित्येतदर्थाय च । मूलरूपत्वमेव स्पष्टयन् श्रीकृष्णस्य स्वरूपलक्षणमाह । अप्रमेयात्मन् ! सर्वातीतत्वेनानन्त्येन चाप्रमेयः सर्वापरिच्छेद्यः । स्वस्यापि विस्मापक आत्मा स्वयं भगवद्रूपं स्वरूपं यस्य हे तथाभूत ! तद्रूपस्थलक्षणान्याह । हे योगापरपर्य्यायया योगमायया पूर्णस्वरूपशक्त्या ईशानलील अत एव हे प्रापञ्चिकाप्रापञ्चिककृत्स्नस्येश्वर ! । अत एव हे तत्र तत्र सर्वत्र विभुत्वाद्वसन् विराजमान ! अत एव हे तत्तदाश्रय ! तत्र स्पष्टमेव

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

श्रीकृष्णत्वं व्यञ्जयन् तदीयपरिवाराणां तादृशलीलानाञ्च नित्यत्वमपि स्पष्टयति । सात्वतां क्षत्रियरूपाणां गोपरूपाणाञ्च सात्वतां मध्ये प्रवर श्रेष्ठ । जातौ निर्द्धारणे षष्ठी । तत्परिवारक तादृशलीलत्वेनैव सर्वदा विराजमानेत्यर्थः । जयति जननिवास इत्यादेः तथा नित्यत्व हेतुः हे प्रभो ! कालादीनामप्युपरिप्रभवनशीलेति कृष्णादिपदे स्तुषमश्यामसुन्दरत्वादिना तन्नाम प्रसिद्धासमोर्ध्वस्व रूपत्वेमत्र यादवगोपपरिकर तदुचितलीलत्वं तव तत्त्वमिति विज्ञापितम् ॥ १० ॥

एवं सम्बोधनेनैव तस्य निजतत्त्वं दर्शयित्वा साक्षात्तत्त्वमपि "विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जग"दित्यनुसारेण दर्शयति त्वमिति द्वाभ्याम् । सर्वभूतानां प्रापञ्चिकस्थावरजङ्गमानामेकस्त्वमात्मा । परमात्मा तृतीयं सर्वभूतस्थमित्युक्तेः । महापुरुषो महत्स्रष्टा च । एकन्तु महतः स्रष्टृत्युक्तेः । ईश्वरो ब्रह्माण्डान्तर्यामी च । द्वितीयं त्वण्डसंस्थितमित्युक्तेः । एधसामिति सर्वत्र स्थितस्यापि ज्योतिषो यथा तेष्वेकांशेन स्थितिस्तेष्वेव झटित्युपलब्धिश्च तद्वदित्यर्थः ॥ ११ ॥

अत्र मुख्यत्वेन प्रस्तुतोपयोगित्वेन च महापुरुषकार्य्यं दर्शयति । आत्मनेति । तैर्व्याख्यातं तत्र मायया ससृज इति साधनान्तरापेक्षमाशङ्क्य व्याचष्टे शक्त्येति सापि तस्यैव शक्तिरिति न दण्डादिवत्त्वमिति भावः ॥ १२ ॥

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

अथेत्थं हतकेशिने भगवते ऽनन्तरं कर्तव्यमावेदयति देवर्षिरिति हे नृप भागवतश्रेष्ठो देवर्षिर्नारद उदारचेष्टितं कृष्णमुपसङ्गम्य रहस्येकान्ते एतद्वक्ष्यमाणमुवाच ॥ ९ ॥

तदेवाह । कृष्णेति । सर्वज्ञं कर्तव्याभिज्ञमपि भगवन्तं त्वरयन्निवावेदयितुं तावत्कृतं केशिवधमभिनन्दितुकामः तावत्स्वसङ्कल्पमात्रपरिकल्पितजगत्पावनार्थमवतीर्णस्य तद्दुष्कृद्विनाशनमुचितमेवेत्यभिप्रयन् स्तौति । कृष्णेति द्वाभ्याम् । यतोऽप्रमेयत्वादिगुणकस्त्वं आत्मनैवात्माश्रयः सृजसीति हेतुहेतुमद्भावपरतया व्याख्येयं कर्त्राद्यनेककारकसाध्या हि सर्वा क्रिया लोके दृष्टा जगत्सृष्ट्यादिक्रिया तु कर्त्रादिकारकषड्भावापन्नत्वदेकसाध्येत्युच्यते पूर्वं सृष्टेः प्राक् त्वमात्मना स्वेनैव कर्त्रा आत्मा स्वयमेवाश्रय आधारो यस्य तथाभूतः मायया स्वसङ्कल्पेनैव गुणान् स्वशरीरभूतप्रधानगुणकार्यभूतान्महदादीन्सृजसीति हि तदर्थः "तदात्मानं स्वयमकुरुत ब्रह्मवनं ब्रह्म स वृक्ष आसीत् आत्मन आकाशः संभूत" इत्यादि श्रुतेरिति भावः । तत्रैकस्यैवानेककारकभावोपयुक्तगुणवत्तां वदन् सम्बोधयति । अप्रमेयात्मन्नित्यादिभिः । कथमेकस्यानेककारकभावापत्तिरित्यतः सम्बोधयति । योगेशेति । विविधविचित्रानन्तशक्ते इत्यर्थः नन्वु महदादय एव सृज्या नत्वहं तत्राह । अप्रमेयात्मन्नपरिच्छेद्यस्वरूप । अनेन सर्वसृज्यशरीरकत्वेन सर्ववस्तुसामानाधिकरण्यार्हत्वात्त्वमेव सृज्य इति भावः । ननु चतुर्मुखादयः सृष्ट्यादिकर्तारो नत्वहं तत्राह । जगदीश्वर जगन्नियन्तः कार्यभूतजगदन्तर्भूतचतुर्मुखादिनिन्तृत्वेन तद्गतं कर्तृत्वं त्वय्येव पर्यवसन्नमिति त्वमेव कर्त्तेति भावः । ननु ब्रह्माण्डादिर्जगदाधारो नत्वहमित्यत आह । वासुदेवेति वासुदेवशब्दार्थं वदन्सम्बोधयति । अखिलाधारेति । अखिलस्य ब्रह्माण्डान्तर्गतादिवस्तुन आधारभूत अखिलमाधारो व्याप्यं यस्य तथाभूतेति वार्थः नन्वेवं भूत परमात्मा नत्वहमित्यत आह । सात्वतामप्रवरेति । सात्वतामिति कर्तरि षष्ठी सात्वतैर्भक्तैर्नितरां प्राप्यमाणेत्यर्थः । परमात्मैव सन् भक्तैः समाश्रयणीयत्वायैवं रूपेणावतीर्ण इत्यर्थः । प्रभो ! अकर्मवश्य इत्यर्थः ॥ १० ॥

परमात्मत्वमेवोपपादयति । त्वमिति । सर्वभूतानां ब्रह्मादिस्थावरान्तानां महदादिपृथिव्यन्तानाञ्चैकस्त्वमेवात्मान्तः प्रविश्य प्रशासनेन धारकः एकः सर्वत्रैकरूपः व्याप्यवस्तुगतविकाररहित इत्यर्थः । इदमेव हि परमात्मत्वं यत्सर्वानुप्रवेशतद्गतधर्मास्पर्शनियमनभर्तृत्वम् एकत्वे दृष्टान्तमाह । यथैधसां काष्ठानामन्तर्ज्योतिरेधोगतवक्रत्वादिभिर्न स्पृश्यते तद्वदित्यर्थः । यद्यहं सर्वभूतानामात्मा तर्हि तैर्दृश्येयेत्यत आह । गूढ इति । अत्रापि ज्योतिरिवैधसामित्येतद्दृष्टान्ततया योज्यं यथैधःसु ज्योतिरन्तर्गतमपि गूढं मथनाद्युपायमन्तरेण न तेभ्यो विविच्य दृश्यते तथा योगविशुद्धमनसा विना न दृश्यस इत्यर्थः । क गूढ इत्यत आह । गुहाशयः गुहायां हृदयकुहरे जीवे वा शेत इति तथा कारणत्वोपयुक्तं सार्वज्ञ्यमाह । साक्षीति । सर्वस्य साक्षाद्द्रष्टा सर्वज्ञ इत्यर्थः । अत एव महापुरुषः ब्रह्मादिजीवविलक्षणः पुरुष ईश्वरस्तेषामधिपतिश्च ॥ ११ ॥

यत एवं भूतस्ततो हे ईश्वर सत्यसङ्कल्पस्त्वं सकलकारकभावमापन्नः तावत्स्वसङ्कल्पेन गुणकार्यभूतान् स्वशरीरभूतान्महदादिपृथिव्यन्तान्सृजसि ततस्तैर्गुणैरिदं परिदृश्यमानं विचित्रसन्निवेशविशिष्टं ब्रह्मादिस्तम्बपर्यन्तं जगत्सृजसि अवसि पालयस्यत्सि संहरसि च ॥ १२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अप्रमेयात्मन् ! अपरिच्छेद्यस्वभाव नन्वेवञ्चेदङ्गुष्ठमात्रः पुरुष इत्यादिपरिमाणवचनस्य का गतिरिति तत्राह । योगेशेति । योगिनां योगविषयत्वेन स्वेच्छाविग्रहग्रहणेन तदुपपत्तेर्योगेशत्वस्य वायुविषयत्वमिति मन्दाशङ्कां निरस्यति । जगदीश्वरेति । "आत्मन एष प्राणो जायते आकाशाद्वायुः प्राणः श्रद्धा खं वायु"रित्यादिश्रुतेः वायोर्जगदन्तःपातित्वेन तदीशत्वं न पृथग्वक्तव्यमिति भावः कृष्णशब्दस्य बह्वर्थविषयत्वेनोक्तविशेषणविशिष्टः क इति संशयनिवृत्तिः कथमिति तत्राह । वासुदेवेति । वासुदेवशब्दस्यार्थान्तरमाह । अखिलेति । नन्वेवञ्चेत्संशयस्तदवस्थ इति तत्राह । सात्वतामिति । नन्वनेन सात्वज्जातिश्रेष्ठ इत्येवायातं नतु तदाधिपत्यमित्यत उक्तं प्रभो इति समर्थ अधिपतौ प्रभुरिति ॥ १० ॥

उक्तविशेषणानामन्यत्रापि कथञ्चिद्वृत्तिसंभवेनापि विष्णुत्वानिश्चय इति तत्राह । त्वमिति । प्रत्यगात्मान्तर्यामीत्यर्थः । ईदृशोऽन्यो नास्तीत्याह । एक इति । एकस्य च बहुष्ववस्थानं कथमिति तत्राह । ज्योतिरिति । मथनादिना दृग्विषयत्वेनाग्नेः सत्ता ज्ञायते न तवेति तत्राह । गूढ इति । कथं गूढत्वमित्यत उक्तं गुहेति हृदयगुहायां शेत इति जीववत्तर्हि त्वं संसारी चेतनः किन्नेत्याह । साक्षीति । संसा-

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली

रिणामनुष्ठीयमानयोः पुण्यापुण्ययोर्द्रष्टा वायोरन्तःस्थत्वेन साक्षित्वेऽपि मुख्यसाक्षित्वं तवेत्याशयेनाह । महापुरुष इति । पुरुषोत्तम इत्यर्थः । पुरुषोत्तमस्यैव मुख्यसाक्षित्वं यतोऽत ईश्वरत्वं तस्यैव मुख्यं न पशुपतेरिति भावेनाह । ईश्वर इति ॥ ११ ॥

अलौकिकत्वं वस्तुनोऽसाधारणलक्षणेन निर्णेतुं शक्यते इति तत्राह—आत्मनेति । पूर्वं जगदादौ आत्मना परप्रेरणामन्तरेण केनोपादानेनेत्यत उक्तं माययेति मायया प्रकृत्या कुलालस्य शालाद्यधिष्ठानदर्शनादस्य किमधिष्ठानमिति तत्राह । आत्माश्रय इति । "स भगवान् कस्मिन्प्रतिष्ठित इति स्वे महिम्नी"ति श्रुतेः गुणान् महदादीन् ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

देवश्चासौ ऋषिः श्रीगोपालमन्त्रगणद्रष्टा चेति सर्वलीलातत्त्वतदनुक्रमाज्ञत्वं विवक्षितं परमान्तरङ्गत्वञ्च सूचितं भागवतप्रवर इति भगवतो लीलाधिकारनियुक्तभक्तेषु श्रेष्ठः । ततस्तत्सम्पादनार्थं तस्य कंसादौ तत्तत्कथनं तस्य रहस्यागत्य निवेदनञ्च युज्यते इति भावः ॥ ६ ॥

मया यत् कंसं प्रति सूचितं तदुपयदीयतादृशलीलावसरं ज्ञात्वैव यतो भगवत्प्रसादेन भगवतस्तत्त्वं लीलानुक्रमञ्च जानामीति विज्ञापयन्नाह । कृष्ण कृष्णेत्येकादशभिः ॥ १०—२४ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

ततो नारदस्य स्वापराधक्षमापणार्थं वाक्यानि निरूपयन् पञ्चदशभिः प्रथमतः तस्य समागमनमाह । देवर्षिरिति । यदैव भगवता केशी हतः तदा भगवत्समीपे न कोऽपि स्थित इति तदैव समागतः निकटे भक्तवत्प्रश्नं कुर्वन् तत्राह । उपसङ्गम्येति । देवर्षित्वाच्च तदर्थपरिज्ञानं भगवान् कथं तमनुज्ञातवानित्याह । भागवतप्रवर इति । भागवतानां मध्ये प्रवरः श्रेष्ठः भागवतमार्गोपदेष्टृत्वात् नृपेति सम्बोधनम् अनभिप्रेतोऽप्यागच्छतीति राजलीलायाः परिज्ञापनार्थमुच्यमानः कथञ्चित् अनभिप्रेतो नारद इति भगवान् मास्येत् अतः कथञ्चिन्निर्भयो भूत्वा तथा वदतीत्याशङ्क्याह । अक्लिष्टकर्माणमिति । स्वतोऽप्यागमनं परमानन्दरूपत्वात् सम्भवतीति तदाह । कृष्णमिति रहसीति । उभयोरहस्यत्वे एकान्ते वा गत्वा उभयोरपि तथा सामर्थ्यसम्भवान्नानुपपत्तिः इदं वक्ष्यमाणस्तोत्रपूर्वकं निवेदनात्मकमभाषत ॥ ६ ॥

स्वापराधनिवृत्त्यर्थं त्रिधास्तोत्रं चकार ह ।
मूलरूपन्तु सम्बोध्य मध्यकार्ये निरूपिते ।
ततोऽवतारकार्यस्य निरूपणमतः कृतम् ॥
अनुमोद्य करिष्यन् यः पञ्चभिस्तदुदीरितम् ।
सामान्येन कृतं द्वेधा द्वाभ्यां स्वेन तथान्यतः ॥
ज्ञानभक्तिविभेदेन स्वरूपञ्च निरूपितम् ।
आनन्दचित्सतां रूपं ज्ञाते भक्तविहीनतिः ॥
कार्यार्थमवतीर्णत्वात् भक्तिमार्गे न दूषणम् ।
कृतन्तु भगवानेवस्त्येवं ससभिरीर्यते ॥
कर्ममार्गेऽप्यदोषाय सामान्यधर्मीर्यते ।
ततोऽन्ते ज्ञानभक्ती च स्वापराधो यतो नहि ।
उपक्रमगतिभ्याञ्च षोडशात्मा निरूपितः ॥

प्रथमं भगवन्तं नवधा सम्बोधयति । कृष्ण कृष्णेति । मूलरूपं निरूपयन् कृष्णेति सदानन्दो मूलम् अन्यथा जगतस्तदात्मत्वं फलरूपता च न स्यात् तत्र प्रमाणद्वयमाहानुभवं वेदश्चाप्रामाण्यां पुनः कृष्णेति द्विरुक्तिरादरे परमानन्द एवादरणीयो भवतीति यद्यपीदमित्थंतया नानुभूयते तथापि वस्तुस्वाभाव्यात् तत्रादर उत्पद्यते अत्रार्थे प्रमाणं वदन् वेदानां गम्य इति तदर्थं वेदोत्पत्तिरिति द्वितीयं प्रमाणमाह । अप्रमेयात्मन्निति । न प्रमातुं योग्यः केनाप्यात्मा यस्य सर्वथा प्रमाणभावो नास्तीति न मन्तव्यम् आत्मत्वात् अतो भगवतैव स्वरूपकथनञ्चोपपद्यते एवं द्वाभ्यां प्रमाणरूपतां निरूप्य साधनरूपतां निरूपयति द्वाभ्यां योगीशजगदीश्वरेति । बहिर्योगः अन्तरीश्वरत्वेन नियमनं तदर्थमाराधना च यथा सम्यगेव प्रेरयतीति ईश्वरत्वाद्वावश्यं सेव्य इति फलरूपत्वमाह द्वयेन । वासुदेवाखिलावासेति । वासुदेवो मोक्षदाता अखिलावासेति तस्य दाने परिज्ञानं भोक्तृरूपञ्च सः भोग्यरूपश्चेति फलत्वञ्च सम्पद्यते प्रमेयरूपत्वेन निरूपयन् भगवत्सिद्धान्तासिद्धमेव प्रमेयमिति ज्ञापयितुं द्वयमाह । सात्वतां प्रवर प्रकर्षेण व्रियत इति प्रवरः प्रकृष्टो वा वरः भर्ता सात्वतैः यो व्रियते स एव प्रमेयमिति यश्च परिपालयितुं शक्तः स एव च पतिः एवमुपास्योपासकयोः निरूपको धर्मो निरूपितः ॥ १० ॥

एवं नवधा मूलरूपं निरूप्य सदोषपरिहारार्थं भगवतः सर्वात्मकत्वं निरूपयति । त्वमात्मेति । जीवा अप्यात्मानो भवन्तीति तद्व्यावृत्त्यर्थमेक एवत्वं सर्वभूतानामात्मेति जीवाः प्रत्येकमात्मानः अयमात्मशब्दः ब्रह्मवादे परमात्मपरः योगशास्त्रे विभूतिपरः मयवच्छास्त्रे आत्मनामात्मा आधिदैविको गङ्गेव सांख्ये तु न जीवब्रह्मविभागः पुरुषेश्वरयोरत्रेत्यत्र निषिद्धत्वात् चतुर्ष्वपि पक्षेषु भगवतो न विलक्षणत्वं प्रतीतिस्तूपाध्यादिविषय इति तत्र दृष्टान्तमाह । ज्योतिरिवैधसामिति । सर्वेषामेव काष्ठानां मध्ये ज्योतिरग्निरेक एव वर्णान्तरप्रतीतिस्त्वौपाधिकी सम्बन्धी निरूपितः ननु तत्सेवाधिकरणत्वम् अनेन काष्ठमग्निरेव काष्ठतापरमग्नेरित्यप्रतिबन्धकात् तस्मिन् दग्धे स्वरूप एव वन्हिस्तिष्ठतीति अत एव मूढः विद्यमानमपि न कोऽपि जानाति अग्नेः स्वरूपमुभयथा प्राप्नोति आवव्यवहाराद् दाह्याभावाद्वा उपाधिरुभयस्यापि प्रतिबन्धकः यथा न दहति तथा न शामयति च तथा सङ्घाते जगति विद्यमाने आत्मा न स्वरूपं प्राप्नोति न साधनैर्नापि बाधकैः एतदर्थमेवमुक्तवान् अस्तीत्यत्र मथनवत् प्रमाणमाह । गुहाशय इति । गुहायामाशेत इति अन्यथा सर्वप्रकाशो न स्यात् किञ्च साक्षी सर्वकर्माणि पश्यति अन्यथा अयमहमेतत्सर्वेद्रष्टेति अन्यथा फलभोगोऽपि न स्यात् इत्यपि निरूपितं जीवव्यावृत्त्यर्थमाह । महापुरुष इति । अनुभावः पुरुषो महापुरुषः अनुभावश्च परमकाष्ठामापन्नः चतुर्ष्वपि पक्षेषु भगवद्धर्म एव किञ्च ईश्वरस्त्वं सर्वनियामकः नियम्यास्तु जीवा इति यथा नियमयसि तथा कुर्वन्तीति स्वरूपत्वात्प्रेरकत्वाच्च सामान्यन्यायेन न मम दोषः ॥ ११ ॥

किञ्च उत्पत्तिविचारेणापि त्वयैव भिन्नतया सृष्टा इति

श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी।

न कंसस्य नापि मम दोष इत्याह। आत्मेति त्वं कर्त्ता आत्माश्रयस्त्वमेवाधिकरणं स्वरूपास्थितावपि त्वमेव करणमिति प्रथमतः करणानिर्देशः आत्मना मायया सर्वभवनसामर्थ्यमप्यात्मैव उभयेनैलोके मायया लोकानामन्यथा प्रतीत्यर्थं वा उत्पादितास्तु सच्चिदानन्देभ्यः सत्वरजस्तमांसि लोकानां प्रतीतिस्तु प्रकृतिरिति अन्यथा भगवतः कर्तृत्वमेव न स्यात् स्वातन्त्र्याभावात् स्वातन्त्र्येतु उभयोः स्वतन्त्रता न सम्भवतीति प्रकृतिस्तदधीना मन्तव्या अत आत्मनैव गुणान् सृजन् मायामपि करणत्वेन स्वीकृतवान् गुणानामुपादानमात्मैव स्वरूपञ्च अन्यथा प्रतीत्यर्थमेव भगवद्रूपा भगवच्छाक्तिर्व्याप्रियत इति पश्चात् तैरेव इदं सर्वं जगत् सृजसि अत्सि भक्षयसि अवसि पालयासि ननु किमर्थमेवं करोतीत्याशङ्क्याह। ईश्वर इति। ईश्वरेच्छाया नियन्तुमशक्यत्वात् अन्यथा स्वविचारेण प्रयोजनस्याभावात् लीलायामपि प्रयोजनासम्भवः अत ऐश्वर्यमेव नियामकमिति अतस्त्वयैव सृष्टमिति त्रिभिर्गुणैरपि अग्रिमकार्ये च विचारितामिति न कस्यचित् दोषः साक्षाद्भगवतः सर्वं जायत इति पक्षः प्रकृते न सम्भवति तथा सति वैलक्षण्ये नियामकाभावात् स्वापराधस्तथैव स्वकृतवैयर्थ्यं च स्यादतोऽन्य एव पक्ष आश्रितः ॥ १२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

व्रजलीलां समाप्य स्वां लीलां दर्शय माथुरीम्।
इत्यावेदयितुं तत्र देवर्षिस्तुष्टुवे प्रभुम्॥

भागवतप्रवर इति। मथुरास्थानामपि भागवतानां प्रकृष्टो वरो मनोरथसिद्धिर्यस्मात् सः। अक्लिष्टेन अक्लेशेनैव कर्म केशिवधादिकं यस्य तम् ॥ ९ ॥

प्रथमं कृष्ण कृष्णेत्यानन्देन भगवतस्तघनामसङ्कीर्त्तनकन्दकाभासो नारदोऽस्मीत्यात्मानं स्मारयति। अप्रमेयः प्रमातुमशक्य आत्मा मनो यस्येत्यतः परं व्रजे एव विराजमानो व्रजस्थान् पित्रादीनानन्दयिष्यसि मथुरां यास्यंस्तत्रत्यान् वेति कस्त्वन्मनो वेदयितुं क्षमत इति भावः। किञ्च योगेश योगमायाधीश्वरत्वादुभयत्रापि विराजस्येवेति भावः। जगदीश्वर इति। जगत्कार्य्यं भारावतरणमपि कर्त्तव्यमिति भावः। वासुदेवेति। नन्दस्य पुत्रत्वेन स्वस्य प्रसिद्धिमकार्षीरेव। इदानीं वसुदेवस्यापि तद्भाग्यं प्रकटयेति भावः। अत एवाखिलावासः अखिलांस्त्वद्भक्तान् कंसभयाद्विच्युतानानीय मथुरायां वासयेत्यर्थः। यस्त्वं सात्वतां यादवानां प्रवरः। यद्वा प्रकृष्टो वरो मनोरथो यस्य सिद्धिःस्वरूपोऽसि। प्रभो! त्वं सर्वं कर्तुं शक्नोषि। ननु मे यथेच्छा तथा करोमि करिष्यामि च तत्र त्वं किमेवं विशेषं निवेदयासि तत्राह त्वमात्मा ममान्तर्यामी त्वमेव मां निवेदयितुं प्रेरयसि तत्राहं किं करोमीति भावः। न केवलं ममैव अपि तु सर्वभूतानामन्तश्चित्ते तिष्ठसि। एधसां काष्ठानामन्तर्ज्योतिरिव गूढः किञ्च गुहाशयः यथा त्वं नन्दपुत्ररूपेण गोवर्द्धनगुहायां शेषे तथैवान्तःकरणगुहायामन्तर्यामिरूपेण शेषे साक्षी तत्र शयानोऽपि सर्वं साक्षात् पश्यसि। तत्र हेतुः महापुरुषः। अप्रतिहतयोगबल इत्यर्थः। किञ्च महापुरुषा ईशितव्या अपि भवन्ति त्वन्त्वीश्वरः सर्वनियन्ता ॥ १० ॥ ११ ॥

किञ्च त्वं यद्यस्मानस्मद्बुद्ध्यादिकं सर्वमिदं जगच्च नास्रक्ष्यस्तदा अहमप्येतं न न्यवेदयिष्यमित्याह। आत्मनेति। आत्माश्रयः स्वतन्त्रः आत्माना आत्मरूपया शक्त्या भवान् गुणान् महदादीन् ससृजे। तेनेदं त्वं यदि सृष्टवानेव तदान्ये जगज्जनास्त्वत्प्रेरिताः स्वस्वकृत्यार्थं चेष्टन्ते तथैवाहमप्यद्य त्वामेतन्निवेदयितुमेवं चेष्टे इति भावः ॥ १२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

भागवतप्रवरः छान्दोग्यप्रसिद्धभूमादिशब्दवाच्यभगवद्विद्यामुपनयनपूर्वकं निजाचार्य्याद्गृहीत्वा तद्विद्योपदेशेन भागवतसम्प्रदायप्रवर्तकत्वात् भागवतेषु प्रवरो मुख्यः एतद्वक्ष्यमाणममाषत ॥ ९ ॥

कंसं तद्वधार्थम्प्रवर्त्य दैत्यविनाशाय धर्मसेतुरक्षणाय चावतीर्णोऽस्यतः दिष्ट्या केशी हतः चाणूरादिसहितं कंसञ्च निहतं द्रक्ष्ये इत्यादि वक्तुकामः प्रथमं सदानन्दत्वाप्रमेयत्वादिगुणवर्णनेन भगवन्तं स्तौति। कृष्णेति त्रिभिः। हे कृष्ण सदानन्द आदरे वीप्सा तस्येयत्तानवच्छिन्नत्वं दर्शयितुं सम्बोधयति। अप्रमेयात्मन्निति। अप्रमेयः सकलप्रमाणैः इयत्तावच्छेदेन प्रमातुमशक्यः आत्मा स्वरूपं विग्रहो वा यस्य ननु तर्हि कथङ्गमनागमनादिव्यवहारसिद्धिरित्यतः सम्बोधयति। योगेशेति। हे अचिन्त्यप्रभावेत्यर्थः। सर्वनियन्तृत्वेन सम्बोधयति। जगदीश्वर! निखिलप्रपञ्चनियन्तः! सर्वनियन्तृत्वेऽपि भक्तवश्यतां दर्शयितुं सम्बोधयति। वासुदेवेति वसुदेवापत्य देवकीजठरधार्य्येऽपि तस्मिन् सर्वाधारत्वं दर्शयितुं सम्बोधयति। अखिलावास! हे सर्वचेतनाचेतनाधार एकान्त्युपास्यतया सम्बोधयति। सात्वतां प्रवरेति सर्वशक्तिमत्त्वं दर्शयितुं सम्बोधयति प्रभो इति ॥ १० ॥

एवं सम्बोधनैः संस्तुत्य सर्वात्मादिना स्तौति। त्वमिति। सर्वेषां चेतनाचेतनानां त्वमात्मा आश्रय इत्यर्थः। किञ्च एधसां काष्ठानामन्तर्ज्योतिरिव सूक्ष्माग्निरिव सर्वभूतानां गुहाशयस्त्वमसि हृदाकाशगोऽसि एधसामन्तर्ज्योतिर्वत्सर्वगोऽपि सर्वदोषास्पृष्टोऽसीत्यर्थः। एवमेव गूढोऽसि यथैधःसु अरणीप्रभृतिषु उपायेनाग्निलाभस्तथोपायतोऽधिकारिभिर्द्रष्टुं शक्योऽसीत्यर्थः। किञ्च सर्वेषां भूतानां साक्षी अतः महापुरुषः सर्वश्रेष्ठस्त्वमेवासि ॥ ११ ॥

अथ स्वाश्रयत्वेन विश्वजन्मादिहेतुत्वेन च स्तौति। आत्मनेति ॥ १२ ॥

भाषा टीका।

इसके अनन्तर सब भागवतों में श्रेष्ठ देव ऋषि नारदजी भगवान् के पास जाकर सर्व कार्य कर्ता कृष्ण भगवान् से एकान्त में यह कथन करते भये ॥ ९ ॥

स त्वं भूधरभूतानां दैत्यप्रमथरक्षसाम् ।
अवतीर्णो विनाशाय सेतूनां रक्षणाय च ॥ १३ ॥
दिष्ट्या ते निहतो दैत्यो लीलयाऽयं हयाकृतिः ।
यस्य हेषितसंत्रस्तास्त्यजन्त्यनिमिषा दिवम् ॥ १४ ॥
चाणूरं मुष्टिकं चैव मल्लानन्यांश्च हस्तिनम् ।
कंसं च निहतं द्रक्ष्ये परश्वो ऽहनि ते विभो ! ॥ १५ ॥
तस्यानुशङ्खयवनमुराणां नरकस्य च ।
पारिजातापहरणमिन्द्रस्य च पराजयम् ॥ १६ ॥

भाषा टीका ।

हे कृष्ण ! हे अप्रेयातमा ! हे योगियों के ईश ! हे जगदीश्वर ! हे वासुदेव ! हे संपूर्ण जगत् के आधार ! हे सात्वतों के पति ! हे प्रभो ! ॥ १० ॥

आप सब भूतों के अन्तर्यामी हो और एकही जैसे कि अनेक काष्ठों में अग्नि रहता है तैसे अन्तःकरण में रहने वाले गुप्त हो सब के साक्षी हो महा पुरुष हो ईश्वर हो ॥ ११ ॥

आपने अपने आत्माही में स्थित होकर सृष्टि से पहिले माया से इन महदादिकों को सृजा है आप सत्य सङ्कल्प होने से उन गुणों से इस जगत को सृजते हो पालते हो संहारभी करते हो आप इन कार्यों में ईश्वर समर्थ हो ॥ १२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

प्रस्तुतमाह । सत्वमिति । भूधरभूतानां भुवं धरन्तीति भूधरा राजानस्तद्रूपाणाम् ॥ १३ — १४ ॥

परश्वोऽहनीति अद्यैवाक्रूर पश्यति श्वो मथुरां गन्तासि परश्वश्चाणूरादींश्च त्वया निहतान् द्रक्ष्यामीति सिद्धवन्निर्देशो विज्ञापनप्रकारविशेषः ॥ १५ ॥

तस्यानु तदनन्तरं शङ्खादीनाम् शङ्खः पञ्चजनः वधं द्रक्ष्यामीति शेषः भाविनिर्देशमात्रमेतन्नत्वानन्तर्यं विवक्षितम् ॥ १६ ॥ — ॥ १७ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

तदेवमुभयरूपं दर्शयित्वा लीलामनुक्रामन् निजरूपावतारे कारणमाह । स त्वमिति । तादृशोऽपि त्वं दैत्यादीनां स्वभक्तिविरुद्धानां साधूनां स्वभक्तिप्रवर्त्तकानां पाठान्तरे सेतूनां स्वभक्तिमर्य्यादानां राजरूपाः प्रमथाः काशिराजादयः ॥ १३ ॥

तत्र पूतनादयो ये विनाशितास्तेऽपि दुष्टा एव किन्त्वयं परमदुर्मार इत्याह । दिष्ट्येति । अयमधुना साक्षादेवेत्यर्थः । अतस्त्वं केशव नामा भवितासीति शेषः । तथाच तेनोक्तं श्रीविष्णुपुराणे । यस्मात्त्वयैष दुष्टात्मा हतः केशी जनार्दन ! । तस्मात् केशवनामा त्वं लोके गेयो भविष्यसीति ॥ १४ ॥

अथ स्वस्य तल्लीलानुक्रमाभिज्ञतातिशयं विज्ञापयन् भविष्यं विवृणोति । चाणूरमित्यादिभिः । अप्यर्थे चकारः सर्वैः सह योज्यास्तैश्च चाणूरादीनामवश्य वध्यत्वं सूचितम् । द्रक्ष्ये द्रक्ष्यामि मल्लानिति बहुत्वं कङ्कन्यग्रोधादीनपि विभो ! हे प्रभो ॥ १५ ॥

तस्येति पञ्चकम् । शङ्खादीनां वधमिति शेषः । इत्यादीनां द्रक्ष्याम्यहं तानीति वक्ष्यमाणेनान्वयः । वीराः क्षत्रियेषु शूराः तत्कन्यानां हे वीरेति वा । प्रायः स्ववीर्य्येणैवोद्वहनात् अतएवाह वीर्य्यं पराक्रमः तदेव शुल्कम् आदिशब्देन कन्याभक्त्यादि । तदेव लक्षणं प्रकारो यस्य तं तत्र क्वचित् समुदितं क्वचित्तु केवलभक्तिः यथा कालिन्द्यादेरिति ज्ञेयं पापात् विप्रगोहरणजातात् शापादिति पाठस्तु श्रीशुकसम्मतः अत्र शापाकथनात् । तत्र द्वारकायामिति यथार्थं पूर्वत्र परत्र च योज्यमिति द्वारकाप्रयाणमपि सूचितं हे जगत्पते ! इति तथेन्द्राद्यागमनेन साक्षाद्गरुडारोहणादिना च तादृशैश्वर्य्यप्रकाशनात् ॥ १६ ॥ १७ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तत्र पालनं स्वावतारैः मत्स्यादिरूपेण चेत्यनेकविधं तत्र स्वावतारेण पालनं दुष्कृद्विनाशपूर्वकमित्यभिप्रेत्याह । सत्वमिति । स उक्तविधस्त्वं भुवो भारभूतानां दैत्यादीनां विनाशाय साधूनां रक्षणाय चावतीर्णः प्रमथा रुद्रभूतानि रक्षणाय चेति चशब्दो विनाशायेत्यनेनान्वेतव्यः सचान्वाचयद्योतकः दुष्कृद्विनाशनमानुषङ्गिकमवतारप्रयोजनं सङ्कल्पमात्रेणापि तत्सिद्धेः साधुपरित्राणमेव परमप्रयोजनमिति बोध्यम् ॥ १३ ॥

एवंविधस्य सर्वाचिन्त्यप्रभावस्यैव केशिहननमुचितमेवेत्यभिनन्दति । दिष्ट्येति । अयमश्वाकृतिर्दैत्यः केशी लीलयैव ते त्वया हतः दिष्ट्या ऽयमस्माकं महानानन्द इत्यर्थः । लीलया हत इत्यनेन दुर्वधोऽपि लीलया इत्येतदद्भुतमित्यभिप्रेतं दुर्वधत्वमेव व्यनक्ति । यस्य केशिनो हेषितेन संत्रस्ता नितरां भीताः सन्तोऽनिमिषा इन्द्रादयो दिवं त्यजन्तीति ॥ १४ ॥

कर्तव्यमावेदयति । चाणूरमित्यादिना । अद्य वाऽऽन्यक्रूर पश्यति श्वो मथुरां गन्तासि परश्वश्चाणूरादींस्त्वया निहतान् द्रक्ष्यामि इति

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

सिद्धवन्निर्देशो विज्ञापनप्रकारविशेषः ॥ १५ ॥

तस्यानु तदनन्तरं शङ्खादीनां नरकस्य च वधमिति शेषः । द्रक्ष्ये इत्यनुषङ्गः शङ्खः पञ्चजनः भाविनिर्देशमात्रमेवैतन्न त्वानन्तर्यं विवक्षितं यानि पारिजातापहरणादीनि यानि च द्वारकामधिवसन् भवान् वीर्याणि चेष्टितानि कर्त्ता करिष्यति तानि सर्वाणि कविभिरस्मदादिभिर्गेयान्यहं द्रक्ष्यामीति सम्बन्धः ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावळी ।

अवनप्रकारं दर्शयति । सत्वमिति ॥ १३ ॥

अनिमिषा देवाः सुरमत्स्यावनिमिषाविति च ॥ १४ ॥

स्वोक्तार्थे वचनं प्रमाणयितुं भाविनमर्थं दिव्यचक्षुषोपलभ्य वक्ति । चाणूरमित्यादिना ते तव करेण ॥ १५ ॥

यथेदानीं केश्यादिहननं प्रत्यक्षं भवत्येवमेव कालान्तरे क्रियमाणमपि कर्म दृग्विषयं भविष्यतीति भावेनाह । तस्येति तस्य कंसस्य अनु अनन्तरं शङ्खादीनां हननमिति शङ्खः पञ्चजनासुरः ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

मल्लानिति बहुत्वं कङ्कन्यग्रोधादीनामपि तदन्तः पाताय । ते त्वया ॥ १९--२० ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

एतस्मिन्नर्थे हेतुं वदन् एतदर्थमेव त्वमवतीर्ण इति सेवकैरपि तदनुगुणमेव कर्त्तव्यमिति न ममापराध इति वक्तुमाह । स त्वमिति । भूधरा राजानः ते भूमारका एव भूपालकत्वेन जाताः वस्तुतो दैत्याः तेषु सात्त्विकाः प्रमथा यक्षा राजसाः रक्षांसि तामसानि एते त्रयोऽपि सर्वनाशकाः नहि नाशकैः पालनं सम्भवति अतः केवलं पर्वतभूतोः भाराय जाताः तेषां नाशाय अवतीर्णो भगवान् तेन भूमेर्भारो गच्छति साधवश्च परिपालनीयाः अराजके राज्ये साधूनां परिपालनं न सम्भवति अरक्ष्यमाणाः सर्व एवासाधवश्च भवन्ति अतः प्रकारान्तरेण दैत्यवधेऽपि न कार्यं सिध्यति सर्वेषां वधे प्रलय एव स्यात् अतो राजानो विधायैव दैत्या हन्तव्याः अतो भगवान् स्वयमवतीर्णः साधूनां रक्षणार्थं च चकारात् भक्त्यर्थं च अतस्तदनुगुणं सेवकैरपि कर्त्तव्यमिति मयापि कर्त्तव्यमिति भावः ॥ १३ ॥

एतन्निदर्शनं वदन् भगवता साम्प्रतं कृतमनुमोदति दिष्ट्येति । त्वया अयं महान् नितरां हतः इव इत्याकृतिमात्रं वस्तुतो दैत्यः लीळयेति । स्वयंपीडाञ्च नाप्नुवन् अन्यथा पीडायामपि सेवकस्यापराध एव स्यात् अत एव दिष्ट्या मम महद्भाग्यं ननु तुच्छेनायासेनैव मार्यते किमाश्चर्यमित्याशङ्क्याह । यस्येति । हेषितेन संत्रस्ताः अनिमिषा अपि दिवन्त्यजन्ति ज्ञानशक्तिःक्षिप्ता अनिमिषाणां तेषामपि भयेन तन्नाशो निरूप्यते किञ्च निमिषोऽपि येषां नास्ति तेषां मूर्च्छादिकमसम्भावितमिति भयं सर्वथा अयुक्तं तेषामपि हेषितमात्रेण भयं जनयति तदपि भयं महत्कार्यं करोतीत्याह । दिवमपि त्यजन्तीति । अत आयासः कृतो भवेत् स न कृत इति महद्भाग्यम् ॥ १४ ॥

अन्यदप्यग्रे भविष्यतीति तदहं सर्वं द्रक्ष्यामीति मया मत्सुखार्थमेवैतत्कृतमिति स्वौत्सुक्यं प्रकटयन् स्वस्यापि दोषं स्वयमेव निवेदयन् आह । चाणूरमिति । योगजधर्मज्ञानेन सर्वात्मना सर्वं विषयीकरोतीति ज्ञापनार्थं व्युत्क्रमेण वर्ण्यते अन्यथा हास्तेयः प्रथमहतः नृगः पश्चात् प्रथमञ्च स्यमन्तकः ततोऽपि पूर्वं मृतपुत्रोपादानं मुष्टिकचाणूरयोः प्रधानत्वात् कीर्त्तनं बलभद्रेणापि मारितो योगजधर्मात् भगवदावेशाच्च भगवत्कृत एवेति ज्ञायते निहतं युद्धं चेति चकारार्थः अद्यसन्ध्यायामक्रूरः समायास्यति श्वो गन्तव्यं मथुरायां परश्वो हन्तव्या इति । तदप्यहन्येव ननु रात्रिपर्यन्तमपि विलम्बः उपलक्षणमेतत् पूर्वान्हे एव मल्लाः शलादयः अन्ये च धनूरक्षकाः चकारात् कंसभ्रातरश्च नारदत्वात्समनोरथः विभो इति संबोधनं सर्वथा तथा भविष्यतीति निश्चयार्थम् ॥ १५ ॥

न केवलं कंसं हत्वा निवृत्तो भविष्यसि किन्तु अन्यानपि मारयिष्यसीति तान् गणयति । तस्य कंसस्य वधमनु शङ्खः पञ्चजनः यवनः कालयवनः मुरो नरकमित्रमेतेषां वधं द्रक्ष्यामीति सम्बन्धः एते त्रयः सात्विकराजसतामसभेदाः नरकस्य च तथा वधं द्रक्ष्यामीति सम्बन्धः अयं भगवत्पुत्रो विशिष्ट इति प्रथमं निरूपितः चकारादन्येऽपि तत्सेवकाः पीठादयः ततो वधं परित्यज्य केवलं जयं वक्तुं निमित्तफलान्याह । पारिजातस्य हरणं निमित्तमिन्द्रस्य पराजयः ॥ १६ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

अत एव निवेदनरूपं स्वकृत्यं करोम्येवेत्याह । स जगत्स्रष्टा त्वं भूधरा राजानस्तद्रूपाणाम् ॥ १३ ॥

दिष्ट्या लोकानां भाग्येन ॥ १४ ॥

पूर्वपूर्वदृष्टत्वदवतारलीलाक्रममहमेवं जानामीत्याह । चाणूरमिति ॥ १५ ॥

शङ्खः पञ्चजनः । भावि निर्देशमात्रमेतत् नत्वानन्तर्य्यमात्रं विवक्षितम् ॥ १६ ॥ १७ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

स उक्तप्रकारस्त्वं भुवं धरन्तीति भूधरा भूपास्तद्रूपाणां दैत्यादीनाम् ॥ १३ ॥

अयं केशी ते त्वया दिष्ट्या निहतः ॥ १४ ॥

परश्व इति अर्थात् अद्याक्रूर एष्यति श्वो मथुरां गन्तासि परश्वस्तु ते त्वया चाणूरादीन् निहतान् द्रक्ष्ये द्रक्ष्यामि क्रमोऽत्र हस्त्यादिवधे न विवक्षितः ॥ १५ ॥

तस्य चरितस्य अनु अनन्तरं शङ्खवधादिकं यानि चान्यानि वीर्य्याणि द्वारकामावसन् कर्त्ता तानि च द्रक्ष्यामीति पञ्चमेना-

उद्वाहं वीरकन्यानां वीर्यशुल्कादिलक्षणाम् ।
नृगस्य मोक्षणं पापाद्द्वारकायां जगत्पते ! ॥ १७ ॥
स्यमन्तकस्य च मणेरादानं सह भार्यया ।
मृतपुत्रप्रदानञ्च ब्राह्मणस्य स्वधामतः ॥ १८ ॥
पौण्ड्रकस्य वधं पश्चात्काशिपुर्याश्च दीपनम् ।
दन्तवक्त्रस्य निधनं चैद्यस्य च महाक्रतौ ॥ १९ ॥
यानि चान्यानि वीर्याणि द्वारकामावसन् भवान् ।
कर्त्ता द्रक्ष्याम्यहं तानि गेयानि कविभिर्भुवि ॥ २० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

न्वयः शङ्खः पञ्चजनः यवनः काळयवनः मुरश्च तेषां वधं पौण्ड्रकस्य वधमिति वधशब्दस्यात्राप्यन्वयः ॥ १६ ॥

भाषा टीका ।

सो आप राजा रूप दैत्यों के प्रमथों के राक्षसों के मध्य में जो दुष्ट हैं तिनके नाश करने को तथा धर्म मर्यादाओं के रक्षण करने को अवतीर्ण भये हो ॥ १३ ॥

आपने लीला हीं से घोडा की आकृती वाले इस दैत्य को जो मारा है सो अच्छा किया जिसके कि हींसने के शब्द से त्रासित होकर सब देवता स्वर्ग को छोड जाते थे ॥ १४ ॥

हे विभो ! अब परसों के दिन चाणूर मुष्टिक तथा और मल्ल हस्ति तथा कंस इन सबों को आपके हाथ से मारे हुये मैं देखोंगा ॥ १५ ॥

उसके पीछे शंख यवन मुर नरकासुर इन का मरना भी हम देखेंगे पारिजात का हरणा और इन्द्र के पराजय को भी देखेंगे ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका

भार्यया जाम्बवत्या सह स्वधामतो महाकालपुरात् ॥ १८ ॥ — ॥ १९ ॥

द्वारकामावसन् द्वारकायां वसन् कर्त्ता करिष्यति ॥ २० ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

मृतपुत्राणां प्रदानं ब्राह्मणस्येति सम्प्रदानत्वाभावस्तस्यैव स्वत्वात् । उपादानमिति क्वचित् पाठः । स्वधामतस्तद्विशेषात् अनावृत्तिस्थानादपीत्यर्थः । इति परमस्वातन्त्र्यं दर्शितं पश्चात् पौण्ड्रकवधानन्तरम् ॥ १८ ॥ १९ ॥

यानि एकेनैव युगपद्वह्वीनां बहुधा विवाहादीनि श्रीदामानुग्रहादीनि तानि चाहं द्रक्ष्यामि अत एवैकादशे । गोविन्दभुजगुप्तायां द्वारकायां कुरूद्वह । अवात्सीन्नारदोऽभीक्ष्णं कृष्णोपासनलालस इति । अहो भाग्यमाहात्म्यं मम अहो कारुण्यमाहात्म्यं तव चेति भावः ॥ २० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

वीर्यमेव शुल्कादिलक्षणं प्रदेयद्रव्यस्वरूपं यस्मिंस्तं वीराणां भीष्मकादीनां याः कन्याः रुक्मिण्यादयस्तासां विवाहमित्यर्थः नृगस्य शापान्मोक्षणं त्याजनमिति सम्बन्धः हे जगत्पते ! ॥ १७ ॥

भार्यया जाम्बवत्या सत्यभामया च सह द्वारकायां स्यमन्तकाख्यस्य मणेरादानं ब्राह्मणस्य ब्राह्मणाय स्वधामतः स्वस्थानात्सङ्कर्षणलोकादित्यर्थः । आनीयेति शेषः मृतानां पुत्राणां प्रदानम् ॥ १८ ॥

दीपनं दाहनं महाक्रतौ युधिष्ठिरराजसूये चैद्यस्य शिशुपालस्य च निधनं वधम् ॥ १९—२० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

आदिशब्देन लक्ष्यवेधनमाह । लक्षणं कालिके चिह्नताम्नि मुद्राङ्कसङ्ख्योरिति च ॥ १७—१९ ॥

वीर्याणामवश्यश्रेयत्वमाह । गेयानीति । भुवीति विशेषणेन वीर्याणां संसारनिवृत्त्यर्थमेव कृतत्वं सूचयति ॥ २० ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

वीरकन्यानामुद्वाहः विवाहः फलं ननु गृहीतानां तत्रापि वन्या गृहीतानां कथं विवाह उचित इति चेत्तत्राह । वीर्यशुल्क एव आदिर्यस्य मनस्तोषणादिः गान्धर्वविधिं तदेव लक्षणमसाधारणो धर्मो यस्योद्वाहस्य विवाहे वीर्यमेव प्रयोजकं मूल्यक्रीते यथा न काचिच्चिन्ता सर्वे पण्यगतं शुचीति वाक्यात् तथापि वीर्यशुल्कमपि क्षत्रियकन्यानामेवोचितं ननु यस्य कस्यचित् तत्राह । वीराणामेव याः कन्याः दानमेव प्रयोजकं चेत् तदा नृगस्य दानात् न किञ्चित्सिद्धमिति पापात् ब्राह्मणगोहरणात् कृकलास-

अथ ते कालरूपस्य क्षपयिष्णोरमुष्य वै ।
अक्षौहिणीनां निधनं द्रक्ष्याम्यर्जुनसारथेः ॥ २१ ॥
विशुद्धविज्ञानघनं स्वसंस्थया समाप्तसर्वार्थममोघवाञ्छितम् ।
स्वतेजसा नित्यनिवृत्तमायागुणप्रवाहं भगवन्तमीमहि ॥ २२ ॥
त्वामीश्वरं स्वाश्रयमात्ममायया विनिर्मिताशेषविशेषकल्पनम् ।
क्रीडार्थमद्यात्तमनुष्यविग्रहं नतोऽस्मि धुर्यं यदुवृष्णिसात्वताम् ॥ २३ ॥
श्रीशुक उवाच ।
एवं यदुपतिं कृष्णं भागवतप्रवरो मुनिः ।
प्रणिपत्याभ्यनुज्ञातो ययौ तद्दर्शनोत्सवः ॥ २४ ॥

श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी ।

नृपाणां द्वारकायामिति तस्योद्धारे भक्तत्वे च हेतुः नतु ब्राह्मणगोहरणमक्षय्यं भवति तत्कथमुद्धार इति चेत्तत्राह । जगत्पत इति । स एव पतिर्नियामकः ॥ १७ ॥

सत्राजितप्रसङ्गे स्यमन्तकमणेरथानयनं जाम्बवता हि नीतः पश्चाज्जात्वा कन्यामपि दत्तवानिति भार्यया सह नयनं मृतपुत्रोपादानं गुरोः चकारात् मृतपुत्राणां ब्राह्मणस्य उपादानं स्वधामतो मूलस्थानात् योगजधर्मास्ते सर्वे स्फुरिताः तिरोहिता अपि योगजधर्मस्यैतावदेव बलं नत्वविद्यमानमपि पश्यति अत एव वैनाशिकप्रक्रिया असङ्गता ॥ १८ ॥

पश्चात् पौण्ड्रकस्य वध इति स्वदर्शनापेक्षया पौण्ड्रको मिथ्यावासुदेवः चकारात् काशिराजस्यापि काशीनगर्या दीपनं ज्वालनं दन्तवक्त्रस्य शिशुपालस्य च ततो वधः विपरीतक्रमः पूर्वजन्मद्वये हिरण्याक्षः कुम्भकर्णश्च प्रथमं हत इति तथैव मारयिष्यतीत्युक्तवान् महाक्रतौ राजसूये चकारात् सर्वत्र तत्संबन्धिपदार्था ग्राह्याः ॥ १९ ॥

एवं विशेषतो निरूप्य सामान्यतो निरूपयति । यानि चान्यानि चेति शाल्ववधादीनि वीर्याणि स्त्रीणां गृहेषु नानाविधा लीलाश्च अन्यानि जीवसाधारणानि द्वारकायां वसानिति प्रासङ्गिकानि तानीत्युक्तं भवानिति सम्मुखतया स्वस्याप्रदर्शनं सूचितं ननु दर्शनेन किंस्यादित्याशङ्क्य वीर्याणां माहात्म्यमाह । गेयानि कविभिरिति । अथवा मयोपदेष्टव्यानीति तदर्थं मया द्रष्टव्यानि भुवीति अग्रिमाणां मुक्त्यर्थानीत्यपि सूचितम् ॥ २० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

भार्य्यया जाम्बवत्या सह । स्वधामतो महाकालपुरात ॥ १८—२० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

वीर्य्यमेव शुल्कादिलक्षणं प्रदेयद्रव्यस्वरूपं यत्र तं वीरकन्यानामुद्वाहम् ॥ १७ ॥

भार्य्यया जाम्बवत्या सह स्वधामतः स्वस्थानतः ॥ १८ ॥

महाक्रतौ राजसूये ॥ १९ ॥

कर्ता करिष्यति ॥ २० ॥

भाषा टीका ।

वीर राजाओं कि कन्याओं का विवाह जिसमें की पराक्रमही मूल्य होगा हे जगत्पते ! द्वारका में नृग राजा का पाप से मोक्षण करना देखेंगे ॥ १७ ॥

स्यमंतक मणिका भार्या के सहित ग्रहण करना और ब्राह्मण के मरे हुये पुत्रों का स्वधाम से ले आना ॥ १८ ॥

पीछे पौंड्रक का वध करना और काशीपुरी का दाहन करना और महायज्ञ में चैद्य का वध तथा दंतवक्त्र का वध भी ॥ १९ ॥

और द्वारका में निवास करके और भी जिन वीरों को आप करेंगे जिनको कवि लोक पृथिवी में गान करेंगे तिन को भी मैं देखोंगा ॥ २० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अमुष्य विश्वस्य भूभारस्य वा ॥ २१ ॥

एवं विज्ञाप्य कृताभिनन्दनं भगवन्तं नमस्यति द्वयेन । विशुद्धविज्ञानघनमिति । केवलं ज्ञानैकमूर्त्तिम् अत एव स्वसंस्थया स्वरूपसम्यक्स्थित्यैव परमानन्दरूपया सम्यगाप्ताः सर्वेऽर्था येन तम् आप्तकामतोक्ता सत्यसङ्कल्पतामाह । अमोघवाञ्छितमिति । ननु वाञ्छाचेदस्ति तर्हि दुर्निवारा संसृतिरत आह। स्वतेजसेति। नित्य सद

श्रीधरस्वामिकृतभावार्थदीपिका ।

नित्यनिवृत्तो मायाकार्यरूपो गुणप्रवाहो यस्मात्तम् अतो भगवन्तं निरतिशयैश्वर्यमीमहि शरणं व्रजेमेति ॥ २२ ॥

ननु त्रिकालज्ञस्त्वं कथं मत्प्रपञ्चं न जानासि जानासि चेत्कथमगुणप्रवाहं ब्रवीषि तत्राह । त्वामिति । ईश्वरमन्यस्य वशयितारं स्वाश्रयमन्यस्यावश मत आत्ममायया आत्माधीनया मायया विनिर्मिता अशेषविशेषा महदाद्या यादवादिरूपा वा कल्पना येन तं धुर्यं श्रेष्ठं नतोऽस्मीति ॥ २३—२४—२५ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

अथ तत्तत्सर्वानन्तरमर्जुनसारथितया सतस्ते तव सम्बन्धे तत्र तत्सम्बन्धमात्रेणैवेत्यर्थः । तच्च त्वयि नाश्चर्य्यमित्याह । कालेति । अमुष्येत्यादौ विश्वमित्यर्थः । कालरूपस्य सतो विश्वमपि क्षपयिष्णोस्तन्नाशनसमर्थस्येत्यर्थः ॥ २१ ॥

विशुद्धेति । तैर्व्याख्यातं तत्र केवलेति "न चक्षुषा गृह्यते रूपमस्य यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा वृणुते तनुं स्वाम्" इति श्रुतेः । स्व प्रकाशत्वेन केवलज्ञानरूपा तस्य च ज्ञानस्य बहुमूर्त्तित्वेऽपि एकस्या मुख्याया मूर्त्ते रंशित्वादेका मूर्त्तिर्यस्य तं तदुक्तमक्रूरेण बहुमूर्त्त्येकमूर्त्तिकमिति । एकेति विशब्दस्यार्थः विशिष्टाभिधायित्वेनासाधारणतया तादृशनिगमनात् । अत एवेति यतो मूर्त्तेरपि केवलं ज्ञानरूपत्वमखण्डत्वाञ्च तदनुभवसिद्धम् । अतः सर्वस्वरूपत्वं स्वरूपं चात्मा आत्मा च सर्वाश्रयः सर्वश्च ज्ञानाश्रयत्वेनैव भासत इति । यत आत्मत्वमत एव परमानन्दरूपेणैव स्थितिः । निरुपाधिपरमप्रेमास्पदरूपत्वात् । यतस्तथात्वमतः स्वरूपत एव सर्वार्थप्राप्तिः । आनन्दानुगत्यैव सर्वस्यार्थत्वात् । "एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्तीति को ह्येवान्यात् कः प्राण्यात् यदेष आकाश आनन्दो न स्यादिति श्रुतेरित्यर्थः । अत एव तस्य नानारूपादिरर्थः स्वरूपत एव प्राप्त इति ज्ञानस्यैव मूर्त्तित्वं युक्तमेवानुभूतं तेनेति भावः । एवमाप्तकामत्वेऽपि वाञ्छा नित्यप्राप्तस्यापि लीलायामप्राप्तत्वसम्पादनपूर्वकप्राप्त्यर्थी तस्याश्चामोघत्वं तादृशासम्भवकारित्वात् । साच मायिकी न भवेदिति व्याचष्टे नन्वित्यादिना । अतस्तद्रूपादीनामप्यमायिकत्वमवधारितम् । अत एव भगवन्तमीमहीति भगवानेव निजाळम्बनतया निगमितो ननु निर्विशेषब्रह्मेति । यद्वा लोकप्रसिद्धविज्ञानमतीतमिति तत्सम्बन्धाभावाद्विशेषेण शुद्धं विज्ञानमानन्दं ब्रह्मेति प्रसिद्धं ब्रह्माख्यमानन्दात्मकं यद्विज्ञानं तद्रूपो यो घनो मूर्त्तस्तल्लक्षणं भगवन्तमीमहि शरणं यामि । ननु विज्ञानस्य कथं करचरणाद्याकारमयमूर्त्तित्वं कथम्वा भगवत्त्वमित्याशङ्क्य श्रुतिप्रसिद्धस्य तस्य तत्प्रसिद्धत्वेनैव तादृशं वैलक्षण्यमाह । स्वसंस्थयेति । परास्य शक्तिर्विविधैव श्रूयते इति न चक्षुषा गृह्यत रूपमस्येति श्रुत्या व्यञ्जितया तत्तद्व्यञ्जकस्वरूपशक्त्या सम्यगाप्तस्तत्तद्रूपः सर्वोऽप्यऽर्थो येन तं तथाप्यमोघवाञ्छितम् इच्छाशक्त्या तत्तत्प्रकाशनाप्रकाशनसमर्थः नन्वपरा मायाख्या शक्तिरपि मम विद्यत इति "श्रूयते मायान्तु प्रकृतिं विद्यान्मायिनन्तु महेश्वर"मिति श्रुतेः । ततस्तद्दोषेणाप्ययं स्पृष्टो भवेयमित्याशङ्क्याह स्वतेजसेति । स्वतेजसा स्वरूपशक्तिप्रभावेणेति दिक् ॥ २२ ॥

त्वामिति च तैर्व्याख्यातं तत्र ब्रवीषीति निषिध्यमानत्वेनेति शेषः । यद्वा । शुद्धवैकुण्ठादिलक्षणे मत्प्रपञ्चे जाते तत्र मायानिषेधोऽप्ययुक्तः सूर्यमण्डले तमोनिषेधवदित्यभिप्रायेणाक्षिपति नन्विति । तत्र सिद्धान्तभाग आत्माधीनयेति न शुद्धे स निषिध्येत किमुत मायिकप्रपञ्चे या तव लीला तस्यामेव । यतः प्रकृतिक्षोभात् पूर्वत्वेन शुद्धापि तवेक्षणलीला प्रकृतिमुपधाय भवति तथा स्वयं भगवत्सम्बन्धिरूपत्वेन शुद्धैवैषा स्वान्तरङ्गपरिकरस्य तव जन्मादिलीला तदितरपूर्वापरयदुवंशमुपधायेति भावः । यदुप्रभृतीनां श्रेष्ठमिति यथा तव तच्छ्रेष्ठत्वं तथा तदन्तरङ्गानां तेषामपि तद्वंश्यत्वमिति भावः । वृष्णिसात्वतानां पृथगुक्तिः श्रेष्ठ्यापेक्षयेति । ननु तादृशस्य मम मायिकप्रपञ्चेऽभिव्यक्तिः किमर्थं तत्राह । क्रीडार्थमाभि प्रपञ्चगतभक्ताभिमुख्येन आत्त आनीतो मनुष्यविग्रहे नराकृतिपरब्रह्माख्यो येन तं यद्वा । तादृशविहारार्थमङ्गीकृतं मनुष्यजातीययुद्धं येन तम् । अभ्यात्तेति पाठे स एवार्थः । अद्येति त्वदवतारसमय इत्यर्थः । अथवा उपक्रमानुसारेण उपसंहरन्नमस्यति विशुद्धेति द्वयेन । तत्र त्वामीश्वरमित्यादिकमर्द्धं पूर्ववत्तदंशतत्त्वपरम् ईश्वरं पुरुषरूपं स्वयन्तु क्रीडार्थमित्यादि । अन्यत पूर्ववदिति ॥ २३ ॥

यदुपतिमिति । तदापि श्रीगोकुलत्यागानिच्छया साक्षान्न किञ्चिदङ्गीकृतवान् किन्तु यदुपतित्वव्यञ्जकलक्षणविशेषेणैव तत्तदङ्गीकृतवानिव यस्तमित्यर्थः । प्रणिपत्य साष्टाङ्गं प्रणम्येत्यत्र हेतुः भागवतेति अतो भगवदभिप्रायं जानन् द्वारकादौ तु तादृग्लोकसङ्कट्टे तन्मर्य्यादां दर्शयति तस्मिन्नन्यथाप्याचरतीति भावः । तस्य कृष्णस्य दर्शनमेवोत्सवो यस्य सोऽपि ययौ । कुतोऽभितोऽनुज्ञातः कृष्णेन प्रस्थापितः सन् ॥ २४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अथ ननु अमुष्य भूभारस्येति कर्मणि षष्ठी क्षपयिष्णोरपचिकीर्षोः कालशरीरकस्य ते त्वयाऽक्षौहिणीनां सेनानां निधनं द्रक्ष्यामि हे अर्जुनसारथे अर्जुनादिप्रयोज्यकर्तृभिः क्षपयिष्णोरित्यभिप्रायेणार्जुनसारथे इति सम्बोधनम् ॥ २१ ॥

एवं विज्ञाप्य कृताभिनन्दनं भगवन्तं प्रपद्य नमस्करोति । विशुद्धेति द्वाभ्याम् विशुद्धविज्ञानघनमपहतपाप्मत्वादिगुणकं केवलज्ञानैकस्वरूपं स्वसंस्थया स्वनिष्ठया निरतिशयानन्दस्वात्मानुभवनिष्ठया समाप्ताः सर्वेऽर्थाः कामा यस्य तं प्रयोजनान्तरानपेक्षमित्यर्थः यद्वा सम्यगाप्ताः सर्वेऽर्थाः यस्य तमवाप्तसमस्तकामामित्यर्थः । सत्यसङ्कल्पतामाह । अमोघवाञ्छितमिति अमोघवर्त्तिनमितिपाठेऽमोघं यथा भवति तथा कार्ये वर्तमानं स्वतेजसा पराभिभवसामर्थ्येन नित्यं निवृत्ताः मायागुणास्तेषां प्रवाहः संसारो यस्य तं भगवन्तं षाड्गुण्यपूर्णमीश्वरं त्वामीमहि प्रपद्येमहि ॥ २२ ॥

स्वयमेवाश्रयो यस्य तं "स्वे महिम्नि प्रतिष्ठित" इतिश्रुत्युक्तरीत्याऽनन्याधारमित्यर्थः । आत्ममायया स्वसङ्कल्पेन विनिर्मिता अशेषाः सर्वविशेषाः पृथिव्यादयस्तेषां कल्पना देवादिरूपा सृष्टिर्येन तमद्याधुना क्रीडार्थमाप्तः मनुष्यस्येव विग्रहो येन तं यद्वा देवादीनां धुर्यं श्रेष्ठं त्वां नतोऽस्मि यद्यपि सात्वतशब्दो भगवत्परस्तस्यापि सात्वतेष्वपि भक्तित्वयोगात्प्रवर्त्तत एवमन्यत्रापि द्रष्टव्यम् ॥ २३ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवमिति । तस्य कृष्णस्य दर्शनाद्युत्सुकः हृष्टमनाः प्रययौ ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अथ भारतयुद्धे अमुष्य भूवळयस्यावशिष्टं क्षपयिष्णोः क्षीणं कर्तुकामस्य अक्षौहिणीनामष्टादशानामिति शेषः अर्जुनसारथेरित्यनेन भारतयुद्ध इति सूचयति ॥ २१ ॥

उपास्यरूपं विशिनष्टि । विशुद्धेति । भगवन्तं शरणमीमहीत्यन्वयः कीदृशं विशुद्धविज्ञानघनम् अप्राकृतज्ञानमूर्तिं स्वसंस्थया स्वव्यवस्थया अपराधीनस्थित्या समाप्तसर्वार्थं समाप्ताशेषपुरुषार्थं केचिद्धरेर्वृत्तिर्मायामयीति सङ्गिरन्ते तत्राह । अमोघेति । कुत एतत्कथ्यते इति तत्राह । नित्येति । नित्यनिवृत्तः मायागुणानां प्रकृतिगुणानां प्रवाहः परम्परा यस्मिन्स तथा नन्वेतन्मुक्तानामप्यस्तीति तत्राह । स्वतेजसेति । स्वप्रभावेण तेजोबले प्रभावे ऽत्र इति ॥ २२ ॥

हे आद्यन्तराक्षसनाशकर्तरीश्वरं त्वां नतोऽस्मि ईश्वरत्वं समर्थयते । स्वाश्रयमित्यादिना । आत्माधीनया मायया प्रकृत्या स्वेच्छया वा क्रीडार्थं क्रीडितुं विनिर्मिताशेषविशेषकल्पनं विरचितसमस्तदेवब्राह्मणासुरादितत्तद्वस्तुतारतम्यलक्षणविशेषव्यवस्थानं मनुष्यविग्रह इव विग्रहो यस्य स तथा तं मांसदृष्ट्या मनुष्याकारमित्यर्थः । मनुष्यदेहस्वीकारे कृत्यमाह । धुर्यमिति । धुरं वहति यो धुर्य इत्यतो यदुवृष्णिसात्वतां धुरस्य वोढारम् आद्यन्तधुर्यमिति विशेषणद्वयेन दुष्टविनिग्रहविशिष्टपालनरक्षणकार्यार्थं मनुष्यविग्रहस्वीकार इति विज्ञायते आद्यन्तो मनुष्यविग्रहो यस्येत्यर्थाङ्गीकार "आदिनो राक्षसाः प्रोक्तास्तदन्तत्वाज्जनार्दन" इति वचनं निरुणद्धि विशुद्धविज्ञानघनमित्यादिविशेषणानि चोक्तानि व्याहतानि स्युरिति ॥ २३ ॥

तस्य दर्शनेनोत्सव उत्कृष्ट आनन्दो यस्य स तथा ॥ २४-२५ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः

अमुष्य क्षपयिष्णोर्विश्वमपि नाशयितुं समर्थस्येत्यर्थः ॥ २१ ॥

विशुद्धेति द्वयम् ॥ २२-२३ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

एवं साक्षात्स्वकृतमुक्त्वा कारितमाह । अथेति । परंपरया करणे हेतुं सामर्थ्यं चाह । कालरूपस्येति । अनेन कालरूपो भूत्वा भारतकार्यं कृतवानिति ज्ञातव्यं नतु कालोऽस्मीति वाक्यात् कालरूप एव भगवान् इति कालस्य नियन्ता भगवानिति तथा करणे हेतुमाह । अमुष्य भूभारस्य क्षपयिष्णोः वै निश्चयेन कालो हि निमित्तत्वमेवापद्यते अक्षौहिणीनामष्टादशपरिमितानाम् अक्षौहिणीपरिमाणञ्च —

> एकेभैकरथा त्र्यश्वा पत्तिः पञ्चपदातिका ।
> पत्त्यङ्गैस्त्रिगुणैः सर्वैः क्रमादाख्या यथोत्तरम् ॥
> सेनामुखं गुल्मगणौ वाहिनी पृतना चमूः ।
> अनीकिनी दशानीकिन्यक्षौहिणी-
> त्येकविंशतिसाहस्री सप्तत्यष्टशताधिका ।
> सङ्ख्या रथाश्विनोः प्रोक्ता नराणां लक्षमुच्यते ॥
> तथा नव सहस्राणि त्रीणि चैव शतानि च ॥
> पञ्चाशच्च तथाऽश्वानां पञ्चषष्टिसहस्रकम् ।
> दशाधिकसहस्राणि षडेवेत्येष सङ्ग्रहः ॥

एवं स्वरूपाणामक्षौहिणीनां निधनं द्रक्ष्यामि भगवता कारितमित्यत्र लौकिकं निदर्शनमाह । अर्ज्जुनसारथेरिति ॥ २१ ॥

एवञ्चरित्रनिरूपणेन लौकिकदृष्टिप्रधानानां स्वदृष्टान्तेन भगवतोऽपि लौकिकत्वं मत्वा ब्रह्मत्वाय लीलयैवैतत् कृतमिति मत्वा स्वरूपमाह द्वाभ्याम् ज्ञानभक्तिसिद्धान्तनिरूपकाभ्याम् । विशुद्धेति । त्वं स्वरूपतः ज्ञानरूपः तच्च ज्ञानं न जन्यं नापि सविषयं तदाह विशुद्धेति । ज्ञानशक्तिस्तत्रजन्यापि न विषया भवति तदैव विशिष्टा शुद्धिर्भवति तच्च विज्ञानं ब्रह्मरूपमिति वक्तुं घनमित्याह । घनमेव हि बृहत् बृंहितञ्च भवति एतादृशस्य ब्रह्मणः सर्वा सामग्री जगत्कारणे आधारादिभूता फलञ्च स्वरूपमेव अन्यथा असकृत्त्वभङ्गप्रसङ्गः स्यात् विकारित्वञ्च स्यात् स्वरूपपक्षेतु तथैव प्रादुर्भवतीति न कोऽपि दोषः सिध्येत तदाह । स्वसंस्थयेति । स्वस्मिन्नेव सम्यग्या स्थितिः तयैव कृत्वा समाप्तसर्वार्थः समाप्ताः सर्वे अर्था यस्य बोभूयमानाशेषपुरुषार्थस्वरूपमेव तस्य स्वरूपं तत्स्वरूपास्थित्यैव भवति बहिर्मुखत्वेन भवतीति नित्यं स्वरूपे भगवानेव स्थितो नत्वन्य इति तस्यैव सिद्धाः सर्वे कामाः न केवलमिष्टसिद्धिरेव स्वरूपास्थित्या किन्त्वनिष्टमेव निवर्त्तत इति तदाह । स्वतेजसेति स्वस्य यत् तेजः कोटिसूर्याधिकप्रकाशं चैतन्यं स्वप्रकाशं तेनैव नित्यनिवृत्ता ये मायागुणाः सत्त्वादयः तेषां प्रवाहः कार्यपरंपरा यस्य एते हि दोषास्तम इव सर्वदा सर्वत्र भवन्ति सूर्यमण्डले तु यथा न तमः तथा भगवति न भवन्ति तत्र हेतुरवश्यं वक्तव्यः हेतुवशादेव नित्यनिवृत्तत्वम् अन्यथा सर्वत्र प्रवर्त्तमाना दोषास्तत्र गता न निवृत्ता भवेयुः सच्चिदानन्दगुणास्तूपयोगिन इति तन्निवारणार्थं मायेति एतादृशमपि औडुलोमिमतवत् न निर्गुणं निराकारं किन्तु भगवन्तं षड्गुणैश्वर्यसम्पन्नं त्वामीमहि शरणं ब्रजेम प्रार्थनायां लिङ् ॥ २२ ॥

भक्त्यनुसारेण भगवन्तं निरूपयति । त्वामीश्वरमिति । सर्वनियन्ता भगवान् ईश्वरः अन्ये त्वीशितव्याः एतादृशोऽपि न स्वार्थमीशितव्यानपेक्षते लौकिकेश्वरवत् तदाह । स्वाश्रयमिति । स्वमात्मानमेवाश्रित्य तिष्ठति यथा गरुडादेः धारणप्रयत्नः स्वस्मिन्नेव वर्त्तत इति नाधारान्तरमपेक्षते स प्रयत्नः शाम्यतीति गरुडादयः कदाचिदन्याधारा अपि भवन्ति भगवतस्तु स प्रयत्नो नित्य इति न कदाचिदप्यन्याश्रितः परिदृश्यमानोऽपि सम्बद्ध इव दृश्यते नतु सम्बध्यते अत एव "यः पृथिव्यां तिष्ठन्नि"त्यादिश्रुतयः एवमपि सति असंयुक्त एव संयोगोऽपि न तेन सह जायते यत आत्ममाययैव निर्मिता अशेषविकल्पा येन सर्वे विकल्पाः अन्यथाबुद्धिहेतवः ते वस्तुतः माययैव प्रदर्श्यन्ते स्वरूपन्तु भगवानेवेति भगवानसङ्गोऽपि ननु दृश्यन्ते अवतारेषु देहेन्द्रियादिधर्मा इति चेत्तत्राह । क्रीडार्थमिति । क्रीडायां ये अर्थाः परिगृह्यन्ते कुब्जादयो धर्मा वाहनत्वादयश्च ते आकारसङ्गे क्रियन्ते नतु भगवद्धर्माः सहजास्ते तथापि कर्म तद्भवतीति फलसाधकत्वं सहजत्वे

भगवानपि गोविन्दो हत्वा केशिनमाहवे ।
पशूनपालयत्पालैः प्रीतैर्व्रजसुखावहः ॥ २५ ॥

श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी ।

दोषरूपत्वात् तदपि न स्यात् अत एव नतोऽस्मि निर्दोषपूर्णगुणविग्रहं विशेषमाह । धुर्यमिति । यादवा वृष्णयः सात्वताश्च सात्त्विकाः यदुवृष्णिरूपा वा वैष्णवाः तेषां धुरं सर्वमेव भारं वहतीति सर्वमकोद्धारक इत्यर्थः ॥ २३ ॥

एतावदुक्तेऽपि न भगवान् किञ्चिदुवाच भ्रान्तो ऽयमिति केवलं गमनार्थमनुज्ञां दत्तवानित्याह । एवमिति । एतदुक्तमवश्यं करिष्यतीत्याज्ञापनार्थं यदुपतिमिति तेषां पतिर्हि तत्कार्यं करिष्यतीति कृष्णं सदानन्दं किञ्चिदप्यकरणे स्वतः पुरुषार्थरूपम् अवश्यं स्वज्ञातं स्वकृतञ्च स्वामिने निवेदनीयमिति निवेदितवानित्याह । भागवतप्रवर इति । एष्यत्परिज्ञाने हेतुः मुनिरिति गमनार्थे साष्टाङ्गं प्रणामं कृतवान् पश्चात् भगवता अभ्यनुज्ञातः ययौ ननु तमागतो न किञ्चित् प्राप्तवान् कथं व्यर्थमेव गत इति चेत् तत्राह । तस्य भगवतो दर्शनमेवोत्सवो यस्य लोके महाफलमुत्सवं तद्रूपं दर्शनमेव प्राप्तवानिति ॥ २४ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

अमुष्य विश्वस्य । षष्ठी आर्षी । निधनं निधनरूपं ते चरितमिति शेषः ॥ २१ ॥

एवं कार्य्यं निवेद्य भगवन्तं प्रणमति द्वाभ्याम् । विशुद्धं विज्ञानमनुभवस्वरूपं यद्ब्रह्म तदेव घनं सान्द्रीभूतं त्वामीश्वरमीमहि शरणं व्रजेम प्रणमामीति वा स्वीयया संस्थया सम्यक् प्रकारेण लीलापरिकरादिविशिष्टया स्थित्या सार्वकालिक्या सम्यगाप्ता भवन्ति सर्वार्थाः सर्वविधभक्तमनोरथा यस्मात्तम् अत एवामोघमव्यर्थं वाञ्छितं स्वभक्तमनोरथनिष्पादनलक्षणं यस्य तं स्वस्य स्वीयामां वा तेजसा नित्यं प्रतिदिनमेव निवृत्तो गुणप्रवाहो यस्मात्तम् ॥२२॥

एवं विधोऽन्यः कोऽपि नास्तीत्याह । त्वामिति । ईश्वरम् अन्यस्य वशयितारं स्वाश्रयं न कस्याप्याश्रितमतोऽन्यस्यावश्यम् एतदेवान्यानधीनमैश्वर्य्यमाह आत्माधीनया मायया विनिर्मितमशेषविशेषकल्पनं विश्वं येन तं किञ्च क्रीडैव अर्थः सप्रयोजनं यस्य तम् अद्य तु आत्तौ गृहीतौ मनुष्यैः कंसादिभिः सह विग्रहः कंसप्राणतुल्यकेशिवधहेतुकं शात्रवं येन तम अभ्यात्तेति च पाठः एषापि तवैका क्रीडेति भावः । यतो यदुवृष्णिसात्वतां सबन्धूनां धुरं रक्षणपोषणादिभारं वहतीति तम ॥ २३–२५ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

कालरूपस्य कालात्मनः । अमुष्य भूभारस्य क्षपयिष्णोरपाचिकीर्षोः । ते कृत्यभूतमक्षौहिणीनां निधनं द्रक्ष्यामि ॥ २१ ॥

एवं केशिवधमभिनन्द्य भाविकर्म सिद्धवन्निर्दिश्य तच्छ्रवणेन प्रसन्नं भगवन्तं नमस्यति । विशुद्धविज्ञानघनमिति द्वाभ्याम् । विशुद्धविज्ञानघनं स्वभावतोपाऽस्तसमस्तदोषं केवलं परज्ञानैकस्वरूपम् । अत एव स्वकीयया स्वरूपस्थित्यैव परमानन्दात्मिकया समाप्ताः सर्वेऽर्थो यस्य तम् । अमोघवाञ्छितं सत्यसंकल्पं स्वतेजसा स्वासाधारणेन प्रभावेण नित्यनिवृत्ताः मायागुणास्तत्प्रवाहः संसारश्च यस्य तम् एवंभूतं भगवन्तं स्वाभाविकैश्वर्य्यषड्गुणनिधिम् ईमहि शरणं व्रजेम ॥ २२ ॥

अद्य त्वां नतोऽस्मि कथम्भूतम् ईश्वरम् सर्वेषां नियन्तारम् स्वाश्रयं नियन्तृरहितं समानातिशयशून्यत्वात् । स्वमायया संकल्परूपया त्रिगुणमय्या वा विनिर्मिता अशेषाणां पृथिव्यादीनां कल्पना नामरूपात्मिका सृष्टियेन तम् । ननु वसुदेवतनयस्यैव भूतमीश्वरत्वं मम कथं घटेतात आह । क्रीडार्थे भक्तैः सह विहर्तुम् आत्ताः पितृत्वादिभावेन स्वीकृताः मनुष्यविग्रहाः येन तम् ॥ २३ ॥

तस्य श्रीकृष्णस्य दर्शनेनोत्सवो यस्य सः ॥ २४ ॥ २५ ॥

भाषा टीका ।

इसके अनंतर इस संसार के क्षय करने वाले तथा अर्जुन के सारथि काल रूप आपके किये भारत में अक्षौहिणी के निधन को देखूंगा ॥ २१ ॥

आप विशुद्ध विज्ञान घन स्वरूप हो अपनी स्थिती से आपको सब अर्थ प्राप्त हैं आपकी इच्छा व्यर्थ नहीं होती है आपने अपने तेज से निलही माया के गुणों के प्रवाह को दूर कर रखा है ऐसे आप भगवान् के मैं शरण प्राप्त हूं ॥ २२ ॥

आप ईश्वर हो अपने आश्रय से स्थित हो और आपने अपनी माया से संपूर्ण विकल्प भेदों को निर्माण किया है आज क्रीडा के लिये मनुष्य देह को आपने धारण किया है ऐसे जो आप वृष्णिसात्वतों के पति तिनको मैं नमस्कार करता हूं ॥ २३ ॥

शुकदेवजी बोले इस प्रकार से भागवतों में श्रेष्ठ नारदजी भगवान् की स्तुति कर प्रणाम करके उनके दर्शन से आनंदित होकर आज्ञा पाकर चले गये ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

ननु नारदेन व्योमवधो न दृष्टस्तत्कथं व्योमवधप्रसक्तिरिति तत्रोच्यते प्रातरेव केशिवधानन्तरं नारदेनोक्तमङ्गीकृत्य पुनस्तत्रैव पशूनपालयता व्योमो हतः यद्वा व्योमवधः पूर्वमेव वृत्तोऽपि

एकदा ते पशून्पालाश्चारयन्तोऽद्रिसानुषु।
चक्रुर्निलायनक्रीडाश्चोरपालापदेशतः॥ २६॥
तत्रासन्कतिचिच्चोराः पालाश्च कतिचिन्नृप!।
मेषायिताश्च तत्रैके विजह्रुरकुतोभयाः॥ २७॥
मयपुत्रो महामायो व्योमो गोपालवेषधृक्।
मेषायितानपोवाह प्रायश्चोरायितो बहून्॥ २८॥

श्रीधरस्वामिकृतभावार्थदीपिका।

वेषधारिवधप्रसङ्गादत्रोच्यत इति द्रष्टव्यं केचित्पुनः शङ्खचूडवधात्पूर्वमेव पठन्ति च तमाह। एकदेति॥ २६-२७॥

मेषायितान्मेषवदाचरितान्स्वयञ्चोरवदाचरितः सन्नपोवाहापकृष्य निनाय॥ २८॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी।

मुनिर्ययौ भगवानपि पशूनपालयदित्यपिशब्दार्थः। यतो गोविन्दः तस्मिन् गते सति प्रकृतगोकुलेन्द्रत्वोचितलीलामेवानुमोदमान इत्यर्थः। तत्र हत्वेति नारदसम्वादात् पूर्वस्याप्यनुवादः। आहव इति तस्यान्येन युद्धे बाल्यत्वमनभिप्रेत्य महाबलिष्ठत्वादिकं सूचितम्। अतः प्रीतैर्गततद्विषयकभयैः पालैस्तत्सङ्गेन गोपालकैः सह पशूनपालयत्। व्रजान्निर्गच्छन्तं तमनुगतानां व्रजजावानाञ्च सुखावहो जातः॥ २५॥

एकदेति तैर्व्याख्यातं तत्र यद्वेति व्योमवधस्य श्रीमुनीन्द्रेणानुक्तत्वात् तद्दिन एव तद्वधे एकदेत्युक्तेरसङ्गतत्वात् तादृशलीलायाः कौमारान्त एव योग्यत्वाच्च अतो वृषमयात्मजाविति गोपिकावाक्यञ्च सङ्गच्छते वृषात्मजो वत्सो मयात्मजो व्योमासुर इति पूर्वव्याख्यानात्। निलायनं नाम चोरितस्य तिरोधापनं तद्रूपां क्रीडां तामेवाह। चौरेति। चौराः पालाश्च रक्षकास्तेषामपदेशतः आभिनयात् तदुद्वयेन मेषापदेशिनामपि ग्रहणम्। सम्बन्धिशब्दत्वात्॥ २६॥

तत्र तस्यां क्रीडायाम्। मेषायिता इति मेषाणां वधेऽपि क्रोशनाधभावेन सुखचौर्य्यत्वात् तत्राद्रिसानुषु विजह्रुः॥ २७॥

प्रायो बहून् सर्वानेव चतुःपञ्चानामेवावशिष्टत्वात्॥ २८॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

अथ भगवानाहवे युद्धे केशिनं हत्वा नारदेन विज्ञापितश्च व्रजस्य सुखमावहतीति तथाभूतः गोपैः सह पशूनपालयत्॥२५॥

प्रातरेव पुनस्तथैव पशून्पालयता व्योमासुरो हतः यद्वा व्योमवधः पूर्वमेव वृत्तोऽपि वेषधारिवधप्रसङ्गादत्रोच्यत इति द्रष्टव्यं केचित्पुनः शङ्खचूडवधात्पूर्वमेव पठन्ति च। एकदेति। कदाचित्ते गोपाः पशूनद्रेः सानुषु चारयन्तः चोरपालव्यवहारेण निलायनाख्यां क्रीडां चक्रुः॥ २६॥

तामेव दर्शयति। तत्रेति तत्र गोपानां मध्ये कतिचिद्गोपाश्चौरव्यपदेश्या बभूवुः हे नृप! केचित्तु पालाश्चौरेभ्यो रक्षकाः अवशिष्टास्तु केचिन्मेषवदाचेरुरेवं निर्भया विजह्रुः॥ २७॥

एवं सति तदा मयस्य पुत्रो व्योमः महामायोऽत एव गोपालस्येव रूपं बिभ्राणः स्वयं प्रायशश्चोर एव तद्वदाचरन् मेषवदाचरितान् बहून् गोपानपोवाह अपकृष्य निनाय॥ २८॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

चोरपालापदेशतः वयं पशूंश्चोरयामः वयं पालयाम इति अपदेशेन छन्नमनसा निलायनक्रीडां निलीनकर्मलक्षणक्रीडाम्॥ २६—२७॥

चोरायितश्चोरवद्वर्तमानः॥ २८॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी।

एवमध्ये समागतं नारदमुपसंहृत्य केशिवधानन्तरं भगवान् गोकुले गत इति नोक्तमिति तदुपसंहरति। भगवानपीति यतो गोविन्दः यथा नारदो गतः एवं भगवानपि ततो गोकुलं गतः आहवे संग्रामे अन्यथायं वधः राजसप्रकरणे न वक्तव्यो भवेत् पूर्ववदेव पशूनपालयत् ननु नारदवाक्येन ऐश्वर्यभावे च खेदो वा जात इति प्रीतैः पालैरिति स्वाभिप्रेतनिवेदनं पूर्ववच्च स्थितिरुक्ता किञ्च अहर्निशं पूर्ववदेव व्रजसुखावहो जातः॥ २५॥

यद्यप्यग्रिमकथा तस्मिन्नेव दिवसे न कृता तथापि सिंहावलोकनन्यायेन कथां निरूपयति इतो गतोऽपि भगवान् गोकुलं पालयिष्यतीति ज्ञापनार्थम्। एकदेति नवभिः। पूर्वमस्याः कथायाः प्रकरणं न स्थितमिति स्वकालेनोक्ता तदाह। कदाचित्ते सर्व एव गोपालाः अद्रिसानुषु पशून् चारयन्तः गोवर्द्धनोपप्रदेशेषु स्थिताः दूरादपि द्रष्टुं शक्नुवन्तीति निलायनक्रीडां चक्रुः तत्र निलायनं यासु क्रीडासु ये क्रीडन्ति तन्मध्य एव केचन लीना भवन्ति केचनान्वेषणार्थं प्रवृत्ता भवन्ति तत्रापि विशेषमाह। चौरपालापदेशत इति। एवमपि केचन निलीनाः चौरा एव भवन्ति अन्वेषकाः पाला एव॥ २६॥

चौर्यविषयसिद्धयर्थं विशेषमाह। तत्रासन्निति सर्वे गोपालास्त्रिविधा जाताः प्रयत्नाधिक्यात् प्रथमतश्चोराः चकारात् सर्वे परावृत्या सर्वे भवन्तीति नृपेति सम्बोधनं लीलामात्रत्वज्ञापनार्थं मेषा नीयमानास्तूष्णीं तिष्ठन्तीति न ज्ञानादिरूपा निरूपिताः एक इत्य-

गिरिदर्यां विनिक्षिप्य नीतं नीतं महाऽसुरः ।
शिलया पिदधे द्वारं चतुःपञ्चावशेषिताः ॥ २९ ॥
तस्य तत्कर्म विज्ञाय कृष्णः शरणदः सताम् ।
गोपान्नयन्तं जग्राह वृकं हरिरिवौजसा ॥ ३० ॥
स निजं रूपमास्थाय गिरीन्द्रसदृशं बली ।
इच्छन्विमोक्तुमात्मानं नाशक्नोद्ग्रहणातुरः ॥ ३१ ॥
तं निगृह्याच्युतो दोर्भ्यां पातयित्वा महीतले ।
पश्यतां दिवि देवानां पशुमारममारयत् ॥ ३२ ॥
गुहापिधानं निर्भिद्य गोपान्निःसार्य कृच्छ्रतः ।
स्तूयमानः सुरैर्गोपैः प्रविवेश स्वगोकुलम् ॥ ३३ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे
पूर्वार्धे व्योमासुरवधो नाम
सप्तत्रिंशोऽध्यायः ॥ ३७ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

शङ्काः भगवता कृत्वा न कुतश्चिद्भयं येषां प्रायेण भगवान् बलभद्रश्च तस्मिन् दिवसे न गोचारणार्थं गतौ अन्यथा समागमनमात्रेणैव स हतो भवेत् गोकुले स्थित एव तत्र गत्वा मारितवानिति विमर्शः ॥ २७ ॥

दैत्याग्रहात् कंसस्य तद्धितकारी मयपुत्रः स्वयमागत्य गोपानामुपद्रवं कृतवानित्याह । मयपुत्र इति । महती माया यस्येति गोपालान् वञ्चयितुं मारयितुञ्च शक्तिरुक्ता पलायनं करिष्यन्तीति व्योमासुरो गोपालरूपो जातः चौरायितप्रतिच्छायरूपः मेषायितान् मेषवत्पतित्वा स्थितान् यथाऽन्ये गोपाला नयन्ति परन्तेषु नीयमानेषु पालयिता जाग्रति अस्मिंस्तु नीयमाने नयति सति मायया कृत्वा न कस्यापि जागरणमिति बहूनेव नीतवान् २८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

निलायनं चोरितवस्तुतिरोधापनम् अपदेशोऽभिनयः ॥ २६ ॥

अकुतोभया इति । चोरयितव्याश्चोरयितारश्च पालकाश्चैते त्रयो वयं सखाय एवेति विश्वासात् ॥ २७ ॥

अपोवाह चोरयामास ॥ २८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

निलायनक्रीडां पशुतस्कोरपालकप्रचारणादिलीलाम् ॥ २६ ॥ २७ ॥

अपोवाह अपकृष्य निनाय ॥ २८ ॥

भाषा टीका ।

गोविंद भगवान् भी केशी दैत्यको युद्ध में मारकर प्रसन्न गोपाळों के साथ में रह कर व्रजको सुख देते हुये पशुओं को गउओं को चराते भये ॥ २५ ॥

एक दिन वे सब गोपाल मिलकर पर्वत के शिखरों में गउओं को चराते हुये चोर और रक्षक व्यवहार से छिपने की लुक लुकानी क्रीडा करते भये ॥ २६ ॥

हे राजन् ! उहां पर कई एक जने चोर होगये काई रक्षक होगये कई एक निर्भय होकर मेढा की नकल करके विहार करते भये ॥ २७ ॥

इतने में मयदानव का पुत्र व्योमासुर गोपाळ का रूप धारण कर के चोर बनकर मेढा बनने वाले बहुत बालकों को उठा लेगया ॥२८॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

पिदधे छादितवान् ॥ २९ ॥

शरणद आश्रयप्रदः हरिः सिंह इव ॥ ३०—३१ ॥

पशुमारं पशुमारो यथा भवति तथा अनिःश्वासमित्यर्थः ॥ ३२ ॥

भुवि गोपैः स्तूयमानः उपरि वैमानिकैर्देवैरिति ॥ ३३ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
सप्तत्रिंशोऽध्यायः ॥ ३७ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

विशेषेण दूरतोऽन्तः प्रदेशप्रवेशनेन नितरां क्षिप्त्वा ततश्च चत्वारः पञ्च वा ते चतुःपञ्चा अवशेषिता बभूवुः । अर्थान्मेषायितगोपा एव । सन्धिरार्षः । वशेषिता इति वा । वतंस इति वत् । यद्वा । चतुःपञ्चा अवशेषिता येषां तथाभूता बभूवुः तावत्पर्य्यन्तं तदज्ञानं च स्वचोरकृतापहारभ्रमात् ॥ २९ ॥

तन्महादारुणं कर्म तस्य विज्ञाय सतां भक्तमात्राणां शरणदः शरणरूपमात्मानं दाता । किमुत तत्तत्सत्तमगणदुर्लभभागधेयानां तेषामित्यर्थः ॥ ३० ॥

वल्यपि आत्मानं मोक्तुमिच्छन्नपि निजं रूपमास्थायापि नाशक्नोत् ॥ ३१ ॥

पश्यतां हर्षेण पश्यत्सु इत्यर्थः । दिवीति तदानीमपि शङ्कयान्तर्द्धानेन स्थितत्वेत्यर्थः । पशुमारममारयत् यज्ञियं पशुमिव श्वासरोधेनामारयत् । "उपमाने कर्मणि च" इति णमुल ण्यन्तस्य म्रियतेरनुप्रयोगश्च । इदमप्यनुरूपमेव तस्यां क्रीडायां चोरदण्डस्यापि क्षणिकतदनुकरणरूपत्वात् तेनापि गोपानामुच्छ्वासरोधनाच्च अच्युत इति तादृशसमुचितलीलातोऽचलनाभिप्रायेण ॥ ३२ ॥

कृच्छ्रतः गुहारूपात् दुःखस्थानान्निःसार्य्य अतएवानुगैर्गोपैर्देवैश्च स्तूयमानः । अतएव प्रकर्षेण विवेश । स्वस्य गोकुलमिति आगामिलीलास्मरणशङ्कया । स्वचित्तं समादधाति नात्यन्तीनस्तत्परित्यागो भविष्यतीत्यभिप्रायात् । तथात्वमग्रतो व्यञ्जयिष्यति । सुरैर्गोपैरिति बहुत्र पाठे सुरैः स्तूयमानोऽपि गोत्रैः सह स्वगोकुलमेवेति ॥ ३३ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे
श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिण्यां
सप्तत्रिंशोऽध्याय ॥३७॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं नीतान्नीतान् गोपान् गिरिदर्य्यां गिरिगुहायां विनिक्षिप्य तस्या द्वारं शिलया पिदधे छादितवान् क्रीडायान्तु चत्वारः पञ्च वा गोपा अवशेषिताः ॥ २९ ॥

तथा तस्य व्योमस्य कर्म चेष्टितं विज्ञाय सतां शरणदः आश्रयप्रदः हेतुगर्भितत्वाद्गोपान्नयन्तं व्योमं सिंहो वृकमिवौजसा बलेन जग्राह ॥ ३० ॥

तथा स व्योमः पर्वतश्रेष्ठतुल्यं स्वासाधारणं रूपं बिभ्रद्बली ग्रहणात्पीडितः, आत्मानं विमोक्तुमिच्छुरपि नाशक्नोत् ॥ ३१ ॥

तथा तं व्योमं नितरां गृहीत्वा भूतले पातयित्वा च दिवि देवानां पश्यतां सतां पशुमारो यथा भवति तथा यज्ञियपशुमिवेति यावत् मारयामास ॥ ३२ ॥

ततो गुहायाः पिधानं छादनं शिलां निर्भिद्य कृच्छ्रतो दुःखाद्गिरिदरीपतनजान्निः सार्यं गोपैः सुरैः स्तूयमानश्च स्वगोकुलं प्रविवेश ॥ ३३ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
सप्तत्रिंशोऽध्यायः ॥३७॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

गिरिदर्य्यां पर्वतगुहायाम् ॥ २९ ॥
हरिः सिंहः ॥ ३० ॥
गुरुणा महता हरिणा गृहीत इति शेषः ॥ ३१ ॥
पशुमारयति स्वकप्राणान्करोति ॥ ३२ ॥ ३३ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
पञ्चत्रिंशोऽध्यायः ॥ ३५ ॥ ३७ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे
सप्तत्रिंशोऽध्यायः ॥ ३७ ॥

श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी ।

क्रीडार्थं न नयनं किन्तु मारणार्थमित्यग्रिमकृत्यमाह । गिरिदर्य्यामिति । बहूनप्येकवारं नयति बहुवारश्च नीतवान् गुहाद्वारमतिसूक्ष्ममिति ज्ञापयितुं नीतं नीतमित्येकवचनं ननु बालाः दयापात्रं कथमेवं गुहायां प्रक्षिपतीत्याशङ्क्याह । महासुर इति । अत्यन्तमासुरस्वभावः अतएव न गुहाप्रवेशनमात्रमेव कारितवान् किन्तु शिलया द्वारमपिदधे एवं मेषायिताः क्षीणाश्चेत् चौरायिताः पालायिताश्च मेषायिता एव क्रमेण भवन्तीति चत्वारः पञ्च वा अवशिष्टाः तदानीं नीयमानेन सह पञ्च नोचेत् चत्वारः ॥ २९ ॥

तदान्यत्र स्थितो भगवान् व्योमस्य कर्म ज्ञात्वा समागत्य यत्कृतवांस्तदाह । तस्येति । तत्कर्म गुहायां निःक्षिप्य शिलापिधानलक्षणं विशेषेण ज्ञात्वा प्रत्यक्षदर्श्येव तथाज्ञाने हेतुः कृष्ण इति तदानन्दो हि सः यदैव स्वानन्दस्तेभ्यः तिरोभूतः सद्रूपाश्च ते अतो ज्ञातवान् तथापि अक्लिष्टकर्मा भगवान् सर्वसमः किमिति तं जगृह इत्याशङ्क्याह । सतां शरणद इति । यदि भगवान् सर्वावस्थासु न पालयेत्तदा न कोऽपि शरणं गच्छेत् ततः शरणदानमेव न स्यात् सताश्च मनसि तद्दुःखं भवेदित्यपि शास्त्ररीतिरपि नश्येदित्यपि गोपान्बहूनेव नयन्तं पालायितं इव तत्रैव प्रादुर्भूतः आगतो वा जग्राह तस्यैकदेशग्रहणव्यावृत्त्यर्थं दृष्टान्तमाह । वृकं हरिरिवेति । स हि सर्वाङ्गे तं व्याप्य आच्छाद्य गृह्णातीति तथा सर्वाङ्गे गृहीत इत्यर्थः ॥ ३० ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

ततः स विचारितवान् यद्यपि भगवान् महान् तथापि रूपान्तरं गृहीतवानिति मया स्वरूपे गृहीते भगवान् स्वल्परूप इति न मारायितुं शक्ष्यति भगवानपि चेत् स्वरूपं गृह्णीयात्तदाऽवतारसमाप्तिरेव भविष्यतीति कंसादीनामस्माकञ्चामारणमेव स्यादित्यभिप्रेत्य स्वरूपं गृहीतवानित्याह । स निजमिति । निजभासुरं रूपं ग्रहणायोग्यत्वायाह । गिरीन्द्रसदृशमिति । पराक्रमोऽपि वर्त्तत इति ज्ञापयितुमाह । बलीति । एवमपि कृत्वा आत्मानं मोक्तुमिच्छन्नपि अत्यन्तप्रयत्नं कुर्वन्नपि आत्मानं विमोक्तुं नाशक्नोत् दूरापास्तं विमोचनं ग्रहणेनातुर एव जातः अन्तिमावस्था ग्रहणमात्रेणैव जातेति ॥ ३१ ॥

तथापि मुख्यदैत्यत्वात् लीनो न भाविष्यतीति स्वयम्मारितवानित्याह । तं निगृह्येति । दोर्भ्यां निग्रहं कृत्वा स्वयं भयरहितः अच्युतः महीतले तं पातयित्वा यथा भूमिष्ठा देवास्तं न त्यज्यन्ति तथा कृत्वा यज्ञार्थे तस्य वधो भवत्विति धर्मनिरूपणार्थं पश्यतामेव सर्वेषां देवानां पशुमारं यथा भवति तथा अमारयत् मुखमुद्रणं कृत्वा गलमोडनं कृतवानित्यर्थः । देवानां दर्शनं सुखार्थम् अन्यथा भगवानक्लिष्टकर्मा तथा न कुर्यात् ॥ ३२ ॥

ततो यत्कृतवांस्तदाह । गुहापिधानमिति । मायया स्थापितं निर्मिथ नितरां भित्त्वा यथा पुनरन्योऽपि न प्रवेशयेत् तथा गुहात्वमेव दूरीकृतवान् कृच्छ्रतः सङ्कटात् गोपान् निःसार्य तैरेव सुरैः गोपैश्च स्तूयमानः भगवत्कृतमुपकारं ते जानन्तीत्युक्तं ततः तैः सह स्वगोकुलं प्रविवेश सर्वत्र प्रत्यापत्तिर्न्निरूप्यते अग्रे लीलापराणामपि तथात्वाय ॥ ३३ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे श्रीलक्ष्मणभट्टात्मजश्रीमद्वल्लभदीक्षितविरचितायां सुबोधिन्याम्

चतुस्त्रिंशाध्यायविवरणम् ॥ ३४ ॥ ३७ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

चतुःपञ्च मेषायिताः सखायः ॥ २९ ॥

हरिः सिंहः ॥ ३० ॥ ३१ ॥

पशुमारं यज्ञियं पशुमिव श्वासरोधेनामारयत् तेनापि गुहाद्वारनिरोधादिति भावः । "उपमाने कर्मणि च" इतिणमुलण्यन्तस्य म्रियतेरनुप्रयोगः ॥ ३२ ॥ ३३ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
सप्तत्रिंशोऽत्र दशमे सङ्गतः सङ्गतः सताम् ॥ ३७ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

पिदधे छादितवान् ॥ २९ ॥–॥ ३० ॥—॥ ३१ ॥

पशुमारं यज्ञियपशुमारो यथा स्यात्तथा ऽनिश्वसन्तमसुरममारयत् ॥ ३२ ॥ ३३ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
सप्तत्रिंशाध्यायार्थप्रकाशः ॥ ३७ ॥

भाषा टीका ।

उस महा असुर ने उनको लेजाकर पर्वत के कंदरा में लेले डार कर पत्थर से उसके द्वार को मूंद दिया ऐसे होते २ चार पांच ही बांकी रह गये ॥ २९ ॥

उसके उस कर्म को जानकर सत्पुरुषों के शरण देने वाले कृष्ण भगवान् गोपों को लेजाते उसको भेडार को जैसे सिंह पकडे तैसे अपने बल से पकड लेते भये ॥ ३० ॥

उस बली दैत्य ने बडे पर्वत सरी का अपना रूप धारण किया तौभी पकडने से बडा दुखी होगया अपने को छुडाने चाहा परंतु छुडाने नहीं सका ॥ ३१ ॥

अच्युत भगवान् ने उसको दोनों हाथों से पकडकर पृथिवी में गिराकर देवतान् के आकाश में देखते ही पशु को यज्ञ में जैसे मारैं हैं तैसे मार दिया ॥ ३२ ॥

फिर गुफा के ढकना को खोलकर कष्ट में से गोपोंको निकाल कर गोपों से देवतों से स्तुत होते हुये अपने गोकुल को भगवान् पधारे ॥ ३३ ॥

इति श्रीभागवत दशमस्कन्धपूर्वार्धे सैंतीसमें अध्याय की भाषाटीका समाप्त ॥ ३७ ॥

इति श्रीमद्भागवते दशमस्कन्धे पूर्वार्धे सप्तत्रिंशोऽध्यायः ॥ ३७ ॥

॥ अष्टात्रिंशोऽध्यायः ॥

श्रीशुक उवाच ॥

अक्रूरोऽपि च तां रात्रिं मधुपुर्यां महामतिः ।
उषित्वा रथमास्थाय प्रययौ नन्दगोकुलम् ॥ १ ॥
गच्छन् पथि महाभागो भगवत्यम्बुजेक्षणे ।
भक्तिं परामुपगत एवमेतदचिन्तयत् ॥ २ ॥
किं मया चरितं भद्रं किं तप्तं परमं तपः ।
किं वाथाप्यर्हते दत्तं यद्द्रक्ष्याम्यद्य केशवम् ॥ ३ ॥
ममैतद्दुर्लभं मन्य उत्तमश्लोकदर्शनम् ।
विषयात्मनो यथा ब्रह्मकीर्तनं शूद्रजन्मनः ॥ ४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अष्टात्रिंशे यथाध्यायमक्रूरो गोकुलं गतः ।
तथैव रामकृष्णाभ्यां गृहं नीत्वा सुसत्कृतः ॥
प्रातः केशिवधे वृत्ते द्वादश्यां निर्गते मुनौ ।
ततो व्योमे हते ऽक्रूरः सायं गोकुलमागमत् ॥

तदेवं नारदेन कंसवधादिकार्ये विज्ञापिते श्रीकृष्णो मथुरां गन्तुमुद्यतो वर्तते तदाक्रूरोऽपि गोकुलमागमदित्याह । अक्रूरोऽपीति ॥ १ ॥ २ ॥

अपिः सम्भावनायाम् अर्हते योग्याय ॥ ३ ॥

स्वस्य कृष्णस्य दर्शने ऽसम्भवमाशङ्क्य पुनः सम्भावयति । ममैतदिति द्वयेन । विषयात्मनो विषयाविष्टचित्तस्य शूद्राज्जन्म यस्य तस्य ब्रह्मकीर्तनं वेदोच्चारणं यथेति ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

अक्रूराय नमस्तस्मै येन कंसोऽपि सेवितः । कुतोऽपि व्याजतो द्रष्टुं सेवितुञ्च निजेश्वरम् । अक्रूर इति तैर्व्याख्यातम् । तत्रापि चशब्दः समुच्चयेऽभिप्रेतः । समुच्चयश्च श्रीकृष्णस्य मथुरागमनोद्यमेनेति । यद्वा । अपिचशब्दः केशिगमनसमुच्चये उभयोः कंसादिष्टत्वात् यस्यां रात्रौ कंसेनादिष्टस्तां तथा श्रीहरिवंशे निशि स्तिमितमूकायां मथुरायां जनाधिप इति । अत एवात्रापि पूर्वमुक्तं प्रविवेश गृहं कंस इत्यादि । यच्च तत्रैवोक्तं तस्मिन्नेव मुहूर्त्ते तु मथुरायाः स निर्ययौ । प्रीतिमान् पुण्डरीकाक्षं द्रष्टुं दानपतिः स्वयमिति । तत्कल्पभेदाद्भिन्नं यद्वा । यादववर्गैः सह कंसस्य बहुलसंकथया प्रायो रात्रिशेष एवोपसन्नेऽक्रूरं प्रति तस्य प्रेरणया तथैव पर्य्यवस्यतीति । महती भक्तिरूपा मतिर्यस्य तादृशः सन्निति श्रीगोकुलजनवैक्लव्यहेतुत्वेनाशोचकं तत् प्रस्थानं केवलं वर्णयितुमनिच्छुस्तद्भक्तिभागास्वादमेवावलम्बते प्रययौ प्रतस्थे ज्ञातत्वेऽपि पुनर्नन्देति विशेषणम् स्वस्य तद्विशिष्टतयैव स्फूर्त्तेः ॥ १ ॥

महामतित्वमेवाह । गच्छन्नित्यादिना नृपेत्यन्तेन । गच्छन्नेव पथि परां भक्तिमुपगतः सन्नेवं किं मया चरितमित्यादि मनोरथप्रकारैरेतत् मयापि भगवान् द्रक्ष्यते इति मनोरथसामान्यमचिन्तयत् यतो महान् भागस्तादृशं श्रीकृष्णकृपारूपं भाग्यं यस्य सः भक्तेः परात्वे हेतुः भगवति निजाशेषैश्वर्यप्रकटनपरे तथाम्बुजेक्षणे तादृशत्वोपलक्षणकमहामाधुर्यप्रकटनपरे च श्रीकृष्णे तत्तत्स्फूर्त्तेरित्यर्थः ॥ २ ॥

नाना सञ्चारिभावैश्चिन्तितमेवाह । किमित्यादिना स्वबन्धुष्वित्यन्तेन । तत्र सवितर्कमाह । किमिति । किं कतमत् परमं भद्रं भगवत्पूजादीनां भद्रकर्मणामपि मध्ये परमम् एवं परमं तपो भगवद्व्रतानां मध्ये वा समुच्चये अथ कार्त्स्न्ये भद्रादीनां यथोत्तरं श्रैष्ठ्यमूह्यं यद्यस्माद्भद्रादेः केशवं परमदुर्दर्शानां ब्रह्मरुद्रादीनामपीश्वरं द्रक्ष्यामि तच्चाद्येति अन्यत्तैः तत्र योग्याय महाभागवतायेत्यर्थः । यद्वा पूज्याय तस्मा एवेत्यर्थः । ममापीत्यन्वयः गर्हितेनापि मयेत्यर्थः ॥ ३ ॥

पुनः सदैन्यमाह । ममेति । एतदीदृशं तत्तद्भद्राचरणादि साध्यं यद्वा । आधुनिकमुत्तमःश्लोकदर्शनं यद्वा स्वानुभवमात्रं वेद्यमाहात्म्यताविवक्षया आदावेतदित्युक्त्वा वागोचरत्वे क्रियमाणे तु यत्किञ्चिदेवोक्तं स्यादित्यभिप्रायेण पश्चात्तादृशानामविशेषणेन

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

साक्षादपि निर्दिशति उत्तमः संसाराख्यतमो निरसनः श्लोकः यशोऽपि यस्य तस्य दर्शनं मम मत्सम्बन्धे दुर्लभं साधनं बाहुल्यं यदा स्यात्तदापि जन्मान्तर एव लभ्यं मन्ये । कुतः विषयात्मनः प्रारब्धवशेन विषयतादात्म्यं प्राप्तस्य । अनुरूपो दृष्टान्तः यथेति । शूद्रजन्मन इति । यथा तस्य तद्बाहुल्ये सति विप्रजन्मन्येव न स्यात् तद्वत् कर्मशूद्रस्य तु प्रायश्चित्तविशेषेणेह जन्मन्यपि स्यादिति ॥ ४ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

अर्हते योग्याय पात्राय ॥ १-३ ॥

ब्रह्मकीर्त्तनं वेदोच्चारणम् ॥ ४——५ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अथाक्रूरः स्वमालयमित्युक्तं ततः स किमकरोदित्याशङ्क्य व्रजं प्रत्यक्रूरगमनं तस्य च मनोरथसिद्धिश्चाहाष्टात्रिंशेन । अक्रूरोऽपीति । महती भगवद्विषया मतिर्यस्य स उषित्वा स्थित्वा प्रभाते रथमधिरुह्य नन्दगोकुलं प्रति ययौ प्रतस्थे इत्यर्थः ॥ १ ॥

महाभागः दुर्लभतरभविष्यद्भगवद्दर्शनात्मकमहाभाग्यवान् भगवति परां भक्तिं प्राप्तः इथीत्थं वक्ष्यमाणप्रकारेणाचिन्तयत् ॥ २ ॥

कंसकृतनिर्वेधादलब्धभगवद्दर्शनः सम्प्रति तत्प्रेषणया भगवन्तं दिदृक्षुस्तावदात्मनस्तद्दर्शनानिदानं बहुधा तर्कयति । किम्मयेति । अर्हते योग्याय सत्पात्रभूताय दत्तं किमित्यूहः कुतः यद्यस्मादद्य केशवं द्रक्ष्याम्यन्यथैतन्न सम्भाव्यत इति भावः ॥ ३ ॥

पुनः "श्रेयांसि बहुविघ्नानि" इति न्यायेन दर्शनासम्भवमाशङ्क्य पुनः सम्भावयति । ममैतदिति द्वाभ्याम् । विषयात्मनः विषयाविष्टचित्तस्य ममैतदुत्तमैश्लोक्यादिभिः केवलं श्लोक्यस्य स्तुत्यस्य वितर्क्यस्येति यावत् नतु दृश्यस्येति भावः । तस्य दर्शनं दुर्लभं मन्ये यथा शूद्राज्जन्म यस्य ब्रह्मकीर्त्तनं वेदवचनं दुर्लभं तद्वत् ॥ ४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अज्ञानां भगवद्भक्तिकरणनिदर्शनार्थं गोकुलयात्राकथनच्छद्मनाऽक्रूरस्य भक्त्युद्रेकः प्रतिपाद्यते ऽस्मिन्नध्याये मधुपुर्यां मथुरायां यस्यां रात्र्यां न्ययुङ्क्त तां रात्रिम् ॥ १ ॥ २ ॥

भद्रं पुण्यं सामान्योक्तं विशिनष्टि । किन्तमिमित्यादिना । अर्हते विष्णुभक्त्यादिगुणसम्पन्नाय ॥ ३ ॥

ब्रह्मकीर्तनं वेदाध्ययनम् ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

॥ १—३ ॥

दुर्लभं साधनबाहुल्यं यदि स्यात्तदापि जन्मान्तर एव लभ्यं मन्ये कुतः विषयात्मनः प्रारब्धवशेन विषयतादात्म्यं प्राप्तस्य अनुरूपो दृष्टान्तो यथेति । शूद्रजन्मन इति । यथा तद्बाहुल्ये सति विप्रजन्मन्येव तत् स्यात्तद्वत् ॥ ४ ॥

श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी ।

पञ्चत्रिंशे भक्तिमार्गस्थापनाय निरूप्यते ।
अक्रूरागमनं भक्तेः फलं चैव हि मानसम् ॥
सात्त्विकश्चेदभिमुखस्तदा भवति भक्तिमान् ।
अन्यथादैत्यसंसर्गे लब्धा भक्तिर्भवेद्ध्रुवम् ॥

त्रयस्त्रिंशेऽध्याये अक्रूरः प्रेषित इत्युक्तं तस्यागमनं निरूपयति । अक्रूरोऽपीति । यस्यां रात्रौ समादिष्टः तां रात्रिं मथुरायामेव स्थितः सा हि भगवदधिष्ठिता भूमिः भगवांश्चेत् निवारयेत् मथुरा वा भगवत्सेवको वा कश्चित् तदा न गमिष्यामीति निश्चित्य तत्रैव स्थितः ततो गमनमेव समीचीनमिति ज्ञात्वा प्रचलित इत्याह । महामतिरिति । अयमुपायः सर्वेषामेव हितकारी अतो गत्वा समानेय इति ततः कंसदत्तं दिव्यं रथमास्थाय स्वयमेकाकी सारथिरूपः नन्दस्य गोकुलं प्रति प्रकर्षेण बहिरन्तः सन्तोषपूर्वकं गृहे च सम्भृतिं कृत्वा ययाविलयर्थः ॥ १ ॥

सात्त्विकस्य भगवदाभिमुख्ये भक्तिर्भवतीति ज्ञापयितुं तस्य भगवद्विषयको मनोरथो जात इत्याह । गच्छन्निति गच्छन्निति पथि मार्गगन्तुः भक्तिरुचितैव पथि गच्छन्निति रथप्रेरणं नापेक्षत इति सूचितं ननु दुष्टसंसर्गी प्राप्य स्थितो दुष्टप्रेरितः कथं भक्तो जात इत्याशङ्क्याह । महाभागवत इति । पूर्वसञ्चितपुण्यराशिः सर्वमेव भाग्यरूपफलोन्मुखं जातमित्यर्थः । तत्फलमाह । भक्तिं परामुपगत इति । परां प्रेमलक्षणां विषयो न विभूतिरूप इत्याह भगवतीति । अम्बुजवदीक्षणे यस्येति दृष्टैव सर्वतापनाशकत्वं निरूपितम् अतः फलदातरि पुरुषोत्तमे भक्तियुक्ता सापि भक्तिः पूर्वं जाता मध्ये गता तिरोहिता पुनरुप समीपे स्वयमेवागता एतद्वक्ष्यमाणमेवं प्रकारेणाचिन्तयदिति गता भक्तिः समागता स्वतः प्रवेशमलभमाना कामनाद्वारा प्रविष्टेति भगवते महत्त्वं ज्ञात्वा तेन स्वस्योत्कर्षं यथा कामयते तथा चिन्तायुक्तं कृतवतीत्यर्थः ॥ २ ॥

प्रथमतो भगवद्धर्माणां माहात्म्यमाह । भक्तिदार्ढ्याय तत्रापि दर्शनस्य सर्वोत्कृष्टत्वमाह । किम्मया चरितं भद्रमिति । त्रयो विभागाः स्वयं भगवानन्ये सर्वे च तेषामुत्कृष्टधर्मैः सहजैरागन्तुकैर्वा सर्वात्मको भगवांस्तुष्यतीति ज्ञायते तस्मिंस्तुष्ट एव तस्य दर्शनं भवतीति यतो ब्रह्मेशयोरपि सुखमोक्षदाता भगवानिति तत्र स्वधर्म आचारः भागवद्धर्मस्तपः सर्वलोकोपकारी दानमिति आचारप्रभवो धर्म इति तदुक्तं किम्मयाचरितमिति । भद्रं कल्याणरूपं तपो मे हृदयं साक्षादिति वाक्यात् भगवच्छक्तिस्तपः अत उक्तं किन्तप्तमिति जीवधर्मस्तपोव्यावृत्त्यर्थं परममिति सर्वोपकारी धर्मो दानं सुपात्र एव महाफलं साधयतीति अर्हते दत्तमिति । अथेति भिन्नप्रक्रमे किंवेत्याकाङ्क्षायामत्यन्तं भगवत्पराय भगवदर्थमेव सर्वविनियोगाय श्रद्धया दत्तमिति धर्मस्याधिक्यं।

मैवं ममाधमस्यापि स्यादेवाच्युतदर्शनम् ।
ह्रियमाणः कालनद्या क्वचित्तरति कश्चन ॥ ५ ॥
ममाद्यामङ्गलं नष्टं फलवांश्चैव मे भवः ।
यन्नमस्ये भगवतो योगिध्येयाङ्घ्रिपङ्कजम् ॥ ६ ॥
कंसो बताद्याकृत मेऽत्यनुग्रहं द्रक्ष्येऽङ्घ्रि पद्मं प्रहितोऽमुना हरेः ।
कृतावतारस्य दुरत्ययं तमः पूर्वेऽतरन् यन्नखमण्डलत्विषा ॥ ७ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

प्रक्रमः अन्यथा अद्यैव भगवद्दर्शनं न भवेदतो ज्ञायते त्रयाणामन्यतरत्कृतमिति ॥ ३ ॥

एवङ्कार्यावश्यकतां ज्ञात्वा कारणं परिकल्प्य तत्र बाधकमाशङ्क्य परिहरति द्वाभ्याम् । ममैतद्दुर्लभं मन्य इति । एतद्दर्शनं मम साधने विद्यमानेऽपि दुर्लभं तत्रोपपत्तिर्मन्य इति युक्त्यैवं निश्चीयते मम दर्शनं न भविष्यतीति अयञ्च तर्कः भगवतः अलौकिकत्वज्ञापकः लौकिकत्वे इति शङ्कैव नोदेतीति दर्शनाभावे हेतुद्वयमाह । भगवन्निष्ठं स्वनिष्ठञ्च धर्मद्वयं भगवन्निष्ठमाह । उत्तमश्लोकस्य दर्शनमिति । उत्तमैरपि श्लोक्यत एव नच दृश्यते उत्तमाः सर्वज्ञा भक्ताः स्वनिष्ठमाह । विषयात्मन इति । किञ्च विषयाणां न केवलं प्रतिबन्धकत्वं तथा सति कदाचित् अनित्यत्वात् विषयाणां दर्शनमपि भवेत् किन्त्वधिकारनिवर्त्तकत्वमपि यतः सिद्धेऽपि सुलभे विषये स्वस्य न योग्यतेति तदाह । यथेति ब्रह्मकीर्त्तनं वेदोच्चारणं पूर्वजन्मनि ब्राह्मणोऽपि सर्वज्ञोऽपि वेदोच्चारणसमर्थोऽपि शूद्रवीजाच्चेदुत्पन्नः तदा नार्हति कीर्त्तनं कर्तुम् ॥ ४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

अष्टत्रिंशे व्यधात्कृष्णो यथाक्रूरो मनोरथान् ।
तथा तान् पूरयामास तदातिथ्यं च सोऽकरोत् ॥

कंसः फाल्गुनकृष्णैकादश्यां कृत्वैव मंत्रणाम् प्रेष्य केशिनमक्रूरमादिश्य प्रहिणोद्व्रजम् । प्रातः केशिवधोऽक्रूरप्रस्थानं नारदस्तुतिः । अपराह्णेव्योमवधोऽक्रूरःसायंव्रजेऽविशत् । तामेकादश्या रात्रिं महामतिरिति । भगवत्कथार्चनादिभिर्जागरणेनैवोषित्वा पारणमकृत्वैव ययौ ॥ १ ॥ २ ॥

सहर्षवितर्कमाह । किमिति । अपिः संभावनायाम् अर्हते योग्याय ॥ ३ ॥

दैन्याम्बुधौ निपतन्नाह । मम कीदृशस्य विषयात्मनः विषयाविष्टस्य शूद्रजातेर्वेदकीर्तनमिव उभयत्रैवानर्हत्वं ध्वनितम् ॥ ४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अष्टत्रिंशेऽक्रूरभाग्योदयं वर्णयति । अक्रूरोऽपीति ॥ १ ॥

श्रीनारदेन कंसवधादिकार्य्ये विज्ञापित्ते सति भगवानपि तदर्थं तत्र गन्तुमियेष यदा तदाक्रूरोऽपि कंसेन नियुक्तस्तां रात्रिं मथुरायामुषित्वा तदनन्तरं रथमारुह्य नन्दगोकुलं प्रययौ ॥ १ ॥

एवमेतत् वक्ष्यमाणमचिन्तयत् ॥ २ ॥

अपीति सम्भावनायां किं साधनं मयाचरितमनुष्ठितम् अर्हते योग्याय ॥ ३ ॥

स्वस्य श्रीकृष्णदर्शनानधिकारित्वं शङ्कते । ममैतदिति । विषयेषु आत्मा मनो यस्य तस्यान्यासक्तस्य मम ब्रह्मकीर्तनं वेदपाठः ॥ ४ ॥

भाषा टीका ।

श्रीशुकदेव जी बोले अक्रूर जी भी उस रात्री भर मधुपुरी मे रहे महा बुद्धिमान् होने से प्रातः काल मे उठ कर रथ पर बैठ कर नन्दजी के गोकुल को जाते भये ॥ १ ॥

महा भाग अक्रूर जी मार्ग मे जाते समय कमल लोचन भगवान् मे परम भक्ति को प्राप्त होकर इस मनोरथ की चिन्ता करते भये ॥ २ ॥

क्या मैने अच्छा कर्म किया है क्या परम तप किया है अथवा क्या किसी सुपात्र को दान दिया है जो कि मैं आज भगवान् केशव का दर्शन करूंगा ॥ ३ ॥

मैं तो समुझता हूं कि यह उतम श्लोक का दर्श मेरे को नहीं होना है जैसे कि विषयी को दर्शन दुर्लभ है और जैसे शूद्रयोनि को वेद का उच्चारण दुर्लभ है ॥ ४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

यद्वा मैवं किन्त्वधमस्य नीचस्यापि मम स्यादेव कुत इत्यत आह । ह्रियमाणः कालनद्येति । अयं भावः यथा नद्या ह्रियमाणानां तृणादीनां मध्ये किञ्चित्कदाचित्तरति कूलं प्राप्नोति तथा कर्मवशेन कालेन ह्रियमाणानां जीवानामपि मध्ये कश्चित्तरेदिति सम्भवतीति ॥ ५

अतो ऽनया प्रवृत्त्यैव ममामङ्गलं ध्रुवं नष्टमेवेति ज्ञायते भवो जन्म च सफलं जातमिति यद्यतो नमस्करिष्यामि ॥ ६ ॥

अमङ्गलनाशे सूचकान्तरमाह । कंस इति । बतेत्याश्चर्ये अतिखलः कंसोऽपि ममात्यन्तमनुग्रहं कृतवान् यतोऽमुना कंसेन प्रहितो हरेरंघ्रिपद्मं द्रक्ष्ये द्रक्ष्यामीति पूर्वेऽम्बरीषादयस्तमः संसारमतरंस्तीर्णाः ॥ ७ ॥

यदर्चितं ब्रह्मभवादिभिः सुरैः श्रिया च देव्या मुनिभिः ससात्वतैः
गोचारणायानुचरैश्चरद्वने यद्गोपिकानां कुचकुङ्कुमाङ्कितम् ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका

अङ्घ्रिपद्मं विभावयति । यदिति । ब्रह्मादिभिरर्चितमिति परमैश्वर्यमाह । श्रिया चेति सौभाग्यातिशयम् । मुनिभिर्भक्तसहितैरिति परमपुरुषार्थत्वम् गोचारणायेति कृपालुत्वम् । यद्गोपिकानामिति प्रेममात्रसुलभत्वम् ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

मतिधृतिभ्यामाह । मैवमिति । अधमस्येति तत्सन्दर्शनाखिलसाधनराहित्यं तद्वैपरीत्यं चोक्तम् । तथाप्यच्युतस्य तद्भजनाभासेऽपि कृपालुतादिमाहात्म्याच्च्युतिरहितस्य श्रीकृष्णस्य दर्शनं तन्माहात्म्यबलात् स्यादेवेत्यर्थः । सम्भावनायां लिङ् । अत्र निदर्शनं चिन्तयति । तत्तत्कर्मभोगकालप्रवाहेण संसार्य्यमाणोऽपि कश्चित् साङ्केत्यनामादिनिमित्ते सति कश्चन अजामिलादिसदृशस्तरति तत्कूलायमानं श्रीभगवन्तं प्राप्नोति यथा कथञ्चित्तदभिगमनादौ सति पूतनादिसदृशो वा । नदीरूपकेण यथा ताभ्रियमाणः तृणादिरनुकूलवातादिनिमित्ते सति तरति तद्वदिति व्यञ्जितम् ॥ ५ ॥

एवं निश्चित्यैव सगर्वमाह । ममेति । अमङ्गलं तद्दर्शने सर्वोऽप्यन्तरायः । यदिति क्रमेणाविर्भाविना श्रीभगवत्कारुण्यस्यैव प्रभावेणेति भावः । योगिभिरेव ध्येयं तैरपि ध्येयमेव च यदङ्घ्रिपङ्कजं तन्नमस्ये साक्षात्कृत्य नमस्यामीत्यर्थः । तच्च भगवतः निजाशेषैश्वर्य्यं प्रकटयतः श्रीकृष्णस्येत्यर्थः ॥ ६ ॥

सम्भावितश्रीभगवत्कारुण्यस्यैव लक्षणं सविस्मयमाह । कंस इति । तैर्व्याख्यातं तत्रापिशब्दात् भगवत्कारुण्यं विनोदं विना न सम्भवतीति भावः । अनुग्रहं ममाभीष्टसान्निव्यमित्यर्थ इति । किम्वा हरेरित्यमङ्गलहरणाभिप्रायेण कृतावतारस्येति तत्रापि सम्प्रति सकललोककृपार्थप्राकट्याभिप्रायेण । यस्याङ्घ्रिपद्मस्य नखमण्डलं तद्बिम्बं तस्य त्विषा एकयापि कान्त्या तत्स्फूर्त्तिमात्रेणापि पूर्वे तद्भक्त्यैवातरन् आस्तां तावत्तेषां भजनान्तराणीति भावः । इति श्रीनराकृतिविग्रहस्य सनातनत्वं विग्रहान्तराणां तदन्तर्भावश्च लभ्यते ॥ ७ ॥

पुनस्तस्याङ्घ्रिद्वन्द्वस्य महिमाधिक्यमनुसंदधानस्तादृशस्यापि प्रेमवश्यत्वगुणं स्मरन् तच्च गोकुलस्यापि परमोत्कर्षव्यञ्जकतया पर्य्यवसाययन् सचमत्कारमाह । यदिति । पूर्ववदत्र च यच्छब्दस्य वाक्यान्तिमत्वात्तच्छब्दानपेक्षयैव योजना स्यादिति पूर्वेण युष्मकं न कृतं तदुक्तं काव्यप्रकाशे । यच्छब्दस्तूत्तरवाक्यपदार्थगतत्वेनोपपत्तेः सामर्थ्यात् पूर्ववाक्यार्थगतस्य तच्छब्दस्योपादानं नापेक्षत इति । ततश्च प्रपञ्चाधिकारिभिर्ब्रह्मादिभिः सुरैर्यदङ्घ्रिपद्ममर्चितमिति "मतिबुद्धी" त्यादिना वर्त्तमाने क्तः । "क्तस्य च वर्त्तमाने" इति षष्ठ्यभावस्त्वार्षः । तैरागमोक्तमार्गेण सदोपास्यमानमिति । तदेवं ब्रह्मादिकर्तृकसदोपास्यत्वमुक्त्वा तदेव द्रढयितुं क्रमेण तच्छिरस्पदैस्तदधस्पदैरपि तादृगुपास्यत्वं दर्शयति । श्रिया च देव्येत्यादिना । श्रियेति वैकुण्ठपरिकराणामुपलक्षणम् । मुनिभिरिति प्रपञ्चस्थसर्वभक्तग्राहकं तत्र मुनिभिः श्रुतिपुराणाद्यनुसारिभिः सिद्धैः साधकैश्च ससात्वतैः पाञ्चरात्रिकसहितैस्तत्साहित्यमत्र तस्यावश्यकत्वाभिप्रायेण । तदेवं यस्योत्कर्षप्रतिपादनाय च तादिदं त्रयमुक्तं तस्य गोकुलस्य परमोत्कर्षं दर्शयति । गोचारणायेत्यर्द्धेन यत्तेषामागममार्गेण ध्यात्वार्चितं तदेव स्वयं गोचारणायानुचरैश्चरद्भवति तदप्यास्तां गोपिकानां कुचनिर्माल्यरूपैः कुङ्कुमैराङ्कितं भवतीत्यहो परमाश्चर्य्यमिति भावः । आचितमिति पाठे व्याप्तमित्यर्थः । तदेवं प्रायो देवर्षिमुखाद्रासश्रवणेन केवलं तत्प्रेमसुलभमेव चिन्तितं नतु रतिकेलिविशेषमयमिति । तदास्य भावेऽस्मिन्न रसाभासत्वं किम्वा गोपिकानां तमतिबालं वात्सल्याद्वक्षसि लालयन्तीनां ज्यायसीनां कासाञ्चिदित्यर्थः । गोपिका अप्यत्रोपलक्षणमेव गोपालादीनामिति ज्ञेयम् । सेयमस्य गोकुलमहिमस्फूर्त्तिस्तदाभिमुख्यप्रभावेणैवेति ज्ञेयम् ॥ ८ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ॥

भवः जन्म ॥ ६ ॥

अत्यनुग्रहम् अकृत अकरोत् तमः पापं "पाप्मा वै तमः" इति श्रुतेः ॥ ७ ॥

गोचारणाय गवां सञ्चारणाय यवसभक्षणातिष्पादनाय वा ॥८-१०॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

यद्वा मैवं किन्त्वधमस्य नीचस्यापि ममाच्युतदर्शनं स्यादेव कुत इत्यत आह । ह्रियमाण इति । अयम्भावः यथा नद्या ह्रियमाणानां तृणादीनां मध्ये किञ्चित्कदाचित्तरति तथा कर्मवशेन कालेन ह्रियमाणानां जीवानामपि मध्ये कश्चित्तरेदिति सम्भवतीति ॥ ५ ॥

अनया प्रवृत्त्यैव ममाद्यामङ्गलं नूनं नष्टं भवो जन्मापि सफलं जातं कुतः यत् यतो योगिभिः केवलं ध्येयमेव नतु दृश्यमङ्घ्रिपङ्कजं नमस्करिष्ये ॥ ६ ॥

अद्याधुना कंसो मे मह्यमत्यर्थमनुग्रहमेवाकृताकरोत् बतेत्याश्चर्ये कुतः यतः अमुना कंसेन प्रहितः प्रेषितोऽहं मुरारेरङ्घ्रिपङ्कजं द्रक्ष्यामि कथम्भूतस्य कृतः अवतरो येन तस्य कथम्भूतं यस्याङ्घ्रिपङ्कजस्य नखमण्डलत्विषा हृदि धार्यमाणया साधनभूतया पूर्वे ब्रह्मादयः दुरत्ययं तमः तमःकार्यं संसारमतरन् तमः पापं वा "पाप्मा वै तमः" इति श्रुतेः ॥ ७ ॥

अङ्घ्रिपद्मं विभावयति । यदिति । यच्छब्दयोस्तदङ्घ्रिपद्मं द्रक्ष्यामि इति पूर्वेण संबन्धः ब्रह्मरुद्रादयो येषां तैः सुरैरर्चितमनेन परत्वमुक्तम् देव्या देवस्य विष्णोः संबन्धिन्या श्रिया

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

लक्ष्म्या चार्चितमनेन पारमैश्वर्यमुक्तम् श्रिया ब्रह्मादिभिराश्रीयमाणया लक्ष्याप्यार्चितत्वोक्तेः सात्वतैर्भक्तैः सहमुनिभिरर्चितमित्यनेन सौभाग्यातिशय उक्तः सात्वन्त एव सात्वताः प्रज्ञादित्वात् स्वार्थेऽण् अनुचरैः सह वने गोचारणार्थमनुचरादित्यनेन वात्सल्यं सौशील्यं चोक्तं गोपिकानां कुचकुङ्कुमैरङ्कितमित्यनेन कमनीयत्वमुक्तम् ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

उक्तमनुवदति । मैवमिति । अहमेवमच्युतदर्शनं दुर्लभमिति आत्मानं मावमंस्यामि नावजानामि कुत इत्यत्राह । स्यादिति । कथमेतत्सम्भवतीत्यत्राह । ह्रियमाण इति । कश्चन विष्णुभक्तिमान् ॥ ५ ॥

भवो जन्म योगिभिः सनकादिभि ॥ ६ ॥

वत आश्चर्यम् अद्य अत्यनुग्रहमाधिकानुग्रहमकृत अकरोत् अतिममात्यनुग्रहमिति पाठे अति अत्यर्थं स मे कृतवानित्यर्थः प्रहितः प्रेषितः अङ्घ्रिपद्मं विशिनष्टि । कृतावतारस्येति । पूर्वे ब्रह्मादयो यस्याङ्घ्रिपद्मस्य नखानां मण्डलस्य त्विषा तेजसा दुरत्ययं तमो ऽज्ञानं मघं वा शुचम् अतरन् तीर्णवन्त इत्यन्वयः ॥ ७ ॥

यच्च ब्रह्मादिभिः सुरैरर्चितं ससात्वतैः पाञ्चरात्रिकैः सहितैः यच्च गोचारणाय गवां तृणचरार्थमनुचरैः गोपैः समं वने भ्रान्तं यच्च वने गोपिकानां कुचकुङ्कुमेनाङ्कितं मुद्रितं तद्द्रक्ष्य इति पूर्वत्रान्वयः ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

अच्युतस्य सङ्कजानाभावेऽपि कृपालुतादिमाहात्म्यात्कु तिराहितस्य श्रीकृष्णस्य दर्शनं तन्माहात्म्यवलात् स्यादेवेत्यर्थः । अत्र निदर्शनं तत्तत्कर्मभोगकालप्रवाहेण संसार्यमाणोऽपि कश्चित् साङ्केत्यनामादिनिमित्ते सति कश्चनाजामिळादिसदृशस्तरति तत्कूलायमानं भगवन्तं प्राप्नोति । यथा कथञ्चिदभिगमनादौ सति पूतनादिसदृशो वा ॥ ५—९ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

एवम्प्रतिकूलतर्कं निरूप्य अनुकूलेन तस्य पराहतिमाह । मैवं ममेति । मेति निषेधार्थं यदुक्तं त्वया विषयित्वात् नाधिकारो विषयाश्च बाधका इति महतामपि केवलं स्तुत्य एव नतु दृश्य इति च एतन्मा किन्तु एवमेवैतत् उभयत्रापि साधकधर्मद्वयमाह । अधमस्यापि अच्युतदर्शनं स्यादेवेति विषयिणाम् अधमाधिकारित्वसम्पादकत्वमेव नत्वधिकारनिवारकत्वम् आसुरत्वमेव तथा "असुर्यैः शूद्र" इति श्रुतेः नापि प्रतिबन्धकत्वं विषयैरपि भगवद्भजनस्य शास्त्रे निरूपितत्वात् "यद्यादिष्टतमं लोक" इति किंत्वधमत्वमेव सम्पादयति सर्वथा निर्विषय उत्तमः बहिर्निर्विषयः मध्यमः उभयत्रापि सविषयो ऽधम इति अधमस्यापि स्यादेवाच्युतदर्शनम् अन्यथाधमो ऽधिकार एव न स्यात् किञ्च भगवानच्युतः सर्वथा च्युतिरहितः स्वरूपतो धर्मतश्च यदि कीर्तितः तत्कीर्तनं न व्यर्थमिति भगवानेव फलमिति दर्शयेदेव कदाचित् अतः स्यादेव ननूक्तो दृष्टान्तो बाधक इति तत्साधकोऽपि दृष्टान्तोऽस्तीत्याह । ह्रियमाण इति । कालनद्या ह्रियमाणः कश्चित् कदाचित् किञ्चित्तरतीति यथा तृणं दृश्यते च नौका जले पतिता स्वयमेव कूलान्तरं गच्छति कालोऽपि नदीरूपः भगवन्तं जीवसमूहश्चान्तरा प्रवहति विषयमाया जलात्मा तत्र तीरस्थान् कदाचिन्मध्ये पातयित्वा उत्तरकूले नयेत् अनेन कालवशादपि मोक्षः सिध्यतीति केषाञ्चिन्मतमुक्तम् अत्र नियामको भगवदवतारः ॥ ५-६ ॥

ननु बाधकस्य कालस्य कथम्मोक्षसाधकत्वमिति चेत्तत्राह । कंस इति । कदाचिद्बाधकान्येव साधकानि भवन्ति विषम्भक्षयित्वा जीवति अन्यथा म्रियेतेति लोकप्रसिद्धिः तदाह । कंस इति । वतेति हर्षे यः सर्वथा बाधकः स एव मे अद्यानुग्रहमकृत य एव हि भगवद्दर्शनं कारयति स एवानुग्रहं करोतीति कदाचिदनुग्रहं करोति लौकिकं विषयादिद्वारा अयन्त्वत्यनुग्रह इति येन प्रहितोऽङ्घ्रिपद्मं द्रक्ष्य इति ननु विपरीतार्थं प्रेषितवान् ततः कथमिष्टसिद्धिरिति चेत्तत्राह । हरेरिति । सहि सर्वदुःखहर्ता सम्बन्धमात्रमपेक्षते स सम्बन्धोऽनेन कारित इति कंसस्यैवायमनुग्रहः यथाकथञ्चित् संबन्ध एवात्र प्रयोजक इति ज्ञापयितुमाह कृतावतारस्येति । एतदर्थमेव भगवदवतार इति तथात्वे प्रमाणमाह । पूर्वेऽतरन्निति यस्य नखमण्डलत्विषापि पूर्वे भगवदीयाः अतरन् संसारं भावितो हृदये प्रकाशमानश्चरणः मुक्तिं ददातीति अविद्यान्धकारहरणार्थं कान्तिर्निरूपिता मण्डलपदं सूर्यादिरिव निवारकत्वं ज्ञापयति ननु दीप इव एकेनापि सूर्येणान्धकारो निवार्यते किम्पुनर्दशभिरिति स्थापयितुं नखेति तरणं पादपोतेनैवेति अर्थात् पादयोः अतो यत्र चरणसम्बन्धमात्रेणैव ध्यानप्राप्तेन सर्वे तीर्णाः तत्र दर्शनवतो मम तरणे कः सन्देहः ॥ ७ ॥

एवं स्वस्य फलमधिकारञ्च निश्चित्य बहुवादिविप्रतिपन्नत्वाद्भगवतो मोक्षदातृत्वं साधयति । यदर्चितमिति । अवश्यं मोक्षोऽस्तीत्यभ्युपगन्तव्यं स च किञ्चिदधीन इति च तत्र सन्मार्गे ब्रह्मा लोके महालक्ष्मीश्च विषयत्वेन ज्ञानशास्त्रे मुनयः भगवच्छास्त्रे सात्वताः एतदवतारे चतुर्द्धा अवतीर्णस्य दिनरात्रिभेदेन गोपा गोप्यश्च सेवकाः ये धृष्टाः अज्ञाश्च न कञ्चन मन्यन्ते तत्रापि स्त्रियः तत्रापि तेन प्रकारेणेति सर्वत्र भक्तिप्राधान्यार्थं पदग्रहणं जगति त्रयो मुख्याः ब्रह्मविष्णुशिवाः तत्र ब्रह्मा शिवश्च आदिभूतौ येषां सात्विककल्पे विष्णुर्भगवानिति गुणावतारेऽपि विशेष उक्तः तैः सर्वैरेवेन्द्रादिभिः स्वेष्टसिद्ध्यर्थमर्चितं स्वामित्वाच्च श्रिया चार्चितं प्रथमतोऽपि तस्याः परिज्ञाने सामर्थ्यमाह । देव्येति । मुनिभिश्चेति चकारात् कर्मिभिरपि फलार्थिभिः सात्वतैरिति वैष्णवभेदा उक्ताः ये सत्त्वैकनिष्ठाः गोपानामर्चनपरिज्ञानार्थमाह । अनुचरैरिति । अलौकिकं गवां चारणं शिक्षणीयमिति ते पूर्वं सेवकाः यस्माद्वने ग्राम्याणां भगवदर्चने बाधकसद्भावात् न भवतीति स्त्रीणामपि भजने हेतुं सूचयति । कुचकुङ्कुमैरङ्कितमिति । कामेनैव तासां भजनं ताभिः बहिरपि हृदये स्थाप्यत इति—

द्रक्ष्यामि नूनं सुकपोलनासिकं स्मितावलोकारुणकञ्जलोचनम्।
मुखं मुकुन्दस्य गुडालकावृतं प्रदक्षिणं मे प्रचरन्ति वै मृगाः ॥ ९ ॥
अप्यद्य विष्णोर्मनुजत्वमीयुषो भारावताराय भुवो निजेच्छया।
लावण्यधाम्नो भवितोपलम्भनं मह्यं न न स्यात्फलमञ्जसा दृशः ॥ १० ॥
य ईक्षिताऽहंरहितोऽप्यसत्सतोः स्वतेजसाऽपास्ततमोभिदाभ्रमः।
स्वमाययात्मन् रचितैस्तदीक्षया प्राणाक्षधीभिः सदनेष्वभीयते ॥ ११ ॥

श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी।

ऐश्वर्यं श्रीस्तथा ज्ञानं कीर्त्तिर्धर्मो विरागता।
षड्गुणास्त्वत्र निर्दिष्टाः क्रमो नात्र विवक्षितः॥
इति ॥ ८ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

मैवमिति मतिधृतिभ्यां दैन्यं संमर्याह। ममेति स्यादेव स्यादपीत्यर्थः ॥ ५ ॥

एवं निश्चित्य सगर्वमाह। ममाद्येति ॥ ६ ॥

किंच कंसेन भगवत्प्रातिकूल्ये निर्दिष्टस्यापि ममात्यन्तमानुकूल्यं फलतोऽभूदित्याह। कंस इति। बतेत्याश्चर्य्ये खलोऽपि कंसः अद्यात्यनुग्रहमकृत यतोऽमुना प्रहितः प्रेषितः पूर्वे अम्बरीषादयः तमः संसारम् अतरन् तीर्णाः ॥ ७ ॥

यदङ्घ्रिपद्मं ब्रह्मादिभिरनुपहर्त्तैर्गन्धमाल्यादिभिरर्चितं पूज्यत इत्यर्थः। "मतिबुद्धिपूजार्थेभ्यश्चे"ति वर्तमाने क्तः षष्ठ्यभाव आर्षः गोचारणाय अनुचरैः सह चरत् गवां पश्चाच्चरादित्यर्थः। यस्यानुचरा ब्रह्मादयस्तदङ्घ्रिपद्मं गवामनुचरं यस्यार्चका ब्रह्मभवादयस्तद्गोपिकानां तु कुचोच्छिष्टकुंकुमास्वादकमित्युत्कर्षपरमावधिः। कुंकुमाचितं कुंकुमार्चितमिति पाठद्वयं न च अत्राकूरेण दासेन स्वप्रभोरुज्ज्वलरसास्वादनं रसाभासत्वादनुचितमिति वाच्यं वाक्यस्यास्य स्वगतत्वात्। स्वगतोक्त्या हि पित्रादयोऽपि हर्षात् पुत्रादीनां शृङ्गाररसमनुमोदयन्तो दृष्टाः ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

अथ तद्दर्शनाधिकारं सम्भावयति। मैवमित्यादिना। मवमनधिकारो मास्तु ममाधमस्यापि अच्युतदर्शनं स्यादेव प्राप्तदर्शनावसरत्वादित्याशयेनाह। ह्रियमाण इति ॥ ५ ॥

अद्य श्रीकृष्णदर्शनार्थावसरे अमङ्गलदर्शनप्रतिबन्धकं कर्म नष्टमेव भवो जन्म सफलमेव जातं यत् यतः योगिध्येयाङ्घ्रिपङ्कजं नमस्करिष्यामि ॥ ६ ॥

दुरत्ययं दुस्तरं तमः संसारं यस्याङ्घ्रिपद्मस्य नखमण्डलमात्रस्य ध्येयस्य त्विषा कान्त्या पूर्वे ध्यातारोऽपि अतरन् तीर्णाः अहन्तु अमुना कंसेन प्रहितः अङ्घ्रिपद्मं सकलं द्रक्ष्ये एतत्फक्रमलनुग्रहं बतेत्याश्चर्ये भागिनेयहन्ता बन्धुघ्नः कंसः मे परकीयस्य अनुग्रहमकृत कृतवान् अतो ज्ञायते ममामङ्गलं नष्टं भवश्च फलवानद्येति भावः ॥ ७ ॥

एवं श्रीभगवच्चरणकमलदर्शने स्वस्य असम्भावनां पुनः सम्भावनाञ्च कृत्वा अथ चरणकमलस्य ब्रह्मादिसेव्यत्वेन स्वस्य अतिदुर्लभत्वेऽपि भक्तवश्यत्वेन सुलभत्वं विभावयति। यदिति॥८॥

भाषा टीका।

अथवा ऐसा न होगा मैं अधम हूं तौ भी मेरे को अच्युत भगवान् का दर्शन होगा ही क्योंकि जैसे नदी में तिरते तृणादिक कोई कभी नदी के किनारे लग जाता है तैसे संसार सागर में प्राणी भी भगवान के सम्बन्ध से कभी तर जाता है ॥ ५ ॥

आज मेरे सब पाप नष्ट होगये जन्म भी सफल होगया जो कि मैं योगियों के ध्यान करने योग्य भगवान् के चरण कमल का दर्शन करूंगा ॥ ६ ॥

अहो कंसने आज मेरे ऊपर बडा अनुग्रह किया है जोकि मैं इस के भेजने से हरि भगवान् के चरण कमल का दर्शन करूंगा जिन भगवान् ने मनुष्यावतार धारण किया है उन भगवान् के चरण नखों के मंडल की कांति के ध्यान से पूर्व के महात्मा दुस्तर संसार को तर गये हैं ॥ ७ ॥

जिस चरणारविन्दका ब्रह्मादिक देवतों ने लक्ष्मी देवीने पांचरात्रिक भक्तों सहित मुनिजनों ने अर्चन किया है जो चरण गोचारण के वास्ते वनमें विचता है जो चरण गोपिकाओं के कुचों के कुंकुम से चिन्हित है तिसका मैं दर्शन करूंगा ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

मनोरथान्तरं करोति। द्रक्ष्यामीति। शोभमानौ कपोलौ नासिका च यस्मिंस्तत् स्मितसहितोऽवलोको यस्मिन् अरुणकञ्जवल्लोचने यस्मिन् तच्च तच्च मुखं गुडालकावृतं वक्रकेशावृतम् तदानीमेव शुभसूचकं दृष्ट्वातिहृष्यन्नाह। प्रदक्षिणमिति ॥ ९ ॥

पुनरप्यन्यच्चिन्तयति। अप्यद्येति। ईयुषः प्राप्तवतः लावण्यस्य धामाश्रयस्तस्य विष्णोः यद्वा विष्णोर्लावण्ययुक्तं यद्धाम वपुस्तस्य उपलम्भनं दर्शनं भविता भविष्यति अपि यद्येवं स्यात्तर्हि मह्यं मम दृशो लोचनस्य फलं न स्यादिति न अपितु स्यादेवेत्यर्थः॥१०॥

य ईक्षितेत्यादिभिः कालापकं तत्रैव शङ्का नन्वस्मदादिवद्देव भोक्तृत्वकर्तृत्वादिधर्मैस्तत्र तत्र प्रतीयमानस्य कथं विष्णुत्वमि

यस्याखिलामीवहभिः सुमङ्गलैर्वाचो विमिश्रा गुणकर्मजन्मभिः ।
प्राणन्ति शुम्भन्ति पुनन्ति वै जगद्यास्तद्विरक्ताः शवशोभना मताः ॥ १२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तामिमां शङ्कां श्लोकत्रयेणापाकुर्वंश्चतुर्थेन तमहं द्रक्ष्यामीति मनोरथं करोति तथाहि । य ईक्षितेति । असत्सतोः कार्यकारणयोरीक्षितापीक्षणमात्रकर्ताप्यहंरहितोऽहंकारहीनः तथापास्ततमोभिदाभ्रमः तमः स्वाज्ञानं ततो भिदा भेदस्ततो भ्रमोऽभिनिवेशादिः अपास्ता अपाकृतास्तमआदयो यस्मिन्सः कुत एतत्तत्राह । स्वतेजसा चिच्छक्त्या नित्यस्वरूपसाक्षात्कारेण तथापि स्वमायया स्वाधीनया मायया तदीक्षया तस्यैवेक्षया प्राणाक्षधीभिः सहितैरात्मन् नात्मनि स्वस्मिन्नेव रचितैर्जीवैः सदनेषु वृन्दावनतरुषु गोपीगृहेषु च लीलया कर्माणि कुर्वन्सक्तवदभीयते आभिमुख्येन प्रतीयते ॥ ११ ॥

ननु सर्वथाहंकारादिरहितस्यात्मारामस्य लीलापि कुत इत्याशङ्क्य परानुग्रहार्थेत्याशयेनाह ॥ यस्येति । अखिलान्यखिलस्य वा अमीवानि पापानि घ्नन्तीत्यखिलामीवहानि तैः तथा सुमङ्गलैः शोभनानि मङ्गलानि येभ्यस्तैः गुणाः करुणादयः कर्माणि जन्मानि च तैर्विमिश्रा युक्ता वाचो जगत्प्राणन्ति जीवयन्ति शुम्भन्ति शोभयन्ति पुनन्ति पावित्रयन्ति व्यतिरेकमाह । या इति । तैर्विरक्ता रहितास्तास्तु स्वलंकृता अपि वस्त्राद्यलंकृतशववच्छोभमानाः सतां सम्मताः ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

इत्थं सहजदास्येनादौ पादाब्जदर्शनं विभाव्य तत एव प्रेमोद्रेकेण लोभात् श्रीमुखदर्शनेऽपि मनोरथं करोति । द्रक्ष्यामीति । नूनं निश्चये । मुकुन्दस्येति पूर्वकृतनिरुक्त्या श्रीदन्तानां कुन्दसादृश्येन स्मितकृततदीषद्विकाशेन च श्रीमुखस्य सौन्दर्य्यमेवाधिकं दर्शितं तन्निश्चये हेतुः मम प्रदक्षिणं यथा स्यात्तथामी साक्षादित्यर्थः । रथनिर्घोषेण दूरवर्त्तित्वाददःशब्दप्रयोगः । वै इति पाठे व्यक्तमित्यर्थः । प्रदक्षिणमिति । अत्र मृगा अयुग्मवैशिष्ट्यार्थं कृष्णमृगसहिताश्चेति ज्ञेयं तथा च शाकुनतन्त्रे । पुण्येन गत्या गवयोरयुग्माः प्रदक्षिणं गौरमृगाश्चरन्ति । समा न शस्ता न च वामयाताः कृष्णैर्विमिश्रा न भवन्ति दुष्टाः इति ॥ ९ ॥

पुनरतिलोभोद्रेकेण सर्वाङ्गदर्शने मनोरथं करोति । अपीति । अद्योपलम्भनं भवितेत्यर्थः । विष्णोः सर्वव्यापकस्य परिपूर्णस्य स्वयं भगवत इत्यर्थः । तादृशस्यापि मनुजत्वमीयुषः लीलामाधुर्य्याय प्रसिद्धमनुजसाधारणां नित्यामेव प्राप्तवतः । अयमात्मापहतपाप्मेतिवन्निष्ठाप्रयोगः । मनुवंशे प्रादुर्भूतत्वं प्राप्तस्येति वा । न चात्र स्वातन्त्र्यभङ्ग इत्याह । निजेच्छयेति । भक्तेच्छयेत्यर्थेऽपि तादिच्छाभक्तेच्छयोरेकात्मकत्वात् तथैवार्थः । न केवलमेवं लीलामाधुर्य्याणामेवाश्रयत्वं सौन्दर्य्याणामपीत्याह । लावण्यधाम्न इति । अन्यत्तैः । तत्रापिशब्दस्य सम्भावनार्थत्वाद्यदीत्यादि व्याख्या । तर्हीति तर्हीत्यर्थे कलं सार्थकत्वम् । एवकार इत ऊर्ध्वं

तन्नास्तीति विवक्षया । तदुक्तम् अक्षण्वतां फलमिदमित्यादि तत्र चाञ्जसा साक्षात् स्वरूपेणैव नतु छायादिवद्व्यवधानेनेति भावः । यद्वा । उपलम्भनं समीपप्राप्तिः । दृशः फलं दर्शनमञ्जसाऽनायासेन भवितेति न किन्तु चक्षुरुन्मीलनमात्रेणैव भविता । ननु योगादिसाधनबाहुल्येनेत्यर्थः । यद्वाऽपीति प्राकाश्ये तदेवं कामयित्वा तत्प्राप्तिं निर्द्धारयति । मह्यमिति । तदुपलम्भनरूपं दृशः फलं मम न भवितेति नापि तु भवितैव पूर्वनिश्चयादिति भावः । अत्राप्यञ्जसा न भवितेति पूर्ववत् ॥ १० ॥

अथ त्रिभिरेव कुळकम् । स चावतीर्ण इत्यन्तेनान्वयपरिप्राप्तेः तत्र य ईक्षितेति तैर्व्याख्यातम् । तत्र ननु अस्मदादिवदेवेत्यादिकं परमतमेवानूदितं पूर्वं श्रीभगवति दृढश्रद्धामयत्वेनोक्तत्वात् तथेक्षणमात्रकर्त्ताप्यहंरहित इतीक्षणमात्रं स करोति तदीक्षणलब्धसामर्थ्याया मायाया एव सृष्ट्यादिकर्तृकत्वमिति भावः । तस्मिन्नीक्षणेऽप्यहङ्काररहित आवेशशून्य इत्यर्थः । तदेवमावेशाभावाज्जीववैलक्षण्यमुक्तम् । स्वतेजसेत्यादिनान्येषामपि तमआदिध्वंसकत्वाज्जीवन्मुक्तेभ्योऽपि । चिच्छक्तिशब्देन हि तृतीये योगमाया व्याख्याता सा च श्रीसनकादौ निषिद्धेति ततश्चिच्छक्तिस्वरूपसाक्षात्कारयोर्वैयधिकरण्य एव तृतीया तस्यावृत्तित्वात्तस्य । प्राणाक्षधीभिः कर्मेन्द्रियज्ञानेन्द्रियान्तःकरणैः । आत्मनि आत्मांशे "ममैवांशो जीवलोके जीवभूतः सनातन" इति श्रीभगवदुपनिषद्दृशा । "जाग्रत्स्वप्नसुषुप्तञ्च गुणतो बुद्धिवृत्तयः । तासां विलक्षणो जीवः साक्षित्वेन विनिश्चित" इति श्रीभगवद्वाक्यान्तररीत्या शुद्धजीवे जीवैः प्रमातृरूपैः अतः स्वेषां प्राणाद्यावृतत्वानुसारेण ईश्वरस्यापि तत्प्रतीतिः । तत्र च तदीक्षयेति मायायाः स्वतः सामर्थ्याभावेन आत्मनि रचितैरिति च तेषां तदेकाश्रयत्वेन स्वतो यथार्थज्ञानाभावोऽभिप्रेतः । वृन्दावनतरुष्वित्यादिकमभिशब्दस्वारस्येन ज्ञेयम् । तत्राभिमुख्येन सक्तवत्त्वं सक्तवत्तस्य प्रस्तुतविषयत्वेन वृन्दावनेत्यादि तत्र च वतिप्रत्यये हेतुर्लीलयेति पुनःपुनरिदमज्ञानमक्रूरस्य संशयानुच्छित्तेः । श्रीकृष्णस्य तत्प्रेमासक्तत्वे निर्णीते ततो नयनाप्रवृत्तिः स्यात् । यद्वा । यः स्वाधीनया मायया आत्मनि देहे रचितैः कारिताध्यासैर्जीवैः सदनेषु चिच्छक्त्या अपास्तं तमो जीवस्येवाज्ञानं तत्कृता भिदा भ्रमश्च येन । कैः प्रतीयते तत्राह । सदसतोरीक्षया याः प्राणाक्षधियः कर्मेन्द्रियज्ञानेन्द्रियान्तःकरणानि तत्तद्रूपतां प्राप्तास्ताभिरेव तामीक्षां विना ताः स्वस्वकार्य्यक्षमा न भवन्तीति विचार्य्येत्यर्थः ॥ ११ ॥

ततेवं परमात्मत्वेन दुर्ळभत्वमुक्त्वा सर्वमङ्गलार्थं कृतनानालीलावतारत्वेन सुलभस्यापि ये बहिर्मुखास्तान् निन्दति । यस्येति । गुणादिभिस्तत्प्रतिपादकवाग्भिर्विमिश्रा इति मध्ये मध्येऽपि विशिष्टतया तद्युक्ता इत्यर्थः । तादृश्यो वाचो भस्त्राः किं न श्वसन्त्युतेति न्यायेन तद्व्यतिरेके मृतप्रायत्वात् । प्रथमं तावत् सम्बन्धमात्रेण सफलजीवनं कुर्वन्ति । ततश्च यस्यास्ति भक्तिर्भगवत्यकिञ्चनेत्यनुसारेण तत्तद्गुणप्रकाशेन शोभयन्ति । ततश्च

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

पुनन्ति मुमुक्षापर्यन्तविविधदुर्वासनाध्वंसनेन शोधयन्ति । अतस्तासां वाचान्तु सुतरां तत्तद्भावं इति भावः । जगदित्यधिकारापेक्षा निरस्ता । वै प्रसिद्धौ । तत्तद्धेतुत्वेन गुणादीनां स्वभावानाह । अखिलेति । सुमङ्गलेति च सर्वदुःखनाशकैः सर्वोत्तमगुणप्रदैरित्यर्थः । विशेषेण रिक्ता शून्या इति स्थानैकद्वयसम्बन्धेनापि तदाद्यभिप्रेतं शवेति सालङ्कारा अपि शवप्राया इत्यर्थः । शवस्य स्वतो व्यर्थस्थितत्वात् पुत्रोत्पादनाशक्त्या परस्यापि प्राणप्रदत्वाभावात् तथा स्वतोऽशोभनत्वात् स्वाधिष्ठानस्याप्यशोभाहेतुत्वात् तथा स्वतोऽपवित्रत्वात् परस्याप्यपावनत्वाच्च तैरिति निर्देशेन रहिता इति च व्याख्यानेन तेषामपि मते विरक्ता इत्येव पाठो नतु विरिक्ता इति स पाठस्तु प्रायः सर्वत्र तेषु विरक्ता आसक्ता इत्यर्थः । अन्यत्तैः । तत्र लीलायाः परानुग्रहाद्यर्थत्वे यद्यपि परमतत्प्रेमवत्सु व्रजवासिषु तद्वैशिष्ट्यापत्त्या सक्तत्वमपि विशेषतः समायाति तथापि वैशिष्ट्यज्ञानात् पूर्ववत्तदज्ञानमेवेति तथावतारितम् ॥ १२ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

ईक्षितेति । अहंशब्देनात्मन्यहंकारो लक्ष्यते । जीवाः स्थूलोऽहं पश्यामीति मन्यन्ते । एवं तद्देहे बुद्धिरहितोऽपि अतएव स्वगतजातिगुणादिभिदाभ्रमरहितोऽपि यः सदसतोः चिदचितोः कार्यकारणयोर्वा ईक्षिता ज्ञाता द्रष्टा सदनेषु भोगायतनेषु देहेषु तदीयस्वसंकल्पेन रचितैः प्राणाक्षधीभिः लिङ्गव्यत्यय आर्षः अधीयते गम्यते बुध्यते प्राणादीनां कारणतया ज्ञायत इत्यर्थः प्राणादिभिर्जन्तुषु भाति चित्रधा इति पाठे प्राणादीनां परमात्मशरीरत्वात् तैर्विशिष्टः चित्रधा बहुधा भातीति ॥ ११ ॥

शास्त्रवशादप्याह । अमीवहाभिः पापापहैः वाचः प्राणन्ति शुम्भन्तीति । अन्तर्भावितण्यर्थनिर्देशः । जगज्जीवयन्ति शोभयन्ति पुनन्ति चेत्यर्थः । या वाचस्तद्विरक्ता भगवज्जन्मादिप्रतिपादनरहिताः ताः शवशोभनाः शवकल्पानां जीवन्मृतानामज्ञानां शोभनाः यद्वा गुणादिशून्याः वाचो निष्प्राणदेहतुल्याः ॥ १२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

द्रक्ष्यामीति । नूनमहं मुकुन्दस्य मुखं द्रक्ष्यामि तत्सूचकं शुभं दृष्ट्वा हृष्यन्नाह । अमी मृगा मे मम प्रदक्षिणं यथा तथा प्रचरन्ति गच्छन्ति कथम्भूतं मुखं शोभनौ कपोलौ नासिका च यस्मिन् स्मितसहितः अवलोको यस्मिन् तच्च तच्च अरुणे कञ्जवल्लोचने यस्मिन् तच्च गुडालकैर्वक्रकेशैरावृतमिति ॥ ९ ॥

पुनरप्यन्यच्चिन्तयति । अप्यद्येति । भुवो भारावताराय भारापनोदनाय निजेच्छया नतु कर्मणा मनुष्यत्वमीयुषः प्राप्तवतो निरतिशयलावण्याश्रयस्य विष्णोरुपलम्भनं दर्शनं भविता भविष्यत्यप्यद्य यद्यधुनैव स्यात्तर्हि मह्यं मम दृशोर्लोचनस्याञ्जसा आश्वव्यवहितं फलं न स्यादिति नापितु स्यादेवेत्यर्थः । द्वौ नशब्दौ प्रकृतार्थमनुद्रढयतः ॥ १० ॥

ननु कोऽसावस्मदादिविलक्षणो यो मनुजत्वमीयिवान् यस्य च दर्शनं बहुमन्यसे इत्याशङ्क्याह । य इत्यादि चतुर्भिः श्लोकैः । यच्छब्दयोः सचावतीर्ण इत्युत्तरेण सम्बन्धः अहंरहित इत्यत्राहंशब्देन अनात्मनि आत्माभिमानहेतुरहङ्कारो लक्ष्यते असत्सतोः स्वशरीरभूतयोः प्रकृतिपुरुषयोरीक्षिता द्रष्टा ज्ञाता अपि अहंरहितः जीववत्स्वाभेदभ्रमरहितः जीवो हि देहं पश्यन् स्वाभिन्नमनुसन्धत्ते तद्वद्यः प्रकृतिपुरुषौ वीक्षन्नपि न स्वाभिन्नावनुसन्धत्ते किन्तु स्वरूपतः स्वभावतश्च स्वस्मादत्यन्तविलक्षणावेव पश्यतीत्यर्थः अनेन बद्धजीववैलक्षण्यमुक्तं तत्र हेतुं वदन्मुक्तवैलक्षण्यमप्याह । स्वतेजसेति । स्वतेजसा नित्यासंकुचितापरिच्छिन्नज्ञानेनापास्तं निरस्तं प्रतिपाक्षितमोऽज्ञानं तन्मूलको भिदाभ्रमः भेदभ्रमः अस्वात्मकस्वतन्त्रवस्तुभ्रमश्च यस्य स मुक्तो हि बद्धदशायां सङ्कुचितज्ञाननानिरस्ताज्ञानतन्मूलकाब्रह्मात्मकस्वतन्त्रवस्तुभ्रमयुक्तः यद्वा स्वतेजसा स्वसम्बन्धिना पराभिभवसामर्थ्येन निरस्तं तमोऽज्ञानं तन्मूलको भिदाभ्रमः स्वस्मिंस्तद्द्वारकदेवत्वमनुष्यत्वादिभेदभ्रमश्च यस्य सः कथमेवं भूतो विज्ञायते इत्यत्राह । स्वमायया स्वशरीरभूतया प्रकृत्या कारणभूतया तदीक्षया तद्विषयकेण करणभूतेन स्वसङ्कल्पेनात्मनि स्वस्मिन्नेवाधारभूते रचितैः प्राणेन्द्रियबुद्धिभिः लिङ्गव्यत्यय आर्षः रचिताभिः प्राणेन्द्रियबुद्धिभिः कार्यभूताभिः सदनेषु भोगायतनेषु देहेषु अभीयते अभिगम्यते बुध्यते इति प्राणादीनां कारणतया ज्ञायते इत्यर्थः । प्राणादिभिर्जन्तुषु भाति चित्रधेति पाठे प्राणादीनामपि परमात्मशरीरत्वात्तैर्विशिष्टश्चित्रधा भातीति शास्त्रवशादवगम्याह नच प्राणादिसृष्टेर्जीवकर्तृकेति तत्कारणतया ज्ञायमानोऽपि जीवान्नातिरिच्यत इति वक्तुं युक्तं स्वस्य प्राणादिसृष्टेःस्वस्य कर्तृत्वासम्भवात् नहि प्रबुद्धः स्वदुःखसाधनानि स्वयं सृजति नापि सर्वप्राणादिसृष्टिरेकजीवकर्तृकैवेति युक्तिमत्तस्यापि स्वयं प्राणादिरहितस्य कर्तृत्वासंभवात् प्राणादिमत एव कर्तृत्वदर्शनात् प्रणादिमत्त्वेतु तत्सृष्टेः कर्त्रन्तरसापेक्षत्वात् नच तावत्स्वस्य प्राणादीन् सृष्ट्वा ततोऽन्येषामपि सृजतीति वक्तुं युक्तं तावत्प्राणादिरहितस्य प्राणादिसृष्टिकर्तृत्वासम्भवादन्योऽन्याश्रयश्च परमात्मा तु करणायत्तज्ञाननिरपेक्षः सङ्कल्पमात्रेणैव प्राणादीन् स्रष्टुं शक्नोतीति तत्कारणतया ज्ञायत इति सुष्ठूक्तम् ॥ ११ ॥

यस्येति । अखिलानां पठतां शृण्वताञ्च जनानाममीवं पापं घ्नन्तीति तथा तैर्यस्य गुणकर्मभिः सुमङ्गलैः निरतिशयश्रेयस्करैः विमिश्रा वाचो गिरः प्राणन्ति शुम्भन्तीत्यन्तर्भावितण्यर्थनिर्देशः । जगज्जीवयन्ति शोभयन्ति पुनन्ति चेत्यर्थः । तत्र गुणा वात्सल्यसौशील्यसौलभ्यादयः कर्माणि जगद्व्यापारप्रभृतीनि चेष्टितानि जन्मानि रामकृष्णादीनि या वाचस्तद्विरक्ता भगवद्गुणादिप्रतिपादनरहितास्ताः पदलावण्यार्थलावण्ययुक्ता अपि शवशोभनाः वस्त्राद्यलंकृतशववच्छोभनाः मताः ज्ञाताः शवकल्पानामभिमता इति भावः ॥ १२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

नूनं निश्चयात् स्मितावलोके ऽरुणे कञ्जसदृशे लोचने यस्य तत्तथा स्मितसहितो ऽवलोको ययोस्ते तथा गुडाः निबिडाः अलकाः तैरावृतं यद्वा गुडाः गुलिकाः तद्वद्वक्राः

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

यद्वा गुडः इक्षुविकारः तद्वत् स्निग्धा अलकास्तैरावृतं दर्शननिश्चये शकुनं वक्ति । प्रदक्षिणमिति । वा इत्यनेन अन्ये भरद्वाजादिपक्ष्यादयो गृह्यन्ते इति सूचयति गुडः पिण्डे क्षुविकृते—स्नुहीगुळिकयेर्गुड इति च ॥ ९ ॥

ईयुषः गतवतः उपलम्भनं दर्शनं भविष्यति मह्यं मम दृशः नेत्रस्य सं समीचीनं फलं स्यान्नु स्यादेव समभेदे समीचीने इति च । दृश इत्येकं वा पदं न संदृशे तिष्ठतीति श्रुतिः सन्दर्शनसाधनस्य नेत्रस्येत्यर्थः ॥ १० ॥

चैतन्यैकरसस्य हरेर्गोपत्वेनावभासनं न चोद्यमिति भावेनाह । य इति । यः हरिः अहंरहितः अविद्यमानं दर्शनमात्मनि यद्याभिमन्येत तदा शुकदोषः स्यात् नत्वासावस्तीत्यर्थः । यद्वदत्वदेहस्थस्याज्ञानादिसम्भवेत्ताहंभावशून्यत्ववचनमौपचारिकं किन्न स्यादिति तत्राह । अपास्तेति । अपास्तः निराकृतः तमोभिदाभ्यामज्ञानान्यथाज्ञानाभ्यामुत्पन्नो भ्रमः प्रवृत्तिर्यस्य सः भ्रमु अनवस्थाने इति धातोः छागतिनिवृत्ताविति अवस्थानं गत्यभावस्तदभावः कार्येषु प्रवर्तमानमित्यर्थः । वस्तुतत्त्वाज्ञानविपरीतनिमित्तप्रवृत्तियुक्तो न भवतीत्यर्थः । यद्वा तमसा वस्तुतत्त्वाज्ञानेन जाता भिदा इदं रजतमित्यन्यथाज्ञानं तदेव भ्रमो भ्रान्तिज्ञानं यस्य दूरेऽस्तीति सः ननु मुक्तोऽप्येताद्दश इत्यत उक्तं स्वतेजसेति सत्यं किन्तु

बलमानन्द ओजश्च सहो ज्ञानमनाकुलम्
स्वरूपाण्येव जीवस्य व्यज्यन्ते परमाद्विमोरिति

श्रुतेरस्य परप्रभावेण तदात्मानमेव वेदाहं ब्रह्मास्मीति स्वमायया स्वेच्छया आत्मन् आत्माधारतया रचितेषु जन्तुषु प्राणादिभिः सह विभ्रघा सुरनरतिर्यगादिनानाजातिमिश्रत्वेन भाति ननु तर्हि विकारोऽपि स्यादित्यत आह । तत्सभिति तथैव सन् अविकार एवाभ्यर्हितः श्रेष्ठ इत्यर्थः । सर्वैरभ्यर्हितो वा सत्सत्येऽभ्यर्हिते श्रेष्ठे साधीयसि भवत्यपीति च अनेन मूलरूपी हरिर्यथा निर्विकारस्तथा रूपान्तरवानिति सूचितं भवति द्वेयदेहित्वेनाभासमानस्य किं कर्मेति तत्राह । ईक्षितेति । असःसतो अशुभशुभयोः ईक्षिता द्रष्टा जन्तुभिः क्रियमाणस्य पुण्यपापलक्षणस्य कर्मणः साक्षीत्यर्थः । नत्वस्य दर्शनाभिमानलक्षणविकारः आपन्नमुद्दिश्येति वा ॥ ११ ॥

यस्य हरेरखिलामीवहभिः अखिलानि अमीवानि पापानि घ्नन्तीत्यखिलामीवहानि तैः अत एव सुमङ्गलैः गुणकर्मजन्मभिः विमिश्राः सङ्कलिता वाचः श्रीकृष्णकृष्णसखवृष्णिवृषेत्यादिलक्षणा जगत्प्राणन्ति आह्लादयन्ति जीवयन्ति वा शुम्भन्ति शोभयन्ति शुभयुक्तं कुर्वन्ति पुनन्ति पवित्रयन्ति वै गङ्गादौ प्रसिद्धमित्यन्वयः या वाचस्तैः विष्ण्वादिभिः विरक्ताः शून्याः वर्जिताः स्युस्ताः सद्भिः अशोभना मताः अवबोधिता इत्यन्वयः ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

ननु सर्वथा अन्योपलम्भनं भवितेत्यन्वयः । विष्णोः सर्वव्यापकस्य परिपूर्णस्य स्वयं भगवत इत्यर्थः । तादृशस्यापि मनुजत्वमीयुषः लीलामाधुर्याय प्रसिद्धमनुजसाधारण्यं नियमेन प्राप्तवतः । अयमात्मापहतपाप्मेत्यादौ कप्रयोगवदत्र प्रयोगः । मनुवंशे प्रादुर्भूतत्वं प्राप्तस्येति वा ॥ १० ॥

ननु कथं तस्य तादृशं दौर्लभ्यं तल्लाभमाहात्म्यञ्च । यदि च तर्हि कर्हि सौलभ्यं येन तवापि तादृशभाग्यद्वाञ्छा इत्याशङ्क्यात्र विवृणोति । य ईक्षितेति चतुर्भिः । तत्राद्यद्वयं कैमुत्येनाह द्वाभ्याम् । दौर्लभ्यं तावदाह । य ईक्षितेति । अपीति समुच्चये । सदसतोरीक्षितापि तदावेशरहितोऽपि । उभयत्र हेतुः स्वतेजसेति । ईक्षितेत्यादिरूपत्वेन सर्वगोचरस्वरूपो यः स्वमायया स्वबीक्षया चात्मनि रचितत्वेन स्वतः सामर्थ्यहीनैस्तं द्रष्टुमयोग्यैश्च जीवैः प्राणादिप्रवृत्तिलिङ्गेन सदनेषु तदधिष्ठानरूपेषु सर्वभूतेषु अभीयते प्रतीयते । अनुमीयते मात्रं नतु दृश्यते यथोक्तं द्वितीये "भगवान् सर्वभूतेषु लक्षितः स्वात्मना हरिः । दृश्यैर्बुद्ध्यादिभिर्द्रष्टा लक्षणैरनुमापकै"रिति एवं "विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जग"दिति उक्तदिशा तदंशस्यापि परमदौर्लभ्यं दर्शितम् ॥ ११—१२ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

एवं सर्वनिर्द्धारं कृत्वा व्रजन् शकुनं दृष्ट्वा प्रोत्साहेन दृष्टरूपं दर्शनं भविष्यतीत्याह । द्रक्ष्यामीति । यतो मृगाः दक्षिणं प्रचरन्ति अतो नूनं द्रक्ष्यामि कंसभृत्यत्वात् भगवान् न सम्मुखो भविष्यतीत्याशङ्क्य मुखारविन्दमेव द्रक्ष्यामीत्याह । मुखमिति । तथापि क्रुद्धः कदाचिद्भवेत् अपकारं वा विचारयन् तिष्ठेत् तदा कपोलौ नासिका च वक्रा विषमाच भवेत्तन्निवारणार्थमाह । सुकपोलनासिकमिति । सुष्ठु कपोलौ नासिका च यस्मिन् इति भक्तिः । तत्रास्य निरूपिता ननु तथाप्यपकारार्थं समागच्छन्तं कथमङ्गीकुर्यात् तत्राह । स्मितावलोकारुणकञ्जलोचनमिति स्मितमल्पहासस्तेन ज्ञानेऽद्वैव्यामोहस्तेनैव व्यामोह इति न ममापराधः युक्तार्थं चैतत्कृतवानिति ज्ञानाधारभूतक्रियायामरुणकमलसादृश्यं निरूपितम् अक्ष्णोररुणता युद्धं सूचयति । मुखदर्शनेन सर्वं फलं सेत्स्यतीत्याह । मुकुन्दस्येति । ननु वादिविप्रतिपत्त्या कथम्भगवानेवं मुखदर्शनेनैव मोक्षं प्रयच्छतीति चेत् तत्राह गुडालकावृतमिति । अलकाः तत्त्वविद इति पूर्वं निरूपितं ते चेत्कुण्डलाकाराः सर्व एव कुण्डलाकाराः प्रपन्नाः तेच पुनर्मीत्सर्यं परित्यज्य सर्वे सम्भूय भगवन्तमाश्रयन्ति तदा न विवाद इति गुडशब्देन परावर्त्तनमुच्यते सर्वतः प्रसरणस्वभावाः पिण्डीभावं प्राप्नुवन्तीति प्रकर्षो यथाभिलषितार्थः मदिच्छयैव वा तथा भवन्तीति मदर्थमेव शकुनं कुर्वन्तीति ज्ञायते प्रकर्षेण च चरन्ति नतु पलायन्ते अयमुक्तः सर्वोऽप्यर्थः न सन्दिग्धो नापि भ्रान्तिप्रतिपन्न इति वै निश्चयेनेत्युक्तम् ॥ ९ ॥

एवं शकुनेनापि दर्शनन्निर्द्धार्य अद्यैव भविष्यतीति मनोरथं करोति । अपीति । दुर्लभं दिनमेतदिति सम्भावना विभूतिर्भविष्यतीत्याशङ्क्याह । विष्णोर्मोक्षदातुः लीलया मनुष्यत्वमीयुषः स्वीकृतवतः उपलम्भनं भविता एतदपि किंसम्भावितमिति प्रयोजनमाह । भारावताराय भुव इति । तत्रापि नियतं हेतुमाह । निजेच्छयेति । भक्तानां ब्रह्मादीनामिच्छया फलदानं कालान्तरेऽस्तु मा वा इदानीमेव दर्शनमात्र एव परमानन्द इति तदर्थमाह । लावण्य-

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

धाम्न इति । सौन्दर्यमात्रस्यैव स्थानभूतस्य उपलम्भनं निकटे दर्शनं यदि भविष्यति तदा मह्यमेव भविष्यति मदर्थमेव मम दृशः दृष्टीनामञ्जसा फलञ्च भविष्यति आत्मा तु मुक्त एव भविष्यति न संदेहः जन्मापि सफलं भविष्यति इन्द्रियाणां साफल्यात् ॥ १० ॥

एवं शीघ्रदर्शनं सम्भाव्य अवतारे अन्यधर्मसम्बन्धमाशङ्क्य तथा सति सर्वमेवान्यथा भविष्यतीति तन्निवृत्त्यर्थं भगवति प्रापञ्चिकधर्मसम्बन्धाभावमाह । य ईक्षितेति । भगवतोऽन्यधर्मसम्बन्धः अहङ्कारे गुणेषु तत्कार्ये चेन्द्रियादौ वर्त्तमाने भवति अहङ्कारादीनां तु कार्यं दृश्यमानमपि स्वरूपेणैव भवतीति न भगवतोऽन्यधर्मसंबन्धः तत्र प्रथममहङ्काराभावेऽपि तत्कार्यमाह । अहंरहितोऽपि असत्सतोर्य ईक्षिता द्रष्टा लौकिकः साहङ्कारो भवति इन्द्रियेष्वहमध्यासव्यतिरेकेण द्रष्टृत्वाभावात् ममतायां वा तथा त्वे वैदिकातिरिक्तसिद्धान्तेषु स्मार्त्तेषु पौराणिकेष्वपि अध्यासो मूलमिति ममतापक्षेऽप्यहङ्कारापेक्षा भगवांस्तु आनन्दमात्रकरपादमुखोदरादिरिति चक्षुषश्चक्षुरिति अहंरहितोऽपीक्षिता भवति अनेन भगज्ज्ञानं निर्विषयमेवेत्युक्तं दीपवदेव सर्वं प्रकाशयति तदा विषयदोषसम्बन्धाभावात् सतः असतश्चापीक्षिता भवति कार्यकारणयोर्वा सत्यञ्चानृतञ्चेतिश्रुतेः कार्यमेव सर्वं गुणकृतदोषसंबन्धाभावमाह । स्वतेजसेति । भगवत्तेजसैव अपास्ता दूरीकृता तमस्तामसमज्ञानं भिदा भेदस्तत्कृतो राजसः ततो भ्रमः सात्त्विकोऽपि विश्वप्रतीतिरूपः नहि तमसि दूरीकृते तत्कृतचोरभयादयो वा सम्भवन्ति भगवतीन्द्रियादिसंबन्धप्रतीतिर्माययैव न वस्तुत इत्याह । स्वमाययेति । स्वाज्ञाकारिणी या सर्वभवनसमर्था माया तया कृत्वा आत्मनि स्वस्मिन्नेव रचितैः प्राणाक्षधीभिः प्राणेन्द्रियान्तःकरणैः सहितेषु सर्वेष्वेव देहेषु गृहेषु अभीयते प्रकाशते भगवान् स्वाधीनया स्वकीयानां देहेन्द्रियान्तःकरणानि प्रतीयन्ते तेष्वात्मप्रतीतिसिध्यर्थमात्मनि रचितैः तेष्वात्मप्रतीतिर्भवत्विति वस्तुतः सर्वत्रायमेव प्रतीयते यत्रान्यत्रापि स्थितो भगवान् न तद्धर्मैर्युज्यते तदा केवलः कथं युक्तो भवेत् अन्यत्रापि ते सर्वे धर्माः भगवदिच्छयैव भगवद्रूपाः माययान्यथा प्रतीयन्ते तत्र भगवत्येव किंवक्तव्यम् अथवा लोकप्रतीत्यर्थं सद्नेषु गोपिकागृहेषु यथा भगवानतत्रस्थोऽपि तत्रस्थ इव प्रतीयते एवं प्राणाक्षधीभिः सहितोऽप्यधीयते आत्मस्थान एव मायया तथा प्रतीत्युपपत्तेः उभयोस्तुल्यत्वात् न दृष्टान्तभाव उक्तः अर्थतस्तु साधनीयं द्वयमपि विमर्शत्वयमेवात्मा सर्वत्रेति कस्य दोषेणायं संयुक्तो भवेदित्यर्थः ॥ ११ ॥

किञ्च यदि भगवति केनाप्यंशेन प्राकृतधर्मसम्बन्धः स्यात् तदा भगवद्गुणनामादिकीर्त्तने कस्यापि पापक्षयो न स्यादित्यभिप्रायेणाह । यस्याखिलामीवहभिरिति । अखिलानामेव अमीवानि पापानि घ्नन्तीत्यमीवहानि भगवन्नामानि न केवलं पापनाशकानि किन्तु सुष्ठु मङ्गलजनकानि तैर्विमिश्रिताः अन्यदीया अपि वाचः गुणाः सत्यादयः कर्माणि गोवर्द्धनोद्धरणादीनि जन्मानि देवकीपुत्रादीनि सर्वेषां सर्वाण्येव पापनाशकानि अत एव या वाच एतद्युक्ताः ताः प्राणन्ति जीवन्ति वाचः प्राणरूपा भगवद्गुणा इति शुम्भन्ति शोभनयुक्ताः पुष्टा भवन्ति ततः सानुभावा अपि भवन्ति जगत्पुनन्तीति यथा देहे प्राणाः अन्नं श्रमश्च एवं वाचि भगवद्गुणजन्मकर्माणि तथैव मनस्यपि त्रयो ब्राह्मण्याः मन्त्रः पूर्वरूपं ब्राह्मणमुत्तररूपमिति श्रुतेः न पृथगुभयोर्निर्देश उक्तः आधिक्यपरं भविष्यतीति सिद्धे साध्यवाक्यं तदाधिक्यं बोधयतीति न्यायात् इत्याशङ्क्य विपरीते बाधकमाह । यास्तद्विरक्ता इति । यथा शवानां शोभा वस्त्राभरणैः क्रियते तथाप्यमङ्गलरूपैव प्राणाभावात् तत्पोषकान्नाभावात् प्राणकार्यधर्माभावाच्च अतो भगवति शतांशेनापि प्राकृतधर्मसंबन्धो भवेत् तदैतन्न स्यादिति भावः ॥ १२ ॥

———

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

शुभशकुनं पश्यन्मनोरथसिद्धिं निश्चिनोति । द्रक्ष्यामीति । नूनं निश्चितमेव गुडालकावृतं कुटिलकुन्तलावृतं यतः प्रदक्षिणमिति ॥९॥

ननु तद्दर्शनमसुरा अपि लभन्त एव तत्र तवैव का भाग्यश्लाघेत्यत आह । अप्यद्येति । अद्य निजेच्छयैव मनुजत्वमस्मद्वंश्यतमनुवंशप्रादुर्भूतत्वं गतवतो विष्णोर्लावण्यधाम्नः किमुपलम्भनं यथार्थानुभवो भवितेत्यसुराणां दर्शनमात्रं नतु लावण्योपलम्भ इति भावः । ततश्च मम दृशः फलं न न स्यादपितु स्यादेवेत्यर्थः ॥ १० ॥

मनुष्याकृतेस्तस्य लावण्योपलम्भो नयनाभ्यामेव स च सांप्रतं नन्दग्राम एव अन्तर्य्यामिणः परमेश्वरस्य तस्य त्वनुमानेनैवोपलम्भोऽस्मदादीनां सदा सर्वत्र वर्तत एवेत्याह । य इति । असत्सतोः जीवस्याशुभशुभकर्मणोरीक्षिता अहंरहितोऽप्यहं पश्यामीत्यहङ्काररहितोऽपीत्यपिकारेण जीवो देहाहङ्कारसहित एव ईक्षिता परमात्मा तु तद्देहाहङ्काररहित एव ईक्षिता द्रष्टा तत्साक्षिः सन् साक्षीत्यर्थः । नन्वहङ्कारराहित्यसाहित्याभ्यां को विचारः देहस्थितश्चेत्तद्वृत्तिशोकमोहादिभिर्युज्यत एव न हि गृहे स्थित आसक्तोऽनासक्तो वा गृहवर्तिध्वान्तमौष्ण्यं शैत्यं वा नानुभवेत्तत्राह स्वतेजसा चिच्छक्त्या अपास्तं तमोऽज्ञानं तत्कृता भिदा भ्रमश्च येन सः यो ह्यन्तर्य्यामी स्वीयया मायया आत्मनि जीवेऽधिकरणे रचिताः सृष्टा याः प्राणेन्द्रियधियस्ताभिस्तासां स्रष्टा स ईयते अनुमीयते तथा तदीक्षया तासां प्राणादीनामीक्षया प्रकाशेन च तासां प्रकाशकः स सदनेषु समष्टिदेहेषु अनुमीयते यदुक्तं "गुणप्रकाशैरनुमीयते भवा"निति तद्रूपलावण्यानुभवो हि परमभाग्यफलमेव यस्य सङ्कीर्तनान्यपि जगदुद्धारकाणीत्याह । यस्येति । अखिलानि अखिलस्य वा अमीवानि पापानि घ्नन्तीत्यखिलामीवहानि तैः शोभनानि मङ्गलानि येभ्यस्तैर्यस्य गुणकर्मजन्मभिर्विमिश्रा युक्ता वाचो वाक्यानि जगत्तद्वक्तृश्रोत्रात्मकं प्राणन्ति जीवयन्ति जीवयित्वा शुम्भन्ति कृपालुत्वं निर्मत्सरत्वादिभिरलङ्कारैः शोभयन्ति शोभयित्वा च पुनन्ति आविद्यकदोषात् पवित्रयन्ति व्यतिरेकमाह । या इति । तैर्गुणकर्मजन्मभिर्विरक्ता रहिता वाचः गुणालङ्कारादिमत्योऽपि शवशोभनाः शवान् शोभयन्तीति ताः प्रथमं जीवतोऽपि तद्वक्तृश्रोत्रात्मकान् जनान् शवान् कुर्वन्ति तत उपमाद्यलङ्कारैरलङ्कारैरिव शोभयन्तीति शवशोभनाः सतां सम्मताः यद्यशः ॥ ११–१२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

शुभसूचकं दृष्ट्वा हृष्यन्नाह । द्रक्ष्यामीति । मृगाः मे मम प्रदक्षिणं यथा तथा प्रचरन्ति वै हेतौ अतो हेतोः नूनं निश्चितं मुकु-

स चावतीर्णः किल सात्वतान्वये स्वसेतुपालामरवर्यशर्मकृत् ।
यशो वितन्वन् व्रज आस्त ईश्वरो गायन्ति देवा यदशेषमङ्गलम् ॥ १३ ॥
तं त्वद्य नूनं महतां गतिं गुरुं त्रैलोक्यकान्तं दृशिमन्महोत्सवम् ।
रूपं दधानं श्रिय ईप्सितास्पदं द्रक्ष्ये ममासन्नुषसः सुदर्शनाः ॥ १४ ॥
१अथावरूढः सपदीशयो रथात्प्रधानपुंसोश्चरणं स्वलब्धये । १ अयं विजयध्वजे नास्ति
धिया धृतं योगिभिरप्यहं ध्रुवं नमस्य आभ्यां च सखीन् वनौकसः ॥ १५ ॥
अप्यङ्घ्रिमूले पतितस्य मे विभुः शिरस्यधास्यन्निजहस्तपङ्कजम् ।
दत्ताभयं कालभुजङ्गरंहसा प्रोद्वेजितानां शरणैषिणां नृणाम् ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

त्वस्य मुखमहं द्रक्ष्यामि कथं भूतं शोभनौ कपोलौ नासिका च यस्मिन् तत् स्मितसहितो ऽवलोको यस्मिन् अरुणकञ्जे इव लोचने यस्मिन् तच्च तच्च तत् गुडालकैः वक्रकुन्तलैरावृतम् ॥ ९ ॥

फलवांश्चैव मे भव इत्येतत् प्रपञ्चयन् बहूनीतरजन्मानि निष्फलान्येव गतानीति मनुष्यत्वं त्वद्य सफलं भविष्यतीत्याशयेनाह । अप्यद्य विष्णोरिति । अपि सम्भावनायाम् मनुष्यत्वमीयुषः बहुषु नानाविधेषु निष्फलेषु जन्मसु गतेषु मनुष्यभावमीयुषः प्राप्तवतः मह्यं मम निजेच्छया भुवो भारावतारायावतीर्णस्येति शेषः । लावण्यस्याप्राकृतविग्रहसौन्दर्यस्य धाम आश्रयस्तस्य विष्णोः अद्य उपलम्भनं दर्शनं भविता भविष्यति एवं सति दृशो लोचनस्य फलं न न स्यादपितु स्यादेवेत्यन्वयः ॥ १० ॥

ननु विष्णोः सर्वत्र सतः सर्वत्र दर्शनं कुतो वा नन्दादिसदनेष्वेवेत्यत्राह । य इति । अहंरहितः प्रकृतिकार्यभूताहङ्कारोपलक्षितसर्वप्राकृतपदार्थविलक्षणः स्वतेजसा स्वप्रभावेण अपास्तं तमः संसारः असंसारित्वात् भिदा भेदः सर्वात्मत्वात् भ्रमः भ्रान्तिः सर्वज्ञत्वात् यस्मात् स जीवविलक्षण इत्यर्थः । असतस्ततः प्रकृतिपुरुषयोः ईक्षिता द्रष्टा सर्वकारणकारणः सर्वगो विष्णुर्द्रष्टा द्रष्टृत्वेन द्रष्टुमशक्य इत्यर्थः । तथापि स्वमायया स्वकृपया आत्मनि स्वविषये आत्मदर्शनार्थमित्यर्थः । प्राणाक्षधीभिः प्राणेन्द्रियबुद्धिभिः सह रचितैर्भावितैर्जीवैः सदनेषु नन्दालयादिषु तदीक्षया तद्दत्तया दृष्ट्या अभीयते प्रत्यक्षतो ऽभिगम्यते इत्यर्थः । य इत्यस्य स चावतीर्ण इति वक्ष्यमाणेन पदेन सम्बन्धः ॥ ११ ॥

कृपया भावितैः प्रत्यक्षतो ऽभिगम्यते इत्युक्तं तत्र तत्कृपालक्ष्येन तद्गुणकर्मजन्मप्रतिपादकशास्त्रश्रवणेन जीवाः भाविता भवन्तीत्याह । यस्येति पदस्य स चावतीर्ण इत्यनेन सम्बन्धः अखिलानां ब्राह्मणादिश्वपचान्तानाममीवानि पापानि घ्नन्तीत्याखिलामीवहानि तैः सुमङ्गलैः शोभनानि मङ्गलानि येभ्यस्तैः यस्य विष्णो गुणकर्मजन्मभिः विमिश्रा युक्ता वाचः वै निश्चितं जगत् प्राणन्ति जीवयन्ति शुम्भन्ति शोभयन्ति पवित्रयन्ति पुनन्ति यास्तु वाचः तैर्विष्णुगुणादिभिर्विरक्ता रहिताः तास्तु वस्त्राद्यलंकृतशववत् शोभमाना मताः सम्मताः सतामिति शेषः ॥ १२ ॥

भाषा टीका ।

अवश्य मैं आज मुकुंद भगवान् के मुखारविंद का दर्शन करूंगा कैसा मुखारविंद है कि सुन्दर कपोल तथा नासिका से शोभित है मंदहास सहित देखने वाले लाल कमल सरीके नेत्रों से शोभित हैं टेढे घुंघुराले केशों से शोभित हैं ऐसे मुख का दर्शन होगा जरूर यह शुभमृग मेरे दाहिने तरफ जाते हैं ॥ ९ ॥

और भी आज पृथिवी के भार के नाश करने की अपनी इच्छा से मनुष्य रूप को प्राप्त भये विष्णु भगवान् लावण्य मूर्ति वाले जो हैं तिनका मेरे को लाभ होगा तो दर्शन से मेरे नेत्रों का फल अवश्य ही होगा ॥ १० ॥

जो भगवान् कार्य कारण दोनों के जानने वाले होकर भी अहंकार से रहित हैं जिनने अपने तेज से अज्ञान कृत भेद भ्रम को दूर कर रखा है तौ भी उनकी माया से उन की ईक्षा से आत्मा मैं अभिमान युक्त जो जीव सो उनके प्राण इंद्रिय बुद्धि आदि द्वारा वृंदावन के वन गृहों में उनको देखते हैं ॥ ११ ॥

जिन भगवान् के सब पाप नाशक मंगल जो गुण कर्म जन्म तिनके चरित्रों से मिश्रित जो वाणी सो सब जगत् को जीवित करती हैं शोभित करती हैं पवित्र करती हैं और जो वाणी उन चरित्रों से रहित हैं सो तो जैसे अलंकृत मुरदा हो तैसी होती हैं ॥ १२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

स्वयं रचितान्सेतून् वर्णाश्रमधर्मान्पालयताममरवर्याणां सुखकर्ता सन्नवतीर्णः यद्यशः ॥ १३ ॥

त्रैलोक्ये एकमेव कान्तम् दृशिर्दृष्टिस्तद्वतां महानुत्सवो यस्मात् यद्वा महानुत्सव एव अत एव श्रिय ईप्सितमास्पदमेव

श्रीधरस्वामिकृतभावार्थदीपिका ।

भूतं रूपं श्रीमूर्तिं दधानं तमीश्वरं द्रक्ष्यामीति अत्र लिङ्गम्। उषसः प्रभातसमयाः सुदर्शनाः शुभदर्शनाः सुखं प्रभाता रजन्यः शुभसूचिका बभूवुरित्यर्थः ॥ १४ ॥

किञ्च अथ दर्शनानन्तरं सपदि तत्क्षणमेव रथादवतीर्णः सन्प्रधानयोः पुरुषयोरामकृष्णयोश्चरणं योगिभिरप्यात्मलाभाय केवलं धियैव धृतं साक्षादहं नमस्यामि आभ्यां सहानयोः सखीन् गोपांश्च नमस्यामीति ॥ १५ ॥

किञ्च अपीति । अधास्यत् धास्यति तद्विभावयति । दत्ताभयमिति साधैन ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

तदेवं य ईक्षिता यस्य च नानागुणकर्मणां तादृङ्माहात्म्यं स तु सोऽपि स्वयं सात्वतान्वयेऽवतीर्णः सन् व्रजे आस्त इत्यन्वयः । किलेति महत्सु शान्तेषु च प्रसिद्धं प्रमाणयति । स्वसेतवो भगवद्धर्मादिमर्य्यादाः अमरवर्य्याः ब्रह्मरुद्रादयः । न केवलं तदवतारादिदर्शिनां तेषामेव शर्मकृत् । अपि त्वन्येषामपीत्याह । यश इति । तदेव प्रशंसति यद्यशो देवाः सर्वाराध्या अपि गायन्ति । यच्च परमतद्वत्तदंशावतारस्यापि लाभमाहात्म्यमाह । यस्येति । निकृष्टपर्यन्ताशेषजीवानां मङ्गलमिति । तत्तत्कर्तृत्वञ्च नत्वस्मदादिवत् कर्मपारवश्येन किन्तु स्वातन्त्र्येणेत्याह । ईश्वर इति ॥ १३ ॥

नन्वेवं साधारण्यं चेत्तस्मात्तव किं वैशिष्ट्यं तत्राह । तं त्विति । नूनं निश्चये । तुशब्दः सर्वयादवादितोऽपि निजभाग्यवैशिष्ट्यविवक्षया अहन्त्वद्यैव तं द्रक्ष्ये महतां महाभागवतानां गतिं गम्यं गुरुञ्चोपदेष्टारमिति साध्यसाधनत्वमुक्तं रूपं सौन्दर्यम् एवं सामान्यत उक्त्वा श्रीकृष्णरूपे तस्मिन् विशेषमाह । त्रैलोक्यमधोमध्योर्ध्वलोकः स च महावैकुण्ठपर्यन्तः सोऽपि महानारायणपर्यन्तः तस्मादपि कान्तम् । अत एव स्वसहितानां तादृशामपि दृशिमतां महोत्सवं वक्ष्यते च महाकालपुरनाथेन श्रीभगवता । "द्विजात्मजा मे युवयोर्दिदृक्षुणा मयोपनीता" इति । उक्तञ्च श्रीमदुद्धवेन विस्मापनं स्वस्य चेति । न केवलं स्वरूपवरीयसामेव तादृशं तत् अपि तु स्वशक्तिवरीयस्या अपीति वदन् तादृशसुभगतायां हेतुमाह सर्वसौभाग्याश्रयायाः श्रियोऽपि ईप्सितमीप्सा तस्या आस्पदं नतु महानारायणादिवद्भोग्यमपीत्यर्थः । तदुक्तं यद्वाञ्छया श्रीर्ललना इति । उषस इत्यनेन चिरं वृद्धयो रात्रयः सुप्रभाताः सन्ति अन्यथेदृशं फलं न स्यादित्यर्थः । अथवा चतुःश्लोकीयमेवं प्रसञ्जनीया । ननु कथं तस्य तादृशं दौर्लभ्यं तल्लाभमाहात्म्यञ्च यदि च तर्हि कथं सौलभ्यं येन तवापि तादृशभाग्यश्लाघा स्यादित्यत्र विवृणोति चतुर्भिः । तत्राद्यं द्वयं कैमुत्येन द्वाभ्यां दौर्लभ्यं तावदाह । य ईक्षितेति । अपीति समुच्चये । सदसतोरीक्षितापि तदावेशरहितोऽपि उभयत्र हेतुः स्वतेजसेति ईक्षितत्वादिरूपत्वे सर्वागोचरस्वरूपो यः स्वमायया स्वचीक्षया चात्मनि रचितत्वेन स्वतः सर्वसामर्थ्यहीनैस्तं द्रष्टुमयोग्यैश्च जीवैः प्राणादिप्रवृत्तिलिङ्गेन सदन्तेषु तदधिष्ठानरूपेषु सर्वभूतेषु अभीयते प्रतीयतेऽनुमीयते मात्रं न तु दृश्यते । यथोक्तं द्वितीये । "भगवान् सर्वभूतेषु लक्षितः स्वात्मना हरि"रिति । एवं "विष्टभ्याहमिदं कृत्स्न"मित्युक्तदिशा तदंशस्यापि परमदौर्लभ्यं दर्शितम् । तद्वत्तदंशावतारगणस्यापि लाभमाहात्म्यमाह । यस्येति । तथापि सौलभ्ये कारणमाह । स चेति । निगमयति । तं त्विति । तस्मान्महदेव मम भाग्यमिति भावः ॥ १४ ॥

भक्ततया दर्शनमात्रेणातृप्त्या मनोरथान्तरं कुरुते । अथेति । नमस्ये नमस्यामि इति वर्त्तमानसामीप्ये लट् । धिया अभ्यासे यच्छता सुविचारेण । धृतं दार्ढ्येन चिन्तितं योगिभिरात्मारामैरपि किं पुनर्भक्तियोगिभिः । स्वस्य भगवतः प्राप्तये आभ्यां सह वर्त्तमानान् सखीन् अनयोर्वयस्यान् आभ्यामनयोरिति वा । ननु भवदीया यादवाश्च केचित् सखायो भविष्यन्ति कुतस्तेष्वेवैतावानादरस्तत्राह । वनौकसः एकान्ते तेन सह विहारेण तेषामेव सख्यातिशयादिति भावः । यद्वा । किं पुनः सखीन् सर्वानपि वृन्दावनप्राणिनो नमस्यामीत्याह । वनेति । एवं पूर्वनमस्कारतो विशेषो ज्ञेयः । अन्यत्तैः । तत्रेति शब्दस्यैतावदेव मम कृत्यमित्यर्थः ॥ १५ ॥

अधुना भक्तिविशेषोदयेन नमस्कारेणातृप्त्या करस्पर्शे मनोरथं करोति अपीति द्वाभ्याम् । अपि प्राकाश्ये । अङ्घ्र्योर्मूले तले विभुः प्रभुः निजं तादृशं तदीयं हस्तपङ्कजं तादृशत्वमेव दर्शयति । दत्तेत्यादिना । यद्यपि तत्प्रियस्य स्वस्य कस्यचिद्गोपस्य हस्तधारणेनापि मम कृतार्थता स्यादेव तथापि निजं किं धास्यतीति भावः । काल एव भुजङ्गः प्राणिसंहारकत्वात् अलक्ष्यगमनहेतुसाधनत्वेऽपि शीघ्रगामित्वाच्च । तस्य रंहसा अनुद्रवणेनोद्वेजितानाम् । अत एव शरणैषिणां सतां नृणां जीवमात्राणां चतुर्थ्यां षष्ठी तेभ्यो दत्ताभयम् ॥ १६ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

स्वसेतुः स्वकृतमर्यादा ॥ १३ ॥

दृशिमतां चक्षुष्मतामुत्सवमानन्दकरम् । असवः इन्द्रियाणि सुदर्शनाः सुप्रसन्नाः ॥ १४ ॥

प्रधानपुंसोः श्रेष्ठयोः पुंसोः योगिभिरपि धिया बुद्ध्या धृतान् चरणान् अथावरूढः । जगदाधारत्वेन निरूपणे ऽनन्तः स्वलब्धये स्वसत्तासिद्ध्यर्थम अधात् दधार पादपीठव्यवधानमात्रं भूमण्डले व्यवधानमिति भावः । आभ्यां रामकृष्णाभ्यां सहितान् सखीन् वनौकसो नमस्ये ॥ १५ ॥–॥ १६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

स चेति । य एवं विधो विष्णुरीश्वरः स एव सात्वतान्वये यादवकुले श्रीकृष्णरूपेणावतीर्णः किल स्वसेतुः स्वकृतमर्य्यादा तं पालयन्तीति तथा तेषाममरवर्य्याणां देवी सम्पत्तिमभिजातानां शर्म सुखं करोतीति तथा भूतः यशः कीर्तिं वितन्वन् व्रजे आस्ते यशो विशिनष्टि । अशेषाणि अखिलानि मङ्गलानि यस्मात् तत् यच्च देवा गायन्ति ॥ १३ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तमिति सात्वतां कुले ऽवतीर्णमुक्तविधमहमद्य नूनं द्रक्ष्यामि यतो मम उषसः लिङ्गव्यत्यय आर्षः उषांसि प्रभातसमयाः सुदर्शनाः प्रसन्नाः सुखप्रभाता रजन्यः शुभसूचका बभूवुरित्यर्थः । कथम्भूतं महतां साधूनां गतिं स्वप्राप्त्युपायं गुरुं हितकारिणं किञ्च रूपं विग्रहं दधानं बिभ्राणं कथम्भूतं रूपं त्रैलोक्यकान्तं त्रिलोकसुन्दरं दृशिमतां चक्षुष्मतां महानुत्सवो हर्षो यस्मात् तत् श्रियो लक्ष्म्या ईप्सितमास्पदमाश्रयभूतम् ॥ १४ ॥

किञ्चाथेति । अथास्य दर्शनानन्तरं सपदि रथादवरूढोऽहमीश्वरयोः प्रधानपुंसोः पुरुषोत्तमयो रामकृष्णयोश्चरणं नूनं ध्रुवं नमस्ये चरणं कथम्भूतं योगिभिरप्यात्मलब्धये स्वसत्तासिद्ध्यै धिया केवलं धृतं भावितं नतु दृष्टमिति भावः तत आभ्यां प्रधानपुंभ्यां सहानयोः सखीन् वनौकसो गोपान्नमस्ये ॥ १५ ॥

किञ्चाथानन्तरमङ्घ्रिमूले पतितस्य मम शिरसि विभुः कृष्णः स्वयं हस्तपङ्कजमधास्यत् आधास्यति हस्तपङ्कजं विभावयति । दत्ताभयमित्यादिना सार्द्धेन । काल एव भुजङ्गस्तस्य रंहसा वेगेन प्रोद्वेजितानां संसारभीरूणां शरणैषिणां रक्षणोपायत्वेनाध्यवस्यतां जनानां दत्तमभयं येन तत् ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावळी ।

अस्त्वेवं विधमाहात्म्यो भगवांस्ततः प्रकृते किमत्राह । स चेति । चशब्द एवार्थे ईश्वर एव व्रजे आस्ते किलत्यन्वयः सात्वतामन्वये यदुकुले अवतीर्णः किङ्कार्यायेति तत्राह । स्वसेत्विति । स्वेन कृतः सेतुर्मर्यादा तां पालयन्ति रक्षयन्तीति स्वसेतुपालाः अमराणां वर्याः अमरवर्याः स्वसेतुपालानाममरवर्याणामिन्द्रादीनां शर्मकृत् सुखकृत् देवकार्यायावतीर्ण इत्यर्थः । अत्र किम्प्रमाणमित्यत्राह । गायन्तीति । देवाः व्यासादयः पुराणादिषु गेयसम्भवे गानं युक्तं तत्कथमित्यत्राह । यश इति । यद्यशो वितन्वन्नास्ते अशेषाणां मङ्गलं श्रेयस्करं वचसा ॥ १३ ॥

स्वमानसं प्रति वक्ति । तं त्विति । अहमद्य तमेव द्रक्ष्ये इत्यन्वयः दृशिमतां चक्षुष्मतां महोत्सवं त्रैलोक्यकान्तं कमनीयं रूपं दधानं "भद्रं कर्णेभिः श्रृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्रा" इति श्रुतिः ममाद्य उषसः प्रभातकालावयवा क्षणादयः सुदर्शनाः सर्वजगत्पूज्यवस्तुदर्शनप्रदा आसन्नित्यन्वयः ॥१४ ॥ ० ॥

कालाख्यभुजङ्गस्य रंहसा रंहोलक्षणविशेषेण अधास्यत् धास्यति धरिष्यत्यपि किम् ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

निगमयति । तं त्विति । तस्मान्महदेव मम भाव्यमिति भावः ॥ १४ ॥

आभ्यां सह वर्त्तमानान् सखीन् वनौकस एकान्तविहारेण सख्यातिशययुक्तानित्यर्थः ॥ १५—१७ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

एतादृश एवायमवतीर्णो नतु धर्मतिरोभावेनेति वक्तुमाह । सचावतीर्ण इति । चकारात् अन्तर्यामितयावतीर्णोऽपि पुनर्बहिरप्यवतीर्ण इति चकाराद्बलभद्रं वा शेषरूपः किलेति प्रसिद्धिः प्रमाणं महतो यत्र क्वाप्यवतारो न भवतीति सात्वतान्वय इत्युक्तं यादवाः सर्वे वैष्णवाः तेषां वंशप्रसिध्यर्थं वा अवतारप्रयोजनमाह । स्वस्य सेतुपाळाः भगवता कृता जगति या मर्यादा तस्याः पालका देवा इति तेषामवताराणां शर्म सुखं यथैव भवति तथैव करोति अवतारेणैव भवतीति अवतारं करोतीत्यर्थः । मुख्यं प्रयोजनमाह । यशो वितन्वन्निति । अग्रे जनिष्यमाणानां मोक्षार्थं यावत्तानि कर्माणि सिद्धानि न भवन्ति तावद्व्रज आस्ते ननु व्रजे स्थितौ किम्प्रयोजनम् उत्कृष्टस्थाने स्थितेनैव तथा कर्त्तुमुचितमिति चेत्तत्राह । ईश्वर इति । अपकृष्टे स्थाने स्थित्वा तादृशं कर्म कुर्वन् सर्वेषां मोक्षं साधयतीति रहस्यसिद्धान्ते चैतत्साधितम् अत एव यद्भगवतश्चरित्रं सर्वे गायन्ति विशेषतो देवाः यस्मादशेषस्यापि मङ्गलभूतं भवतीति ॥ १३ ॥

एवं भगवतो माहात्म्यमुक्त्वा सम्यगलौकिकत्वं सम्पाद्य तद्दर्शनं पुरुषार्थो भवतीति कामयते । तं त्वद्येति । तं पूर्वोक्तं तुशब्देन प्रातीतिकं पक्षं व्यावर्त्तयति अद्यैव द्रक्ष्यामि नूनं नात्र सन्देहः किन्तु निश्चितमेवैतत् भगवतः पुरुषोत्तमत्वप्रतिपादनाय सर्वफलरूपत्वमाह । महतामेव फळं भवतीति तेषां गतिः गम्यः फलमिति यावत् साधनमपि स एवेत्याह । गुरुमिति । उपदेष्टापि स एव ज्ञानं ज्ञानोपदेष्टा च एवम्वैदिकप्रकारेणाह । त्रैलोक्यकान्तमिति । कान्तः पतिः सुन्दरश्च किञ्च विशेषतो दृशिमतां ज्ञानवतां वा महानुत्सवो भवति उत्सवः फलं भवतीत्यविवादं सर्वेषामेव पतिरपेक्ष्यत इति लौकिकं द्वयमपि फलम् एवं लौकिकवैदिकफलरूपं दधानमिति दर्शनं महाफलमिति सूचितं किञ्च लोके सर्वपुरुषार्थरूपा लक्ष्मीः "तया विना क्व देवत्व" मित्यादिवाक्यात् तस्या अपि ईप्सितमास्पदं स्थानं दर्शने आवश्यकं लक्षणमाह । ममासन्नुषसः सुदर्शना इति । एते प्रातःकालाः अद्यतनाः प्रतिक्षणं सुष्ठु दर्शनं येषां तथाविधाः प्रतिक्षणमानन्दजनका दृश्यन्ते ॥ १४ ॥

एवं दर्शनमनोरथमुक्त्वा दर्शनानन्तरमनोरथमाह । अथावरूढ इति । रथावरूढ उत्तीर्णः भगवद्दर्शनानन्तरं सम्भावितदर्शने वा ईशयोः चरणं नमस्ये इति आवेशावतारयोः चरणभेदो नास्तीत्येकवचनं ननु बालकयोः कथन्नमस्कार उचित इति चेत् तत्राह । प्रधानपुंसोरीशयोरिति । मातापित्रोरपि स्वामिनोरिति भावः । अतो गर्भदासाः सर्व एवेत्युक्तं भवति ननु नमस्कारे किम्प्रयोजनं दर्शनेनैव सर्वपुरुषार्थसिद्धिरिति तत्राह । स्वलब्धये योगिभिरपि धिया धृतमिति । आत्मप्राप्त्यर्थं यत्पदं बुद्ध्या मानसिकं ध्रियते तत्साक्षान्नमस्कुर्वन् किङ्कि न करोतीति नमस्कारमनोरथोऽपि युक्त इत्यर्थः । तद्दीनेन नमस्कारेण मोक्षः प्रार्थ्यत इत्याशङ्क्य तन्निवृत्त्यर्थं भक्तिरेव सिध्यत्वित्यभिप्रायेणाह । आभ्यां सह एतत्सखीन् गोपाला-

समर्हणं यत्र निधाय कौशिकस्तथा बलिश्चाप जगत्त्रयेन्द्रताम् ।
यद्वा विहारे व्रजयोषितां श्रमं स्पर्शेन सौगन्धिकगन्ध्यपानुदत् ॥ १७ ॥

श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी ।

अपि तमस्य इति ततो व्रजौकस एव सर्वान्नमस्य इति भगवद्धर्मिणां सर्वेषामेव सर्वोत्कृष्टत्वज्ञानं भक्तिहेतुरिति ॥ १५ ॥

ततो भगवत्प्रसादरूपमनोरथमाह । अप्यङ्घ्रिमूले पतितस्येति। भक्त्युद्रेकात् शनैर्न नमस्कारः किन्तु चरणमूले पातः नन्वदृष्टपूर्वे त्वयि कथम्भगवान् कृपां करिष्यतीतिचेत्तत्राह । विभुरिति । स हि ज्ञाने प्रसादे च समर्थः अध्यधास्यत् "आशंसायां भूतवच्च" ति अपीति सम्भावनायां प्रायेण हस्तं धास्यतीति धारणेनैव महत्सुखं भविष्यतीति अन्यदपि ततः फलं भविष्यतीति हस्तपङ्कजं वर्णयति । दत्ताभयमिति । पङ्कजं हि जलकार्यं करोति विशेषेहि जलेन प्रतीकारः तापरूपत्वात् अत्रापि काल एव भुजङ्गः तस्य रंहसा वेगेन प्रोद्वेजितानां दंशे तु मन्त्राद्यपेक्षा केवलं दृष्ट्वैव भीताः पलायिताः कालो ग्रसिष्यतीति त्यक्तपरिग्रहाः सन्न्यासिनः विवेकिनो वा गृहस्थाः ते च ते भगवच्चरणान्वेषिणः अन्ये पुनर्देवादियोनयः साधनं कर्तुं शक्ताः पश्चादयस्तवज्ञा एव अत उक्तं नृणामिति अभयं प्रयच्छति पङ्कजमिति जले स्थिते कमले यः प्रविशति तस्य न भवत्येव सर्पभयं जले विषस्य न पराक्रमः नापि कमलं सर्पः प्रविशति ॥ १६ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

दृशिमतां चक्षुष्मतां महोत्सवस्वरूपं श्रियो विष्णुवक्षः स्थलस्थिताया अपि लक्ष्म्या ईप्सितानां रतिरासविलासादीनामास्पदं रूपं दधानं तमीश्वरं द्रक्ष्यामि अत्र लिङ्गम् उषसः प्रभातसमयाः सुदर्शनाः शुभसूचका बभूवुरित्यर्थः । बहुवचनेन बह्वीनां रात्रीणां श्रेयः अन्यथैतदृशं फलं न स्यादिति भावः ॥ १४ ॥

अथ दर्शनानन्तरमेव रथात् अवरूढः सपदि अवरोहणसमय एव प्रधानयोः श्रेष्ठयोः पुंसोः रामकृष्णयोश्चरणं योगिभिरपि आत्मलाभाय केवलं धियैव धृतं साक्षादहं नमस्यामि आभ्यां सहितान् सखींश्च नमस्यामि वार्तमानसामीप्ये लट् ततो व्रजौकसः सर्वान् व्रजवासिनोऽपि ॥ १५ ॥

ततश्च अपीति । अधास्यत् धास्यति हस्तपङ्कजं विशिनष्टि। दत्ताभयं नृणामिति चतुर्थ्यर्थे षष्ठी ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

स उक्तप्रकारः स्वसेतुर्भगवद्रचितो धर्मसेतुस्तत्पालानाम् अमरो विष्णुर्वर्य्यः पूज्यो येषां तेषां शर्म सुखं करोतीति तथा अशेषाणि सम्पूर्णानि मङ्गलानि यस्मात् तदशेषमङ्गलं यच्च देवा ब्रह्मादयो गायन्ति तत् यशो वितन्वन् सात्वतान्वये यादवानां वंशे अवतीर्णः सन् व्रजे आस्ते ॥ १३ ॥

उषसः प्रभातसमयाः प्रभाता रजन्यो मम सुदर्शनाः शुभसूचका आसन् अतो नूनं निश्चितमुक्तप्रकारमद्यद्रक्ष्ये द्रक्ष्यामि कथंभूतं महतां गतिं गम्यते इति गतिः प्राप्यं गतिं स्वप्राप्तिसाधनं गुरुम् उपदेष्टारं त्रैलोक्ये एकमेव कान्तं सुन्दरं दृशिमतां दृष्टिमतां महानुत्सवो यस्मात्तम् श्रियः ईप्सितं वाञ्छितमास्पदमाश्रयं रूपं विग्रहं दधानं बिभ्राणम ॥ १४ ॥

किञ्च अथ दर्शनानन्तरं सपदि रथादवतीर्णः प्रधानयोः सर्वश्रेष्ठयोः पुंसोः रामकृष्णयोश्चरणं योगिभिः ध्यानयोगनिरतैर्मुमुक्षुभिरपि स्वलब्धये अपहतपाप्मत्वादिगुणयुक्तस्वरूपलब्धये भगवत्साधर्म्यसिद्ध्यै धियैव केवलं धृतं भावितम् अहं तु साक्षान्नमस्यामि अहो मम भाग्यमिति भावः । किञ्च आभ्यां प्रधानपुंभ्यां सह अनयोः सखीन् गोपांश्च नमस्यामि किं बहुना श्रीकृष्णसंबन्धित्वाद्व्रजौकसः सर्वजन्तूनपि ॥ १५ ॥

शिरसि भगवद्धस्तस्पर्शं लब्ध्वा कृतार्थो भविष्यामीत्याशयेन तत्स्पर्शे तत्प्रभावञ्च चिन्तयति । अपीति द्वाभ्याम् । निजहस्तपङ्कजम् अधास्यत् धास्यति कथम्भूतं काल एव भुजङ्गस्तद्रंहसा वेगेन प्रोद्वेजितानां मुमुक्षूणां शरणं रक्षितारमिच्छतां दत्तमभयं येन तम् ॥ १६ ॥

भाषा टीका ।

वही भगवान् अब यादवों के वंश में अवतीर्ण भये हैं अपने बनाये धर्म मर्यादा के पालन करने वाले देवता आदि को की रक्षा करके सुख देत हैं वे ईश्वर जिस यश को विस्तार करते हैं संपूर्ण जगत् के मङ्गल करने वाले उस यशको सब देवता गान करते हैं ॥ १३ ॥

वे भगवान् महा पुरुषों के गुरु हैं सब के गति दाता हैं त्रैलोकक प्रिय पति हैं दर्शन करने वालों के नेत्रों के उत्सव दायक हैं लक्ष्मीजी के अत्यंत स्थान रूप प्रिय रूपको धारण किये हैं आज निश्चय है कि मैं उन भगवान् का दर्शन करूंगा क्यों कि मेरेः सुप्रभात के शुभके सूचक भये हैं ॥ १४ ॥

इसके अनंतर मैं रथ में से उतर कर शीघ्र ही प्रकृति पुरुषों के ईश्वर दोनों के चरणों को नमस्कार करूंगा जिन चरणों को अपने लाभ के वास्ते सब योगियों ने हृदय में धारण किया है और इन दोनों के साथ उनके सखा वन व्रज वासियों को भी नमस्कार करूंगा ॥ १५ ॥

क्या विभु भगवान् चरण के नीचे गिरे हुये मेरे मस्तक पर हस्तकमल को धारण करैंगे जो कि हस्तकमल काल रूपी सर्प के वेग से डरते हुये शरण की इच्छा करने वाले मनुष्यों के अभय के दैने वाला है ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

बलिना तावत्पदत्रयपरिमितभूदानसमये तस्य हस्ते उदकं निहितम् कौशिक इन्द्रस्तेनापि कदाचित्किञ्चिन्निहितमिति

न मय्युपैष्यत्यरिबुद्धिमच्युतः कंसस्य दूतः प्रहितोऽपि विश्वदृक् ।
योऽन्तर्बहिश्चेतस एतदीहितं क्षेत्रज्ञ ईक्षत्यमलेन चक्षुषा ॥ १८ ॥
अप्यङ्घ्रिमूलेऽवहितं कृताञ्जलिं मामीक्षिता सस्मितमार्द्रया दृशा ।
सपद्यपध्वस्तसमस्तकिल्बिषो वोढा मुदं वीतविशङ्क ऊर्जिताम् ॥ १९ ॥
सुहृत्तमं ज्ञातिमनन्यदैवतं दोर्भ्यां बृहद्भ्यां परिरप्स्यतेऽथ माम् ।
आत्मा हि तीर्थीक्रियते तदैव मे बन्धश्च कर्मात्मक उच्छ्वसित्यतः ॥ २० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

ज्ञातव्यम् मुमुक्षूणां संसारभयनिवर्त्तकं सकामानामभ्युदयप्रदं चेत्युक्तमनुरक्तानां परमसुखदं चेत्याह । यद्वेति वाशब्दो वितर्के विहारे रासक्रीडायां सौगन्धिकस्य गन्ध इव गन्धो यस्य तत्सौगन्धिकगन्धि ॥ १७ ॥

एवं परमानुग्रहं सम्भाव्य पुनरप्यसम्भवमाशङ्क्य परिहरति । न मयीति । यद्यप्यहं कंसेन प्रहितोऽतस्तस्य दूतस्तथापि मय्यरेरयमिति बुद्धिं नोपैष्यति न करिष्यतीत्यर्थः । यतो विश्वदृक् सर्वज्ञोऽतो मम चेतसोऽन्तश्च बहिश्च यदीहितं चेष्टितमेतद्यः क्षेत्रज्ञोऽन्तर्यामी नित्यज्ञानेनेक्षते अयं भावः चेतसो बहिरेव कंसमनुवर्तेऽन्तस्तु कृष्णमेव तदेतदसौ हृदि स्थितो जानातीति यद्वा एतस्य जगत ईहितमिति ॥ १८ ॥

अपि यदङ्घ्रिमूले चरणोपान्तेऽवहितं संयतं कृपार्द्रतेनार्द्रया दृशा मामीक्षिता द्रक्ष्यति तर्हि सपद्येव विनष्टाखिलकल्मषः सन् मुदं वोढा प्राप्स्यामीति ॥ १९ ॥

अथ मां परिरप्स्यत आलिङ्गिष्यति यदा तदैव मे आत्मा देहस्तीर्थी क्रियतेऽतिपवित्रीकरिष्यते उच्छ्वसिति श्लथो भविष्यति अतो देहात् ॥ २० ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

पुनरपि तदेव हस्तपङ्कजं विशिषन् स्वमनोरथं प्रबलयति । समर्हणमिति । सम्यगर्ह्यते पूज्यते येन तत् समर्हणं दानसङ्कल्पोदकं कौशिकस्य तन्निधानं शतक्रत्वनन्तरसमये ज्ञेयं तत्कराश्रयत्वादिन्द्रपदस्य । बलिश्च जगत्त्रयेन्द्रतामापेति प्रथमत एव फलस्यापूर्वरूपत्वेनोदयात् । तथैवोक्तं श्रीविष्णुपुराणे । "यत्राम्बु विन्यस्य बलिर्मनोज्ञानवाप भोगान् वसुधातलस्थः । तथामरत्वं त्रिदशाधिपत्यं मन्वन्तरं पूर्णमपेतशत्रु"रिति । अस्य निष्कामत्वन्तु तच्छिरसि श्रीत्रिविक्रमचरणधारणात् अनन्तरमेव ज्ञानं तथापीश्वरेच्छयैव श्रीप्रह्लादवत्तदङ्गीकारः । तदेवं पूर्वार्द्धे तस्य वदान्यस्वभावत्वेन सकामभक्तेषु सर्वसम्पत्प्रदत्वमुपलक्ष्य परमानन्दस्वरूपत्वेन स्वैकनिष्ठेषु सर्वदुःखनिवर्त्तकत्वमुपलक्षयति । यद्वेति वाशब्दो वितर्के । कस्माचिद्गत् किञ्चित् श्रुत्वा वितर्कयामीत्यर्थः । यदेव हस्तपङ्कजं सौगन्धिकेषु दिव्यपङ्कजविशेषेषु गन्धो गुणलेशो यस्य

तादृशं व्रजयोषितां कोटिसङ्ख्यानां विहारे रासाख्यनृत्यक्रीडाविशेषश्रमं पुनः पुनरावेशान्मूर्च्छापर्य्यन्तं किम्वा होरिकारूपे शङ्खचूडोपद्रवाद्त्रासेन मूर्च्छामयं स्पर्शेन तन्मात्रेण युगपदपानुदत् इत्यर्थः । ततः पूर्ववदत्रापि शब्द स्वरसयोग्यांश एव चिन्तितः । तत्र गोपीनां तत्पत्नीनाश्चेति पद्यद्वये यथा स्वामिभिर्व्याख्यातं तद्वदेवं प्रायस्तद्विधानामभिप्राय इति ॥ १७ ॥

अथार्त्तस्वभावेन चिन्तामतिभ्यामाह । न मयीति । अच्युतः अलुप्तज्ञानैश्वर्य्य इत्यर्थः । अत एव विश्वदृक् ॥ १८ ॥

किल्विषं कंससेवादिलक्षणं वीता अपगता विविधा शङ्का यस्य तथा भूतः सन् । अन्यत्तैः । तत्र यदीति निश्चये । धत्ते पदं त्वमविता यदि विघ्नमूर्ध्नीतिवत् । यद्वा । तदेवं निश्चित्यातृप्तिस्वभावेन मनोरथान्तरं करोति । अपीति ॥ १९ ॥

तेनाप्यतृप्त्या मनोरथान्तरं करोति । सुहृत्तममिति । सुहृत्तमं परममित्रं श्रीवसुदेवादिहितकारित्वात् । बृहद्भ्यामिति गाढालिङ्गनमभिप्रेतं हि निश्चितम् । अतीर्थमपि तीर्थं क्रियते तत्परिरम्भणेनेति शेषः । इति दैन्योक्तिः । एवकारेणान्यनैरपेक्ष्यमुक्तं कर्म प्रारब्धलक्षणं तन्मयो बन्धो बन्धनम् । अन्यत्तैः । तत्र आत्मा देह इत्येव लेखनं युक्तम् । असाविति मूलपाठाभावात् । अथवा परेषामपि पावनत्वात्तीर्थी क्रियते न केवलमेतावत् अपित्वतो देहाद्धेतोरस्य वीक्षणादिना तेषां कर्मात्मकबन्धश्चोच्छ्वसिति ॥ २० ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

अर्हणम् अर्घ्यजलं तद्धस्ते कर्मभिश्च कौशिक इन्द्रः ॥ १७ ॥

यद्यप्यहं कंसस्य भृत्यभूतस्तेन प्रहितस्तथापि विश्वदृक् स मयि न शत्रुबुद्धिमुपेयात् क्षेत्रज्ञः युगपत्सर्वाणि क्षेत्राणि जानातीश्वरः एतदीहितं चेतसो व्यापारं चेतसोऽन्तर्बहिस्तिष्ठन् य ईक्षते इत्यर्थः । "यो मनसि तिष्ठ"न्निति श्रुतेः ॥ १८ ॥

वीतशङ्कः गतशङ्कः ॥ १९ ॥

तीर्थी क्रियते पवित्रीक्रियते उच्छ्वसिति शिथिली भवति ॥ २० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

किञ्च यत्र यस्मिन् हस्तपङ्कजे बलिर्वैरोचनिः पदत्रयपरिमितभूदानसमयेऽर्हणमर्घ्यजलं निधाय जगत्त्रयेन्द्रतां जगत्त्रयाधिपत्यं प्राप प्राप्स्यति भाविनि मन्वन्तरे इन्द्रो भविष्यतीत्यर्थः तथा कौशिक इन्द्रोऽपि कदाचिदर्घ्यं निधाय जगत्त्रयेन्द्रतां प्राप्तवानिति प्रसिद्धिमुपजीव्येत्थमुक्तम् एवं मुमुक्षूणां मोक्षदं सकामानामभ्युदयप्रदञ्चेत्युक्तम् अनुरक्तानां परमसुखदञ्चेत्याह । यद्वेति वाशब्दो वितर्के उक्तसमुच्चयद्योतको वा निपातानामनेकार्थत्वात् यच्चेत्यर्थः व्रजयोषितां विहारे यः श्रमस्तं सौगन्धिकगन्धि यद्धस्तपङ्कजं कर्तृ अपानुदत् दूरीचकार सौगन्धिकस्येव गन्धो यस्य तत्सौगन्धिकगन्धि सौगन्धिकं कमलजातिविशेषः ॥ १७ ॥

एवं परमानुग्रहं सम्भाव्य पुनरप्यसम्भवमाशङ्क्य परिहरति । न मयीति । यद्यप्यहं कंसेन प्रहितः प्रेषितस्तस्य भृत्यश्च तथापि न मयि अरिबुद्धिम् अरेरयमिति बुद्धिं नोपैष्यति न करिष्यतीत्यर्थः यतः स विश्वदृक् सर्वसाक्षी विश्वदृक्त्वमेव प्रपञ्चयति क्षेत्रज्ञः युगपत्सर्वाणि क्षेत्राणि जानन्नीश्वरः नियन्ता च सन् एतन्मच्चेतस ईहितं व्यापारं चेतसोऽन्तर्बहिश्च वसन् "यो मनसि तिष्ठन्निति" श्रुतेः योऽमलेन सङ्कोचविकासरूपविकाररहितेन चक्षुषा धर्मज्ञानेन ईक्षते सर्वं युगपत् साक्षात्करोति अयम्भावः बहिरेवाहं कंसमनुवर्ते अन्तस्तु कृष्णमेव तदेतदसौ हृदिस्थो जानातीति ॥ १८ ॥

अपि तच्चरणोपान्ते ऽवहितं संयतं बद्धाञ्जलिञ्च मां स्मितेन सहितं यथा तथा कृपामृतेनार्द्रया दृशा दृष्ट्या द्रक्ष्यति तर्हि सपद्येव विनष्टाखिलकल्मषः विगतशङ्कश्चोर्जितां प्रभूतां मुदं वोढा प्राप्स्यामि ॥ १९ ॥

किञ्च सुहृत्तमं ज्ञातिं न विद्यते यस्मादन्यद्दैवतं यस्य तं मां पृथुभ्यां दीर्घाभ्यां भुजाभ्यां परिरप्स्यते आलिङ्गिष्यति यदा तदैव मम आत्मा देहः तीर्थी क्रियते पवित्री करिष्यते अतो हेतोर्मम कर्मात्मको बन्धश्च उच्छ्वसिति शिथिली भविष्यति ॥ २० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

यत्र निजहस्तपद्मे समर्हणं जलपूर्वपूजां निधाय दत्त्वा कौशिकः इन्द्रः जगत्त्रयेन्द्रतामाप महाबलिश्च तथा इन्द्रवत् यद्धस्तपङ्कजं सौगन्धिकस्य कह्लारस्य गन्ध इव गन्धोऽस्यास्तीति विहारे वनक्रीडायाम् अपानुदत् निराकरोत् ॥ १७ ॥

ननु किं तव बहुप्रलापेन यतस्त्वं कंसभृत्यः तत्प्रहितश्च अतस्त्वय्यप्रियबुद्धिं कुर्यादच्युत इति मन्दाशङ्कां परिहरन्निवाह । न मयीति । नापिसापि किं न पत्यवेत्याह । विश्वदृगिति । विश्वदृक्त्वान्मम मनोनैर्मल्यं विजानातीत्यर्थः । एतदेव विवृणोति । य इति चेतस एतदीहितं सङ्कल्पलक्षणं चेष्टितम् अन्तर्बहिश्च स्थितमिति व्याप्तिकथनमात्रेण चेतनस्य चेष्टितसाक्षित्वं सम्यङ्न विवृतं स्यादिति क्षेत्रज्ञ इत्युपादत्त "इदं शरीरं कौन्तेय ! क्षेत्रमित्यभिधीयते" इत्यादिना क्षेत्रज्ञशब्दार्थः सम्यग्विवृतः ॥ १८ ॥

दयार्द्रया दृशा मां सस्मितमीक्षते किम् ईक्षणफलमाह । सपदीति । ईक्षणानन्तरमपास्तकिल्बिषः सम्यङ्निराकृताशुभोऽत एव वीता विविधा शङ्का यस्य स वीतशङ्को ऽहमूर्जितामुद्रिक्तां मुदं वोढा प्राप्स्यामीत्यन्वयः ॥ १९ ॥

अथ यदा परिरम्भणे हेतुमाह । सुहृत्तममिति । अन्यदैवतमिष्टप्रदं यस्य नास्ति स तथा परिरम्भणात् किं फलमाप्तं भवतीति तत्राह आत्मेति । अतोऽस्मात् परिरम्भणात् आत्मा देहस्तीर्थीक्रियते शुद्धजलवत् क्रियते पात्रीक्रियते वा ज्ञानदानाय योग्यो भवतीत्यर्थः अन्येषां भगवद्भक्तौ बुद्ध्यवतारीक्रियते वा ज्ञानोपदेशाय वाधिक्रियते वा किमत इत्यत्राह । बन्धश्चेति । कामात्मकः विषयतृष्णालक्षणो बन्धः उच्छ्वसिति निर्वीर्यः छिन्नो भवतीत्यर्थः च उच्छेदेऽपि समुच्चये अतो देहहेतुको वा प्रवाहरूपेण सत्यो वा ॥ २० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

अथार्त्तिस्वभावेन चिन्तामतिभ्यामाह । न मयीति । परेषामपि पावनत्वात्तीर्थीक्रियते न केवलमेतावदेव । अपि तु अतो देहाद्धेतोरस्य वीक्षणादिना तेषां कर्मात्मकबन्धश्चोच्छ्वसिति न तस्येत्यत्र सिद्धान्तः परमात्मसन्दर्भे त्रिनवतितमवाक्यस्यावतारिकाप्रघट्टके दृश्यः देहं भृतां देहभृताम् ॥ १८–२२ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

एवमनिष्टनिवारकत्वेन चरणं संस्तूय इष्टदातृत्वेनापि स्तौति । समर्हणमिति । यत्र हस्ते समर्हणं निधाय देयं किञ्चित्समर्प्य कौशिकः इन्द्रः बलिश्च जगत्त्रयेन्द्रतामवाप अयमिन्द्रः पूर्वजन्मनि कौशिकगोत्रे उत्पन्नः बलिरिव भगवद्धस्ते सर्वं निवेदितवान् तस्य कथा काचित्प्रसिद्धा भविष्यति बलेस्तु प्रसिद्धैव अवापेति प्रवाहनित्यत्वात् पूर्वमपि बलिरैन्द्रं पदं प्राप्तवानिति "छन्दसि लुङ्लङ्लिट" इति भविष्यदर्थे वा लिट् एवं प्रभुत्वेन अनिष्टनिवारकत्वमिष्टदातृत्वं चोक्त्वा मित्रवदपि कार्यं करोतीत्याह । यद्वा विहार इति । व्रजयोषितां सम्बन्धिनि विहारे तासां श्रमं सौगन्धिकगन्धि सौगन्धिकपुष्पवत् गन्धयुक्तं श्रमजलमपानुदत् वायुना हि श्रमो गच्छति त्रिगुणेन तद्धस्तेनापि गतमिति सूचयितुं श्रमजलसम्बन्धः मान्द्यञ्च सिद्धमिति सौरभ्यार्थं तथोक्तवान् अनेन नित्यं स भगवच्चरित्रानुसन्धानं करोतीति सूचितं वेति बह्वर्थसूचनार्थम् अनेन सर्वेषामेव धर्मान् करोतीति सर्वफलदातृत्वं सूचितम् ॥ १७ ॥

ननु शत्रुरेव भवान् शत्रुकार्यं च साधयतीति केश्यादेरिव तवापि वधमेव करिष्यति न तु प्रसादमित्याशङ्क्याह । न मय्युपैष्यतीति । मयि अरिबुद्धिं नोपैष्यति शत्रुरयमिति नाङ्गीकरिष्यति तत्र हेतुरच्युत इति अच्युतत्वात् तस्य न कुतश्चिद्भयम् अतः स्वापकारकत्वेन न कोऽपि भगवतः अरिः दैत्यानां मारणन्तु तेषां लोकानां चोपकाराय यद्यप्यहं कंसस्य दूतः तेनैव प्रेषितः मां प्रति यावदुक्तं तावच्च करिष्यामि ततो लोकदृष्ट्या अरिबुद्धिः कर्त्तव्या तथाप्यच्युतत्वान्न करिष्यति मारणनिमित्तं तु मयि नास्तीति भावः । किञ्च विश्वदृक् व्याजेन अपकारार्थं प्रवृत्त इति ममैव हितार्थं वधं कुर्यात् तद्भगवति व्याजो न सम्भवति यतो विश्वमेव पश्यति इदञ्च ज्ञायत इति न व्याजञ्च करिष्यामि नाप्यतिक्रमम् अस्मिन्नर्थे प्रमाणमाह । योऽन्तर्बहिरिति चेतसोऽन्तर्बहिश्च ईहितं भगवानीक्षते कदाचिदपि चित्तवृत्तिरेतादृशी भवेत् तदा

श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी ।

मारणमेवोचितमन्यथा तु न मारयिष्यति किंच एतदपि चित्तोहितं विश्वासरूपं भगवान् जानाति स्वरूपे स्थित एव जानाति प्रकारान्तरेणापि जानातीत्याह । क्षेत्रज्ञ इति । सर्वं क्षेत्रं जानातीति शरीरं क्षेत्रं "महाभूतान्यहङ्कार" इत्यादिना निरूपितं सविकारं क्षेत्रदर्शनेऽपि विशेषमाह अमलेन चक्षुषेति चक्षुषः चक्षुषा तदात्ममेव भवति अमलं चक्षुर्वस्तुयाथात्म्यमेव गृह्णाति अतः सर्वमेव भगवतः प्रत्यक्षमिति मद्वृत्तान्तं जानातीति न मय्यरिबुद्धिः चित्तस्य बहिः कार्यमान्तरमिच्छाज्ञानञ्च इच्छामध्य इति केचित् एवं सति चित्तस्य चिदानन्दसद्रूपता भवति ॥ १८ ॥

ननु तथापि संसर्गदोषात् अन्नादिदोषाच्च त्वां नाङ्गीकरिष्यतीत्याशङ्क्य तत्परिहरन्मनोरथमाह । अप्यङ्घ्रिमूलेऽवहितमिति । पूर्वपुण्यवशात् अहं पादयोः पतिष्यामि ततः अपराधे गते मयि दया उत्पत्स्यते नष्टो जायत इति तदा दयादृष्ट्या सपद्येवापध्वस्तसमस्तकिल्बिषो भूत्वा मुदं परमानन्दं वोढा वहिष्यामि वीतविशङ्कश्च ततः प्रभृति भविष्यामि ऊर्जितश्च चरणमूले पतितोऽवश्यं दृश्यते अन्यथाग्रे गमनं न भवेत् कदाचित्राक्रम्योल्लङ्घ्य वा अन्यचित्तो गच्छेदित्याशङ्क्याह । अवहितमिति । अहं सावधान आत्मानं ज्ञापयिष्यामि प्रपन्नोऽहमिति नान्यथा बुद्धिर्भविष्यतीत्येतदर्थमाह । कृताञ्जलिमिति । अत एव मामीक्षिता अवश्यं द्रक्ष्यति तत्र प्रमाणमाह । असाविति । इदानीमेव प्रत्यक्षो जातः तदा किंवक्तव्यमिति मम प्रवृत्तिं पूर्ववैरात्म्यञ्च स्मृत्वा सस्मितोऽपि भविष्यति ततः प्रवृत्तिं ज्ञात्वा आर्द्रापि दृष्टिर्भविष्यति एवम्भगवतः दृष्टिमन्दहासस्नेहेषु जातेषु देशकालकर्मापेक्षाया निवृत्तत्वात् सपद्येव गतपापो भविष्यामि वासनापि गमिष्यति मां परित्यज्य अधस्तादेव पतिष्यति भगवता ममैतावानुपकारः कृत इति फलासिद्ध्या निरन्तरं सन्तोषं च प्राप्स्यामि पूर्वं यावानपराधः कृतः तावानग्रे न भविष्यतीति पूर्वस्य चेद्भगवान् निवारको जातः अग्रे कः सन्देहो भविष्यतीति वीतशङ्कः शङ्कैव न भविष्यति ततो भगवदीयकार्येषु वा ऊर्जितः समर्थश्च भविष्यामि एतस्य सर्वस्य सर्वस्यापि मूलं दर्शनमेव ॥ १९ ॥

ततो मनोरथान्तरमाह । सुहृत्तममिति । भगवान् बृहद्भ्यां दोर्भ्यां मां परिरप्स्यते किं तथा चेदात्मा मे देहः तीर्थीक्रियते अतीर्थभूतमपि तीर्थं भविष्यति लोकानामप्युद्धारं करिष्यति किम्पुनर्ममेति आलिङ्गनं त्रयाणां भवति अन्तःकरणसम्बन्धिनां देहसंबन्धिनां शाश्वतो भक्तानाञ्च अहन्तु त्रिरूपोऽपीति ममालिङ्गनं करिष्यत्येव सुहृत्तमोऽति स्निग्धः ज्ञातिर्गोत्रजः न विद्यते अन्यत् दैवतं यस्य सुहृत्तमत्वं लोके सन्दिग्धमपि स्वानुभवान्निर्णीतमिति सिद्धवत्कारेणोक्तं हेतुत्रयं बाधाभावाय आवश्यकत्वाय कार्याय च देहे आत्मपदप्रयोगः भगवत्स्पर्शात् स्पर्शो वा तस्योत्तमत्वख्यापनाय युक्तश्चायमर्थः सर्वाङ्गे चरणो हीनः तत्र चेद्गङ्गादितीर्थान्युत्पद्यन्ते तत उत्तमाङ्गेषु ततोऽपि बहून्येव तीर्थानि निर्गच्छन्तीति परिरम्भणानन्तरं निर्गतो देहः गङ्गाद्यपेक्षयापि महानेव भवति तदैवास्यग्रेणैव संबन्धः तदैव जातो ऽग्रेऽप्यनुवर्त्तत इति तदैव कर्मात्म-

कश्च बन्ध उच्छ्वसिति विदीर्णो भवति अनेन स्वपरोपकार उक्तः अतोऽस्मात् शरीरात् मत्तो हेतोर्वा ॥ २० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

यत्र हस्तपङ्कजे सम्यक् अर्ह्यते पूज्यते येन तत् समर्हणं दानसङ्कल्पोदकं निधाय कौशिकः पुरन्दरः बलिश्च जगत्त्रयेन्द्रत्वमवाप तच्च सार्वभौमावतारे पुरन्दरेण वामनावतारे बलिना तस्य हस्ते उदकं दत्तं तत्र पुरन्दरं इन्द्रत्वमाप बलिराप्स्यतीति बोद्धव्यम् यत् हस्तपङ्कजं वाशब्दो वितर्के विहारे रासक्रीडानन्तरसम्प्रयोगे श्रमं विहारश्रमोत्थप्रस्वेदाम्बु अपानुदत् मार्जयामास यदुक्तं "तासां रतिविहारेण श्रान्तानां वदनानि सः प्रामृजत् करुणः प्रेम्णा सन्तमेनाङ्गपाणिने"ति तेन तस्य पादपङ्कजं ब्रह्माद्यर्चितमपि यथा तासां कुचोच्छिष्टकुङ्कुमधारकमुक्तं तथा हस्तपङ्कजमपीन्द्राद्यार्हितं तासां श्रमाम्बुमार्जकमित्यहो तासां परमोत्कर्षमाधुरी ध्वनिः पङ्कजमपि कीदृशं स्पर्शेन तासां मुखस्पर्शेन सौगन्धिकगन्धि मानसरोवरकमलं सौगन्धिकमिति पुराणप्रसिद्धं स्वगतोक्तत्वात् पूर्ववदत्रापि न रसाभासः ॥ १७ ॥

तदपि स्वस्मिन्ननुग्रहासम्भवमाशङ्क्य परिहरति । नेति । यद्यप्यहं कंसस्य दूतः प्रहितस्तेन प्रेषतोऽपि भवामि अरिबुद्धिम् अरेरयमिति भावनां न उपैष्यति न करिष्यतीत्यर्थः । यतो विश्वदृक् चेतसोऽन्तर्वहिर्वर्त्तमानः एतदीहितं एतस्य सर्वजगतोऽपीहितं ईक्षते ॥ १८ ॥

अपि किम् अङ्घ्रिमूले अवहितं प्रणम्य संयतन्तं मां कृपामृतेनार्द्रया दृशा ईक्षिता ईक्षिष्यते सपदि तत्क्षणादेव ऊर्जितां मुदं वोढा प्राप्स्यामि तदैव वीतविशङ्कश्च मदन्तःकरणं प्रभुर्जानातिस्मेति निश्चेष्यामीत्यर्थः ॥ १९ ॥

परिरप्स्यते आलिङ्गिष्यति तत्र हेतुः सुहृत्तमं न केवलं सौहार्दातिशय एव किन्तु ज्ञातिं ज्ञातित्वेऽपि सत्यनन्यदैवतम् ऐकान्तिकदास्यवन्तं ततश्च तेन मे आत्मा अयं देहः तीर्थीक्रियते तीर्थं करिष्यते देहः पूतो भूत्वाऽन्येषामपि पावनो भविष्यतीत्यर्थः । अतस्तत्परिरम्भादेव हेतोर्बन्धश्च उच्छ्वसिति उद्ग्रथितो भविष्यतीत्यर्थः ॥ २० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

कौशिकः इन्द्रः बलिश्च बुभुक्षुः यत्र यस्मिन् पङ्कजे समर्हणं निधाय जगत्त्रयेन्द्रताम् । लोकत्रयाधिपत्यमवाप । वासमुच्चये सौगन्धिकस्य पद्मजातिविशेषस्य गन्ध इव गन्धो यस्य तत्सौगन्धिकगन्धि तत् हस्तपङ्कजं विहारे रासक्रीडायां व्रजयोषितां श्रमं स्पर्शेन अपानुदत् ॥ १७ ॥

अपि यद्यपि अहं कंसेन प्रहितः अतः कंसस्य दूतोऽपि तथापि मयि अरिबुद्धिमच्युतो न उपैष्यति करिष्यति । तत्र हेतुं दर्शयितुमच्युतं विशिनष्टि । विश्वास्मिन् दृक् दृष्टिर्यस्य सः एतदेव प्रपञ्चयति यतः क्षेत्राणि व्यष्टिसमष्टिरूपाणि शरीराणि जानातीति क्षेत्रज्ञः चेतसोऽन्तर्बहिश्च यच्चेष्टितमेतदमलः

लब्धाङ्गसङ्गं प्रणतं कृताञ्जलिं मां वक्ष्यतेऽक्रूर! ततेत्युरुश्रवाः ।
तदा वयं जन्मभृतो महीयसा नैवादृतो यो धिगमुष्य जन्म तत् ॥ २१ ॥
न तस्य कश्चिद्दयितः सुहृत्तमो न चाप्रियो द्वेष्य उपेक्ष्य एव वा ।
तथापि भक्तान् भजते यथा तथा सुरद्रुमो यद्वदुपाश्रितोऽर्थदः ॥ २२ ॥
किंचाग्रजो माऽवनतं यदूत्तमः स्मयन् परिष्वज्य गृहीतमञ्जलौ ।
गृहं प्रवेश्याप्तसमस्तसत्कृतं सम्प्रक्ष्यते कंसकृतं स्वबन्धुषु ॥ २३ ॥

श्रीशुक उवाच ।

इति संचिन्तयन् कृष्णं श्वफल्कतनयोऽध्वनि ।
रथेन गोकुलं प्राप्तः सूर्यश्चास्तगिरिं नृप ! ॥ २४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

चक्षुषा ईक्षते । कंसेन प्रेषितमपि मां स्वानन्यभक्तं जानात्येवेति फलितोऽर्थः ॥ १८ ॥

अपीति सम्भावनायाम् । अङ्घ्रिमूले अवहितम् अङ्घ्र्योर्मूले तन्मध्यवर्तिभूप्रदेशे उत्तमाङ्गं निवेश्य दण्डवत्पतितम् । आर्द्रया कृपामृतवर्षिण्या दृशा सस्मितं यथा भवति तथा ईक्षिता द्रक्ष्यति तदा सपद्येवापध्वस्तानि समस्तानि किल्बिषाणि पापानि यस्य सः तथाभूतः । वीतविशङ्कः । विगतविविधसंशयः सन् ऊर्जितां प्रभूततरां मुदं वोढा प्राप्स्यामि ॥ १९ ॥

अथानन्तरं न विद्यते कृष्णादन्यद्दैवतं यस्य तं मां परिरप्स्यते आलिङ्गिष्यति यदा तदा मे आत्मा देहस्तीर्थी क्रियते अतिपवित्रीकरिष्यते अतः कर्मात्मको मे बन्धश्चोच्छ्वसिति शिथिलीभविष्यति ॥ २० ॥

भाषा टीका ।

जिस हस्तकमल में कुछ भेटजल देकर इन्द्र ने तथा बलि राजा ने तीनों लोक को प्राप्त होगये हैं जिस हस्त ने अत्यंत सुगंधि वाला होने से ब्रज स्त्रियों के रास विहार में स्पर्श करने से उनके परिश्रम को दूर कर दिया है ॥ १७ ॥

यद्यपि मैं कंस का दूत हूं मेरे को उसने भेजा है तौ भी जो भगवान् विश्व के द्रष्टा सर्वज्ञ हैं क्षेत्रज्ञ हैं तौ भी मेरे चित्त के बाहिर भीतर कि चिन्ता को निर्मल ज्ञान रूप नेत्र से देखते हैं वे भगवान् मेरे पर शत्रु बुद्धि को नहिं धारण करेंगे ॥ १८ ॥

और भी चरण समीप में खडे हुये हाथ जोडे मेरे को जब भगवान् मंद हास युक्त शीतल दृष्टि से देखेंगे तब शीघ्र ही मेरे सब पाप नष्ट होजावेंगे तब सब शंका से रहित होजाऊंगा फिर मैं बडे आनंद को प्राप्त होजाऊंगा ॥ १९ ॥

मेरे को उत्तम सुहृत् ज्ञाति अनन्य भक्त जान कर बडे भारी भुजा ओंसे जब भगवान् आलिंगन करेंगे तब ही मेरा आत्मा शरीर पवित्र हो जावेगा कर्मरूपी बन्ध भी मेरे शरीर में से दूर चला जायगा ॥ २० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तत ओस्तातेति तदा जन्मभृतः सफलजन्मानः अन्यथा तज्जन्मैव न भवतीत्याह । महीयसेति । महीयसा श्रीकृष्णेन यो नादृतोऽमुष्य तस्य जन्तोस्तज्जन्म धिक् ॥ २१ ॥

ननु सुहृदादिषु परिष्वङ्गसम्प्रश्नादयो जीवधर्माः कथमीश्वरे सङ्गच्छन्तेऽत आह । न तस्येति । दयितः प्रियस्तद्विपरीतोऽप्रियः सुहृत्तमो हिततमस्तद्विपरीतो द्वेष्य एतत्सर्वव्यतिरिक्त उपेक्ष्य इति दयिताद्यो न सन्तीति सत्यं तथापि भक्तान् भजते तत्र यथा ये भक्तास्तथा भजते "ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम्" इति भगवद्वचनात् अविषमत्वेऽपि भक्तेभ्य एव फलं ददातीत्यत्र दृष्टान्तः यद्वत्सुरद्रुम इति ॥ २२ ॥

यो मयाञ्जलिः करिष्यते तस्मिन्नेवाञ्जलौ गृहीतं माम् आप्तानि समस्तान्यर्घादिसत्कृतानि येन तं माम् ॥ २३ ॥

स तु मार्गमपि न वेद तथापि रथेन प्राप्त इति ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

पुनरप्यतृष्त्या मनोरथान्तरं करोति । लब्धेति । प्रणतमिति । अङ्गसङ्गलब्ध्या हर्षेण पुनः कृतप्रणाममित्यर्थः । किञ्च । कृताञ्जलिं तद्भुवत्वं प्रेमवैकल्येन वक्ष्यते यदा किमिति तथा वक्ष्यति परमकृपालुत्वादित्याह । उरु महत् श्रवः कीर्त्तिर्निरुपाधि कृपाकरत्वादिलक्षणा यस्य सः । तदा वयं जन्मभृत इत्यनेनास्य मनोरथस्य सर्वतो महत्त्वमभिप्रेतं प्रेमभाषणेनैव परमानन्दसिद्धेः । एवं कृतानन्तु मनोरथानामुत्तरोत्तरं श्रेष्ठ्यं महीयसा श्रीभगवता नादृतः सम्भाषणादिना न सम्मानितः एवकारेण कदाचित् सुखं कदाप्यादरेण सफलजन्मता सूच्यते । अमुष्येति परोक्षोक्तिस्तादृशस्य तद्दूरवर्त्तित्वाभिप्रायेण तन्महत्तमानादृतम् अमुष्येत्युक्तेऽपि तदित्युक्तिस्तादृशत्वाद्यबोधनार्था । यद्वा । परमापकृष्ट॰

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

स्वेनानिर्वचनीयमित्यर्थः । यद्वा साजात्यादिनोत्कृष्टमपि । अन्यत्तैः । तत्र जन्तोरिति महत्तमानादृततया अशेषगुणहीनताभिप्रायेणेति अथवा महीयसा कृपादिगुणमहत्तमेन तत्सेवकेन केनचिदपि किं पुनस्तेन सर्वकृपालुगुणमूर्द्धन्यमणिनेत्यर्थः । अन्यत् समानम् ॥२१॥

न तस्यैति । तैर्व्याख्यातं तत्र कथमीश्वर इत्याप्तकामत्वादिना प्रियाद्यभावादिति भावः प्रियः सगुणेन प्रीतिविषयः तद्विपरीतः स्वदोषेणाप्रीतिविषयः परगुणदोषयोरावेशाभावात्तौ द्वौ न हित उपकारतः प्रत्युपकारविषयः तद्विपरीतस्त्वपकारतो द्वेषविषयः तस्मिन्नपकारादिनिमित्तासम्भवात्तौ च न सर्वस्य तदेकात्मकत्वात् उपेक्ष्योऽपि न इति सत्यमिति नञ्द्वयान्वयायाह मूले चकारः सुहृत्तमादित्रयेऽप्यन्वितः पुनर्नकारः पूर्वनिषिद्धविरोधित्वात् प्राप्तस्य प्रियादित्रयस्य निषेधनिर्द्धारणार्थः एवकारस्तु भक्ता-दित्वेनान्वितः भक्तेभ्य एवेति व्याख्यास्यमानत्वात् अत्रानुप-युक्तत्वाच्च वाशब्दस्तद्गुणद्वयव्यतिरिक्तस्योपेक्ष्यस्यापि समु-च्चये तथाहि तस्य कश्चिदेकोऽपि दयितः सुहृत्तमश्च न नैवा-प्रियश्च द्वेष्यश्च उपेक्ष्यो नाम यः स च नेत्यर्थः यद्यप्येवं प्रीत्या-दिविषयो न तथापि भक्तानेव भजते यद्यपि चाप्रीत्यादिविषयो न तथाप्यभक्तान् भजत इत्यर्थः । तत्र च यथा यादृशभावनादिना ये भक्तास्तांस्तथा तादृशप्रादुर्भावादिनेति वशताप्रातिरप्यभि-प्रेता तदुक्तं श्रीवैकुण्ठदेवेन "अहं भक्तपराधीनो ह्यस्वतन्त्र इव द्विज । साधुभिर्ग्रस्तहृदयो भक्तैर्भक्तजनप्रिय" इति भक्तिसम्बन्धे-नैवेति कृपोदयो भवति कृपया च वशीभूय सुहृत्तमामित्यादि-पूर्वोक्तसुहृत्तमत्वज्ञातित्वपरिरम्भित्वादिकमपि प्राप्नोति न मत्यु-पेक्ष्यतीत्यादिपूर्वोक्तभक्तविद्वेषित्वेष्टृत्वमपीति सिद्धान्तः तथोक्तं श्रीमद्भगवद्गीतास्वेव "समोऽहं सर्वभूतेषु न मे द्वेष्योऽस्ति न प्रियः । ये भजन्ति तु मां भक्त्या मयि ते तेषु चाप्यहम्" मिति तत्रत्यं मयि त इत्यादिकं श्रीवैकुण्ठदेवेन विवृतम् "साधवो हृदयं मह्यं साधूनां हृदयन्त्वहम् । मदन्यत्ते न जानन्ति नाहं तेभ्यो मनाग-पी"ति ईश्वरस्य सतो भक्तकृपासद्भावे तु दोषः पूर्वमेव दर्शितः एवमेव च वैषम्यनैर्घृण्ये परिहृते स्यातां प्राकृतगुणदोषैस्त-च्चित्तास्पर्शात् भक्त्या तत्तत्स्पर्शादिति विशेषविचारस्तु श्रीभाग-वतसन्दर्भस्य परमात्मसन्दर्भे ज्ञेयः दृष्टान्तोऽपि तथा तस्मात् पश्यन्ति पादपास्तस्मात् शृण्वन्ति पादपा इति भारतीयन्यायेन कल्पवृक्षे तु देवत्वांशसद्भावेन सुतरां सज्ञानत्वे बुद्धिपूर्वक-प्रवृत्तेः अबुद्धिपूर्वकत्वे तु पूर्वप्रकरणप्राप्तपरिष्वङ्गादिद्वारकतत्-कृपालुताभिप्रायासिद्धिः स्यात् कल्पवृक्षेणापि तत्कृपैकप्रार्थके-भ्यस्तद्वरोऽपि देय इति सर्वं समञ्जसम् ॥ २२ ॥

अतः श्रीवासुदेवादिपरमभक्तसम्बन्धेन मय्यपि सुहृत्तमादि-भावं श्रीकृष्णः करिष्यत्येव इति सम्भाव्य लब्धाश्वासो मनोरथा-न्तरं कुरुते किं वेति किमिति सम्भावनायां वा समुच्चये अग्र-जश्च किमित्यर्थः । यदूत्तम इति । सुहृत्तमत्वं ज्ञातिवदभिप्रायः अञ्जलावेव ग्रहणञ्च सङ्कोचेनैव कृते तस्मिन्निति भावः । अग्रज इति स्वयमञ्जलिग्रहेण गृहप्रवेशेनादौ हेतुः स्मयन् स्मयगान इति मनःप्रसादापेक्षयोक्तम् अतएवातिथ्येनासमस्तसत्कृतमिति तत्परिणामापेक्षया अस्य बन्धुषु श्रीवसुदेवादिषु कंसस्य कृतं चेष्टितमिति तस्यापि विशेषापेक्षया तथा सति तेनानुकूलीकृतं श्रीकृष्णमिति आनेतुं शक्ष्यामीति चाभिप्रेतम् ॥ २३ ॥

रथेनेति तैर्व्याख्यातम् अतएवानतिदूरेऽप्यध्वनि विलम्बो जातः रथमारुह्यैव श्रीभगवत्समीपपर्यन्तगमनं सूर्यश्चास्तगिरिं प्राप्त इति सहोपमा सा चास्तगिरिणा सूर्यस्येव गोकुलमहसा तस्यावृतत्वं व्यनक्ति ॥ २४ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

तत तातेत्यर्थः । "तत कस्मै मां दास्यती" ति श्रुतिनिर्देशः यदा वक्ष्यते तदा परं जन्मभृतः सफलजन्मानः । महीयसा कृष्णेन यो नादृतः अमुष्य जन्म धिक् ॥ २१ ॥ २२ ॥

संप्रक्ष्यते संप्रश्नं करिष्यतीति ॥ २३ ॥—॥ २६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

किञ्चोरुश्रवाः कृष्णः लब्धोऽङ्गसङ्गः परिरम्भो येन तं प्रणतं बद्धाञ्जलिञ्च मां हे अक्रूर ! हे तत तातेति च वक्ष्यति सम्बोधयति तदा वयं जन्मभृतः सफलजन्मानः भविष्यामः यस्तु पुमान् मही-यसा भगवता नैवादृतः आदृतो न भवति अमुष्यानादृतस्य तज्जन्म धिक् निन्द्यमित्यर्थः ॥ २१ ॥

पुनरपि सुहृत्तमत्वज्ञातित्वादिप्रयुक्तपरिरम्भादेरसम्भवमाश-ङ्कयानन्यदैवतत्वप्रयुक्तस्य तस्य सम्भवमाह न तस्येति । यद्यपि सर्व-समस्य तस्य न दयितादयः सन्ति न विषमा बुद्धिरस्तीत्यर्थः । तथापि यथा भक्ता आत्मानं भजन्ते तथा भक्तान् भजत एव "ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम् । प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रिय" इति तदुक्तेरिति भावः । अवैषम्येऽपि भक्तानेवानुभजत इत्यत्र दृष्टान्तः सुरद्रुमः कल्पतरुः यद्वत् यथा उपाश्रितानां भक्तानां भजतामेवार्थदः कामदस्तद्वत् नह्येतावता तस्य वैषम्यमस्तीति भावः ॥ २२ ॥

किञ्च यदूत्तमः अग्रजो रामः अवनतं प्रणतं मां स्मयन् परि-ष्वज्य यो मयाञ्जलिः क्रियते तस्मिन्नेव गृहीतं मां गृहं प्रवेश्य आत्तानि लब्धानि समस्तानि सत्कृतान्यर्घादीनि येन तं मां प्रति स्वबन्धुषु विषयभूतेषु कंसकृतं द्रोहं सम्प्रक्ष्यते प्रक्ष्यति प्रच्छ ज्ञीप्सायां वाचि ॥ २३ ॥

इत्थं श्वफल्कतनयोऽक्रूरः पथि कृष्णमेवानुचिन्तयन् रथेन गम-नसाधनेन गोकुलं प्राप्तः हे नृप ! सूर्यश्चास्तगिरिं प्राप्तः अस्तमितो बभूव यद्यपि गोकुलमधुपुर्योरन्तरा क्रोशत्रयमेवाक्रूरस्तु प्रभा-तसमय एव रथारूढो मधुपुर्याः प्रतस्थे तथापि कृष्णानुचिन्तया परवशस्तत्र तत्र विलम्बयन् सायन्तनवेलायां गोकुलं प्राप्त इति भावः ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

भगवत ईक्षणसमये इदमित्याशयेन वक्ति । लब्धाङ्गसङ्गमिति । उरुश्रवाः पूर्णकीर्तिः व्यासश्रवणशक्तिमान्वा हे अक्रूर ! हे तात वत्सेति सम्बोधयति च यदि जन्मभृतः जन्मनः साफल्यं प्राप्ताः

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

बाधकमाह । महीयसेति । महत्तमेन भगवता यो नाद्दतः वागादिना सादरमर्चितो न भवति अमुष्य पुंसो यज्जन्म तत् धिक् निन्दामि पुनिष्फलत्वात् ॥ २१ ॥

अयं श्रीकृष्णः क्षीराब्धिशाय्येव नान्य इति तस्य लक्षणमाह । नेति । "वनस्पतिर्वृक्षमात्रे कल्पादौ पुष्पवर्जिते" इत्युत्पलमाला यथा यथा स्वस्वयोग्यफलदानेन ॥ २२ ॥

इदानीं बलभद्रमुद्दिश्याक्रूरचिन्तां वक्ति । किंचेति गृहीतसंचितो गृहीतपशुपादबन्धनरज्जौ यदूत्तमो ऽग्रजोऽवनतं मानयन् स्मयन् रामः मम स्वबन्धुषु वसुदेवादिषु कंसकृतं कर्म सम्प्रेक्ष्यते विचारयिष्यति किंचित्तत्वयः पादबन्धनपाशन्तु पशूनां सञ्चितिं विदु"रिति वररुचिः गृहीतमालन अग्रजे इति पाठे सुगमः पन्थाः यद्वा यदूत्तमः गृहीतानां फलदानाय शुभानां सञ्चितिः सङ्ग्रही येन स तथा तस्मिन्सति स्मयन्मन्दस्मितं कुर्वन् कृष्णः मां सम्प्रेक्ष्यत इति कृष्णविषयो वा ॥ २३—२४ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

एवं मनः शरीरसंबन्धौ प्रार्थयित्वा वाचनिकं प्रार्थयति लब्धाङ्गसङ्गमिति पूर्वधर्माणामनुवृत्त्यर्थमनुवादः अन्यथा विकल्पो भवेत् लब्धः अङ्गसङ्गो येन एतावता गता भवेदित्यत आह । प्रणतमिति । पूर्वधर्मश्चायं ततः कृताञ्जलिः पुनर्विज्ञापकः तदा हे अक्रूर ! हे तातेति मां वक्ष्यति किं तान्नो संबोधने महत्त्वव्यापकं पितृतुल्यत्वेन बन्धुत्वं स्नेहित्वञ्च व्यापयति इति शब्दः प्रकारवाची एवं संबोधने फलमाह । तदा वयं जन्मभृत इति स्वभावतः कुलतश्च अन्यथा महत्त उत्पत्तिस्ताद्दशे कुले चोत्पत्तिर्व्यर्था स्यात् ननु भगवान् किमित्येवं प्रतिष्ठां दद्यात् तत्राह । उरुश्रवा इति । यस्य गृहे यदधिकं भवेत् तदेवान्यस्मै च दद्यात् उरु अधिकं श्रवो यस्येति ननु स्वभावतो महान् भगवता चेन्नाङ्गीकृतः तदा किं स्यादित्याशङ्क्याह । महीयसा योऽनादृतः अमुष्य जन्म धिगिति सर्वदा आक्रूराभावेऽपि कदाचिदन्यादृतो ऽपेक्ष्यते तदभावे जन्मवैयर्थ्यमेव तेन जन्मना लौकिकमपि कार्यं न भवतीति ज्ञापनार्थं धिगित्युक्तम् ॥ २१ ॥

ननु पुरुषोत्तमो भगवान् त्वमत्यन्तं हीनः कथमेवं तवादरं करिष्यति यस्य बन्धुत्वादि तु नापेक्ष्यत एवेति चेत् सत्यं तथापि मन्मनोरथः सेत्स्यतीत्याह । न तस्येति । वस्तुतो भगवान् सर्वेषामेव स्वरूपमन्तरान्यथा भावेन पश्च भगवता सह व्यवधानानीति लोके जीवानां परस्परं पश्च संबन्धा भवन्ति बुद्धिस्त्रिविधा अपेक्षेपेक्षाद्वेषभेदात् अपेक्षा द्विविधा देहसम्बन्धा मित्रभावाद्वा द्वेषश्च द्विविधः स्वस्य द्विष्टतया तत्कृतापकारेण वा तत्र दयितः देहसम्बन्धी स्निग्धः सुहृत्तमो मित्रं भगवान् सर्वस्य इति तद्व्यावृत्त्यर्थं तमप्प्रत्ययः अप्रियः स्वस्य द्वेषविषयः द्वेष्यः द्वेषहेतुः विपरीतं वा भगवांस्तु कस्यापि किमपि न भवति यतो देहधर्मा एवैते तथा च लौकिकन्यायेन पुरस्कारः अपकारो वा न भवति इष्टान्तार्थं द्वितीयमुक्तं तथापि भक्तिशास्त्रात् तथा करिष्यतीत्याह । तथापीति । अन्यथा "ये यथा मां प्रपद्यन्त" इति प्रतिज्ञा विरुद्धा स्यात् तेऽपि भगवन्तं भजन्त इति भक्तान् भजते यथा भक्तास्तथा नन्वेवं सत्यनर्थ एव स्यात् प्रयोजनाभावश्च भक्तो नमस्करोति पादसंवाहनञ्च करोति तथाचेत् कुर्यात् जीवानां कार्यमेव नश्येत् तुलसी हि समर्प्यते भगवते भगवान् पित्रेव तुलसीमेव दद्यात् किं स्यादित्याशङ्क्याह । सुरद्रुमो यद्वदिति । भजनार्थमेव हि तथा करणं भगवांस्तु तदनुसार्यपेक्षितमेव फलं प्रयच्छति नापि तत्कृतं नापि स्वेच्छया यथा कल्पवृक्षः निकटे गत एव कार्यं साधयति अनेन सर्वात्मकत्वेऽपि भगवतः भक्तेभ्य एव दानमिति वैषम्यं परिहृतं नह्यपेक्षितं प्रयच्छन् कल्पवृक्षो विषमो भवति अन्यथा व्यवस्थितिर्न स्यादिति कर्मफलं तु तुच्छं तथा सति भगवत उत्कर्षोऽपि न स्यात् अत उपाश्रितायैव पुरुषार्थदः नत्वनुपाश्रितायेति सर्वं सुस्थम् ॥ २२ ॥

एवं भगवद्विषयकं कायवाङ्मनोरूपं मनोरथमुक्त्वा बलभद्रविषयकं मनोरथमाह । किंचेति । अग्रजो ज्येष्ठभ्राता अनेन मया सर्वोऽपि वृत्तान्तो ज्ञायत इति मयि कृपां करिष्यतीति भावः । तस्याप्यहमवनतः ज्येष्ठस्यापि कनिष्ठावनतौ उत्तमत्वं प्रयोजकमिति यदूत्तम इत्युक्तं स्मयन्निति सम्यक्त्वमागतः कंसं घातयितुमिति बन्धुत्वात् परिष्वज्य महत्त्वपूर्वकं मामञ्जलौ गृहीत्वा अतिनिकटत्वात् गृहं प्रवेश्य भोजयित्वा गृहगतमिव कृत्वा ततोऽप्यधिकं वा आप्ता समस्ता सत्कृतिर्येन ताद्दशं पश्चाद्विश्रान्तं स्वबन्धुषु कंसकृतं सम्प्रक्ष्यते किमिति लोके सिद्धमिति भगवान् महानिति मनोरथः ॥ २३ ॥

एवं मार्गे रथं स्थापयित्वा सन्ध्यापर्यन्तमनेकविधं मनोरथमेव कृतवान् तथापि भगवत्सम्मुखं प्रवृत्तौ सर्वे एवानुगुणा भवन्तीति रथ एव तं गोकुलं समानीतवान् तत्राह । इति कृष्णं संञ्चिन्तयन्नेवान्तः श्वफल्कतनयो महान् यथा तन्भेसवन्ते प्राप्तवान् तदा रथेन गोकुलमपि प्राप्तः भगवानानन्दरूप स्त्रीणामेवेति सन्ध्यावधिरात्राविति मनोरथसिध्यर्थं सूर्योऽप्यस्तङ्गत इत्याह । सूर्य इति । चकारात् सूर्योऽप्यनुगुणः सर्वप्रकारेण नृपेति संबोधनं मन्त्रणं गुप्ततैव कर्तव्यमिति ज्ञापनार्थम् अञ्जलिव्यावृत्त्यर्थं गिरिपदं श्वफल्को महानुभाव इति तत्रास्य निर्दिष्टस्तथात्वाय अन्यथा अनिष्टरूपो न गच्छेत् ॥ २४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

तदेति । हे तात ! इति तदा जन्मभृतः सफलजन्मानः अन्यथा जन्मनो वैयर्थ्यमित्याह । महीयसा महत्तमलोकेन ॥ २१ ॥

ननु तस्य परमेश्वरत्वात् सर्वत्र साम्यमेव सम्भवेत् एवञ्च त्वं स्वस्मिन् तत् सुहृत्तमत्वादिकं किं सम्भावयसीति तत्राह । न तस्येति । तथापि भक्तान् भजत इति । "समोऽहं सर्वभूतेषु न मे द्वेष्योऽस्ति न प्रियः । ये भजन्ति तु मां भक्त्या मयि ते तेषु चाप्यह"मिति तदुक्तेः तत्रापि यथा तथेति ये यथा भक्तास्तांस्तथा भजते "ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यह"मिति तद्वचनात् । यद्वत् सुरद्रुम इति । आश्रयणतारतम्येन फलदानतारतम्यम् अनाश्रितेभ्यः फलाप्रदानञ्च तदपि सुरद्रुमस्य यथा न वैषम्यं तथा तस्य भगवतोऽपि किञ्च सुरद्रुमस्याश्रिताधीनत्वं तथा नास्ति यथा भगवतो भक्ताधीनत्वम् अतो भक्तिसम्बन्धेन तस्य सौहार्दद्वेषापेक्षा अपि दृष्टा एव यथाम्बरीषादौ सौहार्दं तद्द्वेष्टृदुर्वासःप्रभृतौ द्वेषापेक्षे च दृष्टे एवेति ॥ २२ ॥

पदानि तस्याखिललोकपालकिरीटजुष्टामलपादरेणोः ।
ददर्श गोष्ठे क्षितिकौतुकानि विलक्षितान्यब्जयवाङ्कुशाद्यैः ॥ २५ ॥
तद्दर्शनाह्लादविवृद्धसम्भ्रमः प्रेम्णोर्ध्वरोमाश्रुकलाकुलेक्षणः ।
रथादवस्कन्द्य स तेष्वचेष्टत प्रभोरमून्यङ्घ्रिरजांस्यहो इति ॥ २६ ॥
देहं भृतामियानर्थो हित्वा दम्भं भियं शुचम् ।
संदेशाद्यो हरेर्लिङ्गदर्शनश्रवणादिभिः ॥ २७ ॥
ददर्श कृष्णं रामञ्च व्रजे गोदोहनं गतौ ।
पीतनीलाम्बरधरौ शरदम्बुरुहेक्षणौ ॥ २८ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

तस्याग्रजो बलदेवः मां मामञ्जलौ मत्कृताञ्जलौ स्वदक्षिणहस्तेन गृहीतं मामाकृष्य गृहमेकान्तसंलापार्थं प्रवेश्य सत्कृतं सत्कारः ॥ २३-२४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

हे अक्रूर ! हे तत हे ताततेति च वक्ष्यते यदा तदा वयं जन्मभृतः लब्धजन्मफलाः भविष्यामः यस्तु जनो महीयसा श्रीकृष्णेन नैवादृतः अमुष्य जनस्य जन्म धिक् अयुक्तमित्यर्थः ॥ २१ ॥

ननु तस्य सर्वेश्वरस्य कंस उपेक्ष्यो भवान् सुहृत्तमश्च कुतोऽत आह । नेति । तत्तत्कर्मानुसारेण निग्रहानुग्रहकर्तुस्तस्य भगवतः सर्वात्मनः सर्वसमस्य कश्चिदपि उपेक्ष्यो न तथा दयितः प्रियस्तद्विपरीतोऽप्रियश्च कश्चिदपि नास्ति न च सुहृत्तमो हितस्तद्विपरीतो द्वेष्यश्चास्ति तथापि भक्तान् भजते तत्र च यथा ये भक्तास्ते तथा भजते तदुक्तं श्रीमन्मुखेनैव "ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यह" मिति सर्वसमत्वेऽपि भक्तेभ्यस्तत्तद्भावानुसारेण फलं ददातीत्यत्र दृष्टान्तः यद्वत्सुरद्रुम उपाश्रितोऽर्थद इति ॥ २२ ॥

किञ्च अग्रजः कृष्णपूर्वजः रामः अवनतं नम्रं यो मयाञ्जलिः करिष्यते तस्मिन्नेव गृहीतं गृहं प्रवेश्य आप्तानि प्राप्तानि समस्तानि अर्घादिसत्कृतानि येन तं मां मां प्रति बन्धुषु कंसकृतं सम्प्रक्ष्यते ॥ २३ ॥

सफलकतनयः अक्रूरः ॥ २४ ॥

भाषा टीका ।

जब मेरे को भगवान् का अङ्ग सङ्ग होगा मैं फिर प्रणाम करूंगा हाथ जोड के खडा होंगा तब मेरे को भगवान् हे अक्रूर ! हे तात ऐसा कह कर बुलावेंगे तब मैं जन्मधारी हो ऊंगा बडे महात्मा ओंके आदर योग्य हो जाऊंगा जिस को भगवान् आदर नहीं करते हैं उस के जन्म को धिक्कार है ॥ २१ ॥

इन भगवान् के कोइ प्रिय नहीं है न सुहृद है न अप्रिय है न शत्रु है न उपेक्ष है तौभी भक्तों के मनोरथ को करते हैं जैसे कल्पवृक्ष उपासना से फलदेता है ॥ २२ ॥

और श्री बलदेव जी के सहित भगवान् मेरे को नम्र खडे देख कर के हसते हुये अंजलि सहित आलिंगन करके घर के भीतर लेजावेंगे फिर बन्धु का सत्कार करेंगे फिर बन्धु में कंस का कर्तव्य पूछेंगे ॥ २३ ॥

श्री शुकदेव जी बोले अक्रूर जी इस प्रकार से मन में मार्ग मे चिन्ता करते हुये रथपर बैठे हुये गोकुल मे पहुंचे हे राजन् इतने में सूर्य देव श्री अस्ताचल पर चले गये ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अखिलैर्लोकपालैः किरीटेषु जुष्टा अमलाः पादरेणवो यस्य तस्य क्षितिकौतुकानि क्षितेरलंकाररूपाणि ॥ २५ ॥

तद्दर्शनेन य आह्लादस्तेन विवृद्धः सम्भ्रमो यस्य सः प्रेम्णा ऊर्ध्वानि रोमाणि यस्य सः अश्रूणां कलाभिर्लेशैराकुले ईक्षणे यस्य सः अवस्कन्द्यावप्लुत्य तेषु पदेषु सोऽक्रूरः अचेष्टत व्यलुठत् अहो इति दुर्लभतां स्रावयन् ॥ २६ ॥

ननु किमर्थमेवं व्यलुठत् नास्ति प्रेमसंभ्रमे फलोद्देश इत्याह । देहं भृतामिति । देहभाजामेतावानेव पुरुषार्थः कंसस्य सन्देशादारभ्य हरेर्लिङ्गदर्शनश्रवणादिभिर्योऽयमक्रूरस्य वर्णित इति संदेश आद्यो यस्यार्थस्य स यावानक्रूरस्य जात इति वा ॥ २७ ॥

ततः कृष्णं रामं च ददर्श गावो दुह्यन्ते ऽस्मिन्निति गोदोहनं तत्स्थानं गतौ प्राप्तौ ॥ २८ ॥—॥ २९ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

गोष्ठे तत्समीपे ददर्श अचिरादेव श्रीभगवतो गोष्ठान्तःप्रवेशात् पदानां माहात्म्यमाह । अखिलेति । तत्र न तिष्ठति मनः संसारादिलक्षणो येभ्य इत्यमलत्वं किरीटजुष्टत्वे हेतुः ननु सायं पर्यासीनेन सायं गोधूलिकृतान्धकारे बहुलगोपगणपदावृतानि तस्य पदानि कथं दृष्टानि तत्राह । क्षितीति । क्षितेः कौतुकमुत्सवो येभ्यस्तानीति तथैव निजालङ्कारत्वेन सुव्यक्ततया रक्षणात्

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

तत्र च भक्तजनदृष्टौ स्वतः परिस्फुरणादिति भावः । ननु तस्यैव तानीति कथं विज्ञातं तत्राह । अब्जाद्यैर्विलक्षितानि विशेषेण निरूपितानि असाधारणानि वा ॥ २५ ॥

सम्भ्रम आवेग इति कर्त्तव्यतानुसन्धानाभावः अतएवाचेष्टत प्रेम्णेत्यस्य यथापेक्षं सर्वैरप्यन्वयः प्रभोः परमेश्वरस्यामूनि इमानि अन्यत्तैः तत्राहो इति प्रभोरित्यादिकस्य सर्वस्यैवोपलक्षणार्थमिति शब्दस्य सर्वान्वयित्वात् ॥ २६ ॥

अक्रूरस्य श्रीभगवत्पदेषु तथा विलुठनकथनेन भक्त्युद्रेकात्तं प्रशंसति देहं भृतां देहधारिणाम् अन्यथा देहधाणवैफल्यमिति भावः अन्यत्तैः किञ्च दम्भादिकं हित्वा योऽयं जात इति योजनिकयैवं गम्यते यथाक्रूरस्यात्र दम्भो नासीत् न मय्युपैष्यत्यरिबुद्धिमच्युत इत्यादि चिन्तनात् अथान्तःसुखान्तरतात्पर्यलक्षणो यदि दम्भो न स्यात् यथाच कंसप्रतापितो यो बन्धुगर्भस्तत्प्रतापयितव्यश्च यः तस्य तस्य हेतोर्निजकुलरक्षावतीर्णश्रीकृष्णपुरतो व्यञ्जनीयः शोको भीश्च तादृशावेशे हेतुर्नासीत् तद्दर्शनाह्लादेत्याद्युक्तेः प्रेमविभिन्नधैर्य इति तृतीयोक्तेश्च तथा यदि निजदुःखहानितात्पर्यं न स्यादिति लिङ्गमनुभवहेतुः भियं शुचमिति पाठो बहुत्र अथ गोकुलाभ्यन्तरे रथनयनार्थं पुनरारूढ इति ज्ञेयं रथात्तूर्णमवप्लुत्येति वक्ष्यमाणत्वात् ॥ २७ ॥

ददर्शेति षट्कं प्रथमतः श्रीकृष्णं ददर्श अक्रूरस्य भक्तिविशेषेण तस्य प्रभावविशेषेण च व्रजे गवामावासमध्ये कीदृशौ तौ गोदोहनस्थानं गतौ तत्रापि वत्सवर्गमध्ये ददर्शेति श्रीपराशरवैशम्पायनौ तथाच श्रीविष्णुपुराणे "स ददर्श तदा तत्र कृष्णमादोहने गवाम् । वत्समध्ये गतं फुल्लनीलोत्पलदलच्छवि"मिति श्रीहरिवंशे च "प्रविशन्नेव च द्वारि ददर्श दोहने गवाम् । वत्समध्ये स्थितं कृष्णं सवत्समिव गोवृष"मिति तत्र गोपैर्दुह्यमानाभिर्गोभिः समं वत्सानां संमेलनार्थं ज्ञेयं तावेव यथानिर्देशं वर्णयति । पीतेति सार्द्धपञ्चभिः तत्र दूरादेव वस्त्रदर्शनं तदेव तयोरात्मनि यः कृपावलोकस्तत्स्वभावेनान्तर्बहिरिन्द्रियाकर्षणात् तारातडिदादितोऽपि परमकान्तिकन्दलीतुन्दिलानां लोचनानामालोचनं तत्र तु रक्तिमादिना व्यक्तं व्यक्तीभूतस्य कैशोरस्यानुभवः अथ सर्वानुभवाय जातेन चापलेन प्रथमं वर्णनिर्वर्णनं ततो महाशोभोपलम्भः ततः पश्चाद्गवादिसम्भालनार्थं समुत्थापितयोर्भुजयोरवलोकनं ततः परमसुखेन तेन श्रीमुखाभिभालनं ततः किञ्चिन्निकटीभूय पश्यता तेन सर्वाङ्गसौन्दर्यपर्यालोलनं ततो बालौ किशोरावपि द्विरदविक्रमाविति महौजःसहोबलागमः ॥ २८-२९ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

देहभृतां देहिनां संदेशात् शास्त्रानुसारात् दर्शनश्रवणादिभिः शुद्धो भवतीति यत् स्यात् देहभृतामर्थः फलमियदित्यर्थः ॥ २७-३१ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

पदानीति । अखिलैर्लोकपालैः किरीटेषु जुष्टाः अमलाः पादरेणवो यस्य तस्य भगवतः सम्बन्धीनि चित्रेरलङ्काररूपाणि अब्जादिरेखाभिर्विलक्षितानि चिह्नितानि पदानि गोष्ठे ददर्श तेषां पदानां दर्शनेन य आह्लादस्तेन विवृद्धः सम्भ्रमो यस्य प्रेम्णोर्ध्वान्युदञ्चितानि रोमाणि यस्य अश्रूणां हर्षजानां कलाभिर्लेशैराकुले ईक्षणे यस्य सोऽक्रूरः रथादवप्लुत्य तेषु पदेषु अचेष्टत व्यलुठत् अहो प्रभोः कृष्णस्यामून्यङ्घ्र्यो रजांसि ब्रह्मादीनामपि दुर्लभानीति भावयन् अचेष्टतेत्यन्वयः ॥ २५—२६ ॥

नन्ववसादवद्धर्षोऽपि भक्तियोगविरोधी अतः किमित्येवमचेष्टतेत्यत्राह । देहभृतामिति । देहभाजामेतावानेव पुरुषार्थः कोऽसौ दम्भादींस्त्यक्त्वा हरेः सन्देशाद्वृत्तान्ताद्गुणानुकथनाल्लिङ्गानां विग्रहाणां चिन्हानाञ्च दर्शनश्रवणादिभिश्च योऽवस्थाविशेषः स एवेति प्रदर्शयितुमित्यर्थः । भक्तेः पराङ्काष्ठां दर्शयितुमचेष्टतेति भावः ॥ २७ ॥

ततो व्रजे कृष्णञ्च रामं च ददर्श कथम्भूतौ गावो दुह्यन्तेऽस्मिन्निति गोदोहनं तत्स्थानं गतौ प्राप्तौ श्यामलश्च श्वेतश्च तौ श्रियो लक्ष्म्याः शोभायाश्चाश्रयभूतौ बृहद्भुजौ पीनवर्त्तुलदीर्घभुजयुक्तौ शोभने प्रसन्ने मुखे ययोस्तौ बालद्विरदस्य कलभस्येव पदविन्यासौ ययोः ॥ २८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अखिललोकपालानां किरीटेषु सत्सु चूडामणिषु पादरेणवो यस्य स तथा तस्य क्षितिकौतुकानि भूमिमङ्गलकराणि पदानि पादतललाञ्छनानि अब्जादिभिर्विलक्षितानि लाञ्छितानि विवाहहस्तसूत्रे च मङ्गले कौतुकं विदुरिति च ॥ २५ ॥

संभ्रमः भक्त्युद्रेकनिमित्तव्यापारविशेषः उत्थानि रोमाणि यस्य स तथा रोमाञ्चितगात्रश्चायम् अश्रुकलयाकुलेक्षणश्च आकुले कलिले ईक्षणे यस्य स तथा अवस्कन्द्य अवरुह्य ॥ २६ ॥-॥ ७ ॥

गोदोहनं स्थानमिति शेषः गोदोहनक्रियां गताविति वा ॥ २८ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

अत्र मध्ये तस्य भक्त्यतिशयार्थं कायिकोऽपि व्यापारो वक्तव्य इति लोकप्रसिद्ध्यर्थं च निरूपयति । पदानीति त्रिभिः । हेतुक्रियाफलनिरूपकः यो भगवान् हृदये फलत्वेन भाव्यते तस्य पदानि भूमावुद्गतानि भगवदीयशरीरसम्पाद्करजोयुक्तानि दृष्टवान् तद्रजो ग्राह्यमिति वक्तुं तस्य रजसः ब्रह्मत्वाद्यपेक्षयापि महत्त्वमाह । अखिललोकपालकिरीटजुष्टामलपादरेणोरिति । अखिलाः सर्वे लोकपालाः सर्वेषामैश्वर्यं भगवदधीनमेवेति निरूपयितुं देवदैत्यादयः सर्व एव परिगृहीताः लोकपाला इति स्वरूपतोऽपि महत्त्वं महतां सेव्य एव महान् भवतीति किरीटजुष्टत्वेन धर्मार्थे तेषां प्रवृत्तिर्निवारिता धर्मार्थं यो नमस्करोति

श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी ।

स देहेनैव नमस्करोति सर्वाभरणभूषितस्तु ईश्वरमेव नमस्करोतीति मार्गरजोऽपि गच्छतां मुकुटसंबन्धि भवति तद्व्यावृत्त्यर्थं रजसोविशेषणममलमिति एतादृशश्चरणरेणुर्यस्येति भगवत्संबन्धादेव तस्य माहात्म्यं नतु मृगमदवत् स्वरूपतो रेणुर्महान् तादृशस्य पदानि ददर्श इति निधानप्राप्तिरिव सूचिता ननु कथं ज्ञातवानेतानि भगवत्पदानीति तत्राह । विलक्षितानीति । सुखसेव्यत्वाय फलदानाय चाब्जरेखा कीर्त्तिप्रकटनार्थं यवाकृतिः मनोगजनिवारणार्थमङ्कुशरेखा आदिशब्देन ध्वजादयोऽपि ननु भगवानेवं दुर्लभानि किमिति प्रकटितवानित्यत आह । क्षितिकौतुकानीति । क्षितौ कौतुकरूपाणि भूमौ रसप्रकटनार्थं कौतुकत्वेन प्रकटितवान् भूमिष्ठानां भजनसिध्यर्थं यत्राल्पस्थानेऽपि महाफलान्येवं प्रयच्छतीति ॥ २५ ॥

भक्तस्य दर्शने यदुचितं तत्कृतवानित्याह । तद्दर्शनेति । भगवदीयशरीरजनकास्ते रेणवस्तेषां दर्शने पूर्वस्थितदेहादीनां निवृत्तिर्वक्तव्या तत्र भक्तिरसस्तस्मिन्नाविष्टः स्वधर्मप्राकट्येन तद्धर्मान् दूरीकृतवान् तदाह । तेषां पदानां दर्शनेन यो जातो महाह्लादः तेन विवृद्धः सम्भ्रमो यस्य मानसो धर्मः व्याकुलता निरूपिता प्रेम्णा ऊर्ध्वानि रोमाणि यस्य दैहिको धर्मो निरूपितः अश्रुकलाभिराकुले ईक्षणे यस्येतीन्द्रियधर्मा निरूपिताः ततः पूर्वधर्म्माणां गतत्वात् सङ्घातस्तेषु पतित इत्याह । रथादवस्कन्द्येति । अवस्कन्दनमचेतनानां तथा स पतित इत्यर्थः । ततो रजःप्रभावात् सः प्रसिद्धः अक्रूरो जातः अन्तर्देहो भगवदीयो जातः बहिर्देहस्यापि तथात्वाय तेषु रेणुष्वचेष्टत लुठनं कृतवान् बहिस्तथा संवेदनाभावात् चेष्टामात्रमाह । ननु लुठने को हेतुर्वारं वारं तत्राह. तद्गतमभिप्रायं प्रभोरिति । एतावत्कालं शास्त्रार्थत्वेन ईश्वरत्वेन महत्त्वेन संबन्धित्वेन वा ज्ञातवान् इदानीं शुद्धः स्वयं सेवको जातः भगवांश्च प्रभुः तथा सति तस्य परमदुर्लभान्यङ्घ्रिरजांसि कथमेवं भूमौ स्थातुमुचितानि भवन्तीति स्वशरीरे तानि सर्वाण्येव योजयितुं यावत् तानि रजांसि सर्वाणि प्रविशन्ति तावत् लुठनं कृतवान् किञ्च आश्चर्यरसाविष्टोऽपि जातः अहो इति माहात्म्यमनेन सूचितम् ॥ २६ ॥

एवं तस्य कृतमुक्त्वा फलमाह । देहंभृतामिति । यदस्य जातम् इयानेव देहंभृतामर्थः पुरुषार्थः जन्मसाफल्यम् उत्पन्नेन हि परमः पुरुषार्थः साधनीयः स च भगवदीयभावः तथा यत्नः कर्त्तव्यः यथा स भवति ज्ञानादिस्तु अवान्तरफलरूपः मोक्षादपि स्वभावत एवायं भावोऽधिकः तदुपपादितं भगवदीयत्वेनेत्यत्र अत इयानेव पुरुषार्थ इति युक्तमिति हिशब्दः देहसङ्ग्रहणं क्लेशात्मकं तदपि कृत्वा यदि परमपुरुषार्थं न साधयेत् तदा वैयर्थ्यमिति स कोऽर्थ इत्याकाङ्क्षायामाह । सन्देशादिति । सन्देशमारभ्य हरेर्लिङ्गश्रवणदर्शनादिभिर्यो ऽर्थो जातः अयमेवार्थः सन्देशानन्तरमेव तस्य चित्तं भगवत्परं जातं तद्गच्छमानं भगवदीयत्वञ्च सम्पाद्य माहात्म्यज्ञानं कारितवत् लिङ्गानां चिन्हानां भगवत्पदानां प्रथमतो दर्शनं ततस्तत्सायुज्यमिति ततो भगवदीयत्वं माहात्म्यज्ञानञ्च सर्वे च भगवदीया धर्माः सन्देशादिति हेतोर्वा अन्यार्थमपि प्रयुक्तं वाक्यमेतावत्फलं साधयतीति अल्पप्रङ्गे-

नाप्येतावत्वं महाफलमित्यर्थः । परन्तत्र दोषत्रयं परित्यज्यैतत्कर्त्तव्यमित्याह । हित्वेति । दम्भो राजसः भयं सात्विकं शोकस्तामसः दम्भो बाह्यः भयं शारीरं शोकोऽन्तःकरणस्य एतत्सर्वथा त्यक्तव्यम् अनेनापि त्यक्तमिति दम्भं कापट्यं त्यक्तवान् यथा कंसेनोक्तं भयञ्च त्यक्तवान् भगवान् किङ्करिष्यतीति शोकञ्च त्यक्तवान् भगवति तत्र गते कंसः किङ्करिष्यतीति भयानन्तरं चैतद्भवतीत्युक्तं भगवतो माहात्म्यज्ञानाभावे शोको भवति नान्यथा एवमन्यैरपि लौकिका अलौकिकाश्चैते भावाः त्यक्तव्याः अन्यथा एतावत्वं न भवेदिति ॥ २७ ॥

ततो योग्यशरीरं प्राप्य भगवन्तं दृष्टवानित्याह । ददर्शेति यादृशः सेवकः तादृशं वर्णयित्वा यादृशो भगवान् तादृशं वर्णयति षड्भिः—

स्वरूपञ्च वयश्चैव देहेन्द्रियविचेष्टितम् ।
शोभा स्वरूपञ्च तथा शोभा तस्याप्यलौकिकी ॥

तत्र प्रथममपरिदृश्यमानं स्वरूपं वर्णयति भक्तत्वात् प्रथमं कृष्णं ददर्श ततो राममावेशिनं चकारादाविष्टं व्रजे अधिकरणे तत्रापि गोदोहनं गतौ गोदोहनस्थाने स्थितौ गावो दुह्यन्ते अस्मिन्निति देशमुक्त्वा आवरणमाह । पीतनीलाम्बरधराविति । भगवान् पीताम्बरधरः रामो नीलाम्बरधर इति तादृशमेव वस्त्रद्वयं द्वयं परिधृतमस्तीति ज्ञापयितुमम्बरधरावित्युक्तं शरत्काले ये अम्बुरुहे सम्यक् जाते तद्वदीक्षणी ययोः अनेन गुणा उक्ताः देशकालयोः स्वाभाविकयोः विपरीतत्वेऽपि तत्समीचीनं विधाय ज्ञानादिसर्वपुरुषार्थान् प्रयच्छतीति तथोक्तम् ॥ २८ ॥

———

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

पदानि पदचिन्हानि क्षितेः कौतुकं सविस्मयसौभाग्यं यतः ॥ २५॥

अश्रूणां कला कलनमतिक्षरणं कलिहली कामधेनू अवस्कन्द्य सहसैवावप्लुत्य स अक्रूरः तेषु पदेषु अचेष्टत सरोदनमलुठत् अहो भाग्यं दुर्लभलाभो ममायमिति सगद्गदं ब्रुवन् ॥२६॥

मथुरातो यात्रामारभ्य नन्दव्रजप्रवेशपर्यन्तमक्रूरस्य मनोवाक्कायचेष्टितं वर्णयित्वा तदेव दृष्टान्तीकृत्य सिद्धान्तसारमाह । देहं भृतामिति । द्वितीया आर्षी देहधारिणामियान् एतावानेव पुरुषार्थः कंसस्य सन्देशादारभ्य हरेर्लिङ्गदर्शनश्रवणादिभिर्योऽयमक्रूरस्य वर्णितः यथा हरेर्लिङ्गं पदचिन्हं दृष्ट्वा अक्रूरस्तत्रैव धूलौ लुलोठ तथाहमक्रूरो राजमन्त्री राज्ञोऽत्यादरणीयः कथं गोचारकस्य पदधूलौ लुठामीति दम्भं हित्वैव मद्दूतोऽपि भूत्वामच्छत्रोः पदधूलौ लुठतीत्युपजापकुपितात् कंसात् भयं हित्वा कुपितकंसाविनाश्येषु शुचं गृहकलत्रादिषु शोकं हित्वैव लुलोठ यथा तथैव वयं पण्डितत्वादभिजातत्वादैश्वर्यवत्त्वाच्च श्रेष्ठाः कथं सर्वलोकानादृतकुचेलाकिञ्चननिकृष्टवैष्णवचरणधूलौ पताम इति दम्भं स्वजननिन्दनाद्भयं तत्तत्त्यागाच्छोकं च हित्वा हरेर्लिङ्गं वैष्णवं दृष्ट्वा तच्चरणधूलौ पतेयुः यद्वा हित्वेत्यादिकं देहभृत्स्वेव योग्यं नत्वक्रूरे प्रेमाविह्वले इति यथा हरेर्नारदादिमुखाद्यशः श्रवणेन स्मरणेन चाक्रूरो यथा वास्यत्स्वानुकूलान् मनोरथांश्चकार तथैव कदा हरिं परिचरिष्यामः अपि किं तं द्रक्ष्याम इत्यादिमनोरथान् कुर्युरिति ॥ २७ ॥

गावो दुह्यन्तेऽस्मिन् इति गोदोहनं तत्स्थानं गतौ प्राप्तौ

किशोरौ श्यामलश्वेतौ श्रीनिकेतौ बृहद्भुजौ ।
सुमुखौ सुन्दरवरौ बालद्विरदविक्रमौ ॥ २९ ॥
ध्वजवज्राङ्कुशाम्भोजैश्चिह्नितैरङ्घ्रिभिर्व्रजम् ।
शोभयन्तौ महात्मानावनुक्रोशस्मितेक्षणौ ॥ ३० ॥
उदाररुचिरक्रीडौ स्रग्विणौ वनमालिनौ ।
पुण्यगन्धानुलिप्ताङ्गौ स्नातौ विरजवाससौ ॥ ३१ ॥
प्रधानपुरुषावाद्यौ जगद्धेतू जगत्पती ।
अवतीर्णौ जगत्यर्थे स्वांशेन बलकेशवौ ॥ ३२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

यद्वा गवां दोहनं कर्त्तुं प्राप्तौ गा दुहन्तावित्यर्थः । सानुक्रोशे सानुकम्पे सस्मिते च ईक्षणे ययोस्तौ प्रधानभूतौ पुरुषौ जगति अवतीर्णौ अर्थेषु भारावतारूपेषु प्रयोजनेषु मध्ये स्वांशः स्वस्वो यो भागस्तेन हेतुना यथा बकवत्सकादीन् कृष्णो जघान धेनुकप्रलम्बादीन् रामो जघान यथा च चाणूरकंसादीन् कृष्णः मुष्टिककूटशलादीन् रामो हनिष्यतीति ॥ २८ ॥ ३४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

तत्र तस्य श्रीकृष्णस्य क्षितिकौतुकानि भूमेरलङ्काररूपाणि पदानि ददर्श तच्चरणसंस्पृष्टरेणोरपि ब्रह्मादिकिरीटकोटिसेवितत्वं दर्शयति । अखिलैः सर्वैः लोकपालैर्ब्रह्मादिभिः किरीटेषु जुष्टा अमलाः पादरेणवो यस्य तस्येति ॥ २५ ॥

सः अक्रूरः तेषां दर्शनेन य आह्लादस्तेन विवृद्धः सम्भ्रमो यस्य प्रेम्णोत्थोत्पुलकिताणि रोमाणि यस्य सः अश्रूणां कलाभिर्लैराकुले ईक्षणे यस्य सः स्यन्दनस्कन्धादवप्लुत्य अहो प्रभोरमूनङ्घ्रिरजांसीति दुर्लभतां भावयन् तेषु पदेषु अचेष्टत व्यलुठत् ॥ २६ ॥

अन्यान् शिक्षयितुमक्रूरवृत्तान्तं श्लाघते । देहंभृतामिति । देहभृतामियानेव एतावानेव अर्थः पुरुषार्थः कोऽसौ दम्भादीन् हित्वा कंसस्य सन्देशादारभ्य हरेलिङ्गदर्शनश्रवणादिभिर्यो ऽयमक्रूरस्य वर्णित इति शेषः एवमेव देहभृद्भिर्भवितव्यं भावः कर्तव्य इति भावः ॥ २७ ॥

ततो व्रजे रामं कृष्णं च ददर्श कथम्भूतौ गावो दुह्यन्ते यत्र तद्गोदोहनं स्थानं गतौ प्राप्तौ ॥ २८ ॥

भाषा टीका ।

समस्त लोकपालों के किरीटों से जिनके चरण रेणु सेवित हैं तथा अति निर्मल हैं उन कृष्ण भगवान् के कमल यव अंकुशादिकों से चिन्हित चरणों के चिन्हों का अक्रूरजी ने गऊओं के गोष्ठ में दर्शन किया ॥ २५ ॥

उनके दर्शन करने से बडे आनंद के बढने से प्रेम के मारे रोमांच खडे होगये नेत्रों में से अश्रुधारा बह चली आकुल नेत्र होगये झट रथ से उतरकर उन में अहो ये प्रभु के चरण रज हैं ऐसा कह कर लोटने लगे ॥ २६ ॥

देह धारियों का यही स्वार्थ है जो कि दम्भ भय शोक को छोडकर कंस के संदेश से जैसे अक्रूरजी ने हरिके दर्शन श्रवणादिकों में मन लगाया है वैसा करना ॥ २७ ॥

फिर व्रज में गो दोहन स्थान पर आये हुये बलराम तथा श्रीकृष्ण दोनों का अक्रूरजी ने पीत तथा नीले दोनों वस्त्र पहिरें और शरद् ऋतु के कमल सरीके नेत्रों से शोभित उत्तम दर्शन किया ॥ २८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अनुक्रोशोऽनुकम्पा तद्विलसितस्मितयुक्तमीक्षणं ययोस्तौ ॥ ३० ॥

उदारा रुचिरा क्रीडा ययोस्तौ स्रग्विणौ रत्नस्रग्भिरलंकृतौ ॥ ३१ ॥

प्रधानभूतौ पुरुषौ प्रकृतिपुरुषात्मकौ वा कुतः आद्यौ तदपि कुतः जगद्धेतू अत एव जगत्पती विपरीतौ वा चतुर्णां पदानां हेतुहेतुमद्भावः जगत्यर्थे पृथिव्या भारापनयनाय स्वांशेन मूर्त्तिभेदेन बलकेशवौ सन्ताववतीर्णौ ॥ ३२ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

ततो भगवल्लक्षणालक्षणम् अङ्घ्रिभिरिति बहुत्वं द्वयोश्चतुष्ट्यत्वात् ततो अद्भुतमाधुरीभिर्विश्वेषामपि स्तम्भात् स्थगितगतिना तेन पुनरपि कृपादृष्टिवृष्टिलाभः ॥ ३० ॥

तत उदाररुचिरा महामनोहरा क्रीडा गवाह्वानरोधनादिषु विलासहासादिरूपा ययोस्ताविति कृपया सम्यगेव निजमाधुरीं दर्शयितुं तमद्दष्ट्वैव स्थितयोरनयोश्च क्रीडायां कौतुकावेशः तत्र च वेशविशेषाणां प्रत्येकनिशामनमिति यथाक्रममेव वर्णनं स्रग्विणौ हृस्वमध्यमादिमालाधरौ वनमालिनौ दीर्घमालाधरौ विरजाविस्कारान्तो रजशब्दः "अर्थाः पादरजोपमा" इति प्रयोगात् स्रग्वित्वादिकं गृहात् स्नानाद्यनन्तरमेवागमनात् ॥ ३१ ॥

तदेवं तस्य तस्य माधुर्यानुभवचमत्कारजाते तद्भावानुसारेण पारमैश्वर्यानुभवचमत्कारोऽपि जात इत्याह । प्रधानेति । कृष्णस्य

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

सर्वापेक्षया प्रधानत्वं रामस्यान्यापेक्षयेति स्वांशेनेति, स्वाविर्भाव-भेदेनेत्यर्थः ॥ अतएव जगत्पती इति द्वित्वं बलेति बलाधिक्य-स्फूर्त्तेः केशवेति साम्प्रतं केशिहन्तृत्वस्फूर्त्तेः कंसमारणे निश्चयं बोधयति ॥ ३२ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

प्रधानपुरुषौ श्रेष्ठपुरुषौ आद्यौ सृष्टेः पूर्वं विद्यमानौ ॥ ३२—३८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ध्वजादिरेखाभिश्चिन्हितैराङ्घ्रिपङ्कजैर्व्रजमलङ्कुर्वन्तौ. महा-त्मानौ सुशीलौ अनुक्रोशोऽनुकम्पा तद्विलसितस्मितयुक्तमीक्षणं ययोः ॥ २९ ॥ ३० ॥

उदारा रुचिता क्रीडा ययो स्तत्सजावन्तयोः स्त इति तौ पुण्येन श्रेष्ठेन गन्धेन चन्दनेनानुलिप्तानि अङ्गानि ययोः विरजे निर्मले वाससी ययोः ॥ ३१ ॥

प्रधानपुरुषौ श्रेष्ठपुरुषौ आद्यौ सृष्टेः पूर्वं विद्यमानौ जगत्कारणभूतौ जगन्मयौ जगच्छरीरकत्वेन तत्प्रचुरौ जगत्यर्थे जगत्परिपा-लनार्थमंशेन सङ्कल्पेनावतीर्णौ बलाधिक्याद्बलः केशौ ब्रह्मरुद्रौ वाति उत्पादयतीति केशवः—

क इति ब्रह्मणो नाम ईशोऽहं सर्वदेहिनाम् ।
आवां तवाङ्गसम्भूतौ तस्मात्केशवनामवानिति ॥

रुद्रेणैव केशवशब्दार्थस्य निरुक्तेः बलश्च केशवश्च बलकेशवौ ॥३२॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

श्रियो लक्ष्म्याः कान्तेर्वा निकेतौ मन्दिरायमाणौ ॥ २९ ॥

अनुक्रोशेन दयया स्मितेन सहितमीक्षणं ययोस्तौ तथा ॥ ३० ॥

उदारा महती ख्याता वा दक्षिणा वा रुचिरा च क्रीडा ययो-स्तौ "उदारे महती ख्याते दक्षिणे दानशौण्डके" इतियादवः स्नातौ शुद्धौ ॥ ३१ ॥

जगत्यर्थे भूमेरर्थे अर्थप्रदाने प्रधानपुरुषाविद्यादावुच्यमाना गुणा बलभद्रे हरेः सन्निधानादुच्यन्ते नत्वौत्पत्तिकाः तदुक्तं वैन्यपार्थबलेशादावाविष्टं पुरुषोत्तमम् । अपेक्ष्य तद्गुणाः सर्वे इत्यादौ ॥ ३२ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

वय आह । किशोराविति । कैशोरे वयसि विद्यमानौ एकादशवा-र्षिकौ नववर्षादूर्ध्वं षोडशवर्षपर्यन्तं किशोरावस्था गोकुलवासिषु विद्यमानः कालः स्वस्मिन् गृहीत इति तं प्रकटयितुं तथावस्थो जातः अग्रे प्रयोजनाभावात् कालावस्थां न वक्ष्यति अत एव स्थाने भक्तकृपया तामवस्थां गृह्णातीति सन्तं वयसि कैशोरे इत्युक्तम् एकः श्यामलः अपरः श्वेतः कैशोरे वयसि रूपमभिव्यक्तं भव-तीति वयः कार्यत्वेन रूपमुक्तं श्रीनिकेतौ श्रीवत्साङ्कितौ असा-धारणं भगवच्चिन्हमेतत् भगवत्त्वज्ञापकं तदपि तदैव प्रकटमिति भगवतो महती क्रियाशक्तिरिति बृहद्भुजावित्युक्तम अव्यग्रत्वाय सुमुखाविति । भक्तदर्शनावस्थायां सुमुखत्वे तस्य सर्वपुरुषार्थाः सिध्य-न्तीति । सुन्दरवराविति । सुन्दरश्रेष्ठौ यत्राकृतिस्तत्र गुणा वसन्तीति सर्वगुणनिधानावित्यर्थः ॥ बालो यो द्विरदः हस्ती तद्वद्विक्रमो ययो-रिति अमानुषपराक्रमौ निरूपितौ—

सौन्दर्यं च तथा पुष्टिः प्रदृश्यत्वमस्पृश्यता ।
निर्भयत्वं स्वतः सिद्धसाधनत्वञ्च रूप्यते
अरण्य एव तद्वृद्धिः सुखं तस्य गृहे पुनः ।
नान्यत्रेति च बोधाय विदेशक्लेशबाधने ॥

तद्वत्पराक्रम इति कौतुकार्थं सर्वानेव गोपालान् दूरादेव प्रक्षि-पतीति निरूपितम् ॥ २९ ॥

भगवतो धर्मान् निरूपयन् बाह्यानि निरूपयति । ध्वजवज्रेति । ध्वजादिभिश्चतुर्भिश्चिन्हैः पुरुषार्थचतुष्टयरूपैः चिन्हिता ये अङ्घ्रयः तैर्भूमावुद्धृतैः व्रजं शोभयन्तौ शोभायुक्तं कुर्वन्तौ ये सर्वपुरुषार्थदातारः ते यत्र शोभाकरा जाताः भगवत्कृपया इतोऽ-धिकं भगवान् व्रजस्य किं कुर्यात् महानात्मा स्वरूपं ययोः अयं धर्मिनिर्देशः धर्माणामुत्कर्षख्यापकः तयोर्माहात्म्यमुक्त्वा कृपालुतामाह । सानुक्रोशस्मितेक्षणाविति । दयापूर्वकं स्मितपू-र्वकमीक्षणं ययोः दीनेषु दया समेषु स्मितमुत्तमेषु ज्ञान-मिति संसारे क्लिष्टेषु दया ततः कर्मणा परित्यागेन वा क्लिष्टेषु अल्पमोहनेन सुखदानं ततो भक्तेषु ज्ञानस्थापनमिति पर्यवसान-तया दयया सुखदानं प्रत्यक्षत एव स्मितेनैव परमानन्द-ज्ञानमिति ॥ ३० ॥

ततो लीलामाह ॥ उदारेति । उदारा रुचिरा क्रीडा ययोः भगवल्लीला पात्रापात्रविचारव्यतिरेकेण सर्वेभ्य एव सर्वपुरुषार्थान् प्रयच्छतीति उदारा रुचिरा मनोहरा च स्वतः फलरूपा क्रीडेति सामान्यापि लीला आभासरूपा लीला न भवतीति भगवन्तं वर्णयति । स्रग्विणाविति । शिरसि कण्ठे नानाविधाः स्रजो ययोः वनमालायुक्तौ च आपादावलम्बिनीमाला वनमालेति आगन्तुकैः सहजानिवृत्तिं मत्वा वनमाला पृथङ्निरूपिता विरतिवक्षेति चन्दनपुष्पवस्त्राभरणान्येवोक्तानि विरत्यवचनत्वाद्वा पुण्येन गन्धेन अनुलिप्तान्यङ्गानि ययोः एते अभिलेपा एव पुण्यगन्धाः स्नाना-ङ्गभूताः ततः स्नातौ ततो नूतनानिर्मलवस्त्रपरिधानमिति विर-जवाससौ ॥ ३१ ॥

कथमेवं गोकुलवासिनोर्महती पूजा सम्भूतिरितिचेत्तत्राह । प्रधानपुरुषाविति । प्रधानपुरुषावुभावपि कार्यप्रधानपुरुषव्या-वृत्त्यर्थमाह । आद्याविति । तयोः प्रधानपुरुषत्वे हेतुमाह । जगद्धेतू इति । य एव जगत्कारणं स एव प्रथमं प्रधानपुरुषरूपो भवतीति । प्रधानपुरुषत्वं मुख्यपुरुषत्वं वा जगत्कारणत्वमपि साधयति । जग-त्पती इति । भर्त्ता स य एव स्रष्टा उत्पत्तिस्थितिलयानामेककर्तृक-त्वात् पालकत्वं तस्य सर्वजनीनम् अत एव साम्प्रतं रक्षामाश-ङ्क्य जगत्यर्थे भूम्यर्थमवतीर्णौ स्वस्य निजांशेन आनन्दांशेन उभयो-रागमने विशेषकार्यं नाम्नैव निरूपयति बलः क्रियाश-क्तिप्रधानः उत्पत्तिस्थितिलयकर्त्ता केशवो मोक्षदाता ब्रह्मा-दीनामपि ॥ ३२ ॥

दिशो वितिमिरा राजन् ! कुर्वाणौ प्रभया स्वया ।
यथा मारकतः शैलो रौप्यश्च कनकाचितौ ॥ ३३ ॥
रथात्तूर्णमवप्लुत्य सोऽक्रूरः स्नेहविह्वलः ।
पपात चरणोपान्ते दण्डवद्रामकृष्णयोः ॥ ३४ ॥
भगवद्दर्शनाह्लादवाष्पपर्याकुलेक्षणः ।
पुलकाचिताङ्ग औत्कण्ठ्यात्स्वाख्याने नाशकन्नृप ! ॥ ३५ ॥
भगवांस्तमभिप्रेत्य रथाङ्गाङ्कितपाणिना ।
परिरेभेऽभ्युपाकृष्य प्रीतः प्रणतवत्सलः ॥ ३६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

श्रीनिकेतौ शोभाश्रयभूतौ अतिसुन्दरौ अत एवाम्येषु वरौ श्रेष्ठौ ॥ २९ ॥

अनुक्रोशेन अनुकम्पया विलसितेन स्मितेन मन्दहसितेन युक्तमीक्षणं ययोस्तौ ॥ ३० ॥

उदाराः रुचिराः क्रीडाः ययोस्तौ स्रजः रत्नमालाः अमयोः स्युरिति स्रग्विणौ पुण्यैर्गन्धैरनुलिप्तान्यङ्गानि ययोस्तौ ॥ ३१ ॥

प्रधानभूतौ सर्वश्रेष्ठौ पुरुषौ आद्यौ सर्वसृष्टेः पूर्वं विद्यमानौ जगत्यर्थे भूभारापनयनाय स्वांशेन स्वसङ्कल्पेनावतीर्णौ कश्च ईशश्च कैशौ तौ वातीति केशवः ब्रह्मशिवयोरुत्पादकः वा गतौ "वात" इति कः ॥ ३२ ॥

भाषा टीका ।

किशोर अवस्था वाले एक स्यामल एक श्वेत रूप वाले लक्ष्मी के आश्रय तथा बड़े भुजा वाले सुंदर मुख वाले सुंदरों में श्रेष्ठ हस्ती के छौना सदृी के ॥ २९ ॥

ध्वज वज्र अंकुश कमल आदि से चिन्हित चरणों से ब्रजको शोभित करते हुये अत्यंत महा प्रभाव वाले कृपा से मंदहास सुंदर दृष्टि युक्त ॥ ३० ॥

अति मनोहर क्रीडा वाले रत्न माला तथा वन माला पहिरे पवित्र चंदन गंध को अंगों में लेपन किये स्नान किये दिव्य वस्त्रों को पहिरे हुये ॥ ३१ ॥

जगत के आद्य कारण श्रेष्ठ पुरुष जगत के हेतु जगत के पति संसार के हितार्थ अपने अंश से अवतीर्ण श्रीबलराम श्री श्रीकेशव जी का अक्रूरजी ने दर्शन किया ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

स्वप्रभया विगततिमिरा दिशः कुर्वाणौ कनकाचितौ सुवर्णख्याताविति सालङ्कारयोः शैलसादृश्यार्थमुक्तम् ॥ ३३—३४ ॥

भगवद्दर्शनाह्लादेन यद्बाष्पं तेन पर्याकुले ईक्षणे यस्य सः पुलकैराचितं व्याप्तमङ्गं यस्य सः स्वाख्याने अक्रूरोऽहं नमस्करोमीति कथने नाशक्नोत् ॥ ३५ ॥

अभिप्रेत्याऽक्रूरोऽयमेतदर्थमागत इति ज्ञात्वा कंसहननसामर्थ्यं द्योतयन्निव रथाङ्गेन चक्रेणाङ्कितो यः पाणिस्तेनाभ्युपाकृष्य तमालिङ्गितवान् ॥ ३६ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

ननु दूरतस्तत्कौशेयः कथं दृष्टः उच्यते महातेजस्त्वादिति यतः क्रमशः सन्ध्यांशे जातेऽपि विशेषतो न्यद्योततामित्याह । दिश इति । शैलदृष्टान्तोऽन्यसवयस्कापेक्षया बृहत्त्वादेः स्तनशैलादिवत् तथा च श्रीविष्णुपुराणे प्रांशुमुत्तुङ्गबाहुंशमित्यादि योजनार्थं यथा मारकतः शैलो रौप्यश्च कनकाचितौ भवतः । तथा तौ ददर्शेति बृहत्तया सवर्णतया तथा सौवर्णालङ्कारतया चेति भावः । किं कुर्वन्तावित्यत्राह । दिश इति । एवमेव तैः सूचितं कनकेति ॥ ३३ ॥

स तथा निकटागतोऽक्रूरो रथात्तूर्णमवप्लुत्य अवाक् प्लुत्य पतित्वा रामकृष्णयोः समानस्थितयोश्चरणसमीपे दण्डवत् पपात कतिचित् पदानि पद्भ्यामेवागत्येति शेषः । तत्र सर्वत्र हेतुः स्नेहविह्वलः दास्यभावोचितप्रेमविशेषमोहित इति । अयं भावः । दूरतः प्रथमदर्शने यन्नावप्लुतस्तत्र स्नेहवैकल्यमेव हेतुः । भूमौ रथे वा स्थितोऽहमित्यनुसन्धानाभावात् तदभिमुखं द्रुतगामितुरगेण रथेन तदीयरूपाकृष्टदृष्टिमनसः स्वस्यानुकूल्यलाभाच्च । अथ निकटागतो यदवप्लुतस्तत्रापि तदेव हेतुः । दूरस्थभावतस्तदात्मन ईषदूर्ध्वस्थितेन स्फुटमवगतासीत् निकटात्तु स्फुटमवगता । अतस्तदनुसन्धानादादराकर्षणे जाते इति । तथा पित्रव्यतात्वव्यवहारेण योग्यतायामपि प्रणामे यथाविधि तद्विधाने च हेतुर्गम्य इति ॥ ३४ ॥

स्नेहविह्वलत्वमेव सहेतुकमभिव्यञ्जयति । भगवदिति । पर्याकुलेति सम्यग्द्रष्टुमपि नाशकदिति सूचितम् । उत् उद्गतः उच्चैर्गतः कण्ठस्तद्गतः स्वरो यस्य स उत्कण्ठस्तस्य भावः औत्कण्ठ्यं तस्मात् सन्नकण्ठत्वादित्यर्थः । स्वाख्यानेऽपि नाशकत् किं

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

पुनरप्रसङ्गत्वादिसम्पादने इत्यर्थः । नाशकन्नृपेति बहुत्र पाठेऽपि तथैवोह्यम् ॥ ३५ ॥

भगवानिति सार्वज्ञ्यं परमकारुण्यादिकञ्च दर्शितम् अभिप्रेत्य सर्वज्ञोऽपि लीळया श्रुतेनाकारेणाक्रूरोऽयमिति सम्भाव्य रथाङ्गाङ्कितत्वेन भगवल्लक्षणं व्यज्य तत्स्पर्शेनाक्रूरस्य भाग्यमाहात्म्यं दर्शयति । रथाङ्गेत्युपलक्षणं यथोक्तं श्रीपराशरेण सोऽप्येनं ध्वजवज्राब्जकृतचिन्हेन पाणिना । संस्पृश्याकृष्य च प्रीत्या सुगाढं परिषस्वज" इति प्रीतः सन् परिरेभे नतु पितृव्यव्यवहारेण नमस्कृतवान् तत्र प्रीतत्वेऽपि पितृव्यव्यवहारामननेऽपि हेतुः । प्रणतवत्सल इति । ददीयदास्यभक्तिविशेष इत्यर्थः । ये यथा मामित्यादेः श्रीकृष्णेन प्राक् परिरम्भेऽप्ययमेव हेतुः अन्यत्तैः तत्र इवेत्युत्प्रेक्षायां ततो वस्तुतो द्योतनार्थं नोपाकर्षत् किन्तु प्रीत्यैवेत्यर्थः ॥ ३६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

हे राजन् ! स्वया प्रभया दिशो वितिमिराः कुर्वाणौ यथा कनकेनाचितः मध्ये खचितः मारकत शैल इन्द्रनीलपर्वत इति यावत् इयं कृष्णस्योपमा रौप्य इत्यस्याञ्जनाचित इति शेषः । इयं रामस्योपमा एवम्भूतौ ददर्शेति सम्बन्धः ॥ ३३ ॥

तदा सोऽक्रूरः तत्क्षणमेव रथादवप्लुत्य प्रेम्णा विह्वलः रामकृष्णयोश्चरणोपान्ते दण्डवत्पपात ॥ ३४ ॥

भगवद्दर्शनजाह्लादेन यद्बाष्पं तेन परित आकुले व्याप्ते ईक्षणे यस्य सः पुलकैराचितं व्याप्तमङ्गं यस्य तथाभूतः हे नृप ! औत्कण्ठ्यात्स्वाख्यानेऽक्रूरोऽहं नमस्करोमीति कथने नाशकत् न प्रबभूव ॥ ३५ ॥

भगवान् श्रीकृष्णस्तदक्रूरोऽयमेतदर्थमिहागत इत्येतज्ज्ञात्वा प्रणतवत्सलत्वात् रथाङ्गेन चक्रेणाङ्कितो यः पाणिस्तेन तमभिमुखं समीपं आकृष्य प्रीतः परिरेभे आलिङ्गितवान् ॥ ३६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

मरकतसदृशः कृष्णः रजतपर्वतसदृशो रामः कनकाचिताविन्युभयोः समं यदेतनादित्यस्य परं कृष्णरूपामित्यत्र यथादित्यस्य कृष्णप्रभा तिमिरापहा कृष्णमरकतश्यामप्रभापि दिशो वितिमिराः करोतीति युक्तामित्यनेन कृष्णप्रभाया अन्धकारनिरासकत्वं कथमिति मन्दाशङ्का दूरतो निरस्तेति ॥ ३३ ॥

अवप्लुत्य अवरुह्य ॥ ३४ ॥

आह्लाद आनन्दः ॥ ३५

रथाङ्गं चक्रं तेनाङ्कितेन पाणिना ॥ ३६ ॥ — ॥ ३७ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

यथा मारकतः शैलो रौप्यश्च कनकाचितौ भवतः तथा तौ ददर्शेत्यन्वयः । बृहत्तया सर्वात्मतया सुवर्णालङ्कारतया चेति भावः । किं कुर्वन्तावित्यत्राह । दिश इति ॥ ३३–३५ ॥

अभिप्रेत्य लक्षणादिना लोकरीत्या वितर्क्य ॥ ३६ ॥ ३७ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

तादृशस्यावतारे लोके अभिज्ञापकमाह । दिश इति । दश दिशः स्वया असाधारण्या प्रभया वितिमिराः कुर्वाणौ कान्तिरेव सूर्याधिका अलौकिकी न शीता नचोष्णा सर्वतापनाशिका सर्वेषां सर्वानन्ददायिनी ब्रह्मत्वबोधिका भवति राजन्नित्यलौकिकवस्तुपरिज्ञानार्थम् अभूतोपमामाह । यथा मारकतः शैळ इति । मरकतमणिनिर्मितः शैलः भगवान् रौप्यः कैलासस्तत्तुल्यो बळभद्रः उभावपि कनकशृङ्गाङ्कितौ चेत् उपमां प्राप्नुतः सर्वत्र भगवान् धराधरत्वेन वर्ण्यते सर्वाश्रयत्वाय महत्त्वादिधर्मार्थं च ॥ ३३ ॥

एवं भगवन्तं वर्णयित्वा तादृशे स्वमिति तादृशसेवकस्य कर्त्तव्यपूर्वकं भगवत्कार्यमाह दशभिः । तत्र द्वाभ्यां तस्य कृत्यम् अष्टभिर्भगवत्कृत्यमिति प्रपत्तिः तस्य अष्टैश्वर्यादिदानं भगवतः रथादिति आदौ दृष्ट्वा रथे स्थित एव तूर्णमवप्लुत्य तत उच्चस्थाद्भूमौ पतित्वा नतूत्तीर्य स प्रसिद्धः पूर्वं चरणरजस्सु यः पतितः साक्षाद्दर्शनानन्तरमत्युत्कटो यो जातः स्नेहः तेनापि विह्वलः रामकृष्णयोश्चरणोपान्ते निकट एव पपात पाते देहादरविचारार्थमाह । दण्डवदिति । अत्र ज्येष्ठानुक्रम उक्तः व्यवहारे वयसो मुख्यत्वख्यापनार्थः ॥ ३४ ॥

अकस्मात्पतिते शङ्का भवतीति कथं स्वनाम गृहीतवान् तत्राह । भगवद्दर्शनेति । भगवद्दर्शनेन योऽयं महानाल्हादो जातः तेनान्तःपूर्णेन बहिर्वाष्पतया निर्गतेन पर्याकुले ईक्षणे यस्य ज्ञानफलेन ज्ञानं तिरोहितमिति तस्य न विचार उत्पन्न इत्यर्थः । नन्वन्यो मास्तु विचारः अयमहमिति अपूर्वदर्शनत्वात् कथं न स्वाभिधामुक्तवान् तत्राह । पुलकाञ्चित इति । सर्वाङ्गे रोमाञ्चः प्रेमातिभरात् जातः तेन विवशत्वात् स्वाख्याने अयमहमस्मीति कथनेऽपि नाशकत् न समर्थो जातः परिज्ञानार्थं संबोधनमादरार्थं वा ॥ ३५ ॥

ततस्तस्य वचनव्यतिरेकेणैव भगवांस्तं ज्ञात्वा कर्त्तव्यं कृतवानित्याह । भगवानिति । भगवत्त्वात् तमक्रूरोऽयमित्यभिप्रेत्य दुष्टसंसर्गजनितदोषनाशार्थं रथाङ्गेन चक्रेणाङ्कितेन कालात्मकेन तद्दोषं दूरीकृत्य पाणिना तमाकृष्य स्वसमीपं आनीय तस्मिन् स्वप्रवेशे लौकिकं कार्यं सेत्स्यतीति तमेव स्वस्मिन् आनीतवान् ततः परिरेभे उभयोरैक्यं सम्पादितवान् दण्डवत्पातेनैव प्रीतः नन्वस्य बहवो दोषाः सन्ति संसर्गजाः ततकथं प्रीत इति चेत्तत्राह । प्रकर्षेण नतेषु वत्सलः वात्सल्ययुक्तः भक्तकृपालौ प्रकर्षेण नतिमात्रेणैव कृपा अभिव्यक्ता भवति अत आळिङ्गनमुचितमेव यो भगवता परिगृहीतः यः कृष्णपादाङ्कितेषु लोटनेन भगवदीयत्वं प्राप्तः स भगवति सायुज्यमेव प्राप्तवान् न स पुनरुद्धृतः भगवता परित्यक्त इति वचनाभावात् तस्य पूर्वकामितसिद्ध्यर्थं प्रतिकृतिमेव कृत्वा पृथक्कृतवानिति लक्ष्यते नहि परमप्रेम्णा भगवत्सायुज्यं प्राप्तस्य पुनरुत्थानं सम्भवति लौकिकन्याय तु भक्तिर्वृथैव स्यात् अतो बलभद्रालिङ्गनानुपपत्त्या भगवद्विश्लेषः तस्य कल्पयितुं शक्यः एवं सति भक्तिमार्गः

सङ्कर्षणश्च प्रणतमुपगुह्य महामनाः ।
गृहीत्वा पाणिना पाणी अनयत्सानुजो गृहम् ॥ ३७ ॥
पृष्ट्वाथ स्वागतं तस्मै निवेद्य च वरासनम् ।
प्रक्षाल्य विधिवत्पादौ मधुपर्कार्हणमाहरत् ॥ ३८ ॥
निवेद्य गां चातिथये सम्वाह्य श्रान्तमादृतः ।
अन्नं बहुगुणं मेध्यं श्रद्धयोपाहरद्विभुः ॥ ३९ ॥
तस्मै भुक्तवते प्रीत्या रामः परमधर्मवित् ।
मुखवासैर्गन्धमाल्यैः परां प्रीतिं व्यधात्पुनः ॥ ४० ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

सफलो भवति अन्यथा भावान्तरमुत्पादयन् पाक्षिकफलः स्यात् ॥ ३६ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

स्वाख्याने अक्रूरोऽहं नमस्करोमीति स्वकथनेऽपि न शशाक ॥ ३५ ॥

अभिप्रेत्य अक्रूरोऽयमेतदर्थमागत इति ज्ञात्वा रथाङ्गाङ्कितेन चक्रचिन्हाङ्कितेन पाणिना तमभ्युपाकृष्य स्वनिकटमाकृष्य आकर्षणेन कंसहननसामार्थ्यं ज्ञापयन्निवेति भावः ॥ ३६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

मारकतः इन्द्रनीलमणिमयः रौप्यः रूप्यमयश्च शैलो भवति इति तयोः शरीरोपमा तौ च शैलौ यथा कनकाचितौ भवत इति सुवर्णमयालङ्कारोपमा दर्शिता उभयोः सुवर्णालङ्कारालङ्कृतत्वात् एवं भूतौ हे राजन् ! दिशो वितिमिराः स्वया प्रभया कुर्वाणौ ॥ ३३ ॥

स्नेहेन प्रेम्णा विह्वलः विकलः ॥ ३४ ॥

भगवद्दर्शनजेनाह्लादेन यद्बाष्पं तेन परितः आकुले व्याप्ते ईक्षणे यस्य सः पुलकैराचितं व्याप्तमङ्गं यस्य सः स्वाख्याने स्वनामगोत्रादिकथनेनाशकोत् ॥ ३५ ॥

भगवान् सर्वज्ञः अक्रूरोऽयमस्मदानयनार्थमागत इत्यभिप्रेत्य विज्ञाय कंसादिवधसामर्थ्यं सूचयन्निव रथाङ्गेन सुदर्शनेनाङ्कितो यः पाणिस्तेनाभ्युपाकृष्य तमालिङ्गितवान् रथाङ्गाङ्कितपाणिशब्दः श्रीकृष्णाविग्रहस्यानाद्यनन्तताम् द्योतयति ॥ ३६ ॥

भाषा टीका ।

हे राजन् ! वे श्रीरामकृष्ण दोनों अपनी कांति से दशों दिशाओं को अन्धकार रहित करते हुये ऐसे दीखते थे कि जैसे सुवर्ण से मण्डित मरकत मणि का तथा चांदी का पर्वत होवे ॥ ३३ ॥

तब अक्रूर जी स्नेह से बडा विह्वल होकर रथ से जल्दी उतर कर रामकृष्ण दोनों के चरणों के निकट दंड कि नाई गिर पडें ॥ ३४ ॥

भगवान् के दर्शन करने से भया जो आल्हाद तिससे आंसुओं के आने से नेत्रों से व्याकुल होगये उत्कण्ठा से पुळकित होगये और अपने कहने को समर्थ नहीं होसके ॥ ३५ ॥

भगवान् ने अक्रूरजी को जानकर चक्र से चिन्हित अपने हस्त कमल से अक्रूरजी को पकडकर आलिंगन किया और खैंच के ले आये और प्रणत भक्तों के बडे दयालु होने से बडे प्रसन्न भये ॥ ३६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

पाणी अञ्जलिरूपेण संहतावेव गृहीत्वा ॥ ३७ ॥

मधुपर्क एवार्हणं तस्मिन्वा यदुचितमर्हणमाहरत् आनीय समर्पितवानित्यर्थः ॥ ३८ ॥ ३९ ॥ ४० ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

सङ्कर्षण इति । यदूनामपृथग्भावादित्युक्तौचित्याभिप्रायेण महत् श्रीकृष्णभक्तेषु वात्सल्यादिगुणैः सर्वत उत्कृष्टं मनो यस्य स इति पूर्ववद्धेतुः सानुज इत्यग्रजत्वव्यवहारेण तस्यातिथ्यकरणे मुख्यत्वात् गृहं श्रीमन्नन्दगृहे श्रीरामस्यापि स्वगृहत्वेनैवाभिमानात् ॥ ३७ ॥

वरं श्रेष्ठं रत्नादिमयमासनं विधिवत् यथाविधीत्यर्थः इदं सर्वत्र योज्यं प्रक्षाल्य पादावित्यत्र तदप्रत्याख्याने हेतुः आदृतः सादरः तथादरपरिपाटीभिः स्वमाधुरीव्यञ्जिता यथाक्रूरोऽपि तदैश्वर्यादिकं विस्मृत्य तदिच्छैकानुसारी बभूवेति भावः । एवं सम्वाह्य पादसम्वाहनं कृत्वेति च उभयत्र ण्यन्तत्वं वा ॥ ३८-३९ ॥

प्रीत्या भुक्तवते षष्ठ्यादचतुर्थी परमधर्मेण वैष्णवधर्मेण आतिथ्यं तत्रापि द्वादशीपारणायां तत्रापि वैष्णवं प्रत्येकमेव व्यव-

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी।

कर्त्तव्यमिति लोकैः प्रवर्त्तयन्नित्यर्थः। अतः पुनरपि परमां प्रीतिं व्यधात् तस्य दिनस्य द्वादशीत्वं परश्वश्चतुर्दश्यां भूतराजपूजायां कंसराजमारणात् पारणायाः प्रातरकरणन्तु भगवद्दिदृक्षया न रात्रौ पारणं कुर्यादिति नियमातिक्रमस्तु साक्षाद्भगवद्गृहान्नप्राप्तेः ॥ ४० ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्।

संवाह्य अङ्गसंवाहनं कारयित्वा ॥ ३९ ॥

मुखवासैः कर्पूरादिभिः ॥ ४० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

ततः सङ्कर्षणोऽपि प्रणतमक्रूरमुपगुह्याश्लिष्य प्रीतमनाः स्वपाणिना तस्य पाणिं गृहीत्वा सानुजो गृहमनयत् ॥ ३७ ॥

ततः स्वागतं पृष्ट्वा तस्मै अक्रूराय श्रेष्ठमासनं समर्प्य यथाविधि पादौ प्रक्षाल्य मधुपर्कमुपाहरदानीय समर्पितवान् ॥ ३८ ॥

तत आदृतोऽतिथये अक्रूराय गां समर्प्य श्रान्तं तं सम्वाह्य पादसम्वाहनादिकं कारयित्वा मेध्यं विशुद्धं बहुगुणोपेतं षड्रसयुक्तमन्नं श्रद्धया समर्पयामास ॥ ३९ ॥

तस्मा इति। मुखवासैः कर्पूरादिभिर्गन्धमाल्यताम्बूलैश्च तस्मै तस्य परां प्रीतिं व्यधादुपापादयत् ॥ ४० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

मधुपर्कमिहे मधुपर्कपूजां "मधुपर्कं च सक्षौद्रं दधि प्रोक्तं मनीषिभिः" इति तान्त्रिकाः आहरत् दत्तवान् ॥ ३८ ॥

संवाह्य पादाविति शेषः ॥ ३९ ॥

मुखवासैः कर्पूरताम्बूलादिभिः ॥ ४०—४३ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

प्रक्षाल्य विधिवत् पादावित्यत्र हेतुः आदृतः सादरः तथादरपरिपाटीभिः स्वमाधुरीव्यञ्जिता यथाक्रूरोऽपि तदैश्वर्यादिकं विस्मृत्य तदिच्छैकानुसारी बभूवेति भावः ॥ ३८—४३ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी।

सङ्कर्षणोऽपि प्रणत इति भावसङ्कटात् सङ्कर्षणोऽपि तं तथा कृतवानित्याह। सङ्कर्षणश्चेति। अत्रापि प्रणतत्वमेव हेतुः न तु लौकिक इति चकारेणातिदिष्टोऽप्यर्थः कर्तृधर्मपर इति पुनराह। प्रणतमिति। महामना इति। तस्य लौकिकधर्माभिनिवेशः ततोऽयं पितृव्यः समागत इति पाणिना पाणिं गृहीत्वा भगवत्सहितः तं गृहमनयत् कामनासिद्धेति कथनार्थमुच्यते ॥ ३७ ॥

ततो लौकिकवैदिकमार्गेण तं पूजितवानित्याह। पृष्ट्वेति। अनामयमारोग्यं पृष्ट्वा उत्कृष्टं तस्य गृहेऽपि दुर्लभम् आसनं निवेद्य ततः शास्त्रानुसारेण अभ्यागते यथा कर्त्तव्यं तथा पादौ प्रक्षाल्य मधुपर्कसहितमर्हणं पूजामाहरत् ॥ ३८ ॥

निवेद्येति। ततो गां निवेद्य महोक्षं वा महाजं वेति स्मृतेः उत्सर्गपक्ष एव वात्र यद्यप्ययमभ्यागतः तथाप्यपूर्वं इत्यतिथिरेव धर्मेच भगवान् करोति न तु संबन्धेनेति ज्ञापयितुञ्च तथोक्तवान् अतिथिस्तु गोघ्नो भवतीति हननार्थमेवेति केचित् चकारान्महाजश्च वस्त्रादिकञ्च ततः संवाह्य तैलाभ्यङ्गमर्दनादिना सर्वाङ्गश्रमं दूरीकृत्य आदृतो जातः संवाहे हेतुः श्रान्तमिति ततो बहुगुणमनेकव्यञ्जनयुक्तमन्नमोदनं श्रद्धापूर्वमुपाहरत्। मेध्यमिति। तदानीं शुद्धतया निर्मितं रोहिण्या पक्वमित्यर्थः। ननु यथा कथं चित्सम्पादितं तथात्वे श्रद्धा हेतुः अकालेऽपि सहसा सर्वसामग्रीसिद्धौ हेतुः। विभुरिति। अतिथिधर्मं जानातीत्यक्रूरः सर्वं तथैव कृतवान् उभावपि भिन्नभावापन्नाविति न किञ्चिद्विरुध्यते ॥ ३९ ॥

भोजनान्तमेवातिथिकृत्यमिति अग्रिमोपचारं न कुर्यादिति पुनराह। तस्मा इति। भुक्तवते आतृप्तेः ततः परमप्रीत्या मुखवासैस्ताम्बूलादिभिः गन्धैश्चतुः समैः माल्यैश्च राजवत् तस्मै परं प्रीतिं व्यधात् अयमसाधारणो धर्मः अतिथिं स्वसदृशं कुर्यादिति ततोऽप्यधिकं कृतवान् यद्यपि पूर्वं मधुपर्कादिसमये माल्यं दत्तमेव तथापि प्रीत्यै तद्दानमिति पुनरित्यनेनास्य लौकिकत्वमुक्तम् ॥ ४० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

पाणिना स्वदक्षिणेन पाणी अञ्जली भूतौ गृहीत्वेति गृहीतमञ्जलाविति तथैव तन्मनोरथात् ॥ ३७ ॥ ३८ ॥

निवेद्य गामिति। पाद्याद्युपचारेषु गौरियं दृश्यतां तवेति नयनेन्द्रियसुखदानार्थं सुन्दरगवोपस्थानमप्येको मङ्गलोपचारः मेध्यमिति द्वादशीपारणविहितमित्यर्थः। अस्य दिनस्य द्वादशीत्वं परश्वश्चतुर्दश्यां भूतराजपूजायां कंसमारणात् न रात्रौ पारणं कुर्य्यादिति नियमातिक्रमः कृष्णगृहान्नप्राप्तिलोभात् ॥ ३९ ॥ ४० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

अञ्जलिरूपेण संहतावेव पाणी सानुज इत्यनेनैकतः सङ्कर्षणः एकतस्तदनुजश्च गृहीत्वा गृहमनयत् ॥ ३७ ॥

मधुपर्करूपमर्हमर्हणमुपाहरत् आनीय समर्पितवान् ॥ ३८ ॥

संवाह्य चरणसंवाहनादिकं कारयित्वा ॥ ३९ ॥

मुखवासैः ताम्बूलादिभिः गन्धैः कर्पूरादिभिः माल्यैः पुष्पैश्च परामुत्कृष्टां प्रीतिं व्यधात् उदपादयत् ॥ ४० ॥

भाषा टीका।

बड़े खुशी होकर बलदेवजी ने भी उनको आलिङ्गित कर

१पप्रच्छ सत्कृतं नन्दः कथं स्थ निरनुग्रहे ।
कंसे जीवति दाशार्ह ! सौनपाला इवावयः ॥ ४१ ॥
यो ऽवधीत्स्वस्वसुस्तोकान् क्रोशन्त्या असुतृप्खलः ।
किन्नु स्वित्तत्प्रजानां वः कुशलं विमृशामहे ॥ ४२ ॥
इत्थं सूनृतया वाचा नन्देन सुसभाजितः ।
अक्रूरः परिपृष्टेन जहावध्वपरिश्रमम् ॥ ४३ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे
पूर्वार्धे अक्रूरागमनं नाम
अष्टत्रिंशोऽध्यायः ॥ ३८ ॥

भाषा टीका ।

के हाथ से दोनों हाथों को जोडकर श्रीकृष्ण सहित अपने घर में ले आये ॥ ३७ ॥

फिर उनको स्वागत पूछकर उनके अर्थ श्रेष्ठ आसन निवेदन करके विधि पूर्वक पादों को प्रक्षालन करके मधुपर्क पूजन निवेदन किया ॥ ३८ ॥

उन अक्रूर अति थी के अर्थ गउ निवेदन करके पाद सेवा पूर्वक आदर करके विभु भगवान् ने श्रद्धा से बहुत गुण वाला पवित्र अन्नका भोजन कराया ॥ ३९ ॥

उनने जब भोजन कर लिया तब परम धर्मज्ञ श्रीबलरामजी ने प्रीति से तांबूल आदि चंदन आदि से उनकी फिर भी प्रसन्नता की ॥ ४० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

सत्कृतं संमानितम् निरनुग्रहे क्रूरे कथं केन प्रकारेण स्थ जीवितेत्यर्थः । सौनः पशुघाती स एव पालको येषामवीनां मेषाणां त इव तत्तुल्या इत्यर्थः ॥ ४१ ॥

निरनुग्रहतामाह । योऽवधीदिति । तोकान् तोकानि असुतृप् असूनेव तर्पयति यः अतः खलः तस्य कंसस्य प्रजानां हे अक्रूर येषां जीवनमात्रमपि दुर्लभं तेषां वः किं नु कुशलं विचारयाम इति ॥ ४२ ॥

मधुरया वाचा इत्थं सत्कृतः तथैव वाचा परिपृष्टेन प्रश्नेन अध्वपरिश्रमं संसारश्रमम् ॥ ४३ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम
अष्टत्रिंशोऽध्यायः ॥ ३८ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

एवं ज्येष्ठपुत्रेण सत्कृतं सन्तं हे दाशार्हेति कंसस्य यदुकुलद्वेष्टृत्वेन तस्यापि ततो भयं सूचयति शूना हत्वा तया चरतीति शौनः पश्वादिघाती ॥ ४१ ॥

स्वस्य स्वसुरिति सम्बन्धस्य नैकट्यं भागिनेयं हननायोग्यत्वञ्च दर्शितं तत्रापि तोकान् बालापत्यानि तत्रापि क्रोशन्त्य इति निर्दयत्वं महादुष्टत्वञ्च तत्त्व केवलमात्मदेहरक्षार्थमेवेत्याह ॥ असुतृबिति । तदपि तेषु निरपराधेषु मिथ्या दोषारोपादित्याह ॥ खल इति । तस्य प्रजानामधीनानामित्यर्थः । नु सम्बोधने खिलु वितर्के किं कतमत् कुशलम् ॥ ४२ ॥

इत्थमिति तैर्व्याख्यातं तत्राध्वशब्देन संसारवचनमध्वपरिश्रमाभावेन वर्णितत्वात् यद्वाध्वनि परिश्रममिति न मय्युपेष्यत्यरिबुद्धिमच्युत इति पूर्वोक्तरीत्या श्रीव्रजेश्वरादिमनःप्रसादे तु सन्देहात्मको यो मनःखेद आसीत् तमपि जहावित्यर्थः ॥ ४३ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे
श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिण्याम्
अष्टत्रिंशोऽध्याय ॥३८॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

कथं स्थ तत्प्रजानां वः तद्विषयवासिनां वः ॥ ४१—४३ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे
श्रीसुदर्शनसूरिकृतशुकपक्षीये
अष्टत्रिंशोऽध्यायः ॥ ३८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ततो नन्दस्तं कुशलं पप्रच्छ प्रश्नमेवाह । कथमित्यादिना । विमृशाम इ इत्यन्तेन निरनुग्रहे प्रत्युत क्रूरे च दाशार्हे कंसे जीवति

१ इमे श्लोकत्रयी विजयध्वजीये न सन्ति

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

सति कथङ्केन प्रकारेण स्थ जीवथेत्यर्थः । सौनाः पशुघातिनः पालका येषां ते अवयो मेषा इव तत्तुल्या यूयमित्यर्थः ॥ ४१ ॥

निरनुग्रहतामेवाह । योऽवधीदिति । स्वसुर्भगिन्याः क्रोशन्त्याः सत्यास्तोकानपत्यानि अवधीत् असुतृपश्चासून् तर्पयतीति तथा अतः खलः तस्यैवं विधस्य कंसस्य प्रजानां वो युष्माकं कुशलं कीदृशमिति विमृशामहे येषां जीवनमात्रमपि दुर्लभं तेषां वः कुशलं किमिति विचारयामः इत्यर्थः ॥ ४२ ॥

इत्थं नन्देन सूनृतया मधुरया वाचा परिपृष्टः सत्कृतश्चाक्रूरः अध्वश्रमं जहौ ॥ ४३ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्

अष्टत्रिंशोऽध्यायः॥ ३८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्

षट्त्रिंशोऽध्यायः ॥ ३६ ॥ ३८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे

अष्टत्रिंशोऽध्यायः ॥ ३८ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

ततो ग्रामप्रभुणा असम्मानितश्चेत् लौके बालकैः सम्मानितोऽपि न परितुष्टो भवेत् इति सम्भाषणात्मकं सम्माननं नन्दकृतमाह । पप्रच्छेति त्रिभिः । पूर्वमेव सत्कृत इति पूजामकृत्वैव केवलं पप्रच्छ प्रश्नमेवाह । निरनुग्रहे कंसे तस्य समीपे कथं स्थेति सम्भावितोपद्रवस्थानकुशलप्रश्नोऽयं कंसस्य न केऽपि गुणाः सन्तीति जीवनमेवोक्तम् अपकीर्त्या वा जीवति नहि मृतकस्थाने श्मशाने कश्चित्तिष्ठतीति भावः । दाशार्हेति संबोधनं स्वतो वंशतश्च महत्त्वेन स्तोत्रार्थं सर्वत्र स्थितौ दोषाः सन्तीति जन्मभूमित्वात् स्थीयत इति चेत्तत्राह । सौनपाला इति । सूनापरः सौनः नित्यशमिता मांसविक्रयी स एव पालो येषां ते च अवयः गतानुगतिकाः ते यथा अविचार्य तिष्ठन्ति तथा स्थीयत इति स्थितिरनुचितेति भावः ॥ ४१ ॥

कंसस्य निर्दयत्वमाह । योऽवधीदिति । भगिन्याः अतिमान्याः तत्रापि बालकाः तत्रापि क्रोशन्त्या कन्यया सह वा ननु क्वचित् कर्मविशेषे पुत्राद्योऽपि हन्यन्त इति किमर्थं भागिनेयहनने तत्राह । असुतृप् केवलं प्राणपोषकः तेष्वमारितेषु स्वप्राणा गमिष्यन्तीति तदपि न सर्वसम्मत्या नापि क्रियादिना किं तु खलः दुष्टः यत्रैतादृशः प्रभुः तत्र प्रजानां तदधीनानां वो युष्माकं कुशलं किं विमृशामहे किं विचारयामः अतः सन्देहे प्रश्नः अत्र तु विपरीतभाव एवं भिन्नतया कुशलप्रश्ने बन्धुविरोधी दुष्टोऽयमक्रूर इत्युक्तं भवति अतः कुशलसम्भावनायामपि तथा नोक्तवान् ॥ ४२ ॥

एतादृशं नन्दवाक्यमुक्त्वा उपसंहरति । इत्थमिति । सूनृतया अत्यन्तं सत्यरूपया कोमलया सुखदया च वाचा नन्देन सुष्ठु सभाजितः पूजितः अक्रूरः कायिकवाचिकमानसश्रमान् जहौ सुतरां पृष्ट इति अन्याभिनिवेशेन स्मृत्या प्राप्तमपि अध्वपरिश्रमं जहावित्यर्थः ॥ ४३ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे श्रीलक्ष्मणभट्टात्मज-

श्रीमद्वल्लभदीक्षितविरचितायां सुबोधिन्याम्

पञ्चत्रिंशाध्यायविवरणम् ॥ ३५ ॥ ३८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

कथं स्थ जीवथेत्यर्थः । शौनः पशुघाती स एव पालको येषां ते ते अवयः मेषा इवेति न जाने कस्मिंश्चन दिने युष्मान् हनिष्यतीत्येनेति भयमिति भावः ॥ ४१ ॥

तोकान् तोकान्यपत्यानि किं कुशलमिति कुशलाभावे निश्चितेऽपि कथं कुशलं पृच्छाम इति भावः । हे इति सम्बोधने ॥ ४२ ॥

सूनृतया मधुरया वाचा यत् परिपृष्टं प्रश्नस्तेन सभाजितः जहौ तत्याज ॥ ४३ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम्
अष्टत्रिंशोऽत्र दशमे सङ्गतः सङ्गतः सताम् ॥ ३८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

ततो नन्दः सत्कृतं संमानितं पप्रच्छ प्रश्नमेव दर्शयति । निरनुग्रहे क्रूरे कंसे जीवति सति शौनः पशुघ्नः पालो येषां ते शौनपालाः अवयः मेषाः तत्तुल्या यूयं कथङ्केन प्रकारेण स्थ जीवथेत्यर्थः ॥ ४१ ॥

तोकान् तोकानि अपत्यानि तस्य कंसस्य प्रजानां वो युष्माकं किं नु कुशलं विचारयाम हे अक्रूर ! ॥ ४२ ॥

इत्थं सूनृतया वाचा नन्देन अक्रूरः सुसभाजितः सत्कृतः पृष्टश्च तेनैव सत्कारपूर्वकेन परिप्रश्नेन अध्वपरिश्रमं जहौ ॥४३॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे

अष्टत्रिंशाध्यायार्थप्रकाशः ॥ ३८ ॥

भाषा टीका ।

सत्कार हुये पीछे नंदजी ने पूछा कि हे दाशार्ह अक्रूरजी

भाषा टीका।

उस निर्दयी कंस के जीते आप सब कैसे रहते हौ जैसे कि हत्या करने वाला बकरियों का भेडों का रक्षक होवै तौ कैसे बनै॥ ४१॥

जो अपने आत्मा पोषने वाला खल है जिस ने चिन्ता करती हुई अपनी वहन के पुत्रों को मार दिया उस की प्रजा आप लोगों का क्या कुशल हम विचार कर सकते हैं॥ ४२॥

इस प्रकार से सुन्दर वचन से नन्दजी ने जब बडा सत्कार किया तब पूछने से अकूरर जी ने मार्ग के सब परिश्रम को त्याग कर दिया॥ ४३॥

इति श्रीभागवत दशमस्कन्धपूर्वार्धे अठतीसमें अध्याय की भाषाटीका समाप्त॥ ३८॥

इति श्रीमद्भागवते दशमस्कन्धे पूर्वार्धे अष्टात्रिंशोऽध्यायः॥ ३८॥

॥ एकोनचत्वारिंशोऽध्यायः ॥

श्रीशुक उवाच ।

सुखोपविष्टः पर्यङ्के रामकृष्णोरुमानितः ।
लेभे मनोरथान् सर्वान् पथि यान् स चकार ह ॥ १ ॥
किमलभ्यं भगवति प्रसन्ने श्रीनिकेतने ।
तथाऽपि तत्परा राजन्नहि वाञ्छन्ति किञ्चन ॥ २ ॥
सायंतनाशनं कृत्वा भगवान् देवकीसुतः ।
सुहृत्सु वृत्तं कंसस्य पप्रच्छान्यच्चिकीर्षितम् ॥ ३ ॥

श्रीभगवानुवाच ।

[1]तात ! सौम्यागतः कच्चित्स्वागतम्भद्रमस्तु वः ।
अपि स्वज्ञातिबन्धूनामनमीवमनामयम् ॥ ४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

नवत्रिंशे पुरीं गच्छत्यच्युते गोपिकोक्तयः ।
अक्रूरेणाथ कालिन्द्यां विष्णुलोकस्य दर्शनम् ॥

भक्तानां मनोरथाः सत्या भवन्तीति द्योतयन्नाह । सुखोपविष्ट इति । रामकृष्णाभ्यामुरु अधिकं मानितः ॥ १—२ ॥

हे तात हे सौम्य ! स्वागतं यथा तथा आगताः स्वज्ञातिबन्धूनां स्वे सुहृदः ज्ञातयः सपिण्डाः बन्धवो ऽसपिण्डाः संबन्धिनः तेषामपि किमनमीवमपापमदुःखं सुखमिति यावत् अनामयमारोग्यम् ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

यां सद्यो लीळयेल्लीला लोकं शोकमहार्णवे ।
तद्व्यापारोऽपि यः स्वैरमीरयेन्मां स मे गतिः ॥

सुखेत्ययमर्थः ततः श्रीनन्दे तमानन्द्य नक्तं कृत्याय स्वान्तर्गृहं प्रविष्टे सति श्रीरामकृष्णनिदेशेन सेवकपर्यर्पितपर्यङ्के सुखमसङ्कोचमुपविष्टः पुनः श्रीरामकृष्णाभ्यां ताम्बूलगन्धपुष्पजलव्यजनसेवकादि समाधानेनोरुमानितश्च ततः सर्वान् मनोरथान् लेभे तयोरपि स्वान्तर्गृहं प्रविष्टयोः सम्भ्रमे गते सति क्रमेण तत्तत्प्राप्तिभावनया पूर्णमात्मानं मेने तेषामनवच्छेदं वारयति । पथीति ह स्फुटम् एकान्तभक्तियोग्यत्वेन प्रसिद्धं यथा स्यात्तथा इत्यर्थः तदुक्तं देहं भृतामित्यादि तत्र दर्शनस्य सिद्धिः ददर्श कृष्णमित्यादिना दर्शिता नमस्कारस्य रथात्तूर्णमिति तत्रैव हस्तपङ्कजधारणस्य कृपेक्षणस्य च ज्ञेया कृष्णकर्तृकतदालिङ्गनस्य भगवांस्तमिति तत्कर्तृकतातेति सम्बोधनस्य त्वग्रे भावितायां निश्चितत्वात् श्रीसङ्कर्षणेन कंसकृते स्वबन्धुवर्गदुःखप्रश्नस्य च तेनाञ्जलिग्रहणपूर्वकगृहनयनाद्यातिथ्यकरणस्य तु सङ्कर्षणश्चेति ॥ १ ॥

नन्वन्यान् धर्मार्थादिमनोरथान् कथं न चकार तत्राह । किमिति । भगवत्त्वादेव श्रियः प्रेयसीरूपाया हृदि रेखारूपायाश्च निकेतने आश्रये किञ्चनेति पूर्वमुद्दिष्टं भगवत्प्रसादमयतत्तत्प्रकारं विना यत्किञ्चिदन्यदित्यर्थः । देहं भृतामियानर्थ इत्यादेः हे राजन्निति त्वयेदं ज्ञायत एवेति भावः ॥ २ ॥

सायन्तनाशनं कृत्वेति । द्वादश्यामपि द्विर्भोजनमुपानयात् पूर्वं सम्यग्धर्मनियम इति न मर्यादाविरुद्धम् । देवकीसुत इति । तद्भावमात्मनो व्यञ्जयन्नित्यर्थः । अत एव सुहृत्सु यादवेषु वृत्तं वर्तमानां चेष्टां वृत्तामिति पाठे त्वतीतां तथान्यच्चाच्चिकीर्षितम् अध्यवसीयमाना भाविनी चेष्टा तदपि प्रपच्छ यद्वा पाठद्वयेऽपि चेष्टामात्रं यतोऽन्यत्तन्मारणलक्षं चिकीर्षितं स्वयं कर्तुमिष्टमित्यर्थः । ततश्च तद्दोषस्थापनायैव तत्प्रश्न इति भावः । अत्र यद्यपि तदग्रजकर्तृत्वेनैव तेन तत्प्रश्नः पूर्वम्भावितस्तथापि निजानुजाङ्गीकाराद्यपेक्षया क्षणं तूष्णीं स्थितस्याग्रजस्य प्रतिनिधीयमानानुजवचनमग्रजस्यैव प्रतिपन्नम् ॥ ३ ॥

हे तातेति पितृव्यतया पितृतुल्यत्वं हे सौम्येति साधुतया तत्रापि गौरवातिशयो व्यञ्जितः अत एवागता इति बहुत्वं

[1] इतश्चत्वारो विजयध्वजीये न सन्ति ।

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

च इति च आगत इत्येकवचनान्तपाठो बहुत्र भद्रं क्षेममस्तु युष्माकमित्याशीःप्रश्नं सदाचारानुसारात् किम्वा दैन्येनागतस्य तस्य समाश्वासनार्थम् अनमीव अनामयमिति द्वाभ्यां क्रमेण सामान्यविशेषदुःखाभावप्रश्नः अन्यत्तैः यद्वा आगता इत्य- सम्भाव्यस्य तत्र तदागमनस्य सिद्ध्या तदनुमोदनेन तं सन्तोषयति एतदेवाग्रेऽभिव्यञ्जयिष्यति दिष्ट्येत्यत्र कश्चित् स्वागतं किं सुखे- नागतमिति प्रश्नः ॥ ४ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

उरुमानितः कृतबहुमानः ॥ १ ३ ॥
अनमीवम् अशुभरहितम् ॥ ४ ॥ ५ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अथ सम्पन्नमनोरथेनाक्रूरेण विज्ञापितकंसचिकीर्षस्य भगवतः प्रस्थानसमुद्योगसमवलोकनभविष्यद्भगवद्विश्लेषजतापतप्तगोपीजन- मिथः सम्भाषणं मध्ये मार्गमक्रूराय स्वासाधारणदिव्यविग्रहप्रद- र्शनप्रकारं चानुवर्णयत्येकोनचत्वारिंशेन । सुखोपविष्ट इत्यादिना । भक्तानां मनोरथाः सत्या भवन्तीति दर्शयन्नाह । सुखोपविष्ट इति । रामकृष्णाभ्यामुच्चैरधिकं सम्मानितः पर्यङ्के सुखं यथा तथोपविष्टो ऽक्रूरः पथि यान् मनोरथान् चकार तान् सर्वान् लेभे प्राप ॥ १ ॥

तथाहि भगवति षाड्गुण्यपूर्णे श्रीनिकेतने श्रीनिवासे प्रसन्ने सति किमलभ्यं सर्वं सुलभमेवेत्यर्थः । तर्ह्यैश्वर्यकैवल्यभगवत्प्राप्त्या- न्यतमं स्वसमीहितं किमिति न वृण्वते इत्यत्राह तथापि यद्यपि सर्वसुलभमेव तथापि हे राजन् । तत्परा भगवत्पराः किञ्चिदपि न वाञ्छन्ति हि तदनुभवापेक्षया सर्वस्य तुच्छत्वादिति भावः ॥ २ ॥

तदा भगवान् देवकीसुतः सायंकालगतभोजनं कृत्वा स्वसु- हृत्सु वसुदेवादिषु कंसस्य वृत्तिमन्यच्च तस्य चिकीर्षितं पप्रच्छ ॥ ३ ॥

प्रश्नमेवाह । तातेत्यादिभिश्चतुर्भिः । हे तात हे सौम्य ! आगतस्त्वं कच्चित् इदमस्मादिष्टं स्वागतं निर्विघ्नमागमनं जातं किल वो युष्माकं भद्रमस्तु सर्वत्र सर्वदा कुशलमेव भूयात् स्वेषामात्मीयानां ज्ञातीनां सपिण्डानां बन्धूनामसपिण्डानां सपिण्डानाञ्च अनमीवम- शुभरहितम् अनामयमारोग्यमपि स्विदस्ति कच्चित् ॥ ४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

गोचारणायेत्यारभ्य किञ्चाव्रज इत्यन्तेन ग्रन्थेन पथि यान्मनोरथान् चकार दध्यौ तान्लेभे इत्यन्वयः "करणं कारणे काले साधनेऽ- द्भुतादिषु । रूपद्याद्युच्चारणे भेदे ध्यानपद्मासनादिषु" इति यादवः ॥ १ ॥

ननु मुख्यमनोरथो मोक्षः सोऽनेन न लब्धः संसारानिवृत्तेरित्य- त्राह । किमलभ्यमिति । तत्परा मुख्यभागवतास्तत्प्रसादमन्तरेणान्य- न्नाकाङ्क्षन्त इति भावः ॥ २ ॥

सायन्तनाशनं रात्रिभोजनम् ।
सायं प्रातर्द्विजातीनां भोजनं श्रुतिचोदितमिति ॥

याज्ञवल्क्यः सुहृत्सु वसुदेवादिषु वृत्तिं वर्तनम् आजीवलक्षणं वृत्तिर्ग्रथाजीवयोश्चेति च ॥ ३ ॥ ० ॥ ७ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

लेभे मनोरथान् सर्वानिति केषाञ्चित् प्राप्तत्वेन वर्णितत्वात् केषाञ्चिदुपलक्षितत्वेन सूचितत्वात् केषाञ्चित् प्राप्स्यत्वेन निश्चित- त्वादिति नन्वयान् साष्टर्यादीनपि कथं न प्रार्थितवान् तत्राह । किमलभ्यमिति । तत्परा तद्भक्त्येकनिष्ठाः किञ्चन भक्तिव्यतिरिक्तम् ॥ १—१० ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

षड्विंशे भक्तकृपया हरी रूपमदर्शयत् ।
अत्यासक्तिं पूर्वसिद्धां त्यक्त्वापीति निरूप्यते ॥
अक्रूरेण च सम्वादो गमनोद्यम एव च
गोपिकानां विलापश्च भगवद्रूपवर्णनम् ॥
मनोरथस्य सिद्ध्यर्थमुद्यमस्य तथैव च ।
तत्रागत्यागत्यभावे स भिन्न इति संशयात् ॥
चत्वारोऽर्थाः क्रमादुक्ताः पुरुषार्था यतो व्रजे ।
सर्वे सिद्धा इति ज्ञाने भक्तो भूयात्तथापरः ॥

पूर्वाध्याये तस्य मनोरथा निरूपिताः ते वस्तुतो ऽत्रामिप्रेता अपि भक्तिमार्गे भक्तेन कृता इति भगवता कृता इति वक्तु- माह । सुखोपविष्ट इति । नन्दे गृहं गते पश्चात् सुखशय्यायामु- पविष्टः भगवता बलभद्रेण च समाननार्थमुपवेशितः यदि लोके स्वस्मादप्यधिकैः मानो दत्तः तदा किं वक्तव्यं किञ्चित् साधयिष्यति न वेति अतो मनोरथान् सर्वानेव लेभे पुरुषो हि सहस्रं कामाः यतः काममय एवायं तेन सर्वे प्राप्ता इत्या- शङ्क्य विशिनष्टि पथि यान् चकार इति स सोऽक्रूरः पूर्वसिद्धः हेत्याश्चर्ये न हि मार्गे जातो मनोरथः कस्यचित् सिध्यतीति ॥ १ ॥

यद्येवं तर्हि सर्वैरेव भक्तैर्भगवत्समीपमेव गमने कामनैव कर्त्तव्या स्यात् कामनामेव प्रयच्छतीत्याशङ्क्य सकामा नोत्तमा इति शुको निष्कामः तं व्याजेन निन्दन्निवाह । किमलभ्यमिति । फलं द्विविधं नित्यमनित्यं च नित्यं षड्गुणात्मकम् अनित्यं लक्ष्म्याधीनं कृष्णस्तु भगवान् लक्ष्मीपतिश्च स चेत् प्रसन्नः तदधीनं किंवा अलभ्यं भवेत् प्रसादो हि प्रवृत्त आत्मानमपि यच्छति परं प्रसाद एव दुर्लभः न तु प्रसन्ने किञ्चित् अप्रसन्ने न किञ्चित् फलं भवति अतः प्रसादहेतुं प्राप्यकामनां चेत् कुर्यात् तदा भ्रान्त एव स इति वक्तुं तथा भूता न कामयन्त इत्याह । तथापीति । यतस्तत्पराः न तु विषयपराः अयन्तु मध्ये संसर्गात् मध्यमाधिकारं प्राप्त इति कामनां कृतवान् ननु सर्वै- रेवोत्तमैः काम्यते तथा सत्ययम्मार्गः नोत्तमो भवेत् राजन्निति स्नेहेनाप्रतारणार्थं संबोधनं यतस्तत्पराः अत एव किञ्चनापि न वाञ्छन्तीति युक्तमेव ॥ २ ॥

एवं भक्तानां कामनानिर्णयमुक्त्वा कामितशेषं वक्ष्यमाणः सम्भावनयापि सिद्धमुक्तं समर्थयन्नाह । सायन्तनाशनमिति ।

किं नु नः कुशलं पृच्छे एधमाने कुलामये ।
कंसे मातुलनाम्न्यङ्ग ! स्वानां नस्तत्प्रजासु च ॥ ५ ॥
अहो अस्मदभूद्भूरि पित्रोर्वृजिनमार्ययोः ।
यद्धेतोः पुत्रमरणं यद्धेतोर्बन्धनं तयोः ॥ ६ ॥
दिष्ट्याऽद्य दर्शनं स्वानां मह्यं वः सौम्य ! काङ्क्षितम् ।
सञ्जातं वर्ण्यतां तात ! तवागमनकारणम् ॥ ७ ॥

श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी ।

श्रीवन्नन्देन सह वार्त्ता तस्मिन् शय्यायां सुप्ते वा पश्चाद्यशोदागृहे सायंकालभोजनं कृत्वा कंसस्य वृत्तं पप्रच्छेति संबन्धः पश्चाद्भोजने बन्धनश्रवणानन्तरं प्रतीकारमुद्योगं वा अकृत्वा भोजनमनुचितमिति भुक्त्वा पृष्टवान् यशोदायाः सन्तोषार्थं वा तया भोजनार्थं सम्पादितमिति यद्यपि भगवान् जानाति न वा तस्य लौकिके न किञ्चित्कार्यं तथापि देवकीसुत इति भक्तार्थमेवाविर्भूत इति पश्चादेव पृष्टवान् देवकीपुत्रत्वादेव वसुदेवादयः सुहृदः तस्य कदाचित् सुहृत्सु दैत्यावेशाभावे वृत्तं समीचीनमेव श्रूयते अतः सन्देहात् प्रश्नः अक्रूरस्य तथा ज्ञापनार्थं मानुषभावं ज्ञात्वा कदाचिदन्यथापि वदेत् अतो गोपिका वदेवायं परीक्षणीय इति अन्यत् अन्यत्वेऽपि उदासीनेष्वपि चिकीर्षितं कृतं करिष्यमाणं चेत्यर्थः । अन्यथा समागतः को वेद वक्तुं शङ्कतेति अर्थात्कृतं बन्धनादिकं चिकीर्षितं नयनमिति अक्रूरस्य तस्य स्वतः कथने दोष इति भक्तानां बुद्धिग्रहणार्थं शुकस्तथोक्तवान् ॥ ३ ॥

भगवतो वाक्यान्याह चतुर्भिः तस्य तत्सुहृदां च पश्चोत्तापोऽनुमोदनम् आदौ कुशलं पृच्छति तातेति यः शब्दस्तेन मनोरथे निरुक्तः स एव भगवतोक्तः सौम्येति तव न कोऽपि दोष इति । दोषपरिहारार्थं संबोधनं स्वागतं यथा भवति तथा समागतः कच्चित् महोपद्रवे समागतः आहोस्वित् अनुपद्रव इति सन्देहात् क्रियाविशेषणम् अथान्यार्थमागत इति स्ववृत्तान्तं न कथयेदिति तस्य निर्भयत्वाय समाश्वासनमाह । भद्रमस्त्विति समागमनमात्रेणैव सर्वेषामेव भद्रं भविष्यतीति बहुवचनेनोक्तं लोकवत् पृच्छति । अपीति । स्वा भक्ताः ज्ञातयो गोत्रजाः बान्धवाः संबन्धिनः अक्रूर एव वा देहपुत्रादयः स्वशब्देनोच्यन्ते स्वकीया वा ये भवन्त इति प्रश्ने हेतुरुक्तः द्वयं पृच्छति । अनमीवमनामयमिति । कंसनिकटे स्थितानां ब्रह्महत्यादिपापानि प्रत्यहं सम्भवन्तीति अमीवानां पापानामभावः प्रष्टव्यः संसर्गमात्रेणापि चिरकालदुःखदाः आधिव्याधयो भवन्तीति आमयाभावोऽपि प्रष्टव्यः ॥ ४ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

नवत्रिंशे पुरीं याति प्रिये गोप्योऽतिविह्वलाः ।
विलेपुर्यमुनामग्नोऽक्रूरो वैकुण्ठमैक्षत ॥

ननु कथमक्रूरेण केवलं कृष्णदर्शनस्पर्शनादावेव मनोरथाः कृताः ननु पारमेष्ठ्यसायुज्यादौ तत्राह । किमलभ्यमिति ॥ १—३ ॥

स्वे सुहृदः ज्ञातयः सपिण्डाः बन्धवोऽसपिण्डास्तेषां किमनमीवं पापाभावः । अनामयमारोग्यं च ॥ ४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

एकोनचत्वारिंशे भगवदक्रूरसंवादं भगवद्गमनसमुद्योगं भगवद्विरहातुराणां गोपीनां मिथः सम्भाषणमक्रूरेण यमुनायां विष्णुलोकदर्शनं च वर्णयति । सुखोपविष्ट इति । नन्दसत्कारणानन्तरं पर्यङ्के सुखोपविष्टः रामकृष्णाभ्यामुपमानितः ॥ १—३ ॥

कच्चिदिति स्वागतं यथा तथा आगतः अपि च स्वज्ञातिबन्धूनां स्वेषां सुहृदां ज्ञातीनां सपिण्डानां बन्धूनामसपिण्डानां संबन्धिनां च अनमीवमपापं पापकृत्संसर्गस्मरणादेवं प्रश्नः अनामयमारोग्यं दुष्टसङ्गेन बहुचिन्ताकुलानां रोगसम्भावनया एवं प्रश्नः कृतः ॥४॥

भाषा टीका ।

श्रीशुकदेवजी बोले जब अक्रूरजी सुख पूर्वक शयन के शय्या पर बैठ गये तब रामकृष्ण दोनोंने उनका अत्यन्त सत्कार किया तब मार्ग में जिन मनोरथों को उनने किया था वे सब उनके प्राप्त होगये ॥ १ ॥

श्रीनिवास भगवान् के प्रसन्न होजाने पर फिर कुछ दुर्लभ नहीं है तौ भी हे राजन् ! भगवान् की भक्ति वाले पुरुष कुछ भी और नहीं चाहते हैं ॥ २ ॥

देवकी पुत्र भगवान् जब सायंकाळ का भोजन करचुके तब अक्रूरजी के पास जाय कंस की सुहृदों में वृत्ति तथा उसकी करने की क्या इच्छा है सो पूंछते भये ॥ ३ ॥

श्रीभगवान् बोले हे तात ! हे सौम्य आपका अच्छा आगमन भया क्या आप का मंगल होवै आपके सब ज्ञाति तथा बन्धुओं का कुशल तथा नीरोग तो है कि नहीं ॥ ४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

एवं प्रश्नोऽपि मम नातिसंगत इत्याह । किन्विति । अंग हे अक्रूर !

श्रीशुक उवाच ।

पृष्टो भगवता सर्वं वर्णयामास माधवः ।
वैरानुबन्धं यदुषु वसुदेववधोद्यमम् ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

पृच्छे पृच्छामि नोऽस्माकं कुलस्यामये रोगे नो मातुल इति नाम यस्य तस्मिन् नः स्वानां ज्ञातीनां तस्य प्रजासु च ॥ ५ ॥

अस्मदस्मन्निमित्तम् वृजिनं दुःखम् आर्ययोर्निरपराधयोः यद्धेतोर्योऽहमेव हेतुस्तस्मात् ॥ ६ ॥

हे सौम्य ! स्वानां वो दर्शनमद्य मम संजातं तद्दिष्ट्या भद्रम् ॥ ७ ॥

माधवो मधोर्वंशजः ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

कुलामय इति । अनामयस्य विशेषतः प्रश्ने स्वतात्पर्यं दर्शयति तदनुपहतिरेवानामयतया पृष्टेति भावः । नाममात्रेणैव मातुले वस्तुतस्त्वामये यतोऽसौ नागन्तुकः नत्वेकस्य किन्तु सर्वस्यैव कुलस्येत्यतस्तन्नाशनमेवोचितं तथाप्येतावन्तं कालं मातुलनाम्नैवासावुपेक्षित इति भावः । तस्य प्रजासु प्रजानाञ्च यद्वा तदनुजादिरूपासु चैधमानासु ॥ ५ ॥

अस्मदिति पञ्चमी हेतौ बहुत्वमेकत्वे "अस्मदोद्वयोश्चे" ति स्मरणात् यद्धेतोरिति पौनरुक्त्यमनुतापस्वभावेनात्मैकहेतुताविवक्षया च ॥ ६ ॥

सदैवं सति यदद्य वो दर्शनं सम्यगैकान्तिकं जातं तद्दिष्ट्या कीदृशानां स्वानां कंसस्य परजातत्वादस्निग्धत्वाच्च भोजराजत्वेऽपि ममैव ज्ञातीनामित्यर्थः । मदीयस्वजनरूपाणामिति वा यद्वार्षं सर्वनामत्वं स्वेषामात्मीयानामित्यर्थो वा कीदृशं दर्शनं काङ्क्षितं ततस्तावत् प्रियत्वेनैव यदि तत्रत्यस्यैकस्यात्मीयस्य दर्शनं भवेत् तदा तन्मारणयुक्तिः सिद्ध्यतीत्यभिप्रायेणेति भावः । अत्रैतावती विवक्षा अत्रत्या मातापित्रादयस्तत्र तेभ्योऽपि परमस्निग्धा इति तदनुमतिं विना तत्र गन्तुं न शक्नोमि तथा प्रकटेष्वपि तेषु महापराधेषूपेक्षितस्य मातुलनाम्नस्तस्य सहसा जिघांसयाभिगमने तमेव कारणीकर्तुमिच्छामि तस्माद्यदि तादृशोऽपेक्षितः कश्चिदायाति ततस्तदनुरोधेन तेषामनुमतिं लभे तेन सह युक्त्या च तस्यैव तत्कारणत्वमुद्भावयामि तदैव तन्मारणं नीतिपदवीमारोहतीति अतो हे तात ! तवागमनकारणं तावद्वर्ण्यतां तस्मिन् ज्ञाते सत्यायतीं चिन्तां करिष्याम इति भावः ॥ ७ ॥

पृष्ट इति युग्मकम् । भगवत इति भगवन्तं ज्ञापयितुमित्यर्थः । तादर्थ्ये चतुर्थी तन्मारणं तदभीष्टमिति तदर्थमेव वर्णयामास न स्वार्थमित्यर्थः । भगवतेति पाठः क्वचित् यतो मधुवंशजः स्वपक्षत्वादित्यर्थः । सर्वं किमित्यपेक्षायामाह । वैरेति सार्द्धेन वैरानुबन्धं तत्सातत्यम् ॥ ८ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

अस्मत् अस्मत्तः वृजिनं पापम् ॥ ६ ॥ ७ ॥

माधवः मधुकुलप्रभवः ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं प्रश्नोऽपि मम नातीव सङ्गच्छत इत्याह । किन्विति । अङ्ग हे तात ! मातुलनाम्नि नाममात्रेण मातुले न तु वृत्त्येति भावः । तथा चास्माकं कुलामये कुलस्य रोगतुल्ये कंसे वर्द्धमाने सति नोऽस्माकं स्वानां ज्ञातीनां तत्प्रजासु तदपत्येषु च कुशलं किन्नु किमिति पृच्छे ॥ ५ ॥

अहो अस्मत् अस्मत्तो निमित्तादार्ययोः पूज्ययोर्निरपराधयोर्वा मातापित्रोर्भूरि वृजिनं दुःखं प्राप्तं तदेव प्रपञ्चयति । यदु यतो यस्मादस्मत्तो हेतोर्निमित्तात् पुत्राणामस्मदग्रजानां मरणं यदस्मन्निमित्तात्तयोः पित्रोर्बन्धनञ्च प्राप्तम् ॥ ६ ॥

अस्तु तावत् हे सौम्य ! चिरन्वाञ्छितं स्वानां वो युष्माकं दर्शनं त्वद्य सञ्जातमेतद्दिष्ट्या आनन्दजनकमस्माकं हे तात ! तवागमनकारणं वर्ण्यतां कथ्यताम् ॥ ७ ॥

इतीत्थं भगवता पृष्टो माधवो मधुवंशप्रभवोऽक्रूरः सर्वं वर्णयामास सर्वशब्दविवक्षितमेव प्रपञ्चयति । वैरानुबन्धमिति सार्द्धेन यदुषु विषयभूतेषु कंसस्य वैरानुबन्धः वैरमप्रीतिस्तदनुबध्यते यदुषु इत्यनुबन्धः तत्कार्यक्लेशापादनञ्च तथा वसुदेवस्य वधोद्यमं वधार्थं यत्नम् ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

माधवः मधुकुलोद्भवः यस्य कंसस्य सन्देशो यस्य स तथा यस्य कंसस्यार्थे दूतः यत्प्रयोजनमुद्दिश्येति वा तस्य कंसस्य यदुषु वैरानुबन्धं वैरेण सन्ततदोषभावं प्रकृतस्य वैरस्यानुवर्तनं वा

अनुबन्धो दोषभावे प्रकृत्यादौ विनश्वरे ।
मुख्यानुयायिनि शिशौ प्रकृतस्यानुवर्तने ॥

इति ॥ ८ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

कथं त्वयमेव पृच्छ्यते कुशलादिकं कथं न पृच्छ्यते इत्याशङ्क्य तत्र विपरीतनिश्चयं वदन्नाह । किन्तु न इति । तुशब्दः कुशलपक्षं व्यावर्तयति नो ऽस्माकं सर्वेषामेव बन्धुत्वख्यापनाय पित्रादीनात्मत्वेनैव निरूपितवान् सर्वतः अकुशले कुलस्यैवामयरूपे सर्वग्रासकमहाव्याधौ प्रत्यहमेधमाने सति प्रतीकारमकृत्वा किं कुशलं पृच्छे इत्यर्थः । रोगान्त-

यत्सन्देशो यदर्थं वा दूतः सम्प्रेषितः स्वयम् ।
यदुक्तं नारदेनास्य स्वजन्मानकदुन्दुभेः ॥ ९ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

रशङ्काव्यावृत्त्यर्थं नाम गृह्णाति। कंस इति । तर्हि कथमेतावत्कालं ज्ञात्वोपेक्षेति चेत् तत्राह । मातुल नाम्नीति । अमारणार्थं रोगे मातुलसंज्ञा जाता यथा शत्रुर्ब्राह्मण इति अङ्गेति संबोधन-मप्रतारणार्थम् अतः स एव चेदुद्यमं कुर्यात् तदा निवारणे न कोऽपि प्रयास इति सूचितं स्वानां नो बन्धूनां तत्प्रजासु च कुशलं चकारात् कंसप्रजासु ॥ ५ ॥

एवं सिद्धवत्कारेण बन्धूनामनिष्टं सम्भाव्य विशेषतः अप्रश्ने प्रश्ने च तस्य मनसि वैमनस्यं मत्वा कृतं वधादिकमनुशोचन्निवाह । अहो इति । अन्यथा देवकीवसुदेवयोः उपेक्षां करोतीति दुःखं स्यात् अन्यनिमित्तमन्यस्य दुःखं भवतीत्याश्चर्यं यतः अस्मत्तोऽस्मिन्निमित्तं पित्रोर्महद्वृजिनमभूत् तौ वस्तुत आर्यौ अपराधरहितौ अतोऽस्माभिरेव तेषामुपद्रवः कार्यत इत्युक्तं भवति तद्वृजिनं भूरिसम्भाव्यमानमल्पं भविष्यतीति गणयति । यद्धेतोः पुत्रमरणमिति । तयोरष्टमः पुत्रो मारयिष्यतीति मद्धर्मं श्रुत्वा निष्कारणमन्ये पुत्रा मारिताः तयोश्च बन्धनमहं पुत्र इति आद्यावन्ते च ॥ ६ ॥

एवमनुतापमुक्त्वा तस्यागमनाभिनन्दनपूर्वकमागमनप्रयोजनं पृच्छति । दिष्ट्येति । स्वानां यदद्य दर्शनमकस्माज्जातं तद्दिष्ट्या भाग्येन भक्तानां भगवद्दर्शनं भाग्येनेति लौकिकभाषा चैषा यतः हे सौम्य ! मह्यं ममैवोपकाराय सत्फलाय वा लोकोक्त्या ममैव चिरकाङ्क्षितं कदा वा दर्शनं भविष्यतीति सौम्येति संबोधनात् सत्तत्त्वमुसम्प्रत्र हेतुरुक्तः एवमभिनन्दनं कृत्वा पृच्छति। सञ्जातं वर्ण्यतामिति यद्वृत्तं साम्प्रतं तद्वर्ण्यताम् तातेति सम्बोधनमभयत्वाय तवागमने किं कारणं तदपि वर्णय इयं पृष्टम् ॥ ७ ॥

तदा आमूलं सर्वमेवोक्तवानित्याह । पृष्ट इति । भगवता हि पृष्टमन्तर्यामित्वात् वक्तव्यमीश्वरत्वाद्वक्तव्यं सर्वज्ञत्वाद्वक्तव्यम् आत्मत्वाच्च वक्तव्यमिति यतोऽयं माधव इति मधुवंशोत्पन्नः भक्तत्वेनापि गोत्रत्वेनापि सर्वथा वक्तव्यमेवेति तदाह । वैरानुबन्धमिति। वैरमनुबध्यतेऽनेनेति दृढद्वेष्यत्वं ततो वसुदेवस्यापि वधार्थमुद्यमः ॥ ८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

कुशलप्रश्नोऽपि नातिसङ्गच्छत इत्याह । किन्विति । अङ्ग हे अक्रूर ! पृच्छे पृच्छामि नः कुलामये अस्मत्कुलस्य रोगरूपे कंसे नः स्वानाम् अस्मज्ज्ञातीनाम् ॥ ५ ॥

अस्मत् अस्मत्तः मत्तः पुत्रात् वृजिनं दुःखं तदेव किं तत्राह । योऽहमेव हेतुस्तस्मात् ॥ ६ ॥

काङ्क्षितमिति । यदेव कारणीकृत्य तत्र गत्वा कंसं हनिष्यामीति भावः ॥ ७ ॥

माधवः मधुवंशभवः यः धनुर्मखच्छद्मा सन्देशो यस्य यदर्थं चाणूरादिभिर्घातनार्थम् ॥ ८ ॥ ९ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

ननु कुशलप्रश्नं विहाय किमेवं पृच्छसीत्यत आह। किन्नु न इति । हे अङ्ग हे तात ! मातुल इति नाम यस्य ननु वृत्त्या मातुलः तस्मिन् नोऽस्माकं कुलस्य आमये रोगतुल्ये एधमाने नः स्वानां ज्ञातीनां तत्प्रजासु च किंनु कुशलं पृच्छे पृच्छामि ॥ ५ ॥

अहो अस्मत् अस्मत्तः निमित्तभूतात् आर्ययोः निरपराधयोः पित्रोर्भूरि महत् वृजिनं दुःखमभूत् यत् यस्मादस्मत्त एव हेतोः ॥ ६ ॥

हे सौम्य ! स्वानां युष्माकं दर्शनं मह्यं काङ्क्षितं बहुकालतो वाञ्छितमद्यजातम् एतद्दिष्ट्या भद्रं ममानन्दकरमित्यर्थः ॥ ७ ॥

माधवः मधुवंशजः अक्रूरः यदुषु कंसस्य वैरानुबन्धं वैरे हठं वसुदेववधोद्यमं च यः धनुर्मखच्छद्मा सन्देशो यस्य यदर्थं चाणूरादिभिर्घातनार्थं स्वयं दूतः प्रेषितः अस्य श्रीकृष्णस्य स्वजन्म श्रीकृष्णस्य जन्म आनकदुन्दुभेः सकाशात् तत्सर्वं वर्णयामास इति द्वयोरन्वयः ॥ ८ ॥ ९ ॥

भाषा टीका।

हे अक्रूरजी कुल का रोग रूप जो कंस है तिसके बढने पर हम क्या कुशल पूंछेंगे जो कि हमारा मामा है उस के राज्य में जो उनकी प्रजा हैं उनका क्या भला होगा ॥ ५ ॥

अहो हमारे पिता माता दोनों को जो कष्ट भया है जिस मेरे हेतु से उनके पुत्र बहुत मर गये फिर उनका बंधन होगया ॥ ६ ॥

आज बडा मंगल भया कि जो आपने अपने होकर हम को दर्शन दिया सो सुहृद हमारा वांछित था सो तो भया अब हे तात ! आपके आने का कारण कहिये ॥ ७ ॥

श्रीशुकदेवजी बोले भगवान् के पूंछने पर माधव अक्रूर जी ने सब वर्णन किया जैसे कि कंस का यदुओं में वैर तथा वसुदेवजी के बध का उद्योग हुआ है ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका

यो धनुर्मखच्छद्मा संदेशो यस्य यदर्थं चाणूरादिभिर्घातनार्थम् अस्य कृष्णस्य पुरतो वर्णयामास स्वजन्म कृष्णजन्म आनकदुन्दुभेः सकाशात् ॥ ९ ॥

श्रुत्वाऽक्रूरवचः कृष्णो बलश्च परवीरहा ।
प्रहस्य नन्दं पितरं राज्ञादिष्टं विजज्ञतुः ॥ १० ॥
गोपान् समादिशत् सोऽपि गृह्यतां सर्वगोरसः ।
उपायनानि गृह्णीध्वं युज्यन्तां शकटानि च ॥ ११ ॥
यास्यामः श्वो मधुपुरीं दास्यामो नृपते रसान् ।
द्रक्ष्यामः सुमहत् पर्व यान्ति जानपदाः किल ।
एवमाघोषयत् क्षत्त्रा नन्दगोपः स्वगोकुले ॥ १२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

विजज्ञतुर्विशेषेण ज्ञापयामासतुः ॥ १० ॥

सोऽपि नन्दो गोपान् समादिशत् तदेव दर्शयति । गृह्यतामित्यादिना । गोरसः क्षीरादिः उपायनान्युत्तमवस्तूनि ॥ ११ ॥

रसान् घृतादीन् शब्दच्छलेनेदं सूचयति अचिकित्स्यस्य चिकित्सार्थं रसान् दास्याम इति क्षत्त्रा व्रजरक्षाधिकृतेन आघोषयत्सर्वतो घोषितवान् ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

यत्सन्देशः स्वयमात्मनाऽक्रूरो दूतस्तेन सम्प्रेषितो यदर्थं वा तत्सन्देशं तमर्थञ्च वर्णयामास सम्प्रति वैरसातत्यादौ हेतुः यदुक्तमिति तच्चेति पूर्ववत् अन्यत्तैः तत्र सन्देशो हरिवंशानुसारेण वाच्यः नन्दगोपैरित्यादिकः पूर्वोक्त एव ज्ञेयः यदर्थमिति यश्चाणूरादिभिर्घातनमेवार्थो यत्र तादृशं यथा स्यात्तथा प्रेषित इति योज्यम अन्यश्चाक्रूरस्य श्रीकृष्णावेदनवाक्यं श्रीवैशम्पायनेनोक्तं "स्वपुरीं मथुरां तात ! गमिष्यामः सुखाय वै । यास्यन्ति च व्रजाः सर्वे गोपालाः सपरिग्रहाः । कंसाज्ञया समुचितं करमादाय वार्षिकम् । समृद्धस्तस्य कंसस्य भविष्यति धनुर्महः । तद्द्रक्ष्यथः समृद्धञ्च स्वजनैश्च समेष्यथः । पितरं वसुदेवञ्च सततं दुःखभाजनम् । दीनं पुत्रवधश्रान्तं युवामथ समेष्यथः सततं पीड्यमानञ्च कंसेनाशुभबुद्धिना । देशान्ते शोषितं वृद्धं दुःखैः शिथिलताङ्गतम् । कंसस्य भयसंत्रस्तं भवद्भ्याञ्च विना कृतम् । दह्यमानं दिवारात्रौ सोत्कण्ठेनान्तरात्मना । ताञ्च द्रक्ष्यासि गोविन्द पुत्रैरमृदितस्तनीम् । देवकीं देवसङ्काशां सीदन्तीं विहतप्रभाम् । पुत्रशोकेन शुष्यन्तीं त्वद्दर्शनपरायणाम् । वियोगशोकसन्तप्तां विवत्सामिव सौरभीम् । उपप्लुतेक्षणां दीनां नित्यं मलिनवाससम् । स्वर्भानुवदनग्रस्तां शशाङ्कस्य प्रभामिव । त्वद्दर्शनपरां नित्यं तवागमनकाङ्क्षिणीम् । त्वत्प्रवृत्तेन शोकेन सीदन्तीं वै तपस्विनीम् । तत्प्रभावेष्वकुशलां त्वया बाल्ये वियोजिताम् । अरूपज्ञां तव विभो वक्त्रछायास्येन्दुवर्चसः । यदि त्वां जनयित्वा सा देवकी परितप्यते । अपत्यार्थो नु कस्तस्या वरं ह्येवानपत्यता । किञ्च । त्वन्तु शक्रसमः पुत्रो यस्याः स्वसदृशो गुणैः । परेषामप्यभयदो न सा शोचितुमर्हति । वृद्धौ तवाद्य पितरौ परभृत्यत्वमागतौ । भर्त्स्येते त्वत्कृते तेन कंसेनाशुभबुद्धिना । यदि ते देवकी माता पृथिवीवात्मधारिणी । तां शोकसलिले मग्नामुत्तारयितुमर्हसि । तञ्च वृद्धं प्रियसुतं वसुदेवं सुखोचितम् । पुत्रयोगेन संयोज्य कृष्ण ! धर्ममवाप्स्यासि यथा नागः सुदुर्वृत्तो दमितो यमुनाह्रदे । विमूलश्च कृतः शैलो यथा वै भूधरस्त्वया । दर्पोत्सिक्तश्च बलवानारिष्टोऽपि निपातितः । परप्राणहरः केशी दुष्टात्मा च हयो हतः । एतेनैव प्रयत्नेन वृद्धावुद्धृत्य दुःखितौ । यथा धर्ममवाप्नोषि तत्कृष्ण ! परिचिन्त्यताम् निर्भर्त्स्यमानो यैर्दृष्टः पिता ते कंससंसदि । ते सर्वे चक्षुरश्रूणि नेत्रैर्दुःखान्विता भृशम् । गर्भावकृन्तनादीनि दुःखानि च बहून्यपि । माता ते देवकी कृष्ण ! कंसस्य सहते ऽवशेत्यादि ॥ ६ ॥

श्रुत्वा प्रहस्येति प्रहस्य पितरं विजज्ञतुरिति चान्वयः पूर्वत्र स्वामीष्टलाभात् उत्तरत्रावज्ञाज्ञापनेन तच्छङ्कासङ्कोचनायेति ज्ञेयं यतः परः शत्रुर्यो वीरो महाविक्रमः तं हन्तीति तथा सः विज्ञापने हेतुः पितरमिति अत एव राज्ञादिष्टमेव नत्वक्रूरोक्तमन्यदपीत्यर्थः किञ्च राज्ञेति राजाज्ञायास्तादृश्यास्तथैव वक्तुमुचितत्वात् यद्वा उत्तरत्र प्रहस्येत्यत्र हेतुः पितरं स्नेहपरवशमित्यर्थः । विज्ञापने प्रयोजनं परवीरहेति कंसहननार्थमित्यर्थः विजज्ञतुरित्यन्तर्भूतण्यर्थः विज्ञापनं पितृसन्निधानमागत्येति ज्ञेयम् ॥ १० ॥

सोऽपीति । स्वपुत्रपालनव्यग्रत्वेन प्रसिद्धः श्रीनन्दोऽपीत्यर्थः इन्द्रमखभङ्गवत् तस्यैव विज्ञापनमोहनतया परवशीभूयेति भावः एवं सर्वेषामपि विप्रतिपत्तिर्न जातेति ज्ञेयं श्लेषेण श्रीवल्लवेन्द्रोऽपि वत तत्रासंमतो नाभूत् किन्तु समादिशादिति श्रीनारायणेर्व्रजयोषिद्भावभयशोषव्यञ्जना ॥ ११ ॥

यास्याम इति पद्यस्यैवमित्यर्द्धेन शृङ्खला यान्ति जानपदा इत्यभयोक्तिः किल प्रसिद्धौ ॥ १२ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

यत्सन्देशेति । बहुव्रीहिः तं सन्देशं तत्प्रयोजनञ्च वर्णयामासेत्यन्वयः ॥ ६—११ ॥

पर्व उत्सवम् ॥ १२—१४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

यः धनुर्यागच्छद्मा सन्देशो यस्य सः स्वयमात्मा दूतः दूतो

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

कृतः यदर्थं सोपायं समानयनेन चाणूरादिभिर्घातवार्थं प्रेषितः आनकदुन्दुभेः वसुदेवात् सकाशात् स्वजन्म कृष्णजन्म यन्नारदेनास्य कंसस्योक्तं तत्सर्वं वर्णयामासेति सम्बन्धः ॥ ९ ॥

इत्थं वर्णितमक्रूरस्य वच आकर्ण्य कृष्णः परान् शत्रून् वीरान्हन्तीति तथा बलो रामश्च प्रहस्य राज्ञा कंसेनादिष्टं सर्वं नन्दं प्रति विजज्ञतुः विज्ञापयामासतुः ॥१०॥

सोऽपि नन्दोऽपि गोपान् समादिशत् आज्ञापयामास समादेशप्रकारमेवाह । गृह्यतामित्यादिना किलेत्यन्तेन । गोरसः क्षीरादिर्गृह्यतां तथोपायनानि उत्तमवस्तूनि गृह्णीध्वं शकटानि युज्यन्तां वृषभैरिति शेषः ॥ ११ ॥

श्वः समनन्तरेऽह्नि मधुपुरीं प्रति गमिष्यामः नृपतेः कंसस्य सम्प्रदानस्य शेषत्वविवक्षया षष्ठी रसान् क्षीरघृतादीन् दास्यामः यत्र मधुपुर्यां महोत्सवं धनुर्यागं द्रक्ष्यामः जानपदा देशवासिनस्तत्र यान्ति किल तांश्च द्रक्ष्याम इत्यर्थः । इत्थं नन्दगोपः स्वगोकुलक्षत्त्रा सूतेन प्रयोज्यकर्त्रा अघोषयत् ॥ १२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अस्य कंसस्य नारदेन यदुक्तं तदपि किन्तदुक्तं तत्राह । स्वजन्मेति ॥ ९ ॥

विजज्ञतुः विज्ञापयामासतुः ॥ १०—११ ॥

रसानाज्यादीन् हेमानि वा—

> रसो रागे विषे वीर्ये तिक्तादौ पारदे द्रवे ।
>
> रेतस्यास्वादने हेम्नि निर्यासे रसशब्दयोरिति च ॥

पर्व उत्सवं "पक्षसन्धावुत्सवे च ग्रन्थौ पर्व विदुर्बुधा" इति क्षत्त्रा यन्त्रा ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

सोऽपि स्वपुत्रपालनव्यग्रत्वेन प्रसिद्धः श्रीनन्दोऽपीत्यर्थः इन्द्रमखभङ्गवत्तस्यैव विज्ञापनमोहनतया परवशीभूयेति भावः ॥ ११—२१ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

स्वस्य प्रेरणे प्रकारश्च य एव सन्देशो यस्य व्याजेनानेय इति यदर्थं वा स्वयं दूतः तेनैव सम्प्रेषितः अनिष्टभावनया समाकारणार्थमिति एतस्य सर्वस्यापि मूलं नारदवाक्यमित्याह । यदुक्तमिति । नारदोक्तमेव वदति आनकदुन्दुभेः सकाशात् स्वस्य भगवतो जन्मेति अस्य भगवतः स्वस्य देहस्य वा आनकदुन्दुभिपदेन हेतुपूर्वकं सर्वमुक्तवानिति द्वयं सञ्जातं द्वयमागमनकारणं हेतुर्नारदवाक्यमिति ॥ ९ ॥

श्रुत्वेति एवं पञ्च पदार्थान् श्रुत्वा कृष्णः कालात्मा बलश्च क्रियाशक्तियुक्तः एतदर्थमेवावतीर्णौ परस्य शत्रोर्वीराणां हन्ता आवेशी यदस्माभिः कर्तव्यं तदनेनैव कृतमिति प्रहस्य गोप्यं गोप्यमेव विधाय अन्यथा भीतो नन्दो गन्तुं न प्रयच्छेदिति पितृत्वं तस्मिन् स्थापयन्नेव राज्ञा आदिष्टं कौतुकदर्शनार्थमागन्तव्यमिति विजज्ञतुः ज्ञापयामासतुः ॥ १० ॥

भगवदिच्छया पूर्वं शङ्कितोऽपि कंसकृतोत्साहं द्रष्टुं सामग्रीं च सम्पादयितुं सोऽपि नन्दोऽपि गोपान् समादिशत् आस्ति कश्चिद्ग्रामे वाक्यवक्ता तद्द्वारा समादिशदित्यग्रिमवाक्यादवगन्तव्यं तस्याघोषवाक्यान्याह षट् । गृह्यतामित्यादि । सर्वोऽपि गोरसः दधिदुग्धात्मकः गृह्यतामिति नयनार्थं पृथक् क्रियतां यत्प्रथमतः कर्तव्यं तदुच्यते अन्यथा रात्रिशेषे दध्नो मन्थनं स्यात् दुग्धानां च यथेष्टं विनियोगः एते गोपालाः प्रत्येकं समर्थाः मण्डलाधिपतय इव महाराजाः न केवलं गोरसमात्रं ग्राह्यम उपायनान्यपि गृह्णीध्वमभीष्टानि वस्त्राभरणानि यानि भगवदर्थं युज्यन्ते तान्येतद्द्वारा नीतानीति तदर्थमेवमुक्तः एवं पदार्थसम्भृतिमुक्त्वा साधनसम्भृतिमाह । युज्यन्तां शकटानीति । यानि शकटानि गमनयोग्यानि ततः वाहनतश्च योजनं सज्जीकरणं चकारात् रथाश्वादिकं च ॥ ११ ॥

एवं सम्भारस्य प्रयोजनमाह । यास्याम इति । श्व एव मधुपुरीं यास्यामः तर्हि स्वभोजनपर्याप्तमेव गोरसादिकं ग्राह्यमित्याशङ्क्याह । दास्यामो नृपतेरस्मिन्निति । रक्षकाय ह्यवश्यं देयः षष्ठो भागस्तस्यैवेति अतो नृपतेरित्युक्तं पूर्वमसाध्यबुद्ध्या रसा न दत्ताः अधुना तु क्रौर्यं परित्यज्य उत्सवार्थमाकारयतीति साध्यतापरिज्ञानं ननु निर्बन्धाभावात् शङ्कायास्त्वविद्यमानत्वात् किमिति गन्तव्यमिति चेत्तत्राह । द्रक्ष्यामः सुमहत्पर्वेति । इयं चतुर्दशी महत्पर्व भाद्रपदकृष्णाष्टम्यामेकादश वर्षा जाताः तत्र च धनुर्योगो जायत इत्यवश्यं गन्तव्यम् अत्र कापट्यं नास्तीति प्रमाणमाह । यान्ति जानपदा इति । तत्रापि प्रमाणं किलेति प्रसिद्धिः इदं सप्तमं वाक्यं प्रमाणत्वाद्भिन्नमुक्तं प्रत्येकं गृहे यथेयं वार्ता श्रुता भवति तथा अघोषयदित्याह । एवमाघोषयदिति । क्षत्त्रा अन्तःपुराध्यक्षेण स हि रहस्यवेत्ता भवति अथवा गोपान् समीपे समागतानेवमादिशत् स्वगोकुले तु क्षत्त्रा समादिशदिति एवं सर्वत्र श्वो भगवान् गमिष्यतीति प्रकारान्तरेण ज्ञापनमुक्तं सर्वेषां प्रीत्याधिक्याय ॥ १२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

प्रहस्येति । स्वमृत्युमपि निमन्त्र्य स्वान्तिकमानेतुमुपक्रमते युष्माकं राजेत्यर्थस्य द्योतकोऽयं प्रहासः राज्ञादिष्टं धनुर्मखोत्सवनिमन्त्रणं विज्ञापयामासतुर्नतु रहस्यम् ॥ १० ॥

सोऽपि नन्दः ॥ ११ ॥

रसान् घृतादीन् नृपतेः करान् जानपदा इति सर्वजनपदवासिनश्च यान्तीत्यतोऽस्माकमत्र का विप्रतिपत्तिरिति भावः । क्षत्त्रा व्रजनगररक्षाधिकारिणा ॥ १२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

परान् स्वप्रतिकूलान् वीरान् हन्तीति तथा विजज्ञतुः विज्ञापयामासतुः ॥ १० ॥

गोप्यस्तास्तदुपश्रुत्य बभूवुर्व्यथिता भृशम् ।
रामकृष्णौ पुरीं नेतुमक्रूरं व्रजमागतम् ॥ १३ ॥
काश्चित्तत्कृतहृत्तापश्वासम्लानमुखश्रियः ।
स्रंसद्दुकूलवलयकेशग्रन्थ्यश्च काश्चन ॥ १४ ॥
अन्याश्च तदनुध्याननिवृत्ताशेषवृत्तयः ।
नाभ्यजानन्निमं लोकमात्मलोकं गता इव ॥ १५ ॥
स्मरन्त्यश्चापराः शौरेरनुरागस्मितेरिताः ।
हृदि स्पृशश्चित्रपदा गिरः संमुमुहुः स्त्रियः ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

गोरसः क्षीरादिः गृह्यताम् उपायनानि राज्ञे देयान्यन्यानि चोत्तमवस्तूनि गृहीत्वं शकटानि च युज्यन्तामिति गोपान् सोऽपि श्रीनन्दोऽपि समादिशत् आज्ञापयामास ॥ ११ ॥

श्वो ऽनागते ऽह्नि नृपतेः कंसाय रसान् क्षीरादीन् दास्यामः सम्प्रदानस्य शेषत्वविवक्षया षष्ठी क्षत्रा प्रतीहारेण नियोज्यकर्त्रा एवमाघोषयत् सर्वतः घोषितवान्—

क्षत्ता शूद्रात्क्षत्रियजे प्रतीहारे च सारथौ ।
भुजिष्यातनये क्षत्ता नियुक्ते च प्रजासृजीति विश्वः ॥ १२ ॥

भाषा टीका ।

जिस संदेशा को लेकर आये हैं जिस वास्ते दूत बना कर अपने को भेजा है जैसे श्रीकृष्ण के जन्म को नारदजी ने कंस से कहा है सो सब सुना दिया ॥ ९ ॥

श्रीकृष्णजी तथा दूसरे वैरियों के मारने वाले बलरामजी इस बातको सुनकर हंसकर अपने पिता नंद के अर्थ राजा का कथन सुनाते भये ॥ १० ॥

उन नंदजी ने भी सब गोपों को हुकम दिया कि दूध दही आदि सब गोरसों को इकट्ठा करो भेटों को भी लेल्यो और बैलों से गाडियों को जोडो ॥ ११ ॥

कल मथुरा को जायेंगे राजा के लिये सब रस देंगे सुंदर बडा धनुर्याग देखेंगे इसके वास्ते सब देश वासी चले जाते हैं इस प्रकार से कोतवाल के द्वारा नंदजी ने सब जगे खबर करवा दिया ॥ १२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

ताः कृष्णैकजीवना गोप्यस्तदाऽक्रूरमागतमुपश्रुत्येति ॥ १३ ॥

व्यथालिङ्गान्याह पञ्चभिः । काश्चिदिति । तेन श्रवणेन कृतो यो हृत्तापस्तेन यः श्वासस्तेन म्लाना मुखश्रीर्यासां ता बभूवुरिति दुकूलानि च वलयानि च केशग्रन्थयश्च स्रंसन्तो दुकूलादयो यासां तथाभूताः काश्चन बभूवुरिति ॥ १४ ॥

तस्य श्रीकृष्णस्यानुध्यानेन निवृत्ता अशेषाश्चक्षुरादिवृत्तयो यासां ता इमं लोकं देहमपि न जानन्ति स्म मुक्ता इवेति ॥ १५ ॥

अपराः स्त्रियः शौरेर्गिरः स्मरन्त्यः संमुमुहुः कथम्भूताः अनुरागेण यत्स्मितं तेनेरिताः हृदि स्पृशन्तीति हृदि स्पृशो मनोज्ञाः चित्राणि पदानि यासु ताः ॥ १६—१७ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

उपश्रुत्य कस्यापि कुतश्चित् कथयतो मुखाच्छ्रुत्वा साक्षात्तासु कस्यापि तत्कथनाशक्तेः भृशमत्यर्थं दुःखिताः परमदुःखात्मकमपि मरणं सुखं मेनिरे इत्यर्थः । अन्यत्तैः यद्वा ताः स्वभावसिद्धप्रेयसीभावाः तत् आघोषणमात्रं श्रुत्वा भृशं व्यथिताः अन्यास्तु साधनसिद्धप्रेयसीभावास्तौ नेतुमागतमक्रूरमुपश्रुत्य भृशं व्यथिता इति योज्यं किन्तु तासामपीयं व्यथा तद्विरहभीत्यैव जाता तत्र गतस्य तस्यानिष्टशङ्कया तु न जाता तासां मुकुन्द इत्यादि वक्ष्यमाणात् तत्रमेन परमधीरश्रीमदुपनन्दादिसर्ववृद्धवृन्दसम्मतिरेव तत्र कारणम् अन्यथा सद्य एव तासामन्तर्द्धानं स्यादिति लीलाशक्तिरेव तादृशस्फूर्त्तिमरौत्सीदिति श्रेयं विरहभीतिरपि न सार्वकालिकी तत्रासार्वकालिकस्थितिनिश्चयेन नन्दसुनुरिति श्रीमन्नन्दनन्दनत्वेनैव निश्चेष्यमाणत्वात् तासां मुकुन्द इत्यादिकस्याशङ्कामयमात्रत्वात् अन्यथा तथापि प्रागुक्तमेव स्यात् आशामात्रजीवातुत्वात् प्रोषितप्रेयसीनाम् एवमपि तादृश्यवस्था परमानुरागस्वभावेनैव ज्ञेया ॥ १३ ॥

तत्र रासदर्शितप्रेमतारतम्येनासामुत्तरोत्तरमवस्थावैशिष्ट्यमाह । काश्चिदिति त्रिभिः । यद्यप्यत्र पूर्वोक्ताया एव व्यथाया लिङ्गवर्णनमिति तदुपश्रुतिकृतत्वं स्वत एव लभ्यते तथापि तत्कृतेत्यधिकप्रयोगस्तदवस्थायां तदुपश्रवणस्य स्वरूपमात्रेणैव तत्त्वस्याश्च तदनुध्यानेत्यादि अर्थानुसन्धानार्थकाललवविलम्बजातं तदनुध्यानादिकार्यद्वारेति बोधयति । स्रंसदित्यर्द्धं तु कार्श्यादिनिर्दैन्यात् तत् सहयोगाच्च तत् कृतत्वेनान्वितं गम्यमिति श्रवणमात्र-

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

अन्यत्वादत्र च तत्र चार्थानुसन्धानान्तराण्यपि कैमुत्येन गम्या-नीति एवं सति प्रथमद्वयमुत्तमं प्रायोनित्यसिद्धश्च स्वाभाविक-हार्दात् उत्तरं कनिष्ठं प्रायःसाधनसिद्धश्च तादृक्त्वाभावात् अत्र च प्रथमे द्वये उत्तरोत्तरं श्रैष्ठ्यमुत्तरे तु न्यूनत्वमिति ज्ञेयम् अथ क्रमेण व्याख्यायते तत्रैकासां भद्रादीनां सहसा श्वास-वैवर्ण्ये आह काश्चिदित्यर्द्धेन श्वासेन म्लानाः सद्यो विवर्णी-भूताः मुखश्रियस्तिलकादयोऽपि किं पुनर्वर्णो यासां ताः तत्कृतहृत्तापादिपरपरत्रापि गम्यं पूर्वपूर्वावस्थाश्च अथ कासा-ञ्चित् श्यामलादीनां सहसा कार्श्यमप्याह । स्रंसदिति ॥ १४ ॥

अथ चन्द्रावल्यादीनां कासाञ्चिदर्थानुसन्धाने विच्छेदभीत्या तदावेशानन्तरं प्रणयमाह । अन्याश्चेति । पूर्वासामप्यनुध्याने सद्य एतदुक्तं वैशिष्ट्यार्थमात्मलोकं स्वस्वरूपं प्राप्ता जीवन्मुक्ता इवेति देहाज्ञानमात्रे दृष्टान्तः अन्यत्वैः यद्वा तस्य श्रीकृष्ण-गमनस्यानुध्यानं कथमसौ यास्यति कथन्वा तत्र स्थास्यति कथञ्च वयं जीवेम इत्यादिलक्षणा निरन्तरचिन्ता तेन निवृत्ताशेषवृत्तयः इमं साक्षाद्वर्त्तमानमपि लोकं देहदैहिकं सर्वमेव ॥ १५ ॥

अथ श्रीराधादीनां प्रणयातिशयमप्याह । स्मरन्त्य इति । शौरेरिति च । सम्प्रति शूरापत्यतामभिमत्य यो गन्तुकामस्तस्ये-त्यर्थ इति तासां पक्षपातेन श्रीशुकस्य प्रणयेर्ष्योक्तिः अनु-रागेण इत्यनुरागव्यञ्जकस्वरेण विलासेन च हृदिस्पृश इत्यर्थेन चित्रपदा इति शब्देन गिरां सौष्ठवमुक्तं चित्राणि यमकानुप्रा-सादिलक्षणानि अद्भुतानि पदानि यासु ताः इत्यमूभिः सह श्रीभगवतः प्रणयविशेषो दर्शितः अतएव समुमुहुः महाघाता-दिनाप्यप्रतिकार्यत्वेनातिशयितं मोहं प्रापुः स्त्रिय इति तत्र स्त्रैण न धृतपमप्रतिकार्यत्वं दर्शितम् ॥ १६ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

वृत्तयः इन्द्रियवृत्तयः आत्मैव लोकः आत्मलोकनं तत् साक्षात्-कारिण्यः योगारूढा इवेत्यर्थः ॥ १५—१८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

हे नृप ! ता गोकुलस्था गोप्यस्तदा अक्रूरं रामकृष्णावानेतु-मागतमुपश्रुत्य व्यथिता बभूवुः ॥ १३ ॥

व्यथालिङ्गान्याह पञ्चभिः । काश्चिदिति । काश्चित् गोप्यः तस्य श्रवणेन कृतो हृत्तापस्तेन यः श्वासः सोष्णो निःश्वासमारुतस्तेन म्लाना मुखश्रीर्यासां ताः श्लथानि दुकूलानि वलयानि केशा अन्ययश्च यासां तथा भूताः काश्चन बभूवुः ॥ १४ ॥

अन्यास्तु तस्य भगवतोऽनुध्यानेन निवृत्ता अशेषाश्चक्षुरादि-वृत्तयो यासां ता इमं लोकं देहमपि नाभ्यजानन् नानुसमदधुः आत्मैव लोकस्तं गता आत्मसाक्षात्कारिणः योगारूढा इवेत्यर्थः ॥ १५ ॥

अपराः स्त्रियः शौरेर्गिरः स्मरन्त्यः संमुमुहुः कथंभूताः गिरः अनुरागेण सस्मितं वेरिताः हृदिस्पृशन्तीति तथा मनोज्ञाः विचित्राणि पदानि यासु ताः ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

रामकृष्णौ पुरीं नेतुमागतमक्रूरं श्रुत्वा ज्ञात्वा गोपस्त्रिय एवमा-पन्नाः बभूवुरित्यन्वयः तत्कथमिति विविच्याह । काश्चिदिति । तस्य कृष्णस्य मधुपुरीगमनश्रवणकृताभ्यां हृत्तापश्वासाभ्यां म्लाना मुख-श्रीर्यासां तास्तथा ॥ १३ ॥

स्रंसद्दुकूलत्वादावपि तत्कृतेति सम्बन्धयितव्यं यद्वा तत्कृते कृष्णकृते तदनुध्यानेन निवृत्ताशेषेन्द्रियवृत्तयः ॥ १४ ॥

इमं लोकं देहमात्मलोकं मोक्षं हृदि स्पृशः हृदयङ्गमाः मनोहराः अनुरागस्मितपूर्वकमीरिताः ॥ १५ ॥ १६ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

अतस्तथैव गोपिकानां आर्तिमप्याह । गोप्य इति । ताः पूर्वोक्ताः तद्भगवान् गमिष्यतीति यद्यपि लोकानां ध्याने न कोऽप्युक्तवान् तथापि लोकानामेव घोषात् श्रुतमित्याह । उपश्रुत्येति । श्रवणमा-त्रेणैव भृशं व्यथिता बभूवुः केवलं न निष्प्रपञ्चाः किन्तु भगव-दर्थं तद्भगवति प्रचलितं स्वकृतं व्यर्थमिति युक्तमेवोक्तं बभूवु-र्व्यथिता इति । यथा महत्यां पीडायां प्राणस्य क्लेशप्रवृत्तिषु मूर्च्छिता भवन्ति तथा जाता इत्यर्थः । कदाचित् कंसः व्याघ्रे-नाकारयतीति ज्ञात्वा व्यथिता भविष्यन्तीत्याशङ्क्य तत्परिहा-रार्थं निमित्तमनुवदति । रामकृष्णाविति । सर्वासामेवोपद्रवार्थमुभ-योर्ग्रहणम् अन्यतरस्याप्यत्र स्थितौ भगवानागच्छेदित्युभयोर्ग्रहणं पुरीं गतस्य न शीघ्रमागमनमिति सत्यं न भविष्यतीत्याशङ्क्य हेतुमाह । अक्रूरं व्रजमागतमिति । अक्रूर इति नाम्ना प्रवेशं प्राप्तवान् एकविधा तु मूर्च्छिता एव जाताः सर्वथा अनिर्वृता वा ॥ १३ ॥

अन्यासां वृत्तिमाह । काश्चिदिति । त्रिगुणा एताः गुणातीता ज्ञानप्रधाना भक्तिप्रधानाश्चेति पञ्चविधास्तत्र राजस्यो व्यथां प्राप्त-वत्यः सात्त्विक्यस्तु श्रवणकृतो योऽयं हृत्तापः तेन सहितो योऽयं श्वासः तेन म्लाना मुखश्रीर्यासां यद्यपि पूर्णज्ञानाः तथापि सगुणत्वात् बलिष्ठोऽयं विषय इति हृत्ताप उत्पन्न एव तस्यावान्तरकार्यं श्वासः परमकार्यं म्लानतेति अन्याः पुनः श्रुत्वा क्षीणा एव जाताः महाभये शुष्कदेहाः अतः स्रंसद्-दुकूला जाताः स्रंसद्वलयाश्च केशेषु ग्रन्थयोऽपि स्रंसन्तो जाताः एता अन्तर्भयेनैव शुष्काः सम्मोह न त्वेकदेश इति ता एता एव सात्त्विक्य इति केचित् ॥ १४ ॥

ज्ञाननिष्ठा अन्याश्चेति तस्य भगवतः अनुध्यानेन स्मरणान-न्तरं प्राप्तेन ध्यानेन निवृत्ताः अशेषाणामिन्द्रियान्तःकरणदे-हानां वृत्तयो यासां ततः सुषुप्ता इव इमं लोकं नाभ्यजानन् आत्मैव लोकः "अहरहर्ब्रह्मलोकं गच्छन्ती"ति श्रुतेः वस्तु-तस्त्वेताः समाधिस्थिता इति असम्प्रज्ञातत्वं वक्तुं सुषुप्तिदृ-ष्टान्तीकृता ॥ १५ ॥

गतिं सुललितां चेष्टां स्निग्धहासावलोकनम् ।
शोकापहानि नर्माणि प्रोद्दामचरितानि च ॥ १७ ॥
चिन्तयन्त्यो मुकुन्दस्य भीता विरहकातराः ।
समेताः सङ्घशः प्रोचुरश्रुमुख्योऽच्युताशयाः ॥ १८ ॥

गोप्य ऊचुः ।

अहो विधातस्तव न क्वचिद्दया संयोज्य मैत्र्या प्रणयेन देहिनः ।
तांश्चाकृतार्थान् वियुनङ्क्ष्यपार्थकं विक्रीडितं तेऽर्भकचेष्टितं यथा ॥ १९ ॥

श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी ।

भक्तास्तु मूर्च्छिता जाता इत्याह । स्मरन्त्य इति । अपराः कदाचिदपि परभावं नापन्नाः सेवकीभूताः चकाराद्द्वये पश्यन्त्योऽपि अत एव अनुरागपूर्वकस्मितेन मन्दहासेन ईरिताः प्रेरिताः भक्तानां परमानन्दं दातुं महाननुरागः भेदेन रसग्रहणार्थं स्मितमिति तेन स्वस्थानाच्चालिताः भगवत एता हृदि स्पृश इति तथाकरणे हेतुः गिरां वा विशेषणं पूर्वं भगवता परमसौख्यार्थं या गिर ईरिताः ताः स्मरन्त्यः सम्मुमुहुरिति चित्राणि विचित्राणि पदानि यासु कदापि न त्यक्ष्यामि त्वं प्राण भूतस्यासीति पदान्येव न तु वाक्यानि वाक्यार्थाभावात् तदानीं पदार्थस्मारकत्वेन पदान्येव तानि गिरः स्मृत्वा सम्मुमुहुर्मूर्च्छिताः भगवान् गच्छतीति श्रुत्वा पुनश्च न गमिष्यतीति स्मृत्वा उभयोर्विरोधे निर्धारार्थं यतमानाः अनिश्चयान्मूर्च्छिताः एव जाता इत्यर्थः ॥ १६ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

यस्या ताः प्रसिद्धाः कृष्णैकजीवना गोप्यः अक्रूरमागतमुपश्रुत्य ॥ १३ ॥

व्यथालिङ्गानि पञ्चभिर्वर्णयंस्तासु भद्रादीनां श्वासवैवर्ण्ये आह । काश्चिदिति । तेन श्रवणेन कृतो यः सन्तापस्तस्माच्च यः श्वासस्तेन म्लाना मुखश्रीर्यासां ताः श्यामलादीनां सहसा कार्श्यमप्याह । स्रंसदिति ॥ १४ ॥

चन्द्रावल्यादीनां प्रणयमप्याह । तस्यानुध्यानेन ध्यानधारया निवृत्ता अशेषाश्चक्षुरादिवृत्तयो यासां ताः । इमं लोकं देहदैहिकपदार्थं सर्वमेव आत्मलोकं परमात्मस्वरूपं प्राप्ता इवेति देहाद्यज्ञानमात्रेण दृष्टान्तः । नत्वास्वादांशेऽपि । काचकाञ्चनयोरिव ब्रह्मास्वादप्रेमास्वादयोस्तुल्यत्वानौचित्यात् ॥ १५ ॥

राधादीनान्तु प्रणयातिशयमाह । स्मरन्त्य इति । शौरेरिति । सम्प्रति शूरापत्यत्वमभिमत्य यो गन्तुकामस्तस्येति तासां पक्षपातिनः श्रीशुकस्य प्रणयेर्ष्योक्तिः । अनुरागव्यञ्जकं यत् स्मितं तेन ईरिताः चित्राणि विस्मयजनकानि पदानि यासु ता गिरः न पारयेऽहं निरवद्य संयुजामित्यादि वाक्यानि स्मरन्त्यः सम्यगेव मुमुहुः । पूर्वास्तद्रूपस्यैव ध्यानधारयैव मुमुहुः । एतास्तु तद्वाचोऽपि स्मरणेनापि सम्यगेव मुमुहुरिति पूर्वतः प्रेमवैशिष्ट्यवत्यो ज्ञेयाः ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

यासां क्षणमपि कृष्णं विना युगशतमिव भवेत्ताः पूर्वोक्तस्वभावाः तत् तदा रामकृष्णौ पुरीं नेतुमक्रूरमागतमुपश्रुत्य भृशमत्यर्थं व्यथिता बभूवुः ॥ १३ ॥

व्यथाचिह्नानि वर्णयति । काश्चिदिति पञ्चभिः । काश्चित् गोप्यः तेन श्रवणेन कृतो यो हृत्तापस्तेन यः श्वासस्तेन म्लाना मुखश्रीर्यासां तथाभूताः बभूवुः काश्चन तु गोप्यः स्रंसन्तः दुकूलादयो यासां ताः तथाभूता बभूवुः ॥ १४ ॥

अन्यास्तु तस्य श्रीकृष्णस्य अनुध्यानेन निवृत्ता अशेषाः सकलाश्चक्षुरादिवृत्तयो यासां लोक्यन्ते कर्मफलानि भुज्यन्ते अनेनेति लोको देहस्तमिमं देहं नाभ्यजानन् न जानन्ति स्म "एष त आत्मान्तर्य्यामी" ति श्रुतिप्रसिद्ध आत्मैव लोकस्तं गताः तद्ध्यानपरा इव आत्मनः परमात्मनः लोकं गताः त्यक्तप्राकृतदेहाः मुक्ता इवेति ॥ १५ ॥

अपराः स्त्रियस्तु शौरेः श्रीकृष्णस्य अनुरागयुक्तेन स्मितेन ईरिताः उच्चारिताः हृदि स्पृशन्तीति तथा मनोज्ञाः चित्राणि पदानि यासु ताः तथाभूता गिरः स्मरन्त्यो मुमुहुः ॥ १६ ॥ १७ ॥

भाषा टीका ।

गोपिन ने जब सुना कि रामकृष्ण दोनों को मथुरा लेजाने को अक्रूर व्रज में आये हैं तब तो बडी दुखित होगईं ॥ १३ ॥

कोइ गोपी उस चिंता के मारे ताप से श्वास लेने से मुख मलिन होकर दुखित होगईं उनके वस्त्र केशबंध माला वस्त्रों की गांठ सब वस्तु खुलने लग गईं ॥ १४ ॥

कोई भगवान् में लग गईं तो उनके सब काम छूट गये जैसे कोइ परलोक को चला जावै तैसे उनने इस लोक को भूल दिया ॥ १५ ॥

कोई दूसरी गोपी भगवान् के अनुराग युक्त वचन मंद हास के कथन जो की वडे चित्र पदों वाली वाणी के हैं हृदय से नहीं छूटते हैं उनको स्मरण करके मोहित होगईं ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

विरहेण कातरा विह्वलाः अच्युते आशयश्चित्तं यासां ताः ॥ १८ ॥

यस्त्वं प्रदर्श्यासितकुन्तलावृतं मुकुन्दवक्त्रं सुकपोलमुन्नसम् ।
शोकापनोदस्मितलेशसुन्दरं करोषि पारोक्ष्यमसाधु ते कृतम् ॥ २० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

कृष्णसङ्गतिं विधाय विघट्टयतीति विधातारं प्रत्येवाक्रोशन्त्य आहुः । अहो इति । मैत्र्या हिताचरणेन प्रणयेन स्नेहेन च अकृतार्थानप्राप्तभोगानपि तान् वियुनङ्क्षि वियोजयसि तस्मान्न तव दया बालिशोऽपि त्वमित्याहुः । अपार्थकमिति ॥ १९ ॥

विगर्हितं तवेदं कर्मेत्याहुः । यस्त्वमिति । शोकमपनुदतीति शोकापनोदः सचासौ स्मितलेशश्च गूढहासस्तेन सुन्दरं मुकुन्दस्य वक्त्रं सकृत्प्रदर्श्य पुनस्तस्य पारोक्ष्यमदृश्यतां करोष्यतस्तव कृतं कर्मासाधु निन्द्यमित्यर्थः ॥ २० ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

पुनश्च किं जातमिति शङ्कासंस्कारप्राबल्येन लब्धबाह्याः परमोत्कण्ठया श्रीव्रजेश्वरपुरद्वार एवागताः समानदुःखत्वेन सर्वाः संहत्य क्रन्दन्त्यो विलेपुरित्याह । गतिमिति द्वाभ्याम् । गतिं व्रजप्रवेशनिर्गमनादिसमयेषु स्वयमुत्कण्ठाभिर्मुहुर्दृष्टां तत्रैव चेष्टां सखिभिः सह नानाविलासरूपां तत्र चात्मनः प्रति निगूढं सस्नेहहासावलोकनं त्रयाणामेव विशेषणं सुखचितामिति स्निग्धेत्यत्र तु लिङ्गव्यत्ययः । तत्र सुशब्दार्थस्य परां कोटिं ता एव जानन्तीति नासौ व्याख्यातुं शक्यते एवं लब्धेऽपि स्निग्धहासावलोकने तदङ्गसङ्गप्राप्तावविश्वस्तेषु खलु तदनुतापहारीणि नर्माणि तत्प्राप्तिव्यञ्जकपरिहासभङ्गी ततो नर्मणैव सङ्केतिते कुञ्जादौ प्रोद्दामचरितानि गाढानुरागोद्भटसौरतलीलाश्च ॥ १७ ॥

चिन्तयन्त्यो हन्त तत्तदस्माकं सम्प्रति विच्छिन्नमिति सानुतापं भावयन्त्यः । अत एवाश्रुभिर्लिप्तं मुखखण्डमेव तुण्डं यासां वाङ्मुखाः सत्यः यतः स्वभावेनैव निमेषव्यवहितेऽपि भीता अधुनातूपसन्नेन महाविरहेण विह्वलाः तत्र सर्वत्र हेतुः । अच्युते स्थितः तन्मयत्वात् स एव वा आशयो यासां ताः । अच्युतेति तेनापि तदपरित्यागापेक्षया । सङ्घशः मिलनेऽप्यवान्तरसङ्घभेदात् प्रकर्षेण शोकप्रकर्षत्वेनोचुः । अत्र सर्वासामप्येकवचनस्फूर्त्तिस्तदानीमिति तदात्मकहृदयताप्राप्तेः । कदाचिदखिलमुख्या वाक्यं शृण्वतीनामन्यासां तन्मात्रस्यानुमोदनेनोपचारादनुकरणात् पूरणाद्वा । एतच्च तासां परिदेवनं प्रादोषिकघोषणामारभ्य तत्प्रस्थानपर्य्यन्तं ज्ञेयम् ॥ १८ ॥

श्रीकृष्णसङ्गताविव विच्छेदेऽपि कमप्यन्यहेतुमनालोचयन्त्यो विधातारमेव तत्र हेतुं मन्वानास्तमेवाक्रोशन्त्य आहुः । अहो इति त्रिभिः । अहो खेदे हे विधातरिति सर्वं त्वमेव विदधासीति भावः । अतः सर्वेष्वपि जीवेषु दयां कर्त्तुमर्हस्यापि तव कस्मिंश्चिद्दया नास्ति विधातृत्वमेव दर्शयन्त्यो निर्दयत्वञ्च दर्शयन्ति । संयोज्येत्यादिना । देहितः देहाभिमानवशेनेतस्ततो वर्त्तमानानपि जीवान् अकस्मादन्योऽन्यं मैत्र्यापि केवलं तथा प्रणयेन च संयोज्येति विधातृत्वं दर्शितम् एवं श्रीकृष्णसङ्गतौ निजगुणादिराहित्यं सूचितम् अप्यर्थे चकारः संयोज्यापि अकृतार्थानपि वियोजयसि विविधचेष्टितम् अपार्थकम् अपगतौ अर्थौ हेतुप्रयोजने यस्येति केन हेतुना किमर्थं वा संयोजयसि अकृतार्थानपि पश्चात् केन हेतुना किमर्थम्वा वियोजयसीति नावगच्छाम इत्यर्थः । हेतौ प्रयोजने च सति संयोजितानामकस्माद्वियोजनमयुक्तमेवेति भावः । अपार्थकत्वे दृष्टान्तः अर्भके चेष्टितं यथा हेतुं प्रयोजनञ्च विना केवलं मौढ्यादेव तद्वदित्यर्थः अन्यैस्तु तत्र हिताचरणेन तत्कृतप्रीत्या स्नेहेन सम्बन्धादिकृतप्रीत्येत्यर्थः । यद्वा स्वयं मैत्र्योपलक्षितः सन् प्रणयेन मिथो विश्रब्धप्रेम्णा सह संयोज्येति योज्यम् ॥ १९ ॥

भवतु वा सामान्यतस्तव तादृशं चरितं विशेषतस्त्विदं गर्हितमित्याहुः । यस्त्वमिति । प्रकर्षेण रसानुभवपूर्वं दर्शयित्वा असितैः कुन्तलैः कुटिलालकैरावृतं श्रीललाटोपरिभागे भ्रमरवन्निपातेन व्याप्तमित्यूर्ध्वभागस्य शोभा सुकपोलमिति पार्श्वद्वयस्य उन्नसमिति मध्यस्य शोभेति मधुरस्मितेन विकसदधरबिम्बतदारुण्यच्छुरितश्रीमद्दन्तपङ्क्तिमाधुर्य्याभ्यामन्तर्भागस्यापि सूचिता शोकश्चार्त्तानां सर्वेषां तत ईदृशस्य तद्वक्त्रस्य परोक्षताचरणात्तव कर्मासाध्वेव अत एव श्रीविष्णुपुराणे "सारं समस्तगोष्ठस्य विधिना हरता हरिम् । प्रहृतं गोपयोषित्सु निर्घृणेन दुरात्मना" इति अन्यैस्तु यद्वा यस्त्वं मुकुन्दस्य सर्वदुःखमोचकत्वेन तन्नामधेयस्य वक्त्रं प्रकर्षेण दर्शयित्वा पारोक्ष्यं करोषि तस्य ते तव कृतमसाध्वेव चातुर्वर्ण्यमित्यादिवत् स्वार्थे ष्यञ् आस्तां तावन्मैत्रीप्रणयपूर्वकतदीयसंयोगस्य वियोजनं नाम तद्दर्शनमात्रस्यापि गर्हितं किमुत तत्प्रकृष्टदर्शनस्येत्यर्थः प्रकर्षमेव दर्शयन्ति । असितेत्यादि विशेषणैः ॥ २० ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

प्रणयेन विश्वासेन वियुनंक्षि । वियोजयसि । अपार्थकं प्रयोजनशून्यं पारोक्ष्यं मुखस्येति शेषः । दुःखानर्हत्वज्ञानशून्यवत् ॥ १६ — २२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

काश्चित्तु विरहेण भाविना कातरा विह्वलाः मुकुन्दस्य सुन्दरतरां गतिं तथाभूतां चेष्टां रासक्रीडाद्यात्मिकां स्निग्धो यो हासस्तद्युक्तमवलोकनं च शोकमपघ्नन्तीति तथा तानि कर्माणि पूतनाशकटासुरादिवधात्मकानि कर्माणि च प्रोद्दामानि गम्भीराणि चरितानि शयनासनभोजनादीनि च ॥ १७ ॥

स्मरन्त्यः अच्युत एवाशयश्चित्तं यासां ताः अश्रूणि मुखेषु यासां ताः सङ्घशः समेत्य तत्र तत्र सङ्घशो भूत्वा प्रोचुः ॥ १८ ॥

उक्तिमेवाह । अहो इत्यादिभिः तावत् श्रीकृष्णसङ्गतिं विधाय विघटयतीति विधातारं प्रत्येवाक्रोशन्त्य आहुः । अहो इति त्रिभिः ।

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

हे विधातस्तव क्वचिदपि दया नास्त्यहो तथा हि मैत्र्या हिताचरणेन प्रणयेन स्नेहेन विश्वासेन च देहिनो जनान् तावन्मिथः संयोज्य अकृतार्थानप्राप्तभोगानेव तान् वियुनंक्षि वियोजयसि तस्मात्तव दया नास्ति अतस्तव चेष्टितमपार्थकं प्रयोजनशून्यं यथा बालकचेष्टितं तद्वन्मूर्खस्त्वमिति भावः ॥ १९ ॥

विगर्हितं तव कर्मेत्याहुः । यस्त्वमिति । आसितैः कुन्तलैरावृत शोभनौ कपोलौ यस्मिन् उन्नता नासिका यस्मिन् तत् शोकमपनुदतीति शोकापनोदः सचासौ स्मितलेशस्तेन सुन्दरं मुकुन्दस्य वक्त्रमस्माकं प्रदर्श्य यस्त्वं पुनस्तस्य पारोक्ष्यमदृश्यतां करोषि अतस्ते तव कृतं कर्म असाधु निन्द्यमित्यर्थः ॥ २० ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

चित्राणि पदानि यासु तास्तथा गतिं यात्रां चेष्टाम् अङ्गविषयां स्निग्धहासेन सहितमवलोकनम् ॥ १७ ॥

अच्युताशयाः अच्युतबुद्धयः ॥ १८ ॥

हे विधातः तव क्वचिद्दया नास्ति कथं प्रणयेन देहिनः जन्तून्मैत्र्या मित्रभावेन संयोज्य एकीकृत्य पुनस्तान् देहिनः अकृतार्थान् अप्राप्तमनोरथानेव वियुनंक्षि वियुक्तदेहान् करोषि अहो इत्यन्वयः अतस्ते तव चेष्टितमपार्थकं निष्फलं कथमिति अर्भकचेष्टितं यथा तथेति ॥ १९ ॥

अत्र मया किमवद्यमकारीति तत्राह । यस्त्वमिति । यस्त्वं सुकपोलादिविशिष्टं मुकुन्दवक्त्रं प्रदर्श्य दर्शयित्वा पुनःपारोक्ष्यं परोक्षविषयं चक्षुरगोचरं करोषि यस्मात्त्वया कृतमसाध्वमङ्गलमित्यन्वयः शोकस्यापनोदो निरासो येन सः शोकापनोदः स्मितलेशः तथा तेन सुन्दरं मनोहरं स्मितस्य लेशः स्मितलेशः ॥ २० ॥

———

श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी ।

अन्याः पुनः सर्वा मिलिताः जीवनार्थं विरहवाक्यान्युक्तवत्य इत्याह । गतिमिति द्वाभ्याम् । विषयक्रियाभ्यां स्वसमीपे समागच्छतो भगवतः गतिं चिन्तयन्त्यः ततः सुष्ठु ललितां चेष्टां समाश्लेषादिरूपां ततः स्निग्धो योऽयं हासपूर्वावलोकः कन्दर्पलीलायाम् एवं कृत्वा कियत्कालवियोगानन्तरं पुनरागतस्य पूर्वं विरहकृतः योऽयं शोकः तद्दूरीकरणसमर्थानि नर्माणि परिहासवाक्यानि ततो मत्तगजवत् प्रकर्षेण उद्दामानि गतशृङ्खलारूपाणि यानि चरितानि स्वच्छन्दलीलारूपाणि चकारादन्यान्यप्यवान्तररूपाणि ॥ १७ ॥

नन्वेताः असत्य इव निषिद्धविषयपराः किमिति निरूप्यन्ते इत्याशङ्क्याह । मुकुन्दस्येति । मोक्षदातुः मोक्षसिध्यर्थमेता लीलाः ततः पूर्वावस्था सर्वस्वरूपा गतेति अत्यन्तं भीताः धैर्याद्यभावार्थमाह । विरहकातरा इति । अल्पविरहेऽप्यत्यन्तं दीनाः शीतभीता इव ततः समानशीलव्यसनाः सर्वाः प्रत्येकं मिलिताः समूहभेदेन जाताः विंशतिभेदाः परमप्रेमयुक्ताः तद्भावाभिव्यञ्जकाश्रुमुचः कामव्याप्तचित्ता अपि तथा भवन्तीति तद्व्यावृत्त्यर्थमाह । अच्युताशयाः सत्यः प्रोचुः अन्योऽन्यजीवनार्थम् ॥ १८ ॥

एतद्वाक्यैरेव भगवच्चरित्रं स्पष्टमिति न पुनर्निरूप्यते निरोधान्ते युगलरूपा द्वादश निरूपिताः तथैवैता इति तासां द्वादशधा वचनान्युच्यन्ते अत्रोपालम्भ्याः प्रथमतो ब्रह्मा यद्वाक्याद्भगवानागतः ततो भगवान् ततोऽक्रूरः साधारण्येन सर्वे ततो बान्धवाः ततः स्वात्मेति एवं षड्विधाः तत्र प्रथमं त्रिभिः उपालम्भमाहुः । अहो इति–

> अविवेको दुरात्मत्वं दत्तापहरणं तथा ।
> त्रिदोषं ब्रह्मणः प्राहुर्व्यवहाराद्यतः कृतम् ॥

आदावविवेकमाहुः । अहो इत्याश्चर्ये जगत्कर्तुर्वेदगर्भस्याप्यविवेक इति ननु मया संयोजनमेव कृतं वियोगकर्ता त्वन्य एवेति चेत् तत्राहुः । विधातरिति । सर्वं विदधातीति अविशेषाद्वियोजकोऽपि त्वमेव तर्हि युक्तमेवेति चेत्तत्राहुः । तव न क्वचिद्दयेति उत्पादितेषु स्वापत्यरूपेषु शिक्षार्थं दण्डयेऽपि क्वचिद्दया भवति कश्चिच्छरीरमेव छिनत्ति कश्चित् द्रव्यं कश्चिदिह लोकपरलोकौ कश्चिद्विषयानिति अस्माकं तु भगवान् सर्वमेवेति कर्नाप्यशन दया चेत् तदंशस्थापनार्थं वा भगवन्तं स्थापयेत् दभावात् क्वचिदपि न दयेति । ननु भवददृष्टादेव भगवान्मिलितः तदपगमे गच्छतीति चेत् तत्राहुः । संयोज्य मैत्र्येति । भगवता सह जीवानां योगेनादृष्टं कारणं वियोगजनितत्वात् सोऽन्तर्याम्यात्मा च तं प्रार्थयित्वा बहिराविर्भावयित्वा सहजसंबन्धव्यतिरेकेणैव मैत्र्या संयोज्य तान् पुनर्जीवान् भगवत्संयुक्तफलाभावात् अकृतार्थान् वियुनंक्षि वियोजयसि "स यदि पितृलोककामो भवती" त्यादिश्रुतौ सर्वकामनासिद्धिरुक्ता पुनरावृत्त्यभावश्च आनन्दमयमात्मानमुपसङ्क्रम्येत्यादावपि तथा अत्र तु न कोऽपि मनोरथोऽतः परं सेत्स्यति आवृत्तिश्च भविष्यतीति सर्वप्रकारेणाभिलषितभगवद्वियोगादकृतार्थान् एव जीवानस्मान्वियुनंक्षि वियोजयसि भवेदप्येतदेवं यदि वियोजने तव वा कश्चित् पुरुषार्थः सिध्येत् अतस्ते विक्रीडितं विशेषक्रीडारूपमेतत् अर्भकचेष्टितप्रायं जातम् अलौकिकमपि कृत्वा उत्तमामपि प्रतिमां मृदादिनिर्मितां क्षणादेव दूरीकुर्वन्तीति ब्रह्मणोऽप्यविवेकः ॥ १९ ॥

किं च नाविवेकमात्रं किं तु असमीचीनमेव करोतीत्याहुः यस्त्वमिति । त्वं ह्यस्मदुपकारार्थं शोकापनोदार्थं मोक्षार्थं वा भगवन्मुखारविन्दं प्रदर्शितवान् तदप्रदर्शनदशायामल्पमेव शोकादिकं स्थितं साम्प्रतं त्वाधिकं जायत इति यदपि त्वया कृतं तदप्यसाध्वेव कृतं यथा मोहकः समीचीनमिव प्रदर्श्यासमीचीनं करोति तथात्वमुपपादयन्ति प्रथमतो मुकुन्दस्य मोक्षदातुर्वक्त्रं प्रधानभूतं यतो मोक्षो भवत्येव तदपि बहुभिरेव सर्वैरावृतं तदाह । आसितैः कुन्तलैरावृतमिति नीलालकावृतत्वेन स्वस्यानधिकारेऽपि तत्प्राप्तिः सूचिता कामरस एवायं परितो वेष्टितः तिष्ठतीति ततः सुकपोलं रसानुभवयोग्यमूर्ध्वा नासिका यस्मिन्निति पूर्णरसत्वेन प्रफुल्लरूपं शोकादिनिवृत्तिस्तु तद्धर्मलेशेनापि भवतीत्याहुः । शोकापनोदनं करोति स्मितस्य लेश एव तादृशोऽप्यत्र सौन्दर्यं एवोपक्षीयते एतादृशं मुखं सर्वदा दर्शनयोग्यं पारोक्ष्यं करोषि परोक्षस्य धर्मयुक्तं करोषि न ह्यपारोक्ष्यैकस्वरूपं भगवन्मुखारविन्दं स्वतः परोक्षतामापद्यते त्वं पुनरव्यक्तमपि व्यक्तं करोषीतीदमपि विपरीतं करोषि तत्तु सर्वोपकारीति ते कृतं साधु भवति इदं त्वसाधु किं बहुना

क्रूरस्त्वमक्रूरसमाख्यया स्म नश्चक्षुर्हि दत्तं हरसे बताज्ञवत् ।
येनैकदेशेऽखिलसर्गसौष्ठवं त्वदीयमद्राक्ष्म वयं मधुद्विषः ॥ २१ ॥
न नन्दसूनुः क्षणभङ्गसौहृदः समीक्षते नः स्वकृतातुरा बत ।
विहाय गेहान् स्वजनान् सुतान् पतींस्तद्दास्यमद्धोपगता नवप्रियः ॥ २२ ॥
सुखं प्रभाता रजनीयमाशिषः सत्या बभूवुः पुरयोषितां ध्रुवम् ।
याः संप्रविष्टस्य मुखं व्रजस्पतेः पास्यन्त्यपाङ्गोत्कलितस्मितासवम् ॥ २३ ॥
तासां मुकुन्दो मधुमञ्जुभाषितैर्गृहीतचित्तः परवान् मनस्व्यपि ।
कथं पुनर्नः प्रतियास्यतेऽबला ! ग्राम्याः सलज्जस्मितविभ्रमैर्भ्रमन् ॥ २४ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

ते तवाप्यसाधु अनेन कर्मणा तवापि नेष्टं सेत्स्यतीति भावः अत एव भगवान् न ब्रह्मलोकमार्गेण गतः ॥ २० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

एवं मूर्च्छादिसञ्चारिग्रस्ता एव रात्रिं गमयित्वा पुनश्च किं जातमिति शङ्कासञ्चारिसंस्कारप्राबल्येन लब्धबाह्यानुसन्धानाः परमोत्कण्ठया प्रातर्व्रजराजपुरद्वार एव आगताः भाविविरहवत्त्वेन साम्यात् सर्वाः संहत्य विलेपुरित्याह । गतिमिति । निमेषविरहतोऽपि भीताः सम्प्रति तु भाविना महाविरहेण विह्वलाः सङ्घशः समेताः यूथैर्यूथैः सङ्गत्य मिलिताः ॥ १७ ॥ १८ ॥

कृष्णस्य सङ्गताविव विच्छेदेऽपि कमप्यन्यं हेतुमनालोचयन्त्यो विधातारमेव दूषयन्ति । अहो इति । हे विधातरहो आश्चर्यं तवाप्येवमन्याय इति भावः । कोऽसौ तव क्वचिदपि न दयेत्येष एव ननु कथमेवं निश्चिनुध्वे तत्राहुः । मैत्र्या सख्येन यः प्रकृष्टो नयः मनःप्राणबुद्ध्यादीनां परस्परप्रापणं तेन देहिनः संयोज्य तांश्च अकृतार्थान् अप्राप्ततत्सङ्गानेव वियुनाङ्क्षि वियोजयसि एवार्थे चकारः न च तद्वियोजनात्तव किञ्चित्प्रयोजनमस्तीत्याहुः । अपगतोऽर्थः फलं यतस्तत् अतस्तव चेष्टितमर्भकचेष्टितं यथेति त्वमतिबालिश एवेति भावः ॥ १९ ॥

सर्वपितामहस्य मम नार्भकतुल्यत्वमिति चेत्तर्हि त्वं लोकानाममद्रकारीत्याहुः । यो विधातापि भूत्वा त्वं मुकुन्दवक्त्रं शोकस्यापनोदो यस्मात्तेन स्मितलेशेन सुन्दरं प्रदर्श्य तस्य पारोक्ष्यम् अदृश्यत्वं करोष्यतस्तव कृतं कर्म असाधु अभद्रं निन्द्यमित्यर्थः ॥२०॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

विरहेण भाविना कातराः व्याकुलाः अच्युते आशयश्चित्तं यासां ताः गृहात् गृहात् समेत्य सङ्घशः तत्र तत्र सङ्घशो भूत्वा प्रोचुः ॥ १८ ॥

तासामुक्तिं प्रपञ्चयति । अहो इत्यादिद्वादशभिः तत्र तावत् श्रीकृष्णेन सहास्मान् संयोज्य वियोजयतीति विधातारं प्रत्याक्रोशन्त्य आहुः । अहो इति त्रिभिः अहो विधातः ! देहिनः निरपराधिनो जनान् अस्मान् मैत्र्या हिताचरणेन प्रणयेन स्नेहेन च मिथः संयोज्य तांश्चाकृतार्थान् अप्राप्तभोगान् वियुनङ्क्षि वियोजयसि अतो ज्ञायते क्वचिदपि तव दया नास्ति सर्वत्र निर्दयोऽसीत्यर्थः । न केवलं निर्दयः अपि तु बालिशोऽपि त्वमित्याहुः । यथा अर्भकचेष्टितमपार्थकं निरर्थकं भविता तथा ते चेष्टितं कर्मापार्थकमेव ॥ १९ ॥

किंच तव चेष्टितं न केवलं निरर्थकमात्रमपित्वनर्थकरमित्याहुः । यस्त्वमिति । असितैः कुन्तलैरावृतं शोभनौ कपोलौ यस्मिन् उन्नता नासिका यस्मिन् शोकमपनुदति दूरीकरोतीति तथा सचासौ स्मितलेशः मन्दहासः तेन सुन्दरं मनोहरं मुकुन्दस्य वक्त्रं सकृत्प्रदर्श्य पुनस्तस्य पारोक्ष्यमदृश्यतां करोषि । अतस्तव कृतं कर्म असाधु अस्माकमहितमित्यर्थः ॥ २० ॥

भाषा टीका ।

भगवान् की सुंदर ललितगति चेष्टा स्नेह युक्त हंसी सहित चितवन शोक के नाश करने वाले कौतुक बडे मनोहर चरित्र ॥ १७ ॥

मुकुंद भगवान् की इन वातों को स्मरण करके भीत होकर अधीरज होकर इकट्ठी होकर भगवान् में मन लगाकर मुख नेत्रों से आंसु गिराती हुई वोलीं ॥ १८ ॥

गोपी वोलीं अहो हे विधाता ! तेरेको कहीं दया नहीं है जो कि तू प्राणियों को मित्रता से जोडकर फिर उनके मनोरथ पूरे नहीं होते ही जुदा कर देता है सो तेरा काम ऐसा है कि जैसी व्यर्थ वालकों की क्रीडा होवै ॥ १९ ॥

जोकि तू नील वालों से शोभित सुन्दर कपोल वाले उन्नत नासिका वाले शोक को नाश करने योग्य मंदहास से सुंदर शोभित श्रीमुकुंद के मुखारविंद को दर्शन कराकर फिर दूर करता है तो यह तेरा वडा बुरा काम है ॥ २० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

किञ्च दत्तापहारित्वेनातिक्रूरस्त्वमित्याहुः । क्रूरस्त्वमिति । नन्वक्रूरो हरति नाहमिति चेदत आहुः । अक्रूर समाख्ययेति । नह्येवं कर्तुमन्यः प्रभवत्यतो नामान्तरेण ध्रुवं त्वमेवागतोऽसि

श्रीधरस्वामिकृतभावार्थदीपिका ।

कृष्णं हरामि न युष्मच्चक्षुरिति चेन्न येन त्वद्दत्तेन चक्षुषा मधुद्विष एकदेशे नेत्रवक्त्रादौ त्वदीयं समग्रसृष्टिनैपुण्यमद्राक्ष्म दृष्टवत्यो वयं तच्चक्षुः अयम्भावः मम सर्वं रहस्यमाभिर्ज्ञातमित्यमर्षेणैव कृष्णं वियोजयन्नस्मानन्धीकरोषीति ॥ २१ ॥

विधातारं विहाय परस्परमूचुः । न नन्दसूनुरिति । बतेति खेदे क्षणभङ्गमस्थिरं सौहृदं यस्य सः गृहादीन्विहायाद्धा साक्षात्तस्यैव दास्यमुपगताः स्वकृतातुरास्तत्कृतेनैव स्मितादिना परवशा अपि नोऽस्मान्न समीक्षते नवं प्रियं यस्य सः अत एवं निवारयाम इति भावः ॥ २२ ॥

सेर्ष्यमूचुः । सुखं प्रभातेति । व्रजस्पतेः श्रीकृष्णस्य मुखं पास्यन्त्यादरेण द्रक्ष्यन्ति कथंभूतम् अपाङ्गेन नेत्रप्रान्तेनोत्कालितमुज्जृम्भितं स्मितमेवासवो रसो यस्मिंस्तत् यद्वा अपाङ्गोत्कलितस्मितेन सवरूपं यन्मुखं ततश्च पानं मुख्यमेव संभावयन्ति ॥ २३ ॥

ननु द्वित्राणि दिनानि तथा भवतु नाम तथाप्यस्मत्स्नेहाकृष्टः पित्रादिभिश्च परावर्तित आगमिष्यतीत्याशङ्क्याहुः। हे अबलास्तासां मधुरमञ्जुभिर्भाषितैर्वशीकृतचित्तस्तथा तासां सलज्जस्मितैर्विभ्रमैर्भ्रमन् परवान् पित्रादिपरतन्त्रोऽपि यद्वा व्रजे परे ऽन्ये बन्धवः सन्ति यस्य तथा मनस्वी धीरोऽपि ग्राम्या आविद्यधा नः कथं प्रतियास्यते प्रत्येष्यति न कथंचिदित्यर्थः ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

हि एव त्वमेव करोषि वत खेदे तथा श्रीविष्णुपुराणेऽपि "अहो गोपीजनस्यास्य दर्शयित्वा महानिधिम् । उत्कृत्तान्यद्य नेत्राणि विधात्राकरुणात्मने"ति यथाज्ञः पापापापमजानन् जनो दत्तमपि हरति तद्वदित्यर्थः । किन्तु त्वं सर्वज्ञोऽपि अज्ञायस इति परमदुःखदानमात्रतात्पर्यत्वेन ततोऽपि पापवैशिष्ट्यमिति भावः । कथं चक्षुर्हृतं तत्राहुर्येनेति त्वदीयमखिलसर्गसौष्ठवं मधुद्विष एकदेशेऽद्राक्ष्मेति तदीयनेत्रवक्त्रादिसौन्दर्यामृतार्णवकलांशांश एव पद्मचन्द्रादिसौन्दर्यं पर्याप्तमपश्यामेत्यर्थः अतो ऽनभिरुचेरन्यत्राप्रवर्त्तमानस्य तन्मात्रविषयस्य चक्षुषस्तद्धरणेन चक्षुष एव हरणं तत्र मधुद्विष इति योग्यपदोपादानं नारायणसमो गुणैरिति वाक्यात् सर्वातिशयिगुणशालित्वेनैव तत्पर्यायस्येत्यर्थः । यद्वा मक्षिकेव मधु तदितरसर्वप्राकृताप्राकृतवाञ्छनीयं तस्मै द्वेष्टि तदीयानां तद्धरतीति तस्येति यद्वा मधुपुरीपतित्वात् तत्समशीलत्वाच्च कंस एव मधु तद्द्विष इति तं हत्वा तद्राज्ये लब्धे पुनरत्रागमनं दुर्लभमिति भावः ॥ २१ ॥

उदासीनं विधातारं किं निन्दामः परमात्मीयोऽस्मज्जीवनैकहेतुः श्रीनन्दसूनुरेव तथाविध इत्याहुर्नेति । नन्दसूनुर्वल्लवेन्द्रकुमारत्वेनाप्यस्मत्समीक्षणयोग्यः किं पुनरस्माभिस्तादृशप्रेमबन्धेन सोऽपीत्यर्थः । न समीक्षते नापेक्षते अपृष्ट्वैव दूरमस्मानेव्यमात् समीक्षिष्यत इति च व्याख्यानेऽपि संप्रत्यपेक्षाया अदर्शनादिति भावः । अतो दृढसौहृदत्वेन ज्ञातत्वेऽपि क्षणभङ्गसौहृद एवासौ न समीक्षायां हेतुविशेषमाहुर्विहायेति । गेहादीनां यथोत्तरं श्रैष्ठमूह्यम् अद्धा साक्षात् स्वदेहार्पणादिना दासीत्वमुप सामीप्येन प्राप्ताः इति दास्यविशेषः सूचितः तदुपगतावेव हेतुः स्वकृतातुरा इति तैर्व्याख्यातं यद्वा संप्रति समीक्षायां विशेषतो हेत्वन्तरमाहुः । स्वकृतेन परित्यागेनातुरा रोगेणैव पीडिताः न केवलं न समीक्षते किञ्च नवप्रियोऽसौ सर्वान् व्रजजनान् विहाय अक्रूरेण सममात्मीयतां व्यज्य गमनदर्शनान्नवप्रिय एवासौ संप्रति माधुरीभिरेव प्रीतिं विधास्यतीत्यर्थः ॥ २२ ॥

अत एव सेर्ष्यमूचुः पञ्चभिः । आशिषः विप्राद्याशीर्वादाः दीर्घमनोरथा वा सत्याः सफलाः सम्यक् पर्यन्तः प्रविष्टस्य व्रजस्पतेरिति व्रजजनानामेव दृश्यमिति भावः । सुष्ठ्वाशीः पास्यन्ति नेत्ररसनया स्वादयिष्यन्ति अत एव श्रीविष्णुपुराणे "सुप्रभाताद्य रजनी मथुरावासियोषिताम् । पास्यन्त्यच्युतवक्त्राब्जं यासां नेत्राणि पङ्क्तय" इति ॥ २३ ॥

भ्रमन् सर्वं विस्मरन् अन्यत्तैः परवान् गृहीतचित्तत्वादेव तत्पराधीनः सन्नित्यर्थः। तथाच तत्रैव "मथुरां प्राप्य गोविन्दः कथं गोकुलमेष्यति । नागरस्त्रीकलालापमधु श्रोत्रेण पास्यति । विलसिवाक्यपानेषु नागरीणां कृतास्पदम् । चित्तमस्य कथं भूयो ग्राम्यगोपीषु यास्यति । भावगर्भस्मितं वाक्यं विलासललिता गतिः । नागरीणामतीवैतत् कटाक्षेक्षितमेव च । ग्राम्यो हरिरयं तासां विलासनिगडैर्यतः । भवतीनां पुनः पार्श्वे कया युक्त्या समेष्यती"ति ॥ २४ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

व्रजस्पतेः व्रजपतेः ॥ २३ ॥ २४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

नन्वक्रूरस्तस्य पारोक्ष्यं करोति नत्वहमित्याशङ्क्याहुः क्रूरस्त्वमिति । येन त्वया नोऽस्मभ्यं चक्षुर्दत्तं तत्पुनस्त्वमेवाज्ञवत् दुःखानभिज्ञवन्मूर्खवदक्रूरसमाख्यया हरसे अक्रूर इति व्याजमात्रमेव न सः त्वत्तोऽन्यः नह्येवं कर्त्तुमन्यः प्रभवतीति अभिप्रायेणाक्रूरसमाख्ययेत्युक्तम् अतो नामान्तरेण ध्रुवं त्वमेवागतो दत्तमपहरन् क्रूर इत्यर्थः । ननु कृष्णं हरामि नतु युष्मच्चक्षुरित्याशङ्क्याहुः । येन त्वद्दत्तेन चक्षुषा मधुद्विषः श्रीकृष्णस्यैकदेशे नेत्रवक्त्रादौ त्वदीयसमग्रसृष्टिनैपुण्यमद्राक्ष्म दृष्टवत्यो वयम् अयंभावः तव सर्वं रहस्यमस्माभिर्ज्ञातमित्यमर्षेण कृष्णं वियोजयन्नस्मानन्धीकरोषीति ॥ २१ ॥

विधातारं विहाय परस्परमाहुः । न नन्दसूनुरिति । बतेति खेदे क्षणभङ्गमस्थिरं सौहृदं यस्य स नन्दसूनुर्गेहादीन् विहाय अद्धा साक्षात्स्वस्य तस्यैव दास्यमुपगताः स्वकृतेनैव स्मितादिना आतुराः परवशा अपि नोऽस्मानपि न समीक्षिता न समीक्षिष्यते तत्र हेतुं सेर्ष्यमाहुः । नवप्रियः नवः पुरस्त्रीजनः प्रियो यस्य तथाभूतः अत एवैनं वारयाम इति भावः ॥ २२ ॥

पुनः सेर्ष्यमाहुः । सुखप्रभातेति । पुरयोषितां मधुपुरीस्थयोषिता

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

इयं रात्रिः सुखप्रभाता तथा तासामाशिषः कामाश्च सत्या बभूवुः । तत्र हेतुं वदन्त्यस्ता विशिंषन्ति । याः पुरयोषितः पुर्यां प्रविष्टस्य व्रजस्पतेः श्रीकृष्णस्य सुडागम आर्षः पारस्करादेराकृतिगणत्वाद्वा अपाङ्गेन नेत्रान्तेन उत्कलितमुज्जृम्भितं स्मितमेवासवो रसो यस्य तन्मुखं पास्यन्ति मुखकमलस्थस्मितासवं पास्यन्तीति भावः ॥ २३ ॥

मथुराङ्गतोऽपि पुनरायास्यतीत्युद्भावयन्तीः काश्चित्प्रत्याहुः । तासामिति । हे अबलाः ! तासां पुरस्त्रीणां मधुवन्मञ्जुभिर्भाषितैः वशीकृतचित्तस्तथा तासां सलज्जितैर्विभ्रमैर्भ्रमन् मुकुन्दः स्वतो मनस्वी धीरोऽपि परवान् सन् परस्त्रीपरतन्त्रः ग्राम्याः अविदग्धा नोऽस्मान् प्रति कथं यास्यते न कथञ्चिदित्यर्थः ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

हे विधातः ! त्वमक्रूरसमाख्यया अनृशंसो ऽयमकठिनोऽयमिति गुणसमानतास्ना स्मृतः पूर्वमधुना क्रूर इति स्मर्यसे कुतः येन चक्षुषा मधुद्विष एकदेशे मुखाद्येकावयवे तदीयं तस्य तव विद्यमानम् अखिलस्य विश्वस्य सर्गे सृष्टौ यत्सौन्दर्यं तदद्राक्ष्म तत् त्वया हि एवं दत्तं चक्षुरस्मत्कृतघ्नवद्धरसे बत कष्टमित्यन्वयः—

क्रूरो भयङ्करे क्रन्धे नृशंसे कठिनोष्णयोरिति च

यद्वा तस्य मधुद्विषो विद्यमानमखिलं पूर्णं सर्गं स्वाभाविकमकृत्रिमं सौष्ठवमन्यत्समम् ॥ २१ ॥

इदानीं कृष्णं कटाक्षीकृत्य वदन्ति । नेति । स्वकृते स्वात्मानं कृष्णमुद्दिश्यातुराः क्लिष्टा अपि नोऽस्मान्न समीक्षते न चिन्तयति यत्तस्मान्नन्दसूनुः क्षणभङ्गसौहृदः नवप्रियः नूतनप्रियश्च कीदृशीरस्मान् गेहादीन् विहाय स्वदास्यमद्धा प्रत्यक्षमुपागताः अद्धा सत्यं वा अद्धा प्रत्यक्षसत्ययोरिति च ॥ २२ ॥

सुखप्रभातत्वे निमित्तमाहुः । या इति । व्रजस्पतेः गोकुलनाथस्य सकारश्छान्दसः अपाङ्गेन कटाक्षनिरीक्षणेन उत्कलितमुत्पन्नमभीष्टवर्षकीकृतं वा स्मितमेवासवममृतं यस्मिंस्तथा ॥ २३ ॥

इदानीं कृष्णमवजानन्त्यो वदन्ति । मनस्वी महामनाः अपि मुकुन्दो मथुराङ्गतः पुनः नोऽस्मान् प्रति कथं प्रतियास्यते आगमिष्यते न केनापीत्यन्वयः । अनागमने निमित्तमाहुः । तासां मथुराङ्गनानां मधुतन्तुभाषितैः मधुवत्पुष्परसवत् मञ्जुभिः श्रुतिमनोहरैर्वचनैः गृहीतचित्तो वशीकृतचेताः अतएव परवान् पराधीनः

परवांस्तु पराधीनो निघ्नः परवशः स्मृत इति हलायुधः ।

तासां मधुरवचनमेव कारणं न त्वन्यदित्याशयेनाहुः । अबलाः सुरतचातुर्यविधुराः किञ्च ग्राम्याः अश्लीललीलाः तदपि मुख्यं नेत्याहुः । अलज्जाः लज्जारहिताः प्राविलासोऽपि सुखसूचको नेत्याहुः । स्मितेन सह विभ्रमन्ती भ्रूर्यासां तास्तथा "समुद्रामिव नेत्याहुः । स्मितेन सह विभ्रमन्ती भ्रूर्यासां तास्तथा "समुद्रोर्मिवदुःखस्यदुग्भ्रूविलासेन सुन्दरी । निद्रितं मदनं या तु बोधयेत्सा वराङ्गने"ति कामन्दकः यद्वा हे अबलाः ता मथुराङ्गनाः ग्राम्याः नित्यसुरतकर्मोपेताः स्मिता स्फुटीकृता विभ्रमन्ती भ्रूर्यासां तास्तथा ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

न समीक्षते ॥ २२—२४ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

नन्वक्रूर एव नयति भगवन्तं किमित्यहमुपालभ्ये इति चेत्तत्राहुः । न हि त्वया समानीतः त्वद्वाक्येन समागतः अक्रूरेण नेतुं शक्यः अतस्त्वमेव भगवन्नयनात् क्रूरात्मापि सन् अक्रूरोऽहमिति विपरीतं नाम धृत्वा भद्रामङ्गलवारवत् अन्यथा प्रवेशो न भविष्यतीति लोकापवादव्यावृत्त्यर्थं तेन रूपेण हरसे चक्षुः चक्षुश्चक्षुरितिश्रुत्या भगवांश्चक्षुषश्चक्षुः युक्तश्चायमर्थः प्रामाणिकत्वात् इदं पुनश्चक्षुर्न सर्वजनीनं किं तु त्वयैवास्मभ्यं विशेषाकारेण दत्तं न हि दत्तं चक्षुः देवादिभिरपि ह्रियते अन्येनापहृतं परं प्रयच्छन्ति बतेति खेदे एतदभावे सुतरामन्धत्वमेव प्राकृतं चक्षुस्तु एतत्प्राप्त्या निवर्तितम् अतोऽस्मन्तमप्रकाररूपत्वान्न हर्त्तव्यमिति भावः । ननु ये यत्कर्तुं प्रवृत्तास्ते तत्करिष्यन्त्येवेत्युपालम्भो निरर्थक एवेति चेत्तत्राहुः । अज्ञवदिति । अत्रार्थे विमर्शकारित्वाभावाद्विवेको बोधनीय इत्युपालम्भ उचित इत्यर्थः । किञ्च तवाप्यनेन चक्षुषा महानुपकारः सिध्येतीत्याहुः । येनैकदेश इति । त्वया हि सौन्दर्यं सृष्टं क्वचित्प्रकाशतीयं तत्समुदायेन सर्वस्यापि भगवदवयव एव भवति तन्मूलकत्वादेव तस्य सौन्दर्यस्य विशिष्यप्रतीतमिदं कृत्स्नमिति वाक्याद प्रकाश एव जगत् तत्राप्येकदेशे सौन्दर्यमिति रूपग्रहणार्थमेव हि चक्षुषो निर्माणं रूपं त्वयैव व्यवहारस्त्वन्धानामपि सिध्यति अत एव येन चक्षुषश्चक्षुषा तवैवाखिलसर्गसौष्ठवं वयमद्राक्ष्म वयं च श्रुतिरूपाः अन्यथा त्वत्कृतमप्रामाणिकमेव स्यात् मधुद्विष इति तवाप्युपकारकर्त्ता भगवान् सोऽत्र रमते तत्प्रतिबन्धोऽपि तवानुचित इत्यर्थः ॥ २१ ॥

एवं ब्रह्माण उपालम्भमुक्त्वा स्वतन्त्रो भगवान् ब्रह्माणं न मन्यत इत्याशङ्क्य भगवत उपालम्भनमाहुः । न नन्दसूनुरिति चतुर्भिः । यद्यपि भगवान् मार्गान् विधाय स्वयमुदासीन एव तिष्ठति दूरे स्थित्वा च किञ्चित्करोति ननु सर्वथा तथापि प्रपत्तिमार्गे न किञ्चित् कृतवान् नापि शास्त्रं न वा साधनानि प्रमाणवाक्येऽपि "अहं त्वां सर्वपापेभ्यो मोक्षयिष्यामि" इति प्रमेयबलमेवोक्तवान् अत उपालभ्यो भवत्येव किं च नन्दसूनुः भक्तकृपया भक्तिमार्गेऽपि नन्दस्य पुत्रो जातः यत्रैतावद्भवति अप्रयोजके तत्रास्माकं मनोरथार्थमेव कथं न बिलम्बं करोतीति अत एव प्रायेणान्याभिनिवेशो जात इत्याहुः । क्षणभङ्गसौहृद इति । क्षणेनैव भङ्गो यस्य तादृशं सौहृदं यस्येति अन्यथा विचारयेद्वा अत एव न समीक्षते सम्यक् पश्यत्यपि न न हि गतसौहृदा द्रष्टव्या इत्यत्र हेतुमाहुः । स्वकृतातुरा इति । स्वकृते भगवदर्थमेवातुरा दीनाः बतेति खेदे कर्ममार्गेऽपि लौकिकेऽपि स्वकृतातुरेषु समीक्षा क्रियते ज्ञानमार्गे तु आत्मत्वेनैव नित्यप्रकाश इति बहिराविर्भावात् सपक्षो भगवतैव त्यक्तः स्वेषां प्रपत्त्यधिकारित्वमाहुः । विहायेति । सर्वधर्मान् परित्य-

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

ज्येत्यर्थः । गृहत्यागेन तद्धर्मत्याग उक्त एव बाह्याश्चत्वार आन्तराश्च तथा बाह्यानां परित्याग एव आन्तराणां तु दास्यार्थं स्थापनमिति बाह्यानि गणयन्ति । स्वजना बान्धवाः सुताः स्वस्माडुत्पन्नाः पतयो नियामकाः विशिष्टत्वाद्बाधकत्वात् स्वतन्त्रत्वात स्वस्यैव भोक्तृत्वाभिमानाच्च आन्तरवन्नैषां दास्योपयोगः अतस्त्यक्तव्या एव स्वदास्यमित्येकशब्दार्थं उक्तः न तु देशादिसाहितस्य तदप्यद्धा साक्षात् न तु नामादिद्वारा एवमुपगतानपि न समीक्षते विचारयत्यपि न अतः केवलं खेद एव कर्त्तुमुचितः असमीक्षायां हेतुं कल्पयन्ति । नवप्रिय इति । असमीचीनमपि नवमेव प्रियं मन्यते अयमप्येकः स्वभावः ॥ २२ ॥

नवप्रियत्वेन सूचितं भावं प्रकटीकुर्वन्ति त्रिभिः नूनतं त्रिविधं भवतीति । सुखं प्रभातेति । "राजसस्तामसश्चैव सात्त्विकश्चेत्यनुक्रमः" इयं रजनी अस्मत्प्रतिपक्षाणामेव सुखं प्रभाता रजनी न त्वस्माकम् आशिषश्च मनोरथाः ब्राह्मणैर्निरूपिता वा तासामेव सत्या बभूवुः यतस्ताः पुरयोषितः चतुराः अन्यथात्रैवागच्छेयुः अत एवास्माकं गमनमपि तत्र बाधितं सपत्नीनामयमवसर इति अस्मद्भोगकालापेक्षया तासामुत्तमो भविष्यति देशश्चोत्तमः अतः पुरवासिन्यः भाव्यर्थं परिज्ञाय स्थिरा जाताश्चतुरा एव अतः ध्रुवमेव महोत्सवो भविष्यति उत्सवमाहुः । याः सम्प्रविष्टस्येति । सम्यक् प्रविष्टस्य व्रजस्पतेः गोकुलस्वामिनो गोविन्दस्य स्वस्थानं प्रविष्टस्य मुखं पास्यन्ति प्रभोर्मुखे परकीये च महानानन्दो भवतीति तास्मिन्मुखे तासां मधुपानमपि भविष्यति न केवलं लावण्यामृतपानमिति विशेषमाहुः । अपाङ्गेन उत्कळितं यत् स्मितं तत्सहितमधरामृतं तदेव देहादिविस्मारकम् अनेन तासां पूर्वदुःखस्मरणाभावात् साम्प्रतमानन्दानुभवाच्च तासामेव महद्भाग्यं न त्वस्माकम् ॥ २३ ॥

नन्वस्तु तासामद्य श्वः परश्वो वा भगवानत्रायास्यतीति अस्माकमेव सुखं भविष्यतीत्याशङ्क्याहुः । तासामिति । स हि मोक्षदाता अस्माकं मुक्तिमेव दास्यति शास्त्रसिद्धं तासां वा मधु स्वादिष्टं मञ्जु मनोहरं ग्रहणे पर्यवसाने वोत्तमं यद्भाषितम् एकेनापि कार्यसिद्धौ बहूनि तानि अतो गृहीतचित्तः चित्ताधीनश्च पुरुषः ननु नन्दोऽस्ति सङ्गे भगवांस्तु जितेन्द्रियः पराधीनतयैव प्रवर्त्तते न तु स्वत इति चेत् सत्यं यद्यपि परवान् यद्यपि मनस्वी तथापि नः अस्मान् प्रति कथं प्रतियास्यति एकदा अयं रसो भुक्त इति उद्भूता इतिवद्यथा नन्दाधीनः तथान्याधीनोऽपि भविष्यति यथा वयं तथा अन्या अपीति अबला इति सम्बोधनं सम्मत्यर्थमुपायाभावार्थं च ग्राम्या इति स्वेषु बाधको धर्मः यद्यपि ग्राम्यः प्राथमिको भवति रसः अतः सम्भावना तथापि नागरिकादीनां सर्वेषामेवोपभोगे महानेव कालो भवतीति पुनरावृत्तिर्भवति न वेति कथमिति प्रकारप्रश्नः प्रथमप्रवृत्तौ लज्जा ततः स्मितं ततो विभ्रमाः तैस्तत्रैव भ्रमन् पुनस्तास्वेव मण्डलपरिभ्रमं कुर्वन् कथं प्रतियास्यति न हि भ्रमे उत्पन्ने गमनमार्गस्यापि विस्मृतत्वात् भ्रमणं युक्तमेव ॥ २४ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

नन्वक्रूरः कृष्णं पुरीं नयति नाहमितिचेत्तत्राहुः । क्रूरस्त्वं विपरीतलक्षणया अक्रूरस्य समाख्यया नाम्ना नह्येवं कर्तुमन्यः शक्नोतीति भावः । तथा दत्तापहारित्वेनापि क्रूरोऽसीत्याहुः । त्वयैव दत्तं चक्षुस्त्वमेव हरसे यथाऽज्ञः पुण्यपापे अजानन् दत्तमपि हरति तद्वत् कृष्णं हरामि न युष्मच्चक्षुरिति चेत्तत्र कृष्णहरणादेवास्माकमान्ध्याच्चक्षुर्हरणमित्याहुः । येन चक्षुषा मधुद्विषः कृष्णस्यैकदेशे वक्त्रनेत्रादौ त्वदीयमखिलसृष्टेः सौष्ठवमद्राक्ष्म तेन किमन्यत् पश्यामः अतोऽन्धा एव भविष्यामः ॥ २१ ॥

हन्त हन्तास्मत्प्रेमास्पदत्वादस्मज्जीवनैकहेतुः कृष्ण एवास्मानुपेक्षते विधातारं किमिति दूषयाम इत्याहुः । नेति । अतिप्रबल प्रेमा कथमनेन छिन्न इत्यत आहुः । क्षणमात्रेणैव भङ्गो यस्य तथाभूतं सौहृदं यस्य सः सौहृदं नैवमन्यः कर्तुं शक्नोतीति भावः । हन्त हन्त, स्वस्य कृते आतुराः प्राणान्तिमदशापन्ना अप्यस्मान् न सम्यगीक्षतेऽपि एता रुदित्वा म्रियन्तां नाम अहन्तु मथुरां गत्व सुखं लभे इत्यस्य निश्चय इति भावः । वयं तु विहायेत्यादि यद्दास्यार्थं पत्यादीनप्यत्यजाम सोऽस्मांस्त्यजति तत्र हेतुः न वा एव प्रिया यस्य सः वयमधुना पुरातन्योऽभूम यतस्तस्मादिति भावः तस्माद्वयमनेनोभयलोकत एव भ्रंशिता इति ध्वनिः ॥ २२ ॥

हन्त हन्त किमद्भुतमिदमस्माकं दुरदृष्टं मथुराङ्गनानां शुभादृष्टं युगपदेव फलतिस्मेत्याहुः । सुखमिति । इयं रजनी पुरयोषितां सुप्रभाता व्रजयोषितां तु दुष्प्रभाता तासामाशिषो विप्रादिदत्ताः दीर्घतरमनोरथा वा सत्याः सफलाः अस्माकं तु नष्टा बभूवुः व्रजस्पतेः कृष्णस्य सुडार्थैः अपाङ्गे नेत्रान्ते उत्कलितस्मितम् उत्कृष्टरसव्याञ्जिकाः कलाः सञ्जाता यस्य तदुत्कलितं स्मितमेव रहस्येङ्गितमासवो मादको रसो यत्र तन्मुखं पास्यन्ति स्वापाङ्गरसनाभिरास्वादयिष्यन्ति कुलधर्मलज्जाभयादिकं सहसैव त्यक्त्वा अस्येङ्गितमङ्गीकरिष्यन्तीत्यर्थः । ततश्च समुचितसमये सम्यक् प्रकारेणान्यजनालक्षिततया प्रविष्टस्य मुखमपि साक्षात् पास्यन्ति ॥ २३ ॥

ननु द्वित्राणि दिनानि तथा भवतु नाम तथाप्यस्मत्स्नेहाकृष्टः पित्रादिभिश्च परावर्तित आगमिष्यतीति चेद्धो मुग्धा न जानीथ तत्त्वं शृणुतेत्याहुः । तासां मधुतोऽपि मञ्जुभिरतिमधुरैर्भाषितैर्गृहीतचित्त आकृष्टमनाः अत एव परवांस्तदधीनः सन् मनस्व्यपि धीरोऽपि हे अबलाः ! तादृशकळावयबलहीनाः कथं ग्राम्या अस्मान् प्रत्यायास्यति ननु तदपि पित्रादीन् लोकधर्मयोरपि वर्त्मानुस्मृत्य विवेकबलादायास्यत्येवेत्यतो विशिंषन्ति । तासां सळज्जस्मितैर्विभ्रमैर्मदनावेशसूचकचेष्टितैश्च भ्रमन् भ्रान्तिं प्राप्नुवन् अयमहो सर्वं विस्मरिष्यत्येवेति भावः ॥ २४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

नच तवैतत् कर्मैवासाधु त्वमपि रूपान्तरेणास्मदहिते प्रवृत्तो वञ्चकत्वदत्तापहारित्वादिदोषवत्त्वेनासाधुरसीत्याहुः । क्रूर इति । हे विधातः ! त्वं क्रूरोऽसि "क्रूरस्तु कठिने नृशंसेऽप्यभिधेयवदि"ति विश्वः यतः मधुद्विषः मधुसंज्ञकमहासुरद्वेषिणः विख्यातकीर्तेर्विष्णोः विश्वमूर्तेः एकदेशे मुखनेत्रादौ त्वदीयम् अखिलसर्ग-

अद्य ध्रुवं तत्र दृशो भविष्यते दाशार्हभोजान्धकवृष्णिसात्वताम् ।
महोत्सवः श्रीरमणं गुणास्पदं द्रक्ष्यन्ति ये चाध्वनि देवकीसुतम् ॥ २५ ॥
मैतद्विधस्याकरुणस्य नाम भूदक्रूर इत्येतदतीव दारुणः ।
योऽसावनाश्वास्य सुदुःखितं जनं प्रियात्प्रियं नेष्यति पारमध्वनः ॥ २६ ॥
अनार्द्रधीरेष समास्थितो रथं तमन्वमी च त्वरयन्ति दुर्मदाः ।
गोपा अनोभिः स्थविरैरुपेक्षितं दैवं च नोद्य प्रतिकूलमीहते ॥ २७ ॥
निवारयामः समुपेत्य माधवं किन्नोऽकरिष्यन् कुलवृद्धबान्धवाः ।
मुकुन्दसङ्गान्निमिषार्द्धदुस्त्यजाद्दैवेन विध्वंसितदीनचेतसाम् ॥ २८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

सौष्ठवं समग्रं सृष्टेः पुण्यमद्राक्ष्म दृष्टवत्यो वयम् अतः सर्वसृष्टि-सौष्ठवदर्शनकरणभूतं मधुद्विडाख्यं येन त्वयैव दत्तं स त्वमेव नश्चक्षुः अज्ञवत् बालवत् अक्रूरसमाख्यया हरसे नान्यश्चैतत्कर्तुं शक्नोति अतो निरपराधिजनदुःखदत्वेन वञ्चकत्वेन दत्तापहारित्वेन वालिशत्वेन च त्वमप्यसाधुरेवासीति भावः। स्मेति पादपूरणे ॥ २१ ॥

तत्र काश्चिन्नन्दसूनुमेवाक्रोशन्त्यो ऽन्योऽन्यमूचुः। न नन्दसूनुरिति। बतेति खेदे क्षणभङ्गमस्थिरं सौहृदं यस्य सः नवप्रियः नवं नवं प्रियं यस्य सः एवंभूतो नन्दसुनुः यस्मात् स्वकृतातुराः तत्कृतेनैव स्मितादिना आतुराः परवशाः गृहादीन् विहाय अद्धा साक्षात्तस्यैव दास्यमुपगताः अपि नो ऽस्मान् न समीक्षते ॥ २२ ॥

काश्चित्तु इतो गतस्य भगवतो दर्शनादिकं प्राप्य तत्रत्याः कृतार्था भविष्यन्तीत्याशयेनाहुः। सुखमितित्रिभिः। पुरयोषितामियं प्रभाता प्रातः कालरूपा रजनी सुखं यथा तथा बभूव तथा आशिषः कामाः सत्या बभूवुः यतः याः पुरयोषितः व्रजस्पतेः श्रीकृष्णस्य अपाङ्गोत्कलितस्मितासवम् अपाङ्गेन नयनप्रान्तेनोत्कलितं विकसितं यत् स्मितं तेनासवरूपं रसरूपं मुखं पास्यन्ति ॥ २३ ॥

ननु धनुर्यागोत्सवं दृष्ट्वा पुनरायास्यतीत्यत्र काश्चिदाहुः। तासामिति। हे अबलाः। परवान् पित्रादिपरतन्त्रोऽपि स्वतो मनस्वी धीरोऽपि मुकुन्दः तासां पुरयोषितां सलज्जास्मितैर्विभ्रमैर्विळासैर्भ्रमन् तासां मधुमञ्जुभाषितैः मधुरकोमळवचनैर्गृहीताचित्तः गृहीतं वशीकृतं चितं यस्य सः ग्राम्याः अविदग्धाः नोऽस्मान् कथम्प्रतियास्यति प्रत्येष्यति न कथञ्चिदित्यर्थः ॥ २४ ॥

भाषा टीका।

हे विधाता! तू बडा क्रूर निर्दयी है जो की तू अक्रूरनाम से आकर पहिले दिये हमारे नेत्र को जबरदस्ती से अज्ञानी की नाई हरण करता है जिस नेत्र से कि हमने मधुसूदन के एक अंग में तेरी संपूर्ण सृष्टि की सुंदरता को देख लिया है ॥ २१ ॥

यह नंद का पुत्र भी बडा कठोर है और नई वस्तु को चाहने वाला है क्षणिक मित्रताई वाला है हम सब गोपी बडी आतुर हैं घर स्वजन पुत्र पती सबों को छोडकर सब प्रकार से साक्षात् उसकी दासी भई हैं तौ भी हमको नहीं देखता है ॥ २२ ॥

अब तो मथुरा पुर वाली स्त्रियों की सब रात सुख प्रभात वाली होगई उनके मनोरथ सफल होगये यह निश्चय है जो कि पुर में प्रवेश होते समय में ब्रजपति श्रीकृष्ण के अपांग दृष्टि से मंद हास रस सहित मुख कमल के मधुको पान करैंगी ॥ २३ ॥

मुकुंद यद्यपि वडे धीर हैं तौ भी उन स्त्रियों के मनोहर वचनों से उनका चित्त खिच जायगा तब परवश होजायगे फिर हम गामवालीयों अबलाओं पर स्नेह नहीं करैंगे लज्जा सहित मंदहास से फिर उनके भाव वाले नेत्रों से भ्रमित होकर फिर कैसे हमारे पास आवेंगे ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका

किञ्च अस्मदुत्सवभाजो ऽन्य एवाद्य भविष्यन्तीत्याहुः। अद्येति तत्र पुरे दाशार्हादीनां दृशो दृष्टेर्महानुत्सवो भविष्यते भविष्यति ये देवकीसुतं द्रक्ष्यन्ति तथा ये चाध्वनि गच्छन्तं द्रक्ष्यन्ति तेषामपि दृशो भविष्यतीति यद्वा दृश इति द्वितीया तेषां दृशो नेत्राणि महोत्सवो भविष्यते प्राप्स्यति प्राप्त्यर्थस्य भवतेरात्मनेपदित्वात् ॥ २५ ॥

अक्रूरं शपन्त्य आहुः। मैतद्विधस्येति। एषा विधा विधानं कर्म यस्य अत एव निष्कृपस्याक्रूर इति शोभनं नाम माभूत् तत्र हेतुः। अतीव दारुण इत्यादि। प्रियात्प्राणादपि प्रियतरं कृष्णमध्वनः पारमस्मद्दृग्गोचरत्वादतिदूरं देशं नेष्यति ॥ २६ ॥

अहो धिगस्मज्जीवितमित्याहुः। अनार्द्रधीरिति। अनार्द्रा कठिना धीर्यस्य स तावदेष कृष्णो रथमधिरूढः अस्याविनयमीलक्ष्य स्थविरैश्चोपेक्षितम् ते न निवारितवन्त इत्यर्थः। किञ्च दैवञ्चेति अयंभावः यदि दैवमस्माकमनुकूलं भवेत्तर्हि विघ्नैः कश्चिदेषां मध्ये प्रतिहन्येत अकस्माद्वज्रपातो वा भवेत् अन्यद्वा किञ्चिदनिष्टं स्यान्न तु तत्किञ्चिदस्तीति ॥ २७ ॥

परस्परं सम्मन्त्र्य साहसमधिरुह्याहुः। निवारयाम इति।

श्रीधरस्वामिकृतभावार्थदीपिका ।

अकरिष्यन् करिष्यन्ति निमिषार्धदुस्त्यजात् मुकुन्दसङ्गाद्विध्वंसितानि वियोजितान्यत एव दीनानि चेतांसि यासाम् एवम्भूतानामस्माकं न मृत्योरपि भयमित्यर्थः ॥ २८ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

गुणानां गुणजातीनां सर्वास्पदमाश्रयं यदाश्रयेणैव ते सिद्ध्यन्ति तमित्यर्थः । किं बहुना सर्वगुणसम्पत्तिहेतुविष्णुप्रियां श्रियं लक्ष्मीमपि रमयितुं जातरतिं कर्त्तुं शीलं यस्य तमिति प्रौढिवाक्यं देवकीसुतमिति "प्रागयं वसुदेवस्य" इत्यादि तत्पुरोहितवाक्येन सच साच तत्पुत्रत्वमेवाभिमस्यत इति । यद्वा । देवकी श्रीयशोदेति पूर्वमेवोक्तं ये चाध्वनि वर्त्तमानाः पथिकास्तद्वासिनोऽपि लोकाः । तथा च "तत्रैव धन्यास्ते पथि ये कृष्णमितो यान्तमवारिताः । उद्वाहिष्यन्ति पश्यन्तः स्वदेहं पुलकाचितम् । मथुरानागरीपौरनयनानां महोत्सवः । गोविन्दावयवैर्दृष्टैरतीवाद्य भविष्यति । को नु स्वप्नः स्वभाग्याभिर्दृष्टस्ताभिरधोक्षजः । विस्तारितान्तनयना या द्रक्ष्यन्त्यनिवारिताः" ॥ २५ ॥

इति शब्देनैव एतदित्यस्यार्थस्योक्तत्वात् इत्येतदिति तैर्नालिखितं यद्वा । इत्येतत् इत्येवमित्यादिप्रयोगदर्शनाद्गोबलीवर्दन्यायेन पौनरुक्त्यदोषो ज्ञेयः । अतीव दारुणः परमक्रूरः कुतस्तदाहुर्य इति । असाविति दारुणत्वेनानिर्वचनयित्वं सूचितं यद्वा । असावयमित्यर्थः । प्रत्यक्षस्थितोऽपीति अनाश्वास्य पुनरेष मया समानीय युष्मासु समर्पणीय इति वचसापि जनमिति सामान्येनोक्तेस्तन्मात्रस्याप्याश्वास उचितः किमुताबलारूपस्येत्यर्थः । अतोऽचिरादस्मिन् स्त्रीवधो भावीति सुशब्दाभिप्रायः । अतोऽतीव क्रूर एव । तथा च तत्रैव । "किं न वेत्ति नृशंसोऽयमनुरागपरं जनम् । येनायमक्ष्णोराह्लादं नयत्यन्यत्र नो हरि" मिति अतः परमस्य क्रूरस्य क्रूर इत्येव नाम युक्तमिति भावः । अन्यत्तैः यद्वा अक्रूर इति नाम मा भूदेव इत्येवमेतत्प्रकारमन्यन्नमापि माभूदित्यर्थः ॥ २६ ॥

अहो कंसदूतोऽयं क्रूर एव परमकृपाकोमलचित्तः श्रीनन्दनन्दनोऽप्यस्मान् प्रति परमकठिनोऽभूदिति परमार्त्त्याहुरनार्द्रधीरिति । यतो रथं सम्यगवास्थित उपरि नीडमारूढः तं रथमनु पश्चात् किम्वा श्रीकृष्णमनुवर्त्तन्ते ये तेऽमी गोपाः श्रीदामादयः अनोभिः कृत्वा शीघ्रं शकटयोजनादिना यद्वा तैः सह वर्त्तमानास्तान्यारूढा इत्यर्थः । त्वरयन्ति गमने त्वरां कुर्वन्ति यद्वा तमेवानु अनुक्षणं गन्तुं त्वरयन्ति यतो दुर्मदाः महामत्ताः अन्यथा विचारसम्भवात् ॥ २७ ॥

सोऽयमस्माभिर्बाल्यमारभ्यानन्यवृत्तिना मनसा वृत इति सचाप्यस्मांस्तथैवाङ्गीकृतवानिति पतिरेव स्यात् ततः संप्रत्यस्मान् परित्यज्य व्रजन्नसौ कथं निवारणीयः कस्य वा तु सङ्कोच इत्याशयेनाहुर्निवारयाम इति । सम्यक् लज्जादिकमपहाय साहसमालम्ब्य उप समीपे गत्वा श्रीहस्तधारणादिना माधवं निवारयामः शीघ्रमेव निवारयिष्यामः ननु पित्राद्यनुमतिं विना कथं स्वातन्त्र्येण वृतोऽसौ तत्राप्याहुः । माधवमिति । नूनं लक्ष्म्यापि निगूढमयं वृतोऽस्तीति सदाचारप्रश्नेनायं दोष इति भावः । स्थापयिष्यते चेदमेवं ब्रुवाणा इत्यादौ ननु कुलवृद्धादयस्त्विदमौद्धत्यं दृष्ट्वा शान्तिं करिष्यन्ति तत्राहुः । किन्न इति । कुलस्य वृद्धा धर्मप्रवर्त्तका बान्धवाः स्नेहादिबद्धाः पत्यादयश्च धार्ष्ट्यदर्शनेन निश्चितरहस्यवृत्तान्ता अपि नोऽस्माकं किं करिष्यन्ति यतो दैवेनापरिहार्येण निजादृष्टेन हेतुना यो मुकुन्दसङ्गस्तत्प्रथमदर्शनादिस्तेनैव विध्वंसितानि देहगेहाद्यासक्तितो विचालितानि तथा यथामनोरथं तदप्राप्त्या दीनानि च चेतांसि यासां तासां नन्वतो दैवेन तद्वियोजनमधुना भद्रमेव कृतं तर्ह्यधुनापि तत्सङ्गाग्रहस्त्यज्यतां तत्र सभयमाहुर्निमिषेति । यद्वा युष्माकं ते किञ्चिदपि न करिष्यन्ति तत्राहुर्मुकुन्देति । मुकुन्दस्य सानुरागेण कुलवृद्धा देव्यो मोचकत्वात्तन्नाम्नस्तस्य माधवस्य सङ्गाद्दैवेन विध्वंसिता अतएव दीनचेतसः यास्तासामस्माकं कीदृशान्मुकुन्दसङ्गान्निमिषार्धेऽपि दुस्त्यजत्वेन पूर्वमस्माभिरनुभूतादित्यर्थः । अयं भावः यद्यसौ निवृत्तः स्यात्तस्य यदि स्तैस्त्यज्येमहि तदा वनदेव्य इव वृन्दावनैकशरणा भूत्वा तं सुखमेव निषेधेमहि यदि दण्ड्येमहि निरुध्येमहि च तदापि तन्निवृत्तिं दृष्ट्वैव म्रियेमहीति सुखमेव यदि न निवृत्तः स्यात्तदोत्सर्गसिद्धमेव मरणं स्यादिति न किमपि ते कुर्युस्ततो निवारयाम एवेति ॥ २८ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

अध्वनि ये द्रक्ष्यन्ति तेषां च महोत्सवः ॥ २५ ॥

अक्रूर इति नाम माभूदित्यन्वयः अध्वनः पारं दूरदेशम् ॥ २६—२९ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

किञ्चास्मदुत्सवभाजोऽन्य एवाद्य भविष्यन्तीत्याहुः । अद्येति । तत्र पुरे दाशार्हादीनां दृशो दृष्टैरद्य महानुत्सवो भविष्यते भविष्यतीति आत्मनेपदमार्षं तथा च ये जना अध्वनि श्रीरमणं लक्ष्मीकान्तं गुणानां कल्याणानामाश्रयं देवकीसुतं द्रक्ष्यन्ति तेषाञ्च दृशः नूनमुत्सवो भविष्यति यद्वा दृश इति द्वितीयाबहुवचनान्तं तेषां दृशो नेत्राणि महोत्सवो भविष्यते प्राप्स्यते प्राप्स्यर्थस्य भवतेरात्मनेपदित्वात् ॥ २५ ॥

अक्रूराय शपन्त्य आहुः । मैवं विधस्येति । एवंविधा विधानं कर्म यस्य एतद्विधस्येति पाठे एषा विधा यस्य तस्यात एव निष्कृपस्याक्रूर इतीत्थं नाम माभूत् तत्र हेतुरतीव दारुण इत्यादि । दारुणः क्रूरः अतः क्रूर इत्येव व्यपदेष्टव्य इति भावः । योऽसावक्रूरः सुतरां दुःखितंजनमस्मत्समुदायात्मकमनाश्वास्य नास्मान् सान्त्वयित्वा प्रियात्प्राणादपि प्रियं कृष्णमध्वनः पारं नेष्यति अस्मदगोचरमतिदूरदेशं नेष्यतीत्यर्थः ॥ २६ ॥

इत्थं ब्रुवन्तीनां सतीनां प्रभाते रथारूढं श्रीकृष्णमालक्ष्य शपन्त्य आहुः । अनार्द्रधीरिति । अनार्द्रा धीर्यस्य स एष कृष्णो रथमधिरूढः तमनुसृत्यामी दुर्मदा गोपाश्चानोभिः शकटैर्गमनसाधनैः स्थविरैर्वृद्धैरुपेक्षितं मूर्खत्वात्तैरप्युपेक्षितं ते न निवारितवन्त इति भावः । तं कृष्णं त्वरयन्ति किञ्च दैवमप्यद्य नोऽस्माकं प्रतिकूलं यथा तथा ईहते चेष्टते अयंभावः यदि दैवमस्माकमनुकूलं भवेदेतैरयं

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

विहन्येत अकस्माद्धुनैव व्रजे किञ्चिदरिष्टं वा स्यान्नतु तत्किञ्चिदस्त्यतो दैवमपि प्रतिकूलमिति ॥ २७ ॥

परस्परं सम्मन्त्र्य साहसमधिरुह्याहुः । निवारयाम इति । तं माधवमुपेत्य वयं निवारयेम व्रजे वृद्धा बान्धवाश्च नोऽस्माकं किमकरिष्यन् किञ्चिदपि न करिष्यन्ति तत्र हेतुं वदन्त्य आत्मनो विशिषन्ति निमिषार्द्धमपि दुस्त्यजान्मुकुन्दस्य सङ्गाद्दैवेन विध्वंसितानि वियोजितानि अत एव दीनानि चेतांसि यासां तासां न इति सम्बन्धः एवम्भूतानामस्माकं न मृत्योरपि भयमस्तीत्यर्थः ॥ २८॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

तत्र मथुरायां दाशार्हादीनां दृशां महोत्सवो भवितेति शेषः महानुत्सव आनन्दो यस्य स तथा तं ये दाशार्हादयः देवकीसुतं द्रक्ष्यन्तीति यत्तस्मात् ये चाध्वनि द्रक्ष्यन्ति तेषां दृशाश्चेति॥ २५ ॥

इदानीमक्रूरं शपन्ति । मैतदिति । एवंविधस्यातिदारुणे कर्मणि प्रवृत्तस्यैतद्विधस्यैतादृशस्य वा ॥ २६ ॥

कृष्णस्यैश्वरत्वं सम्वदन्ते । अनार्द्रधीरिति । अनेन निःसङ्गत्वं हरेर्दर्शितं दुर्मदाः उत्तरकार्यान्धाः स्थविरैः कुलवृद्धैः ॥ २७ ॥

नः किमनिष्टमकरिष्यन् विभ्रंशितानामत एव दीनचेतसाम् ॥ २८॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

देवकीसुतमिति प्रागयं वसुदेवस्येत्यादि तत्पुरोहितवाक्येन स च सा च तस्मिन् पुत्रत्वमेवाभिमंस्यत इत्यभिप्रायेण २५—२७ ॥

माधवं लक्ष्म्या अपि पतिभावहेतुगुणवृन्दमित्यर्थः ॥ २८-३३॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

ननु भगवान् भक्तवत्सलः समायास्यतीति चेत् तत्राहुः । अद्येति । भक्ता अपि तत्र बहवः अतस्तेषां दाशार्हभोजान्धकवृष्णिसात्वतां पञ्चविधानां कुकुरादीनामपि संग्राहकाः तथापि सत्त्वप्रधाना एव गणिताः तेषां दृशो महोत्सवो भविता शोभा हि द्रष्टव्या लक्ष्म्यधीना च शोभा तस्या अपि रमण इति किं च ये च अध्वनि देवकीसुतत्वात् नाद्भितार्थं गच्छन्तं ये मार्गे द्रक्ष्यन्ति तेषामपि दृशो भविष्यति महोत्सवः ननु दर्शनमात्रेण कथमिष्टसिद्धिरिति चेत् तत्राहुः । गुणास्पदमिति । अनन्तगुणानामास्पदत्वात् दर्शनानन्तरं गुणास्तत्रैव समायास्यन्ति अतो महानेवोत्सवः फलपर्यवसायी त्रिविधा अपि गणिताः ॥ २५ ॥

एवं चतुर्धा भगवन्तमुपालभ्य अक्रूरोपालम्भनमाहुः । मैतद्विधस्येति । संज्ञा ह्यन्वर्थोचिता क्रौर्यादयस्त्वन्तःकरणधर्माः अक्रूर इत्येतन्नामास्य अतः अविचार्यैव नामकरणं कृतमिति माभूत यस्तु सर्वस्मारकः स कथमक्रूर इति यतोऽयमतीव दारुणः अत आक्रूर उचितः नह्य कार्यार्थं सोऽपि समागतः किं कुर्यादिति चेत्तत्राहुः । अनाश्वास्येति । सुदुःखितं गोपीजनं तेषां सर्वस्वभूतं ताननाश्वास्य नयतीति आश्वासनं हि भगवन्तमानीय केनचिद्रूपेण वा अत्र स्थापयित्वा समागमिष्यामीति वाग्बन्धं वा कारयित्वा पश्चान्नयनमुचितं न तु धनादिदानं यतो भगवान् प्रियात् प्राणादपि प्रियः आत्मनोऽपि नयनं च न गोचारणवत् किं त्वध्वनः पारं यत्र गतः तस्मिन् दिवसे नायाति ॥ २६ ॥

सर्वानेवोपालभन्ते । अनार्द्रधीरेष इति । गोपिकाव्यतिरिक्तानां सर्वेषामेव महानुत्साहः अतः सर्वे प्रातरेव भुक्त्वा अक्रूरव्यतीरिक्ता रथारूढा जाताः शकटारूढाश्च भगवानपि यशोदादिभिरभ्यनुज्ञातः सम्यगेवास्थितो रथम् अस्मिन्नपि समये अस्मद्विचारं न कृतवानिति अनार्द्रधीरेष कृष्णो दृश्यते न तु सोऽस्मान् पश्यति किं च तमनु यावन्तो गोपाः ते सर्वे दुर्मदाः विचाररहिताः परघातेऽपि क्लेशरहिताः अमी त्वरयन्ति यतस्तथैव दृश्यन्ते चकारादक्रूरोऽपि ते च शकटारूढा इति तेषां चलनक्लेशाभावश्च पश्चात् स्थितेशकटानुरोधेन गन्तव्यं पततीति अनोभिः साधनैरित्यप्युक्तं तर्ह्युपनन्दादयो वृद्धा वक्तव्या इति चेत्तत्राहुः । स्थविरैरुपेक्षितमिति । तेषां विचारेण तथा गोप्यस्तथा नागर्यस्तथैव वसुदेवादय इति नन्वदृष्टं प्रार्थयन्तु यथा विघ्नः कियत्कालप्रतिबन्धो वा भवेत् तत्राहुः । दैवं चेति । चकारात् कालादयः सर्व एव प्रतिकूलमीहन्ते ॥ २७ ॥

स्वप्रवृत्तिबन्धकत्वेन बान्धवानुपालभन्त्यः तानगणयन्ति निवारयाम इति । सर्वाभिः सम्भूय भगवान्निवारणीयः तथा सति बान्धवाः कोपं करिष्यन्तीति चेत्तत्राहुः । किन्नो करिष्यन्निति नोऽस्माकं किमकरिष्यन्निति किं पूर्वं कृतवन्तः करिष्यन्ति वा ते हि कुलस्यैव बान्धवाः कुलापेक्षायां सत्यां कुले स्थापयन्ति न त्वतिरिक्तं किञ्चित्कुर्वन्ति भगवतः कुलस्य च तारतम्ये विचार्यमाणे कुलं बन्धकं भगवान् मुकुन्दः किं च तस्य सङ्गः साक्षात् स तु निमिषार्धमपि दुस्त्यजः तस्माद्धेतोः दैवेनैव स्वादृष्टेनैव विध्वंसिताः अत एव दीनचेतसः तेषां कुलस्थैर्न्न किञ्चित् कर्त्तुं शक्यते यदि ते भगवते दद्युः तर्हि कुर्युरेव तत्तु न कुर्वन्तीति प्रतिबन्धकत्वाश्च न तैः किञ्चित्कार्यम् अपकारश्चेत् अस्माकं स्वत एव सिद्धः पिष्टपेषणं तैः किं कर्त्तव्यमिति ननु निवारणे किं भविष्यति यदि नागमिष्यति तत्राहुः । माधवमिति । स हि लक्ष्मीपतिः बलात् तया गृहीतस्तदीयो जातः एवमस्मदीयोऽपि भविष्यतीति यत्ने कृते तु नास्माकं बुद्धिदोषः अकृते तु पश्चात्तापो भविष्यतीति भावः । पश्चात्तापाभावार्थमेवमुद्यमः न तु कार्यं भविष्यतीति तथापि न सर्वासां संमतिरिति लौकिकालौकिकपरमार्थदार्ढ्ययुक्ताभिरप्रवृत्तामिति ॥ २८ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

किञ्च व्रजस्थानामानन्दं पुरस्थाः प्राप्स्यन्तीत्याहुः । अद्येति । दृश इति जात्येकत्वं दाशार्हादीनां दृशां महोत्सवो भविष्यति येचाध्वनि द्रक्ष्यन्ति तेषामपि दृशामात्मनेपदमार्षं यद्वा दृश इति

यस्यानुरागललितस्मितवल्गुमन्त्रलीलावलोकपरिरम्भणरासगोष्ठ्याम् ।
नीताः स्म नः क्षणमिव क्षणदा विना तं गोप्यः कथं न्वतितरेम तमो दुरन्तम् ॥ २९ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

द्वितीया तेषां दृशो दृष्टीर्महोत्सवो भविष्यते प्राप्स्यति प्राप्त्यर्थकोऽयं भवतिरात्मनेपदी ॥ २५ ॥

अक्रूरं शपन्त्य आहुः । एतद्विधस्य एतादृशस्य यद्वा एषा विधा विधानं कर्म यस्य अत एव निष्करुणस्य अक्रूर इत्येतन्नाम माभूत् न युज्यत इत्यर्थः । तत्र हेतुरतीवेति, तस्मादतः परमयं क्रूर इति नाम्नाऽभिधेय इति भावः । पुनरेष मया समानीय युष्मासु समर्पणीय इति वचसापि जनं व्रजस्थमेकमपि जनमनाश्वास्य सुदुः खितमिति सुशब्देन मरिष्यतां व्रजजनानां वधपातकमयमेव प्राप्स्यतीति द्योतितम् प्रियात् प्राणादपि प्रियं कृष्णम् अध्वनोऽस्मद्दृश्यस्य पारं दूरदेशमित्यर्थः ॥ २६ ॥

अहो अत्रागत्याक्रूरेण स्वक्रूरता सर्वत्रैव लक्षारितेत्याहुः । अनार्द्रधीरस्मान् रुदतीर्दृष्ट्वापि एव कृष्णः अनोभिः सहिता गोपा दुर्मदा इत्येषामहो दुष्टा मत्ततैवाजनिष्ट अन्ततोऽगमिष्यतः कृष्णस्य विरहेण स्वयं यन्मरिष्यन्ति तदपि नानुसन्दधते इति भावः । स्थविरैर्वृद्धैरपि निषेधमकुर्वद्भिरुपेक्षितं स्वजीवितमिति शेषः किञ्च दैवतं चेति अयं भावः यदि दैवमस्माकमनुकूलमभविष्यत्तदा त्रिचैः किञ्चिदेषामुपद्रवमुदपादयिष्यतेति तस्मादायुरेव व्रजस्थानामतः परं नास्तीति निश्चिनुम इति भावः ॥ २७ ॥

परस्परं सम्मन्त्र्य साहसमधिरुह्याहुः । निवारयामः सम्यगुपेत्य वस्त्रहस्ताकर्षणादिना भोः प्राणैकवल्लभ रथादवतरावतर त्वं स्त्रीवधकोटीर्माऽगृहाणेति वाग्भिरपि निवर्तयामः ननु कुलवधूनामस्माकमेतावदतिधार्ष्ट्यं दृष्ट्वा लोका हसिष्यन्ति रहस्यमुद्घाटितमालक्ष्य बन्धवोऽपि त्यक्ष्यन्ति तत्राहुः । किंनोऽकरिष्यन् करिष्यन्ति कीदृशानां निमिषार्द्धमपि व्याप्य त्यक्तुमशक्यात् मुकुन्दस्य सङ्गात् दैवेन विध्वंसिता वियोजिता अत एव दीनचेतसश्च यास्तासामस्माकम् अयं भावः यद्यसौ निवृत्तः स्यात्तदा यदि बन्धुभिस्त्यक्ष्येमहि तदा वनदेव्य इव वृन्दावने स्थास्याम इत्यभीष्टसिद्धिरेव यदि वा दण्ड्येमहि रुध्येमहि वा तदाप्येकग्रामस्थितिज्ञानेन सखीजनचातुर्यप्रापिततन्निर्माल्यमाल्यचर्वितादिना च सुखमेव जीवामः यदि चासौ नैव निवृत्तः स्यात्तदोत्सर्गसिद्धं मरणमस्माकमस्त्येवेति ॥ २८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

किञ्च तत्र पुरे अद्य ध्रुवं महोत्सवः दाशार्हादीनां दृशः नेत्राणि भविष्यते प्राप्स्यते ये चान्येऽपि जना अध्वनि देवकीसुतं द्रक्ष्यन्ति तेषामपि दृशां महोत्सवो भविष्यते ॥ २५ ॥

कश्चिन्न विधाता ऽक्रूरत्वसमाख्यया श्रीकृष्णं हरन्नता न स दत्तापहारित्वादिदोषवान् नापि श्रीकृष्णः क्षणभङ्गसौहृदत्वादिदोषवान् किन्त्वक्रूर एव श्रीकृष्णं हरतीत्यक्रूरं शपन्त्य आहुः । एतद्विधस्येति पादोनाभ्यां द्वाभ्याम् । एषा श्रीकृष्णहरणरूपा विधा विधानं कर्म यस्य अत एवाऽकरुणस्य अक्रूर इति शोभनं नाम माभूत् यतः योऽसौ अतीव दारुणः सुदुःखितं जनमस्मदादिरूपम् अनाश्वास्य असान्त्वयित्वा प्रियात्प्राणादपि प्रियं श्रीकृष्णम् अध्वनः पारं नेष्यति अस्मद्दृग्गोचरत्वाद्दूरं देशं नेष्यतीत्यर्थः ॥ २६ ॥

अनार्द्रा अस्निग्धा धीर्यस्य स एष अक्रूरः रथमास्थितः स्थविरैरुपनन्दादिभिरुपेक्षितं तमक्रूरं गोपाश्चापि त्वरयन्ति अन्यास्त्वक्रूरस्यापि दोषाभावं मन्वानाः स्वदैवप्रातिकूल्यं श्रीकृष्णवियोगे कारणमाहुः । दैवमिति ॥ २७ ॥

श्रीकृष्णवियोगे दैवं कारणमित्युक्तं तत्र काश्चित् तत्प्रतीकारं पौरुषेण करिष्याम इत्याहुः । निवारयाम इति । ननु दैवप्रतीकारार्थमेवं साहसे प्रवृत्ता अस्मान् कुलवृद्धबान्धवाः वारयिष्यन्त्यत आहुः । दैवेन निमिषार्द्धदुस्त्यजादपि मुकुन्दसङ्गात् विध्वंसितानि वियोजितानि अत एव दीनानि चेतांसि यासामेवं भूताना नोऽस्माकं कुलवृद्धाः अन्ये च बान्धवाः किमकरिष्यन् किङ्करिष्यन्ति पिष्टस्य पेषणासम्भवात् दैवताडितानां नः पुनस्ताडनासम्भवादिति भावः अतः माधवं निवारयाम एव ॥ २८ ॥

भाषा टीका ।

आज निश्चय से उहां मधुपुरी में दाशार्ह भोज अंधक सात्वत इन सवों के नेत्रों को बड़ा उत्सव प्राप्त होगा जो कि लक्ष्मी के पति सब गुणों से पूर्ण देवकी नंदनजी के मार्ग में जाते समय दर्शन करेंगे ॥ २५ ॥

इस प्रकार के अत्यंत कठोर काम करने वाले का अक्रूर नाम नहीं होना चाहिये जो कि यह ऐसे दुःखित जन हम लोगों को आश्वासन नहीं करके हमारे नेत्रों से दूर रहता को हमारे प्राणों से भी प्रिय श्रीश्याम सुंदर को लेजावेगा ॥ २६ ॥

यह नंदनंदन भी निर्दय बुद्धिवाला होकर रथ पर बैठ गया है तिसके पीछे ये और भी दुर्मद गोप लोग जल्दी कर रहे हैं जो कि गाड़ों पै चढ़े जा रहे हैं बृद्ध लोग कोइ इनको नहीं समुझाते हैं दैव भी आज हमारा प्रति कूल होरहा है जो कुछ विघ्न भी नहीं हो जाता है ॥ २७ ॥

अब हम सब जाकर माधव को लौटावेंगी कोइ कुल के वृद्ध बांधव लोग हमारा क्या करेंगे एक निमिष भी नहीं छोडने योग जो मुकुंद का संग तिससे हमको दैवने छुडा दिया है तो और क्या करेंगे ॥ २८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

इतोऽपि कारणादवश्यं साहसमेवावलम्बनीयमित्याहुः । हे गोप्यो यस्य ललितं स्मितं च वल्गुमन्त्रश्च लीलावलोकश्च परिरम्भणं

योऽह्नः क्षये व्रजमनन्तसखः परीतो गोपैर्विशन् खुररजश्छुरितालकस्रक् ।
वेणुं क्वणन् स्मितकटाक्षनिरीक्षणेन चित्तं क्षिणोत्यमुमृते नु कथं भवेम ॥ ३० ॥
श्रीशुक उवाच ।
एवं ब्रुवाणा विरहातुरा भृशं व्रजस्त्रियः कृष्णविषक्तमानसाः ।
विसृज्य लज्जां रुरुदुः स्म सुस्वरं गोविन्द ! दामोदर ! माधवेति ॥ ३१ ॥
स्त्रीणामेवं रुदन्तीनामुदिते सवितर्यथ ।
अक्रूरश्चोदयामास कृतमैत्रादिको रथम् ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

सानुरागेणैतानि यस्यां रासगोष्ठ्यां रासक्रीडासभायां नोऽस्माभिः क्षणदा रात्रयः क्षणमिव नीतास्तममुं कृष्णं विना दुरन्तं तमो विरहदुःखं कथन्नु अतितरेम न कथंचिदित्यर्थः ॥ २९ ॥

किञ्च आस्तां तावत्तमोऽतितरणं जीवनमेव कथं स्यादित्याहुः । य इति । अह्नः क्षये दिनावसाने खुररजोभिश्छुरिता धूसरा अलका स्रजश्च यस्य स व्रजं विशन् स्मितेन यत्कटाक्षनिरीक्षणं तेन नश्चित्तं क्षिणोति हरति अमुं कृष्णं विना कथं भवेम जीवेम ॥ ३० ॥

कृष्णे विषक्तानि मानसानि यासाम् सुस्वरमुच्चैः ॥ ३१ ॥

क्रूरमक्रूरतः श्रुत्वा कंसं कंसनिषूदनः ।
गोपीमनोरथारामः सरामः स्वपुरं ययौ ॥

स्त्रीणामिति । ता अनादृत्य कृतमैत्रादिको मैत्रं मित्रदैवतं सन्ध्योपासनं तदादि कर्म कृतं येन सः ॥ ३२ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

अथ निवारणार्थमुद्यता अपि बहुविरुद्धसङ्घट्टे तस्मिन् स्वेषां प्रवेशमदृष्ट्वा ससयमाहुर्यस्येति । रासोपलक्षणत्वेन लीलान्तरमपि ज्ञेयं वल्गुमन्त्रः मधुररहस्यसङ्केतवार्त्ता स्म विस्मये नु वितर्के तरणस्य दुष्करत्वेनातिशब्दः यथा रासक्रीडासुखेन बह्व्योऽपि रात्रयः क्षण इव भवन्ति स्म तथा तद्विरहदुःखेन क्षणोऽपि युगशतमिव स्यादतस्तत् सह्यं न स्यादिति भावः ॥ २९ ॥

अनन्तः सङ्कर्षणतया तदेकनामत्वात् शुभ्रवर्णत्वेन सारूप्यादनन्तबलत्वाच्च व्रजे कृष्णनामान्तरवत्तथा प्रसिद्धः श्रीबलदेवस्तस्य सखा तत्सहित इत्यर्थः । गोपैर्वयस्यैः परितो वेष्टितः स्मितं मन्दहासः कटाक्षोऽपाङ्गदर्शनं तत्प्रधानं निरीक्षणं वक्षोजादिनिभालनं तेन चित्तं क्षिणोति प्रेमोद्रेकेण सम्मोहयति नु आशङ्कायाम् अतोऽद्य स्वयमेवात्रत्या मरिष्याम इति भावः ॥ ३० ॥

अथ भृशं विरहातुरत्वेन विशेषविलापशक्त्या शोकोद्दीपकतन्नामविशेषैरेव विलेपुरित्याह । एवमीदृशं भृशं ब्रुवाणा इत्यन्वयेऽपि तादृशमूचुरिति ज्ञेयं तत्र हेतुर्विरहेणातुरा विवशाः तत्रापि हेतुर्व्रजस्त्रियः सहजप्रेमरसमयत्वेन प्रसिद्धा इत्यर्थः अत एव कृष्णे विषक्तानि प्रेम्णा सक्तानि मानसानि यासां ताः अत एव लज्जां हित्वा सुस्वरं करुणोच्चस्वरेण रुरुदुः स्म पादपूरणे तच्च प्रेमार्त्तेरशक्त्या कथं रुरुदुः हे गोविन्द ! दामोदर ! माधवेत्येवम् अत्र गोविन्देति गोकुलेन्द्रस्मरणात्त्वां विना गोकुलमिदं सर्वं क्षणादेव विनङ्क्ष्यतीति सूचयन्ति दामोदरेति नाम श्रीव्रजेश्वर्याः स्वकृतानुतापस्मारकं ततस्त्वां विना तस्यास्तस्य स्मरणेन सम्प्रति कीदृगवस्था भविष्यतीति व्यञ्जयन्ति माधवेति जयति तेऽधिकं जन्मना व्रज इत्यनेन सततमुरसि सौख्यं श्रीर्वधूः साकमास्ते इत्यनेन च निजसम्भावनानुसारेण तथा श्रीनारायणप्रिययापि गूढं वृत्त इति परमसहायकत्वं योऽस्मदेवास्मन्महानुरागविषयो जात इति स्मरणेन हन्त कथमस्माकं मधुना कालक्षेपणं भविष्यतीति ज्ञापयन्ति मा नाम्नी नारायणप्रियामपि धुनोति भावविशेषेण कम्पयतीति निराकिंश्चात्र प्रस्तुतोपयोगिनी ज्ञेया ईदृशस्यापि तव विच्छेदे वयं वा कथं जीवेम मरणे च हा पुनर्द्रष्टव्यो नासीदिति ध्वनयन्ति चकारोऽनुक्तानामन्येषामपि नाममयकरुणपरिदेवितानां समुच्चये ॥ ३१ ॥

एवमुक्तप्रकारेण रुदतीरपि स्त्रियोऽनादृत्येति अक्रूरस्यापराधो ध्वनितः स्वतः सर्वैरेवानुकम्प्यानां तत्रापि तादृशश्रीकृष्णप्रेम्णा तथा रुदतीनां व्रजस्त्रीणां कथमपि सान्त्वनमनपेक्ष्य प्रस्थानात् अतस्ताभिरपि तदपराधं मत्वा प्रागुक्तं योऽसावनाश्वास्येति श्रीविष्णुपुराणेऽपि "अक्रूरः क्रूरहृदयः शीघ्रं प्रेरयते हयान्। एवमार्त्तासु योषित्सु न घृणा तस्य जायते" इति अत एव श्रीगोकुलमाहिम्नास्तु तदपराधस्य फलमक्रूरस्य वक्ष्यमाणे स्यमन्तकप्रसङ्गे मन्यन्ते सूर्यं उदित एवेति सल्लज्जाद्यपेक्षया रथं भ्रातृभ्यां ताभ्यामिति शेषः ॥ ३२ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

अनन्तसखः बलभद्रसखः क्वणन् क्वणयन् ॥ ३०...३४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

इतोऽप्यवश्यं साहसमेवावलम्बनीयमित्याहुः । यस्येति । हे गोप्यः यस्य अनुरागेण ललितं स्मितं च वल्गुमन्त्रः सुन्दरतरवाक्

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

संलापश्च लीळावलोकश्च परिरम्भणञ्च एतानि यस्यां तस्यां रासगोष्ठ्यां रासक्रीडासभायां नोऽस्माभिः क्षणदा रात्रयः क्षणमिव नीताः क्रमितास्तममुं श्रीकृष्णं विना दुरन्तं तमो विरहजं दुःखं कथं त्वातितरेम न कथञ्चिदित्यर्थः ॥ २९ ॥

आस्तां तावत्तमोऽतितरणं जीवनमेव कथं स्यादित्याहुः । य इति । योऽनन्तस्य रामस्य सखा तत्सहित इत्यर्थः । गोपैश्च परिवृतः अन्हः क्षये दिनावसाने गवां खुररजोभिः छुरिता धूसरा अलकाः स्रजश्च यस्य सः व्रजं विशन् वेणुं वादयन् स्मितेन यत्कटाक्षेण वीक्षया तेन नोऽस्माकं चित्तं क्षिणोति हरति तममुं श्रीकृष्णं विना कथंभवेम जीवेम ॥ ३० ॥

इतीत्थं ब्रुवाणाः भृशं नितरां कृष्णे विषक्तानि मानसानि यासां ता अत एव तद्विरहेण भाविना आतुरा व्रजस्त्रियः लज्जां विसृज्य सुस्वरमुच्चैर्हे गोविन्द ! हे दामोदर ! हे माधवेति च रुरुदुः स्म ॥ ३१ ॥

इत्थं स्त्रीणं रुदतीनां सतीनां सवितरि सूर्ये उदिते सत्यनन्तरमक्रूरः कृतं मैत्रं मित्रस्य कृत्यं तदादि यस्य तथेत्त सः गोपेषु प्रदर्शितसौहार्द इत्यर्थः । रथं चोदयामास गमयामास मैत्रं मित्रः सूर्यस्तद्दैवत्यं प्रातः संध्योपासनं तदादिकर्मकृतं येनेति वा ॥ ३२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावळी ।

हे गोप्यः ! क्षणदा निद्रावसरदाः सुरतोत्सवप्रदा वा रात्र्यां तमो दुःखम् ॥ २९ ॥

अन्हः क्षये सन्ध्यासमये तं कृष्णमृते विना कृष्णो दयातिशयात् अरुणेति सखीसम्बोधनं भवेम तास्विति शेषः ॥ ३०-३१ ॥

कृतमैत्र्यादिकः कृतसूर्यमण्डलाधिष्ठितनारायणोपासनादिः क्रियः ॥ ३२-३३ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

ततो निराशा आत्मानमेवोपालभन्ते द्वयेन दुःखाभावं सुखं च स प्रयच्छतीति तदभावे कथं दुःखनिवृत्तिः कथं वा अनिवृत्तौ सत्यां जीविष्यामः मरणे वा भगवन्तं न प्राप्स्याम इति किं वा भविष्यामः । यस्यानुरागेति । अनुरागादयो भगवदीयाः अनुरागपूर्वकं यत्स्मितं तत्पूर्वका ये वल्गुमन्त्रा गुह्यभाषणानि तत्सहिता लीला तत्पूर्वकोऽयमवलोकः ततोऽधिकरसोद्गमार्थं परिरम्भो रासश्च एतेषां या गोष्ठी समूहः अवसरो देशकालसहितः तस्यां क्षणदा रात्रयः क्षणमिव नीताः नात्र विविच्य प्रमाणं वक्तव्यं स्मेति प्रसिद्धिः सर्वगोपिकानुभवसिद्धं या रात्रयः अन्येभ्यः क्षणं प्रयच्छन्ति अतस्ता बहुक्षणा भवन्ति ता अपि क्षणमिव नीताः अतः परं तं विना तदीयसर्वसामग्र्यपगमे चन्द्रादीनामप्यपगमात् तम एव निश्चलं स्थास्यति तत्कथं तरेमेति एकापि रात्रिर्न गमिष्यतीति

भावः । वस्तुतः कृष्णात्रयोदशीयम् अतोऽन्धकारः सिद्धः आन्तरोऽपि ॥ २९ ॥

किञ्च अन्धकारेऽपि केचित् जीवन्ति अस्माकं तु जीवनमपि न भविष्यतीत्याहुः । योऽन्हः क्षय इति । अन्हः क्षये सन्ध्यायां क्षयशब्दप्रयोगोऽन्हो क्लिष्टत्वज्ञापकः अनन्तो बलभद्रः अनन्तकालस्यापि तदनुगुणत्वमुक्तं गोपैः परीत इति सर्वैः सहितोऽस्मत्कार्यमेव करोतीत्याहुः । किञ्च यदपि कृतं तदप्यस्मदर्थमेवेति वर्णयन्ति । विशन् खुररजश्छुरिताळकस्रक् इति । व्रजं विशन्ति या गावः तासां खुररजसा छुरिता अळकाः स्रजश्च एके ज्ञानरूपाः अन्ये भक्तिरूपाः उभयत्रापि धर्मसंबन्धः सूच्यते उभयविधा एवं क्लेशेनाप्युद्ध्रियन्त इति ज्ञापयितुं ततो रसानुद्बोधयितुं वेणुं क्वणन् तान् पुष्टीकरिष्यन् स्मितपूर्वकं यत् कटाक्षनिरीक्षणं तेनास्माकं चित्तं क्षिणोति पीडयति काममुद्बोधयित्वा पश्चाद्रमते एवं सर्वत्र सौख्यदातारं विना कथं भवेम कामवस्थां प्राप्स्यामः ॥ ३० ॥

एवमुपालभ्य पूर्वं रोदने प्रादुर्भूत इति रोदनं कृतवत्य इत्याह । एवमिति । अयमेकः प्रकारो निरूपितः एवमनन्तप्रकारेण जातविरहेण भावनया आतुराश्च जाताः यतो व्रजस्त्रियः सदानन्दासक्तचित्ताः न विषयैः परितुष्यन्ति ततो लज्जां विसृज्य सुस्वरमुच्चै रुरुदुः शास्त्रतो देवादिभिः कृतं भक्तिवशादस्माभिः कृतं लोकतः स्वकृतं सर्वमेव भगवान् दूरीकरोतीति संबोधनत्रयं गोविन्दो ऽभिषिक्तः दामोदरो वशीकृतः लक्ष्मीपतिश्च माधवः एते धर्माः प्रायेण भगवता विस्मृता इति दयासिद्ध्यर्थं रोदनपूर्वकमुच्चारितवत्यः ॥ ३१ ॥

स्त्रीणामिति । स्त्रीणां रोदने न गमिष्यतीति अभिप्रेत्य सूर्योदये जाते कालातिक्रमं च ज्ञात्वा स्वयमक्रूरः वसुदेवादिकार्यसाधकः कंसस्यापि मित्रकार्यं करिष्यन् कृतमैत्रः कृतसन्ध्यावन्दनः कृतावश्यको वा तिष्ठेदासूर्यदर्शनादिति सूर्योदयपर्यन्तं कर्मैव कृतवानिति लक्ष्यते अग्निहोत्रादिसमयेषु वा न गन्तव्यमिति ज्ञापनार्थम् अथ भिन्नप्रक्रमेण गोकुलवासनां परित्यज्य भिन्नवासनायामभिनिविष्टचित्तः रथं प्रेरयामास ॥ ३२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

इतोऽपि कारणान्निवारयाम एवेत्याहुः । यस्यानुरागेणैव ललितस्मितादीनि यस्यां तत्रैव वल्गुमन्त्राः रहस्यसङ्केतवार्त्ता । रासगोष्ठ्यां रासोपलक्षितक्रीडामात्रसभायां नोऽस्माभिः क्षणदा रात्रयः क्षणमिव नीताः तं कृष्णं विना दुरन्तमदृष्टपारं तमः विरहान्धकारदुःखसमुद्रं नु निश्चितं कथमातितरेम । यथास्य सङ्गसुखेन बहवोऽपि रात्रयः क्षण इवाभूवंस्तथैव विरहदुःखेन क्षणोऽप्यस्माकं युगसहस्रं सदा भवत्येव किन्तु बह्वी रात्रीरागामिर्निर्गमयितुं कथं प्रभविष्याम इत्यर्थः ॥ २९ ॥

किञ्चाद्यैव सायं मरिष्याम इत्याहुर्य इति । अन्हः क्षये दिनावसाने अनन्तस्य रामस्य सखा व्रजं विशन् क्वणयन् निरीक्षणं वक्षोजादिनिभालनं तेन चित्तं क्षिणोति सम्मोहयति । अमुं कृष्णमृते कथं भवेम जीवेमेति । अद्य सायं तत्स्यादि न भविष्यति तदा का खलु जीवितं धारयितुं पारयिष्यतीति भावः ॥ ३० ॥

गोपास्तमन्वसज्जन्त नन्दाद्याः शकटैस्ततः ।
आदायोपायनं भूरि कुम्भान् गोरससम्भृतान् ॥ ३३ ॥
गोप्यश्च दयितं कृष्णमनुव्रज्यानुरञ्जिताः ।
प्रत्यादेशं भगवतः काङ्क्षन्त्यश्चावतस्थिरे ॥ ३४ ॥
तास्तथा तप्यतीर्वीक्ष्य स्वप्रस्थाने यदूत्तमः ।
सान्त्वयामास सप्रेमैरायास्य इति दौत्यकैः ॥ ३५ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

एवं विलप्य कृष्णं रथादवतारयितुं संहता एव यदा गन्तुं प्रवृत्तास्तदोत्तम्भादिविप्लववशादसामर्थ्ये सति केवलं रुरुदुरेवेत्याह । एवमिति । विरहपीडया आतुराः एकमपि पदं गन्तुं स्पष्टाक्षरतया वक्तुञ्चासमर्थाः हे गोविन्द ! इत्यनेनास्माकं गा मनश्चक्षुरादीन्द्रियवृत्तिर्वाः परःसहस्रा विन्द लभस्व त्वत्सङ्ग एव गच्छन्तीरेताः कृपया गृहाण स्वीयमनोवृषभेन्द्रेण सह सङ्गमय्य रक्ष नतूपेक्षस्व देहास्त्वस्माकं त्वत्सङ्गायोग्यत्वाद्दुर्भगा अत्रैव पञ्चत्वं प्राप्स्यन्ति यदि त्वं नागमिष्यसीति विज्ञापना किञ्च स्त्रीवधान् जिघृक्षसि चेद्गृहाण यस्याः प्रेम्णा दामबन्धनमपि स्वीकृतवानभूस्तां मातरं श्रीव्रजेश्वरीं मा जहि यदि परश्वस्त्वं नायास्यसि तदा सा सर्वथा मरिष्यतीति मातृहत्यान्तु मा गृहाणेति हे दामोदरेति पदेन विज्ञापना हे माधवेति त्वमस्माकं मा खलु धवः किन्तु सखा भवसि यदि धवोऽभविष्यस्तदा अस्मासु तव स्वत्वसम्भवात् स्ववस्तूनां पालने ज्वालने वा नैवातिदोषं प्राप्स्यः किन्तु वयं परद्रव्याणि भवामोऽतोऽस्मन्नाशनिबन्धनं दोषं माङ्गीकुरुथा इति विज्ञापना द्योतिता ॥ ३१ ॥

स्त्रीणामित्यनादरे षष्ठी भो मातरः ! क्षमध्वं पराधीनस्य राजसेवकस्य ममापराधमेषोऽहमेव कृष्णमानीय समर्पयिष्यामीत्याश्वासनाकरणमेवानादरः अत एतदनादरलक्षणापराधफलमक्रूरस्य स्यमन्तकप्रसङ्गे कृष्णविच्छेददुःखं द्वारकात्यागं दुर्यशो वाराणसीवासं च भावकभक्तविशेषाः केचिन्मन्यन्ते कृतं मैत्रं मित्रदैवत्यं दैहिकं तदादिकं स्नानसन्ध्योपासनादिकं कर्म येन सः अत्र गोपीविलापाब्धिनिमग्नसम्पूर्णचेतस्त्वादेव मुनिना तात्कालिकव्रजेश्वरीविलापावर्णनमिति वैष्णवतोषिणी धनुर्महोत्सवदर्शनसोत्कण्ठमना बालकोऽयं स्वपित्रा सहैव याति यथासमयं पित्रैव भोजयिष्यमाणः पितुरङ्क एव सुखं शयिष्यमाण एकदिनं तत्र स्थित्वा परश्वः पुनः स्वपित्रा सहैवायास्यति कात्र चिन्तेति पुरन्ध्रीभिर्गोपैश्च नन्दादिभिश्च मुहुराश्वासितायास्तस्यास्तदा नातिशोक इत्यन्ये प्राहुः ॥ ३१-३२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अस्माः सुखाः दैवं पौरुषेणान्यथा कर्तुं कः शक्नुयात् माधवञ्च सत्यसङ्कल्पमावश्यके कार्ये प्रवृत्तमितरो निवारयितुं कः शक्नुयात् अतस्तद्गुणस्मरणातुराः तद्विरहदुःखाभिभूताः तद्वियोगानन्तरं कथं जीवेमेति परस्परमूचुः । यस्येति द्वाभ्याम् । श्रीकृष्णस्य अनुरागेण ललितं स्मितं तथा वल्गुमन्त्रश्च तथा लीलावलोकश्च परिरम्भणञ्च यस्यां रासगोष्ठ्यां रासक्रीडायां तोऽस्माभिः क्षणदाः रात्रयः क्षणमिव नीताः तं श्रीकृष्णं विना हे गोप्यः ! दुरन्तं तमो विरहदुःखं कथं नु अतितरेम न कथञ्चिदित्यर्थः ॥ २९ ॥

अतस्तद्वियोगदुःखाभिभूतानां जीवनं कथं स्यादित्याहुः । य इति । यः अनन्ताः सखायो यस्य सः बलसखो वा यः श्रीकृष्णः अह्नः क्षये दिनान्ते खुररजोभिः छुरिता व्याप्ता अलकाः स्रजश्च यस्य सः गोपैः परीतः व्रजं विशन् स्मितेन यत्कटाक्षनिरीक्षणं तेन नोऽस्माकं चित्तं क्षिणोति हरति अमुं श्रीकृष्णं विना कथं भवेम कथं जीवेम न कथमपीत्यर्थः ॥ ३० ॥

विरहेण समासन्नेन श्रीकृष्णवियोगेन आतुराः कृष्णे विषक्तानि मानसानि यासां ताः सुस्वरमूचुः ॥ ३१ ॥

कृतं मैत्रादिकं मैत्रं मित्रदैवत्यं सन्ध्योपासनं तदादिकं कर्म येन सः ॥ ३२ ॥

भाषा टीका ।

हे गोपीहो ! जिन भगवान् के अनुराग युक्त ललित मनोहर मंदहास युक्त सुंदर बोल और लीला सहित जो देखना और अलिंगन करना आदि करके रास गोष्ठी में बडी रातों को भी क्षणमात्र सरी के विताये हैं वे हम सब कैसे इस कठिन कष्ट से पार होंगी ॥ २९ ॥

जोकि दिनके सांझके समय बलदेवजी के साथ गोपों के सहित ब्रज में प्रवेश होते समय में गो खुरों के रजों से लिपटी माला अलकावली को धारण किये हुये बंशी को बजाते हुये मंदहास युक्त कटाक्ष के देखने से हमारे चित्त को हरण कर लेते हैं उनके विना कैसे हम रह सकेंगी ॥ ३० ॥

श्रीशुकदेवजी बोले इस प्रकार से बोलती भई रोती ब्रज स्त्री अत्यंत दुखित भई हुई श्रीकृष्ण के विषै मै चित्त के लग जाने से लज्जा को छोडकर बडे ऊंचे स्वर से हे दामोदर ! माधव ! इत्यादि पुकारकर रोदन करने लगीं ॥ ३१ ॥

स्त्रियों के ऐसे रोते पर जब सूर्य उदय होगया तब अक्रूरजी ने प्रातः काल की स्नान संध्यादि क्रिया करके रथ को चला दिया ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अन्वसज्जन्तान्वगच्छन् ॥ ३३ ॥

यावदालक्ष्यते केतुर्यावद्रेणू रथस्य च ।
अनुप्रस्थापितात्मानो लेख्यानीवोपलक्षिताः ॥ ३६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका

अनुरञ्जिताः परावृत्य निरीक्षणादिभिः किञ्चिदानन्दिताः प्रत्यादेशं प्रत्याख्यानम् ॥ ३४ ॥

तप्यतीः सन्तप्यमानाः आयास्ये शीघ्रमागमिष्यामीति दूतवाक्यैः ॥ ३५ ॥

कृष्णमनुप्रस्थापिता आत्मानश्चित्तानि याभिस्ताः लेख्यमयपुत्रिका इव निश्चलाः ॥ ३६-३७ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

तं रथमन्वसज्जन्त पश्चादगच्छन् विविधशङ्काकुलचित्तत्वात् आयसन्नेन सन्नद्धादयश्च तत इत्यनेन सूचिते विलम्बे हेतुः उपायनं गव्ययुतसद्द्रव्यं कुम्भांश्च एवं यात्रामङ्गलमपि सूचितम् ॥ ३३ ॥

प्रत्यादेशं गमने वैमुख्येनाक्रूरवचनादिखण्डनं यद्वा दूतादिद्वाराऽवधिकरणार्थनिजविज्ञप्तिवाक्यस्य प्रतिवचनमित्यर्थः । अवतस्थिरे दूरतस्तद्दृष्टिविषये परमोच्चदेशे सावधानतया स्थिता इत्यर्थः ॥ ३४ ॥

केचित्तु यदेवं व्याचक्षते दूतद्वारकसन्देशस्वरूपैरायास्यामि नतु स्वयमिति तदसत् इतिशब्दस्य सर्वान्ते निर्देशाभावात् तदप्रतिपत्तेः सन्देशमात्रागमने प्रत्युत तासां परमक्षोभापत्तेः "आगमिष्यत्यदीर्घेण कालेन व्रजमच्युत" इत्यनेन परमाप्तदूतस्य श्रीमदुद्धवस्य वाक्येन तदुक्तिखण्डनेः दौत्यकैर्योज्यतया वारम्वारं बहुभिर्दूतवचनैः सप्रेमैर्विविधशपथादिपूर्वकं स्नेहमयैर्नतु स्वच्छलैरित्यर्थः । यदूत्तम इति । सम्प्रति तत्रागमिमत्यैव तद्रक्षानिश्चयात् गमने हेतुः आयास्ये इति "वर्त्तमानसामीप्ये वर्त्तमानवद्वा" इति तत्र लट्प्रयोगोऽपि तच्च दन्तवक्त्रवधानन्तरं सिद्धमिति पाद्मोत्तरखण्डं मूलस्यास्यञ्च तत्रैवोदाहरिष्यते ॥ ३५ ॥

अथापि तासां सद्यः प्राणरक्षैवाभूत् नतु शान्तिरित्याह । यावदिति । आलक्ष्यते किञ्चिल्लक्षणेनेष दृश्यते इत्यर्थः । तावत्तं रथं रेणुञ्चानु पश्चात् प्रस्थापितात्मानः उपलक्षिता लोकैः समीपे दृष्टाः ॥ ३६ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

आयास्ये इति सन्निधाय यास्यामीत्यभिप्रायः ॥ ३५...३८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

गोरसपूर्णकुम्भादीन् भूरिप्रभूतमुपायनं चादाय ततो नन्दाद्या गोपाः शकटैस्तं रथमनुपृष्ठतः समसज्जन्त सङ्गताः ययुः ॥ ३३ ॥

तदा गोप्यः कृष्णमनुव्रज्य तेनानुरञ्जिता आश्वासिता भगवतः प्रत्यादेशं प्रत्युत्तरं काङ्क्षन्त्यस्तत्रैवावतस्थिरे ॥ ३४ ॥

तदा यदूत्तमो भगवान् स्वस्य प्रस्थाने निमित्ते तप्यतीस्तप्यमानास्ताः प्रत्यादेशं काङ्क्षिणीः गोपीः समवलोक्य शीघ्रमागमिष्यामीति दौत्यैः दूतद्वारा प्रेषितैर्वाक्यैः सान्त्वयामास ॥ ३५ ॥

तदा श्रीकृष्णमनुप्रस्थापिता आत्मानश्चित्तानि याभिस्ता गोप्यः यावत्केतुः पताका लक्ष्यते यावच्च रथस्य रेणुर्दृश्यते तावत्तत्रैव लेख्यानीव चित्रस्थप्रतिमा इव उपतस्थिरे ॥ ३६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

प्रत्यादेशं प्रतिवचनं तिष्ठन्तु नायान्त्विति गमननिषेधपरं वचनं वा ॥ ३४ ॥

समीचीनतया प्रेषयितुं योग्यैः दौत्यकैः दूतसम्बन्धिभिः वाक्यैः ॥ ३५ ॥

केतुर्ध्वजः लेख्यानि चित्राणि ॥ ३६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

प्रत्यादेशं प्रत्युत्तरम् ॥ ३४—३६ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

ततो गमनोत्सवो जात इति वक्तुमाह । गोपा इति । तं भगवद्रथमनु असज्जन्त तत एव हेतोः ततो गोकुलाद्वा उपायनं गोरससम्भृतान् कुम्भांश्चादाय अवश्यगमने अत्यासक्तौ च तेषां हेतुरुक्तः भगवत्परिपालितानां रसो भगवतैव भोक्तव्य इति ॥ ३३ ॥

ततो गोपिकारोदने पूर्ववद्भगवानन्तः प्रकट इति विशेषमनुक्त्वा पूर्ववदेव सिद्धत्वात् अग्रिमवृत्तान्तमेवाह । गोप्यश्चेति चतुर्भिः । गोप्यश्च भगवत्सङ्गे गताः सूक्ष्मरूपाः स्थूलास्तु दयितं भर्त्तारं कृष्णं सदानन्दमनुव्रज्य कियद्दूरं सङ्गे गताः ततो भगवता अनुरञ्जिताः स्वरागेण रक्ताः मध्यप्रदेशे प्रत्युत्तरं भगवतः काङ्क्षन्त्यः किमस्माभिरागन्तव्यं स्वामिना वा आगन्तव्यमिति नान्यः प्रकारोऽस्ति निस्तार इति अवतस्थिरे तथैव स्थिताः ॥ ३४ ॥

ततो भगवता यत्कृतं तदाह । ता इति । याः स्थिताः याश्च नाविर्भूतस्वरूपाः तासामर्थे तथा सन्तापयुक्ता वीक्ष्य स्वस्यैव निमित्तमिति यदुराजसिंहः यावच्चकार्यमपि कर्त्तव्यमिति सम्प्रेष्यैरुत्तमदूतैः अहमेवायास्य इति दौत्यकैर्दूतवाक्यैः सान्त्वयामास अत्र तासां वाक्ये भ्रमो जातः भगवांस्तु दूतवाक्यद्वारा शब्दार्थरूपः ज्ञानरूपो वा आयमिष्यामीत्याद्युक्तवान् दौत्यवाक्यैरायास्य

ता निराशा निववृतुर्गोविन्दविनिवर्त्तने ।
विशोका अहनी निन्युर्गायन्त्यः प्रियचेष्टितम् ॥ ३७ ॥
भगवानपि संप्राप्तो रामाक्रूरयुतो नृप ! ।
रथेन वायुवेगेन कालिन्दीमघनाशिनीम् ॥ ३८ ॥
तत्रोपस्पृश्य पानीयं पीत्वा मृष्टं मणिप्रभम् ।
वृक्षषण्डमुपव्रज्य सरामो रथमाविशत् ॥ ३९ ॥

श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी ।

इति ताः पुनः इदानीमेतदेव वचनं दूतकार्यमिति ज्ञातव्यः इदं भगवच्चरित्रमेव अन्यथा न वक्तव्यं स्यात् ॥ ३५

तास्तथोक्ता अपि भगवत्संबन्धदर्शनार्थं तथैव स्थिता इत्याह । वतेति शब्दादर्थो महानिति अर्थसम्बधार्थं तथा कथनं यावता कालेन केतुर्ध्वजः लक्ष्यतेऽपि सम्भावनयापि दृश्यते यावद्वा रथस्य रेणुरपि तावत्पर्यन्तं भगवत्सङ्गे अनुप्रस्थापितान्तःकरणाः आधिदैविकरूपाः जीवस्वरूपा वा शरीरमात्रेण लेख्यानीव उपलक्षिताः प्रतिमायां चलनं भवतीति तद्व्यावृत्त्यर्थमुक्तम् आकृतिमात्रं तत्र स्थितं स्वरूपं तु भगवता सह गतमिति वा ॥ ३६ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

अनुरञ्जिताः कृष्णेन रथस्थेनैव पश्चिमाभिमुखीभूय स्वप्रेयसीनां निर्गच्छतः प्राणानालक्ष्य भोः प्राणैकवल्लभा माखिद्यत एषोऽहमेतान् वञ्चयित्वा युष्मत्सन्निधिमेष्यामीत्यर्थद्योतकेन निरीक्षणेन किञ्चिदानन्दिताः ततश्चोर्वीदिजाड्ये किञ्चिन्निवृत्ते सति गोप्यश्चेति । यथा गोपा आनन्देन रथमनुव्रजन्ति स्म तथा गोप्यश्च दयितमनुव्रज्य प्रत्यादेशं च काङ्क्षन्त्यः अवतस्थिरे नयनकृतमाश्वासं यथा प्रापुस्तथा वचनकृतमपि तमभिलषन्त्य इत्यर्थः ॥ ३४ ॥

तप्यतीः सन्तप्यमानाः यदूनां पालने प्रवृत्तमतित्वात् यदूत्तमः दौत्यकैर्दूतवाक्यैः कर्मणि ष्यञ् बहुवचनेन यथा तासां प्रबोधो भवति तथा बहुप्रकारैस्तद्विश्वासोत्पादकशपथशतसहितैरित्यर्थः । कप्रत्ययेनानुकम्पाव्यञ्जकैः सप्रेमैः सप्रेमाभिरिति यथा यूयं मां विना विभिन्नधैर्य्यास्तथैवाहमपि विदीर्णहृदय एव पराधीन एव भवतीनां स्मितमधुरकटाक्षमाध्वीकं त्रिजगदतिदुर्लभं स्वधीरसनया लिहन्नेव जीवन् पुरीं यामि यद्यहं परश्वो नागमिष्यामि तदा यूयमहं च युगपदेव प्राणान् धर्त्तुं न प्रभविष्यामो यदि वा परमायुः प्राबल्यादाशाबन्धाच्च जीविष्यामस्तदपि तज्जीवनं मरणकोटितोऽप्यतिकष्टमित्याविप्रेमामृतम्रक्षितैरित्यर्थः । आयास्ये आयास्यामि परश्व आगमनप्रकारस्तूपरिष्टाद्व्याख्यास्यते ॥ ३५ ॥

आलक्ष्यते किञ्चिल्लक्षणेनैवदृश्यते इत्यर्थः । गच्छन्तं कान्तमनु प्रस्थापिता आत्मानो मनांसि याभिस्ताः अत एव लेख्यानि चित्राणीव उप समीपेऽपि लक्षिता लोकैर्दृष्टाः ॥ ३६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

ततो रथचोदनानन्तरं गोपाः तं रथमन्वसज्जन्त अनुययुः ॥३३॥

गोप्यश्च कृष्णमनुव्रज्य तेन च निरीक्षणादिभिरनुरञ्जिताः किञ्चिदानन्दिताः भगवतः प्रत्यादेशं प्रत्युत्तरं काङ्क्षन्त्यः अवतस्थिरे ॥ ३४ ॥

यदूत्तमः श्रीकृष्णः स्वप्रस्थाने निमित्ते ताः तप्यतीस्तप्यमानाः वीक्ष्य आयास्ये इति दौत्यकैः दूतद्वारकैर्वाक्यैः सान्त्वयामास आयास्ये इति "ज्ञातीन् वो द्रष्टुमेष्यामि विधाय सुहृदां सुख"मिति वक्ष्यमाणं च वाक्यं भगवता प्रतिपालितमेवेति सूचितं प्रथमे "यर्ह्यम्बुजाक्षापससार भोभवान् कुरून् मधून् वाथ सुहृद्दिदृक्षया । तत्राब्दकोटिप्रतिमः क्षणो भवेदिति" । हरिवंशे तु हंसडिम्भकवधानन्तरं श्रीगोवर्द्धने श्रीनन्दयशोदागोपीनां श्रीकृष्णादिसंयोगः प्रसिद्ध एव ॥ ३५ ॥

तदा गोप्यः श्रीकृष्णमनुप्रस्थापिताः आत्मानः चित्तानि याभिस्ताः यावत् रथस्य केतुर्लक्ष्यते यावद्रेणुश्च लक्ष्यते तावत् तत्रैव लेख्यानीव कुड्यादिषु लिखिताः प्रतिमा इवोपतस्थिरे स्थिता बभूवुः ॥ ३६—३६ ॥

भाषा टीका ।

नन्दादिक गोप भी सब उनके पीछे गाडियों में चढकर बहुत से भेटों को लेकर और गोरसों के घडों को लेकर चलते भये ॥ ३३ ॥

गोपी सब भी अति प्रिय कृष्ण के अनुराग से पीछे से जाकर भगवान् के निषेधको भी इच्छा करती हुई खडी रहीं ॥ ३४ ॥

भगवान् ने उनको अपने जाने में तैसी दुःखित देखकर दूतन के द्वारा सांत्वन करने को कहा भेजा कि हम चले आवेंगे कर के कहो ॥ ३५ ॥

जब पर्यन्त रथका ध्वजा दीख पडा जब तक रथका रज दीख पडा तब तक अपने मनों को गोविन्द के पीछे भेजकर चित्र लिखी सरीकी गोपी वहीं खडी रह गईं ॥ ३६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

वृक्षाणां षण्डं समूहमुपव्रज्य ॥ ३९ ॥

अक्रूरस्तावुपामन्त्र्य निवेश्य च रथोपरि ।
कालिन्द्या ह्रदमागत्य स्नानं विधिवदाचरत् ॥ ४० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

शत्रुभ्यः शङ्कितः सन् रथोपरि निवेश्य ॥ ४० ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

अतो गोविन्दस्य विशेषेण मथुरागमनोन्मुख्यं विनैव निवर्त्तने निराशाः किन्तु तत आगमन एव साशाः सद्यो निवृत्ता इत्यर्थः । आयास्य इति तेनोक्तत्वात् तथैवाह । प्रियस्य श्रीकृष्णस्य चेष्टितं तस्मान्मच्छरणं गोष्ठमित्यादिलक्षणं तत्तत्प्रतिपालकं चरितम् आयास्य इत्यस्य प्रमाणरूपं गायन्त्यो विशोका आशाच्छेदजातेन कर्म्मपर्यन्तभेदकेन प्रियविच्छेदं जानन्त्यस्तद्दुःखाशङ्कालक्षणेन शोकेन रहिताः सत्योऽहनी निन्युस्तद्दर्शनदुःखातिशयं विषह्य गमयामासुः अन्यथा क्षणमपि नागमिष्यन्नित्यर्थः । यथैव स्वयं श्रीभगवता वक्ष्यते "धारयन्त्यतिकृच्छ्रेण प्रायः प्राणान् कथञ्चन । प्रत्यागमनसन्देशैर्बल्लव्यो मे मदात्मिका" इति श्रीमदुद्धवेन च "गायन्ति ते विशदकर्म गृहेषु देव्यो राज्ञां स्वशत्रुवधमात्मविमोक्षणञ्च । गोप्य"श्चेत्यादि अहनी रात्र्यहनी इत्यर्थः । तद्विशेषस्तु लीलास्तोत्रादौ वर्णितः ॥ ३७ ॥

अथ तासामिव प्रियजनप्रेमार्द्रतास्वभावेन सकलश्रुतिस्मृतिगीतस्य श्रीकृष्णस्यापि आर्त्तिर्जातैव किन्तु गाम्भीर्येणैव गोपिता दौत्यकैरिति बहुवचनेन तदावेशसूचनात् गमनं त्वावश्यककार्यविशेषार्थमेवेत्याह । भगवानपीति । सोऽपि तद्दुःखदर्शनाक्षमतया वायुवेगेन तद्वत् शीघ्रतया चालितेन रथेन कालिन्दीमनन्तीर्थप्रदेशावच्छिन्नां सम्यक् प्राप्तः कीदृशीमघानि अङ्घोदुःखव्यसनानि नाशयतीति तां निजविरहतापनाशिनी सा भवेदिति बुद्ध्येत्यर्थः । ननु तद्दुःखं न तत्र स्पष्टं दृष्टं तत्राह । रामेति । तत्सङ्कोचान्निगूहितमिति भावः । ननु तर्हि इयाजेनापि कथं न निवृत्तस्तत्राप्याह । रामेति । श्रीवसुदेवादित्राणाग्राहिणा तद्युगळसङ्गेन तस्यापि तदावश्यककर्त्तव्यता भगवदुद्दीपनादिति भावः । कालिन्दीप्राप्तिश्चेयं मध्यान्हे तथा च श्रीविष्णुपुराणे "गच्छन्तौ जविनाश्वेन रथेन यमुनातटम् । प्राप्ता मध्यान्हसमये रामाक्रूरजनार्दनाः" इति अत एवान्ये तत्सङ्गेन गन्तुं न शक्ताः तत्र तदानीं नन्दीश्वरगिरिसन्निहितः श्रीनन्दानिळय इति प्रसिद्धावपि यद्यपि तादृशवेगस्य रथस्य तावान् विलम्बो न सम्भवति तथाप्यसौ मुहुर्दूतादिद्वारा श्रीगोपिकासान्त्वनबाहुल्येन वृक्षावृततया रथगमने कौटिल्येन च ज्ञेयः ॥ ३८ ॥

उपस्पृश्य आचम्य आविशत् आरुरोह ॥ ३९ ॥

अहो श्रीव्रजदेवीमनःक्षोभात् किल तदप्यक्रूरस्य तन्निजपरममधुरवैभवावगाहिता यथा ब्रह्मादेर्जाता तथा न जातेत्याह । अक्रूर इति त्रिभिः । तावुपामन्त्र्य अनुज्ञाप्य रथोपरीति सुखोपवेशार्थं कालिन्द्या ह्रदमनन्ततीर्थं तीरमिति क्वचित् पाठः ॥ ४० ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

मृष्टमणिप्रभं शुद्धमरकतप्रभम् ॥ ३९ ॥ ४० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ततो गोविन्दस्य विनिवर्त्तने दूरगमने सति निराशास्ता गोप्यो निववृतुः न्यवर्त्तन्त ततः प्रियस्य श्रीकृष्णस्यैव चेष्टितं गायन्त्यस्तेनैव विगतशोकाः अहानि निन्युः क्रमितवत्यः ॥ ३७ ॥

हे नृप ! रामाक्रूराभ्यां युक्तो भगवानपि वायोरिव वेगो यस्य तेन रथेन साधननाघं नाशयतीति तथा तां कालिन्दीं कालिन्दीगतं तीर्थविशेषं प्राप्तः ॥ ३८ ॥

मृष्टस्य निघर्षणेन निर्मलीकृतस्य मणेरिन्द्रनीलस्येव प्रभा यस्य तत्पानीयं जलं पीत्वा उपस्पृश्याचम्य च वृक्षाणां षण्डं समूहमुपव्रज्य सरामो रथमाविशत् आरूढवान् ॥ ३९ ॥

तदाक्रूरः शत्रुभ्यः शङ्कितः तौ रामकृष्णौ रथोपरि निवेश्यामन्त्र्य पृष्ट्वा माध्याह्निकार्थं कालिन्द्या ह्रदमागत्य तत्र यथाविधिस्नानमाचरत् कर्त्तुमारेभे ॥ ४० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

गोविन्दविनिवर्त्तने कृष्णदर्शने ॥ ३७—३८ ॥

श्याममणिप्रभम् ॥ ३९-४० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

गोविन्दस्य विशेषेण मथुरागमनं विनैव वर्त्तने निराशाः किन्तु आगमन एव साशाः सत्यः निवृत्ता इत्यर्थः । अत एव विशोकाः पूर्वापेक्षया शोकरहिता अपि प्रियचेष्टितमेव गायन्त्योऽहनी निन्युरित्यर्थः ॥ ३७ ॥

अथ तासामिव लीलारसाविष्टस्य श्रीकृष्णस्यापि दुःखं जातमेव किन्तु गोपितं तथापि गमनमावश्यककार्य्यविशेषार्थमेवेत्याह । भगवानपीति । सोऽपि तद्दुःखदर्शनाक्षमः सन् वायुवेगेन तद्वच्छीघ्रतया चालितेन रथेन कालिन्दीं सम्प्राप्तः अघसङ्गानि दुःखव्यसनानि नाशयतीति तां निजविरहतापनाशिनी सा भवेदिति बुद्ध्येत्यर्थः । तत्तद्दुःखं न तत्र स्पष्टं तत्राह । रामेति । ताभ्यां सङ्कोचान्निगूहितमिति भावः ॥ ३८-४५ ॥

निमज्ज्य तस्मिन् सलिले जपन् ब्रह्म सनातनम् ।
तावेव दहशे ऽक्रूरो रामकृष्णौ समन्वितौ ॥ ४१ ॥
तौ रथस्थौ कथमिह सुतावानकदुन्दुभेः ।
तर्हि स्वित्स्यन्दने न स्त इत्युन्मज्ज्य व्यचष्ट सः ॥ ४२ ॥
तत्रापि च यथापूर्वमासीनौ पुनरेव सः ।
न्यमज्जद्दर्शनं यन्मे मृषा किं सलिले तयोः ॥ ४३ ॥

श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी ।

ततोऽपि दूरङ्गते निवृत्ता जाता इत्याह । ता निराशा इति। निवृत्ताशा जाताः केनचिन्निमित्तेनाद्यैव भगवान्निवर्त्तिष्यत इति ततः कथं जीवितव्यत्य इत्याशङ्क्याह। प्रियचेष्टितं गायन्त्यः भगवद्गुणा अपि भगवानेवेति तेनैव विशोकाः अहनी निन्युः रात्रिञ्चरित्रगानेन रात्रिं दिवसचरित्रगानेन दिनमिति विशेषं वक्तुमहनी इति द्विवचनेन निर्देश उक्तः। अनेन भगवतः भक्तोपेक्षादोषोऽपि निवारितः भगवदनागमनेऽपि दोषाभावश्च अहनी इति जात्यभिप्रायः गानेनैकरात्रिरिव सर्वा रात्रयो गता इत्यपि ज्ञापयितुम् ॥ ३७ ॥

यदा ता विशोका जाताः तदा भगवान् गोकुलवृत्तान्तमविचार्य अग्रे गत इत्याह । भगवानपीति । यद्यप्यत्रैव स्थित्वा कंसं मारयितुं शक्तः गोपिकाश्च सङ्गे नेतुमेकेन रूपेण स्थित्वा रूपान्तरेण वा गन्तुं तथापि मथुरामेव गत इत्यपिशब्दः रामाक्रूराभ्यां सहित एकस्मिन् रथे स्थितः तयोरप्रधानत्वाय तथोक्तिः नृप ! इति सम्बोधनं राजलीलेयमिति ज्ञापयितुं वायुवेगेन रथेनेति योजनत्रयं चतुष्टयं वा घटिकामात्रेण समागत इति सर्वे गोपाला नन्दादयः पश्चादेव स्थिताः किञ्चित्प्रदर्शयितुं परं भगवानेव समागतः अन्तर्वेद्यां गोकुलं वृन्दावनं गोवर्द्धन इति विमर्शः कल्यादौ तदीयभागाः सांप्रतमन्यत्र जाता इति न प्रत्यक्षविरोधः अन्या तु कल्पना न युक्ता सारस्वतकल्पानुसारिणी चेयं कथा एतावत् दूरमन्तर्वेद्यामेवागत्य मथुरानिकटे मथुरातः क्रोशद्वये सर्वत्रानिम्ना यमुनाह्रदेष्वेव गम्भीरेति अघनाशिनी तीर्थं समागत इति साधारण्येन सर्वत्र वा कालिन्द्या विशेषणम् अक्रूरस्य सर्वपापक्षये भगवत्स्वरूपदर्शनयोग्यतासिद्ध्यर्थम् ॥ ३८ ॥

ततः प्रातःकाले भुक्तमिति तत्रागत्य यत्कृतवांस्तदाह । तत्रोपस्पृश्येति तत्र कालिन्द्यां स्वयमुत्तीर्य लीलया उपस्पृश्य स्नात्वा पानीयं पीत्वा मृष्टमुज्ज्वलं विरजत्वात् स्वान्तः स्थितमप्यक्रूरं पावयित्वा अन्यानप्यपेक्षितान् मणिप्रभमिति इन्द्रनीलश्यामं सर्वप्रकाशकमन्तः प्रविष्टमिति तत्रत्यानां शुद्धिवत् ज्ञानमपि जनयतीति ज्ञापयितुं ततो वृक्षखण्डं वृक्षसमूहं वैष्णवच्छायां समाश्रित्य बलभद्रसहितः पुनः रथारूढो जातः अग्रे किञ्चित् कर्त्तव्यमिति छायायां रथे उपविष्ट इत्यर्थः ॥ ३९ ॥

ततो ऽक्रूरः प्रत्यहं नद्यामागन्तुमसमर्थः दुर्ल्लभत्वाद्यमुनायाः तत्र स्नात्वा गमिष्यामीति स्नानार्थं प्रवृत्त इत्याह तौ इति तौ रामकृष्णौ आमन्त्र्य स्नानार्थं गमिष्यामीति प्रार्थयित्वा बालकाविति इतस्ततः क्रीडन्तौ रथोपरि निवेश्य उपवेश्यैवात्र स्थातव्यमित्युक्त्वा कालिन्द्यास्तीरे पुनः समागत्य विधिवन्मृत्तिकास्नानं पुनः कर्तुं प्रवृत्तः प्रातः काले मृत्तिकास्नानस्य निषिद्धत्वात् ॥ ४० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

गोविन्दस्य विनिवर्त्तने निराशास्तास्ततः स्थानान्निववृतुः स्वयमेवासौ सर्वान् वञ्चयित्वा निवर्त्तिष्यत इति वा आशा आसीत् सा नष्टेत्यर्थः । विशिष्टशोकवत्य एव अहनी द्वे निन्युः । अहनी इत्यार्षम् । अहानीत्यर्थ इत्येके ॥ ३७—३९ ॥

रथोपरि निवेश्येति सुखोपवेशार्थं शत्रुभ्यः शङ्कया वा ॥ ४०-४३॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

वृक्षषण्डं वृक्षसमूहम् ॥ ३९—४० ॥

भाषा टीका।

फिर वे गोपी गोविंद के लौटने में निराशा होकर लौट गईं फिर प्रिय की चेष्टा ओं को गान करके दिन रातों को बिताती भई ॥ ३७ ॥

हे राजन् ! भगवान् भी बलरामजी अक्रूरजी के सहित पवन सरी के वेग वाले रथ से चलकर सब पापों की नाश करनेवाली यमुना पर पहुंचे ॥ ३८ ॥

उहां पर स्नानाचमनादि करके मणि सदृश निर्मल जल को पान करके फिर वृक्षों के समूह में जाकर रामजी सहित रथ पर बैठ गये ॥ ३९ ॥

अक्रूरजी ने उन दोनों को रथ पर बैठाकर आज्ञा मांग कर यमुनाजी के ह्रद में जाकर विधि पूर्वक स्नान किया ॥ ४० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

ब्रह्म वेदं जपन् । केमौ बालौ क्व तौ मल्लाविति शङ्कितचेतसे । अक्रूराय जले रूपमत्याश्चर्यं व्यदर्शयत् ॥ ४१ ४२ ॥ ४३ ॥

भूयस्तत्रापि सो ऽद्राक्षीत् स्तूयमानमहीश्वरम् ।
सिद्धचारणगन्धर्वैरसुरैर्नतकन्धरैः ॥ ४४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

सिद्धादिभिः स्तूयमानम् ॥ ४४ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

सनातनमिति विशेषणं तत्र भक्तिविशेषे कारणं समन्वितौ पूर्ववदेकत्रैव वर्त्तमानौ ॥ ४१ ॥

ताविविति युग्मकम् । इह जले इतीति पतद्विचिन्त्येत्यर्थः । तत्रापि स्यन्दनेऽपि यथापूर्वमासीनौ व्यचष्टेति पूर्वेणान्वयः ॥ ४२ ॥

ततश्च पुनरेव पुनश्चाक्रूरो न्यमज्जत् तत्र हेतुर्दर्शनमिति मे मम कर्तृभूतस्य तयोः कर्मभूतयोः सलिले यद्दर्शनं तत् किं मृषेतीतिशब्देनान्वयः ॥ ४३ ॥

श्रीभगवांस्तु स्वयं परममधुरवैभवमनवगाहमानं तं प्रति निजांशलक्षणं श्रीविष्णुमेवानुभावितवानित्याह । भूय इत्यादि त्रिभिः अत्र भूय इति युग्मकम् । भूयस्तत्रापि तत्रैव ह्रदेऽहीश्वरमद्राक्षीत् ननु पूर्ववत् कृष्णरामौ सिद्धैः स्वशिष्यरूपैः सनकादिभिः भुजङ्गपतयो विवृता वैष्णवे "वृतं वासुकिरम्भाधैर्महद्भिः पवनाशिभि" रिति असुरैः प्रह्लादप्रभृतिभिः नतेति सर्वेषां विशेषणम् ॥ ४४ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

ब्रह्म प्रणवम् ॥ ४१—५२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तत्र जले सनातनं ब्रह्म नित्यब्रह्मस्वरूपावेदकं प्रणवं जपन्निमज्ज्य समन्वितौ सहभूतौ तावेव रामकृष्णौ ददर्श ॥ ४१ ॥

एवं दृष्ट्वा सोऽक्रूरस्तावानकदुन्दुभेः सुतौ रथस्थौ कथमिह स्तः यदि रथादवरुह्यागतौ तर्हि रथे न स्त इति वितर्क्य उन्मज्ज्य ददर्श ॥ ४२ ॥

तत्रापि रथेऽपि पूर्ववदासीनौ दृष्ट्वा तयोः सलिले मम दर्शनं मत्कर्तृकं दर्शनं किं मृषा उत सत्यं यदि सत्यं तर्हि पुनर्द्रक्ष्यामीति चिन्तयन् पुनर्न्यमज्जत् पुनर्निमग्नः ॥ ४३ ॥

तत्रापि जले तावदहीश्वरं शेषं ददर्श कथंभूतं नता कन्धरा ग्रीवा येषां तैः सिद्धादिभिः स्तूयमानम् ॥ ४४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

ब्रह्म अघमर्षणसूक्तं ब्रह्म वेदस्तत्त्वमिति च ॥ ४१ ॥

स्यन्दने रथे न स्तः न विद्येते स्वित्किम् ॥ ४२ ॥

सलिले तयोः रामकृष्णयोः दर्शनं मृषा किमिति मेन इति शेषः ॥ ४३ ॥

असुरैरसुषु रतैः वशीकृतेन्द्रियैरित्यर्थः ॥ ४४ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

तत्राघमर्षणजपः जले निमज्ज्य कर्तव्यः हिरण्यशृङ्गमित्यादि जले निमज्ज्य तस्मिन् सलिले सनातनं वेदात्मकं ब्रह्म जपन् तेन शुद्धान्तःकरणः तावेव रामकृष्णौ ददर्श समन्वितौ मिलितौ यथा जलमध्यस्थाः पदार्थाः दृश्यन्ते तथा तावपि दृष्टवान् तस्मिन् स्थाने माया उद्घाटितेति सानुभावं भवति स्थानं भगवांश्च पुनः सर्वत्रैव वर्त्तते देशादिदोषाच्च न प्रतीयते प्रदर्शितवांश्च तस्य सन्देहव्यावृत्त्यर्थम् ॥ ४१ ॥

तत्र तौ दृष्ट्वा सन्देहात् विचारयति । तौ रथस्थाविति । भगवतः सर्वात्मत्वं भगवत्त्वं च विस्मृत्याह । आनकदुन्दुभेः सुतौ तौ मया रथस्थौ कृतौ कथमिह दृश्येते कथं वा समागताविति यदि केनचित्प्रकारेण मय्यन्यचित्ते समागतौ तर्हि स्यन्दने न भविष्यतः इति विचार्य उन्मज्ज्य व्यचष्ट दृष्टवान् द्रष्टा स एवेति अभिज्ञानार्थमाह ॥ ४२ ॥

ततोऽत्रापि दृष्टवानित्याह । तत्रापि चेति यथापूर्वं यथा स्थापितौ तथैव दृष्टवान् तस्य पुनरेव जिज्ञासा उत्पन्नेत्याह । पुनरेव स इति । निमज्ज्य मे सतः यत् भगवतो दर्शनं तत्किं मृषेति अर्थाद्विमर्शोऽयम् ॥ ४३ ॥

ततो भूयः निमज्ज्य दृष्टवानित्याह । भूय इति । प्रथमपर्याये भगवतो माहात्म्याज्ञानात् कल्पयित्वा शास्त्राप्रामाण्यं पुनरुन्मज्ज्य दृष्टवान् ततोऽनुभवात् प्रमाणमपि कृत्वा पुनर्द्रष्टुं प्रवृत्त इति नास्य लौकिकालौकिकप्रमाणेषु प्रतिष्ठेति भगवान् विचार्य तं बोधयितुं स्वमाहात्म्यं प्रकटितवानित्याह । भूयस्तत्रापीति । स एवाक्रूरः भूयो दृष्टवान् तत्रापीत्यपिशब्देन बहिर्जलमध्येऽपि अथवा तत्रापि दर्शने विशेषं दृष्टवान् यः सङ्कर्षणः तं शेषत्वेन दृष्टवान् भगवन्तं तु शेषशायिनं तस्य नारायणत्वेनैव ज्ञानं युक्तं भवतीति न तु पुरुषोत्तमत्वेन सन्देहनिवारणार्थमेवं प्रदर्श्यत इति सिद्धादिभिः स्तूयमानं च दृष्टवान् सिद्धाः सर्वे शेषाविष्टलक्ष्मणसेवकाः तथा षष्ठे निरूपिताः भुजङ्गानां सर्पाणां ये पतयः वासुकिप्रमुखाः तैरपि असुराणामपि ये पतयः कालनेमिप्रभृतयः तैरपि सर्वं एव संकर्षणस्य भक्ता इति सर्वे दैत्याः ससेवकाः अतस्तैः किं भयमिति प्रथमकक्षायामेव भयाभावो निरूपितः ॥ ४४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

स्वमन्त्रध्येयरूपादप्यद्भुतं रूपमीक्षितम् ।
व्रजेऽक्रूरेण तत्रैव निष्ठामप्याप चेतसः ॥
तां च्यावयन् व्रजवधूमन्त्रहेतोः पुरातनीम् ।
निष्ठामेवापयन् कृष्णो वैकुण्ठं तमदर्शयत् ॥

द्वितीयमज्जने तु तं स्वांशं श्रीविष्णुं तन्मन्त्रोपास्यवैकुण्ठं दर्शयंस्तत्रैव तन्मनोनिष्ठां धारयितुं तत्परिकरानानखशिखं तद्र-

सहस्रशिरसं देवं सहस्रफणमौलिनम् ।
नीलाम्बरं बिसश्वेतं शृङ्गैः श्वेतमिव स्थितम् ॥ ४५ ॥
तस्योत्सङ्गे घनश्यामं पीतकौशेयवाससम् ।
पुरुषं चतुर्भुजं शान्तं पद्मपत्रारुणेक्षणम् ॥ ४६ ॥
चारुप्रसन्नवदनं चारुहासनिरीक्षणम् ।
सुभ्रून्नसं चारुकर्णं सुकपोलारुणाधरम् ॥ ४७ ॥
प्रलम्बपीवरभुजं तुङ्गांसोरःस्थलश्रियम् ।
कम्बुकण्ठं निम्ननाभिं वलिमत्पल्लवोदरम् ॥ ४८ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

एममपि साक्षादनुभावयामास मदभिष्टदेवो वैकुण्ठनाथ एव वसुदेवगृहेऽवतीर्ण इति ज्ञापयामास च । भूय इति त्रयोदशभिः । तत्र द्वाभ्यां बलदेवांशं शेषं वर्णयति । सहस्रं फणा मौलयः किरीटानि च विद्यन्ते यस्य तं श्रीस्वादित्वादिनिः शृङ्गैः शिखरैः श्वेतं कैलासमिव "ददृशुर्ब्रह्मणो लोकं यत्राक्रूरोऽध्यगात् पुरे"त्यत्र ब्रह्मणो लोकं वैकुण्ठमिति स्वामिव्याख्यानात् वैकुण्ठेऽपि यथा शेष इति भागवतामृतवाक्याच्च जलेऽक्रूरो वैकुण्ठमेवापश्यदिति प्राहुः ॥ ४४-४५ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

ब्रह्म प्रणवम् उकरीत्या भगवत्स्वरूपगुणादिज्ञानवते शत्रुमध्ये गमयित्रे ऽक्रूराय स्वरूपं तादृशज्ञानदाढ्यार्थं जले दर्शयामास ॥ ४१—४३ ॥

अहीनामीश्वरं शेषम् ॥ ४४ ॥

भाषा टीका ।

फिर अक्रूरजी जब ॐकार मंत्र के जाप करते जल मे मस्तक सहित डुबे तब उन्ही राम कृष्ण दोनों का दर्शन करते भये ॥ ४१ ॥

तब उन ने विचारा कि वे तो रथ मे थे तो इहां कहां से आये जो इहां हैं तो रथ मे नहीं होंगे ऐसा जानके जल मे से मस्तक निकाल देखा तो उन्हीं को रथ पर भी देखा ॥ ४२ ॥

उहां भी उन को पहिले सरी के बैठे देख कर फिर विचारा कि क्या मेरा जल में देखना झूठा है ॥ ४३ ॥

इस प्रकार से फिर भी जल मे देखा कि सिद्ध चारण गन्धर्वअसुर मस्तकों को नम्र कर के जिन की स्तुति कर रहे हैं ऐसे अहीश्वर शेषजी का दर्शन किया ॥ ४४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

सहस्रं शिरांसि यस्य तम् सहस्रफणेषु मौलयो यस्य सन्तीति तथा तम् नीले अम्बरे यस्य तं बिसवत्कमलनालवच्छ्वेतम् शृङ्गैः शिखरैः श्वेतं कैलासमिव स्थितम् ॥ ४५ ॥

तस्योत्सङ्गे कुण्डलीकृतदेहार्धे विलोक्येत्येकादशेन श्लोकेनान्वयः ॥ ४६ ॥

शोभने भ्रुवौ यस्य उन्नता नासिका यस्य तं च तञ्च शोभनौ कपोलौ यस्य अरुणावधरौ यस्य तञ्च तञ्च ॥ ४७ ॥

तुङ्गावंसौ यस्य उरःस्थले श्रीर्यस्य तञ्च तञ्च वलिमत्पल्लवोदरं वलयस्तिर्यङ् निम्नरेखा यस्य सन्ति तद्वलिमत्तच्च तत्पल्लववदश्वत्थदलसदृशमुदरं यस्य तम् ॥ ४८ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

देवं जगत्पूज्यं मौळिनमिति श्रीह्यादित्वादिनिः सहस्रं फणा मौळयश्च किरीटानि विद्यन्ते यस्मिन् श्वेतं श्वेताद्रिं कैलासमित्यर्थः । टीकायां कमळकन्दस्य मृणाले तात्पर्यम् ॥ ४५ ॥

अथ द्वादशकम् तस्याहीश्वरस्योत्सङ्गे तदानीं लीलया सुखमासीनमिति ज्ञेयं "तस्योत्सङ्गे घनश्यामं श्रीवत्साच्छादितोरसम् । पीताम्बरधरं विष्णुं सूपविष्टं ददर्श ह" इति श्रीवैशम्पायनेनोक्तेः अत एव कुण्डलीकृतेति तैर्व्याख्यातं पुरुषं ब्रह्माण्डान्तर्यामिणो रूपविशेषं स्पष्टयिष्यते च नतोऽस्म्यहं त्वामित्यादिना शान्तं घोरत्वाद्यभावेन मनोनयनानन्दकरमित्यर्थः । पद्मपत्रवत् प्रान्ते अरुणे ईक्षणे यस्य तम् ॥ ४६ ॥

चारु सुशब्दयोर्मुहुरुक्तिर्यदा यद्ददृश्यत तदा तस्यैवातिशयस्तेनान्वभूयतेति बोधनाय ॥ ४७ ॥

श्रीरत्र रेखारूपा प्रेयसीतत्सखीरूपे त्वग्रे वक्ष्यते च कम्बुवत्त्रिरेखकण्ठम् ॥ ४८ ॥

श्रीमद्वीरराघवाचार्यकृतभगवतचन्द्रचन्द्रिका ।

सहस्रं शिरांसि फणा यस्य तं देवं देदीप्यमानं सहस्रेषु

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

फणेषु मौलयः किरीटान्यस्य सन्तीति सहस्रफणमौलिनः पामादेराकृतिगणत्वात् मत्वर्थीयनप्रत्ययस्तं नीलमम्बरं यस्य तं विसतन्तुवत् श्वेतं हिरण्मयैः शृङ्गै रजतगिरिमिव स्थितम् ॥ ४५ ॥

तस्याहीश्वरस्योत्सङ्गे फणप्रान्तभागे पुरुषमद्राक्षीत् केमौ बालौ क मल्लावित्याशङ्कापाजिहीर्षया प्रदर्शितमात्मानमद्राक्षीदिति भावः। कथम्भूतं नीलमेघवत् श्यामं पीते कौशेये वाससी यस्य चत्वारो भुजा यस्य तं शान्तं प्रसन्नं पद्मपत्रे इव ईक्षणे नेत्रे यस्य ॥ ४६ ॥

चारु सुन्दरं प्रसन्नं च वदनं यस्य चारुहासेन युक्तं निरीक्षणं यस्य शोभने भ्रुवौ यस्य उन्नता नासिका च यस्य चारू कर्णौ श्रोत्रे यस्य शोभनौ कपोलौ यस्य अरुणः अधरो यस्य स चासौ यस्तम् ॥ ४७ ॥

प्रलम्बा आजानुलम्बिनः पीवराश्च भुजा यस्य तुङ्गावुन्नतौ अंसौ स्कन्धौ यस्य स चासौ उरसि श्रीर्यस्य स च तं कम्बुवत् शङ्खवद्रेखात्रयोपेतः नातिदीर्घो नातिह्रस्वश्च कण्ठो यस्य निम्ना नाभिर्यस्य वलिमद्वलित्रयोपेतमश्वत्थपल्लववदुदरं यस्य ॥ ४८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली

बिसश्वेतं श्वेतपद्मनालतन्तुवद्धवलं शिखरैः सह श्वेतनामानं पर्वतम् ॥ ४५ ॥

उत्सङ्गे भोगे वपुरङ्गं तत्सङ्गहीनो जनार्दन इति च ॥ ४६ ॥

सुभ्रूश्च उन्नसश्च सुभ्रून्नसः तम् ॥ ४७ ॥

तुङ्गांसश्च उरःस्थलश्रीश्च तुङ्गांसोरःस्थलश्रीः तुङ्गावंसौ यस्य स तथा उरःस्थले श्रीर्यस्य स तथा तं वलिमश्च पल्लवश्चाकाशवच्च उदरं यस्य स तथा तं पल्लवश्च प्रकोष्ठे वापि विस्तृताविति वैजयन्तीमाला सुन्दररेखाङ्कितानन्तामण्डकोटिनिवेशनोदरमित्यर्थः ॥४८॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

पुरुषं ब्रह्माण्डान्तर्यामिरूपम् । स्पष्टयिष्यते च । नतोऽस्म्यहं त्वामित्यादि । सर्वं धैर्य्यम् ॥ ४६—४७ ॥

श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी ।

सङ्कर्षणं वर्णयति । सहस्रशिरसमिति । रूपान्तरे प्रतीतिर्दृढा न भवतीति स्वरूपमेव प्रकटितवान् सहस्रं शिरांसि यस्य दैत्यानां कामरूपे तथा भवतीति तद्व्यावृत्त्यर्थं देवमिति । सर्वत्र शिरसि फणाः मुकुटानि च एतादृशं शेषस्यैव रूपं भवति अन्यदपि ध्यानार्थमाह । नीलाम्बरमिति । तस्य ह्यावरणं कालरूपमिति पुनस्तम् इति विसश्वेतता शीतलं चिक्कणं श्वेतं विलमिति अन्यधर्मार्थमेव श्वेतता निरूपिता वर्णनार्थं तु फणैः कृत्वा श्वेताद्रिं कैलासमिव शृङ्गैः सहितं दृष्टवान् स्थितमिति फणभागे उच्चत्वात् उत्थित इव दृष्टः ॥ ४५ ॥

ततो दृष्टं भगवन्तं वर्णयति । तस्योत्सङ्गे इति । सङ्ग इत्सङ्गे काये कोमलत्वात् समत्वात् क्रमेण वर्तुलत्वेन सूक्ष्मत्वात् सर्वस्यैव शरीरस्योत्सङ्गतुल्यता सुखशयनार्थं तथोक्तवान् अन्यथा सर्पे शयनं भयानकं भवतीति उत्सङ्गपदं घनश्याममिति । तप्तानां तापनाशकं यथा आकाशमेघः स्वाधार एव भवति तथा भगवानपि पीतं यत् कौशेयं पट्टाम्बरं तदेव वस्त्रं यस्य एतेषां स्वरूपं प्रयोजनं च पूर्वमुक्तं पुरुषं पुरुषाकारं चत्वारो भुजा यस्य शान्तं गुणातीतम् उत्पत्तिस्थितिलयानां तदंशैरेव सिद्धत्वात् पद्मगर्भवत् अरुणे ईक्षणे यस्य मेघतुल्यतया प्रयोजनं निरूपितं वासः प्रमाणं पुरुष इति मूलरूपता पूर्वमेवाहमितिहासमिति निरुक्त्या पुरुषार्थचतुष्टयं दातुं चतुर्भुजाभिव्यक्तिः अन्तःकरणादिदोषाभावाय शान्तिः दृष्ट्यैव तापहारित्वाय अरुणवर्णेक्षणत्वं कंसवधार्थं च गर्भपदेन व्याजेनैव मारयिष्यति न प्राकट्येनेति निरूपितम् एवं षड्गुणा निरूपिताः ॥ ४६ ॥

चारु मनोहरं प्रसन्नं वदनं यस्य स्वरूपतः फलतश्च सर्वसुखदायि चारुः योऽयं हासः तत्पूर्वकं निरीक्षणं यस्य भक्तिज्ञानयोरुत्कर्षः सफलो निरूपितः । शोभने भ्रुवौ यस्य ऊर्ध्वा नासिका च कालासन्ययोः बहिरन्तः कार्ये निरूपिते सर्वे भगवत्यस्तीति ज्ञापयितुं निरूपयति चारू कर्णौ यस्य सर्वत्र भगवानुत्तम उक्तः सुष्ठु कपोलौ अरुणवर्णौ अधरौ यस्येति कामलोभावुत्तमौ निरूपितौ ॥ ४७ ॥

प्रकर्षेण प्रलम्बाः पीवराः स्थूला भुजा यस्य दूरस्थाः स्थूलदृष्टयोऽपि पुरुषार्थान् प्राप्स्यन्तीति ज्ञापयितुं तुङ्गावंसावुरःस्थलं च तत्र श्रीर्यस्य सर्वेषामेव सर्वं भारमूढ्वा सर्वं प्रयच्छतीति सर्वविद्यात्मकं त्रिवलीयुक्तं कण्ठस्थानमिति कम्बुवत् कण्ठो यस्य निम्ना नाभिर्यस्येति जगत्कर्तृत्वमस्य गूढमिति सुलक्षणत्वं च निरूपितं त्रिवली युक्तं पत्रवदश्वत्थपत्रवत् उदरं यस्य कोमलता किञ्चिदुन्नतत्वं च निरूपितं येन तद्वर्तिनः सर्वे सुस्था इति ॥ ४८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

कृष्णस्यांशं नारायणं वर्णयति । तस्य उत्सङ्गे कुण्डलीकृतदेहार्द्धे विलोकयेत्येकादशेन श्लोकेनान्वयः ॥ ४६-४७ ॥

तुङ्गांसमुरःस्थलश्रियश्चेति द्वयोः कर्मधारयेणैकपदं वलयस्तिस्त्र्यङ्गिम्ना रेखाः सन्ति यस्य तत् वलिमत् तच्च पल्लववत् अश्वत्थदलसदृशमुदरं यस्य तत् ॥ ४८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

कथम्भूतमहीश्वरम् सहस्रं शिरांसि यस्य तम् देवं दीप्यमानम् सहस्रफणेषु मौलयः शिरोभूषणान्यस्य सन्तीति तथा तम् नीले अम्बरे यस्य तम् विशदकमलकन्दवत् श्वेतम् शृङ्गैर्नानामणियुक्तैः शिखरैरिति मौलियुक्तानां फणानामुपमा दर्शिता श्वेतं कैलाशमिव स्थितम् ॥ ४५ ॥

तस्याहीशस्योत्सङ्गे पुरुषं विलोक्य भिया गद्गदयास्तौषीदिति द्वादशश्लोकानामन्वयः ॥ ४६ ॥

चारु सुन्दरं प्रसन्नं वदनं यस्य तम् शोभने भ्रुवौ यस्य

बृहत्कटितटश्रोणिकरभोरुद्वयान्वितम् ।
चारुजानुयुगं चारुजङ्घायुगलसंयुतम् ॥ ४९ ॥
तुङ्गगुल्फारुणनखव्रातदीधितिभिर्वृतम् ।
नवाङ्गुल्यङ्गुष्ठदलैर्विलसत्पादपङ्कजम् ॥ ५० ॥
सुमहार्हमणिव्रातकिरीटकटकाङ्गदैः ।
कटिसूत्रब्रह्मसूत्रहारनूपुरकुण्डलैः ॥ ५१ ॥
भ्राजमानं पद्मकरं शङ्खचक्रगदाधरम् ।
श्रीवत्सवक्षसं भ्राजत्कौस्तुभं वनमालिनम् ॥ ५२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

उन्नता नासिका यस्य तच्च तच्च शोभनौ कपोलौ यस्य अरुणोऽधरो यस्य तच्च तच्च ॥ ४७ ॥

प्रलम्बाः आजानुलम्बिनः पीवराः पीनाश्च भुजा यस्य तम् तुङ्गावुन्नतौ अंसौ स्कन्धौ यस्य उरःस्थले श्रीर्यस्य तच्च तं च वलयस्तीर्य्यङ्निम्ना रेखा यस्य सन्ति तद्वलिमत् तच्च पल्लववत् अश्वत्थपल्लववदुदरं यस्य तम् ॥ ४८ ॥

भाषा टीका ।

वे देव सहस्र मस्तक वाले सहस्रफणा सहित किरीट वाले हैं नीलवस्त्र धारण किये हैं पद्म कंद सरीके श्वेत हैं जैसे शिखरों से पर्वत होवै ॥ ४५ ॥

उन शेषजी के गोद पर मेघ सरी के श्याम पीतांबर वस्त्र धारण किये चार भुजा वाले शांत पद्म पत्र सरी के लाल नेत्र वाले ॥ ४६ ॥

मनोहर प्रसन्न मुख वाले सुन्दर हास सहित देखने वाले सुंदर नासिका सुंदर कर्ण सुंदर कपोल अरुण अधर से शोभित ॥ ४७ ॥

बडे लंबे स्थूल भुजा वाले ऊंचे स्कन्ध तथा वक्षः स्थल से शोभित शंख सरीका कण्ठ गंभीर नाभि त्रिवलियुक पत्र सरी के उदर से शोभित ॥ ४८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

कटितटश्च श्रोणिश्च करभसदृशमूरुद्वयञ्च बृहच्च तत्कटितटश्रोणिकरभोरुद्वयञ्च तेनान्वितम् यद्वा बृहद्भ्यां कटितटश्रोणिभ्यां करभोरुद्वयेन चान्वितम् ॥ ४९ ॥

तुङ्गावीषदुन्नतौ गुल्फावरुणनखव्राताश्च तेषां दीधितिभिः तथा नवाः कोमला अङ्गुल्योऽङ्गुष्ठौ च तान्येव दलानि तैश्च विलसच्छोभमानं पादपङ्कजं यस्य तम् ॥ ५० ॥

सुमहार्हा मणिव्राता येषु तैः किरीटादिभिः ॥ ५१–५२ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

कटिरेव तटं विस्तीर्णत्वात् श्रोणिरत्र तदग्रभागः तयोर्बृहत्त्वं स्थौल्यं "मणिबन्धादाकनिष्ठं करस्य करभो बहिः" उरुद्वयस्य तत्सादृश्यं यथायथं स्थूलत्वेन क्रमनिम्नत्वेन च अन्वितसंयुतादिपदं तत्सौन्दर्यातिशयव्यञ्जनायापूर्वमित्यर्थः । तत्तद्व्यञ्जयति ॥४९॥

नवशब्देन सौकुमार्यं तेन च नवदलवदारुण्यं लक्ष्यते नवानि यान्यङ्गुल्यादिरूपाणि दलानि तैरिति वैपरीत्येन रूपकं चातिशयितार्थं तत्र क्वचिद्व्युत्क्रमेण वर्णनेन तद्दृष्टस्तथैव भ्रमणं बोधयित्वा लोभाकुलता बोध्यते ॥ ५० ॥

अधुना भूषणादिकमाह । सुमहार्हेति द्वाभ्याम् । सुमहार्हशब्देन परमश्रेष्ठत्वं कटिसूत्रेत्यादीनामपि सुमहार्हत्वादिकत्वं ज्ञेयं तादृशकिरीटादिभिर्भ्राजमानं यद्वा तैस्तैर्विशिष्टं स्वभावतस्तु सूर्यकोटिवद्भ्राजमानं पद्मस्य पृथगुक्तिरन्यायुधत्वात् करसम्बन्धेनोक्तिरन्यत्राप्यङ्के तद्धारणसम्भवात् ॥ ५१ ॥ ५२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

बृहता कटितटेन श्रोण्या च करभसदृशोरुद्वयेन चान्वितं चारुजानुनोर्युगं यस्य दीर्घयोर्जङ्घयोर्युगलेन संयुतम् ॥ ४९ ॥

तुङ्गावीषदुन्नतौ गुल्फौ अरुणनखव्राताश्च तेषां दीधितिभिर्हे नृप ! तथा नवा अङ्गुल्यः नवौ अङ्गुष्ठौ च तान्येव दलानि तैश्च शोभमाने पादपङ्कजे यस्य तं महार्हा मणिव्राता येषु तैः किरीटादिभिर्भ्राजमानम् ॥ ५०–५१ ॥

पद्मं करे दक्षिणे यस्य तमवशिष्टैस्त्रिभिः करैः शङ्खचक्रगदाधरतीति तथा तं श्रीवत्सो वक्षसि यस्य तं भ्राजन् भ्राजमानः कौस्तुभो यस्य तं वनमाला अस्यास्तीति तथा तम् ॥ ५२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

कनिष्ठिकामूलं करभः काञ्चीपदं कटितटञ्च श्रोणी च करभवद्वृत्तं मांसलमूरुद्वयञ्च तानि तैरन्वितम् ॥ ४९–५२ ॥

सुनन्दनन्दप्रमुखैः पार्षदैः सनकादिभिः ।
सुरेशैर्ब्रह्मरुद्राद्यैर्नवभिश्च द्विजोत्तमैः ॥ ५३ ॥
प्रह्लादनारदवसुप्रमुखैर्भागवतोत्तमैः ।
स्तूयमानं पृथग्भावैर्वचोभिरमलात्मभिः ॥ ५४ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

बृहन् स्थूलः कटितटो यस्य श्रोणिरपि तथा ततोऽधो भागः स्त्रीणां नितम्बस्थानीयः ततोऽप्यधस्तात् करभवत् ऊरुद्वयेनान्वितामिति अनेकपादत्वं व्यावर्त्तयति भूमिः कटितटरूपेति आधारबाहुल्यं निरूपितं ततोऽधस्तात् सर्वाङ्गेषु सौन्दर्यं निरूपयन् तथा वर्णयति सर्वाङ्गेषु तस्य दृष्टिः पततीति चारु जानुयुगं यस्य तथा जङ्घायुगेन च संयुतमेकस्यां जङ्घायामपरां संस्थाप्य तिष्ठतीति अन्यथा विश्लेषे भक्तानां मतिर्भिन्ना भवतीति ॥ ४९ ॥

तुङ्गौ गुल्फौ अरुणा नखास्तेषां व्रातः समूहः तस्य दीधितिभिः कान्तिभिर्वृतं नखकान्तयः सर्वाङ्गं व्याप्य तिष्ठन्तीति नवा अङ्गुलयः अङ्गुष्ठौ च कमलदलप्रायाः तैर्विलसत् शोभायुक्तं पादपङ्कजं यस्य सुसेव्यत्वाय चरणौ तथा निरूपितौ ॥ ५० ॥

एवं सर्वाङ्गवर्णनमुक्त्वा आभरणानां वर्णनमाह । कटिसूत्रेति । कटिसूत्रं काञ्चीदामरूपमर्यादानिमित्तं ब्रह्मसूत्रं यज्ञोपवीतं नाममर्यादानिमित्तं हारो मुक्तानां हृदये शोभाकरः मुक्तान् जीवान् हृदये स्थापयतीति ज्ञापयितुं नूपुरं पादे कुण्डले कर्णयोः ॥ ५१ ॥

भक्तिशास्त्रे योगज्ञाने च समलंकृते एतैर्भ्राजमानम् आयुधानि वर्णयति । पद्मकरमिति । एकस्मिन् करे पद्ममेतत् सर्वागुणसमम् अतः सर्वबुद्धिभ्रामकमिति ततः शङ्खः अपां तत्त्वं पृथ्वी पद्ममिति तेजश्चक्रं गदा आसन्यरूपेति एतानि बिभर्त्तीति तथा लक्षणान्तराण्याह । श्रीवत्सो दक्षिणावर्त्तरोमरेखा वक्षसि यस्य इदमसाधारणं लक्षणं भ्राजत् कौस्तुभरत्नं यस्य शुद्धा जीवाः कण्ठे स्थिता इति वनमालायुक्तमिति कीर्तियुक्तम् ॥ ५२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

बृहद्भ्यां कटितटश्रोणिभ्यां करभसदृशोरुद्वये न च अन्वितं कटितटं नितम्बः श्रोणिः कटिः कटिः श्रोणिः ककुद्मती मणिबन्धादाकनिष्ठं करस्य करभो बहिरित्यमरः ॥ ४९ ॥

तुङ्गगुल्फेति गुल्फस्य तुङ्गता ईषन् मात्रैव व्याख्येया अतिसौकुमार्य्यात् नवा अङ्गुल्यः अङ्गुष्ठौ च त एव दलानि तैः शोभमाने पादपङ्कजे यस्य तं पृथग्भावैरिति पार्षदैः स्वामित्वेन सनकाद्यैर्ब्रह्मत्वेन ब्रह्माद्यैः परमेश्वरत्वेन मरीच्याद्यैः प्रजापतित्वेन प्रह्लादाद्यैरिष्टदैवतत्वेन तत्र वसुरुपरिचरः अत्र पार्षदाः पूर्वाद्यष्टस्वपि दिक्षु सनकाद्याः पश्चात् ब्रह्माद्या दक्षिणे भागे मरीच्याद्या वामे प्रह्लादाद्याः संमुखे नारदः संमुखार्द्धे एते च सर्वे एव नित्याः प्रापाञ्चिक ब्रह्माद्या एतद्ब्रह्मादिविभूतयो ज्ञेयाः यदुक्तं पाद्मोत्तरखण्डे "नित्याः सर्वे परे धाम्नि ये चान्ये च दिवौकसः । ते वै प्राकृतनाकेऽस्मिन्ननित्यास्त्रिदिवेश्वराः„ इति । श्रियेति श्र्यादयः स्वरूपभूताः तत्र श्रीरैश्वर्य्यं पुष्टिर्बलं गीर्ज्ञानं कान्तिः श्रीः कीर्त्तिर्यशः तुष्टिर्वैराग्यमिति षड्भगशब्दवाच्याः शक्तयः इला भूशक्तिः संधिन्याख्या अन्तरङ्गा यस्या विभूतिः पृथ्वी ऊर्ज्जा लीला शक्तिरन्तरङ्गा यस्या विभूतिर्भूलोकस्था तुलसी विद्याविद्ये जीवानां मुक्तिसंसृतिहेतू वहिरङ्गे शक्तिर्महालक्ष्मीर्ह्लादिन्यन्तरङ्गा माया विद्याविद्ययोर्मूलभूता बहिरङ्गा चकारात्तदधीना जीवशक्तिस्तटस्था एताभिर्नितरां सेवितम् ॥ ५० ॥ ५५ ॥ ५७ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

बृहता कटितटेन श्रोण्या च करभसदृशेनोरुद्वयेन च अन्वितम् ॥ ४९ ॥

तुङ्गावीषदुन्नतौ गुल्फौ अरुणा नखव्रातश्च तेषां दीधितिभिर्वृतम् नवाः अङ्गुल्यः अङ्गुष्ठौ च तान्येव दलानि तैः विलसती शोभमाने पादपङ्कजे यस्य तम् ॥ ५० ॥

सुमहार्हाणां मणीनां व्राताः येषु तैः किरीटादिभिः ॥ ५१ ॥ ५२ ॥

भाषा टीका ।

अति विशाल कटितट तथा श्रोणि और हस्ति के सुंड सरी के जंघा दोनों से शोभित मनोहर दोनों जानु सुंदर ऊरु दोनों से अति शोभित ॥ ४९ ॥

अति ऊंचे गुल्फ तथा अरुण नखों के समूह की कांति से युक्त नूतन अंगुलि अंगुष्ठ दलों वाले चरण कमल से शोभित ॥ ५० ॥

बडे मूल्य के योग्य मणियों के समूह से युक्त किरीट कडा बाजू बंद कटि सूत्र यज्ञोपवीत हार नूपुर कुंडल इन से शोभित ॥ ५१ ॥

अति देदीप्यमान रूप युक्त हस्त में कमल को धारण किये शंख चक्र गदाओं को भी धारण किये वक्षस्थल में प्रकाशमान श्रीवत्स का चिन्ह कौस्तुभ तथा वनमाला से शोभित ॥ ५२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका

पृथक् पृथक् भावाभिप्रायो येषां तैः तत्र पार्षदैः स्वामीति स्तूयमान

श्रिया पुष्ट्या गिरा कान्त्या कीर्त्या तुष्ट्येलयोर्जया ।
विद्ययाऽविद्यया शक्त्या मायया च निषेवितम् ॥ ५५ ॥
विलोक्य सुभृशं प्रीतो भक्त्या परमया युतः ।
हृष्यत्तनूरुहो भावपरिक्लिन्नात्मलोचनः ॥ ५६ ॥
गिरा गद्गदयाऽस्तौषीत्सत्त्वमालम्ब्य सात्वतः ।
प्रणम्य मूर्ध्नाऽवहितः कृताञ्जलिपुटः शनैः ॥ ५७ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे
पूर्वार्धे अक्रूरप्रतियाने
एकोनचत्वारिंशोऽध्यायः ॥ ३९ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

सनकादिभिर्ब्रह्मेति ब्रह्माद्यैर्महेश्वर इति मरीच्यादिभिर्द्विजोत्तमैः परः प्रजापतिरिति वसुरुपरिचरः प्रह्लादनारदवसवः प्रमुखा मुख्या येषां तैः परंदैवतमिति च श्रेष्ठैर्वचोभिः पृथग्भावैर्वचोभिरिति वा ॥ ५३ ॥ ५४ ॥

विद्याविद्ये जीवानां मुक्तिसंसृतिहेतू माया तयोः कारणम् शक्तिर्ह्लादिनी सम्विज्ज्ञानमाभिरन्याभिश्च निषेवितम् ॥ ५५ ॥

विलोक्य सुभृशं प्रीतो ऽस्मत्कृष्णोऽसावेवंभूतः परमेश्वर इति ज्ञात्वेति ॥ ५६ ॥ ५७ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
एकोनचत्वारिंशोऽध्यायः ॥ ३९ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

परिवारानाह । सुनन्देति त्रिभिः । तत्र पार्षदाः सेवकत्वात् सर्वान्तरङ्गाः सनकाद्या भक्तत्वेऽपि सेवांशराहित्येन ततो बहिरङ्गा निष्कामत्वेन भगवत्स्वरूपानुभावित्वेन चान्येभ्योऽन्तरङ्गाः ब्रह्माद्येषु ब्रह्मरुद्रयोर्वस्तुतस्तु तद्गुणत्वेऽपि जगदाधिकारांशाभिमानाभाससद्भावेन ततो बहिरङ्गतादर्शकत्वम् अन्ये तु बहिरङ्गा एव मरीचिरत्र्यङ्गिरसौ पुलस्त्यः पुलहः क्रतुर्भृगुर्वशिष्ठो दक्षश्चेति नव प्रजापतयो ब्रह्माद्यपेक्षया न्यूनज्ञानादित्वेन बहिरङ्गा एव प्रह्लादादयस्तत्तन्महागुणत्वेऽपि सर्वतत्तत्परिवारसहितस्य तस्य दैन्येनोपासकाभिमानितया बाहिरेव प्रायस्तिष्ठन्तीति सर्वबहिर्गणिताः एषां दिङ्नियमश्चागमानुसारात् यथा पार्षदाः पूर्वादिष्वपि दिक्षु सनकाद्याः पश्चात् ब्रह्माद्याः ऊर्ध्वादियथास्वदंशदिक्षु देवस्य दक्षिणभागे वा मरीच्याद्या वामे प्रह्लादादयः सम्मुखे नारदस्तु सम्मुखोर्ध्वे इति एते च नित्यावरणरूपत्वात् प्रापञ्चिकानामधिकरूपा ज्ञेयाः । यथोक्तं पाद्मोत्तरखण्डे "नित्याः सर्वे परे धाम्नि ये चान्ये च दिवौकसः । ते वै प्राकृतनाकेऽस्मिन् नित्यास्त्रिदशेश्वराः तेह नाकं महिमानः सचन्त इति वै श्रुति,, रिति अन्यत्तैः तत्र श्रेष्ठैरित्यमलात्मभिरित्यस्यार्थः अविद्यमानं मलं दोषो यत्रेति पक्षे पृथग् भावैरिति वचोविशेषणमेव कृतं तथापि वक्तृष्वेव तात्पर्यम् अथामलात्मभिरिति परिवारस्य विशेषणं तेन च सर्वेषामेवाभिप्रायाणां युक्ततमत्वं व्यक्तम् ॥ ५३—५४ ॥

आवरणरूपेण च वर्तमानाः शक्तीराह । श्रियेति । तैर्व्याख्यातं तत्र ह्लादिनी स्वरूपानन्दानुभाविनी सम्वित् चिद्रूपा स्वरूपभूतमहाशक्तिः सैव हि शक्तिशब्दस्य प्रथमप्रवृत्तिहेतुर्मायातिरिक्ता च तया महालक्ष्म्याख्यया तदन्तरङ्गया निषेवितं तया तत्स्पर्शात् तदुक्तं "ह्लादिन्या सम्विदाश्लिष्टः सच्चिदानन्द ईश्वर,, इति सम्विदित्यस्यान्ते ज्ञानमित्यधिका टीका केनचिदबुद्धैव कल्पितेति लक्ष्यते मायया च बहिरङ्गया निषेवितं चशब्देन गौणताव्यक्तेस्तया तदस्पर्शात् तदुक्तं श्रीविष्णुपुराणे "ह्लादिनी सन्धिनी सम्वित्त्वय्येका सर्वसंस्थितौ । ह्लादतापकरी मिश्रा त्वयि नो गुणवर्जिते,, इति तथा द्वितीये च "विलज्जमानया यस्य स्थातुमीक्षापथेमुये,,त्यादि अनयोरेव मूर्तिभेदाः श्र्यादयः प्रापञ्चिकाप्रापञ्चिकभेदेन द्विविधत्वात्तासां जात्या त्वेकत्वं विवक्षितं तत्र श्रीः सम्पदः सम्पादयित्री पुष्टिः शरीरस्य गीर्वाचः कान्तिः शोभायाः कीर्तिर्यशसः तुष्टिरन्तःकरणस्य इला भुवः ऊर्जा लीलायाः विद्या यथार्थज्ञानस्य अविद्या तदज्ञानस्य तच्च क्वचित्सत्त्वेनापि भवतीति ह्लादिनी वृत्तिरपि एतदुपलक्षणत्वेनान्या अपि ज्ञेयाः तदुक्तं पाद्मोत्तरखण्डे एव "एवं परं पदे नित्यैर्मुक्तैर्हरिपरायणैः । दिव्याभिर्महिषीभिश्च राजते विभुरीश्वर,, इति ॥ ५५ ॥

विलोक्येति । तैर्व्याख्यातं तत्राध्याहारेण व्याचष्टेऽस्मत्कृष्णोऽसावित्यादि यथोक्तं वैष्णवे "बलकृष्णौ तदाक्रूरः प्रत्यभिज्ञाय विस्मित ,,इति तस्यानुभव एतावानेव विचारस्त्वधिको भविष्यति अद्भुतानीह यावन्तीत्यादिद्वाभ्याम् ॥ ५६ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

सत्त्वं धैर्यं रुद्धकण्ठत्वेन शनैरेव ॥ ५७ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिण्याम् एकोनचत्वारिंशोऽध्यायः ॥ ३९ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

नवभिः नव ब्रह्माण इति प्रसिद्धैः कश्यपादिभिः ॥ ५३—५५ ॥

भावप्रक्लिन्नात्मलोचनः स्नेहात्साश्रुलोचनः ॥ ६६ ॥ ५७ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे श्रीसुदर्शनसूरिकृतशुकपक्षीये एकोनचत्वारिंशोऽध्यायः ॥ ३९ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

सुनन्दादिभिः पार्षदैः सनकादिभिश्च सुरश्रेष्ठैर्ब्रह्मरुद्रादिभिश्च नवभिर्द्विजोत्तमैर्मरीच्यादिभिश्च विशुद्धमानसैः क्रमेण सर्वशेषीति परं ब्रह्मेति सर्वकारणमिति प्रजापतिरित्येवं पृथक्पृथक् अभिप्रायबद्भिर्वचोभिः स्तूयमानम् ॥ ५३—५४ ॥

श्र्यादिभिः मूर्त्तिविशिष्टैः शक्तिभिः द्वादशभिर्निषेविनम् ॥५५॥ एवंभूतं विलोक्य नितरां प्रीतः उत्कृष्टया भक्त्या च युक्तः अत एव हृष्यन्ति उदञ्चितानि तनूरुहाणि लोमानि यस्य भावेन प्रीत्यतिशयेन परिक्लिन्नः आर्द्रः आत्मा चित्तं लोचने च यस्य सः ॥ ५६ ॥

सात्वतोऽक्रूरः सत्त्वं धैर्यमवलम्ब्य मूर्ध्ना प्रणम्यावनतः प्रह्वः कृतमञ्जलिपुटं येन सः गद्गदया वाचा शनैस्तुष्टाव ॥ ५७ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम् एकोनचत्वारिंशोऽध्यायः ॥ ३९ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

नवभिः द्विजोत्तमैः कश्यपादिभिः ॥ ५३ ॥

पृथङ्मार्गैः वैदिकतान्त्रिकमार्गविषयैः ॥ ५४-५५ ॥

भावेन तद्भक्तिस्वभावेन परिक्लिन्ने आनन्दाश्रुजलस्नाते आत्मलोचने यस्य स तथा ॥ ५६ ॥

सत्त्वं सत्त्वगुणमात्मभावं वा ॥ ५७ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम् सप्तत्रिंशोऽध्यायः ॥ ३७ ॥ ३९ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे एकोनचत्वारिंशोऽध्यायः ॥ ३९ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

एवं लक्षणानि निरूप्य सेवकान् निरूपयति । सुनन्देति । सुनन्दनन्दादयः अष्टौ द्वाःस्थाश्च सनकादयः आधिदैविका भक्ताः सुरेशादयः इन्द्रप्रमुखाः अष्टौ लोकपालाः ब्रह्मा रुद्रश्च आद्यौ येषामेते उत्तमसेवकाः मनुष्यान् निरूप्य ऋषीन्निरूपयति । नवभिश्चेति मरीच्यादयो नव ब्राह्मणश्रेष्ठाः भगवत्कर्मपराः ॥ ५३ ॥

भगवद्भक्ता अप्याधिदैविकास्तत्र दृष्टा इत्याह । प्रह्लादेति दैत्येषु प्रह्लादः श्रेष्ठः नारदो देवेषु वसुः भीष्मो मानुषेषु त्रिविधा एव जीवाः तत्र भक्ता एव मुख्या इति एतत्प्रमुखैर्भागवतोत्तमैः स्तूयमानं दृष्टवान् तत्र स्तोत्रे सात्त्विकराजसतामसभावाः वक्तृनिष्ठा इति पृथग्भावैः स्तोत्राणि स्तोत्रमपि न तदानीमेव कल्पयित्वा कथनरूपं किन्तु वचोभिः पूर्वसिद्धैः गद्यपद्यादिरूपैः ननु वैकुण्ठे भगवत्संनिधाने वा परमानन्दानुभवोऽस्तीति भोगं विहाय किमिति स्तोत्रं कुर्वन्तीत्याशङ्क्याह । अमलात्मभिरिति । निर्मलान्तःकरणास्ते भगवत्पराः न तु भोगपराः ॥ ५४ ॥ ततो भगवतः सर्वकार्यसाधिका द्वादशशक्तयः ता अपि दृष्टवानित्याह । श्रियेति । श्रीर्लक्ष्मीः श्र्यादिभिर्निषेवितं पुष्टिर्नाम यया सर्वे पुष्टा भवन्ति सा यत्र न प्रविशति ते बहाहारा अपि न पुष्टा भवन्ति एवं सर्वत्र गीः सरस्वती प्रसिद्धा कान्तिः काचित् प्रभा राज्याभिषेकादिषु प्रकटा जायते अलङ्करणानि तच्छेषाण्येव कीर्तिः प्रसिद्धा सा यत्र न प्रविशति तत्र समानकर्मणा न कीर्तिर्भवति तुष्टिः सन्तोषात्मिका यदभावे महानपि तृणवद्भवति इला भूमिः ऊर्जा सर्वसामर्थ्यरूपा विद्या ज्ञानरूपा मोक्षदायिनी अविद्या बन्धिका निद्रादयोऽपि तद्भेदा एव केचन मायाभेदा इत्याहुः । शक्तिरिच्छाशक्तिः एषा सर्वनियामिका माया सर्वभवनसामर्थ्यं व्यामोहिका चेति उभयविधापि परिगृहीता चकारेण अनेन सर्वत्र सर्वे भेदाः परिगृहीताः तेन मुख्या द्वादश अवान्तरभेदा असंख्याता एव भवन्तीति निरुक्तं भवति—

> आधार एव रूपञ्च आकारोऽङ्गानि चैव हि ।
> अलङ्करणचिन्हानि सेवका द्विविधा अपि ।
> शक्तयश्चेति भगवान् सप्तधा विनिरूपितः ॥

इति ॥ ५५ ॥

एवं दृष्टवतो यज्जातं तदाह । विलोक्येति । आदौ तादृशं दुर्लभं दृष्ट्वा सुभृशं प्रीतः ततः परमया भक्त्या युतः ततो हृष्यत्तनूरुहः—

> अन्तस्तोषस्तथा भक्तिर्भक्तिचिह्नानि चैव हि ।
> दृष्टे भगवति ह्यासन् भक्तस्येति निरूपितम् ॥

भावेन क्लिन्नमन्तःकरणं लोचने च यस्य प्रेमोद्गमलक्षणमेतत् ततो वैकल्यमर्थादुक्तं भवति ॥ ५६ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी।

ततो यत्कृतवांस्तदाह। गिरेति। गद्गदया वाण्या अस्तौषीत् सत्त्वमालम्ब्येति निर्गुणावस्थां दूरीकृत्य सत्त्वावस्थावलम्बनं कृतवान् यतः सात्त्वतः वैष्णवः ततः साष्टाङ्गप्रणम्य वैकुण्ठ एवाभिव्यक्त इति जलाद्यभावात् अवहितः सावधानो भूत्वा मनः सुस्थिरं विधाय कृताञ्जलिपुटो भूत्वा चिरकालं तूष्णीं स्थित्वा अल्पोद्गमसामर्थ्येऽपि स्तोत्रं कृतवानिति वक्तुमाह। शनैरिति। स्तोत्रे हि कृते भगवता प्रदर्शितं तस्य हृदयारूढं जातमिति ज्ञायते नान्यथेति सर्वत्र स्तोत्रव्यवस्था॥५७॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे श्रीलक्ष्मणभट्टात्मज-

श्रीमद्वल्लभदीक्षितविरचितायां सुबोधिन्याम्

षट्त्रिंशाध्यायविवरणम्॥३६॥३९॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम्

एकोनचत्वारिंशोऽयं दशमे ऽजनि सङ्गतः॥३९॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

नवभिः मरीच्यादिभिः॥५३॥

पृथक्पृथक्भावोऽभिप्रायो येषां तैर्वचोभिः॥५४॥

श्र्यादिभिः मूर्तिमतीभिः शक्तिभिर्निषेवितम् तत्राविद्यया कर्मरूपया "अविद्या कर्मसंज्ञान्या तृतीया शक्ति"रिति वाक्यात् मायया त्रिगुणया॥५५—५७॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे

एकोनचत्वारिंशाध्यायार्थप्रकाशः॥३९॥

भाषा टीका।

सुनंद नंद आदि पार्षद तथा सनकादि और ब्रह्मा रुद्रादि देवतों से तथा मरीच्यादि नौ ऋषियों से॥५३॥

प्रह्लाद नारद वसुआदि भागवत्तोत्तमों से दिव्य निर्मल वचनों से स्तुत॥५४॥

श्री पुष्टी सरस्वती कांति कीर्ति तुष्टि इला उर्जा विद्या अविद्या शक्ति माया इन शक्तियों से सेवित॥५५॥

ऐसे भगवान् के स्वरूप का दर्शन करके अक्रूरजी परम भक्ति युक्त प्रसन्न होगये शरीर उनका रोमांचित होगया॥५६॥

फिर अक्रूरजी धैर्य को धारण करके मस्तक से प्रणाम करके दोनों हाथों से अंजलि जोडकर धीरे से गद्गद्वाणी से भगवान् की स्तुति करने लगे॥५७॥

इति श्रीभागवत दशमस्कन्धपूर्वार्धे उनचालीसवें अध्याय की भाषाटीका समाप्त॥३९॥

इति श्रीमद्भागवते दशमस्कन्धे पूर्वार्धे एकोनचत्वारिंशोऽध्यायः॥३९॥

॥ चत्वारिंशोऽध्यायः ॥

॥ श्रीशुक उवाच ॥

"एवं दृष्ट्वा तमक्रूरः प्रसन्नहृदयेन्द्रियः ।
तुष्टाव पुण्डरीकाक्षं भक्त्यावनतकन्धरः ॥" "अयं विजयध्वज पाठः"

॥ अक्रूर उवाच ॥

नतोऽस्म्यहं त्वाखिलहेतुहेतुं नारायणं पूरुषमाद्यमव्ययम् ।
यन्नाभिजातादरविन्दकोशाद्ब्रह्माविरासीद्यत एष लोकः ॥ १ ॥

भूस्तोयमग्निः पवनः खमादिर्महानजादिर्मन इन्द्रियाणि ।
सर्वेन्द्रियार्था विबुधाश्च सर्वे ये हेतवस्ते जगतोऽङ्गभूताः ॥ २ ॥

नैते स्वरूपं विदुरात्मनस्ते ह्यजादयोऽनात्मतया गृहीताः ।
अजोऽनुबद्धः स गुणैरजाया गुणात्परं वेद न ते स्वरूपम् ॥ ३ ॥

त्वां योगिनो यजन्त्यद्धा महापुरुषमीश्वरम् ।
साध्यात्मं साधिभूतं च साधिदैवञ्च साधवः ॥ ४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

चत्वारिंशे ततोऽक्रूरः कृष्णं मत्वेश्वरेश्वरम् ।
प्रणम्य भक्त्या तुष्टाव सगुणागुणभेदतः ॥

श्रीकृष्णं प्रणमति । नतोऽस्मीति । हे कृष्ण ! त्वा त्वां नतोऽस्मि त्वमस्मात्पितृव्यः कुतो मां बाळं नतोऽसि तत्राह । आद्यं पुरुषमव्ययं चानादिनिधनमित्यर्थः । कुत एतत् अखिलहेतूनां हेतुं स तु नारायणो नाहमिति चेत्तत्राह । नारायणं त्वां किं नारायण इति मां स्तौषि कात्र स्तुतिः सत्यमेवेत्याह । यन्नाभिजातादिति । यतो ब्रह्मणः ॥ १ ॥

अखिलहेतुत्वं प्रपञ्चयति । भूरिति । खस्यादिरहङ्कारः अजा माया तस्या आदिः पुरुषः एते ये जगतो हेतवस्ते सर्वे तवाङ्गभूता अङ्गाच्छ्रीमूर्तेर्भूताः उपसर्जनभूता वा ॥ २ ॥

नन्वतिस्तुतिः कथं क्रियतेऽहमेवान्यत उत्पन्नस्तत्परतन्त्रश्चेत्याशङ्क्य तवैषा माया त्वत्पारमार्थ्यं तु न कोऽपि वेदेत्याह । नत इति । एते अज आदिर्येषां ते आत्मनस्ते स्वरूपं न विदुः अनात्मतया जडत्वेन कारणेन जडत्वे हेतुः गृहीताः प्रत्यक्षादिभिर्दृष्टाः नह्यजडो दृग्गोचर इति भावः । ननु जडा मां माजानन्तु जीवस्तु ज्ञास्यतीत्यत आह । अज इति । सो ऽजो ब्रह्माप्यजाया गुणैरनुबद्ध आवृतो गुणातीतं ते तव स्वरूपं न वेदन्यः कुतो ज्ञास्यतीति यद्वा प्रकृत्यादय आत्मनःस्वरूपं तव स्वरूपञ्च न विदुः जडत्वादेव जीवस्तु तानात्मानञ्च वेत्ति न पुनस्त्वत्स्वरूपमिति यथोक्तं हंसगुह्ये—

देहोऽसवोऽक्षा मनवोऽभूतमात्रा नात्मान मन्यञ्च विदुः परं यत् ।
सर्वं पुमान्वेद गुणांश्च तज्ज्ञो न वेद सर्वज्ञमनन्तमीडे ॥

इति ॥ ३ ॥

ननु यदि केऽपि न जानन्ति कथं तर्हि संसारनिवृत्तिर्जीवानामित्याशङ्क्य साक्षाद्गोचरत्वेऽपि येन केनापि मार्गेण भजतां त्वं गम्योऽसीत्याह । त्वां योगिन इति । हैरण्यगर्भादयोऽध्यात्माधिभूताधिदैवसाक्षिणां महापुरुषं तदन्तर्यामिस्वरूपमीश्वरं नियन्तारं च यजन्ति ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

तं तावत् पुरुषत्वेन स्तौति । नतोऽस्मीति । तैर्व्याख्यातं तत्र साक्षाच्चतुर्भुजत्वादिनाविर्भावेऽपि त्वमस्मत्पितृव्य इत्यादिकं विनोदेन वदेदसावित्यभिप्रायेणाद्यमित्यादिकमाहेति भावः किमित्यादिः प्रश्नः नारायणत्वमारोप्य किळ मां प्रोत्साहयसीत्यर्थः केत्यादिकमुत्तरम् अत्र न कापि स्तुतिः किन्तु सत्यमेवेदमित्यर्थः अत्र तन्नाभीत्यादेर्हेतुत्वं च तर्जनीद्वयेन साक्षादरविन्दकोषदर्शनादिति ज्ञेयम् ॥ १ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

भूरिति तैर्व्याख्यातं तत्रादिशब्दस्य सापेक्षत्वान्निरन्तरवर्त्तमानस्य खस्यैवादितयाऽहङ्कारो लभ्यत इत्यभिप्रेत्याह । खस्येति खवदजेत्यपि पृथक् पदं पुरुषो जीवः तस्य मायात आदित्वं तदस्तीति तदंशत्वेन श्रीमूर्त्तेरिति तस्या एव परमतत्त्वरूपत्वं साधितं जन्म चाचिन्त्यशक्त्या कारणस्य विकारित्वराहित्येनैव तदुभ्रमहानार्थमेव चोत्तरः पक्षः ॥ २ ॥

गुणात् परं तदनासक्तम् अन्यत्तैः तत्र तानात्मानं चेत्यर्थात् यद्वा नन्वेतावन्तं कालं कथमेवं न ज्ञातवानसि तत्राह । न ते इति । तस्मादधुना कृपयाविर्भावादेव ज्ञायस इति भावः ॥ ३ ॥

ननु कोऽपि य जानाति चेत् कथं योगादिफलं सिद्ध्यति यतः "फलमत उपपत्तेः" इति न्यायेन बन्धको भवपाशेनेत्यादि प्रामाण्येन च तत एव सर्वं फलं स्यात् किमुत मुक्तिः तत्र शुभफलप्राप्तिश्च तस्य प्रसादेन प्रसादश्चोपासनयैव उपासना च ज्ञानेनैवेति उच्यते अन्तर्यामिणि तस्मिन्नेव सर्वोपासनावाक्यतात्पर्यपर्यवसानात् सर्वत्रैवोपास्यत्वभावस्तस्य स्यादिति तज्ज्ञानपूर्विकायामिव तदज्ञानपूर्विकाया—मप्युपासनायां तस्मादेव तत् सिद्ध्यति मिथ्यैव तु भावो यजमानदेवतान्तरयोरित्यभिप्रेत्य साधारण्येन तथा विज्ञाप्रयति यद्वा यथैवं कारणवाक्यानां त्वय्येव तात्पर्यं तथोपासनावाक्यानामपीत्याह । त्वामिति । अद्धा साक्षादिति महापुरुषरूपेणोपासनात् अत एव साधवः अन्येभ्यः श्रेष्ठाः अन्यतैः तत्र साक्षादगोचरत्वेऽपि भजनस्य साक्षाद्विषयत्वाभावेऽपीत्यर्थः ॥ ४ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

आदिशब्देन पृथिव्यादीनां कारणभूतोऽहंकार उच्यते अजा मूलप्रकृतिः सा कार्याणामादिभूता ये जगतो हेतवः ते तव अंशभूताः ॥ १ ॥ २ ॥

आत्मनः अन्तर्यामिभूतः सः अन्यात्मतया स्वनिष्ठात्मभ्रान्त्या अजः ब्रह्मा अजाया गुणैः प्रकृतिगुणैः सत्त्वादिभिः ॥ ३ ॥

साध्यात्मा दिदेहावस्थितेन पञ्चभूतावस्थितेन आदित्यमण्डलावस्थितेन च रूपेण सहितम् ॥ ४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अस्तौषीदित्युक्तां स्तुतिमेव दर्शयति चत्वारिंशेन । नतोऽस्मीत्यादिना । तावत्सर्वजगत्कारणत्वसर्वान्तरत्वादिभिःस्तुवन्नमस्करोति नतोऽस्मीति द्वाभ्याम् । अखिलहेतुहेतुं त्वामहं नतोऽस्मि अखिलस्य व्यष्टिप्रपञ्चस्य ये हेतवो महदादयस्तेषामपि हेतुं कारणमित्यर्थः । नन्वखिलहेतुहेतुःसद्ब्रह्मात्माकाशप्राणादिष्वन्यतमो नत्वहमित्यत आह नारायणमिति । कृत्स्नकारणत्वस्यानेकनिष्ठत्वे "न तत्समश्चाभ्यधिकश्च दृश्यते" इत्युक्तरीत्या निस्समाभ्यधिकाद्वितीयवस्त्वसिद्ध्या तस्यैकनिष्ठत्वस्य वाच्यत्वात्सदादिसामान्यशब्दघटितकारणवाक्याभिप्रेतकारणवस्तुविशेषाकाङ्क्षाशामकेन विशेषशब्दात्मकनारायणपरघटितेन एको हवै नारायणआसीदितिवाक्येन नारायणेतरस्य निषेधपूर्वकं तस्यैव कारणत्वं श्रावयता कारणत्वेनावगतो नारायण एव

सच त्वमेवेति भावः नन्वस्त्वहं नारायण इति स एवाखिलहेतुरिति च तथापि ममापि कारणान्तरं स्यात्तत्राह पुरुषमादिम् आदि पुरुषं कारणत्वपराकाष्ठाभूतं स्वयं कारणान्तररहितमित्यर्थः एवमप्यव्ययं निर्विकारं विकाराणां शरीरभूतचिदचिद्गतत्वादिति भावः । अखिलहेतुहेतुत्वमेव प्रपञ्चयति । यन्नाभीति । एष परिदृश्यमानो व्यष्टिप्रपञ्चः यतो बभूव स ब्रह्मा चतुर्मुखः यस्य तव नाभेर्जातादरविन्दकोशात् आविरासीत् उदभवत् अनेन व्यष्टिसृष्टिश्चतुर्मुखद्वारिका समष्टिस्त्वद्वारिकेति दर्शितम् ॥ १ ॥

ननु किमिदमखिलहेतुत्वं निमित्तरूपमुतोपादानत्वरूपमित्याशङ्कायामुभयविधञ्चेत्यभिप्रेत्याह । भूरिति । पृथ्व्यादीत्याकाशान्तानि पञ्चभूतानि तेषामादिः कारणमहङ्कारः तथा तस्यापि कारणं महान् तस्याप्यादिकारणमजा मूलप्रकृतिः सा हि सर्वकार्य्याणामादिभूता तथा सात्त्विकाहङ्कारकार्य्यभूतानीन्द्रियाणि ज्ञानकर्मोभयेन्द्रियाणि मनश्च तेषामधिष्ठातारो विबुधा देवाः दिग्वातार्कप्रचेतोऽश्विवन्हीन्द्रोपेन्द्रमित्रप्रजापतिचन्द्रमसः इन्द्रियाणामर्था विषयाः शब्दादयश्चेति येजगतो हेतवस्ते सर्वे ते तवाङ्गभूताः शरीरभूताः अनेन मूलप्रकृतिविशिष्टो महदादिशरीरकतया तत्तद्रूपेण परिणत इत्युपादानत्वमुक्तम् मूलप्रकृतेर्महदादीनाञ्च शरीरत्वकथनेन नियन्तृनियाम्यभावसिद्धेर्निमित्तत्वमप्युक्तं जगतो ये हेतवः इति जगदन्तर्भूतज्ञानविकासात्मककार्य्यावस्थजीवकारणभूतज्ञानसङ्कोचरूपकारणावस्थजीवानामपि तदङ्गत्वप्रतीत्या जीवान् प्रत्युपादाननिमित्तत्वरूपोभयविधकारणत्वासिद्धिः ॥ २ ॥

ननु त्वमिव सर्वेऽप्येवंविधसर्वकारणं सर्वान्तरात्मानं सर्वशरीरकं च मां किं न जानीयुस्तत्राह । नैत इति । एते त्वच्छरीरभूता अजादयः जीवादयः अन्तरात्मनस्तव स्वरूपं न विदुः अजादय इत्यत्रादिशब्दः प्रकृतितत्कार्य्यसंग्राहकः सच दृष्टान्तार्थः जडाः प्रकृत्यादयो यथा न तव स्वरूपं विदुः एवञ्जीवा अपि न विदुरित्यर्थः ननु जडत्वात्प्रकृत्यादयो न विदुरिति युक्तम् अजडा जीवास्तु कुतो न विदुरित्यत्राह । अन्यात्मतया गृहीता इति । अन्यस्मिन् स्वस्माद्भिन्ने देहे आत्मतया आत्माभिमानेन तथा अन्यस्मिन् स्वतन्त्रात्त्वत्तोऽन्यस्मिन् स्वात्मनि आत्मतया स्वातन्त्र्याभिमानेन च गृहीताः ग्रस्ताः देहात्माभिमानस्वतन्त्राभिमानाभ्यां ग्रस्ताः स्वात्मानमेव देहविलक्षणमीश्वरपरतन्त्रञ्च न जानन्ति कथं नु त्वां विदुरित्यर्थः इत्थमेव ब्रह्मापि न वेद किमुत तत्सृज्यास्तदर्वाचीना इति कैमुत्यन्यायेनाह । अज इति । अजो ब्रह्मापि स्वगुणैः स्वशरीरारम्भकसत्त्वरजस्तमोगुणैरनुबद्धस्तत्परवश इति यावत् अजायाः प्रकृतेर्गुणात् जातावेकवचनं गुणेभ्यः सत्त्वादिभ्यः परम्विलक्षणं तन्नियन्तृ तव स्वरूपं न वेद किमुतान्ये न विदुरिति भावः । अनात्मतयेतिपाठे जडत्वेन दृष्टाः अजादयः प्रकृत्यादयः यथा न विदुरेवमजोऽपि ब्रह्मापि न वेद किमुतान्ये न विदुरिति योजनीयम् ॥ ३ ॥

ननु सर्वैरवेद्यं मत्स्वरूपं शशविषाणप्रायं स्यादित्याशङ्कायां देहात्माद्यभिमानिनां मांसचक्षुराद्यवेद्यमपि योगविशुद्धमनोवेद्यमित्यभिप्रयन् तदेव नानाविधब्रह्मविद्याभिज्ञैर्नयोगिनः कर्मयोगिनश्च यजन्तीत्याह । त्वामिति । योगिन इत्यस्य केचिदित्यादिः केचिद्योगिनः आनन्दवल्यादिविहितोपासननिष्ठाः महापुरुषं प्रकृतेस्तत्संसृष्टाच्चेतनान्मुक्तान्नित्याच्च विलक्षणमीश्वरं त्वामद्धा त्वामेव अद्धेत्यवधारणे साक्षात्त्वामेव सत्यं ज्ञानमनन्तमित्याद्युक्तविधं

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

यजन्ति आराधयन्ति उपासत इतियावत् केचित्साधवस्तु अन्तरादित्यप्रतर्दनादिविद्यानिष्ठास्तु साधिदैवम् आदित्यान्तस्थमिन्द्रादिदेवतान्तर्यामिणमिन्द्रादिशरीरकं त्वां यजन्ति उपासनां कुर्वन्तीत्यर्थः। केचित्तु साध्यात्ममात्मनि शरीरे अध्यात्मं तेन सहितं साध्यात्मं शरीरावयवाक्षिहृदयादिषु वसन्तं त्वां जयन्ति तथाहि छान्दोग्ये य एषोऽन्तरादित्ये हिरण्ययः पुरुषो दृश्यते इत्युपक्रम्य तस्य ऋक्साम गेष्णावित्याधिदैवतमथाध्यात्मं य एषोऽन्तरक्षिणि पुरुषो दृश्यते इत्युक्तम् अपरेतु योगिनः साधिभूतं सर्वभूतस्थं सर्वशरीरकं त्वां भजन्ति सर्वं खल्विदं ब्रह्म तज्जलानीत्युक्तविधामुपासनां कुर्वन्तीत्यर्थः। तदेव मुपासनानामद्वारकसद्वारकभेदन द्वैविध्यं दर्शितम् ॥ ४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

अक्रूरस्तुतिव्यपदेशेन विद्वदधिकारयोग्यं भगवदुपासनाप्रकारं निरूपयत्यस्मिन्नध्याये। तत्राक्रूरो भगवन्तं दृष्ट्वोत्तरं किञ्चकारेति परीक्षितो मानसीं शङ्कां शुकः परिहरति। एवमि ॥ ० ॥

नन्वस्यानस्ये वैशिष्ट्यस्य ज्ञापनाय व्यावर्तकलक्षणमाह। अखिलेति। कदाचिन्नित्यन्यथा प्रतीतिं निवारयति। भूतमिति। यदेतन्निमित्तकारणत्वं तत्कदाचिन्नापगच्छतीत्यर्थः। अखिलहेतुहेतुमिति पाठे उपादानकारणानामपि कारणमित्यर्थः। किन्नामधेयोऽयमिति तत्राह। नारायणमिति। अराविरुद्धत्वान्नारा गुणास्तेषा मयनं ननु तर्हि किमयं शब्दगुणाश्रयत्वेनाकाश इतिचेत्तत्राह। पूरुषमिति पूर्णषड्गुणम् आकाशस्यैकगुणत्वान्महान्विशेषः नन्वाकाशो वैनामरूपयोर्निर्वहितेतिश्रुतेरविनाशित्वेनाखिलहेतुत्वन्नरसमुदायो नारमिति नरसमुदायाविसर्वपदार्थस्यावकाशप्रदत्वेनाश्रयत्वेन नारायणशब्दवाच्यत्वमाकाशस्य किन्न स्यादित्यतो वाह। पूरुषमिति पूरुषस्यापि पितृपितामहादिवद् घटमृदादिवद्वा बीजपरम्परा स्यादिति तत्राह। आदिमिति। वैशेषिकपक्षे यथा परमाणोः कारणत्वं पर्याप्तम् एवमत्रापीत्यर्थः। एवंविधस्यापि सगर्भकर्कटवद्विनाशित्वं स्यात्किनेत्याह। अव्ययमिति। न केवलं स्रष्टृत्वेनास्य कारणत्वं पर्याप्तमपितु संहर्तृत्वेनापीति भावेनाह। आदिमिति। अद्भक्षण इतिधातोः अत्तृत्वादादिमित्यर्थः। संहर्तृत्वमप्यस्मिन्पर्याप्तिमिति प्रकटनाय णप्रत्ययप्रयोगः जीवो जीवस्य जीवनमितिन्यायेन अत्तुरस्याप्यन्यो ऽत्ता स्यादित्यतो वाह। अव्ययमिति। सर्ववारणे विरिञ्चे जाग्रति पर्याप्तकारणत्वमस्य कथमिति तत्राह। यन्नाभीति। विरिञ्चस्य कारणत्वं तर्हि कथमिति तत्राह। यत इति। यतो विरिञ्चाल्लोको देवलोकोऽभूदिति शेषः ॥ १ ॥

आदित्वं स्पष्टयति। भूरिति। आत्मन आकाशः सम्भूत इति श्रुतिः आदिर्भूतादिरहङ्कारः अजा च आदिश्च अजादिः प्रकृत्याख्यकारणमित्यर्थः। न केवलमस्य समस्ताचेतनहेतुत्वं किन्तु चेतनराशिरित्याशयेन वाह। अजादिरिति। ब्रह्मादिचेतनसंघ अजादिः ये सर्वे अजादयो जगतो हेतवो यथायोग्यं कारणानि ते सर्वे तवाङ्गभूता अङ्गेभ्यो जाताः पद्भ्यां भूमिरितिश्रुतेः ॥ २ ॥

त्वदङ्गजाताद्यविज्ञातमाहात्म्यं मत्येन मया न ज्ञायत इति किंव कृत्यमित्याशयेनाह अवेदने निमित्तमाह। अन्येति। अन्यात्मतया गृहीताः एते जीवात्मानो मत्तोऽन्ये इति भगवता गृहीताः ईश्वरो भ्रान्तत्वात्तथा गृह्णातीतिचेन्न अहं परो हि मद्भिन्ना जीवात्मानोऽल्पशक्तय इत्यादेः नहीश्वरस्य सर्वज्ञस्य भ्रान्तिरुपपद्यते नहि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते इतिश्रुतेः ये तवाङ्गेभ्यो जातास्त एव अजादयः आत्मनस्तव स्वरूपं न विदुरित्यन्वयः अजो ब्रह्मा आदिर्येषां रुद्रादीनां ते अजादय इति तद्गुणसंविज्ञानबहुव्रीहौ ब्रह्मणोऽप्यज्ञानमापद्यते वेदाहमेतं पुरुषमिति श्रुत्या तद्विज्ञानप्रतीतेरतो ब्रह्मकारणका रुद्रादयो न विदुरित्यर्थः। किन्नस्यादित्यत आह। अज इति। अजाया गुणैर्बद्ध इति हेतुगर्भं विशेषणं गुणात्परं दूरीभूतम् अजादय इत्यत्र अजाशब्देन चित्प्रकृतिरपि ग्राह्या तस्या अपि सर्वात्मना तद्विषयज्ञानाभावात् तदुक्तं यथा हरिः स्वमात्मानं वेद तद्वद्रमापिचेत्यादि अनेन दाहमित्यस्यापि गतिरुक्ता भवति अत ईश्वरस्य दुर्ज्ञेयत्वात्साधनानुष्ठानवैयर्थ्यमित्याशङ्का परास्ता तत्प्रसादेन यथायोग्यज्ञानसम्भवाद्यथाशक्ति स्वाहितमतनुष्ठेयम् ॥ ३ ॥

अत्र किम्प्रमाणमित्यतो वृद्धाचार एव प्रमाणमित्याह। त्वामिति अधिष्ठानविशेषमाह। साध्यात्ममिति। आत्मशब्दोक्तनरैः सह ततोऽधिकत्वेन वर्तमानं भूतराकाशादिभिः सह तदुत्तमत्वेन वर्तमानं देवैर्ब्रह्मादिभिः सह ततोऽविशिष्टगुणत्वेन तिष्ठन्तं तत्तदुपासनार्थं तत्तदधिष्ठानेषु तत्तद्गुणप्रवर्तकत्वेन तत्तदुत्तमत्वेन वर्तमानमित्यर्थः। तदुक्तं स्थितो ब्रह्मादिदेवेषु खादिभूतेषुचेश्वर इत्यादि ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

यथा कारणवाक्यानां त्वय्येव तात्पर्यं तथोपासनावाक्यानामपीत्याह। त्वामिति ॥ १—४ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी।

सप्तत्रिंशे तु सन्तुष्टः स्तोत्रं चक्रे मनोहरम्।
चतुर्धा ज्ञातमाहात्म्यसिद्धसिद्धान्त ईर्यते ॥
स्वरूपेण प्रमाणेन युक्त्या वस्तुस्वरूपतः।
अवतारफलैश्चैव सर्वस्यैव विनिर्णयः ॥
राजसे स्तोत्रकर्त्तायं मध्यमो विनिरूप्यते।
उत्तमे नारदो वक्ता वसुदेवादयस्तथा ॥
यस्य यस्य यथा भावस्तेन तादृङ्निरूप्यते।
सर्वं युक्तं भगवति न सर्वः सर्व एव च ॥

तत्र प्रथमं स्वरूपं कीर्त्तयन् नमस्करोति। नतोऽस्म्यहमिति। त्वां साक्षादग्रे आविर्भूतं कनिष्ठशङ्का तु नास्त्येव यतोऽखिललोकस्यापि जगतस्त्वं हेतुः अखिलहेतुत्वे उपपत्तिं प्रमाणं चाह नारायणमिति। आदौ ब्रह्माण्डे नारायणादेव सर्वं जातमिति सर्वलोकप्रसिद्धं श्रुतिश्च पुरुषो ह वै नारायणोऽकामयतेति तथा पुरुषसूक्ते तदर्थमेव पुरुषमित्याह नैतावन्मात्रपरत्वमिति वक्तरि भर्त्तारं तस्यापि मूलभूतमिति वक्तुमव्ययमक्षररूपं निरूपयति अथवा ब्रह्माण्डमध्यस्थितजगत एव कारणत्वेन भगवान् निरूप्यते तादृशमेव रूपं प्रकटितमिति तत्रैवाद्यता व्यष्ट्यपेक्षया मूल-

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

रूपता अविनाशित्वं च लोके कर्तृत्वमेव येन प्रकारेण तमाह । यन्नाभिजातादिति । यस्य भगवतो नाभेर्जातात् अरविन्दकोशात् कमलमुकुलात् पश्चाद्विकसितात् तत्र स्थितो भ्रमर इव आविरासीत् ब्रह्मा यतो ब्रह्मणः सकाशात् एष लोकः सर्वोऽपि प्रपञ्चः ॥ १ ॥

एवं जगत्कारणत्वमुपपाद्य कार्यकारणयोर्वैलक्षण्यसिद्ध्यर्थं भगवतो नित्यमुक्तत्वं जीवानां तत्कृपया तथात्वमिति वक्तुं कार्यभूतप्रपञ्चस्य स्वरूपमाह । भूस्तोयमिति । एतस्य वा मूलभूतत्वख्यापनाय तत्वान्येतस्मादेवोत्पन्नानीत्याह । भूस्तोयमिति । मूलभूतानि चेत् एवं परमिति ज्ञातव्यम् एवं क्रमस्तत्र न विवक्षितः प्रथमपक्षे तु विवक्षित इति गणनार्थं वा स्थूलात् सूक्ष्मे बुद्धिनिवेशनार्थं खान्तानि पञ्चभूतानि आदिरहंकारः महान् महत्तत्वम् अजा प्रकृतिः आदिः पुरुषः ततो मनः मनसा पुरुषः सर्वं करोतीत्याधिदैविकमनोविवक्षया व्युत्क्रमेणापि निरूपितं इन्द्रियाणि चकाराद्बुद्धिः प्राणश्च ततः सर्वेन्द्रियार्था गन्धादयः वागादयश्च चकारात् तदवान्तरभेदाः स्त्र्यादयश्च किं बहुना सर्व एव विषयाः घटादयः स्रगादयश्च चकारात्तज्जनितानि सुखादीनि एते हि सर्वे यद्यपि जगतो हेतवः तथापि ते अङ्गाज्जाताः अक्षरात् तस्यैवाङ्गत्वश्रुतेः ब्रह्म पुच्छमित्यादौ अतः कारणात् त्वमेव जगद्धेतुरिति स्वरूपेण माहात्म्यमुक्तम् ॥ २ ॥

प्रमाणेन वक्तव्यमित्याकाङ्क्षायां वेदातिरिक्तं प्रमाणं नास्तीति वक्तुं ब्रह्मादीनामपीदमित्थतया ज्ञानाभावमाह । नैते स्वरूपमिति । अथवा एते तव पुत्राः पौत्रा वा कथं न मुक्ता यद्येत एवामुक्ताः कथमन्यो मुक्तो भविष्यतीत्याशङ्क्य तेषाममुक्तौ अभिमानादज्ञानङ्कारणमित्यभिप्रायेणाह । नैते स्वरूपं विदुरिति । अवश्यं ज्ञातव्यमिति बोधनार्थमात्मन इति यद्यपि त्वमात्मा तथापि आत्मत्वेन त्वां न गृहीतवन्त इति अनात्मतया गृहीताः कर्त्तरि कः ते वा त्वया कृपया आत्मत्वेन न गृहीता इति अजादयः अन्तरादयः पुरुषादयो वा ते रूपं न विदुः ब्रह्मादयो हि प्रमाणपरा ज्ञास्यन्तीति विज्ञाय तेषामपि ज्ञानाभावमाह । अजोऽनुबद्ध इति । अजो ब्रह्मा अजायाः प्रकृतेः सृष्टिरूपायाः गुणैः कर्तृत्वादिधर्मैः सत्वादिभिर्वा अनुबद्धः स्वासक्त्या बद्धोऽपि भगवदिच्छया वा पुनस्तैरनुबद्धः अजो गुणात्परं पृथग्भूतं गुणनियामकं वा ते रूपं न वेद न हि गृहे बद्धः गृहादन्यत्र स्थितं परिपश्यति अतः परिच्छिन्नमेव मन्यते तस्मान्न मोक्ष इति यदि तेऽपि न जानन्ति कथमन्यो ज्ञास्यतीति अतो यः कश्चनैवं भविष्यति स न ज्ञास्यति यः पुनस्त्वत्कृपया ज्ञास्यति स एव कृतार्थो भविष्यतीति नालौकिकं किञ्चित ॥ ३ ॥

तर्हि कथं ज्ञानोपाय इति चेत्तत्रोच्यते अज्ञात्वापि यथाकथंचि शास्त्रानुसारेण भगवान् सेव्यः ततो ज्ञापयिष्यतीत्यभिप्रेत्य सर्व एव त्वां स्वाधिकारानुसारेण तत्तद्रूपं सेवन्त इत्याह । त्वां योगिन इति षड्भिः सप्तभिर्वा । विशेषसामान्यप्रकारेण तत्रादौ योगिनः सर्वापेक्षिणः मोक्षपरा इति तान्गणयति यद्यपि योगे चित्तवृत्तिनिरोधे आत्मस्फूर्तिः फलमिति ध्यानार्थमेव भगवद्रूपमिति न ते भगवदुपासकाः तथाप्यसङ्गत्वेनेश्वरप्रणिधानमुक्तं शास्त्रं वा नापेक्षत इति विरुद्धांशोऽग्रे त्यक्तव्य इति योगिनोऽपि त्वामेव यजन्ति अद्धा साक्षात्ते ह्यन्तरुपासकाः अतो देहादिभिर्न व्यवहिताः तेषां मते पुरुष ईश्वरः साकारः सर्वजीवविलक्षणः अस्तीति नास्त्यत्र सांख्ययोगयोरीश्वरस्य साकारत्वं निराकारत्वं च स्थापितं तदाह । महापुरुषमीश्वरमिति । अन्तर्बहिर्नियामकं च साधवः पुनः सदाचाराः स्मार्त्तधर्मपराः भगवन्तमाश्रयरूपं मन्यमानाः आध्यात्मिकादिभेदत्रयं तदधीनमेवेति त्रितयसहित एव भगवानित्याहुः ॥ साध्यात्ममध्यात्मसहितमेवमाधिदैवसहितामिति अन्यथा कर्मणा बन्ध एव स्यात् एवं सति कर्त्ता प्रेरकश्च भगवदधीन इति नापराधस्तस्य भवति ॥ ४ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

चत्वारिंशे स्वेष्टदेवं तुष्टाव विविधा ब्रुवन् ।
उपासना उपास्यांश्च गान्दिनीनन्दनो नमन् ॥

अखिलानां हेतुर्ब्रह्मा तस्यापि हेतुं पुरुषमिति पुरुषाकारत्वमेव सर्वहेतुहेतुत्वमआद्यमव्ययमित्यनादिनिधनत्वं सर्वहेतुहेतुत्वं विवृणोति । यन्नाभीति ॥ १ ॥

किञ्च पृथिव्यादयः पदार्थास्तव पुरुषाकारस्यास्य चिदानन्दमयस्यैवाङ्गानां विभूतय इत्याह भूरिति आदिरहंकारः अजादिः प्रधानजीवकालकर्मादिवस्तुमात्रम् एते ये जगतो हेतवस्ते सर्वे तव अङ्गभूताः अङ्गमात् श्रीमूर्तेर्भूता जाताः यदुक्तम् सार्चा वन्हेर्मुखं क्षेत्रमित्यादि ॥ २ ॥

एते त्वत्तो जाता एव केवलं न तु त्वां जानन्तीत्याह । नैते इति । एते अजा आदिर्येषां ते आत्मनः परमात्मनस्ते स्वरूपं न विदुः कुतः जडत्वेन जाड्येन गृहीताः ग्रस्ता इत्यर्थः । ननु जडा मां न जानन्तु चेतनो जीवस्तु ज्ञास्यतीत्यत आह । अजो ब्रह्मापि भवन् जीवो न वेद कुतः अजाया गुणैरनुबद्धः आवृतः गुणातीतं ते स्वरूपं न वेद ॥ ३ ॥

किञ्च यद्यपि त्वां न वेद तथापि सर्वफलप्रदात्त्वत्त एव फलप्राप्तिमन्तोऽपि नानोपास्यानुपासीना अपि लोका वस्तुतस्त्वामेवोपासत इति ब्रुवन् सांख्यमार्गं योगमार्गं च प्रथममाह । त्वां योगिन इति । अध्यात्माधिभूताधिदैवसाक्षिणं महापुरुषमन्तर्यामिस्वरूपमीश्वरं च यजन्ति ॥ ४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

गिरा गद्गदयास्तौषीदिति निर्दिष्टाक्रूरकृता भगवत्स्तुतिश्चत्वारिंशे प्रपञ्च्यते । अक्रूर उवाचेति । तत्रादौ सर्वकारणकारणत्वादिना श्रीकृष्णं प्रणमति । नतोऽस्मीति । त्वा त्वां श्रीकृष्णमहं नतोऽस्मीति । नमनीयत्वे हेतुं दर्शयितुं तमेव विशिनष्टि । अखिलहेतूनां प्रकृतिपुरुषकालादीनां हेतुं निःसमनातिशयं सर्ववेदैकवेद्यं मुख्यं विश्वकारणमित्यर्थः । "प्रधानक्षेत्रज्ञपतिर्गुणेशः ज्ञः कालकालो गुणी सर्वविद्यः यः कारणं करणाधिपाधिपः कृष्ण एव परो देवः न तत्समश्चाभ्यधिकश्च दृश्यते सर्वे वेदा यत्पदमामनन्ति" इत्यादिश्रुतेः "अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते । वेदैश्च

त्रय्या च विद्यया केचित्त्वां वै वैतानिका द्विजाः ।
यजन्ते विततैर्यज्ञैर्नानारूपामराख्यया ॥ ५ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

सर्वैरहमेव वेद्य" इति स्मृतेश्च ननु सर्वकारणकारणत्वे विकारित्वप्रसङ्ग इत्यत आह । अव्ययमिति । निर्विकारस्वरूपमित्यर्थः । त्वच्छक्तिविक्षेपतस्त्वत्परिणामः संसार इति भावः । महत्स्रष्टाण्डस्थः सर्वभूतस्थश्च त्वमेवासीत्याह । नारायणं पुरुषमाद्यमिति । नारायणमण्डस्थम् आद्यं महत्स्रष्टारम् पूरुषं सर्वभूतस्थम् व्यष्टिसृष्टिहेतोश्चतुर्मुखस्य हेतुरण्डस्थस्वमूर्तिद्वारा त्वमिति दर्शयति । यस्य नारायणस्य नाभिजादरविन्दकोशात् य एष व्यष्टिरूपो लोको जात इति शेषः स ब्रह्मा आविरासीत् अण्डस्थनारायणस्य श्रीकृष्णमूर्तित्वं "नारायणोऽङ्गं नरभूजलायना" दित्यत्रोपपादितमेव "स वै किलायं पुरुषः पुरातनो य एक आसीदविशेष आत्मनि अग्रे गुणेभ्य" इत्यत्र श्रीकृष्णस्य सर्वपूर्वत्वं चोक्तमेव ॥ १ ॥

अथ समष्टिव्यष्टिहेतूनां हेतुस्त्वामिति दर्शयितुं भगवतः सर्वात्मत्वमाह । भूरिति । अजा प्रकृतिः शक्तिः आदिः नित्यस्वरूपः पुरुषो जीवः "प्रकृतिं पुरुषञ्चैव प्रविश्यात्मेच्छया हरिः । क्षोभयामास सम्प्राप्ते सर्गकालेऽव्ययाव्यया" विति स्मृतिप्रसिद्धौ प्रकृतिपुरुषौ तयोरनाद्यनन्तत्वे गुणक्षोभेण प्रकृतेः पुरुषस्य तु ज्ञानविकाशेन कार्यत्वम् तत्कार्यं महान् तत्कार्यमादिः भूतेन्द्रियादिमयसर्वहेतुरहङ्कारः तत्कार्यङ्खम् तत्कार्यं पवनः तत्कार्यमग्निः तत्कार्यं तोयम् तत्कार्यम्भूः सर्वेन्द्रियार्थाः खादिगुणाः शब्दादयः दशेन्द्रियाणि श्रोत्रादीनि राजसाहङ्कारकार्य्याणि मनो विबुधाश्च दिग्वादयः सात्त्विकाहङ्कारस्य कार्य्याणि एते सर्वे जगतो हेतवः येऽन्ये कालादयस्ते च सर्वे तव श्रीकृष्णस्य अङ्गभूताः त्वं सर्वेषामङ्गीत्यर्थः । प्रकृत्याद्यचेतनवर्गस्तव शक्तिः चेतनवर्गस्तवांशोऽतः सर्वात्मा त्वमसीति भावः ॥ २ ॥

एवं भोक्ता "भोग्यं प्रेरितारञ्च मत्वा सर्वं प्रोक्तं त्रिविधं ब्रह्ममेत" दिति श्रुतिप्रोक्तानां भोक्तृभोग्यनियन्तॄणां मध्ये नियन्तुर्ब्रह्मणः सर्वकारणत्वं सर्वात्मत्वं भोक्तृभोग्ययोस्तत्कार्यत्वम् तदात्मकत्वं चोक्तमथ भोग्यस्य जडत्वं परवेद्यत्वं भोक्तुश्चेतनत्वं गुणावृतत्वं कथञ्चित्स्ववेद्यत्वं परिच्छिन्नत्वं नियन्तृस्वरूपेयात्तनभिज्ञत्वं नियन्तुश्च सर्वकारणकारणत्वसर्वज्ञत्वसर्वात्मत्वादिस्वाभाविकगुणनिधेः प्राकृतगुणवर्जितत्वमियत्तानवच्छिन्नत्वं वर्णयति । नैते इति । एते अजादयः प्रकृतिमहदहङ्कारादयः आत्मनः स्वस्य स्वरूपं न विदुः हि यतस्ते प्रकृत्यादयः अनात्मतया आत्मा चेतनस्तद्भिन्नोऽनात्मा अचेतनः पदार्थः तस्य भावस्तत्ता तया जडत्वेन गृहीताः नहि जडः स्वमन्यम्वा जानाति अजो ब्रह्मादिरूपो जीवः अजो ह्येको जुषमाणोऽनुशेते" इति श्रुतेः अजायाः प्रकृतेर्गुणैरनुबद्धः अर्थात्परिच्छिन्नस्वरूपः अनात्मतया गृहीता इत्यनेनैव जडविलक्षणः चेतन इत्यर्थः । अतः आत्मानं भोक्तारमात्मात्मतया गृहीतं भोग्यवर्गञ्च जानाति ते तवापरिच्छिन्नस्य ब्रह्मणः स्वरूपं स्वकीयं स्वासाधारणस्वरूपं "हिरण्मयः पुरुषः हिरण्यकेश" इत्यादिश्रुतिप्रोक्तं विग्रहलक्षणम्वा कथम्भूतं गुणादिति जातावेकवचनं गुणेभ्यः परम्विलक्षणमनावृतम् न वेद एवं भूतं ते स्वासाधारणं रूपं ब्रह्मादयोऽपि न जानन्ति यदा तदाहङ्कुतो जानीयामतः केवलं नतोऽस्मीति त्रयाणां श्लोकानां फलितोऽर्थः । एवमेव "देहोऽसवोऽक्षा मनवो भूतमात्रा नात्मानमन्यञ्च विदुः परं यत् । सर्वं पुमान् वेद गुणांश्च तज्ज्ञो न वेद सर्वज्ञमनन्तमीडे" इत्युक्तं हंसगुह्ये ॥ ३ ॥

ननु तर्हि "ब्रह्मविदाप्नोति पर" मित्यादिवाक्यानि ज्ञानान्मुक्तिमाहुस्तदभावे कथम्मुक्तिः स्यान्मुमुक्षोरत्रेयत्ताज्ञानाभावेऽपि यथाशास्त्रं त्वां ज्ञात्वा भजतो मुक्तिः स्यादेवेत्याशयेन ब्रह्मोपासनां तदंशोपासनाश्चाधिकारिबाहुल्यत आह । त्वां योगिन इत्यादिना । योगिनः कर्मज्ञानभक्तियोगयुक्ताः औपनिषदाः अक्षरस्फुटमेव महापुरुषमनल्पं पुरुषं "भूमा त्वेव विजिज्ञासितव्य" इत्येवं भूमविद्याप्रसिद्धं भूमानं त्वामेव यजन्ति उपासते तथा साधवो मुमुक्षवः तत्प्रकरणप्रसिद्धा औपनिषदाः ईश्वरं नियन्तारम् "एष सर्वेश्वरः सर्वाधिपति" रित्यादिश्रुतिप्रसिद्धम् तथा "य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते" इत्याद्युपक्रम्य इत्यधिदैवतम् अथाध्यात्मं "य एषोऽन्तराक्षिणि पुरुषो दृश्यते" इत्येवं छान्दोग्यादिषु प्रसिद्धं साधिदैवम् सूर्याधिष्ठितस्वरूपसहितम् साध्यात्मम् चक्षुराधिष्ठितस्वरूपसहितम् साधिभूतं तत्तद्भूतस्थस्वरूपसहितम् त्वामेव यजन्ति साहित्यमत्र तत्तत्स्थानगतस्वरूपद्वारा सर्वात्मानं सर्वस्वरूपं त्वामेवोपासते इत्यभिप्रायः उपलक्षणमेतदन्यासां वेदान्तोक्तोपासनानां तास्तु वेदान्तकौस्तुभादौ द्रष्टव्याः ॥ ४ ॥

भाषा टीका ।

अक्रूरजी स्तुति करते हैं कि हे प्रभो ! आपको मैं नमस्कार कर्ता हूं आप आद्य पुरुष हौ अव्यय हौ सब संसार के हेतुओं के भी हेतु हौ और नारायण हौ जिन आपके नाभि कमल से उत्पन्न भये कमल से ब्रह्मा उत्पन्न भये हैं जिन ब्रह्मा से यह सब लोक पैदा भये हैं ॥ १ ॥

पृथिवी जल अग्नि पवन आकाश अहंकार महत्तत्व प्रकृति पुरुष मन इन्द्रिय और सब इन्द्रियों के विषय तथा सब देवता जो कोई जगत् के हेतु हैं सो सब आपके अंग से पैदा भये हैं ॥ २ ॥

आप इनके आत्मा हौ ये सब आपके स्वरूप को नहीं जानते हैं जो कि ये सब ब्रह्मादिक हैं सोभी मायाके गुणोंसे बद्ध होने से गुणोंसे परे वर्तमान आपके स्वरूपको नहीं जानते हैं ॥ ३ ॥

साधु योगी लोग आपको साक्षात् महापुरुष ईश्वर जान कर अध्यात्म अधिभुत अधिदैव के सहित आपके स्वरूप का यजन करते हैं ॥ ४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तदेवं सांख्ययोगावेकीकृत्योक्तौ त्रयीमार्गं कर्मज्ञानभेदेन दर्श-

१एके त्वाखिलकर्माणि सन्न्यस्योपशमं गताः । १केचित्त्वेति-वीरराघव पाठः
ज्ञानिनो ज्ञानयज्ञेन यजन्ति ज्ञानविग्रहम् ॥ ६ ॥
अन्ये च संस्कृतात्मानो विधिनाभिहितेन ते ।
यजन्ति त्वन्मयास्त्वां वै बहुमूर्त्त्येकमूर्तिकम् ॥ ७ ॥
त्वामेवान्ये शिवोक्तेन मार्गेण शिवरूपिणम् ।
बह्वाचार्यविभेदेन भगवन् ! समुपासते ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका

यति । त्रय्या चेति श्लोकद्वयेन । वैतानिकाः कर्मयोगिनस्त्वां वै त्वामेव यजन्ते ननु ते इन्द्रवरुणवाय्वादीन् यजन्ते नतु मामित्यत आह । नाना वज्रहस्तादीनि रूपाणि येषां ते येऽमरास्तेषामाख्यया नाम्ना त्वामेव यजन्त इति अयं भावः ऐन्द्रवारुणादिसूक्तैरिन्द्रादयः सर्वैश्वर्येण प्रकाश्यन्ते नच सर्वेश्वरा बभूवुः सम्भवन्त्यतो नामभेदेन त्वामेव यजन्त इति तथाच श्रुतिः "सप्रथमः सप्रकृतिर्विश्वकर्मा स प्रथमो मित्रावरुणो ऽग्निः सप्रथमो बृहस्पतिः श्चिकित्वांस्तस्मा इन्द्राय हविराजुहोती" ति ॥ ५ ॥

ज्ञानयज्ञेन समाधिना ॥ ६ ॥

सांख्ययोगत्रयीमार्गा उक्ता वैष्णवशैवमार्गावाह द्वयेन । अन्ये चेति । संस्कृतात्मानो वैष्णवशैवदीक्षिताः सन्तस्ते त्वयाभिहितेन पञ्चरात्रादिविधिना त्वन्मयास्त्वन्मयत्वेनात्मानं चिन्तयन्तस्त्वदेकप्रधाना इति वा वासुदेवसङ्कर्षणप्रद्युम्नानिरुद्धभेदेन बहुमूर्तिं नारायणरूपेणैकमूर्तिकञ्च त्वामेव यजन्ति ॥ ७ ॥

बह्वाचार्यविभेदेनेति । नानाभेदशैवपाशुपतादिमार्गेण ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

त्रय्येति तैर्व्याख्यातं यद्वा त्रय्या कर्मकाण्डमय्या "एवं त्रयीधर्ममनुप्रपन्ना गतागतं कामकामा लभन्ते" इत्यादेः चकारेण गौणत्वं व्यज्यात्रासाक्षात्त्वं व्यनक्ति विततैर्बहुधा विस्तारितैः ॥ ५ ॥

एके ततः श्रेष्ठाः ब्रह्मकाण्डविद उपशमं धैर्यं गताः अतो ज्ञानिनो निर्णीतपरमार्थाः सन्तः ज्ञानविग्रहं चिन्मात्राकारं ब्रह्माख्यं चिद्घनमूर्त्ति भगवदाख्यं वा श्लोकद्वयेन वेदमार्ग उक्तः ॥ ६ ॥

अन्ये चेति । चकारात् पूर्वसाम्यं बोधयति । ते त्वयाभिहितेनोक्तेन इति पञ्चरात्रस्य परमप्रामाण्यं तेन सर्वतो मान्यत्वं चोक्तं तथैव दर्शयिष्यते मोक्षधर्मवाक्येन अतएव संस्कृतात्मानः शैवादिदीक्षितानतिक्रम्य गुणविशेषयुक्तचित्ताः अत एव त्वन्मयास्त्वत्प्रचुराः सदा वाहिरन्तश्च त्वत्स्फूर्त्तिमन्त इत्यर्थः । बह्व्यो वासुदेवादयो मत्स्यादयश्च मूर्त्तयो यस्य एका परमव्योमाधिपमहानारायणरूपा मूर्त्तिर्यस्य तञ्च तंच यद्वा बहुमूर्त्तिकमप्येकमूर्त्तिकमिति तत्तन्मूर्त्तीनां नानात्वेऽप्येकत्वमभिप्रेतम् ॥ ७ ॥

त्वामेवेत्येवशब्देन पूर्वतो न्यूनत्वं बोधयति राजैवायं युवराज इतिवत् अत्र भगवन्तमुपासत इति भगवान् समुपागत इति पाठद्वयम् ॥ ८ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

वैतानिकाः यज्ञपराः ॥ ५ ॥

अखिलकर्माणि काम्यानि यद्वा यज्ञादिकर्माणि संन्यस्य त्वयि समर्प्य संन्यासशब्दः समर्पणवाची नतु परित्यागवाची

मयि सर्वाणि कर्माणि संन्यस्याध्यात्मचेतसा ।
निराशीर्निर्ममो भूत्वा युध्यस्व विगतज्वरः ॥

इतिप्रयोगात् नहि सर्वाणि कर्माणि हित्वा युध्यस्वेत्युच्यते ॥ ६ ॥

अन्ये भगवच्छास्त्रनिष्ठाः बहुमूर्त्त्येकमूर्त्तिकं व्यूहचतुष्टयवन्तं परवासुदेवं चेत्यर्थः ॥ ७ ॥

शिवरूपिणां शिवाख्यदेवतान्तर्यामिणं नतु शैवागमाभिप्रायकथनं तच्छास्त्रसिद्धिप्रज्ञानानि वा ॥ ८—११ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अथ कर्मणामपि तदाराधनात्मकानां द्वैविध्यमभिप्रयन् तावत्तद्द्वारककर्माराध्यत्वमाह । त्रय्या चेति । केचिद्वैतानिकाः कर्मयोगिनो द्विजाः नानारूपामराः नाना विधत्वच्छरीरभूता इन्द्रादयो देवास्तेषामाख्या नामानि यस्यां तया त्रय्या विद्यया वेदपूर्वभागात्मिकया विद्यया बोधितैर्विविधैर्यज्ञैस्त्वां यजन्ते इन्द्रादिदेवतान्तरात्मानं तच्छारीरकं त्वामाराधयन्तीत्यर्थः । यद्वा नानाविधानि रूपाणि वज्रहस्तत्वादीनि येषां तेषामिन्द्रादीनामाख्यया अभिधेयमितिशेषः । आकृत्यधिकरणन्यायेन इन्द्राद्यन्तरात्मभूतत्वत्पर्य्यन्ताभिधायिभिरिन्द्रादिनामभिरभिध्येयं तत्तच्छरीरकं त्वां यजन्तीत्यर्थः । सिंहावलोकितन्यायेन पुनः साक्षाज्ज्ञानयोगविशेषाराध्यमाह । केचित्त्वेति केचित् त्वा इतिच्छेदः त्वा त्वां यजन्तीति सम्बन्धः केचित्तु ज्ञानिनः भगवच्छेषतैकरसात्मयाथात्म्यज्ञानिनः भगवच्छेषतैकरसोऽहं तदायत्तस्वरूपस्थितिप्रवृत्तिश्च भगवांस्त्वसंख्येयैः कल्याणगुणैः परतरः इत्येवं विधज्ञानवन्त इत्यर्थः । अखिलकर्माणि तदुक्तविधस्वरूपविरुद्धान्यहङ्कारममकारगर्भाणि काम्यकर्माणि

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

त्यक्त्वा यद्वा मयि सर्वाणि कर्माणीत्युक्तरीत्या क्रियमाणानां नित्यनैमित्तिकादीनां फलसाधनताकारपरित्यागपूर्वकं भगवदाराधनरूपतामनुसन्धायेत्यर्थः। इदमेव हि भगवति कर्मणां यत्कैङ्कर्यरूपत्वानुसन्धानमिति उपशमं शब्दादिविषयेषु भोग्यताबुद्धिराहित्यं गताः प्राप्ताः ज्ञानयज्ञैन प्राप्यं प्रापकं चान्यदपि यन्मनोरथविषयभूतं तत्सर्वं परमपुरुष एवेत्येवं विधज्ञानयोगेन ज्ञानस्वरूपं त्वां यजन्ति यद्वा ज्ञानविग्रहम् एवंविधज्ञानेन यजतामनिष्टपरिहारेष्टप्राप्तिप्रणोपयुक्तज्ञानाश्रयं त्वां यजन्तीत्यर्थः॥ ६ ॥

अथाद्वारकककर्माराध्यमाह । अन्ये चेति । ते त्वयाभिहितेन विधिना पञ्चरात्रात्मकेन त्वदुक्तश्रीमत्पञ्चरात्रोक्तप्रकारेणेत्यर्थः। संस्कृतात्मानस्तापादिभिः पञ्चभिः संस्कारैः संस्कृता आत्मानो देहा येषां तथाभूताः त्वन्मयास्त्वज्ज्ञानप्रचुरा अन्ये भगवच्छास्त्रनिष्ठाः साक्षात्त्वामेव व्यूहविभवरूपेण बहुमूर्त्तिकम् पररूपेणैकमूर्त्तिकम् च यजन्ति पाञ्चकालिकैर्धर्मैराराधयन्ति ॥ ७ ॥

अथ—

> येऽप्यन्यदेवता भक्ता यजन्ते श्रद्धयान्विताः।
> तेऽपि मामेव कौन्तेय यजन्त्यविधिपूर्वकम्॥

इत्युक्तरीत्यातत्तद्देवतामात्रपर्यन्तावसितबुद्धिमत्कृतयजनस्य तत्तद्देवताशरीरकतदन्तरात्मभूतपरमपुरुषाराधनरूपेणाकृततदाराधनतां वक्तुं तावत्प्रदर्शनार्थमाह । त्वामेवान्य इति । हे भगवन् बहूनां माचार्याणां कापालिककालामुखशैवपाशुपतादिरूपाणां भेदः आचारभेदो यस्मिन् तेन शिवोपदिष्टेन मार्गेण शैवाद्यागमोक्तप्रकारेण त्वामेव शिवरूपिणमुपासते उपासकानां तद्बुध्यभावेप्युपासना त्वय्येव पर्यवस्यत्येव किन्तु तदुपासनमविधिपूर्वकमत एवान्तवत्फलसाधनमिति भावः ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

योगिनो यजन्त्यद्धेति विशेषणात्केचिदन्यथा यजन्तीति ध्वनितमर्थमाह । त्रय्येति । त्रय्या विद्यया कर्मप्रधानप्रकाशिकया वैतानिकाः याज्ञिकाः यज्ञकर्मशीला इत्यर्थः

> अस्त्री वितानमुल्लोचे विस्ताराध्वरयोः क्षणे।
> त्रिषु शून्ये च मन्दे च विषापयुतेषु स्वाङ्गिण्यपि ॥

उक्तविशेषणैरयमर्थो विज्ञायत इत्याह । विततैरिति । विस्तृतैः इन्द्रं यजामि यजेत्यादि बहुदैवत्य कर्मणामेकविषयत्वं कथं सङ्गच्छत इत्यत्राह नानारूपेति नानाविधानि शुक्लादिरूपाणि सौन्दर्याणि वा स्वभावा वा यशांसि वा येषां ते नानारूपाः ते चामरा देवाः नानारूपामराः तेषामाख्यया विशिष्टं विष्णुमिति शेषः सर्वदेवेष्वपि हरिः सर्वदेवनियामक इत्यादिवचनबाहुल्यादुपगन्तव्यं विष्णोः सर्वनामत्वम् अमरेति विशेषणेन वेदस्य वाच्याभावेनाप्रामाण्यं स्यादिति शङ्का निरस्ता इदञ्च विष्णावेव मुख्यमिति ॥ ५ ॥

प्रवृत्तिमार्गविहितोपासनाप्रकारमुक्त्वा ऽधुना निवृत्तिमार्गविषयोपास्तिविधानमाह । एक इति । तुशब्देन एषां मुख्यत्वं दर्शयति । उपशमं भगवन्निष्ठाम् ॥ ६ ॥

वैदिकमतमुक्त्वा तान्त्रिकमतमाह । अन्ये त्विति । अन्ये पाञ्चरात्रिकाः तुशब्देन तत्रापि बाहुविध्यमस्तीति सूचयति संस्कृतात्मानः शिक्षितबुद्धयः सम्प्रदायागतप्रज्ञा वा शुद्धदेहा वा विधिं तेन विधिना पञ्चधा कथितेन कालेन वा पञ्चकालपरायणैरिति वचनात् विधौ तु दैवकाल चेति च त्वमेव मयः सर्वोत्तम इति बुद्धिर्येषान्ते तथा बहुमूर्त्या वै बहुरूपेणच भक्तानुग्रहार्थं बहुत्वग्रहणं निजमेकमेवेत्याह । एकमूर्तिकमिति । व्यष्ट्या समष्ट्या च त्वामेव यजन्तीत्यर्थः ॥ ७ ॥

ननु शैवागमेषु शिवस्य यष्टव्यत्वेनोक्तत्वात्सर्वे त्वामेव यजन्तीति कथं युज्यत इति तत्राह । त्वामेवेति । शिवरूपिणं पुरुषार्थमूर्तिं शिवे रुद्रे रूपं नियामकमस्यास्तीति शिवान्तर्यामिणमित्यर्थः। दधीच्यादिबह्वाचार्यविभेदेन शैवपाशुपताद्युपदेष्टृभेदेन वा ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

त्रय्या कर्मकाण्डमय्या ॥ ५ ॥

एके ब्रह्मकाण्डविदः ज्ञानविग्रहं चिन्मात्राकारं ब्रह्माख्यं चिद्घनमूर्त्तिं भगवदाख्यं वा श्लोकद्वयेन वेदमार्ग उक्तः ॥ ६ ॥

संस्कृतात्मानः पाञ्चरात्रिकदीक्षया पाशुपतादिदीक्षामतिक्रम्य गुणविशेषयुक्तचित्ताः त्वामेवेत्येवकारेण न्यूनं बोधयति राजैव युवराज इतिवत् ॥ ७ ॥ ८ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

एवमपेक्षिततमान्तरबाह्यधर्मपरान् स्मार्तान्निरूप्य श्रौतान्निरूपयति । त्रय्येति । श्रुतौ पक्षत्रयं काण्डत्रयभेदात् तत्र कर्ममार्गे त्रयीप्रधानम् उपनिषदो ज्ञानमार्गे उपासनायां तु प्रणवादिमन्त्राः तत्क्रमेण त्रयमाह सर्वेषामेव भगवज्ज्ञानेपयोग इत्यवोचाम मन्त्रभेदेन वेदानां त्रैविध्यम् ऋचः सामानि यजूंषीति तदुपयोगि ब्राह्मणं च बाह्यक्रिया वा यजुषा क्रियते आन्तरी साक्षाद्देवतायै द्रव्यसमर्पणारूपा ऋचा क्रियते ततो देवतायाः फलदानार्थं हविर्ग्रहणार्थं च साम्ना स्तूयते एवम्प्रकारेण वैतानिकाः यज्ञवितानपराः यज्ञस्वरूपं त्वां विस्तीर्णैः सहस्रसंवत्सरान्तैः नानाविधैर्यज्ञैर्यजन्ते इति सर्वत्र सम्बन्धः चकारादङ्गोपाङ्गादिभिः सह ज्ञानेनापि सहेति केचित् । द्विजा इति जन्मकर्मावदाताः श्रोत्रियाः न तु सर्वेषां तत्राधिकार इति नन्नु तत्रेन्द्रादय एवेज्यन्ते न तु भगवानित्यभिप्रेत्याह । नानारूपेति । नानाविधानि रूपाणि येषाममराणामिन्द्रादीनां तेषामाख्यया आधिदैविकत्वाद् भगवत एव नामेति वा तेषामेवाख्यया भगवानेवेज्यते वस्तुतस्तु अङ्गप्रायास्ते यथा राज्ञः मुकुटोष्णीषादिनिर्माता सेवक एव भवति यद्यपि शिरसि एव परिचर्यां करोति एवं कर्णादिष्वपि तथापि राजसेवक एवोच्यते न त्वङ्गसेवक इति तथा प्रकृतेऽपि इन्द्रादयो ज्ञाहव इत्यादिभिरङ्गत्वश्रुतेः अतो भगवानेवेज्यते ॥ ५ ॥

एकेति । अन्ये पुनः सर्वकर्माणि त्यक्त्वा उपशमं गताः चित्तस्य परमां शान्तिं प्राप्य ज्ञानिनो भूत्वा ब्रह्मात्मत्वस्फूर्तिकाः आत्मयाजिनो भूत्वा ज्ञानरूपमेव यज्ञं कुर्वन्तः ज्ञानयज्ञो नाम आत्मानमेव त्रिपद्रूपं यज्ञरूपेण कल्पयित्वा भगवते समर्पयन्ति भगवत्प्रीतिसाधकत्वाज्ज्ञानमेव यज्ञशब्देनोच्यते

श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी ।

अथवा जरामर्यादिप्रकाराः ज्ञानयज्ञास्तत्र इज्यापि ज्ञानरूपा एवेत्याह । ज्ञानविग्रहमिति उडुलोमिवत् ॥ ६ ॥

उपासकानाह । अन्ये चेति । ते हि स्वात्मानं भगवन्तं च भिन्नमभिन्नं च मन्यन्ते नारुद्रो रुद्रमर्चयेदित्यादिवाक्यैः अत आह अन्ये भिन्नाश्चकाराद्भिन्ना अपि संस्कृतात्मानः दीक्षादिभिः शोधितसञ्जाताः गुणा अभिहितेन मार्गेण ते प्रसिद्धाः तत्तत्प्रकारेणैव तत्तद्देवतामन्त्रोपासकाः ततस्तन्मया भूत्वा उपास्यदेवतया व्याप्तस्वरूपा भूत्वा त्वामेव वै निश्चयेन नात्र तिरोहितमिव बहुमूर्त्या मत्स्यकूर्मादिरूपैः एकमूर्तिम् एकस्वरूपमेव यजन्ति सर्वे हि विष्णूपासका इति अत्र शैवादयोऽपि भगवन्निष्ठा एवेति ज्ञातव्याः उपासनायां हि मन्त्र एव प्रधानं स मन्त्ररूपः यज्ञवेदक एव इन्द्रादिवत्तत्तदभिमानिन्यो देवता इति ततः पञ्चविधैः अनेकविधैर्वा मन्त्रैः उपासनामार्गसिद्धो भगवानेक एवोपास्यते क्षुद्रोपासकांश्चाग्रे वक्ष्यते भिन्नप्रकारसिद्धांश्च ॥ ७ ॥

किं च शिवरूपोऽपि त्वमेवेति शैवा अपि त्वामेवोपासत इत्याह । त्वामेवेति । अन्य उपासकेभ्यो भिन्नाः शिवशास्त्रानुसारिणः तामसे कल्पे शिवरूपेण विष्णुः तिष्ठतीति शैवास्तमेव पक्षमाश्रित्य स्वभावरुच्या तथोपासते शिवोक्तो मार्गः शैवपञ्चरात्रे पाशुपतादौ च प्रसिद्धः तत्र शिवरूपी विष्णुरेव केचिदावेशिनमाहुः । तत्र बहवश्चाचार्याः महापाशुपतपाशुपतादिभेदभिन्नाः भगवन्निति सम्बोधनात् यदा वैराग्यगुणप्राधान्येन कार्यं करोषि तदा शिवरूपो भवसीति ज्ञापितं सम्यगेवोपासत इति ॥ ८ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

कर्ममार्गमाह । त्रय्या चेति द्वाभ्याम् । वैतानिकाः कर्मयोगिनः त्वां वै त्वामेव यजन्ते ननु ते इन्द्रवरुणादीन् यजन्ते नतु मामित्यत आह । नाना वज्रहस्तादीनि रूपाणि येषां ते ये अमरास्तेषामाख्यया नाम्ना त्वामेव यजन्ते अयं भावः ऐन्द्रवारुणादिसूक्तैरिन्द्रादयः सर्वैश्वर्येण प्रकाश्यन्ते नच सर्वेश्वरा बहवः सम्भवन्ति तस्मान्नामभेदेन त्वामेव यजन्त इति तथाच श्रुतिः "स प्रथमः स प्रकृतिः विश्वकर्मा प्रथमो मित्रावरुणोऽग्निः स प्रथमो बृहस्पतिश्चिकित्वांस्तस्मा इन्द्राय हविराजुहोती"ति ॥ ५ ॥

ज्ञानमार्गमाह । एके इति । ज्ञानयज्ञेन समाधिना ज्ञानविग्रहं ज्ञानस्वरूपं यद्वा ज्ञानस्यैव विशेषतो ग्रहो ग्रहणमास्वादनं यतस्तत् ब्रह्मेत्यर्थः ॥ ६ ॥

वैष्णवमार्गमाह । अन्ये इति । संस्कृतात्मान इत्येतदन्योपासका असंस्कृतमनस इति लभ्यते विधिना पञ्चरात्रदृष्टेन त्वयाभिहितेनेति "पञ्चरात्रस्य सर्वस्य वक्ता तु भगवान् स्वय" मिति स्मृतेस्तस्य परमप्रामाण्यात् सर्वतो मान्यत्वं द्योतितम् अन्तर्बहिस्त्वदीयस्फूर्त्तिमत्त्वात् त्वन्मयाः बहुमूर्त्तिकमप्येकमूर्त्तिकमिति तन्मूर्त्तीनां चिन्मयीनां नानात्वेऽप्यैक्यमभिप्रेतम् "एको वशी सर्वगः कृष्ण ईड्यः एकोऽपि सन् बहुधा योऽवभाती"ति श्रुतेः ॥ ७ ॥

शैवमार्गमाह । त्वामेवेत्येवकारः पूर्वतो न्यूनत्वं बोधयति राजैवायं युवराज इनिवत् ब्रह्माचार्यविभेदेन शैवपाशुपतादिनानारूपेण भगवन्तमुपासते भगवान् समुपासते इति पाठद्वयम् ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

एवं नानोपासनया वेदान्तिनस्त्वामेवाराधयन्तीत्युक्तमथ ब्रह्मांशोपासना दर्शयति । तत्र मीमांसका अपि गोपदगतगङ्गोदकन्यायेन तदंशभूतेन्द्रादियजनपराः इन्द्रादिद्वारा त्वामेवाराधयन्तीत्याह । त्रय्येति । वैतानिकाः इन्द्रादियजनरूपकर्मविज्ञानपराः त्वामेव यजन्ते "ननु ज्ञाज्ञौ द्वावजावीशानीशौ" इत्यादि श्रुतिभ्यः इन्द्रादयो जीवाः स्वरूपतो नामतश्चेश्वराद्भिन्ना एवातस्ते इन्द्रादियजनपराः मां कथं यजन्ते इत्यत आह । नानारूपामराख्यया । नानारूपाणां पृथक् पृथक् अल्पशक्तिस्वरूपाणां त्वदंशानाममराणामाख्यया नाम्ना त्वामेव यजन्ते यथा ओषधयः तत्तन्नामानि च पृथिवीमाश्रित्य वर्तन्ते तथा सर्वे इन्द्रादयः तत्तन्नामानि च त्वामाश्रित्य वर्तन्ते इत्यर्थः ॥ ५ ॥

अथानीश्वरसांख्यादयश्च ज्ञानयज्ञेन आत्मानात्मविवेकेन ज्ञानं जीवस्वरूपलक्षणं विग्रहोऽधिष्ठानं यस्य तमित्यर्थः । "यो विज्ञाने तिष्ठन्नि"तिश्रुतेः पुरुषान्तरात्मानं त्वां पुरुषद्वारा यजन्तीत्यर्थः ॥ ६ ॥

एवं ब्रह्मोपासनां तदंशोपासनाञ्चोक्त्वा ब्रह्मोपासनामेव रहस्यभेदेन दर्शयति । अन्ये चेति । अन्ये सर्ववेदार्थभूतपञ्चरात्राद्यागमनिष्ठाः संस्कृतः चतुरायुधचिन्हादिपञ्चसंस्कारैः आत्मा देहो येषां ते तथा ते च संस्काराः श्रुत्या सूचिताः "धृतोर्ध्वपुण्ड्रः कृतचक्रधारी विष्णुम्परं ध्यायति यो महात्मा । स्वरेण मन्त्रेण सदा हृदिस्थितं परात्परं यन्महतो महान्तम्" इति स्मृत्या च पञ्चसंस्काराः प्रदर्शिताः "तापः पुण्ड्रं तथा नाम मन्त्रो यागश्च पञ्चमः । अमी हि पञ्चसंस्काराः पारमैकान्त्यहेतवः" । इति तापशब्देन सुदर्शनादीनामग्नितप्तानां चिन्हं ज्ञेयम् तच्च द्वारवत्यामेव यथोक्तं पाद्मे रुक्माङ्गदं प्रति श्रीनारदेन "अग्नितप्तं सदा धार्य्यं द्वारवत्यां विचक्षणैः । नान्यस्थाने जातु राजन् ! सत्यमेतद्ब्रवीमि ते" इति तत्र च परमाचार्यैः श्रीकृष्ण एव तत्रत्यपुरुषद्वारा तप्तमुद्राप्रदः तदुक्तं बृहन्नारदीये "चतुर्थं द्वारकास्थानं मद्धाम सुरसेवितम् । तत्राहं हेतिना साध्वि ! तापयामि तनुं नृणा" मिति अन्यत्र तु गोपीचन्दनालितैः सुदर्शनादिभिः पञ्चसंस्कारकाले शिष्यं संस्कुर्वन्ति भागवताः तदुक्तं वाराहे श्रीसनत्कुमारेण "कृष्णायुधाङ्कितो देहो गोपीचन्दनमृत्स्नया । प्रयागादिषु तीर्थेषु स गत्वा किं करिष्यति । किञ्चाग्निं विनापि सुदर्शनस्य स्वत एवाग्निरूपत्वञ्चोक्तं सामवेदे मैत्रावरुणशाखायाम् "पवित्रमित्यग्निः अग्निर्वै सहस्रारः सहस्रारो नेमिः नेमिना तप्ततनुर्ब्रह्मणः सायुज्यं सलोकतामाप्नोती"ति अनेन शीतलमुद्राधारणमपि तप्तमुद्राधारणमेवेति सिद्धम् पुण्ड्रमूर्ध्वं पुण्ड्रं नाम श्रीकृष्णदासादिः मन्त्रोऽष्टादशाक्षरादिः यागो भगवन्मूर्त्तिपूजनध्यानादिः इति पञ्चसंस्कारनिर्णयः विस्तरस्तु स्वधर्मामृतसिन्धौ द्रष्टव्यः कथम्भूताः त्वन्मया त्वत्प्रधानाः अंशत्वावच्छिन्नेन रूपेण भिन्नस्वरूपा अपि अंशिनिरपेक्षस्थितिप्रवृत्त्याद्यभावादभिन्ना इत्यर्थः । एवम्भूतास्ते त्वया अभिहितेन विधिना बहुमूर्त्येकमूर्तिकं व्यूहाङ्गिनं त्वामेव यजन्ति तथाह भगवाना-

सर्व एव यजन्ति त्वां सर्वदेवमयेश्वरम् ।
येऽप्यन्यदेवताभक्ता यद्यप्यन्यधियः प्रभो ! ॥ ९ ॥
यथाद्रिप्रभवा नद्यः पर्जन्यापूरिताः प्रभो ! ।
विशन्ति सर्वतः सिन्धुं तद्वत्त्वां गतयोऽन्ततः ॥ १० ॥
सत्त्वं रजस्तम इति भवतः प्रकृतेर्गुणाः ।
तेषु हि प्राकृताः प्रोता आब्रह्मस्थावरादयः ॥ ११ ॥
तुभ्यं नमस्ते ऽस्त्वविषक्तदृष्टये सर्वात्मने सर्वधियाञ्च साक्षिणे ।
गुणप्रवाहो ऽयमविद्यया कृतः प्रवर्तते देवनृतिर्यगात्मसु ॥ १२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

द्याचार्यैः "स्वभावतोऽपास्तसमस्तदोषमशेषकल्याणगुणैकराशिम् । व्यूहाङ्गिनं ब्रह्म परं वरेण्यं ध्यायेम कृष्णं कमलेक्षणं हरि" मिति ॥ ७ ॥

अथांशोपासनाया अपि रहस्यविशेषं सूचयन् अन्यदेवभक्तैस्तदुद्देशेन कृतोपासनापि सर्वात्मनि त्वय्येव पर्य्यवस्यतीत्याह द्वाभ्याम् । त्वामेवेति । शिवोक्तेन शिवोपदिष्टेन मार्गेण कथम्भूतेन बह्वाचार्यविभेदेन बहूनां कापालिककालामुखशैवादीनामाचार्याणां भेदः आचरणभेदो यस्मिन् तेन ॥ ८ ॥

भाषा टीका ।

कोइ ब्राह्मण यज्ञ करने वाले त्रयी वेद विद्या से आपका पूजन करते हैं जो नाना प्रकार के देवताओं के नाम से अनेक यज्ञों के विस्तार करते हैं ॥ ५ ॥

कोइ एक ज्ञानीजन शांति को प्राप्त होकर सब कर्मों को आप के विषे अर्पण करके ज्ञान मूर्ति आपका यजन करते हैं ॥ ६ ॥

और कोइ महा पुरुष आपकी कही पंच रात्र विधि से आप में तत्पर होकर तप्त शंख चक्र धारणादि संस्कार से दीक्षित होकर बहुत मूर्ति वाले तथा एक मूर्ति वाले आपका यजन करते हैं ॥ ७ ॥

कोइ दूसरे पुरुष शिवोक्त मार्ग से शिव रूपी आपको जानकर बहुत आचार्यों के मत भेदसे भगवान् आपकी उपासना करते हैं ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

ये ऽपि क्षुद्रदेवताभक्तास्तेऽपि त्वामेव यजन्तीत्याह । सर्व एवेति । हे सर्वदेवमय नन्वेते परस्परदेवताऽधिक्षेपकलहव्याकुलचित्ताः कथमेकमेव यजन्तीत्युच्यते तत्राह । यद्यप्यन्यधिय इति । बुद्धिमात्रभेदो न वस्तुभेद इत्यर्थः ॥ ९ ॥

तस्मात्सर्वे मार्गास्त्वय्येव पर्यवस्यन्तीति सदृष्टान्तमाह । यथेति । अद्रेः सकाशात्सर्वतः प्रभवन्ति या नद्यस्ताः पुनः पर्जन्येनापूरिता बहुस्रोतसः सत्यः सर्वतः सिन्धुमेव विशन्ति यथा तद्वदेता गतयो मार्गा अन्ततस्त्वामेव विशन्तीति ॥ १० ॥

अत्र हेतुमाह । सत्त्वमिति । भवतः शक्तिर्या प्रकृतिस्तस्याः सत्त्वादयो गुणाः अतः प्राकृताः प्रकृतिकार्योपाधयो ब्रह्मपर्यन्ताः स्थावरादयो जीवाः स्वोपाधिद्वारा तेषु गुणेषु प्रोताः प्रविष्टास्ते च प्रकृतौ सा च त्वयीति अतः क्रमेणोपाधिलयात्सर्वेऽपि त्वामेव विशन्तीति यद्वा भवतः प्रकृतेर्गुणेषु प्रोता ब्रह्मादयो भवद्व्यतिरिक्ता न सन्त्यतस्त्वमेव सर्वदेवमय इति ॥ ११ ॥

ननु भवतः प्रकृतेरिति वदन् ममापि प्रकृतिसम्बन्धं ब्रवीषि ततश्च तेषां मम च को विशेषः स्यादित्याशङ्क्य विशेषमाह । तुभ्यमिति । अविषक्तदृष्टयेऽलिप्तबुद्धये कुतः सर्वात्मने त्वद्व्यतिरिक्ताभावादविषक्तदृष्टित्वमित्यर्थः । किञ्च सर्वधियां साक्षिणे सर्वबुद्धिसाक्षित्वान्न क्वापि बुद्धिलेप इत्यर्थः । इतरे तु संसरन्तीत्याह । गुणप्रवाह इति । देवनृतिर्यञ्च आत्मानो येषां तेषु देवादिशरीराभिमानिष्वित्यर्थः । त्वदविद्यया कृतोऽयं गुणप्रवाहः प्रवर्ततेऽतो महान् विशेष इत्यर्थः ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

किं तत्तद्विशेषनिर्देशेनेत्याह । सर्व इति । अत्र येऽप्यन्यदेवतेति स्वामिसम्मतः पाठः अन्यपदस्य क्षुद्रपदेन व्याख्यानात् नानेति क्वचित् पाठः अन्यस्मिन्निन्द्रादावेव नतु त्वयि धीर्येषां तथाभूता यद्यपि तथापि त्वय्येव पर्यवसानात् सर्व एव त्वां यजन्ति तत्र हेतुः सर्व एव देवा अधिष्ठानतया प्राचुर्येण विद्यन्ते यत्रेति सर्वदेवमय ईश्वरोऽन्तर्यामी तत्र अधिष्ठानपूजा अधिष्ठात्रादावेव पर्यवस्यति किन्त्वन्याधीनत्वेन तात्त्विकं फलं न स्यादिति भावः । तदुक्तं श्रीभगवद्गीतासु "येऽप्यन्यदेवताभक्ता यजन्ते श्रद्धयान्विताः । तेऽपि मामेव कौन्तेय ! यजन्त्यविधिपूर्वकम् । अहं सर्वस्य यज्ञस्य भोक्ता च प्रभुरेव च । नतु मामभिजानन्ति तत्त्वेनातश्च्यवन्ति ते । देवान् देवयजो यान्ती" त्यादि ॥ ९ ॥

अत्राद्रिस्थानीयो वेदः पर्जन्यस्थानीया मुनयो ज्ञेयाः अन्तत इति दृष्टान्ते गमनस्य पर्यवसाने सति दार्ष्टान्तिके विचारस्येति

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

व्याख्येयं तथाच मोक्षधर्मे नारायणीयोपाख्याने "साङ्ख्यं योगः पञ्चरात्रं वेदाः पाशुपतं तथा । ज्ञानान्येतानि राजर्षे ! विद्धि नानामतानि वै । सांख्यस्य वक्ता कपिलः परमर्षिः स उच्यते । हिरण्यगर्भो योगस्य वेत्ता नान्यः पुरातनः । अपान्तरतमाश्चैव वेदाचार्यः स उच्यते । प्राचीनगर्भं तमृषिं प्रवदन्तीह केचन । उमापतिर्भूतपतिः श्रीकण्ठो ब्रह्मणः सुतः । उक्तवानिदमव्यग्रो ज्ञानं पाशुपतं शिवः । पञ्चरात्रस्य कृत्स्नस्य वक्ता तु भगवान् स्वयम् । सर्वेष्वेव नृपश्रेष्ठ ! ज्ञानेष्वेतेषु दृश्यते । यथागमं यथाज्ञानं निष्ठा नारायणः प्रभुः । न चैनमेवं जानन्ति तमोभूता विशाम्पते ! । तमेव शास्त्रकर्त्तारः प्रवदन्ति मनीषिणः । निष्ठां नारायणमृषिं नान्योऽस्तीति वचो मम । निःसंशयेषु सर्वेषु नित्यं वसति वै हरिः । ससंशयान् हेतुबलान्नाध्यावसति माधवः । पञ्चरात्रविदो ये तु यथाक्रमपरा नृप ! एकान्तभावोपगतास्ते हरिं प्रविशन्ति वै । साङ्ख्यञ्च योगश्च सनातनोऽत्र वेदाश्च सर्वे निखिलेन राजन् ! । सर्वैः समस्तैर्ऋषिभिर्निरुक्तो नारायणो विश्वमिदं पुराण" मिति अपान्तरतमा इति श्रीकृष्णद्वैपायनस्यैव पूर्वजन्मनामेति तत्रैवोक्तं सर्वेष्वेवेति तत्र तत्र नारायणवत् परमोपादेयगुणत्वेनानुक्तेस्तेषां तदाकाङ्क्षासम्भवादिति भावः ॥ १० ॥

ननु विचारस्य पर्यवसाने सत्येव ते मार्गा मयि विशन्तीति कथमुक्तं कथन्त्वा प्रथमत एव न विशन्तीति तत्राह । सत्त्वमिति । तैर्व्याख्यातं तत्र पूर्वार्थे क्रमेण देवतापरित्यागो ज्ञेयः वैदिकमार्गस्य चित्तशोधकस्वभावत्वात् उत्तरार्थे ईश्वर इति योज्यं तदेवं मायामोहितत्वादेव साक्षात्त्वां न भजन्तीति भावः ॥ ११ ॥

त्वन्तु तेषु पूर्ववदुदासीनस्तिष्ठसीति विचार्य स्वयं भीतः सन् प्रपद्यमान आह । तुभ्यमित्यर्द्धेन । ते इत्यस्याविद्ययेत्यनेनान्वयः अत एव तैर्व्याख्यातं त्वदविद्याकृतोऽयमिति यद्वा यत्तुभ्यं नमो नमस्कारः तस्ते तुभ्यमिति त्वामेव प्रसादयितुमित्यर्थः । क्रियार्थोपपदस्य च कर्मणि स्थानिन" इति विधानात् तुशब्दो भिन्नोपक्रमे प्राकृतेभ्योऽत्यन्तभेदात् अस्त्विति पाठे स्पष्ट एव द्वितीयोऽर्थः अविषक्तदृष्टये दृष्ट्वापि तेष्वनासक्तायेत्यर्थः । तत्र हेतुः सर्वात्मने सर्वमूलस्वरूपत्वात् सर्वेषां सर्वप्रवर्त्तकस्य कथमन्यत्रादरः स्यात् येन विरक्तिः स्यादिति भावः । नन्वादराभावेऽपि द्रष्टृदृश्यगुणस्य संक्रमः स्यादेव तत्राह । सर्वधियां सर्वसाक्षिणे साक्षिमात्रत्वान्न तव तेष्वासक्तिरिति भावः । ननु तेषां त्वय्येव पर्यवसानतो विचारे सति त्वदौदासीन्ये कथं सिद्धिः स्यात्तत्राप्याह । सर्वधियाञ्चेति । तेषां तदा त्वदाभिमुख्ये जाते भक्तत्वं जातमिति तदभिज्ञस्त्वं न तेषूदासीनो भवसीति भावः । "समोऽहं सर्वभूतेषु न मे द्वेष्योऽस्ति न प्रियः । ये भजन्ति तु मां भक्त्या मयि ते तेषु चाप्यह" मिति श्रीभगवद्गीतात एवेति भावः । ननु तादृशविचारात् पूर्वावस्थायां तेषां का वार्त्ता तत्राह सार्द्धेन गुणेति ॥ १२ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

यदविद्यया यदीयया प्रकृत्या "मम माया दुरत्यये" ति वचनात् ॥ १२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

कथमतद्विषयकोपासनानां तत्पर्य्यवसानमित्यतः सदृष्टान्तं तदुपपादयति । सर्व एवेति द्वाभ्याम् । हे प्रभो ! ये नानादेवताभक्तास्ते यद्यप्यन्यधियः परमात्मेतरविषयकोपासनात्मकधीमन्तस्तथापि ते सर्वे त्वामेव यजन्ते तत्र हेतुं वदन् विशिनष्टि । सर्वदेवमयेश्वरं "स आत्मा अङ्गान्यन्या देवता" इत्युक्तरीत्या सर्वदेवताशरीरकत्वेन तत्प्रचुरत्वात्सर्वदेवमयः सचासौ तेषामीश्वरोऽन्तः प्रविश्य नियन्ता च तं सर्वदेवानां त्वदायत्तसत्तादिमत्त्वेन त्वदपृथक्सिद्धविशेषणत्वेन त्वत्त्वो व्यतिरेकाभावात् तद्विषयकोपासनास्त्वद्विषयिका एवेति भावः ॥ ६ ॥

त्वय्येव पर्य्यवस्यन्तीत्यत्र दृष्टान्तमाह । यथेति । अद्रेः सकाशात्प्रभवन्त्युत्पद्यन्ते इति तथा नद्यः पर्जन्येनापूरिताः बहुस्रोतसः सत्यः सर्वतः सिन्धुं समुद्रमेव विशन्ति तद्वत् गतयो बुद्धयोऽप्यन्ततः पर्य्यवसानतः त्वामेव विशेष्यभूतं विषयीकुर्वन्ति ॥१०॥

गतय इत्यनेन ज्ञानमात्रस्य विशेषणभूतप्रपञ्चविषयकस्य विशेष्यभूतपरमात्मपर्य्यन्तत्वं सूचितं तदेव व्यञ्जयितुं सर्वस्य चिदचिदात्मकप्रपञ्चस्य तद्विशेषणतामाह । स त्वमिति । भवतः प्रकृतेः त्वच्छरीरभूतप्रधानस्येत्यर्थः । "यस्याव्यक्तं शरीर" मिति श्रुतेः ये सत्त्वादयो गुणाः तेष्वेवाब्रह्मस्थावरान्ताः प्राकृताः प्रकृतिपरिणामात्मकाः तन्तुषु पटवत्प्रोताः प्रविष्टाः ब्रह्मादिक्षेत्रज्ञाधिष्ठिता देहास्त्वदपृथक्सिद्ध विशेषण भूतगुणमयप्रकृतिकार्यतया त्वदायत्तसत्तादिमन्तः त्वद्विशेषणभूता इत्यर्थः ॥ ११ ॥

एवमचेतनप्रपञ्चस्य तद्विशेषणत्वमुक्तम् अथ ब्रह्मादिक्षेत्रज्ञानां तच्छरीरत्वेन तद्विशेषणत्वं तदायत्तबन्धमोक्षादिमत्त्वं तस्य बन्धापादनाद्युपयुक्तसर्वज्ञत्वञ्च वदन्नमस्करोति । तुभ्यमिति । सर्वात्मने सर्वेषां ब्रह्मादिक्षेत्रज्ञानामात्म अनेन क्षेत्रज्ञानां तच्छरीरत्वेन तद्विशेषणत्वं फलितं यर्हि सर्वात्मा तर्हि जीववत्किंदेहात्माभिमानी नेत्याह । अविषक्तदृष्टये । अविषक्ता देहादिष्वनभिनिविष्टा दृष्टिर्यस्य तस्मै देहात्माद्यभिमानरहितायेत्यर्थः । तत्र हेतुः सर्वधियां साक्षिणे सर्वासां बुद्धीनां साक्षाद्द्रष्ट्रे सर्वबुद्धिसाक्षित्वात् न क्वापि देहात्माद्यभिमान इति भावः । किञ्च यदविद्यया यदीयया प्रकृत्या हेतुभूतया देवनृतिर्यगात्मानो देहा येषां तेषु क्षेत्रज्ञेषु अयं परिदृश्यमानो गुणप्रवाहः सत्त्वादिभिर्निमित्तभूतैः प्रवहते प्राप्नोतीति तथा संसारः असकृद्दुःखरूपः प्रवहते तस्मै तुभ्यं ते नमः अस्तु यदविद्ययेत्यनेन "दैवी ह्येषा गुणमयी मम" त्यादिवचनार्थोऽभिप्रेतः ॥ १२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावळी ।

उपसंहरति । सर्व एवेति । सर्वेषां देवानामीश्वराः इन्द्रादयः तेषामपीश्वरः सर्वदेवमहेश्वरः सर्व इति क इति तत्राह । य इति । ये इन्द्रादिनानादेवतानां भक्ताः अत एव तद्भक्तिपूर्त्यर्थमन्यधियः स्वातन्त्र्यबुद्धयो यद्यपि तथापि तव सर्वस्वामित्वं जानन्तो देवास्त्वद्दत्तबलिं त्वयि समर्प्य तत्फलार्थी स्वयं स्वीकुर्वन्त्यन्यथा पश्यतो हरत्वं तेषां स्यादतस्तन्न कुर्वन्ति किन्तु तत्फलमन्तवदेव

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

तथा श्रुतत्वादिति भावः । यद्वा विष्णोरन्या विलक्षणा धीर्येषां ते तथा यद्यपि तथापि पूर्वादृष्टवशाज्ज्ञानादेवताभक्ताः ये ते त्वत्सर्वोत्तमत्वज्ञानाभावात्तेषामित्यतः प्रभो इत्युक्तम् ॥ ९ ॥

एतदेव विशदयति । यथेति अद्रिभ्यः प्रभवः उत्पत्तिर्यासां ताः अद्रिप्रभवाः पर्जन्येन गर्जन्मेघेन आपूरिताः सिन्धुं समुद्रं त्वां गतयः पूजामार्गाः पुरुषार्थसाधनानि शास्त्राणि वा येऽन्ततः पूजावसाने ब्रह्मार्पणबुद्ध्यावासिता इत्यर्थः ॥ १० ॥

ननु पूजादिकं सर्वं भगवद्विषयश्चेन्मतभेदः कथमुत्पद्यत इत्याशङ्क्य सत्त्वादिगुणोपरक्तत्वात्तदाकृष्टबुद्धित्वेन तद्भेद इत्याशयेनाह । सत्त्वमिति । प्राकृताः प्रकृतिनिमित्तास्तेषु सत्त्वादिषु प्रोताः सम्यक् स्यूताः सम्वलिता इत्यर्थः । कार्यते ह्यवश इत्यादि हिशब्देन गृहीतम् ॥ ११ ॥

ननु प्राकृतपदार्थेष्ववस्थितस्य हरेस्ततो विशिष्टत्वमहिमासम्भवात् किं विशेषेण प्रणतिः प्रार्थ्यत इति तत्राह । तुभ्यमिति । तुभ्यं नमोऽस्तु यः सात्त्विकादिनानाजन कृतपूजाविषयत्वेनोक्तस्तस्मै ते भूयोऽपि नमोऽस्त्वित्यन्वादिश्यते प्रतिविशेषणमनुसंधेयमिति द्योतनाय वा अविप्रकृष्टदृष्टये अप्रतिहतज्ञानाय एकैकस्यैकैकप्रतिहतेदृष्टत्वादस्य कथमप्रतिहतज्ञानत्वमित्याशङ्क्य सर्वस्वामित्वेन स्वातन्त्र्यप्रतीतेर्ज्ञानप्रतिबन्धकाभवो युक्त इति भावेनाह । सर्वात्मन इति । सर्वेषां तत्तच्छक्तिमाकृष्य वशीकृत्य तिष्ठत इत्यर्थः । तदेव विशिनष्टि । सर्वेति । स हि सर्वमनोवृत्तिप्रेरकः समुदाहृत इत्यादेः यद्वा अनेनासङ्गत्वं स्पष्टयत इति । अस्य सर्वस्वातन्त्र्यमस्तीति कथमवगन्तुं शक्यमित्याशङ्क्य संसारस्य हरीच्छाधीनत्वज्ञानादित्याह । गुणप्रवाह इति । अस्य हरेर्विद्ययेच्छया अनिषधे पुमान्विष्णाववविचित्रे स्मरे पुमानिति च देवत्वोपाधिविशिष्ट आत्मनीति प्रत्येकमन्वेतव्यम् ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

सर्वं एव व्याख्या ॥ ९—११ ॥

तेऽविद्ययेत्यन्वयः । त्वद्विषयेणाज्ञानेनेत्यर्थः ॥ १२ ॥

श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी ।

एवं षड्विधा निरूप्य सामान्येन क्षुद्रोपासकानाह । सर्व एवेति । किं बहुना क्षेत्रपालाद्युपासका अपि त्वामेवोपासते यतस्त्वं सर्वदेवमयः तेषामपीश्वरः „अहं हि सर्वयज्ञानां भोक्ता च„ ति वाक्यात् सर्वदेवमयश्चासावीश्वरश्चेति ननु बुद्धिस्तेषां न भगवत्परेति कथं सर्वेषां भगवदुपासकत्वमित्याशङ्क्याह । येऽप्यन्यदेवताभक्ता इति । वयमात्मव्यतिरिक्तस्य विष्णुव्यतिरिक्तस्य च देवतान्तरस्योपासका इति यद्यप्येषामन्यबुद्धिः तथापि उपास्यो महानिति मत्वा हि ते उपासते न त्वस्मदुपास्यो न किञ्चित्कर इति अन्यथा नोपासीरन् न हि कश्चिद्धीनमप्रयोजकं ज्ञात्वा कश्चनोपास्ते परं भ्रमादुपासना भवति भ्रमे तु भगवद्धर्मा एव तत्रारोपिता इति भगवानेव सेव्यते आरोपस्य तुल्यत्वात् अबुद्धिपूर्वकोऽयमिति विशेषः । योऽपि भ्रमाद्रजतं जानाति सोऽपि रजतं ज्ञातवानेव अन्यथा अनुव्यवसायोऽपि भ्रान्तः स्यात् यदुक्तं भगवता „न तु मामभिजानन्ती„ति तद्विधिपरत्वेन अविधिपूर्वकमिति वचनात् प्रतिमादावपि भगवानारोप्यते तद्धर्माश्च तथा तत्तदुपासका अपि स्वसेव्ये भगवत्त्वं तद्धर्माश्चारोपयन्ति परं विध्यभावात् न तस्य ज्ञानजनकत्वं किं तूद्देश्यफलमेव अतो भगवदज्ञानात्तेषां संसार एव स्थितिरिति वदता भगवता विधिमार्गो मुख्यतया स्थापितः न त्वविहितो मार्गो निन्दितः अन्यथा "मामेव यजन्ति अहं हि सर्वज्ञानानां लभते च ततः कामान् मयैव विहितान् हितान्" इति न वदेदेव तस्माद्विधिस्तुतिपरमेवैतद्वाक्यम अतः सुष्ठूक्तं येऽप्यन्यदेवताभक्ता यद्यप्यन्यधियः तथापि त्वामेवोपासते इति नन्वेवं भ्रमं भगवानुत्पाद्य किमिति एवं फलं प्रयच्छति कथं सर्वानेव नैकविधान् करोतीत्याशङ्क्याह । प्रभो इति स हि सर्वप्रकारसमर्थः तथापि चकारादन्यथा चनानाप्रकारान् ॥ ९ ॥

ननु तत्तदुपासकानां तत्तद्देवतासायुज्यस्योक्तत्वात् कथं प्रमेयबलविचारेण तेषां गत्यभाव इति चेत्तत्राह । यथाद्रिप्रभवा इति । साधनपरं चैतद्वाक्यम्—

आकाशात्पतितं तोयं यथा गच्छति सागरम् ।
सर्वदेवनमस्कारः केशवं प्रति गच्छति ॥

इतिवाक्यात् प्रमेयबले च तेषां भगवत्सायुज्यमेव यदि निष्कामाः परम्पराकालविलम्बश्च भवति यथाभूतोपासकाः भूतसायुज्यं प्राप्नुवन्ति ततो भूतानि महादेवसायुज्यं महादेवो भगवत्सायुज्यमिति एवं विहितानामविहितानां वा साक्षात्परम्परया वा भगवत्सायुज्यमेव फलमिति यथा सर्वासामेव पर्वतप्रभवानां नदीनां मेघैरापूर्यमाणानां सिन्धुरेव प्रवेशस्थानं चतुर्दिक्षु न त्वन्यः कश्चित्प्रवेशयोग्यो भवति तद्वदेव नदीप्राया जीवगणाः सहजेन पर्वतजलेनागन्तुकेन वा वृष्टिजलेन वा पूरिता भवन्ति तथा विधिनाविधिना च पूरिताः जीवा जन्मकोटिभिः भगवत्सायुज्यमेव प्राप्नुवन्ति तथाभूतानामपि फलं साधयतीति ज्ञापनार्थं प्रभो इति गतयः फलानि अन्ततः त्वय्येव विशन्ति ॥ १० ॥

किं च उत्पत्तिविचारेणापि त्वत्त एवोत्पन्नाः त्वय्येव विशन्ति त्वमेवेति कथं तेषां त्वत्सायुज्यं न भवेत् न ह्यन्यः कश्चिदस्ति तदाह । सत्त्वमिति त्वमेव प्रकृतिः अतो भवतः प्रकृतेस्त्वदीयाया वा सत्त्वं रजस्तम इति त्रयो गुणाः तेषु सर्व एव प्राकृताः प्रकृतिप्रकारेणोत्पादिताः तेषु गुणेषु प्रोताः ब्रह्मावधिस्थावरान्ताः अतः सर्वेषामेव गुणे लयः गुणाः प्रकृतौ प्रकृतिस्त्वयि त्वमेव वा ॥ ११ ॥

एवं सोपपत्तिकं प्रमाणं भगवद्विषयकं सफलं निरूप्य प्रमाणतः प्रेमतश्च महत्त्वं निरूप्य नमस्यति । तुभ्यमिति । अन्यथा महत्त्वं हृदयारूढं नेति शङ्का स्यात् तदर्थं माहात्म्यमुक्त्वा नमस्कर्त्तव्यं तुभ्यमेतादृशाय नमः ते तुभ्यं त्वदर्थमेव त्वमेव फलमित्यर्थः । एवं त्वन्नमस्कारे त्वमेव फलं भवसीति प्रार्थयति

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

अस्त्विति नन्ववतीर्णोऽहं तद्धर्मैर्व्याप्त इति किं मम नमस्कारेणेत्यत आह । अविषक्तदृष्टय इति । न विषक्ता दृष्टिर्यस्य क्वापि धर्मेषु भगवद्दृष्टिर्न विषज्जते तत्र हेतुः सर्वात्मन इति । अन्यस्मिन् हि आसक्तिर्भगवांस्तु सर्व एव आत्मासक्तिः कृत्रिमैव अनेन स्वापराधोऽपि परिहृतः प्रमाणं चाह । सर्वधियां च साक्षिण इति । सर्वबुद्धीनां द्रष्टा अन्तर्बहीरूपत्वं चोक्तं चकारादात्मनः प्राणादीनां च यो हि सर्वात्मा भवति तस्यान्याध्यासो न भवति यो वा सर्वसाक्षी स कर्त्ता न भवति यस्त्वेतादृशः स विषक्तदृष्टिर्न भवति क्वापि अतो भगवति नान्यधर्मसम्बन्धः अन्यधर्माभावाच्च तर्हि कस्यापि न स्यादित्याशङ्क्य यस्याविद्या तस्य भगवतीत्याह । गुणप्रवाह इति । अयं गुणानां प्रवाहः अविद्ययैव देवनृतिर्यगात्मसु त्रिविधेषु सात्त्विकराजसतामसेष्वेव प्रवर्त्तते न तु गुणातीते ब्रह्मणि तेषां तु असकृदेव यावदविद्या न निवर्त्तेत इति ॥ १२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

एवमुक्तलक्षणा योगिकर्मिप्रभृतय उपासकाः सर्व एव त्वां भजन्ति कुत इत्यत आह । सर्व इति । तवैव सर्वदेवमयत्वादीश्वरत्वाच्चेत्यर्थः । ननु केचित् पृष्टाः वयं शिवमर्च्चयामो वयन्तु सूर्यं गणेशमित्याचक्षते तत्राह । येऽपीति । ननु ते कादाचित्कीमपि स्मृतिं मयि न दधते तत्राह । यद्यपीति । अन्येष्वव देवेषु ननु त्वयि धीर्येषां ते ॥ ९ ॥

ननु यदि मामेवार्च्चयन्ति तर्हि ते मामेव प्राप्नुयुः मैवं तेषामर्च्चना एव त्वां प्राप्नुवन्ति ननु ते अर्च्चकाः यदुक्तं त्वयैव "येऽप्यन्यदेवता भक्ता यजन्ते श्रद्धयान्विताः तेऽपि मामेव कौन्तेय यजन्त्यविधिपूर्वकम् । अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च । न तु मामभिजानन्ति तत्त्वेनातश्च्यवन्ति ते । यान्ति देवव्रता देवान् पितॄन् यान्ति पितृव्रताः । भूतानि यान्ति भूतेज्या यान्ति मद्याजिनोऽपि मा,, मित्यतोऽहमपि दृष्टान्तेन तथैव वच्मीत्याह । यथेति । अद्रिभ्यः सकाशात् प्रकर्षेण भवन्तीति ताः अद्रिभिर्जनिता इत्यर्थः । पर्जन्येन मेघेनापूरिता इति अद्रिषु पर्जन्यवृष्टानि जलान्येवेतस्ततः एकीभूय नद्यो भवन्ति ताश्च नद्यः सर्वतः प्रसृत्य अन्ततः सिन्धुं विशन्तीति अद्रिजनिता नद्य एव यथा सिन्धुं प्राप्नुवन्ति ननु नदीजनका अद्रयस्तथैव गतयो गम्यन्ते आभिरिति मार्गभूता अर्चना एव त्वां प्राप्नुवन्ति नत्वर्चकास्ते तवैव सर्वदेवाधिष्ठातृत्वात् अधिष्ठानपूजा अधिष्ठातर्येव पर्यवस्यतीति न्यायात् सर्वदेवपूजापि त्वत्पूजैवेति भावः । अत्र पर्जन्यस्थानीयो वेदः पर्जन्यो हि सिन्धुजलमयत्वात् सिन्धोरुद्भूतः वेदोऽपि त्वत्त उद्भूतस्तदुक्ता नानापूजनविधय एव जलानि तत्राधिकारिण एवाद्रयस्तत्कृता नानादेवेशपूजा एव नानादेशनद्यस्ता नद्यो यथा नानादेशेभ्यः निःसृत्य सिन्धुमेव गच्छन्ति तथैव पूजा अपि देवेभ्यो निःसृत्य विष्णुम् ॥ १० ॥

ननु तर्ह्येवं विविच्य सर्वेऽपि किं मामेव नोपासते तत्राह । सत्त्वमिति । तेषु गुणेषु हि निश्चितं प्राकृता जीवाः प्रोताः प्रथिताः आब्रह्मेति ब्रह्मपर्यन्ता अपि जीवा यदि मायया मोह्यन्ते तर्हि सर्वे मनुजास्त्वां कथं भजन्तामिति भावः ॥ ११ ॥

ते त्वां प्राप्तु तुभ्यं मम नमोऽस्तु तव तु स्वभक्तेभ्योऽन्येषूपासकेषु दृष्टिर्न रज्यतीत्याह । तुभ्यमिति । अविषक्त दृष्टये कथं तर्हि सर्वदेवपूजां त्वं प्राप्नोषीति ब्रूषे यो हि येभ्यः पूजां प्राप्नोति स तेष्वनुरज्यत्येवेत्यत आह । सर्वाधिष्ठातृत्वादेव तत्तत्पूजां प्राप्नोषि ननु तस्यां तत्र काचिदपेक्षास्ति तेऽपि त्वां न पूजयन्ति कुतस्तत्र तेष्वासक्तिरिति भावः । अतः साक्षिण इति साक्षी त्वं सर्वेष्वोदासीन एवेति भावः । ननु तर्हि ते देवा स्वस्वोपासिकांस्तानुद्धरन्तु तत्राह । गुणेति असकृत् निरन्तरं देवनृतियैश्च आत्मानो येषां तेषु देवादिशरीराभिमानिष्वित्यर्थः । तत्तदुपास्या देवा अपि स्वयं गुणप्रवाहपतिताः कथं स्वोपासकांस्तानुद्धरन्त्विति भावः ॥ १२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

एवमन्येऽपि येऽन्यदेवताभक्ताः यद्यप्यन्याधियः अन्येषु त्वदन्यतया अब्रह्मात्मकतया स्वस्वमनीषया अयमेवेश्वरः अयमेवेश्वर इत्येवं कल्पितेषु धीर्येषां ते तथाभूताः अपि वस्तुतस्तेषामब्रह्मात्मकत्वाभावात्तद्द्वारा तदुपासना ब्रह्मणि सर्वात्मनि श्रीकृष्णे त्वय्येव पर्य्यवसन्ना भवत्यतस्त्वामेव सर्वे यजन्तीत्यर्थः । तदुक्तं श्रीमुखेनैव । ये ऽप्यन्यदेवता भक्ताः यजन्ते श्रद्धयान्विताः । तेऽपि मामेव कौन्तेय ! यजन्त्यविधिपूर्वक" मिति । यद्यप्यन्याधिय इति बुद्धिमात्रभेदो न वस्तुभेद इति तद्युक्तमेव । एवमवस्तुस्वीकारे । उपास्योपासकबुद्धिबोद्धव्यादिभेदासम्भवात् ॥ ९ ॥

यतः सर्वे मार्गाः सर्वात्मनि त्वय्येव पर्य्यवस्यन्तीति सदृष्टान्तमाह । यथेति । प्रभवन्ति यस्मात्स प्रभवः अद्रिः प्रभवो यासां ताः । नद्यः स्वाभाविकाः पर्जन्येन पूरिताः क्षुद्रनद्यश्च सर्वतः सिन्धुं विशन्ति यथा तद्वद्वेदाद्रिप्रभवाः गतयः मार्गाः अन्यप्रवर्तिताश्च । अन्ततः सिद्धान्ततः त्वामेव विशन्ति । ॥ १० ॥

ननु "सर्वे वेदा यत्पदमामनन्ति वेदैश्च सर्वैरहमेव वेद्य" इति श्रुतिस्मृतिभ्यां वेदोक्ता गतिस्तु एकैव तत्र गतिबाहुल्ये किं निमित्तमित्यत्र त्वन्मायागुणबद्धा जीवा एवेत्याह । सत्त्वमिति । तेषु प्रोताः अतः स्वस्वमनीषया वेदादेव केचित्सात्त्विकराजसतामसरूपाः गतीः प्रवर्तयन्ति केचित्तु वेदनैरपेक्ष्येण प्रवर्तयन्तीति भावः ॥ ११ ॥

सर्वा गतयस्त्वां विशन्तीत्युक्तं तत्र सात्त्विकीगतिफलं देवभावं राजसीगतिफलं नृभावं तामसीगतिफलं तिर्य्यग्भावं त्वमेव ददासि अहन्तु त्वद्दासः अतो मां स्वचरणसङ्गं देहीत्यभिप्रायेण नमस्करोति । तुभ्यं नमोऽस्तु । कथम्भूताय यस्माद्धेतुभूतात् ते त्वत्तः देवादयः आत्मानः स्वस्वकर्मफलभूताः देहा येषां तेषु जीवेषु विषयेष्वयं गुणप्रवाहः त्रिगुणकार्य्यभूतः संसारः अविद्यया गुणमय्या प्रकृत्या ऽसकृत् पुनः पुनः प्रवर्तते तस्मै इत्यन्वयः गुणप्रवाहप्रवर्तकत्वेन आसक्तिम्प्राप्ताम्वारयति । अविषक्तदृष्टये इति । तत्र हेतुं दर्शयितुं विशिनष्टि । सर्वात्मने इति । तत्तत्कर्मफलरूपदेवादिदेहप्रापणयोग्यतां दर्शयन् वेदमात्रविषयत्वं

अग्निर्मुखं ते ऽवनिरङ्घ्रिरीक्षणं सूर्यो नभो नाभिरथो दिशः श्रुतिः ।
द्यौः कं सुरेन्द्रास्तव बाहवोऽर्णवाः कुक्षिर्मरुत्प्राणबलं प्रकल्पितम् ॥ १३ ॥
रोमाणि वृक्षौषधयः शिरोरुहा मेघाः परस्यास्थिनखानि तेऽद्रयः ।
निमेषणं रात्र्यहनी प्रजापतिर्मेढ्रस्तु वृष्टिस्तव वीर्यमिष्यते ॥ १४ ॥
त्वय्यव्ययात्मन् ! पुरुषे प्रकल्पिता लोकाः सपाला बहुजीवसङ्कुलाः ।
यथा जले सञ्जिहते जलौकसोऽप्युदुम्बरे वा मशका मनोमये ॥ १५ ॥
यानि यानीह रूपाणि क्रीडनार्थं बिभर्षि हि ।
तैरामृष्टशुचो लोका मुदा गायन्ति ते यशः ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

भगवतो दर्शयति । सर्वधियाञ्च साक्षिणे इति । साक्षिणे साक्षाद्द्रष्ट्रे धीप्रवर्तकायेत्यर्थः ॥ १२ ॥

भाषा टीका ।

जो लोक और देवताओं के भक्त हैं तथा औरों में उन की बुद्धि है तो भी हे प्रभो ! आप सर्वान्तर्यामी हो इसी हेतु से आप सब देवाओं के महेश्वर हो तिस से सब आपही का यजन करते हैं ॥ ९ ॥

हे प्रभो ! जैसे पर्वतों से पैदा होने वाली नदी वर्षा से भरकर सब समुद्रही में जाती हैं तैसेही सब देवतों का पूजन आपको ही कभी अंत में प्राप्त होता है ॥ १० ॥

सत्त्व रजः तमः ए तीन आपकी प्रकृति के गुण हैं उन गुणों से ब्रह्मा से लेकर स्थावर पर्यन्त सब प्राणी बंधे हुये हैं ॥ ११ ॥

सब विषय वासना से रहित दृष्टि वाले सर्वात्म स्वरूप सबकी बुद्धियों के साक्षी आपके अर्थ नमस्कार होवै आपकी त्रिगुणमयी माया का यह प्रवाह है सो देवता मनुष्य तिर्यक् इन जीवों में प्रवृत्त होरहा है ॥ १२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

सर्वात्मन इत्यनेनोक्तं सगुणं स्तौति । अग्निर्मुखमिति त्रिभिः । अग्न्यादीनजुर्ध्वस्वावयवता विधीयते योऽयमग्निः स तु तव मुखमित्यादिवत्तत्रनव्ययस्य ईक्षणं चक्षुः श्रुतिः श्रवणेन्द्रियम् कं मूर्द्धा प्राणश्च बलं च तत् ॥ १३ ॥

अद्रयः परस्य तेऽस्थिनखानि ॥ १४ ॥

न केवलमेतावत्किन्तु सर्वोऽप्ययं प्रपञ्चस्त्वदवयवभूत इत्वेति वदन्नेवं सत्यपि प्रपञ्चस्य बहुजन्मादयो विकारास्त्वयि न प्रसजन्ते तस्य त्वयि कल्पितत्वादित्याह । त्वयीति । अव्ययात्मनि पुरुषे पूर्णे लोकादयः सञ्जिहते प्रचरन्ति हे अव्ययात्मन्निति वा कथं भूते त्वयि मनोमये मनःप्रधाने मनोवृत्तिव्यङ्ग्ये "दृश्यते त्वग्र्यया बुद्ध्या मनसैवानुद्रष्टव्य" इत्यादिश्रुतेः जले यथा जलौकसः सूक्ष्मप्राण्यण्डराशयो यथा चोदुम्बरान्तः केसरेषु मशकाः परस्परवार्त्तानभिज्ञा एवमनन्तानि ब्रह्माण्डानि त्वयि सञ्चरन्तीत्यर्थः ॥ १५ ॥

तस्मादेवं भूतं तव स्वरूपं दुरवगाहमिति त्वदवतारकथामृतमेव सन्तः सेवन्त इत्याह । यानि यानीति । आमृष्टा परिमार्जिता शुक् येषां ते ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

सर्वमयत्वेन सर्वमयेश्वरत्वं दर्शयति । अग्निरिति त्रिभिः । तत्राद्यं युग्मकं मुखं मुखशक्त्यंशाधिष्ठानमित्यर्थः ॥ १३ ॥

एवमन्यदपि अतएवाभेदेनोपासनं विधीयते परस्य तेभ्योऽन्यस्य निजरूपेण पृथग्वर्त्तमानस्येति अभेदेनोक्तेभ्योऽपि भेदो दर्शितः ॥ १४ ॥

तदेवं विराजरूपत्वेन स्तुत्वानन्तब्रह्माण्डकारणमहाहिरण्यगर्भत्वेन स्तौति । त्वयीति । हे अव्ययात्मन् ! सर्वकारणत्वेऽप्यचिन्त्यशक्त्या निर्विकार ! पुरुषे महाहिरण्यगर्भरूपे मनोमये मन आद्यन्तःकरणमयषोडशकले त्वयि लोकाः सपाला बहुजीवसङ्कुलाः सञ्चरन्तीति तत्र लोकाः ब्रह्माण्डानि सञ्चरन्ति यथाक्रमं सृष्टिप्रलयो बहिरन्तर्भवन्ति पालाः ब्रह्मादयः अधिकारानधिकारयोरारोहन्ति पतन्ति च अन्ये जीवाः अत्रामुत्रागतागतं कुर्वन्तीत्यर्थः । तत्र ब्रह्माण्डानां सञ्चरणे दृष्टान्तः यथा जल इति पालादीनामुदुम्बरे वेति उदुम्बरमत्र ब्रह्माण्डस्थानीयम् ॥ १५ ॥

एवम्भूतस्य तत्स्वरूपस्य ज्ञानं दुर्घटं तेन सुखविशेषोऽपि न दृश्यते तदवतारलीलानां दर्शनात् । श्रवणादावपि सर्वेषां सर्वशोकनिवृत्तिः परमानन्दश्च जायते ततस्ते ता एव गायन्तीत्याह । यानीति । तथा च ब्रह्माणोक्तम् । ज्ञाने प्रयासमित्यादि । वीप्सायां सर्वेषामेव रूपाणां शोकमार्जनादिना परमसेव्यत्वमुक्तं रूपाणि बिभर्षीत्यवताराणां सर्वेषां तदीयत्वाभिप्रायेण । लोकाः सर्वे इत्यधिकारापेक्षा निरस्ता । मुदा गायन्तीति तद्गानस्य स्वतः पुरुषार्थता अभिप्रेता । यशः । पूर्वं वक्ष्यमाणसाधारण्येन वैष्णवाना-

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

नुपासनत्वमुक्तम् । तत्र च बहुमूर्त्येकमूर्त्तिकमिति यद्विशिष्य तां मूर्त्तयो नोक्तास्तत्र सन्तोषाभावात् प्रपञ्चयति । यानीति ॥ १६ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

अक्षिणी सूर्य इति चन्द्रस्याप्युपलक्षणं चक्षुषी चन्द्रसूर्याविति श्रुतेः कं शिरः ॥ १२—१४ ॥

मनोमये विशुद्धमनोग्राह्ये त्वयि कल्पिता इत्यन्वयः संजिहते सञ्चरन्ति ॥ १५—२३ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

उक्तञ्चिदचिच्छरीरकत्वमेव प्रपञ्चयितुं विश्वरूपं स्तौति । अग्निरित्यादिना । अत्राग्न्याद्यनुवादेनेश्वरमुखाद्यवयवता विधीयते योऽयमग्निः स तव मुखमित्यादि अवनिस्तवाङ्घ्रिः अवनिशब्दः पातालप्रभृतिमहीतलपर्य्यन्तसङ्ग्राहकः पातालमेतस्य हि पादमूलमित्यादिस्थानप्रामाण्यात् सूर्य ईक्षणं दृष्टिः नभो नाभिः नभशब्दो भुवर्लोकप्रभृतितपोलोकपर्य्यन्तसङ्ग्राहकः नाभिशब्दस्तु तत्प्रभृतीनाम् उरोग्रीवावदनललाटानां दिशस्तव श्रुतिः श्रोत्रं द्यौः सत्यलोकस्तव कं शिरः सुरेशा इन्द्रादयः तव बाहवः अर्णवाः समुद्रास्तव कुक्षिः मरुद्वायुस्तव प्राणश्च बलञ्च तयोः समाहारः तत्कल्पितं रचितं त्वयेति शेषः यद्वा उपासकैरिति शेषः । कल्पितं ध्यातमित्यर्थः ॥ १३ ॥

वृक्षा ओषधयश्च तव रोमाणि मेघास्तु शिरोरुहाः केशाः अद्रयो गिरयः परस्य ते तवास्थीनि नखानि च रात्रिश्च अहश्च ते तव निमेषणं प्रजापतिर्मेढ्रः वृष्टिस्तव वीर्य्यमिष्यते उपासनायामिति शेषः ॥ १४ ॥

न केवलमेतावदेव किन्तु सर्वोऽप्ययं प्रपञ्चस्तवदवयवभूत एवेत्याह । त्वयीति । हे अव्ययात्मन् ! अविकृतस्वरूप विश्वशरीरकत्वेऽपि तद्गतविकारैरस्पृष्टेति सम्बोधनाभिप्रायः बहुभिर्जीवैः सङ्कुला व्याप्ताः पालकैः सहिताः सर्वे लोका मनोमये विशुद्धमनोग्राह्ये परमपुरुषे त्वयि कल्पिताः संजिहते चरन्ति जले यथा जलौकसः सूक्ष्मप्राणिराशयः यथा वा उदुम्बरान्तः केसरेषु मशकाः परस्परवार्त्तानभिज्ञा एवमनन्तानि ब्रह्माण्डानि त्वयि संजिहते चरन्तीत्यर्थः ॥ १५ ॥

तस्मादेवं भूतं तव स्वरूपं दुरवगाहमिति त्वदवतारकथामृतमेव सेवन्त इत्याह । यानि यानीति । त्वं क्रीडनार्थं यानि यानि रूपाणि बिभर्षि तैरनुसंहितैरामृष्टा परिमार्जिता आध्यात्मिकादितापा येषां ते लोका रसज्ञा जना मुदा तव यशो गायन्ति ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

नानादेवताभक्तैः क्रियमाणं यजनादिकं त्वद्विषयं कथं स्यादित्याशङ्क्य तेषां त्वदंशोद्भूतत्वेन त्वत्सम्बन्धित्वादिति भावेन तेषां त्वदङ्गजन्यत्वमाह । अग्निर्मुखमिति । मुखाज्जातोऽग्निस्तव मुखमित्युच्यते मुखादिन्द्रश्चाग्निश्च प्राणाद्वायुरजायतेत्यादावितीदं त्वयैव च प्रकल्पितमहं पश्यामीत्येवं योजनीयं विष्णोरङ्गसमुद्भूता विष्णोरङ्गानि देवता इत्यादेः ईक्षणं नेत्रं कंशिरः पुंसि कः कंशिरोऽम्बुनोरित्यमरः सुरेन्द्राः लोकपालाः अर्णवं वदन्तीति शेषः ॥ १३ ॥

निमेषणं निमेषोन्मेषौ निमिषो मुकुलीभावो रात्रिरुत्फुल्लता अहरुन्मेषः । प्रजापतिर्वृक्षः वीर्यं रेतः ॥ १४ ॥

संजिहते संजायन्ते जलमेवाश्रित्य तिष्ठन्तीति जलौकसः मत्स्यादयः उदुम्बरे जन्तुफले मशकाः पिपीलिकाविशेषाः मनोमये ज्ञानस्वरूपे ॥ १५ ॥

पुरुषसूक्तोक्तभगवन्मूर्तिविशेषं स्तुत्वा मत्स्याद्यवतारान् स्तोतुमुपक्रमते । यानीति । आमृष्टशुचः मार्जितशोकाः परितृप्ताः पूर्वमविद्यमानान्येव रूपाणि बिभर्षि नाविद्यमानानीति इदमर्थं हिशब्दो वक्ति भूतामेव बिभर्तीशो ह्यवतारतनुं सदेत्यादेश्च ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

सर्वमयत्वेन सर्वदेवमयेश्वरत्वं दर्शयति । अग्निरिति त्रिभिः । मुखं मुखशक्त्यंशाधिष्ठानमित्यर्थः । एवमन्यदपि ॥ १३—१६ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

एवं निर्दोषत्वमुक्त्वा माहात्म्यं निरूप्य नमस्कृत्य अवयवानां स्वरूपमाह । अग्निर्मुखमिति । सर्वदेवतात्मको भगवानिति वक्तुं सर्वे अवयवाः देवतात्वेन निरूप्यन्ते योऽग्निः स ते मुखं या अवनिर्भूमिः सा तेऽङ्घ्रिः यः सूर्यः स ते ईक्षणं चक्षुः नभस्त्वाकाशः नाभिः एतानि महाभूतान्यपि भवन्तीति केवलं देवता एवाग्रे निरूप्यन्ते । अथो इति । दिशस्ते श्रुतिः श्रोत्रं द्यौः स्वर्गः ते कं शिरः सुरेन्द्राः ते बाहवः अर्णवाः समुद्राः ते कुक्षिः मरुद्वायुस्ते प्राणः स्थूलरूप एवायं सूक्ष्मरूप इति ज्ञात्वा तथा निरूपयति ननु पुरुषोत्तममेवं जानाति यत्किंचित् प्रकल्पितं लोके कृतिसाध्यं तस्य बलम् ॥ १३ ॥

रोमाणीति । वृक्षौषधयस्ते रोमाणि मेघाः शिरोरुहाः ननु बाधितोऽयमर्थः कथमुच्यत इत्याशङ्क्य सर्वसमाधानार्थं च निरूपयति । परस्य त इति । त्वं परः स्वराट् परब्रह्म वा अद्रयः ते अस्थिनखानि च राज्यहनी तु प्रजापतेः संवत्सरात्मकस्य कालस्य ते निरीक्षणं निमीलनं रात्रिरुन्मीलनमहरिति । प्रजापतिस्ते मेढ्रं गुह्यमिन्द्रियं वृष्टिस्तु तव वीर्यं तुशब्दस्तु केशाङ्कुलौ व्यावर्त्तयति । ननु कथं साध्यसाधनयोर्विरुद्धरूपत्वमित्याशङ्क्य प्रमाणमाह । इष्यत इति । प्रामाणिकानामिदमभिमतं दिवि चलन्तीति मेघानां कोशत्वं वृष्टिः सर्वोत्पत्तिसाधनमिति रेतस्त्वं तस्य चोच्यते ॥ १४ ॥

एवमवयवान् निरूप्य सर्वलोकाधारत्वं निरूपयति । त्वय्यव्ययात्मन्निति । एतेषामाधारत्वेन उपचयापचयावाशङ्क्य पुरुषरूपे त्वयि पातालमेतस्य हि पादमूलमिति न्यायेन अव्ययात्मनि सर्वे लोकाः प्रकल्पिताः विशेषेण रचिताः भगवतो भारमाशङ्क्य दृष्टान्तमाह । यथा जले संजिहते इति जले मत्स्यादिजीवास्तिष्ठन्तीति न तावतापि तस्य कश्चन भारो भवति एवं भगवत्यपि सर्वे लोकाः संजिहते संहतास्तिष्ठन्ति अचेतनस्य दृष्टान्तो विषम इति चेतनमाह । उदुम्बरे वा यथा मशका इति । एकैकस्मिन् फले कोटिशो मशकाः तत्रैवोत्पन्नाः तत्र तिष्ठन्ति एकत्र बहवश्च भवन्ति यथा जलौकसां जलमेव स्थानं तथोदुम्बर एव मशकानामपि एतदपि प्रत्यक्षसिद्धं न भवति

नमः कारणमत्स्याय प्रलयाब्धिचराय च।
हयशीर्ष्णे नमस्तुभ्यं मधुकैटभमृत्यवे ॥ १७ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी।

को वेदोदुम्बरस्य मशकैः क्लेशोऽस्ति नवेति शरीरावयवेषु जीवानां स्थितौ तत्रोत्पन्नानामपि क्लेशो भवतीत्याशङ्क्य दृष्टान्तान्तरमाह। मनोमय इति। मनोरथे यथा जीवा विषयास-क्तमानसः सुखदा एव भवन्ति नतु भारकल्पाः तथा भगवत्यपि सुखार्थमेव कल्पितास्ते लोकास्तिष्ठन्ति नतु भाररूपा भवन्ति ॥ १५ ॥

एवं भगवदवयवानां सर्वाधारत्वं सर्वदेवतारूपत्वं च निरूप्य तादृशस्य महतः लोके जुगुप्सितरूपेणावतरणं न युक्तमि-त्याशङ्क्य अवतारप्रयोजनमाह। यानि यानीति। हे भगवन्नाना-विधक्रीडार्थे जले स्थले अरण्ये सर्वत्र क्रीडार्थे मत्स्यादिरू-पाणि करोषि तावतापि न तेषां रूपाणां लोके निन्दा किन्तु यानि यानि रूपाणि त्वं विभर्षि क्रीडार्थे कृतत्वात्तव नातीवा-ग्रहः तथापि तैः रूपैः आमृष्टशुचः सर्वतो नाशितशोकाः सर्वे एव लोकाः ते यशो मुदा गायन्ति अतो लोकानां गानार्थे तव चरित्रं तेन च सर्वपुरुषार्थसिद्धिः सर्वेषां दुःख-नाशार्थमवताराणि चेत्युक्तं मुदा गायन्तीत्यनेन चरित्राणां स्वतः पुरुषार्थता च निरूपिता ॥ १६ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

किञ्च वैराजरूपस्य तव ते ते देवा अङ्गान्येवातोऽपि तत्त-देवपूजा तवैव पूजेत्याह। अग्निरिति। कं शिरः ॥ १४ ॥

नन्वेवं चेत्तर्हि देवयाजिनोऽपि मद्याजिन एव यान्ति मद्या-जिनोऽपि मामिति मदुक्तेः। कथं ते मां न प्राप्नुवन्ति तत्राह। त्वयि पुरुषे वैराजरूपे लोका भूरादयः प्रकल्पिताः पाला इन्द्रादि-देवास्तत्सहिताः सञ्जिहते प्रचलन्ति वा इवार्थे यथा च उदुम्बर-फले मशकाः सूक्ष्मकीटाः असङ्ख्याः त्वयि कीदृशे मनोमये मन आद्यखिलतत्त्वमये मायिकत्वान्नश्वरे इत्यर्थः। हे अव्ययात्मन्! न व्येति न नश्यति आत्मा देहो यस्य हे सच्चिदानन्दविग्रहेत्यर्थः। तेनानश्वराणि सच्चिदानन्दमयानि रूपाण्येव तव स्वरूपाणि तानि यजन्त एव त्वद्याजिन उच्यन्ते वैराजरूपन्तु तव मायिकं रूपं नश्वरं नतु त्वत्स्वरूपमतस्तदङ्गभूत देवयाजिनो न त्वद्याजिनः अतः साधूक्तं यान्ति देवव्रता देवानित्यादीति द्योतितम् ॥ १५ ॥

ननु तर्हि कानि मम स्वरूपभूतानि रूपाणीत्यत आह। यानीति क्रीडमानि अब्धिसन्तरणमधुकैटभहननादीनि तदर्थं विभर्षि नित्यसिद्धान्येव गृह्णासि गृहीत्वा लोकाम् कृपया दर्शयसीत्यर्थः। अतस्तैराराधितैरामृष्टाः परिमार्जिताः शुचः आनियकशोकमोहा-दयो भक्ता येस्ते ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

सर्वात्मने नम इत्युक्तं तत्प्रपञ्चयति। अग्निरिति द्वाभ्याम्। ईक्षणं चक्षुः श्रुतिः श्रोत्रम् कं शिरः प्राणश्च बलश्चेति समाहारे द्वन्द्वः अद्रयः अस्थिनखानि ते परस्य अप्राकृतविग्रहस्यापि उपासना-विशेषविवक्षया एवंभूतदेहावयवविधातामिति मनोरथप्रदा इति भावः ॥ १३ ॥ १४ ॥

ये हेतवस्ते जगतोऽङ्गभूताः इत्यत्र सर्वजडचेतनयोः शक्त्यंशभू-तयोः विश्वकारणरूपयोरङ्गित्वेन सर्वात्मत्वमुक्तमग्निर्मुखमित्यत्र कार्यरूपयोरङ्गित्वेन सर्वात्मत्वमुक्तमथ जडचेतनात्मकस्य कार्य-कारणरूपस्य कृत्स्नस्य जगतः आधारत्वं भगवतो वर्णयति। हे अव्ययात्मन्! स्वरूपतस्तु जीवोऽपि अव्ययः भवांस्तु देहतोऽप्यव्यय इति सम्बोधनाभिप्रायः त्वयि पुरुषे पूर्णे मनोमये मनःप्रधाने शुद्धेन भक्तमनसा ग्राह्ये दृश्यते "त्वग्र्यया बुद्ध्या मनसैवानुद्र-ष्टव्य" इत्यादिश्रुतेः लोकाः सूक्ष्मस्थूलरूपाः प्रकल्पिताः सम्यक् स्थिताः यथा जले जलौकसः उदुम्बरे मशकाश्च पूर्वमनभिव्यक्ता एवाभिव्यक्ताः सन्तः सञ्जिहते प्रचलन्ति तद्वत् ॥ १५ ॥

तव येन केनाप्यवतारेण सेवितेन संसारशोकरहिताः निर्भयाः सन्तस्तव यशो गायन्तीत्याह। यानीति। तैर्हेतुभूतैः आमृष्टाः परिमार्जिताः शुचो येषां ते लोकाः साधुजनाः ॥ १६ ॥

भाषा टीका।

अग्नि आपका मुख है पृथिवी आपका चरण हैं सूर्य आप का नेत्र है आकाश आपकी नाभि है दिशा सब आपके कर्ण हैं अंतरिक्ष आपका मस्तक हैं देवता आपके बाहु हैं समुद्र आपकी कुक्षि है पवन आपका बल तथा प्राण है ॥ १३ ॥

वृक्ष औषधि आपके रोम हैं मेघ आपके केश हैं पर्वत आपके अस्थि तथा नख हैं रात दिन आपके निमेष हैं प्रजा पति आपका लिंग इन्द्रिय है वृष्टि आपका वीर्य है ॥ १४ ॥

संपूर्ण दिक् पालों के सहित अनेक जीवों के सहित सब लोक अव्ययात्मा पुरुष आप में हीं कल्पित हैं आप मन से जान ने योग्य हो आप केविषै ए सब ऐसे हैं कि जैसे जल में जल जंतु होवैं जैसे गुलर के फल में मशक होवैं ॥ १५ ॥

आप क्रीडाके अर्थ जिन जिन रूपों को धारण करते हो तिन रूपों के चरित्रों से सब लोक सुखी होकर आनंद से आपके यश का गान करते हैं ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

अतः स्वायमप्यवतारानमस्यति। नम इति। हयशीर्ष्णे हयग्रीवाय मधुकैटभयोर्मृत्यवे हन्त्रे ॥ १७ ॥

अकूपाराय बृहते नमो मन्दरधारिणे ।
क्षित्युद्धारविहाराय नमः सूकरमूर्त्तये ॥ १८ ॥
नमस्तेऽद्भुतसिंहाय साधुलोकभयापह ! ।
वामनाय नमस्तुभ्यं क्रान्तत्रिभुवनाय च ॥ १९ ॥
नमो भृगूणां पतये दृप्तक्षत्रवनच्छिदे ।
नमस्ते रघुवर्याय रावणान्तकराय च ॥ २० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अकूपाराय कूर्माय क्षित्युद्धारो विहारो यस्य तस्मै ॥ १८-१९ ॥
भृगूणां पतये परशुरामाय ॥ २० ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

सर्वकारणरूपाय मत्स्यायेति तद्रूपस्य नित्यत्वादिकमभिप्रेतम् । एव कारणत्वमग्रेऽपि ज्ञेयं चकारात् सत्यव्रतोपदेशादिकारणेन । एवमन्येऽपि चकारा योज्याः । तुभ्यमित्यत्र च योज्यम् ॥ १७ ॥
"अकूपारः समुद्रे स्यात् कूर्मराजेऽपि कीर्तित" इति विश्वः । बृहत इति । योजनलक्षविस्तारात् । शूकरस्य मूर्त्तिरिव मूर्त्तिर्यस्येति प्राकृतशूकरत्वं निरस्तम् अप्राकृततदाकारत्वेनैव च सत्संज्ञत्वं विहितम् ॥ १८ ॥
तथा भूतत्वेऽपि हे साधुलोकभयापह ! ॥ १९ ॥
कुठाराद्युधत्वाद्वनरूपकं तेन तेषां तत्र किञ्चिदपि कर्तुमक्षमत्वं व्यञ्जितम् ॥ २० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

कानि तानि रूपाणि यैरासृष्टशुच इत्यत्र कानिचिन्निदर्शयन्नमस्करोति । नम इत्यादिना । कारणमत्स्याय जगत्स्थितिकारणभूताय मत्स्याय कारणपदेनावतारप्रयोजनं सूच्यते एवं मधुकैटभमृत्यवे इत्यनेन एवमुत्तरत्रापि द्रष्टव्यम् ॥ १७ ॥
अकूपाराय कूर्माय क्षित्युद्धार एव विहारो यस्य तस्मा इति प्रयोजनमुच्यते ॥ १८ ॥
हे साधुलोकभयापह ! इति सम्बोधनं प्रयोजनकथनाभिप्रायकं क्रान्तं त्रिभुवनं येन तस्मै इत्यवतारप्रयोजनमुच्यते ॥ १९ ॥
दृप्तं गर्वितं प्रभूतं वा क्षत्रकुलमेव वनं तस्य च्छेत्रे इति प्रयोजनं दुष्टक्षत्रेति च पाठः भृगूणां पतये परशुरामाय रावणस्यान्तं नाशं कृतवानिति तथा तस्मा इति प्रयोजनम् ॥ २० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली

कारणमत्स्याय मन्वादिरक्षणं निमित्तीकृत्य मत्स्यवेषधारिण इत्यर्थः । असुरमदं स्यति नाशयतीति मत्स्यः "षोऽन्तकर्मणीति" धातुः मत्स्यानामुदकमेव परं जीवनमिति सूचनाय प्रलयाब्धिचरत्वमेति प्रलयाब्धिचरणमन्यस्य न शक्यमिति ईश्वरत्वद्योतनाय वा चशब्दो वक्ष्यमाणसमुच्चये वर्तते मधुकैटभमृत्यवे केशवाय ॥ १७ ॥
अकूपाराय कूर्मरूपाय "कूर्मेचाब्धावकूपार" इति बृहते नित्यवृद्धाय किङ्कृत्यमित्यत उक्तं मन्दरेति ॥ १८ ॥
साधुलोकभयापह ! देवजनस्य बल्यादेः प्राप्तभयमपहन्तीति क्रान्तत्रिभुवनाय त्रिविक्रमाय ॥ १९ ॥ २० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

सर्वकारणरूपाय मत्स्याय ॥ १७—२१ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

यद्यप्यनन्तानि रूपाणि तथापि प्रसिद्धानि कानिचिद् गणयन् महत्त्वख्यापनाय सर्वत्र नमस्यति । नमः कारणमत्स्यायेति । मत्स्याय ते तुभ्यं नमः ननु निन्दितो मत्स्यः किमिति भगवान् जात इत्याशङ्क्याह । कारणेति । यदा मत्स्या जाताः तदा बीजत्वेन कश्चिन्मत्स्यः पूर्वसिद्धः कारणत्वेनाङ्गीकर्त्तव्यः अन्यथा मत्स्यानामुत्पत्तिर्न स्यात् उदुम्बरादिषु मांसेषु वा जीवानामुत्पत्तौ कारणभूतरूपस्य तत्र स्थितिरवश्यमङ्गीकर्त्तव्या अन्यथा कारणरूपता भज्येत अनेन जगति यावन्ति रूपाणि भगवतः कारणरूपाणीति नहि भगवतः कस्मिंश्चिद्रूपे गृहीते विगानं भवति कारणार्थं वा प्रलये सत्यव्रतरक्षा वेदोद्धारश्च कार्यं तदर्थं मत्स्य इति तस्मै नमः तदपि रूपमुपास्यमिति प्रलयकालीनो योऽब्धिः तस्मिंश्चरतीति चरित्रं सत्यव्रतरक्षात्मकं वेदोद्धारः रूपद्वयेन कृत इति हयग्रीवरूपं च कृतवानित्याह हयशीर्ष्णे इति । हयस्य शिर एव शिरोभाग एव अङ्गं तु पुरुषरूपमेव हयग्रीवावतारेण कृतं चरित्रमाह । मधुकैटभयोः मृत्युरिति । मधुकैटभौ तेन रूपेण हतवानिति मृत्युत्वात् स्वत एवोत्पन्नयोरपि वधे न कश्चिद्दोषः अत्युपकारित्वात् तस्मै ते तुभ्यं सर्वदा नमोऽस्त्विति प्रार्थयति ॥ १७ ॥
कूर्मं नमस्यति । अकूपारायेति । अकूपाः आनिम्ना आरा रेखा यस्येति कूर्मः योगप्राधान्यात् समुद्रवाचकः कूर्मस्यापि वाचकः अकूपारशब्दः समुद्रादप्यधिक इति जलचरत्वादोषपरिहारार्थमाह । बृहत इति । अतिस्थूलाय चरित्रमाह । मन्दधारिण इति । अमृतमथने मग्नं मन्दरं धृतवानिति क्षित्युद्धारार्थमेव विहारो यस्येति वराहरूपत्वेऽपि न काचित्क्षतिः अत एव रूपात् प्रथमतः चरित्रमुक्तं शूकररूपा मूर्तिर्यस्य ॥ १८ ॥

नमस्ते वासुदेवाय नमः सङ्कर्षणाय च ।
प्रद्युम्नायानिरुद्धाय सात्वतां पतये नमः ॥ २१ ॥
नमो बुद्धाय शुद्धाय दैत्यदानवमोहिने ।
म्लेच्छप्रायक्षत्रहन्त्रे नमस्ते कल्किरूपिणे ॥ २२ ॥
भगवन् ! जीवलोकोऽयं मोहितस्तव मायया ।
अहं ममेत्यसद्ग्राहो भ्राम्यते कर्मवर्त्मसु ॥ २३ ॥
अहं चात्मात्मजागारदारार्थस्वजनादिषु ।
भ्रमामि स्वप्नकल्पेषु मूढः सत्यधिया विभो ! ॥ २४ ॥

श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी ।

नमस्ते इति । अद्भुतसिंहोऽर्धसिंहः अर्द्धे च नरः वचनप्रामाण्यात् स्तम्भाद्वा निर्गमादद्भुतत्वं चरित्रमाह संबोधनेन साधुलोकानां प्रह्लादादीनां भयमपहन्तीति यद्यपि वामनोऽपि नानतारूपं किं तूपेन्द्र एव तथापि कार्यं तेन रूपेण कृतमिति वामनायेत्युक्तं क्रान्तानि त्रिभुवनानि पदक्रमैर्येन चेति बलिबन्धनादिकमपि कृतवान् ॥ १९ ॥

नम इति । भृगूणां पतये भार्गवोत्तमाय परशुरामाय चरित्रमाह । दृप्तं यत् क्षत्रं तदेव दैत्यत्वादतिप्रवृद्धं वनरूपं जातं तत् छिनत्तीति रघुवर्यः रघुवंशोत्पन्नेषु श्रेष्ठो रामचन्द्रः चरित्रमाह । रावणस्य अन्तकरायेति चकारादन्यदप्यनन्तमेव चरित्रं गृह्यते ॥ २० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

तान्येव कानीत्याकाङ्क्षायामाह । नम इति षड्भिः । सर्वकारणरूपायेति । तद्रूपस्य नित्यत्वादिकमभिप्रेतम् । एवं कारणत्वमग्रेऽपि ज्ञेयम्, प्रलयाब्धिचरायेति तत्रेतस्ततश्चलनमेव क्रीडनम् । एवमग्रे मधुकैटभहननादीन्येव क्रीडनानि ज्ञेयानि । अकूपाराय कूर्माय । "अकूपारः समुद्रे स्यात् कूर्मराजेऽपि कीर्त्तित" इति विश्वः ॥ १७–२१ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अतः व्यूहाङ्गिवासुदेवसहितान् कांश्चिदवतारान्स्वयमपि नमस्यति । नम इति षड्भिः ॥ १७ ॥
अकूपाराय कूर्माय ॥ १८—२२ ॥

भाषा टीका ।

सबके कारण होकर मत्स्य रूप धारण कर प्रलय समुद्र में विचरने वाले तथा हयग्रीव अवतार से मधुकैटभदैत्यों को मारने वाले आपके अर्थ नमस्कार है ॥ १७ ॥

बड़े भारी कूर्मावतार से मंदर पर्वत धारण करने वाले तथा पृथिवी के उद्धार से विहार करने वाले वाराह मूर्ति आपको नमस्कार है ॥ १८ ॥

साधु लोकों के भय नाश करने वाले अद्भुत नृसिंहावतार आपके अर्थ नमस्कार है तीनों भुवन को आक्रमण करने वाले वामनावतार आपके अर्थ नमस्कार है ॥ १९ ॥

गर्वित क्षत्रिय रूप वन के नाश करने वाले भृगुपति परशुराम अवतार आपके अर्थ नमस्कार है रावण के नाश करने वाले रघुवर श्रीरामचंद्र रूप आपके अर्थ नमस्कार है ॥ २० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

चतुर्व्यूहरूपेण प्रणमति । नमस्ते वासुदेवायेति ॥ २१–२२ ॥

एवं स्तुत्वा बन्धमोक्षं प्रार्थयितुमाह । भगवन्निति । असति देहादौ ग्राह आग्रहो यस्य सः असन् ग्राहो यस्येति वा ॥ २३ ॥

न केवलमयं लोकोऽहमपि तथैवेत्याह । अहञ्चेति ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

नमस्त इति । तैर्व्याख्यातं तत्र सङ्कर्षणमित्यादेरयमर्थः । क्रमप्राप्तस्तावदत्र श्रीबलराम इति सङ्कर्षणशब्देन स एवोच्यते स च श्रीकृष्णलक्षणवासुदेवादिचतुर्व्यूहान्तःपाती ततस्तदन्तःपातितयैव तं प्रणमन् तान् सर्वानेव प्रणमतीति तात्पर्यादावेषां नित्यत्वश्रवणात्तदानीमनाविर्भूतयोरपि प्रद्युम्नादिकयोर्नमस्कारस्तां श्रुतिं प्रमाणयति । सात्वतां पतय इति । सर्वेषामेव विशेषणम्, सङ्ख्यानामपि स्तुत्यर्थं तृतीयनमःशब्दः प्रद्युम्नेऽपि योज्यः ॥ २१ ॥

शुद्धाय वेदविरुद्धशास्त्रप्रवर्तकत्वेऽपि निर्दोषायैव । तत्र हेतुः दैत्येति । म्लेच्छा एव प्रायेण साद‍ृश्येन क्षत्राणि क्षत्रियाः राज्यकारित्वात्तत्तुल्या इत्यर्थः । तेषां हन्त्रे कल्को दम्भः म्लेच्छवेशित्वेन सोऽस्यास्तीति तादृशं रूपं यस्य तन्नाम्ने ॥ २२ ॥

एवं त्वया लोकोद्धारार्थमवतारेषु कृतेष्वपि ये महापराधसंस्कारवन्तस्ते तु त्वन्मायया मोहितास्त्वद्भक्तिं विहायान्यत्र प्रवर्तन्ते इति शोचन्नाह । भगवन्निति । हे मायातिरस्कारषड्गुणैश्वर्य ! इति निवेदने हेतुरयं कर्ममार्गेष्वेव भ्राम्यते मुहुर्भ्रान्त्या प्रवर्त्यते न तु त्वद्भक्तावित्यर्थः ॥ २३ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

त्वद्भक्तौ प्रवृत्तोऽहं नूनं तादृगपराधिसङ्गदोषात् पुनर्लब्धच्छिद्रया त्वन्माययावरणाद्गृहादावासक्तिं हातुं न शक्नोमीत्याह । अहं चेति । अप्यर्थे चकारः आत्मा देहः ॥ २४ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

अहं चात्मेति । आत्मशब्दः शरीरवाची । स्वप्नकल्पेषु अनित्येषु नित्यबुद्ध्या आत्मव्यतिरिक्तदेहादावात्मबुद्ध्या च विपर्यस्तमितिः ॥ २४—२७ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

रामकृष्णौ विभवौ वासुदेवसङ्कर्षणौ व्यूहौ च तन्त्रेणाभिप्रेत्य नमस्करोति । नमस्ते वासुदेवायेत्यर्द्धेन । प्रद्युम्नानिरुद्धौ व्यूहौ नमस्करोति प्रद्युम्नायानिरुद्धायेति सर्वेषां प्रयोजनाभिप्रायेण विशिनष्टि । सात्वताम्पतये नमः साधुपरित्रात्रे इत्यर्थः । यद्वा वासुदेवायेत्यादिभिश्चतुर्भिर्व्यूहचतुष्टयं नमस्क्रियते सात्वताम्पतय इत्यनेन रामकृष्णनमस्कृतिः तेनैव प्रयोजनं चाभिप्रेतम् ॥ २१ ॥

वेदाप्रामाण्याद्युपदेष्टृत्वेऽपि शुद्धाय विशुद्धकर्मणे तस्य दुष्कृन्निरसनार्थत्वादित्यभिप्रेत्य प्रयोजनञ्च वदन् विशिनष्टि । दैत्यदानवमोहिन इति । दैत्यान् दानवांश्च मोहयतीति तथा म्लेच्छप्रायं म्लेच्छतुल्यं यत्क्षत्रकुलं तस्य हन्त्रे इति प्रयोजनमुक्तम् ॥ २२ ॥

एवं स्तुत्वा बन्धमोक्षं प्रार्थयितुमाह । भगवन्निति । हे भगवन् सर्वोजनस्तव मायया मोहित अतएवानात्मन्यात्माभिमानरूपाद् स्वस्मिन् स्वत्वाभिमानरूपाच्चासतो दृष्टानर्थकराद्ग्राहाद्भ्रमात्मकज्ञानात् कर्मवर्त्मसु कर्ममार्गेषु शब्दादिविषयसाधनभूतेषु भ्राम्यते यद्वा असद्ग्राह इति । अहंममेत्यसति प्रकृतिपरिणामरूपे देहतदनुबन्ध्यादौ आग्रहः असदाग्रहः ग्राहः अभिनिवेशो यस्य तथाभूत इत्यर्थः ॥ २३ ॥

भ्राम्यत्वेवं लोकस्तव किं तत्राह । अहञ्चेति । अहमित्यादिभिश्चतुर्भिस्तावदात्मनः कार्पण्यमावेद्य सोऽहमित्येकेन प्रपद्य शरण्यगुणाविष्कारपूर्वकं गोप्ता भवेति प्रार्थयते यथा सर्वलोकस्तथा तदन्तर्गतोऽहमपि गेहापत्यादिषु स्वप्नवदर्थतुल्येषु अनित्येष्वित्यर्थः । सत्यधिया नित्यबुद्ध्या भ्रमामि अतोऽहं मूढः ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

सङ्कर्षणादिषु हरेः संनिधानविशेषात्तेषामवतारान्तर्भावं कृत्वा नमनं क्रियते नतु साक्षादधोक्षजावतारत्वेन तदुक्तम्—

प्रद्युम्ने चानिरुद्धे च बलदेवे च केशव इत्यादौ ॥ २१ ॥

बुद्धावतारप्रयोजनं दैत्यमोहनमेव नान्यदिति द्योतयति । दैत्येत्यादिना ॥ २२ ॥ २३ ॥

आत्मा देहः आत्मजः पुत्रः अर्थो हिरण्यादिः स्वजनो बन्धुजनादिः भ्रमामि भ्रान्तिं करोमि ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

म्लेच्छा एव प्रायेण सादृश्येन क्षत्राणि क्षत्रियाः राज्यकारित्वात्तत्तुल्या इत्यर्थः तेषां हन्त्रे ॥ २२—२६ ॥

श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी ।

भगवांश्चतुर्मूर्त्तिरवतीर्ण इति भगवतः कृष्णस्यावतारे विशेषमाह । नमस्ते वासुदेवायेति । अत्रादिमध्यावसानेषु नमनं सङ्कर्षणे आवेशमपि भगवान्करोतीति तदपि रूपं चकारेण परिगृहीतं चरित्रमाह । सात्वताम्पतय इति । समस्तभक्तानां पतये सर्वथा रक्षकाय प्रार्थनाव्यतिरेकेणापि स्वकीयानां सर्वपुरुषार्थामेवावतार इत्यर्थः ॥ २१ ॥

अग्रे जायमानमाह । नमो बुद्धायेति । आर्षज्ञानेन यथा यथा पश्यति तथा तथा निरूपयति भगवान् वा तं प्रति तथा तथा आत्मानं प्रदर्शयति बुद्धो वेदादिनिन्दया विसदृशो भविष्यति इत्याशङ्क्याह । शुद्धायेति । सर्वदोषरहिताय तर्हि किमर्थं तथोक्तवानित्याशङ्कां परिहरन् चरित्रमाह । दैत्यान्दानवांश्च मोहयतीति दैत्यदानवानां यो मोहः सोऽस्य वर्त्तत इति अयं चेन्न प्रकटीकुर्यात् तदा मोहो न भवेदिति मत्वर्थीय इन् प्रत्ययः कल्किं नमस्यति । म्लेच्छक्षत्रेति क्षत्रं रक्षकत्वेन स्थितं हन्तीति क्षत्रघ्नः क्षत्रहन्ता तदा क्षत्रिया म्लेच्छरूपा इति म्लेच्छप्रायेत्युक्तं द्वयं भिन्नतया निरूपितवान् गुणदोषयोर्विपरीतत्वबोधनाय म्लेच्छा ये सहजदैत्याः ते गुणवन्तोऽपि हन्तव्याः क्षत्रियास्तु दोषवन्त एवेति एवं प्रयोजनमुक्त्वा पश्चात्स्वरूपमाह कल्कस्येव निष्पीडितरसस्य चतुर्युगात्मकस्य कालस्य स्वरूपमस्मिन् वर्त्तत इति कल्किनि केवलं तस्यैव रूपं स्वस्मिन्प्रतिबिम्बितं प्रतीयते किं तु अस्यापि पृथग्रूपवत्वमुक्तम् ॥ २२ ॥

कियन्ति रूपाणि भगवतो नत्वा किञ्चित्प्रार्थयितुं सर्वेषामेव साधारणं दुःखं निवेदयति । भगवन्निति । एतादृशेऽपि त्वयि सर्वदा जागरूके लोकाः त्वन्मायया मोहिता इति दुःखं प्राप्नुवन्ति अन्यथा कथं दुःखं स्यात् भगवन्निति सम्बोधनं सर्वसामर्थ्याय अयं सर्वोऽपि परिदृश्यमानो जीवलोकः तवैव मायया अनुल्लङ्घ्यया मोहितः अन्यथा अहं ममेति दुष्टे देहादौ ग्राहः आग्रहो यस्य तादृशः कथं भवेत् अत एव कर्ममार्गेषु उच्चावचेषु श्वयोन्यादिषु भ्राम्यते पुनः परिभ्रमति यदि मायया मोहितो न स्यात् तदा सकृत् क्लेशं प्राप्य पुनरहंममाभिमानं न कुर्यात् ॥ २३ ॥

तर्हि तव किमित्याकाङ्क्षायामाह । अहं चेति यथा अन्ये मोहिताः अहम् अहमपि मोहितः किं च मयि विशेषोऽप्यस्तीत्याह । आत्मात्मजेति । आत्मा देहः आत्मजाः पुत्राः अगारं गृहं दाराः स्त्रियः अर्थो धनं स्वजनाः बान्धवाः तेषु सर्वेष्वेव सकृदवगतवैषम्योऽपि पुनर्भ्रमामि न वा एते स्वरूपतः सन्ति नापि कार्त्स्न्येनाभिव्यक्ताः अन्यथा तेषां कार्यम् आपाततोऽपि प्रकटं स्यात् यतोऽहं स्वप्नकल्पेष्वपि भ्रमामि न केवलमहन्तामतामात्रमपि अतो मूढः सर्वापेक्षयापि किंच न केवलं भ्रममात्रं किं तु तेषु सत्यबुद्धिरपि जायते येन विचारेऽपि अन्यथा बाधेऽपि

अनित्यानात्मदुःखेषु विपर्ययमतिर्ह्यहम् ।
द्वन्द्वारामस्तमोविष्टो न जाने त्वात्मनः प्रियम् ॥ २५ ॥
यथाबुधो जलं हित्वा प्रतिच्छन्नं तदुद्भवैः ।
अभ्येति मृगतृष्णां वै तद्वत्त्वाहं पराङ्मुखः ॥ २६ ॥
नोत्सहेऽहं कृपणधीः कामकर्महतं मनः ।
रोद्धुं प्रमाथिभिश्चाक्षैर्ह्रियमाणमितस्ततः ॥ २७ ॥
सोऽहं तवाङ्घ्र्युपगतोऽस्म्यसतां दुरापं तच्चाप्यहं भवदनुग्रह ईश ! मन्ये ।
पुंसो भवेद्यर्हि संसरणापवर्गस्त्वय्यब्जनाभ ! सदुपासनया मतिः स्यात् ॥ २८ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

भ्रमो निवर्त्तते प्रभो ! इति सम्बोधनं त्वं सर्वसमर्थः एतादृशमप्यसाध्यं साधयिष्यसीति ॥ २४ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

शुद्धाय वेदविरुद्धशास्त्रप्रवर्त्तकत्वेऽपि निर्दोषाय ॥ २२ ॥

एवं स्तुत्वा दुःखं विज्ञापयति । भगवन्निति । भ्राम्यते माययैव ॥ २३—२४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अथानादिमायामोहितत्वात्संसारगर्त्ते पतितः स्वयमात्मविमोक्षणेऽसमर्थस्त्वच्चरणं शरणं गतोऽस्मीत्याह । भगवन्नितिषड्भिः । असतोरनित्ययोर्देहगेहयोरहमिति ममेति च ग्राह आग्रहो यस्य सः ॥२३॥

तथैवाहं च स्वप्नकल्पेषु स्वप्नवदनित्येषु सत्यधिया नित्यबुद्ध्या ॥ २४ ॥

भाषा टीका ।

वासुदेव सङ्कर्षण प्रद्युम्न अनिरुद्ध सात्वतों के पति आपके अर्थ नमस्कार है ॥ २१ ॥

शुद्ध स्वरूप तथा दैत्य दानवों के मोहने वाले बुद्धावतार आपके अर्थ नमस्कार है और म्लेच्छ सरीके क्षत्रियों के मारने वाले कल्कि रूप आपके अर्थ नमस्कार है ॥ २२ ॥

हे भगवन् ! यह लोक आपकी माया से मोहित है सो मैं हूं मेरा है इस असत् बुद्धि को ग्रहण करके कर्म के मार्गों में घूमता रहता है ॥ २३ ॥

हे विभो ! मैं भी पुत्र घर भार्या धन स्वजनादिकों में जो कि स्वप्न के तुल्य अचिर स्थायी हैं तिन में मूर्ख होने से सत्यबुद्धि से भ्रमि रहा हूं ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

मूढत्वमेव प्रकटयति । विपर्ययमतिरिति । अनित्ये कर्मफले नित्यमित्यनात्मनि देहे आत्मेति दुःखरूपे गृहादौ सुखमिति विपरीतमतिरित्यर्थः द्वन्द्वेषु सुखदुःखादिष्वारमति क्रीडतीति तथा सः दुःखे कुतो रतिस्तत्राह । तमोविष्टस्तमसा व्याप्तोऽत आत्मनः प्रियं प्रेमास्पदं त्वा त्वां न जाने इत्यर्थः ॥ २५ ॥

तदेव सदृष्टान्तमाह । यथेति । तस्माज्जलादुद्भवन्तीति तदुद्भवानि तृणादीनि तैः तथा मायाच्छन्नं त्वा त्वामहं हित्वा पराङ्मुखो देहाभिमुखो वर्त इति ॥ २६ ॥

नन्वेवं जानतः कुतो विषयाभिमुखता तत्राह । नोत्सह इति । कृपणा विषयवासनायुक्ता धीर्यस्य सः अत एव कामकर्मभ्यां हतं क्षुभितमिन्द्रियैश्च बलिभिर्विषयसंयुक्तैरितस्ततः आकृष्यमाणं मनो रोद्धुं नियन्तुं न शक्नोमीति ॥ २७ ॥

तदेवमस्वतन्त्रो यः सोऽहं तवाङ्घ्रिमुपगतः शरणं प्राप्तः नन्विन्द्रियपरतन्त्रस्यैतदपि कुतस्तत्राह । तच्चापीति । हे ईश ! अन्तर्यामिस्त्वदङ्घ्र्युपगमनं चासतां दुरापमतो भवतोऽनुग्रह एवेत्यहं मन्ये अनुग्रहे सतीति वा ननु सतां सेवयेदं भवतीति किं मदनुग्रहेणेत्यत आह । पुंस इति । जीवस्य संसारस्यापवर्गः समाप्तिर्यदा त्वत्कृपया भवेत्सम्भावनास्पदं भवति हे अब्जनाभ ! तदा सदुपासना सम्पद्यते तयैव त्वयि मतिर्भवेत् त्वत्कृपां विना न सत्सेवा नतरां त्वन्मतिर्नितरां मुक्तिरित्यर्थः ॥ २८ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

अनित्यादिषु विपरीतबुद्धिः सन् द्वन्द्वारामः हि निश्चितं त्वा त्वामात्मन एव साक्षात्प्रियं परमात्मत्वात् न तु पुत्रादिवद्देहादिसम्बन्धेनेत्यर्थः । इति देहादिभ्योऽपि प्रियतमत्वेन ज्ञानयोग्यतोक्ता तथापि न जाने नानुभवामि ॥ २५ ॥

अबुधः अविवेकी तदुद्भवैः सरसशैवालादिभिरिति सुक्षेयत्वमपि सूचितं दार्ष्टान्तिकेऽपि तत्तत्प्रभावमाधुर्यस्य युक्तत्वेन अभ्येति दूरतो याति वै प्रसिद्धौ हित्वाहं त्वामित्येव पाठः तथेति टीकातः तद्वत्त्वाहमिति पाठे तु सिद्धे त्वा त्वां हित्वेत्यन्वयः तथेति टीका तु तद्वदित्यस्य मन्तव्या ॥ २६ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

कामः पूर्ववासना तत्प्रेरितेन कर्मणा हृतं ततोऽप्यैहिकविषयाणां संयुक्तत्वात्प्रमाथिभिः ॥ २७ ॥

अस्मीति शरणागतत्वस्य दार्ढ्यं नित्यत्वं चाभिप्रैति असतामिन्द्रियपरतन्त्राणां हे ईशेति अन्तर्यामितयाधुना त्वमेव तत्र तत्प्रेरणादित्यर्थः । अयमनुग्रहे हेतुः अब्जनाभेति लोकानुग्रहेणैव लोकपद्मं निजनाभौ वहसीति भावः । अन्यत्रैः तत्र सदुपासना तद्भक्तानां सेवा संपद्यते सङ्गीभवति त्वन्मतिस्त्वज्ज्ञानं मुक्तिः सैकेनानुषङ्गिकी सापि न तमां किमुत स्वयं भक्तिरित्यर्थः इति शेषः यद्वा त्वज्ज्ञानं तु मम परमदूरतममित्याह । पुंस इति । अथवा स तथाविधोऽप्यहमङ्घ्रत्यत्र सुपां सुलुगित्यादिना अमो लुक् असतां तथाविधानां मादृशां दुरापं तवाङ्घ्रिं यदुपगतोऽस्मि समीपे प्राप्तवानस्मि तच्चाप्यहमित्यादि अत्र पुनरहंशब्दः कंचिन्निजभजनादिकं कारणं वदन्तु अहं तु त्वदनुग्रहमेवेति व्यनक्ति अहो अस्तु तावत्त्वदङ्घ्रिसमीपप्राप्तिरन्यथा त्वयि मतिरपि दुरापेत्याह । पुंस इति । चिरेण यर्हि चिरेण सत्या उत्तमया उपासनया त्वदाराधनेन सतां चोपासनया संसारापवर्गस्तन्नाशनाक्षयः स्यात्तदैव तया त्वयि मतिर्भक्तिः स्यान्नान्यदेति ॥ २८ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

संसरणं संसारः संसारवासना हेतुभूता त्वयि त्वद्विषया मतिः न यद्वा यदा मतिः स्यात् तदा संसारापवर्ग इत्यर्थः ॥ २९ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

मूढत्वमेवाविष्करोति । अनित्येति । अहमनित्यानात्मदुःखेषु विपर्ययस्ता मतिर्यस्य सः अनित्येषु वस्तुषु नित्यमतिमान् अनात्मनि देहे आत्माभिमानवान् अन्ततो दुःखात्मकेषु शब्दादिविषयेषु सुखाभिमानी चेत्यर्थः । द्वन्द्वेषु सुखदुःखादिषु आरमामीति क्रीडतीति तथा सः वैषयिकसुखानुबन्धितया प्राप्तं दुःखमपि सुखवन्मन्यमान इत्यभिप्रायः तत्र हेतुः तमसा गुणेन व्याप्तः आत्मनः प्रियं न जाने निरतिशयनित्यनिरुपाधिकप्रीतिविषयं त्वां न जानामीत्यर्थः ॥ २५ ॥

उक्तमेव सदृष्टान्तमाह । यथेति । तस्मात् जलादुद्भवन्तीति तथा तैस्तृणादिभिश्छन्नं जलं हित्वा अत एवाबुधो मृगतृष्णां जलवदवभासमानां मरीचिकामभ्येति तथाहमपि त्वां निरतिशयपुरुषार्थभूतं तत्साधनभूतञ्च त्वां त्यक्त्वा पराङ्मुखः देहाद्यभिमुखो वर्त्ते इत्यर्थः ॥ २६ ॥

नन्वेवं जानतः कुतस्तव विषयाभिमुख्यं तत्राह । कृपणा विषयवासनायुक्ता धीर्यस्य सः अत एवान्तः कामकर्मभ्यां हृतं क्षुभितामिन्द्रियैः प्रमाथिभिर्विषयसंयुक्तैरितस्ततः आकृष्यमाणं मनो रोद्धुं नियन्तुं नोत्सहे न शक्नोमि ॥ २७ ॥

तदेवं विषयपरवशः साधनान्तररहितोऽहमाङ्घ्रिमुपगतः तवाङ्घ्र्यभ्युपगतः शरणं प्राप्तः कथम्भूतमङ्घ्रिम् असतां दुरापं दुष्प्रापं सापेक्षस्याङ्घ्रिशब्दस्याप्यत्र समास आर्षः नन्विन्द्रियपरवशस्यैतदपि कुतस्तत्राह । तच्चापीति । तदङ्घ्र्यभ्युपगमनं भवदनुग्रहं श्रीभगवदनुग्रं त्वदनुग्रहमूलकं मन्ये अन्तरात्मतया अनुजिघृक्षोस्तवानुग्रहकारितं मन्य इत्यभिप्रायेण सम्बोधयति अनेन शरणवरणे स्वस्वातन्त्र्यनिवृत्तिः सूचिता ननु प्रापित्सा सत्सेवामूलिका ननु मदनुग्रहमूलिकेत्यत्राह । यदा पुंसः संसारिणः संसरणस्यापवर्गः समाप्तिर्यस्मात्स अनुग्रह इति विशेष्याध्याहारः तथाभूतस्त्वदनुग्रहो भवेत्तदा हे अब्जनाभ ! सतामुपासनया त्वयि मतिः स्यात्प्रापित्सात्मिका मतिः स्यादित्यर्थः । ईश्वरस्य च सौहार्दं यदृच्छासुकृतं तदा विष्णोः कटाक्षः इत्याद्युक्तरीत्या सत्सङ्गादिप्रणाड्यामपि त्वदनुग्रह एव निदानमिति भावः ॥ २८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अनित्यानात्मदुःखेषु विपर्ययमतिः । अनित्येषु नित्यबुद्धिः अनात्मन्यात्मबुद्धिः ॥ २५ ॥

तदुद्भवैः जलोद्भवैः शैवालादिभिः अबुधः मृगतृष्णां मृग्यन्त इति मृगा विषयास्तत्तृष्णाश्च ॥ २६ ॥

मनो रोद्धुं नोत्सहे ॥ २७ ॥

तथापि प्रयत इत्याशयेनाह । सोऽहमिति । यः मनःसाधनकरणाशक्तः सोऽहं यच्च तवाङ्घ्र्यपगमनञ्च अपिशब्द एवार्थे स्वपदप्राप्तौ निमित्तं ध्वनयति । पुंस इति । यर्हि यदा संसरणात्संसारादपवर्गो मोक्षो भवेत् कस्य पुंसस्तदाह । हे अब्जनाभ ! सतां पुरुषाणामुपासनया सेवया हेतुना त्वयि मतिः मननबुद्धिः अन्तरतरत्यर्थः ॥ २८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

कामेन भोगेच्छया क्वचित् कर्मणा केवलप्रारब्धाख्येनापि ॥ २७ ॥

सोऽहमिति । तथाविधकृपणधीरप्यहं ननु सन्मतिं विना मदनुग्रहोऽपि कथं स्यात्तत्राह । पुंस इति । पुंसः यर्हि संसाराणामपवर्गः स्यात् सर्वक्षैर्भावित्वेन सम्भाव्यते तर्हि सदुपासनया त्वयि मतिः स्यादित्यर्थः । भवापवर्गो भ्रमतो यदा भवेदित्यादेः तस्मादत्र ममापि सदुपासनैव निदानमिति भावः ॥ २८--३० ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

ननु शास्त्राद्विवेके उत्पन्ने संसारस्यासारतां ज्ञात्वा स्वयमेव सर्वं त्यक्ष्यसि किं मया कर्तव्यमित्याशङ्कायामाह । अनित्येति । शास्त्रमप्युल्लङ्घ्य मम बुद्धिर्विपरीता जाता अनित्ये सर्वत्र नित्यबुद्धिः देहे दैहिके च अनात्मनि आत्मबाधके आत्मबुद्धिः देहादावेव दुःखे विण्मूत्रपूयास्थितौ सुखबुद्धिः अतो ज्ञातमपि शास्त्रं नानुभवं बाधते अतो द्वन्द्वेष्वेव सुखदुःखादिषु रागद्वेषादिषु वा आरामो यस्य तादृशो जातः ननु कथमेवं भ्रमस्तत्राह । तमो-

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

विष्ट इति । तमो महामोहः अज्ञानमेव वा तस्यास्य निवृत्तिः कदेत्याशङ्कायां त्वयि ज्ञाते प्रकाशो भवतीति निश्चित्य त्वज्ज्ञानमेव चक्षुषि विद्यमानतमसा न जायत इत्याह । न जाने इति न हि स्वप्रकाशमपि सूर्यमन्धः पश्यति तथा त्वामपि आत्मनामपि प्रियं परमानन्ददातारं सुगममपि प्रत्यक्षसिद्धमपि तथात्वेन न जाने आत्मनः परमिति वा नियन्तारम् ॥ २५ ॥

ननु श्रुत्यनुभवौ परित्यज्य युक्तिमान् विवेकी कथं न जानातीत्याशङ्क्य दृष्टान्तेन स्पष्टयति । यथेति । अबुधो मूर्खः जलार्थी सन् जलाशयोपरि तिष्ठन् कमलपत्रादिभिः आच्छन्नं जलं कमलपत्रादिसमूहमेव ज्ञात्वा तद्दूरीकृत्य मध्यस्थितं जलमगृहीत्वा दूरे मरीचिकाजलं पश्यन् तदर्थमभिधावति तद्वदेवान्तः स्थितं भगवन्तम् अहङ्कारादिभिस्तद्गुणैराच्छन्नं तद्दूरीकृत्य परमानन्दमननुभूय दुःखात्मके बहिर्विषये अभिधावति तद्वदहं त्वां हित्वा विषयसुखार्थं गच्छामि अत्र हेतुमाह । पराङ्मुख इति । पराक् बहिरेव मुखं यस्येति मुखमत्र प्रवृत्तिस्वभाव आत्मा तस्य प्रतिनिधिरूपमिदं मुखं यदभिमुखस्तदेव च करोति अत्र शास्त्रादिद्वारा यदा अन्तर्मुखो भवति तदैव निकटे भगवन्तं प्राप्नोति बहिर्जलप्राप्तिस्तु भगवदिच्छया प्रलय इव सर्वत्र भगवदभिव्यक्तौ यथैवायं प्रदर्शयति तथैव स मन्यत इति स्वयमपि तथैव तत्प्रत्यभिव्यक्त इति न काप्यनुपपत्तिः ॥ २६ ॥

ननु ज्ञाते विवेके कथं मोह इति चेत्तत्राह । नोत्सहेऽहमिति । मनो हि द्विः स्वभावं क्रियाशक्तियुक्तं ज्ञानशक्तियुक्तं च । यथा विवेकेन शास्त्रेण च ज्ञानशक्तिरुत्पाद्यते । एवं योगेन क्रियाशक्तिरपि चेदुत्पाद्येत तदैकमुखं मनो भवति अन्यथा बलिष्ठा क्रिया ज्ञानं बाधित्वा स्वकार्यमेव करोति । अत एव केचित् ज्ञानापेक्षयापि योगमेव प्रशंसन्ति ज्ञानिभ्योऽप्यधिको मत इति भगवानप्याह । ज्ञानेच्छाप्रयत्नानामुत्तरोत्तरप्राबल्यं तथैव मनोवाक्कायानामपि तत्र कामादयो बाधकाः तैः संसार एव मनः प्रवर्त्यते योगादयस्त्वशक्याः न ह्यन्धकारे महति वायौ सृष्टौ च दीपः स्थापयितुं शक्यते तदाह । कृपणधीरिति । कृपणा दीना बुद्धिर्यस्य मनसो हि नियामिका बुद्धिः सैवादौ कृपणा दीना विषयपरा न हि चौरेणान्यः सन्मार्गे स्थापयितुं शक्यः किं च मनः पुनः कामकर्मभ्यां हृतमुत्कटेच्छा कामः तदनुगुणं च कर्म ज्ञानं तु दुर्बलमसहायं कामकर्मभ्यां च हृतं न तु स्वस्थं तद्वयेन तदनुगुणमेव भवति न त्वात्मानुगुणमतो रोद्धुमुत्साहमपि न करोमि अशक्यज्ञानानिश्चयात् किं च प्रमाथिभिर्बलिष्ठैरिन्द्रियैः इतस्ततो ह्रियमाणम् अतः सर्वत्रैवाशक्तः केवलं शरणं गच्छामि बलिष्ठांस्तांश्च निवेदयामि स्वाशक्यत्वं च ॥ २७ ॥

एवं सति यत्कर्तव्यं भगवतैव तच्चेत् क्रियेत कृपया स्वतन्त्रविचारेण असमद्भाग्येन तस्यैव वा कार्यार्थं तदैव निस्तारो नान्यथेत्यभिप्रायेणाह । सोऽहं तवाङ्घ्र्युपगतोऽस्मीति । सर्वथा अशक्यसाधनः सोऽहं तवाङ्घ्रिमुपगतः दीनतया शरणं प्रविष्टः इवामीमस्मि एतदपि शरणगमनमपि असतां दुरापं ये असन्तः पूर्वोक्ताः विवेकरहिता अपि विवेकेन स्वेतावत्स्वरूपाद्यत इति किं च भगवदनुग्रहमेव तन्मन्ये अन्यथा शरणागतो न भवेत् शरणागतो जात इति वा न भवेत् यदि सङ्घातमनुगुणं कुर्यात् त्याजयेद्वा तदा शरणागतिः सिद्धेति ज्ञातव्यम् अनुगुणपक्षस्तु ज्ञातुं सुगमः त्याजनपक्षस्तु दुर्ज्ञेयोऽपि अनुभावेन कृपाप्रकाशेन च ज्ञायते अतः स्वरूपतो निष्पन्नं वा शरणागमनमेव भगवतोऽनुग्रहः सत्सेवानुग्रह इति स्वरूपसत्त्वमेव नियामकं तथैव ते उत्पादिताः इति मूलेच्छात्र नियामिका ननु त्याजनमनुगुणं वा तस्यापि स्वार्थमात्रेऽप्यशक्यो भगवान्कथं करिष्यतीति चेत्तत्राह । ईश इति । हे सर्वसमर्थ अत्र ममानुभव एव प्रमाणमित्याह । मन्य इति । अनेन भगवानेव यदि करोति तदैव निस्तारो भवति इति ज्ञापितम् नन्वेवं सति शास्त्रं व्यर्थं स्यात् ज्ञानस्याप्यनुपयोगादिति चेत्तत्राह । पुंसो भवेदिति । यर्हि पुंसः भगवदिच्छया संसरणापवर्गः स्यात् सृष्टिसमये हि भगवान् सर्वानेव विचारयति इममित्थं करिष्यामीति तत्र यं मोचयिष्यामीति मन्यते तत्र जन्मानि अवधिमन्ति करोति तथा सति यदैवान्तिमं जन्म भवति स संसरणापवर्ग उच्यते अग्रे संसरणाभावात् अत्रोपपत्तिरूपं किञ्चिदाह पुंसो भवेदिति । अन्यथा तं पुरुषमेव न कुर्यात् "तासां मे पौरुषी प्रिये" ति भगवद्वाक्यात् अतः पुंसां मुक्तिरस्तीति सम्भाव्यते परं कालनियमे न प्रमाणं तदाह । यर्हीति । यर्ह्येवान्तिमं जन्म करिष्यतीत्यत्र नियामकमाह । अब्जनाभेति । अन्यथा स्वयमागत्य सृष्टिं नोत्पादयेत् अब्जं नाभौ यस्येति स्वयमाविर्भूय यतः सृष्टिं कृतवान् न तु सेवकद्वारा अतो ज्ञायते केषाञ्चिन्मुक्तिं तस्यां सृष्टौ दास्यतीति तदा तस्मिन् जन्मनि भगवति मतिर्भवति "तमेव विदित्वातिमृत्युमेतीति" नियमात् "ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तर" मिति भगवद्वाक्याच्च भगवज्ज्ञानमावश्यकं तत्र सता बोधकत्वेन उपदिश्यमानत्वेन च शास्त्रोपयोगः साधनेनैव सर्वं करोतीति एतावानर्थस्तुल्य इति अशक्ये समवानेव वर्तत इति त्याजनपक्षेऽपि न काप्यनुपपत्तिः अतः सत्सेवारुचिः भगवत्स्वरूपज्ञानेच्छा शास्त्रपरत्वं च अन्तिमजन्मज्ञापकम् ॥ २८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

अनित्ये कर्मफले नित्यमिति अनात्मनि देहे आत्मेति दुःखरूपे गृहादौ सुखमिति विपरीतमतिरित्यर्थः । द्वन्द्वेषु सुखदुःखेषु आरमतीति सः यतस्तमसाविष्टः व्याप्तः आत्मनः प्रियं प्रेमास्पदं त्वां न जाने ॥ २५ ॥

सदृष्टान्तमाह । यथेति । तस्माज्जलादुद्भवन्तीति तदुद्भवानि तृणादीनि तैः तथाज्ञानेन मायाच्छन्नत्वेन प्रतीतं स्वां त्वां हित्वा पराङ्मुखः देहाद्यभिमुखो वर्त्ते ॥ २६ ॥

प्रमाथिभिः प्रकर्षेण मथद्भिर्बलिष्ठैरक्षैरिन्द्रियैराकृष्यमाणं मनः रोद्धं नोत्सहे इति तथा मे धियः कार्पण्यं यथा तादृशं मनः रोद्धुमुत्साहोऽपि न जायत इत्यर्थः ॥ २७ ॥

सोऽहं तथाभूतोऽप्यहं तवाङ्घ्रिम् उपगतः शरणं प्राप्तोऽस्मि तच्च त्वदङ्घ्र्युपगमनमसद्भिर्जनैर्दुरापं भवदनुग्रह एव भवदनुग्रहे सत्येव सम्भवेदित्यहं मन्ये जानामि मदनुग्रह एव कदा स्यादित्यत्राह । हे अब्जनाभ । सदुपासनया हेतुना यर्हि त्वयि मतिः

नमो विज्ञानमात्राय सर्वप्रत्ययहेतवे
पुरुषेशप्रधानाय ब्रह्मणे ऽनन्तशक्तये ॥ २९ ॥
नमस्ते वासुदेवाय सर्वभूतक्षयाय च ।
हृषीकेश ! नमस्तुभ्यं प्रपन्नं पाहि मां प्रभो ! ॥ ३० ॥
इति श्रीमद्भागवते महापुराणे दशमस्कन्धे
पूर्वार्धे अक्रूरस्तुतिर्नाम
चत्वारिंशोऽध्यायः ॥ ४० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी

स्यात् सदुपासनैव कदा स्यात्तत्राह ।पुंसो यर्हि संसरणस्य संसारस्य अपवर्गः अन्तकालः स्यात् संसारान्तकाल एव कदा स्यादिति चेत् यदा यादृच्छिकी सत्कृपा स्यादिति ज्ञेयं तेनादौ यादृच्छिकी सत्कृपा ततः संसाराक्षयारम्भः ततः सदुपासना ततः कृष्णमतिरिति क्रमः शास्त्रारम्भ एव सत्यामित्यादिना प्राक्प्रदर्शित उक्तो भवति ॥ २८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अनित्ये गृहादौ नित्यमिति अनात्मनि देहादावहमिति दुःखे संस्पर्शजे भोगे सुखमिति विपर्ययमतिः द्वन्द्वेषु सुखदुःखादिषु आत्मति क्रीडतीति तथा सः तमसि मायायां विष्टः प्रविष्टः मायावृतज्ञान इत्यर्थः। आत्मनः अंशभूतस्य जीवात्मनः प्रियं स्थितिप्रवृत्तिहेतुमंशिनं परमात्मानं त्वां न जाने ॥ २५ ॥

सर्वेषामन्तर्यामिणं स्वकार्य्यभूतेषु अन्नमयादिषु अन्तर्वसन्तं परमानन्दं त्वामहं हित्वा पराङ्मुख आनन्दभ्रान्त्या कलत्रापत्याद्यभिमुखो वर्ते यथा अबुधो मूर्खः कश्चित्तदुद्भवैस्तृणादिभिः प्रतिच्छन्नं जलं हित्वा मृगतृष्णामभ्येति तद्वत् ॥ २६ ॥

एवमज्ञानतोऽप्यात्मनः दैन्यमाह । नोत्सहे इति । कृपणा आत्मविमोक्षणे अकुशला धीर्यस्य सः अत एव कामो ऽभिलाषस्तन्मूलकैः कर्मभिर्हतं मोहितम् अक्षैरिन्द्रियैः प्रमाथिभिर्बलिभिरिन्द्रियैर्ह्रियमाणमभिभूयमानं मनः रोद्धुमात्मविमोक्षणोपाये प्रवर्तयितुं नोत्सहे न शक्नोमि ॥ २७ ॥

एवं दीनोऽहं तवाङ्घ्रिमुपतः शरणं प्राप्तोऽस्मि तच्चापि अङ्घ्र्युपगमनमपि असतामसाधूनां सुदुर्लभम् अतः हे ईश ! किञ्चित्साधुत्वं निमित्तीकृत्य भवतोऽनुग्रहे सति एवेत्यहं मन्ये उपगमनप्रदस्यानुग्रहस्य निर्निमित्तत्वस्वीकारे सर्वेषामुपगमनप्रसङ्गः स्यादिति भावः । तत्र साधुत्वं त्वयि मतिमत्त्वमित्याह। हे अब्जनाभ पुंसः संसारिणः यर्हि यदा सदुपासनया सतामुपासनया त्वयि मतिः स्यात्तदा संसरणस्य प्रवाहस्य अपवर्गः समाप्तिर्भवेत् सत्सेवया त्वयि मतिस्ततस्त्वदनुग्रहस्तत उपगमनं ततो मुक्तिरिति क्रमः॥२८॥

भाषा टीका ।

अनित्य अनात्मा दुःख रूप देहादि कों मैं मेरी विपरीत बुद्धि है तिससे मैं राग द्वेष द्वंद्व में पडकर विनष्टबुद्धि होकर आत्मा के प्रिय आपको नहीं जानता हूं ॥ २५ ॥

जैसे अज्ञानी पुरुष जलसे पैदा भये तृणादिकों से ढके हुये जलको छोडकर मृगतृष्णा को दौडता है तैसे मैं आपसे विमुख होरहा हूं ॥ २६ ॥

मैं वडा असमर्थ हूं सो काम कर्म से नष्ट भये मनको नहीं रोकसक्ता हूं क्योंकि वह मन मथन करने वालि इंद्रियों से चळायमान होरहा है ॥ २७ ॥

सो मैं अव असत् पुरुषों को नहीं प्राप्त होने योग्य जो आपका चरण है तिसके शरण प्राप्त भया हूं तिसको भी मैं आपका अनुग्रह ही मानता हूं जव पुरुष को संसार से छूटना होता है तव हे पद्मनाभ ! सत्पुरुषों के संग होने से उनकी सेवा से आपके विषे वुद्धि होती है ॥ २८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

पादयोः पतन्प्रार्थयते । नम इति द्वयेन । विज्ञानमेव मात्रा मूर्त्तिर्यस्य तस्मै अत एव सर्वप्रत्ययहेतवे समस्तज्ञानकारणाय किञ्च पुरुषस्य ये ईशाः सुखदुःखादिप्रापकाः कालकर्मस्वभावादयस्तेषां प्रधानाय नियन्त्रे कुतः ब्रह्मणे परिपूर्णाय किञ्च अनन्तशक्तये अनन्ताः शक्तयो यस्य यद्वा अनन्ता मायाख्यशक्तिर्यस्य तस्मै अथवा प्रकृतिः पुरुषस्तत्प्रवर्तक ईशः काल एतत्त्रितयात्मने ब्रह्मणे वक्ष्यति च भगवान्–

प्रकृतिर्ह्यस्योपादानमाधारः पुरुषः परः ।
सतोऽभिव्यञ्जकः कालो ब्रह्म तत्त्रितयं त्वहम् ।

इति ॥ २९ ॥

सर्वप्रत्ययहेतुत्वमभिव्यञ्जयंस्तौति । नमस्त इति । वासुदेवाय चित्ताधिष्ठात्रे सर्वभूतक्षयाय क्षय आश्रयः अहङ्कारश्च प्राणिनामाश्रयः ततश्चाहङ्काराधिष्ठात्रे सङ्कर्षणायेत्यर्थः । हृषीकेशेति बुद्धिमनसोरधिष्ठात्रोः प्रद्युम्नानिरुद्धयोरेकीकृत्य ग्रहणम् शरणागतं मां पाहीति प्रार्थना ॥ ३० ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
चत्वारिंशोऽध्यायः ॥ ४० ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

एतदादिकं सर्वं स्वयं जानास्येव तत्तत्प्रतीकारेऽपि परम-समर्थोऽसीति किं विज्ञापयानीति सकाकु प्रणमन्नात्मानं समर्पयति । नम इति द्वाभ्याम् ॥ २९ ॥

वासुदेवाय सर्वकारणरूपाय सर्वभूतक्षयाय प्रलयाश्रयाय हे हृषीकेश ! स्थितावपि सर्वान्तर्यामिन्नित्यर्थः ॥ ३० ॥

तस्मै चैतन्यदेवाय नमो भगवते मुहुः ।
बुधान् स्मारयितुं यो मां वाचलयति कौतुकी ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे
श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिण्याम्
चत्वारिंशोऽध्यायः ॥ ४० ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

ज्ञानमात्राय मात्रचा स्वरूपे क्वचिदपि जडत्वं नास्तीत्युच्यते सर्वप्रत्ययहेतवे सर्वेषां ज्ञानप्रदाय । पुरुषेशप्रधानायेति पाठे प्रधानभूतेन पुरुषेण रूपेण स्वेन रूपेणावस्थितायेत्यर्थः ॥ २९ ॥

सर्वभूतक्षयाय सर्वभूतनिवासाय ॥ ३० ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे
श्रीसुदर्शनसूरिकृतशुकपक्षीये
चत्वारिंशोऽध्यायः ॥ ४० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

विज्ञानमात्राय अनुकूलात्मकज्ञानमात्रस्वरूपाय मात्रचा स्वरूपे क्वचिदपि जडत्वशङ्काव्युदासः सर्वप्रत्ययहेतवे सर्वेषां ज्ञानप्रदाय पुरुषो जीवस्तस्येशः स चासौ प्रधानश्च प्रधानशब्दस्तच्छरीरवाचकः प्रधानपुरुषेश्वरायेत्यर्थः । यद्वा पुरुषस्य ये ईशाः सुखदुःखादिप्रापकाः कालकर्मस्वभावादयः तेषां प्रधानाय नियन्त्रे यद्वा ईश्वरो हरिः प्रधानो यस्य पुरुषश्चासावीश्वरप्रधानश्च तस्मै हरिप्रधानभूतेन पुरुषेण स्वरूपेण चावस्थितायेत्यर्थः । ब्रह्मणे स्वरूपेण गुणैश्च निरतिशयाय बृहते अनन्ताः शक्तयः जगत्सर्गाद्युपयुक्तसामर्थ्यविशेषा यस्य तस्मै ॥ २९ ॥

वासुदेवशब्दार्थमाह । सर्वभूतक्षयाय च सर्वभूतनिवासाय हे हृषीकेश ! तुभ्यं नमः अहं त्वच्छेषभूतः मे मम नाहं मच्छेषभूतः एवं प्रपन्नं मां पाहि त्रायस्व अत्र विज्ञानमात्रायेत्यनेन प्राप्यत्वोपयुक्तं निरतिशयानन्दस्वरूपत्वं विवक्षितं सर्वप्रत्ययहेतवे इत्यनेन प्रपित्साहेतुत्वं पुरुषेशप्रधानायेत्यनेन सर्वशेषित्वं ब्रह्मण इत्यनेन वात्सल्यसौशील्यसौलभ्यादिगुणपूर्णत्वम् अनन्तशक्तय इत्यनेन बन्धमोक्षाद्यापादनोपयुक्तसामर्थ्यवत्त्वं वासुदेवायेत्यनेन धारकत्वं हृषीकेशेत्यनेन नियन्तृत्वम् ॥ ३० ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
चत्वारिंशोऽध्यायः ॥ ४० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

मननविषयरूपमाह । नम इति । ज्ञानस्वरूपं नान्यत् "मात्रं कार्त्स्न्येऽवधारणे" इति यादवः यद्वा विज्ञानं मात्रा मानं प्रमाणं यस्मिन् स तथा तस्मै "मात्रापरिच्छदे देशे प्रवृत्तौ कर्णभूषणे । अक्षरावयवे मान" इति च "नैषा तर्केण मतिरापनेये" ति च श्रुतिः सर्वेषां ज्ञानानां हेतवे कारणाय विरिञ्चिशङ्करयोः प्रत्ययहेतुत्वम् औपचारिकमितिभावेनाह । पुरुषेति । पुरुषेश्वरयोर्विरिञ्चिशङ्करयोरप्युत्तमोत्तमाय एवंविधस्य किन्नामधेयमित्यत उक्तं ब्रह्मण इति "सत्यं ज्ञानमनन्तं ब्रह्मे" ति श्रुतेः विरिञ्च्याद्युत्तमत्वे को हेतुरित्यत उक्तमनन्तेति ॥ २९ ॥

वासुदेवमूर्तेर्मोक्षहेतुत्वमिति कृत्वा तं नमति । नम इति सर्वभूतक्षयाय सर्वभूतनिवासाय "शुद्धस्फटिकसङ्काशं वासुदेवं निरञ्जन"मित्यादेः हृषीकेश ! इन्द्रियेश प्रभो ! समर्थ ॥ ३० ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
अष्टत्रिंशोऽध्यायः ॥ ३८ ॥ ४० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे
चत्वारिंशोऽध्यायः ॥ ४० ॥

॥ श्रीमद्वल्लभाचार्यकृतसुबोधिनी ॥

एवं विज्ञाप्य विज्ञापनासिद्ध्यर्थं नमस्यति । नमो विज्ञानमात्रायेति । शास्त्रस्य सतां च तदैवोपयोगो भवति यदा भगवान् विशिष्टज्ञानमात्रमेव भवति अन्यथा ज्ञाने सामान्यसिद्धिः मनननिदिध्यासदिना च विशेषसिद्धिरित्ययमर्थो नोपपद्येत ज्ञानस्याज्ञत्वं च न स्यात् शास्त्रेण हि ज्ञानमेवोत्पाद्यते न त्वन्यत् तच्चेद्विज्ञानमन्यदेव स्यात् किं भगवद्भजनेन शरणागमेन वा स्यात् अतस्त्वं विज्ञानमात्ररूपः किं च यदि भगवान् आन्तरो न भवेत् आत्मा वा न भवेत् तदान्यत्र स्थितमन्यो न प्राप्नोति अन्यश्चान्यो न भवतीति मुक्तिरेव न स्यात् सर्वेषां प्रत्ययानां ज्ञानानां हेतुः कारणमन्तर्यामी आत्मा वा स भवानेव ननु तस्य ज्ञानैकरूपस्यात्मनः कथं जगत्कारणत्वमित्याशङ्क्याह । पुरुषेशप्रधानायेति । पुरुषः प्रकृतिभर्ता ईशः कालः गुणक्षोभकः गुणात्मिका च प्रकृतिः हेतुत्रितयरूपः नन्वेकस्य कथमनेकरूपता तत्राह । ब्रह्मण इति । बृहत्त्वात् बृंहणत्वात् सर्वभवनसमर्थं तदेव ब्रह्मशब्दस्तादृश एव वर्तत इति प्रकारान्तरेणापि सर्वरूपत्वमुपपादयति । अनन्तशक्तय इति । अनन्ताः शक्तयो यस्येति तत्तच्छक्त्या तथा तथा भवतीति न काप्यनुपपत्तिः स्वरूपमेव वा तथेति पक्षद्वयमप्यविरुद्धम् ॥ २९ ॥

पुनर्विज्ञापनार्थं नमस्यति । नमस्ते वासुदेवायेति मोक्षदात्रे ननु तथाप्येतावत्कालं त्वमन्यत्र स्थितः कृतापराधस्य ततः कथं

श्रीमद्वल्लभाचार्यकृतसुबोधिनी।

मोक्षो देय इत्याशङ्कायामाह सर्वभूतानां क्षयाय स्थानरूपायेति तेन त्वय्येव स्थिताः भूतेषु स्थितावपि त्वय्येव स्थिताः चकारात्सर्वभूतस्वरूपाय किं च यदपि कृतं तत्रापि त्वमेव हेतुः यतो हृषीकेशः इन्द्रियप्रेरकः अतः सर्वापराधशान्त्यर्थं तुभ्यं नमः विज्ञापनामाह। प्रपन्नं शरणागतं मां पाहि पालय यथा पुनः प्रवाहे न पतामीति प्रार्थना वाचनिकी शरणागमनं प्रथमतो मानसं पश्चात्कायिकमिति तदुपपादितं शरणागतिप्रकरणे॥ ३०॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे श्रीलक्ष्मणभट्टात्मज-

श्रीमद्वल्लभदीक्षितविरचितायां सुबोधिन्याम्

सप्तत्रिंशाध्यायविवरणम्॥ ३७॥ ४०॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

पादयोः पतन् आत्मानं निवेदयति द्वाभ्याम्। नम इति। विज्ञानस्य मदनुभवस्य मात्रा परिमाणं यतस्तस्मै यावन्तं स्वविषयकमनुभवं ददासि तावदेव त्वामनुभवामीत्यर्थः। अन्यविषयकज्ञानानामपि त्वमेव हेतुरित्याह। सर्वेति। यतः पुरुषेति पुरुषोऽन्तर्यामी तद्रूपेण कर्मादिषु प्रेरयसि ईश! ईश्वरस्तद्रूपेण कर्मादिफलं ददासि प्रधानं माया तद्रूपेण विषयेषु त्वमेव बध्नासि ब्रह्म ज्ञानैकस्वरूपं तद्रूपेण स्फुरितं सत् तस्माद्बन्धान्मोचयासि च अनन्तशक्तिर्भगवान् तद्रूपेण स्वस्मिन् भक्तिं प्रदाय कृतार्थयसि च॥२९॥

वासुदेवायेति हे वसुदेवनन्दन! भवानेव मम सेव्यो भवतु नतु दुष्टभूपतिरिति भावः। सर्वभूतानां क्षयाय निवासायेति स्वस्मिन्नेव मां वासय नतु गृहान्धकूपे इति भावः। हृषीकेशेति मम मनआदीन्द्रियाणि भवानेव गृह्णातु नतु कलत्रपुत्रादिरिति भावः॥ ३०॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम्।

चत्वारिंशोऽत्र दशमे सङ्गतः सङ्गतः सताम्॥ ४०॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

एवम्प्रपन्नो भूत्वा पादयोः पतन् मां पाहीत्याह। नम इति द्वाभ्याम्। "विज्ञानं यज्ञं तनुते" इति श्रुतौ विज्ञानशब्दो जीववाचकः विज्ञानं जीवः मात्रा अंशो यस्य तस्मै अत एव सर्वेषां स्वांशभूतानां जीवानां प्रत्ययस्य ज्ञानस्य हेतवे जीवानां यथाधिकारं भुक्तिमुक्तिज्ञानप्रदायेत्यर्थः। अत एव पुरुषाणां जीवानां ये ईशाः पराभवकराः कालकर्मस्वभावादयस्तेषां प्रधानाय नियन्त्रे॥ २९॥

सर्वेषां भूतानां क्षयाय वासस्थानाय प्रपन्नं त्वदङ्घ्रिं शरणं गतं मां पाहि संसारात्त्रायस्व॥ ३०॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे

चत्वारिंशाध्यायार्थप्रकाशः॥ ४०॥

भाषा टीका।

सब बुद्धि के हेतु विज्ञान मात्र स्वरूप आपके अर्थ नमस्कार है पुरुष प्रधान दोनों के ईश अनंत शक्ति ब्रह्म आपके अर्थ नमस्कार है॥ २९॥

सर्वभूतों के निवास हेतु वासुदेव हृषीकेश आपके अर्थ नमस्कार है हे प्रभो! मैं शरणागत हूं मेरी रक्षा करो॥ ३०॥

इति श्रीभागवत दशमस्कन्धपूर्वार्धे चालीसमें अध्याय की भाषाटीका समाप्त॥ ४०॥

इति श्रीमद्भागवते दशमस्कन्धे पूर्वार्धे चत्वारिंशोऽध्यायः॥ ४०॥

॥ एकचत्वारिंशोऽध्यायः ॥

श्रीशुक उवाच

स्तुवतस्तस्य भगवान् दर्शयित्वा जले वपुः ।
भूयः समाहरत् कृष्णो नटो नाट्यमिवात्मनः ॥ १ ॥
सोऽपि चान्तर्हितं वीक्ष्य जलादुन्मज्ज्य सत्वरः ।
कृत्वा चावश्यकं सर्वं विस्मितो रथमागमत् ॥ २ ॥
तमपृच्छद्धृषीकेशः किं ते दृष्टमिवाद्भुतम् ।
भूमौ वियति तोये वा तथा त्वां लक्षयामहे ॥ ३ ॥

अक्रूर उवाच

अद्भुतानीह यावन्ति भूमौ वियति वा जले ।
त्वयि विश्वात्मके तानि किं मेऽदृष्टं विपश्यतः ॥ ४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका

एकचत्वारिंशकेऽहन् रजकं प्रविशन् पुरीम् ।
ततो वयानदात्तुष्टः सुदाम्नो वायकस्य च ॥
सशङ्कमक्रूरमतःप्रबोध्य स्वधामसन्दर्शनसत्कृपातः ।
सराजधानीं मथुरामपश्यदलङ्कृतानन्तमहोत्सवाढ्याम् ॥

॥ १—३ ॥

भूमौ वियति जले वा यावन्त्यद्भुतानि तानि त्वय्येव सन्ति तं च त्वां पश्यतो मे किमद्भुतमदृष्टम् अपितु सर्वं दृष्टमित्यर्थः ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

तस्येत्यनादरे षष्ठी तमपृष्ट्वेवेत्यर्थः । समहरत् अन्तर्द्धापयामास नटो नाट्यमिवेति आकस्मिकत्वांशे दृष्टान्तः आत्मनो वपुरिति तद्वपुषः स्वभावसिद्धत्वं दर्शितम् ॥ १ ॥

अपिचशब्दः उक्तसमुच्चये अन्तर्हितं तमिति वीक्ष्य आलोच्य उन्मज्ज्य निःसृत्य सर्वम् आवश्यकं माध्याह्निकजलाधिष्ठानकभगवत्पूजादिकं तच्चाभिव्याञ्जितं श्रीपराशरेण "अर्च्चयामास सर्वेशं धूपपुष्पैर्मनोमयै" रिति अत्र जलेनैव तत्तत्कल्पनात् मनोमयत्वम् ॥ २ ॥

हृषीकेशः सर्वेन्द्रियप्रवर्त्तकः सर्वज्ञोऽपीत्यर्थः । कौतुकार्थमिति भावः । इह तीर्थे ननु कुतस्त्वया ज्ञातं तत्राह । यथा दृष्टाद्भुतत्वप्रकारेण त्वां लक्षयामहे दृष्टिवैलक्षण्यादिलक्षणैरवगच्छामः तथाच श्रीविष्णुपुराणे "नूनं ते दृष्टमाश्चर्यमक्रूर ! यमुनाजले । विस्मयोत्फुल्लनयनो भवान् संलक्ष्यते यत" इति बहुत्वं न केवलमहमेव मेऽग्रजचरणाश्चेति तदपेक्षया ॥ ३ ॥

पूर्वं तद्रूपं तदभेदेन ज्ञातवान् इदानीन्तु सदयतत्प्रश्नप्रभावेण लब्धविशेषज्ञानस्तमेव तत्सर्वदर्शकं मत्वा तस्यापि रूपस्य तद्वैभवत्वमेव विचार्याह । अद्भुतानीति । भूम्यादिषु यावन्त्यद्भुतानि सन्ति तानि तावन्ति त्वय्येवेह सन्ति तत्र हेतुः विश्वात्मके विश्वस्य मूलरूपत्वात् विश्वेन कार्येण आश्रित आत्मा यस्य तादृशे मध्यपदलोपी बहुव्रीहिः "यस्मिन् विज्ञाते सर्वं विज्ञातं भवती" ति श्रुतेः तस्माद्विपश्यत इति विपश्यता मे मया भूम्यादिषु किमद्भुतं दृष्टं न किमपि किन्तु यत् किमपि दृष्टं तत् त्वय्येव दृष्टमित्यर्थः । त्वद्रूपे दृष्ट एव तद्दर्शनादिति भावः ॥ ४ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

समहरत् अन्तर्हितङ्कृतवान् ॥ १—५ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं सरूपदर्शिताक्रूरसंस्तुतस्वासाधारणरूपो भगवान् रथमास्थाय श्रीमथुरोपवनोऽङ्गीकृताक्रूरप्रार्थनः प्रेषिताक्रूरश्च श्वः प्रविष्टश्रीमथुरो

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

निगृहीतरजकस्तन्तुवायमाळाकारौ परमभागवतावकरोदित्याहैकचत्वारिंशेन स्तुवत इत्यादिना । भगवान् कृष्णः आत्मनः स्वस्य वपुस्तुवतस्तस्याक्रूरस्य दर्शयित्वा स्वासाधारणं रूपं पुनःसमहरदन्तर्धापयामास यथा नटो नाट्यं नाट्यार्हं रूपं दर्शयित्वान्तर्धापयति तद्वत् ॥ १ ॥

सोऽक्रूरोऽप्यन्तर्हितं वीक्ष्य ज्ञात्वा जलादुन्मज्ज्य त्वरया युक्तः आवश्यकं माध्याह्निकं नित्यकर्म सर्वं कृत्वा विस्मितः सन् रथमाविशत् ॥ २ ॥

तमाविष्टवन्तमक्रूरं कृष्णः पप्रच्छ प्रश्नमेवाह । किंत इत्यादिना इह रथे भूमौ वियत्याकाशे जले वा किमद्भुतं चित्रं त्वया दृष्टं न किमपि दृष्टमिति मावोच इत्यभिप्रेत्याह । तथा दृष्टाद्भुतं त्वां लक्षयामहे चिन्हैरनुमिनुमः ॥ ३ ॥

इत्थमापृष्टः प्राहाक्रूरः । अद्भुतानीति । भूम्यादिषु यावन्त्यद्भुतानि तानि विश्वशरीरके त्वय्येव सन्ति तत्र त्वां पश्यतो मे मया किं दृष्टं न किमप्यद्भुतं त्वय्यविद्यमानं दृष्टमिति काकाभिप्रेतार्थः ॥ ४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

तस्मिन्निजजन्मनि योग्यताया आभिभवो नास्ति किन्तु सर्वत्राद्भुतत्वमेव यत्तदेतेषु द्विश्राध्यायेषु व्यनक्ति । तत्रादावक्रूरदृष्टभगवद्रूपस्यान्तर्धानकारणं कृष्णाक्रूरयोः प्रश्नोत्तराभ्यां हरेः सर्वैराचिन्त्याद्भुतमाहात्म्यं च वक्ति । स्तुवत इति । आत्मनो वपुः नटत्वेन दर्शितं नाट्यं नटनविषयं हनुमदादिरूपं यथा तिरोधत्ते तथा ॥ १ ॥

आवश्यकं नित्यकर्म ॥ २ ॥

दयालुः श्रीकृष्णः आत्मनो माहात्म्यं तेन वादयितुमज्ञातवत् पृच्छति । तमिति । अद्भुतमदर्शि लक्षणैस्त्वां लक्षयामहे व्यावृत्तं पश्यामः ॥ ३ ॥

अक्रूरः परिहरति । अद्भुतानीति । इह भूम्यादौ यावन्त्यद्भुतानि सन्ति विश्वात्मके विश्वरूपे त्वयि तानि विपश्यतो मे किमदृष्टं सर्वं दृष्टमेव तानि विश्वात्मके त्वयि सन्ति तस्मात्त्वां विपश्यतो मे किमदृष्टमिति वा ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

नटो नाट्यमिवेत्याकस्मिकत्वांशे दृष्टान्तः आत्मनो वपुरिति तद्वपुषः स्वभावसिद्धत्वं दर्शितम् ॥ १—११ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

अष्टात्रिंशे ज्ञाततत्त्वं श्वफल्कतनयं हरिः ।
विसृज्य मथुरामैक्षदुक्तो माहात्म्यबोधकः ॥
गोपनार्थं परीक्षोक्ता हृदयारूढबोधनम् ।
वाक्यैर्निरूपितं वप्र्यां प्रवेशो नगरीं हरेः ॥
उत्सवेषु यथा रोधस्तथात्रापि चकार ह ।
माहात्म्यज्ञापनार्थाय रजकं हतवान् स्वयम् ॥
अनिष्टप्रदो लोके महानिति निरूप्यते ।
वायकस्य सुदाम्नश्च वरदानं यथेप्सितम् ॥
प्रपञ्चविस्मृतिः सर्वा कृतानेन हि राजसे ।
स्वासक्तिरग्रे वक्तव्या सामान्यं ते न सेत्स्यति ॥

पूर्वाध्याये स्तुतिरुक्ता तामुपसंहरन् अग्रे भगवत्कृतमाह । स्तुवतस्तस्येति । तस्याक्रूरस्य स्तुवत एव सतः न तु स्तोत्रसमाप्तौ तथा सति वरो देयः स्यात् ननु कथमेवं सामि कार्यं कृतवानित्याह । भगवानिति । स्वच्छन्दात्मा तावतैव कार्यसिद्धिं मत्वा न हि ब्रह्मसाक्षात्कारः परमदुर्लभो बहुकालं भवति नाप्ययं वैकुण्ठे नीतः किं तु जले स्ववपुर्ब्रह्माण्डात्मकं नारायणरूपं प्रदर्शितवान् यथाविर्भावः तथा तिरोभावोऽपि वक्तव्य इति भूयः समहरत् उपसंहृतवान् अनेन भगवति स्थित एवायं, प्रपञ्चः ब्रह्माण्डात्मकः हस्त इव प्रसार्य पुनरुपसंहृत इति निरूपितम् नतु तत्रत्यः मायाजवनिकादूरीकरणेन प्रदर्शित इति यतोऽयं कृष्णः एतदर्थमेव सदानन्दोऽवतीर्ण इति अन्तः स्थितमेव प्रदर्शितमित्यत्र दृष्टान्तमाह । नटो नाट्यमिवेति । यथा नटः नटविद्यामन्तः स्थितां बहिः प्रकटयत्यभिनयेन तथा भगवानप्येतादृश इति ज्ञापयितुं नारायणरूपं प्रदर्शितवानित्यर्थः । ननु नाट्यवैलक्षण्यं प्रतीयते न हि नाट्यमेतादृशमिति तत्राह । आत्मन इति । अद्भुतमेतन्नाट्यम् ॥ १ ॥

सोऽपि भगवतैव कृतमिति ज्ञात्वा ज्ञाततत्त्वोऽन्तरङ्गः भगवत्समीपमागत इत्याह । सोऽपीति । अन्तर्हितं स्वयमेव अथवा चकारेण वा अन्तर्हितं भक्त्या हृदये तं वीक्ष्य बहिर्दृष्टमन्तः स्थापयित्वा युक्तश्चायमर्थः अन्यथा दर्शनं व्यर्थं स्यात् धर्मान्तरप्रवेशश्च स्यात् ततो भयं च निवर्त्येत अन्यथा बुद्धिश्च स्यात् अत एव जलादुन्मज्ज्य स्नानविधिं त्यक्त्वा पूर्णो भूत्वा भगवदपराधं सञ्चिन्त्य सत्वरः अत्यावश्यकं कर्म विधाय चकारादकृत्वापि कथमेवं दुर्लभं प्रदर्शितवानिति विस्मितः रथसमीपमागमत् नतु मननादिकं कृत्वा निवृत्तो जातः ॥ २ ॥

तदा भगवान् विस्मयांशोऽनुचित इति तन्निवृत्त्यर्थं किञ्चित् पृष्टवान् इत्याह । तमपृच्छदिति । यदि भगवत्पृष्टं वदेत् अन्यत्रापि तदा न माहात्म्यं तस्य हृदयारूढं भगवतेऽपि यदि न वदति तदान्यस्मै कथनसम्भावनैव न भवति । हृषीकेश इति । स्वयमेव तथा प्रेरितवान् इच्छानिवर्तनार्थं परम्पृष्टवानिति ॥ किं ते त्वया दृष्टमिति । इहास्मिन् जळाशये जलादिकं बह्वेव दृष्टमिति तद्व्यावृत्त्यर्थमाह । अद्भुतमिति । अलौकिकदृष्टपूर्वमद्भुतं दृष्टं वस्तु अन्याधारं जानाति न वेत्ति तन्मनोविषयार्थं स्थानानि निर्दिशति । भूमौ वियति तोये वेति । दर्शनसमये भूमिरपि दृष्टा युक्त्या गन्धर्वनगरादिवत् आकाशेऽपि दर्शनं सम्भवति निमज्ज्य पश्यतीति जल एव भवति चेत्यनादरे यत्र क्वचित् अवश्यं दृष्टमिति अलौकिकं ज्ञानं गोपयितुमाह । तथा त्वां लक्षयामह इति । अद्भुतदर्शनमिव स ह्याश्चर्याभिनिविष्टः प्रपञ्चमग्रिमकार्यं च न स्मरतीति । प्रपञ्चो ह्यन्यथादृष्टिरद्भुतार्थनिरीक्षकः तादृशं भगवान् दृष्ट्वा दर्शनं कल्पयेत्पुनः ॥ ३ ॥

अक्रूरस्तु ज्ञातमाहात्म्यः तन्न वक्तव्यमिति ईश्वरपृष्टं मत्व-

यत्राद्भुतानि सर्वाणि भूमौ वियति वा जले ।
तं त्वानुपश्यतो ब्रह्मन् किं मे दृष्टमिहाद्भुतम् ॥ ५ ॥
इत्युक्त्वा चोदयामास स्यन्दनं गान्दिनीसुतः ।
मथुरामनयद्रामं कृष्णं चैव दिनात्यये ॥ ६ ॥
मार्गे ग्रामजना राजंस्तत्र तत्रोपसङ्गताः ।
वसुदेवसुतौ वीक्ष्य प्रीता दृष्टिं नचाददुः ॥ ७ ॥
तावद्व्रजौकसस्तत्र नन्दगोपादयोऽग्रतः ।
पुरोपवनमासाद्य प्रतीक्षन्तोऽवतस्थिरे ॥ ८ ॥

श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी ।

क्यमिति ज्ञात्वा सामान्यत उत्तरमाह । अद्भुतानीति । स्वरूपमाधारः भगवानेवेति प्रदेशान्तप्रश्नोऽनुपपन्नः सोऽपि वा प्रदेशः त्वय्येवास्तीति न त्वत्तोऽन्यत्राद्भुतमस्ति त्वद्दर्शनं तु अद्भुतमेवेति चिन्हमप्यव्यभिचारि इहास्मिन् समये देशे वा भूमौ वियति जळे वा यान्यद्भुतानि तानि त्वय्येव यतस्त्वं विश्वात्मकः विश्वस्मिन्न ह्यद्भुतानि भवन्ति अतस्तानि किं मे मया न दृष्टानि यतस्त्वां विपश्यतः अदृष्टस्तु त्वं केनापि अन्यस्याद्भुतत्वमेव नास्ति केनचिददृष्टत्वात् भगवांस्तु सर्वादृष्टः तद्देशमदृष्टं भगवन्तं विपश्यतो मे किन्तानि न दृष्टानीत्यर्थात् तानीति पूर्वस्यैव वा अनुवादः सर्वाद्भुताधारे दृष्टे नादृष्टं किंचिदवाशिष्यत इति आक्षेपोयुक्तः ॥ ४ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

एकचत्वारिंशकेऽगात् पुरीं स्वामोहयन्नहन् ।
रजकं वायकायादात् सुदाम्ने च वरान् हरिः ॥

सस्येत्यनादरे षष्ठी समहरदन्तर्द्धापयामास नाट्यमिवेत्युपसंहार एव दृष्टान्तः नटो नाट्यं यथोपसंहरति तथैव कृष्णो वैकुण्ठं वैकुण्ठीयञ्च सनातनं वस्तु तत्सर्वमुपसञ्जहारेत्यर्थः ॥ १—२ ॥

तथा त्वां ळक्षयामहे इति । तव नेत्रे सास्रे प्रोत्फुल्ले एवात्र प्रमाणमिति भावः ॥ ३ ॥

अनेन कृष्णेनैव तत्तत्सर्वं स्ववैभवमेवाहं दर्शित इति तादृशसत्परत्वादेव निश्चित्य सहर्षविवेकमाह । अद्भुतानि भूम्यादौ यावन्ति सन्ति तानि त्वय्येव सन्ति अतस्तं त्वां विपश्यतो मे किमद्भुतमदृष्टमपि तु सर्वमेव दृष्टमित्यर्थः ॥ ४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

एकचत्वारिंशे पुर्य्यां भगवान् प्रविश्य रजकवधं भक्ते वायके आळाकारे चानुग्रहं कृतवानित्युच्यते ॥ १ ॥ २ ॥

भूम्यादौ इह रथे वा अद्भुतं चित्रम् ॥ ३ ॥

विश्वात्मके सर्वात्मनि त्वय्येव तानि सन्ति विपश्यतः त्वामिति शेषः मे किमदृष्टमपि तु सर्वं दृष्टमित्यर्थः ॥ ४ ॥

भाषा टीका ।

श्रीशुकदेवजी बोले अक्रूर जी के ऐसे जल में स्तुति कर ते ही कर ते भगवान् मूर्तिका दर्शन करा कर जैसे नट नाट्य दिखाके समेटे तैसे उस मूर्ति का अन्तर्धान करेत भये ॥ १ ॥

सो अक्रूरजी भी मूर्ति का अन्तर्धान देख कर जल में से जल्दी निकल कर संध्यादिक करके विस्मित होकर रथ पर को आगये ॥ २ ॥

हृषीकेश भगवान् उन से पूछने लगे कि तुमने आकाश भूमिल अथवा जल में क्या अद्भुत देखा है ऐसे हम तुमको देखते हैं ॥ ३ ॥

अक्रूरजी बोले इस जगत् में पृथिवी आकाश या जल में जितने यद्भुत हैं सो तो विश्वरूप वाले आप ही में हैं तो आपको देखने वाले मैंने इहां क्या अद्भुत नहीं देखा है ॥ ४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

ननु मत्प्राप्तेः पूर्वमेव त्वं विस्मितमुखो लक्षितोऽस्यतो भूमौ वियति जले वा किमप्यद्भुतं दृष्टमेवेति चेदत आह । यत्राद्भुतानीति । यत्र त्वयि सर्वाण्यद्भुतानि सन्ति तं त्वामिह पश्यतो मेऽन्यत्र भूम्यादौ किमद्भुतं दृष्टं त्वां विना न तत्र किञ्चिदद्भुतमित्यर्थः ब्रह्मन् हे परमेश्वरेत्यर्थः । ब्रह्मेति वा पाठः ॥ ५ ॥

गान्दिनीसुतोऽक्रूरः ॥ ६ ॥

दृष्टिं नाददुः पश्यन्त एव स्थिता इत्यर्थः ॥ ७ ॥

रामकृष्णागमनं प्रतीक्षमाणाः स्थिताः ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

त्वद्रूपेऽस्मिन् दृश्यमाने तु तानि सर्वाण्यप्यद्भुतानि न

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

कल्प्यन्ते किन्तु तद्रूपमेवेदमित्याह । यत्रेति । भूम्यादिषु यान्यद्भुतान्यपि सर्वाणि यत्र त्वयि सन्ति तं त्वा त्वामनुपश्यत इति भाग्यतः सम्प्रति निरन्तरं पश्यता मया किमन्यदद्भुतमिह दृष्टं किं त्विदमेव त्वद्रूपं पूर्वतोऽप्यद्भुतं दृश्यत इत्यर्थः । तत्र हेतुगर्भं निशिनष्टि । ब्रह्मेति "अथ कस्मादुच्यते ब्रह्म बृंहति बृंहयतिच" इत्यादि श्रुतौ "बृहत्वाद्बृंहणत्वाच्च यद्ब्रह्म परमं विदु"रिति श्रीविष्णुपुराणे च त्वय्येव सर्वबृहत्तमत्वस्य दृष्टत्वात्तत्रापि यन्मर्त्यलीलौपयिकमित्यादौ विस्मापनं स्वस्य च सौभगर्द्धेः परं पदमिति प्रसिद्ध्या त्वद्रूपस्यास्य परमतत्त्वत्वादिति भावः । ब्रह्मन्निति पाठे स एवार्थः दृष्टमिवेति पाठेत्विवशब्दस्तस्य दर्शनस्य न्यूनत्वमेव बोधयतीति दिक् ॥ ५ ॥

अनयदित्यनेन श्रीमुनीन्द्रस्य गोकुलजनत्वाभिमानो बोध्यते दिनात्ययेऽन्त्ययामे तथापराह्ण इति वक्ष्यमाणात् वक्ष्यमाणबहुललीलाकालसमावेशाच्च तयोर्विचरतोः स्वैरमादित्योऽस्तमुपेयिवानिति च वक्ष्यते तथोक्तं श्रीपराशरेण "संप्राप्तश्चापि सायान्हे सोऽक्रूरो मथुरापुरीम्" इति अत्रान्तिमदशदण्डात्मिकापराह्णस्यान्तिमषड्दण्डात्मकसायाह्नस्य च प्रायिकत्वात्तन्मध्यवर्त्तिचतुर्थप्रहरत्वमेवोभयसमञ्जसमिति यच्चोक्तं वैशम्पायनेन "विविशुस्ते पुरीं रम्यां काले रक्तदिवाकर" इति सायान्हस्यैकदेशचिन्हं मन्तव्यम् अक्रूरतीर्थादतिनिकटवर्त्तिपुरोपवनस्य दिनात्यये प्राप्तिः अक्रूरस्य तदाश्चर्यदर्शनादिना चिरं विलम्बनात् ॥ ६ ॥

किञ्च पथि लोकानां प्रीत्यर्थं शनैरागमनादपीत्याशयेनाह । मार्ग इति । ग्रामाणां जना इति मूढत्वं सूचितं तथापि व्रीडा इति वस्तुस्वभावो दर्शितः हे राजन्निति त्वया बुध्यते एवेति भावः । यद्वा ग्रामे जनानामपि तादृशप्रीतिस्मरणात् प्रेमार्त्त्युदयेन शोचन् सम्बोधयति ॥ ७ ॥

यावत्ते आयान्ति तावत् प्रतीक्षमाणा अव्रतस्थिरेऽनिष्टाशङ्कीनि बन्धुहृदयानीति न्यायेन वर्त्मनिरीक्षमाणा ऊर्ध्वावस्थित्या अवर्त्तन्त न तु प्रविष्टा इत्यर्थः । पूर्वं रथशैघ्र्येणानुगन्तुमशक्तास्ते स्ववर्त्माग्रे रथचिन्हमदृष्ट्वापि वक्रवर्त्मान्तरे तच्चिन्हात् तेनासौ गत इत्याशङ्कमानाः शीघ्रतन्मिलनाय ऋजुवर्त्मना चलन्त एवासन् सम्प्रति त्वेकीभूतवर्त्मनि पुरसमीपेऽपि तददृष्ट्वा परमोत्कण्ठया पश्चादेव निरीक्षमाणास्तस्थुरिति ज्ञेयम् ॥ ८ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

गान्दिनी अक्रूरस्य माता ॥ ६—१३ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

दृष्टं वदेत्यत आह । यत्रेति । हे ब्रह्मन् ! संबुद्धौ नपुंसकानां वेति विकल्पान्नलोपाभावः यत्र त्वयि सर्वाण्यद्भुतानि तं त्वामिह पश्यतो मे अन्यत्र भूम्यादौ किमद्भुतं दृष्टं त्वां विना न किञ्चिदद्भुतमित्यर्थः ॥ ५ ॥

इतीत्थमुक्त्वा गान्दिनीसुतः अक्रूरः स्यन्दनं रथं चोदयामास गमयामास ततो रामं कृष्णं च दिनात्यये दिनावसाने श्रीमथुरां प्रापयामास ॥ ६ ॥

तदा तत्र मार्गे ग्रामेषु जनाः वसुदेवस्य सुतौ रामकृष्णावुपसंगताः सन्तः तौ दृष्ट्वा प्रीताः दृष्टिं नाददुः न प्रत्याजहुः पश्यन्त एव स्थिता इत्यर्थः ॥ ७ ॥

तावदिति । यावद्रामकृष्णौ मथुरामनयत् तावदेव ततः पूर्वमेव नन्दादयो गोपाः उपवनं प्राप्य श्रीरामकृष्णागमनं प्रतीक्षमाणाः स्थिताः ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

किं त्वयाद्भुतं दृष्टमिति प्रश्नस्य सर्वं दृष्टमेवेति परिहारः कथमागत इत्यत उक्तमेव स्फोरयति । यत्रेति । यत्र भूम्यादौ सन्ति सर्वाणि अद्भुतानि यत्र यस्मिन् त्वयि सन्ति तं त्वानुपश्यतो मे किमद्भुतमदृष्टं सर्वमद्भुतं दृष्टमित्यर्थः । ब्रह्मन् पूर्ण ! ॥ ५ ॥

दिनात्यये अपराह्णे ॥ ६ ॥

तयोर्वसुदेवसुतयोः लग्नाः प्रीताः प्रसन्नाः दृष्टिं नाददुः प्रत्यादानं न चक्रुः ॥ ७ ॥

प्रतीक्षन्तः पश्यन्तः ॥ ८ ॥ ९ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

कदाचिदयमुपचाराद्वदतीति पुनः प्रश्नशङ्कायामाह । यत्राद्भुतानीति । यत्र क्वचिदद्भुतानि लोके दृश्यन्ते तानि त्वय्येव वस्तुतस्तु अतो येन केनचिदपि त्वय्येव चेदद्भुतानि द्रष्टव्यानि तदा त्वां पश्यतो मे किं वा अद्भुतमदृष्टम् अनेन तत्रापि त्वमेवाद्भुतो दृष्टः त्वय्येव च दृष्टं त्वमेव सः त्वय्येव तदिति सर्वाधारस्त्वमेवेत्याधारप्रश्नोऽपि न कर्त्तव्य इति भगवन्तमाधारत्वेन निर्दिशति तं त्वेति ब्रह्मन्निति तत्समर्थनायोपपत्तिः ॥ ५ ॥

एवं परोक्षेणोत्तरमुक्त्वा भगवदिच्छां ज्ञात्वा रथं प्रेरितवानित्याह । इत्युक्त्वेति । भगवद्वाक्ये नावहेलेति उत्तरमुक्त्वा पश्चाद्रथं चोदयामास ननु कस्योत्तालता तथा ज्ञात्वा भगवान्सम्यक्प्रसादनीयः किम्वा भगवतः कार्यं तुच्छं हि तत्तत्राह । गान्दिनीसुत इति । गोदानेन चोत्पन्ना गोरूपैव भवति तस्याश्च पुत्रः सौरभेय एव परं भगवन्तं मथुरां प्रापयत् रामो हि रतिकर्त्ता कृष्णश्च तत्फलं सदानन्दः स चेन्नगर्यां प्रतिष्ठितो भवति तदा तत्रस्थानां निरन्तरमेव सुखं भवतीति दिनात्यये संध्याकाले सा हि गोधूलिका प्रवेशे सुमुहूर्त्ता भवति चकारात् मध्ये स्थितान् सर्वानेव भगवदिच्छयैव सन्ध्याकालोऽपि अपराह्णो भविष्यति यावता च कालेन कार्यं भविष्यति तावान् कालो ग्राह्यः अन्यथा दिनात्ययपदं बाधितं स्यात् अत्ययारम्भे वा मध्यान्होपरि मध्यान्हे अतिक्रान्ते दिनमतिक्रान्तमेवेति । मथुरास्थदिनानां वा दुःख दानात्यये स्वस्य वा ॥ ६ ॥

ततो भगवान् शनैर्गच्छन् सर्वानन्दकरो जात इत्याह । मार्ग इति । मध्ये ये ग्रामाः तदीया वा सर्वत्र मार्गे राजन्निति सम्बोधनं तथानुभवाय तत्र तत्रेति न देशविशेषस्तेषां

तान् समेत्याह भगवानक्रूरं जगदीश्वरः।
गृहीत्वा पाणिना पाणिं प्रश्रितं प्रहसन्निव ॥ ९ ॥
भवान् प्रविशतामग्रे सहयानः पुरीं गृहम्।
वयं त्विहावमुच्याथ ततो द्रक्ष्यामहे पुरीम् ॥ १० ॥

॥ अक्रूर उवाच ॥

नाहं भवद्भ्यां रहितः प्रवेक्ष्ये मथुरां प्रभो !।
त्यक्तुं नार्हसि मां नाथ ! भक्तं ते भक्तवत्सल ! ॥ ११ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी।

दर्शने अभिप्रेते अनभिप्रेते च देशे उपसंगताः निकटे समागताः वसुदेवसुतावेतो वीर्य्य सम्बन्धात् स्वरूपाच्च प्रीताः भगवते दत्तदृष्टयः चकारात्सर्वमपि दत्त्वा नाददुः न पुनर्गृहीतवन्तः सामान्येन मार्गस्थानां निरोध उक्तः दृष्टेरग्रहणे हेतुः प्रीता इति प्रीतिरेव दानफलं जातमिति पुनः कथं ग्रहणं भवेत् सुखार्थमिन्द्रियाणां परिग्रहः तस्मिन् जाते न प्रवर्त्तन्त एव तेषामधिका बुद्धिर्न जातेति वसुदेवैतत्त्वोक्तिः ॥ ७ ॥

भगवद्गमनात् पूर्वमेव नन्दादयः मथुरोपवनपर्यन्तं गताः अग्रे भगवति समागते गन्तव्यमिति प्रतीक्षयैव स्थिता इत्याह। तावदिति। यतस्ते ब्रजौकसः अनावृत एव देशे स्थातुं योग्याः अत एवाग्रेऽपि गताः बहवो बालकाः भगवन्मित्राणि सहैव स्थिताः नन्दगोपादय एव परं वृद्धाः पूर्वं गताः उपवनं नानाविधफलप्रधानं मथुरानिकटस्थम् अवतस्थिरे केवलं स्थिताः नतु तत्स्थितियोग्यं साधनमपि न संपादितवन्त इत्यर्थः। अनेन व्यवहारेऽपि भगवत एव प्राधान्यं सूचितम् ॥ ८ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

किञ्च त्वद्रूपेऽस्मिन् दृश्यमाने सम्प्रति तु तानि सर्वाण्यद्भुतत्वाय न कल्प्यन्ते किन्तु त्वद्रूपमेवेदमित्याह। यत्र त्वयि सर्वाण्यद्भुतानि तं त्वा त्वाम् अनुपश्यतो निरन्तरमीक्षमाणस्य ममान्यत्र भूम्यादौ किमद्भुतं तद्दृष्टमपि तु न किमपि किंविदमेव त्वद्रूपं सर्वतोऽप्यद्भुतं दृश्यते इति जले सङ्कर्षणनारायणपार्षदान्वितं यद्वैकुण्ठस्थलमद्भुतं दृष्टं ततोऽपि परः सहस्राण्यद्भुतानि त्वद्रूपेऽस्मिन् वर्त्तन्त इति प्रत्येमीत्यर्थः। हे ब्रह्मन्! ब्रह्म चेति पाठद्वयं त्वं महामहेश्वरः साक्षात् परब्रह्मैवासि त्वयि भ्रातृपुत्रत्वज्ञानरूपं मन्मौढ्यं सम्प्रति त्वत्कृपया निःशेषतयापक्षीणमिति भावः ॥ ५ ॥

गान्दिनीसुतोऽक्रूरः ॥ ६ ॥

नाददुः पश्यन्त एव निष्पन्दा बभूवुरित्यर्थः ॥ ७ ॥

प्रतीक्षन्तः रामकृष्णौ प्रतीक्षमाणाः स्थिता इति पूर्वं रथशैघ्र्येणानुगन्तुमसमर्थै रथ वर्त्म परित्यज्य ऋजुमार्गेणैव तैरग्रे गमनादक्रूरनिमज्जननिबन्धनविलम्बाच्चेति भावः ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

एतदेवस्पष्टयति। यत्रेति। इह रथे तं त्वा त्वां तु निश्चितं पश्यतः किमदृष्टं सर्वं दृष्टमेव ॥ ५ ॥

गान्दिन्याः सुतोऽक्रूरः दिनात्ययेऽपराह्ने तस्मिन्नेवापराह्ने रजकवधादिकं ज्ञेयं कंसश्च निहतं द्रक्ष्ये परश्वोऽहनीति देवर्षिवाक्यात् ॥ ६ ॥

दृष्टिं न आददुः न प्रत्याजहुः चित्रलिखिता इव तस्थुरित्यर्थः ॥ ७ ॥

यावदक्रूरः रामकृष्णौ मथुरामनयत्तावत् नन्दगोपादयो ऽग्रतः पुरोपवनमासाद्य प्राप्य रामकृष्णागमनं प्रतीक्षन्तोऽवतस्थिरे इत्यन्वयः ॥ ८ ॥

भाषा टीका।

जिन आपके विषै संपूर्ण जो भूमि आकाश जल में हैं सो सब ही अद्भुत हैं तिन आपके रूपको जो मैंने देखलिया तो फिर और क्या अद्भुत मैंने देखा होगा ॥ ५ ॥

इतना कह कर अक्रूरजी ने रथ को चलाया फिर दिन की समाप्ति के समय पर राम तथा कृष्ण दोनों को मथुरा में पहुंचाय दिया ॥ ६ ॥

हे राजन्! दिन मे जाते समय मार्ग में ग्रामों के मनुष्यादि सब वसुदेव के दोनों पुत्रो के दर्शन कर के प्रीति के वसहोने से नेत्रों को नही हटा सके ॥ ७ ॥

तितने में नंदादिक सब ब्रजवासी पहिले से जाकर सहर के पास बगीचे में ठहर कर भगवान् की प्रतीक्षा करते खडे रहे ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

प्रश्रितं विनीतम् ॥ ९ ॥

सगृहश्च प्रविशताम् अवमुच्योचार्य विश्राम्येत्यर्थः ॥ १०—११ ॥

आगच्छ याम गेहान्नः सनाथान् कुर्वधोक्षज ! ।
सहाग्रजः सगोपालैः सुहृद्भिश्च सुहृत्तम ! ॥ १२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

साग्रजः सहगोपालैरित्यर्थः ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

जगदीश्वरोऽपि निजपाणिना तत्पाणिं गृहीत्वा यतो भगवान् भक्तवात्सल्याद्यशेषगुणप्रकटनपर इत्यर्थः । प्रहसन्निवेत्यवज्ञानां सूचयितुमिति भावः ॥ ९ ॥

अथ त्वत्प्रवेशानन्तरमेव पुरीं द्रक्ष्यामः हे तातेति तत्सन्तोषार्थमादरोक्तिः एवमेव मोचनं पुरीदर्शनञ्च कार्यमस्माकमस्तीति विलम्बात् सहैव गमनं न सम्भवेदिति व्यञ्जितं तच्चासङ्कोचेन तद्दर्शनार्थम् ॥ १० ॥

परमार्त्या बहुधा सम्बोधयन् प्रार्थयते । प्रभो इत्यादिना । तत्र नाहमित्यादौ हेतुः हे प्रभो ! सर्वोपरि प्रभवनशीलत्वेन सर्वाश्रय ! ननु तथापि मदाज्ञया प्रविशत तत्राह । त्यक्तुमिति । तत्र हेतुः नाथ इति नाथयति याचयति ददाति सर्वेभ्यः सर्वान् कामानिति हे तथाभूत ! ननूदासीनस्त्यज्यत एवेति चेत्तत्राह । ते तव भक्तम् अनन्यगतिमित्यर्थः । ननु सत्यं कदापि न त्याज्य एव किन्तु स्वच्छन्देन पुरीविहाराद्यर्थमिममल्पकालं स्वगृहं प्रस्थाप्यसे तत्राह । हे भक्तवत्सल ! इति क्षणमपि भक्तत्यागो न तव युक्त इति भावः ॥ ११ ॥

तर्हि किं कार्यं तत्राह । आगच्छेति । नन्वस्मदागमनविज्ञापनाय त्वं कंसं यास्यसि इत्याशङ्क्य त्वदैश्वर्यानुभवेन कंसान्निर्भयतया नेत्याह । याम इति । अहं यूयञ्च सर्वे एव प्रथमतो गृहाण्येव गमिष्यामः तथापि सम्मतिमालक्ष्य सदैन्यं प्रार्थयते नोऽस्मान् सनाथान् कुरु बहुत्वं निजबन्धुवर्गापेक्षया हे अधोक्षज ! इन्द्रियज्ञानागोचर इत्येवम्भूतस्य तव साक्षाद्गमनेनैव सनाथत्वं सिद्ध्यतीति भावः । यद्वा नोऽस्मत्सम्बन्धिनो गेहान् यामः तानेव सनाथान् कुरु दासस्य ते तु स्वामित्वाभावात् त्वद्गमनेनैव सनाथत्वसिद्धेरिति भावः । अतएव नैकाकी चागच्छेरित्याह । सहेति । तैर्व्याख्यातं तत्र छान्दसत्वाद्विपर्ययेण पाठ इति भावः यद्वा सुहृद्भिः पित्रादिभिः तैश्च कीदृशैः सगोपालैः शाकटवलीवर्दरक्षकैरपि सह साकल्येऽव्ययीभावः । "तृतीयासप्तम्योर्बहुल" मित्यमादेशाविकल्पः । ननु सद्य एव कथं घटतां तत्राह । सुहृत् निरुपाधिकृपाकरः साधुः सुहृत्तमस्तद्भक्तः साधुः सुहृत्तमस्त्वं भगवानिति तथाभूतत्वन्माहात्म्येन घटते ननु मद्योग्यतयेत्यर्थः ॥ १२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तान्नन्दादीन् समेत्य जगदीश्वरो भगवान् स्वपाणिना विनीतमक्रूरं पाणिं गृहीत्वा प्रहसन् वक्ष्यमाणमुवाच इवशब्देन हास्ये ईषत्त्वं द्योत्यते ॥ ९ ॥

उक्तमेवाह । भवानिति भवान् सहयानः सरथः पुरीं तत्र स्वगृहमग्रे विशतां वयं त्विहोपवने अवमुच्य उत्तार्य्य विश्राम्येत्यर्थः । अथ प्रातः वो युष्माकं पुरीं मथुरां द्रक्ष्यामः ॥ १० ॥

एवमुक्तः प्राहाक्रूरः । नाहमिति षड्भिः । हे विभो ! भवद्भ्यां रहितो वियुक्तोऽहं पुरीं न प्रवेक्ष्ये हे नाथ ! भक्तं मां त्यक्तुं नार्हसि तत्र हेतुं वदन् सम्बोधयति हे भक्तवत्सलेति ॥ ११ ॥

त्यक्ष्य इति ग्राम्यजनप्रयोगिकुण्डं तत्कथं वेक्ष्ये प्रवेक्ष्ये दुरन्तं दुर्वचं ग्राम्यवचः ग्राम्यस्येव वचो रामकृष्णावानीताविल्येवं विधं वाक्यं कथं वक्ष्ये कंसं प्रति इति शेषः । हे जगत्पते ! कथमभिन्नतया द्रक्ष्ये त्वच्छरीरभूतत्वेन त्वदपृथक्सिद्धान् कंसादीन् त्वत्तः पृथक्सिद्धतया शत्रुभावेन कथं द्रक्ष्ये इत्यर्थः । क्वचिदयं श्लोको न दृश्यते अतो हे अधोक्षज ! त्वमागच्छ यामः त्वयैव सहवयं गमिष्यामः नोऽस्मान् सनाथान् सेश्वरान् कुरू ग्रजः सरामः गोपालैश्च सुहृद्भिश्च सह हे सुरोत्तम ॥ १२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

भवानग्रे प्रविशतां पश्चात्त्वं गृहं व्रज अवमुच्य स्कन्धावरोहं कृत्वा ॥ १०—१३ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

सुहृद्भिः पित्रादिभिः सगोपालैः सकटवलीवर्दरक्षकैरपि सहेति शेषः ॥ १२—१४ ॥

श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी ।

ततोऽक्रूरविसर्जनमाह । तान् समेत्येति । अक्रूरे स्थिते लोकव्यवहारे पितृव्य इति स्वच्छन्दलीला नोचितेति व्यवहारेऽपि निर्बन्धेन नागत इति ख्यापयितुं तान्नन्दादीन् समेत्य अक्रूरं प्रत्याह । भगवानिति । निःशङ्कः बहिः स्थिते कंसः कदाचिदुपद्रवं कुर्यादिति शङ्काया अभावायाह । जगदीश्वर इति । स एव हि जगतो नियन्ता स्वामी ऐश्वर्यं गुप्तं कृत्वा सख्यबन्धुत्वादिप्रकटनार्थं पाणिना पाणिं गृहीत्वा तेन नम्रं प्रहसन् व्यामोहयन् पूर्वावस्थां तस्य सम्पादयन् वक्ष्यमाणमब्रवीत् ॥ ९ ॥

भगवद्वाक्ये चित्तदाढ्यार्थं पृथङ्निरूपणं वचनमेवाह । भवानिति । असम्बन्धख्यापनार्थं भवानिति अस्मत्प्रवेशात्पूर्वमेव अन्यथा तव कार्यं कृतमपि उपद्रवादकृतं मन्येत कंसः ततो गृहेऽपि त्वया गन्तव्यम् अन्यथा कंसः अस्मन्निषेधार्थं प्रेरयेत् तच्चानुचितं यथा तवापराधो न भवति तदर्थं वयमिहैव प्रतिमुच्य शिबिरं कृत्वा अथ भिन्नप्रक्रमेण यावत्कंसः आकारयिष्यति तावत्पुरीं द्रक्ष्यामः अनेन पुरी सम्यक् स्थापिता न वेति ॥ १० ॥

भगवान् मध्ये उदासीनमिवोक्तवानिति तदसहमानः किञ्चित्प्रार्थयति । नाहमिति षड्भिः सर्वे हि भगवद्गुणास्तेन वर्णनीया

पुनीहि पादरजसा गृहान्नो गृहमेधिनाम् ।
यच्छौचेनानुतृप्यन्ति पितरः साग्नयः सुराः ॥ १३ ॥
अवनिज्याङ्घ्रियुगलमासीच्छ्लोक्यो बलिर्महान् ।
ऐश्वर्यमतुलं लेभे गतिं चैकान्तिनां तु या ॥ १४ ॥
आपस्तेऽङ्घ्र्यवनेजिन्यस्त्रींल्लोकाञ्छुचयोऽपुनन् ।
शिरसाधत्त याः शर्वः स्वर्याताः सगरात्मजाः ॥ १५ ॥
देवदेव ! जगन्नाथ ! पुण्यश्रवणकीर्त्तन ! ।
यदूत्तमोत्तमश्लोक ! नारायण ! नमोऽस्तु ते ॥ १६ ॥

श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी ।

इति स ह्येवं ज्ञातवान् यथा कंसादयस्तथायामिति ज्ञात्वा भगवांस्तां दूरीकरोतीति एवं सति भगवान् स्वच्छन्दलीलां करोतु नाम मयाप्यत्रैव स्थातव्यं क्वचिन्नतु भगवद्रहितं पुरं गृहं वा प्रवेष्टव्यम् अत एव वैराग्यविधिः भगवदभावे गृहादिकं त्यक्तव्यमिति अतो भवद्भ्यां रहितः शब्दब्रह्मपरब्रह्मभ्यां मधुदैत्ययुक्तां तत्सम्बन्धिनीं मथुरां न प्रवेक्ष्ये "नैतमृषिं विदित्वा नगरं प्रविशेद्यदि प्रविशेन्मिथो चरित्वा प्रविशे" दिति श्रुतेः शङ्का तु तव नास्तीत्याह । प्रभो ! इति । अतः परमनागमने मत्त्यागो हेतुः तन्न कर्तव्यमिति प्रार्थयति । त्यक्तुं नार्हसीति । नाथे त्यक्ते न कापि पाल्यानां गतिर्भवतीति तत्रापि भक्तं तत्रापि ते अवतारलीलाविशेषभक्तं कार्यार्थे त्याग इति चेत्तत्राह । भक्तवत्सलेति । भक्तवात्सल्यं तिष्ठतीति न कदाचिदपि भक्तास्त्यक्तव्याः ॥ ११ ॥

नगरे स्थानं नास्तीति चेत्तत्राह । आगच्छेति । सर्वैः सहागच्छ गृहं तुल्यमिति ख्यापयितुं याम इति सर्वेषां गमनं तुल्यं निरूपितं नो गेहानिति बहवो वयं भ्रातरः एकैकस्य गृहा अपि बहवः अतो न स्थलसंकोचः ननु विशेषाभावादत्रैव स्थातव्यमिति चेत्तत्राह । सनाथान्कुर्विति । यो हि प्रभुर्भवति स स्वगृहे तिष्ठति न त्वन्यगृहे यद्यस्मद्गृहे त्वया न स्थितं स्यात् तदा अस्मन्नाथो न भवेः । तदा वयमनाथाः अतः सनाथान् कुरु अस्मत्संबन्धेन तवापराधो भविष्यतीति चेत् तत्राह । अधोक्षजेति । ज्ञानविषय एव त्वं न भवसि कुतस्तरां क्रियाविषयो भविष्यसीति अनेन भगवतो ज्ञानशक्तिर्निरूपिता "यस्या मतं तस्य मत" मिति तर्ह्येकाकी समागमिष्यामीत्याशङ्कायामाह । सहाग्रज इति । तवाप्यग्रजस्य सुतरामेव न भयं मान्यश्च गोरक्षणधर्मात् अचातुर्यत्वाच्च गोपालानां भयशङ्कैव नास्ति त्वयि सति केषामपि न भयमिति वक्तुं सुहृद्भिः सहेति गोपाला एव सुहृदः नन्दादयो वा बान्धवाः चकारात् सर्वे सेवकाः अनांसि वृषभादयश्च ननु कथमेतावद्भिः सह गन्तव्यमिति चेत्तत्राह । सुहृद्भिश्च सुहृत्तमेति । स्वामी भवानत्यन्तं सुहृत् भवत्सम्बन्धिनः सुहृत्तराः अन्ये सेवकादयः सुहृदः अतः सर्वैरेवागन्तव्यम् ॥ १२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

प्रश्रितं विनीतं प्रहसन्निवेति तदानन्दनार्थमेव नतु वस्तुतः प्रहसन् मथुरानगरदर्शनेन व्रजनगरत्यागस्मृत्यान्तर्विषादोदयात् ॥ ९ ॥

गृहं स्ववासं च अवमुच्य विश्राम्य ॥ १०—११ ॥

याम एते त्वञ्चाहं चास्माकं गेहान् याम इति कंसमावेदयितुं तत्समीपं प्रथमं न यास्यामिश्वो मारिष्यन् स मे किङ्कर्तुं शक्नुयात् नाहं तस्मात् किञ्चिदपि बिभेमि त्वदैश्वर्यस्य दृष्टत्वादिति भावः । नच मद्गृहे कस्यापि वस्तुनः सङ्कोचस्तस्मात्सर्वेऽपि यूयं गच्छतेत्याह । सहाग्रज इति ॥ १२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

तान् नन्दादीन् समेत्य प्रश्रितं विनीतमक्रूरमाह ॥ ९ ॥

सहयानः सहरथः पुरीं तत्र स्वगृहमग्रे प्रविशताम् वयन्तु इह उपवने अवमुच्य उत्तार्य्य विश्राम्येत्यर्थः । हे तात ! ततः पुरीं द्रक्ष्यामः ॥ १० ॥ १२ ॥

भाषा टीका ।

तदनंतर जगदीश्वर भगवान् ने अक्रूरजी के हाथ को अपने हाथ से पकड़कर हंसकर कहा ॥ ९ ॥

आप आगे से रथ सहित पुरी को जाकर घरको जाओ हम यहां पर उतर कर फिर पुरी को देखैंगे ॥ १० ॥

अक्रूरजी बोले हे प्रभो ! आप दोनों के विना मैं मथुरा पुरी में प्रवेश नही करूंगा हे नाथ ! हे भक्तवत्सल मैं तुमारा भक्त हूं मेरे को आप छोडने को नहीं योग्य हौ ॥ ११ ॥

हे अधोक्षज ! आइये हमारे घरों को कृतार्थ करो हे सुहृत्तम अपने बडे भ्राता सहित गोपालों के सहित सखाओं के सहित चलैंगे ॥ १२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

यच्छौचेन यस्य पादरजसः क्षालनोदकेन गृहाङ्गणस्थितेन ॥ १३ ॥

श्रीधरस्वामिकृतभावार्थदीपिका

श्लोक्यः पुण्यकीर्त्यर्हः एकान्तभक्तानां या गतिस्तां च लेभे ॥ १४ ॥

अपुनन् पवित्रितवत्यः याभिरद्भिः स्वः स्वर्गं प्राप्ताः ॥ १५ ॥

प्रार्थयमानो नमस्करोति । देवदेवेति । अतः परमन्यच्छ्रेयो नास्तीति मत्वा बहुधा सम्बोधयति ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

ननु पित्रग्निसुरादीनां पूजादिना सदा त्वद्गृहाणां सनाथता भात्येव तत्राह । पुनीहि गृहमेधिनां नित्यं गृहेषु पञ्चसूनापराणाम् अनुशब्देन सकृल्लब्धेनापि निरन्तरं तृप्यन्तीति ध्वन्यते पितर इति । पित्रादीनामनुतृप्त्या गार्हस्थ्यकृत्यसमाप्त्या गृहस्थानां स्वत एव सुखं कृतार्थता च स्यादिति भावः ॥ १३ ॥

नचेयं स्तुतिर्दृष्टफलत्वात् यद्वा ननु तर्हि रजस्तच्छौचजलं वा तत्र नीयतामित्याशङ्क्य श्रीवलिवत्तत्र साक्षात् प्रक्षालयितुमिच्छामीत्याशयेनाह । अवनिज्येति । महान् श्लोक्यः पुण्यकीर्तिमत्सु श्रेष्ठ इत्यर्थः । श्रीव्यासादिभिरपि प्रशस्तत्वात् अतुळमिन्द्रादीनामपि दुर्लभत्वात् गतिं प्राप्यं तां च लेभे इहैव द्वारपालत्वेन श्रीभगवतः साक्षात् प्राप्तत्वात् ॥ १४ ॥

अहो आस्तां तावत् त्वत्तदवनेजनजलानां माहात्म्यं परम्परयापि तत्स्पृष्टानां माहात्म्यं परमाश्चर्यमित्याह । आप इति । शुचय इति । महापातकिपावनेनान्यतीर्थानामिवाशुचित्वं निरस्तं न केवलं त्रीन् लोकानेवापुनन् लोकपालमुख्यं सर्ववन्द्यं श्रीशिवमपीत्याह । शिरसेति । तथा चोक्तं प्रथमस्कन्धे शेषं पुनातीति बहिः श्मशानादिसम्बन्धं तिरस्करोतीत्यर्थः । इति तासां परमपुरुषार्थरूपत्वमुक्तम् अहो साक्षात्तत्स्पर्शेन पावनत्वं किं वक्तव्यं महापराधिनां चिरं स्वकृतपापेनैव दग्धानामपि दाहस्थानस्पर्शमात्रेणैव परमशोधनं ब्रह्मलोकप्रापणञ्चाह । स्वर्गता इति । स्वरिति त्रिलोकीपक्षे ब्रह्मलोकपर्यन्तस्य स्वर्गत्वाद्ब्रह्मलोकमित्यर्थः । तत्तु नवमे व्यक्तमेवमादौ पावनत्वं ततः परमवन्द्यत्वं ततश्च सुदुस्तरमहदपराधादपि निस्तारकत्वं परमपदप्रापकत्वञ्च क्रमेणोक्तम् ॥ १५ ॥

हे देवदेवेति । तत्र त्वद्गमनेन ध्रुवं महापुण्यं स्यादेवेति भावः । यद्वा देवानां ब्रह्मादीनां देव पूज्येति यद्यपि त एव सेवकास्त्वदनुग्राह्यास्तथापि जगन्नाथत्वेन मामप्यनुग्रहीतुमर्हसीति भावः । ननु पुण्यवत एवानुगृह्णामि तत्राह । पुण्येति । तव श्रवणादिनाहमपि पुण्यवानेव यद्वा यस्य श्रवणकीर्त्तनाभ्यामपि पुण्यं स्यात्तस्य दर्शनादिना ममापि महापुण्यं जातमेवेति भावः । किञ्च यदूत्तमेति । यदुकुलावतीर्णेन तच्छ्रेष्ठेन त्वया तत्कुलजोऽहमनुग्रहीतुं योग्य इति भावः । ननु तथापि कंससङ्गी त्वं श्रीगोकुले जातापराधश्च कथमनुग्राह्य इत्याशङ्क्याह । उत्तमःश्लोकेति । पूतनादीनामपि तादृशगतिदानेन सर्वोत्कृष्टनिजकीर्त्त्यपेक्षयेत्यर्थः । नन्वीश्वरस्य मम तादृशीच्छा कदाचिद्भवेत् कदाचिन्न भवेदित्याशङ्क्याह । नारं जीवसमूहस्तस्यायनमाश्रयेति भवतु मा वा तथापि जीवमात्रस्य त्वमेव गतिरिति भावः । परमवैयग्र्येण सपादग्रहं प्रणमति । नम इति । एवं श्रीकृष्णमेक प्रस्यैव प्रार्थनादिकम् अन्योऽन्यं महास्निग्धतया श्रीबलदेवेन सह तस्याभेदात् तस्मात् प्राधान्याच्च ॥ १६ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

श्लोकिन वलिः महावलिः महानासीदित्यन्वयः । लेभे त्वत्सङ्कल्पादतुलमैश्वर्यमित्यर्थः ॥ १४ ॥

अवनेजनं क्षालनं स्वर्याताः ताभिरिति शेषः ॥ १५ - २४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

पादरजसा गृहमेधिनामस्माकं गृहं पुनीहि पवित्रीकुरु यस्य पादरजशौचेन क्षालनादकेन पीतेन गृहाङ्गणस्थितेन शिरसि धृतेन चास्माकं पितरोऽग्नयः सुराश्च तृप्यन्ति तृप्ता भवन्ति तेन पादरजसेत्यन्वयः ॥ १३ ॥

किञ्च तवाङ्घ्रियुगलमवनिज्य प्रक्षाल्य बलिर्वैरोचनिर्बृहच्छ्लोक्यः विपुलकीर्त्यर्हः महान् गुणैरिति शेषः । आसीद्बभूव त्वत्सङ्कल्पालब्धप्रायमैश्वर्यं लेभे प्राप्तवान् तथैकान्तिनामनन्यप्रयोजनानां प्रपन्नानां या गतिस्त्वत्प्राप्तिरूपा तां च लेभे लब्धवत्प्रायो बभूव ॥ १४ ॥

किञ्च तवाङ्घ्र्योरवनेजन्यः क्षालिन्य आपः गाङ्गाः शुचयः पवित्राः त्रींल्लोकानपुनन् पवित्रितवत्यः किञ्च या आपः शर्वो रुद्रः शिरसा धृतवान् किञ्च याभिरद्भिः सगरात्मजाः स्वर्गं गता बभूवुः एवंविधमहामाहिमशालिपवित्रतमगङ्गादिरूपतीर्थाश्रयपादरजसा पुनीहि इत्यन्वयः ॥ १५ ॥

एवं प्रार्थयमानोऽनितरसाधारणधर्मयुक्तं सम्बोधयन्नमस्करोति देवदेवेति । देवानां ब्रह्मादीनामपि देव जगतो नाथ पुण्यं शृण्वतां वदतां च पुण्यावहं यस्य श्रवणं कीर्त्तनञ्च तद्यस्य स पुण्यश्रवणकीर्त्तनः तस्य सम्बोधनम् उत्तमैर्ब्रह्मादिभिः श्लोक्यते ईड्यते इति तथा उत्तमः श्लोको यशो यस्येति वा ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावळी ।

अवनिज्य प्रक्षाल्य एकान्तिनां भक्तमुख्यानां या गतिःक्लृप्ता ताम् ॥ १४ ॥

अपुनन् शुद्धांश्चक्रुः ॥ १५ ॥ १६ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

यशोरूपं भगवन्तं निरूपयति । पुनीहीति । अनेन सनाथत्वमात्रत्वं चेत् वचनेनापि सनाथत्वं संपद्यत इति किमागमनेनेत्याशङ्का परिहृता यतो गृहपावित्र्यमाधिकं कर्तव्यमिति पावित्र्योपायमाह । पादरजसेति । चरणरजो हि भगवदीयत्वं संपादयतीति परमशुद्धत्वैव । तथात्वं भवतीति पादरजसा गृहाणां पावनं कर्त्तव्यं तत्रेतो नयने अल्पमेव रजो भवेत् तत्र गमने तु सर्वैव भूः चरणरजो भवतीति सर्वेषामेव गृहाणां पावनं भवति ननु भगवदीया भवन्तः गृहाश्च तथा सति का पावनापेक्षा इति चेत्तत्राह । गृहमेधिनामिति । गृहे मेधा हि सा नित्यमु-

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

त्पद्यते तथा सति य एव गृहस्थो भवति ज्ञाननिष्ठो भक्तो वा स एव लिप्यते कालगुणैरिव ते चेद्गृहाः अपहतपाप्मानो भवन्ति तदैव निस्तार इति । किं च न केवलं जीवतामेव भगवदागमेन उपकारः किन्तु सर्वेषामेव पित्रादीनां परमा तृप्ति-रित्याह । यच्छौचेनेति । यस्य भगवतः शौचेन चरणोदकेन पितरः अग्नयो देवाश्च अनुतृप्ता भवन्ति । यतो ब्रह्मदण्डहता अपि मुच्यन्ते । अतस्तव चरणोदकं पितृणां परमानन्दहेतु-र्भवति । तेषां कव्यं गृहीत्वा प्रयच्छत्यग्निरिति तेषां च तृप्ति-रपेक्ष्यते । तत्र प्रविष्टा एव पितरो जाता इति च तथा तदधिष्ठात्र्यो देवताः यज्ञो देवाः पितरश्च तृप्ता भवन्तीत्युक्तं भवति ॥ १३ ॥

श्रियं निरूपयन् चरणोदकस्य माहात्म्यमाह । अवनिज्याङ्घ्रि-युगलमिति । चरणोदकनिर्माणेन प्रक्षालनक्रियया वलेस्त्रयं जातं कीर्त्तिः ऐश्वर्यं भक्तिर्मोक्षो वा श्लोक्योऽपि जातः महानपि जातः महत्त्वं सर्वलोकप्रसिद्धिः सत्यं शौचमित्यादि गुणवत्त्वं प्रार्थ्यो महत्त्वमिच्छद्भिरिति वाक्यात् ऐश्वर्यमिन्द्रत्वमतुलं ततो-ऽप्यधिकं भगवान् वश इति । एकान्तिनां भक्तानां या गतिः स्वतन्त्रा भक्तिः सायुज्यं वा येति सर्वलोकप्रसिद्धा "आनिच्छतो गतिमण्वीं प्रयुङ्क्ते" इत्यादिवाक्यासिद्धा ॥ १४ ॥

धर्मं निरूपयन् वीर्यं वा चरणोदकमेव स्तौति । आप इति । ते त्रिविक्रमस्य अङ्घ्र्यवनेजन्यः आपः चरणक्षालनो-दकानि त्रीन् लोकान् मन्दाकिन्यादिभेदेन अपुनन् यतः स्वयं शुचयः शुद्धाः नखोदकस्याशुद्धत्वमाशङ्क्य तथोक्तवान् न केवलं पवित्रत्वजनकत्वं किन्तु आधिदैविकत्वसम्पादकत्वमपीत्याह । शिरसाधत्त याः शर्व इति । शर्वो महादेवः "शिवः शिवो भू" दि-त्यत्र फलं विस्तरेण निरूपितं ततो भूमिङ्गतापि ब्रह्मदण्डहता-नपि पावयामासेत्याह । स्वर्याता इति । सगरस्य पुत्राः दुरात्मत्वेन प्रसिद्धाः स्वर्गं गताः इन्द्रेण नाशार्थे कृतप्रयत्ना अपि चरणोदकेनेन्द्रसमानाः कृता इत्यर्थः ॥ १५ ॥

भगवत ऐश्वर्यं कीर्त्तयन् नमस्यति । ऐश्वर्यं षड्विधम् उपास्य-त्वेन प्रभुत्वेन दोषनिवारकत्वेन गुणाधायकत्वेन उत्तमस्तु-त्यत्वेन जगत्कारणत्वेन च । देवदेव इति । तत्र भगवान् देवानामपि देवः उपास्यानामप्युपास्यः जगत एव नाथः नत्वेकदेशस्य पुण्ये पापनिवारके श्रवणकीर्त्तने यस्य यथा श्रवणं तथैव कीर्तनं पाप-नाशकम् । यदूत्तमेति । यदोरपि गुणाधायकः "अकर्ताश्चरितं पितु" रिति न्यायेन पितुः प्रतिकूलत्वात् न कस्यापि साध्यः तस्यापि गुणान् धत्त इति उत्तमैरपि व्यासादिभिः श्लोक्यत इति नारा-यणो जगत्कर्त्ता इति एवं षड्गुणपूर्णं नमस्यति । नमोऽस्तुत इति । नमस्कारप्रार्थनया नित्यं नमस्कार उक्तः ॥ १६ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

यच्छौचेन यत्पादरजःक्षालनोदकेन ॥ १३ ॥

श्लोक्या महायशोऽर्हः गतिं च लेभे या एकान्तिनामेव गतिः क्वचित्पाठः ॥ १४ ॥

आपो गङ्गाभिधानाः शुचयो ऽप्राकृत्यः स्वर्याता इति यत इति शेषः ॥ १५ ॥

हे देवदेव ! त्वं देवेषु दीव्यसि मद्गृहेऽपि अद्य दीव्य त्वं जगतां नाथः अद्य मद्गृहनाथो भव हे पुण्यश्रवणकीर्तन ! अद्य मद्गृहमपि पुण्यं कुरु हे यदूत्तम ! यदोर्मम गेहमागच्छ हे उत्तम श्लोक ! पतित पावनत्वयशः प्रकाशयन् पातितं मद्गृहं पुनीहि ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

यत् यस्य पादरजसः शौचेन क्षालनोदकेन गृहाङ्गणास्थि-तेन ॥ १३ ॥

बलिः तवाङ्घ्रियुगलमवनिज्य प्रक्षाल्य श्लोक्यः ! पुण्यकी-र्त्यर्हैः महांश्चासीत् ऐश्वर्य्यम् एकान्तिनां भागवतानां या गति-स्तां लेभे च ॥ १४ ॥

किञ्च ते अङ्घ्र्योः अवनेजन्यः शौचभूता आपः शुचयः पवित्राः त्रीन् लोकान् अपुनन् पावित्रितवत्यः सगरात्मजा ब्रह्मदण्डहताः स्वः स्वर्गं याताः याभिरिति शेषः । किम्बहुना याः सर्वः शिवः शिरसा-ऽधत्त मस्तकेन धृतवान् ॥ १५ ॥

हे देवदेव ! ब्रह्मशिवादिपूज्य हे जगन्नाथ ! पुण्ये श्रवणकीर्तने यस्य स तथा हे यदूत्तम । यदुश्रेष्ठ ! हे उत्तमश्लोकः पुण्यकीर्ते हे नारा-यण अखिलनरसमूहनिवासस्थान ते ! नमोऽस्तु पादरजसा पुनीहीति प्रार्थना ॥ १६ ॥

भाषा टीका ।

हम गृहस्थों के घरों को अपने पाद रज से पवित्र करो जिस आपके चरण जल के पवित्रता से अग्नि पितर देवता सब तृप्त होजाते हैं ॥ १३ ॥

आपके चरण युगल को प्रक्षालन करके बली राजा बड़ा प्रशंसनीय हो गया बड़े ऐश्वर्य को प्राप्त भया और जो एका-न्तियों की गति है तिसको भी प्राप्त होगया ॥ १४ ॥

पापों को नाश करने वाले आपके चरणों के धोये जल जो पवित्र होकर जगत् को पवित्र करते भये जिन गंगा रूप जलों को मस्तक में महादेवजी ने धारण किया है जिन से सगर के पुत्र सब स्वर्ग को चले गये ॥ १५ ॥

हे देव देव ! हे जगन्नाथ ! हे पुण्य श्रवण कीर्तन ! हे यदू-त्तम ! हे उत्तमश्लोक ! हे नारायण ! आपके अर्थ नम-स्कार है ॥ १६ ॥

श्रीभगवानुवाच ॥

आयास्ये भवतो गेहमहमार्यसमन्वितः ।
यदुचक्रद्रुहं हत्वा वितरिष्ये सुहृत्प्रियम् ॥ १७ ॥

॥ श्रीशुक उवाच ॥

एवमुक्तो भगवता सोऽक्रूरो विमना इव ।
पुरीं प्रविष्टः कंसाय कर्मावेद्य गृहं ययौ ॥ १८ ॥
अथापराह्णे भगवान् कृष्णः सङ्कर्षणान्वितः ।
मथुरां प्राविशद्गोपैर्दिदृक्षुः परिवारितः ॥ १६ ॥
ददर्श तां स्फाटिकतुङ्गगोपुरद्वारां बृहद्धेमकपाटतोरणाम् ।
ताम्रारकोष्ठां परिखादुरासदामुद्यानरम्योपवनोपशोभिताम् ॥ २० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

आदौ तावद्यदुचक्राय द्रुह्यतीति यदुचक्रध्रुक् तं कंसं हत्वा सुहृदां प्रियं वितरिष्ये दास्यामि ॥ १७ ॥

रामकृष्णावानीताविति स्वकृतं कर्मावेद्य समर्प्येति ॥ १८ ॥

गोपैः परिवारितः प्राविशत् ॥ १९ ॥

श्रीकृष्णदृष्टां पुरीमनुवर्णयति चतुर्भिः । ददर्श तामिति । स्फाटिकानि तुङ्गानि गोपुराणि पुरद्वाराणि गृहद्वाराणि च यस्यां ताम् बृहन्ति हेममयानि कपाटानि तोरणानि च यस्यां ताम् ताम्रश्चाऽऽरः आरकूटश्च तन्मयाः कोष्ठा धान्यागाराश्वशालादयो यस्यां ताम् परिखाः परितः खातगर्त्तास्ताभिर्दुरासदां दुर्गमाम् उद्यानानि दूरस्थानानि वनानि रम्याण्युपवनानि च निकटानि तैरुपशोभिताम् ॥ २० ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

आर्येण श्रीरामेण सम्यगन्वित इति गोपैः साहित्यं निरस्तं तेषां चिरं तत्रानवस्थानात्, कदेत्यपेक्षायामाह । यदुचक्रेति । यदेति श्लेषः सङ्केतेनैव तदुक्तिः मन्त्रभङ्गभयात् दुष्टत्वाद्वा सुहृदां यादवानां श्रीवसुदेवमोचनादिना प्रियं प्रीतिं पितरौ बद्धौ सर्वे यादवाश्चात्र दुःखिताः अतोऽत्रागतस्य मम त्वद्गृहगमनादिनातिथ्यसुखं न योग्यमिति भावः ॥ १७॥

स परमोत्सुकः श्रीभगवदानयने परमहृष्टोऽपि च इवेति वक्यालङ्कारे यद्वा आयास्य इति तदङ्गीकारेण कंसहननप्रतिज्ञादिना चात्यन्तवैमनस्याभावात् गृहं ययाविति प्रायः श्वः कंसमारयित्वा श्रीभगवानागमिष्यतीति विभाव्य बहुधा निजगृहमुपस्कर्तुमिति ज्ञेयम् । अतएव तदासक्त्या तत्र तस्य श्रीभगवदागमनपर्यन्तमन्यत् कर्मादिकं किमप्यग्रे कुत्रापि न श्रूयते ॥ १८ ॥

गोपैर्वयस्यैः ॥ १९ ॥

चतुष्केण पुरीं वर्णयन्नादौ तस्याः स्वाभाविकीं शोभां वर्णयति । ददर्शेति सार्द्धद्वयेन । आरः आरकूटः पित्तलं परिखाः पार्श्वद्वये ज्ञेयाः पूर्वोत्तरयोः प्रायः श्रीयमुनाया एव परिखारूपेण वर्त्तमानत्वात् उद्यानं फलप्रधानम् उपवनं पुष्पप्रधानं पूर्वमुक्तं शकटावरणस्थानोपवनकृत्रिमं बाह्यञ्च उपवनस्य सौन्दर्यादिविशेषण रम्येति विशेषणम् अन्यत्तैः यद्वा कोष्ठानि दुर्गप्राकाराः उद्यानरम्या चासावुपवनोपशोभिता चेति तां प्रत्येकं विशेषणसाधिक्यापेक्षया क्रमस्त्वेवम् उद्यानानि उपवनानि परिखाः कोष्ठानि तत्र गोपुराणि अन्यद्वाराणि द्वार्षु हेमकपाटानि ॥ २० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

इत्थं प्रार्थितः प्राह भगवान् । आयास्य इति । यदुचक्राय यदुवंशजसमूहाय द्रुह्यतीति यदुचक्रध्रुक् तं यदुचक्रद्रुहं कंसं हत्वा ताताऽग्रजसमन्वितोऽहं भवतो गेहम्प्रत्यायास्ये आगमिष्यामि तथान्येषां च सुहृदां प्रियं वितरिष्ये करिष्यामि ॥ १७॥

इत्थं भगवतोक्तोऽक्रूरः विमना इव किञ्चिदसन्तुष्टमना इव भूत्वा पुरीं प्रविष्टः कर्म रामकृष्णावानीताविति स्वकृतं कर्मावेद्य स्वगृहं ययौ ॥ १८ ॥

अथ श्वोऽपराह्णे भगवान् कृष्णः सङ्कर्षणेनान्वितो गोपैः परिवृतो द्रष्टुमिच्छुः श्रीमथुरां प्राविशत् ॥ १६ ॥

तां मथुरां ददर्श कथम्भूतां स्फाटिकमयानि तुङ्गान्युच्छ्रितानि गोपुराणि पुरद्वाराणि अन्यानि च द्वाराणि यस्यां ताम्रम् आरम् आरकूटश्च तन्मयाः प्रकोष्ठकाः धान्यादिशालादयो यस्यां तां परिखाभिः परितः खाताभिः दुर्गमाम् उद्यानानि दूरस्थानि रम्याण्युपवनानि च निकटानि तै रुपशोभिताम् ॥ २० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

यदुवर्गद्रुहं कंसम् ॥ १७ ॥

त्वयोक्तं कर्म मया कृतमिति ॥ १८ ॥ १६ ॥

स्फाटिकानि स्फटिकरत्ननिर्मितानि तुङ्गानि च गोपुराणि पुर-

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

द्वाराणि यस्यां सा तथा बृहन्ति विशालानि स्फुरन्ति शोभमानानि हेम्ना निर्मितानि कपाटानि तोरणानि च यस्यां सा यथा ताम्रैरारैरारकूटैर्लोहविशेषैर्निर्मितानि कोष्ठान्यन्तर्भवनानि यस्यां सा तथा आराण्यारकूटमित्यभिधानं यद्वा ताम्रेण विरचिते आरकोष्ठे अट्टालावयववप्रे यस्यां सा यद्वा ताम्रकृतानि अराणि दलानि यस्मिंस्तथा ताम्रारं कोष्ठं यस्यां सा तथा सा च आसीमा परिखा खातनदी यस्यां सा तथा ताम्रारकोष्ठापरिखाम् अत एव दुरासदां दुष्प्रवेशां ताम्रारकोष्ठां परिखादुरासदामितिपठन्ति उद्यानैः सर्वसाधारणवनै रम्या रमणीया च उपवनानामारामाणां प्रमदावनानामालिः पङ्क्तिस्तया शोभिताम् उद्यानरम्योपवनालिशोभिताम् ॥ २० ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

तदा भगवान् नित्यकार्यकर्त्तेति भगवत्कृतस्य विघाताभावाच्च तावत् पुरीं द्रक्ष्यामह इति वाक्यात् आगमनस्य प्रार्थितत्वात् कालान्तरे समागन्तव्यमित्याह । आयास्य इति । उदासीनवचनाभावाय स्वाभिप्रेतं चाह । आगमिष्यामि परमार्थसमन्वितः इदानीं विद्यमानानां मध्ये बलभद्रसहितः प्रार्थितानां पूरणार्थमुद्धवः समागमिष्यतीति भावः । तर्हि आभ्यामेव गन्तव्यमिदानीमेवेति चेत्तत्राह । यदूचक्रद्रुहं हत्वेति । सर्वेषामेव यादवानां चक्रस्य यो द्रोहकर्त्ता तं कंसं हत्वा सिद्धवत्कारेण कथनात् सन्देहोऽपि अप्रार्थितोऽप्यायास्ये समागमने प्रयोजनं सूचयति । वितरिष्य इति । सुहृदामत्रत्यानां पाण्डवानां च प्रियं वितरिष्य इति अनेन तेषां सुखार्थं त्वां प्रेषयिष्यामि तदर्थमागमिष्यामीति सूचितम् ॥ १७ ॥

एवमागमनं निर्द्धार्य भगवदाज्ञया गृहे गत इत्याह । एवमुक्त इति । भगवता अप्रतिहतसामर्थ्येन एवमाज्ञप्तः इदानीमेव नेष्टं सिद्धमिति विमनाः अग्रे कार्यमपि करिष्यतीति इव स्वयं प्रथमतः एव पुरीं प्रविष्टः कंसाय भगवानानीत इति स्वकृतं कर्मावेद्य गृहं ययौ शीघ्रमेव स्वगृहज्ञतः ॥ १८ ॥

एवं पूर्वसम्बन्धिनां निरोधमुक्त्वा वार्त्तयैव पूर्वमपि निरोधं सम्पाद्य स्वरूपेणापि सम्पादयितुं स्वयं मथुरां दृष्टवानित्याह । अथेति । अथ भिन्नक्रमेण मित्रभूतैरेव गोपालैः सहापराह्णे तृतीये भागे भगवान् आविष्कृतसर्वधर्मा कृष्णः एतदर्थमेवावतीर्णः कंसमारणार्थं यत्नः कर्त्तव्य इति सङ्कर्षणसमन्वितः अन्यथा उभयोरवतारो न स्यात् । गोपैः परिवृत इति । एतैः सह एतावत्कालं क्रीडा कृतेति ज्ञापनार्थं शोभार्थं मनसि शङ्काभावार्थं तेभ्यः माहात्म्यप्रदर्शनार्थं च मथुरां स्वनगरीं प्रकर्षेणाविशत् सामीप्ये सप्तमी पुरद्वारनिकटे गत इत्यर्थः ॥ १९ ॥

ततो भगवान् दृष्टवानित्याह । ददर्शेति । भगवद्दृष्टां पुरीं वर्णयति चतुर्भिः । पुरुषार्थचतुष्टयपूर्णां स्वरूपतो द्रव्यतश्च वैचित्र्येणाप्यनुत्तमाम् अलंकृतां सांप्रतं तु भगवद्दर्शनार्थिभिः तां मथुरां दृष्ट्वैव सन्तोषं प्रापितवान् स्फाटिकानि तुङ्गानि गोपुराणि पुरद्वाराणि च यस्यां द्वारादिषु बृहन्ति सुवर्णकपाटानि तोरणानि च यस्यां ताम्रमयाः आराः कोष्ठानि च प्राकाराः यस्याः केचित्तु आरशब्देन आरकूटमाहुः ताम्रमयान्यारकूटमयानि च कोष्ठानि यस्याः परिखा परितो गर्त्तः तया कृत्वा दुरासदां यमुना तु दूर इति परिखाया न बाधः उद्यानानि पुष्पप्रधानवाटिकाः तैः रम्याम् उपवनैश्च फलप्रधानैः उपसमीपे शोभितां द्वारप्राकारपरिखाफलपुष्पैः सुशोभिता । पञ्चधा नगरी रम्या सालंकारा च रूपिता ॥ २० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

सत्यं भो मां यदूत्तमं ब्रूषे तर्हि यदुचक्रद्रुहं हत्वैव भवतो गेहमायास्ये ॥ १७ ॥ १८ ॥

गोपैः परिवारितो युक्तः ॥ १९ ॥

पुरीं वर्णयति चतुर्भिः । स्फाटिकानि तुङ्गानि गोपुराणि पुरद्वाराणि द्वाराणि अन्यानि च यस्यां तां बृहन्ति हेममयानि कवाटानि तोरणानि बहिर्द्वाराणि च यस्यां तां ताम्रं च आरः पित्तलं च तन्मयाः कोष्ठाः धान्याद्यागारा यस्यां तां परिखाः परितः खाता गर्त्तास्ताभिर्दुरासदां सौवर्णाः शृङ्गाटकाश्चतुष्पथाः हर्म्याणि धनिगृहाणि निष्कुटा गृहारामास्तैः श्रेणीनाम् एकरूपशिल्पोपजीविनां सभाभिरुपवेशस्थानैरन्यैश्च भवनैरलंकृतां वैडुर्य्यादिरत्नैर्जुष्टेषु वलभ्यादिषु आविष्टैरुपविष्टैरासक्तैर्वा पारावतैर्बर्हिभिश्च नादितां तत्तत्प्रतिध्वनिमत्त्वेन तैरेव कारितनादामित्यर्थः । तत्र बलभी गृहचूडेति क्षीरस्वामी आच्छादनं स्याद्वलभी गृहाणामिति हलायुधः बलभी चन्द्रशालिकेति त्रिकाण्डशेषः सा च सर्वगृहोपरिवर्त्तिनी छाया । वेदिर्गृहाग्रे इष्टकादिबद्धा विश्रान्तिभूः । जालामुखरन्ध्राणि गवाक्षच्छिद्राणि कुट्टिमानि मणिबद्धभूमयः । रथ्या राजमार्गाः आपणाः पण्यवीथयः मार्गा अवान्तरवर्त्मानि चत्वराण्यङ्गणानि आपूर्णैः कुम्भैः दधिचन्दनत्यादिविषद्भिर्विशेषणविशिष्टैः स्वलंकृतानि द्वाराणि येषां ते गृहा यस्यां तां वृन्दं फलसंहतिः रम्भाः कदल्यः क्रमुकाः केतवो ध्वजाः सपताकाः पट्टिका वितस्तिविस्तरपट्टवस्त्रखण्डानि अत्रेयं रीतिः द्वारेषूभयतस्तण्डुलानामुपरि कुम्भाः तत्परितः प्रसूनावलयः कुम्भानाङ्कण्ठे पट्टिकामुखेषु चूतादिपल्लवाः तदुपरि स्वर्णपात्रे दीपावलयः कुम्भानां पार्श्वद्वये रम्भावृक्षद्वयम् अग्रे पश्चाच्च क्रमुकवृक्षद्वयम् केतवः कुम्भालम्बाः ॥ २०—२३ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

एवं प्रार्थितो भगवानाह । आयास्ये इति । यदुचक्राय द्रुह्यतीति यदुचक्रध्रुक् तं कंसं हत्वा भवतो गेहमायास्ये तथान्येषामपि सुहृदां प्रियं वितरिष्ये ॥ १७ ॥

यदर्थं प्रेषितोऽस्मि तन्मया संपादितमिति स्वकृतं कर्मावेद्य गृहं ययौ ॥ १८ ॥

भगवान् सर्वं कर्तुं कुशलोऽपि सबलः गोपैः परिवारितः अथाक्रूरगमनानन्तरम् अपराह्णे तद्दिनशेषे मथुरां प्राविशत् ॥ १९ ॥

मथुरां वर्णयति । ददर्शेति चतुर्भिः । तां मथुरां ददर्श भगवानिति शेषः । कथंभूताम् स्फाटिकानि स्फटिकमयानि तुङ्गान्युन्नतानि गोपुराणि पुरद्वाराणि अन्यानि च द्वाराणि यस्यां तां बृहन्ति हेममयानि कपाटानि तोरणानि च यस्याम् ताम्रं च आरः आरकूटश्च तन्मयाः कोष्ठाः यस्यां ताम् परिखाभिर्दुरासदाम् दुर्गमाम् उद्यानैर्दूरस्थैर्वनैर्रम्या उपवनैः समीपस्थैर्वनैरुपशोभिता सा च सा च ताम् ॥ २० ॥

सौवर्णशृङ्गाटकहर्म्यनिष्कुटैः श्रेणीसभाभिर्भवनैरुपस्कृताम् ।
वैदूर्यवज्रामलनीलविद्रुमैर्मुक्ताहरिद्भिर्वलभीषु वेदिषु ॥ २१ ॥
जुष्टेषु जालामुखरन्ध्रकुट्टिमेष्वाविष्टपारावतबर्हिनादिताम् ।
संसिक्तरथ्यापणमार्गचत्वरां प्रकीर्णमाल्याङ्कुरलाजतण्डुलाम् ॥ २२ ॥
आपूर्णकुम्भैर्दधिचन्दनोक्षितैः प्रसूनदीपावलिभिः सपल्लवैः ।
सवृन्दरम्भाक्रमुकैः सकेतुभिः स्वलंकृतद्वारगृहां सपट्टिकैः ॥ २३ ॥
तां सम्प्रविष्टौ वसुदेवनन्दनौ वृतौ वयस्यैर्नरदेववर्त्मना ।
द्रष्टुं समीयुस्त्वरिताः पुरस्त्रियो हर्म्याणि चैवारुरुहुर्नृपोत्सुकाः ॥ २४ ॥

भाषा टीका ।

श्रीभगवान् बोले मैं बलदेवजी के सहित आपके घर आऊंगा सब यादवों के द्रोही को मारकर आने से सुहृदों की प्रसन्नता करूंगा ॥ १७ ॥

श्रीशुकदेवजी बोले भगवान् के ऐसे कहने से वे अक्रूरजी उदास से होकर पुर में प्रविष्ट भये कंसके अर्थ कृत कार्य को निवेदन करके अपने घर को गये ॥ १८ ॥

इसके अनंतर भगवान् तीसरेपहर में बलदेवजी के सहित साथ गोपालों के सहित मिलकर देखने की इछा से मथुरापुरी मे प्रवेश करते भये ॥ १९ ॥

उहां पर भगवान् ने मथुरा को देखा कि जिसमें स्फटिक मणिके द्वारोंके गोपुर हैं वडे वडे सुवर्ण के किवाडों से तथा तोरणों से शोभित है तामाके तथा पतिलके धानादि रखने के कोठे जिसमें वन रहे हैं वडी भारी खाइसे प्रवेश होने योग्य नहीं है वाहिर उपवन वगी चाआओं से अति शोभित है ॥ २० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

सौवर्णाः शृङ्गाटकाश्चतुष्पथा हर्म्याणि धनिनां गृहाणि च निष्कुटा गृहोचिता आरामाश्च तैः श्रेणीनामेकरूपशिल्पोपजीविनां सभाभिरुपवेशस्थानैरन्यैश्च भवनैर्गृहैरुपस्कृतामलंकृताम् अमलाः स्फटिकाः हरितो मरकता वैदूर्यादिरत्नैर्जुष्टेषु वलभ्यादिष्वाविष्टै रुपविष्टैः पारावतैर्बर्हिभिश्च नादितां तत्र वलभ्यो गृहपुरोभागेषु वक्रदारुच्छादनानि वेदयो वलभीनामधोदेशे विरचिता अवष्टम्भवेदिकाः जालामुखरन्ध्राणि गवाक्षच्छिद्राणि कुट्टिमानि मणिबद्धा भूमयस्तेष्विति रथ्या राजमार्गाः आपणाः पण्यवीथयः मार्गा अन्ये च चत्वराण्यङ्गणानि संसिक्तानि रथ्यादीनि यस्यां तां प्रकीर्णा माल्यादयो यस्यां ताम् ॥ २१-२२ ॥

तथा स्वलंकृतानि द्वाराणि येषां ते गृहा यस्यां ताम् कैः आपूर्णैः कुम्भैर्दध्ना चन्दनेन चोक्षितैः सिक्तैः प्रसूनानां दीपानां चावलयो येषु तैः वृन्दैः फलगुच्छैरुपलक्षिता रम्भाः क्रमुकाश्च तत्सहितैः सकेतुभिः केतवो ध्वजास्तत्सहितैः पट्टिका वितस्तिविस्तारपट्टवस्त्राणि तत्सहितैः तत्रेयं रीतिः द्वारेषूभयतस्तण्डुलानामुपरि कुम्भास्तदुपरितः प्रसूनावलयः कण्ठे पट्टिका मुखे चूतादिपल्लवास्तदुपरि पात्रान्तरे दीपावलयस्तत्सन्निधौ रम्भाक्रमुकाः केतवस्तोरणानि चेति ॥ २३ ॥

नरदेववर्त्मना राजमार्गेण तां पुरीं सम्प्रविष्टाविति द्वितीयान्तम् ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

सौवर्णेति तैर्व्याख्यातम् तत्र वलभी पटलाधारो वंश्यपञ्जरः तस्य चूडा वा इति क्षीरस्वामी आच्छादनं स्याद्वलभी गृहाणामिति हलायुधः तत्र छाजेति भाषा मध्यदेशीयानां सा चेष्टकादिनिर्मितगृहप्रान्ते पाषाणादिनिर्मितच्छादनश्रेणी वलभीश्चन्द्रशालिकेति त्रिकाण्डशेषः सा च गृहोपरि गृहं तथा च माघकाव्ये "यस्यामसेवन्त नमद्वलीकाः समं वधूभिर्वलभीर्युवानः" इति वेदिर्गृहाग्रे इष्टकादिबद्धा विश्रान्तिभूः वलभ्यादिषु आविष्टा उपविष्टाः किम्वा तेषु वर्त्तमाना ये आविष्टा मत्ताः पारावतादयस्तैर्नादितां कारितनादां तत्प्रतिध्वनियुक्तान्तर्गृहामित्यर्थः ॥ २१ ॥

अधुना लोकेषु धनुर्महख्यापनार्थं कंसेन कृतां यद्वा नित्योत्सवमय्यास्तत्पुर्याः स्वभावतः पौरैर्नित्यक्रियमाणामलङ्कारादिशोभां श्रीकृष्णप्रवेशमङ्गलसूचनीं वर्णयति । संसिक्तेति सार्द्धेन । संशब्देन सम्यग्रजोनाशनपूर्वकं सुगन्धिजलादिभिः सेको बोध्यते अङ्कुरा नवोद्भिन्नयवादयः एषां सर्वत्र सर्वसम्भवानुक्रमो ज्ञेयः एवमग्रेऽपि ॥ २२ ॥

आ शब्देन पवित्रोत्तमजलादिना सम्यक् पूरणं बोध्यते अलङ्कृतेति सुशब्दसूचितं दर्शयति । दधीत्यादिभिः । अन्यत्तैः तत्र तोरणानि चेति कपाटतोरणमित्यस्मादाकृष्टम् ॥ २३ ॥

तामिति त्रिकम् । संप्रविष्टावित्युक्तं सम्यक् प्रवेशमेव दर्शयति । वृतावित्यादिना । समीयुः सम्यक् नैकट्येन किम्वा सङ्घशः प्राप्ता एव हर्म्याणि चारुरुहुरेव निवारिता अपि न निवृत्ता बभुवुरित्यर्थः । स्वयमप्यौत्सुक्यात् सम्बोधयति नृपेति अत्र टीकायां द्वितीयान्तमित्यर्थः ॥ २४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

सौवर्णाः शृङ्गाटकाश्चतुष्पथाः हर्म्याणि धनिनां गृहाणि च तेषु निष्कुटाः गृहोचिता आरामास्तैः श्रेणीनामेकरूपशिल्पोपजीविनां सभाभिरुपवेशस्थानैरन्यैश्च भवनैर्गृहैरुपस्कृतामलंकृताम् अमलस्फटिकाः हरिन्मरकताः वैडूर्यादिरत्नैर्जुष्टेषु संयुक्तेषु वळभ्यादिषु आविष्टैः पारावतैः मयूरैश्च नादितां तत्र वलभ्यः गृहपुरोभागस्तम्भविहिताच्छादनोपष्टम्भवक्रदारूणि वेदयः वलभीनामधोदेशे विराचिता अवष्टम्भवेदिकाः ॥ २१ ॥

जालामुखरन्ध्राणि गवाक्षच्छिद्राणि कुट्टिमानि मणिभूमयः रथ्या राजमार्गाः आपणाः पण्यवीथयः मार्गाः अन्ये चत्वराण्यङ्गणानि संसिक्तानि रथ्यादीनि यस्यां विकीर्णास्तत्र तत्राकीर्णा माल्यादयो यस्यां तत्र माल्यानि मालार्हाणि पुष्पाणि ॥ २२ ॥

आपूर्णकुम्भैः दध्ना चन्दनेनोक्षितैः सिक्तैः प्रसूनानां दीपानाञ्चावलयो येषु तैः सवृन्दाः फलगुच्छैः सहिताः रम्भाः कदल्यः क्रमुकाश्च तैः केतुभिश्च सहितैः पट्टिकाः वितस्तिविस्तारपट्टवस्त्राणि तत्सहितैश्च स्वलंकृतानि द्वाराणि येषां ते गृहा यस्यां तां तत्रेयं रीतिः द्वारभूम्युभयतः तण्डुलानामुपरि कुम्भाः तत्पूरितः प्रसूनावलयः कण्ठे पट्टिकाः मुखे चूतादिपल्लवाः तदुपरि पात्रान्तरे दीपावलयः तत्संनिधौ रम्भाः क्रमुकाः केतवस्तोरणानि चेति ॥ २३ ॥

तामेवंभूतां पुरीं वयस्यैः सखिभिः सहितौ नरदेवानां वर्त्मना राजमार्गेण प्रविष्टौ वसुदेवनन्दनौ द्रष्टुं पुरस्त्रियस्त्वरिताः समीयुः तत्र तत्र समुदिताश्च बभूवुः तथा हे नृप ! उत्सुकाः सत्यो हर्म्याणि चारुरुहुः ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

सौवर्णैः सुवर्णबद्धैः शृङ्गाटकैश्चतुष्पथैः हर्म्यैः धनिनां निवासैः निष्कुटैः पथिकावासैः गृहवाटीभिर्वा श्रेणीसभाभिः गृहपङ्क्त्यन्तरालक्लृप्तसभाभिः श्रेणी वेश्या गृहपङ्क्तिः तत्पुरतः कृतसभाभिर्वा भवनैः प्रशस्तैः गृहैरुपस्कृताम् अलङ्कृतां वेदिषु परिष्कृतभूमिषु वलभीषु आच्छादनवक्रदारुषु प्रान्तचित्रफलकेषु मुक्ताहरिद्भिः मुक्तावलिरश्मिमिश्रितैः वैडूर्यादिभिः ॥ २१ ॥

जुष्टेषु न्युप्तेषु जालानां गवाक्षाणामासुखरन्ध्रं मुखच्छिद्रपर्यन्तेषु विद्यमानेषु कुट्टिमेषु बद्धभूमिकेषु स्थलेषु आविष्टैरुपविष्टैः पारावतैः कपोतैः बर्हिभिर्मयूरैश्च नादितां शब्दितां चन्दनादिजलैः संसिक्ता आर्द्रीकृता रथ्या रथमार्गः आपणः निषद्यामार्गः पण्यवीथिकामार्गः प्रतिगृहं पन्थाः चत्वरश्चतुष्पथः विस्तृतमार्गः यस्यां सा तथा तां प्रकीर्णानि व्याप्तानि माल्याङ्कुरलाजतण्डुलानि यस्यां सा तथा ॥ २२ ॥

आपूर्णकुम्भैः स्वलङ्कृतानि द्वाराणि येषां ते तथा स्वलंकृतद्वाराः गृहा यस्यां सा तथा तां कटिशैरापूर्णकुम्भैः दधिचन्दनरसेन चोक्षितैः सिक्तैः प्रसूनानां दीपानामावलयो येषु ते तथा तैः सपल्लवैः किसलयसहितमुखैः वृन्तेन प्रसवबन्धनेन सहिता सवृन्ता रम्भा कदली सवृन्तरम्भा तथा क्रमुकाः पूगाः तैः पट्टिकाया उपर्याततवितानवस्त्रेण सहिता सपट्टिका ताम् ॥ २३ ॥

या पूर्वं कर्णाकर्णिसौन्दर्यो तां नरदेववर्त्मना राजमार्गेण ॥ २४ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

बाह्यतः शोभामुक्त्वा आन्तरशोभामाह । सौवर्णेति । सुवर्णमयाः शृङ्गाटकादयः तैरुपस्कृतामिति । शृङ्गाटकं पुरमध्यचतुर्मार्गे विश्रामस्थानमीरितं हर्म्याणि धनिनां गृहाः निष्कुटं कुट्टिमा भूमिः एकशिल्पोपजीविनां क्रयविक्रयस्थानं श्रेणिः सभा नराणामुपवेशस्थानानि भवनानि सर्वेषामेव गृहाः सर्वं एव सुवर्णमया इति न काप्यशोभा वैडूर्यादयो मणयः तैरप्युपस्कृतां वज्रो हीरकममलाः स्फाटिकाः नीलो नीळमणिः विद्रुमः प्रवालः मुक्ताश्चहरिन्मणयश्च एभिर्निर्मिताः पूर्वोक्ता वलभ्यादयश्च वलभ्यो द्वाराग्रे वक्रदारुनिर्मिताः उपवेशनार्थं वेदयः उपवेशनोचस्थानानि तेषु वैडूर्यादिभिरुपस्कृतामिति संबन्धः ॥ २१ ॥

अग्रेऽपि तैर्जुष्टेषु योजितेषु जालामुखरन्ध्रकुट्टिमेषु गवाक्षरन्ध्रमध्यभूमिषु आविष्टा ये पारावताः बर्हिणश्च तेषां नादयुक्ताम् एवमुपरि सौभाग्यमुक्त्वा मार्गादिसौभाग्यमाह । सम्यक् सिक्ता रथ्यादयो यस्यां रथ्या राजमार्गाः आपणयः पण्यवीथी मार्गाः अन्ये चत्वराण्यङ्गणानि प्रकीर्णानि सर्वत्र माल्यानि पुष्पाणि अङ्कुराः यवाङ्कुराः लाजाः भ्रष्टधान्यानि तण्डुलाश्च मङ्गलार्थमेतेषां विकरणम् भगवानायास्यतीति ॥ २२ ॥

आ समन्तात् पूर्णकुम्भैः दध्ना चन्दनेन च उक्षितैः दध्ना सहितैश्चन्दनैः उक्षितैः पूर्णकुम्भैः सहितामिति प्रसूनानि दीपावलयः आरात्रिकाणि पल्लवसहिताश्चैते सवृन्दाः फलसहिता रम्भाः कदल्यः क्रमुकाश्च पूगपोताः ध्वजसहिताः तैः सुष्ठु अलङ्कृताः द्वाराणि गृहाश्च यस्यां सपट्टिका रम्भादयः अत्रैव प्रक्रिया द्वारस्योभयपार्श्वे कुम्भद्वयं तदुपरि दधिपूर्णपात्रं तत्र निकटे दीपाः रम्भाः क्रमुकाश्च ध्वजः पताका च चन्द्रवर्णाश्चन्द्राकारा आदर्शाश्च महोत्सवे सर्वत्र क्रियन्त इति ॥ २३ ॥

एवं पुरीं वर्णयित्वा तस्यां प्रविष्टावित्याह । तां सम्प्रविष्टाविति । सर्वेषां भगवद्दर्शनार्थमेव तथा निर्माणमिति येषां बहिरागत्य दर्शनं संभवति ताननुक्त्वा यासां न संभवति तासामुद्योगाधिक्यमाह । द्रष्टुं समीयुरिति । नगरीं प्रविष्टौ वसुदेवस्य पुत्रौ गोपालैर्वृतौ नरदेववर्त्मना राजमार्गेण संयुक्तौ गच्छन्तौ द्रष्टुं पुरस्त्रियः समीयुः सम्यगाभिमुख्येन समागताः याः साधारण्यः पुरस्त्रियः दूरस्थाश्च बहिर्निर्गमनासमर्थाश्च हर्म्याणि उच्चगृहान् आरुरुहुः चकारात् यत्रैव स्थिताः द्रष्टुं शक्नुवन्ति तमेवारुरुहुरिति नृपेति सम्बोधनं राज्ञो गमनेऽप्येवं कुर्वन्तीति ज्ञापनार्थं भगवति तु विशेषः उत्सुका इति ॥ २४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

नरदेववर्त्मना राजमार्गेण पुरीं प्रविष्टौ रामकृष्णौ द्रष्टुं पुरस्त्रियः समीयुः सहत्य जग्मुः । हर्म्याणि च काश्चिदारुरुहुः ॥ २४ ॥

काश्चिद्विपर्यग्धृतवस्त्रभूषणा विस्मृत्य चैकं युगलेष्वथापराः ।
कृतैकपत्रश्रवणैकनूपुरा नाङ्क्त्वा द्वितीयं त्वपराश्च लोचनम् ॥ २५ ॥
अश्नन्त्य एकास्तदपास्य सोत्सवा अभ्यज्यमाना अकृतोपमज्जनाः ।
स्वपन्त्य उत्थाय निशम्य निःस्वनं प्रपाययन्त्योऽर्भमपोह्य मातरः ॥ २६॥
मनांसि तासामरविन्दलोचनः प्रगल्भलीलाहसितावलोकनैः ।
जहार मत्तद्विरदेन्द्रविक्रमो दृशां ददच्छ्रीरमणात्मनोत्सवम् ॥ २७ ॥
दृष्ट्वा मुहुः श्रुतमनुद्रुतचेतसस्तं तत्प्रेक्षणोत्स्मितसुधोक्षणलब्धमानाः ।
आनन्दमूर्तिमुपगुह्य दृशात्मलब्धं हृष्यत्त्वचो जहुरनन्तमरिन्दमाधिम् ॥ २८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

सौवर्णशृङ्गाटकैः सुवर्णमयचतुष्पथैर्हर्म्यैर्धनिनां गृहैश्च "निष्कुटैर्निष्कुटस्तु गृहोद्याने" इति कोशप्रसिद्धैर्गृहोचितैरारामैश्च श्रेणीनामेकरूपशिल्पोपजीविनां सभाभिरुपवेशस्थानैरन्यैश्च भवनैरुपस्कृतामलंकृताम् वैडूर्यादिभिः मुक्ताहारिद्भिश्च जुष्टेषु यथायथं संयुक्तेषु वलभीषु गृहपुरोभागस्थवक्रदारुच्छादनेषु तथा वेदिषु वलभीनामधोदेशे विरचितासु अवष्टम्भवेदिकासु च जालामुखेषु गवाक्षच्छिद्रेषु च कुट्टिमेषु मणिवद्धासु भूमिषु च आविष्टैरुपविष्टैः पारावतैर्बर्हिभिश्च नादिताम् ॥ २१ ॥

सलिक्तानि रथ्यादीनि यस्यां तां तत्र रथ्या राजमार्गाः आपणाः पण्यवीथयः मार्गाः अन्ये चत्वराणि अङ्गणानि प्रकीर्णा माल्यादयो यस्यां ताम् ॥ २२ ॥

आपूर्णकुम्भैः दध्ना चन्दनेन च उक्षितैः सिक्तैः प्रसूनानां च आवलयो येषु तैः सपल्लवैः पल्लवसहितैः वृन्दैः फलगुच्छैरुपलक्षिताः रम्भाः कदलयः क्रमुकाश्च तत्सहितैः सकेतुभिः केतवो ध्वजास्तत्सहितैः पट्टिका वितस्तिविस्तारपट्टवस्त्राणि तत्सहितैः स्वलंकृतानि सुष्ठुभूषितानि द्वाराणि येषां ते गृहा यस्यां ताम् तत्रायं क्रमः द्वारेषूभयतस्तण्डुलानामुपरि पूर्णकुम्भाः तत्परितः प्रसूनवलयः कण्ठे पट्टिका मुखे चूतादिपल्लवाः तदुपरि पात्रान्तरे दीपावलयस्तत्समीपे रम्भाः क्रमुकाः केतवस्तोरणानि चेति ॥ २३ ॥

नरदेववर्त्मना राजमार्गेण प्रविष्टौ वसुदेवनन्दनौ द्रष्टुं समुत्सुकाः पुरस्त्रियः समीयुः हर्म्याणि चारुरुहुरित्यन्वयः ॥ २४ ॥

भाषा टीका ।

चौराहे सब सुवर्ण के हैं धनि पुरुषों के घर भी हैं तथा घरकेपास फलों के बाग बगीचा इनसे एक शिल्प जीविका वाले मनुष्यों के घरों से शोभित है वैदूर्य मणि निर्मल मरकत मणि मूंगा मुक्ता हूरे रत्न इनसे बने हुये छज्जा उसमें वने हैं तिनसे शोभित है ॥ २१ ॥

छज्जाके झरोखोंके मुखों पर छिद्रों के सामने मची पर बैठे हुये कबूतर तथा मोर इनसे शब्दायमान है राज मार्ग बजार गली दुकान ए सब जिस मे छिडकी हुई हैं माला फूल दूर्वादिक अंकुर खील चावल इन के विखरने से शोभित है ॥ २२ ॥

जिसमें घरोंके आगे के द्वार सब जल से पूर्ण कुम्भों से शोभित हैं और दधि तथा चंदन जल से सींचे हैं फूल दीपों की माला से आम्रादिके पल्लवों से शोभित हैं फल के गुच्छों सहित केला के वृक्षों से पताकों से पट्ट रेसम के वस्त्रों से उस पुरी में सब घरों के दरवाजे अलंकृत हैं तिससे शोभित है ॥ २३ ॥

हे राजन्! उस पुरी में अपने सखाओं के सहित वे दोनों वसुदेव पुत्र जब राज मार्ग में प्रविष्ट भये तब उनके दर्शन करने की इछा से पुरकी सब स्त्री वडी उत्कंठा वाली होकर उंची अटारियों का आरोहण करतीं भईं ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

औत्सुक्यमेवाह द्वयेन । काश्चिदिति । विपर्यक् विपरीतं धृतानि वस्त्राणि भूषणानि च याभिस्ताः युगलेषु धार्येषु कुण्डलकङ्कणादिष्वेकं विस्मृत्य समीयुः कृतमेकमेव पत्रं ययोस्ते श्रवणे यासामेकमेव नूपुरं चरणाभरणं यासां ताश्च ताश्च नाङ्क्त्वा अनङ्क्त्वा एकस्मिन्नेव लोचने अञ्जनं निधायैव ॥ २५ ॥

तद्भोजनं त्यक्त्वा अभ्यज्यमानाः सखीभिः क्रियमाणतैलाभ्यङ्गाः अकृतोपमज्जना अकृतस्नानाः अर्भं बालकम् अपोह्य निरस्य ॥ २६ ॥

प्रगल्भा या लीलास्ताभिर्हसितानि निरीक्षणानि च तैः श्रियं रमयतीति श्रीरमणस्तेनात्मना वपुषा तासां दृशामुत्सवं ददन्मनांसि जहार ॥ २७ ॥

मुहुः श्रुतत्वात्तद्गतचेतसः सवस्तं दृष्ट्वा तस्य प्रेक्षणं च्चोत्स्मितञ्च तदेव सुधा तयोक्षणं सेचनं तेन लब्धो मानो याभिस्ताः दृशोद्घाटितेन नेत्रद्वारेणात्मनि मनसि लब्धं प्राप्तं परिष्वज्य तदप्राप्तिजनितमनन्तमाधिं मानसीं व्यथां जहुः हे अरिन्दम ! निर्जितकामेति सम्बोधनं शृङ्गाररसेऽनिमग्नो माधुरिति ॥ २८ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

काश्चिदिति । निःस्वनं निशम्येति द्वितीयश्लोकस्थेन सर्वेषामेवान्वयः । तयोः सन्दर्शनेन पौरजनानां हर्षकोलाहले श्रुत्वेत्यर्थः । युगलेष्वित्यत्र चकारान्वयः एकमिति जातावेकत्वं काश्चिद्विपर्यगित्यादिलक्षणाः सद्यो युग्मतया धार्येष्वप्येकमेकं विस्मृत्य समीयुरित्यर्थः । अर्थेत्यर्थान्तरारम्भे अपरा एकपत्रैकनूपुरमात्राभरणीकृताङ्घ्रयः सत्यो लोचनमङ्क्तुमारब्धवत्योऽप्येकमप्यनङ्क्त्वा समीयुः अपरास्तु तथाभूता द्वितीयं लोचनमनङ्क्त्वा समीयुरित्यर्थः । चशब्दोऽनुक्तसमुच्चये तेनान्यदपि ज्ञेयं खलोचनमिति तु पाठो बहुत्र खशब्देनावेशातिशयः सूचितस्तथापीत्यर्थः ॥ २५ ॥

तदपास्येति सर्वत्राप्यन्वयः तत्र प्रथमतः तद्भोजनं त्यक्त्वा आचमनञ्चाकृत्वेति बोद्धव्यम् एकाः सोत्सवा विहारादिकमपरा निवाहमानादयश्च तत्तदपास्य यद्वा सर्वत्रैव हेतुः सोत्सवा हर्षभराक्रान्तचित्ता इति स्वपन्त्यः स्वपत्य उत्थाय तदपास्येति निद्राजाड्यं त्यक्त्वा इत्यर्थः । अर्भं निजनवबाळकं स्तन्यं निपाययन्त्यस्तदपास्य तन्निपायनं त्यक्त्वा पश्चात्तमप्यपोह्य इत्यर्थः । मातर इति स्नेहविशेषः सूचितस्तथापि आसामेवमनुक्रमोक्तिः स्वगमनानुक्रमेण ज्ञेया ॥ २६ ॥

दूरतस्तावत् श्रियोऽपि रतिजनकेन वपुषैव दृशामुत्सवं ददत् तत्रापि मत्तद्विरदेन्द्रविक्रमत्वेन दृश्यमानो दृशां तं ददत् नैकट्ये तु सति तत्राप्यरविन्दलोचनतया दृश्यमानो दृशां तं ददत् तत्रापि प्रगल्भलीलाहसितावलोकनैर्दृशां तं ददत् तासां मनांसि जहारेत्यर्थः । प्रगल्भाः मनोहरणसमर्थाः कैशोरत्वेन वैदग्धीपराकाष्ठां प्राप्ता वा या लीळाः भ्रूनर्त्तनादयः हसितानि च तत्तद्भावसूचकस्मितभेदाः तद्युक्तैरवलोकनैरिति मत्तद्विरदस्येव विक्रमः पराक्रमविशिष्टचरणन्यासो यस्येति स विग्रहः जात्यपेक्षया एकत्वेनाप्यर्थसिद्धौ मनांसीति व्यक्त्यपेक्षया बहुवचनं क्रियमाणबाहुल्यस्य स्पष्टीभावनेनार्थचमत्कारः स्यादिति जहारेति मनसां निधिरिवोत्प्रेक्षा व्यञ्जिता तेन तल्लोभ्यत्वञ्च युक्तञ्च तत् सप्रेमत्वात्तेषाम् उत्सवं ददत् जहारेति श्लेषेण हरणचातुरी दर्शिता अन्योऽपि चतुरलुब्धो महोत्सवादिभिर्जनान् प्रलोभ्य तद्धनानि गृह्णातीति इयं दर्शनक्रमेण व्याख्या पाठक्रमेण त्वेवम् अरविन्दलोचन एव सन् जहार किमुत सर्वाविलासोपरि चरता दृशावलोकनैः तादृशविक्रम एव जहार किमुत तादृश तदधिकाधिकानन्तलीलाश्रयतातादृशवपुषेति अत एव साधकतमत्वविवक्षया उत्तरोत्तरत्र तृतीया ॥ २७ ॥

अनुद्रुतं वेगेन पश्चात् संलग्नं किम्वा निरन्तरं प्रेम्णा द्रवीभूतं चेतो यासां ताः एतच्च श्रवणेनैव सुतरां तु दर्शनेन अयमुपगूहने हेतुः किञ्च स्मिदिति उत् उत्कृष्टं स्मितं यद्वा तासां श्रीकृष्णप्रेक्षणेन तस्य यदुद्गतं स्मितं प्राप्तः सम्मानः अनन्तमपि अङ्गुः तत्र हेतुः आनन्दघनविग्रहं तमुपगुह्येति तत् कथमात्मलब्धं मनोलब्धत्वेन मनसैवेत्यर्थः । तदपि कथं दृशेति दृशा सम्बध्यमिति तस्यां दृशि वाष्पेण वा लज्जया वा मोहेन वा मुद्रितायां सत्यां मनसि साक्षादिव परिस्फूर्त्या तत्र नितरां साक्षादिवालिङ्गनसम्पत्तेरिति भावः । उपगूहनलक्षणं हृष्यत्त्वचः महापुल

काचितत्वाद्वेत्य इत्यर्थः । एतादृशः श्रीकृष्णविषयकप्रेमरसविशेषे विघ्नः प्राकृतशृङ्गारादिरसः नातिविचारस्तस्मिन्नपि इष्टिरेव वा अरिः हे तद्दमनेति तद्दमनत्वेनैव त्वां प्रति रसविशेषोऽयं वर्ण्यते अन्यथा तवर्णयिष्यत्वेति भावः ॥ २८ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

विपर्यक् विपरीतं युगलेषु पाणिपादादियुगलेषु ॥ २५—४० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

त्वरामौत्सुक्यं चाह द्वयेन । काश्चिदिति । विपर्यक् विपरीतम् अयथायथं भृतानि वस्त्राणि भूषणानि च याभिस्ताः काश्चिदेवंभूताः अपरास्तु युगलेषु धार्येषु कुण्डलकङ्कणादिषु एकस्मिन् विस्मृत्य समीयुरित्यनुषङ्गः अन्यास्तु कृतं निहितमेकमेव पत्रं ताटङ्कः ययोस्ते श्रवणे श्रोत्रे यासां ताः एकमेव नूपुरं चरणाभरणं यासां तास्ताश्च स्वकीयमेकं लोचनं नाङ्क्त्वा एकस्मिन्नेव लोचने कज्जळं निधायेत्यर्थः ॥ २५ ॥

एकास्तु अश्नन्त्यः तद्भोजनं विहाय काश्चित्तु अभ्यज्यमानाः सखीभिः क्रियमाणतैलाभ्यङ्गाः अकृतस्नाना एव काश्चित्तु स्वपन्त्यो निःस्वनं निशम्योत्थाय अपरास्तु मातरः अर्भकं पाययन्त्यः स्तन्यमिति शेषः । तमर्भकं विहाय समीयुरिति सर्वत्र सम्बन्धः ॥ २६ ॥

मत्तगजेन्द्रस्येव विक्रमः पादविक्षेपो यस्य सः श्रियः कान्तो भगवान् प्रगल्भाः या लीलास्ताभिर्हसितानीक्षणानि च तैस्तासां पुरस्त्रीणां दृशामुत्सवं महाहर्षं विदधानः तासां मनांसि चित्तान्यपहृतवान् ॥ २७ ॥

मुहुः श्रुतत्वात्तद्गतचेतसस्ते दृष्ट्वा हे अरिन्दम ! तस्य प्रेक्षणञ्च स्मितञ्च तदेव सुधा तयोक्षणं सेचनं तेन लब्धो मानो याभिस्ताः दृशा उद्घाटितनेत्रद्वारा आत्मनि मनसि लब्धं प्राप्तमानन्दमूर्त्तिं परिष्वज्य पुलकिततत्वचः तदप्राप्तिजमनन्तमधिकमाधिम् व्यथां जहुः ॥ २८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

विपर्ययकृतानि व्यत्यस्तत्वेनाळंकृतानि वस्त्राणि भूषणानि यासां ताः वस्त्रस्थाने भूषणानि भूषणस्थाने वस्त्राणीति युगलेषु मध्ये एकं विस्मृत्य एतदेव स्फारयति । कृतैकेति । वस्त्रं परिधानमात्रं एकं श्रवणभूषणम् एकं नूपुरञ्च यासां ताः एकमङ्क्त्वा एकं लोचनं नाङ्क्त्वा अञ्जितं मषीकृतमकृत्वा ॥ २५ ॥

अभ्यज्यमानास्तैललेपनं कुर्वाणाः अकृतोपमज्जनाः अकृतजलस्नानाः अर्भं बालम् अपोह्य तिर्यक् कृत्वा ॥ २६ ॥

प्रागल्भ्येन धाष्ट्र्येन लीलासहितहसितेनावलोकनेन कटाक्षनिरीक्षणेन ॥ २७ ॥

श्रुतं कृष्णरूपसौन्दर्यं स्त्रियः एकदापि न दृष्टोऽयमित्याधिं मनःपीडां तद्दर्शनेन जहुरित्यन्वयः । तस्य कृष्णस्य प्रेक्षितमुत्कृष्टं स्मितं च तत्प्रेक्षितोत्स्मितं ते सुधा प्रेक्षितोत्स्मितसुधा तस्या उक्षणेन लब्धो मानो

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

यासां तास्तथा आत्मनि मनसि लब्धं स्थितं हृष्यत्त्वचः रोमाञ्चाञ्चिताः ॥ २८ ॥

श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी।

तासामौत्सुक्यं वर्णयन् वस्त्राभरणानां विपर्यासमाह भगवति आसक्तौ विशेषः अन्यथा लौकिक्येव भाषा भवति काश्चित् स्त्रियः विपर्यक् विपरीततया धृतानि वस्त्राणि भूषणानि च याभिः पादयोराभरणं हस्ते वस्त्राण्युपरि एवं सर्वत्र किञ्च न केवलं विपर्यासः अपि तु युगळेषु एकं विस्मृत्य च एकमेवाभरणं धृत्वागताः अथ विपर्यग्धृतेभ्यः अपराः अन्याः तत्र पूर्वापेक्षयाप्येता उत्तमा इति युगलाभरणेषु हस्तकटकादिषु एकस्यापि धारणं भवति यत्र पुनः द्वयोरेव धारणं नैकस्य एकधारणं सर्वथा विगीतं तादृशमपि कृतवत्य इत्याह। कृतैकपत्रश्रवणैकनूपुरा इति। कृतं स्थापितमेव यत्र ताटङ्कं श्रवणे याभिः एकमेव च नूपुरं श्रवणे पादे वा कृतं याभिः ताश्च ताश्च अन्याः पुनः द्वितीयं लोचनं न अङ्क्त्वा द्रष्टुं समीयुरिति सम्बन्धः तुशब्दोऽन्यार्थः स्वलोचनमिति अर्थादन्यलोचनमपि अन्यस्य कज्जलं प्रयच्छन्ती मध्ये ॥ २५ ॥

तथैव गतिक्रियाशक्तत्वभावमाह। अश्नन्त्य एका इति। तद्दीनकर्म अन्नं वा अन्यथापि त्यागो भवतीति तद्व्यावृत्त्यर्थमाह। सोत्सवा इति। उल्लाससहिताः अन्याः पुनरभ्यज्यमानाः सर्वाङ्गे दत्ततैलाः शिरसि धृत्वा वा अकृतोपमज्जनाः स्नानमकृत्वैव ययुः अन्याः पुनः स्वपन्त्यः उत्थाय भगवानागत इति कोलाहलं निशम्य तथैवानर्चितदेहाः समीयुः अन्याः पुनः मातरः धात्रीव्यतिरिक्ताः साक्षात्स्वप्रसूतानपि बालकान् प्रपाययन्त्यः अर्भवत्यश्च बालकमपि विसृज्यापोह्य त्वरिता ययुः इति सम्बन्धः ॥ २६ ॥

एवं सर्वासां भगवद्दर्शनार्थं प्रपञ्चविस्मृतिं निरूप्य ततो निष्प्रपञ्चासु स्वासक्त्यर्थं भगवच्चरितमाह। मनांसि तासामिति। तासां पूर्वोक्तानां मनश्चेद्भगवदीयं जातं तदा स्वासक्तिः सिद्धैव मनोमूलकत्वात् संसारस्य मनसो हि वशीकरणं द्वेधा भवति वस्तुसामर्थ्यात् मन एव वशे भवति तथोत्कृष्टविषये स्वधर्मैश्च मोहकैर्भवति यथा मन्त्रादिभिः तत्रारविन्दलोचनः कमलनयन इति स्वरूपसौन्दर्यं सर्वतापनाशकत्वेनोपकारित्वं च निरूपितं धर्मोन्मोहकानाह। प्रगल्भा या लीळाः तत्सूचकं यद्धासितं तत्पूर्वकमवलोकनैरिति अतिकामुकस्य तादृशचेष्टासूचकं हास्यं भवति अवलोकनं च पुरस्कारत्वात्तासां तत्परिज्ञानं तेनैव ता व्यामुग्धा भवन्तीति हसितं मन्त्रात्मकं दृष्टिः पाशात्मिकेति यस्याः मनः येनैव प्रकारेणायाति तादृशमेव प्रेक्षितं हसितं चेति ज्ञापयितुं बहुवचनं तत्र बाधिकां बुद्धिं दूरीकर्तुमाह। मत्तद्विरदेन्द्रविक्रम इति। भयं बाधकं लौकिकं तासां वैदिके आधिकाराभावात् विचारे दोषाभावश्च तथायं यथा मत्तो द्विरदेन्द्रः स्वार्थं सर्वानविवार्य लौकिकालौकिकसाधनयुक्तो यथा मत्तगजः सजातीयानामप्यतिक्रमार्थम् इन्द्रपदं तस्यापि सर्वथा कर्तव्यत्वेन धर्मः अत्यधिको भवतीति विक्रमपदं तस्मादस्य एतत्प्राप्तौ तासां च सर्वथा भयाभावश्च सूचितः ननु दृष्टिद्वारा हि मनोग्राह्यमन्तः स्थितम् इन्द्रियान्तरव्यापारस्य तदानीमभावात् दृष्टिः पुनः चञ्चला अन्यत्र गच्छेद्यदि तदा तद्द्वारा ग्रहणं सर्वथा न सम्भवतीति कथं मकान्ततो ग्रहणमिति चेत्तत्राह। तासां दृशां श्रीरमणात्मना लक्ष्मीरमणरूपेण उत्सवं ददृदिति उत्सवात्सक्तो हि नान्यत् किञ्चन वेद सर्वस्वापहारोऽपि चञ्चलानां मध्ये लक्ष्मीः परमकाष्ठामापन्ना तामपि दमयति अनन्यासक्तां करोति कथमन्यां न कुर्यात् अतो निष्प्रत्यूहं तासां मनोहरणमुपपद्यते आत्मपदेन चावश्यकत्वं तत्परत्वे सूचयति ॥ २७ ॥

ननु भगवानक्लिष्टकर्मा तासां मनः कथं गृहीतवानित्याशङ्क्याह। दृष्टेति। आत्मानं सकार्यं ताभ्यो दत्त्वा तासां मनो गृहीतवान् भगवत्स्वरूपग्रहणे तासां प्रकारमाह। दृष्टेति। मुहुः पूर्वं वारं वारं श्रुतो यो भगवान् स इदानीं दृष्टः ततः प्रथमं चक्षुः प्रीतिरुक्ता श्रवणव्यतिरेकेण प्रीतिश्चिन्न भवतीति अन्यथाद्भुतरस एवोत्पद्यते तत्प्रीतिः सर्वेभ्योऽभ्यधिकप्रीतिसिद्ध्यर्थं मुहुः श्रवणमपेक्ष्यते ततस्तासां चित्तासंगमाह। अनुद्रुतचेतस इति। दर्शनमनुद्रुतं चित्तं यासामत एव म्रियमाणमपि स्वभावादिभिर्न स्थितं तमिति इतमनसं तेन चित्तप्रतिबन्धकं मनोऽपि नास्ति प्रत्युतानुगुणमेवेति तथाप्यपुरस्कृता महान्तं ग्रहीतुं समर्था इति पुरस्कारमाह। तस्य प्रेक्षणपूर्वकं यदुत्स्मितमूर्ध्वस्मितं सर्वेप्रपञ्चात् अधिकरसं तद्विस्मारकं च सैव सुधा मिष्टत्वाय स्मितम् अलौकिकभावाय प्रेक्षणमिति द्वयं मिलितममृतं तुल्यं भवति आभासैरप्युपमीयते प्रकृतोपयोगाय तया यदुक्षणं सेचनं तेन लब्धो मानो याभिः लताप्रायास्ताः अमृतासिक्ताः भगवतोऽप्यानन्दरूपं फलं फलिष्यन्तीति ततः समानना प्राप्य आनन्दानुभवे योग्याः सत्यः भावलक्षणं वा मानं प्राप्य तदुपनोदनार्थमिव समागतं भगवन्तं स्वतः पुरुषार्थरूपमानन्दरूपां मूर्तिं स्येति उपगुह्य अन्तरात्मना चित्तेन च समालिङ्ग्यान्तः पूर्णा जाता भगवत्प्रविष्टमार्गमाह। दृशा आत्मलब्धमिति। दृष्टिद्वारा ज्ञानद्वारा च आत्मन्यात्मत्वेन वा लब्धं ततोऽन्तः पूर्णानन्दः बहिरपि तं प्रकाटितवत्य इत्याह। हृष्यत्त्वच इति। सर्वाङ्गेषु रोमाञ्चयुक्ताः ततः पूर्णमनोरथा जाता इत्याह। अनन्तमाधिं जहुरिति। भगवानस्माभिर्न प्राप्त इति पूर्वं मनःपीडा स्थिता प्राप्तेऽपि भगवति यावन्नित्यप्राप्तौ भगवाञ्ज्ञायते यावद्वा नान्तः प्रविश्य स्थिरो भवति तावद्भूतभविष्यत्कालयोः भगवत्सम्बन्धाभावचिन्ता न गच्छेतीति अधुनान्तः प्रविष्टे भगवति तेनैव पूर्णाः मनःपीडायाः स्थानाभावात्तां जहुः अन्यथा नित्यमनोरथः क्षणमात्रदृष्टेन सिध्येत् अरिन्दमेति सम्बोधनं लौकिकालौकिकतुल्यतया स्त्रीपुंसप्रसङ्ग इति लौकिकभावेन कामादिभिर्भवेदिति तन्निवृत्त्यर्थं अरीन् कामादीन् दमयतीति ॥ २८ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

औत्सुक्यं विवृणोति द्वाभ्याम्। काश्चिदिति। विपर्यक् विपरीतं यथा स्यात्तथा धृतानि वस्त्राणि भूषणानि च याभिस्ताः युगलेषु धार्य्येषु कुण्डलकङ्कणादिषु मध्ये एकमेकं विस्मृत्य समीयुः। कृतमेकैकमेव पत्रं श्रवणेषु याभिः। एकैकमेव नूपुरं यासां ताश्च ताश्च ताः। द्वितीयं स्वलोचनं न अङ्क्त्वा किं त्वेकं वाममेव कज्जलेनाङ्क्त्वेत्यर्थः। तत् अशनं सोत्सवा इति विवाहादिकर्म परास्तत्कर्म त्यक्त्वा परिणीयमानाः कन्यापतिप्रक्रमणमसमाप्यैवेत्यर्थः। सखीभिरभ्यज्यमाना एव ताः सखीस्तिरस्कृत्य अभ्यङ्गमप्यसमाप्यैवेत्यर्थः। न कृतमुप

प्रासादशिखरारूढाः प्रीत्युत्फुल्लमुखाम्बुजाः ।
अभ्यवर्षन् सौमनस्यैः प्रमदा बलकेशवौ ॥ २९ ॥
दध्यक्षतैः सोदपात्रैः स्रग्गन्धैरभ्युपायनैः ।
तावानर्चुः प्रमुदितास्तत्र तत्र द्विजातयः ॥ ३० ॥
१ऊचुः पौरा अहो गोप्यस्तपः किमचरन्महत् । १अयं विजयध्वजीये नास्ति
या ह्येतावनुपश्यन्ति नरलोकमहोत्सवौ ॥ ३१ ॥
रजकं कञ्चिदायान्तं रङ्गकारं गदाग्रजः ।
दृष्ट्वाऽयाचत वासांसि धौतान्यत्युत्तमानि च ॥ ३२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

आधिक्येन मज्जनं याभिस्ताः स्नानमप्यसमाप्य क्लिन्नाङ्ग्य एवेत्यर्थः । नितरामितियत्नेन पाययन्त्य इति स्वयं पातुमजानन्तं सद्यः प्रसूतमर्भमप्यपोह्येत्यर्थः ॥ २५ ॥ २६ ॥

श्रिया स्वशोभयैव रमयति मथुराङ्गनाः क्रीडयतीति श्रीरमणः तेनात्मना देहेन दृशामुत्सवं ददत् मनांसि तासां जहारेति चाक्षुषसम्भोगदानेन ता विह्वलीकृत्यालक्षितमेव मनोरत्नानि चोरयामासेत्यर्थः ॥ २७ ॥

अनुद्रुतानि दर्शनं लक्ष्यीकृत्यैव द्रवीभूतानि चेतांसि यासां ताः तत्कर्तृकं प्रेक्षणम् उत्कृष्टं स्मितं च सुधा तया यदुक्षणं सेचनं तेन लब्धो मान आदरो याभिस्ताः दृशा एकस्यैव नेत्रस्यापाङ्गद्वारेण उद्घाटितेन आत्मनि मनसि लब्धं प्राप्तं स्वच्छन्देनैवोपगुह्य तदप्राप्तिजनितमनन्तमाधिमजहुः हे अरिन्दमेति एतादृशभगवच्चरित्रश्रवणमननादिनैव त्वया कामादयः शत्रवो जिता इति भावः ॥ २८ ॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

तासामौत्सुक्यमाह । काश्चिदिति । विपर्ययेण व्यानतः स्वरूपतश्च विपरीतं धृतानि वस्त्राणि भूषणानि च याभिस्ताः समीयुरित्यनुषङ्गः एवमग्रेऽपि युगलेषु धार्य्येषु कङ्कणादिषु एकं विस्मृत्य कृतमेकमेव पत्रं ययोस्ते श्रवणे यासामेकमेव नूपुरं चरणाभरणं यासां ताश्च ताश्च ताः द्वितीयं स्वलोचनं नाङ्क्त्वा अनङ्क्त्वा एकस्मिन्नेव लोचने अञ्जनं निधायेत्यर्थः ॥ २५ ॥

एकाः अश्नन्त्यस्तद्भोजनं विहाय अन्याः अभ्यज्यमानाः सखीभिः क्रियमाणतैलाभ्यङ्गाः अकृतस्नानाः काश्चिन्मातरः निपाययन्त्यः अर्भं बालम् अपोह्य निरस्य ॥ २६ ॥

अरविन्दे इव लोचने यस्य सः मत्तगजेन्द्रस्येव विक्रमश्चरणविन्यासो यस्य सः प्रगल्भा याः लीलास्ताभिर्हसितानीक्षणानि तैः श्रियं देवीं रमयतीति श्रीरमणस्तेनात्मना नित्यानन्दाप्राकृतविग्रहेण तासां दृशामुत्सवं ददत् मनांसि जहारेत्यन्वयः ॥ २७ ॥

हे अरिन्दम ! श्रीकृष्ण भजनविरोधिदुमलकलैः मुहुः श्रुतमनन्तं त्रिविधपरिच्छेदशून्यं श्रीकृष्णमत एवानुद्रुतचेतसस्तद्द्रुतचेतसः साक्षाद्दृष्ट्वा तस्य प्रेक्षणं च उत्स्मितं च तदेव सुधा तयोक्षणं प्रोक्षणं तेन लब्धमानाः दृशा नेत्रद्वारेण आत्मनि मनसि लब्धं प्राप्तमानन्दमूर्तिमप्राकृतपरमानन्दविग्रहं परिरभ्य परिष्वज्य हृष्यत्त्वचः पुलकितत्वचः तदप्राप्तिजमाधिं व्यथां जहुः ॥ २८ ॥

———

भाषा टीका ।

कोइ स्त्रियों ने जळदी के मारे सिंगार करते मे उलटा वस्त्रादि पहर लिया कुण्डलादिक एकही पहरे कोइ ने एक ही कान मे पुष्प पत्र धारण किये कोइने एकही पगमे नूपुर पहरे को इने एक नेत्र मे अंजन लगाया दूसर मे नहीं ॥ २५ ॥

कोई स्त्री भोजन करते समय मे उस भोजन को छोड आई कोइ खुसी के मारे उवटन लगाकर बिना स्नान किये ही आगई को सोती हुई शब्द को सुनकर उठ दौडी कोइ बालक की माता दूध पिवाते मे बालक को छोडकर चली आई ॥ २६ ॥

कमल लोचन भगवान् ने बडे मनोहर लीला सहित हास तथा अवलोकन आदि चेष्टा से उन स्त्रियों के मनको हरण कर लिया और मत्त हस्ती किसी चाल वाली लक्ष्मी की रमण करने वाली मूर्ति से सब के नेत्रों को आनन्द दिया ॥ २७ ॥

वार वार सुने हुये भगवान् के विषै जिनका मन लगगया था उन स्त्रियों ने भगवान् के दर्शन करने से उनके मंद हास रूप अमृत के सिंचने से सत्कार को प्राप्त होकर आनन्द मूर्ति भगवान् जो मनमें प्राप्त होगये हैं, तिनको आलिंगन करके हे राजन् रोमों से हर्षित होकर बडी भारी मन की आधिको दूर कर दिया ॥ २८ ॥

———

श्रीधरस्वामिकृतभावार्थदीपिका ।

सौमनस्यैः कुसुमसमूहैः शोभनमनोभावैर्वा ॥ २९-३० ॥

पौराः पुरस्त्रियः ॥ ३१ ॥

रजको वस्त्रनिर्णेजकः स एव वस्त्राणां रङ्गमपि कुर्वन् रङ्गकारः ॥ ३२-३३ ॥

———

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

आधित्यागलक्षणमाह । प्रासादेति । पूर्वं हर्म्याण्यारुरुहुरित्युक्तम् इदानीञ्च प्रासादाग्रमारूढा इत्यौत्सुक्याधिक्यं दर्शितं बलं केशवं चाभितो वर्षन् एकत्र स्थितत्वात् यद्वा श्रीकृष्णाग्रजत्वेन तस्मिन्नोपभुक्ते प्रमदाः श्रीकृष्णभावेन प्रकृष्टमदा इत्येव तात्पर्यम् अयमभिवर्षणे हेतुः कंसादभये च बलकेशवाविति बलाधिक्यकेशिहन्तृत्वस्फूर्त्तेः सर्वेषां तदा तद्विषयकमपि भयं न जातमिति भावः । बलस्यादौ निर्देशः श्रेष्ठत्वेनाग्रे गमनात् ॥ २९ ॥

इत्थं प्रायो मृदुलतमहृदयतया भावविशेषयुक्ताभिः स्त्रीभिरादौ श्रीभगवत्संमानमुक्त्वा ब्राह्मणैः कृतमाह । दधीति । उदकपूर्णघटसहितैर्दध्यादिभिः उपायनैरप्यन्यैर्मङ्गलायनफलादिभिः नन्वेतेऽपि कथं कंसाद्भयं नाकुर्वन् तत्राह । प्रकर्षेण मुदिताः अहो सोऽयं भगवानिति परमानन्देन तद्भयापगमादिति भावः । अत्र द्विजा विप्रा एवाग्रे वैश्यानामुक्तेः ॥ ३० ॥

पौराः पौर्यः केवलगोपीनां श्लाघनात् । ङीप्प्रत्ययाभाव आर्षः यद्वा एवं स्त्रीपुंसानां सर्वेषामेव प्रमोदमुक्त्वा तत्र च प्रायो रूपदर्शनमेव कारणमिति बोधयन् तन्माहात्म्यं तात्पर्येणाह ऊचुरिति । पुरौकसः सर्वेऽपि किमूचुस्तदाह । अहो इति । तत्र गोप्य इत्युपलक्षणम् । नरलोको भूलोकः तत्रावतीर्णत्वेन तत्प्राधान्यात् । यद्वा । नराणामित्युक्त्वा सन्तोषाभावादाहुः लोकानां चतुर्दशभुवनानामपि यद्वा नरलोका जीवलोका स्तेषां सर्वेषामपि महानुत्सवो याभ्यां तौ महोत्सवरूपाविति वा । अनु निरन्तर पश्यन्तीति वर्त्तमाननिर्देशः पुनस्तत्र गमनसम्भावनात् ॥ ३१ ॥

एवं शिष्टानां परमानन्देन तत्सम्माननमुक्त्वा दुष्टानां तद्वैपरीत्यं दर्शयन्नादौ रजकवधमाह । रजकमिति षड्भिः । कञ्चित् दैत्यस्वभावं कंसानुगमित्यर्थः । अत उक्तं वैष्णवे "कृष्ण स्तस्य दुरात्मन" इति । रङ्गकारमित्यनेन तस्य विक्रेतव्यान्यपि कतिचित् वस्त्राण्यासन् । सञ्चितार्थमेव तु राजवस्त्राणीति वक्ष्यतीति भावः । वस्त्रधवनस्थानात् पुर्यन्तरागच्छन्तम् इति तदपि मङ्गलमेकमिति सूचितं "सधौतवस्त्रो रजकस्त्वधन्य" इत्युक्तेः । गदाग्रज इत्यनुप्रासरक्षार्थं रङ्गरङ्गेति वारद्वयश्रवणात् । यद्वा । गदोऽपि तादृशत्वेन प्रसिद्धः किमुत तदग्रजः स्वयं भगवानिति ज्ञापनार्थम् एवं यदुकुललीलारम्भे गुणतः श्रीरामकृष्णेतरसर्वभ्रातृगणमुख्यस्य गदस्यापि जन्म सूचितं गर्भौ च द्वौ । बलं गदं सारणञ्चेति रौहिणेयः । देवरक्षितया लब्धा नव चात्र गदादय इति देवरक्षितयञ्चेति । तत्र रौहिणेयस्य जन्माभावात् । अन्यतर एवात्र गृह्यते । सचानन्तरकनिष्ठः श्रीकृष्णस्यानन्तरज्येष्ठः श्रीरामवदेव सहविहारी भविष्यतीति सूचितम् । अतएव कश्चिद्गदाग्रजः सौम्येति श्रीगोपीभिर्मम गदाग्रज एत्य पाणिमिति रुक्मिण्या च वक्ष्यते इति ॥ ३२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

प्रीत्योत्फुल्लानि मुखाम्बुजानि यासां ताः प्रमदाः स्त्रियः सौमनस्यैः कुसुमसमूहै रामकृष्णावभ्यवर्षन् ॥ २९ ॥

द्विजातयो ब्राह्मण्यस्तत्र तत्र प्रमुदिताः सत्यः दध्यादिभिस्तौ रामकृष्णावानर्चुः ॥ ३० ॥

पौराः स्त्रियः परस्परमूचुः उक्तिमेवाह । अहो इत्यादिना । गोप्यः किं महत्तपश्चक्रुः अन्यथैतन्न सम्भाव्यत इत्यभिप्रेत्याहुः । या गोप्यः नरलोकस्य महानुत्सवो याभ्यां तौ रामकृष्णावनुपश्यन्ति ॥ ३१ ॥

इत्थं तासु कथयन्तीषु सतीषु तदा गदाग्रजो भगवान् कञ्चिदायान्तं रजको वस्त्रनिर्णेजकः स एव वस्त्राणां रङ्गमपि कुर्वन् रङ्गकारस्तं दृष्ट्वा धौतानि निर्णिक्तानि अद्भुतानि वस्त्राणि अयाचत ॥ ३२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली

सौमनस्यैः सुमनसां पुष्पाणां राशिभिः ॥ २९ ॥

आनर्चुः पूजयामासुः ॥ ३० ॥ ० ॥

रङ्गकारं वर्णकारकम् ॥ ३२—३४ ॥

श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी ।

ततः पूर्णमनोरथानां कृत्यमाह । प्रासादशिखरारूढा इति । देवानां कृत्यं पुष्पवृष्टिः एतास्तु देवरूपा जाताः अन्तःपूर्णत्वात् बहिरपि देवतुल्यत्वं जातमित्याह । प्रासादशिखरेषु समारूढाः विमानेष्विव स्थिताः । अनिमिषत्वसिद्ध्यर्थमाह । प्रीत्युत्फुल्लदृश इति । स्नेहेन कृत्वा निर्निमेषाः विकसितनयना एव स्थिताः अबलाः स्वभावतः सौन्दर्ययुक्ताः अतः सर्वथा देवतुल्याः सौमनस्यैः पुष्पैरुत्तमैरभ्यवर्षन् ननु निकटे स्थिताः बहुपुष्पैर्वर्षणे अति क्रमशङ्कया कथं न भीता जाता इति चेत्तत्राह । प्रमदा इति । प्रकृष्टो मदः कामात्मको यासु तदा आविर्भूतकामाः विचाररहिता जाता इत्यर्थः । किञ्च पुष्पवृष्ट्या न भगवतः काचित् अनुपपत्तिरिति नामविशेषमाह । बलो बलभद्रः बलाधिक्यादेव केशवस्तु ब्रह्मेशयोः सुखदातेति सर्वदा पुष्पवृष्टिमनुभवति मत्वर्थीये च वप्रत्यये पुष्पाणां केशेषु स्थापनं सर्वदेति नातिक्रमशङ्का ॥ २९ ॥

एवं स्त्रीणां संमाननं निरूप्य ब्राह्मणानां संबन्धिसंमानमाह । दध्यक्षतैरिति । लोके स्त्रियः अलौकिके द्विजा इति द्वयमेव जगद्रत्नं तेन भूषितो भगवान्निरूप्यते देशाचारात् तिलकार्थम् दधि अक्षताश्च तैः प्रथमतः अर्चनं ततः पादप्रक्षालनाद्यर्थम् उदपात्राणि बहुवचनमनेकधा जलोपयोग इति नानाविधजलानि निरूपयति ततः उत्तमाः स्रजः ततो गन्धश्चन्दनकृतो धूपकृतश्च ततः अभ्युपायनानि मिष्टान्नादीनि फलादीनि वा एवं चतुर्विधैः साधनैः तौ रामकृष्णौ आनर्चुः ततः प्रमुदिता अपि जाताः द्विजातीनां पर्यवसानेऽपि कश्चिदेव सुखं भवतीति पश्चात्प्रमोद उक्तः तत्र तत्रेति ब्राह्मणानां संमर्दो निवारितः क्रमपूजा चोक्ता द्विजातय इति सर्वे साधारण्येन पूजार्थं प्रवृत्ता इति तेषामपि निरोध उक्तः ॥ ३० ॥

एवं कायिकं मानसिकं समानमुक्त्वा वाचनिकमाह । ऊचुरिति । सर्वे एव पुरवासिनः सकृद्भगवन्तं दृष्ट्वा अमितानन्दमनुभूय

देह्यावयोः समुचितान्यङ्ग ! वासांसि चार्हतोः ।
भविष्यति परं श्रेयो दातुस्ते नात्र संशयः ॥ ३३ ॥
स याचितो भगवता परिपूर्णेन सर्वतः ।
साक्षेपं रुषितः प्राह भृत्यो राज्ञः सुदुर्मदः ॥ ३४ ॥
ईदृशान्येव वासांसि नित्यं गिरिवनेचराः ।
परिधत्त किमुद्वृत्ता राजद्रव्याण्यभीप्सथ ॥ ३५ ॥
याताशु बालिशा मैवं प्रार्थ्यं यदि जिजीविषा ।
बध्नन्ति घ्नन्ति लुम्पन्ति दृप्तं राजकुलानि वै ॥ ३६ ॥

श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी।

विचारितवन्तः ये सर्वदैव भगवन्तं पश्यन्ति तेषां महद्भाग्यं तद्भाग्यं स्मृत्वा आश्चर्याविष्टा आहुः। अहो इति। गोप्यः तपः किमचरन्निति। भगवन्तं द्रष्टुं स्त्रिय एव जानन्तीति तासां प्रशंसा तपसैव सर्वं सिध्यतीति ज्ञातेऽस्माभिरपि तत्कर्त्तव्यमिति यत्र साधनेऽपि तत्रत्यानामिच्छा तत्र फले किं वक्तव्यमिति भावः। भगवद्दर्शनस्योत्कृष्टत्वायाह। नरलोकमहोत्सवाविति। उत्सवः कदाचिदेव भवति महोत्सवस्तु सतोऽपि दुर्लभः तत्रापि सर्वेषामुत्सवोऽतिदुर्लभः ॥ ३१ ॥

एतावितिं प्रदर्शनेनाद्भुतत्वे प्रमाणमुक्तम् एवं कायवाङ्मनोभिः समाननं निरूप्य ये समाननं न कुर्वन्ति ये वा कुर्वन्ति उभयोः फलं दर्शयितुं हीनजातीयानामतिक्रमे नाशो निरूप्यते रजकमिति सप्तभिः। हीनः भगवन्तं न मन्यत इति ज्ञापयितुमेवं कथा अन्यथा भगवान् हीनं न कुर्यात् अन्त्यजेषु मुख्यो रजकः रजकश्चर्मकारश्चेत्यादि वाक्यात् अत एव रामावतारे रजकस्याधिक्षेपवाक्यम् अत एव इयं जातिरेव दुष्टा सदा अयं किंचिदिति महान्तं साभरणमुत्तमवस्त्रयुक्तमायान्तं स्वसंमुखं रजका द्विविधाः केवलमलशोधकाः रङ्गकाश्च तत्रायं रजक इत्याह। रङ्गकारमिति। ननु भगवान् राजवस्त्राणि किमिति प्रार्थयति तत्राह। गदाग्रज इति। गदो रोहिणीपुत्रो द्वितीयः सोऽग्रे भविता तस्मादग्रे जातो भगवान् सर्वोत्पादनीयः तत्कंसवधाभावे न भवतीति कंसे मारिते तानि वस्त्राणि स्वस्यैव याचनं तु तं मेलयितुं यथा पुरवासिनः तथा तद्भृत्या अपि चेत् न मारणीया इति केचित्तु गदोऽयं भविष्यतीति मारणार्थं तथोक्तवानित्याहुः। कृपा दृष्टिस्तस्मिन् पतितेति तदुद्धारार्थं याचितवान् तदाह। दृष्ट्वायाचतेति। ननु विद्यमानेषु वस्त्रेषु किमिति याचितवांस्तत्राह। धौतानीति। सांप्रतमेव प्रक्षालितानि स्वरूपतोऽप्युत्तमानि चकारात् नानाविधानि ॥ ३२ ॥

———

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

सुमनसां तासां कर्माणि भावोद्दीपनानि सामनस्यानि तैर्वृ-

भिरभ्यवर्षन् कुसुमानि स्मितानि वेति शेषः ॥ २९-३० ॥

पौराः पुरवासिस्त्रीजनाः ॥ ३१ ॥

रजको वस्त्रनिर्णेजकः स एव वस्त्राणां रङ्गमपि कुर्वन् रङ्गकारस्तम् ॥ ३२—३४ ॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

प्रीत्या उत्फुल्लानि मुखाम्बुजानि यासां ताः सौमनस्यैः कुसुमकलापैः ॥ २९ ॥

द्विजातयस्त्रैवर्णिकाः ॥ ३० ॥

पौराः पुरस्त्रियः नरलोकस्य महानुत्सवो याभ्यां तौ ॥ ३१ ॥

रजकं वस्त्रनिर्णेजकम् रङ्गकारं वस्त्राणां रङ्गं करोतीति तम् ॥ ३२—३३ ॥

———

भाषा टीका।

वे सब मथुरा नारी महलों के ऊपर चढ़कर प्रीति से प्रफुल्लित मुखवाली होकर बलदेवजी तथा केशव भगवान् के ऊपर सुंदर फूलों की वर्षा करती भई ॥ २९ ॥

जाते समय उन उन स्थलोंकर ब्राह्मण लोग भी दधि अक्षत चंदन जल पात्र भेट आदिकों से बड़े आनंदित होकर उन दोनों भ्राताओं का पूजन करते भये ॥ ३० ॥

पुरवासी लोग कहने लगे कि अहो गोपियों ने कौनसी तपस्या की है जो कि सब नर लोक के रमण करने वाले इन दोनों को रोज देखती हैं ॥ ३१ ॥

गदाग्रज भगवान् ने कपडा रंगने वाले धोने वाले आते हुये किसी रजक को देखकर धोये उत्तम वस्त्रों को उससे यांचना किया ॥ ३२ ॥

———

श्रीधरस्वामिकृतभावार्थदीपिका

रुषितः कुपितः ॥ ३४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

हे उद्धृत्ताः ! गिरौ वने चरथ ये नित्यं ते यूयं पूर्वं परिधत्तेति सम्भावनायां लोट् अभीप्सथ प्रार्थयध्वम् ॥ ३५ ॥

राजकुलानि राजकीयाः लुम्पन्ति निःस्वं कुर्वन्ति ॥ ३६-३७ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

कथमयाचत तदाह । देहीति । समुचितानि परिधानयोग्यानि स्वस्ववर्णाकारयोग्यानि अङ्ग हे रजक ! न वक्तव्यम् एतद्वस्त्रयोग्यौ युवां न भवथ इत्याह । अर्हतोरिति । ननु मूल्यं विना कथं देयानीति चेत्तत्राह । भविष्यतीति । परमुत्तमं श्रेयो मङ्गलमैहिकमामुष्मिकञ्च कियद्विलम्बेन मूल्यमधिकं देयं पुण्यञ्च परमं भावीत्यर्थः । दुष्टं प्रत्यपीदृशं मधुरवाक्यं निजसौशील्येनायत्यां भक्तजनासह्यानिजाकीर्तिपरिहारेच्छया च श्लेषादकारप्रश्लेषेणादातुस्ते परलोके भक्तिसुखमयं वैकुण्ठप्राप्तिलक्षणं परं श्रेयो न भावि किन्तु तद्वहिर्मुखं केवलं कैवल्यमेव अत्र न संशयः जीवने सन्देहः मरणमेवेत्यर्थः ॥ ३३ ॥

सर्वतः परिपूर्णेनेति कौतुकादेवेति भावः । सुदुर्मदत्वमुक्तं वैष्णवे । "कंसस्य रजकः सोऽथ प्रासादारूढविस्मय" इति । सुदुर्मुख इति पाठे परमदुर्वचनः । तदुक्तं श्रीहरिवंशे । "प्राप्ताविष्टाय मूर्खाय सृजते वाङ्मयं विषमिति ॥ ३४ ॥

हे उद्वृत्ताः ! राजतो निःशङ्कचेष्टाः यतो गिरिवनेचराः तादृशा यूयम् ईदृशान्येव वासांसि परिधत्त तर्हि किं कथं राजद्रव्याण्यभीप्सथ अत्र नाधिकलाभः प्रत्युतेदानीं राजपुरागतानां वो राजापराधतो भयञ्च भविष्यतीति भावः । अत्र यद्यपि परिधत्तेति सोपहासमेव तत्र च हेतुर्गिरिवनेचरा इति तथापि वञ्चनार्थं सत्यमुद्रयैवावददिति किमभीप्सथेत्युक्तं यद्वा । ईदृशान्येव वासांसि किं परिधत्त येनोद्वृत्ताः सन्तो राजद्रव्याण्यभीप्सथ । वस्तुतो न परिधत्त नच तदभीप्सा योग्या किन्तूद्वृत्तत्वमेव युष्माकमवशिष्यत इति भावः । अत्र यद्यपि परिपूर्णेन सर्वत इति श्यामं हिरण्यपरिधिमित्याद्युक्तानुसारेण तद्वस्त्रन्तु सर्वोत्कृष्टमेव । तथोक्तं वृन्दावनविहारे पराशरेणापि "सुवर्णाञ्जनचूर्णाभ्यां तौ तदा भूषिताम्वरा" विति तथाप्यासुरदृष्ट्या तत्सौन्दर्यं नच दृश्यत इति तथोक्तं सरस्वती तु यथार्थमाह हे उत्कृष्टवृत्ता नित्यमेव श्रीगोवर्द्धनवनविहारिणो यूयं किमीदृशान्येव वासांसि परिधत्त अपि तु परमदिव्यान्येव राजद्रव्याणि च किमभीप्सथ अपि तु नैवेत्यर्थः । तस्माद्व्याजमात्रमेवेदं याचनमिति भावः ॥ ३५ ॥

हे वालिशा ! आशु यात पलायध्वमित्यर्थः । मैवं प्रार्थ्य पुनः कदापि प्रार्थनमीदृशं न कार्यं घ्नन्ति प्रहरन्ति लुम्पन्ति छिन्दन्ति हि यतः सम्प्रति त्वस्माभिर्वालिशत्वादेव क्षान्तमिति भावः । सरस्वती त्वाह हे याताशुवालिशाः यातः प्राप्त आशुक्षपलो वालिशो मूर्खश्चायं रजकलक्षणो यैः तथाभूताः । यदि जिजीविषा जीवनधारणेच्छा तत्प्रकटनेच्छा तदा मैवं प्रार्थ्यं ननु शूरे रजकेऽपि कथं वलं वर्णनीयं तत्राह । हि यतः राजकुलानि राजवंश्या भवद्विधाः दृप्तं दर्पयुक्तं जनं वध्नन्तीत्यादि । जीव बलप्राणधारणयोः ॥ ३६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

याच्ञाप्रकारमेवाह । देहीति । अङ्ग हे रजक ! योग्ययोरावयोः समुचितानि वासांसि देहि दातुस्तव परममुत्कृष्टं श्रेयो भविष्यति नास्मिन्नर्थे संशयोऽस्ति ॥ ३३ ॥

इत्थं भगवता सर्वतः परिपूर्णेन पूर्णकामेन याचितः स रजकः राज्ञः कंसस्य भृत्यः दुर्मदश्च हेतुगर्भमिदं विशेषणद्वयम् अतो रुषितः क्रुद्धः साक्षेपम् आटोपगर्भं यथा तथा प्राह ॥ ३४ ॥

उक्तिमेवाह । ईदृशानीति द्वाभ्याम् । हे उद्वृत्ताः ! गिरौ वने च चरथ ये ते यूयम् ईदृशान्येव वासांसि परिधत्त किं सम्भावनायां लोट् राजद्रव्याणि अभीप्सथ स्वाधिकारमनालोच्येति शेषः ॥ ३५ ॥

हे वालिशाः ! आशु यात यर्हि जीवितुमिच्छा तर्हि मैवं प्रार्थनीयं यद्येवं प्रार्थ्यते तर्हि राजकुलानि राजकीयाः दुष्टान् युष्मान् बध्नन्ति हन्ति लुम्पन्ति निस्वं कुर्य्युः ॥ ३६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

साक्षेपवाक्यं विवृणोति । ईदृशानीति । परिधत्थ परिधानं कुरुथ ॥ ३५ ॥

जिजीविषा जीवितुमिच्छा लुम्पन्ति अवच्छेदं कुर्वन्ति राजकुलानि राज्ञां समूहाः ॥ ३६—३७ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

ईदृशानीति । तदिदमासुरदृष्ट्या श्रीविष्णुपुराणे लौकिकदृष्ट्यापि "सुवर्णाञ्जनचूर्णाभ्यां तौ तदा रुषितावि"वेत्युत्तमत्वावगमात् मूलेऽपि श्यामं हिरण्यपरिधिमिति दृश्यते ॥ ३५—३९ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

याचनमाह । देह्यावयोरिति । गोपालेभ्यः पश्चाद्देयमिति सङ्कोचादावयोरेवेत्युक्तं समुचितानि मह्यं पीतप्रधानानि बलभद्राय नीलप्रधानानि अङ्गेति सम्बोधनं तस्मिन् स्नेहसूचकमतिक्रमाभावार्थं च वासांसि परिधानयोग्यानि चकाराद्यदि तवाभरणानि भवन्ति गोपालेभ्योऽपि वा न ज्ञायत इति चेत्तत्राह । अर्हतोरिति आवामुत्तमवस्त्राण्यर्हन्तौ दाने किं स्यादत आह । भविष्यति परं श्रेय इति । अन्येभ्यो दानापेक्षयापि मह्यं दाने परमधिकमेव श्रेयो भविष्यति परं दातुरेव तेन त्वद्दाने अन्यथा भगवद्वाक्यमन्यथा स्यात् दानपक्षे पश्चाद्राजत्वे वृत्तेऽपि दोषान्तरशङ्कया श्रेयो न भवेदिति शङ्कां वारयति । नात्र संशय इति ॥ ३३ ॥

एवं व्यवहारसिद्धत्वात्तदुपकारार्थं याचनेऽपि कृते दुष्टो नाङ्गीकृतवानित्याह । स याचित इति । अविद्यमानत्वाद्याचनं व्यावर्त्तयति । भगवतेति । सर्वसमर्थस्यापि कदाचिन्न भवेदिति तदर्थमाह । परिपूर्णेन सर्वत इति । सर्वदेशेषु सर्वकालेषु च परितः सर्वद्रव्याणि सर्वे-

एवं विकत्थमानस्य कुपितो देवकीसुतः ।
रजकस्य कराग्रेण शिरः कायादपातयत् ॥ ३७
तस्यानुजीविनः सर्वे वासःकोशान् विसृज्य वै ।
दुद्रुवुः सर्वतो मार्गं वासांसि जगृहे ऽच्युतः ॥ ३८ ॥
वासित्वात्मप्रिये वस्त्रे कृष्णः सङ्कर्षणस्तथा ।
शेषाण्यादत्त गोपेभ्यो विसृज्य भुवि कानिचित् ॥ ३९ ॥

श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी ।

फलानि सर्वतः पूर्णानि ततश्च तादृशाय वचनेनापि हितं वक्तव्यमिति तन्नोक्तवानित्याह । साक्षेपमिति । आक्षेपपूर्वकं रुषितः प्राह अन्तर्बहिः तस्य दोषौ निरूपितौ रोषः आन्तरः साक्षेपं यथा भवतीति बाह्यं तस्य तथात्वे हेतुमाह । भृत्यो राज्ञ इति । कंसस्य भृत्यः स्वभावतोऽपि दुष्ट इत्याह । सुदुर्मद इति । सुतरां दुष्टो मदो यस्येति ॥ ३४ ॥

आक्षेपमाह । ईदृशान्येवेति । यो हि समीचीनवस्त्राणि परिधत्ते स कदाचिद्भवि याचयित्वापि परिधत्ते द्रव्यं दत्त्वा वा तथा किं भवन्तः ईदृशान्येवात्युज्ज्वलानि नित्यं परिधत्त तथैवेत्याशङ्कायामाह । गिरिवनेचरा इति । गिरौ वने च चरन्ति ते विद्यमानवस्त्रा अपि कुचैला एव भवन्ति नित्यं ये गिरिवनेचराः तेषामुत्तमवस्त्रपरिग्रहो व्यर्थ एव । नन्वपरिहितान्यपि औत्सुक्यात् याच्यन्त इति चेत्तत्राह । किमुद्धृत्ता इति । औत्सुक्ययाचने न राजकीयानि याच्यन्ते किं तु साधारणानि । नन्वसाधारणान्यपि याच्यन्ते का मर्यादेति चेत्तत्राह । तर्हि किं भवन्त उद्वृत्ता इति । उद्गतं वृत्तं मर्यादारूपं येभ्यः एतादृशोद्वृत्तता किमर्थं क्रियत इति वा येन राजद्रव्याण्यभीप्सथ यस्तु मूर्द्धाभिषिक्तः तन्मात्रोपभोग्यानि मत्प्रक्षालितानि वस्त्राणि तान्यपि यतोऽभीप्सथ ॥ ३५ ॥

अज्ञात्वा याचितमिति चेत्तत्राह । याताश्विति । इतः शीघ्रमेव यात ग्रामान्तरं गच्छत यतोऽत्रत्यवृत्तान्तो न ज्ञायते भवद्भिः हितमाह । मैवं प्रार्थ्यमिति । बाधकमाह । यदि जिजीविषेति । यतः प्रार्थयितारं राजकुलानि मर्यादार्थं युक्ता राजभटाः अल्पापराधे बध्नन्ति महत्यपराधे गृहस्थासंमते तमेव घ्नन्ति अन्यथा लुठन्ति सर्वस्वलुण्ठनं कुर्वन्ति तथाकरणे दोषमाह । दृप्तमिति । अतो यावत् दृप्तता न जानन्ति तावदन्यत्र यातेति रोषवाक्यम् एवं सर्वसाधारणं भगवन्तं ज्ञात्वा बहुवचनेन सर्वान् प्रत्युक्तवान् ॥ ३६ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

वृत्तात् सौशील्यात् उद्गताः हे दुःशीला इत्यर्थः । परिधत्तेति सम्भावनायां लोट् सरस्वतीत्वाह हे उत्कृष्टचरित्रा गोवर्द्धनगिरिचरा यूयं किम् ईदृशानि प्राकृतानि परिधत्त अपितु नैवेत्यर्थः । तस्मात्कीलयापि किं राजद्रव्याण्यपवित्राण्यभीप्सथ वृत्तं पद्ये चरित्रे त्रिष्वित्यमरः ॥ ३५ ॥

यातेति स्पष्टं पक्षे हे वालिशा ! वालिं श्यन्ति त्रिपादभूमिं प्रार्थ्य तनू कुर्वन्तीति बालिशाः स्वार्थेऽण् वालिशा हे परमेश्वराः यदि मे जिजीविषास्ति तर्हि मैवं प्रार्थ्यं वलिरिव तुभ्यं यदि वासांसि ददामि तर्ह्येव मे जीवनं न स्थास्यतीत्यर्थः । कुत इत्यत आह । बध्नन्तीति । राजकुलानि अत्रत्याः राजकीयाः पुरुषा दृप्तं कंसराजान्निःशङ्कं जनं प्रथमं बध्नन्ति ततो राजानं विज्ञाप्य घ्नन्ति ततो लुम्पन्ति तद्गृहं लुठन्ति ॥ ३६—३७ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

रुषितः कुपितः साक्षेपं यथा तथा प्राह ॥ ३४ ॥

हे गिरिवनेचराः ! गिरौ वने चरथ यूयम् ईदृशान्येव वासांसि परिधत्त किं सम्भावनायां लोट् राजद्रव्याणि अभीप्सथ प्रार्थयध्वम् ॥ ३५ ॥

हि यतः राजकुलानि राजकीयाः बध्नन्ति निर्व्यापारं कुर्वन्ति घ्नन्ति निर्जीवितं कुर्वन्ति लुण्ठन्ति निःस्वं कुर्वन्ति अत आशु यात यदि जीवितुमिच्छा तर्हि मैवं प्रार्थ्यम् एवम्प्रार्थना न कर्तव्येति फलितोऽर्थः ॥ ३६—३७ ॥

भाषा टीका ।

भगवान् बोले हम दोनों के अच्छे उचित वस्त्र सब हैं हम इनके योग्य हैं सो हम को तू वस्त्रों को देदे तो देने से तेरा भला होगा इसमें कुछ सन्देह नहीं है ॥ ३३ ॥

सब प्रकार से परिपूर्ण भगवान् के ऐसे मागने पर भी राजा का भृत्य बडा दुर्मद वह धोवी गुसा होकर कटुक वचन से कहने लगा ॥ ३४ ॥

अहो रोज पर्वत वन में घूमने वाले तुम लोग ऐसे ही कपडों को पहरते हौ क्या अहो उद्धतो ! राजा के द्रव्य को चाहते हौ ॥ ३५ ॥

हे बालको ! तुम चले जाओ यदि जीने की इच्छा है तो कभी ऐसी चाहना नहीं करना ऐसे गर्वित पुरुषों को राजा के कुल के पुरुष बांधते हैं मारते हैं लूटलेते हैं ॥ ३६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

वासःकोशान् वस्त्रपुटकान् ॥ ३८—३९ ॥

ततस्तु वायकः प्रीतस्तयोर्वेषमकल्पयत् ।
विचित्रवर्णैश्चैलेयैराकल्पैरनुरूपतः ॥ ४० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

वायकस्तन्तुवायविशेषः वेषमलङ्कारं, चैळयैर्वस्त्रमयैराकल्पैर्भूषणैः ॥ ४० ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

विकत्थमानस्य विरुद्धमात्मश्लाघापूर्वकमुच्चैर्जल्पतः अत्रात्मश्लाघा च एवम्भूतमहाशिल्पिराजात्मीयसेवकोऽहमिति व्यञ्जनया स्पष्टं दर्शिता श्रीवैशम्पायनेन ।"अहं कंसस्य वासांसि नानादेशोद्भवानि वै ।कामरागाणि शतशो रञ्जयामि विशेषत" इत्यादौ । कुपितः कंसपक्षपाताद्विशेषतश्च बहुवचनेन तत्साक्षादग्रजादीन् प्रति दुरुक्तिस्पर्शात् । अतएव खड्गानुकारिणा कराग्रेणैकेनैव तिष्ठत एव तस्य शिरः कायादहरत् छित्त्वा दूरे चिक्षेपेत्यर्थः । देवकीसुत इत्यत्र कंसेन क्रियमाणया देवक्या यातनया कदर्थितः सोऽयं तदीयानां जनानां कथमौद्धत्यं सहतामिति भावः । यद्वा यतो दुष्टसंहारार्थं तस्यां जात इत्यर्थः ॥ ३७ ॥

वै एव चेति पाठेऽनुक्तमसमुच्चयः ते गर्दभादीन्यपि सर्वत इतस्ततो मार्गं दुद्रुवुः । यद्वा । मार्गस्य सर्वा दिशो दुद्रुवुः । अकारप्रश्लेषेण अमार्गमिति वा । मार्गं हित्वा तदितरस्थानं प्रति दुद्रुवुरित्यर्थः । अच्युत इति । तत्स्थानस्थितिमपि व्यञ्जयति ॥ ३८ ॥

आत्मप्रिये पीतनीलवर्णे वस्त्रे परिधानीयोत्तरीये आदत्त आ सम्यक् तत्तदिच्छाद्यनुरूपं वस्त्रं दत्तवान् तदर्थं गृहीतवानिति वा । कानिचिदयोग्यानि अधिकानि च । अत्रायमपि श्रीभगवतोऽभिप्रायः नूनं कंसेन महोत्सवे स्वपरिकरसुशोभार्थमेतान्यपूर्वाणि वस्त्राणि धावयितुं दत्तानि तस्मात्तच्छोभां नाशयंस्तैरहमेव स्वपरिकरसुशोभां कुर्वन् प्रथमतस्तदुत्सादयामीति वस्तुतस्त्वेतानि वस्त्राणि नरककृतकुमारीवत्तदीयान्येव लीलासौष्ठवाय लीलाशक्त्या तद्द्वारैव तु मिलितानीति ज्ञेयम् ॥ ३९ ॥

इत्थं शिष्टहर्षांशमेव दुष्टनिग्रहं कृत्वा शिष्टाननुजग्राहेति वदन्नादौ वायकानुग्रहमाह । ततस्त्विति । ततस्तद्वधाद्वस्त्रपरिधानाच्च वायकः प्रीतः सन् चैलेयैरेवाकल्पैः कटककुण्डलादिभिस्तयोर्वेशं रचितवान् आकल्पत्वमेव स्थापयति । विचित्रवर्णैर्मणिजटितसुवर्णकल्पवत् विरच्य स्वगृहादानीतैरित्यर्थः । ननु कुतस्तौ निजमणिमयालङ्कारं त्यक्तवन्तौ कुतो वा सोऽपि चैलेयमेवालङ्कारं दत्तवान् तत्राह । अनुरूपतः मल्ललीलायां गात्रतोदकत्वेन तस्यैवानुरूप्यादित्यर्थः । अनेन तयोः स्वस्वानुरूप्यमपि ज्ञेयम् ॥ ४० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

इत्थं रजकस्य विकत्थमानस्य सतः भगवान् मुकुन्दः कराग्रेण तस्य शिरः कायादपाहरत् ॥ ३७ ॥

ततस्तस्य रजकस्यानुजीविनः सर्वे वासःकोशान् वस्त्रपुटकान् विसृज्य सर्वतो मार्गान् प्रति दुद्रुवुः पलायितवन्तः ततो भगवान् वासांस्यादत्त ॥ ३८ ॥

तदा सङ्कर्षणः श्रीकृष्णश्चात्मप्रिये स्वाभीष्टे वस्त्रे वसित्वा परिधाय शेषाणि गोपेभ्यः आदत्त अदात् कानिचिद्वासांसि भुवि विसृज्य त्यक्त्वा अगादिति शेषः ॥ ३९ ॥

ततः कश्चिद्वायकः तन्तुवायकः प्रीतः प्रीतियुक्तः विचित्रवर्णैश्चैलेयैर्वस्त्रमयैराकल्पैर्भूषणैर्यथानुरूपं तयो रामकृष्णयोर्वेषमलङ्कारमकल्पयत् विदधे ॥ ४० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

वासःकोशान् वस्त्राख्यराशीन् कोशोऽस्त्री कुड्मले दिव्ये शास्त्रेऽथाघे गृहे तनाविति च वस्त्रकरण्डकान् वा ॥ ३८ ॥

वस्त्रे परिधानोत्तरीये विसृज्य ॥ ३९ ॥

वयाकः तन्तुवायकः वेषमद्भुतालङ्कारमेतदेव विशदयति । विचित्रेति । विचित्रा नानाविधा वर्णाः नीलरक्तादयो येषां ते तथा तैः शैलेयैः धातुभिः आकल्पैः आभरणैः ॥ ४० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

चैलेयैरेवाकल्पैः कटककुण्डलादिभिः रत्ननिर्मितवत् विचित्रवर्णैः तद्वेशे हेतुः । आनुरूप्यतः मल्ललीलायां गात्रतोदकत्वेन तस्यैवानुरूप्यादित्यर्थः ॥ ४०—४४ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

तत्र बळभद्राक्षेपमसहमानः अग्रे कार्यमपि कर्त्तव्यमिति तं मारितवानित्याह । एवमिति । विशेषेण कत्थमानस्य असम्बद्धभाषिणः भगवन्माहात्म्यमज्ञात्वा स्वोत्कर्षमेव वदतीति अत एव कुपितः किञ्च । देवकीसुत इति । देवकी तु बद्धा तस्यां कृपया कंसो मारणीय इति तं मारितवान् अथवा मातुलेयो न मारणीय इति तं ज्ञापयितुं स्वस्य पौरुषप्राकट्यार्थं रजकं मारितवान् कराग्रेण चपेटेन नखेन वा केचित् अदृष्टं सुदर्शनं कल्पयन्ति तस्य मुखस्यैव दोष इति शिरः कायात् दूरीकृतवान् उभयोः सम्बन्धो न युक्त इति ॥ ३७ ॥

तत्प्रक्षालितानि हि भगवता परिधेयानीति ततोऽन्ये अहन्यमाना अपि पलायिता इत्याह । तस्यानुजीविन इति । तस्य मुख्यरजकस्य अनुजीविनः सेवकाः सर्व एव रजकाः अतस्ते वासःकोशान् वस्त्रभारान् भण्डाररूपान् विसृज्य वै निश्चयेन पुनः प्राप्तिप्रत्याशां दूरीकृत्य यथा कथंचित् दुद्रुवुः सर्वत एव मार्गो यथा भवति तथा भीतपलायने सर्वत्रैव मार्गो भवतीति ततो भगवान् अप्रतिहतः स्वयं वासांसि जगृहे क्षत्रियाणामयं धर्मः

नानालक्षणवेषाभ्यां कृष्णरामौ विरेजतुः ।
स्वलंकृतौ बालगजौ पर्वणीव सितेतरौ ॥ ४१ ॥
तस्य प्रसन्नो भगवान् प्रादात्सारूप्यमात्मनः ।
श्रियं च परमां लोके बलैश्वर्यस्मृतीन्द्रियम् ॥ ४२ ॥
ततः सुदाम्नो भवनं मालाकारस्य जग्मतुः ।
तौ दृष्ट्वा स समुत्थाय ननाम शिरसा भुवि ॥ ४३ ॥
तयोरासनमानीय पाद्यं चार्घ्यार्हणादिभिः ।
पूजां सानुगयोश्चक्रे स्रक्ताम्बूलानुलेपनैः ॥ ४४ ॥

श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी ।

इतस्य शत्रोः पदार्थाः स्वस्यैवेति च्युतिराहित्यमत्र कोलाहलादिना भयशङ्काव्यावृत्त्यर्थम् ॥ ३८ ॥

अत एव निर्भयव्यवहारमाह । वसित्वात्मप्रिये वस्त्रे इति । आत्मप्रिये सिते संकर्षणोऽपि तथा तथा शेषाणि पुनर्वस्त्राणि गोपेभ्यः आधत्त भगवान् संकर्षणश्च तेषां स्वतो ग्रहणमनुचितमिति भारं उपरि यदि अनाभिप्रेतं भवेत् तानि भुवि विसृज्य उत्तमान्येव दत्तवान् । प्रायेण बहून्येव गृहीतानि त्यक्तानि तु बहूनि वस्त्रे इति द्विवचनं जात्यभिप्रायमुभयोर्वैजात्येन वस्त्रजातीयाः प्रिया इति न तु वस्त्रद्वयमेव पतदर्थमेवावतीर्ण इति कृष्णस्योचितं परिधानं सम्यक् कर्षतीति द्रष्टृद्वयमेलक इति संकर्षणस्यापि परिधानमुचितम् ॥ ३९ ॥

ततो यथा कथंचिद्बन्धनार्थं प्रवृत्तौ ज्ञाततत्त्वावपि मुग्धभावेन वायकपरितोषार्थं तदा संतुष्टो वायकः वस्त्रपरिधानकारयिता यः प्रभुभ्योऽपि सम्यक् परिधानं कारयति स मम कार्यमेतदिति स्वकार्ये प्राप्ते सर्वोऽपि प्रीतो भवति तत्राप्युत्कर्षे तयोः कृष्णरामयोः यो वेष उचितः स्वयं पूर्वं ध्यातो वा तमकल्पयत् स्वयं विचार्य नानाविधवस्त्राणि कोशेभ्यः भगवतैव वा पूर्वं गृहीतानि । विचित्रो वर्णो येषामिति यस्मिन् भागे यादृशो वर्ण उचितः । चैलेयैरुत्तमवस्त्रैराकल्पैराभरणरूपैः अनुरूपत इति । यथा श्यामे यथा शुक्ले वेश उचितो भवति एकत्रैव एकविषय एव हिताहितासिद्धिरिति ज्ञापयितुं वायकनिरूपणम् ॥ ४० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

वासःकोशान् वस्त्रसंपुटान् ॥ ३८—३९ ॥

वायकः वैणवसौचिकः आकल्पैः कटककुण्डलकेयूरादिभिश्चैलेयैः कोमलचेलखण्डनिर्मितैः विचित्रवर्णैर्मणिजटितस्वर्णतुल्यवर्णैः अनुरूपतः मल्ललीलायां गात्रतोदकत्वेन चैलेयालङ्काराणामेवौचित्येनानुरूप्यात् तयोर्वर्णानुरूप्याच्च ॥ ४० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

वासःकोशान् वस्त्रपुटकान् मार्गे राजमार्गेऽच विसृज्य सर्वतः दुद्रुवुः ॥ ३८ ॥

कृष्णस्तथा सङ्कर्षणः आत्मप्रिये वस्त्रे वसित्वा परिधाय गोपेभ्य कानिचित् तत्प्रियाणि वस्त्राण्यादत्त अदात् शेषाणि भुवि विसृज्य अगादिति शेषः ॥ ३९ ॥

ततस्तदनन्तरं वायकस्तन्तुवायकः प्रीतः प्रीतियुक्तः विचित्रवर्णैः चैलेयैर्वस्त्रमयैराकल्पैर्भूषणैः । तयोर्वेषमलङ्कारसंकल्पयतु विदधे ॥ ४० ॥

भाषा टीका ।

इस प्रकार से वकवाद करने वाले रजक के ऊपर देवकी सुत भगवान् कुपित भये तव अपने करके अग्र भाग से उस धोवी के शरीर में से शिरको तोडकर नीचे गिरा दिया ॥३७॥

तिसके पीछे उसके नौकर जितने रहे सो वस्त्रादि पदार्थों को जहां तहां छोडकर चारों तरफ की रस्ता को भाग गये उन सब कपडों को भगवान् ने लेलिया ॥ ३८ ॥

श्रीकृष्ण भगवान् ने तथा वलरामजी ने भी अपने प्रिय वस्त्रों को पहर लिये वांकी वस्त्र और गोपों को देदिये और कुछ जमीन ही में छोड दिये ॥ ३९ ॥

तिसके अनंतर किसी भक्त दरजी ने प्रसन्न होकर विचित्र प्रकार के वस्त्रों से उन दोनों के अनुरूप वेष कल्पना कर दिये ॥ ४० ॥

श्रीधरस्वामिकृतभावार्थदीपिका

पर्वण्युत्सवे ॥ ४१ ॥

इह लोके परमां श्रियं च बलं चैश्वर्यञ्च स्मृतिश्चेन्द्रियं तत्पाटवं च प्रादात् ॥ ४२—४५ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

नाना बहुविधं लक्षणं प्रकारो ययोस्ताभ्यां वेशाभ्यां छन्दाभ्यां द्वित्वं तत्तदनुरूपत्वेन द्विधाभेदात् विरेजतुरित्यत्र भक्तसेवास्वीकारादिति तत्त्वं सितेतरौ शुक्लकृष्णौ बालगजाविव दार्ष्टान्तिकवर्णव्यातिक्रमेण दृष्टान्तवर्णोक्तिः केवलमलङ्कारकृतशोभायां तात्पर्येण पूर्वापरताऽनपेक्षणात् ॥ ४१ ॥

तस्य तस्मै प्रकर्षेणादाव षष्ठी पूर्वत एव तस्य तद्भक्त्या सारूप्यादीनां तत्स्वामित्वबोधनार्थं लोक इत्यत्रैव लोके किमुत परत्रेत्यर्थः । यद्वा लोके पश्यत्स्वेवेत्यर्थः । प्रशब्दार्थमभिव्यञ्जयति । आत्मनः श्रीगोपालरूपस्येति परमां ब्रह्मादिदुर्लभां श्रियं द्रव्यादिसम्पदं परमामिति लिङ्गादिव्यत्ययेनाग्रेऽपि योज्यं चकारादैश्वर्यं प्रभुत्वं दानञ्च त्रिवक्रावत्तत्कालमेव ज्ञेयं तत्सम्भावनार्थमाह । भगवानिति ॥ ४२ ॥

ततस्तदनन्तरमिति चैलेयाकल्पानन्तरं पुष्पमालानामपेक्षत्वादित्यर्थः । यद्वा । वायकानुग्रहानन्तरं वायकादपि मालाकारं प्रत्यधिकानुग्रहार्थमित्यर्थः । सर्वलोकवत्तस्य पूर्वं स्वयं श्रीकृष्णनिकटाप्रयाणं तु तदुपायनार्थापूर्वमालारचनाभिनिवेशेनेति ज्ञेयं अग्रे च व्यक्तं भावि सम्यक् ससंभ्रममासनत्यागादिप्रकारेणोत्थाय शिरसा भुवि ननाम । यथोक्तं वैष्णवे । "भुवं विष्टभ्य हस्ताभ्यां पस्पर्श शिरसा महीं" मिति । श्रीभगवद्दर्शनार्थं निष्क्रान्तपरिकरस्य तन्मालानिविष्टदृष्टेस्तस्य कृपया सहसान्तिकसमागमनेन प्रणामस्थानसंकोचात्तत्तः सम्भ्रमेण तद्विस्मरणाद्वा ॥ ४३ ॥

अर्घ्यं गन्धादिद्रव्याष्टकम् अर्हणञ्चान्यत् पूजोपकरणं धूपदीपनैवेद्यादि । आदिशब्दाच्चामरवीजननीराजनादीनि । अर्हणशब्देनादिशब्देन च गृहीतानामपि स्रगादीनां पृथगुक्तिस्तत्प्राचुर्यस्य पुनः पूजनस्य चाभिप्रायेण ॥ ४४ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

सितेतरौ सितश्च तदितरश्च असितः श्वेतकृष्णवर्णौ गजाविव ॥ ४१—५२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तदा तौ रामकृष्णौ नानाविधवेषाभ्यां विरेजतुः यथा पर्वण्युत्सवे स्वलंकृतौ सितेतरौ श्वेतवर्णकृष्णवर्णौ बालगजौ रेजतुस्तद्वत् ॥ ४१ ॥

ततो भगवान् प्रसन्नस्तस्य वायकस्य स्वसारूप्यं स्वसाधर्म्यं मुक्तिमिति यावत् प्रादात् देहावसाने दास्यामीति सङ्कल्पितवानित्यर्थः । श्रियमित्यादि अस्य जीवद्दशायामितिशेषः इह लोके परमां श्रियं बलं चैश्वर्यञ्च स्वाविषयकस्मृतिञ्चेन्द्रियं तत्पाटवञ्चादात् ॥ ४२ ॥

ततः सुवासः सुदामाख्यस्य मालाकारस्य गृहं जग्मतुः गतवन्तौ स च तौ रामकृष्णौ दूरादेव दृष्ट्वोत्थायाभ्येत्य शिरसा भुवि ननाम नमश्चक्रे ॥ ४३ ॥

तयोरासनमानीयादाय समर्प्य पाद्यं च समर्प्येति शेषः अर्घ्यार्हणादिभिः स्रगादिभिश्च सानुगयोस्तयोः पूजां चक्रे अर्हणशब्द उपात्तेतरपूजासाधनसंग्रहार्थः ॥ ४४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावळी ।

लक्षणं मुद्रा पर्वणीव पौर्णमास्यमावास्ये इव सितेतरौ श्वेतश्यामौ ॥ ४१ ॥

बलञ्च ऐश्वर्यञ्च स्मृतिश्च इन्द्रियञ्च बलैश्वर्यस्मृतीन्द्रियाणि तानि बलं शरीरशक्तिः रूपं सौन्दर्यं वा ऐश्वर्यमणिमादि स्मृतिर्भगवत्स्मरणम् इन्द्रियं ज्ञानेन्द्रियम् ॥ ४२—४४ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

तत्परिधापनेन भगवतः शोभामाह । अन्यथा तस्मै वरदानं सारूप्यलक्षणमयुक्तं स्यात् अतस्तत्क्रियया शोभा जातेत्याह । नानालक्षणेति । नानालक्षणानि वेषाः वेषाकृतौ तस्य वैयर्थ्याभावाय सदानन्दत्वं रतिजनत्वं लोके विशेषेण पूर्वापेक्षयापि रेजतुः यतः स्वलंकृतौ भगवतोऽतिमहतः स्वरूपेणोत्कृष्टस्यालंकारेण कौतुकमेव भवतीति ज्ञापयितुं दृष्टान्तमाह । बालगजौ अतिसुन्दरौ यथा पर्वणि नवम्यादावुत्सवे अलंकृतौ भवतस्तथातिचपलाविव अतिसुन्दरौ सर्वैर्दृष्टावित्यर्थः ॥ ४१ ॥

तदा सर्वेषामधिकसन्तोषे फलं देयमिति । सन्तुष्टो भगवान् फलं दत्तवानित्याह । तस्य प्रसन्न इति । मनसि रूपं भावयित्वा रूपं कृतवानिति सारूप्यमेव दत्तवान् सामर्थ्यार्थं भगवानिति मुक्तिः प्रसन्न एव भवतीति प्रसन्न इत्याह । आत्मनः सारूप्यं व्यापिवैकुण्ठवासिनः । एतद्देहावसाने भविष्यतीति तदानीमनभिप्रेतमिति । फलान्तरमप्याह । बलैश्वर्य्येति । बलं देहस्य ऐश्वर्यवाचकम् आज्ञासामर्थ्यमिति यावत् । स्मृतिर्मानसी भगवदनुसंधानरूपा आत्मानुसन्धानरूपा इन्द्रियमपि सर्वेन्द्रियसामर्थ्यं दत्तवान् एवमन्तश्चतुर्द्धा ऐहिकं पारलौकिकं चेति षट् फलानि दत्तानि । धर्म एव तेन सम्पादित इति न स्वरूपदानम् ॥ ४२ ॥

भक्त्या सह स्वरूपदानार्थमुपाख्यानान्तरमाह । ततः सुदाम्न इति । यो हि दाता स पूर्वं यद्देयं तद्दत्त्वैव दुर्लभं प्रयच्छति अतस्तदनन्तरम् उत्तममालाकर्तुर्भवनं गतौ प्रायेण तस्य भवनं न राजमार्गे अन्यथा प्रासंगिकमेव स्यात् । विक्रयस्थाने तु नोत्तमाः पदार्था भवन्तीति भवनमेव जग्मतुः सुदामपदं रूढं वा भवेदिति विशेषमाह । मालाकारस्येति । साधारण्येन मालाकर्त्तुः नन्वक्लिष्टकर्मा भगवान् किमित्यल्पार्थे परगृहं गत इति शङ्काव्युदासाय तस्य भक्त्यादिकं निरूपयति । तौ दृष्ट्वेति सार्धैः षड्भिः । षड्गुणेभ्योऽधिकं देयमिति भक्तिरुद्धेमिति । स झुत्तमां मालां विधाय किं कर्त्तव्यमिति तिष्ठति तदैवागतौ रामकृष्णौ दृष्ट्वा प्रसिद्धः पूर्वमपि भगवद्भक्तः समुत्थाय भुवि शिरसा साष्टाङ्गं ननाम लौकिकयेषा भाषेति यथाकृतमुक्तवान् निरोधार्हो भवतीति ज्ञापयितुं वा प्राकृतत्वाभावाय भक्तत्वाभावाय च मध्यभावं निरूपयन्निरूपयति ॥ ४३ ॥

एतावन्महत्युदासीनेनापि क्रियत इति विशेषतः पूजामाह । तयोरासनमानीयेति । स्वगृहे तादृशं योग्यं प्रायो नास्तीति यद्वोत्तमं तदेवानीय

आह नः सार्थकं जन्म पावितं च कुलं प्रभो ! ।
पितृदेवर्षयो मह्यं तुष्टा ह्यागमनेन वाम् ॥ ४५ ॥
भवन्तौ किल विश्वस्य जगतः कारणं परम् ।
अवतीर्णाविहांशेन क्षेमाय च भवाय च ॥ ४६ ॥
न हि वां विषमा दृष्टिः सुहृदोर्जगदात्मनोः ।
समयोः सर्वभूतेषु भजन्तं भजतोरपि ॥ ४७ ॥
तान्नाज्ञापयतं भृत्यं किमहं करवाणि वाम् ।
पुंसोऽत्यनुग्रहो ह्येष भवद्भिर्यन्नियुज्यते ॥ ४८ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

दत्तवान् । अव्यवहार्ये वा तथा पाद्यं च चकारादन्येऽप्युपचारास्तथैव कृताः अर्हणादिभिश्चन्दनादिभिः पाद्यान्ते उपचारे कृते सान्निध्यात् जातस्नेहः भक्त्युत्तरं कृतवानिति ज्ञापयितुमथ शब्दः अतः सानुगयोः पूजां चक्रे इयं पूजा आकस्मिकीति लोकसाधारणीमाह । स्रक्ताम्बूलानुलेपनैरिति । आदौ चन्दनानुलेपनम् । ततस्ताम्बूलं ततो मालेति तथापि स्वधर्मो मालेति व्युत्क्रमेण निरूपितवान् । भक्तिवशाद्वा यदैव यत्संपन्नं तदेवाग्रे कृतवानिति । ॥ ४४ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

नानाविधं लक्षणं ययोस्ताभ्यां वेषाभ्यां द्वित्वं तत्तदनुरूपत्वेन द्विधा भेदात् पर्वणि उत्सवे सितेतरौ सितश्यामौ ॥ ४१ ॥

इन्द्रियमिन्द्रियपाटवम् ॥ ४२ ॥

वस्त्रालङ्कारपरिधानानन्तरं मालां अपेक्ष्यन्त इत्यत आह । तत इति ॥ ४३—४६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

पर्वणि उत्सवे सितेतरौ शुक्लकृष्णौ ॥ ४१ ॥

सारूप्यं साधर्म्यलक्षणं मोक्षम् प्रादात् इह लोके लीलादर्शनार्थं यावद्वासस्तावत्कालं श्रियं बलं च ऐश्वर्य्यं च स्मृतिञ्च इन्द्रियमिन्द्रियपाटवञ्च कंसादिभ्यः सर्वशः श्रैष्ठ्यं प्रादादित्यर्थः ॥ ४२ ॥

सः सुदामा ॥ ४३ ॥ ४५ ॥

भाषा टीका ।

नाना प्रकार के वेश से रामकृष्ण दोनों ऐसे शोभित भये जैसे पूर्णिमा अमावास्या पर्व में सफेद तथा श्याम हस्ति दोनों अलंकृत किये जावें ॥ ४१ ॥

उस दरजी के ऊपर भगवान् प्रसन्न भये सो उसको अपना सारूप्य देदिया इस लोक में परम श्री बल ऐश्वर्य इन्द्रिय शक्ति इन सवन को भी दे दिया ॥ ४२ ॥

तिसके अनंतर सुदामा नामा माला कारके घरको भगवान् जाते भये वह माळाकार उन दोनों का दर्शन करके उठ खडा भया औ पृथि में गिरकर शिरसे प्रणाम करता भया ॥ ४३ ॥

उनके लिये दिव्य आसन लाकर दिया विधि पूर्वक सब अनुचरों के सहित उन दोनों का पूजन किया माला ताम्बूल आदिक सब दिये तथा चन्दन लगाये ॥ ४४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

क्षेमायाभयाय भवायोद्भवाय ॥ ४६ ॥

रजकवधेन वायकानुग्रहेण च युवयोर्विषमदृष्टितयाऽनीश्वरता नाशङ्कनीयेत्याह । नहि वामिति । अत्र हेतुः । समयोरिति । अत्रापि हेतुद्वयं सुहृदोरिति जगदात्मनोरिति च ॥ ४७—४८ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

अथ भक्त्या स्तुतिश्च कृतेत्याह । प्राहेति । प्रेमगद्गदिकायुक्तप्रकारेणावदत् । न इति बहुत्वं तदागमनेनात्मनो बहुमानात् निजपरिवाराद्यपेक्षया वा । आगमनेनेति कृपया वास्तुस्पर्शमात्रेण किमुत साक्षाद्दर्शनदानेनेति भावः । अहो किं वक्तव्यं युष्मदागमनसौभाग्यवतां युवामेव साक्षात् पश्यतामस्माकं जन्म सार्थकमिति अनेनैव पूर्वपुरुषाः सम्बन्धिनश्च सर्वे भूतभाविन्या निस्तीर्णा इत्याह । पावितञ्चेति । नित्यपूज्यानां पित्रादीनां प्रीत्युत्पत्त्या समाप्तकृत्यता च वृत्त्याशयेनाह । पितृदेवेति । हीति प्रमाणं दर्शयति । तथा चाक्रूरेण वक्ष्यते । अद्येश नो वसतय इत्यादि । तत्र सर्वत्रैव हेतुः हे विभो । परमेश्वरेति ॥ ४५ ॥

ननु नन्दगोपसुतौ आवां कथमीदृशी स्तुतिः क्रियते तत्राह । भवन्ताविति । किल शास्त्रादिप्रसिद्धौ विश्वस्य सर्वस्य जगतोऽस्थिरस्य महदादेः कारणं पुरुषरूपेण कारणावस्थातः परञ्च स्वयं भगवद्रूपत्वेन इह मथुरायां अंशोनेति । ज्ञातावेकत्वम् अंशोपपत्त्यादिभिः सहेत्यर्थः ।

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

यद्वांऽशेन जगतः कारणमित्यन्वयः । तथाच वक्ष्यते "यस्यांशांशांशभागेन विश्वस्थित्यप्ययोद्भवा" इति । चकाराभ्यां द्वयोरपि प्राधान्यं बोध्यते । तत्र क्षेम इहामुत्र चाभयं भव उद्भवो वृद्धिर्वा ॥ ४६ ॥

ज्ञानक्रियाशक्तिदातृत्वेनोपकारात् सुहृदोरर्थात् सर्वेषां चेतनानां मूलकारणत्वेन जगतः कृत्स्नस्य चेतनस्याचेतनस्य चात्मनोः । यद्वा जगत् कृत्स्नं व्याप्य सुहृदोः आत्मनोश्च । अपिरुक्तसमुच्चये । विशेषतो भजन्तं ब्राह्मणचण्डालादीनामेकतरमाश्रयमाणमात्रं भजतोः स्वयमाश्रयतोश्च । अतः समयोर्युवयोर्न विषमा दृष्टिः । किम्वा सुहृदोर्जगदात्मनोश्च तावन्न विषमा दृष्टिः । तथा भजन्तमेव भजतोः कृपयतोरपि न सा । यतः समयोः प्राकृते दुःखे सुखे च तुल्ययोः । सूर्ये तमस इव पेचकचक्षुर्ज्योतिष इव च तच्चेतसि तस्य तस्य स्पर्शासम्भवात् स्वरूपभूताह्लादिनीशक्तिविलासविशेषरूपाया भक्तेरेव स्पर्शादिति भावः । तदुक्तं श्रीगीतासु । "समोऽहं सर्वभूतेषु न मे द्वेष्योऽस्ति न प्रियः । ये भजन्ति तु मां भक्त्या मयि ते तेषु चाप्यह" मिति । नवमे च । "साधवो हृदयं मह्यं साधूनां हृदयं त्वहम् । मदन्यत्ते न जानन्ति नाहं तेभ्यो मनागपी" ति उभयत्र भक्त्यैव नत्वन्येन तच्चित्तं लिप्तं भवतीत्यर्थः । अन्यत्तैः । अथवा ईश्वरयोर्युवयोर्भक्तिहीनाधमगृह आगमनं सर्वत्र समतयैवेति दैन्यमात्रादाह । नहीति । अयमनुग्राह्यः अयञ्च नेति विषमा दृष्टिर्नास्ति यतः सुहृदोर्निरुपाधिकृपाकरयोः । किञ्च जगदेवात्मा प्रियं ययोः कुतः भजन्तं भजतोरपि सर्वभूतेषूत्तमाधमेष्वपि समयोर्जगन्नाथत्वादीनवात्सल्याच्चेत्यर्थ ॥ ४७ ॥

तौ विषमदृष्टिरहितावपि । ननु मदाज्ञा वेदरूपास्त्येव तत्राह ॥ किमिति साक्षादागतयोर्युवयोरधुना किं कार्यं तदित्यर्थः । नन्वाज्ञां विनापि पूर्वमातिथ्येन स्वयं तत्कृतमेव तत्राह । पुंस इति । हि यस्माद्भवद्भिर्यभियुज्यते हि एव एष एव पुंसो जीवस्य निजजनस्य वा अनुग्रहः परमानुग्राह्यत्वामिति पुंसस्त्विति पाठे अनुग्रहस्त्वेष इत्यन्वयः । भवद्भिरिति बहुत्वं तदीयापेक्षया । अतोऽधुना भवदाज्ञया किंचिच्चिकीर्षामीति भावः ॥४८॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ततस्तौ प्राह उक्तिमेवाह । नः सार्थकमित्यादिना इत्यभिप्रेत्येत्यतः प्राक्तनेन वां युवयोः आगमनेन नोऽस्माकं जन्मसार्थकं जातं नः कुलञ्च पावितं पवित्रीकृतं पित्रादयश्च मह्यं तुष्टा बभूवुः ॥४५॥

कथं यादवयोरावयोरागमनमात्रेण सर्वमेतत्सम्पन्नं तत्राह । भवन्ताविति । विश्वस्य कृत्स्नस्य जगतो भवन्तौ परं कारणं मूलकारणभूतावित्यर्थः । कथमेवं विधयोः कर्मकृतं प्राकृतं जन्मेत्यत आह । अवतीर्णाविति । अंशेन सङ्कल्परूपज्ञानेन नतु कर्मणेति भावः । इह लोके अवतीर्णौ जन्मनः सुखदुःखानुभवार्थत्वं वारयन् प्रयोजनमाह । क्षेमाय साधूनामिति शेषः । क्षेमः प्राप्तश्रियः पालनं भवो लब्धसुखप्रापणम् ॥ ४६ ॥

ननु कश्चिदनुगृह्णन्तौ कश्चिच्चानानुगृह्णतौ कश्चिच्चातिगृह्णन्ता-वावां नेश्वरौ किन्तु प्राकृतौ जीवावित्यत आह । नहीति । जगत आत्मनोः अतएव सुहृदोः नहि स्वशरीरे कस्यचिदप्यसौहार्दं दृष्टमिति भावः । युवयोर्विषमा दृष्टिर्न विद्यते तत्र हेतुं वदन् विशिनष्टि भजन्तं भजतोरनुगृह्णतोरपि समयोः नहि भक्तेष्वनुग्रहो वैषम्यमूलकः नह्यप्रार्थितार्थदस्य सुरद्रुमस्य वैषम्यमस्ति वैषम्यपरिहारार्थं भजनात्मकं व्याजमपेक्षते इति भावः ॥ ४७ ॥

स्वस्मिन्नत्यन्तपारतन्त्र्यमावेदयितुं कैङ्कर्यानुशासनं प्रार्थयते । साध्विति । वां युवयोरहं किङ्करवाणि किं करोऽस्मीत्यर्थः अतो भृत्यं मां साधु यथा तथा आज्ञापयतम् एतावतैवाहमनुगृहीतो भविष्यामीत्यभिप्रेत्याह । पुंसस्त्विति । भवद्भिर्नियुज्यते अनुशिष्यते इत्येष एव पुंसो जीवस्यानुग्रहस्त्वत्कृतानुग्रह इतीत्थं विज्ञापयन्निति शेषः ॥ ४८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

सार्थकं सप्रयोजनं पावितं शुद्धीकृतम् ॥ ४५—४७ ॥

शाधि शिक्षस्व कर्तव्यमनुजानीहीति वा एतत्कुर्विति नियुज्यते प्रेर्यत इति यदेषः ॥ ४८—५२ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

मह्यं मां प्रति ॥ ४५—४६ ॥

सुहृदोर्जगदात्मनोश्च तावन्न विषमा दृष्टिः । तथा भजन्तं भजतोः कृपयतोरपि न सा । यतः समयोः प्राकृते दुःखे सुखे च तुल्ययोः ॥ ४७ ॥ ४८ ॥ •

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

एवं कायिकमुक्त्वा तत्कृतां वाचनिकीं पूजामाह । त्रिभिः प्राहेति । स्वकृतार्थत्वं भगवत्कृतस्य फलत्वाय भगवतो निर्दोषपूर्णगुणत्वं च निरूपयति आदौ भक्तोद्धारको भगवानिति स्वकृतकृत्यमाह । नः सार्थकं जन्मेति । पुरुषार्थपर्यवसायि जन्म सार्थकं न इति गृहस्थानां सर्वेषामेव । ये वा भगवतैवं कृताः श्लाघायां वा यद्यपि जन्मकाल एव तादृशं फलं भविष्यतीति सर्वदैव सार्थकं तथापि फलोन्मुखता अद्येति ज्ञानं वेति प्रतिदिनं देहाद्युत्पत्तेर्वाद्येत्युक्तं प्राहेति पाठे तु न संदेहः । न केवलं मम जन्म किं तु मत्संबन्धिनां सर्वेषामेवेत्याह । पावितं च कुलमिति । चकारात् कुलस्थाः सर्वे च तथात्वे सामर्थ्यं प्रभो इति सर्वस्यापि स्वकृतस्य जन्मकोटिभिः संपादितस्य विनियोगोऽत्रैवेति वक्तुं पूर्वं स्वाराधितदेवादीनां प्रसादफलमेवेत्याह । पितृदेवर्षय इति युवयोरागमनेन पितृदेवर्षयो मह्यं तुष्टा इति केचित् । वस्तुतस्तु पितृदेवर्षयो मह्यं तुष्टाः शुकश्चायमर्थः । युवयोरागमनेनेति फलकीर्तनं करणता त्वग्रिमफलार्थम् । अथवा नातः परं पित्राद्याराधनं कर्तव्यं यतस्त्वदागमनेनैव ते सन्तुष्टाः । मह्यमिति

श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी ।

मदर्थं फलं दातुं मम वा अनेन त्वय्येव पूजिते सुतरां ते तुष्टा भवन्तीति किं वक्तव्यमित्युक्तम् ॥ ४५ ॥

महत्यारोपन्यायेन स्तुतिरेवंविधा संभवतीति तद्व्यावृत्त्यर्थं स्वस्य भगवत्स्वरूपज्ञानमाविष्करोति भवन्ताविति । विश्वस्य सम्बन्धिनौ भवन्तौ किल प्रसिद्धौ विश्वस्मिन् भवन्तौ प्रसिद्धावित्यर्थः । अनेन जगति यावन्तो महद्धर्माः ते सर्वे निरूपिताः कारणत्वं च निरूपयन्नाह । जगतः कारणं परमिति । जगद्यज्जायते तस्य मूलकारणं भवानेव विश्वशब्दो वा सर्वशब्दवत् सामान्यविशेषवाची उत्पादकत्वेन महत्त्वेन फलत्वेन च उत्पत्त्या चोपपत्त्या च माहात्म्यं निरूपितं नतूत्पत्तिस्थितिलयैर्येन न्यूनता स्यात् । सर्वनिधानत्वेनैव वा सर्वप्रकारेण स्तुत्यता निरूपिता साधारणकारणत्वं कालस्यापि वर्त्तत इति परमिति । अनन्तमूर्त्तिर्भगवानिति द्विवचनं न दोषाय रूपद्वयेन चाविर्भूत इति माहात्म्यं परमुच्यते तादृशयोरवतारे प्रयोजनमाह । अवतीर्णाविहांशेनेति । इह प्रपञ्चे अंशेन क्रियाशक्त्या अवतीर्णौ ज्ञानांशेनान्य एव स्रष्टा इति । पूर्ववदेव देशेन वा । एकवचनं तु तदेवान्यत्राविष्टमित्येकावताराभिप्रायम् अत एव क्रियाप्रयोजनमाह । क्षेमाय च भवाय चेति । स्थितस्य परिपालनार्थं चकारादक्षेमव्यावृत्त्यर्थं भवायोद्भवाय आधिक्यार्थं चकारान्मोक्षाय च । आधिक्यमत्र भक्तिः अतः कार्यचतुष्टयार्थं भगवदवतार इत्युक्तं सर्वदुष्टनिराकरणार्थं सतां रक्षणार्थं मोक्षार्थं भक्त्यर्थं च ॥ ४६ ॥

नन्वेवं क्रियमाणे अब्रह्मत्वं स्यात् विषमकरणादित्याशङ्क्य सर्वदोषान् परिहरति । न हि वां विषमा दृष्टिरिति । मूलकारण एव हि नैर्घृण्यमपि प्रसिद्धं भवति अवतीर्णेषु वैषम्यमेव प्रसिद्धमिति तदेव निराक्रियते वां युवयोर्न विषमा दृष्टिः कश्चिन्मारणीयः कश्चित्स्थाप्य इति तत्र हेतुत्रयं वदति सुहृदोः जगदात्मनोः समयोरिति युक्त्या प्रमाणेन च पदार्थे निर्णीते प्रातीतिको दोषः भ्रमप्रतीतिरपि अन्यथा वा व्याख्येयेति न काप्यनुपपत्तिः युक्तश्चायमर्थ इति सर्वत्रैवं निर्णय इति हिशब्दः न हि किंचित्पुत्रं मारयन् कंचिदभिनन्दन् पिता विषमो भवति शिक्षार्थमेव तथा करणात् न हि हस्तेन पादं प्रक्षालयन् शिरश्चाप्रक्षालयन् विषमो भवति क्वचिदेव वा अलंकुर्वन् कालमुखे प्रविष्टानां जीवानामुद्धारार्थमागतः कालं वञ्चयित्वा नयन् वञ्चनार्थं सुहृदेव अन्तर्यामित्वात् सखित्वात्कृपालुत्वाच्च प्रदर्शनार्थं विषममपि कुर्वन्न विषमो भवति तदाह । सुहृदोरिति । यथैव सौहार्दं सिध्यति तथैव कुरुतः जगत एवात्मानौ कथमेकस्यैव विषमौ भविष्यतः अनेन स्वात्मानं यथासुखं करोतीति नैर्घृण्यमपि परिहृतं ज्ञातव्यम् । सर्वभूतेषु समत्वं कारणत्वादेव सिद्धं भूतपदेन च रोगादिवत् ये निवर्तनीया एव सहजासुराः ते व्यावर्तिता इति केचित् वस्तुतस्तु जाताभिप्रायम् अन्यथा आत्मैवेति नात्मनः समा भवति साम्यस्य भेदसहिष्णुत्वात् । नन्वेतच्छिक्षार्थं मारणे गतिरुक्ता वरदानादेः का गतिरिति चेत्तत्राह । भजन्तं भजतोऽपीति । "ये यथा मां प्रपद्यन्त" इति वाक्यात् कल्पतरुस्वभावत्वाच्च प्रार्थितायैव प्रयच्छतीति सर्वेभ्यः अदानेऽपि न विषमत्वम् ॥ ४७ ॥

एवं स्तुत्वा स्वस्य मानसं निवेदयति । तावाज्ञापयतमिति । अयं हि मनसा भगवते सर्वं निवेद्य दासो जातः स चेद्भगवता दासत्वेन क्रियते तदा दासः संपद्यते । तस्य चाभिज्ञापकमाज्ञापनम् अतस्तौ स्वामिनौ भृत्यं मामाज्ञापयत ननु वेदे सर्वे एव जीवाः भृत्या आज्ञप्ताः तथा भवानपीति चेत्तत्राह । किमहं करवाणि वामिति । युवयोरर्थे किं विशेषेण करवाणि अन्यथा विशेषतो दासभावप्राप्तेः कः पुरुषार्थः स्यात् ननु पूर्णकामावावां नास्मभ्यं किञ्चित् कर्तव्यमिति चेत्तत्राह । पुंसोऽत्यनुग्रह इति । न ह्ययं नियोगः भवदुपकाराय किं त्वस्मदुपकाराय यथा वरदानं वरापेक्षयाप्ययमत्यनुग्रहः यत्सेवकत्वेन स्वीकृत्य नियुज्यते युक्तियुक्तश्चायमर्थः वरः परिच्छिन्नः अपरिच्छिन्नं च दासत्वमिति तस्य हि सर्वं कार्यं स्वामिनैव कर्तव्यमिति । भवद्भिरिति बहुवचनं ससेवकाभिप्रायम् एष इति भक्त्या भगवदाज्ञापनं तस्य पुरः स्फूर्तिकमिति उक्तम् । अत एवाग्रे अनुक्तोऽपि मालां दास्यति अनेन भगवत्प्रपत्तेः स्वतः सामर्थ्यं द्योतितम् ॥ ४८ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

भजन्तं भजतोऽपीति । समोऽहं सर्वभूतेष्वित्यत्र ये भजन्ति च मां भक्त्या मयि ते तेषु चाप्यहमिति तदुक्तेः वस्तुतस्तु विप्रश्वपचादिषु सत्कर्मकुकर्मवत्स्वपि मध्ये यः कोऽपि त्वां भजति तमेव त्वं भजसीति न तव जात्यादिवैषम्यं यतोऽत्रत्येष्वपि मध्ये भजन्तं वायकं मालाकारं च मां कृतार्थयसीति भावः ॥ ४७—४८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अंशेन स्वसङ्कल्पेन क्षेमाय मोक्षाय भवायोद्भवाय भोगाय मुमुक्षुभ्यो मोक्षप्रदानाय बुभुक्षुभ्यो भोगप्रदानायेत्यर्थः ॥ ४६ ॥

रजकवायकादिनिग्रहानुग्रहकर्तृत्वं युवयोस्तत्तत्कर्मसापेक्षत्वादित्याह । नहीति ॥ ४७ ॥

नियुज्यते एवं कुरु इत्येवमनुशिष्यते इत्येष पुंसः अनुशिष्टस्य महान् त्वत्कृतोऽनुग्रहः ॥ ४८ ॥

भाषा टीका ।

फिर बोला हे प्रभो ! मेरा जन्म सफल हो गया मेरे कुल को आपने पवित्र करदिया आप के आगमन से मेरे पितर तथा देवता सब तृप्त हो गये ॥ ४५ ॥

आपतो संपूर्ण जगत् के परम काण हो इस जगत् के कल्याण ताथ पालन के वास्ते अंशोंसहित अवतीर्ण भये हो ॥४६॥

इत्यभिप्रेत्य राजेन्द्र ! सुदामा प्रीतमानसः ।
शस्तैः सुगन्धैः कुसुमैर्माला विरचिता ददौ ॥ ४९ ॥
ताभिः स्वलङ्कृतौ प्रीतौ कृष्णरामौ सहानुगौ ।
प्रणताय प्रपन्नाय ददतुर्वरदौ वरान् ॥ ५० ॥
सोऽपि वव्रेऽचलां भक्तिं तस्मिन्नेवाखिलात्मनि ।
तद्भक्तेषु च सौहार्दं भूतेषु च दयां पराम् ॥ ५१ ॥
इति तस्मै वरं दत्त्वा श्रियं चान्वयवर्धिनीम् ।
बलमायुर्यशः कान्तिं निर्जगाम सहाग्रजः ॥ ५२ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे
पूर्वार्धे मथुरापुरप्रवेशो नाम
एकचत्वारिंशोऽध्यायः ॥ ४१ ॥

भाषा टीका ।

आप सब के सुहृद हो जगत् के आत्मा हो आपकी विषम दृष्टि नहीं है आप सब भूतों पर सम हो भजने वालों को फल देने वाले हो ॥ ४७ ॥

सो आप अब मुझ भृत्य को आज्ञा दो आप दोनों को मैं क्या करूं आप का जो कुछ आज्ञा करना है सो तो भृत्य पुरुष पर अनुग्रह करना है ॥ ४८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

इत्यभिप्रेत्य इत्येवं विज्ञापयन्नभिप्रेत्य तन्मतं ज्ञात्वा॥४९—५१॥

अन्वयवर्धिनीं वंशे वृद्धिमतीमित्यर्थः । अप्रार्थितं श्रीप्रभृति कश्च दत्त्वा ततो निर्जगामेति ॥ ५२ ॥

स्वैरं चरन्मधुपुरे रजकं निकृत्य कृष्णः प्रदाय च वरानथ वायकाय ।
मालाकृतं समनुकम्प्य चकार कुब्जामृज्वीं धनुश्च सहसा नमयन्बभञ्ज ।

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम
एकचत्वारिंशोऽध्यायः ॥ ४१ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

अभिप्रेत्येति लज्जादिना ताभ्यां साक्षादनुक्तमपि मालाकारस्य स्वस्य गृहागमनेन मालाविशेषविक्रयदृष्ट्या च सम्भाव्येत्यर्थः । हे राजेन्द्रेति महाराजस्यापि ता दुर्लभा इति सूचयति । यद्वा । तत्साम्यविशेषं बोधयति न सम्बोधयति । शस्तैः सद्वर्णसौकुमार्य्यादिगुणैर्मङ्गलकरत्वान्मङ्गलैरिति वा । विरचिता इति । यासु निजकुटुम्बैः सह स्वयं विशेषेण रच्यमानासु तौ सहसैवागतौ ता विरचिताः सतीर्ददावित्यर्थः । पूजायान्तु शैघ्र्येण पूर्वं सिद्धा राजादियोग्या एव ददाविति भावः । अन्यथा विरचिता इति व्यर्थं प्रीतमानसत्वेन दानप्रकारस्तु श्रीपराशरेणोक्तः । "ततः प्रहृष्टवदनस्तयोः पुष्पाणि कामतः । चारूण्येतानि चैतानि प्रददौ स विलोभय"न्निति ॥ ४९ ॥

प्रणताय मालादानानन्तरं कृताष्टाङ्गप्रणामाय प्रपन्नाय रक्ष रक्षेत्यादि प्रकारेण शरणागताय । यद्वा प्रथमत एव भक्ताय ॥ ५० ॥

ननु के ते वराः तांश्च परमैकान्ती सुदामा स्वयं वृतवान् न वा तत्राह । सोऽपीति । तस्मिन् श्रीकृष्ण एव । ननु कथं पूर्वभक्तिरीत्या श्रीसङ्कर्षणेऽपि न वृतवान् तत्राह । अखिलानां सङ्कर्षणादीनां स्वांशानामात्मनि मूलस्वरूपेऽशिनीत्यर्थः । तेन सा च सिध्येदिति विविक्तपुरुषार्थतयेति भावः । पूर्वन्तु समयुग्मतावर्णनं तदग्रजतया तस्यापि गौरवलीलासारादेकमेव द्विधा प्रकाशमानं तत्तत्त्वमेकपरमैश्वर्य्यस्याश्रययोग्यं भवत्येवेति प्रशंसातात्पर्य्येणेति भावः । परां श्रेष्ठां निरुपाधिदयाम् । आद्यश्चकारस्त्वर्थे द्वितीय उक्तसमुच्चये ॥ ५१ ॥

इति एतदप्रार्थितान् । ननु कथं वदान्यशिरोमणिरसौ स्वयमन्यान् वरान् न ददौ तत्राह । श्रियश्चेत्यादि । द्वितीयचकारोक्तं समुच्चिनोति । अन्यत्तैः । अन्वयवर्द्धिनीमितीन्नन्तपाठ एव तेषां सम्मतः । मतुपा व्याख्यातत्वात् । वर्द्धनं वर्द्धः अन्वयवर्धोऽस्तीति तत्र वंश इति सप्तम्यन्तासमस्तपाठे तद्वंशेऽनवच्छिन्नां श्रियमित्यर्थः । समस्तपाठे वंशवृद्धिश्चेत्यर्थः । तदुक्तं श्रीपराशरेण "बलहानिर्न ते सौम्य ! धनहानिरथापि वा । यावद्दिनानि तावच्च न विनङ्क्ष्यति सन्ततिः । भुक्त्वा च विपुलान् भोगांस्त्वमन्ते मत्प्रसादतः । ममानुस्मरणं प्राप्य दिव्यलोकमवाप्स्यसि । धर्म्मे मनश्च ते भद्र ! सर्वकालं भविष्यति । युष्मत्सन्ततिजातानामायुर्दीर्घं भविष्यति । नोपसर्गादिकं दोषं युष्मत्सन्ततिसम्भवम् । अवाप्स्यति महाभाग ! यावत्सूर्य्यो भविष्यती"ति । बलमा॰

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी।

गुरिति पाठे च तत्तत्सर्वं श्रथाद्यन्तभूतमेव ज्ञेयम्। अग्रजेन सह वरान् दत्त्वा तेनैव सह निर्जगामेत्यर्थः ॥ ५२ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे
श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिण्याम्
एकचत्वारिंशोऽध्यायः ॥ ४१ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्।

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे
श्रीसुदर्शनसूरिकृतशुकपक्षीये
एकचत्वारिंशोऽध्यायः ॥ ४१ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

इतीत्थं विज्ञापयन्निति शेषः हे राजेन्द्र! अभिप्रेत्य तयोरभिमतं ज्ञात्वा प्रीतमानसः सुदामा प्रशस्तैः सुगन्धिभिश्च कुसुमैर्विरचिता मालास्ताभ्यां ददौ ॥ ४९ ॥

ताभिर्मालाभिरलंकृतौ वरदौ तस्मै प्रपन्नाय शरणागताय वरानिष्टार्थान् ददतुः ॥ ५० ॥

के ते वरास्तेन वृता यान् ददतुरित्यत आह। सोऽपीति। अखिलस्य चिदचिदात्मकस्य जगतः आत्मनि तस्मिन् भगवत्यचलां भक्तिं भागवतेषु सौहार्दम् आनुकूल्यं भूतेषु भगवच्छरीरभूतचेतनात्मकेषु दयां, स्वार्थनिरपेक्षपरदुःखासहिष्णुत्वरूपां वृतवान् ॥ ५१ ॥

इतीत्थं यथावृतं तस्मै वरं दत्त्वा तेनावृतामन्वयवर्द्धिनीं वंशवृद्धिमतीं श्रियं तथा बलादींश्च दत्त्वा सहाग्रजस्ततो निर्जगाम तत्र बलं देहधारणसामर्थ्यम् ॥ ५२ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
एकचत्वारिंशोऽध्यायः ॥ ४१ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
एकोनचत्वारिंशोऽध्यायः ॥ ३९ ॥ ४१ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

विरचिता इति। तदागमनं श्रुत्वा तदर्थं निजकुटुम्बैः सह स्वयं रच्यमानायां यस्यां तौ सहसैवागतौ तां विरचितां सतीं ददावित्यर्थः। पूजायां तु दोषेणान्या इति भावः। ताभिरित्येकशेषत्वात् तया अन्याभिश्चेत्यर्थः ॥ ४९—५२ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे
एकचत्वारिंशोऽध्यायः ॥ ४१ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी।

यथात्रालौकिकद्रष्टृत्वं भगवद्धर्मेणैवाज्ञा बोधितेति वाक्यापेक्षाभावात् न किंचिदुक्तवन्तौ स्वयमेव ज्ञात्वा यत्कृतवांस्तदाह। इत्यभिप्रेत्येति। राजेन्द्रेति संबोधनं केचन सेवकाः अभिप्रेतार्थमपि जानन्तीति नाश्चर्यमेतदिति ज्ञापनार्थं तादृशाः सेवकाः सार्वभौमे एव भवन्तीतीन्द्रपदं पदार्थे निश्चिते प्रीतमानसो जातः। आज्ञा प्राप्तेति ततः शस्तैः शास्त्रतः स्तुतैः स्वरूपतश्च सुगन्धैः मल्लिकादिभिः कुसुमैर्विरचितामेकामेव मालां ददौ माला विरचिता इति वा पाठः। एकवचने तु भगवति कृते भगवानाविष्ट इति तत्रापि बलभद्रेऽपि स्फुरति प्रतिबिम्बवत्। अन्यथा अपि माला दत्तवान् इति ज्ञातव्यम् ॥ ४९ ॥

ततो भगवान् वरं दत्तवानिति वक्ष्यन् तत्कृतं शोभातिशयमाह। ताभिः स्वलंकृताविति। उत्कृष्टमालाभिः सुष्ठु अलंकृतौ ततः प्रीतौ जातौ सदानन्दरमणकर्तारौ फलसाधनरूपौ सर्वसेवकैः सह प्रीतौ निर्विवादौ प्रणताय नम्राय विनीताय कर्मज्ञानमार्गयोरपि फलदानयोग्याय प्रपन्नाय शरणागताय भक्तिमार्गेऽपि फलदानयोग्याय यतो वरदौ अतो वरान् ददतुः वरदेश्वरत्वं नाविर्भावितं किं तु वरदत्वमेव वरान् दास्यावः प्रार्थयेत्युक्तवन्तावित्यर्थः ॥ ५० ॥

अथवा स्वयं वरान् दत्तवन्तावेव सोऽपि पृथग्याचितवानिति तदाह। सोऽपि वव्र इति। भगवता दत्तवरोऽपि कृतार्थोऽपि अचलां भक्तिं वव्रे विषये वैलक्षण्याभावाय तस्मिन्नित्येकवचनं ज्ञानपरपर्यायरूपा सा भक्तिरिति ज्ञापयितुमाह। अखिलात्मनीति। अनेन सर्वत्र विषमा दृष्टिरपि परिहृता तथापि भक्तवैशिष्ट्यं वक्तुं भेदसहिष्णुत्वाय सर्वोत्तमत्वं स्थापयितुमन्यद्वरद्वयमाह। तद्भक्तेषु च सौहार्दमिति। चकाराद्भगवदीयव्यतिरिक्तेष्वौदासीन्यं भूतेषु दीनेषु सर्वेषु च परामुत्कृष्टां दयां लोकोत्तरां यया ते कृतार्था भवन्ति चकारात्प्रश्रयादिकमपि स्वोत्कृष्टेषु प्रार्थितं भवति ॥ ५१ ॥

प्रार्थितं च दत्तवानित्याह। इतीति। एवंप्रकारेण प्रार्थितं वरं तस्मै दत्त्वा स्वयं पुनः वंशं तद्वृद्धिं तत्र सर्वत्र श्रियः अविच्छेदं श्रियं च दत्तवान्। एतद्बाह्यम्। आभ्यन्तरं च दत्तवानित्याह। बलमिति। बलं देहसामर्थ्यम् आयुः यशः कान्तिं सौन्दर्यं चेति एवं दत्त्वा ततो भक्तगृहान् निर्जगाम अत्र दाने भगवानेव कर्ता बलभद्रः सहभावमात्रमिति निर्गमने तु प्राधान्येन निर्गत इति। सहाग्रज इति। बलभद्रसहितः एतदर्थमेवावतीर्णाविति गमनावश्यकत्वं सूचितम् ॥ ५२ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे
श्रीमद्वल्लभदीक्षितविरचितायां सुबोधिन्याम्
अष्टत्रिंशाध्यायविवरणम् ॥ ३८ ॥ ४१ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

भो सुदामन्! वस्तवाभिप्रायस्तमेव कुर्वित्येवावयोराज्ञेति चेत् भद्रं भद्रमित्याह। इत्यभिप्रेत्येति। एवं स्वामिप्रेतं कृत्यं प्राप्येत्यर्थः। तर्हि माला दीयन्तामित्यभिप्रायेणैवाज्ञां ज्ञात्वेति भावः। सौरभ्यसौरूप्यसौकुमार्यशैत्यातिशयवतीः मालामिते-

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

कवचनेन भ्रातृभ्यां तुल्यतयैव दीयमानास्वपि मालासु मध्ये एवालक्षितं कृष्णाय सर्वश्रेष्ठामेकां मालां ददावित्यर्थः॥ ४६—५१॥

श्रियं चेति श्रीबलादीनां तस्य ग्रहीतुमनपेक्ष्यत्वेऽपि स्वस्य दातुमपेक्ष्यत्वाद्ददाविति तस्य भक्तवात्सल्यमेवं सर्वत्रैव प्राय इति ज्ञेयम्॥ ५२॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम्।
एकचत्वारिंशकोऽयं दशमेऽजनि सङ्गतः॥४१॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

अभिप्रेत्य तयोरभिमतं ज्ञात्वा॥ ४६॥
तामिर्मालाभिः॥ ५०॥
स इति
स भक्तिं केवलां वव्रे भक्तसौहार्दसंयुताम्।
सर्वभूतदया युक्तां श्रेष्ठां तामुत्तरोत्तराम्॥ ५१॥
इति तत्प्रार्थितं वरं दत्त्वा तेनाप्रार्थितामन्वयवर्द्धिनीं वंशवृद्धिमतीं श्रियं तथा बलादिकञ्च दत्त्वा ततो निर्जगाम॥ ५२॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
एकचत्वारिंशाध्यायार्थप्रकाशः॥ ४१॥

भाषा टीका।

हे राजेन्द्र! इस प्रकार से मनमें विचार करके सुदामा बड़ा प्रसन्न भया फिर सुंदर सुगंध वाले फूलों से बनाई हुई माला पहिराई॥ ४९॥

उन सब मालाओं से अच्छे अलंकृत होकर कृष्णराम दोनों सब अनुचरों के सहित प्रसन्न भये फिर नमस्कार करते हुये शरणागत माळाकार को वरदान देते भये क्योंकि आप सब के वर देने वाले हैं॥ ५०॥

उस माळा कारने भी उन भगवान् के विषै अचल भक्ति मांगी और उनके भक्तों में सुहृद्भाव तथा सब भूतों में परम दया का होना मांगा॥ ५१॥

इस प्रकार से भगवान् बलदेवजी के सहित वरदान देकर और वंश के बढाने वाली लक्ष्मी को और बल आयु यश कान्ति ये सब उसको देकरके वहां से चले गये॥ ५२॥

इति श्रीभागवत दशमस्कन्धपूर्वार्धे एकतालीसमें अध्याय
की भाषा टीका समाप्त॥ ४१॥

इति श्रीमद्भागवते दशमस्कन्धे पूर्वार्धे एकचत्वारिंशोऽध्यायः॥ ४१॥

॥ द्विचत्वारिंशोऽध्यायः ॥

॥ श्रीशुक उवाच ॥

अथ व्रजन्राजपथेन माधवः स्त्रियं गृहीताङ्गविलेपभाजनाम् ।
विलोक्य कुब्जां युवतीं वराननां पप्रच्छ यान्तीं प्रहसन्रसप्रदः ॥ १ ॥

का त्वं वरोर्वेतदुहानुलेपनं कस्याङ्गने वा कथयस्व साधु नः ।
देह्यावयोरङ्गविलेपमुत्तमं श्रेयस्ततस्ते न चिराद्भविष्यति ॥ २ ॥

सैरन्ध्र्युवाच

दास्यस्म्यहं सुन्दर ! कंससम्मता त्रिवक्रनामा ह्यनुलेपकर्मणि ।
मद्भावितं भोजपतेरतिप्रियं विना युवां कोऽन्यतमस्तदर्हति ॥ ३ ॥

रूपपेशलमाधुर्यहसितालापवीक्षितैः ।
धर्षितात्मा ददौ सान्द्रमुभयोरनुलेपनम् ॥ ४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

द्विचत्वारिंशके कुब्जोन्नमनं धनुषो भिदा ।
वधस्तद्रक्षिणां कंसारिष्टं रङ्गोत्सवादि च ॥

अङ्गविलेपाश्चन्दनादयः गृहीतान्यङ्गविलेपानां भाजनानि यया ताम् रसप्रदः सुखप्रदः ॥ १ ॥

हे अङ्गने हे वरोरु इति सोपहासं सम्बोध्य पृच्छति त्वं का एतदनुलेपनं कस्य वा उ ह इति निपातौ भ्रूविक्षेपयुक्ते वितर्के अस्मत्सेवा सद्यः फलत्येवेत्याह । न चिरादिति ॥ २ ॥

तिस्रो श्रीवोरःकटयो वक्रा इति त्रिवक्रेति नाम यस्याः सा अनुलेपसाधनक्रियायां कंसस्य बहुमता दास्यस्मि ॥ ३ ॥

रूपं चाङ्गसौष्ठवं पेशलश्च सौकुमार्यं माधुर्यश्च रसिकता हसितश्चालापाश्च वीक्षितश्च तैर्धर्षितात्मा मोहितचित्ता सान्द्रं घनम् ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

राजपथेनेति । तस्मिन् लोकसुखदातृत्वं दर्शयति । युवतीमिति । कामिनामिति पदद्वये नान्यत् सौष्ठवं त्वस्तीति बोधितं यान्तीं कंसगृहं गच्छन्तीं तथा च तस्या एवोक्तिः । श्रीहरिवंशे । राज्ञः स्नानगृहं यामीति प्रकर्षेण साकूततया हसन् स्वभावत एव रसप्रदः । अत्र तु रसः कुब्जायां शृङ्गारः सहचरेषु हास्यः सर्वत्र त्वद्भुतश्च तं तं प्रदातुमित्यर्थः ॥ १ ॥

साधु सत्यं वा लज्जया यदुक्तिवैकल्यं तद्भिन्नैव वा यदि स्यात् । अङ्गविलेपनम् अस्मद्गात्रयोग्यं तथा च तत्रैव । "तामुवाच हसन्तीं तु कृष्णः कुब्जामवस्थिताम् । उभयोर्गात्रसदृशं दीयतामनुलेपन"मिति । किञ्च । "वयं विदेशातिथयो मल्लाः प्राप्ता वरानने ! । द्रष्टुं धनुर्महं दिव्यं राष्ट्रञ्चैव महर्द्धिमत्" इति । सम्बोधनद्वयमुपहासेन । वरौ ऊरू यस्या इति न केवलं तावेव तादृशौ अपि त्वङ्ग मूर्तिरेव प्रशस्तं यस्या अस्तीति सर्वे गुणाः सन्त्येव तत्रैकमेवात्र बहुत्वं दोष इत्यभिप्रायात् ॥ २ ॥

त्रिवक्रनामेति पुंवद्भाव आर्षः । हि प्रसिद्धौ । तथाच तत्रैव "कुतश्चागम्यते सौम्य ! यन्मां त्वं नावबुध्यसे । महाराजस्य दयितां नियुक्तामनुलेपने" इति । मया भावितं साधितं तदनुलेपनं युवामिति सामान्योक्त्या श्रीरामेऽपि तदर्हताप्राप्तिस्तत्सम्बन्धेनैवाभिप्रेयते । हे सुन्दरेति । तस्यैव सम्बोधनेन तदेकतात्पर्यत्वात् । युवां विनाऽन्येषु बहुषु श्रेष्ठो यः सोऽपि कोऽर्हति । यद्वा । अन्यतमः युवाभ्यामत्यन्तभिन्न इति युष्मदीयाः सखायोऽप्यर्हन्तीति अन्यत्तैः । यद्वा । तवाहं दास्यस्मीति भावविशेषेणादावुक्त्वा पश्चात् तत्प्रश्नोत्तरमाह । कंसेत्यादिना ॥ ३ ॥

रूपेति तैर्व्याख्यातं यद्वा । माधुर्यं स्वभावतो मनोहरत्वं तदुक्तं किमेतदद्भुतमिव वासुदेवेऽखिलात्ममीत्यादि तच्च रूपं पेशलं सौन्दर्यसौष्ठवयुक्तं वाचः पेशैरितिवत् तथा तत्रैव । हसितेनालापेन वीक्षणेन च विशेषत इत्यर्थः । रूपादिभिरिति श्रीकृष्णस्यैवेति ज्ञेयं तत्रैव भावस्य स्वयमभिव्यञ्जयिष्यमाणत्वात् । उभयोरपि योग्यं तदिच्छया ददौ समर्पितवती । तथाच श्रीविष्णु-

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

पुराणे "श्रुत्वा तमाह सा कृष्णं गृह्यतामिति सादरम् । अनुलेपञ्च प्रददौ गात्रयोग्यमथोभयो" रिति । अत्र दानं हस्ते समर्पणं गात्रे लेपनं वा । पूर्वत्र सान्द्रमिति तत्संज्ञकं ततः स्ववहनयोग्येन स्वल्पेनापि सहचरवृन्दसहितयोः पर्याप्तिरभूदिति बोध्यते उत्तरत्र सर्वाङ्गव्याप्तमित्यर्थः । उभयत्र मालाकल्पानुपघातपूर्वकानुलेपनं ज्ञेयम् ॥ ४ ॥

— — —

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

॥ १—४ ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अथ त्रिवक्रासमर्पितानुलिप्ताङ्गरागः ऋज्वीकृतत्रिवक्रो निर्भिन्नचापश्चापपालकलघातिततत्पालकः समुत्पादितकंसभयः पुनः स्वनिकेतनमाविवेशेत्याह द्विचत्वारिंशेन । अथेत्यादिना । अथ मालाकारानुग्रहानन्तरं राजमार्गेण व्रजन् गृहीतान्यङ्गविलेपनानां सुगन्धिचन्दनानां भाजनानि पात्राणि यया वरं सुन्दरमाननं यस्यास्तां कुब्जां विलोक्य सुखप्रदो भगवान् प्रहसन् तां युवतीं पप्रच्छ ॥ १ ॥

प्रश्नप्रकारमेवाह । का त्वमिति । हे अङ्गने हे वरोरु इति सोपहाससंबोधनं त्वं का इहास्यां पुर्य्यामेतदनुलेपनं कस्य वा कस्मै नयसीत्यर्थः । साधु यथार्थं नोऽस्मभ्यं कथयस्व कस्मै चिद्भवतु किन्तूत्तममिदमनुलेपनमावयोरावाभ्यां देहि ततोऽनुलेपनदानेन हेतुना तवाचिरादेव श्रेयो भविष्यति ॥ २ ॥

इत्थमापृष्टा याचिता च सा प्राह । दासीति । हे सुन्दरवराहं कंसस्य सम्मता तस्य दासी त्रिवक्रनाम्नी नित्यमनुलेपनकर्मणि तेन नियुक्तास्मि तिस्रो ग्रीवोरुकट्यः वक्रा यस्याः सा त्रिवक्रेत्यन्वर्थं नाम कंससम्मतत्वे हेतुमाह । मद्भावितं मया साधितमनुलेपनं भोजपतेः कंसस्यातीव प्रियमतोऽहं तत्संमतेति भावः अतस्तद्राज्ञः प्रियमनुलेपनं वां भवन्तौ विना अन्यः को वा पुमान् तदर्हति युवामेवार्हावित्यर्थः ॥ ३ ॥

रूपेति । भगवत इत्यादि भगवतः रूपादिभिः मोहित आत्मा चित्तं यस्याः सा सान्द्रं तदनुलेपनमुभयोर्ददौ तत्र रूपमङ्गसौष्ठवं पेशलं सौकुमार्य्यं माधुर्य्यं रसिकत्वम् ॥ ४ ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अथ निर्गमनानन्तरं धात्रीं सैरन्ध्रीं दृष्ट्वा पप्रच्छेत्यन्वयः गृहीताङ्गविलेपभाजनां गृहीतचन्दनपात्रां कुब्जां वक्रशरीरां वयसा युवतीं तरुणीं वचसा रसप्रदः आनन्दप्रदः कामरागप्रदो वा ॥ १ ॥

हे वरोरु ! साधु सत्यं

निर्दोषे पेशले सत्ये साधुशब्दं प्रयुञ्जत इति ॥ २ ॥

यच्छास्त्रविहितं ननु तदेव दासी अनुलेपकर्मणि चन्दनसौरभ्यकर्मणि सम्मता अविप्रतिपन्ना अन्यतमः अन्येष्वपि श्रेष्ठतमः ॥ ३ ॥

धर्षितात्मा अस्ववशमनाः वशीकृतमना वा ॥ ४ ॥

———

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

युवामिति । त्वत्सम्बन्धेन श्रीरामोऽप्यर्हतीति भावः ॥ १ ॥ ३ ॥

माधुर्य्यं स्वभावतो मनोहरत्वं तच्च रूपपेशलं सौन्दर्य्यसौष्ठवयुक्तं तथा तत्रैव हासितादिना विशेषत इत्यर्थः । रूपादिभिरिति श्रीकृष्णस्यैव ज्ञेयम् । उभयोरपि योग्यं तदिच्छया ददौ तथा च वैष्णवे "श्रुत्वा तमाह सा कृष्णं गृह्यतामिति सादरम् । अनुलेपनं प्रददौ गात्रयोग्यमथोभयोरिति" ॥ ४—३८ ॥

———

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

एकोनचत्वारिंशे तु हरेरद्भुतकर्मणः ।
स्वासक्त्यर्थं राजसानि वीर्यं तस्य निरूप्यते ॥
अलौकिकं लौकिकं हि प्रसन्नः कुरुते फलम् ।
नान्यस्तत्र फलं दातुं शक्नोति हि यतः कथा ॥
लौकिकालौकिकत्वेन सामर्थ्यं लक्षणं पुनः ।
निरूप्यते स्वदोषस्य निवृत्त्यै स तथापि हि ॥
न निवर्त्तत इत्युक्त्वा मल्लरङ्गकथापरा ।
एतावता क्लिष्टकर्मा हरिरत्र निरूपितः ॥
प्रमाणानां फलं ह्येतत् कार्यं चापि निरूपितम् ।
कुब्जाप्यत्र धनूरूपा वायुना तु तथा कृता ॥
आध्यात्मिको रुद्ररूपः शिष्टो धनुषि संस्थितौ ।
यत्पालकं तस्य खण्डौ साधनं नाशने मतम् ॥
कालोऽपि विपरीतोऽभूद्दुर्न्निमित्तैः पतिर्द्विषाम् ।
बुद्धिर्हि न हिता तस्य प्रतिकूलेऽखिलं हरौ ॥

पूर्वाध्यायान्ते सुदाम्नो भवनान्निर्गत इत्युक्तं तत्र पुनरन्यस्य गृहे गमनं संभवतीति तद्व्यावृत्त्यर्थं भिन्नप्रक्रमेण स्वपूर्वलीलयैव भगवान्प्रचलित इत्याह । अथेति । राजमार्गेणैव व्रजन् स्त्रियं ददर्शेति । स्त्रियो हि भगवतः कृपापात्रमिति तत्र भगवतो नात्यन्तप्रयासः कालेनैव ताः भगवदीयाः क्रियन्ते "तत्प्रियार्थं संभवन्तु सुरस्त्रिय" इत्यादिवाक्यात् । अतः कुब्जा मध्ये मिलिता अलौकिकं तत्समीकरणमिति अलौकिकसामर्थ्यज्ञापनाय चतुष्पथ एव तथा करणम् । माधव इति । लक्ष्मीपतित्वात्तदंशभूता सेति तस्या उद्धारः कर्त्तव्यः तस्या नामाप्रसिद्धमिति जात्यादिकमेव निरूपितम् । स्त्रियमिति । विशिष्टं भोगयोग्यं गृहीतमङ्गविलेपभाजनं यया सा हि स्वगृहे अङ्गविलेपनं सज्जीकृत्य कंसार्थं नयति भगवति च प्रविष्टे ततो राजधर्मा निवृत्ताः भगवत्येव समागताः अत एव वस्त्राणि चन्दनं माला राजभोग्याः भगवतैव गृहीताः तां कुब्जां निर्गतपृष्ठभागां युवतीं वयसोत्तमां दर्शनेऽप्युत्तमामाह । वराननामिति । भोगे परमयोग्या मुख्ये उत्थाने अदृष्टसामर्थ्यात् अतोऽग्रफलां तां मध्ये मार्गे दृष्ट्वा पप्रच्छ यान्तीमेव न तु सा भगवन्तं दृष्ट्वा स्थिरीभूता भोगाभावनिश्चयाद्राक्षिज्ञानादावनाधिकारात् दर्शने मनोभवपीडासम्भवात्

श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी ।

गच्छन्तीव सा जाता । प्रहसन्निति । तस्याःसर्वमेव विवेकं दूरीकुर्वन् परिभाषणं कृतवान् । यथा सा पश्यति कृपापात्रं भगवान् स्वयमप्याकार्य स्वास्मिन् प्रवर्त्तयतीति ज्ञापयितुमाभाषणं कृतवान् कुब्जेयमपूर्वा गच्छतीति लोकरीत्या प्रहसनम् । ननु गच्छन्तीकिमित्याकारितवान् तत्राह । रसप्रदं इति । रसमात्मस्वरूपं कामरसं प्रकर्षेण ददातीति ॥ १ ॥

प्रश्नमाह । का त्वमिति । वरोर्विति संबोधनं भोगयोग्यतां सूचयति । उ ह अपि च । एतदनुलेपनं कस्य त्वं वा कस्येति अङ्गनेति पुनः प्रीत्या संबोधनं तव विशेषप्रीत्या भोगयोग्यतां संपादयिष्यामीति ज्ञापनार्थं वेत्यनादरे नोऽस्माकं संबन्धिपरिज्ञाने न किंचित् प्रयोजनमिति । साधु यथा भवति तथा नोऽस्मभ्यं कथयस्व । किं च । आवयोरेतदनुलेपनमुत्तमं प्रतीयत इति देहि । अङ्गविलेपने दत्ते अङ्गमेव दास्यामीति भगवदभिप्रायः तदेवाह । श्रेय इति । ततस्ते आचिरादेव श्रेयो भविष्यति । यद्यपि दानफले देशादीनां प्रशस्तत्वाभावात् शीघ्रं न भविष्यति तथापि दर्शनमपि दाने शीघ्रं सफलं भविष्यतीति तथोक्तिः ॥ २ ॥

सा तु सैरन्ध्री अन्तःपुरदासिका बहिस्तिष्ठति अभर्तृका च सा स्वस्वरूपं निरूपयन्ति । दास्यस्मीति स्वभावतो जात्यैव दासी सुन्दरवर्यैति सम्बोधनात् त्वं चेत् कृपां करिष्यसि तवैव भविष्यामीति राजदास्योऽपि वेश्याप्रायाः गुप्ताः परम् अनुलेपककर्मणि चतुःसमनिर्माणे सम्मता सर्वेषामेव अस्मिन्नर्थे अनुलेपभोक्ता राजा प्रमाणमिति तस्यापि सम्मतिमाह । मद्भावितमिति । मया भावितं भागशो निर्मितमङ्गविलेपनं भोजपतेः कंसस्यातिप्रियम् अतः युवां भवन्तौ विना अन्यतमः को वा अर्हति भोजपतेः प्रियमेव न तु भोजपतिरर्हति ॥ ३ ॥

यद्यपि राजकीयं तत् ततो जीवति राज्ञि अर्हतु वा मा वा तथापि नान्यस्मै दातुमुचितं तथापि कामेन भगवद्वशा भूत्वा दत्तवतीत्याह । रूपेति । रूपं भगवतो नीलमेघश्यामं तस्य पेशलं कोमलता अङ्गनानां भोगयोग्यता माधुर्यं तस्यैव कोमलताया अयमधिको गुणः माधुर्ययुक्तं च हसितं हसितपूर्वकमालापाश्च । वीक्षितानि च रूपं हसितं भाषितं वीक्षणमिति देहेन्द्रियान्तःकरणात्मनां वशीकरणसाधनान्येतानीति तैर्धर्षितात्मा स्वरूपाच्याविततदेहेन्द्रियादिरूपा सान्द्रं गाढम् अन्तः स्थितमुभयोरनुलेपनं ददौ उभयत्रापि मनःप्रीतिरिति भगवतापि तथैव याचितमिति ॥ ४ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

द्विचत्वारिंशके कुब्जा हास्योन्नमनचापभित् ।
कंससैन्यवधारिष्टक्षणरङ्गोत्सवायभूत् ॥

अङ्गविलेपाश्चन्दनादयः रसं कुब्जायाः शृङ्गारं स्वसहचरेषु हास्यं सर्वत्र त्वद्भुतं प्रददातीति सः इयं स्वरूपभूतायाः साक्षाद्भूशक्तेः सत्यभामाया अंशभूता अन्या एव विभूतिः पृथिवी प्रसिद्धा अतस्तया सहैकयेत्यं परस्सहस्त्रदुष्टासुरभारभुग्नत्वं स्वकुब्जेन दर्शयन्ती स्वयं गन्धगुणं चन्दनादिमिषेणोपहरन्ती पृथिव्येव परमभक्ता प्रीत्या यस्य सद्वताभूत् भगवांश्च सानन्दमेव गन्धं गृहीत्वा स्वीयं माधुर्यमेव रसं ददानो भो मद्भक्ते पृथ्वि ! सत्यत्वेव कंसादि स्वभावान् मया पद्भ्यामेव विद्धि तदधुनैव त्वं सुखा भवेति तामाश्वासयन्नानन्दमग्नाम् ऋज्वीं चक्रे इत्येवैतत् प्रकरणतत्त्वमिति केचिदाहुः ॥ १ ॥

हे अङ्गने हे वरोर्विति सोपहासं सान्तःस्पृहं च सम्बोध्य पृच्छति । कात्वङ्कस्य वा एतदनुलेपनम् ॥ २ ॥

दास्यस्मीत्यन्यस्य सम्बन्धिपदस्यानुपादानात् प्रत्यासत्त्या तवेति द्योतनं तवेत्युक्ते अनृतं भावव्यक्तिश्च स्यादिति तत्र प्रयुक्तं सुन्दरत्यकवचनेनैकस्मिन् कृष्ण एव स्पृहा युवामिति द्विवचने स्वीयभावस्यावहित्था च द्योतिता तिस्रो ग्रीवोरःकट्यो वक्रा यस्याः सा नाम यस्याः सा पुंवद्भाव आर्षः हि एवार्थे अनुलेपनकर्मण्येवाहं कंससम्मता न त्वन्यत्र कुब्जदोषादिति स्वशुद्धिर्ज्ञापिता ॥ ३ ॥

रूपेण सौन्दर्येण पेशलैः सम्मोहनकर्मणि दक्षैर्माधुर्याद्यैर्धर्षितचित्ता "दक्षे तु चतुरपेशलपटव" इत्यमरः ॥ ४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

द्विचत्वारिंशे कुब्जोन्नमनधनुर्भञ्जनतत्पालवधादिकं भगवत्कर्म वर्णयति । अथेति । गृहीतान्यङ्गविलेपानां चन्दनादीनां भाजनानि यया ताम् रसप्रदः भक्तिरसप्रदः ॥ १ ॥

भावि उर्वादिसौन्दर्यं सिद्धवदालक्ष्य सम्बोधयति । हे वरोरु त्वं का एतदनुलेपनं कस्य वा साधु यथार्थं नोऽस्मभ्यं कथयस्व ततः अङ्गविलेपार्पणेन ते श्रेयः न चिरात् सद्य एव भविष्यति ॥ २ ॥

हे सुन्दरवर्य्य ! तिस्रो ग्रीवोरःकट्यो वक्रा इति त्रिवक्रेति नाम यस्याः सा भोजपतेर्दासी अहमस्मि भोजपतेरिति सर्वत्र युज्यते अनुलेपनकर्मणि भोजपतेः संमता मद्भावितं मया भावितं वासितं संस्कृतमनुलेपनं "भावितं वासिते प्राप्ते" इति हैमः भोजपतेः अतिप्रियम् तद्राज्ययोग्यमनुलेपनं युवां विना अन्यतमः को ऽर्हति न कोऽपि युवां तु अर्हथ इत्यर्थः ॥ ३ ॥

रूपादिभिर्धर्षितो मोहितः आत्मा चित्तं यस्याः सा सान्द्रं घनम् तत्र पेशलं दक्षत्वं "चारौ दक्षे च पेशल" इत्यमरः माधुर्यं रसिकत्वम् ॥ ४ ॥

भाषा टीका ।

श्रीशुकदेवजी बोले इसके अनन्तर माधव भगवान् जब राज मार्ग में जाने लगे तब अङ्गविलेपन चंदन का बरतन लियी हुई एक स्त्री को देखते भये उस कुब्जा को जाती हुई देखकर सब के रस देने वाले भगवान् उस वरानना सुंदरी से पूंछते भये ॥ १ ॥

हे वरोरु ! तू कौन है हे अंगने ! यह किसके लेपन का चंदन है सो अच्छी तरह से हम से कह दे यह सुंदर अंगलेपन चंदन है सो हम दोनों को देदे तिस के पीछे शीघ्रही तेरा कल्याण होजायगा ॥ २ ॥

ततस्ताव‍ङ्गरागेण स्ववर्णेतरशोभिना । [1]
सम्प्राप्तपरभागेन शुशुभाते ऽनुरञ्जितौ ॥ ५ ॥
प्रसन्नो भगवान् कुब्जां त्रिवक्रां रुचिराननाम् ।
ऋज्वीं कर्तुं मनश्चक्रे दर्शयन् दर्शने फलम् ॥ ६ ॥
पद्भ्यामाक्रम्य प्रपदे द्व्यङ्गुल्युत्तानपाणिना ।
प्रगृह्य चुबुके ऽध्यात्ममुदनीनमदच्युतः ॥ ७ ॥
सा तदर्जुसमानाङ्गी बृहच्छ्रोणिपयोधरा ।
मुकुन्दस्पर्शनात्सद्यो बभूव प्रमदोत्तमा ॥ ८ ॥

१ १सुवर्णेतरेति विज० पाठः

भाषा टीका।

सैरंध्री कुब्जा बोली हे श्याम सुंदर ! मै कंस की दासी हूं उस की बडी संमत हूं त्रिवक्रा मेरा नाम है मैं अनुलेप कर्म में रहती हूं मेरा बनाया चंदन कंस राजा को बडा प्रिय है अब तो आप दोनों के बिना इस चंदन के योग्य और कौन होगा ॥ ३ ॥

फिर वह कुब्जा भगवान् के रूप मधुरता सुंदरता हसना बोलना देखना आदिक चेष्टाओं से वशी होकर सुंदर चंदन को दोनों रामकृष्ण के अर्थ देती भई ॥ ४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

स्ववर्णेतरशोभिना रामकृष्णयोर्वर्णाभ्यामितरः पीतादिवर्णस्तेन शोभितुं शीलं यस्य तेन सम्प्राप्तपरभागेन सम्प्राप्तः परो नाभेरुपरितनो भागो येन सः सम्प्राप्तः परभागः शोभातिशयो येनेति वा तेनानुरञ्जितौ ॥ ५ ॥

स्वदर्शने सद्यः फलं दर्शयन् ॥ ६ ॥

तस्याः प्रपदे पादाग्रद्वयं पद्भ्यामापीडय द्वे अङ्गुल्यावुत्ताने उन्नते यस्मिन् पाणौ तेन चुबुके मुखस्याधोभागे धृत्वा ऽध्यात्मं देहमुन्नमयामास ॥ ७ ॥

तदैवर्ऋजुसमानमङ्गं यस्याः बृहत्यौ श्रोणी पयोधरौ च यस्याः सा मुकुन्दस्पर्शनादिति मुख्यङ्कारणम् ॥ ८—११ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

अनुरञ्जितौ पत्रभङ्गीरचनाविधिना श्रीगण्डवक्षोभुजादिष्वनुलिप्तौ सखिभिस्तथैव स्वयम् ॥ ५ ॥

कुब्जामतएव त्रिवक्रां तत्संज्ञकाम् ऋज्वीं कर्तुमिति । अनृज्वीमृज्वीं कर्तुमित्यर्थः ऋजुकरणे हेत्वन्तरं रुचिराननामिति । अन्यत्तैः । तत्र सद्यः फळमापातफलमिति ॥ ६ ॥

तत्र मल्लाक्लेलोचितग्रहणप्रावीण्यपूर्वकमेवेत्याह । पद्भ्यामिति द्वे अङ्गुल्यौ मध्यमातर्जन्यौ उत्ताने उपरिकृताङ्गभागे यत्र तेन पाणिना दक्षिणेन वामेन तु पृष्ठावष्टम्भनं ज्ञेयम् । आत्मानं जीवमधिकृत्य वर्त्तमानमध्यात्मं देहम् इति जीवत्यागपर्यन्तं तद्देहस्य प्रारब्धवशेनापरिहार्यं तत्कुब्जत्वं सूचितम् । अच्युतः निजलीलाविशेषादच्युत इति अतएव तथा प्रग्रहणम् । अन्यथेच्छामात्रेणैव तत्तत्सम्भवात् ॥ ७ ॥

ऋजूनि वक्रतापगमात् अतएव कुब्जतया वक्षोभागादेः स्वल्पत्वादिना पूर्वमसमानानि अधुना तु समानं योग्यं मानं परिमाणं येषां तथा भूतान्यङ्गानि यस्याः तदेव दर्शयति । बृहदिति । न केवलमेतावदेव प्रमदानां मध्ये उत्तमा च बभूव । भगवदङ्गसङ्गानुरूपोत्कर्षमपि लेभे इत्यर्थः । अतोऽत्र मुकुन्दस्पर्शनमेव मुख्यं कारणं ग्रहणादिपरिपाटी तु विनोदमात्रत्वाद्गौणमिति भावः । मुकुन्देति कैमुत्येन हेतुगर्भं यो निजांशेनापि तेन च चिन्त्यमानमात्रेणाप्यशेषसंहारदोषदूरीकरणपूर्वकं सारूप्यादिमुक्तिमपि ददाति तस्य साक्षाद्भूतस्य कियदिदमिति भावः ॥ ८ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

स्ववर्णेतरशोभिना स्वदेहवर्णविरुद्धवर्णशोभिना ॥ ५—६ ॥
अध्यात्मं शरीरम् उदनीनमत् उन्नमयामास ॥ ७ ॥
ऋजुसमानाङ्गी समानशब्दो रूपपरः ॥ ८...१८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तत इति । स्ववर्णेतरशोभिना स्वस्याङ्गरागस्य यो वर्णः वरा हरुधिरवल्लोहितवर्णःतस्मादितरौ यौ वर्णौ तयोःशरीरगतौ विशुद्धौ सितासितवर्णौ ताभ्यां शोभिना अतएव प्राप्तः परभागो महातिशयो येन तेनानुरञ्जितौ तौ रामकृष्णौ शुशुभाते यद्वा तौ रामकृष्णौ स्वदेहगतविशुद्धसितासितवर्णाभ्यामितरेणेतरवर्णेनातएव शोभिनातएव च सम्प्राप्तमहातिशयेन यद्वा सम्प्राप्तः पर उत्कृष्टः भागः शरीरैकदेशो येन तेनानुरञ्जिताविल्यर्थः ॥ ५ ॥

श्रेयस्ततस्ते न चिराद्भविष्यतीत्युक्तं श्रेयश्चकारेत्याह । प्रसन्न इति । स्वदर्शनफलं तस्याः दर्शयन् तां त्रिवक्राम् ऋज्वीं कर्तुमवक्रां कर्तुं मनश्चक्रे मनश्चकार नमस्कारपूर्वकमृज्वीं चकारेत्यर्थः ॥ ६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तत्प्रकारमेवाह । पद्भ्यामिति । तस्याः प्रपदे पादाग्रद्वयं स्वपद्भ्यामापीड्य आक्रमणेनावष्टभ्य द्वे अङ्गुली उत्ताने उन्नते यस्मिन् तथाभूतेन पाणिना तस्याश्चिबुके मुखस्याधोभागे गृहीत्वा अध्यात्मं देहम् उदनीनमत् उन्नमयामास ॥ ७ ॥

सा तदैव ऋजु समानमनुरूपमङ्गं यस्याः बृहत्यौ श्रोणी पयोधरौ च यस्याः तथाभूता मुकुन्दस्पर्शनान्निदानात् सद्य एव प्रमदोत्तमा बभूव ॥ ८ ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

सुवर्णादितरद्रजतं तेन कर्पूरो लक्ष्यते कर्पूरसम्पर्केण शोभा परमलातिशयलक्षणास्यास्तीति सुवर्णेतरशोभिना भगवच्छरीरकान्तिमपेक्ष्य सम्प्राप्तः अपरभागो गुणोत्कर्षराहित्यं येन स तथा तेन ईषद्गुणोत्कर्षं प्राप्तेन वा भगवदङ्गसङ्गेन सम्यगुत्कर्षं प्राप्तेन वा अनुरञ्जितौ स्वकान्त्यनुकूलरागशोभां प्राप्ता ॥ ५ ॥

ऋज्वीं कर्तुम् समीकर्तुम् आत्मनो दर्शने यत्फलं तद्दर्शयन् पश्यत्कंसहननं लोकान्प्रत्याययन्निति भावः ॥ ६ ॥

कुब्जायाः प्रपदे पादाग्रे स्वपादाभ्यामाक्रम्यावष्टभ्य द्वे अङ्गुल्यौ उत्ताने यस्मिन्पाणौ तेन द्व्यङ्गुलोत्तानपाणिना चुबुके मुखाधःप्रदेशे आस्यं प्रगृह्य उदनीनमत् उन्नमयांचकार ऊर्ध्वमाकृष्टवानित्यर्थः ॥ ७-८ ॥

———

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

ततो भगवतः त्रिविधोऽप्यलङ्कारो ज्ञात इत्याह । ततस्ताविति । स्ववर्णात् शुक्लनीलात् इतरो यः पीतो वर्णः तेन शोभायुक्तेन अङ्गरागेण तावुभावपि शुशुभाते स्वरूपतः शोभाकर्तृत्वं वारयति । सम्प्राप्तपरभागेनाति । सम्यक्प्राप्तः परो नाभेरूर्ध्वभागो येनाङ्गरागेण नाभेरूर्ध्वं सर्वत्रैव कण्ठपर्यन्तं व्याप्तमनुलेपनं यथा वस्त्राणां मालादीनां च शोभा नापगता भवति तथा प्राप्तिः सम्यक्प्राप्तिः ननु वस्त्रादिघर्षणेन स्वतो वा तदपगमे कथं शोभा प्रतिष्ठिता स्यादत आह । अनुरञ्जिताविति । माञ्जिष्ठादिना वस्त्रमिव तेन रागयुक्तौ जातौ प्रीतौ वा ॥ ५ ॥

ततो भगवान् वाक्यं कृतमिति किञ्चित्फलं तदानीमेवाग्रिमफलसाधकं कर्तुमारब्धवानित्याह । प्रसन्न इति । तस्याः कृतं शोभातिशयं ज्ञात्वा प्रसन्नो जातः भगवांश्च सर्वफलदानसमर्थः तथाप्यादौ दोषो दूरीकर्तव्य इति दोषमेव दूरीकृतवान् तदर्थमाह । कुब्जामिति । न केवलं कुब्जत्वमात्रं किं तु त्रिवक्रां ग्रीवापादौ मध्यमिति मुखे वक्रतामाशङ्क्य तद्व्यावृत्त्यर्थमाह । रुचिरमाननं यस्याः ऋज्वीं कुब्जतां वक्रत्वं च दूरीकरिष्यामीति मनश्चक्रे प्रक्षालयो सा तथाभूतैवेति मूलच्छाया अभावात् नूतनं मनः कर्तव्यं राजसा ह्यतिकठिना इति तेषामर्थे नूतनमपि करोतीति ज्ञापयति । नन्वेतदङ्गरागादानफलं तथा सति शास्त्रविरुद्धमित्याशङ्क्याह । दर्शन फलं दर्शयन्निति ॥ ६ ॥

आक्रम्येति । तस्याः पादाग्रद्वयं स्वस्य पद्भ्यामाक्रम्य पृष्ठभाग हस्तं दत्त्वा द्व्यङ्गुलोत्तानपाणिना कनिष्ठानामिके सङ्कोच्य मध्यमादेशिनीद्वयमुत्तानं विधाय चिबुकाधो गृहीत्वा अध्यात्मं तस्य शरीरमुदनीनमत् ऊर्ध्वं नीतवान् ननु स्त्रीस्पर्शो भावान्तरोत्पत्तेरावश्यकत्वात् कथमव्यग्र एवं कृतवानित्याह । अच्युत इति । अच्युतत्वादेव तामपि नावयवशश्च्युतां कृतवान् किं त्वपेक्षितप्रकारेणैव समां चक्रे भगवान् प्रकारान्तरेणापि ऋज्वीं करोति तथा सा यान्ती स्थितेति तस्यै काममोक्षावेव दातुं द्वे एवाङ्गुल्यौ उत्ताने कृते अङ्गुष्ठस्य तु सर्वसमत्वात् न योजनम् ॥ ७ ॥

एवं कौतुकमिव वस्त्रपुत्तलिकावत्सर्ज्जीचकारभगवत्स्पर्शपर्यन्तमेव तथात्वमिति स्थितिस्थापकसंस्कारेण पूर्ववदेव माभवत्विति भगवता परित्यक्ता परित्यक्तामपि तां वर्णयति । सा तदेति । सा त्रिवक्रापि तदैव ऋजु समानं चाङ्गं यस्यास्तादृशी जाता ननु कुब्जभागे ये अवयवाः बहवः स्थिताः ते चेत्तदुदरे प्रविशन्ति तदा कृशोदरीत्वं भज्येत अथापगच्छेयुः तदैकदेशनाशात् अच्युतस्पर्शः न गुणो भवतीत्याशङ्क्याह । बृहच्छ्रोणिपयोधरेति । श्रोण्योः पयोधरयोश्च ते भागाः प्रविष्टा अतो भोगोपकारायैव जाताः किं च मुकुन्दो मोक्षदाता सर्वेषामेव सर्वावस्थां त्याजयित्वा स्वानन्दं प्रापयति । तथा तस्या अपि पूर्वावस्थां दूरीकृत्य लक्ष्मीसमानावस्थां प्रापितवान् यदाह । मुकुन्दस्पर्शनात्सद्य एव प्रमदोत्तमा जाता ॥ ८ ॥

———

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

स्ववर्णेतरेण कृष्णरामयोवर्णाभ्यामितरेण पीतवर्णेन श्यामवर्णेन च शोभितुं शीलं यस्य तेन संप्राप्तः परभागः भूषणभूषणाङ्गमिति न्यायेन परमोत्कर्षो येन तेन ॥ ५ ॥ ६ ॥

तस्या प्रपदे पादाग्रद्वयं पाद्भ्यमापीड्य द्वे अङ्गुल्यावुत्ताने उन्नते यस्मिन् तेन पाणिना चिबुके मुखस्याधोभागे धृत्वा अध्यात्मं देहमुन्नमयामास ॥ ७ ॥

तदैव ऋजु समानमङ्गं यस्याः सा ॥ ८ ॥ ९ ॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

स्ववर्णाभ्यां सितासिताभ्यामितरेतरवर्णेन शोभितुं शीलं यस्य तेन सम्प्राप्तः परः सर्वत उत्कृष्टः भागः रामकृष्णविग्रहरूप आश्रयो येन तेन अङ्गरागेणानुरञ्जितौ शुशुभाते ॥ ५ ॥ ६ ॥

अच्युतः श्रीकृष्णः स्वपद्भ्यां कुब्जायाः प्रपदे पादाग्रे आक्रम्य द्वे अङ्गुल्यौ उत्ताने उन्नते यस्मिन् तेन पाणिना चिबुके प्रगृह्य अध्यात्मं शरीरम् उदनीनमत् उन्नमयामास ॥ ७ ॥

तदा मुकुन्दस्य स्पर्शनात् सा ऋजुसमानमङ्गं यस्याः सा बृहत्यौ श्रोणी पयोधरौ च यस्याः सा सद्यः प्रमदोत्तमा बभूव ॥ ८ ॥

———

भाषा टीका ।

तब तो रामकृष्ण दोनों अपने वर्ण से दूसरा वर्ण अति शोभा वाला जो कि नाभी के ऊपर शरीर में लगा है तिस चंदन से रंगे हुये अत्यंत शोभा को प्राप्त होते भये ॥ ५ ॥

ततो रूपगुणौदार्यसम्पन्ना प्राह केशवम् ।
उत्तरीयान्तमाकृष्य स्मयन्ती जातहृच्छया ॥ ९ ॥
एहि वीर ! गृहं यामो न त्वां त्यक्तुमिहोत्सहे ।
त्वयोन्मथितचित्तायाः प्रसीद पुरुषर्षभ ! ॥ १० ॥
एवं स्त्रिया याच्यमानः कृष्णो रामस्य पश्यतः ।
मुखं वीक्ष्यानुगानां प्रहसंस्तामुवाच ह ॥ ११ ॥
एष्यामि ते गृहं सुभ्रुः ! पुंसामाधिविकर्शनम् ।
साधितार्थोऽगृहाणां नः पान्थानां त्वं परायणम् ॥ १२ ॥

भाषा टीका ।

फिर भगवान् प्रसन्न भये तीन जगे से टेढी उस कुब्जा को सीधी करके अपने दर्शन का फल दिखाने को विचार करते भये ॥ ६ ॥

भगवान् ने उसके पैरों की अंगुलियों को अपने पैर के अंगुठा से दवाकर हाथ की दो अंगुलियों से उसकी ठोडी को उठाकर ऊपर को हाथ करके झटक दिया ॥ ७ ॥

वह कुब्जा तवही सीधी समान अंग वाली वडी कटि वाली दिव्यस्तनों वाली होगई मुकुंद भगवान् के स्पर्श करते मात्र सव स्त्रीयों में वडी उत्तम स्त्री होगई ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

आधिविकर्शनं मनःपीडाशमनम् कंसवधेन स्वयं साधितोऽर्थः सुहृदां प्रयोजनं येन सः अगृहाणामकृतदाराणां पान्थानां प्रवासिनां परमयनमाश्रयस्त्वम् ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

ततस्तत्स्पर्शनादेव रूपगुणयोरौदार्य्यं महत्त्वं तेन सम्पन्ना सती इति प्रमदोत्तमात्वमेव दर्शितम् अतो योग्यताप्राप्त्या जातहृच्छया प्रकटीभूतकामा स्मयो मदः स्मितं वा तत्सहितं यथा स्यात्तथा स्मयन्तीति पाठे स्मयमाना प्रकर्षेण कटाक्षवीक्षणादिना आह । तदुक्तं श्रीपराशरेण "विलासललितं प्राह प्रेमगर्भभरालस"मिति ॥ ९ ॥

वीरेति निजभावोद्दीपनगुणविशेषविशिष्टतया सम्बोधयति । श्लेषेण हे अभीष्टपूरणसमर्थ ! मम गृहं त्वमेहि । ननु निजसङ्गिन इमान् विहाय कथमेकाकी यायामिति चेत्तत्राह त्वमेतेऽहञ्च सर्वे यामः । ननु दिनान्तरे गमिष्यामः तत्राह । नेति । इह राजमार्गे त्यक्तुं न शक्नोमि वासस्थानानिश्चयेन पुनर्दुष्प्रापत्वात् । अतो गृहमेव नेष्यामीत्यर्थः । यद्वा तर्हि ज्येष्ठोऽयं सखीनामेको वा नीयतां तत्राह । नेति । त्वय्येव मदपेक्षा नत्वन्यस्मिन्निति भावः । नन्वीदृशमत्र ते धार्ष्ट्यं न योग्यं तत्राह । त्वयेति । अतो मम न कोऽपि दोष इति भावः । अतएव प्रसीद स्वयमेवानुग्रहं कुरु । त्वत्प्रसादे सति धार्ष्ट्यादपि न बिभेमीति भावः । तत्र हेतुमाह । पुरुषर्षभ ! हे पुरुषोत्तमेति । किञ्च । निजपुरुषर्षभतापेक्षया त्वयापि नाहं त्यक्तुं योग्येति भावः ॥ १० ॥

रामस्य पश्यतः अनुगानाञ्च पश्यतां तत्तत् साक्षात् स्त्रिया कामिन्या याच्यमानः रहस्यं किमपि प्रार्थ्यमानः अतएव तस्य तेषाञ्च मुखं वीक्ष्य प्रहसन् कौतुकेनोच्चैर्हसन् । तथाचोक्तम् । श्रीवैशम्पायनेन "तौ जातहर्षावन्योऽन्यं सतामाक्षेपमव्ययौ । वीक्ष्यमाणौ प्रहसितौ कुब्जायाः श्रुतविस्तरा"विति । ह स्फुटमेवोवाच । तथा तच्च श्रीरामादीन् प्रति एतां वञ्चयामीति व्यञ्जनाय तां प्रति तु प्रतिजानाम्येवैतदिति बोधनायेति भावः ॥ ११ ॥

तथैव तद्विषयकस्वकाममपि सूचयति । एष्यामीति । अगृहाणामित्यादौ च बहुवचनादिना स्वस्य साधारण्यानन्याश्रयत्वाभ्यां पूर्ववदेव व्यञ्जना ॥ १२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

किञ्च रूपादिसम्पन्ना सती जातः हृच्छयः कामो यस्याः सा अतएव स्मयन्ती मुकुन्दमुत्तरीयाग्रमाकृष्य प्राह तत्र रूपं सौन्दर्यं गुणा यौवनादयः औदार्यं गत्यवलोकनादि श्रैष्ठ्यम् ॥ ९ ॥

उक्तिमेवाह । एहीति । हे वीर ! अस्मद्गृहं प्रत्यागच्छ यामः गच्छामः इह त्वां त्यक्तुं नोत्सहे न शक्नोमि त्वयोन्मथितं क्षोभितं चित्तं यस्यास्तस्या मम प्रसीद हे पुरुषर्षभ ! ॥ १० ॥

इत्थं तया स्त्रिया रामस्य पश्यतः सतः याच्यमानोऽपि भगवान् अनुगानां गोपानाञ्च चशब्दाद्रामस्य मुखमवलोक्य प्रहसन् तामुवाच ॥ ११ ॥

उक्तिमेवाह । एष्यामीति । हे सुभ्रु ! साधितः कंसवधरूपोऽर्थः प्रयोजनं येन तथाभूतः पुंसामाधिविकर्षणं कामप्रयुक्तमनःपीडाशमनं तव गृहं प्रत्यागमिष्यामि अगृहाणां न विद्यन्ते गृहाः अस्यां पुर्यां येषां तेषां पान्थानामस्माकं त्वमेव परायणमुपभोग्येत्यर्थः ॥ १२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

उत्तरीयान्तमुत्तरीयवस्त्राञ्चलं सस्मयं समदं हृच्छयःकामः॥ ९॥

त्वया कारणेन उन्मथितचित्तायाः विलोलितमनसः॥ १०॥

हेत्यनेनायमितिहासो लोके प्रवर्ततामिति सूचयंस्तामाहेति ज्ञाप्यत इति ॥ ११ ॥

तरुणानां पुंसामाधिविकर्शनं मनःपीडापरिहारनिमित्तं गृहमागमिष्यामि किन्तु किञ्चित्कार्यमस्तीत्याह । साधितार्थ इति । अर्थः कंसवधलक्षणः त्वं सर्वथा परिहारार्था नेत्याह । अगृहाणामिति । अगृहाणां गृहरहितानां वनवासिनामित्यर्थः । पान्थानां पथिकानां नोऽस्माकं त्वं परायणमुत्तमाश्रयः अनेनासङ्गानामीश्वराणामस्माकं भक्ता एव पूजादिनाश्रयभूता इति दर्शितम् ॥ १२ ॥

श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी ।

ततो भगवान् स्वार्थमेव कृतवानिति भगवन्तमेव गृहीतवतीत्याह । तत इति । ततः तस्याः रूपं सम्पन्नं गुणाश्च पद्मगन्धाद्यः पूर्णो रसः तस्य च दानार्थमौदार्यं च सम्पन्नम् औदार्ये च सर्वे गुणा इति आन्तराः सत्यादयः सर्वे निरुक्ताः एवं सर्वगुणसम्पन्ना सती केशवं ब्रह्मादिभ्योऽपि सुखदातारं प्राह सा दासीति प्रमदा जातेति भगवदङ्गस्पर्शोऽपि वृत्त इति निर्भया सती विदग्धमिव कामरसिकमिव उत्तरीयान्तं भगवत आकृष्य तदानीमेव जातभावा स्वहृदयं बोधयन्तीव स्मयन्ती वक्ष्यमाणमाह। ननु कथं सभायां चतुष्पथे तथा कृतवतीत्याह। जातो हृच्छयो यस्या इति ॥ ९ ॥

तस्या वाक्यमाह । एहीति । स्त्रीणां रसान्तरं न रोचत इति गोपिकावदेषापि काममेव पुरुषार्थं मन्यते तं दातुं समर्थ इति वीरेति सम्बोधनं गृहं रमणयोग्यमिति आत्मानं भगवन्तं च आत्मतया सम्भाव्य याम इत्याह । सर्वेषां कार्यमस्ति चेत् त्वयावश्यमागन्तव्यमित्यभिप्रायेणाह । न त्वां त्यक्तुमिहोत्सह इति । अकृतकार्यत्वात् सम्भूतिरेव सम्पादिता न तु भोजितेति त्यागो दूरे तदर्थमुत्साहमपि न करोमि । नन्वेवं निबन्धे को हेतुस्तत्राह । त्वयोन्मथितचित्ताया इति । त्वया हि चित्तं मदीयमुन्माथितं येन चेतना गता मथनं कृत्वा हि तत्फलं नवनीतमिव भोक्तव्यम् अतो भोगार्थं निर्बन्ध इत्यर्थः । नन्वीश्वरे कथमेवं धाष्टर्यमिति शङ्कायामाह । प्रसीदेति । प्रसीदेति प्रसन्नो भव स्वामिन् ! त्वयि प्रसन्ने एव सर्वं भवतीति तर्हि निष्कामां करिष्यामीति चेत्तत्राह । पुरुषर्षभेति । हे पुरुषश्रेष्ठ ! न हि पुरुषः स्त्रियं निष्कामां करोति अपि तु कामपूर्णामेव सुतरामेव पुरुषर्षभः ॥ १०

एवं कामपीडितायां तस्यां प्रार्थयमानायां सत्यां तदुल्लङ्घनमनुचितमिति भगवान् किं कृतवानित्याशङ्कायामाह। एवमिति । एवं निर्बन्धप्रकारेण स्त्रिया याच्यमानः कृष्णः तेषामेवार्थं अवतीर्णः तथापि रामस्यापि बालाः कौतुकचेतसः बलभद्रो युद्धाभिलाषी इयं च कामपरा एवं च सति सर्वानुरोधः कर्त्तव्य इति प्रहसन् प्रकर्षेण तां मोहयन् उवाच हेत्याश्चर्यं नहि स्त्रीभिः प्रार्थितः कृष्णो विलम्बं करोतीति । अथवा पूर्णानन्दः कथमेवमाह । अहमागमिष्यामीति ॥ ११ ॥

भगवद्वाक्यमाह । एष्यामि ते गृहमिति । सुभ्रु इति सम्बोधनं प्रार्थनार्थमिवेति सूचयति परिहासार्थं यथा तस्या अयं रसो गुप्तो भवति तदर्थमुपहासवदाह । पुंसामाधिविकर्षणमिति । ये केचन पुरुषाः तेषां मनःपीडागुप्तार्थां तां त्वद्गृहमेव त्याजयति अतः आधिविकर्षणं परमारब्धं समाप्य कर्तव्यमिति विलम्बः कर्त्तव्य इत्याह । साधितार्थ इति । कंसं हत्वेत्यर्थः । ननु पश्चादागमिष्यसीत्यत्र किं प्रमाणमित्याशङ्क्याह । अगृहाणां नः पान्थानां त्वमेव परायणमिति परिहासोक्तिरेषा स्वार्थमेवागमिष्याम इति नात्र सन्देहः कर्त्तव्यः । पान्थानामिति । गृहार्थमप्यागमनं क्वचित् स्थातव्यमिति यदि कश्चित् प्रार्थयेत्तदा तत्र स्थितौ कः सन्देह इत्यर्थः । किञ्च त्वमेव परमयनमिति । अस्माकं सुतरां स्वार्थमुत्पादिता परायणं भवत्येव ॥ १२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

हे वीरेति । अन्ये धर्मवीराद्या भवन्ति त्वं तु स्त्रीजनधर्मध्वंसवीरो भवसीति भावः । ननु त्वमेहीत्यादिना भोजनार्थमेव मां निमन्त्रयसि किं तत्राह । न त्वां त्यक्तुमित्यादि । त्वदुक्त्या तु लोका इह राजमार्गे हसन्तः अन्यथा संभावयन्ति तस्मादेवं मावादीस्तत्राह । त्वयोन्माथितेति । तर्हि त्वया मच्चित्तं कथमुत्कर्षेण माथितमिति तवैवायं स्पर्शदोषो न ममेति भावः । सप्तम्यर्थे षष्ठी ॥ १० ॥

मुखं वीक्ष्येति । भो आर्य्य ! भोः सखायश्च किमधुनापि युष्माकं मुखानि हास्यार्णवे न विप्लुतानि पश्यत नेयं स्त्रीमूर्तिः किं तु हास्यरस एव युष्मान् कौतुकिनो ज्ञात्वा मिलितुमुपक्रमते मथुरापुर्य्यां हास्यवैदग्धीयं वा स्वं परिचाययतीति भावः ॥ ११ ॥

कुब्जां प्रति प्रियोऽयं मां स्वीकरोतीति रामादीन् प्रति तु ग्राम्यां स्त्रियमिमामयं कृष्णो वञ्चयतीति द्योतयन्नाह । एष्यामीति पुंसामिति । बहुवचनेन तां प्रति परिहासः । साधितार्थ इति । कंसवधाद्यावश्यककृत्यं कृत्वा निश्चिन्तो भूत्वेति समयसंकेतश्च व्यञ्जितः अगृहाणां "न गृहं गृहमित्याहुर्गृहिणी गृहमुच्यते" इति न्यायेनाकृतदाराणां नोऽस्माकमिति राजपुत्रत्वादात्मन आदरेण खल्वेकत्वेऽपि बहुवचनं सा मन्यते स्म पान्थानामिति गोकुले स्वनगरे मम गोप्योऽनुरागिण्यो वर्तन्ते तथात्र पुर्य्यामपरिचितायां न काश्चन केवलं त्वमेवैकानुरागिणी प्राप्तेति तां प्रत्यनुरागश्च व्यञ्जितः रामादींस्तु बहुवचनेन आधिपदेन पान्थपदेन च प्रयुक्तेन कृष्ण एतामस्वीकुर्वन् सामान्यवनितात्वलक्षणगालिप्रदानेनैनामनभिज्ञां तिरस्करोतीति प्रत्याययामास ॥ १२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

ततस्तदनन्तरं रूपेण गुणैर्मधुरभाषणादिभिः औदार्य्येण च संपन्ना जातो हृच्छयः श्रीकृष्णेन सह विहर्तुं कामो यस्याः सा ॥९॥

गृहं मदीयं यामः ॥ १०—११ ॥

पुंसां प्रविशताम् आधिविकर्षणं मनःपीडाशमनम् । ते गृहमेष्यामि । पान्थानां प्रवासिनां कंसभयाद्देशान्तरे वर्तमानानामगृहाणां त्यक्तगृहाणां सुहृदां कंसवधेन साधितो ऽर्थः प्रयोजनं

विसृज्य माध्व्या वाण्या तां व्रजन्मार्गे वणिक्पथैः ।
नानोपायनताम्बूलस्रग्गन्धैः साग्रजो ऽर्चितः ॥ १३ ॥
तद्दर्शनस्मरक्षोभादात्मानं नाविदन् स्त्रियः[१] । [१]अयं विजयध्वजीये नास्ति
विस्रस्तवासःकबरवलयालेख्यमूर्त्तयः ॥ १४ ॥
ततः पौरान् पृच्छमानो धनुषः स्थानमच्युतः ।
तस्मिन् प्रविष्टो ददृशे धनुरैन्द्रमिवाद्भुतम् ॥ १५ ॥
पुरुषैर्बहुभिर्गुप्तमर्चितं परमर्द्धिमत् ।
वार्यमाणो नृभिः कृष्णः प्रसह्य धनुराददे ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

येन सः हे सुभ्रु ! त्वं नः परायणं मनोवासस्थानं त्वयि अस्माकं मनो वर्तत इत्यर्थः । यद्वा त्वं नोऽसि अतस्ते गृहं परायणमेष्यामीति ॥ १२ ॥

भाषा टीका ।

फिर तो कुब्जा रूप गुण उदारता से संयुक्त होकर भगवान् के वस्त्र के अग्र भाग को पकड कर कंदर्प के वस होकर हंस के कहने लगी ॥ ९ ॥

हे वीर ! आओ घरको जायंगे इहां पर मैं आपको नहीं छोड सकती हूं तुमारे रूप से मेरा चित्त चंचल होगया है सो हे पुरुषोत्तम ! मेरे पर प्रसन्न होजाओ ॥ १० ॥

इस प्रकार से बलदेवजी के देखतेही जब उस स्त्रीने याचना करी तब गोपों के मुखों को देखकर हंसकर भगवान् उससे बोले ॥ ११ ॥

हे सभ्रु ! पुरुषों की मनकी चिंता को नाश करने वाले तुमारे घरको मैं अपने और सब कामों को करके आऊंगा क्यों कि विना घर वाले मार्ग में आने वाले हम लोगों को तुही आश्रय है ॥ १२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

मधुरया गिरा तां प्रस्थाप्य व्रजन् वणिक्पथैर्वणिग्भिरर्चितः ॥ १३ ॥

लेख्याश्चित्रन्यस्ता इव मूर्त्तयो यासां ताः ॥ १४ ॥

धनुर्मखशालां पृच्छन् ॥ १५ ॥

प्रसह्य बलात् ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

नानाविधैरुपायनरूपैस्ताम्बूलादिभिश्च उपायनगृहीतानामपि ताम्बूलादीनां पृथक् निर्देशस्तदानीमुपादेयानां तेषां प्राचुर्यविवक्षया । स्रजः रत्नमुक्तादिमालाः । गन्धः सुगन्धिश्च-न्दनादिभिः पङ्कः अगुर्वादिसाधितद्रवविशेषः विचित्रवर्णचूर्णादयश्च । साग्रज इत्युपलक्षणं सानुगोऽपि श्रीयमुनान्तिके पुर्यन्ते वर्त्तमानत्वादादौ विप्रैः कृतमधुनाचान्तर्वर्त्तमानैर्वैश्यैरर्चनमुक्तं क्षत्रियादयश्च प्रायो मध्ये वसन्तीति तत्कृतं नोक्तमिति ज्ञेयम् ॥ १३ ॥

वणिक्पथेष्वपि स्त्रीणान्तु कोमलस्वभावत्वादधिको भावो जात इत्याह । तदिति । स्त्रियः वणिग्योषितः । तस्य दर्शनेन यः स्मरः स्मरणमात्रेणापि जायमानः प्रेमविलासरूपः कामस्तेन क्षोभो धैर्यक्षयः मोहो वा तस्माद्धेतोः आत्मानं देहं देहिनं नाविदन् का वयं क वर्त्तामहे इत्यनुसन्धातुं न शक्ता इत्यर्थः अतएव विशेषेण स्रस्तानि वासआदीनि यासां ताः तत्र वासो वलयविस्रंसः स्मरवेगेन सद्य एव काश्यापत्तेः केशविस्रंसस्तु गात्रमोटनकम्पाद्यमर्द्दात् किञ्च लेख्यवन्मूर्त्तयो बभूवुरिति शेषः ॥ १४ ॥

तत इति । सार्द्धकं भक्तजनानुग्रहानन्तरं ज्ञानाद्यैश्वर्यैतः सर्वेथाच्युतिरहितोऽपि लीलाकौतुकावेशेन धनुःस्थानं पृच्छन्नित्यादि योज्यम् ऐन्द्रं धनुरिवेति रत्नादिजटितत्वेन विचित्रवर्णत्वात् बृहत्तरत्वाच्च अतएवाद्भुतं तथाच हरिवंशे । "स तयोर्दर्शयामास तद्धनुः स्तम्भसन्निभम् । अनारोप्यमसम्भेद्यं देवैरपि सवासवै"रिति । पुरुषैः कंसभृत्यैरर्चितत्वादेव परमर्द्धिर्भूषणादिमहाधनसम्पत्तिस्तद्वत् ॥ १५ ॥

वार्यैत्यर्द्धकम् । नृभिस्तद्रक्षिभिः क्रोधात्तथा सर्वैरपि कंसभीत्यास्नेहाद्वार्यमाणोऽपि ॥ १६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवंविधया माध्व्या मधुरया वाण्या तां विसृज्य उत्तरीयान्त्याजयित्वेति भावः । ततो मार्गे व्रजन् ततो वणिक्पथे प्रविष्टः तत्र नानाविधैरुपायनैः श्रेष्ठवस्तुभिः ताम्बूलादिभिश्च सरामः समर्चितो बभूव ॥ १३ ॥

तदा तस्य भगवतो दर्शनेन यः स्मरक्षोभस्तेन स्त्रिय आत्मानं देहं नाविदन् नानुसमदधत वेदनाभावमेव दर्शयन् विशिनष्टि । विस्रस्ताः वासःप्रभृतयो यासां ताः लेख्यवल्लिखितप्रतिमावन्निश्चलाः मूर्त्तयो तासां ताः ॥ १४ ॥

ततो धनुषः स्थानं धनुर्मखशालां पौरान्प्रति पृच्छमानोऽच्युतस्तस्मिन् धनुषः स्थाने प्रविष्टः ऐन्द्रं धनुरिवाद्भुतम् ॥ १५ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

बहुभिः पुरुषैर्गुप्तमर्चितं परमा ऋद्धिः सुवर्णालङ्कारादिसम्पत्तिरस्यास्तीति तथा तद्धनुर्दृष्टवान् तदा तत्रस्थैः पालकैः बहुधा वार्य्यमाणोऽपि कृष्णः प्रसह्य बलात् तद्धनुरादधे ॥ १६ ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली

माध्व्या मधुरया वणिजां पन्थानो येषां ते तथा तैः दर्शनार्थमागतैः पण्यवीथिकाश्रितैः वैश्यैश्चार्चितः नानाविधोपायनं ताम्बूलादिकं येषां ते तथा तैः ॥ १३ ॥ ० ॥

पृच्छमानः पृच्छन् ॥ १५—१६ ॥

———

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

एवमुक्त्वा प्रकृतार्थमेव प्रवृत्त इत्याह । विसृज्येति । वाणी तु माध्वी अर्थस्तु विलम्बसाधकत्वान्न मधुरः तामिति सा एका स्त्री कृतोपकारा च एते तु तद्विपरीता इति एतेषां मनोरथसिद्ध्यर्थं मार्गे एवं व्रजन् राजमार्गे गच्छन् तत्रत्यैर्वणिग्जनैः नानाविधान्युपायनानि रिक्तहस्तपरिहाराय ताम्बूलस्रग्गन्धाः पूजासाधनानि बलभद्रसहितः पूजितः ॥ १३ ॥

एवं साधारणपुरुषाणां विनियोगमुक्त्वा साधारणस्त्रीणामाह । तद्दर्शनेति । तस्य भगवतो दर्शनात् यः स्मरस्य क्षोभः तेन आत्मानं देहं नाविदन् दृढा प्रपञ्चविस्मृतिरुक्ता भगवद्दर्शनं हि स्मरं जनयति नूतनं पूर्वमप्येकः स्मरः सहजः उभौ मिलितौ क्षुब्धौ जातौ मुख्यतया दृष्ट्या जातः काम इति स एव क्षोभक उक्तः यत्र देहस्याप्यस्मरणं तत्रान्यस्मरणं दूरादपास्तमिति अत्यन्तविस्मरणं ज्ञापयितुमाह । विस्रस्तेति । सर्वाभरणभूषिता भगवद्दर्शनार्थमागताः तत्र भगवद्दर्शनेन क्षोभे जाते आभरणानि स्वत एव विशकलितानि जातानि उभयोरप्युपयोगाभावात् विशेषेण स्रस्तानि अधः पतितानि वासांसि कवरः केशपाशः वलयाः कङ्कणा आभरणानि किञ्च सर्वा क्रियापि निवृत्तेत्याह । आलेख्यं चित्रमिव मूर्तिर्यासामिति पूर्वापेक्षयाप्येतासां सर्वक्रियाराहित्यमधिकमुक्तम् ॥ १४ ॥

एवमाधिभूतरूपाणां प्रपञ्चविस्मृतिमुक्त्वा आधिदैविकानामपि तथा प्रेरणाभावाय भयं वा प्रपञ्चविस्मृतिं वा जनयन् धनुर्भङ्गार्थं प्रवृत्त इत्याह । ततः पौरान् पृच्छमान इति । सन्ति तत्र दृष्टुमभ्यागता जानपदाः तद्व्यावृत्त्यर्थं पौरा विशेषं जानन्तीति पृच्छमानः कुत्र धनुर्यागो जायत इति । ननु धनुर्यागे कथं गच्छति भयस्थानत्वादित्याशङ्क्याह । अच्युत इति । तैरुक्तमित्युक्तसिद्धत्वाभोक्तम् अथवा लोकानां भ्रमासिद्ध्यर्थमेव प्रश्नः गुप्ततयैव हि सर्वं कर्तव्यमिति । एवं पृच्छमान एव तस्मिन् यागस्थाने प्रविष्टः धनुर्ददर्श प्रायेणेदं धनुः उपास्यदेवतया स्थापितं यावदिदं धनुः स्थास्यति तावन्न तव पराजय इति । अन्यथा भगवान् तद्भङ्गं न कुर्यात् । सोऽपि मरणसंशये तदा यत्नं न कुर्यात् यथा ऐन्द्रं धनुर्विचित्रं भवति तद्वत्तथैवेत्-

दपि ततोऽप्यद्भुतं तदेकविधमेव भवति । इदमनेकविधमिति तत्तस्य प्राणभूतमिति । ॥ १५ ॥

पुरुषैर्बहुभिर्गुप्तं तद्रक्षकाः शस्त्रपाणयः तद्देवताश्च दैत्यहितैषिण्यस्तदाह । बहुभिरिति । किंच तदर्चितं वस्त्रादिभिः अनेन देवतासान्निध्यमुक्तम् । अनुभावमप्याह । परमर्द्धियुक्तमिति । ततो दर्शनार्थं गतो भगवान् अदृश्यः अतः प्रविष्टः सन् तद्धनुर्गृहीतवानित्याह । वार्यमाणो नृभिरिति । सर्वैरेव नृभिः ग्रहणे वार्यमाणः कृष्णः तदर्थमेवावतार्यः प्रसह्य बलात् तान् दूरीकृत्य धनुरादधे पूजास्थानं पद्भ्यामाक्रम्य धनुर्गृहीतवान् । ॥ १६ ॥

———

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

माध्व्या मधुरया वणिक्पथैर्वैश्यैर्वाणिज्यवर्त्मवर्तिभिर्नानाजातिभिरित्यर्थः ॥ १३ ॥

तेषां स्त्रियस्तु परमभक्ताः "चक्षूरागः प्रथमं चित्तासङ्गस्ततोऽथ संकल्पः । निद्राच्छेदस्तनुता विषयनिवृत्तिस्त्रपानाशः । उन्मादो मूर्च्छा मृतिरित्येताः स्मरदशा दशैव स्युः" इति क्रमोद्भवित्वादपि स्मरदशाः सद्य एव प्रापुरित्याह । तद्दर्शनेति । आत्मानं नाविदन्निति ? का वयं क वर्त्तामहे किं कुर्मह इत्यनुसंधातुमक्षमा इति त्रपानाशपर्यन्ता दशा उक्ताः विस्रस्तेति वाससां वलयानां च विस्रंसः स्मरवेगजनितकार्श्यातिशयात् कवरविस्रंसस्तु महाकम्पगात्रमोटनभूतललोटनाद्यभिमर्दात् एष एव उन्मादोऽष्टमः ततश्च लेख्याश्चित्रन्यस्ता मूर्तयो यासां ताः इति मूर्च्छा नवमी दशमी त्वमङ्गलत्वात् प्रेमवतीनां प्रायो न भवतीति प्राञ्चः ॥ १४ ॥ १५ ॥

प्रसह्य बलात् ॥ १६ ॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

वणिक्पथैः वाणिग्भिः ॥ १३ ॥

तस्य भगवतः दर्शनेन यः स्मरक्षोभस्तस्मात् । कुड्यादौ लिखिता इव मूर्तयो यासां ताः आत्मानं नाविदन् कुतो लोकमिति भावः ॥ १४ ॥

तस्मिन् पौरैः सूचिते धनुषः स्थाने ॥ १५ ॥

नृभिस्तद्रक्षिभिः वार्यमाणोऽपि प्रसह्य आददे गृहीतवान् ॥ १६ ॥

———

भाषा टीका ।

ऐसे मधुर वचन से उसको विदा करके मार्ग में जाते समय में पुरवासि वैश्य जनों ने भेट तांबूल माला चंदनादि द्वारा भगवान् पूजित भये ॥ १३ ॥

उन भगवान् के दर्शन करने से कंदर्प के क्षोभ होने से उहां की सब स्त्रियों ने अपने होसको छोड दिया उनके वस्त्र केशबंध वलय अन्यथा होगये लिखे चित्र सी खडी रह गई ॥ १४ ॥

करेण वामेन सलीलमुद्धृतं सज्जं च कृत्वा निमिषेण पश्यताम् ।
नृणां विकृष्य प्रबभञ्ज मध्यतो यथेक्षुदण्डं मदकर्युरुक्रमः ॥१७॥
धनुषो भज्यमानस्य शब्दः खं रोदसी दिशः ।
पूरयामास यं श्रुत्वा कंसस्त्रासमुपागमत् ॥ १८ ॥
तद्रक्षिणः सानुचराः कुपिता आततायिनः ।
ग्रहीतुकामा आवव्रुर्गृह्यतां बध्यतामिति ॥ १९ ॥
अथ तान् दुरभिप्रायान् विलोक्य बलकेशवौ ।
क्रुद्धौ धन्वन आदाय शकले तांश्च जघ्नतुः ॥ २० ॥

भाष टीका ।

तिसके पीछे पुरवासियों से उत्तम धनुष के स्थान को पूछते हुये भगवान् उहां पँहुचे तब उस स्थान मे इंद्र धनुष सरीके बड़े अद्भुत धनुष को देखा ॥ १५ ॥

वह धनुष बहुत से रक्षकों से रक्षित पूजित है बड़ी संपत्ति से युक्त है तब उसके पास जाते समय रक्षक पुरुषों ने निषेध किया तो भी श्रीकृष्ण भगवान् जबरदस्ती से जाकर धनुष को उठा लेते भये ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका

निमिषेणातिशीघ्रम् मदकरी मत्तहस्ती ॥ १७—१८ ॥

गृह्यतां बध्यतामिति वदन्तो जिघृक्षव आवृतवन्तः ॥ १९ ॥

न केवलं क्रुद्धौ किन्तु भग्नस्य धनुषः शकले गृहीत्वा जघ्नतुश्चेति ॥ २० ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

सलीलं सावहेलं चकारादस्य सर्वैरप्यन्वयः । तथा निमिषेणेत्यस्यापि उद्धृतमुत्थापितं पश्यतां नृणां तत्र रक्षिणां कुञ्जानामन्येषाञ्चासम्भवं मल्लानामिति ज्ञेयम् अनादरे षष्ठी । अकारप्रश्लेषेणानिमिषेण निर्निमिषतया पश्यतामिति ॥ १७ ॥

नच तन्मृदुलं मन्तव्यं किन्तु वज्रसारतोऽपि परमतिकठिनमित्याशयेनाह । धनुष इति । प्राक् खमन्तरीक्षं पूरयामास शब्दस्याकाशगतत्वात् ततः रोदसी द्यावाभूमी महत्तरत्वेनोर्ध्वाधोगामित्वात् । ततश्च दिशः सर्वाः । एवं सर्वानपि लोकान् अपूरयदित्यर्थः । कंसो जगद्भीषणोऽपि उप आधिक्येन त्रासं प्राप्तः निर्घातकोटिनिष्ठुरतच्छब्दादेव । विचारतश्च तस्मात् सद्यो मृत्युप्राप्तिमननात् ॥ १८ ॥

सानुचरं श्रीरामादिसहितम् आततायिनः गृहीतायुधाः गृह्यतां राज्ञे समर्पणाय जीवन्नेव भ्रियतां पश्चाद्बध्यतां पाशैर्बध्यतामिति एषा महामदेनावहेलोक्तिः । वाग्देवीमते तु, अस्मद्विधौ गृह्यतां बध्यतामिति ज्ञेयम् ॥ १९ ॥

दुरभिप्रायान् दुष्टभावान् धन्वनो धनुषः तान् विलोक्य क्रुद्धौ जघ्नतुश्चेति वाक्यभेदाच्चातिलस्यापुनरुक्तता ॥ २० ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

आततायिनः जिघांसया शस्त्रपाणयः ॥ १९—२२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

उरुक्रमो भगवान् सलीलं यथा तथा वामेन करेणोद्धृतं धनुः सज्यं समारोपितज्याकं कृत्वा निमेषेणाशु नृणां पश्यतां सतां विकृष्य मध्यतो बभञ्ज भग्नमकरोत् यथा मतङ्गजः इक्षुदण्डं तद्वत् ॥ १७ ॥

तथा भज्यमानस्य धनुषो ध्वनिः खमाकाशं रोदसी द्यावापृथिव्यौ दिशश्च पूरयामास यं शब्दं श्रुत्वा कंसः त्रासं भयं प्राप्तवान् ॥ १८ ॥

तस्य धनुषो रक्षिणः पालकाः सानुचराः आततायिनः जिघांसया गृहीतशस्त्राः जिघृक्षवः गृह्यतां बध्यतामिति ब्रुवाणाः आवव्रुः आवृतवन्तः ॥ १६ ॥

तानागतान् दुरभिप्रायान् जिघांसूनवलोक्य रामकृष्णौ धनुषः शकले आदाय ताभ्यां तान् जघ्नतुः ॥ २० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

ज्यया मौर्व्या सहितं सज्यं निमिषपरिमितेन कालेन अनिमिषेण निमेषणरहितेन वा स्तिमितपक्ष्मणा नेत्रेणेत्यर्थः । मदकरी नित्यमदजलस्रावी गजः मदयुक्तो गजो वा ॥ १७ ॥

रोदसी द्यावापृथिव्यौ ॥ १८ ॥

आततायिनः आयुधान्यातत्य विस्तृत्यागच्छन्तः ॥ १९ ॥

धनुषः द्वे शकले खण्डे आदाय ॥ २० ॥

बलं च कंसप्रहितं हत्वा शालामुखात्ततः ।
निष्क्रम्य चेरतुर्हृष्टौ निरीक्ष्य पुरसम्पदः ॥ २१ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

ग्रहणे प्रकारं वदन् भङ्गमाह । करेणेति । धनुर्हि वामकरे एव स्थाप्यते दक्षिणेनापि गृहीत्वा अवहेलया । दैत्यांशत्वाच्च वामेनैव ग्रहणं महतोऽपि ग्रहणं लीलयेति । तेषां युद्धार्थं प्रवृत्त्यभावाय । एवमपि पश्यन् यदि युद्धार्थं प्रवर्तेत तदा भगवतो न कोऽपि दोष इति ज्ञापयितुं सलीलमुद्धृतं सज्जं च कृत्वा निमिषेण निमेष—मात्रेण स्थित्वैव प्रत्यञ्चाभङ्गभयाभावात् अग्रे नामितवान् । तथा करणमल्पेनापि कालेन भवति । अनिमिषेण वा पश्यतां सतां ततो मध्ये धृत्वा विकृष्य प्रबभञ्ज मध्य एव । यथा योजितं न भवति दृढमुष्टिं बद्ध्वा गाढमाकृष्य पश्चान्मुष्टिमध्यशैथिल्ये धनुषो भङ्गो भवति । अतस्तथा विकृष्य मध्यतः प्रबभञ्ज प्रकर्षेण भङ्गः नावयवशः किंतु खण्डद्वयप्रकारेण आयासाभावाय दृष्टान्तमाह । यथेक्षुदण्डमिति । दण्डपदेन शुष्कताप्युक्ता । मदयुक्तश्च करी जानात्यपि न । ननु दृष्टान्तमात्रेण न साध्यं सिध्यति किंतु दार्ष्टान्तिकयुक्तेन तत्कथं बालेन धनुषो भङ्गोऽनायासेनेतिचेत् तत्राह । उरुक्रम इति । ॥ १७ ॥

तर्हि दैवगत्यैव तद्भग्नं भविष्यतीत्याशङ्क्य भङ्गस्य शब्दमाह । धनुषो भज्यमानस्येति । शिथिलभङ्गे महान् उत्तिष्ठति । ननु स शब्दः अल्पहेतुक एव तदानीं जातो भविष्यतीति तत्परिहारार्थमाह । भज्यमानस्येति । वर्तमानप्रयोगेण ततः शब्दोत्पत्तिरुक्ता । तेन सर्व एव स्वाश्रयः पूरित इति वक्तुं खं ब्रह्माण्डमध्यं रोदसी द्यावापृथिव्यौ चतस्रो दिशश्च पूरयामास । धनुर्भङ्गशब्द एव सर्वत्र श्रूयते नान्यशब्द इति । एतदल्पकालेनैव कृतमिति तेषां निवारणसामर्थ्यं न वृत्तं पश्चात् शब्देनैव कियत्कालं व्यापृताः । अतो धनुर्भङ्गः निष्प्रत्यूहो जातः । अस्य च प्रयोजनं कंसभयजननमिति तज्जातमित्याह । यं नादं श्रुत्वा कंसस्त्रासं महाभयमुपागमत् निकट एव फलं प्राप्स्यामीति संत्रस्तो जातः ॥ १८ ॥

उभयतः प्रतीकारार्थं प्रवृत्तानां निराकरणमाह । तद्रक्षिण इति त्रिभिः । प्रथमं धनुःस्थान एव धनूरक्षकाः स्थिताः ते भगवन्तं बलभद्रं गोपांश्च ग्रहीतुकामाः कुपिताः सन्तः अन्यायः कृत इति मूर्खाः आततायिनः शस्त्रपाणयो जाताः ततः आवव्रुः वेष्टितवन्तः तेषां मानसङ्कायिकं च व्यापारमुक्त्वा वाचानिकमाह । गृह्यतां बध्यतामिति । ये गृहीतास्तेषां बन्धनमादिशन्ति ॥ १९ ॥

ततो भगवन्तौ तेषामतिक्रमं ज्ञात्वा नैतावतापि त्यक्ष्यन्तीति तेषां दुष्टमभिप्रायं ज्ञात्वा भिन्नप्रक्रमेण लीलां परित्यज्य आविष्कृतपौरुषौ गोपानां रक्षार्थं कंसं च ज्ञापयितुं प्रवृत्तावित्याह । अथ तानिति । बलो बलभद्रः ब्रह्मरुद्रयोरपि सेव्यः ततो महान् केशवः भक्तातिक्रमं ज्ञात्वा क्रुद्धौ जातौ ततः साधनेनैव मारणीया इति तेऽपि शस्त्रपाणय इति यद्वैतावत्कालं पालितवन्तः तदेव तन्मारकं जातमिति ज्ञापयितुं धन्वनः शकले आदाय तान् चकारादन्यानपि दुष्टान् जघ्नतुः आधिदैविकदेवान् वा धन्वन्शब्दोऽपि धनुर्वाचकः धन्वनाग धन्वनाजिजयेमेति प्रयोगात् देशमपि वक्ति धन्वन्निव प्रपा असीति ॥ २० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

नृणां पश्यतां प्रबभञ्जेति हंहो लोकाः श्रुतचरमहिमद्रढिमक्रमेतदेव धनुः पूज्यते युष्माकं राज्ञा इदं तु मत्पाणिस्पर्शमात्रेणैव विदीर्णं घुणजीर्णमेवोपलब्धमिति प्रोवाचेति ज्ञेयम् ॥ १७ ॥ १८ ॥

सानुचरं कृष्णं ग्रहीतुकामाः बध्यतामिति ब्रुवाणा आवव्रुः वाग्देवीमते तु अस्मद्विधो जनो बध्यतामिति ॥ १९ ॥

धन्वनो धनुषः शकले द्वे खण्डे गृहीत्वा ॥ २० ॥ २१ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

निमिषेणाल्पेन कालेन मदकरी मत्तहस्ती इक्षुदण्डमिव सलीलं यथा तथा विकृष्य बभञ्ज द्विधाऽकरोत् ॥ १७ ॥—॥ १८ ॥

आततायिनः शस्त्रपाणयः तस्य धनुषो रक्षिणः गृह्यतां बध्यतामित्येवं जल्पन्तो ग्रहीतुकामाः आवव्रुः आवृतवन्तः ॥ १९ ॥—॥ २० ॥

भाषा टीका ।

उस धनुष को भगवान् ने बडे सहज से बांये हाथ से उठा लिया फिर उसको चढा भी दिया फिर सम्पूर्ण मनुष्यों के देखते ही खेंच करके बडे पराक्रमी भगवान् ने जैसे हस्ती ऊंख के दंडको तोडता है तैसे उस धनुष को मध्य में से तोड दिया ॥ १७ ॥

टूट ते समय में धनुष का जो शब्द है उसने आकाश पाताल तथा सब दिशों को भर दिया जिसको कि सुनकर कंस को बडी त्रास होगई ॥ १८ ॥

उस धनुष के रक्षा करने वाले सब मनुष्य अनुचरों सहित बडे कुपित भये सब शस्त्र धारण करके दौडे और पकडो बांधो कह करके भगवान् को घेर लेते भये ॥ १९ ॥

इसके अनंतर रामकृष्ण दोनों उनको दुष्ट अभिप्रायवाले जानकर क्रोधित भये और उसी धनुके दोनों टुकडों को पकड कर उन सबों को मारते भये ॥ २० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

प्रयतः प्रातर्गन्तव्यमिति शालामुखादेव पुनर्निष्क्रम्य ॥ २१ ॥

तयोस्तदद्भुतं वीर्यं निशाम्य पुरवासिनः ।
तेजः प्रागल्भ्यं रूपं च मेनिरे विबुधोत्तमौ ॥ २२ ॥
तयोर्विचरतोः स्वैरमादित्योऽस्तमुपेयिवान् ।
कृष्णरामौ वृतौ गोपैः पुराच्छकटमीयतुः ॥ २३ ॥
गोप्यो मुकुन्दविगमे विरहातुरा या आशासताशिष ऋता मधुपुर्यभूवन् ।
सम्पश्यतां पुरुषभूषणगात्रलक्ष्मीं हित्वेतरान्नु भजतश्चकमेऽयनं श्रीः ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका

तेजः प्रभावम् प्रागल्भ्यं धृष्टताम् ॥ २२ ॥

शकटं शकटावमोचनस्थानम् ॥ २३ ॥

मुकुन्दस्य विगमे व्रजान्निर्गमनसमये या आशिष आशासत सुखं प्रभाता रजनीयम् अद्य ध्रुवं तत्र दृशो भविष्यत इत्यादि यदुक्तवत्यस्ता ऋताः सत्या बभूवुः पुरुषभूषणस्य श्रीकृष्णस्य गात्रस्य देहस्य लक्ष्मीं शोभां कथम्भूतस्य गात्रस्य नु अहो इतरान्ब्रह्मादीन् हित्वा यदयनमाश्रयं श्रीः कामयामास यां गात्रलक्ष्मीमिति वा ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

कंसेन प्रहितं बलं सैन्यं श्लेषेण कंसस्य सामर्थ्यमिवेति ततस्तस्मादेवेति शालामुखविशेषणं पुरसम्पदो निरीक्ष्य हृष्टा सन्तौ पुनरपि चेरतुः । लीलया पुर्यन्तर्बभ्रमतुः ॥ २१ ॥

एवं दुष्टदमनादिना शिष्टानामानन्दो नितरां जात इत्याह । तयोरिति ॥ तत् तत्रत्यं वीर्यं धनुर्ग्रहणादौ पराक्रमं तेजः सर्वाभिभवनस्वभावः प्रागल्भ्यमकुण्ठत्वं रूपं सौन्दर्यञ्च । तेजआदीनां द्वन्द्वैक्यं विबुधोत्तमौ शिवविष्णू ततोऽप्युत्तमौ श्रीसङ्कर्षणवासुदेवौ वा ॥ २२ ॥

विशेषतो बहुत्र्यतथा चरतोः आदित्योऽस्तमिति तदानीमाविष्कृततत्प्रतापासहनत्वादेवेति भावः ॥ २३ ॥

अथ श्रीगोपीनां पुरजनानाञ्च प्रेमवर्णनमुपसंहरति गोप्य इति । अयमर्थः । मुकुन्दस्य विगमे व्रजं परित्यज्य मथुराप्रस्थाने गोप्यो विरहातुराः सत्यो या आशिषः सुखं प्रभाता रजनीयमाशिषः सत्या बभूवुः पुरयोषितां ध्रुवम् । इति रीत्या पुरयोषितां कामिनीनां यान् अर्थान् आशासत अवश्यप्राप्यत्वेनेष्टवत्यः स्वयमभिप्रेतवत्य इत्यर्थः । आङ् शासु इच्छायां ता आशिषो मधुपुरि मधुपुरे पुरुषभूषणस्य मुकुन्दस्य सम्यक् पश्यतामन्येषामपि जनानामव्यभिचारिण्यो बभूवुः । तदुत्कर्षार्थं तद्गात्रलक्ष्मीमेव विशिनष्टि । हित्वेति । श्रीर्यत्पदाम्बुजरजश्चकमे तुलस्या इत्यादिरीत्या यद्वाञ्छया श्रीरित्यादिरीत्या च भजतः स्वसम्पत्तिकामनया समुपासीनानपि इतरान् हित्वा तन्मयनिजान्तरवैभवमनादृत्य यामेवायनमाश्रयं कामयामास । तदेवं परमयोग्यानां तासां विरहमनभिनन्दन् परमयोग्यत्वादेव पर्यवसानेन तु न स्यादस्यैव विरह इति ध्वनयति । वक्ष्यते च स्वयं भगवता । मय्यावेश्य मनः कृष्णे विमुक्ताशेषवृत्ति यत् । अनुस्मरन्त्यो मां नित्यमचिरान्मामुपैष्यथेति ॥ २४ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

शकटं नन्दादीनां विश्रमस्थानम् ॥ २३ ॥

पुरुषभूषणः भूषणभूतः कृष्णस्तस्य गात्रलक्ष्मीं सम्पश्यतामै आशिषः ऋताः सत्या अभूवन् इत्यर्थः ॥ २४ ... २६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तदा कंसेन प्रेषितं सैन्यं हत्वा ततः शालाद्वारान्निर्गत्य तत्र तत्र पुरसम्पदो निरीक्ष्य हृष्टौ चेरतुः ॥ २१ ॥

तयोस्तत्कृष्णयोस्तद्धनुर्भञ्जनाद्यात्मकं कर्म निशाम्य दृष्ट्वा श्रुत्वा च तेजः पराभिभवनसामर्थ्यं प्रागल्भ्यं धृष्टतारूपञ्च तेषां समाहारस्तेनातितरसाधारणेन तौ देवोत्तमौ मेनिरेऽमन्यन्त ॥ २२

स्वैरं यथा तथा तयोर्विचरतोः सतोः सूर्योऽस्तमाप्तः ततस्तौ गोपैः सह पुरात् शकटं शकटावमोचनस्थानं नन्दादीनां विश्रमस्थानमिति यावत् ईयतुः आजग्मतुः ॥ २३ ॥

मुकुन्दस्य विगमे व्रजान्निर्गमनवेलायां विरहेणातुरा गोप्यः या याः आशिषः आशासत सुखं प्रभाता रजनीयम् अद्य ध्रुवं तत्र दृशो भविष्यत इत्यादिकमुक्तवत्यः ताः सर्वा आशिषो मधुपुर्यां पुरुषभूषणस्य गात्रलक्ष्मीं पश्यतां जनानामृताः सत्या बभूवुः कथम्भूतस्य गात्रस्य भजतः सेवमानानितरान् ब्रह्मादीन् हित्वा श्रीर्महालक्ष्मीर्यद्गात्रमाश्रयं चकमे अचीकमत यामिति पाठे यां गात्रलक्ष्मीमित्यर्थः । यमिति पाठे यं पुरुषभूषणमित्यर्थः ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

शालामुखाद्धनुर्गृहद्वारात् ॥ २१ ॥

वीर्यं पराक्रमं तेजः बलं प्रभावम्वा प्रागल्भ्यं धाष्टर्यंरूपं सौन्दर्यम् एकवद्भावादेकवचनं तेजः प्रागल्भ्ययोरूपं चक्षुर्ग्राह्यमिव स्थितमित्यर्थः ॥ २२ ॥

अस्तम् अस्तगिरिं शकटमुपशल्यं स्वावस्थानम् ॥ २३ ॥ ० ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

एवं रक्षकान् देवान् नरांश्च हत्वा गमनार्थमुद्युक्तौ तावता कोलाहले जाते कंसो बलं च प्रेषितवान् एकहेलया तं च हत्वा निर्गतावित्याह । बलञ्चेति । हस्त्यश्वरथपदात्यात्मकं बलं सेनां हत्वा शालामुखान्निष्क्रम्य युद्धावेशं परित्यज्य क्षणान्मनोहररूपावेव जातौ अतः हृष्टौ सन्तौ पुरसंपदो निरीक्ष्य चेरतुः यथैताभ्यां धनुर्वार्त्तापि न ज्ञायत इति लोकप्रतीतिर्भवति तत्र पूर्ववदेव स्त्रीणां पुरुषाणां च व्यवहारो जात इति न विशेष उक्तः एवं तयोर्महत्यानन्दे आग्रेमानन्दासिध्यर्थं तयोर्विचरतोरेव सतोः सूर्योऽस्तं गत इत्याह । स्वैरं यथासुखम् अनेनामर्यादापि लीला निरूपिता ये दैत्यांशाः ते मारिताः लुण्ठिताश्च कंसाहितैषिणः स्त्रियश्चात्यन्तकामपीडिताः सन्तोषं प्रापिताः एवमनुग्रह—निग्रहात्मकं तु कुर्वाणौ विचेरतुरिति ॥ २१ ॥

तदा आदित्योऽस्तं गतः भीत इति केचित् भगवानपि निवृत्त इत्याह । कृष्णरामाविति । अत्र मध्ये क्वचिदेकः श्लोकः अविगीत एव श्रूयते यदा बलं हत्वा निर्गतौ तदा लोकानां भगवदासक्त्यर्थं माहात्म्यज्ञानमपि वृत्तमित्याह । तयोस्तदद्भुतं वीर्यमिति । तदनुभङ्गलक्षणं पराक्रमं यत्रैव भगवन्तं पश्यन्ति तत्रैव पृष्ठतः प्रवृत्ता लोकाः एताभ्यां धनुर्भङ्गादिकं कृतमिति सर्वत्रैवाहुः ततो निशम्य सर्वे एव पुरवासिनः तयोः तेजः शरीरकान्तिः प्रागल्भ्यं प्रागल्भतारूपं च कोटिकन्दर्पलावण्यं रूपं च दृष्ट्वा श्रुत्वा च तौ विबुधोत्तमौ मेनिरे यथा नन्दादयः प्रथमप्रकरणे गोपवृद्धाश्च गोप्यश्चेत्यत्र तामसास्तृतीये तज्ज्ञातवन्तः राजसास्तु द्वितीये ज्ञातुं युक्ताः प्रथमे निरूप्यन्त इति विगीतमित्यपि केचित् गोकुलचरित्रमपि श्रुतमित्यर्थादेतदपि द्वितीये द्वितीये च वक्ष्यति मन्ये कृष्णं च रामं चेति स्वापेक्षया देवा उत्तमाः तेभ्योऽप्येतावुत्तमाविति ब्रह्माण्डे सर्वोत्तमत्वमुक्तं भवति गोपैः सहितौ कृष्णरामौ पुरदर्शनं परित्यज्य शकटं शकटस्थानं यत्र नन्दादयास्तिष्ठन्ति तदीयतुः ॥ २२ ॥ २३ ॥

एवं भगवच्चरित्रमुक्त्वा प्रमाणप्रकरणत्वात् तत्र प्रमाणमतिदिशन् माहात्म्यमाह । गोप्य इति । मथुरायां तावदेव जातं यावद्गोपीभिरुक्तं युद्धादिकं तु दोषानिवर्त्तकमिति न तन्निष्पन्नत्वेनोच्यते अनेन गोपिकाः परित्यज्य तासु क्लिष्टासु कथमन्यत् कृतवान् इत्यपि दूषणं निराकृतं यतस्ता एव याः आशिष आशासत ता एव सत्याः कर्त्तव्या इति भगवांस्तथा कृतवान् तासामेव वचनप्रमाणार्थं यतो भगवान् मुकुन्दः असत्यवचने मोक्षोऽपि दातुमशक्य इति तत्रापि मुकुन्दस्य विगमे वियोगे उपस्थिते विरहातुराः सत्यः भगवता निरुद्धा इति द्वेषादिकमकृत्वा आशिष एवाशासत ताभ्यो हितमपि कर्त्तव्यं तदभावे वाक्यं वा कर्त्तव्यमिति अतस्ता एवाशिषः मधुपुरि मथुरायां सत्या जाताः तदपि भगवता कर्त्तव्यमिति न कृतं किन्तु अनुषङ्गादेव जातमित्याह । सम्पश्यतामिति । पुरुषाणां भूषणरूपस्य मुकुटमणेर्भगवतः गात्रलक्ष्मीं सम्पश्यतामिति । ननु कथं स्त्रीणामेवं वचनं सत्यत्वेन निरूप्यते नान्येषामित्याशङ्क्याह । हित्वेति । आदौ वाक् स्त्री स्त्रीणां मूलभूतया लक्ष्म्या च भगवान् परिगृहीतः अतः परिग्रहदार्ढ्यात् ता एवात्र प्रमाणं श्रीरितरान् ब्रह्मादीन् नु निश्चयेन भजतोऽपि सेवार्थमागतानपि हित्वा स्वस्यायनं स्थानभूतं चकमे अयमेव मम स्थानं भवत्विति सैव सर्वा गोप्यः तासां स्ववाक्यमत्र सिद्धं नत्वातिरिक्तं किंचित् ॥ २४ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

वीर्य्यं बलं तेजः प्रभावः विबुधोत्तमौ विष्णुरुद्रौ वासुदेवसंकर्षणौ वा ॥ २२ ॥

शकटं शकटावमोचनाभिधं मथुराप्रान्तस्थं नन्दावासम् ॥ २३ ॥

व्रजसुन्दरीभावभावितत्वादकस्मात्तद्विरहस्मृतिजनितविषादो— मुनीन्द्रः परीक्षितं पूर्वकथां स्मारयति । गोप्य इति । मुकुन्दस्य विगमे व्रजान्निर्गमनसमये या आशिषः भविष्यन्तीः सुखसम्पत्तीः आसासत अस्माकमाशिषोऽद्य पुरस्त्र्यः प्राप्स्यन्तीत्यभाषन्त सुखं प्रभाता रजनीयमिति अद्य ध्रुवं तत्र दृशो भविष्यत इत्यादिकास्ता मधुपुर्य्यां कृष्णगात्रशोभां पश्यताम् ऋताः सत्या यथार्था एवाभूवन् कथं तादृशीनां विळापोक्तिरप्यन्यथा भवेदिति भावः । श्रीस्त्रैलोक्यवर्तिन्यपि शोभा सर्वशोभाधिष्ठात्री देवता इतरान् भजतः स्वं कामयमानानपि पुंसस्त्यक्त्वा यां गात्रशोभां चकमे भूषणभूषणाङ्गमितिवत् स्वं शोभयितुमिति भावः । गात्रलक्ष्मीं विशिनष्टि । अयनं प्राकृताप्राकृतसर्वशोभानामाश्रयणीयमित्यर्थः ॥ २४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

पुरसंपदो निरीक्ष्य चेरतुः ॥ २१ ॥

तेजः पराभिभवनसामर्थ्यं प्रागल्भ्यं धृष्टत्वम् ॥ २२ ॥

शकटं शकटावमोचनस्थानम् ईयतुः आजग्मतुः ॥ २३ ॥

गोप्यः मुकुन्दस्य विगमे व्रजान्निर्गमने सुखं प्रभाता रजनीयमाशिषः सत्या बभूवुः । अद्य ध्रुवं तत्र दृशो भाजिष्यते इत्यादि या आशिषः आशासत उक्तवत्यः ताः सर्वाः पुरुषभूषणगात्रस्य श्रीकृष्णगात्रस्य लक्ष्मीं पश्यताम् ऋताः सत्याः बभूवुः उ अहो श्रीः भजतो ब्रह्मादीन् हित्वा यद्गात्रमयनमाश्रयं चकमे कामयामास ॥ २४ ॥

भाषा टीका ।

फिर कंस की भेजी हुई वडी सेना को भी मारकर उहां से शाला के दरवाजे से वाहर निकलकर नगर की संपत्ति को देखकर वडे हर्ष से दोनों भाई विचरते भये ॥ २१ ॥

उन दोनों रामकृष्ण के उस चरित्र वीर्य को देखकर तथा तेज की ढिठाई को रूप को देखकर सब पुरवासी उनको कोई उत्तम देवता मानते भये ॥ २२ ॥

उन दोनों के इस प्रकार से निर्भय होकर विचरते संते सूर्यनारायण अस्त होगये तब रामकृष्ण दोनों गोपों के साथ मिलकर नगर से वाहर शकटस्थान में चले गये ॥ २३ ॥

ब्रज से भगवान् के चलते समय में मथुरा वासियों के जिन भाग्यों को गोपियों ने इच्छा किया रहा वह सब आज

अवनिक्ताङ्घ्रियुगलौ भुक्त्वा क्षीरोपसेचनम्।
ऊषतुस्तां सुखं रात्रिं ज्ञात्वा कंसचिकीर्षितम् ॥ २५ ॥
कंसस्तु धनुषो भङ्गं रक्षिणां स्वबलस्य च।
वधं निशम्य गोविन्दरामविक्रीडितं परम् ॥ २६ ॥
दीर्घप्रजागरो भीतो दुर्निमित्तानि दुर्मतिः।
बहून्यचष्टोभयथा मृत्योर्दौत्यकराणि च ॥ २७ ॥
अदर्शनं स्वशिरसः प्रतिरूपे च सत्यपि।
असत्यपि द्वितीये च द्वैरूप्यं ज्योतिषां तथा ॥ २८ ॥

भाषा टीका।

पुरुषों के भूषण भगवान् जिनको कि अपने भजने वाले सव देवतों को छोड़कर लक्ष्मी भजन करती है उन भगवान् के शरीर की शोभा देखने वालों के सव मनोरथ सफल होगये ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

अवनिक्तं क्षालितमङ्घ्रियुगलं ययोस्तौ क्षीरमिश्रमन्नं भुक्त्वा सुखं न्यवसताम् ॥२५॥

परं केवलं गोविन्दरामयोर्विक्रीडितं तन्नतु पराक्रमः कश्चित् ॥२६॥

उभयथा स्वप्नजागरितभेदेन प्रत्येकं मृत्योर्दौत्यकराणि च तथाच मन्त्रः "इत्था दुलूकश्चापप्तन् हिरण्याक्षो अयोमुखः। रक्षसां दूत आगत" इत्यादिः तथा "यदेतद्भूतान्यन्वाविश्य दैवीं वाचं वदसि" इत्यादिश्च ॥ २७॥

तानि दर्शयति। श्लोकत्रयेण जलादौ प्रतिरूपे दृश्यमानेऽपि शिरसस्तत्रादर्शनम् असत्यपि द्वितीये चक्षुषोऽन्तर्धानेऽङ्गुल्यादौ ज्योतिषां चन्द्रादीनां द्वित्वम् ॥ २८ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी।

अवनिक्त इति तैर्व्याख्यातं तत्र ययोरिति षष्ठ्या तत्तदङ्गसेवककर्तृकत्वं बोध्यते। क्षीरमिश्रमिति श्रीव्रजेश्वर्या सायमशनार्थं शकटस्थापिताग्निधानीस्थितभाण्डवृन्दनिक्षिप्तमिति ज्ञेयं क्षीरेणोपसिच्यते इति कर्मणि ल्युट्विधानात्। कंसस्य चिकीर्षितं प्रातर्मञ्चारूढमहाजनसमागममध्ये रङ्गभूमौ मल्लयुद्धादिविधापनेच्छां ज्ञात्वा लोकमुखात् श्रुत्वा सुखं तद्वधार्थमायासं विना स्वस्थं यथा स्यात्तथा। यत् खल्वत्र रजकादिकं हत्वा पादावनेजनमात्रं कृत्वा नतु स्नात्वा भुक्तं तत्रेदं मन्यामहे पापिनां वधः खलु परमधर्म एव तथा "प्रत्यङ्गुलन्तु तीर्थानि प्रतिहन्तं सुरालया" इति मथुरामाहात्म्ये वचनादरः कर्त्तव्य एव ततस्तदनन्तरं स्नानं युक्तमिति ॥ २५ ॥

कंसस्त्विति युग्मकम्। कंसस्तु धनुर्भङ्गादिकं निशम्य तञ्च परं केवलं रामकृष्णयोर्विचित्रक्रीडारूपं नतु युद्धरूपं निशम्य भीतो दुर्निमित्तान्यचष्ट ॥ २६ ॥

दुर्मतिस्तदानीमपि श्रीभगवद्भागवतद्रोहानिवृत्तेः। अयं सर्वत्रैव हेतुः। बहूनि राज्यभङ्गादिहेतूनि तावद्ददर्श। तथा मृत्योर्दौत्यमिव कुर्वन्तीति तत्कर्माणि तत्सूचकानि च ददर्शेत्यर्थः ॥२७॥

अदर्शनमिति त्रिकम्। द्वितीयेति तैर्व्याख्यातम्। तत्र चक्षुषः अन्तर्धानं तद्धेतुर्यदङ्गुल्यादि तस्मिन्नसत्यपीत्यर्थः। आदिग्रहणात् तत्र मुख्यत्वेन मृत्युसूचकानि जागरदुर्निमित्तानि विशेषाद्दर्शयति काचकामलादयः। द्वैरूप्यं द्वित्वभानं चकारद्वयमदर्शनदर्शनयोर्द्वयोरपि प्राधान्यबोधनार्थम्। एवं तथेत्यस्य परेणान्वयः ॥२८॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

अवनिक्तं क्षालितमङ्घ्रियुग्मं ययोस्तौ क्षीरमुपसेचनं यस्य तदन्नं क्षीरमिश्रान्नमित्यर्थः। भुक्त्वा परेद्युः कंसचिकीर्षितं ज्ञात्वा तौ च सुखं यथा तथा तां रात्रिमूषतुः उषितवन्तौ ॥ २५ ॥

कंसस्तु रामकृष्णयोः केवलं क्रीडारूपं धनुर्भङ्गं तद्रक्षिणां स्वबलस्य च वधं निशम्याकर्ण्य भीतो दीर्घप्रजागरः अलब्धनिद्रः दुःखितो बहूनि उभयथा स्वप्नजागरितभेदेन स्वाप्नानि जागरितानि च मृत्योर्दौत्यकराणि दुष्टानि निमित्तानि अचष्ट ददर्श ॥ २६ ॥ २७॥

तान्येव कानि चिदाह त्रिभिः। तावज्जागरितानि तान्याह। अदर्शनमिति द्वाभ्याम्। वियज्जलादौ प्रतिरूपे दृश्यमाने सति स्वशिरसस्तत्रादर्शनम् असत्यपि द्वितीये ज्योतिषां चन्द्रादीनां द्वित्वम् ॥ २८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

क्षीरोपसेचनं क्षीरोपसेचकभूयिष्ठमन्नम् ॥ २५ ॥

धनूरक्षिणां वधं प्रेषितस्वबलस्य वधश्च किङ्कृतमिति तत्राह। गोविन्देति। गोविन्दरामाभ्यां विक्रीडितम् ॥ २६ ॥

दीर्घः प्रजागरः निद्राराहित्यं यस्य स तथा अचष्ट अपश्यत् उभयथा दैहिकानि बाह्यानि च यद्वा जाग्रति स्वप्ने च दौत्यकराणि सूचकानि ॥ २७ ॥

तान्येव व्यनक्ति। अदर्शनमित्यादिना। प्रतिरूपेषु छायालक्षणेषु

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

सत्स्वपि स्वशिरसोऽदर्शनं द्वितीये चन्द्रादावसति अविद्यमानेऽपि ज्योतिषां चन्द्रादीनां द्वैरूप्यं द्विमूर्तित्वं द्वौ चन्द्रावित्यादि बहुवचनेन दीपादयो ग्राह्याः द्विशिखात्वमित्यादिना ॥ २८ ॥

———

श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी।

अवमोचनं गतस्य भगवतश्चरित्रमाह । अवनिक्तमङ्घ्रियुगलं याभ्यां क्षीरमुपसिच्यते अस्मिन्निति क्षीरोपसेचनं पायसं वा पृथुका वा पक्वान्नविशेषो वा क्षीरस्योपसेचनं यथा भवति तथा वा प्रथमतो नगरगमने क्षीरोदनभोजनं मुख्यमिति यथा गमने दध्योदनभोजनं लघुपाकार्थं वेति केचित् अतस्तां रात्रिं सुखमूषतुः अन्यत्रासुखं वक्तुं भगवति विद्यमानसुखस्यानुवाद उक्तः ननु पितरौ बद्धौ अमोचयित्वा कथं सुखमूषतुस्तत्राह । ज्ञात्वा कंसचिकीर्षितमिति । कंसस्य चिकीर्षितं ज्ञात्वा कंस एव तत् करिष्यति किमित्यस्माभिः क्लिष्टं कर्त्तव्यमिति यथैतावान् कालः वसुदेवपुत्रत्वं सङ्गोप्य नीत एवमियमपि रात्रिः सङ्गोप्या अन्यथा नन्दादीनां क्लेशो भवेत् व्यवहारेऽपि शत्रु हत्वैव परिगृहीतं ग्राह्यम् अन्यथा चौर्यं स्यात् अतः स्ववधार्थं कंस एव यत्नं करिष्यतीति निश्चित्य सुखमूषतुः ॥ २५ ॥

एवं भगवच्चरित्रमुक्त्वा अग्रिमं चरित्रसिध्यर्थं कंसवृत्तान्तमाह । कंसस्त्विति । कंसस्य रात्रौ महती अनिर्वृत्तिर्जाता आदौ निद्राभावः निद्रायामपि दुःस्वप्नादिकमिति एवं मरणं निश्चयात्कमपि ज्ञात्वा पुनर्मरणार्थमेव प्रवृत्त इति भगवतोऽक्लिष्टकर्मत्वार्थमिदमुपाख्यानमुक्तवान् । आदौ निद्राभावे हेतुमाह । तुशब्दः सुखात्मकतां व्यावर्त्तयति । अग्रे कंसस्य दुःखमेवेति ज्ञापयितुं धन्वनो धनुषो भङ्गं श्रुत्वा रक्षिणां स्वबलस्य च वधं श्रुत्वा एतदपि गोविन्दस्य रामस्य च विक्रीडितत्वमात्रं श्रुत्वा दीर्घप्रजागरो जातः प्रकृष्टो जागरः बहिर्विक्षेपसहितः परमुत्कृष्टं विक्रीडितं परमित्यर्थः । विषये वा न केवलं प्रजागरणमात्रं किं तु भीतोऽपि जातः । अन्तःकरणमेव तस्यादौ मरणं सूचयति । एवमपि न भगवन्तं प्रपद्यत इति । दुर्मतित्वात् दुर्निमित्तानि दुष्टनिमित्तानि अवश्यं भाविमरणसूचकानि बहून्येव व्यचष्ट अनेन द्वेषेणापि भगवन्तं चिन्तयन् कथं दुर्निमित्तानि दृष्टवानिति परिहृतं यतो दुर्मतिः भगवत्यनिष्टं भावयति तच्चात्मन्येव फलतीति बहूनि बहुविधानि प्रकारबहुत्वमत्र विवक्षितम् उभयथा यो मृत्युः स्वस्वकीयविषयः ऐहिकपारलौकिकविषयो वा परलोकोऽपि न भविष्यतीति भयोत्पादनार्थं तथा दृष्टानि उभयथा स्वप्नजागरितानीति वा नन्वेतानि किमिति दृश्यन्ते तत्राह । मृत्योर्दौत्यकराणीति । मृत्युरत्रायास्यतीति दूतवदवबोधयन्ति चकारात् स्वतोऽपि भयानकानि ॥ २६ ॥ २७ ॥

जागरितान्याह । अदर्शनमिति सप्तविधानि । मृत्युरपि भगवानिति । प्रतिबिम्बे दर्पणादौ स्वशिरसः अदर्शनं ग्रीवापर्यन्तमेव प्रतिरूपं दृश्यते । चकारात्प्रत्यक्षेऽपि नासिकादिमुखाभावो दृश्यते सोऽपि न दृश्यत इति तर्ह्येतस्यैवाभाव इति चेत्तत्राह । सत्यपीति । स्पर्शादिना बहिर्ज्ञायते अन्यश्च प्रतिबिम्बो दृश्यत इति । चक्षुर्हि ज्ञानात्मकं तत् आत्मानमेव गृह्णाति स्वप्रकाशत्वात् विषयदोषसंभवाच्च । तथा सति भगवानेव दृश्यते सर्वत्र यत्र पुनः येनांशेन तिरोधत्ते तत् क्रियया सदपि ज्ञानविषयत्वेन न सद्भवति । तत्र देहे ग्रीवान्तं क्रियाप्रधानं ज्ञानांशेनैव तिरोहितः । न तु सदंशेन अग्रे क्रियायाः कर्त्तव्यत्वात् । अनेन मरणं निर्द्धारितं न तु कृतमिति बोधितम् । द्वितीयमाह । असत्यपि द्वितीये च द्वैरूप्यमिति । भगवानेक एव सर्वत्र यदा प्राणी कालाभिमुखो भवति तदा द्वितीयः कालो भासते । तदत्र सूचयति द्वितीयः समागत इति । तृतीयमाह । ज्योतिषां तथेति । ज्योतिषामपि द्वैरूप्यं दृश्यते दीपचन्द्रनक्षत्रादीनामेकस्मिन् दीपे अक्षिनिकोचनादिव्यतिरेकेणापि दीपद्वयप्रतीतिः ज्योतिर्ह्याधिदैविकं रक्षकं तदपि कालव्याप्तं जातमिति ज्ञापितम् ॥ २८ ॥

———

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

अवनिक्तं दासैः क्षालितमङ्घ्रियुगलं ययोस्तौ क्षीरोपसेचनं क्षीरेण व्रजस्थकृष्णप्रियवयस्कयणीदुग्धेन शकटोपरिस्थाग्निधान्यां व्रजेश्वर्य्यैवार्पितभाण्डस्थेन उपासिच्यमानमोदनं भुक्त्वा कंसस्य चिकीर्षितं परेद्यवि स्वहिंसनव्यवसायं ज्ञात्वापि सुखस्वापाधिक्येन ऊषतुः भोः पुत्रौ अद्य किं कृतं मुग्धाभ्यां युवाभ्यां हन्त हन्त कथमर्चितं धनुर्भग्नं कथं वा तद्रक्षिणो हताः न जाने क्रुध्यन् कंसः श्वः किं करिष्यति हा हा कथं मया गोष्ठात् युवामानीतावित्यादिभीतस्य सर्वां रात्रिमनिद्राणस्य पितुर्नन्दस्य वाक्यं स्वापाधिक्यादेव तौ न श्रुतवन्ताविति ज्ञेयम् ॥ २५ ॥

तं च वधं केवलं रामकृष्णयोर्विक्रीडितं न तु पराक्रमं निशम्य ॥ २६ ॥

उभयथा स्वप्नजागरप्रकारेण मृत्योर्दौत्यमिव कुर्वन्तीति तानि ॥ २७ ॥

तानि दर्शयति त्रिभिर्दर्पणादौ प्रतिरूपे दृश्यमानेऽपि स्वशिरसस्तत्रादर्शनं द्वितीये द्वैरूप्यहेतुभूते चक्षुरन्तर्धानकारियवकुल्यादौ असत्यपि ज्योतिषां चन्द्रादीनां द्वित्वम् ॥ २८ ॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

अवनिक्ताङ्घ्रियुगलौ क्षालिताङ्घ्रियुगलौ क्षीरोपसेचनं दुग्धमिश्रमन्नम् ॥ २५ ॥

कंसस्तु धनुर्भङ्गादिकं गोविन्दरामयोः परं केवलं विक्रीडितं निशम्याकर्ण्य भीतः दीर्घप्रजागरः । अलब्धनिद्रः उभयथा स्वप्नजागरितभेदेन मृत्योर्दौत्यकराणि दुर्निमित्तानि अचष्ट ददर्श ॥ २६ ॥ २७ ॥

तान्येव दर्शयति । अदर्शनमिति त्रिभिः । प्रतिरूपे जलादौ सत्यपि तस्मिन् स्वशिरसोऽदर्शनम् द्वितीये असत्यपि ज्योतिषां चन्द्रादीनां द्वैरूप्यम् ॥ २८ ॥

———

छिद्रप्रतीतिश्छायायां प्राणघोषानुपश्रुतिः ।
स्वर्णप्रतीतिर्वृक्षेषु स्वपदानामदर्शनम् ॥ २९ ॥
स्वप्ने प्रेतपरिष्वङ्गः खरयानं विषादनम् ।
यायान्नलदमाल्येकस्तैलाभ्यक्तो दिगम्बरः ॥ ३० ॥
अन्यानि चेत्थम्भूतानि स्वप्नजागरितानि च ।
पश्यन्मरणसंत्रस्तो निद्रां लेभे न चिन्तया ॥ ३१ ॥
व्युष्टायां निशि कौरव्य ! सूर्ये चाद्भ्यः समुत्थिते ।
कारयामास वै कंसो मल्लक्रीडामहोत्सवम् ॥ ३२ ॥

भाषा टीका ।

फिर भगवान् वासस्थान मे जाकर ठहरे तव उनके दोनों के चरण प्रक्षालनादिक भये फिर सुन्दर दुग्ध के साथ भगवान् ने भोजनादि किये फिर कंस के कर्तव्य को जान कर सुख से उस रात्री मे उहां निवास किया ॥ २५ ॥

उहां कंस ने धनुष का टूटना तथा रक्षक जनों का और अपने भेजे फौज का भगवान् से वध होना इन को केवळ भगवान् की पराक्रम क्रीडा मात्र सुना ॥ २६ ॥

फिर उस दुर्मति कंस को डर होने से रात भर नींद नहीं आई वडे असगुन देख पडे दोनों प्रकार के जो कि मानो मृत्यु के दूत हैं ॥ २७ ॥

जैसे कि अपने शिर के पास मे रहते ही दर्पणादिकों मे मस्तक का नहीं दीखना दूसरा नहीं है तौ भी चन्द्र सूर्य दो दीखने ॥ २८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

छायायां प्रतिबिम्बे छिद्रप्रतीतिः पिहितकर्णपुटस्य योऽन्तः श्रूयमाणो ध्वनिः स प्राणघोषस्तस्याश्रवणम् वृक्षेषु स्वर्णवर्णप्रतीतिः रजःकर्दमादिषु स्वपदानामदर्शनम् एतानि जागरितानि दुर्निमित्तानि ॥ २९ ॥

स्वाप्नान्याह । स्वप्न इति । प्रेतैर्मृतैः परिष्वङ्गः खरमारुह्य यानम् विषभक्षणम् नलदमाली जपाकुसुममाली यायादिति यत्तदप्येकं निमित्तमिति ॥ ३० ॥ ३१ ॥

कष्टेन कथञ्चित्प्रभातायां पुनः सूर्येचाद्भ्यः समुत्थित इति तथा च श्रुतिः "अद्भ्यो वा इति य उदगान्महतोऽर्णवात् विभ्राजमानः सलिलस्य मध्यात् समा वृषभो लोहिताक्षः सूर्यो विपश्चिन् मनसा पुनातु" इति च ॥ ३२ ॥ ३३ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

स्वच्छायायां छिद्रप्रतीतिः सच्छिद्रतादर्शनमित्यर्थः टीकायां जागरितानीति संजातो जागरो येषु तानि जागरसम्बन्धीनीत्यर्थः ॥ २९ ॥

दीर्घप्रजागरत्वेऽपि कदाचिच्चिन्तयैव तन्द्रा स्यादिति स्वप्न इत्युक्तम् ॥ ३० ॥

स्वप्नजागरितानि तत्तत्सम्बन्धीनि ॥ ३१ ॥

व्युष्टायामिति अरुणोदयो विवक्षितः । तर्हि कथमन्धकारांश एव नेत्याह । सूर्ये चेति । समुद्रतीरस्थैः सूर्यो यदा तत एवोत्तिष्ठन्नदृश्यत तदैवात्रत्योदयसन्निधावित्यर्थः । इति त्वरा तदनुरूपकाळता च दर्शिता । मल्लक्रीडात्मकं महोत्सवं कारयामास आरेभ इत्यर्थः । एवमात्मवधोपायः स्वयमेव कृत इति तद्दुर्बुद्ध्याश्चर्येण सम्बोधयति । कौरव्येति ॥ ३२ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

नळदमाली मस्तककृतपद्मकुसुम इत्याहुः ॥ ३० ३५ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

छायायां छिद्रप्रतीतिः रन्ध्रदर्शनं कर्णरन्ध्रयोः पिहितयोः सतोरन्तःश्रूयमाणो यो ध्वनिः स प्राणघोषः तस्याश्रवणं वृक्षेषु स्वर्णवर्णप्रतीतिः रजःकर्दमादिषु स्वपदानामदर्शनमित्येतानि जागरितानि दुर्निमित्तानि ॥ २९ ॥

अथ स्वाप्नान्याह । स्वप्न इति । प्रेतैः मृतैः परिष्वङ्गः आलिङ्गनं खरमारुह्य यानं विषभक्षणं नलदमाली जपाकुसुममाली तैळेनाभ्यक्तः दिगम्बरश्चैकः ॥ ३० ॥

अथानान्यपीत्थं भूतानि स्वप्नानि जागरितानि च दुष्टानि निमित्तानि पश्यन् तत्सूचितमरणादतीव भीतश्चिन्तया निद्रां न ळेभे न प्राप्तवान् ॥ ३१ ॥

हे कौरव्य ! कथञ्चिन्निशि व्युष्टायां प्रभातायां सत्याम् अद्भ्यः सकाशात्सूर्ये समुत्थिते सति "य उदगात् महतोऽर्णवाद्विभ्राजमानः सलिलस्य मध्यात्समा वृषभो ळोहिताक्षः सूर्यो विपश्चिन्मनसा पुनात्विति" श्रौतीं प्रसिद्धिमुपजीव्याद्भ्यः सूर्ये समुत्थित इत्युक्तम् मल्लानां क्रीडैव महानुत्सवः तं यद्वा मल्लानां क्रीडार्थं यस्तेषामुत्सवः मङ्गळस्नानादिरूपस्तं कंसः कारयामास ॥ ३२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

छायायां छिद्रप्रतीतिः सुषिरदर्शनं कर्णे प्रतिष्टब्धे करेण प्राणघोषस्य शरीरवायोः प्रणवमुख्यस्तो मन्द्रध्वनेरनुपश्रुतिरश्च-

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

वर्णं वृक्षेषु स्वर्णच्छायादर्शनं पृथिव्यां स्वपदानां पादलाञ्छनानामदर्शनम् ॥ २९ ॥

प्रेतपरिष्वङ्गः मृतालिङ्गनं स्वप्ने विसादनं पद्मकन्दभक्षणलक्षणं नलदमाली दक्षिणामुखो व्रजयतीति श्रुतिः—

पद्ममाशां शिरः कृत्वा यो गच्छेद्दक्षिणामुखः ।
एवं पश्यन्निशि स्वप्ने तत्क्षणान्मृत्युमेष्यतीति ॥
स्वप्नदर्शन इति यद्वा चक्ररक्तपुष्पं मृणालशून्यम् ।
वर्षासु जायमानं नलदं तत्कृतमालाधारी ॥

अभयं नलदं सेव्यममृणालं जलाशयमित्यमरः ॥ ३० ॥

अन्यानि "वनभूकर्णसप्तानां पञ्चनेत्र विनासिका । एक जिह्वेति पञ्चत्वलक्षणं विबुधाविदु"रित्यादीनि ॥ ३१ ॥

निशि व्युष्टायाम् निवृत्तायाम् अभिसमुत्थिते उदयपर्वतादिति शेषः ॥ ३२ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

अतिदेशेन तत्राप्येकदेशाप्रतीतिरपि चतुर्थमाह । छिद्रप्रतीतिरिति । छायामध्ये छिद्रं प्रतीयत इति पुरुषोऽयं भगवानिति ज्ञापयितुं प्रतिच्छाया भवति पुरुषाकृतिं तं केचित् तेजोऽभावमाहुः सर्वत्र विद्यमानं पुरुषव्यवधानात् तावद्दूरे न दृश्यत इति तथा सच्चिदानन्दोऽपि तिरोहित इति प्रपञ्च एव तत्तदाकारेण भासत इति वस्तुतस्तु छाया पुरुषो भिन्नो भगवद्रूपस्तत्र जीवश्चेन्निष्काशयेत् तदान्यत्रापि निर्गतो भविष्यति जीव इति ज्ञानवत छायापुरुषेऽप्यर्धतिरोधानं जीवांशस्यैव आध्यात्मिकी व्यवस्थैषात्र आधिभौतिकी पूर्वं निरूपिता तत्रेयं तामसी प्राणघोषो राजसः पीतप्रतीतिश्चाक्षुषी सात्त्विकीति प्राणस्य क्रियैव प्रधानमिति तस्याः कार्यं निवर्त्तितम् इतो भगवान् क्रमशो निवृत्तव्यापारो भविष्यतीति ज्ञापनार्थं सामि कार्याणि निरूप्यन्ते प्राणघोषस्य कर्णपिधानेऽपि अनुपश्रुतिः वृक्षेषु सर्वत्र स्वर्णप्रतीतिः वृक्षा हि दारुरूपाः अग्नेश्च रेतः सुवर्णं तेषु यद्याग्निः तदा सर्वात्मभावः अग्नेः रेत एवं तेषु दृष्टमित्यर्द्धनाश एव बोधितः । आधिदैविकमाह । स्वपदानामदर्शनमिति । स्वस्य पदानां भूमौ स्थापितानामदर्शनं भूमिर्द्देवता तं त्यक्तवतीति तत्पदानि भूमौ नाभिव्यक्तानि भवन्ति ॥ २९ ॥

एवं जागरितानि निरूप्य अवस्थान्तरेऽपि दुर्न्निमित्तानि निरूपयति अन्यथा मृतप्रायो व्याधितो वा जीवेत् तान्यपि सप्तविधानि प्रेतस्य परिष्वङ्गः श्मशाने पतितः शवः कंसे गते तदालिङ्गनं करोति तस्य मित्रमयमपि भविष्यतीति । प्रेतानां वा मृतानां समालिङ्गनं साधु समागतोऽसीति । खरयानमिति । गर्द्दभारूढमात्मानं पश्यति वाक्यात् विषभक्षणम् आधिभौतिकमेतत् त्रयं सत्त्वरजस्तमोरूपं प्रेतानामालिङ्गनमेव नतु प्रेतत्वं गर्दभेन गमनमात्रं न तु यमपुरीप्रवेशः विषस्य भक्षणमेव मरणमिति सामिकार्याणि पुनस्त्रिविधान्युक्त्वा धर्मिणमपि चतुर्थमाह । यायादिति । नलदमालायुक्तमात्मानं दृष्ट्वान् महाराजोऽप्येकाकी यायादिति । आशंसितमेतदिति ज्ञापनार्थं लिङ्प्रयोगः तैलाभ्यक्तमात्मानं पश्यति एकत्वं तामसमिति दिगम्बर इत्याधिदैविकं सर्वदेवतामयेन वाससा त्यक्त इति "सर्वदैवत्यं वास" इति श्रुतेः क्रिया पुनरन्ते निरूपिता सा तस्य गमननिर्द्धारं कारयतीति ॥ ३० ॥

एवं कानिचित् निरूप्य अन्यान्यपि कालेन सूचितानि दृष्टवानित्याह । अन्यानि चेति । चकारात्स्वप्नेपि ऽविशेषतः अनुक्तौ हेतुमाह । इत्थंभूतानीति । चकारादेतान्यपि पुनः पुनर्दृष्टानीत्याह । स्वप्नजागरितानीति । चकारात् स्वप्ने यः स्वप्नः तत्र तदुपयोग्यानि दृष्टानीति न केवलमेतानि दृष्टानि किं तु स्वकार्यमपि चक्रुरित्याह । पश्यन्मरणसंत्रस्त इति । मरणात् संत्रस्तः मरणं निश्चित्य त्रासं प्राप्तवानित्यर्थः । एतदर्द्धरात्रसमये ततः प्रभृतिचिन्तया निद्रां न लेभे ॥ ३१ ॥

एवमपि न निवृत्त इत्याह । व्युष्टायामिति । कौरव्येति विश्वासार्थं सम्बोधनं निशि व्युष्टायां प्रभातायां सत्यां दोषे अपगते गुणेऽपि जाते सूर्ये चाद्भ्यः समुत्थित इति "अद्भ्यः प्रातरुदेत्यपः सायं प्रविशति य उदगान् महतोऽर्णवा"दित्यादिश्रुतेः चकाराल्लोकेष्वप्युत्थितेषु त्रैवर्णिकानामावश्यककर्मानन्तरं च मल्लक्रीडामहोत्सवं कारयामासेति मल्लक्रीडाप्रधानोऽयं महोत्सवः यस्मिन्महोत्सवे मल्लाः क्रीडन्ति लोकवञ्चनार्थं तमेकं परिकल्पितवान् ॥ ३२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

छायायां स्वप्रतिबिम्बे छिद्रप्रतीतिः पिहितकर्णपुटस्य योऽन्तः श्रूयमाणो ध्वनिः स प्राणघोषस्तस्याश्रवणं वृक्षेषु स्वर्णवर्णप्रतीतिः रजःकर्दमादिषु स्वपदानामदर्शनम् एतानि जागरणदुर्निमित्तानि प्रेतैर्मृतैर्ज्ञातिबन्धुभिः सहपरिष्वङ्गः खरयानं गर्द्दभारोहणं विषादनं विषभक्षणं नलदमाली जपाकुसुममालावान् यायाद्गच्छेदिति यत्तदप्येकं दुर्निमित्तम् ॥ २९ ॥ ३० ॥

स्वप्नजागरितानि तत्सम्बन्धीनि ॥ ३१ ॥

व्युष्टायां प्रभातायां सूर्ये चाद्भ्य इति । तथा च श्रुतिः "य उदगान्महतोऽर्णवात् विभ्राजमानः सलिलस्य मध्यात् समा वृषभो लोहिताक्षः सूर्यो विपश्चिन् मनसा पुनात्विति" ॥ ३२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

स्वपदानां रजःकर्दमादिष्वदर्शनम् ॥ २९ ॥

प्रेतैः मृतैः परिष्वङ्गः आलिङ्गनम् खरेण यानं खरमारुह्य गमनम् विषस्य अदनं भक्षणम् नलदमाली जपाकुसुममाली यायादिति यत्तदेकं दुर्निमित्तम् । तैलाभ्यक्तः दिगम्बरो नग्नो यायादिति चैकं दुर्निमित्तम् ॥ ३० ॥ ३१ ॥

व्युष्टायां प्रभातायाम् सूर्येचाद्भ्यः समुत्थिते सति मल्लक्रीडारूपं महोत्सवं कारयामास "श्रूयते हि कयाचिद्विवक्षया सूर्यस्याद्भ्यः समुत्थानम् । य उदगान्महतोऽर्णवाद्विभ्राजमानः सलिलस्य मध्यात्समा वृषभो लोहिताक्षः सूर्यो विपश्चिन्मनसा पुनात्विति ॥ ३२—३३ ॥

आनर्चुः पुरुषा रङ्गं तूर्यभेर्यश्च जघ्निरे ।
मञ्चाश्चालंकृताः स्रग्भिः पताकाचैलतोरणैः ॥ ३३ ॥
तेषु पौरा जानपदा ब्रह्मक्षत्रपुरोगमाः ।
यथोपजोषं विविशू राजानश्च कृतासनाः ॥ ३४ ॥
कंसः परिवृतोऽमात्यै राजमञ्च उपाविशत् ।
मण्डलेश्वरमध्यस्थो हृदयेन विदूयता ॥ ३५ ॥
वाद्यमानेषु तूर्येषु मल्लतालोत्तरेषु च ।
मल्लाः स्वलङ्कृता दृप्ताः सोपाध्यायाः समासत ॥ ३६ ॥

भाषा टीका ।

अपनी छाया में छेद दीखना कान के भीतर के शब्द का नहीं सुनना वृक्षों में सुवर्ण की प्रतीति होना कीचड आदि में अपने पैरों का चिन्ह नहीं दिखाना ॥ २९ ॥

स्वप्न में मुरदा का अलिंगन करना गदहा की असवारी करना विष का खाना और औडहुल फूलों की माला पहर कर तेल को लगा कर नंगा होकर इकेला दक्षिण को जाना ॥ ३० ॥

और भी इस प्रकार के स्वप्न जाग्रत के कुसगुनों को देख कर मरण से डर कर चिंता से कंस को निंद्रा नहीं आई ॥ ३१ ॥

हे कौरव्य ! परीक्षित जी रात के बीतते ही जलों मे से सूर्य के उदय होते ही कंस ने मल्लों की क्रीडा का वडा उत्सव करवाया ॥ ३२ ॥

———

श्रीधरस्वामिकृतभावार्थदीपिका ।

यथोपजोषं यथासुखम् ॥ ३४ ॥ ३५ ॥

मल्लताल उत्तर उपरि उच्चैः श्रूयते येषु तेषु तूर्येषु उपाध्याया मल्लाचार्याः ॥ ३६ ॥

———

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

महोत्सवत्वमेवाह ॥ आनर्चुरिति । रङ्गं मल्लक्रीडास्थानं पुरुषाः कंसभृत्याः आनर्चुर्मङ्गलकलसस्थापनादिना अलं चक्रुः । तथा च हरिवंशे कंसादेशः । "श्वः सचित्राः समालाश्च सपताकास्तथैव च । सुवासिता वपुष्मन्तः उपनीतोत्तरच्छदाः । क्रियन्तां मञ्चवाटाश्च वलभ्यो वीथयस्तथा । अक्षवाटे करीषस्य कल्प्यन्तां राशयोऽव्ययाः । घण्टाभरणशोभाश्च वळयश्चानुरूपतः । स्थाप्यन्तां सुनिखाताश्च पानकुम्भा यथाक्रमम् । उदभारवहाः सर्वे सकाञ्चनघटोत्तमाः । वळयश्चोपकल्प्यन्तां कषायाश्चैव कुम्भशः" इति । पताकाभिश्चैलानि वस्त्रानिर्मितानि तोरणानि तैश्च ॥ ३३ ॥

यथोपजोषमित्यत्र विशेषः श्रीविष्णुपुराणे । "राजमञ्चेषु चारूढाः सह भृत्यैर्महीभृतः । अन्तःपुराणां मञ्चाश्च तथान्ये परिकल्पिताः । अन्ये च वारमुख्यानामन्ये नगरयोषिताम् । अक्रूरवसुदेवौ च मञ्चमध्ये व्यवस्थितौ । नगरीयोषितां मध्ये देवकी पुत्रगर्द्धिनी"ति । हरिवंशे । "मञ्चागारैः सुनिर्मुक्तैर्युद्धाय सुविभूषितैः । समाजवाटः शुशुभे समेघौघ इवार्णवः । श्रेणीनाञ्च गणानाञ्च मञ्चा भान्त्यचलोपमाः । अन्तःपुरगणानाञ्च प्रेक्षागाराण्यदूरतः । रेजुः काञ्चनचित्राणि रत्नजालाकुलानि च । गणिकानां पृथङ् मञ्चा शुभैरास्तरणाम्बरैः । शोभिता वारमुख्याभिर्विमानप्रतिमौजसः । अन्ये च मञ्चा बहवः काष्ठसञ्चयबन्धनाः रेजुः प्रस्तरणास्तत्र शतशोऽथ सहस्रशः" इत्यादि । अत्र पूर्वत्र मञ्चप्रान्त इति राज्ञ एवेति ज्ञेयम् । मुख्यत्वेन तस्यैव प्राप्तः । ताभ्यां या देवकी भावविक्रातिशङ्कया कंसेन तथाचरितत्वाच्च नागरीमञ्चे देवकीप्रवेशे हेतुः पुत्रगर्द्धिनीति कंसेनानादृतत्वेनान्तःपुरमञ्चाप्रवेशादिति भावः । विविशुरुपाविशन् कृतं निर्माय न्यस्तमासनं तत्तद्योग्यपीठादिकं येषां ते ॥ ३४ ॥

राजमञ्चश्चोक्तस्तत्रैव । "प्राङ्मुखश्चात्र निर्मुक्तो मेरुशृङ्गसमप्रभः रुक्मयन्त्रनिभस्तम्भश्चित्रनिर्योगशोभितः । प्रेक्षागारः स कंसस्य चकाशेऽप्यधिकं श्रिया । शोभितो माल्यदामाद्यैर्निवासकृतलक्षण" इति । "स दृष्ट्वा सर्वनिर्मुक्तं प्रेक्षागारं नृपोत्तमः । श्रेणीनां दृढसंयुक्तैर्मञ्चवाटैर्निरन्तरम् । सोत्तरणाय युक्ताभिर्वलभीभिर्विभूषितम् । काञ्चनीभिः प्रवृद्धाभिरेकस्तम्भैश्च शोभितम् । सर्वतः सारनिर्यूहं स्वायतं सुप्रतिष्ठितम् । उदकूल्लवनसुश्लिष्टं मञ्चारोहणमुत्तमम् । नृपासनपरिक्षिप्तं सञ्चार पथसङ्कुलम् । छन्नं तद्घोदकाभिश्च मानवौघभवक्षय"मिति । तत्र मञ्चप्रेक्षागारयोः स्वल्पबहुळपरिच्छदादीनां भेदो ज्ञेयः । मण्डलेश्वराः खण्डमण्डलपतयः तेषां मध्यस्थः । कंससेवकत्वेन तेषां तन्मञ्च एवास्थितेः । राजानश्चान्ये तन्मित्रनृपा इति भेदः । यद्वा । पृथङ्मञ्चोपविष्टानां तेषामेव मञ्चवर्गमध्ये कंसमञ्चस्य वृत्तेः । विशेषण दूयता दूयमानेन हृदयेनोपलक्षित इति । स्वभावतो नित्यभीतत्वाद्विशेषतश्च दुर्निमित्तादिदर्शनात् ॥ ३५ ॥

न केवलं स्वयमेव वाद्यमानेषु अपितु मल्लानां तालश्च स्वबाहुमूलघातः । स उत्तरस्तदधिकतया श्रूयमाणो येषु तादृशेषु चेति तद्वाद्याद्यधिकशब्दोऽयं मल्लानां महाबलिष्ठतोक्ता । यद्वा । बहिः साधारणेषु तूर्येषु वाद्यमानेषु अन्तस्तु मल्लोचिततालप्रधानेषु वाद्यमानेष्विति । यतो दृप्ताः सगर्वाः । अतएव सम्यगसङ्कोचेनासर्वतोऽविशन् प्रविविशुः ॥ ३६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

पुरुषा भृत्या रङ्गं मल्लक्रीडास्थानमानर्चुः मार्जनचन्दनाम्भः सेचनादिभिरिति शेषः । तूर्याणि भेर्यो भेरीश्च जघ्निरे वादितवन्तः स्रग्भिः पताकाभिश्चैलैश्चित्रपटैस्तोरणैश्च मञ्चाः दिदृक्षूणामुपवेशस्थानानि उच्चानि स्वलंकृताः ॥ ३३ ॥

ततस्तेषु मञ्चेषु ब्राह्मणक्षत्रियादयः पौराः पुरवासिनो जानपदा देशवासिनश्च प्रजाः यथोपवेशं राजाज्ञामनतिक्रम्य यथोपजोषमितिपाठे यथासुखं विविशुः तथा राजानः देशान्तरेभ्यः समाहूतास्ते राजानः कृतानि परिगृहीतानि आसनानि सिंहासनानि यैस्तथाभूताः ॥ ३४ ॥

कंसस्तु मण्डलेश्वरमध्यस्थो विदूयता उपतप्यमानेन हृदयेन सहित इति शेषः अमात्यैर्मन्त्रिभिः परिवृतो राजमञ्चमखण्डमण्डलेश्वरोपवेशयोग्यं मञ्चमुपाविशत् ॥ ३५ ॥

तदा मल्लानां तालैः करतलैः भुजास्फालनमुत्तरमुच्चैः श्रूयमाणं येषु तेषु तूर्येषु वाद्यमानेषु सत्सु उपाध्यायाः मल्लाचार्य्याः तैः सहिताः सर्वे मल्लाः स्वलंकृताः समाविशन् ॥ ३६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली

पणवगोमुखादितूर्यम् ॥ ३३ ॥

ब्रह्माणः ब्राह्मणाः क्षत्रा मण्डलेश्वराः पुरोगमा मुख्या येषां ते तथा यथोपजोषं यथासुखं राज्ञो त्रिशिनांष्ट्रि । राजान इति ॥ ३४ ॥

विदूयता तप्यमानेन ॥ ३५ ॥

मल्लानां तालशब्दोत्तरेषु उच्चैः श्रावितताळशब्देष्वित्यर्थः उपाध्यायाः मल्लशिक्षाचार्याः तैः सहिताः ॥ ३६ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

तत्र संभाषणमाह । आनर्चुरिति । पुरुषा अधिकारिणः रङ्गं रङ्गप्रवेशम् आनर्चुर्लेपादिना पूजितवन्तः तद्धि भूम्यन्तरिक्षाकाशात्मकं तत्र भूमिप्रदेशस्य पूजोक्ता मध्यप्रदेशस्याह । तूर्यं तूर्य्यो वा मङ्गलवाद्यानि भेर्यश्च उत्सवसूचकानि चकारात् दृन्यानि जघ्निरे शब्दिताः भेरीणां हननाभावात् ढोल्लकापरपर्यायो वा भेरीशब्दः विसर्गलोपः तूर्यशब्दो वा तूर्याणि भेर्यश्चेति उपरि शृङ्गारमाह । मञ्चाः स्वलङ्कृता इति । सर्वत्र मालाभिः स्वलङ्कृताः पताकादिभिश्च वस्त्रमयानि च तोरणानि वस्त्रैस्तोरणैश्चेति वा ॥ ३३ ॥

एवमलङ्कृतस्य रङ्गस्थानस्य उपयोगमाह । तेषु पौरा इति । आदावुपरि विनियोगः तेषु मञ्चेषु पौराः पुरवासिनो जानपदा देशवासिनश्च ब्रह्मक्षत्रौ पुरोगमावग्रे उपविष्टौ येषां मञ्चानां बहुत्वसूचनायाह । यथोपजोषमिति । ये समाहुताः खण्डमण्डलाधिपतयो राजानः ते कृतासनाः दत्तासनाः संमाननार्थं युद्धार्थं चकाराद्राजकार्यादिच कृतमासनं येभ्य इति ॥ ३४ ॥

कंसोऽप्युपविष्ट इत्याह । कंस इति । अमात्यैः परिवृतः राजमञ्चमध्ये श्रेष्ठत्वेन विनिर्मितमुपाविशत् तत्र मण्डलेश्वरा अप्युपवेशिता इत्याह । मण्डलेश्वरमध्यस्थ इति । मण्डलेश्वराणां मध्ये तिष्ठतीति बहिः शोभा निरूपिता हृदयेन विदूयता उपलक्षितः सहितो वा तेनान्तःशोभाभाव उक्तः ॥ ३५ ॥

वाद्यानां निमित्तत्वेन मध्यस्थानामुपयोगमाह । वाद्यमानेष्विति । तूर्याणां वाद्ये मङ्गलप्रतीत्या सर्वे मल्लाः समागताः तत्र च मल्लानां तळशब्दाः आस्फोटनरूपाः उत्तराणि येषां तूर्यैराकारिता मल्ला आस्फोटनतलशब्दान् कृत्वा आगता एव वयमित्युत्तरमुक्तवन्तः । एवमाकारणं प्रतिवचनं च सत्यवाक्यानामागमननिमित्तमुक्तं ततस्ते समागता इत्याह । मल्लाः स्वलंकृता इति । अद्य विद्याप्राकट्यमिति मल्लरीत्या अलंकृताः । अथवा कटकादिभिरेव यतो दत्ताः केवलं शोभार्थं गच्छामः न तु कश्चिदस्माकं प्रतिपक्षोऽस्तीति । अथवा भगवतो माहात्म्यं श्रुत्वा अभीताः कथमागता इत्याशङ्क्याह । दत्ता इति । विद्याबलमपि तेषां नास्तीति सूचयितुमुपाध्यायसहिता आगता इत्युक्तं बुद्धिदोषाभावं ज्ञापयितुं वा भगवता तथा कृताः सम्यगेव पुरस्कारपूर्वकं रङ्गस्थानमाविशन् ॥ ३६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

पुरुषाः कंसस्य कर्मचारिणः आनर्चुः मङ्गलकलसस्थापनादिना अलं चक्रुः जघ्निरे वादनार्थं काष्ठिकाभिरताडयन्त ॥ ३३ ॥

यथोपजोषं यथासुखम् ॥ ३४ ॥

विदूयता दूयमानेन हृदा उपलक्षितः ॥ ३५ ॥

मल्लतालोत्तरेषु मल्लोचिततालप्रधानेषु ॥ ३६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

यथोपजोषं यथासुखम् ॥ ३४ - ३५ ॥

मल्लतालः उत्तर उपरि उपरि प्रतीयमानो येषु ॥ ३६ ॥

भाषा टीका ।

रंग भूमी के पुरुषों ने रंग स्थान का अर्चन किया फिर ढोल नगारा सब बजे और बडे ऊंचे मंच माळा पताका वस्त्र तोरणादिकों से भूषित किये गये ॥ ३३ ॥

उन मंचानो पर पुर ग्रामों के आये ब्राह्मण क्षत्रियादिक अपने अनुकूल सुख से बैठे और बहुत राजा भी सिंहासनों पर बैठ गये ॥ ३४ ॥

कंस भी बहुत से मंत्रियोंके सहित राजा के योग बडे मंच पर बैठ गया वह सब मंडलेश्वरों के मध्य में बैठा है तौ भी हृदय उसका कांपता था ॥ ३५ ॥

जब इधर बाजा बजे और मल्लों के ताल ठोंकने के शब्द भये तब बडे मल्ल अलंकृत होकर बडे गर्व से उपाध्यायों के सहित उहां पर आते भये ॥ ३६ ॥

चाणूरो मुष्टिकः कूटः शलस्तोशल एव च ।
त आसेदुरुपस्थानं वल्गुवाद्यप्रहर्षिताः ॥ ३७ ॥
नन्दगोपादयो गोपा भोजराजसमाहुताः ।
निवेदितोपायनास्ते एकस्मिन् मञ्च आविशन् ॥ ३८ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे
पूर्वार्धे मल्लरङ्गोपवर्णनं नाम
द्विचत्वारिंशोऽध्यायः ॥ ४२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

उपस्थानम् मल्लरङ्गम् ॥ ३७ ॥

समाहुताः समाहूताः निवेदितान्युपायनानि यैस्ते ॥ ३८ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
द्विचत्वारिंशोऽध्यायः ॥ ४२ ॥

———

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

उपतिष्ठन्ति आराधयन्ति कंसं यत्र तदुपस्थानं मल्लरङ्गोचितस्थलम् आसेदुः प्राप्तवन्तः एव कारेण चाणूराद्य एवासेदुः किमुतान्ये तच्छिष्या इत्यर्थः । चकाकात् प्राश्निकवर्गश्च । तथा श्रीविष्णुपुराणे । "मल्लाः प्राश्निकवर्गश्च रङ्गमध्ये समीपगः । कृतः कंसेनेति । अस्यार्थः । मल्ला बाहुयोधिनः प्राश्निकाश्चानुमोदनादिना तदुत्साहनादिपरास्तेषां वर्ग इति ॥ ३७ ॥

भोजराजेन कंसेन सम्यक् नूनमक्रूरज्ञातिभोजवर्गप्रस्थापनेन वृद्धगोपाः सादरमाहूताः सन्तः अतो धनुर्भङ्गादि शङ्कया स्वयमप्रविष्टा इति ज्ञेयम् । समाह्वानमाश्वासनाय । तच्च श्रीकृष्णरामयोर्मल्लयुद्धे प्रवर्त्तनार्थमिति ज्ञेयम् । ते श्रीकृष्णैकप्रिया अपि कुवलयापीडवधपूर्वकं स्वच्छन्देन रङ्गान्तः प्रवेष्टुं श्रीकृष्णेच्छयैव तेषामादौ तत्र गमनमित्यूह्यम अतएवैकस्मिन्नेव नतु पृथक् पृथक् मञ्चे उपविष्टाः ॥ ३८ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे
श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिण्याम्
द्विचत्वारिंशोऽध्यायः ॥ ४२ ॥

———

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे
श्रीसुदर्शनसूरिकृतशुकपक्षीये
द्विचत्वारिंशोऽध्यायः ॥ ४२ ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तथा चाणूरादयो मल्ला वल्गुवाद्यैर्मधुरवाद्यैः प्रहर्षितास्तदुपस्थानं मल्लरङ्गमासेदुराजग्मुः ॥ ३७ ॥

तथा नन्दादयो गोपाश्च भोजराजेन कंसेनाहूताः निवेदितान्युपायनानि यैस्ते एकस्मिन्मञ्चे आविविशुः ॥ ३८ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
द्विचत्वारिंशोऽध्यायः ॥ ४२ ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

कांश्चिन्मल्लान्नाम्ना निर्दिशति । चाणूर इति । ये चाणूरप्रभृतयः त एव मल्लेषु प्रधानाः त एवमुपस्थानं रङ्गसमीपम् ॥ ३७ ॥

भोजराजेन समाहूता ये नन्दादिगोपास्ते किमकुर्वन्निति तत्राह । नन्दगोपादय इति । निवेदितोपायनाः दत्तप्रभृताः ॥ ३८ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्यां
चत्वारिंशोऽध्यायः ॥ ४० ॥ ४२ ॥

———

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे
द्विचत्वारिंशोऽध्यायः ॥ ४२ ॥

———

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

ततः सर्वेष्वागतेषु चाणूरादयो युद्धभूमिं युद्धवेषेण समागता इत्याह । चाणूर इति । पञ्चैते दैत्यप्राणरूपाः पञ्चैव उपस्थानमागताः उपसमीपे स्थीयते अस्मिन्निति यद्युद्धस्थानं चकारात्

श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी ।

तत्सेवका अपि आसेदुः आगतानामुत्साहमाह । वल्गुवाद्येन प्रहर्षिता इति ॥ ३७ ॥

एवं सर्वसामग्रीसम्पत्तौ समाहूता नन्दादयः समागता इत्याह । नन्दगोपादय इति । बालकास्तु भगवन्मित्राणि भगवतैव सहागमिष्यन्ति । नन्दगोपादि सदृशा ये ते भोजराजेन अप्रतिहतप्रतापेन समाहुताः समानीताः उपायनानि निवेद्य यतो गृहादेवोपायनानि गृहीतवन्तः तदाह । त इति । सर्वदा वा तदधीनाः प्रसिद्धा वा प्रसिद्धैरुपायनं देयमिति विजातीयैः सह कलहशङ्कया दुर्बलाः एकस्मिन्नेव मञ्चे आविशन् अनेन मञ्चानां स्थूलता निरूपिता ॥ ३८ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे श्रीमद्वल्लभदीक्षितविरचितायां सुबोधिन्याम् एकोनचत्वारिंशाध्यायविवरणम् ॥ ३९ ॥ ४२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

उपस्थानं मल्लरङ्गभूमिम् ॥ ३७ ॥

समाहुताः सम्यक् सादरं साश्वासं चाहूता इत्यर्थः । तत्राश्वासश्च भो व्रजराज ! त्वं मे मण्डलेश्वरमुख्योऽसि गोष्ठादागतोऽपि किं भीत्यैव मां न सङ्गतोऽभूः धनुर्भङ्गं खलु पुत्रयोर्दौरात्म्यं मामंस्थाः ताभ्यां ह्यः स्वबलपरीक्षैव मह्यं दत्ता तौ बलिष्ठौ श्रुत्वैव द्रष्टुमाहूतौ तत् कुतः शीघ्रमागच्छत मा भैष्टेत्यादिकः अत एव राजगौरवादेव क्वापि प्रातरेव गतौ स्वपुत्रौ तत्रापश्यन्नपि तदागमनमनपेक्ष्यैव परमाप्तबुद्धिमतो गोपानेव तयो रक्षार्थं शीलशिक्षणार्थं च नियुज्य हितोपदेशवाक्यं सन्दिश्य च द्रुतं नन्द आजगाम उपनन्दादयश्च द्रुतमायाताः कंसाय निवेदितदधिघृतवस्त्रस्वर्णमुद्राद्युपायनाः राजमञ्चे उपवेशस्थलादर्शनाद्राज्ञ आज्ञयैवान्यस्मिन्नेकस्मिन् मञ्चे उपविविशुः ॥ ३८ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
द्विचत्वारिंशकः साधु दशमेऽजनि सङ्गतः ॥ ४२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

उपस्थानं मल्लरङ्गं चाणूरादय आसेदुः ॥ ३७ ॥

समाहुताः समाहूताः ॥ ३८ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे द्विचत्वारिंशाध्यायार्थप्रकाशः ॥ ४२ ॥

भाषा टीका ।

चाणूर है मुष्टिक है कूट है शल है तोशल है ए सब मनोहर बाजों से हर्षित होकर युद्ध स्थान को प्राप्त होते भये ॥ ३७ ॥

नंदादिक सब गोप भी भोज राजके बुलाने से भेटको राजा को देकरके एक दूसरे मंच पर बैठ गये ॥ ३८ ॥

इति श्रीभागवत दशमस्कन्धपूर्वार्धे बैयालीसमे अध्याय की भाषा टीका समाप्त ॥ ४२ ॥

इति श्रीमद्भागवते दशमस्कन्धे पूर्वार्धे द्विचत्वारिंशोऽध्यायः ॥ ४२ ॥

॥ त्रिचत्वारिंशोऽध्यायः ॥

॥श्रीशुक उवाच॥

अथ कृष्णश्च रामश्च कृतशौचौ परन्तप !।
मल्लदुन्दुभिनिर्घोषं श्रुत्वा द्रष्टुमुपेयतुः ॥ १ ॥
रङ्गद्वारं समासाद्य तस्मिन्नागमवस्थितम् ।
अपश्यत्कुवलयापीडं कृष्णोऽम्बष्ठप्रचोदितम् ॥ २ ॥
बद्ध्वा परिकरं शौरिः समुह्य कुटिलालकान् ।
उवाच हस्तिपं वाचा मेघनादगभीरया ॥ ३ ॥
अम्बष्ठाम्बष्ठ ! मार्गं नौ देह्यपक्रम माचिरम् ।
नोचेत्सकुञ्जरं त्वाऽद्य नयामि यमसादनम् ॥ ४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

त्रिचत्वारिंशके हत्वा गजेन्द्रं रामकृष्णयोः ।
रङ्गप्रवेशसौभाग्यं चाणूरेण च भाषणम् ॥

पूर्वेद्युरेव कृतं शौचं शुद्धत्वं निरपराधत्वं याभ्यां तौ एतदुक्तं भवति धनुर्भङ्गादिनाऽऽवाभ्यां निजैश्वर्ये सूचितेऽपि पितरौ नमुञ्चत्यावाञ्च पुनर्जिघांसत्यतोऽस्य मातुलस्यापि वधे नावयोर्दोष इत्येवं कृतापराधपरिहाराविति । मल्लानां दुन्दुभीनाञ्च निर्घोषं मल्लतालं दुन्दुभिनिर्घोषं वा ॥ १ ॥

अम्बष्ठो हस्तिपस्तेन चोदितम् ॥ २ ॥

परिकरं युद्धोचितपरिधानं कृत्वा समुह्य निबद्ध्य ॥ ३ ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

द्रष्टुमिति । दिदृक्षाव्याजेनेत्यर्थः । अम्बष्ठादिवञ्चनार्थं परिधानीयोत्तरीयपरिधानेन मल्लवेशास्वीकारात् । अन्यथा वक्ष्यमाणपरिकरबन्धवैयर्थ्यं स्यात् उपेयतुः रङ्गस्थलान्तिकं ययतुः । परन्तप ! हे शत्रुनाशनेति तादृशदुष्टद्वेषो भवादृशां शीलमेवेति भावः । अन्यत्तैः । यद्वा कृतशौचाविति नरचेष्टानुकरणमात्रम् एतन्मिषेणैव वृद्धगोपेभ्यः पूर्वमेव विच्छिन्नाविति ज्ञेयम् ॥ १ ॥

अवधानेन स्थितमपश्यत् एतच्चाम्बष्ठप्रणोदितमपश्यदित्यर्थः॥२॥

शौरिरिति । तद्वंश्यानामानन्दार्थमिति भावः । परिकरं बद्ध्वा कञ्चुकं विसृज्य परिधानीयं मध्यबन्धधटीपटेन वेष्टयित्वा माल्यमालादिकं वैकक्ष्यादित्वेन विधायेत्यर्थः । विचित्रवेशाभरणस्रग्म्बराविति वक्ष्यमाणात् । कुटिलान् स्वभावतो वक्रान् अत एव पूर्वं कङ्कतिकया वक्रकुण्डलीषु दीर्घकेशेषु प्रवेशितानपि युद्धकाले विक्षेपशङ्कया अलकान् चूर्णकुन्तलान् समुह्योत्तरीयेणापि गाढं बद्ध्वेत्यर्थः । समूह्येति पाठे दीर्घत्वमार्षं श्लेषेण दुष्टवधे मुखावरणादिना विघ्नापादनात् कुटिलानां स्वीयानामपि सम्यग्बन्धनं युक्तमेवेति ध्वनितम् । अन्यत्तैः तत्र परिकरमित्यनन्तरं बद्ध्वेति पतितमिव यद्वा बद्ध्वेत्यस्यैव टीका कृत्वेति ॥ ३ ॥

वीप्सा दृढावधानार्थं क्रोधादेव वा मार्गरोधनं किल महापातकमित्याशयेनाह । माचिरं द्रुतम् अपक्राम मार्गादपसर नयामि प्रेषयादि सामीप्ये वर्त्तमानवत्त्वम् । अद्येति एतावन्तं कालमुद्वृत्तो वर्त्तसे तस्मादद्य त्वामित्यर्थम् यमस्य सदनमेव सादनं स्वार्थेऽण् वस्तुतस्तु यमेन मनोनिरोधेन साद्यते आसाद्यते यत्तन्मोक्षलक्षणं वस्त्वित्यर्थः ॥ ४ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम ।

॥ १ ॥
अम्बष्ठप्रचोदितं हस्तिपप्रचोदितम् ॥ २—६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ऊषतुस्तां सुखं रात्रिं ज्ञात्वा कंसचिकीर्षितम् इत्युक्तम् अथ किमपरेद्युः कंसचिकीर्षितं किंवा तावकुरुतामित्यत्राह । अथेत्यादिना हे परन्तप ! परेद्युः प्रातः रामः कृष्णश्च कृतशौचौ कृतं शौचं स्नानादिकर्म याभ्यां तौ मल्लानां दुन्दुभीनां च निर्घोषं श्रुत्वा द्रष्टुमाजग्मतुः ॥ १ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

रङ्गस्य मल्लक्रीडास्थानस्य द्वारमासाद्य तस्मिन् द्वारेऽवस्थितेन हस्तिपेन प्रचोदित कुवलयापीडाख्यं गजं भगवानपश्यत् ॥ २ ॥

परिकरं परिधानं यथोचितं बद्ध्वा कुटिलालकान् समूह्य निबध्य गर्जितवद्गम्भीरया वाचा हस्तिपमुवाच ॥ ३ ॥

उक्तिमेवाह । अम्बष्ठाम्बष्ठेति । अपक्रम मार्गे परित्यज माचिरं विलम्बं माकार्षीः नोचेन्मार्गे न दास्यसि चेदद्य सकुञ्जरं त्वां यमलोकं प्रापयामि ॥ ४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

कृष्णरामाभ्यां नन्दादिभिः सह स्थितमुत पृथगिति संशयनिरासार्थं तत्कर्म कथयति । अथेति। कृतशौचौ मुखप्रक्षालनादिना प्राप्तशुद्धी यद्वा कृतं पर्याप्तं पूर्णं शौचं शुचेरग्नेः सर्वदहनत्वं ययोस्तौ अग्निवत्सर्वदाहकावित्यर्थः । अत्रापि विशेषोऽस्तीत्याह । परन्तपाविति । शत्रूणामेव तापकौ न सर्वेषामित्यर्थः । मल्लदुन्दुभिनिर्घोषं मल्लयुद्धोचितदुन्दुभिध्वनिं मल्लयुद्धं द्रष्टुं तत्समीपमाजग्मतुः ॥ १ ॥ २ ॥

परिकरं कक्षाख्यमुदरबन्धं काञ्चीम्वा कुटिलालकान् समुह्य एकीकृत्य बद्ध्वा ॥ ३ ॥

अपक्राम अपसर यमसादनं यमगृहम् ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

मल्लानामशनिरित्यादि ॥ १—४० ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

शब्दस्य हि बलं पूर्णं सप्तभिर्विनिरूपितम् ।
अर्थस्यापि बलं राध तावद्भिर्विनिरूप्यते ॥
प्रपञ्चो विस्मृतः सर्वैरुत्सवाद्यैरनेकधा ।
माहात्म्यस्य परिज्ञानात्तदासक्तिर्निरूप्यते ॥
द्रष्टॄणां च तथा पित्रोः सर्वेषामेव चैव हि ।
पूर्वोक्तानां तथान्येषां द्वाभ्यां द्वाभ्यामुदीर्यते ॥
एवमासक्तिशुद्धौ हि तदेकपरता पुनः ।
वक्तव्येति ततो हेतोः फलं चापि निरूप्यते ॥
चत्वारिंशत्तमेऽध्याये कृष्णासक्तिर्निरूप्यते ।
दृष्ट्वा सामर्थ्यमतुलं विस्मितानामनेकधा ॥

पूर्वाध्याये भगवतो दोषाभावाय विशेषचेष्टाफलं साधारणचेष्टारूपस्य कालस्य च दुर्निमित्तप्रदर्शनलक्षणं निरूपितं तथाप्यनिवृत्तौ भक्तोपेक्षादोषो भगवतोऽपि भविष्यतीति । अनाहूतयोरपि रामकृष्णयोर्दर्शनार्थं प्रवृत्तिर्निरूप्यते तत्र प्रथमं रङ्गदर्शनार्थं प्रवृत्तावित्याह । अथ कृष्णश्च रामश्चेति । चकारद्वयं समुच्चयार्थं संसाधनरूपफलं च तत्र गच्छतीति निरोधे न कोऽपि सन्देह इति भावः । अथेति प्रक्रियान्तरं प्रमेयबलमारभ्यत इति कृतशौचौ कृतावश्यकाविति केचित् पूर्वविन एव कृतं शौचं समुद्धता याभ्यां परन्तपेति सम्बोधनं गूढार्थपरिज्ञानाय ब्रह्मधर्मा-

ह्येते तपसा ज्ञातव्या इति तदा मल्लानां दुन्दुभीनां च नितरां घोषं श्रुत्वा सर्वसामग्री सिद्धेति स्वयमपि द्रष्टुमुपेयतुः ॥ १ ॥

प्रमेयनिरोधे दृष्टं माहात्म्यं प्रयोजकमिति वक्तुं प्रथमं कुवलयापीडवधो निरूप्यते । रङ्गद्वारमिति त्रयोदशभिः । कालजयो हि पौरुषमिति स त्रयोदशात्मा संवत्सरो निरूपितः कुवलयं भूमण्डलं तस्यापीडं मुकुटस्थानीयमासमन्तात् पीडा वा यस्मात् द्विपश्रेष्ठं हन्तुमुद्यत इत्याह । रङ्गद्वारमिति । रङ्ग उत्सवस्थानं तस्यापि शोभार्थं द्वारादिनिर्माणं तावत्पर्यन्तं सम्यगेव गत्वा तस्मिन् द्वारमध्ये गजमवस्थितमपश्यत् तदैव ह्युत्सवः सम्पद्यते यदि कालो निवृत्तो भवति तदोत्सवदर्शनमिति मृत्युर्हि गजरूपः पञ्चमे निरूपितः अवस्थितमचलं दृष्ट्वैव हननार्थमपश्यत् सर्वथा हनने हेतुः कुवलयापीडमिति । सर्वेषामेव दुःखदं तत्रापि अम्बष्ठेन सङ्करोद्भवेन जातिहीनेन प्रकर्षेण प्रेरितं स्वसंमुखमागच्छन्तम् अनेन भगवतो ऽक्लिष्टकर्मत्वं निरूपितं कदाचित् साधारणोऽयं भवेत् अतस्तच्छङ्कापरिहारार्थं कृष्ण इति ॥ २ ॥

कालात्मानं दृष्ट्वापि तेन बलक्षये जातेऽपि पुनः प्रबोधं कृतवानित्याह । बद्ध्वेति । परिकरमुत्तरीयवस्त्रं कटिसम्बद्धं कृत्वा कुटिलालकांश्च हस्तद्वयेन चूडाकारेण बद्ध्वा कालमुभयतो निरुध्य भ्रमनिवृत्त्यर्थं वाचा निर्भर्त्सनं कृतवान् इत्याह । उवाचेति । हस्ती चेत् दुष्टः हस्तिपेन वारणीयः हस्तिपश्चेत् स एव मारणीयः अन्यथा उभावपि मारणीयाविति तदधीनो हस्तीति तस्य निर्भर्त्सने यथा भयमुत्पद्यते तथा सिंहसमानस्य मेघस्येव नादं कृतवानित्याह । मेघनादगम्भीरया वाचेति । मेघनादापेक्षयापि गम्भीरा अनेनान्तःस्थितानां तप्तानां वसुदेवादीनां तापोऽपि निवारितः ॥ ३ ॥

निर्भर्त्सनमाह । अम्बष्ठाम्बष्ठेति । निन्दायां वीप्सा प्रतिलोमजोऽम्बष्ठ इति तस्य सहजदोषकीर्त्तनेनैव तिरस्कारो भवति अनवहितस्य श्रवणार्थं वा द्विरुक्तिः नो मार्गं देहीति । अयमस्माकमेव मार्गः उत्सवोऽस्मदर्थमेव कृत इति अस्मभ्यं मार्गो देहीति च कथं देय इति चेत्तत्राह । अपक्रमेति । इतो ऽन्यत्र गच्छ चिरं मा अन्यथाज्ञोल्लङ्घने मदीयः कालो ऽधिकारी मारयिष्यतीति । किं च यदि केनापि प्रकारेण मार्गं न दास्यसि तत उभयोर्दोषे कुञ्जरसहितं त्वामद्यैव यमसादनं नयामि प्रापयिष्यामि मध्ये न त्यक्ष्यामीति मृत्युरेव यमगृहम् अन्यथा मल्लेभकङ्कयवना इति गणना विरुध्येत कदाचिद्धस्ती मम युद्धसाधनमिति न मन्तव्यमित्यभिप्रायेणाह । स कुञ्जरमिति । अद्यैवेति तव मारणेऽपि विलम्बो न भविष्यतीत्यर्थः । अद्येति वर्त्तमानकालवाचकं न तु दिनवाचकम् ॥ ४ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

त्रिचत्वारिंशके हत्वा हस्तीन्द्रं रङ्गभूगतः ।
माधुर्यैश्वर्यवर्षी स चाणूरं प्रत्यभाषत ॥

अथेति । उपासि प्रित्रादीनपृष्ट्वैव सर्वैरुत्थितो सवयस्यौ यमु-

एवं निर्भर्त्सितोऽम्बष्ठः कुपितः कोपितं गजम्।
चोदयामास कृष्णाय कालान्तकयमोपमम्॥ ५॥
करीन्द्रस्तमभिद्रुत्य करेण तरसाऽग्रहीत्।
कराद्विगलितः सोऽमुं निहत्याङ्घ्रिष्वलीयत॥ ६॥
संक्रुद्धस्तमचक्षाणो घ्राणदृष्टिः स केशवम्।
परामृशत्पुष्करेण स प्रसह्य विनिर्गतः॥ ७॥
पुच्छे प्रगृह्यातिबलं धनुषः पञ्चविंशतिम्।
विचकर्ष यथा नागं सुपर्ण इव लीलया॥ ८॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

नातीरं रामकृष्णौ गतौ तत्रैव कृतदन्तधावनादिकौ भो भो वयस्याः! मल्लतालमयो दुन्दुभिघोषोऽयं श्रूयते तदित एव प्रविशाव इति दृष्टुं द्रुतमीयतुः॥ १॥

अम्बष्ठो हस्तिपस्तेन स्वं प्रति हिंसार्थं प्रेरितम्॥ २॥

परिकरं बद्ध्वा कञ्चुकं विसृज्य परिधानीयवस्त्रं मध्यबन्धनपटीपटेन वेष्टयित्वा प्रालम्बमालादिकं वैकक्षकादित्वेन निधायेत्यर्थः। कुटिलालकान् उष्णीषबन्धनकाले अङ्गुल्या केशान्तःप्रवेशितानपि युद्धकाले विक्षेपशङ्कया समुह्य उत्तरीयेणापि गाढं बद्ध्वेत्यर्थः। समूह्येति पाठे दीर्घत्वमार्षम्॥ ३॥

यमस्य सादनं सदनं वस्तुतस्तु यमेन मनोनिरोधेनासाद्यते प्राप्यते इति यमसादनं मोक्षम्॥ ४॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

त्रिचत्वारिंशे कुवलयापीडवधरङ्गप्रवेशादिकं भगवच्चरितं वर्णयति। अथेति। कृतं शौचं स्नानादिकं याभ्यां तौ॥ १॥

अम्बष्ठेन हस्तिपेन प्रचोदितम्॥ २॥

समुह्य निबध्य॥ ३॥ ४॥

भाषा टीका।

श्रीशुकदेवजी बोले हे परंतप! परीक्षितजी इसके अनंतर प्रातःकाल स्नानादि क्रिया करके मल्लों के नगारों के शब्द को सुनकर देखने के वास्ते रामकृष्ण दोनों पास में चले जाते भये॥१॥

रंगद्वार में जाते मात्र श्रीकृष्ण ने देखा कि उहां पर कुवलयापीड नाम का एक हस्ती है तिसको पीलवान ने अपने ऊपर चला दिया है॥ २॥

इसको देखकर शौरि भगवान् ने कमर बांधकर अलकावली को संभाल कर मेघ सरी की गंभीर वाणी से पुकार कर पीलवान् से कहा॥ ३॥

हे अंबष्ठ! तु इहां से हटजा जल्दी हमको मार्ग देदे नहीं तो आज मैं हाथी के सहित तेरेको यमपुरी को भेज देऊंगा॥ ४॥

श्रीधरस्वामिकृतभावार्थदीपिका

अन्तको मृत्युः कालस्तन्निमित्तं यमस्तन्नियन्ता तैरुपमो यस्य तम्॥ ५॥

विगलितो विच्युतः मुष्टिना निहत्यालीयत्तादृश्यो बभूव॥ ६॥

अचक्षाणो ऽपश्यन् घ्राणमवघ्राणं तेन दृष्टिर्दर्शनं यस्य सः लोचनागोचरमपि हि पशवो घ्राणेन जानन्तीति प्रसिद्धम् परामृशतवान् पुष्करेण शुण्डाग्रेण स कृष्णः प्रसह्य बलेन॥ ७॥

धनुषो धनुषां पञ्चविंशतिर्यावत्तावन्तं देशं विचकर्ष आकृष्य नीतवान् कं क इव विचकर्ष यथा नागं सर्पवत्तथैवास्मै गजं सुपर्णवत्स्वयमिति आविरासीद्यथाप्राच्यां दिशीन्दुरिव पुष्कल इतिवत्॥ ८॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी।

कृष्णाय कृष्णं ग्रहीतुम्॥ ५॥

अग्रहीत् धृतवानेव महाकौतुकितया तस्य सर्वसंभवात् एवमग्रेऽप्यूह्यम्। अतएव वक्ष्यते लीलयेति क्रीडयेति च। विशेषण गलितो निष्क्रान्तः सन् विशब्देन वस्त्रमालादीनामपि निराकुलता बोध्यते। एवमग्रेऽपि अङ्घ्रिषु अलीयत पदचतुष्टयमध्यगः सन् तेनादृश्योऽभूत्॥ ६॥

पुष्करेणेति श्लेषात्तस्य श्रीमदङ्गे कमलवत् कोमलताङ्गतेनेति ध्वन्यते॥ ७॥

यथेति तैर्व्याख्यातम्। यद्वा यथा यथावत् विचकर्ष तन्मध्ये तेन कचिदपि स्थैर्यांशस्याप्यशक्यत्वात्॥ ८॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्।

घ्राणदृष्टिः हस्ताग्रे दृष्टिर्यस्य स तथोक्तः॥ ७—१६॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका

इत्थं निर्भर्त्सितो हास्तिपः क्रुद्धः कोपितं कोपं प्रापितमन्तको मृत्युः कालः तन्निमित्तं यमस्तु नियन्ता तैरुपमा यस्य तं गजं कृष्णाय चोदयामास कृष्णं प्रति द्रावयामासेत्यर्थः॥ ५॥

करीन्द्रस्तं कृष्णमभिद्रुत्य बलात्कारेणाग्रहीत् कृष्णः कराद्विगलितः

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

विच्युतः अमुं करीन्द्रं निहत्य मुष्टिना प्रताड्य तस्याङ्घ्रिषु चरणानां मध्ये ऽलीयत तस्माददृश्यो बभूवेत्यर्थः ॥ ६ ॥

तं कृष्णमचक्षाणोऽपश्यन्नत एव संक्रुद्धः स करीन्द्रः घ्राणदृष्टिः हस्ताग्रे दृष्टिर्यस्य तथाभूतः सन् केशवं पुष्करेण तुण्डाग्रेण परामृशदन्वेषयामास स कृष्णः प्रसह्य बलात्कारेणाङ्घ्रिमध्याद्विनिर्गतः ॥ ७ ॥

तमतिबलं पुच्छे प्रगृह्य धनुषः पञ्चविंशतिर्यावत्तं देशं विचकर्षाकृष्टवान् यथा सुपर्णो गरुडः लीलया नागं सर्पं विकर्षति तद्वत् ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

बलादाकर्षणे "कालः मृत्युर्वा कालो मृत्यौ यमे चैवे"ति संहारेऽन्तको रुद्र इव रुद्रो मामविशान्तक इति श्रुतिः क्लेशजनने यम इव स्थितः कालान्तकयमोपमः तम् ॥ ५ ॥

करीन्द्रकराद्विगलितः विश्लथितः स कृष्णः अमुं करीन्द्रं निहत्य मुष्टिनापहृत्य करीन्द्रस्याङ्घ्रिषु पादेष्वलीयत निलीनोऽभूत् ॥ ६ ॥

अचक्षाणः अपश्यन् घ्राणदृष्टिर्यस्य स तथा गजो घ्राणेन पादमध्ये निलीनं केशवं ज्ञात्वा पुष्करेण शुण्डाग्रेण तं कृष्णं परामृशत् आकृष्टवान् स कृष्णः पुष्करग्रहणात् प्रसह्य सहसा विनिर्गतः ॥ ७ ॥

विनिर्गत्य किञ्चकारेति तत्राह। पुच्छ इति। पञ्चविंशतिधनुःपरिमितस्थलपर्यन्तं नागं सर्पम् ॥ ८ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी।

ततो यज्जातं तदाह। एवं निर्भर्त्सित इति। एवमित्यसह्यं निर्भत्सनं नितरां भर्त्सितः अम्बष्ठो हीनः अत एव हितवाक्येऽपि कुपितः हस्ती पूर्वमेव तेन कोपितः कृतोऽस्ति अतस्तत्कर्मनिपुणः मूर्खः कृष्णाय सदानन्दाय कालाय वा प्रेरयामास ननूपद्रवार्थं प्रेरणम् उपद्रवो हि कालो निमित्तमन्यथा साधनानि विपरीतानि भवेयुः अन्तको मृत्युः स चेत् कुतश्चित् जायेत ततोऽनिष्टं भवेत् अधिकारी यमो वा यद्याज्ञां दद्यात् एवमङ्ग श्रुतिपुराणशास्त्रभेदेन तेष्वसंगतेषु प्रयोजनाभावात् किं प्रेरणयेत्याशङ्कयाह। कालान्तकयमोपममिति। त्रितयप्रतिरूपोऽयं यत्रैतदभावः तत्र तेषामपेक्षा न त्वस्मिन् विद्यमाने ॥ ५ ॥

यद्यम्बष्ठप्रेरितः हस्ती विशेषतो नापकुर्यात् तदा न मारयेदिति तस्य विशेषापकारमाह। करीन्द्रस्तमभिन्द्रुत्येति। ननु भगवत्समीपागमने देवैः कथं न निरुद्ध इत्याशङ्क्याह। इन्द्र इति। क्रियाशक्तिप्रधानः करी क्रियायामधिपतिश्चेन्द्रः अतो निष्प्रत्यूहं तं भगवन्तमभिप्रेत्य तरसा शीघ्रमेव करेण शुण्डादण्डेन भगवन्तमग्रहीत्। क्रिययापि भगवान् व्याप्तो भविष्यतीति बुद्ध्या तथा कृतवान् भगवांस्तु भक्तवश्य इति कराद्विगलितो जात इत्याह। विशेषेण गलितः करो हि धर्तुमेवाशक्तो जातः स्थूलबुद्ध्या धृतः सूक्ष्मो जातः यतः स प्रसिद्धः सर्वशक्तिः ततः अमुं हस्तिनं निहत्य तस्याज्ञानार्थं अङ्घ्रिष्वलीयत तस्यैव पादचतुष्टयमध्ये गुप्तो जातः अनेन दैवाद्विमोकः पलायनं च व्यावर्तितं तस्यान्तर्दृष्ट्यर्थं च जिज्ञासायामेव प्राप्यत इति ज्ञापनार्थम् ॥ ६ ॥

ततो यज्जातं तदाह। संक्रुद्ध इति। ताडनेन सुतरां क्रुद्धः दृष्ट्वा हि प्रयत्नः कर्तव्य इति दर्शनार्थं यतमानोऽपि नापश्यदित्याह। तमचक्षाण इति। भगवन्तमपश्यन् पशुत्वात् घ्राणदृष्टिर्जातः घ्राणेन हि ते जानन्ति। यतः स प्रसिद्धः युद्धादौ समर्थः केशवं परामृशत् स हि ब्रह्मादीनां सुखार्थमवतीर्ण इति तेनापि धृतो जातः तत्रापि पुष्करेण पुष्करं हस्तमुखं तदा भगवान् स्थूलो भूत्वा प्रसह्य बलात् पुष्कराद्विनिर्गतो जातः नहि पुष्करनाभः पुष्करेण ग्रहीतुं शक्यः ॥ ७ ॥

ततो भगवान् विशेषाकारेण कोपमुत्पादयितुं पश्चाद्गत्वा पुच्छं गृहीतवानित्याह। पुच्छे प्रगृह्येति। प्रकर्षेण हस्तद्वयेन गृहीत्वा धनुषो मानेन चतुर्हस्तेन पञ्चविंशतिसंख्या यावता भवति तावद्दूरं विचकर्ष धनुषः पञ्चविंशतिर्यत्रेत्यलुक्समासः ननु गजो महान् सूक्ष्मश्च भगवान् कथमाकर्षणं कृतवान् इत्याह। यथा नागमिति। सुपर्णो हि महान्तमपि नागमाकर्षति भक्ष्यो हि निःसत्त्वः कर्तव्यः अन्यथा भक्षणे प्रतिबन्धको भवेत्। तथा भगवानपि मारणार्थं तस्य बलनाशं करोति पञ्चविंशतितत्त्वानि तस्मिन् सन्ति तेषामनुरोधात् धनुश्च रक्षकमिति तेन मिता भूमिः तदर्थमाकृष्टा। तावता मार्गो भवति शतहस्तं तु करिणमिति तावद्दूरे गते मार्गस्थानां नापकाराय भवतीति धनुर्हस्तचतुष्टयम्। एतदपि लीलया अनेन तस्य स्वबलमपि ज्ञापितवान् ॥ ८ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

कृष्णाय कृष्णं ग्रहीतुं कालेन अन्तः आयुःशेषो येषां तेषां मनुष्यादीनां यो यमः प्रसिद्धस्तेनोपमा यस्य तं तेन कृष्णस्यासौ किमपि कर्तुं न प्रभविष्यतीति भीतं राजानं प्रत्याश्वासो ध्वनितः ॥ ५ ॥

तं निर्भयत्वेनैव स्थितं कृष्णं करेण शुण्डेन मध्यदेशे अग्रहीत् ततश्च स कृष्णः अमुं कुञ्जरं निहत्य वाममुष्ट्या शुण्डे प्रहृत्य तत्प्रहारविवशात् शुण्डाद्विगलितः सन् अङ्घ्रिषु तस्य महास्थूलपादेषु अलीयत अतः अदृश्यो बभूव अत्र अङ्घ्रिष्विति बहुवचनेनैवं व्याख्येयं प्रथममेकस्मिन् पादपृष्ठे, अलीयत तदा घ्राणदृष्टौ कुञ्जरे तत्रैव धर्तुमुद्यते सति अन्यस्मिन् पादे अलीयत तत्रापि धर्तुमुद्यते अपरस्मिन्नित्येवं सहासमुखाम्बुजो महाकौतुकी स कुञ्जरं बहुशो वञ्चयन् स्वखेलामेवाद्भुतां लोकान् दर्शयामासेति भावः ॥ ६ ॥

अचक्षाणोऽपश्यन् पशुत्वाद्घ्राणदृष्टिः गन्धेनैव जानन् पुष्करेण शुण्डाग्रेण परामृशत् तं जग्राहेति स्वीयखेलान्तरं लोकान् दर्शयिष्यन् कृष्णः स्वमेकवारं तदुत्साहवर्धनार्थं ग्राहयामासेति भावः। ततश्च कुञ्जरे तस्मिन् कृतार्थमन्ये सति स कृष्णः प्रसह्य बलात्कारेणैव किमरे बलं दर्शयसीत्युक्त्वा स्वं मोचयित्वा बहिर्निर्गतोऽभूत् ॥ ७ ॥

स पर्यावर्त्तमानेन सव्यदक्षिणतोऽच्युतः ।
बभ्राम भ्राम्यमाणेन गोवत्सेनेव बालकः ॥ ९ ॥
ततोऽभिमुखमभ्येत्य पाणिनाहत्य वारणम् ।
प्राद्रवन् पातयामास स्पृश्यमानः पदे पदे ॥ १० ॥
स धावन् क्रीडया भूमौ पतित्वा सहसोत्थितः ।
तं मत्वा पतितं क्रुद्धो दन्ताभ्यां सोऽहनत् क्षितिम् ॥ ११ ॥
स्वविक्रमे प्रतिहते कुञ्जरेन्द्रोऽत्यमर्षितः ।
चोद्यमानो महामात्रैः कृष्णमभ्यद्रवद्रुषा ॥ १२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

धनुषः धनुर्षां पञ्चविंशतिं शतहस्तप्रमाणादेशं व्याप्य यथेति यथावदेव विचकार्ष कुञ्जरः स तदा यत् किञ्चिदपि स्थैर्य्यं धर्तुं न शशाकेति भावः ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

स्वयं कुपितः कोपितं कोपं प्रापितं मृत्युः प्राणवियोजको देवताविशेषः । कालस्तन्निमित्तभूतः यतो नियन्ता तैरुपमा यस्य सः तं कृष्णाय कृष्णं प्रति चोदयामास ॥ ५ ॥

तं श्रीकृष्णम् करेण अग्रहीत् सः श्रीकृष्णः करात् विगलितः प्रच्युतः मुष्टिना निहत्य प्रताड्य अङ्घ्रिषु करचरणानां मध्ये अलीयत करिणोऽदृश्यो बभूव ॥ ६ ॥

स करीन्द्रः तं केशवम् अचक्षाणः लोचनेन अपश्यन् अपि घ्राणेन दृष्टिर्दर्शनं यस्य सः अवघ्राणेन प्रत्यक्षीकृत्य पुष्करेण शुण्डाग्रेण परामृशत् गृहीतवान् सः श्रीकृष्णः प्रसह्य बलात् विनिर्गतः ॥ ७ ॥

केशवः अतिबलं करीन्द्रं पुच्छे यथा यथावत् सुदृढमित्यर्थः प्रगृह्य धनुषः पञ्चविंशतिं धनुषाम्पञ्चविंशतिर्यावत् तावन्तं देशं लीलया विचकर्ष आकृष्य नीतवान् सुपर्णो गरुत्मान् नागं सर्पमिव॥८॥

भाषा टीका ।

इस प्रकार से भर्त्सना करने से पीलवान् बडा कुपित भया और फिर कुपित उस हाथि को कृष्ण के उपर चलाता हुआ जो कि हाथी काल अंतक यमके सदृश भयंकर है ॥ ५ ॥

वह हाथी कृष्ण के उपर दौड कर वडे जोर से उन को सूंड से पकडाता भया फिर भगवान् उस के सूंड मे से छूट कर उस को घुंसामार कर उस के पैरों के आट में छिपगये ॥ ६ ॥

नासिका की दृष्टि वाला वह हाथी उन को नहीं देखने से वडा क्रोधित हो गया फिर सूंड से जाकर केशवजी को पकडता भया फिर भगवान् हठात् निकलगये ॥ ७ ॥

फिर वलिष्ठ उस हाथी को पूंछ में से पकड कर पचीस धनुष तक ऐसे खैंच लेगये कि जैसे गरुड सहजही सर्प को खैंच लेजावे ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

स पर्यावर्त्तमानेनेति । पुच्छग्राहिणं श्रीकृष्णं ग्रहीतुं यदि दाक्षिणतः परिवर्त्तते गजस्तर्हि सव्यतो भ्रामयति यदा सव्यतः परिवर्त्तते तदा दक्षिणतो भ्रामयंस्तेन सह बभ्राम गोवत्सेन भ्राम्यमाणेन बालकः स एवं कृष्णो यथान्यो वा बालक इवेति ॥ ९ ॥

वारणं गजं प्राद्रवन्प्रकर्षेणासमन्ततो धावन्पातयामास यथा पतति तथा तं वञ्चयन्प्राद्रवादित्यर्थः ॥ १० ॥

किञ्च स धावन्निति अहनदहन् ॥ ११—१४ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

अच्युत इति । कदाचिदपि तदा तत्पुच्छग्रहणाच्युतिराहित्याभिप्रायेण । यद्वा द्रुतगतिविशेषेण सव्ये दक्षिणे चालातचक्रवद्वर्त्तमानत्वात् ॥ ९ ॥

ततो भ्रामणलीलानन्तरम् आगत्य ईषत् प्रहृत्य अन्यथा सद्य एव मरणात् व्यथादावपि तदनुधावनाशक्तेः वारणेन स्पृश्यमानः अन्यथा निरुत्साहतया तस्य वैमुख्यसम्भवात् । कौतुकविशेषासम्पत्तेश्च ॥ १० ॥

स इति तैर्व्याख्यातं तत्र किञ्चेति । पूर्वोक्तपातने युक्तिश्चेत्यर्थः । भूमें सहसेति अतिद्रुतमुत्थानेनामुना तदतर्कणात् । अत एव क्षितिमहनत् जानुभ्यां पतित्वा चखानेत्यर्थः तथाच श्रीहरिवंशे । पपात भूमिं जानुभ्यां दशनाभ्यां तुतोद चेति ॥ ११ ॥

स्वतएवात्यमर्षितः सञ्जातपरमामर्षः पुनश्च महामात्रैः प्रेर्यमाणो रुषा तद्वैरिहिंस्येनाभ्यद्रवत् ॥ १२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

स इति स भगवान् पुच्छग्राहिणमात्मानं ग्रहीतुं यदि गजः दाक्षिणतः परिवर्तते तर्हि सव्यतो भ्रामयन् यदापसव्यं परिवर्त्तते तदा दक्षि-

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

णतो भ्रामयन् एवं पर्यावर्वर्त्तमानेन करिणा सह स्वयं बभ्राम यथा बालो भ्राम्यमाणेन गोवत्सेन सह भ्राम्यति तद्वत् अत्र बालकः श्रीकृष्ण एव बाल्यदशावस्थो दृष्टान्ततया विवक्षितः ॥ ९ ॥

ततो वारणं गजमभिमुखमभेत्य पाणिना आहत्य प्राद्रवन् धावन्पदे पदे वारणेन स्पृश्यमानः पातयामास स यथा पतन्निव तथा तं वञ्चयन्प्राद्रवदित्यर्थः ॥ १० ॥

यदा च गजः पतति तदा स भगवानपि क्रीडया धावन् भूमौ पतति पतितं दृष्ट्वा स यदाभिधावति तदा भगवानुत्थितो धावति गजस्तु पतितं स्थितमेव मत्वा क्रुद्धः केवलं दन्ताभ्यां क्षितिमाहन्तीति ॥ ११ ॥

एवं स्वस्य गजस्य विक्रमे प्रतिहते क्षीयमाणे सति कुञ्जरेन्द्रः केवलमत्यन्तक्रोधमात्रयुक्तः हस्तिपैर्वलाच्चोद्यमानः प्रेर्यमाणः कृष्णं रुषाभ्यद्रवदभ्यधावत् ॥ १२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

सोऽच्युतः सव्यदक्षिणतो बभ्राम पुच्छङ्गृहीत्वेतिशेषः परि परित ओवर्तमानेन पुनः पुनः सव्यतो दक्षिणतश्च भ्रमता गजेन गृह्यत इति कथमिव बालको भ्राम्यमाणेन गोपुच्छेन गृहीतेन भ्रमति यथा तथेति ॥ ९ ॥

ततः किमनया लीलयेति मत्वा पुच्छं मुक्त्वा करीन्द्रस्याभिमुखं गत्वा पाणिना वारणम् आहत्य प्राद्रवदित्यन्वयः ततः किमभूदिति तत्राह । यापयामासेति प्राद्रवन्कृष्णः करीन्द्रं यापयामास स्वपृष्ठत आगमयायास गजोऽपि तमन्वाद्रवदित्यर्थः ॥ १०—१३ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

ततः स मोचयितुं समर्थः स्थिरीभवितुं च परावृत्या भगवान् धर्त्तव्य इति यत्नं कृतवानित्याह । स पर्यावर्तमानेनेति । सव्यदक्षिणतः वामेन दक्षिणेन च भागेन परिवर्तमानेन कृत्वा स प्रसिद्धो येनाकृष्टः भयाभावायाह । अच्युत इति । श्रोतुः शङ्कानिवृत्त्यर्थं सर्वत्रैव तथोक्तवान् । स्वयमपि भगवान् बभ्राम । स हि भगवदर्थं प्रयत्नं करोतीति । किं च भगवतैव स भ्राम्यमाणो जातः । अतो भ्रामयन् स्वयं बभ्राम । ननु भगवान् सर्वसमर्थः किमिति बभ्राम तत्राह । गोपुच्छेनेव बालक इति । बालको हि लीलया परिभ्रमति तथा लीलाप्रदर्शनार्थं तथा कृतवान् ॥ ९ ॥

लीलार्थमेव तथा करणमिति पश्चाल्लीलां त्यक्त्वा प्रौढलीलाप्रदर्शनार्थं सम्मुखमागत्य युद्धं कृतवानित्याह । तत इति । ततः पुच्छं विसृज्य अभिमुखमभ्येत्य हस्तिसम्मुखे गत्वा सजातीयबालकसम्मुखमिव पौरुषख्यापनार्थं पाणिना मुखे आहत्य प्राद्रवत् स हि हस्ती वारणः सर्वानेव निवारयितुं शक्नोति तादृशोऽप्यप्रयोजको जात इति वक्तुं तथोक्तवान् किं च तथैव प्राद्रवत् यथा पदे स्पृश्यमानो भवति । तथा भवनस्य प्रयोजनमाह । पातयामासेति । सूक्ष्मो भगवान् महानुच्चैः स्पृष्ट्वा धर्तव्य इति नीचो भवन् पतति एवमनुलोमप्रतिलोमाभ्यां क्रीडां कृतवान् ॥ १० ॥

ततो बञ्चनेन दैत्यांशः स इति सोऽपि प्रकारो ज्ञायत इति ज्ञापयितुं लीलां कृतवानित्याह । स धावन्निति । क्रीडया धावन् अनवहित इव भूमौ पतितः पतनपर्यन्तमेव स दृष्टवान् । भगवांस्तु पतित्वा सहसैवोत्थितः ततस्तस्य भ्रमकार्यमाह । तं मत्वेति । भगवन्तं तथा मत्वा पूर्वमपकृतः क्रुद्धः सन् भुवं दन्ताभ्यां पतितस्थानमहनत् ततोऽतिव्यथां प्राप्तवान् साधनत्रयमपि तस्यैवं पराहतं जातम् ॥ ११ ॥

ततः क्रुद्धो यत्कृतवांस्तदाह । स्वविक्रम इति । स हि साधनबले क्षीणे सम्पूर्णेनैव शरीरेण तदुपरि पतिष्यामीति बुद्ध्या प्रवृत्तः यतः कुञ्जरेन्द्रः स्वरूपतो महान् अतः साधने क्षीणेऽपि न निवृत्तः किं तु साधनक्षयः रोष एव हेतुर्जात इत्याह । अत्यमर्षण इति । अधिकं मर्षणं क्रोधो यस्य तादृशो जातः तत्रापि महामात्रैः उपरि पृष्ठतः परितश्च चोद्यमानः कृष्णं सर्वमारकं सुतरां साम्प्रतं दैत्यपक्षस्य शुद्धभावेन चेद्गच्छेत् कृतार्थो वा भवेत् किं तु रुषा अभ्यद्रवत् ॥ १२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

ततश्च कुञ्जरस्य किञ्चिदुत्साहप्रापणार्थमाकर्षणवेगं भगवान् किञ्चित् शिथिलीचक्रे इत्याह । स अच्युतः पर्यावर्त्तमानेन कुञ्जरेण सह सव्यदक्षिणतो बभ्रामेति किंचिदुत्साहं प्राप्य पुच्छग्राहिणं कृष्णं ग्रहीतुं यदि दक्षिणतः परिवर्त्तते कुञ्जरस्तदा तं सव्यतो भ्रामयन् स्वयं भ्रमति यदि च सव्यतस्तदा दक्षिणत इत्येवं स बभ्राम भ्राम्यमाणेन गोवत्सेन सह बलवान् बालक इवेति ॥ ९ ॥

अथान्यां खेलां दर्शयन् पुच्छं तत्याजेत्याह । तत इति । पाणिना आहत्य ईषदेव प्रहृत्य यथावत्प्रहारे सद्योमरणात् प्रारभ्यमाणखेला न निष्पद्येत इति भावः । प्राद्रवन् सन्निति प्रकर्षेण द्रवन्नपि आ ईषदेव द्रवन् तदुत्साहवर्द्धनार्थं स्वस्य प्रद्रवणं दर्शयामास तं वस्तुतस्तु स्वस्य तदीषदेव द्रवणमित्यर्थः । अत एव पदे पदे तेन स्पृश्यमानः सन् तं पातयामासेति तं पातयितुमेव स्वयं मुहुर्मुहुर्द्रवणासमर्थ इव स्खलतिस्मेत्यर्थः ॥ १० ॥

ततश्च कठोरतरशिलामय्यां भूमौ तमत्याघातं प्रापयितुं स्वस्य पतनमेव तं दर्शयामास न तु लाघवादुत्थानमित्याह । स इति । तं पतितं मत्वा तमेव हन्तुमुद्यतोऽपि क्षितिमेवाहनत् जानुभ्यां पतित्वा चखानेत्यर्थः । तस्य दन्तक्षेपकाले एवातिसूक्ष्मे कृष्णस्योत्थायान्यत्र गमनात् अत एव अतर्कितेति सहसेत्याभिधानात् सहसोत्थित इति प्रयुक्तम् ॥ ११ ॥ १२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

लीलया विचकर्षेत्युक्तं तां लीलां दर्शयति । सः अच्युतः श्रीकृष्णः पुच्छग्राहिणमात्मानं ग्रहीतुं यदि दक्षिणतः परिवर्तते गजस्तर्हि सव्यतो यदि सव्यतः परिवर्तते तदा दक्षिणतश्च भ्रामयन् इत्थं सव्यदक्षिणतः पर्यावर्तमानेन भ्राम्यमाणेन गजेन्द्रेण सह बभ्राम भ्राम्यमाणेन गोवत्सेन बालक इव ॥ ९ ॥

ततस्तदनन्तरं स अच्युतः पुच्छं हित्वा अभिमुखमभ्येत्य वारणं

तमापतन्तमासाद्य भगवान् मधुसूदनः ।
निगृह्य पाणिना हस्तं पातयामास भूतले ॥ १३ ॥
पतितस्य पदाक्रम्य मृगेन्द्र इव लीलया ।
दन्तमुत्पाट्य तेनेभं हस्तिपांश्चाहनद्धरिः ॥ १४ ॥
मृतकं द्विपमुत्सृज्य दन्तपाणिः समाविशत् ।
अंसन्यस्तविषाणोऽसृङ्मदविन्दुभिरङ्कितः ।
विरूढस्वेदकणिकावदनाम्बुरुहो बभौ ॥ १५ ॥
वृतौ गोपैः कतिपयैर्बलदेवजनार्दनौ ।
रङ्गं विविशतू राजन् ! गजदन्तवरायुधौ ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

गजं पाणिना आहत्य वारणेन पदे पदे स्पृश्यमानः प्राद्रवन् पातयामास कष्टेन समं ततो धावनेन मोहयित्वा पातयामासेत्यर्थः ॥ १० ॥

किञ्च सः श्रीकृष्णः तमुत्थितं दृष्ट्वा धावन् पुनः प्राद्रवन् क्रीडया भूमौ पतित्वा सहसोत्थितः यदा तदा तं श्रीकृष्णं पतितं मत्वा सः गजः क्षितिमहनत् अहन् ॥ ११--१४ ॥

भाषा टीका ।

वे अच्युत भगवान् घूमते हुये-उस हाथी के दहिने वांये तरफ से घुमाने से ऐसे घूमे जैसे गऊ के बछारा से बालक घूमता है ॥ ९ ॥

तिसी के पीछे हाथी के सामने आकर हाथ से हस्ती को थप्पड मार कर दौड कर पीछे से गिर कर पैंड पैंड मे उसको गिराते गये ॥ १० ॥

वह भगवान् क्रीडा से दौडते हुये भूमी में गिर कर शीघ्र ही उठ कर खडे भये उनको गिरे हुये जान कर क्रोधित हो कर हाथी ने दांतों से पृथिवी मे प्रहार किया॥११॥

अपने पराक्रम के नाश होने से हस्ती वडा क्रोधित भया फिर पीलवानों के प्रेरणा से रोष के मारे श्री कृष्ण के ऊपर दौडता भया ॥ १२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

रङ्गं समाविशत्तदा वीरश्रिया बभौ कथम्भूतः अंसे न्यस्तं विषाणं गजदन्तो येन सः असृजो रक्तस्य मदस्य च बिन्दुभिः परितोऽङ्कितः विरूढा उद्गताः स्वेदकणिकास्ताभिरुपलक्षितं वदनाम्बुरुहं यस्य सः ॥ १५ ॥

न केवलं स एकः समाविशत्किन्तु वृतौ गोपैरिति ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

स्वयं भगवानप्यंशेन च तादृशमधोः सूदनोऽपि श्रीमन्नराकारोचितमल्लळीलारसानुरूप्येणैव पाणिना हस्तं शुण्डां प्रगृह्येत्यर्थः ॥ १३ ॥

पतितं सन्तं तं श्रीचरणेन शिर आक्रम्य पाठान्तरे पतितस्य स्वतः तस्य दन्तमुत्पाट्य हरिरिति सिंहवत्तत्प्राणहरणात् हस्तिहननेन सिंहरूपत्वाच्च ॥ १४ ॥

मृतकमित्यर्द्धकं दन्तयुक्तवामपाणिः । द्वितीयदन्तोऽस्य श्रीबलदेवेनोत्पाट्य गृहीत इति ज्ञेयं गजदन्तवरायुधाविति वक्ष्यमाणत्वात् । सम्यक् मत्तगजेन्द्रगत्या शोभाविशेषेण च आ ईषदुद्भ्रान्तः आविशत् प्रविवेश शोभाविशेषमाह । अंसो वामस्कन्धः अङ्कितः विचित्रैरिव भूषितः विशेषेण विचित्रतया वा रूढाः प्रादुर्भूताः । रुहेः प्रादुर्भावार्थत्वात् सच्चिदानन्दविग्रहे विकारासम्भवात् अन्तर्भूतानन्तताद‍ृशविलासधर्माणां लीलानुरूप्येण केवलाविर्भावतिरोभावसम्प्रातिपत्तेश्च । अम्बुरुहरूपकेण तस्यापि जलविन्दुभिर्यथा शोभा स्यात्तथा इति ध्वन्यते ॥ १५ ॥

प्रवेशे पूर्वतो विशेषविवक्षयोक्तपोषन्यायेनाह । वृताविति । कतिपयैरिति । वृद्धानां श्रीव्रजेन्द्रेण सह गमनात् सवयसामप्यत्यासन्नानामेव श्रीगोकुलतः सङ्गमनात् बलदेव इत्यत्रजस्नेहेन दुष्टवधार्थं तदानीं वळविशेषप्रकटनात् । जनार्दन इति जनैर्निजभक्तैः श्रीनारदादिभिरर्द्यते कंसवधार्थं याच्यते यः स तथा राजन्निति हर्षेण सम्बोधयति गजस्य दन्तावेव तन्मारणसाधनतया कंसादौ भयदत्वेनांसगृहीततया च वरे आयुधे ययोः यद्वा गजदन्तश्रेष्ठौ आयुधे ययोस्तौ ॥ १६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तदा भगवानापतन्तं गजमासाद्य स्वपाणिना हस्तं तस्य शुण्डं प्रगृह्य भूतले पातयामास ॥ १३ ॥

पतितं गजेन्द्रं यदा पादेनाक्रम्यावष्टभ्य सिंह इव दन्तमुत्पाट्य तेनैव दन्तेनैव हस्तिपानहनत् ॥ १४ ॥

मृतं गजमुत्सृज्य दन्तः पाणौ यस्य तथाभूतः ततोऽसे न्यस्तः

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

निहितो विषाणो गजदन्तो येन सः असृजः रुधिरस्य मदोदकस्य च विन्दुभिरङ्कितः विरूढा उद्गताः स्वेदकणिका यस्मिंस्तद्वदनाम्बुरुहं यस्य तथाभूतो बभौ ॥ १५ ॥

रामकृष्णौ कतिपयैर्गोपैः परिवृतौ गजदन्तौ एव वरे श्रेष्ठे आयुधे ययोस्तौ हे राजन् ! रङ्गं मल्लक्रीडास्थनं विविशतुः ॥१६॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

तेन दन्तेन हस्तिपान् महामात्रान् ॥ १४ ॥

द्विपं गजं विषाणोपरक्तेन असृजा रुधिरेण मदजलबिन्दुभिश्च विरूढा विस्तृता स्वेदजलकणिका यस्मिंस्तद्विरूढस्वेदकणिक ताहशं वदनाम्बुरुहं ययोस्तौ तथा ॥ १५॥१६ ॥

श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी ।

तदा भगवान् सर्वात्मना समायातीति मारितवानित्याह । तमापतन्तमिति । उपरि पतन्तमासाद्य स्वयमग्रे गत्वा मारणप्रकारभिज्ञः भगवान् शङ्का वा अमारणं वा न सम्भावितमिति ज्ञापयितुमाह । मधुसूदन इति । यो हि मधुकैटभौ मारितवान् तस्यास्य सत्त्वस्यास्य हनने कः प्रयास इति किं तु स्वपाणिना तस्य हस्तं प्रसार्यमाणं निगृह्य नितरां लकुटवत् गृहीत्वा शाखामिव भूतले पातयामास स्थूलशरीरस्य पातनेनैव मूर्च्छा सम्पन्ना ॥ १३ ॥

ततो यत्कृतवांस्तदाह । पतितं तं पदाक्रम्येति । प्रथमव्यापारेणैव पतितः ताहशं मस्तके पादं दत्वा दन्तमुत्पाट्य तेनैव दन्तेनाहनत् उत्पाटने प्रकारमाह । मृगेन्द्र इति । स हि कुम्भस्थलं विदार्य तत्र दन्तमूलं बन्धनेभ्यः पृथक्कृत्य पश्चाद्दन्तमेवोत्पाटयति । परं महता प्रयासेन भगवांस्तु लीलयेति विशेषः ततस्तेनैव दन्तेन सर्वानेव महामात्रान् यैर्यैः प्रेरितः तानहनत् चकारात् हस्तिनं ननु गजः किमिति हतः अर्धमृत एव त्यक्तुमुचित इति चेत्तत्राह । हरिरिति सिंहो हि मारयत्येव शाश्वतिको विरोध इति भगवांश्च हरिः सर्वदुःखहर्ता अर्धमृतस्य जीवने महान् क्लेश इति वसुदेवादीनामपि दुःखं दूरीकर्तव्यमिति ॥ १४ ॥

एवं हस्तिनं हत्वा प्रतिबन्धकापगमे तन्निवृत्तिं सूचयन् अन्तः प्रविष्ट इत्याह । मृतकमिति । स हि पूर्वमेवासमर्थः अप्रयोजको जीवः यतः यानेऽप्युभयसापेक्षः अतस्तं विसृज्य दन्तपाणिर्भूत्वा सम्यगेवाग्र आविशत् तदा प्रविष्टस्य भगवतः स्वरूपं वर्णयति । असन्यस्तविषाण इति । लोकानां प्रतीत्यर्थं दन्तोऽयं महाभार इति अंसे स्थापितवान् साप्येका लीला ततः असृङ्मदयोः विन्दुभिरङ्कितोऽपि जातः सर्वाङ्गे समाकर्षणेन दन्तस्य तत्र स्थितः मदः रुधिरं च कणशो भगवति सम्बद्धः यथा पूर्वदिवसे मालया चन्दनेन शुशुभे एवमिदानीमपि दन्तेन मदविन्दुभिश्च शुशुभे विषाणमिति कदाचिद्धग्नविषाणं गोपालाः स्कन्धेऽपि बिभ्रति नापूर्वमिति ख्यापयितुं कुवलयापीडं च बलीवर्दं ज्ञापयितुं किं च विशेषेण रूढा याः स्वेदकणिकाः ता वदनाम्बुरुहे यस्य भक्तार्थं भगवानेवं प्रयासं करोतीति ज्ञापयितुं कणिकोद्भेदः एताहशोऽपि बभौ सर्वोत्कृष्टकान्तियुक्तो जात इत्यर्थः ॥ १५ ॥

एवं भगवन्तं वर्णयित्वा सर्वेषां सुखेन रङ्गप्रवेशमाह । वृताविति । केचन गोपाला इतस्ततः पलायिताः केचनान्तः प्रविष्टाः केचनैव स्थिताः अतः कतिपयैरेव गोपैर्वृतौ बलभद्रेणापि द्वितीयो दन्तो गृहीतः हस्तिनः सर्वस्वं तदिति शत्रोर्धनं ग्राह्यमिति अग्रे साधनस्याप्यपेक्षितत्वात् तत्र प्रवेशे दैत्यवधार्थं सामर्थ्यं सहजद्वेषं सूचयितुं बलदेव इत्युक्तवान् जनार्दनः अविद्यामपि मारयतीति । किं तस्य तद्गृहीतमारणे प्रयास इति रङ्गमिति ताहशौ रङ्गं रङ्गप्रदेशं गजदन्तावेव वरे उत्कृष्टे आयुधे ययोः ताहशौ इदानीमेव मारयिष्याव इति बोधयन्ताविव निर्विविशतुः निःशङ्कतया प्रविष्टौ ॥ १६ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

ततश्च समयाधिक्यमालक्ष्य तेन सह खेलां समापयामासेत्याह । तमिति । पाणिना एकेनैव अवहेलया वामेनैवेत्यर्थः हस्तं शुण्डं नितरां गृहीत्वा ॥ १३ ॥ १४ ॥

असन्यस्तविषाणः स्कन्धार्पितगजदन्तः असृजो रक्तस्य मदस्य च विन्दुभिः परितोऽङ्कितः विरूढा उद्गताः प्रस्वेदकणिकास्ताभिर्नीहारकणिकाभिरिवोपलक्षितं वदनाम्बुरुहं यस्य स मूर्तया वीररसश्रियेव बभौ ॥ १५ ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

समाविशत् रङ्गमितिशेषः असृजो रक्तस्य च विन्दुभिः परितः सर्वतोऽङ्कितः विरूढा उद्गताः स्वेदकणिकास्ताभिरुपलक्षितं वदनाम्बुरुहं यस्य सः इत्थम्भूतया वीरश्रिया बभौ ॥ १५ ॥

प्राधान्यविवक्षया रङ्गे भगवत्प्रवेशमुक्त्वा अथ बलादिसहितस्य प्रवेश माह । वृताविति ॥ १६ ॥

भाषा टीका ।

मधुसूदन भगवान् ने उसको आते देखकर अपने हाथ से उसके सूंड को पकड कर जमीन में गिरा दिया ॥ १३ ॥

फिर हरि भगवान् ने गिरे हुये उस हाथि को सिंह की नाईं अनायास से पैर से दबा कर दान्त उखाड कर उस हाथी को तथा हस्ति पालक सबों को मार दिया ॥ १४ ॥

फिर भगवान् मरे हुये उस हाथी को छोड कर दांत को हाथ मे ले कर फिर दांत को कांधे मे रख कर रक्त के विंदुओं से अंकित हो कर बीच मे पसीना के विंदुओं से मुख में शोभित होते भये भीतर को गये ॥ १५ ॥

हे राजन् ! कई एक गोपों के सहित बलदेव जी तथा श्रीकृष्ण दोनों गज दंत के आयुध को लेकर रंग भूमी में प्रवेश करते भये ॥ १६ ॥

मल्लानामशनिर्नृणां नरवरः स्त्रीणां स्मरो मूर्त्तिमान् ।
गोपानां स्वजनोऽसतां क्षितिभुजां शास्ता स्वपित्रोः शिशुः ।
मृत्युर्भोजपतेर्विराडविदुषां तत्त्वं परं योगिनाम् ।
वृष्णीनां परदेवतेति विदितो रङ्गं गतः साग्रजः ॥ १७ ॥
हतं कुवलयापीडं दृष्ट्वा तावपि दुर्जयौ ॥
कंसो मनस्व्यपि तदा भृशमुद्विविजे नृप ! । १८ ॥
तौ रेजतू रङ्गगतौ महाभुजौ विचित्रवेषाभरणस्रगम्बरौ ।
यथा नटावुत्तमवेषधारिणौ मनः क्षिपन्तौ प्रभया निरीक्षताम् ॥ १९ ॥
निरीक्ष्य तावुत्तमपूरुषौ जना मञ्चस्थिता नागरराष्ट्रका नृप ! ।
प्रहर्षवेगोत्कलितेक्षणाननाः पपुर्न तृप्ता नयनैस्तदाननम् ॥ २० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तत्र शृङ्गारादिसर्वरसकदम्बमूर्त्तिर्भगवांस्तत्तदभिप्रायानुसारेण बभौ न साकल्येन सर्वेषामित्याह । मल्लानामिति । मल्लादीनाम- ज्ञानां द्रष्टॄणामशन्यादिरूपेण दशधा विदितः सन् साग्रजो रङ्गं गत इत्यन्वयः मल्लादिष्वभिव्यक्ता रसाः क्रमेण श्लोकेन निवध्यन्ते—

रौद्रोऽद्भुतश्च शृङ्गारो हास्यं वीरो दया तथा ।
भयानकश्च बीभत्सः शान्तः सप्रेमभक्तिकः ।

अविदुषां विराट् विकलः अपर्याप्तो राजत इति तथा अनेन बीभत्स- रस उक्तः विकलत्वञ्च क्व वज्रसारसर्वाङ्गावित्यादिना वक्ष्यते ॥ १७ ॥

उद्विविजे भीतो बभूव ॥ १८॥

यथा नटाविति निर्भयत्वं दर्शितम् ॥ १९॥

प्रहर्षवेगेनोत्कलितान्युज्जृम्भितानीक्षणान्याननानि च येषां तयोराननं पपुः परं न तृप्ताः निराकाङ्क्षा न बभूवुरि- त्यर्थः ॥ २० ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

मल्लानामिति तैर्व्याख्यातम् । तत्र सर्वरसकदम्बमूर्त्तिरिति कार्यकारणाभेदात् । "रसो वै सः रसं ह्येवायं लब्ध्वानन्दी भव- ती"ति श्रुतेः । विशेषश्चैवं मल्लानां परमशूरम्मन्यतया गर्वि- तानामवज्ञातचरस्याप्यशनितुल्याङ्गत्वेन हरेः स्फुरणादशनि- वद्विरोधिजनमवगणय्य प्रवेशाच्च मल्लानां क्रोधस्थायिभावमयो रौद्रः । नृणां तद्द्वेषितदीयम्मन्यव्यतिरिक्तानां पौरादीनां लोको- त्तरविलासादिदर्शनेन विस्मयस्थाय्यद्भुतः । स्त्रीणां मान्यादिव्यति- रिक्तानां स्मरत्वेन प्रियभावमयी रतिर्व्यक्ता ततस्तत्स्थायी शृङ्गारः गोपानां श्रीदामादीनां स्वजनो वयस्यः ततोऽसङ्कु- चितचित्ततया गजरक्तमदविन्दुदन्तादिजातविलक्षणवेशदर्श- नेन तेषां हासस्थायिभावो हास्यः । असतां राज्ञां शास्तेति तद्वीर्यालिवायदर्शनेन युद्धोत्साहस्थायी वीररसः । पित्रोः श्रीदेवकी- वसुदेवयोः श्रीनन्दवसुदेवयोर्वा तदुपलक्षणत्वेन तत्समवासना- नामन्येषामपि शिशुत्वस्फूर्त्तेस्तदीयमार्द्दवज्ञानेन मल्लादिदौ- रात्म्यशङ्कया शोकस्थायी करुणः । एष एव दयाशब्देन लक्षितः कंसस्य मृत्युस्तद्धेतुः तेन भयस्थायी भयानकः अविदुषां सच्चि- दानन्दविग्रहत्वेन विद्वद्गणसंमतेऽपि तस्मिन् विकलत्वमननेन भौतिकनिर्णयाज्जुगुप्सा स्थायी वीभत्सः । योगिनां ज्ञानिभक्तानां परं तत्त्वं परब्रह्मविग्रहः तेन शान्तिस्थायी शान्तः । शमो मन्नि- ष्ठता बुद्धेरिति शान्तिशब्दस्य तन्निष्ठावाचित्वेन तन्निष्ठायाश्च तत्प्रीतिमात्रजन्यत्वेन दास्यसख्यादिभावविशेषानिर्देशेन चाखि- लान्यवासना शान्तिपूर्वकस्तत्स्वरूपैकालम्बनः प्रीतिविशेष एव शान्तिरित्युच्यते सा ऽस्यास्तीति अर्शआदित्वादच् । वृष्णीनां पर- माराध्य इति सप्रेमभक्तिकः भक्तिराराध्यतया ज्ञानम् । प्रेमात्मिका भक्तिः प्रेमभक्तिः । तया स्थायिरूपया सह वर्त्तत इत्यतोऽयं रससंग्रहश्लोकः "रौद्रोऽद्भुतः शुचिरथो धृतिसख्यहासो वीरोऽथ वत्सलयुतः करुणो भयाङ्कः । वीभत्ससंज्ञ उदितोऽथ तथैव शान्तः सप्रेमभक्तिरिति ते द्व्यधिका दश स्युः"इति अत्र क्रमं विना निर्देश- स्तत्रोच्चावचजनानां दृष्टिपातस्तथैव जात इति विवक्षया । अथवा अथ ये तत्र प्रतिकूलज्ञानाः अज्ञानाः सज्ञाना अनुकूलज्ञाना- श्चेति सामान्यतश्चतुर्विधास्तदवान्तरभेदेन विशेषतो दशविधा द्रष्टारः सन्ति तेषामसौ यथायोग्यं पृथक् पृथक् तत्तद्धर्मप्रकट- नेनाविर्बभाविति तादृङ् मधुरविलासे परमैश्वर्यमपि दर्शयति । मल्लानामिति"। तत्र मल्लाः कंसपक्षीयाः सक्षितिभुजः कंसश्च प्रतिकूलज्ञानाः परमसुखविग्रहे तस्मिन् तथा तथा दुःखदत्वा- योगात् । किन्तु तमोदूषितदृष्टयः तस्मिन् विपरीतमेव धर्मं प्रति- यन्ति । खण्डे पित्तदूषितजिह्वायास्तिक्तत्वमिव तत्र मल्लानां स्वाङ्गस्पर्शातिकर्कशत्वादिना सर्वयादवादिसाधुगणस्य तथा तस्यापि पराभवं भावयतां ततोऽप्यतिकर्कशत्वादित्वं प्रकटित- मित्यशनिः । असतां साधूनामेव शास्ति कुर्वतां तत एवानधिका- रिणामपि बलादेव क्षितिभुजां तदुपभोगकर्तॄणां श्लेषेण ताम- श्यवहरतामिव शास्ता दण्डकर्त्ता । भोजपतेश्च राक्षसदैत्यादि- निजगणद्वारा स्वयञ्चानेकसाधूनां मृत्युहेतुत्वेन स्वमात्रादौ खरिमश्च तथोद्यमकारित्वेन प्रसिद्धस्य अतः श्लेषेण सर्वञ्जि- तानां श्रेष्ठस्येत्यर्थः । तस्य मृत्युर्यम इव अथ न द्वेषिणो नच

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

सज्ञाना नचानुकूलज्ञाना याज्ञिकब्राह्मणा इव केचिदविद्वांसः तादृशतत्स्वरूपानुभूते सुखोदयाभावायोगाच्च जानन्त्येव किं तु तादृशत्वानुभावकतच्छक्तिविशेषप्रसादालाभेन यत्किञ्चिन्नृबालकत्वेनैवानुभवन्ति तेषां विराट् विराडंशनृबालकविग्रहः अथ सज्ञाना आकाशस्थितयोगिनः सनकादयः ते तु सर्वाश्रयभूततया जानन्तीत्यानुकूल्यांशस्य नातिसम्भवात् केवळतज्ज्ञानमात्राः तेषां परं तत्त्वम् अखण्डस्वरूपतल्लक्षणं गुणानां पिण्डरूपश्रीभगवदाकारत्वेन केवलस्वरूपमात्राविर्भावब्रह्माकारतोऽपि श्रेष्ठं वास्तववस्त्वित्यर्थः । अथ नरवरः स्त्रियो वृष्णयः पितरो गोपाश्चानुकूलज्ञानाः । तथा तथा ज्ञानस्यानुकूल्यमयत्वात्तेषां तत्तद्रूप इति स्वाभाविकानन्तमाधुरीप्रभाववृन्दस्य तस्य तांस्तान् प्रति तत्तदुल्लासात् यद्यदंशांशाभासलाभेन जीवा अपि तथा तथा रोचन्ते । तत्र नृणामितरानुकूलचतुष्टयव्यतिरिक्तानां साधारणानां निरीक्ष्य तावुत्तमपूरुषौ जना इत्यादि वक्ष्यमाणानां मध्ये केषाञ्चित् पुरुषाणां महानयं वताधर्म इत्यादि वक्ष्यमाणवचनानां मध्ये कासाञ्चित् स्त्रीणाञ्चेत्यर्थः । तेषां नरवरः नरश्रेष्ठः एषां ज्ञानित्वं प्रभावमाधुर्यांशज्ञानेनैव तच्छ्रेष्ठत्वावगमात् आनुकूल्यत्वञ्च तथा तथा वचनात् । एवमुत्तरोत्तरत्रापि तारतम्येन तत्त्वं ज्ञेयं । स्त्रीणां तादृशवाक्यानां मध्ये गोप्यस्तपः किमचरन्नित्यादि वचनानां कासाञ्चित् स्मरस्तद्धेतुमाधुरीविशेषप्रकाशनेन श्रीकृष्णावभासिते चेतसि प्राकृतस्मरवेषताया अधिकारसामर्थ्येन च स्वयमेतद्रूपः । अतएवाह मूर्त्तिमानिति। मृत्युत्वेन त्विदं न विशेष्यतेऽयथावत्त्वात् । परतत्त्वेऽपि न तेन सह मूर्त्तेरभेदात् । वृष्णीनां तत्प्रधानानां यादवानां परदेवतापारमैश्वर्यस्फुरणेन सम्बन्धस्फुरणस्यावृतप्रायत्वात् । परा सर्वतः श्रेष्ठा या देवता स्वयं भगवत्त्वेन निजाराध्या सैव स्वयम् । अतः पित्रोः यदुकुललीलायां पितृत्वेन प्रसिद्धयोः श्रीवसुदेवदेवक्योर्वृष्णिश्रेष्ठत्वेन तज्जन्मलक्षणमारभ्य तादृशस्तुत्यादिश्रवणैनैश्वर्यज्ञानाच्छावृतवात्सल्ययोरपि शिशुरिति तदानीं तादृशसङ्कटसमये श्रीनन्दादिसङ्गेनैव शुद्धवात्सल्यस्योल्लासादिति ज्ञेयम् । स्वशब्दोऽत्र वृष्णिभ्योऽन्तरङ्गत्वव्यञ्जनाय स्वपित्रोरिति क्वचित् पाठः । अत्र विशेष्यपदं नाध्याहार्यं गोपानां श्रीनन्दादीनां श्रीदामादीनाञ्च स्वजनः पुत्रादिरूपो मित्रादिरूपश्चेति तेषां स्वभाव एवोक्तः । तथा तथैवं श्रीगोकुललीलायां श्रीमुनीन्द्रादिभिस्तेषामसकृत् प्रशस्तत्वात्तदपेक्षयान्येषां कनिष्ठीकृतत्वाच्च अत्र चैवं ज्ञेयम् उक्ता भावास्तावत्त्रिविधाः प्रतिकूलज्ञानानां प्रीतिविरोधिनः अज्ञानां प्रीत्युदासीनाः । अन्योभयेषां प्रीत्यात्मका इति । तत्राद्यानामशनित्वशास्तृत्वमृत्युत्वभानाद्भयप्राया एव लक्ष्यन्ते तच्च तेषां भयं रसतां न प्राप्नोति । प्राकृतरसशास्त्रविदः श्रव्यकाव्यदर्शने येषु दृश्यकाव्यानुकार्येषु च नलदमयन्त्यादिषु रसोत्पत्तिं न रसं प्रतिपद्यन्ते किन्तु तत्तत्काव्यानुभावितृष्वेव तेष्वपि तत्सवासनेष्वेव सम्प्रतिपद्यन्ते मल्लादि सवासनास्तु न भगवत्काव्याधिकारेण इति श्रीभागवतरसविदस्तु तादृशं भावं द्वेष्यत्वेनैव मन्यन्ते । वस्तुतश्च दुःखरूप एवासाविति न सुखस्वरूपरसतामर्हति । अथाज्ञानामवज्ञैव सापि रसतां न प्राप्नोति । अथान्योभयेषां प्रीत्यात्मकत्वेनैक्येऽपि तत्तद्विशेषात् पञ्च भेदाः । योगिनां ज्ञानभक्तस्य परपर्याया शान्तिः । वृष्णीनां तदुपलक्षितभक्तिमतां प्रेमपर्याया भक्तिः मित्राणां सख्यं पित्रादीनां शिशुत्वपुत्रत्वभावनामयप्रीतिमतां वात्सल्यं स्त्रीविशेषाणां प्रियता भावनामयी रतिरिति।यत्र तु वैशिष्ट्यं न जातं तत्र शुद्धैव प्रीतिः तथा नृणामिति षट् । एष च प्रीत्यात्मकः सर्वोऽपि भावो रसतां प्राप्नोत्येव ब्रह्मानन्दतोऽपि स्वत एव परमानन्दरूपत्वात् । प्राकृत रसशास्त्रज्ञानामपि यत्किञ्चिदानन्दरूपत्वेनैव प्रीत्यादीनां रसता सम्प्रतिपत्तेः । विभावादिसद्भावश्चात्र स्वत एव परमालौकिकः । अतः प्राकृतरसवत् कविकृत्रिमालौकिकत्वमपि नापेक्ष्यते । अतोऽत्र वर्णनीयानुकार्ययोरेव मुख्या रसोत्पत्तिः । एष एव भागवतरसो नाम कौमुदीकारादिभिर्दर्शितः । मूलेऽपि पिबत भागवतं रसमालयमित्यादौ । तत्रोदाहरणञ्च । "स्मरन्तः स्मारयन्तश्च मिथोऽघौघहरं हरिम् । भक्त्या सञ्जातया भक्त्या बिभ्रत्युत्पुलकां तनुम्।क्वचिद्रुदन्त्यच्युतचिन्तया क्वचिद्धसन्ति नन्दति वदन्त्यलौकिकाः।नृत्यन्ति गायन्त्यनुशीलयन्त्यजं भवन्ति तूष्णीं परमेत्य निर्वृता" इति । अत्र हरिरालम्बनो विभावः स्मरणमुद्दीपनो विभावः विशेषेण भावयति रसमिति विभावशब्दस्यार्थः । स्मरणादिक उद्भास्वराख्योऽनुभावः । पुळकः सात्त्विकाख्यः अनुभावयति ज्ञापयति रसमिति तच्छब्दार्थः चिन्तादयः सञ्चारिभावाः रसे सम्यक् चरन्तीति सञ्जातया भक्त्येति स्थायी भावः सर्वाश्रयत्वात् स्थातुं शीलमस्येति । भवन्ति तूष्णीं परमेत्य निर्वृता इति तत्सम्वलनं परं परमरसात्मकं वास्त्वित्यर्थः । एवं "भगवद्दर्शनाह्लादवाष्पपर्याकुलेक्षणः । पुलकाचिताङ्ग औत्कण्ठ्यात् स्वाख्यानेऽपि हि नाशकद्",त्यादि । एवं प्रीतेरैक्येन तन्मयरसस्याप्यैक्यं तद्भावानां षोढाभेदेन रसा अपि षोढाः । यथा शान्तिस्थायी शान्तः प्रेमभक्तिस्थायी सप्रेमभक्तिकः । सख्यस्थायी सख्यमयः । वात्सल्यस्थायी वत्सळः । रतिस्थायी श्रृङ्गारः । अवशिष्टप्रीतिस्थायी तु प्रीतिमय एव । अथ येऽन्येऽद्भुतादयो भागवताः सप्त रसास्तेऽपि तेषु भगवत्प्रियजनेषु भगवत्प्रीतेरेवाविर्भवन्ति तत्रैव च तिरोभवन्तीति तत्तद्रससञ्चारिभावप्राया गौणत्वाच्चात्र गण्यन्ते । तद्विरोधितदुदासीनभावौ तु तज्ज्ञानायैव दर्शिताविति । एते च भावरसाः प्रायः सञ्ज्ञान्तरेण परिभाष्य रसामृतसिन्धौ श्रीमद्भ्रातृशुभाशयैर्विस्तरतः करतळ इव दर्शिताः । सङ्क्षेपतस्तदर्थसङ्ग्रहश्लोकाश्चैते । "स्थायी भावो विभावानुभावैः सञ्चारिभिस्तथा । स्वाद्यत्वं नीयमानोऽसौ रस इत्यभिधीयते । कारणान्यथ कार्याणि सहकारीणि यानि च ॥ तान्येव व्यपदिश्यन्ते विभावाद्याख्यया रसे । आलम्बनोद्दीपनाख्ये विभावस्य भिदे उभे । आलम्बनौ च द्विविधौ विषयाश्रयभेदतः ॥ रसस्य विषयः कृष्णस्तस्यानुभविताश्रयः । सचानुभविता प्रेम्णा यः श्रेष्ठोऽन्यस्पृहाकरः । उद्दीपनास्तु सम्बन्धिपदार्थाः कंसवैरिणः । अनुभावाः सात्त्विकाः स्युराङ्गिकाश्चेति ते द्विधा । स्तम्भः स्वेदोऽथ रोमाञ्चः स्वरभङ्गोऽथ वेपथुः । वैवर्ण्यमश्रुप्रलय इत्यष्टौ सात्त्विकाः स्मृताः । नृत्यं विलुठितं गानं श्वासहासादयोऽपि च आङ्गिका अनुभावास्ते यथायथमुदीरिताः । निर्वेदश्च विषादश्च दैन्यं ग्लानिस्तमो मदः । गर्वः शङ्का त्रासवेगा उन्मादापस्मृती तथा । व्याधिर्मोहो मृतिश्चैव आलस्यं जाड्यमित्यपि । व्रीडावहित्था स्मरणं वितर्कश्चिन्तनं मतिः । हिंसौत्सुक्यत्वौग्र्यामर्षासूयाश्च धृतिचापले । निद्रा च सुप्तिराळस्यामितीमे व्यभिचारिणः । निर्वेदाद्यास्त्रयस्त्रिंशद्भावाः स्युर्व्यभिचारिणः । स्थायिनं वर्द्धयन्तो ये प्रादुःषन्ति तिरोऽपि च । आनुकूल्यात्मका

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

याचिल्लिप्सोल्लासमधर्मिका । स स्थायी तारतम्येन रतिःप्रेमादिनामभाक् । रतिःप्रेमतथास्नेहः प्रणयो मानरागकौ । अनुरागमहाभावावेत् भावक्रमा मताः । शान्तिः प्रीतिस्तथा सख्यं वात्सल्यं प्रियता च सः । ज्ञानादरस्वतुल्यत्वकृपावल्लभभावतः । शान्तः प्रीतस्तथा प्रेयान् वत्सलो मधुरो रसाः । सामान्याद्भक्तिशब्दोक्तः स्थायी भक्तिरसो मतः । विस्मयो हास्य उत्साहक्रोधभीतघृणाशुचः । ये चैते स्थायिनो भक्तेर्जातास्ते तत्र गौणकाः । अद्‌भुते हास्य वीरौ च रौद्रस्तद्वद्भयानकः । वीभत्सः करुणश्चैव तेषु गौणरसाः क्रमात् । श्रीकृष्णविषयत्वन्तु भक्तिद्वारात्र सम्मतम् । क्वचित् स्वतोऽपि येन स्यात् स्थायिनो नहि दूषण"मिति ॥ १७ ॥

हतं दृष्ट्वेति । महोच्चमञ्चोपर्युपवेशात् । अतिदुर्जयत्वदर्शनं कुवलयापीडहननात् तेजोविशेषाभिव्यञ्जनाद्वा । मनस्वी महाशूरोऽपि तदेति ततः प्राक् तादृशभयाभावात् नृपेति कंसस्य तादृशोद्वेगात् प्रहर्षेण सम्बोधनम् ॥ १८ ॥

विचित्राणि विविधानि अद्‌भुतानि च वेशादीनि ययोस्तौ तत्र वेशस्तिलकादिःआभरणं तिलकमेव कटककुण्डलादि कृतोऽपि महायुद्धे तेषामम्लानत्वादि व्यञ्जनया कौशलविशेषो व्यञ्जितः । निरीक्षमाणानां मल्लादिदृशादिधजन्मनां प्रभया अशनित्वादिरूपया स्वतेजसा मनःक्षिपन्तौ यथायथं विक्षिपन्तौ उत्तमवेशधारिणाविति नटविशेषणम् उत्तमास्तथा तथा प्रत्यापनसमर्था ये वेशा नानानेपथ्यानि तद्धारिणावित्येकस्य नानात्वं प्रकाशमात्रेण तु कालभेदे दृष्टान्तः । यद्वा ऐन्द्रजालिकनट एवात्र दृष्टान्तः सच स्वाङ्गेन्द्रजालाभ्यं सत्यासत्यधर्मान् युगपद्दर्शयतीति ॥ १९ ॥

ये तु प्रतिकूलज्ञानव्यतिरिकास्तेषु तु साधारणानामपि परमप्रेमैव जातः किमुतासाधारणानामित्याह । निरीक्ष्येति । उत्तम पूरुषाविव्यखिलसौन्दर्यवैदग्ध्यादिकं सूचितं मञ्चस्थिता इति निरीक्षणसम्यक्त्वं नागराः पौराः राष्ट्रिकाश्च जानपदा लोकाः सर्वेऽपीत्यर्थः । उत्कलितत्वं विकाशितत्वं पपुरित्यनेन नयनानां चसकत्वम् आननस्य च सौन्दर्यामृतनिधानपात्रत्वम् । आननं पपुरिति सौन्दर्यप्राचुर्याच्चेनाभेदोत्प्रेक्षया केवलानननिर्देशो दर्शने तत्प्राधान्यात् ॥ २० ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

विराट् देहमात्रबुद्धिविषयः ॥ १७—२४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तत्र शृङ्गारादिरसकदम्बैकमूर्त्तिर्भगवांस्तत्तदभिप्रायानुसारेण बभौ न साकल्येन सर्वेषामित्याह । मल्लानामिति । मल्लादीनां दशानां द्रष्टॄणामशन्यादिरूपेण दशधा विदितः सन् साग्रजो रङ्गं रङ्गस्थानं गत इत्यन्वयः अशनिवद्रौद्रः स्त्रीणां मूर्त्तिमान्स्मरः विदितः असतां दुष्टानां क्षितिभृतां शास्ता स्वपित्रोः शिशुरनेन करुणो रसः प्रदर्शितो भवति भोजपतेः कंसस्य मृत्युरनेन भयानकरसः अविदुषां देहात्माभिमानिनां विराट् देहमात्रबुद्धिविषयः योगिनां परमात्मोपासनात्मकयोगनिष्ठानां परं तत्त्वमिति विदितः स्वोपास्यवस्तुत्वेन विदित इत्यर्थः ॥ १७ ॥

हतमिति । हतं कुवलयापीडं दृष्ट्वा ततस्तौ रामकृष्णावतिदुर्जयाविति ज्ञात्वा मनस्वी धीरोऽपि कंसः हे नृप ! नितरामुद्विविजे भीतो बभूव ॥ १८ ॥

ताविति विचित्रो वेषः तथा आभरणानि स्रजश्च ययोस्तौ रामकृष्णौ स्वकान्त्या पश्यतां जनानां मनःक्षिपन्तावपहरन्तौ क्षोभयन्तौ वा रेजतुः यथोत्तमवेषधारिणौ नटौ तद्वत् ॥ १९ ॥

निरीक्ष्येति । हे नृप ! पौरा जानपदाश्च जनाः तावुत्तमपूरुषौ निरीक्ष्यावस्थिता निश्चलाः प्रहर्षवेगेन उत्कलितान्युज्जृम्भितानीक्षणान्याननानि च येषां ते नयनैर्लावण्यपानपात्रभूतैस्तयोराननं पपुराननगतलावण्यरसं पीतवन्त इत्यर्थः । परन्तु न तृप्ता निराकाङ्क्षा न बभूवुरित्यर्थः ॥ २० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

मल्लानामशनिरिव भासमानः उपर्यप्येवं योगिनां परंतत्त्वं ब्रह्म ब्रह्म वेदस्तपस्तत्त्वमिति च भोजपतेः कंसस्य मृत्युरिव नित्यमेवेति योज्यम् ॥ १७ ॥

मनस्वी शूरोऽपि उद्विविजे ओ विजी भयचलनयोरिति धातुः भीतोऽभूत् ॥ १८ ॥

देहप्रभया निरीक्षतां मनः क्षिपन्तौ आकर्षन्तौ ॥ १९ ॥

नागराः नगरवासिनः राष्ट्राः जनपदवासिनः प्रहर्षवेगेन उत्कलितमुत्फुल्लमीक्षणमाननञ्च येषां ते तथा ॥ २०॥२१ ॥

श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी ।

तादृशवेषेण प्रवेशस्य प्रयोजनं वदन् भगवतः स्वरूपं बलभद्रसाहितं सर्वैर्दृष्टं यथाधिकारं नानाभावान् जनयतीत्याह । मल्लानामशनिरिति । "प्रमेयेण निरोधोऽत्र कर्त्तव्यो हरिणा भृशम् । लोकाश्च दशधा भिन्नास्ततो दशविधोऽभवत् । यस्य भावो यथा लोके तस्यानुसरणे कृते । निरोधो जायते सम्यक् अन्यथा बन्धनं भवेत् गुणा नवविधाः प्रोक्तास्तदभावस्तथापरः । शृङ्गारादिरसाश्चैव तेषामेव निरूपकाः । राजसास्त्रिविधाः पूर्वं तामसाश्च ततः पराः आध्यात्मिकास्तथा पूर्वं दैविकास्तु ततःपरम् । रौद्रोऽद्भुतश्च शृङ्गारो हास्यं वीरो दया तथा । भयानकोऽपि बीभत्सः शान्तो भक्तिरसस्तथा । एतान् दर्शयितुं भावान् हरिरेवं बभौ महान् । अतस्तस्मिन्गुणा एव सर्वे भावा न चान्यथा" आदौ मल्लाः प्रतियोगिनमन्वेषमाणाः भगवान्न प्रतियोगी किं तु विसदृश इति सोऽपि सर्वथा मारक एवेति ज्ञातवन्त इत्याह । मल्लानामशनिरिति । विदितः साग्रजो बलभद्रसाहितः रङ्गं गत इति यत्र हि विद्युत्पतति वृष्टिश्च तत्र न समीचीनमिति ज्ञात्वा विद्युतोऽतिवेगात् पलायनेऽप्यशक्ता जाता इत्यर्थः । तेन मल्लस्वभावा निरुद्धाः ये रौद्रप्रकृतयः ततोऽन्ये साधारणाः राजसाः भगवन्तमद्भुतं ज्ञातवन्त इत्याह । नृणां नरवर इति । अद्भुतो नरः नरश्रेष्ठ इति भगवन्तं दृष्ट्वा अद्भुतदर्शनमिति अद्भुतरस एवोत्पन्नः साधारणास्त्वद्भुतरसेनैव वशे भवन्तीति सर्वत्रेति विदितो रङ्गं गत इति संबध्यते तादृशावस्थायामपि स्त्रीणां तामससात्त्विकीनां भगवान्स्वफलस्वरूप एव प्रतिभाव इत्याह । स्त्रीणामिति । प्रद्युम्नागतानां ताः कामपूतनाः कदापि स्वस्वामिनं न दृष्टवत्यः स्मरो हि स्मर्त्तव्यात्मा स इदानीं मूर्त्तिमत्त्वेज्जातस्तदा सनाथा

श्रीमद्वल्लभाचार्यकृतसुबोधिनी।

जाताः अतः परं सर्वैरेवेन्द्रियैः शरीरेणान्तःकरणेन च सेव्यो जात इति एवमेकाविधास्त्रयो निरूपिताः सर्वाधमाः मल्ला उत्तमाः स्त्रिय इति पुष्टिमार्गे क्रम उक्तः आधिभौतिकाभिमानिनामेषा रीतिरिति एवं सामर्थ्यप्रकटनेऽपि गोपानां राजसतामसानां स्वजनः अस्मदीय एवायं बन्धुः परमुत्कर्षापन्नः अतो भगवता यो वेषः कृतो विलक्षणः स हास्यरसजनको जातः यथा स्वकीये वेषे कृते आध्यात्मिके एते देहस्वरूपाः इन्द्रियरूपास्त्वमिमाः आत्मरूपास्तत इति दास्यत्वेन इन्द्रियतुल्यता राज्ञां भगवन्तं दृष्ट्वा तेषां वीररस उत्पन्न इत्याह। असतां क्षितिभुजां शास्तेति। सन्तो ये ते वृष्णित्वेन वक्तव्याः भक्त्यधिकारिणः ये च लौकिकाः असन्तस्ते पामरा एव बीभत्सरसे वक्तव्याः ये पुनः राजसराजसाः ते राजसभावसिद्ध्यर्थं क्षितिभुज उच्यन्ते वीररसस्तेषामेव भगवन्तं दृष्ट्वा युद्धार्थं बुद्धिस्तेषामुत्पन्ना परमयं शास्तेति तेषां न प्रवृत्तिः वीररसस्तूत्पद्यत एवेति रसोत्तमत्वार्थमेवमुक्तं यथा हीनस्यापि पुरुषस्य महाराजावरोधे दृष्टे शृङ्गाररस उत्पद्यत एव परं तासां नोत्पद्यते अधमबुद्धेर्बाधकत्वात् स्वस्मात्तत्रोत्कर्षबुद्धिः सर्वत्र रसपोषिका अतो वीराणामसतां विचाररहितानां दृप्तानां शास्तृत्वप्रतीतावपि वीररसो युक्त एव यथा स्त्रीणां स्नेहो भगवति तथैव ततोऽप्यधिको वसुदेवदेवकयोः स्नेहः परं तमः अज्ञानात्मकमिति कामस्तत्र प्रयोजकः अत्र तु मोह इति मोहांशे राजसत्वं स्नेहांशस्तु सर्वत्र सात्त्विक एव लौकिकत्वाद्राजसत्वं निषिद्धत्वात्तामसत्वं विहितत्वात्सात्त्विकत्वं चेति स्नेहे त्रयो भेदाः तत्तदधिकारिणां तथैव निरोध उक्तः स्वपित्रोर्वसुदेवदेवकयोः शिशुर्बालक एव करुणापरपर्यायो दयारस उत्पन्नः स हि स्नेहस्यान्तरङ्गं भवति सा दया करुणारूपा स्नेहधर्मात् बालक एवेति तेष, शिशुरेव प्रतिभातः सात्त्विकान् गणयति ये हि मुक्त्यधिकारिणः अलौकिकाः ते भयबीभत्सशान्तरसेष्वधिक्रियन्ते तत्रानुपदमेव मुक्तिर्भविष्यतीति दुष्टकर्मकर्तेति कंसः तामससात्त्विकः देहाधिष्ठातृदेवतेव प्राज्ञ इव निरूप्यते। मृत्युर्भोजपतेरिति। मृत्युर्भयात्मकः न हि ततोऽधिकं भयमस्ति लोकन्यायेन नरकापेक्षयापि मृत्युरेव महान् भोजानां पतिरिति महत्त्वं सात्त्विकत्वार्थमुक्तम्। विराडविदुषामिति। ये हि भगवत्स्वरूपानिष्ठा भक्ताः राजससात्त्विकास्तेषां स्नेहात् रुधिरमदविन्दुभिः कृत्वा बीभत्सरस उत्पद्यते यथा स्वपुत्रादौ असद्द्रव्यसंबद्धे विचिकित्सा भवति अन्यथा तद्दूरीकरणार्थं प्रवृत्तिर्न स्यात निन्दा तु भगवल्लीलाऽपरिज्ञानात् उत्क्रम्योत्क्रम्य क्षितिमित्यादिकमपि महतामेव बीभत्सरसजनकं न तु प्राकृतानाम् अन्यथा निरोधे ते न वक्तव्याः स्युः न ह्यतिप्राकृताः त्यक्तव्या एव भगवानिति बुद्धियुक्ताः निरोधाधिकारिणो भवन्ति विराट्शब्दः शोभाभाववाचकः विगतराजनरूपः न तु प्रसिद्धः अदृष्टवादसंमतत्वाच्च न हि तत्स्वरूपज्ञा अविदुषो भवन्ति परं योगिनो हि सात्त्विकसात्त्विकाः प्रवृत्तिस्वभावत्वाच्च गुणातीताः तेषां स्वेष्टसिद्ध्यर्थमात्मत्वेन च स्फुरणाप्रकारद्वयेन च स्नेहः अतो योगिनां परमेव तत्त्वं पुरुषोत्तमरूपं तेषां सर्वं तत्त्वात्मकमित्यात्मापि तत्त्वरूपो भवति योगसांख्ययोरेवैषा व्यवस्था परत्वं परमकाष्ठापन्नत्वं वृष्णयो हि यादवा भगवदीया गुणातीताः येषां सात्त्विकं तेषां परमनिरोधो वक्तव्यः शय्यासनाटनालापेति तेषां भगवति परत्वं स्वामित्वं देवतात्वं च विदितं जातं दासस्य हि स्वामी नियामकः स लौकिकोऽपि भवतीति तद्व्यावृत्त्यर्थं देवतापदं स्वस्मिन् अलौकिकबुद्धौ हीनत्वाभावात् दृढा भक्तिर्न भविष्यतीति स्वस्मिन् प्राकृतत्वबुद्धिरेव अतः परे देवतात्वं भगवति युक्तं भगवांस्तु यादृशस्तादृश एव सर्वविलक्षणः सर्वरूपश्चेति अत उक्तमिति विदित इति रङ्गस्थानं गतः यत्र सर्वेषामेव रसः पुष्टो भवति यद्यपि शान्तरसस्य न विशेषाभिनयः तथापि तथोपवेशनेन सामान्याभिनयोऽस्त्येव अष्टौ नाट्ये रसा इति विशेषाभिप्रायं भक्तिरसोऽपि रसवृष्टिवत् निपुणैरभिनेय इति सर्वेषामेवार्थे रङ्गं गतः 'साग्रजो बलभद्रसहितः समानतया सर्वत्र निरूपयन् अत्र गौणत्वार्थं सहभावमेवोक्तवान् अन्यथा द्विवचनेनैव वदेत् वेदसहभावोऽपि भगवति वक्तव्यः अलौकिकत्वाय तत्रापि सवरससबंन्धे पित्रोरित्यादि न सामञ्जस्येन युक्तं भवेत् गोपानामपि लीलाया अकृतत्वात् न हास्यरसत्वं तस्मादसर्वत्वात् सहभाव एवोक्तः॥ १७॥

रसोत्पत्तौ तत्तद्बुद्धियोग्यत्वेन निरूपिता फलमुखत्वाय प्रधानक्रमेण कंसस्यादौ भयमाह। हतं कुवलयापीडमिति। स हि ज्ञातवान् वञ्चयित्वा समायास्यतीति तत्र मारयित्वा समागत इति यद्यपि महाशूरः राजापि तथापि भृशमुद्विविजे यदि गजो हतः अशस्त्रेण तर्ह्यन्यानपि मारयिष्यतीति युक्तिः प्रमाणमाह। दृष्ट्वा तावपि दुर्जयाविति। मनसा दृष्ट्या च एतौ दुर्जयाविति प्रतिभाति मया च यत्नः कर्तव्यः कृतश्च भूयान् अपकृतश्च पित्रादिबन्धनेन अतो मारयिष्यत्येव नान्यथेति भृशमुद्वेगः दुःखेन जयो ययोरिति नात्र योगो वक्तव्यः किं तु अजेयावित्येव रूढोऽर्थः नृपेति सम्बोधनं शत्रोस्तथात्वदर्शनात् विश्वासार्थम्॥ १८॥

एवं प्रधानस्य रसाविर्भावमुक्त्वा मल्लानामतिकठिनानां भगवतो गुणश्रवणमपि अधिकमपेक्ष्यत इति तान् परित्यज्य शिष्टानां रसाविर्भावो जात इत्याह। तौ रेजतुरिति। निरीक्षतां प्रभया मनः क्षिपन्तौ रेजतुरिति। मनो हि प्रतिबन्धकं क्षणेन रसान्तरमप्युत्पादयेत् अतस्तस्याक्षेपो वक्तव्यः यथा नोत्पादयेदिति प्रतिबन्धकनिवृत्त्यर्थं प्रथमतो भगवच्छोभावर्णनं शोभायामुभयोस्तुल्यता यथा नीलमुक्तामणी नटवदेव भगवन्तौ रूपान्तरं गृहीतवन्तौ तौ चेद्रङ्गगतौ भवतः वेषः सार्थको भवतीति परमार्थतः लोकेऽपि रङ्गस्थान एव नटोत्तमता नान्यत्र अतो रङ्गगतौ रेजतुः पूर्वापेक्षयापि नन्वयं रङ्गः कृत्रिमः कथमत्र रमणमिति चेत्तत्राह। महाभुजाविति। तथापि भुजाभ्यामेव सर्वं निराकर्तव्या इति युक्तैव शोभा ननु तथापि ये रसानभिज्ञाः प्राकृताः शुद्धस्वाङ्गरसं न जानन्ति तेषां कथं रसोत्पत्तिरित्यत आह। विचित्रवेषाभरणस्रगम्बराविति। विचित्रो वेषो यथा भवति तथा आभरणानि स्रजः अम्बराणि च ययोः त्रिविधान्यथाभरणानि वैचित्र्यं जनयन्तीति अन्येषामपि रसयोग्यता नन्वेतयोः नटवद्रूपान्तरग्रहणमिति हि महतां प्रतीतिः न सर्वेषां तत्कथं नटबुद्ध्यभावात् रसोत्पत्तिरिति चेत्तत्राह। यथा नटाविति। नटवदेव तदानीमभिनयं कुरुतः अतः सर्वेषामेव नटप्रतीतिः न तु स्वाभाविकाविव अपूर्वदर्शनात्तयोः कथं न भवेदित्याशङ्क्याह। उत्तमवेषधारिणाविति॥ उत्तम-

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

वेषं धारयन्तौ इति नटाभिनयो न स्वाभाविकोऽतः सर्वेषामेव स्वप्रभया मनोहरणं युक्तम् ॥ १९ ॥

ततस्तेषां रस आविर्भूत इति वक्तुं भगवति प्रेमपूर्वकमवलोकनमाह । निरीक्ष्येति । पुरुषमात्रमपि सुन्दरं दृष्ट्वा प्रमोदो भवेदेतौ तु पुरुषोत्तमौ उत्तमः पुरुषः परमात्मेति आत्मनोऽपि नियामकौ जनाः सर्व एव प्राणिनः साधारणाः ततो विशिष्टाः मञ्चस्थिताः दर्शनयोग्यत्वाय वा मञ्चस्थितत्वं नागरराष्ट्रकाः नगरवासिनो देशवासिनश्च नगरवासिनो रसाभिज्ञाः देशवासिनो बहुज्ञाः अत उभये विशिष्टा गणिताः ततोऽपि नृपास्त्रिविधाश्चतुर्विधा वा सर्वेषामपि नियन्तारं दृष्ट्वा मुदिता जाताः न केवलं हर्षमात्रं किं तु प्रहर्षस्य यो वेगः तेनोत्कळितं विकाशाभिमुखमाननं येषां प्रथमदर्शन एवैतत् अग्रे वाक्यैर्विकाशं वक्ष्यति अतस्तदाननं पपुस्तेन मार्गेणान्तः प्रवेशितवन्तः नयनैरिति नयनरूपाण्येव तानि अतो मुखमपि नीतवन्ति । इयमेव तदासक्तिः यदन्तर्बहिः स एव दृश्यते ॥ २० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

अथ तत्र रङ्गभूमौ स्थितेषु नानाविधजनसमुदायेषु श्रुतिप्रथितमहारसस्वरूपः स्वयं भगवानयमन्तःकरणानुरूपमेव स्फुरति स्मेति वदन्नयमेव सर्वोपनिषत्सारार्थो मूर्त इति साक्षादिव दर्शयति । मल्लानां पर्वतोपशरीराणां चाणूरादीनामशनिरिव विदितोऽभूदित्येवमेव सर्वत्रान्वयः क्वचित् तृतीयार्थे क्वचित् सम्बन्धे च षष्ठ्यः अतिसुकुमारसुशीतलसुमधुराङ्गोऽपि स पर्वतैर्महाकठोरसुसंतापककटुतराङ्गो वज्र इव मल्लैर्द्वेषदुष्टान्तःकरणैरनुभूतः पित्तदूषितरसनैर्मत्स्याण्डिकापिण्ड इवातितिक्त इति तैस्तत्स्वरूपं नास्वादितमिति तेषु रसाभास एव न तु रसः नृणां माथुराणां द्वेषादिराहित्याद्धृत्सन्नस्यैव प्रेमसामान्यवतां नरवरः नरेष्वसाधारणैरतिचमत्कारकरूपगुणलीलादिभिः श्रेष्ठ इति तैः शुद्धसत्त्वमयान्तःकरणैस्तस्य नरवरत्वं स्वरूपमेवास्वादितमिति तेषु विस्मयरसः स्त्रीणां जनन्यादिव्यतिरिक्तानां युवतीनां स्मर इति कृष्णविषयककामस्य प्राकृतत्वाभावात् तासां माथुरत्वेन प्रेमवत्त्वात् ताभिस्तस्य साक्षान्मन्मथमन्मथत्वं स्वरूपमेवास्वादितमिति तासूज्ज्वलो रसः अत्रैव मूर्तिमानिति विशेषणोपन्यासेनास्यैव स्वरूपस्याङ्गित्वं ध्वनितं गोपानां स्वजन इति तैरपि स्वरूपमास्वादितं यतो गोपमित्रत्वं खलु तस्य स्वरूपमेवेति तेषु सख्यरसो हास्यरसश्च असतामसाधूनां क्षितिभुजां श्लेषेण सज्जनवतीं पृथ्वीं ग्रसतामिव भक्तापराधिनां तेषां शास्ता अन्तकः इत्यन्तकत्वं सर्वसुहृदः सर्वानन्दकन्दस्य कृष्णस्य न स्वरूपमतस्तैर्मल्लैरिव तन्नास्वादितमिति तेषु रौद्ररसाभास एव स्वपित्रोर्नन्दयशोदयोर्वसुदेवदेवक्योर्वा शिशुरिति ताभ्यां च स्वरूपमास्वादितं यतो नन्दात्मजत्वं वसुदेवात्मजत्वं च तस्य स्वरूपमेवेति तत्र वात्सल्यरसो विजिघांसुलोकदर्शनात् करुणारसश्च भोजपतेः कंसस्य मृत्युरिति मृत्युत्वं माधुर्य्यसुधावर्षुकस्य कृष्णस्य न स्वरूपमतस्तेन तस्य तन्नास्वादितमिति तस्मिन् भयानकरसाभासः अविदुषां कंसपुरोहितादीनामपराधिनां विराट् व्यष्टिः प्राकृतो मनुष्यः हंहो अयमेव किं परमेश्वर इत्युच्यते भ्रान्तैरयन्तु पारदारिकत्वेन गवादिघातित्वेन च श्रुतचरः संप्रति प्राण्यस्थिरक्तकलिलगात्रो मनुष्येष्वप्यनाचारो घृणास्पदी भवत्यस्मन्नेत्राणामिति व्याहरत्सु महापापिष्ठेष्वावेशाभावात् कंसादिभ्योऽप्यधमेषु मन्दभाग्येषु तेषु वीभत्सरसाभासः योगिनां सनकादीनां परं तत्त्वं मूर्तं परं ब्रह्मेति तस्य स्वरूपम् तैरास्वादितमिति तेषु शान्तरसः वृष्णीनां परदेवतो पास्यपरमेश्वर इति तत्स्वरूपं तैरास्वादितमिति तेषु दास्यरस इत्येवं तत्र दशविधेषु जनसमुदायेषु चतुर्णां विमुखत्वेन तद्रसास्वादनासामर्थ्यात् षड्भिरष्टौ रसाः स्वादिता इत्यतो "रसो वै सः रसं ह्येवायं लब्ध्वानन्दो भवती,,ति वै निश्चितमेव सः श्रीभागवतीयदशमस्कन्धदर्शितायां माथुररङ्गभूमौ प्रसिद्धः कृष्ण एव रसः तं रसं कृष्णमेवायमानन्दमयोऽपि लब्ध्वानन्दी आनन्दभूमवान् भवतीति रसश्रुतिरेवं व्याख्येया ॥ १७ ॥

मनस्वी महाशूरोऽपि यद्वा पूर्वत एव चिन्ताकुलोऽपि तदानीमतिचिन्ताकातरो बभूव ॥ १८ ॥

मनः स्पृशन्तौ आश्लिष्य मनसि लग्नीभूय तिष्ठन्तावित्यर्थः ॥ १९ ॥ प्रहर्षवेगेन सूर्य्योदयशैघ्र्येणेव उत्कलितानि विकसितानि ईक्षणानि आननानि च कमलानि येषां ते तदाननमाधुर्य्यं पपुः ॥ २० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

रङ्गं गते भगवति मल्लादीनां स्वस्वबुद्ध्यनुसारतो नानाप्रतीतयो जाता इत्याह मल्लानामशनिरिति । विदितः नृणां नरवर इति विदितः स्त्रीणां मूर्तिमान् स्मर इति विदितः गोपानां स्वजन इति विदितः असतां शास्तेति विदितः स्वपित्रोः शिशुरिति विदितः भोजपतेः मृत्युरिति विदितः अविदुषां देहात्माभिमानिनां विराट् देहात्माभिमानीति विदितः योगिनां ज्ञानभक्त्यादियोगवतां तत्त्वज्ञानां परं सर्ववेदैकवेद्यं तत्त्वमिति विदितः वृष्णीनां परदेवता अस्मद्रक्षणाय परदेवतास्मत्सु बन्धुरूपेण वर्तते इति विदितः सन् साग्रजो रङ्गगतोऽभूदित्यर्थः । एवं श्रीकृष्णे अन्या अपि प्रतीतयः मनुष्यत्वजारत्वदेवत्वनारायणांशत्वादिकाः उक्ताः वक्ष्यमाणाश्चातत्त्वज्ञानां सन्तीति ज्ञेयम् ॥ १७ ॥

विशेषतः कंसस्तु तौ रामकृष्णौ दुर्जयौ दृष्ट्वा भृशमुद्विविजे भीतो बभूव ॥ १८ ॥—॥ १९ ॥

तयोराननं नयनैः पपुः तथापि न तृप्ताः ॥ २० ॥

भाषा टीका ।

भगवान् रंग भूमीमें जाते समय में नवरस मूर्ति होकर सब को दीखपडे तिसमें मल्लों को वज्र सरीके दीखे मनुष्यों को उत्तम सुंदर मनुष्य दीखे स्त्रियों को मूर्तिमान् काम देव सरीके दीखे गोप लोगों को अपने स्वजन सरीके दीखे असत् राजाओं को शासन करने वाले सरीके दीखे अपने पिता माता को पुत्र सरीके भोज पति कंस को मृत्यु सरी के दीखे अविद्वान् लोगों को असमर्थ सरीके दीखे योगिजनों को परम तत्त्व सरी के

पिबन्त इव चक्षुर्भ्यां लिहन्त इव जिह्वया ।
जिघ्रन्त इव नासाभ्यां श्लिष्यन्त इव बाहुभिः॥ २१ ॥
ऊचुः परस्परं ते वै यथादृष्टं यथाश्रुतम् ।
तद्रूपगुणमाधुर्यप्रागल्भ्यस्मारिता इव ॥ २२ ॥
एतौ भगवतः साक्षाद्धरेर्नारायणस्य हि ।
अवतीर्णाविहांशेन वसुदेवस्य वेश्मनि ॥ ॥ २३ ॥
एष वै किल देवक्यां जातो नीतश्च गोकुलम् ।
कालमेतं वसन् गूढो ववृधे नन्दवेश्मनि ॥ २४ ॥

भाषा टीका ।

दीखे वृष्णि वंशियों को परम देवता सरीके दीखे इस प्रकार से बलदेवजी के सहिवे रंग भूमी मे पधारे ॥ १७ ॥

हे नृप ! कुवलयापीड को मारा देखकर रामकृष्ण दोनों को दुर्जय जान कर यद्यपि वडा उत्साही है तौ भी कंस बडा डरता भया ॥ १८ ॥

बडे भुजा वाले वे दोनों रंग भूमिमें विचित्र वेष आभरण माला वस्त्रों से अत्यन्त शोभित भये जैसे उत्तम वेष धारण करने वाले नट होवैं और अपने तेज से देखने वालों के मन को आकर्षण करते थे ॥ १९ ॥

हे नृप ! उन उत्तम पुरुषों को देखकर मंचों पर बैठे नगर के राज्य के जो मनुष्य हैं सो हर्ष के वेग से उनके नेत्र मुख अति प्रसन्न होगये वे सब बडी तृष्णा से उनके मुखरूपी अमृत का पान कर के भी तृप्त न भये ॥ २० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तदेवाह । पिबन्त इवेति।श्लिष्यन्तः पारिष्वङ्गं कुर्वन्त इव लक्षिता इत्यर्थः ॥ २१ ॥

यथादृष्टं धनुर्भङ्गादि यथाश्रुतं गोवर्धनोद्धरणादि तत्तदनतिक्रम्य तदनुरूपमित्यर्थः । प्रत्यक्षश्च तयोरूपं गजदन्तादियुक्तं गुणाः शौर्यादयो माधुर्यं हसितालापादि प्रागल्भ्यं धाष्टर्यं तैः स्मारिता इव स्मरणं प्रापिता इव ॥ २२ ॥

विस्मितानां वाक्यान्याह । अष्टभिरेतावित्यादिभिः ॥ २३ ॥
किलेति सर्वत्रान्वयः ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

पिबन्त इति युग्मकम् । ताविति शेषः । इवेत्युत्प्रेक्षायां नेत्रविस्तारणलिङ्गेन ताभ्यां तयोः पानमिव कुर्वन्त इत्यर्थः । प्रत्येकापेक्षया द्वित्वादि एवं जिह्वाद्वारा तन्माधुर्यवर्णनलिङ्गेन तया तयोर्लेहनमिव कुर्वन्त इत्यर्थः । तथा हर्षवशात् तदातिसाम्मुख्यपूर्वकनासाफुल्लत्वसंभ्रमश्वासोत्तोलनादिलिङ्गेनाविच्छिदुरतत्सौरभ्यलाभलालसया तावेव नासयोः प्रवेशयितुमिव प्रवृत्ता इत्यर्थः । तद्वदेव च परस्परपरूपदर्शनार्थं करचालनालिङ्गेन बाहुभिस्तयोरालिङ्गनमिव कुर्वन्तः अत एव चालनलाघवे बहव इव दृश्यन्त इत्यभिप्रायेणात्र तु बहुत्वं केषाञ्चित्तत्तद्योग्यानां तत्तदिच्छाप्यस्ति ततः किञ्चिदनुकरणमपि सम्भवतीत्यपि पिबन्त इवेत्यादिकमुक्तम् ऊचुरिति तैर्व्याख्यातम् । तत्र यथादृष्टमित्यादावेवं विवेचनीयम् । समासोऽयमव्ययीभावः सचा "व्ययं विभक्ति" त्यादिना सूत्रेण "यथासादृश्य" इत्यादिना च वर्ण्यते तत्र प्रथमेन यथार्थत्वे प्रवर्त्तमानस्यैवं विवेकः यथार्थाश्चत्वारः योग्यता वीप्सा पदार्थानतिवृत्तिः सादृश्यञ्चेति । अत्र पदार्थानतिवृत्तिस्तदनतिक्रमः । तत्रोदाहरणं यथाबलमध्येति बलमनतिक्रम्येत्यर्थः । योग्यतायामुदाहरणम् अनुरूपस्य दानं यथादानमिति योग्यमित्यर्थः अत्र तु यथाशब्देन प्रयुज्यते नत्वन्यशब्दैः एवं सर्वाणि व्यज्यन्तीत्यत्र सादृश्यार्थे सहशब्दवत् । तस्माद्यथा दृष्टमित्यादौ दृष्टं यद्धनुर्भङ्गादि तदनतिक्रम्य यथाश्रुतं श्रुतं यद्गोवर्द्धनोद्धरणादि तत्तदनतिक्रम्येति विभज्यैव योज्यं तदनुरूपमित्यर्थः इत्यत्र तु योग्यतायामेवाव्ययीभावो गम्यते अनुरूपमस्य दानमितिवत् ततश्च तत्तद्योग्यमित्यर्थः । पदार्थानतिवृत्तियोग्यतयोरव्ययीभावयोर्भिन्नार्थत्वेऽपि योग्यतार्थे यत्र पर्यवसानं कृतं तत् खलु तत्रैव तात्पर्यमित्यपेक्षयागम्यते 'यथासादृश्य' इत्यशब्दस्य प्रवर्त्तमानस्य द्वितीयसूत्रस्योदाहरणं यथावृद्धं प्रविशन्तु ये ये वृद्धास्त इत्यर्थः । प्रत्यक्षमित्यनेन तच्छब्दो व्याख्यात इति । यद्वा । यथेति योग्यतार्थ एव दृष्टं यद्धनुर्भङ्गादि तदनुरूपमेव श्रुतं यन्नारायणांशत्वादि तदनुरूपमेव नाधिकमित्यर्थः । अतएव वक्ष्यतेऽशेनेति । तत्तदपि तेषां संदिग्धमिवासीत् सम्प्रति तद्दर्शनेनैव निश्चितं जातमित्याह । तद्रूपेति । तस्य रूपं भगवल्लक्षणाकारः गुणा असमोर्ध्वसौन्दर्यशौर्योदयः माधुर्यं क्वचिदाच्छादितेष्वपि रूपगुणेषु तत्स्वभावत एव मनोहरत्वं प्रागल्भ्यं सर्वत्राकुण्ठत्वं तैः स्मारिता इव इवेत्युत्प्रेक्षायां वस्तुतस्त्वसम्भावनाविपरीतभावनाभ्यां संदिग्धत्वमेव ननु श्रुत्वापि दृष्ट्वापि विस्मृतत्वमिति तैः प्रतीतिं प्रापिता इत्यर्थः । यद्वा तत्तत्तु तेषां सदा स्मर्यमाणमपि तदानीं तद्रूपादिदर्शनेनातीव चमत्कृतमासीदिति नूतनस्मरणविषयतामिव प्राप्तमित्याह । तद्रूपगुणेति । अतएवोत्तरत्र विस्मितानां वाक्यमाहेति तैर्व्याख्यास्यते ॥ २१ ॥ २२

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

यदुक्तस्तदेवाह अष्टभिः भगवतः स्वाभाविकासमोर्ध्वनिखिलैश्वर्ययुक्तस्यहरेः सर्वं दुःखहर्तुरभीष्टदानादिना मनोहरस्य च यतो नारायणस्यसर्वजीवाश्रयस्य तस्य साक्षाद्दर्शनं नतु शक्त्यावेशादिनांश्लेतौ सर्वाभीष्टप्रदौ भविष्यत इति दर्शितम् इह श्रीमथुरायां तत्रापि श्रीवसुदेवस्य वेश्मनीति स्वेषु चातिशयेन पक्षपातो दर्शितः। वेश्मनीति साक्षाद्भगवदंशत्वेन विकारासम्भवात गीर्देवीतिवत्याह अंशेन तच्छक्तिमयत्वात्तदंशोपलक्षितो यो वसुदेवस्तस्य वेश्मनीत्यर्थः ॥ २३ ॥

एवं सामान्येन द्वावप्युक्त्वा भगवदवतारत्वमेव स्पष्टयितुं तच्चारितानि वक्ष्यन्तः प्राधान्येन श्रीकृष्णस्यादावाहुः । एष इति षड्भिः । वै प्रसिद्धौ यो जातः प्रादुर्भूतः स एवैषः एष इत्यङ्गुल्या निर्देशात् किल निश्चये एतमेतावन्तम् ॥ २४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका

तदेवाह । पिबन्त इवेति । दिलष्यन्तः परिष्वङ्गं कुर्वन्त इव इत्थं लक्षिता इत्यर्थः ॥ २१ ॥

ऊचुरिति । यथादृष्टं धनुर्भङ्गादि यथाश्रुतं गोवर्द्धनोद्धरणादि तदनतिक्रम्य तदनुरूपमित्यर्थः । ते नागरराष्ट्रकाः परस्परमूचुः कथंभूताः तयोरूपं गजदन्तादिश्रुक्तं गुणाः शौर्यादयः माधुर्यं हसितालापादिगतं प्रागल्भ्यं धाष्टर्यं तैः स्मारिता इव स्मरणं प्रापिता इवानितरसाधारणतद्रूपगुणादि याथात्म्यवेदिन इव इवशब्दोऽनतिरिक्तद्योतकः ॥ २२ ॥

तदेव दर्शयंस्तेषामुक्तिमाह । एतावित्यष्टभिः । एतौ रामकृष्णौ नारायणस्यांशेनावतीर्णौ नारायण एव स्वसङ्कल्परूपेणांशेन रामकृष्णरूपेणावतीर्ण इत्यर्थः । यद्वा छत्रिन्यायेनांशेनावतीर्णौ इत्युक्तं श्रीकृष्णस्य साक्षान्नारायणावतारत्वेन रामस्य तदंशभूतसङ्कर्षणावतारत्वात् ॥ २३ ॥

तत्र श्रीकृष्णचरित्रं जन्मत आरभ्य सङ्गृह्णन्ति । स एष इति । देवक्याञ्जातः वसुदेवादित्यध्याहारः गोकुलं प्रतिनीतः वसुदेवेनेति शेषः किलेत्याश्चर्ये प्रसिद्धौ वा एतमेतावन्तं कालम् अत्यन्तसंयोगे द्वितीया नन्दगृहे गूढः इतरैरविज्ञातो वसन् ववृधे एधाञ्चक्रे ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावळी ।

तयोः कृष्णरामयोः रूपगुणः शब्दगुणः माधुर्यश्च तेन यद्वा रूपगुणेन कान्तिगुणेन कीर्तिगुणेन वा माधुर्येणवा वाच इति शेषः प्रागल्भ्येन वैशारद्येन च स्मारिताः स्मृतिं कारिताः

रूपं शब्दे पशौ श्लोक इत्यादेः

॥ २२॥२३ ॥

एतं कालम् एतावन्तं कालम् ॥ २४ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

न केवलं योगिवदन्तः स्थापयित्वा चरितार्था जाताः किं तु भक्ता इव परमाकाङ्क्षायुक्ता इव मुग्धा इव क्षुधिता इव प्रोष्यागता इव परमस्निग्धा इव जाता इत्याह । पिबन्त इवेति । चक्षुर्भ्यां पिबन्त इव जाताः प्रत्येकं चक्षुर्द्वयेनान्तः दुःसहतापशान्त्यर्थम् अन्तर्निवेशितवन्तः यथा पानसमये जलमन्तर्बहिर्व्याप्तं तिष्ठति तथा भगवान् जात इत्यर्थः यथा गौर्वत्से जाते जिह्वया प्रेमपूर्त्यर्थं लेहनं करोति तथा ज्ञानानन्तरं भावमाविष्कृतवन्तः यथा पिता तदर्थमेव संपादितपदार्थः प्रोष्यागतः मूर्ध्नि जिघ्रति जातं वा तथा भगवति सर्वे जाताः ज्ञानप्रेमानन्तरं बहिरात्मत्वेन व्यवहृतवन्त इत्यर्थः । यथा वा मित्राणि स्त्रियो वा चिरागतमालिङ्गन्ति तथा भगवति सर्वे एव जातभावा जाताः ज्ञानप्रेमात्मव्यवहारेषु सिद्धेषु सख्यान्तमात्मसमर्पणान्तं वा भक्तिसाधनानि क्रियन्ते तथा कृतवन्तः एवं ज्ञानक्रियाशक्तिविनियोगेन अन्तःकरणशरीरयोर्भगवति विनिवेशनमुक्तं लेहनाघ्राणाभ्यामिन्द्रियप्राणयोरपि ॥ २१ ॥

एवं चतुर्द्धा ज्ञानक्रियाशक्ती निरूपिते अनेन तदासक्तिः सिद्धैव तथापि स्थूणाखननन्यायेन यदि न स्थिरीक्रियते रसस्तदा रूढो न भवतीति भगवति प्राचनिकमाह । ऊचुरिति । यद्यपि सर्वे जानन्ति तथापि वक्तारः श्रोतारश्च सर्व एव जाताः दार्ढ्यकरणस्यैव प्रयोजकत्वात् अतः परस्परमेवोचुः यतस्ते प्रसिद्धधाः निरुद्धधाः सर्वे एव तथा जाता इति वक्तुं निश्चयमाह तत्र भगवन्माहात्म्यं ज्ञात्वा वक्तव्यमिति ज्ञापनार्थं दर्शनं श्रवणं चाह । यथादृष्टं यथाश्रुतमिति । न तु कल्पनया श्रुतं कीर्त्यत इति सिद्धं दृष्टमसम्भावनादिनिराकरणाय ननु कः प्रसङ्गोऽत्र भगवद्गुणनिरूपणे तत्राह । तद्रूपेति । तस्य रूपं गुणाः माधुर्यं कोमलता च प्रागल्भ्यं सामर्थ्यं तैर्दृष्टश्रुतं स्मारितं येषु तेन संस्कारोद्बोधात् संयोगापेक्षया संस्कारस्य बलवत्त्वात् ऊचुरेव अन्यथा प्रत्यक्षविषये परिदृश्यमाने अन्यचित्तता न स्यात वस्तुतस्तु भगवद्गुणाः स्वरूपं च भगवत्कृपया तेष्वाविर्भूतमेव तथापि स्मृता इव वदन्तीतीवेत्युक्तम् ॥ २२ ॥

तेषां वाक्यान्याह । एतावित्यष्टभिः । अष्टैश्वर्याणि वक्तव्यानीति गुणैः सह भगवान् प्रमाणं चेति वा जन्मावधि सर्वमाहुः तत्रोभयोरुत्पत्तौ तुल्यतामाहुः । एतौ रामकृष्णौ भगवतः पुरुषोत्तमस्य साक्षात्स्वयमागत्य सर्वदुःखनिवारकस्य स एव स्वस्मिन् तानानीय स्वकीयान् देहादीन् तेषु संपाद्योद्धारं कुर्वन् समागत इत्याहुः । नारायणस्येति । अनेन भूतलमध्यब्रह्माण्डभावा निरूपिताः तस्यैतावान् समारम्भः सर्वमुक्त्यर्थः स भगवदवतारव्यतिरेकेण न सम्भवतीति युक्त एव तस्यावतार इति हिशब्दः अवतारो हि ये उद्धर्त्तव्याः तेषां मध्ये अवतरणं कूपे पतितो हि गुणैः स्वयमागत्य चोद्ध्रियते तत्राङ्गेषु स्वागमनमेवोचितमिति अवतीर्णौ इह प्रपञ्चे यावतांशेन एते उद्धृता भवन्ति तावन्तमेवांशं व्याप्तवानित्याहुः । अंशेनेति । अंशत्वं स्वरूपत्वं च सर्वत्र पूर्णके आनन्दमात्रकरपादमुखोदरादावनन्तमूर्त्तौ पूर्णेन विरुध्यते सर्वमासिद्धमेतदिति वदता वसुदेवस्य वेश्मनि गृहे भार्यायां चेत्युक्तम्

पूतनाऽनेन नीतान्तं चक्रवातश्च दानवः।
अर्जुनौ गुह्यकः केशी धेनुकोऽन्ये च तद्विधाः ॥ २५ ॥
गावः सपाला एतेन दावाग्नेः परिमोचिताः।
कालियो दमितः सर्प इन्द्रश्च विमदः कृतः ॥ २६ ॥
सप्ताहमेकहस्तेन धृतोऽद्रिप्रवरोऽमुना।
वर्षवाताशनिभ्यश्च परित्रातं च गोकुलम् ॥ २७ ॥
गोप्योऽस्य नित्यमुदितहसितप्रेक्षणं मुखम्।
पश्यन्त्यो विविधांस्तापांस्तरन्ति स्माश्रमं मुदा ॥ २८ ॥

श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी।

अतो द्वयमपि समर्थितं गृहे ह्याविर्भाव एवेति यथाश्रुतमिति वाक्यात् तावदेव तैः श्रुतमिति ॥ २३ ॥

एवमुभयोः सामान्यरूपमुक्त्वा भगवति विशेषरूपमाह। एष इति। एष कृष्णः वै निश्चयेन किलेति प्रसिद्धौ देवक्यां जातः गोकुलं च नीतो वसुदेवेन चकारात्तत्प्रतिनिधित्वेन कन्याप्या-नीता नारदवाक्यादेषा प्रसिद्धिः ततः एतावत्कालम् एकादशव-र्षपर्यन्तं तत्रैव वसन् नन्दवेश्मनि ववृधे तर्हि कथं सर्वैर्न व्यवहृत इति चेत्तत्राह। गूढ इति। गुप्तत्वार्थं गुप्तत्वेन वा न व्यवहृत इत्यर्थः। वृद्धिर्जनवत्प्रातीतिकी ॥ २४ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

पिबन्त इवेत्यादीनि नयनविस्ताररसानाकलनप्रफुल्लनासा-श्वासग्रहणबाहुप्रसारणलिङ्गज्ञापितानीत्यर्थः। दृष्टं धनुर्भङ्गादि श्रुतं गोवर्द्धनोद्धरणादि तत्तदनतिक्रम्य ऊचुः रूपाणि श्यामत्वरक्त-हस्तपाणित्वादीनि गुणाः शौर्य्यादयः माधुर्य्याणि हसितापाङ्ग-प्रेक्षणादीनि प्रागल्भ्यानि धनुर्भङ्गादिष्वकुण्ठानि तैस्तत्प्रभावादीन् श्रुतान् स्मारिता इवेत्यनधिकारार्थम् ॥ २१ ॥ २२ ॥
अंशेनेति तेषां तथैव प्रतीतेः ॥ २३ ॥ २४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

तदेव दर्शयति। पिबन्त इति। श्लिष्यन्त इव परिष्वङ्गं कुर्वन्त इव एवं लक्षिता इत्यर्थः ॥ २१ ॥

तयोः रूपादिभिः स्मारिता इव स्मरणं प्रापिता इव यथादृष्टं धनुर्भङ्गादि यथाश्रुतं पूतनावधादि वैशब्देन यथामति च ऊचुः ॥२२॥

ऊचुः परस्परं ते वै यथादृष्टं यथाश्रुतमित्येतत्प्रपञ्चयति। एतावित्यादिषड्भिः। हरेर्नारायणस्यांशेनेत्युक्तिः वक्तृमत्यनुरूपा यद्वा छविन्यायेन तमस्यांशत्वात् श्रीकृष्णस्य परब्रह्मनारायणत्वात् ॥ २३ ॥—॥ २४ ॥

भाषा टीका।

सब मनुष्य नेत्रों से उनका पानसा करने लगे जीभ से उनको चाटते सरीके नासिकाओं से उनको सूंघते सरीके बाहुओं से आलिंगन से करते भये ॥ २१ ॥

वे सब परस्पर मे कहने लगे कि जैसे सुनते थे तैसे हि देखे हैं उन के रूप गुण माधुर्य के स्मरण करने से मोहित हो कर वाले ॥ २२ ॥

ए दोनों साक्षात् हरि भगवान् नारायण अंश सहित है इन ने इहां पर वसुदेव जी के घर मे अवतार लियाहै ॥ २३ ॥

यह कृष्ण जी देवकी के गर्भ मे प्रगट भये हैं फिर गोकुल मे पहुचाये गये सो इतने काल गोकुल से नन्द जी के घर रह कर बडे भये हैं ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका

गुह्यकः शङ्खचूडः अन्ये चाघासुरादयः ॥ २५—२७ ॥

आश्रमीषच्छ्रमयुक्तं मुखम् अश्रमं मुखमिति वा यद्वा अश्रमं यथा भवति तथा तरन्ति स्मेति ॥ २८ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी।

अन्तं विनाशम् ॥ २५ ॥
सर्पति इतस्ततः प्रसरतीति सर्प इति शिरःसु नृत्येन तद्व-मनमशक्यमिति। तथा कालिय इति तन्नामप्रसिद्ध्यैव महाविषय-मत्वादिकं सूचितम् ॥ २६ ॥

विमदकरणप्रकारमेवाह। सप्ताहमिति। प्रथमश्चकारः उक्तस्य समुच्चये। द्वितीयोऽनुक्तस्य। तेन श्रीगोविन्दाभिषेकमपि गृही-तम् ॥ २७ ॥

तत्रैव भावविशेषवतीनां कासाञ्चित् स्त्रीणां वाक्यमाह। गोप्य इति। नित्यं मुदितं हर्षेण प्रसन्नञ्च तत् हसितेन प्रेक्षणमिव लोकनं यस्मिन् तच्च। यद्वा। नित्यं मुदितञ्च तत् अत एव हसितं हास्ययुक्तञ्च प्रकृष्टं कटाक्षादिना सुन्दरमीक्षणं यस्मिन् तच्च। यद्वा। उदितं हसितयुक्तं प्रेक्षणं यस्मिन् तादृशं मुदा

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी।

पश्यन्त्यः। अतएवाश्रमम् अनायासेन तरन्तिस्म अतरन्। ता एव तेऽत्रर्वास्माद्विधमन्दभाग्या इति दैन्येनातीतत्वं यद्वा स्म प्रसिद्धावेव मातीते। अतो वर्त्तमानप्रयोगस्तस्य व्रजगमने सम्भावनानपगमात् विविधान् गुरुपत्यादिकृतनिन्दातर्ज्जनादिना विरहादिभेदेन वा एवं रासादिलीलापि सूचिता॥ २८॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्।

चक्रवातः तृणावर्त्तः॥ २५-२८॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

अनेन श्रीकृष्णेन पूतना निहता तथा चक्रवातः तृणावर्तश्च दानवो निहतः अर्जुनौ पातिताविति शेषः अनेनेत्यनुषङ्गः धेनुकादयश्च तथाविधा अन्ये चाघासुरादयो निहताः तत्र गुह्यकः शङ्खचूडः॥ २५॥

एतेनैव गोपालैः सहिता गावश्चाग्नेः सकाशात्परिमोचिताः कालियाख्यः सर्पश्च अनेनैव दमितः विगतो मदो यस्य तथाभूतः इन्द्रश्च कृतः॥ २६॥

अद्रिप्रवरो गोवर्द्धनोऽनेन श्रीकृष्णेन कर्त्रा हस्तेन धृतः वर्षधाराभ्योऽशनिभ्यश्च गोकुलं परित्रातं रक्षितम्॥ २७॥

नित्यप्रमुदितं हसितमीक्षणञ्च यस्मिंस्तदस्य मुखं पश्यन्त्यः यद्वा नित्यविकसितं हसितेनेक्षणाभ्याञ्च युक्तमस्य मुखं मुदा पश्यन्त्यः विविधान् तापानाध्यात्मिकादीन् अश्रमं न श्रमो विद्यते यस्मिन्कर्मणि तद्यथा भवति तथा तरन्ति स्मातिवर्त्तन्ते स्म॥२८॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

अन्तं नाशं नीता गुह्यकः शङ्खचूडः॥ २५—२७॥

अश्रमञ्च तरन्ति॥ २८॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी।

न केवलं तूष्णीं वृद्धिं गतः किं तु चरित्राण्यपि कृतवानित्याहुः। पूतनेत्यादिपञ्चभिः। दुष्टनिग्रहः शिष्टदुःखदूरीकरणं तेभ्यः फलदानं चेति तत्र दुःखं त्रिविधम् आधिभौतिकमाधिदैविकमाध्यात्मिकमिति ततश्चरित्रं पञ्चविधं तत्र प्रथममाह। अनेन पूतना अन्तं नीता प्रथमं ततश्चक्रवातस्तृणावर्त्तः अन्तं नीतः स च दानवो महान् ततोऽर्ज्जुनौ यमलौ वृक्षौ ततो धेनुकः ततः साम्प्रतं केशी गुह्यकः शङ्खचूडः अन्ये चारिष्टादयः तद्विधाः पूर्वोक्तसमानाः "षडेते प्रतिपक्षास्तु इन्द्रियाणीव रूपिताः। अतिदिष्टास्तथा चान्ये सर्वतुल्या यतः परे"॥ २५॥

आधिभौतिकोपद्रवपरिहारमाह। गावः सपाला इति। एतेन भगवता सपाला गावः दावाग्नेः सकाशात् परितो मोचिताः अचेतनबाधानिराकरणमुक्तं सचेतननिराकरणमाह। कालीयः सर्पो दमितः आधिदैविकोऽपि भूततुल्यो जात इति वक्तुं सह कीर्त्तनम् इन्द्रश्च विमदः कृत इति चकाराद्ब्राह्मणाः वरुणादयश्च॥ २६॥

आधिदैविकोपद्रवनिराकरणमाह। सप्ताहमिति। एकहस्तेनाद्रिप्रवरो गोवर्द्धनः धृतः धारितः अनायासार्थमेकहस्तेन धृत इत्युक्तं सर्वत्राप्रयोजकव्यावृत्त्यर्थमुक्तिविशेषः यथा कालीयः सर्प इति सर्पो हि दमने दुःसाध्य इति अमुना भगवतेति बालकत्वं प्रदर्शितवन्तः किं धारणेन कृतमित्याशङ्कायामाह। वर्षवाताशनिभ्यश्चेति। अशनिप्रायाः पाषाणाः यदि वा क्षणं तिष्ठेयुस्तदाशनयोऽपि पतेयुरिति निर्द्धारितत्वादुक्तम् २७॥

आध्यात्मिकपीडापरिहारमाह। गोप्य इति। अशनिभ्यश्चेति चकारात् इन्द्रयागादपि उपधर्मात् परिपालिता इति गोप्यो हि अस्य मुखं पश्यन्त्यः विविधांस्तापान् जहुः नित्यमुदितं च तत् हसितपूर्वकं प्रेक्षितं यत्र तादृशं च नित्यमुदितत्वेन तत्र न किञ्चित्कर्तव्यं दृष्टिश्च अतः प्रवृत्ता भवति विवेकेन ये क्लेशाः ये वा अज्ञानेन ते उभये हसितप्रेक्षिताभ्यां निराकृताः मुखं हि परमानन्दरूपं विविधास्तापाः कामादयः अज्ञानादयः विषयानुरोधादयश्च तरणे प्रसिद्धिरेव प्रमाणम् अश्रममिति कर्मज्ञानभक्तिमार्गेषु श्रमोऽप्यस्त्यन्ततः अत्र तु श्रमाभावः किं च नौकानद्यादितरणे श्रमाभावोऽस्ति अत्र तु मुदेत्यधिकम्॥ २८॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

गुह्यकः शङ्खचूडः॥ २५—२७॥

अस्य कृष्णस्य विविधान् पतिश्वश्र्वादितर्जनानिरोधादीन् अश्रमं यथा स्यात्तथेति तत्र तासां दुःखगन्धोऽपि न भवेदित्यर्थः॥ २८॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

गुह्यकः शङ्खचूडः अन्ये चाघासुरादयः॥ २५—२७॥

अश्रमं यथा भवति तथा विविधान् तापान् तरन्ति स्म॥ २८॥

भाषा टीका।

इनने पूतना को मारा है तृणावर्त दानव को मारा है, यमलार्जुन को शंखचूड को केशी को धेनुक को और जो तैसे दुष्ट हैं उनको भी मारा है॥ २५॥

गोपालों के सहित सब गऊओं को इनने दावाग्नि में से छुडाया है कालिय सर्प को दमन किया है इंद्रको मद रहित किया है॥ २६॥

इन्हीने एक हाथ से गोवर्धन पर्वत को सात दिन तक धारण किया है वर्षा पवन वज्र आदिक से गोकुल की रक्षा की है॥ २७॥

नित्य ही गोपी सब इनके हास दृष्टि युक्त मुखारविंद का दर्शन करती हुई आनंद को पाकर सब श्रम और तापों से तर जाती हैं॥ २८॥

वदन्त्यनेन वंशोऽयं यदोः सुबहुविश्रुतः ।
श्रियं यशो महत्त्वञ्च लप्स्यते परिरक्षितः ॥ २९ ॥
अयञ्चास्याग्रजः श्रीमान् रामः कमललोचनः ।
प्रलम्बो निहतो येन वत्सको ये बकादयः ॥ ३० ॥
जनेष्वेवं ब्रुवाणेषु तूर्येषु निनदत्सु च ।
कृष्णरामौ समाभाष्य चाणूरो वाक्यमब्रवीत् ॥ ३१ ॥
हे नन्दसूनो ! हे राम ! भवन्तौ वीरसम्मतौ ।
नियुद्धकुशलौ श्रुत्वा राज्ञाहूतौ दिदृक्षुणा ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अनेन परिरक्षितो यदोर्वंशः सुबहुविश्रुतः सन् इत्यादि लप्स्यते इति वदन्तीति ॥ २९ ॥

धेनुकबकवत्सासुरेषु विपर्ययोक्तिर्जनवादेष्वनिश्चयात् ॥ ३० ॥

जनेष्वेवं ब्रुवाणेषु सत्सु तदसहमानश्चाणूरोऽब्रवीदिति ॥ ३१-३४ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

अथ श्रीमथुरादौ करिष्यमाणां लीलामुद्दिशन्ति । वदन्तीति । शास्त्रज्ञाः कथयन्ति महत्त्वं सर्वत उत्कर्षम् ॥ २९ ॥

एवं श्रीबलदेवस्याप्याहुः । अयमिति । अप्यर्थे चकारः । अग्रजत्वेन श्रीमान् तदनुरूपसर्वशोभायुक्तः तत्रापि नेत्रशोभया लोभयन्ति । कमलेति । वत्सको वत्सप्रतिरूप एव नतु वत्सः "इवे प्रतिकृता"विति कन् इति तद्वधदोषः प्रत्याख्यातः । आदिशब्दाद्धेनुकशातयः विपर्ययोक्तिस्तैर्योजिता । अत्र यथादृष्टं यथाश्रुतमित्युक्तेस्तत्त्वज्ञानाभाव एवोपजीव्यः ॥ ३० ॥

एवमेतत्प्रकारं ब्रुवाणेष्विति प्रहर्षेण तेषामुक्त्यसमाप्तिरुक्ता जनेष्विति बाहुल्यात्तेषामनिवार्यत्वं ज्ञापितं तदुक्तेरप्रमाणत्वञ्च खण्डितम् एवं तेषां मात्सर्यादयः । तूर्येषु नितरां नदत्स्वित्यनेन युद्धोत्साहश्च दर्शितः । अत एवाब्रवीत् । समाभाष्य आहूय सम्बोध्य वा वाक्यमिति पौनरुक्त्यं विशेषेण विशेषोऽत्र देय इत्यभिप्रायेण सच निष्ठुरमिति गम्यः । यद्वा । अकारप्रश्लेषेण वक्तुमयोग्यमित्यर्थः ॥ ३१ ॥

समाभाषणप्रकारमेवाह । हे इति । नन्दसूनुत्वेन सम्बोधनं तदीयसत्पुत्रत्वस्य व्यञ्जनाय । रामेति सकललोकरतिहेतुत्वस्य तत्कृत युद्धाय प्रोत्साहनं श्लेषेण तु गोपपुत्रत्वेनामहत्त्वं तद्वत् पितृसम्बन्धानुल्लेखेनाज्ञातपितृकत्वञ्च सूचयति तदुपहासेन तेजोग्लपनार्थमिति ज्ञेयं वीर्येण बलेन सम्मतौ लोकानामादृतौ तत्रापि नियुद्धे बाहुयुद्धे कुशलौ दक्षौ श्रुत्वा अतएव दिदृक्षुणा भवन्तौ नियुद्धं वा द्रष्टुमिच्छता राज्ञेति तद्योग्यतोक्ता । अहो अत्र मल्लयुद्धेन क्रीडतमिति भावः । अत्रापि विरोधिलक्षणयोपहास एव तात्पर्यम् ॥ ३२ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

अनेन परिरक्षितो वंश इत्यन्वयः ॥ २९-३७ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अनेन परिरक्षितो यदोर्वंशः सुबहुविस्तरः सन् विश्रुत इति पाठे प्रसिद्धः सन् श्रियं कीर्त्तिं महतां पूज्यतां च लप्स्यते ॥ २९ ॥

अथ रामस्य गुणान् सङ्ग्रहेण आहुः अयञ्चेति । अस्य श्रीकृष्णस्याग्रजोऽयं रामः कमललोचनः श्रीमान्कल्याणगुणसमृद्धिमाननेन प्रलम्बादयो निहताश्च ॥ ३० ॥

इतीत्थं जनेषु ब्रुवाणेषु तूर्येषु वाद्यमानेषु च सत्सु चाणूरः कृष्णरामौ समाभाष्य सम्बोध्य वाक्यमुवाच ॥ ३१ ॥

हे नन्दसूनो इति चतुर्भिः भवन्तौ वीराणां संमतौ मल्लयुद्धे प्रवीणाविति च श्रुत्वा दिदृक्षुणा युद्धदर्शनेच्छुना राज्ञा आहूतौ ॥ ३२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

इति वदन्ति अनेन कृष्णेन ॥ २९-३१ ॥

वीर्येण पराक्रमेण समतौ सम्यक् प्रख्यातौ नियुद्धं बाहुयुद्धं मल्लयुद्धमितियावत् तस्मिन् कुशलौ निपुणौ ॥ ३२ ॥ ३३ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

एवं दुःखाभावमुक्त्वा सत्सु सर्वसुखप्रदानं भविष्यदाहुः । वदन्त्यनेन वंशोऽयमिति । अनेन भगवता कृत्वा यदोर्वंशः विगीतोऽपि सुबहुविश्रुतो भविष्यति दुष्टो हि न श्रूयते दोषनिराकरणे तु स श्रूयते ततोऽपि गुणाधाने विश्रुतो भवति । अलौकिके तु गुणे बहुविश्रुतो भवति । मोक्षदानार्थं भगवति समागते तु सुबहविश्रुतो भवति । किं च श्रियं च लप्स्यते पूर्वस्मादधिकं यशश्च श्रियो हि सांसिद्धिको दोषो लोभ इति तन्निवृत्त्यर्थं यशसो निरूपणं बहिः शोभैषा अन्तः शोभार्थमाह । महत्त्वं चेति । महत्त्वेन सत्यादयः सर्वे गुणा उक्ताः चकारान्मोक्षं च प्राप्स्यति । अनेनैव परिरक्षितश्च भविष्यति

प्रियं राज्ञः प्रकुर्वन्त्यः श्रेयो विन्दन्ति वै प्रजाः ।
मनसा कर्मणा वाचा विपरीतमतोऽन्यथा ॥ ३३ ॥
नित्यं प्रमुदिता गोपा वत्सपाला यथा स्फुटम् ।
वनेषु मल्लयुद्धेन क्रीडन्तश्चारयन्ति गाः ॥ ३४ ॥
तस्माद्राज्ञः प्रियं यूयं वयश्च करवाम हे ।
भूतानि नः प्रसीदन्ति सर्वभूतमयो नृपः ॥ ३५ ॥

श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी ।

न तु सन्निपातेन म्रियमाणः यथा गङ्गया मुक्तः क्रियते तथा सति न सर्वोत्कर्षो भगवति समायाति ॥ २९ ॥

एवं भगवच्चरित्रमुक्त्वा प्रमाणबलमिव निरूपयन् बलभद्रचरित्रमाह । अयं चेति । यथा भगवान् षड्गुणैश्वर्य्यसम्पन्न एवमयमपीति चकारादतिदिश्यते अनेन तुल्यत्वनिरूपणेष्वपि उपदेशातिदेशकृतवैलक्षण्यमुक्तं भवति अस्य भगवतः अग्रजो ज्येष्ठभ्राता तस्य ज्येष्ठत्वे च हेतुमाह । श्रीमानिति । शोभातिशयवान् अधिकश्च दृश्यते राम इति प्रसिद्धः अनेन साधनरूपता तस्योक्ता कमललोचन इति दृष्टयैव सर्वतापनाशक इति अस्य पौरुषं तथा न प्रसिद्धमिति रूपमेव बहु वर्णितं पौरुषमप्याहुः । प्रलंबो निहतोऽनेनेति न वक्तव्यः लोके बलभद्रेण हत इति प्रसिद्धत्वाद्गणितः । धेनुकादय इति । तत्संबन्धिनः तालाश्च भगवतापि धेनुको हत इति प्रसिद्धिः अतः पूर्वमुक्तं ये वकादय इति वा पाठः अप्रसिद्धत्वात् दुर्दुरादय आदिशब्देन ग्राह्याः ॥ ३० ॥

एवं सर्वे भगवद्गुणतत्पराः कायवाङ्मनोभिर्भगवत्प्रपन्ना जाताः ततो गुणश्रवणेन मल्लानामपि रस आविर्भूत इत्याह । जनेष्विति । अन्यथा भयात् रौद्ररस उत्पन्नोऽपि प्रतिबद्धः स्थितः सीता एव रौद्ररसेन जाताः गुणश्रवणे तु रौद्रता गतेति इदानीं सम्भाषणार्थं प्रवृत्ताः एवं सर्वेष्वेव जनेषु प्रकर्षेण पूर्णेषु तूर्याणि च निरन्तरं वाद्यमानानि जातानि चकारात् मल्लविस्फोटनानि ॥ ३१ ॥

एवं मङ्गले सम्पन्ने स्वस्य जयमाशङ्क्य कृष्णरामौ समाभाष्य सम्यगाभाषणं कृत्वा कुशलप्रश्नादिकं विधाय ततः प्रसन्नौ ज्ञात्वा चाणूरो वाक्यमब्रवीत् मुख्यत्वात् पदार्थास्तदीया बाधितार्थाः युद्धं कर्तव्यमिति वाक्यार्थः परमबाधितः अतो वाक्यमित्युक्तं स हि चतुरः गोप्यं गोप्यत्वेनैव निरूपयन्नाह । हे नन्दसूनो ! इति । वस्तुतो जानात्येव नायं नन्दसूनुरिति तथा सति भ्रातरमिव भागिनेयमपि युद्धे न युञ्ज्यात् कंसः रामेति वचनं नाममात्रेण सन्तोषार्थम् उत्कर्षवाचकत्वात् बलभद्रेति नोक्तं सङ्कर्षणत्वं च गोप्यमेव नामग्रहणानन्तरं तयोस्तुतिमाह । भवन्तौ वीरसम्मताविति । पराक्रमे विषये सर्वैः स्तुतौ न कोऽपि युवयोः पराक्रमे विप्रतिपद्यत इति । अतः राज्ञा आहूतौ किं च नियुद्धकुशलौ मल्लानामिव बाहुयुद्धे समर्थौ राज्ञा श्रुतं प्रामाणिकमेव भवति अतो दिदृक्षुणा अर्थात् बाहुयुद्धं राज्ञा आहूतौ ॥ ३२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

अनेन रक्षितो यदोर्वंशः श्र्यादिकं लप्स्यते इति वदन्ति ॥ २० ॥ धेनुकवत्सकादिषु विपर्य्ययोक्तिर्जनवादेष्वनिश्चयात् ॥ ३० ॥ ३१ ॥ नियुद्धं बाहुयुद्धम् ॥ ३२ ॥ ३३ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

यदोर्वंशः अनेन श्रीकृष्णेन परिरक्षितः अत एव सुबहुविश्रुतः सन् श्र्यादिलप्स्यते इत्यन्वयः ॥ २९ ॥

वत्सको ये वकादयः ते रामेण निहताः इत्युक्तिरपि तन्मत्यनुरूपा अत एव ऊचुः परस्परं ते वै यथादृष्टं यथाश्रुतमित्यत्र यथामतीत्यपि योजनीयम् ॥ ३० ॥

चाणूरः प्राक्कंसानुशिष्टः जनवाद्यं चासहमानो ऽब्रवीत् ॥ ३१ ॥

तदेवं चाणूरस्य वयमिव रामकृष्णावपि राज्ञः प्रजान्तर्गतावित्येवं मन्वानस्य वाक्यं दर्शयति । हे नन्दसूनो इति चतुर्भिः ॥ ३२—३४ ॥

भाषा टीका ।

इन्हीं से यह यदुवंश बडा विख्यात होगा ऐसा कहते हैं यही वंश इनसे रक्षित हो कर श्री यश महत्त्वको प्राप्त हो जायगा ॥ २९ ॥

कमल नेत्र श्रीबलराम जी श्रीमान् इन के बडे भाई हैं जिनने प्रलम्ब वत्स वक आदिक असुरों को मारा है ॥ ३० ॥

इस प्रकार से मनुष्यों के बोलते संते और बाजान के तजते मै राम कृष्ण दोनों को संबोधन दे कर चाणूर मल्ल ने ये वचन कहे ॥ ३१ ॥

हे नन्द पुत्र श्रीकृष्ण ! हे बलराम ! तुम दोनों वीरों के बडे संमत हो तुम दोनों को बाहु युद्ध मे बडे प्रवीण सुन कर देखने की इच्छा से राजा ने बुलाया है ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

हे कृष्ण ! प्रियं करवामेति राज्ञि प्रीते भूतानि च प्रसीदेयुः ॥ ३५—३७ ॥

तन्निशम्याब्रवीत्कृष्णो देशकालोचितं वचः ।
नियुद्धमात्मनोऽभीष्टं मन्यमानोऽभिनन्द्य च ॥ ३६॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

तत्र च वैमुख्यं न युक्तं तथा च स्मृतिरित्याह । प्रियमिति । प्रकुर्वन्त्य इत्यार्षो लुम् एतच्च भवतोः श्रेयोऽर्थमिति भावः ॥ ३३ ॥

न वक्तव्यं गोपैरस्माभिस्तत्र सम्यक् ज्ञायत इति यतो नित्यमिति । गोपा गोपजातयो वा सपालाः वत्सपालत्वमारभ्य तथा तेन प्रकारेण वनेषु मल्लयुद्धेन क्रीडन्तो गाश्चारयन्तीत्यर्थः तदेतद्विधान्यस्य ग्राम्यस्य वाक्यानि कष्टान्वयानि यथावदेव मुनीन्द्रेणोपहासार्थमनूदितानीति ज्ञेयं गोपा गवां रक्षकाः समुच्चयेऽप्यर्थे वा तथाशब्दः वत्सपाला अपि गा गोजातीः स्फुटं व्यक्तं प्रसिद्धमेवेत्यर्थः । इदमपि निगूढोपहासयुक्तम् एवमुत्तरत्रापि यथेति पाठे यथावदित्यर्थः ॥ ३४ ॥

तर्हि गोपैः सह तत्क्रीडा कार्य्येति चेत्तत्राह । तस्मादिति । राज्ञः प्रियार्थमस्माभिः सह कार्य्येति भावः । भूतानि जीवाः नृपस्य सर्वभूतमयत्वं सर्वभूतस्य तदुपजीवनत्वात् तस्मान्निजप्रजारूपयोर्भवतोरनेन रक्षैव कार्य्येति माच भैष्टमिति भावः । अन्यत्तैः तत्रेतिशब्दस्य प्रकारार्थस्य राज्ञीत्यादिनान्वयः ॥ ३५ ॥

तन्निशम्याभिनन्द्य च देशकालोचितं तदानीं तादृशमेव वक्तुं योग्यं वचोमात्रमब्रवीत् वस्तुतोऽभिप्रायस्त्वन्य एवेति भावः । तादृशवचने हेतुः नियुद्धमित्यादि । तत्र हेतुः कृष्णः तादृशलीलाकौतुकितया प्रसिद्ध इत्यर्थः ॥ ३६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

मनः प्रभृतिकरणत्रयेण राज्ञः प्रियं कुर्वन्त्यः प्रजाः श्रेयः सुखं लभन्ते अतोऽन्यथाप्रियं कुर्वन्त्यस्तु विपरीतमश्रेयो दुःखं विन्दन्ति ॥ ३३ ॥

नावां नियुद्धे कुशलावित्यत आह । नित्यमिति । वत्सानां पाला वत्सपाला वत्सपालनयोग्यवयसः आरभ्येति भावः । गोपाः यावद्गोपालनयोग्यवयसः भवन्तः वनेषु मल्लयुद्धेन क्रीडन्त एव गाश्चारयन्ति अतो नियुद्धकुशलाववेतिभावः ॥ ३४ ॥

तस्माद्यूयं वयञ्च राज्ञः कंसस्य प्रियं करवामहे एवं राज्ञि प्रीते सति सर्वाणि भूतानि नोऽस्माकं प्रसीदन्ति कुतः यतो राजा सर्वभूतात्मकः ॥ ३५ ॥

तच्चाणूरवाक्यं निशम्याकर्ण्य भगवान्नियुद्धं स्वस्याभिमतमेव मन्यमानोऽत एव तद्वचो ऽभिनन्द्य देशकालोचितं वचो ऽब्रवीत् ॥ ३६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली

तत्कथमवगतमिति तत्राह । नित्येति । नियुद्धेन क्रीडन्तः गोपाला वत्सपालाश्च गोवत्सांश्च चारयन्तीति किंवदन्त्यावगतमित्यर्थः ॥ ३४ ॥

किं कलहेन फलमिति तत्राह । भूतानीति ॥ ३५ ॥ ३६ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

ननु राज्ञो दर्शने सुखं भवति अस्माकं कः पुरुषार्थ इति चेत्तत्राह । प्रियं राज्ञ इति । राज्ञः प्रियं प्रकर्षेण कुर्वन्त्यः तदधीनाः प्रजाः श्रेय उत्तमफलं धनादिकं विन्दन्ति परं कापट्ये फलं न भवतीत्यभिप्रायेणाह । मनसा कर्मणा वाचेति । ये हि कायवाङ्मनोभिः प्रियं कुर्वन्ति ते श्रेयो वै निश्चयेन विन्दन्ति । न केवलं प्रिये कृते श्रेयः प्राप्यते अन्यथा नेत्येतावदेव किं तु विपरीतं यः प्रियं न करोति कायवाङ्मनोभिः सः अतः अस्माद्धेतोः अन्यथा अश्रेयो मारणादिकं च प्राप्नोति यतः प्रजानामयं स्वधर्म इति ॥ ३३ ॥

नन्वस्माभिर्बालैर्वनस्थैः क्व मल्लयुद्धं शिक्षितमिति चेत्तत्राह । नित्यं प्रमुदिता इति । एके हि जीवितार्थं शिक्षन्ति अन्ये तु बलार्थं पुष्टाः सन्तः शिक्षकाः परम्परया प्राप्ताः परं ते लौकिका भवन्ति अतः शास्त्रीयेभ्यः फलतो हीना अपि स्वरूपतः पुष्टा भवन्ति तदाह । नित्यमेव प्रमुदिता गोपा बाल्येऽपि वत्सपालाः स्फुटमेव वनेषु मल्लयुद्धेन क्रीडन्तः गाश्चारयन्ति गोचारणे हि श्रमे दुग्धपानं स्वतः सिद्धं वृषभाणां निग्रहश्च बलिष्ठैरेव भवति अतः सर्वथा श्रुतं सत्यम् ॥ ३४ ॥

तस्माद्राज्ञः प्रियंकर्त्तव्यमित्याह । तस्मादिति । राजा हि सर्वाराध्यः अतो यूयं लौकिका वयं च शास्त्रीयाः चकारात् एवमन्ये विद्यावन्तोऽपि प्रियं करवामहे सर्वानेकीकृत्य वदति एकमार्गप्रवृत्तानां हि मुख्यानुसरणं युक्तमिति अस्माभिश्चेत्कर्त्तव्यं भवद्भिरपि कर्त्तव्यमेवेति ततः किमत आह । भूतानि नः प्रसीदन्ति इति । सर्वभूतमयः प्राणी अतस्तेषां हितं कर्त्तव्यम् अन्यथात्वे शापप्रसादे कृतघ्नता भवेत् फलदानार्थं यतः सर्वभूतमयो नृपः भूतान्यत्र देवतारूपाणि तस्य विवक्षितानि वस्तुतस्तु पाञ्चभौतिक एव ॥ ३५ ॥

ततो भगवान् युक्तियुक्तं ग्राह्यमिति लौकिकमपि न बाधनीयमित्यक्लिष्टकर्मा उत्तरमाहेत्याह । तन्निशम्येति । तद्युक्तियुक्तं वचः कृष्णस्तदर्थमेवावतीर्णः समागतश्च तथापि देशकालयोरनुचितं तदाह । लौकिकत्वात् प्रश्नस्य शास्त्रादियुद्धापेक्षया नियुद्धमात्मनोऽभीष्टं क्षत्रियाणां हि शस्त्रग्रहणं षोडशे वर्षे उपनयनानन्तरं च शिक्षा अत इदानीं बाहुयुद्धमेवात्मनोऽभीष्टं मन्यमानः देशकालावस्थानामनुगुणत्ववचनात् चाणूरमभिनन्द्य चकारात् राजानं च उवाच ॥ ३६ ॥

प्रजा भोजपतेरस्य वयं चापि वनेचराः ।
करवाम प्रियं नित्यं तन्नः परमनुग्रहः ॥ ३७ ॥
बाला वयं तुल्यबलैः क्रीडिष्यामो यथोचितम् ।
भवेन्नियुद्धं माऽधर्मः स्पृशेन्मल्लसभासदः ॥ ३८ ॥

॥ चाणूर उवाच ॥

न बालो न किशोरस्त्वं बलश्च बलिनांवरः ।
लीलयेभो हतो येन सहस्रद्विपसत्त्वभृत् ॥ ३९ ॥
तस्माद्भवद्भ्यां बलिभिर्योद्धव्यं नानयोऽत्र वै ।
मयि विक्रम वार्ष्णेय ! बलेन सह मुष्टिकः ॥ ४० ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे
पूर्वार्धे कुवलयापीडवधो नाम
त्रिचत्वारिंशोऽध्यायः ॥ ४३ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

नियुद्धकुशलत्वं कथमावयोरित्यत आह । नित्यमिति ॥ ३४॥३५ ॥ ३६ ॥ ३७ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

यस्मात्सर्वभूतमयः नृपः तस्माद्वयं यूयं च राज्ञः प्रियं करवाम एवं राज्ञि प्रीते सति हे कृष्ण ! नोऽस्माकं सर्वभूतानि प्रसीदन्ति प्रसीदेयुरित्यर्थः ॥ ३५—३७ ॥

भाषा टीका ।

राजा की प्रसन्नता करने से प्रजा का कल्याण होता है सो मन वचन कर्म से करनी चाहिये जो नहीं करै तो उलटा राजा कोप करता है ॥ ३३ ॥

आप गोपाल लोग वछरुओं के पालने में आनंदित होकर वनों में मल्ल युद्ध करत हैं सोवात प्रसिद्ध है ऐसी क्रीडा करते गउओंको चराते हैं ॥ ३४ ॥

तिससे हम तुम सब मिलकर राजा का संतोष करैंगे तब संपूर्ण प्राणी हम पर प्रसन्न होंगे क्योंकि राजा ही सर्व भूत मय है ॥ ३५ ॥

इस बात को सुनकर वाहु युद्ध को अपना अभिष्ट समुझकर उस देश काल के उचित वचन को श्रीकृष्ण भगवान् बोलते भये ॥ ३६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

यथोचितं नियुद्धं बाहुयुद्धं भवेत् मल्लसभासदो मल्लसभाधिकृतान् जनानधर्मो मास्पृशेन स्पृशेदित्यर्थः हे मल्लेति वा ॥ ३८ ॥

सहस्रद्विपानां सत्त्वं बलं बिभर्तीति तथा ॥ ३९ ॥

बालिभिर्मांदृशैः सह अनयोऽधर्मः विक्रम पराक्रमं कुरु मुष्टिको विक्रमतादित्यनुषङ्गः ॥ ४० ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
त्रिचत्वारिंशोऽध्यायः ॥ ४३ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

अभिनन्दनमेवाह । प्रजा इति । भोजपतेरिति गौरवात् तत्राप्यस्येति नतूग्रसेनस्यापीत्यर्थः । वयं च प्रजाः कीदृशा अपि वनेचरा अपि चकाराद्भवन्तस्तावत्तत्पुरवासिनः सुतरामेवेत्यर्थः । तस्माद्वयमपि राज्ञः प्रियमाज्ञाप्रतिपालनादिकं करवामैव तच्च नोऽस्मभ्यं भोजपतेरनुग्रह एव यत एव वयमत्र प्रवृत्ता भवामेति भावः । वस्तुतस्तु अस्येत्यनादरे वयं चापि वयमपि प्रजाः अपितु नैवेत्यर्थः । तत्र हेतुः वनेचराः नित्यं वृन्दावनविहारिण इत्यर्थः । अयन्त्वाधुनिक इति भावः । तस्माद्वयं राज्ञः स्वस्य श्रीगोपराजस्यैव प्रियङ्करवाम कर्तुमिच्छामः नतु भोजपतेः । नन्वीश्वरस्य तवान्यत्र राजत्वादिमननमाज्ञाप्रतिपालनादिकं चासम्भवमित्याशङ्क्याह । तच्च नोऽस्माकमनुग्रहः प्रेमविशेषकर्तृजनविषयश्चेतोद्रवविशेष एव येन तादृशीमपि वश्यतां प्रतिपद्येमहीति भावः ॥ ३७ ॥

बाला बालत्वेनाल्पबला इत्यर्थः । बहुत्वमन्येषामपि बालानां स्वकोटौ प्रवेश्य दृष्टान्तत्वव्यञ्जनाय सांसर्गिगोपवर्गापेक्षया वा तुल्यबलैरिति बालेष्वपि ये न्यूनबला अधिकबला वा तैरपि

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

नेत्यर्थः । क्रीडिष्याम इति । तत्रापि क्रीडायामेव ममेच्छेति भावः । अन्यत्तैः वस्तुतश्च हे बाला ! अस्माः तुल्यबलैः गोपैः सखिभिरेव सह क्रीडिष्यामः नत्वल्पबलैर्युष्माभिरित्यर्थः । "गोपैः समानगुणशीलवयोविलासवेषैश्च मूर्च्छितकलस्वनवेणुवीणै"रिति प्रसिद्धेः मल्लानामशनिरिति च तथापि भवादृशामाग्रहात्तत्र प्रवर्तामहे ततोऽशनिस्वभावमदङ्गस्पर्शेन भवतां वधे तु नास्माकं दोष इति भावः—

श्रीहरिवंशे विष्णुपर्वणि कंसवधे अष्टाशीतितमाध्याये ।
नियुद्धे निपातनानन्तरमवध्यस्यापि मल्लस्य ॥
तस्य वधे कार्ये स्वदोषपरिहारार्थे—
स्पष्टमेव श्रीभगवद्वचनम् ॥
अहं बालो महानन्ध्रो वपुषा पर्वतोपमः ।
युद्धं ममानेन सह रोचते बाहुशालिना ॥
युद्धव्यतिक्रमः कश्चिन्न भविष्यति मत्कृतः ।
न ह्यहं बाहुयोधानां दूषयिष्यामि यन्मतम् ॥
योऽयं करीषधर्मश्च तोयधर्मश्च रङ्गजः ।
कषायस्य च संसर्गः समयो ह्येष कल्पितः ॥
संयमः स्थिरता शौर्यं व्यायामः सत्क्रिया बलम् ।
रङ्गे च नियता सिद्धिरेतद्युद्धविदां मतम् ॥
यदयं बाहुयुद्धं वै सवैरं कर्तुमुद्यतः ।
अत्र वै निग्रहः कार्यस्तोषयिष्याम्यहं जगत् ॥
करूषेषु प्रसूतोऽयं चाणूरो नाम नामतः ।
बाहुयोधी शरीरेण कर्मभिश्चात्र चिन्त्यताम् ॥
एतेन बहवो मल्ला निपातानन्तरं हताः ।
स्वप्रतापकामेन मल्लमार्गश्च दूषितः ॥
शस्त्रसिद्धिस्तु योधानां सङ्ग्रामे शस्त्रयोधिनाम् ।
रङ्गे सिद्धिस्तु मल्लानां प्रतिमल्लनिपातजा ॥
रणे विजयमानस्य कीर्तिर्भवति शाश्वती ।
हतस्यापि रणे शक्रानीकपृष्ठं विधीयते ॥
रणे ह्युभयतः सिद्धिर्हतस्येह हतोऽपि वा ।
साहि प्राणान्तिकी यात्रा महद्भिः साधु पूजिता ॥
अयन्तु मार्गो बलतः क्रियातश्च विनिःसृतः ।
मृतस्य रङ्गे कः स्वर्गो जयतो वा कुतो रतिः ।
ये तु केचित् स्वदोषेण राज्ञः पण्डितमानिनः ॥
प्रतापार्थे हता मल्ला मल्लहन्तुर्वधो हि सः ।

इति ॥ ३८ ॥

किशोरश्च न भवसि तस्यापि बाल्यसादृश्येनाल्पबलत्वात् किन्तु बलिनां मध्ये वरः श्रेष्ठः वरत्वमेव दर्शयति । लीलयेति । येनेति । येन येनेत्यर्थः । द्वयोरपि स्कन्धे गजदन्तस्य दृष्टत्वादनुमाय तदिदं प्रोक्तमिति ज्ञेयम् ॥ ॥ ३९ ॥

बलिभिरिति वस्तुतः सर्वेषामेव मल्लानां क्रमेण नियुद्धेच्छया यद्वा बालिभिर्बहुभिरप्येकदा योद्धव्यं तथापि नान्यः कथं तर्हि भवता योद्धव्यमित्याशङ्क्य पुनः साभिमानमाह । मयि तु विक्रम बालत्वं स्वविक्रमं दर्शयेत्यर्थः । अहं तु न दर्शयिष्यामीति भावः नतु गोपा वयं राजसभायां न क्रीडायोग्या इत्यत्राह । हे वार्ष्णेय ! तदिदमपि वयं जानीम इति भावः ॥ ४० ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे
श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिण्याम्
त्रिचत्वारिंशोऽध्यायः ॥ ४३ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

बालशब्दोऽत्यन्तशैशवपरः ॥ ३८ ॥ ३९ ॥ ४० ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे
श्रीसुदर्शनसूरिकृतशुकपक्षीये
त्रिचत्वारिंशोऽध्यायः ॥ ४३ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तदेवाह । प्रजा इति द्वाभ्याम् । अस्य भोजपतेः कंसस्य वनेचरा वयमपि प्रजा एव तद्देशवनोपजीवित्वाद्वयमपि कथञ्चित्प्रजा एवेत्यर्थः । ननु युष्मद्विधा इति भावः । अतस्तस्य प्रियङ्करवाम परं केवलं तत्कथं चित्प्रीतिरित्येतन्नोऽस्माकमस्मद्विषयोऽनुग्रहः ॥ ३७ ॥

वयन्तु बाला अतस्तुल्यबलैः सह क्रीडिष्यामः नत्वधिकबलैर्भवद्भिरिति भावः । यथोचितं नियुद्धं भवेन्मल्लसभासदः मल्लसभाधिकृतानधर्मो मास्पृशतु हे मल्लेति वा ॥ ३८ ॥

एवमुक्तः प्राह चाणूरः । न बाल इति । बालशब्दोऽत्यन्तशैशवपरः तच्च दृष्टान्तार्थं यथा नात्यन्तशिशुस्तथा न किशोरोऽपि किं तु युवेति भावः । तथापि बलहीन इत्यत आह । बलिनांवरः । यादृशस्त्वं तादृश एव रामोऽपीत्याह । बलश्चेति । बलिनांवरत्वे लिङ्गं वदन् विशिनष्टि । येन त्वया लीलयैव सहस्रद्विपानां सत्त्वं बलं बिभर्तीति तथा इभो गजः कुवलयापीडो हतः ॥ ३९ ॥

तस्माद्बलिभ्यामावाभ्यां सह बलवद्भिर्युष्माभिर्योद्धव्यम् अत्र युद्धे अनयोऽधर्मो न विद्यते वै नूनं हे वार्ष्णेय ! मया सह त्वं विक्रम पराक्रमं कुरु युद्ध्यस्वेति यावत् बलेन रामेण सह तु मुष्टिको विक्रमिष्यते ॥ ४० ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
त्रिचत्वारिंशोऽध्यायः ॥ ४३ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

यूयं भोजपतेः प्रजाः वयं चापि विशेषोऽस्ति वयं वनेचराः यूयं तत्समीपचराः अतो विशेषप्रियाश्च तथापि वयं तस्य नित्यं प्रियं करवामो नाप्रियमिति यत्तस्माकः परमनुग्रह एव ॥ ३७ ॥

तत्रापि किञ्चित्कर्तव्यमस्तीत्याह । बाला इति । वयं बाला इति यदतस्तुल्यबलैः मल्लैः समं नियुद्धामित्ययं धर्मः अधर्मो मास्पृशेन स्पृशतु ॥ ३८ ॥

चाणूरः कृष्णोक्तं परिहरति । नेति ॥ ३९ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अनयोऽन्यायलक्षणः अधर्मः विक्रम विक्रमस्व मुष्टिका बलेन रामेण सह विक्रमं करोत्विति ॥ ४० ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्यां

एकचत्वारिंशोऽध्यायः ॥ ४१ ॥ ४३ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे

त्रिचत्वारिंशोऽध्यायः ॥ ४३ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

राज्ञः प्रियं प्रकर्त्तव्यमेव परं त्वया सह नियुद्धं न कर्त्तव्यम् अतुल्यबलत्वादिति तदाह द्वयेन । प्रजा इति । अस्य भोजपतेः कंसस्य प्रदर्शनेन तिरस्कृत इव वयमिति प्रदर्शनेन कथं वा प्रजात्वमित्युपहासितः वयं चकाराद्यूयं च वस्तुतस्तु यूयमेव वस्त्वर्थे वयं तु वनेचरा इति नास्माकं राज्ञा कृत्यं तथापि नित्यं करवाम फलं तु नापेक्ष्यत इत्याह । तन्नः परमनुग्रह इति । मातुलो हि राजा स चेद्भागिनेयगुणान् पश्येत् तदा अनुगृह्णीयादेवेति युक्तत्वादभिनन्दनम् ॥ ३७ ॥

एतावानर्थः साधारणः विशेषमाह । बाला वयमिति । प्रदर्शनमेव ह्यत्र प्रयोजनं न त्वन्यत् चेत्तदा बाहुयुद्धं शास्त्रानुसारेण कर्त्तव्यमिति तथैव करिष्याम इत्याह । बाला वयमिति। नियुद्धशास्त्रे हि समानवयस्कैरेव समानबलदेहैर्युद्धं कर्त्तव्यमिति हि स्थितिः अतः बालैः समानवयस्कैः तुल्यबलैरेतैर्गोपैः सह क्रीडिष्यामः तथा सत्युचितं भवति तदाह । यथोचितमिति । नन्वाज्ञा प्रमाणं कार्यमितीत्याशङ्क्याह । भवेन्नियुद्धमिति । समानैः क्रियमाणमेतस्मिन् युद्धेऽधर्मो मा भवेत् ततो द्रष्टॄणां मल्लसभासदां दोषोऽपि न भवेदित्याह । मल्लसभासदः । मा स्पृशेदिति । चाणूरो के हि लौकिको धर्मः तदविरुद्धोऽयं शास्त्रीयो धर्म इति युक्तमुक्तं भगवानपि चाणूरादयो दैत्या इति छलेनैवोक्तवान् बलसंबन्धिनो वयं बालाः तुल्यबलाः प्रातीतिकाः सखित्वाद्गोपा बलभद्रो वा भवांस्तु न तुल्यबलः किं तु हीनबल इति अभिप्रायेण प्रत्युक्तम् ॥ ३८ ॥

चाणूरस्तु विपरीतं ज्ञात्वा अनिष्टफलार्थं विपरीतत्वं सम्पाद्य युद्धार्थं प्रवर्त्तयते । न बाल इति द्वाभ्याम् । उपपत्त्या बलं साधयति न वा त्वं बालः बालाभिप्रायेण सूक्ष्मत्वमाशङ्क्य दृष्टसिद्धिं मत्वा अङ्गीकारे तत्परिहारार्थमाह । न किशोर इति । वयस्तु बलादिनियामकं न भवतीत्यभिप्रायः । वस्तुतोऽपि तथा बलश्चेति चकारात् सोऽपि न बालो न किशोरः किं तु बलिनां वरः सोऽपि भवांश्च उभयोर्बलमपि प्रतिज्ञाय अन्यतरबलसाधनदृष्टान्तेनैतत् साधयितुं सहस्रद्विपानां सत्त्वं बिभर्त्ति इति तादृशकुवलयापीडः द्विपस्य बलं शास्त्रप्रसिद्धं पुरुषाच्छतगुणं बलमिति भारं वहति पुरुषः शतभारं वहति गज इति तादृशोऽपि लीलयैव हतः न ह्यसाधनेन ससाधन इभः पुरुषेण बालेन वा हन्तुं शक्यः अतोऽतिपुरुषकारस्त्वयि वर्त्तत इति न भवान् पुरुषैस्तुल्यः ॥ ३९ ॥

एवं बलभद्रोऽपि ततः किमेतस्मादिति भवद्भ्यां सह गजादपि बलिष्ठैर्योद्धव्यम् एवं युद्धे नानयः शत्रुभिर्योद्धव्यमेव न्यायविरोधोऽपि नास्ति वै निश्चयेन तर्हि गोपालास्तथाविधाः सन्ति तैः सह युद्धं कर्त्तव्यमिति चेत्तत्राह । मया विक्रमेति । वार्ष्णेयेति सम्बोधनं छलं दूरीकरोति कपटं परित्यज्य स्पष्टं मया सह युद्धं तु कुरु त्वं कंसस्य भागिनेयो ऽ ततः किमिति छलवादः क्रियते छलं परित्यज्य मया सह द्वेषिणा स्पष्टं युद्धं कर्त्तव्यं तदाह । विक्रमेति । पराक्रमं कुरु बलेन सह च मुष्टिकः पराक्रमं करोतु अनेन मुष्टिको हीनबलः प्रबलस्त्वम् अहं महाबलस्त्वसोऽपीति निरूपितवान् अत एव भगवता चाणूरो हतः अन्यथा अक्लिष्टकर्मा न हन्यात् हननस्याप्रतिज्ञातत्वात् एवं वाग्बन्धावधि सर्वेषां द्रष्टॄणां भगवत्यासक्तिर्निरूपिता ॥ ४० ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे

श्रीमद्वल्लभदीक्षितविरचितायां सुबोधिन्याम्

चत्वारिंशाध्यायाविवरणम् ॥ ४० ॥ ४३ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

मल्लसभासदो मल्लसभाधिकृतान् अधर्मो मा स्पृशेदित्यतो बालैरेव सहक्रीडिष्यामोऽन्यथा त्वधर्मः स्पृशेदेवेति भावः ॥ ३८ ॥ ३९ ॥

बलिभिर्मद्विधैरेव सह न चात्रैर्बालैस्तेषां त्वत्तुल्यबलत्वाभावादिति भावः ॥ ४० ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।

दशमस्य त्रयश्चत्वारिंशोऽप्यजनि सङ्गतः ॥ ४३ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

एवं चेत्तर्हि राज्ञः मल्लसभाधिकृतजनद्वारा अधार्मिकत्वं यथा न स्यात्तथा क्रीडिष्याम इत्याह । बाला इति । तुल्यबलैः सह क्रीडिष्यामः न तु बलिभिर्भवद्भिः सहेति यथोचितं नियुद्धं भवेत् मल्लसभासदः मल्लसभाधिकृतान् जनान् अधर्मः सद्यो नाशहेतुर्मा स्पृशेत् ॥ ३८ ॥

सहस्रद्विपानां हस्तिनां सत्त्वं बलं बिभर्तीति तथा ॥ ३९ ॥

अनयोऽधर्मो नास्ति हे वार्ष्णेय ! त्वं मयि विक्रम पराक्रमं कुरु रामेण सह मुष्टिकः विक्रमताम् ॥ ४० ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे

त्रिचत्वारिंशाध्यायार्थप्रकाशः ॥ ४३ ॥

भाषा टीका ।

तुम लोग इन भोज राज के प्रजा हो और जंगल में रहने वाले हम भी प्रजा ही हैं हम सदा प्रिय करते ही हैं यह तो हमारे ऊपर बडा अनुग्रह ही है ॥ ३७ ॥

हम बालक हैं अपने बरोबर बळ वाले बालकों के साथ खेल कुस्ती करेंगे जैसा उचित है ऐसे युद्ध होने से मल्ल सभा वालों को अधर्म नहीं लगेगा ॥ ३८ ॥

चाणूर बोला तुम न बालक हो न किशोर हो ऐसे ही बलरामजी भी बलियों में बली हैं जिन तुमने कि हजारों हाथियों के जोर वाले कुवलया पीड को सहजही से मार दिया है ॥ ३९ ॥

तिससे तुम दोनों के साथ बळ वाले मल्लों को युद्ध करना चाहिये इसमें कोई अन्याय नहीं है हे कृष्ण ! मेरे साथ तुम युद्ध करो बलदेवजी के साथ मुष्टिक युद्ध करेगा ॥४०॥

इति श्रीभागवत दशमस्कन्धपूर्वार्धे तैतालीसमें अध्याय की भाषा टीका समाप्त ॥ ४३ ॥

इति श्रीमद्भागवते दशमस्कन्धे पूर्वार्धे त्रिचत्वारिंशोऽध्यायः ॥ ४३ ॥

॥ चतुश्चत्वारिंशोऽध्यायः ॥

श्रीशुक उवाच ।

एवं चर्चितसंकल्पो भगवान् मधुसूदनः ।
आससादाथ चाणूरं मुष्टिकं रोहिणीसुतः ॥ १ ॥
हस्ताभ्यां हस्तयोर्बद्ध्वा पद्भ्यामेव च पादयोः ।
विचकर्षतुरन्योऽन्यं प्रसह्य विजिगीषया ॥ २ ॥
अरत्नी द्वे अरत्निभ्यां जानुभ्यां चैव जानुनी ।
शिरश्शिरष्णोरसोरस्तावन्योऽन्यमभिजघ्नतुः ॥ ३ ॥
परिभ्रामणविक्षेपपरिरम्भावपातनैः ।
उत्सर्पणापसर्पणैश्चान्योऽन्यं प्रत्यरुन्धताम् ॥ ४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

चतुश्चत्वारिंशके तु मल्लकंसादिमर्दनम् ।
कंसयोषित्समाश्वासस्ताभ्यां पित्रोश्च दर्शनम् ॥

चर्चितो निश्चित एव सङ्कल्पो यस्य सः ॥ १ ॥ २ ॥

बाहुमध्यात्कनिष्ठाङ्गुलिव्यतिरेकेण कृतमुष्टिर्हस्तोऽरत्निः ॥ ३ ॥

परिभ्रामणं हस्तादिषु गृहीत्वा परितश्चालनम् विक्षेपो नोदनम् परिरम्भो बाहुभ्यां निष्पीडनम् अवपातनमधः क्षेपः उत्सर्पणमुत्सृज्य पुरतो गमनम् अपसर्पणं पृष्ठतो गमनम् एतैः प्रत्यरुन्धतां प्रत्यावृतवन्तौ ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

भगवानशेषैश्वर्यसम्पन्न इति सद्य एव इच्छामात्रेण तद्वधसामर्थ्यं सूचितं तथापि चाणूरमाससाद क्षणं मल्लयुद्धकौतुकार्थमन्तिके गतः यतो मधुसूदनः यथा सद्यो हन्तुं शक्तोऽपि चिरं बाहुयुद्धक्रीडां कृत्वा मधुं हतवान् तद्वदित्यर्थः । "लोकवत्तु लीलाकैवल्यम्" इति न्यायेनेति भावः । अथ तदनन्तरं मुष्टिकमित्यादि । आससाद इति क्वचित् पाठः ॥ १ ॥

क्रीडामेवाह । हस्ताभ्यामित्यादि चतुर्भिः । चकार उक्तसमुच्चये एवशब्दस्य, हस्ताभ्यामित्यनेनाप्यन्वयः । अन्येनान्यस्य मिश्रणे वैषम्यापत्त्या मल्लक्रीडापाटवहानेः । एवमग्रेऽपि । अन्योऽन्यं विजिगीषयेति श्रीभगवतोऽपि नरलीलायुद्धव्यवसायत्वेन जयेच्छासम्भवात् ॥ २ ॥

द्वे इति प्रत्येकं पृथगित्यर्थः । तौ श्रीभगवच्चाणूरौ ताविव्यस्य पूर्वेण परेणाप्यन्वयः । अभितो जघ्नतुः प्रहृतवन्तौ । अरत्निशब्दस्तैर्व्याख्यातः । अत्र प्रमाणवाचकः खल्वयं ततस्तेन युद्धं न सम्भवति कथञ्चित्तद्व्यञ्जकाकाराङ्गवाचकत्वेऽपि निःसृतकनिष्ठाङ्गुलितया प्रहारसौकर्यं न सम्भवति नापि मल्लेन तादृशं युद्धं प्रसिद्धं तस्मान्मुष्ट्युपलक्षितत्वेन कथञ्चिन्मुष्टिरेव वाच्या व्याख्यास्यते च भगवद्गात्राणामरत्निजान्वादीनामिति । यद्वा । अरत्निः कफणौ हस्ते सप्रकोष्ठ तदङ्गुलाविति विश्वप्रकाशात् कफोणिरेवोच्यते । कफोणिः कफणिस्तथेति द्विरूपकोषादिति ॥३॥

उत्सर्पणमग्रे गमनम् अपसर्पणं पश्चाद्गमनं प्रत्यरुन्धतामित्यस्य स्थाने लुङ्प्रयोगे श्नम्प्रत्यय आर्षः । परस्परं मुहुः स्थगितोद्यमं चक्रतुरित्यर्थः ॥ ४ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

॥ १—९ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अथ चाणूरमुष्टिककूटशलकंसवधात्मकं कर्मानुवर्णयति चतुश्चत्वारिंशेन । एवञ्चर्चितो निश्चितः स्वसङ्कल्प एव यस्य सः चाणूरमाससादाभ्यपद्यत तथा रोहिणीसुतो रामो मुष्टिकमाससाद ॥ १ ॥

तदा तौ कृष्णचाणूरौ राममुष्टिकौ च हस्तयोर्हस्ताभ्यां पादयोः पादाभ्यां च बद्ध्वा परस्परं जेतुमिच्छयाऽन्योऽन्यं विचकर्षतुर्विकृष्टवन्तौ ॥ २ ॥

कनिष्ठां विना कृतमुष्टिहस्तोऽरत्निः अरत्निभ्यां द्वे जानुनी मिथोऽभिजघ्नतुः तथा जानुभ्यां जानुनी शिरसा शिरः उरसोरश्चाभिजघ्नतुः ॥ ३ ॥

परिभ्रमणं हस्तादिषु गृहीत्वा परितश्चालनं विक्षेपो नोदनं परि-

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका

रम्भो बाहुभ्यां पीडनम् अवपातनमधः पातनम् उत्सर्पणम् उत्सृज्य पुरतो गमनम् अपसर्पणं पृष्ठतो गमनमेतैस्तौ कृष्णचाणूरौ राममुष्टिकौ चान्योऽन्यं प्रत्यरुन्धतां प्रत्यावृतवन्तौ ॥ ४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

एवञ्चाणूरोक्तप्रकारेण चिन्तितः सङ्कल्पो मनोरथो येन स तथा हेति युद्धप्रारम्भे प्रत्यारम्भे प्रासिद्धौ हेति च ॥ १ ॥

तत्र मल्लयुद्धकरणप्रकारं कथयति । हस्ताभ्यामिति ।
आस्फोटय हस्तौ हस्ताभ्यामूरूचैव परस्परम् ।
विसृज्य भूयः सङ्गृह्य परिक्रम्य परस्परम् ॥
इत्येकश्लोकमादित्वेन केचित्पठन्ति ॥ २ ॥ ३ ॥

विक्षेप आकृष्य मोचनम् अवपातनमधोमुखेन पातनम् उत्सर्पणमुत्क्षेपः अपसर्पः पृष्ठतो गमनम् ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

अरत्निः कफोणिः । अरत्निः कफूणौ हस्ते सप्रकोष्ठतलाङ्गुलाविति विश्वप्रकाशात् । कफोणिः कफणिस्तथेति द्विरूपकोशात् ॥ १—४ ॥

श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी ।

एकचत्वारिंशत्तमे वधः कंसस्य रूप्यते ।
तदीयैः सह तस्माद्धि पित्रो रोधश्च दीनयोः ॥
बलक्षयाय लीलापि वाक्यान्यासक्तिबोधने ।
भक्तार्थं मारणं चास्य कंसस्यापि तथैव च ॥
प्रतिबन्धनिवृत्त्यर्थमेतावद्भगवत्कृतम् ।
निरुद्धास्तेऽपि मुक्ता हि पूर्वस्माच्च विशिष्टता ।
बोधिता ज्ञानकथनात् आसक्तिश्च स्थितैव हि ॥
त्रिविधाः सर्व एवैते गुणातीतोऽपि सात्त्विकः ।
अथावतिः पुनर्वाच्यास्तत्रैके मोचिताः स्वतः ॥
निरुद्धाः सफलाः प्रोक्ताः पितरौ पूर्वतोऽधिकौ ।

पूर्वाध्याये युद्धार्थं चाणूराकरणमुक्तम् आहूतो न निवर्त्तेतेति शास्त्रात् हीनबलेनापि युद्धार्थं प्रवृत्ताविस्याह । एवमिति । चर्चितो विचारितः सङ्कल्पो येन यस्य वा चर्चा हि विचारात्मिका अविचार्य चेत् दुर्बलेन सह युद्धं कुर्यात्तदा दोषो भवेत् किं च भगवान् तद्धृदयमपि जानाति युद्धाभावे न निवर्त्तेत इति शङ्का तु नास्तीत्याह । मधुसूदन इति । यो मधुमपि हन्ति तत्रायं को वराक इति अत एवाससाद निकटे सम्बद्धो जातः अथेति प्रथमं चाणूरस्य यश्चाणूरः स्वस्मिन् योजितः भिन्नपक्षे मारितो दूरीकृतो वा अथ तदनन्तरं चाणूरमाससाद मुष्टिकं तु रोहिणीसुत इति मुष्टिको ह्यप्रयोजकः बिभेति च स्वतः स्वयं च नोक्तवान् तथापि चाणूरे संलग्ने तद्वाक्यात् स्वयमपि संलग्नः तदनुचितमिति रोहिणीसुत इत्युक्तम् ॥ १ ॥

मल्लयुद्धप्रकारेण प्रवृत्ताविति तदाह चतुर्भिः—

बलं शिक्षा च माया च प्रसादश्च गुरोस्तथा ।
चत्वारोऽपि निराकार्यास्ततः श्लोकचतुष्टयम् ॥

हस्ताभ्यामिति । हस्ताग्रे हस्ताग्रं धृत्वा पादाग्रे च पादाग्रं विचकर्षतुः प्रथमं समत्वायाह । अन्योऽन्यं प्रसह्य विजिगीषया आकर्षणं कृतवन्तौ येनैवाकृष्टोपरः आकृष्टो भवति स पराजितो भवति इति अङ्गुलीनां बन्धनं परस्परमुभयोः अत्रैव जये महाबलत्वम् ॥ २ ॥

ततः साक्षात्सर्वाङ्गेषु संयोगेन युद्धमाह । अरत्नी द्वे इति । हस्तमध्ये उभयत्रापि हस्तसम्बन्धः अरत्निवाच्यो भवति तथा जानुद्वयमपि अधोभागसहितजानुद्वयेन संवेष्टितं भवति क्रमेणैतच्चतुष्टयं बोद्धव्यं शिरः शीर्ष्णा उरसा उरः एवं तौ अन्योन्यमाभिमुख्येन जघ्नतुः ॥ ३ ॥

बलशिक्षे निरूपिते मायया शास्त्रीयप्रकारमाह । परिभ्रामणेति । परितो भ्रामणमेकस्यैकेन ततो दूरे विक्षेपः ततः पुनरागतयोः परिरम्भः गाढालिङ्गनं ततो मिलितेनैव भूमाववपातनम् एवं चत्वारः एकक्रमेण ततो विश्लिष्टयोः उत्सर्पणमूर्ध्वे प्रक्षेपः अपसर्पणं हत्वा पश्चात्सर्पणमधः सर्पणं वा पतितो मल्लः ऊर्ध्वे सर्पणेनापि उपरितनं जयति उपरितनो वा अधस्तनम् एवमन्योऽन्यं प्रत्यरुन्धताम् अन्योऽन्यस्य बलं यथा प्रतिरुद्धं भवति ॥ ४ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

चतुश्चत्वारिंशकेऽत्र मल्लकंसा हताः स्त्रियः ।
आश्वासिताश्च भ्रातृभ्यामभूत् पित्रोश्च दर्शनम् ॥

चर्चितश्चाणूरमहं हन्यामिति विचारितः संकल्पो येन सः ॥ १ ॥ २ ॥

कनिष्ठाङ्गुलिव्यतिरेकेण कृतमुष्टिर्हस्तोऽरत्निः यद्यपि ताभ्यां मल्लयुद्धं दुष्करत्वादप्रसिद्धं प्रसिद्धं तु समुष्टिहस्ताभ्यामेव तथापि वेणुवाद्य उरुधा निजाशिक्षा इतिवद्भगवता निष्कनिष्ठमुष्टिहस्तेनैवारब्धे नियुद्धे चाणूरेणापि कष्टं प्राप्तेनापि वीराभिमानिना तथा कृतमिति ज्ञेयम् ॥ ३ ॥

परिभ्रामणं हस्तादिषु गृहीत्वा परितश्चालनं विक्षेपो नोदनं परिरम्भो बाहुभ्यां निष्पीडनमवपातनमधःक्षेपः उत्सर्पणमुत्सृज्य पुरतो गमनम् अपसर्पणं पृष्ठतो गमनम् एतैः प्रत्यरुन्धतां प्रत्यावृतवन्तौ लुङि इनम्प्रत्यय आर्षः ॥ ४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

चतुश्चत्वारिंशे मल्लकंसवधादिकं भगवत्कर्म वर्णयति । एवमिति । एवं चर्चितो निश्चितः संकल्प एव यस्य सः ॥ १ ॥

कृष्णचाणूरौ राममुष्टिकौ च विजिगीषया अन्योऽन्यं जेतुमिच्छया विचकर्षतुः ॥ २ ॥

अरत्न्यादिकमरत्न्यादिभिरन्योऽन्यमभिजघ्नतुः तत्र बद्धमुष्टिर्बाहुमध्यात्कनिष्ठाङ्गुलिमूलपर्य्यन्तो हस्तोऽरत्निशब्दार्थः ॥ ३ ॥

किंच परिभ्रामणादिभिरन्योऽन्यं प्रत्यरुन्धतां प्रत्यावृतवन्तौ तत्र हस्तादिषु गृहीत्वा परितश्चालनं परिभ्रामणम् नोदनं विक्षेपः

उत्थापनैरुन्नयनैश्चालनैः स्थापनैरपि ।
परस्परं जिगीषन्तावपचक्रतुरात्मनः ॥ ५ ॥
तद्बलाबलवद्युद्धं समेताः सर्वयोषितः ।
ऊचुः परस्परं राजन् ! सानुकम्पा वरूथशः ॥ ६ ॥
महानयं बताधर्म एषां राजसभासदाम् ।
ये बलाबलवद्युद्धं राज्ञोऽन्विच्छन्ति पश्यतः ॥ ७ ॥
क्व वज्रसारसर्वाङ्गौ मल्लौ शैलेन्द्रसन्निभौ ।
क्व चातिसुकुमाराङ्गौ किशोरौ नाप्तयौवनौ ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

बाहुभ्यां निष्पीडनं परिरम्भः अधः क्षेपो ऽवपातनम् उत्सृज्य पुरतो गमनमुत्सर्पणं पृष्ठतो गमनमपसर्पणम् ॥ ४ ॥

भाषा टीका।

श्रीशुकदेवजी बोले मधुसूदन भगवान् इस प्रकार संकल्प करके चाणूर के पास जाकर उपस्थित भये इसी प्रकार से रोहिणी पुत्र वलदेवजी मुष्टिक के पास पहुंच गये ॥ १ ॥

वे दोनों दोनों हाथों से हाथों को पादों से पादों को जोड़ कर जीतने की इच्छा से आपस में एक को एक खैंचते भये ॥ २ ॥

कनिष्ठिका छोडकर पंजा से पंजा मिलाकर जंघा से जंघा पिंडरी से पिंडरी मिलाकर शिर से शिर छाती से छाती जोडकर आपस में एक को एक प्रहार करते भये ॥ ३ ॥

घुमाना फैंकना पकड लेना नीचे डार देना छोडकर पीछे हटना पीछे से दौड़ जाना इस प्रकार से एक को एक घेर कर लडाई करते भये ॥ ४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

उत्थापनं जानुनी पादौ च पिण्डीकृत्य पतितस्योच्चाटनम् उन्नयनं हस्ताभ्यामुद्धृत्य नयनम् चालनं कण्ठादिलग्नस्य निःसारणं स्थापनं पादादिपिण्डीकरणम् एवं परस्परमात्मनो देहस्यापचक्रतुरपकारं कृतवन्तौ ॥ ५ ॥

तद्युद्धं बलाबलवदेकतो बलमन्यतोऽबलं तद्युक्तं विषममित्यूचुरित्यर्थः ॥ ६ ॥

तदेव दर्शयति । महानिति । यद्वा बलाबलवतोर्युद्धं दृष्ट्वा महानयमधर्म इत्यूचुरित्यन्वयः बालयोर्बलवतोश्च युद्धं राजा चेत्पश्येत्स्वयं वारणीयः एते तु राज्ञः पश्यतः स्वयमन्विच्छन्त्यनुमन्यन्त इति महानधर्म इत्यर्थः ॥ ७ ॥

बलाबलवद्युद्धतां प्रपञ्चयति पञ्चभिः । क्वेति । वज्रसाराणि वज्रवत्काठिनानि सर्वाण्यङ्गानि ययोस्तौ ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

आत्मनोऽपचक्रतुरिति श्रीभगवतो वस्तुतस्तदभावेऽपि चाणूराभिप्रायानुसारतः ॥ ५ ॥

तद्युद्धं बलाबलवदूचुरित्यन्वयः । सानुकम्पा इति तेषां शुद्धप्रेम्णः प्रशंसा वरूथशः स्वस्ववर्गभेदेन ॥ ६ ॥

किमूचुस्तदाह । महानिति दशभिः । राजसभ्यत्वेन धर्मज्ञत्वादियोग्यतोक्ता । राज्ञि पश्यतीत्यर्थः । बत खेदे ॥ ७ ॥

क्व अत्यन्तबाधकेऽधर्मे तथा क्व अत्यन्तबाध्ये धर्मे वर्त्तेते इत्यर्थः । सम्मिलिताविति वा पाठः ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

उत्थापनं पादौ जानुनी च पिण्डीकृत्य पतितस्योत्थापनम् उन्नयनं हस्ताभ्यामुद्धृत्य नयनं चालनं कण्ठादिलग्नस्य निःसारणं स्थापनं पाणिपादादेः पिण्डीकरणम् एभिः परस्परमात्मनो देहस्यापचक्रतुरपकृतवन्तौ ॥ ५ ॥

तदा हे राजन् ! सर्वाः योषितः सङ्घशः समेत्य सहिताः सानुकम्पा रामकृष्णविषयकानुकम्पायुक्ता अत एव परस्परं बलाबलवद्युद्धमूचुः एकतो बलमन्यतोऽबलं तद्युक्तं विषममित्यूचुरित्यर्थः ॥ ६ ॥

तदेव दर्शयितुं तासामुक्तिमाह । महानिति दशभिः । एषां राजसभासदां राजसभाधिकृतानामयं महानधर्मः बतेति खेदे कोऽसावधर्म इत्यत्र विशेषणमुखेनाहुः । य इति । ये राजसभासदः बलयोश्चाबलवतोश्च युद्धमन्विच्छन्ति राजा चेत्पश्येत्स्वयं वारणीयः एते तु राज्ञः पश्यतः स्वयमप्यन्विच्छन्त्यनुमन्यन्त इत्ययं महानधर्म इत्यर्थः ॥ ७ ॥

बलाबलवद्युद्धमेव दर्शयति पञ्चभिः । क्वेति । वज्रवत्काठिनानि सर्वाङ्गानि ययोस्तौ शैलेन्द्रतुल्यौ मल्लौ क्व अतिसुकुमाराण्यङ्गानि ययोरनाप्तमप्राप्तं यौवनं याभ्यां तावेतौ किशोरौ क्व ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

उन्नमनमुत्तानीकरणम् अभिचक्रतुः मुष्ट्यादियुद्धं कृतवन्तौ

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

मल्लयुद्धं नियुद्धञ्च विशेषेदं प्रचक्षते ।
द्वात्रिंशद्भेदमपरे चत्वारिंशद्विधं तथेति ॥

सङ्ग्रामविजयवचनात् सर्वनियुद्धविधिदर्शनार्थं भगवतैवं क्रीडितं तत्तद्विधायासाभावादयमेवार्थ उपरि तैस्तैर्नियुद्धविधिभिर्विविधैरच्युतेतरौ युयुधात इत्यादिना सूच्यते च ॥ ५ ॥

बालबलवतोः कृष्णचाणूरयोः युद्धं तत्प्रेक्ष्य वरूथशः सङ्घशः ॥६॥

राजसभायां सीदन्त्युपविशन्तीति राजसभासदः तेषां कोऽयमधर्म इत्याहुः । य इति । बालस्य बलवता सह युद्धमन्विच्छन्ति अनुकूलं मन्वते राज्ञः पश्यतः सत इत्यनेन उभयेषामप्यधर्मः प्राप्त इति ज्ञायते ॥ ७ ॥

कथमधर्म आसीदिति तत्राहुः । क्वेति । वज्रवत्साराणि बलाढ्यानि सर्वाणि अङ्गानि करचरणादीनि ययोस्तौ तथा--

सारो बले स्थिरांशे ऽर्थे पुमान्न्याये वरे ऽर्थवद् ।

इति च ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

आत्मनोऽपचक्रतुरिति श्रीभगवतस्तदभावेऽपि चाणूराभिप्रायानुसारात् ॥ ५—६ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

ततः प्रसादेनापि प्राप्तैः प्रकारैर्युद्धमाह । उत्थापनैरिति । उपविष्टं स्थिरं प्रतिज्ञाय उत्थापनं करोति स जयति यस्तूर्ध्वं तिष्ठति तं य उन्नमयति सोऽपि जयति तथा यः स्थिरो भवति तं च यश्चालयति प्रतिज्ञया सोऽपि तथा यश्चलतीतस्ततस्तं यः स्थिरीकरोति सोऽपि एवमेतेऽपि चत्वारः प्रकाराः तैः जिगीषन्तौ मल्लौ आत्मनः अपचक्रतुः देहस्यापकारं कृतवन्तौ अत्र सङ्घातः प्रत्यक्षः स्थूलः कार्पास इव चाणूरादेः सूक्ष्मोऽतिनिष्ठुरः वज्रस्येव भगवतः ॥ ५ ॥

एवं फलतः भगवज्जयेऽपि प्रतीत्या विपरीत इति ये पूर्वं स्वासक्ताः कृताः तत्रापि स्त्रियो मुग्धाः तास्त्वसहमानाः स्वहृदयस्थं भावं प्रकाशितवत्य इत्याह । तदिति एकादशभिः । तत्र सप्तभिर्दृष्टवर्णनं भगवच्चरित्रत्वाय चतुर्भिः स्वानिन्दार्थं गोपिकास्तोत्रमिति तत्र प्रथमं युद्धं दृष्ट्वा खिन्नानामाक्रोशार्थं प्रवृत्तिमाह । तद्युद्धं बलाबलवत् अतः परस्परं योषितः समताः सानुकम्पाः स्वस्वदेशग्रामभेदेन वरूथशः समेताः वक्ष्यमाणमूचुरिति संबन्धः तत्प्रसिद्धं वा बलाबलवद्युद्धमेवोचुः एतद्बलाबलयुक्तमिति ततस्तस्य दोषानप्यत्र ऊचुरिति केचित्तद्युद्धमालक्ष्य वा समेताः बलाबलवतोर्युद्धं बलं चाबलं च मतुबुभयत्र सम्बध्यते तयोः बलाबलयुक्तं यथा भवति तथा वा युद्धं सर्वयोषित इति । निरोध एव नियामको न सम्बन्धादिरियुक्तं परस्परामिति । समानशीलव्यसनता सर्वेषामुक्ता राजन्निति स्नेहात्सम्बोधनमवधानाय स्त्रीणां वचनमिति कदाचिदुपेक्षां कुर्यादिति स्निग्धे स्नेहस्यायं गुणः सत्समर्थेऽप्यसमर्थबुद्धिरिति समूहबाहुल्ये हि सम्यक् श्रवणं भवतीति दशविधा बाललीलया सगुणा नवविधा एकविधा निर्गुणा इति एवं दशप्रकारसमूहाः ॥ ६ ॥

तत्रैकाः न्यायाभिनिविष्टाः अन्यायमसहमाना आहुः । महानयमिति । वतेति खेदे कथमेवमकस्मात् अनर्थः प्रवृत्त इति अयं महानेवाधर्मः एषां राजसभासदां भविष्यति यद्यपि राजसम्बन्ध एवाधर्मः तत्रापि सभासम्बन्धः तत्राप्याधिकारः सर्वापेक्षयापि अयं महानेवाधर्मः तमेवाह निमित्त वा ये बालवलवद्युद्धमिति । एको बालः अपरो बलवानिति तयोर्युद्धं शास्त्रविरुद्धमिति तत्रापि राज्ञः पश्यतः राजा हि धर्ममूर्तिः तस्य दर्शने सुतरामधिकृतैरन्यायो न कर्त्तव्य इति अतः राज्ञः पश्यतोऽपि सतः अन्विच्छन्तीति । अनेन राजाप्येवं ज्ञास्यति एते सर्वत्रैवंभूता दुष्टा इति ततो दुष्टयापकारोऽपि भविष्यतीति तासामाशयः ॥ ७ ॥

ननु भगवानपि सबळो बळिष्ठः अतो नाधर्मो भविष्यतीति चेत्तत्राहुः । क्व वज्रसारसर्वाङ्गाविति । नहि बाधितमर्थं वेदोऽपि बोधयति भगवतोऽङ्गानि कोमलानीत्यनुभवसिद्धं मल्लानामप्यङ्गान्यतिकठिनानि इत्यपि लोकप्रसिद्धिः किञ्च तावुभौ एतौ च सूक्ष्मौ यत्र कृतिस्तत्र गुणा इति । न्यायविरोधोऽत्र प्रदर्शितः तदाहुः । वज्रादपि सारभूतानि सर्वाङ्गानि ययोः सुतरां मल्लौ मल्लविद्यायां निपुणौ तत्रापि शैलेन्द्रसन्निभौ महामेरुतुल्यौ क्व एतौ बालकौ वा अतिसुकुमारौ क्व अत्यन्तसुकुमाराण्यङ्गानि ययोः वयसा तु किशोरौ लोके किशोरावपि देहवशाद्बीजादिवशाद्वा प्राप्तयौवनाविव भवतः तदपि नास्तीत्याहुः । न प्राप्तं यौवनं याभ्यामिति नसमासः स्पष्टतया प्रदर्शनार्थः ॥ ८ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

उत्थापनं पादौ जानुनी च पिण्डीकृत्य पतितस्योच्चाटनं उन्नयनं हस्ताभ्यामुद्धृत्य नयनं चालनं कण्ठादिलग्नस्य निःसारणं स्थापनं पाणिपादादिपिण्डीकरणम् एवं परस्परमात्मनो देहस्यापचक्रतुः भगवतस्तदभावेऽपि द्रष्टृलोकाभिप्रायमनुसृत्य तथोक्तम् ॥ ५ ॥

तद्युद्धं बलाबलवत् ऊचुरित्यन्वयः एकतो बळम् अन्यतश्चाबलं तद्वत् तद्युक्तमतो विषममित्यर्थः । तत्र हेतुः सानुकम्पा इति । स्नेहस्य स्वभाव एवायं यत् स्वविषयस्य बलाधिक्यं न प्रत्याययेदिति ॥ ६ ॥

तासामुक्तिमाह । महानिति दशभिः । बालाभ्यां सह बलवतो युद्धं राजा चेत् पश्येत् सोऽपि वारणीयः एते तु राज्ञः पश्यतोऽनुपश्चात् स्वयमपि पश्यन्ति इच्छतस्तस्यानु स्वयमपीच्छन्तीति शत्रन्तस्य दृशेराक्षेपात् तिङन्तोऽपि दृशिर्लभ्यते तथैव तिङन्तस्येच्छतेराक्षेपात् सोऽपि शत्रन्तो लभ्यते ॥ ७ ॥

बलवत्त्वाबलवत्त्वे तर्जनीभिर्दर्शयन्ति । क्वेति ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

किञ्च जिगीषन्तौ जेतुमिच्छन्तौ उत्थापनादिभिरात्मनो देहस्य परमपचक्रतुरपकारं कृतवन्तौ तत्रोत्थापनं पादौ जानुनी च पिण्डीकृत्य पतितस्योच्चाटनम् उन्नयनं हस्ताभ्यामुद्धृत्य नयनम् चालनं कण्ठादिलग्नस्य निःसारणं स्थापनं पाणिपादादिपिण्डीकरणम् ॥ ५ ॥

धर्मव्यतिक्रमो ह्यस्य समाजस्य ध्रुवं भवेत् ।
यत्राधर्मः समुत्तिष्ठेन्न स्थेयं तत्र कर्हिचित् ॥ ९ ॥
न सभां प्रविशेत्प्राज्ञः सभ्यदोषाननुस्मरन् ।
अब्रुवन् विब्रुवन्नज्ञो नरः किल्बिषमश्नुते ॥ १० ॥
वल्गतः शत्रुमभितः कृष्णस्य वदनाम्बुजम् ।
वीक्ष्यतां श्रमवार्युप्तं पद्मकोशमिवाम्बुभिः ॥ ११ ॥
किं न पश्यत रामस्य मुखमाताम्रलोचनम् ।
मुष्टिकं प्रति सामर्षं हाससंरम्भशोभितम् ॥ १२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

ततस्तस्मिन्समये सानुकम्पाः रामकृष्णविषयकदयायुक्ताः सर्वयोषितः बलाबलवतोः कृष्णचाणूरयोः राममुष्टिकयोर्युद्धं दृष्ट्वा परस्परमूचुः रामकृष्णावबलवन्तौ चाणूरमुष्टिकौ बलवन्तावतस्तद्युद्धमयुक्तमिति स्वबुद्ध्यनुसारेण ज्ञात्वोचुरित्यर्थः ॥ ६ ॥

तासामुक्तिं दर्शयति । महानित्यादिना । राज्ञः कंसस्य पश्यतो निरीक्षतः अर्थात्तदाज्ञयैव बलाबलवद्युद्धमन्विच्छन्ति मन्वते ये तेषां सराजकानां महान् सद्योनाशहेतुरयमधर्मः वर्ततीति खेदे ॥ ७ ॥

वज्रवत्साराणि कठिनानि सर्वाण्यङ्गानि ययोस्तौ क्व अतिसुकुमाराणि अतिकोमलान्यङ्गानि ययोस्तौ च क्व ॥ ८ ॥ ९ ॥

भाषा टीका ।

उठालेना खैंच लेजाना ढकेल देना पादादिकों का जोड देना इत्यादि मल्ल युद्ध की रीतियों से जीतने की इच्छा से अपकार उपाय करते भये ॥ ५ ॥

हे राजन् ! उस दुर्बल तथा बलियोंके युद्ध को देखकर संपूर्ण स्त्रीजन दयायुक्त होकर इकट्ठी होकर बहुतसी बातें परस्पर कहने लगीं ॥ ६ ॥

अहो इन राज सभा वालों का यह बडा अधर्म है जो कि राजा के देखते ही दुर्बल तथा बलियों के युद्ध की चाहना करते हैं ॥ ७ ॥

देखो कहां तो वज्र सरी के कठोर शरीर वाले पर्वत सरीके मल्ल दोनों और कहां अत्यन्त सुकुमार शरीर वाले युवा अवस्थाके विना किशोर मूर्ति रामकृष्ण दोनों हैं ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका

समाजस्य सभायाः ॥ ९ ॥

अपरा ऊचुः । न सभामिति । अब्रुवन् ज्ञात्वाऽपि तूष्णीं तिष्ठन् विब्रुवन् विपरीतं ब्रुवन् अज्ञो न जानामीति ब्रुवन् अतः प्राज्ञो न सभां प्रविशेदिति ॥ १० ॥

वल्गतः शत्रुमभितः इति । शत्रोः सर्वतो धावतः कृष्णस्य श्रमवारिणा उप्तं व्याप्तं मुखाम्बुजं दृश्यताम् ॥ ११ ॥

अन्या ऊचुः । किं न पश्यतेति । सामर्षं सक्रोधं हासेन संरम्भ आवेशस्तेन शोभितम् ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

सम्यगुत्तिष्ठेत् उद्भवेत् तस्माद्वयमत्र स्थातुं न योग्या इति भावः ॥ ९ ॥

तथाप्यत्र यत् प्रविष्टास्तन्महापराधा जाता एवेत्याशयेनाहुः । नेति । प्राज्ञः युक्तवचनायुक्तवचनयोर्दोषज्ञः । तर्हि तत्र तस्य सावधानत्वे को दोषस्तत्राहुः । सभ्यानां कथञ्चित् कस्यचिद्दोषः स्यात् एवं स्वस्यापि प्रमादिनेति सभ्यानां संसर्गजं स्वस्यापि असाक्षिज्ञ दोषं विचारयन्नित्यर्थः । दोषानेवाहुः । अब्रुवन्निति । विज्ञोऽपि मौनमपलापं वा कुर्वन् तथा स्वयमज्ञोऽपि विरुद्धं ब्रुवन् किमुत विज्ञोऽपीत्यर्थः ॥ १० ॥

नन्वेतयोः श्रमादृष्ट्या बलवत्त्वानुमानान्न कोऽपि दोषप्रसङ्ग इत्याशङ्क्य श्रीकृष्णस्य तावत् श्रमं दर्शयन्ति । वल्गत इति । श्रमश्चायं तादृशास्निग्धानेव प्रति भासते नतु सर्वानिति ज्ञेयम् । मल्लानामशनिरित्याद्युक्तेः । रूपकेण तत्तद्धर्मं साधयित्वापि पश्चात्पुनरुपमानादिदं बोधयन्ति आकृष्टाम्बुजगणसौन्दर्यात्तन्मुखमेवाम्बुजं तथा श्रमवार्येव तच्छोभाहेतुत्वेन तदुपयुक्तं वारीति स्वानुभवव्यञ्जनाय रूपकं कृतं यथा कथञ्चित् साधारणजनानुभवायैव तु पुनरुपमा कृतेति । श्रमवारीत्यत्र भिसोलुक् छान्दसः । तत एवाम्बुभिरित्युपमानेन योगः स्यादिति कोषपदोपादानेन मुखस्यापि स्मितेनेषद्विकासित्वं ज्ञापितम् अतएव विशेषेणेक्ष्यताम् ॥ ११ ॥

अथ तद्वत् सुकुमारस्यापि श्रीरामस्य तच्छ्रमदर्शनेन स्वश्रममभिभूय जातं क्रोधतेजः पश्यतेति तदेव स्थापयन्ति । किं न पश्यतेति । हासेनावज्ञा च दर्शिता । हासकर्तृको य आवेशः अविच्छिन्नोदयस्तेन शोभितम् । अन्यत्तैः यद्वा । हासेन संरम्भ आटोपस्तेन ॥ १२ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

विब्रुवन् विपरीतं ब्रुवन् ॥ १०-१२ ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अतोऽस्य समाजस्य सभाया महान् धर्मव्यतिक्रमः धर्मव्यत्यासः धर्मविपर्ययोऽधर्मो भवेत् किं विधेयमित्यत्र काभिश्चिदुक्ते काश्चिदाहुः । यत्राधर्म इति । समुत्तिष्ठेत् प्रवर्त्तेत तत्र कर्हिचित् क्षणमपि न स्थेयमिति ॥ ९ ॥

अपरा आहुः । न सभामिति । सभ्यानां दोषाननुस्मरन्प्राज्ञश्चेत्तां सभां न प्रविशेत् अब्रुवन् ज्ञात्वापि तूष्णीं तिष्ठन् विब्रुवन् विपरीतं ब्रुवन्नज्ञ इव तिष्ठन् ज्ञात्वापि न जानामीति ब्रुवन्नित्यर्थः । एवं विधो यो नरः स किल्विषमश्नुत प्राप्नोति ॥ १० ॥

अन्यास्त्वाहुः । वल्गात इति । शत्रुमभितः शत्रोः सर्वतः वल्गतो धावतः कृष्णस्याम्बुकणैः पद्मकोशमिव श्रमवारिणा उप्तम् व्याप्तं वदनाम्बुजं दृश्यताम् ॥ ११ ॥

अन्या ऊचुः । किं नेति । आ ईषत्समन्ताद्वा ताम्रे लोचने यस्मिंस्तत् मुष्टिकं प्रति सामर्षं सक्रोधं हासेन संरम्भ आवेशस्तेन शोभनं रामस्यापि मुखं किं न पश्यतेत्यर्थः ॥ १२ ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

समाजस्य सभ्यसमूहस्य अर्थतो मन्वादिवाक्यं प्रतीक्षयान्ति यत्रेति ॥ ९ ॥

किमित्यप्रवेश इति तत्राहुः । अब्रुवन्निति विब्रुवन् विपरीतं ब्रुवन् "आत्मसर्वाङ्गसम्बन्धमलङ्किल्बिषमुच्यत" इति च अनपायिमलं किल्बिषमित्यर्थः ॥ १० ॥

श्रमपर्याप्तं श्रमवारिव्याप्तं पद्मकोशं पद्ममुकुलम ॥ ११ ॥

हे सख्यः ! रामस्य मुखं न पश्यत किम्पश्यतेत्यन्वयः अमर्षेण सहितो हासः सामर्षहासः तेन संरम्भणे च शोभनं चारुतरम ॥ १२ ॥

———

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे

प्राज्ञो निवृत्ति मार्गज्ञः ॥ १० ॥ ४६ ॥

———

श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी ।

एवमधर्मं हेतुभूतं न्यायविरोधं निरूप्य न केवलमधर्मः एषां भविष्यति किन्तु यस्य धर्मस्य प्रभावेण ऐश्वर्यादिकं भुञ्जते तस्याप्यतिक्रमो भविष्यतीत्याहुः । धर्मव्यतिक्रम इति । अस्य समाजस्य ध्रुवं धर्मव्यतिक्रमो भवेत् शुभफलं धर्मादेवेति तदतिक्रमे तादृश एव ततः पूर्वं विषमनियोगेनाधर्मः अन्येऽपि सहजाः अधर्माः सन्त्येव वस्तुतोऽपि धर्मस्य प्रभुरच्युत इति प्रभोरन्यथा विनियोगे लीलादर्शने वा धर्मसेवकानां भवत्येवातिक्रमः सोऽप्यधर्मः धर्मं नातिक्रमेदिति निषेधात् एवमधर्मः अस्मिन् समाजे सर्वत एवोद्गतः अतो यत्र सम्यगधर्मः उत्तिष्ठेत तत्र दुःखस्यावश्यकभावात् कदाचिदपि न स्थेयं यद्यपि दुःखसम्भावना नास्ति तथापि कारणोत्पत्तेर्विद्यमानत्वात् सर्पनिकटशयनवत् न स्थेयमेव ॥ ९ ॥

नन्वेवं सति सर्वेषामेवाधर्मः को विशेषः समाजस्येति चेत्तत्राहुः । न सभां प्रविशेदिति । अथवा किमित्यच्युते निर्गन्तव्यं वा तूष्णीं स्थातव्यमित्याशङ्क्य स्वार्थमित्याहुः । न सभामिति । सभास्थैरवश्यं वा वक्तव्यम् अथासामर्थ्यं चेत् प्रथमत एव प्राज्ञः अग्रिमार्थं सर्वं जानन् सभामेव न प्रविशेत्—

सभायां न प्रवेष्टव्यं न वदेद्वासमञ्जसम् ।
अब्रवन् विब्रुवन् वापि नरो भवति किल्विषी । इति

मनुवाक्यात् एते हि सभ्यदोषा इत्याहुः । अब्रुवन्निति । सभायां उपविष्टेनावश्यं वक्तव्यं पृष्टः अपृष्टो वा यथोचितं न वदेत् तथापि नरकभागी स्यात् यदि वा विरुद्धं वदेत् अन्यायं पृष्टः अपृष्टो वा पृष्टश्चेज्जानन्नपि नाहं जाने इति वदेत् सोऽज्ञ इत्युच्यते एवं त्रिविधा अप्येते नरकभाजो भवन्ति सभायां प्रविशन् सभास्मरणे तद्गतगुणदोषाणामपि स्मरणमावश्यकमिति तथोक्तं किल्विषमावश्यकं नरकम् ॥ १० ॥

ननु भगवतोऽपि बलमवश्यमस्ति कुवलयापीडवधात्तत्राहुः । बल्गतः शत्रुमभित इति । शत्रुं चाणूरमभितः वल्गतः मल्लशब्दान् कुर्वतः कृष्णस्य सदानन्दस्य अस्माकं सर्वस्य वा वदनाम्बुजम्प्रस्वेदजलैः व्याप्तं च पश्यत यद्यधिकबलः समबलो वा स्यात् तदा शत्रोरिवास्यापि श्रमो न स्यात् शत्रुश्चासमर्थस्यैवेति लोकप्रसिद्धिः श्रमवारिभिर्व्याप्तं न तु कणैः अनेनान्तःश्रमाधिक्यं द्योतितं ननु भवत्येव कर्मणा श्रमः को दोष इति चेत्तत्राहुः । पद्मकोशमिवाम्बुभिरिति । पद्मकोशो हि जलादुद्गतो भवति कदापि जलं न स्पृशति यथाजलं वर्धते तथा तन्नालमपि वर्धत इति तस्य जलव्याप्तिरसम्भाविता । तथा भगवतोऽपि श्रमजलसम्बन्धोऽसम्भावित इत्यर्थः । तासामासक्तिसिद्ध्यर्थं भगवता तथा प्रदर्शितम् अन्यासक्ता मा भवेयुरिति कंसादीनां च प्रथमतः सुखार्थम् ॥ ११ ॥

एतत्सर्वेषां न प्रकटमिति चक्षुरपि कदाचिद्दर्शनाभावात् बलभद्रे सर्वजनीनं तदिति साक्षेपमाहुः । किं न पश्यतेति । रामस्य मुखमासमन्तात्ताम्रलोचनं किं न पश्यत भ्राता ज्येष्ठोऽयमस्य श्रमः सर्वजनीनः अन्यथा क्रोधाविर्भावं न कुर्यात् अशक्तस्यैव तथा करणात् ननु स्वभावतोऽपि ताम्रो भवेदित्याशङ्क्याह । मुष्टिकं प्रति सामर्षमिति । मुष्टिको मारणीय इति क्रोधमाविर्भावयति स्वतो ह्यसमर्थानां कामादयः प्रवर्त्तका भवन्ति । नन्वेतदपि सहजमिति चेत्तत्राहुः । हाससंरम्भशोभितमिति । हासेन यः संरम्भः क्रोधः तेन शोभितम् अथवा पूर्वं हाससंरम्भेण हासपूर्वकः कामलीलया शोभितं पूर्ववचने अस्मान् खिन्नान्वा दृष्ट्वा हास्यसंरम्भाभ्यां शोभितम् एता अस्मान्न जानन्तीति हास्यं दुःखं प्राप्नुवन्तीति शीघ्रं मारणीय इति संरम्भमपि करोति उभाभ्यां चातिशोभितम् अतो न सहजं किमपीत्यर्थः ॥ १२ ॥

———

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

धर्मव्यतिक्रमोऽधर्मः समाजस्य सभायाः न स्थेयमित्यतोऽस्माभिरित उत्थाय गम्यतामिति भावः ॥ ९ ॥

अस्माभिरत्रागत्यैवापराद्धमित्यपराः शास्त्रशासनमाहुः । न

पुण्या बत व्रजभुवो यदयं नृलिङ्गगूढः पुराणपुरुषो वनचित्रमाल्यः ।
गाः पालयन् सह बलः क्वणयंश्च वेणुं विक्रीडयाञ्चति [1]गिरित्ररमार्चिताङ्घ्रिः ॥ १३ ॥
गोप्यस्तपः किमचरन् यदमुष्य रूपं लावण्यसार[2]मसमोर्ध्वमनन्यसिद्धम् ।
दृग्भिः पिबन्त्यनुसवाभिनवं दुरापमेकान्तधाम यशसः श्रिय ऐश्वरस्य ॥ १४ ॥
या दोहने ऽवहनने [3]मथनोपलेपप्रेङ्खेङ्खनार्भरुदितोक्षणमार्जनादौ ।
गायन्ति चैनमनुरक्तधियोऽश्रुकण्ठ्यो धन्या व्रजस्त्रिय उरुक्रम[4]चित्तयानाः ॥ १५ ॥
प्रातर्व्रजाद्व्रजत आविशतश्च सायं गोभिः समं क्वणयतोऽस्य निशम्य वेणुम् ।
निर्गम्य तूर्णमबलाः पथि भूरिपुण्याः पश्यन्ति सस्मितमुखं सदयावलोकम् ॥ १६ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

सभामिति । सभायामधर्मे उत्पद्यमाने सति धर्मं ज्ञात्वापि तम् अब्रुवन् तूष्णीं तिष्ठन्नित्यर्थः । विब्रुवन् विधर्ममेव ब्रुवन् वा अज्ञः ज्ञात्वापि न जानामीति ब्रुवन् वा किल्बिषं प्राप्नोत्यतः सभां न प्रविशेदिति सभाप्रवेशनिषेधो व्यवहारसापेक्षस्यैव प्राज्ञस्य ननु व्यवहारानिरपेक्षस्य प्राज्ञस्य यथा सभापर्वणि द्यूते द्रौपदीविपदि व्यवहारसापेक्षाः प्राज्ञाः भीष्मादयो ऽब्रुवाणा एव तस्थुः व्यवहारनिरपेक्षः प्राज्ञो विदुरस्तु धर्मं ब्रूतेस्मैवेति रङ्गभूमौ तु सर्व एव प्राज्ञाः कंसाद्भीताः व्यवहारसापेक्षा एवेति ॥ १० ॥

ननु तयोः श्रमादृष्ट्या बलवत्त्वानुमानान्न कोऽपि दोषप्रसङ्ग इत्याशङ्क्य कृष्णस्य तावत् श्रमं दर्शयन्ति । बलात इति । शत्रुमभित इति । शत्रोः सर्वतो धावतः कृष्णस्य श्रमवारिणा उप्तं व्याप्तं वदनाम्बुजं मुखचन्द्रो दृश्यतां अब्जौ शङ्खशशाङ्कौ चेत्यमरः क्लीवत्वमार्षम् ॥ ११ ॥

सामर्षं सक्रोधमिति क्रोधस्य कारणं मुष्टिकप्रहारजनितः श्रम एव बुद्ध्यतामिति भावः । कोपोत्थेन हासेन सह संरम्भो युद्धावेशस्तेन शोभितम् ॥ १२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अज्ञानतो ह्यधार्मिकसमाजप्रवेशे सति तत्र न स्थेयमित्युक्तम् ज्ञानपूर्वकन्तु तस्मिन् प्रवेशमपि न कुर्यादित्याहुः । नेति । अब्रुवन् ज्ञात्वापि तूष्णीं तिष्ठन् विब्रुवन् विपरीतं ब्रुवन् अज्ञोऽस्मि न जानामीति ब्रुवन् किल्बिषमश्नुतेऽतः प्राज्ञः सभ्यदोषाननुस्मरन् सभां न प्रविशेत् ॥ १० ॥

प्रस्तुतमाहुः । शत्रुमभितः चाणूरस्य परितः वल्गतः श्रमवारिणा उप्तं व्याप्तं कृष्णस्य वदनाम्बुजं वीक्ष्यताम् दृश्यताम् ॥ ११ ॥

अन्या आहुः । किं नेति । ईषत्साम्रे लोचने यस्मिन् तत् सामर्षं सक्रोधं हासेन संरम्भः आवेशस्तेन शोभितं रामस्य मुखं किं न पश्यत ॥ १२ ॥

भाषा टीका ।

इस सभा का तो धर्म व्यतिक्रम अवश्य होजायगा जहां से धर्म उठ जाता है उहां पर कभी भी नहीं रहना चाहिये ॥ ९ ॥

सभ्य जनों के दोष को जानने वाला पुरुष कभी राजा के सभा में प्रवेश न करै आप अज्ञानी होकर कहने या न कहने से मनुष्य पाप का भागी होता है ॥ १० ॥

शत्रु के पीछे चारों तरफ दौडते हुये श्रीकृष्णचन्द्र के मुख कमल को देखो कि परिश्रम की पसीना से ऐसा शोभित है जैसा कि जल के बिंदुओं से कमल का फूल होवै ॥ ११ ॥

क्या तुम नहीं देखती हो कि मुष्टिक के ऊपर क्रोधकर के हास तथा समारंभ से शोभित कुछ लालवर्ण वाला श्रीबलरामजी का मुख कैसा शोभा देरहा है ॥ १२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अन्या ऊचुः । पुण्या बतेति । नृलिङ्गेन मनुष्यदेहेन गूढः वनस्थानि चित्राणि माल्यानि यस्य सः गिरित्रः शिवो रमा च ताभ्यामर्चितावङ्घ्री यस्य सः अयं भावः । धिगिमां सभां यस्यामयं पराभूयते तास्तु व्रजभुवो धन्याः यत्रासु अयं कृष्णो विविधक्रीडयाञ्चति गच्छतीति ॥ १३ ॥

अहो कष्टमल्पपुण्या वयं यतोऽस्माभिरनवसरे दृष्टोऽयम् गोप्यस्तु बहुपुण्या इत्याहुस्त्रिभिः । गोप्य इति । अमुष्य श्रीकृष्णस्य रूपमङ्गं लावण्येन सारं श्रेष्ठं किञ्च असमोर्ध्वं न विद्यते सममूर्ध्वमधिकं च यस्य तत् तदपि नान्येनाभरणादिना सिद्धं किं तु स्वत एव ऐश्वरस्यैश्वर्यस्य चैकान्तधामाव्यभिचारिस्थानं पाठान्तरे अमुष्य ईश्वरस्येत्यन्वयः एवं भूतं नित्यं नवीनं रूपं या नेत्रैः पश्यन्तीति ॥ १४ ॥

किञ्च या दोहनादिष्वेनं गायन्ति ता व्रजस्त्रियो धन्याः प्रेङ्खेङ्खनं दोलान्दोलनम् उक्षणं सेचनं कथम्भूताः उरुक्रमे चित्तमुरुक्रमचित्तं तेनैव यानं सर्वविषयप्राप्तिर्यासां ताः पाठान्तरे उरुक्रमं चिन्तयन्त्य इत्यर्थः । कुतः अनुरक्तधियः तत्र लिङ्गमश्रुकण्ठ्यः ॥ १५ ॥

प्रातरिति । या अबला अस्य वेणुं निशम्य गृहात्तूर्णं निर्गम्य पथि सस्मितमुखं पश्यन्ति ता भूरि पुण्या इति ॥ १६ ॥

१ गिरावमरार्चिताङ्घ्रिः २ मथनोत्थ ३ मथनोपजल्प ४ चित्तयामाः इति वि० पाठः

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

पुण्या इति तैर्व्याख्यातं तत्रायं भाव इत्यस्येदन्तु विवक्षितमित्यर्थः । यद्वा । अथ काश्चिद्विदग्धा यज्ञपत्नीप्राया ऐश्वर्यज्ञानमिश्रपरमप्रेमवत्यस्तत्सभावैगुण्येन मधुपुरीमप्यबहुमन्वानाः तत्रत्यानां साद्गुण्ये श्रीव्रजभुवमेव प्रशंसन्ति । पुण्या इति चतुर्भिः बत विस्मये । व्रजभुवः व्रजसम्बन्धिन्यो भूमय एव पुण्याः परमधन्याः । न त्वियं महापुर्यपि । बहुत्वनिर्देशेन तासां बहूनामपि यादृशपुण्यत्वं न त्वेकस्या अपि तादृशत्वमित्यर्थः । यत् यासु अयं श्रीकृष्णाख्यः पुराणपुरुषोऽपि नवो नित्यनूतनो यः स एव च पुरुषः तन्मुख्यत्वेन तच्छब्दः । प्रथमोऽभिधेयः सोऽञ्चति भ्रमति । वर्त्तमानप्रयोगस्तत्सामीप्यात् पुनस्तत्र गमनाभिप्रायाच्च वस्तुतस्तु यथार्थभारतीनिःसृतिरियं तत्र तदीयनित्यलीलायाः स्थापयिष्यमाणत्वात् । अन्यत्र परममहतामप्यसौ दुर्लभ इत्याह । गिरित्रेण रमयापि हृदयेनार्च्चितौ आगमोक्तार्च्चनमात्रेण उद्विग्नयैवाराधितौ नतु व्रजवासिवत् साक्षात् सेवितौ अङ्घ्री यस्य तादृश इत्यर्थः । ननु सत्यप्यत्राप्ययमञ्चति तत्राहुर्विक्रीडयेति । अत्र प्रतिकूलैः पराभवितुमिष्यते विविधोदासीनलोकैः सङ्कीर्यते चेति नात्यभीष्टचिक्रीडिषोदयस्तत्र विशिष्टा क्रीडा । तत्र तु सर्वस्याप्यनुकूलत्वेनैव कान्तत्वेन च परमाभीष्टचिक्रीडिषोदयाद्विशिष्टैवेति कुतः साम्यमेवेति भावः । सर्वानुकूल्यं वैशिष्ट्यञ्च दर्शयन्ति । वनेत्यादिना । वने सर्वाभीष्टपुष्पादिनिधाने परमैकान्ते श्रीवृन्दावने चित्राणि विशिष्टक्रीडाकौतुकितया सखिभिर्मिलित्वा विविधाश्चर्यत्वेन यावदभीष्टं रचितानि माल्यानि यस्य तादृशः । उपलक्षणञ्चैतत् वेशान्तराणां तथा गाः पालयन् स्वयं निजपरमस्नेहपात्राणां गवां तत्तन्निजाभीष्टक्रीडास्वैरता सहायं पालनं विश्वमोहनं मधुराह्वानादिना कुर्वन् । किञ्च । सहबलः तत्र तत्र बलसहाय इति स्वयमभीष्टतत्तत्क्रीडेन श्रीबलेन पुष्टतत्तत्क्रीड इत्यर्थः । अहो किमपरं वक्तव्यं शक्रशर्वपरमेष्ठिमोहनः तरूणामपि पुलककारकं वेणुञ्च क्वणयन् तद्वाद्यमाधुरीं मुहुरुल्लासयन्निति ॥ १३ ॥

गोप्य इत्यत्र तेषामवतारिकायां श्लोकोऽयमिति पर्यन्तः पूर्वपद्याभिप्रायः । गोप्यस्त्विन्युत्तरत्रयस्य ज्ञेयः । असमोर्ध्वम् अनन्तसदाविर्भावेष्वपि न विद्यते समं किमुतोर्ध्वं यस्य तादित्यर्थः । पिबन्तीति तृषार्त्ता इवामृतमिति भावः । अनुसवाभिनवं प्रतिक्षणमधिकाविर्भाविप्रेमतत्स्फूर्त्योः परस्परवर्द्धनत्वादिति भावः । दुरापं लक्ष्म्यादिभिर्दुर्लभमपि श्रियः सर्वशोभायाः । ईश्वरस्येति पाठे परमेश्वरस्यापि परमालम्बनरूपमित्यर्थः । अन्यत्रैः । तत्र सौन्दर्यमिति लेख्येऽप्यसङ्गमिति नूनं प्रथमलेखकभ्रमात् अन्यथा किञ्चित् तस्य तदीयादेश्चासङ्गतिरिति । यद्वा । व्रजभुवां धन्यत्वेन तत्सम्बन्धमात्रधन्यत्वं व्यञ्जितं तत्रापि श्रीगोपीनां किं वक्तव्यमिति परमविदग्धाः काश्चित् श्रीशुकेनाप्यनुमोद्यमानेष्वमीषु वाक्येषु बाढमनुमोदमानं वाक्यमाहुः । गोप्य इति । तपो भगवदाराधनलक्षणं किं चरत्स्य आचारवत्यः ईदृशफलस्य वाङ्मनसातीतत्वात् तदपि तादृशमित्यर्थः । यदि जानीथ तदा वयमपि तत्तपो धर्मं करवामेति भावः । यद्वा । किन्तपोऽचरन् अपि तु नैवाचरन् तपोमात्रस्येदृशफलदानाशक्तेः तदीयनित्यप्रेयसीसमुचित एवायमुदय इति भावः । तथात्वे हेतुं परमेवाहुः । यत् यस्मात् अमुष्य साक्षात् भावेऽपि निर्देष्टुमशक्यस्येत्यर्थः । रूपं परमशोभनप्रमाणाङ्गप्रत्यङ्गवत्त्वं दृग्भिः पिबन्तीति नैरन्तर्येऽपि तस्याक्षयिष्णुत्वं तासामतृप्तिञ्च सूचयित्वा रूपस्य सुधासमुद्रत्वमुत्प्रेक्षन्ते किञ्च दर्शनमात्रस्य तादृशत्वं दर्शयित्वा आलिङ्गनादेः कैमुत्यमानयन्ते कीदृशं तत् लावण्यस्य कान्तिकन्दलीचाकचिक्यस्य सारः श्रेष्ठांशो यत्र तादृशं तत् प्राचुर्यात्तद्रूपमेव वा । नन्वनन्ता एव तत्प्रादुर्भावा इति तत्र तत्रापि तादृशत्वं सम्भवति तत्राहुरसमोर्ध्वम् । नन्वन्यत्र नास्ति चेत् कुतो लब्धं तत्राहुः । अनन्यसिद्धं स्वभाविकमेवेत्यर्थः । इति नित्यत्वञ्च दर्शितम् । अतएव यशआद्युपलक्षितानां षण्णां भगानामतिशयितं धाम नित्याश्रयं पाठान्तरेऽपि ईश्वरत्वस्येत्येवार्थः । नन्वेवं सदैकरूपत्वेन पश्यन्ति चेत्तदापि नासकृत् चमत्कारः स्यात्तत्राहुरनुसवेति । नन्वीदृशं रूपं तत्रास्ति चेत्तदान्येऽपि पश्येयुस्तत्राहुर्दुरापमिति । स्वतस्तादृशप्रेम्णोऽसम्भवादन्येषां तादृशत्वं तासामेव दृढावधानेन स्फुरति अन्यथा तु न स्फुरतीत्यर्थः ॥ १४ ॥

एवं दर्शनवदर्शनेऽपि तद्रूपं तथैव तासां स्फुरतीत्याहुर्या इति । दोहनावहनने अन्तर्भूतण्यर्थपदे ज्ञेये अवहननं तुषापकरणं चकार उक्तसमुच्चये । कदाचित् पश्यन्ति कदाचिद्गायन्ति चेत्यर्थः । एवं पूर्वोक्तरूपं यदा न पश्यन्ति तदापि तद्रूपं स्फुरतीति भावः । एवं तादृशगानाभावाद्वयमधन्या एवेति तात्पर्यम् । अन्यत्रैः । यद्वा । अश्रुकण्ठ्यः रोदनपराश्च भवन्ति यतोऽनुरक्तधियः अतः उरुक्रमचित्तमेव यानं गमनसाधनं यासां ताः यत्र यत्र तच्चित्तं याति तत्र तत्रैव तस्मिन्स्ता एव स्फुरन्तीत्यर्थः । चिन्तयाना इति पाठेऽपि चिन्तनं चिन्ता तदेव यानं यासामिति समानोऽर्थश्च ॥ १५ ॥

दृग्भिः पानमेव वर्णयन्ति । प्रातरिति । व्रजतः श्रीवृन्दावनं गच्छतः गोभिरित्युपलक्षणं गोपवर्गैश्च समं वेणुमित्यस्योभयत्राप्यन्वयः । वेणुं क्वणयतः अतएव वेणुं तद्वाद्यद्वारा निशम्य श्रवणकरणकज्ञानं विधायेत्यर्थः । अयं तूर्णनिर्गमे हेतुः वेणुसम्बन्धात् श्रीमुखस्य शोभाविशेषोऽपि सूचितः । "तन्मुखं कथमिवाम्बुजतुल्यं रुक्षं वाचामवाचि ननु पर्वणि पर्वणीन्दोः । तत् किं ब्रुवे किमपरं भुवनैककान्तः वेणुं त्वदाननमनेन समं नु यत् स्या" दिति श्रीलीलाशुकोक्तिः । अबला वेणुनादेन सततप्रेमभरेणैव वा दोहादिसामर्थ्यहीनत्वात्तथाप्येव वाच्या इत्यर्थः । अत एवस्ततः प्रस्खलन्त्य इति भावः । यद्वा । अन्यसङ्गे गन्तुमशक्यत्वादस्य वर्त्मन्येव ता इति । सुस्मितेत्यादिविशेषणद्वयं तत्राप्यतिशयद्योतकं तथा सायं आ सम्यक् वन्यवेशादिना उत्तमप्रकारेण व्रजं प्रविशतश्च तत्रापि गोभिः सममित्यादिकं सर्वं योज्यम् ॥ १६ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

नृलिङ्गगूढः नरशरीरगूढः गिरित्रो रुद्रः अञ्चति गच्छति ॥ १३ ॥

अनन्यसिद्धं स्वाभाविकम् अनुसवेति अनुसन्ध्यं प्रतिक्षणमित्यर्थः ॥ १४ ॥

प्रेङ्खोलने डोलाविहारे ॥ १५—१७ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अपराश्चाहुः । पुण्या इति । स्वयं पुराणपुरुषः श्रीमन्नारायणः सन्नृलिङ्गेन मनुष्यस्येव शरीरेण गूढः तिरोधापितस्वस्वरूपगुणः वन्यानि विचित्राणि माल्यानि यस्य सः गिरित्ररमाभ्यां रुद्रमहालक्ष्मीभ्यामर्चितावङ्घ्री यस्य सः गिरित्रग्रहणं चतुर्मुखादीनामप्युपलक्षणं सहबलः बलरामेण सहितः वेणुं वादयन् गाश्च पालयन् विक्रीडयाञ्चति अटति अयम्भावः धिगिमां सभां स्वामयं परिभूयते तास्तु व्रजभुवो धन्या यतो यास्वयं श्रीकृष्णो विविधक्रीडया चरतीति ॥ १३ ॥

अहो अल्पपुण्या वयं यतोऽस्माभिरनवसरे अयं दृष्टः गोप्यस्तु बहुपुण्या इत्याहुस्त्रिभिः । गोप्य इति । गोप्यः किन्तपः समाचरन् ताभिराचरितं तपोऽनिर्वचनीयमित्यर्थः । कुतः यद्यस्मादमुष्य श्रीकृष्णस्य रूपमङ्गप्रत्यङ्गलावण्येन सह सारं श्रेष्ठं किञ्चासमोर्ध्वं न सममूर्ध्वमधिकञ्च यस्य तन्निः समाभ्यधिकामित्यर्थः । तदपि नान्येन नाभरणादिना सिद्धं किन्तु स्वत एवाकर्मायत्तं वा किञ्च यशसः श्रियो लक्ष्म्याः ईश्वरस्य भावप्रधानोऽयं निर्देशः ऐश्वर्यस्य च एकान्तधामाव्यभिचारिस्थानं सदाभिनवं दुरापमकृतपुण्यानां चक्षुषापि प्राप्तुमशक्यम् एवंभूतं रूपं याः नेत्रैरनुपिबन्ति पश्यन्तीति ॥ १४ ॥

किञ्च या दोहनादिष्वेनं गायन्ति ता व्रजस्त्रियो धन्याः कथम्भूताः उरुक्रमे चित्तमुरुक्रमचित्तं तदेव यानं सर्वपुरुषार्थप्राप्तिसाधनं यासां ताः पाठान्तरे उरुक्रमं चिन्तयमाना इवेत्यर्थः । कुतोऽनुरक्तधियः तत्र लिङ्गमश्रुकण्ठयः आनन्दाश्रुनिरुद्धकण्ठयः तत्र गोदोहनं गवां दोहनम् अवहननमुलूखलादौ धान्यादिसंस्कारैः वहनं जलाद्यानयनं मथनं दध्नः उपलेपो गृहाणां लेपनं प्रेङ्खेङ्खनं दोलान्दोलनमर्भरुदितं रुदद्र्भकसान्त्वनम् उक्षणं सेचनं मार्जनं गृहसंमार्जनम् ॥ १५ ॥

अपिच प्रातरिति । या अबलाः गोभिः सह प्रातर्व्रजान्निर्गच्छतः ततः सायमाविशतश्च वेणुं क्वणयतस्तस्य वेणुरवमाकर्ण्य गृहात्तूर्णं निर्गत्य पथि तस्य सदयोऽवलोको यस्मिंस्तद्युक्तं मुखं पश्यन्ति ता भूरिपुण्याः ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली

नृणां लिङ्गेन लक्षणेन गूढः छन्नः अयं कृष्णनामा पुराणपुरुषः यद्यासु व्रजभूमिषु विक्रीडया क्रीडेच्छया अञ्चति गच्छति पादाभ्यामिति शेषः । गाश्चारयन् गिरावञ्चति च ता व्रजभुवः स गिरिश्च पुण्याः पावनाः बत आश्चर्यावधेः स्थितिः किम्विशिष्टः विद्यमानानि विचित्राणि नानावर्णानि माल्यानि पुष्पाणि यस्य स तथा गिरावमरैर्देवैरर्चिताङ्घ्रिः व्रजभुवि अमरैरमलैः शुद्धान्तःकरणैर्गोपालैरर्चितश्रीचरणः ॥ १३ ॥

अमुष्येश्वरस्य यल्लावण्यसारमथनोत्थं शृङ्गाररसमथनादुत्पन्नं नचेदं कृत्रिममित्याह । अनन्यसिद्धमिति । अन्यस्मात्प्रकृतेर्जातं न भवतीति अन्येषामविद्यमानं वा अनुसवं प्रतिक्षणम् अभिनवं नूतनं ज्ञानमन्तरेण दुष्प्रापं श्रियो यशसश्चैकान्तधाम यत्स्थानरूपं द्रव्याश्रयलक्षणगुणं तद्याः दृग्भिः पिबन्ति ता गोप्यः किन्तपः अचरन् चक्रुरित्यन्वयः ॥ १४ ॥

या गोप्यो गोदोहनादावेनं कृष्णं गायन्ति ता गोकुलस्त्रियः पुण्या इत्यन्वयः अवहनने व्रीहिताडनकाले दधिमन्थनवेलायाम् उत्थजल्पे मिथःसम्भाषणसमये उपलेप इति केचित्पठन्ति गोमयादिना स्थललेपनकाले प्रेङ्खेङ्खने दोलाचलनकाले अर्भरुदिते बालरोदनकाले उक्षणे प्राङ्गणसेचनसमये मज्जने स्नानकाले मार्जन इति केचित् आदिशब्देन स्खलनपतनादिकं गृह्यते उरुक्रमचित्ते यामः कालविशेषो यासां तास्तथा उरुक्रमचित्तेन गतो यामो यासां ता इति वा ॥ १५ ॥

वेणुरवं निशम्य व्रजान्निर्गत्य पथि स्थित्वा ॥ १६—१७ ॥ ० ॥

श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी ।

एवं स्नेहवशादश्रान्तेऽपि भगवति श्रमं मत्वा अनवसरे भगवानस्माभिर्दृष्ट इति स्वभाग्यं विगर्हयन्त्यः गोकुलवासिनां भाग्यमभिनन्दन्ति । पुण्या बत इति चतुर्भिः । आदौ भूमिमभिनन्दन्ति पश्चात् स्त्रियः आदौ व्रजभुव एव धन्याः यदयं नृलिङ्गेन कपटमानुषवेषेण गूढः सन् स्वयं पुराणपुरुषोऽपि वनचित्रमालायुक्तश्च तत्रत्याः गाः पालयन् ससहायोऽपि तत्परः बलभद्रसहितः विक्रीडयैव विशेषेण क्रीडार्थमेव अञ्चति व्रजभुवं गच्छति वा स्वयं तु गिरित्रेण रमया च अर्चितौ अङ्घ्री यस्य भूमिः स्वभावतः पुण्या भवति यद्यपि मथुरापि तथा गणिता तथापि मथुरामण्डले व्रजभुव एव पुण्याः पुण्यं हि सुखफलं भवति निरन्तरं तत्रत्यानां सुखानुभवात् अत्र तु तद्विपरीता इति वर्तते हर्षे एतादृशमपि लोके स्थानं भवतीति गोप्यस्य हि क्रीडासुखदायिनी अतो भगवतोऽपि गुप्तक्रीडासाधनत्वात् सुखदा भूमिः । पुराणपुरुष इति । तासां स्वरूपज्ञानं दृढमिति ज्ञापितं तथापि श्रमाविर्भावात् स्थलान्तरप्रशंसैव गुप्तश्च सर्वैर्व्यवहर्तुं शक्यते तथात्वेन नियामकमप्याहुः । वनस्थानामपि चित्रमाल्यानां धारक इति । गाः पालयन्निति सुतरां गौणभावाश्रयणात् स्वच्छन्दलीला संपद्यते बाधकनिराकरणार्थं ससहायोऽपि रसोद्बोधनार्थं रक्षकदेवोद्बोधनार्थं वा दिनेऽपि परमानन्दानुभवार्थं च वेणुक्वणनं चकारात् नानाविधां च लीलां कुर्वन् भूमेः पूजने तत्रत्यानपि पूजयन्तीति स्वच्छन्दलीलायामतिक्रमेऽपि नापराधो भवति अन्यत्र गुप्ताभावे स्वस्य नेष्टं गुप्तत्वे तु चाणूरादीनामतिक्रम इति उभयथाप्यत्र दुःखं न च गोकुले स्वरूपप्रच्युत एव तिष्ठतीति शङ्कनीयं यतस्तत्र स्थितमपि महादेवो लक्ष्मीश्च पूजयति स हि पशुपतिः तदीयानां पशूनां पालानां भगवान् रक्षक इति स्वमपराधी च पूजनया स्वापराधं दूरीकरोति महांश्चेत् स्वकार्यं करोति तदा हीनो लज्जते अतः पूजयति अन्यथा गोवर्द्धनोद्धरणे इन्द्रस्यापकारं कुर्यात् गोवर्द्धनं वा विशकलितं स हि यथास्थितान् पर्वतान् पालयति सुदर्शनस्यापि मोक्षं नाङ्गीकुर्यात् अतः सेवकत्वेनैव तस्य व्यवहारो दृश्यते लक्ष्मीः पुनः सर्वस्त्रीमूलप्रकृतिः तद्विभवरूपा गोप्यः तासामपि कृपां करोतीति अथवा महादेवो भगवति पशुपालने क्रियमाणे तस्य पालनं गमिष्यतीति रमा च गोपिकासु स्थितासु आदरो गमिष्यतीति ॥ १३ ॥

एवं भूमिमभिनन्द्य गोपिकाभिनन्दनमाहुः त्रिभिः । गोप्यस्तपः किमचरन्निति । भगवतो रूपं यादृशं ध्येयं तादृशं यतः पश्यन्ति भगवन्तमेव च गायन्ति तदासक्ताश्च तिष्ठन्तीति न ह्येतन्नूयं

श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी ।

स्वल्पतपसा प्रसिद्धतपसा वा भवति अन्यथा अन्येषामपि स्यात् अतो न ज्ञायते किं वा तपस्ताभिः कृतमिति यद्यप्यस्माभिरपि भगवद्रूपं दृश्यते तथापि अमुष्यैतद्रूपं लावण्यमेव सारभूतं यत्र केवलं लावण्यमेव तत्र प्रकाशते लावण्यस्यापि वा सारम् इदानीं तु क्रोधाद्याविर्भावात् अवस्थया तिरोहितमिव प्रतिभाति किं च असमोर्ध्वं न समम् ऊर्ध्वं च यस्मात् तासां हि दृष्टौ भगवानेक एव प्रतिभाति अत्र तु दुष्टः सम्बन्धी चाणूरादिरपि दृश्यते ऊर्ध्वता च कंसादेः मञ्चस्थितत्वात् प्रतीयते किं च अनन्यसिद्धं स लावण्यरसः केवलं भगवत्येव सिद्धः अन्यथा भुव्यन्येऽपि भाग्ययुक्ता भवेयुः अतस्तादृशामृतपानं तपसा विना न भवतीति अवश्यं तपस्ताभिः कृतमिति सिद्धम् । किं च दृग्भिः पिबन्ति दूरादपि पातुं शक्यते दृशा तत्रापि नानाविधैः अलसवलितादिभिः पानमनेन सर्वोऽपि रमणप्रकारस्तासां सूचितः चर्वितचर्वणत्वव्यावृत्त्यर्थमाहुः । अनुसवाभिनवमिति । अनुसवं प्रतिक्षणं नूतनमेव भवति पूर्वानुभूतरसादुत्कृष्टं नापि तत्सर्वं सुलभमित्याहुः । दुरापमिति । सर्वेषामेव दुःखेनापि प्राप्तुमशक्यं तासां त्वयत्नसिद्धं जातमिति । ननु केवलं भोग एव भगवता सिद्ध इति कथं सर्वोत्कृष्टता यद्धि सर्वमेव फलं साधयति तत्सर्वोत्तममिति चेत्तत्राहुः । एकान्तधामेति । भोगस्त्वैहिकपारलौकिकः सर्वोत्कृष्ट इति वीर्यस्य न पृथगुपयोगः ज्ञानवैराग्ययोश्च अतस्त्रयमेवावशिष्यते यशः श्रीः ऐश्वर्यं चेति तेषामेकान्ततः भगवल्लावण्यामृतमेव धाम तस्मिन् प्राप्ते ऐश्वर्यादिकं सर्वं सिध्यतीति न भोगमात्रपरत्वम् ऐश्वर्यामिति भाव अत्र चकारादपेक्षितानामपि ज्ञानवैराग्यादीनां ग्रहणम् ॥ १४ ॥

ननु सर्वोत्तमा भगवद्भक्तिः तासां तु कामः प्रधानमिति का स्तुतिरिति चेत्तत्राहुः । या दोहन इति । दोहनं सायं प्रभाते वा ततः अवहननं ततो मथनं दध्नः प्रातरवलेपनं च एतच्चतुष्टयं गृहकार्यं व्रजस्त्रीणां सहजं सर्वासां ततः प्रेङ्खेङ्खनं दोलयान्दोलनं विद्यमानबालकानामर्भरुदितं बालकरोदनम् उक्षणं सेचनं वृक्षादिषु सूक्ष्मेषु तुलस्यादिषु वा मार्जनं प्राङ्गणादेः एतेषु एनं भगवन्तं गायन्ति चकारात् स्मरन्ति भावयन्ति तदर्थमेव च कुर्वन्ति धर्मपरा अपि तत्कुर्वन्ति इति तद्व्यावृत्त्यर्थमाहुः । अनुरक्तधिय इति । अनुरक्ता धीर्यासाम् अनुरागमात्रेण न भक्तिर्भवति उत्कटभावाभावात् लौकिकप्रेमवतां धर्ममार्गेऽपि तथात्वादित्यत आहुः । अश्रुकण्ठ्य इति । अश्रूणि नेत्रयोः गद्गदकण्ठता च तदुभयं निरुद्धम् अथवा नेत्रयोः श्रवणाभावात् अन्तर्दृष्टीनामश्रूणि कण्ठ एव समायान्तीति तथोक्तवत्यः अतः सर्वभावेन प्रपन्नाः फलं च प्राप्नुवन्तीति व्रजस्त्रियो धन्याः किं च उरुक्रमचिन्तयानाः न केवलं यदा कदाचिदेव तासामेवं भावः किं तु सर्वदेति वक्तुं सर्वैवोरुक्रमं चिन्तयानाः उरुक्रमं चिन्तयन्ति ॥ १५ ॥

किं च एतादृश्योऽपि न केवलं योगिवत् साक्षात्काररहिताः किं तु रपस्विन इव वरदानार्थमागतं भगवन्तं सर्वदैव पश्यन्तीत्याहुः । प्रातर्व्रजाद्व्रजत इति । गूढास्तु लीलाः ताभिर्न ज्ञायन्त इति भगवद्दर्शनं सायं प्रातरेवेत्याहुः । प्रातः काले गाः नीत्वा व्रजाद्व्रजतः सायं काले च व्रजमाविशतः चकारादन्यदापि यदृच्छया आगच्छतः अन्यांश्च दर्शनावस्थाः सर्वा एव सङ्गृहीताः गोभिः सममिति पाल्यमानानामानयनमावश्यकमिति निर्भयार्थं च न हि वेदबोधिते पदार्थे कस्यचिदपि शङ्का भवति किं च वेणुं क्वणयत इति । यथा चित्तमपहृतं भवति तथा वेणुनादं करोति तेन सद्भावाः सर्वे भगवद्विषयका आविर्भवन्ति अन्ये तु तिरोभवन्ति अतस्तस्य वेणुनादं निशम्य तूर्णं गृहान्निर्गताः पथि मार्ग एव भगवन्तं पश्यन्ति योगिनो हि समागते भगवति पश्यन्ति । एतास्तु अर्द्धसमागत एवेति विशेषः अतो भूरिपुण्याः अबला इति तासां दोषाभावो भूरिपुण्यत्वे हेतुरुक्तः किं च सस्मितं मुखं पश्यन्ति अन्तरानन्दमाविर्भावयत् तेन यथा भक्तिप्रतिबन्धकमुत्पन्नमपि ज्ञानं निवृत्तं भवति तादृशं प्रेमानन्दमेव प्रयच्छतीति मोक्षादप्यधिकफलमुक्तं किं च सदयावलोकमिति । दयापूर्वकमवलोकनं यस्मिन् न च वक्तव्यं संसारो न निवर्त्तिष्यत इति यतो भगवान् दयया पश्यति कृतार्था एताः कर्त्तव्या इति दयया दोषनिवृत्तिः अवलोकनेन सर्वस्वदानमिति द्वयमुक्तम् अतः स्त्रीणां तादृशभगवल्लीलायां महानेव प्रयास उक्तः ॥ १६ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

अथ काश्चित् यज्ञपत्नीसवासनास्ता एव वा तदवाप्तिसंतापस्फुरिततदैश्वर्यज्ञानाः महाप्रेमवत्यो दृश्यमानां तामनीतिमसहमाना व्रजभुवस्तत्रत्यजनांश्च स्तुवाना मथुरायास्तद्वासिनां च निन्दामभिव्यञ्जयन्ति । पुण्या इति । बत विस्मये यत् यासु नृलिङ्गेन स्वस्वरूपलक्षणेनापि बहिरङ्गजनैर्ज्ञातुमशक्यत्वात् गूढः विविधया स्वमनोरथोत्थया क्रीडया अञ्चति भ्रमति तेन धिगिमां मथुरापुरीं यतोऽस्यामस्यैतादृशो दुःखातिशयस्तं चात्रत्या जनाः पश्यन्ति तास्तु वनभूमयोऽपि धन्या एव यास्वस्य वेणुवादनादिविविधक्रीडानन्दः तं च तत्रत्याः सानन्दं पश्यन्तीति द्योतितम् अत्राञ्चतीति वर्तमानप्रयोगस्तासां तत्रैव पुनः कृष्णागमनाभिप्रायात् वस्तुतस्तु यथार्थैव भारतीयं तन्मुखेभ्यो निःसृता लीलानां नित्यत्वस्य स्थापितत्वात् स्थापयिष्यमाणत्वाच्च ॥ १३ ॥

हन्त हन्त महासुकृतिन एव व्रजभूमिषूत्पद्यन्ते तेष्वपि गोपीजनाः अतिश्रेष्ठा इत्याहुः । गोप्य इति । किमचरन्निति । भोः सख्यः तत् तपः यदि यूयं सर्वज्ञस्य कस्यचिन्मुखात् जानीथ तदा ब्रूत यथा तदेवास्मिन् जन्मनि कृत्वा व्रजभूमौ गोप्यो भवेम यत् यतस्ता अमुष्य रूपं सौन्दर्य्यामृतं पिबन्ति वयं तु मथुरास्था अस्य पराभवविषं पीत्वा आनखशिखं ज्वलाम इति भावः । तासां दृग्भिः पानस्यैव तादृशतपःफलत्वमुक्त्वा स्वाङ्गैरालिङ्गनादेस्त्वनिर्वाच्यहेतुकत्वं ज्ञापितं किं चास्य रूपे लावण्यमधिकं वर्त्तत इत्यत उपादीयते इति न वाच्यं किं तु लावण्यसारं लावण्यस्यापि यः सारस्तत्स्वरूपमेवैतत् ननु स्वर्लोकादिभ्योऽपि न्यूने भूर्लोकेऽस्मिंश्चेदेवं रूपं दृश्यते तर्हि सर्वतः श्रेष्ठे महावैकुण्ठलोके इतोऽप्यधिकमधुरं श्रीनारायणस्य रूपं भवेदिति तत्राहुः । असमोर्ध्वम् एतद्रूपस्य सममेव रूपं क्वापि नास्ति किमुताधिकमिति भावः । ननु तर्हि कृष्णेनैतद्रूपं कुतः सकाशात् प्राप्तं तत्राहुः । अनन्यसिद्धमस्मिन्नेतत् स्वाभाविकमित्यर्थः । नन्वेवमप्येतद्रूपं वाः सदैकरूपत्वेन पश्यन्ति चेत्तथापि तासां नासकृच्चमत्कारः स्यात्तत्राहुः । अनुसवाभिनवं प्रतिक्षणं नूतनम् एवं चेत्तर्हि तत्रैव गत्वा अन्यदेशीयाभिरपि स्त्रीभिः सुखेनायं दृश्य-

एवं प्रभाषमाणासु स्त्रीषु योगेश्वरो हरिः ।
शत्रुं हन्तुं मनश्चक्रे भगवान् भरतर्षभ ! ॥ १७ ॥
[1]सभयाः स्त्रीगिरः श्रुत्वा पुत्रस्नेहशुचातुरौ ।
पितरावन्वतप्येतां पुत्रयोरबुधौ बलम् ॥ १८ ॥
तैस्तैर्नियुद्धविधिभिर्विविधैरच्युतेतरौ ।
युयुधाते यथाऽन्योऽन्यं तथैव बलमुष्टिकौ ॥ १९ ॥

[1] अयं विजयध्वजीये नास्ति

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

तामित्यत आहुर्दुरापं लक्ष्म्यापि दुर्लभं ननु भवतु नामास्य सौन्दर्य्यौपाधिक एव सर्वोत्कर्षः श्रीनारायणादौ तु भगशब्दवाच्यषडैश्वर्य्यमधिकं वर्त्तते तत्राहुः । एकान्तेति । यशआद्युपलक्षितानां षण्णाममेव भगानाम् एकान्तधाम अतिशयितमास्पदं ऐश्वरस्य ऐश्वर्य्यस्य ईश्वरस्येत्यपि पाठः ॥ १४ ॥

किं च तासां गृहकर्माण्यपि नैतन्माधुर्य्यपानप्रतिबन्धकानीत्याहुः । या दोहनादिषु एनं गायन्ति चकारात् क्वापि पश्यन्ति चेत्येतन्माधुर्य्यं रसनाभिरपि दृग्भिरपि पिबन्तीति पानाविच्छेद उक्तः प्रेङ्खेङ्खनं दोलान्दोळनम् उक्षणं सेचनम् उरुक्रमस्य चित्तं यानं वाहनं यासां ता इत्ययमुरुक्रमोऽपि ब्रह्मादिभिः स्वचित्तेषूह्यमानोऽपि वा स्वयं स्वचित्ते वहतीति तास्वपि कृष्णोऽयमनुरक्तधीरिति तासां सौभाग्यभरो दर्शितः । चिन्तयाना इति पाठ उरुक्रमं चिन्तयन्त्य इत्यर्थः ॥ १५ ॥

प्रातर्व्रजाद्वनं व्रजतः सायं वनाद्व्रजमाविशतः प्रविशतोऽस्य कृष्णस्य वेणुं निशम्य गृहेभ्यो निर्गम्य पथि गवानयनमार्गसमीपोपवनादौ पश्यन्ति सदयः स्वविरहखिन्नाङ्गीस्ता दृष्ट्वा तदभीष्टवितरणव्यञ्जकानुकम्पासहितोऽवलोको यस्य तम् ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

सुज्ञाततत्त्वा आहुः । पुण्या इति चतुर्भिः । नृलिङ्गगूढः नृणां ब्रह्मादिमत्कुणपर्य्यन्तानां लिङ्गेषु देहेषु गूढः सर्वव्यापक इत्यर्थे । यत्तु नृलिङ्गेन मनुष्यदेहेन गूढ इति तन्न असमोर्ध्वमनन्यसिद्धम् एकान्तधाम यशसः श्रिय ईश्वरस्य अत्मानमप्युच्चयापचयौ न यस्येत्यादि वक्ष्यमाणवचनाविरोधात् एवम्भूतः पुरापि नवश्चासौ पुरुषश्च सोऽयं कृष्णः वनानि वन्यानि चित्राणि नानाविधानि माल्यानि यस्य सः गिरित्ररमाभ्यामर्चिताङ्घ्री यस्य सः यासु विक्रीडया हेतुभूतया अञ्चति गच्छति ताः व्रजभुवो धन्याः अत्र त्यास्त्वेनङ्क्षोपायित्वा सराजकाः चाणूरादयो मरिष्यन्ति न रामकृष्णयोः किञ्चिदप्यपकारं करिष्यन्तीति भावः ॥ १३ ॥

अत एव व्रजगताः गोप्यः सुकृतिन्य इत्याहुः । गोप्य इत्यादित्रिभिः । अहो गोप्यः किमकृतं तपः आचरन् यत् येन तपआचरणेन अमुष्य श्रीकृष्णस्येश्वरस्य सर्वनियन्तुः रूपं श्रीमन्मङ्गलविग्रहं लावण्येन सह सारं श्रेष्ठम् असमोर्ध्वम् निःसमानाधिकम् अनन्यासिद्धम् अन्यासिद्धं कर्मजन्यं प्राकृतं रूपं तद्भिन्नमनन्यसिद्धमप्राकृतमित्यर्थः । तत एव अनुसवाभिनवं सर्वदा नूतनम् अतएव यशसः श्रियः महालक्ष्म्याश्च एकान्तधाम अव्यभिचारिस्थानम् दृग्भिः पिबन्ति ॥ १४ ॥

किञ्च अनुरक्तधियः श्रीकृष्णासक्तबुद्धयः अत एव उरुक्रमचिन्तयानाः उरुक्रमं चिन्तयन्त्यः अतएवाश्रुमुख्यः याः दोहनादिषु एनं श्रीकृष्णं गायन्ति प्रेङ्खेङ्खनं दोलान्दोलनम् उक्षणं सेचनम् ॥ १५ ॥

क्वणयतः वादयतः ॥ १६ ॥

भाषा टीका ।

हे सखि ! हो वे व्रज भूमि धन्य हैं जिनभूमियों में पुराण पुरुष ये भगवान् गुप्त होकर वन की विचित्र फूलों की मालाओं को धारण किये हुये वलदेवजी के सहित गउओं को चराते हुये वंशी को वजाते हुये क्रीडा करते विचरते हैं जिन भगवान् के कि चरण कमल को श्रीमहादेवजी तथा लक्ष्मी आदि कपूजन करते हैं ॥ ॥ १३ ॥

गोपियों ने क्या जाने क्या तप किया है जो कि लावण्य की खान का सार जिसके न कोई समान है न कोई जिस से अधिक है और विना भूषणादि से ही सिद्ध है नित्य नवीन है औरों को दुळभ है यशका श्रीका ऐश्वर्य का एक धाम है ऐसे भगवान् के रूप को नेत्रों से सव काल में पान करती हैं ॥ १४ ॥

जो गोपी गोदोहन में धान कूटने में दधि मंथन में घर ळीपने में झूला झुलाने में वालक के रोदन समय में घरके सींचने झाडने में त्रिविक्र भगवान् में चित्त लगाकर अनुरक्त वुद्धि वाली होकर अश्रु कंठ वाली होकर इन श्रीकृष्णचंद्र का गान करती हैं वे व्रज स्त्री धन्य हैं ॥ १५ ॥

जो कि गोपी प्रातः काल में व्रज से वन को जाते में सायंकाल में व्रज से आते समय में गउओं के साथ वेणु को वजाते हुये इन भगवान् के शब्द को सुन कर शीघ्र ही घरों में से निकल कर दया युक्त दृष्टि सहित मंद हास युक्त मुखारविंद को देखती हैं वे व्रज स्त्री वडी पुण्य वाली हैं ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

एवं सभयं ब्रुवाणासु स्त्रीषु तासां भयनिवृत्तये कृष्णः शत्रुं हन्तुं मनश्चक्रे ॥ १७ ॥

सभयाः स्त्रीणां गिरः श्रुत्वा पुत्रयोः स्नेहेन या शुक् तया

भगवद्गात्रनिष्पातैर्वज्रनिष्पेषनिष्ठुरैः ।
चाणूरो भज्यमानाङ्गो मुहुर्ग्लानिमवाप ह ॥ २० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

आतुरौ विह्वलौ पुत्रयोर्बलमजानन्तौ पितरावनुतापं प्राप्ताविति ॥१८-१९ ॥

तदा भगवतो गात्राणामरत्निजान्वादीनां निष्पातः प्रहारैर्वज्रस्य निष्पेषस्तीव्रप्रपातस्तद्वन्निष्ठुरैः भज्यमानाङ्गः श्लथद्गात्रः॥ २० ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

यद्यप्यन्यदापि तत् सन्दर्शनं सम्पद्यते तथापि तन्निर्गमनाप्रवेशयोरनुव्रजाभिगमनच्छलाल्लोकानामग्रेऽप्यसङ्कोचेन तत् सिद्ध्यतीति तथा विरहापगमापगमयोरत्यन्ताशक्त्या विशेषतस्तत् स्यादिति तदानीन्तनमेव तदुक्तम् । ईदृशमात्रस्य दर्शनमस्माकं न कथमपि सम्भवेदित्यत एवापुण्या एव वयमिति भावः । एवमीदृशं प्रकर्षेण प्रेमार्त्या सभयं भाषमाणासु सतीष्विति तादृशभाषणात्तासामनिवृत्तिरुक्ता । अर्हानर्हयोश्चेत्यनेन सप्तमी चार्हार्थे तदा तद्विधानं योग्यमेवेत्यर्थः । योगेश्वर इति । स्वेच्छया स्वशक्तिप्रकाशनाप्रकाशनयोर्हेतुः हरति भूभारं हारीरिति तद्वधप्रवृत्तावौत्सर्गिकश्चास्ति हेतुरिति भावः । शत्रुमिति सद्विद्वेषित्वात् । भगवानिति स्वरूपनिर्देशः सर्वत्रैव हेतुगर्भः । हे भारतर्षभेति चिरं युद्धक्रीडया तद्वधविलम्बादप्रसन्नचित्तं राजानमुल्लासयति भरतवंश्यत्वात्त्वमपि भारतयुद्धादावीदृशीं तल्लीलां जानासीत्यभिप्रायेण ॥ १७ ॥

स्त्रीणां तथाविधगिरः उप सामीप्येनाधिक्येन वा श्रुत्वा पितरौ तदानीं तादृशाभिमानमेवास्थिताविति पुत्रेत्यादौ हेतुः । आतुरत्वादेव बलं वाप्यनयोः अबुधौ अजानन्तौ सन्तौ तदनुसन्धानुमशक्ताविव्यर्थः । अन्वतप्येतां कथं व्रजे गमिष्यन्नक्रूर एव प्रथमतरस्तथा न शिक्षितः यथा नैतावानेष्यदित्यादिकं पश्चात्तापमकुर्वताम् अत्र बलमबुधावित्यत्र षष्ठ्यभावस्तस्याः षष्ठ्या अनित्यत्वात् । यदुक्तं । "कर्तृकर्मणोः कृती" त्यत्र भाष्यवृत्तौ विहिततदर्हमिति सूत्रनिर्देशेनानित्यताज्ञापनात् । धार्यैरामोदमुत्तममिति भट्टिरिति । तद्धितप्रत्ययः खलु सूत्रप्रथमनिर्दिष्टविभक्त्यन्तादेव नियमितः । यथा तस्यापत्यमित्यत्र उपगोरपत्यमौपगवः यथाचात्र धनमर्हति धन्य इति ॥ १८ ॥

पुनर्युद्धवर्णनमवतारयति । तैरिति पूर्वदर्शितदिङ्मात्रैः । वीप्सा तेषां वैचित्र्याद्यपेक्षया । उभाविति चाणूरस्यापि तत्र नैपुण्यं बोधयति अन्यथानर्हतया लीलासौष्ठवं न स्यात्तच्च लीलाशक्तिसम्पादितमिति भावः । विविधैरच्युतेतराविति पाठे इतरश्चाणूरः ॥ १९ ॥

अचिन्त्यशक्तित्ववाचको भगवच्छब्दोऽत्र मल्लेषु तादृशस्फूर्त्तौ हेतुः । वज्रनिष्पेषस्तत्करणकचूर्णनं तस्मादपि निष्ठुरैः ॥ २० ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

पितरौ देवकीवसुदेवौ ॥ १८ ॥

अच्युतेतरौ अच्युतचाणूरौ ॥ १९—३३ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

इत्थं स्त्रीषु प्रभाषमाणासु सतीषु हे भरतर्षभ ! योगेश्वरो भगवान् हरिः श्रीकृष्णः शत्रुं हन्तुं मनश्चक्रे ॥ १७ ॥

तथा पितरौ देवकीवसुदेवौ नन्दवसुदेवौ वा पुत्रयोः रामकृष्णयोर्बलमजानन्तौ केवलं स्त्रीणामुक्तरीत्या भाषमाणानां गिरो वचांस्याकर्ण्यान्वतप्येतामनुतप्तवन्तौ ॥ १८ ॥

अच्युतेतरौ कृष्णचाणूरौ चान्योऽन्यं नानाविधैस्तैस्तैर्नियुद्धविधिभिः पूर्वोक्तपरिभ्रमणविक्षेपादिभिर्यथा युयुधाते तथैव बलमुष्टिकौ राममुष्टिकौ च युयुधाते ॥ १९ ॥

तदा भगवतो गात्रनिष्पातैररत्निजान्वादिप्रहारैर्वज्रस्य निष्पेषस्तीव्रप्रहारस्तद्वन्निष्ठुरैर्भज्यमानाङ्गः चाणूरो मुहुर्ग्लानिमवापावाप्तवान् ॥ २० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

इतरश्चाणूरः ॥ १९ ॥

ग्लानिं प्राणसन्देहक्लेशम् ॥ २०-२४ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

ततो भगवांस्तदसहमानः यत्कृतवांस्तदाह । एवं संभाषमाणास्विति । स्त्रीष्वेवं सम्यग्भाषमाणासु अन्येन सहासक्तोऽपि सर्वात्मत्वात् शृणोत्येव योगेश्वरत्वादपि दूरश्रवणदर्शनादेस्तद्धर्मत्वात् दूरादेव श्रुत्वा हरिस्तासां सर्वदुःखहर्त्ता शत्रुं कंसमेव हन्तुं चाणूरं तासां विषादं वा मनश्चक्रे स ह्यक्लिष्टकर्मा न मारयेत् संध्यापर्यन्तं युद्धं च कुर्यात् ततः सम्यक्ताडिताः न प्रातरागच्छेयुः तथापि मारणार्थमेव नूतनं मनः कृतवान् ननु कथमेवं नूतनं पूर्वसिद्धादधिकं करोतीति चेत्तत्राह । भगवानिति । विश्वासार्थं भरतर्षभेति सम्बोधनम् ॥ १७ ॥

ननु तथापि स्त्रीणां वाक्यात् सर्वात्मा कथं तान्मारयितुं प्रवृत्त इति चेत्तत्राह । उपश्रुत्येति । तासां वाक्यात् देवकीवसुदेवयोर्महानेव क्लेशो जातः यदि शीघ्रं भगवान् मारयेत्तयोरपि क्लेशः अधिकः अनुवर्तेत अतः पित्रोरर्थं हन्तुं मनश्चक्रे इति स्त्रीणां गिर उपश्रुत्य तावपि तत्र समानीताविति निकटे न गिरो जाता इति अन्वतप्येतां तासां वचनेन भगवतः असामर्थ्यमिव प्रतिभातम् अतः पूर्वं सामर्थ्यं जानतोरपि वाक्यश्रवणेनानुतापो जातः । ननु माहात्म्यज्ञानस्य जातत्वात् कथं ताप इति

स श्येनवेग उत्पत्य मुष्टीकृत्य करावुभौ ।
भगवन्तं वासुदेवं क्रुद्धो वक्षस्यबाधत ॥ २१ ॥
नाचलत्तत्प्रहारेण मालाहत इव द्विपः ।
बाह्वोर्निगृह्य चाणूरं बहुशो भ्रामयन् हरिः ॥ २२ ॥
भूपृष्ठे पोथयामास तरसा क्षीणजीवितम् ।
विस्रस्ताकल्पकेशस्रगिन्द्रध्वज इवापतत् ॥ २३ ॥
तथैव मुष्टिकः पूर्वं स्वमुष्ट्याभिहतेन वै ।
बलभद्रेण बलिना तलेनाभिहतो भृशम् ॥ २४ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

१चेत्तत्राह । पुत्रयोरबुधौ बलमिति । माहात्म्यं तु जानीतः परं न बलं ततः क्लेशं प्राप्नोतीति तयोरनुतापः ॥ १८ ॥

एवं प्रासङ्गिकमुक्त्वा प्रस्तुतं वदन् यत्पूर्वं कृष्णचाणूरयोः प्रकारचतुष्टयं निरूपितं तद्रामसुष्टिकयोरप्यतिदिशति । तैस्तैरिति । नियुद्धविधिभिः बाहुयुद्धप्रकारैस्तैस्तैः प्रसिद्धैः पूर्वोक्तैर्वा ततोऽपि विविधैरनेकप्रकारैः यथाऽच्युतेतरौ अन्योऽन्यं युयुधाते तथैव बलमुष्टिकावपि तेनैव प्रकारेण युयुधाते अन्योऽन्यामिति द्वन्द्वयुद्धता अनुपदेशश्लोकः ॥ १६ ॥

अग्रे चाणूरमारणं वक्तुं पूर्वकृतयुद्धस्य वैयर्थ्यं उत्तरत्रापि तथैव भविष्यतीति पूर्वकृतस्य फलमाह । भगवद्गात्रेति । भगवतो गात्राण्यवयवाः तेषां निपातैः उपरि पातैः वज्रनिष्पेषात् वज्रेण पेषणादपि पुनः पुनर्धर्षणादपि निष्ठुरैः अतिदुःसहैः चाणूरो भज्यमानाङ्गः मुहुर्वारंवारं ग्लानिमवाप हेत्याश्चर्यं स हि पूर्वमिन्द्रेण सह युद्धे वज्रे प्रक्षिप्ते वक्षः स्पर्शे च तं वज्रं दूरीकृतवान् ॥ २० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

योगेश्वर इति । तत्रत्यानुकूलप्रतिकूललोकानां स्वगता अपि वाचः शृण्वन्नित्यर्थः । हन्तुं मनश्चक्र इत्यलमेता अनुरागिणीर्दुःखयित्वेति भावः ॥ १७ ॥

पितरौ देवकीवसुदेवौ वसुदेवनन्दौ वा अन्वतप्येतां हन्त हन्त व्रजे गमिष्यन्नक्रूर एव कथं तथा न शिक्षितो यथा नैतावानेष्यत् स इति हन्त हन्त कथमनार्य्यपुरे मयका सुतः कथमसौ न निगाह्य गृहे धृत इत्यादिकं पश्चात्तापमकुर्वतां बलमबुधौ अजानन्तौ षष्ठ्या अभावः "तदर्हम्" इति निर्देशेन तस्या अनित्यत्वज्ञापनाम् ॥ १८ ॥

अच्युतश्च इतश्चाणूरश्च तौ ॥ १६ ॥

निष्पातैः प्रहारैः वज्रेण निष्पेषः सञ्चूर्णनं तद्वान्निष्ठुरैः ॥ २० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

एवं सभयं निर्भयञ्च प्रभाषमाणासु योगेश्वरः सर्वचित्ताभिज्ञः ॥ १७—१८ ॥

अच्युतेतरौ श्रीकृष्णवलदेवौ ॥ १९ ॥

भगवतो गात्राणामरत्न्यादीनां निष्पातैः प्रहारैः वज्रस्य निष्पेषस्तीव्रः प्रपातस्तद्वन्निष्ठुरैर्दुःसहैः ॥ २० ॥

भाषा टीका ।

हे पुरुष श्रेष्ठ ! परीक्षित्‌जी इस प्रकार से स्त्रियों के भाषण करते ही मात्र में योगेश्वरों के ईश्वर हरि भगवान् ने शत्रु के मारने की इच्छा की ॥ १७ ॥

भय युक्त स्त्रियों के वचनों को श्रवण करके पिता माता वसुदेव देवकी नंदयशोदा दोनों बडा शोच करते भये क्यों कि वे चारों पुत्रों के वलको नहीं जानते हैं ॥ १८ ॥

अच्युत भगवान् और चाणूर दोनों उन नाना प्रकार के युद्ध प्रकारों से जैसे युद्ध करते भये तैसे ही वलदेवजी और मुष्टिक दोनों युद्ध करते भये ॥ १९ ॥

फिर तो वज्र के निष्पात सरी के निठुर जो भगवान् के शरीर के प्रहार तिनों से चाणूर के सब अंग ढीळे होने लगे इससे वारंवार ग्ळानि को प्राप्त होने लगा ॥ २० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

श्येनस्येव वेगो यस्य स चाणूरः अबाधतताडयत् ॥ २१ ॥ २२ ॥

भूपृष्ठे भुव उपरि पोथयामासाऽऽस्फालयत् इन्द्रध्वजो वज्रं यद्वा इन्द्रध्वजो गौडेषु प्रसिद्धः कस्मिंश्चिदुत्सवे महास्तम्भो ध्वजपताकाद्यलङ्कृतः पुरुषाकृतिरुच्छ्रीयते स यथा पतति तद्वदपतदिति ॥ २३—२४ ॥

१एतत्पद्यव्याख्याने उपश्रुत्येतिप्रतीकधारणेनाधिकः पाठः मूले प्रतीयते परन्तु सुबोधिनीसहितपुस्तकेऽपि मूले इदानीं स नोपलब्ध इति ज्ञेयम्

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी।

श्येनवेग इति। पूर्वं ग्लानिं प्राप्य दूरे गमनं बोधितम्। उभाविल्येकदैव मुष्टीकृताभ्यां द्वाभ्यामेव प्रहारात् महावलिष्ठत्वं नियुद्धकुशलत्वञ्च दर्शितं भगवन्तं वासुदेवमिति तन्मूढत्वदौरात्म्यव्यञ्जकं तत्तन्निरुक्तेः॥ २१॥

श्रीभगवानपि तादृशनिजजनहर्षणाय तस्य तत्तदेव व्यञ्जितवान् नतु स्वविनोदाय स्वस्य क्षोभलेशमप्यनुकृतवानित्याह। नेत्यनेन। स्रग्भिरित्यनेन सुखमपि तस्य सूचितम्। बहुत्वस्य यदि बह्वीभिरपि ताभिर्हतः स्यात्तदपि तस्य यथा न किञ्चिदपि स्यात्तथास्य बलवाहुल्येनापीति भावः। अथ श्रीहरिवंशवचनानि ज्ञेयानि। "यदयं बाहुयुद्धं वै सदैवं कर्त्तुमुद्यतः। तत्र वै विग्रहः कार्यस्तोषयिष्याम्यहं जगत्। करुषेषु प्रसूतोऽयं चाणूरो नाम नामतः। बाहुयोधी शरीरेण कर्मभिश्चानुचिन्त्यताम्। एतेन बहवो मल्ला निपातानन्तरं हताः। रङ्गप्रतापकामेन मल्लमार्गाश्च दूषिताः। ये तु केचित् स्वदोषेण राज्ञः पण्डितमानिनः। प्रतापार्थं हता मल्ला मल्लहन्तुर्वधो हि स इति। बहुशः बहुवारान् बहुधा चेत्यर्थः। तरसा भ्रमणवेगेनैव क्षीणजीविनमाकाश एव मृतं तथाच श्रीविष्णुपुराणे। "भ्रामयित्वा शतगुणं दैत्यमल्लममित्रजित्। भूमावास्फोटयामास गगने गतजीवित" मिति। अतएव अहो मृत एवायमित्युक्त्वा परित्यागमिषेणैव पोथयामासेति ज्ञेयम्॥ २२॥

अपतत् स चेति शेषः। इन्द्रध्वजोपमया तद्देहस्य बृहत्तरत्वमपि ध्वनितं यथोक्तं श्रीहरिवंशे। "देहेन तस्य मल्लस्य चाणूरस्य गतायुषः। सन्निरुद्धो महारङ्गः सशैलेनेव लक्ष्यत इति॥ २३॥

अभिमुखं हतेन प्रहृतेन। बलभद्रं बलोच्छ्रयादिति स्वभावत एव महाबलिष्ठेन तत्रापि बलिना प्रकटितबलेनेत्यर्थः। तलेन चपेटेन॥ २४॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

स चाणूरः श्येनस्येव वेगो यस्य स उत्प्लुत्य क्रुद्धः उभौ मुष्टीकृतौ करौ वासुदेवं वक्षस्यताडयन्मुष्टीकृतकराभ्यां वासुदेवस्य वक्षस्यताडयदित्यर्थः। मुष्टीकृत्येति पाठे उभौ करौ मुष्टीकृत्य॥ २१॥

भगवांस्तत्प्रहारेण नाचलत् यथा स्रग्भिर्हतः ताडितो द्विपो गजो न चलति तद्वत् किन्तु तरसा चाणूरं बाह्वोर्गृहीत्वा बहुकृत्वो भ्रामयंस्तेनैव त्यक्तं जीवितं यस्य तं गतप्राणं भूपृष्ठे पोथयामास आस्फोटयत् तेनैव पातितश्चाणूरः विस्रस्ता विक्षिप्ताः केशाः आकल्पा आभरणानि स्रजश्च यस्य तथाभूतो न्यपतत् यथेन्द्रध्वजस्तद्वत्॥ २२॥ २३॥

तथा मुष्टिकोऽपि तावत्समुष्टिताडितेन रामेण कर्त्रा भृशं करतलेनाभिताडितः प्रवेपितः कम्पितः अर्दितः पीडितः मुखतो रुधिरमुद्वमन्नुद्गिरन् गतप्राणो वा तेन चण्डमारुतेनाहत उन्मूलितमूलोऽङ्घ्रिपो वृक्ष इव उर्व्युपस्थे भूपृष्ठे पपात॥ २४-२५॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी।

तादृशो हि चाणूरः कथं मूर्च्छामवापेति ततो मारणं वक्तुं भगवानक्लिष्टकर्मेति प्रथमं तस्यापराधमाह। स श्येनवेग इति श्येनादप्यधिको वेगो यस्य श्येनो हि भ्रातृव्यं निपात्यादत्ते श्येनात्सर्वे सपक्षा बिभ्यति अतस्ततं उत्पत्य उभावपि करौ मुष्टीकृत्य गदावदेकीकृत्य पृथग्वा मुष्टिद्वयं संयोज्य सर्वेश्वरमगणयन्तं वासुदेवं मोक्षदातारमन्यथा भुजाधिष्ठातेन्द्रो न प्रवर्त्तेयेत् मोक्षं दास्यतीति भगवदिच्छया अन्यथा कर्त्तुमशक्ताः कालादयस्तूष्णीं स्थिताः नन्वन्तर्यामी कथमेवं प्रेरितवानित्यत आह। क्रुद्ध इति। क्रोधेन व्याप्तस्तथा कृतवान्न बुद्धिपूर्वकं प्रेरितो वा राज्यार्थं लक्ष्मीनिवासभूतमिति सन्तुष्टात् कंसाल्लक्ष्मीं प्राप्स्यामीति वक्षः स्पर्शमात्रं कृतवान्॥ २१॥

सोऽपि स्पर्शस्तस्य व्यर्थो जात इत्याह। नाचलदिति। तस्य प्रहारेण ईषदपि चलनं स्यन्दनमपि न प्राप्तवान् दूरे स्यन्दनं ज्ञातवानपि नेति वक्तुं दृष्टान्तमाह। मालाहत इवेति। हस्ती हि अङ्कुशप्रहारमपि न मन्यते का वार्त्ता मालाप्रहारस्य ततो भगवांस्तं मारितवानित्याह। बाह्वोर्निगृह्येति। यौ बाहू मुष्टीकृत्य भगवति प्रक्षिप्तवान् तावेकहस्तेन गृहीत्वा यथा न मोचयति तथा गृहीत्वा बहुशो बहुवारमभ्रामयत्॥ २२॥

तस्य पुनरुत्थानाभावायाह। तरसा क्षीणजीवितमिति। शीघ्रमेव भ्रामणसमय एव क्षीणं जीवितं यस्य भगवान् हि दूरादेव प्रक्षिप्तवान् न स्वेकं भागं धृत्वा भूमौ ताडितवान् अतस्तस्य भगवद्धस्ताद्विमुक्तस्य भूमौ पतने प्रकारमाह। विस्रस्तालपकेशस्रगिति। विस्रस्ताः इतस्ततः प्रक्षिप्ताः आकल्पाः आभरणानि केशाः स्रजो मालाश्च यस्य तादृशो भूत्वा लक्ष्मीस्थानप्रहारेण लक्ष्मीस्तस्य विमुखेति तत्सम्बन्धिनः पदार्थाः विशेषेण स्रस्ताः ततः इन्द्रध्वज इव पूर्वमिन्द्रगर्वनाशो भगवता कृत इति तद्वदस्यापि जातमिति ज्ञापयितुं पूर्वदेशप्रसिद्धः इन्द्रध्वज उच्चैः स्तम्भः परितो रज्जूनामाकर्षणेनोत्थापितः यथा रज्जूनां शैथिल्ये गलितवस्त्राद्याभरणानि पातन्ति तथा कालादृष्टकर्मादीनां विशकलितत्वेन रक्षकाभावात् शरीरं स्तम्भयितुमशक्तः भूमावपत् मल्ला हि पतन्तोऽपि स्वं शरीरं धारणावशाद्धारयन्ति तदत्र नाभूदिति ज्ञापयितुं दृष्टान्तकथनम्॥ २३॥

यथैतस्य भगवता मारणं कृतमेवं मुष्टिकस्यापि बलभद्रेण कृतमिति वक्तुमाह। तथैवेति। बलभद्रस्याप्यक्लिष्टकर्मत्वं बोधयितुं पूर्वं मुष्टिकस्यातिक्रम उच्यते तथेत्यनेन स्त्रीणां वचनानन्तरं तद्दुःखदूरीकरणाय शत्रुहननेच्छा तथैव गात्रस्पर्शैः शत्रोः सर्वाङ्गव्यथा ततो मारणमिति सर्वमतिदिष्टं मारणे प्रकारं वक्तुं पुनर्निरूपणमाह। स्वमुष्ट्या अभिहतेन बलेन तलेन चपेटेनाभिहतः भृशं मुखाद्रुधिरमुद्वमन् अत्यन्तमर्दितः व्यसुः सन् पपात असावधानत्वाय दृष्टान्तः वाताहत इवेति। चपेटताडनेनैव क्रियाशक्तिस्तस्यापगता बलवता सजातीयेनापहृतेति समुच्चयेति मुष्टिकनाम्ना तस्य मुष्टिरेव प्रसिद्धा अतएव तेनाभितो हतः आभिमुख्येन वा प्रथमपक्षे मुष्टिभिः सर्वाङ्गेषु हननं द्वितीये तु मुखे वक्षसि वा सकृदेव हननमिति ननु चपेटमात्रेण कथं हननमित्याशङ्क्याह। बलिनेति। अनेन कर्णप्रान्ते मर्मस्थानमिति दैवगत्या हत इति पक्षो व्यावर्त्तितः॥ २४॥

प्रवेपितः स रुधिरमुद्वमन्मुखतोऽर्दितः ।
व्यसुः पपातोर्व्युपस्थे वाताहत इवाङ्घ्रिपः ॥ २५ ॥
ततः कूटमनुप्राप्तं रामः प्रहरतांवरः ।
अवधील्लीलया राजन् ! सावज्ञं वाममुष्टिना ॥ २६ ॥
तर्ह्येव हि शलः कृष्णपदापहतशीर्षकः ।
द्विधा विदीर्णस्तोशलक उभावपि निपेततुः ॥ २७ ॥
चाणूरे मुष्टिके कूटे शले तोशलके हते ।
शेषाः प्रदुद्रुवुर्मल्लाः सर्वे प्राणपरीप्सवः ॥ २८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

अबाधत अताडयत् ॥ २१ ॥ २२ ॥
इन्द्रध्वजः प्राच्येषु प्रसिद्धः ॥ २३ ॥
तलेन पाणितलेन ॥ २४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

स चाणूरः श्येनस्येव वेगो यस्य सः अबाधत अताडयत् ॥ २१ ॥ २२ ॥

ध्वजपताकाद्यलङ्कृतः प्रतिसम्वत्सरमुच्छ्रीयते य इन्द्रध्वजः
अद्यप्रभृति यश्चैवं करिष्यति नरेश्वरः ।
आरोग्यञ्च सुभिक्षञ्च तस्य राष्ट्रे भविष्यति ॥
इत्यादिपुराणान्तरप्रसिद्धस्तद्वदित्यर्थः ॥ २३ ॥ २४ ॥

भाषा टीका ।

तब वह चाणूर बाज की नाईं, ऊपर को कूदकर दोनों हाथों को जोड़कर क्रोधित होकर भगवान् वासुदेव के हृदय में ताडन करता भया ॥ २१ ॥

परंतु उस प्रहार से भगवान् कुछ भी चलायमान नहीं भये जैसे कि माला के मारने से हाथी दुखित नहीं होता है फिर तो भगवान् हरि ने चाणूर को दोनों भुजाओं से उठाकर घुमाया ॥ २२ ॥

उतने ही में वेग से उसके प्राण निकल गये फिर उसको जमीन पर पटक दिया तब वह चाणूर ऐसा पड़ा जैसा इंद्र ध्वज गिरता है तैसे भूषण केश माला उसके सब खुल गये और गिर पड़ा ॥ २३ ॥

इसी प्रकार से मुष्टिक ने क्रोधित होकर बलभद्रजी को प्रहार किया फिर बलभद्रजी ने उस पर अत्यंत प्रहार किया ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अर्दितः पीडितः उर्व्युपस्थे भूतले ॥ २५--२८ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

पूर्वमिन्द्रध्वजदृष्टान्तः ऊर्ध्वात् पतनेऽत्र वृक्षदृष्टान्तो भूमेरेवेति ॥ २५ ॥

लीलया अप्रयासचेष्टया । यतो वाममुष्ट्या तत्रापि सावज्ञं हेलयैवेत्यर्थः ॥ २६ ॥

शलस्तोशलकश्च मल्लन्यायमतिक्रम्य भयात्सिलिलवैचाल्यक्षितयुगपत्तत्पादद्वयाकर्षणाय नीतिमस्तकः सन्निति ज्ञेयम् ॥ २७ ॥

युद्धे श्रीकृष्णतः भयुद्वेतु कंसतः प्राणरक्षां कर्तुमिच्छव इत्यर्थः ॥ २८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ततो रामः तमनु समनन्तरं प्राप्तं कूटाख्यं मल्लं सावज्ञं सावहेलनं यथा तथा लीलया वाममुष्टिना ऽवधीत् ॥ २६ ॥

तदैव कृष्णस्य प्रपदा पादाग्रेण ताडितशिराः शलाख्यो मल्लः तोशलस्तु द्विधा विदीर्णः विदारितः उभौ तावेतौ शलकौ शलकौ निपेततुः ॥ २७ ॥

इत्थं चाणूरादिषु हतेष्ववशिष्टाः सर्वे प्राणपरीप्सया प्राणानाप्तुमिच्छया जीवितुमिच्छयेति यावत्प्रदुद्रुवुः पलायितवन्तः प्राणपरीप्सव इति पाठे जीवितुमिच्छव इत्यर्थः ॥ २८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

उर्व्युपस्थे भूमिपृष्ठे ॥ २५ ॥
सावज्ञम् अनायासम् ॥ २६-२८ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

अभितो हत इत्यनेनापि यतो बलमस्य भग्नमेव उपकार्यैवेति आहननमात्रेण कथं प्राणोद्गम इति आशङ्क्य प्रकारमाह । प्रवेपित

गोपान् वयस्यानाकृष्य तैः संसृज्य विजह्रतुः ।
वाद्यमानेषु तूर्येषु वल्गन्तौ रुतनूपुरौ ॥ २९ ॥
जनाः प्रजहृषुः सर्वे कर्मणा रामकृष्णयोः ।
ऋते कंसं विप्रमुख्याः साधवः साधु साध्विति ॥ ३० ॥
हतेषु मल्लवर्येषु विद्रुतेषु च भोजराट् ।
न्यवारयत्स्वतूर्याणि वाक्यं चेदमुवाच ह ॥ ३१ ॥
निःसारयत दुर्वृत्तौ वसुदेवात्मजौ पुरात् ।
धनं हरत गोपानां नन्दं बध्नीत दुर्मतिम् ॥ ३२ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

इति । प्रकर्षेण वेपित इति मूर्च्छया परितः कम्पितो जातः ततोऽन्तःक्षोभात् आघातेन सर्वाङ्गे तु रुधिरमेकीभूतं मुखान्निर्गतं ततः पीडितो जातः यथा प्राणापगमो भवति ततः स्तम्भकस्याभावात् पतितः बलक्रियापतनपर्यन्तमपि व्यापृतेति ज्ञापयितुं दृष्टान्त उक्तः नावयवावियोगे परमकारणनाशात् पतितः किं तु बलमूलकारणयोरेव सामर्थ्यादिति ॥ २५ ॥

तस्मिन् हते कूटो नाम बहुकपटाभिज्ञः युद्धे कूटवत् स्थिरोऽपि बलभद्रं ताडितवान् ततो बलेन लीलयैव हत इत्याह । अत्र न बलव्यापारः किं तु मल्लरसस्योद्गमनार्थं रमणात्मक इति रसोद्गमार्थमेव प्रहरताम्बर इति लीलयेति च पुरुषकारोऽपि निरूपितः राजन्निति विश्वासार्थं सम्बोधनमलौकिकत्वात् क्रियाशक्तिप्रधानः राम इति बलनामवतः रामनाम्नोऽपि सामर्थ्यप्रतिपादकत्वं वक्तुमिदमुक्तम् ॥ २६ ॥

एवमुभयोर्वधो बलान्निरूपितः अवशिष्टयोर्वधं भगवतः सकाशादाह । तर्ह्येवेति । न तु बलभद्रव्यापारानन्तरं शलतोशलौ हतौ किं तु यदैव कूटो हतः तदैव शलोऽपि चतुर्थः कृष्णपादायहतशीर्षको जातः स हि पादं धर्तुमागतः क्षिपता पादेन हतः तस्मिन्नेव समये तोशलकोऽपि समागतः स तु द्विधा विदीर्णः यदैव उभयोरपि पदव्यापारः साक्षाद्भगवता हताविति वक्तुमेवं वचनमुचितं एवं प्रकारान्तरादपि सम्भवति कृष्णपदापहतं दूरं प्रक्षिप्तं शिरो यस्य तादृशः शलो जातः तेन द्विधा विदीर्णः तस्य शिरसा तोशलको हतः द्विधा विदीर्णः प्रदरवत् न तु भगवत्पदा हत इति अर्थद्वयेऽपि उभावपि निपेततुः सकृदेव एको विदीर्णः एकस्तिर्यक् द्विधा जात इतिविशेषः ॥ २७ ॥

एवं भगवतोऽक्लिष्टकर्मत्वं निरूपितम् । चाणूर इति गणना हतानामभिज्ञानार्था पञ्चानां मध्ये एकस्मिन्नपि प्राणे स्थिते यथा देहो नापगच्छति तथा शिष्टा मल्ला नापगच्छन्तीति ततः सर्वे स्वप्राणरक्षकाः धनप्राप्त्याशां दूरीकृत्य प्रकर्षेण दुद्रुवुः अयुद्धं कंसाश्रयं युद्धे तु भगवत इति पलायनमेव शरणम् अन्येषां वीराणामपि पलायनं मा भवत्विति मल्लग्रहणं स विशेषे शिष्टानां युद्धं कर्त्तव्यमिति सर्वग्रहणं ननु सर्वैरेव स्वपौरुषं प्रदर्शनीयं कथमतिक्रम इति चेत्तत्राह । सर्वे प्राणपरीप्सव इति । यदि चाणूरादीन्न हन्यात्तदा अन्येऽपि युध्येरन् न हि वीरा इव मल्लाः प्राणनिरपेक्षं यतन्ते परिपालयितुमीप्सवः ॥ २८ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

उर्व्युपस्थे भूतले श्लेषद्योतितं गालिप्रदान च ॥ २५—२८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

उर्व्युपस्थे भूतले ॥ २५—२८ ॥

भाषा टीका ।

तब वह मुष्टिक कांपता हुआ मुख से रुधिर को उगिलता हुआ बडा पीडित होकर प्राणों को त्याग करके जैसे पवन के मारे पेड गिरे तैसे पृथिवी के ऊपर गिर पडा ॥ २५ ॥

तिसके पीछे कूट मल्ल आया तिसको प्रहार करने वालों में श्रेष्ठ बळरामजी ने हे राजन्! बडी अवज्ञा से बांयीं मुष्टि से मार दिया ॥ २६ ॥

तिसी वखत शल नाम का मल्ल आया सो श्रीकृष्ण के पाव के प्रहार से मस्तक के फूटने से ऐसे ही तोसल मल्ल भी दो टुकडा से विदीर्ण होकर दोनों गिर पडे ॥ २७ ॥

इस प्रकार से चाणूर मुष्टिक कूट शल तोशल ये सब जब मर गये तब बांकी जो मल्ल रहे सो प्राण की रक्षा करने की इच्छा से सब भग गये ॥ २८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

वल्गन्तौ नृत्यादि कुर्वन्तौ ॥ २९ ॥

साधु साधु इति वदन्तः ॥ ३०—३३ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

गोपानित्येत् प्राक् ततश्च विहृत्येति ज्ञेयम् । आकृष्य आपातप्रवृत्तौ लज्जया स्वयमनागच्छतोऽपि बलाद्गृहीत्वा संसृज्य

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

मल्लरीत्या मिथो गृहीत्वा वल्गन्तौमल्लगतिं कुर्वन्तौ तदानीं चैलेयालङ्कारत्वेऽपि रत्ननूपुराविति चरणे प्रतिमल्लनिमर्दाभावात् गात्रातोदकत्वेन वल्गनपोषकशब्दत्वेनच तदपरित्यागात् । एतद्वयस्याकर्षणादिकं कौतुकार्थं तच्च कंसक्रोधविवर्द्धनमपि ज्ञेयम् ॥२९॥

विप्रेषु मुख्याः साधवश्च ये ते तु तन्महिमज्ञानवलेनाकुतोभयत्वात् साधु साधु साध्विति स्पष्टमेव वदन्तः प्रजहृषुः ॥ ३० ॥

स्वस्यैव तूर्याणि न्यवारयादिति नतु देवानां निवारयितु शक्तः तदानीं हततेजस्कत्वात् । नच यानि स्वयमवाद्यन्त तानि वा अशक्यत्वादिति भावः । स इति पाठेऽपि स एवार्थः । श्रीविष्णुपुराणे तु पूर्वमेव न्यवारयदित्युक्तं "वलक्षयं विवृद्धिञ्च दृष्ट्वा चाणूरकृष्णयोः । वारयामास तूर्याणि कंसः कोपपरायणः । मृदङ्गादिषु वाद्येषु प्रतिषिद्धेषु तत्क्षणात् । खे सङ्गतान्यवाद्यन्त देवतूर्याण्यनेकशः । जय गोविन्द ! चाणूरं जहि केशव दानवम् । इत्यन्तर्द्धि गता देवास्तदोचुरतिहर्षिता "इति । श्रीहरिवंशे च । ततःप्रस्विन्नवदनः कृष्णप्राणाहितेक्षणः । न्यवारयत तूर्याणि कंसः सव्येन पाणिना । प्रतिषिद्धेषु तूर्येषु मृदङ्गादिषु तेषु वै । खे सङ्गतानी" त्यादि । किञ्च । स्वयमेव अवाद्यन्त तूर्यघोषाश्च सर्वश इति । अत्रैकवाक्यतावादकैः पुनः प्रवर्त्तितत्वाज्ज्ञेया निवारणे छलं दर्शयति । वाक्यञ्चेति ह स्फुटं निजादेशश्रवणार्थमिवेति भावः । भोजेयादिवभेदैः कतिपयैरेव राजत इति तथा सः इति तदानीं सर्वेषामपि तदनादरः सूचितः ॥ ३१ ॥

नियुद्धक्रीडायां मल्लहननाद्दुर्वृत्तौ । युद्धं चानयोस्तादित्याह-यतो वसुदेवात्मजौ पुरान्निःसारयतेत्यपकर्तुमशक्यत्वात् निःसारणशक्यत्वञ्चानयोः प्रायो वनवासिनोर्वनाभिरुचेः स्यादिति गूढोऽभिप्रायः प्रकटस्तु भागिनेयावेताविति दुर्मतिं वसुदेवेन सह सौहृद्यात् तथाप्यज्ञानादेव मच्छत्रुपालनं कुरुत इति वध्यतैव ननु हन्यातेत्यर्थः ॥ ३२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ततो रामकृष्णौ वयस्यान् सखीन् गोपानाकृष्याहूय तैः संसृत्य सङ्क्रम्य तूर्येषु वाद्यमानेषु सत्सु चारुणी नूपुरे ययोस्तौ वल्गन्तौ नृत्यादि कुर्वन्तौ ॥ २९ ॥

तदा कंस विना सर्वे जनाः रामकृष्णयोः कर्मणा युद्धात्मकेन नितरां हृष्टवन्तः तथा साधवो विप्रश्रेष्ठाश्च साधु साध्वित्यूचुः ॥ ३० ॥

इत्थं मल्लवर्येषु चाणूरादिषु हतेष्ववशिष्टेषु पलायमानेषु च सत्सु स भोजराट् कंसः तूर्याणि न्यवारयदिदं वक्ष्यमाणं वाक्यमुवाच ह ॥ ३१ ॥

तदेवाह । निःसारयतेति द्वाभ्याम् । दुर्वृत्तौ वसुदेवस्यात्मजौ द्रविणीयासमिदं पुरान्निःसारयत निर्वासयत स्वभूत्यान् प्रतीयमुक्तिः स्तमिदं पुरान्निःसारयत निर्वासयत तथा दुष्टबुद्धियस्य तं नन्दं गोपानां धनं हरत गृह्णीत तथा दुष्टबुद्धियस्य तं नन्दं गृह्णीत बद्धं कुरुत ॥ ३२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

संसृज्य सङ्क्रम्य वल्गन्तौ नृत्यन्तौ तौ वीक्ष्य नुतनूपुरौ स्तुततुलाकोटी नुतनूपुराविति केचित् तुलाकोटिस्तु नूपुर इति ॥२९-३१॥
निःसारयत निर्गमयत ॥३२-३३ ॥

श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी ।

ततो भगवांस्तुल्यवलैः क्रीडिष्याम इति पूर्वमेव प्रतिज्ञानात् तेषु गतेष्वपि राजप्रीतेश्चिकीर्षितत्वाद्गोपैः सह मल्लयुद्धं कृतवानित्याह । गोपान् वयस्यानिति । वयस्याःसमानवयसा प्रतीत्या कालकृततुल्यबलाः तेऽपि किञ्चिद्भीता इत्यालक्ष्य स्वयंहस्तेन धृत्वा समाकृष्य विजहृतुः ननु भगवान्न विहरणार्थं प्रवृत्तः नापि कंसस्यैतदभिप्रेतमिति किमिति विजहतुः प्रतिज्ञा तु पूर्व तैः सह युद्धनिषेधार्था न तु बालैः सह युद्धार्थापि उभयत्र तात्पर्ये वाक्यभेदप्रसङ्गात् प्रकरणं नियामकमिति निषेधो वक्तव्य एवेति चेत्तत्राह । वाद्यमानेषु तूर्येष्विति । तेषु हतेष्वपि मल्लानां रसजनकानि तूर्याणि वाद्यमानान्येव जातानीति निमित्तस्य विद्यमानत्वात् लोकप्रतीत्यर्थं लीलया कस्यापि सन्तोषो न जात इति लोकानां प्रीत्यर्थं तथा कृतवन्तौ किञ्च वल्गन्तौ शब्दं कुरुतः मल्लानां जयख्यापकं किञ्च रत्ननूपुरौ च जातौ नूपुरयोरपि जयख्यापकत्वं लोकसिद्धम् ॥ २९ ॥

एतद्यदर्थं कृतं तज्जातमित्याह । जनाः प्रजहृषुरिति । जनाः प्रकर्षेण जहृषुः हर्षं प्राप्ताः सर्व इति अष्टविधाः मल्लकंसव्यतिरिक्ताः रूपेण तथा जाता भविष्यन्तीत्याशङ्क्याह । कर्मणेति रामकृष्णयोरुभयोरपि मल्लवधलक्षणेनालौकिकेन कर्मणा सांप्रतं बालैः सह मल्लयुद्धलक्षणेन वा । पूर्वकर्मतूद्वेजकमिति न रसोत्पादकं कंसस्यापि सुखमाशङ्क्याह । ऋते कंसमिति । तत्रापि ये विप्रमुख्याः ये वा साधवः भगवत्पराः साधु साध्विति वदन्तो जहृषुः कायिकव्यापारो दर्शनमेव हर्षो मानसः वाचनिकी प्रशंसेति सर्वथा तेषां हर्षो निरूपितः हीनानां प्रशंसा करणमयुक्तमिति विप्रश्रेष्ठाः साधवश्च गणिताः ॥ ३० ॥

मध्ये कियत्कालं यावता गोपैः सह युद्धं तावच्चिन्ताकुलो विचारमूढः स्थितः पश्चात्पुनरत्यावेशेन बहिर्मुखो जात इति निवारणादिकं कृतवानित्याह । हतेष्विति । केचन हताः केचन विद्रुताः तथापि प्रसिद्धतयैव अपकारः कर्तव्य इति विचारितवान् यतो भोजराट् आदौ निमित्तं दूरीकृतवानित्याह । निवारयत्स्वतूर्याणीति । न्यवारयदिति वा इदमग्रे वक्ष्यमाणं वाक्यं चोवाच चकाराद्युद्धार्थं सावधानोऽपि जातः कपटलीला स्वेनैव निराकृता ईश्वरत्वं चाविष्कृतवान् तथा सति यदि तयोर्वैरं दद्यात्तूष्णीं वा अन्तर्गच्छेत् तदा न काचिच्चिन्ता स्यात् अक्लिष्टकर्मा हि भगवान् वसुदेवं मोचयित्वा नयेत् स्थापयेद्वा भक्तद्रोहे वधः स्मृत इति भगवत्प्रतिज्ञेति अक्लिष्टतासिद्ध्यर्थं वक्ष्यमाणमुक्तवान् हत्याश्चर्यं एतान्नृपि दृष्ट्वा पुनर्निर्लज्ज आज्ञापयतीति ॥ ३१ ॥

तस्यायुक्तवचनान्याह । निःसारयतेति द्वाभ्याम् । भगवति तत्सम्बन्धे च लोके दोषप्रतीतिव्यावृत्त्यर्थं कपटेन वदति यतो दुर्वृत्तौ बालौ च नहि मारणमुचितं युद्धदर्शनार्थमेव परमाकारितौ वसुदेवस्यैवैतौ अतो भागिनेयाविति निःसारणमेव

वसुदेवस्तु दुर्मेधा हन्यतामाश्वसत्तमः ।
उग्रसेनः पिता चापि सानुगः परपक्षगः ॥ ३३ ॥
एवं विकत्थमाने वै कंसे प्रकुपितोऽव्ययः ।
लघिम्नोत्पत्य तरसा मञ्चमुत्तुङ्गमारुहत् ॥ ३४ ॥
तमाविशन्तमालोक्य मृत्युमात्मन आसनात् ।
मनस्वी सहसोत्थाय जगृहे सोऽसिचर्मणी ॥ ३५ ॥
तं खड्गपाणिं विचरन्तमाशु श्येनं यथा दक्षिणसव्यमम्बरे ।
समग्रहीद्दुर्विषहोग्रतेजा यथोरगं ताक्ष्र्यसुतः प्रसह्य ॥ ३६ ॥

श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी ।

कुर्वन्तु गोपानां च धनं हरत धनेन तैः पोषिताविति नन्दः अस्मदीयोऽपि भिन्नपक्षो जात इति वध्नीत ननु कोऽपराधो नन्दस्य सहि स्वपुत्रत्वेन जानाति नत्वन्यथेति चेत्तत्राह । दुर्मेधा इति । दुर्बुद्धिरयं विलक्षणं पुत्रं दृष्ट्वा स्वस्माज्जातः कथमेवं भविष्यतीत्याशङ्कायां राज्ञे खलु निवेदनीयं विचारकाणां चतुराणामेषा रीतिरिति तदकरणात् दुर्मतिः अतस्तस्य बन्धनमेव दण्डः ॥ ३२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

वल्गन्तौ नृत्यादि कुर्वन्तौ ॥ २९ ॥

विप्रेषु ये मुख्याः साधवो ये ते साधु साध्वित्यूचुः विप्राधमाः कंसपुरोहितास्तु हाहेत्यूचुरिति भावः ॥ ३०-३१ ॥

निः सारयतेत्यादौ सरस्वतीमिते तु दुर्गमं वृत्तं चरित्रं ययोस्तौ पुरात् पुरमध्यास्य निः शेषेण सारं श्रेष्ठं कुरुत गोपानां धनं श्रीकृष्णं हरत अत्रैव रक्षत नन्दं वध्नीत प्रेमरसनयेति शेषः तेन संहाति प्रीतिं कुरुतेत्यर्थः । दुर्गमा मतिर्यस्य तम् ॥ ३२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

वल्गन्तौ निःशङ्कं धावमानौ ॥ २९ ॥

साधुसाध्विति वदन्तः ॥ ३०-३३ ॥

भाषा टीका ।

फिर तो भगवान् तथा बलरामजी दोनों अपने सखाओं को खैंचकर विहार करते भये उस समय पर सब बाजा बजते थे और उनके चरणों में नूपुर बजते थे ॥ २९ ॥

उन दोनों के उस कर्म से एक कंस को छोड कर सब मनुष्य बडे हर्षित भये और उत्तम ब्राह्मण लोग साधु साधु इस शब्द से प्रशंसा करते भये ॥ ३० ॥

ऐसे बडे मल्लों के मरने से औरों के भग जाने से भोज राज ने सब अपने बाजों को बंद करवा दिये और इस वचन को कहता भया ॥ ३१ ॥

इन दुर्वृत्त वसुदेव के दोनों पुत्रों को इस पुरी में से निकालो सब गोपों के धनको छीन ल्यो और दुर्मति नंद को बांधल्यो ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अव्ययोऽश्रमः लघिम्ना लाघवेन ॥ ३४-३५ ॥
दुर्विषहमविषह्यमुग्रं तेजो यस्य स श्रीकृष्णः ॥ ३६ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

सुदुर्मेधाः पुत्रपरिवर्त्तनादिकौटिल्येन अतोऽसत्तमः स्वपुत्रार्पणप्रतिज्ञाखण्डनात् । वसुदेवस्त्वित्यपि पाठः क्वचित् चकार उक्तसमुच्चये । अपिशब्दात् यद्यपि पिता तथापीत्यर्थः । परपक्षगो वसुदेवाद्यनुगः । वाग् देवी तु यथार्थमाह । दुः दुर्गमं वृत्तं चरित्रं ययोरिति प्रपतितो वर्गः प्रवर्ग इतिवत् कृदन्तपदलोपात् । पुरान्निःसारयत मथुरापुरीमधिकृत्य व्यञ्जयत प्रकाशयतेत्यर्थः । गोपानां धनं श्रीकृष्णं हरत अत्रैव रक्षत । ननु श्रीनन्दो नैनं त्यक्ष्यति तत्राह । दुःखितमतिं नन्दं बध्नीत कृष्णद्वारैव समयं विधाय प्रतिबद्धं प्रतिष्टब्धं कुरुत ततः सुदुर्गमबुद्धिर्वसुदेवो हन्यतां गम्यतां सर्वैराश्रियतामित्यर्थः । न विद्यते सत्तमो यस्मात् सः । तथोग्रसेनोऽप्याश्रियतां परः परमेश्वरस्तत्पक्षग इति ॥ ३३ ॥

विकत्थमान इति । तथा तर्जनस्याप्यात्मश्लाघायां तात्पर्यात् अव्ययः श्रीकृष्णः तन्नामत्वेन प्रसिद्धत्वादश्रम एव सन्नित्यर्थः । लघिम्ना शैघ्र्यातिशयेनालक्षिततयेत्यर्थः । तरसा वेगेनारुहत् आरोहदित्यर्थः ॥ ३४ ॥

आविशन्तं वेगेन मञ्चान्तः प्रविशन्तम् आत्मनो मृत्युं मृत्युमिव अत्यन्तभीत्या साक्षात् मृत्युत्वेन प्रतीयमानमित्यर्थः । मनस्वीति निन्दार्थे विन् "भूमनिन्दाप्रशंसासु" इत्यादि स्मरणात् निन्दितमना भीत इत्यर्थः । अत एव कंसोऽसाखोऽपि तस्मिन्नसिचर्मणी द्वे अपि जग्राह ॥ ३५ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

दक्षिणं वामञ्च भागं व्याप्य गतिकौशलेन आशु वेगेन विविधं चरन्तं भ्रमन्तं तत्रानुरूपो दृष्टान्तः यथाकाशे श्येनमिति अनेन दुर्ग्रहत्वमुक्तं तथापि प्रसह्य बलात् समग्रहीत् । कुतः दुर्विषहोग्रः नतु साधारणोग्रः पराक्रमो यस्य स इति । तार्क्ष्यसुतोऽपि दुर्विषान् सर्पान् हन्तीति दुर्विषहा अतएवोग्रतेजाश्च तद्दृष्टान्तेन तु साधारणोग्रः लीलया ग्रहणमपि सूचितम् ॥ ३६ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

लघिम्ना लाघवेन ॥ ३४—३५ ॥

तार्क्ष्यसुतः कश्यपपुत्रो गरुडः ॥ ३६—४६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

असत्तमो दुरात्मा वसुदेवः आशु शीघ्रं हन्यतां तथा नोऽस्माकं पिता उग्रसेनश्च परपक्षगः शत्रुपक्षपाती हेतुगर्भमिदं तस्मात्सानुगो हन्यताम् ॥ ३३ ॥

इत्येवं कंसे विकत्थमाने विरुद्धं यथा तथा कथयति सति अव्ययो भगवान् प्रकुपितो लघिम्ना लाघवेन उत्पत्य तरसा बलेनोत्तुङ्गमुन्नतं मञ्चं कंसाधिष्ठितं पीठमारुरोह ॥ ३४ ॥

तदा तत्कालिककर्तव्याभिज्ञः कंसः स्वमृत्युमिवापतन्तं कृष्णमालोक्य सहसा त्वरया आसनादुत्थाय खड्गखेटौ जगृहे ॥ ३५ ॥

अविसह्यमुग्रं तेजो यस्य स भगवान् खड्गः पाणौ यस्य तं दक्षिणवामतोऽम्बरे ऊर्ध्वे च श्येनमिव च चरन्तं कंसं समग्रहीत् यथा तार्क्ष्यसुतः कश्यपपुत्रो गरुडः प्रसह्य बलादुरगं सर्पं गृह्णाति तद्वत् ॥ ३६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

लघिम्ना पक्षिवत् लाघवेन । अव्ययः योगवित् प्रधानपुरुषेश्वर इत्यर्थः ॥ ३४ ॥

मनस्वी धीरः ॥ ३५ ॥

दुर्विषहे च उग्रे च तेजसी बलार्चिषी यस्य स तथेति ॥ ३६ ॥

श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी ।

वसुदेवस्तु मुख्योऽपराधी अतोऽस्माद्विशेषमाह । वसुदेवेति । तुशब्देन बन्धनपक्षं व्यावर्त्तयति । दुर्मेधा इति । स्वयमष्टमो मया आनेय इति प्रतिज्ञायापि नानीतवान् कंस एव मारणीय इति च कपटं कृत्वान्यत्र स्थापितवान् अतो हन्यतामाभिव्यविचारेण सतां बन्धूनां हननं निषिद्धमिति चेत्तत्राह । असत्तम इति । सर्वोपास्यराजहननार्थं कृतप्रयत्न इति नन्वेवं सति यादवाः त्वां मारयेयुरिति चेत्तत्राह । उग्रसेन इति । यद्यपि पिता तथाप्युग्रसेनो हन्तव्यः सानुगो देवकसहितः स एव परपक्षग इति अन्ये अराजकभयात्साधारणत्वाद्वा नापकरिष्यन्तीति भावः । स्वाधिकबलानां हननं दृष्टापि दुर्बुद्धिः ॥ ३३ ॥

अनुतयं परित्यज्य विपरीतं वदति अतो मारणीय इति तस्य दोषं त्याजयितुं मारणार्थं प्रवृत्त इत्याह । एवं विकत्थमान इति । रजकतुल्योऽयं कंस इति कं प्रति कंसः न कमपीति एवं वदतीति अधिक्षेपविषयत्वाद् व्ययः स्वतो भयाभावात् प्रकुपितः भक्तानामपकारश्रवणात् लघिम्ना मल्लविद्यायामिवोत्पतनप्रकारेण उत्तुङ्गं स्थूलं मञ्चमारुहत् यत्र कंसस्तिष्ठति अयं हि ततो ऽधःपातनीयः उच्चस्थानोपवेशनाद्यतो वल्गति ॥ ३४ ॥

ततो याञ्जतं तदाह । तमापतन्तमिति । उपर्यागत्य पतन्तं तं तदानीमपि यदि प्रपन्नो भवेत्तदापि न मारयेदिति सूचयितुं तत्रापि तस्यातिक्रम उच्यते । स हि पूर्वमेव तथात्मनो मृत्युत्वेन श्रुतवान् तथापि मनस्वी शूरः शूराणामन्तकाले शौर्यमाविर्भवतीति तदा आसनात्सहसोत्थाय आसने उपवेशनमयुक्तमित्याशङ्क्य स्वधर्मविध्यर्थं युद्धे च मरणं क्षत्रियस्योक्तमिति स्वधर्ममिव खड्गचर्मणी जगृहे निकटे तयोरेवोपयोगात् ॥ ३५ ॥

ततो युद्धार्थं यतमानं तं विलोक्य अन्तरिक्षे च युद्धं न युक्तमिति भूमावुत्पन्नत्वात् तं भूमौ पातयितुं गृहीतवानित्याह । तं खड्गपाणिमिति । तस्य महत्त्वाय युद्धकौशलमाह । आशु विचरन्तं श्येनमिव अलौकिकी शिक्षा तदीयोक्ता सद्यउत्पतन्नेव दृष्टः अम्बरे च अम्बर एव तं गृहीतवान् ननु प्रहारात्कथं न भयं तत्राह । दुःसहः दुःखेनापि विशिष्टं सहो यस्य असह्यमुग्रं तेजो यस्य अग्रे वा सर्वापेक्षया तेजो यस्य प्रभावसामर्थ्ययोर्विद्यमानत्वात् न भयम् अत एव तेजःसामर्थ्यात् न शस्त्रप्रक्षेपः ग्रहणसिद्धिश्च कालात्मा भगवान् तं मारणार्थमेव गृहीतवानिति दृष्टान्तमाह । यथोरगं तार्क्ष्यसुत इति । प्रसह्य बलादनेन तस्य शरीरव्यापारः प्रतिकूलः सूचितः तथापि गृहीत इति तस्याग्रेऽपि विनयार्थं सामर्थ्यं प्रदर्शितवान् ॥ ३६ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

दुर्गमबुद्धिर्वसुदेवो हन्यतां [गम्यतां सर्वैराश्रीयतामित्यर्थः । न विद्यते सत्तमो यस्मात् सः परस्य परमेश्वरस्य पक्षं गच्छतीति सः ॥ ३३ ॥

स्वभक्तद्रोहश्रवणात् [प्रकुपितः प्रकृष्टकोपेनापि जीवानामिव नास्ति व्ययो यस्य सः लघिम्ना सर्वदृष्ट्यालक्षितमिति भावः ॥ ३४—३६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

लघिम्ना लाघवेन ॥ ३४-३५ ॥

दुर्विषहमविषह्यं तेजो यस्य सः श्रीकृष्णः ॥ ३६—३९ ॥

भाषा टीका ।

और दुर्बुद्धि असत्तम वसुदेव को जल्दी मारो और पर पक्ष में रहने वाले उग्रसेन पिता को भी भृत्यों सहित मारो ॥ ३३ ॥

प्रगृह्य केशेषु चलत्किरीटं निपात्य रङ्गोपरि तुङ्गमञ्चात् ।
तस्योपरिष्टात्स्वयमब्जनाभः पपात विश्वाश्रय आत्मतन्त्रः ॥ ३७ ॥
कंसोऽपि कृष्णेन जगत्त्रयैकनिवासभूतेन निपात्य सोऽधः ।
तेनात्मतन्त्रेण च पीडितोऽलं तत्याज राजन्निमिषान्तरेण ॥ ० ॥ इति विज० पाठः
तं सम्परेतं विचकर्ष भूमौ हरिर्यथेभं जगतो विपश्यतः ।
हाहेतिशब्दः सुमहांस्तदाऽभूदुदीरितः सर्वजनैर्नरेन्द्र ! ॥ ३८ ॥
स नित्यदोद्विग्नधिया तमीश्वरं पिबन् वदन् वा विचरन् स्वपन् श्वसन् ।
ददर्श चक्रायुधमग्रतो यतस्तदेव रूपं दुरवापमाप ॥ ३९ ॥
तस्यानुजा भ्रातरोऽष्टौ कङ्कन्यग्रोधकादयः ।
अभ्यधावन्नभिक्रुद्धा भ्रातुर्निर्वेशकारिणः ॥ ४० ॥

भाषा टीका ।

कंस के इस प्रकार वक्कवाद करते ही में अव्ययात्मा श्रीकृष्ण भगवान् वडे कोपित भये और वडी फुर्त्ती से उछांग मार कर वडे ऊंचे कंस के मंच पर चढ गये ॥ ३४ ॥

अपने आत्मा के मृत्यु रूप उन भगवान् को पैठते देखकर पुरुषार्थी होने से जल्दी से उठकर उसने ढाल तरवार दोनों को उठा लिया ॥ ३५ ॥

तरवार को हाथ में लिये वाज पक्षी की नांई आकाश में दहिने वांये तरफ घूमते हुये कंस को देखकर दुर्विग्रह उग्र तेज वाले भगवान् ने जैसे गरुड सर्प को पकडै तैसे जवरदस्ती से कंस को पकड लिया ॥ ३६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

गरिष्ठत्वाय विश्वाश्रयत्वमुक्तम् तत्र हेतुः अब्जनाभः कुतस्तथापर्यैव पपात यत आत्मतन्त्रः स्वतन्त्रः ॥ ३७—३९ ॥

निर्वेशो निष्कृतिरानृण्यमित्यर्थः । तत्कारिणः सन्तस्तेऽभ्यधावन् ॥ ४० ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

सम्यक् ग्रहणमेव व्यञ्जयति । केशेषु प्रकर्षेण दृढं गृहीत्वेति ननु मुकुटबद्धकेशानां कृतं ग्रहणं कथं स्यात्तत्राह । चलत् ग्रहणोद्यम एव सवेगग्रथमस्तकचालनेन विगलत्किरीटं यस्य तं तथा च श्रीविष्णुपुराणे । "केशेष्वाकृष्य विगलत्किरी"टमिति । श्रीहरिवंशे च । "मुकुटश्चापतत् तस्य काञ्चनो वज्रभूषितः । शिरसस्तस्य कृष्णेन परामृष्टस्य पाणिने"ति । अन्यैः । यद्वा । आत्मतन्त्रत्वे हेतुः विश्वाश्रयः तत्र कैमुत्येन हेतुः अब्जनाभः गर्भोदशायिरूपेणांशेनापि भुवनकोषपद्मनाभ इत्यर्थः ॥ ३७ ॥

उपरि श्रीभगवत्पातादेव सम्यक् परेतं सन्तं जगतो विपश्यत इति । केनापि न निवारितमिति सर्वेषामेव सुखमिति च सूचितम् । हाहेति शब्दोऽत्र विस्मये महाशूरस्याप्यस्यावज्ञया वधात् । तथा श्रीविष्णुपुराणे । "ततो हाहा कृतं सर्वमासीत्तद्रङ्गमण्डलम् । अवज्ञया हतं दृष्ट्वा कृष्णेन मथुरेश्वर"मिति । नरेन्द्रेति तं हृष्टं दृष्ट्वा स्वयमतिहृष्टः सम्बोधयति ॥ ३८ ॥

प्रसङ्गात् कंसस्य मोक्षमाह । स इति । नित्यदा नित्यमेवोद्वेगीतया भयेनाकृष्टया धिया ददर्श । तस्य यद्रूपं नित्यं दृष्टं तदेवाधुनापि स्फुरितं सत् प्रापेत्यर्थः । "यं यं वापि स्मरन् भावं त्यजत्यन्ते कलेवरम् । तं तमेवैति कौन्तेय ! सदा तद्भावभावितः "इति श्रीभगवद्गीतातः पेशस्कारिकीटवदिति भावः । दुरवापमाप । ननु कालनेमिजन्मनि श्रीमदजितेन हतस्याप्यप्राप्तमोक्षस्य तादृशदुष्टस्य तत् कथं घटेत तत्राह । तं निजाशेषैश्वर्यप्रकटनपरमीश्वरमिति ॥ ३९ ॥

अनुजा अनुगा इति वा पाठः तत्तुल्या एवेत्यर्थः ॥ ४० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ततः केशेषु प्रगृह्य दृढं गृहीत्वा चलद्विक्षिप्तं किरीटं यस्य तं कंसमुत्तुङ्गमञ्चाद्रङ्गोपरि निपात्य तस्य कंसस्य उपरिष्टात्स्वयमब्जनाभो भगवान् पपात कथम्भूतः विश्वाधारः अनेन गरिष्ठत्वमुक्तम् आत्मतन्त्रः स्वतन्त्रः संहारकर्तेत्यर्थः ॥ ३७ ॥

ततो जगतो जनस्य पश्यतः सतः परेतं मृतं कंसं भूमौ विचकर्ष यथा हरिः सिंहः इभं मृतं तद्वत् तदा हे नरेन्द्र ! सर्वैर्जनैः सुमहानत्युच्चैर्हाहेतिशब्दः उदीरित उद्घोषितोऽभूत् ॥ ३८ ॥

यतः सदोद्विग्नया भीतया धिया तमीश्वरं कृष्णमेव पानभोजनाद्यवस्थास्वग्रतश्चक्रायुधं ददर्श ततः स कंसो दुरापमपि तदेव रूपं प्राप्तवान् तत्सारूप्यलक्षणां मुक्तिमवापेत्यर्थः ॥ ३९ ॥

ततस्तस्य कंसस्य भ्रातरः कङ्कादयोऽष्टौ भ्रातुर्निर्वेशं निष्कृतिमानृण्यं तत्कारिणोऽतिक्रुद्धा अभ्यधावन् ॥ ४० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

उत्तुङ्गमञ्चादवपतनादङ्गभङ्गः कथं नाभूत्तत्राह । विश्वाश्रय इति । विश्वमाश्रयो यस्येति विग्रहे उक्तचोद्यानिस्तार इत्यत उक्तमात्मतन्त्र इति अपराधीनत्वात् ॥ ३७- ० ॥ ३८ ॥

स कंसः चीर्णपुण्यफलादानार्थं कंसे स्थितो वायुः संसारावस्थायां तदुद्विग्नबुद्ध्या भीतबुद्ध्या अन्यत्र मरणादुद्विग्नबुद्ध्या तमीश्वरं ध्यायन्नित्यदाप्थनादौ पुनः दैत्यस्य मृत्युसमये मञ्चेऽग्रतः स्थितं यदच्युतमविनाशि नित्यं चक्रं सुदर्शनमायुधं यस्य स तथा ददर्श हरे रूपमाप आविष्ट इत्यर्थः । अन्यस्त्वच्युतं चक्रं छद्म वायुधं यस्यास्तमोदेवतायास्तच्चक्रायुधमन्यथाज्ञानसाध्यं यद्दर्श तदेव तमोदेवतायाः रूपं नित्यदुःखलक्षणमाप दुरवापमित्युभयत्र समम्--

> चक्रं सैन्ये जलावर्ते रथाङ्गे चक्रराष्ट्रयोः ।
> सञ्चारे मण्डले वृत्ते छद्मभेदार्थदम्भयोरिति च ॥

॥ ३९ ॥

भ्रातुर्निर्वेशो निष्कृतिरानृण्यं तत्कारिणः सिंहव्याघ्रौ मृगाधिपाविति च ॥ ४० ॥ ४१ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

तथाप्यविनीतं पातितवानित्याह । प्रगृह्येति । स हि भगवता स्पृष्टोऽपि न किन्तु केशेषु गृहीतः वैयग्र्यसूचनायाह । चलत् किरीटं यथा भवतीति । ततः सर्वथा सज्जीकृतं रङ्गस्थानमिति स्वपदेन पवित्रमिति भगवदीयरूपसिध्यर्थं तुङ्गमञ्चाद्रङ्गोपरि निपात्य स्वयमपि तदुपरि पतितः यथा अनवहितौ ततः पतितौ भवतः तथा लोकप्रतीतिर्जनिता तत्क्रियायां स्वयमपि व्यापृत इति न क्लिष्टकर्मत्वम् । नन्वेवं कथं पातलक्षणमपूर्वं साधनं कृतवान् न हि शत्रुमारणे स्वयमात्मा साधनत्वेन युज्यते तत्राह । अब्जनाभ इति । स हि कमलनाभो मूलकारणं स्वात्मानमेव सर्वत्र नियुङ्क्ते तथात्रापि अनेनालौकिकपक्षकरणदोषोऽपि निवारितः सर्वेषां च पितृत्वेनोद्धारोऽपि कर्त्तव्य इति तथा कृतवानित्यर्थः । विश्वाश्रय इति । तस्य मारणेनैव मारणं कृतमिति केचित् वस्तुतस्तु तस्यापि भगवानाश्रय इति तस्मै स्वात्मानं दत्तवान् आत्मतन्त्र इति । स्वस्य शङ्काभावाय स हि स्वतन्त्रः उभयत्रापि हेतुरपीच्छायाम् अनाधिकारिणं स्वात्मानं प्रयच्छतीत्यत्रापि ततस्तस्मै स्वात्मदानेन कृतार्थं तं लोलप्रतीत्यर्थं कपटं कृत्वा तिष्ठतीति ॥ ३७ ॥

भ्रान्तानां प्रतीतिसिध्यर्थं च सम्परेतमपि तं विचकर्षेत्याह । तं सम्परेतमिति । सम्यक् परः इतः प्राप्तो येन भगवद्धस्ते वा सम्यक् मृत इति नास्य प्राणा उत्क्रान्ताः किन्तु मूर्च्छया अन्तर्दृष्टौ अन्तर्बहिः यद्रूपं भगवदीयं सर्वदालपते तस्मिन् स्वयं प्रविशन् प्राणानपि प्रवेशितवानिति सारूप्यपक्षे भवति । सायुज्ये तु अस्मिन्नेव शरीरे आत्मनि वा प्राणानां लयः इहैव समवलीयन्ते इति मृत्युर्यस्योपसेचनमिति च श्रुतौ । ततस्तादृशस्य भगवदीयशरीरोत्पत्त्यर्थं विचकर्ष यत्र यत्राङ्गिरेणवः तत्र सम्बद्धं कृतवान् अत एव भूमावित्युक्तम् । लोकप्रतीतौ तस्य तिरस्कृत्वख्यापनाय विकर्षणं विशीर्णावयवं च विकर्षणेन कृतवानिति ज्ञापयितुं दृष्टान्तमाह । हरिर्यथेभमिति । अल्पमूर्तिः सिंहः स्थूलमपि गजं हत्वा दैवादेवायं मृत इति शङ्का भविष्यतीति विशीर्णावयवं यथा भवति तथा कर्षणं करोति तथा दैवगत्या कदाचिन्मृतो भवेदिति शङ्कापरिहारार्थं वस्तुतस्तु हरिः सर्वदुःखहर्त्ता यथा गजेन्द्रमुपरि नीतवान् तथात्र कंस भूमौ विशेषेण चकर्षेति विशेषः अधिकः प्रयत्नो न कृत इति माहात्म्यार्थमक्लिष्टकर्मत्वख्यापनार्थं च प्रमाणमाह । जगतो विपश्यत इति । पितरौ क्लेशितावति तयोः सन्तोषार्थं विकर्षणमिति केचित् तत्र दृष्टान्तादिकं न सङ्गच्छते स यमुनां प्रापित इति पुराणान्तरं तत्र च विश्रान्त इति किञ्च सर्वेषामेव स मारित इति प्रतीतिर्ज्ञातेत्याह । हा हेति शब्दः सुमहानभूदिति । अयुक्ते तथा शब्दः पित्रोर्हितार्थे तथा करणे सर्वजनानां हा हेति शब्दो नोपपद्येत राजत्वाद्वा अकस्मात्तथा वचनं नरेन्द्रेति सम्बोधनं लोकपीडकेषु रक्षकाणां तथा भवतीति ज्ञापनार्थम् ॥ ३८ ॥

एवं सर्वजनीने तस्य मारणे प्रवृत्ते प्रमेयबलमाश्रित्य तस्य परलोके किं जातमित्याकाङ्क्षायां सारूप्यं वा सायुज्यं वा जातमित्याह । स नित्यदोद्विग्नधियेति । सर्वदैवभयेनोद्विग्नबुद्ध्या तमेव भगवन्तं भयप्रत्यासत्या प्रदर्शितेश्वरस्वरूपं चक्रायुधं शङ्खचक्रगदापद्मधरं सर्वावस्थासु पश्यन् तदेव रूपमवाप सदा तद्भावभावितः अन्ते तु तं दृष्टवानेव याने हि दुःखनिवृत्त्या सुखेन च विषयप्राबल्यात् सर्वविस्मरणं सिद्धं तथा भोजने विशेषेण चरणे आखेटकादावपि स्वपन् निद्रायां श्वसन्मूर्च्छायामपि यत्र पञ्चस्ववस्थासु दर्शनं तत्रोपवेशनादौ न संदेह एव किञ्च न केवलं स्मरणमात्रं किन्त्वग्रतश्चक्रायुधं ददर्श सर्वदेवभयजनको भगवानिति तस्य न भयं निवृत्तम् अतोऽन्तेऽपि सुतरां भगवान्मारयितुं प्रवृत्त इति भयजननात् तदेव रूपं प्रकटीभूतम् अन्तरेवेति विमर्शः बहिः पक्षे उत्क्रान्तिरप्यपेक्षते यद्यपि कालरूपसायुज्यं युक्तं योधानामिव तथापि भावनाया बलिष्ठत्वात् सर्वदा साक्षात् कृतं सदेव रूपमवाप तद्वस्तुतः सर्वेषामेव दुरापम् ॥ ३९ ॥

एवं तस्य भगवदिच्छया तथा त्वमापन्नस्य स्वतो दोषाभावात् गुणस्य च विद्यमानत्वात् सायुज्यमुक्त्वा व्यवहारे शिष्टं कृत्यं वदन् तद्भ्रातृणां वधमाह । तस्यानुजा इति । तस्य कंसस्य भ्रातरः अष्टौ भ्रातरः कङ्कन्यग्रोध इति सपक्षता महत्त्वनिरूपणार्थं नामद्वयं निरूप्य तदादि भूता निरूपिताः कंसे निहते भ्रातरि जीवति भ्राता परेण हन्तव्य इति हते पुनः जिघांसन्तं जिघांसीयादिति न्यायात् भ्रातुर्निर्वेशनं निष्कृतिं कुर्वन्तीति अतिक्रुद्धाः सन्तः अभ्यधावन् कपटेनाकस्मान्मारितवानित्यतिक्रोधः एकः कथंचिन्मारितः वयमष्टावेकश्च मारक इति क्रुद्धबुद्धयः अभिमुख्येनैव धावनं कृतवन्तः निर्वेशो ऋणशोधनं हन्यात् हतो वा भवेत् अन्यथा न निर्वेशः स्यादिति अत्रापि भ्रातैव ॥ ४० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

कंसो मृत इति यदा कोऽपि न प्रतीयाय किं तु मूर्च्छितोऽयमिति मन्यते स्म तदा तं विचकर्ष तन्मृत्युं सर्वान् प्रत्याययितुमिति भावः । हाहेति शब्दोऽत्र विस्मये महाशूरस्याप्यवज्ञया

तथातिरभसांस्तांस्तु संयत्तान् रोहिणीसुतः ।
अहन् परिघमुद्यम्य पशूनिव मृगाधिपः ॥ ४१ ॥
नेदुर्दुन्दुभयो व्योम्नि ब्रह्मेशाद्या विभूतयः ।
पुष्पैः किरन्तस्तं प्रीताः शशंसुर्ननृतुः स्त्रियः ॥ ४२ ॥
तेषां स्त्रियो महाराज ! सुहृन्मरणदुःखिताः ।
तत्राभीयुर्विनिघ्नन्त्यः शीर्षाण्यश्रुविलोचनाः ॥ ४३ ॥
शयानान् वीरशय्यायां पतीनालिङ्ग्य शोचतीः ।
विलेपुः सुस्वरं नार्यो विसृजन्त्यो मुहुः शुचः ॥ ४४ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

वधात् यदुक्तं वैष्णवे "ततो हाहाकृतं सर्वमासीत्तद्रङ्गमण्डलम् । अवज्ञया हतं दृष्ट्वा कृष्णेन मथुरेश्वर" मिति ॥ ३७-३८ ॥

कंसस्य भयहेतुको भगवदावेश एव सर्वापराधक्षयपूर्वकमोक्षहेतुरासीदित्याह । स इति ॥ ३९ ॥

निर्वेशो निष्कृतिरानृण्यमित्यर्थः ॥ ४०—४३ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

निर्वेशो निष्कृतिरानृण्यं तत्कारिणः ॥ ४० ॥

भाषा टीका ।

तदनंतर सब संसार के आश्रय स्वतंत्र पद्मनाभ भगवान् किरीट जिसकी चलायमान होरही है ऐसे कंसके केशों को पकडकर बड़े ऊंचे मंच पर से रंगभूमी में गिराकर आप भी उसके ऊपर ही कूद पडे ॥ ३७ ॥

इतने में वह कंस प्राणों से रहित होगया फिर भी सब संसार के देखते ही जैसे हाथी को सिंह खैंचे तैसे उस कंस को जमीन पर भगवान् खैंचते भये फिरतो हे नरेंद्र ! सब मनुष्यों के उच्चारण करने सैं उस समय में बडा भारी एक हा हा कार का शब्द होता भया ॥ ३८ ॥

वह कंस सदा काल उद्वेग को पाकर उसी बुद्धि से खाते पीते बोलते घूमते सोते श्वास लेते आदि समयों में उन्हीं भगवान् श्रीकृष्णचंद्र को ही चक्र धारण किये हुये आगे देखता था तिससे मरने पर सर्व दुर्लभ उसी रूप को प्राप्त होगया ॥ ३९ ॥

उस कंस के भाइ छोटे कंक न्यग्रोध आदिक आठ थे सो भ्राता की बदली लेने के वास्ते क्रोधित होकर दौडे ॥ ४० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तथा तादृगतिरभसो वेगो येषां तान् संयत्तानुद्युक्तान् ॥४१-४३॥ शोचन्त्यो विलापांश्चक्रुः शुचः अश्रूणि ॥ ४४ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

तथेति तैर्व्याख्यातं । तत्र तादृगिति । कंसरभससदृशं इत्यर्थः । यद्वा । तेनातिक्रोधादिप्रकारेणेति । परिघं तत्रैव दैवतः प्राप्तं यद्वा । परिघाकारं गजदन्तमेव ॥ ४१ ॥

विभूतयस्तदैश्वर्यास्तत्सेवका इत्यर्थः । स्त्रियोऽप्सरसः ॥४२॥

सुहृदः पत्यादयः ॥ ४३ ॥

वीराणां शय्या युद्धे मरणभूमिः तस्यां शयानान् सुप्तवत् पतितान् ॥ ४४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तदातिरभसौ वेगो येषां तानुद्युक्तान् रामः परिघमुद्यम्याहन् जघान मृगाधिपः सिंहः पशूनिव ॥ ४१ ॥

तदा स्वविभूतिभूता ब्रह्मरुद्रादयः पुष्पैः किरन्तः शशंसुस्तुष्टुवुः स्त्रियो ऽप्सरसो ननृतुः ॥ ४२ ॥

ततः हे महाराज ! तेषां कंसादीनां स्त्रियः पत्न्यः भर्तृमरणेन हेतुना दुःखिताः स्वशिरांसि विनिघ्नन्त्यः अश्रूणि लोचनयोर्यासां तास्तत्र भर्तृसंनिधावाजग्मुः ॥ ४३ ॥

वीरशय्यायां युद्धभूमौ शयानान् स्वभर्तॄनालिङ्ग्य शोचन्त्यः मुहुः शुचोऽश्रूणि विसृजन्त्यः सुस्वरं यथा तथा विलेपुर्विलापं चक्रुः ॥ ४४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

विभूतयः हरिविशेषसन्निधानपात्राणि ॥ ४२ ॥ ४३ ॥

वीरशय्यायां रणभूमौ विलेपुः विप्रलापं चक्रुः विसृजन्त्यः ददत्यः

त्यागो विहापितं दानमुत्सर्जनविसर्जने ।

इति हलायुधः ॥ ४४ ॥

श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी ।

अष्टानामनुकल्प एक एव तान् मारितवानित्याह । तथातिरभसानिति । यथा कंसः अतिवेगवान् एवं ते

हा नाथ ! प्रियधर्मज्ञ ! करुणानाथ ! वत्सल ! ।
त्वया हतेन निहता वयं ते सगृहप्रजाः ॥ ४५ ॥
त्वया विरहिता पत्या पुरीयं पुरुषर्षभ ! ।
न शोभते वयमिव निवृत्तोत्सवमङ्गला ॥ ४६ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

सर्वे एव अतिशीघ्रमागतास्तान् प्रसिद्धान् तु इति भगवन्मारणपक्षं व्यावर्त्तयति नाप्युपेक्षाः यतः संयत्ताः शस्त्रपाणयः ननु भगवानेव मारयेत् किमिति बलभद्रेण हतास्तत्राह । रोहिणीसुत इति । देवकी भ्रातरस्ते अतो मातुला भगवता न हन्तव्या इति कंसस्तु अन्येन वधं नार्हतीति कथं चिद्धतः । अविमृश्यकारित्वात् अत एव सशस्त्रान् स्वयमपि परिघप्रायं दन्तमेव गृहीत्वा अन्यद्वा तत्र विद्यमानमायुधमर्गलामेव वा तेन प्रहृत्य मारितवान् पशूनिवेत्यत्रापि संबध्यते यथा लकुटेन पशवो हन्यन्ते तथा सर्वे मारिताः तेषां छेदनं न भविष्यतीत्याशङ्क्य दृष्टान्तमाह । मृगाधिप इवेति । सिंहो हि क्षुधितः भक्षणार्थमेव मारयतीति तथा सर्वे विशीर्णावयवाः कृता इत्यर्थः । अनायासेन मारणे सन्देहाभावे वा दृष्टान्तः ॥ ४१ ॥

एवं सभ्रातरि हते देवानामपि परमानन्दो जात इति देवविपक्षवधेन भगवतो धर्मस्थापनमेव जातमिति मातुलदोषपरिहारार्थं देवकृतं पुष्पवृष्ट्यादिकमाह । नेदुर्दुन्दुभय इति । ब्रह्मा ईश्वरश्च आदौ येषां विष्णुर्भगवानेवेति द्वावेवावशिष्टाविति द्वयोर्गणना प्रमेयप्रमाणभूतौ वा तं भगवन्तं प्रीताः सन्तः पुष्पैः किरन्तः शशंसुः दुन्दुभीनां नादनं स्वतन्त्रं तत्प्रेरणायां जातमिति तत्कायिकं भिन्नकर्तृकमपि ब्रह्मादीनां मानसं भवति पुष्पवृष्टिः कायिकी शंसनं वाचनिकं तेषां तु स्त्रियः पुरुषधर्मैस्तुल्या अपि एकशेषेणोक्ताः भगवति स्नेहविशेषात् ननृतुः ननु ब्रह्मणः सर्वतुल्यत्वान्महादेवस्य च कंसो भक्त इति कथं सर्वेषामनुमोदनमिति चेत्तत्राह । विभूतयः इति भगवतो विभूतिप्रायाः विभूतिमान् भगवान् अतः स्वामिकृतं तेषामभिनन्द्यमेव ॥ ४२ ॥

भगवान् स्त्रीणां सुखार्थं अवतीर्ण इति कथं तेषां स्त्रीणां सुतरां मातुलानीनां वैधव्यं संपादितवानित्याशङ्क्य तासामपि दुःखं न जातं भर्तृदोषस्मरणात् अन्यथा निर्वाहाभावात् भगवत्यादरातिशयाच्चेति वक्तुं तेषां स्त्रीणामुपाख्यानमाह । तेषां स्त्रिय इति । मल्लादीनां कंसादिनवानां च महाराजेति सम्बोधनं नाश्चर्यमेतदिति ज्ञापनार्थं प्रोत्साहनार्थं वा लौकिकमिति कदाचिन्न शृणुयात् सुहृदां भर्तॄणां मारणेन अतिदुःखिताः अन्यायित्वेन पतितत्वात् भर्तृत्वमनुक्त्वामित्रत्वमेवाह । पत्नी हि सर्वस्य मित्रमिति श्रुतेः मरणेनैव दुःखिताः यदि भगवांस्तान् बन्दीकुर्यात् तदा दुःखमपि न भवेत् अतः शीर्षाणि विनिघ्नन्त्यः तत्राभीयुः अश्रूणि लोचनयोर्यासाम् अश्रूण्यन्तः करणधर्मौ हननमिन्द्रियाणामभिगमनं कायिकं शोककार्यं त्रयमपि कुलस्त्रीणां सभायामागमनं नान्यदा ॥ ४३ ॥

आगत्य यादृक् दुःखत्वस्तदाह । शयानानिति । वीरशय्याया-मिति । रणाङ्गणे शय्यायामेव शयने स्त्रीणामधिकार इति । पतीनालिङ्ग्येति स्नेहोद्गम उक्तः ततः शोचन्त्यो जाताः विलेपुः सुस्वरं यतो नार्यः अन्तःकरणपूर्वकत्वायाह । मुहुः शुचो विसृजन्त्य इति । लौकिक्येका भाषा यथा देवक्यादयः पुत्राद्यपाये रोदनं कृतवत्यः तथा तासामपि जातमिति भगवान् भक्तकृपया तथा कृतवानिति वक्तुमेवं निरूप्यते ॥ ४४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

शोचतीः शोचन्त्यः ॥ ४४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

तथा तादृशः अतिरभसो वेगो येषां तान् ॥ ४१—४३ ॥

शोचतीः शोचन्त्यः विलेपुः विलापांश्चक्रुः शुचः अश्रूणि ॥ ४४—४७ ॥

भाषा टीका ।

उस प्रकार बडे यत्न से लडने वाले बडे वेग वाले उनको रोहिणी सुत बलरामजी ने परिघ आयुध उठाकर जैसे सिंह मृगों को मारता है तैसें सबको मार दिया ॥ ४१ ॥

तब तो आकाश में नगारा बजे और ब्रह्मा महादेव आदि जो भगवान की विभूति हैं वे सब प्रसन्न होकर फूलों की वर्षा करते भये और स्वर्गस्त्रियों ने नृत्य किया ॥ ४२ ॥

हे महाराज ! उन आठ नौओं की स्त्री सब अपने पतियों के मरण होने से दुखित होकर आंसु गिराती हुई मस्तकों को हाथों से ताडन करती हुई आई ॥ ४३ ॥

वीर शयनों में सोये हुये पतियों को आलिंगन करके सोच करती हुई वार वार आंसुओं को गिराती हुई सब नारी बडे ऊंचे स्वर से रोदन करती भई ॥ ४४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

धर्मज्ञ इत्यादीनि विलापे प्रेमसम्बोधनानि ते त्वदीया वयम् ॥ ४५ ॥

त्वया पत्या विरहिता पुरीयं न शोभत इति स्वदुःखाभिधानम् ॥ ४६ ॥

अनागसामिति तु परमार्थाभिधानम् ॥ ४७ ॥

अनागसां त्वं भूतानां कृतवान् द्रोहमुल्बणम् ।
तेनेमां भो दशां नीतो भूतध्रुक्को लभेत शम् ॥ ४७ ॥
सर्वेषामिह भूतानामेष हि प्रभवाप्ययः ।
गोप्ता च तदवध्यायी न क्वचित्सुखमेधते ॥ ४८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

एष कृष्णः प्रभवत्यस्मादिति प्रभवः अपियन्त्यस्मिन्नित्यप्ययः स च स च तदवध्यानं तदवज्ञा तत्कर्तु शीलं यस्य सः ॥ ४८-४९ ॥

अथ परमार्थदृष्ट्योचुः । अनागसामिति । त्वं निरपराधानां भूतानां दुःसहं द्रोहं कृतवान् तेन कारणेन भो भर्तः ! इमां दशामवस्थां प्राप्तः भूतेभ्यो द्रुह्यतीति तथा सः को वा शं सुखं लभेत किं तु दुःखमेवेति भावः ॥ ४७ ॥

किं चैष कृष्णः सर्वेषां भूतानां प्रभवः प्रभवन्त्यस्मादिति प्रभवः स्रष्टेत्यर्थः । अपियन्ति लीयन्तेऽस्मिन्नित्यप्ययः संहर्तेत्यर्थः गोप्ता रक्षिता चातस्तदवध्यायी तस्मिन् विषयेऽवध्यानमवज्ञा तत्कर्तु शीलं यस्य सः क्वचिदपि सुखं यथा तथा नैधते न वर्द्धते किं तु दुःखमेवाऽनुवन्नश्यतीत्यर्थः ॥ ४८ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

हा नाथेत्याद्येकत्वं प्रत्येकं पृथग्विलापात् मुख्यत्वेन कंसस्त्रीणामेव तद्वर्णनाद्वा । करुण दयालो ! आ ईषत् प्रहृतेऽपि निहताः किं पुनर्मारिते त्वया हतेनेति पाठः क्वचित् । त्वया हतेनैव कर्त्रेति दुःखोक्तिः । गृहैः प्रजाभिश्चापत्यादिभिः सहिताः ॥ ४५ ॥

विशेषणापुनर्योगतया रहिता निवृत्त उत्सवः गीतवाद्यादिमङ्गलानि च शुभसूचकानि यस्याः सा । नचान्यतस्तत सर्वं सम्भवेदित्याहुः । पुरुषर्षभेति । गौर्देवी तु विन्दन्ती अनाथेत्याकारविश्लेषेणैकपद्यात् । तथैवाह पुरुषर्षभ वलीवर्द्द काका न शोभते किमिति श्लेषाच्च ऋषभः स्वरभेदे स्यादष्टवर्गौषधे वृषे । श्रेष्ठार्थे चेति विश्वप्रकाशात् ॥ ४६ ॥

दैहिकव्यवहारमात्रेण ताभिः सह शोचन्त्यः काश्चित् परमार्थदर्शिन्य आहुरनागसामिति द्वाभ्याम् । उल्बणमुत्कटं बहुधा कुमारणात् ॥ ४७ ॥

किञ्च सर्वेषामिति तदवध्यायी तदवज्ञातापि किं पुनर्द्रोहीत्यर्थः । सुखं यथा स्यात्तथा नैधते स सदा दुःखेन क्षीयत इत्यर्थः । क्वचिदिह परत्र चेत्यर्थः । इदं तत्स्वभावनिन्दापेक्षयैवोक्तं नतु तादृशानामपि सुखपर्यवसायकभगवत्स्वभावदृष्ट्येति ज्ञेयम् ॥ ४८ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

भूतध्रुक् भूतद्रोही शं सुखम् ॥ ४७ ॥
अवध्यायी अवज्ञाकारी ॥ ४८-५१ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका

विलापप्रकारमेवाह । हा नाथेति । नाथेत्यादीनि विलापे प्रेमसम्बोधनानि हतेन त्वया सहैव ते त्वदीयाः सगृहाः सप्रजाश्च वयमपि निहतप्रायाः ॥ ४५ ॥

पत्या प्रभुणा त्वया विरहितेयं पुरी हे पुरुषर्षभ । यथा वयं तद्वन्निवृत्त उत्सवा मङ्गलानि सुखानि च यस्यां सा तथाभूता पूर्ववन्न शोभते इति सदृष्ट्योचुः ॥ ४६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

करुणया नाथन्ते प्रार्थयन्ते इति करुणानाथास्तेषु वत्सल स्निग्ध ! ते तव विद्यमानाः ये पुरासनाथास्ते वयमिति वा ॥ ४५—४७ ॥

प्रभव उत्पादकः अप्ययः संहारहेतुः प्रभवाप्ययौ हि भूतानामिति श्रुतिः यथा सुखं भवति तथा नैधते न वर्धते ॥ ४८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

दैहिकव्यवहारमात्रेण ताभिः सह शोचन्त्यः काश्चित् परमार्थदर्शिन्य आहुरनागसामिति द्वाभ्याम् ॥ ४७—५१ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

चतुर्भिर्विलापमाह । हा नाथेति । आदौ तावत् शोचन्ति ततः पुरीं ततस्तेषां दुर्दशां तत ईश्वरापराधेन परलोकेऽपि न सुखमिति । प्रथममात्मानं शोचन्ति हेति । महादुःखे संबोधनानि स्वस्य धर्मादिभिस्तत्त्वन्तं पञ्चपुरुषार्थसाधकत्वेन । नाथत्वात् धर्मः स्वस्य सेवया सिध्यति प्रियत्वादर्थं साधयति धर्मज्ञत्वात्कामं स्त्रीणां व्रतमनुस्मरन्निव करुणेति तत्कृपया मोक्षो भवतीति । अनाथवत्सलेति । दीना वयं त्वच्छरणं गता इति भक्तिरपि सिध्यति । इदानीं, तु त्वया हतेन ते वयं त्वदीयाः सगृहप्रजाः निहताः त्वया निहतेन कयाचित्क्रियया व्याप्तो भवतु यथा कथंचिन्मरणहेतुः मारक एव भवति । शरीरेण गृहेण पुत्रैर्वा धर्मः सेत्स्यतीति पक्षो निराकृतः यतो वयं सर्वे हता एव ॥ ४५ ॥

ननु मथुरेयं तीर्थभूता अत्र जीवता मृतेन वा मोक्षः साधनीय इति किं भर्तृपगमे शोकः क्रियत इति चेत्तत्राहुः

श्रीशुक उवाच

राजयोषित आश्वास्य भगवान् लोकभावनः ।
यामाहुर्लौकिकीं संस्थां हतानां समकारयत् ॥ ४९ ॥
मातरं पितरं चैव मोचयित्वाथ बन्धनात् ।
कृष्णरामौ ववन्दाते शिरसास्पृश्य पादयोः ॥ ५० ॥
देवकी वसुदेवश्च विज्ञाय जगदीश्वरौ ।
कृतसम्वन्दनौ पुत्रौ सस्वजाते न शङ्कितौ ॥ ५१ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे
पूर्वार्धे कंसवधो नाम
चतुश्चत्वारिंशोऽध्यायः ॥ ४४ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

त्वया विरहितेति । त्वया पत्या विरहिता इयं पुरी स्वयमेव न शोभते किमन्येषामुपकारं करिष्यतीति भावः । यतो निवृत्तानि उत्सवाः मङ्गलानि च यस्यां तस्मिन्विद्यमान एव उत्सवो मङ्गलानि च प्रवृत्तानि । ननु निवृत्ते तासां दृष्टया अमङ्गलमिव प्रतिभातीति वाद्यानां निवृत्तत्वादुत्सवो निवृत्त इति तथोक्तम् । अत एव न शोभते क्षणान्तरे शोभिष्यत इत्याशङ्क्याहुः । वयमिवेति । यथा वयमतः परमशोभायुक्ता एव तथा पुर्यपीति तासां प्रतिभा यतः त्वया पत्या विरहिता यद्यपि पुर्याः पतिर्भविष्यति यः कश्चित्तथापि त्यक्तो भविष्यतीति जीर्ण पट इव शोभाकरो भविष्यतीति भगवांस्तु पतिर्न भविष्यतीति तासां वचनं सत्यमेव त्यक्त्वा च ततः परं तदाहुः । हे पुरुषर्षभेति॥ ४६ ॥

ननु स्त्रीणां भाग्ये अवैधव्ये विद्यमाने कथमेवं भवेत् अतो भवतीनामेव दुर्भाग्यान्मृत इति किमिति विलापः क्रियते इति चेत्तत्राहुः । अनागसामिति । निरपराधानां प्राणिनां त्वमुल्वणं पुत्रादिमारणरूपं द्रोहं कृतवान् तेनैवं दुर्मृत्युरूपां दशां नीतः । ननु धर्मोऽपि भूयान् कृत इति । यथा धर्मफलं न जातं तथैतदपि न भवेदित्याशङ्क्य द्रोहस्य विशेषमाहुः । भूतध्रुगिति । अत्यन्तधर्मकर्तापि भूतद्रोहं चेत् कुर्यात् तदा शं न लभतेव सर्वं धर्मं बाधित्वा द्रोहः स्वफलमेव प्रयच्छतीति ॥ ४७ ॥

ननु राज्ञां द्रोहः स्वाभाविक एव भवतीति कथमन्यरीत्या फलमिति चेत्तत्र विशेषमाहुः । सर्वेषामिह भूतानामिति । राज्ञोऽपि सर्वथा सर्वभूतद्रोह अवश्यवानिष्टं ततोऽपि तव प्रकारान्तरेण महज्जातमिति तत्फलं तथा यतः सर्वेषामेव भूतानामेष भगवान् प्रभव उत्पत्तिस्थानमप्ययो नाशश्च तेन मध्येऽपि स एव युक्तश्चायमर्थः यतो ब्रह्म भगवान् कारणत्वेनोक्तः अतस्तदवध्याने भूतसाध्यं सुखमिति न कश्चिदपि सुखं भवेत् भूतानां हि भगवानाराध्यः मारकत्वात्क्षयजनकश्च भोक्ता च रक्षकः अतस्तद्विरोधे तदात्मकमेव सर्वमिति न कश्चित् सुखं तस्मात्त्वदोषेणैव तवेयमवस्थेति ॥ ४८ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

तत्र सुभगा जरासन्धकन्याद्या आहुः । हा नाथेति द्वाभ्याम् सगृहप्रजाः गृहैः प्रजाभिश्च सह वर्त्तमानाः ॥ ४५—४६ ॥

दुर्भगाः शुद्धान्तः करणा आहुः । अनागसामिति द्वाभ्याम् ॥ ४७ ॥

एष श्रीकृष्णः प्रभवन्त्यस्मादिति प्रभवः अपियन्त्यस्मिन्नित्यप्ययः स च स च अवध्यानमवज्ञा तत्कर्तुं शीलं यस्य सः ॥ ४८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

एष कृष्णः प्रभवत्यस्मादिति प्रभवः उत्पत्तिस्थानम् अपियन्त्यस्मिन्नित्यप्ययः प्रवेशस्थानं स च स च तथा तदवध्यानं कर्तुं शीलमस्यास्तीति तदवध्यायी ॥ ४८—५० ॥

भाषा टीका ।

वे कहने लगीं हा नाथ! हे प्रिय धर्मज्ञ! करुणानाथ हे वत्सल! तुमारे मरने से, हम भी सब घर पुत्रों सहित नष्ट होगईं ॥ ४५ ॥

हे पुरुष श्रेष्ठ! तुम से पति से रहित होने से यह पुरी मंगल उत्सवों से रहित होने से नहीं शोभती है जैसे कि हमारी शोभा बिगडी है ॥ ४६ ॥

आपने विना दोष वाले प्राणियों का बडा द्रोह किया है तिससे तुमारी यह दशा भई है भूत द्रोह करने वाले को किसी को सुख नहीं होसका है ॥ ४७ ॥

यह कृष्ण तो इस संसार में सब भूतों का उत्पत्ति स्थिति प्रलय करने वाला है रक्षा करने वाला है इसकी अवज्ञा करने वाला कोई भी कहीं भी सुख नहीं पाता है ॥ ४८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

आस्पृश्य ईषत्स्पृष्ट्वा ॥ ५० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

पुत्रभ्रान्तिं विहाय जगदीश्वराविति ज्ञात्वा शङ्कितौ न सस्वजाते नालिङ्गितवन्तौ किन्तु बद्धाञ्जली तस्थतुरित्यर्थः ॥ ५१ ॥

प्रसह्य हत्वा हस्तीन्द्रं मल्लेन्द्रान्मल्ललीलया ।
बीभत्सचरितं कंसं सबीभत्समभारयत् ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
चतुश्चत्वारिंशोऽध्यायः ॥ ४४ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

आश्वास्येत्यत्र हेतुः लोकभावनः स्वाभाविकया दयया सर्वलोकपालक इति । अतएव श्रीविष्णुपुराणे । "बहुप्रकारमस्वस्थः पश्चात्तापातुरो हरिः । ताः समाश्वासयामास स्वयमस्राविलेक्षणः" इति । श्रीहरिवंशे "कंसनारी विलापांश्च श्रुत्वा सकरुणान् बहून् । गर्हमाणस्तथात्मानं तस्मिन् यादवसंसदि । अहो मयातिबाल्येन नवरोषातिवर्त्तिना । वैधव्यं स्त्रीसहस्राणां कंसस्यास्य कृते कृत"मित्यादि । संस्थाम् अन्त्यकृत्यं सा च । स नीतो यमुनातीरमुत्तरमित्यादि श्रीहरिवंशानुसारेण परिज्ञेया । तच्च तासां महाशोकदर्शनपरिहारार्थं तीर्थानामनाविलतार्थं चेति गम्यते ॥ ४९ ॥

अथ तदनन्तरमिति परदुःखासहिष्णुतया आदौ कंसस्त्रीणां पतिदेहेन सह प्रेषणाय व्यग्रत्वात् । सर्वेषु स्वस्वस्थानं गतेषु कोलाहलशान्तिश्च आस्पृश्य सम्यक् स्पृष्ट्वा ॥ ५० ॥

विशेषतो ज्ञात्वेति सम्प्रत्यद्भुतकर्मदर्शनादिना स्मृततज्जन्मवृत्तान्तत्वेन पुनरैश्वर्यज्ञानोद्बोधात् कृतसभक्तिवन्दनावपि पुत्रावपि जगदीशबुद्ध्या भीतौ सन्तौ अन्यत्तैः । यद्वा । न सस्वजाते किन्तु प्रणतौ स्तुवन्तौ च स्थिताविल्यर्थः । तथाच श्रीविष्णुपुराणे । "उत्थाप्य वसुदेवस्तु देवकी च जनार्दनम् । स्मृतजन्मोक्तवचनौ तावेव प्रणतौ स्थिता" विति । स्तुतिश्च दीर्घा तत्र विद्यते ॥ ५१ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे
श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिण्याम्
चतुश्चत्वारिंशोऽध्यायः ॥ ४४ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे
श्रीसुदर्शनसूरिकृतशुकपक्षीये
चतुश्चत्वारिंशोऽध्यायः ॥ ४४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका

इत्थं शोचतीः राजयोषितः सान्त्वयित्वा लोकभावनः लोकं भावयति श्रेयो युक्तं करोतीति तथा तस्मात् हतानां यां लौकिकीं संस्थां दाहादिक्रियामाहुर्मनुयाज्ञवल्क्यादयः तामकारयत् ॥ ४९ ॥

ततो रामकृष्णौ मातरं देवकीं पितरं वसुदेवं च बन्धनान्मोचयित्वा तयोः पादयोः शिरसा ईषत्स्पृष्ट्वा ववन्दाते नमस्कृतवन्तौ ॥ ५० ॥

कृतं सम्वन्दनं याभ्यां तौ पुत्रौ जगदीश्वरौ विज्ञाय न शङ्कितौ कंसभयशङ्कारहितौ सस्वजाते आलिङ्गितवन्तौ ॥ ५१ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
चतुश्चत्वारिंशोऽध्यायः ॥ ४४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

संस्थां मृतसंस्कारम् ॥ ४९ ॥ ५० ॥

न सस्वजाते आलिङ्गनं न कुर्वाते । किन्तु बद्धाञ्जली तस्थतुरित्यर्थः ॥ ५१ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्यां
द्विचत्वारिंशोऽध्यायः ॥ ४२ ॥ ४४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे
चतुश्चत्वारिंशोऽध्यायः ॥ ४४ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

एवं तासां सत्यवचनं श्रुत्वा ताः आश्वास्य भगवान् समर्थः आश्वासनेनैव तासां परमानन्दो जात इति अलौकिकं सामर्थ्यं भगवच्छब्दादवगम्यते लोकभावन इति न तस्य शत्रुमित्रोदासीनत्वम् अतः शत्रुस्त्रीणामपि कृत एव भगवतोपकारः तासु कृपयैव परलोकक्रियां कारितवानित्याह । यामाहुर्लौकिकीं संस्थामिति । दाहादिरूपाम् हतानामिति न तासां सह गमनं भगवता आश्वासनस्य कृतत्वात् यद्यपि अस्ति प्राप्तौ दुष्टे तथाप्यग्रे लीलायाः कर्त्तव्यत्वात् नानुमरणे बुद्धिर्दत्ता सम्यगकारयत् तथा शब्दतो नियोगं कृतवान् ॥ ४९ ॥

एवं दुष्टमारणं तत्रातिसंनिहितप्रतिक्रियां च कृत्वा यदर्थमेतावत्कृतं तयोः पित्रोर्लौकिकानिरोधं त्याजयित्वा स्वनिरोधं कृतवान् इत्याह । मातरं पितरमिति द्वाभ्याम् । मुख्यं दुःखं मातुरेव अतः प्रथमं निरूपिता यद्यपि बहव एव बद्धा उग्रसेनादयः तथापि प्रथममेतावेव मोचितौ चकारादेतन्निकटे सेवकाश्च आदौ निरोधात् दूरीकृतवन्तौ अथ बन्धनात् प्रथमं मानसो विमोकः द्वितीयः कायिकः तयोर्वैलक्षण्यप्रतिपादनाय अथेति नियोगानन्तरं वा

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

कृतकार्यत्वेनाव्यग्रत्वाय ततः कृष्णरामौ फलसाधनभूतौ ववन्दाते अभिवादनं कृतवन्तौ । तथैव तौ निरुद्धौ भवत इति शिरसा पादयोरास्पृश्य सत्यलोकादुपरि तौ नीतौ फलं च तयोरेवैतं ननु दुःखनिवृत्तिमात्रं यत्र पुत्रस्य सत्यलोकप्रापणं तत्र पित्रोस्ततो ऽधिकस्थानप्रापणं युक्तमेव । आसमन्तात्स्पर्शनं तु सत्यमाक्रम्य यथागच्छतः तथोपायं कृतवन्तौ ॥ ५० ॥

एवमुत्कृष्टफलदानलक्षणस्वगृहनयनेन निषिद्धौ तौ अनधिकारिणौ मामवत इति लोके ज्ञापनार्थं तयोरधिकारमाह । देवकीवसुदेवश्चेति । चकारस्तूक्तसमुच्चयार्थः अन्यतरस्यापि गौणत्वाभावाय कंसादिकमारणेन वैकुण्ठप्रापणेन च प्रत्यक्षतो ऽनुभावं दृष्ट्वा जगदीश्वरावेताविति विज्ञाय कृतसम्बन्धौ कृतनमस्कारौ भगवन्तौ न सस्वजाते नालिङ्गितवन्तौ यतः शङ्कितौ ईश्वरे हि सम्बन्धिनामपि शङ्का भवत्येव प्रपञ्चः कंसेनैव निराकृतः आसक्तिः स्थितैव फलं साधनं च परं कर्तव्यं तत्र फलं वैकुण्ठप्राप्तिः साधनं ज्ञानमिति तयोः पूर्णनिरोधो निरूपितः ॥ ५१ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे श्रीमद्वल्लभदीक्षितविरचितायां सुबोधिन्याम् एकचत्वारिंशाध्यायविवरणम् ॥ ४१ ॥ ४४ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

राजयोषितो दुर्भगा एवं मयि पालयितरि का युष्माकं चिन्तेत्याश्वास्य ॥ ४९ ॥

आस्पृश्य सम्यक् स्पृष्ट्वा ॥ ५० ॥

विज्ञायेति । जन्मसमयस्मृत्या कंसवधाद्यैश्वर्यदृष्ट्या च परमार्थदृष्टिमग्नौ न सस्वजाते लोकव्यवहारदृष्टिमग्नौ च नापि नमश्चक्राते किं तु शङ्कितौ स्तब्धावेव स्थितौ ॥ ५१ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
दशमस्य चतुश्चत्वारिंशोऽप्यजनि सङ्गतः ॥ ४४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

न सस्वजाते नालिङ्गितवन्तौ ॥ ५१ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे चतुश्चत्वारिंशाध्यायार्थप्रकाशः ॥ ४४ ॥

भाषा टीका ।

श्रीशुकदेवजी बोले लोकों की रक्षा करने वाले भगवान् राजा आदि मरेन की स्त्रियों की धीरज आश्वासना करके मरने पीछे जो लौकिक क्रिया कही है तिसको कराते भये ॥ ४९ ॥

इसके अनन्तर माता पिता दोनों को बंधन में से छुडा कर श्रीकृष्ण राम दोनों ने उनके पादस्पर्श करके वंदना किया ॥ ५० ॥

देवकी तथा वसुदेव दोनों ने भगवान् को जगदीश्वर जानने से पुत्रों के वंदन करने पर भी शङ्कित होने से आलिंगन भी नहीं किया केवल खडे रह गये ॥ ५१ ॥

इति श्रीभागवत दशमस्कन्धपूर्वार्धे चौमालीसमें अध्याय की भाषा टीका समाप्त ॥ ४४ ॥

इति श्रीमद्भागवते दशमस्कन्धे पूर्वार्धे चतुश्चत्वारिंशोऽध्यायः ॥ ४४ ॥

॥ पञ्चचत्वारिंशोऽध्यायः ॥

। श्रीशुक उवाच ।

पितरावुपलब्धार्थौ विदित्वा पुरुषोत्तमः ।
माभूदिति निजां मायां ततान जनमोहिनीम् ॥ १ ॥
उवाच पितरावेत्य साग्रजः सात्वतर्षभः ।
प्रश्रयावनतः प्रीणन्नम्ब ! तातेति सादरम् ॥ २ ॥
नास्मत्तो युवयोस्तात ! नित्योत्कण्ठितयोरपि ।
बाल्यपौगण्डकैशोराः पुत्राभ्यामभवन् क्वचित् ॥ ३ ॥
न लब्धो दैवहतयोर्वासो नौ भवदन्तिके ।
यां बालाः पितृगेहस्था विन्दन्ते लालिता मुदम् ॥ ४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

पञ्चचत्वारिंशकेऽथ पितृनन्दादिसान्त्वनम् ।
उग्रसेनाभिषेकश्च गुरौ वासात्पुरागमः ॥

उपलब्धार्थौ विदित्वेति । अयमर्थः उप समीपे आवयोः पुत्रबुद्ध्या सांसारिकपरमसुखभोगात्पूर्वमेव लब्धार्थावावामीश्वराविति लब्धः प्राप्तः परमज्ञानरूपोऽर्थो याभ्यां तौ तथाभूतौ ज्ञात्वा मयि प्रसन्ने सत्यनयोर्ज्ञानं नाम किं दुर्लभं स्यात् दुर्लभन्तु मयि पुत्रतया प्रेम अत इदानीमेव तज्ज्ञानं माभूदिति निजां स्वाधीनां मायां तयोः प्रसारितवानिति ॥ १ ॥

तदेव दर्शयति । उवाचेत्यादिभिरष्टभिः । प्रीणन्प्रीणयन्सादरं ब्रुवन् ॥ २ ॥

अस्मत्तोऽस्मन्निमित्तं नित्यमुत्कण्ठितयोरपि युवयोः पुत्राभ्यामावाभ्यां कृत्वा बाल्यपौगण्डकैशोरास्तत्तदवस्थानुभवसुखानीत्यर्थः । नाभवन्निति । अस्मत्तः पुत्राभ्यामिति सामानाधिकरण्यं वा ॥ ३ ॥

किञ्च आवामेव दैवहीनावित्याह । न लब्ध इति । पितृगेहस्था बाला यां मुदं विन्दन्ते सा च न लब्धेति ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

अहो भगवतो नौमि बलात् सर्वप्रवर्त्तनम् ।
प्राहिणोद्यः स्वशून्येऽपि श्रीनन्दादीनपि व्रजे ॥

अथ तं सम्परेतं विचकर्ष भूमावित्यारभ्य उवाच पितरावित्येतत्पर्यन्तस्य प्रकरणस्य लीलाक्रमघटनार्थं पच्यन्तां विविधाः पाका इतिवदार्थिक एव क्रमो गृह्यते । तथाहि । प्रथमं तावत् कंसस्य मृत्युप्रत्यायनार्थं रङ्गभूमावेव यत् किञ्चिद्विकर्षणं ततः कंसभ्रातॄणां हननं ततः श्रीवसुदेवदेवकीमोचनं तत्रैव ताभ्यां वन्द्यमानयोस्तयोः सङ्कोचवचनं, ततः पर्वतकायस्य कंसस्य यमुनातीरं प्रति नयनासम्भवात् श्रीकृष्णेन स्वयमेव पुनर्विकर्षणं तेन च परिखा जातेति श्रीविष्णुपुराणे प्रसिद्धम् । यथा "गौरवेणातिमहता परिखा तेन कृष्यता । कृता कंसस्य देहेन वेगेनेव महाम्भस" इति । सा चाद्यापि विश्रान्तितीर्थपर्यन्तसङ्गता कंसस्य खातमिति कंसनदीति च प्रसिद्धा दृश्यते । एवं कंसदेहस्य स्थौल्यकाठिन्येऽपि व्यक्ते । ततः कंसादिस्त्रीणां तत्रैव गमनं विलापाद्यश्च । ततश्च पितरावुपलब्धार्थावित्यादि । अथ तदिदं प्रकरणं व्याख्यायते । उपलब्धार्थाविति उपोऽत्र हीने । पुत्रभावमयप्रेमतो हीनतया लब्धोऽर्थः पारमैश्वर्यज्ञानं याभ्यां तादृशौ तन्मोचनानन्तरं वन्दनसमये ज्ञात्वा तत्तु मा भूदिति विचार्य जनमोहिनी या माया पुत्राद्यासक्तिरूपा निजां तां स्वविषयिकां ततान । "या प्रीतिरविवेकानां विषयेष्वनपायिनी । त्वामनुस्मरतः सा मे हृदयान्मापसर्पत्विति" वत् अन्यत्तैः । यद्वा । स्वीयामसाधारणीं कृपां किम्वा स्वविषयिकां पितृभावमयीं कृपां वात्सल्यं तामभिव्यञ्जयति जनानां स्वभक्तानां मोहिनीं यद्दर्शनेन तदानीन्तना यच्छ्रवणेनेदानीन्तनाश्च भक्ताः प्रेममोहं प्राप्नुवन्तीत्यर्थः । एतेन तादृशभावस्य परमपुरुषार्थत्वं ध्वनितं श्रीशुकादीनामपि तादृशभक्तगणान्तःपातात् । यद्वा । तां मायां पुनः कीदृशीं अंशेन जनमोहिनीञ्च किञ्चिदन्यथावचनत्वेन पुरतः प्रणीयमानत्वात् तच्चामू प्रति युक्तमेव । स्त्रीषु नर्म विवाहे च वृत्त्यर्थे प्राणसङ्कटे इत्यादिन्यायात् पुत्रभाव एवानयोः पितृत्वेन स्वीकृतयोर्वृत्तिरिति । वक्ष्यते चेति मायेत्यादौ परिरभ्यापतुर्मुदमिति ॥ १ ॥

तदेव विवृणोति । उवाचेति । उवाच पितरावेत्येति पूर्वं मोचयित्वा गृहमेव प्रस्थापितौ तावागत्येत्यर्थः । कंसादिसंस्कारार्थ-

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

मन्यान्नियोज्येति भावः । सात्वतर्षभ इति स्ववंश्यत्वेनानुगृहीतेषु यादवेषु च कृपां विस्तारयितुमुचितोऽयमिति तद्दर्शनयातेष्वपि तां विस्तारितवानिति भावः । तथाच विष्णुपुराणे । मोहाय यदुचक्रस्य विततान स वैष्णवीमिति । साग्रजत्वं तत्साहित्येन तयोरधिकविश्वासार्थम् । अन्यत्तैः । यद्वा । हे अम्ब तातेत्येवं सम्बोधनेन प्रीणन्तौ प्रीणयन् किम्वा स्वयमेव हृष्यन् सादरमुवाच ॥ २ ॥

हे तातेति प्राधान्यात् । किम्वा ज्ञानपरस्य तस्य स्नेहौत्सुक्यमसम्भाव्य पितृवत् मातृवत् स्नेहनिष्ठोदयाय क्वचिदेकांशेऽपि तदिदं कैशोरस्य पूर्वपूर्वावस्थैवोच्यते । अथात्र वर्षक्रमो विचार्यते । क्व सप्तहायनो बालः क्व महाद्रिविधारणमिति श्रीव्रजवासिवचनेन तद्धारणसमये सप्तहायनत्वं श्रूयते । तद्धारणञ्च तत्पूजासमयकार्त्तिकशुक्लप्रतिपदानन्तरतृतीयायामेव गम्यते वर्षपूरणसमयस्तु गौणभाद्रकृष्णाष्टम्यामिति मासद्वयदिनदशकाधिकेऽपि वात्सल्यात् सप्तवर्षसाम्यतां ते प्रोक्तवन्तः तस्मात्तन्मर्यादया पूर्वपूर्वपर्यालोचनया च तदभ्यन्तरलीलात्रयाणि गण्यन्ते । तत्र कालेनाल्पेन राजर्षे इत्यादिदृष्ट्या राजकुमारादिषु दृष्टत्वेन कैमुत्यप्राप्त्या च नासम्भावना कार्या । तत्र सति वर्षे पूर्णे तृणावर्त्तवधः । तृतीयवर्षारम्भे कार्त्तिके दामोदरलीला ततः कतिचिद्दिनान्ते वृन्दावनप्रवेशः । प्रविष्टे च वृन्दावने त्रिचतुर्मासानन्तरं वत्सचारणारम्भः तत्र वत्सवकव्योमवधः । तदेवं तृतीये पूर्णे चतुर्थारम्भे शरदि बालवत्सहरणं तत्र पौगण्डस्य प्रवेशेऽपि यत्कौमारे हरिकृतं पौगण्डे परिकीर्त्तितमिति वचनासङ्गरणहेतोरुल्लासेन स्तम्भः पञ्चमारम्भे पौगण्डप्रकाशः तत्र कार्त्तिकशुक्लाष्टम्यां गोचारणारम्भः पञ्चमस्य निदाघे कालियदमनं षष्ठे गोचारणकौतुकमात्रं सप्तमारम्भे कैशोरप्रवेशः तत्रैव पक्वतालावसरे धेनुकवधः । तल्लब्धायां पीत्वा मुकुन्दमुखसारघमित्यादि रीत्या प्रथमतादृशभावाभिव्यक्तिः । कालियदमनधेनुकवधयोर्विपर्ययः प्रतिपन्न एव सप्तमस्य निदाघे प्रलम्बवधः । अष्टमस्याश्विने वेणुगीतं कार्त्तिके गोवर्द्धनोद्धरणमिति क्व सप्त हायनो बाल इति वचनमनुस्मृत्य स्थापितम् । यथैकादशसमास्तत्र गूढार्चिः सबलोऽवसदित्यनुसृत्य निरूप्यते अष्टमारम्भे एव कार्त्तिकशुक्लैकादश्यां गोविन्दाभिषेकः द्वादश्याञ्च वरुणलोकगमनं तत्पूर्णिमायां ब्रह्महृदावगाहनं श्रीवराहदेवेन तस्यां तन्महिमकथनात् हेमन्ते वस्त्रहरणं निदाघे यज्ञपत्नीप्रसादः नवमस्य शरदि रासलीला शिवरात्रिचतुर्दश्यामम्बिकाकाननयात्रा फाल्गुन्यां शङ्खचूडवधः । दशमे खेलीला एकादशस्य चैत्रपौर्णमास्यामरिष्टवधः द्वादशस्य गौणफाल्गुनद्वादश्यां केशिवधः । तच्चतुर्दश्यां कंसवध इति द्वादशस्तत्र न पूर्ण इत्येवोक्तम् । किन्तु नवमान्त एव पूर्णकिशोरता । सा च न ह्यवच्छिद्यते कृष्णं मत्वा स्त्रियो हीवा निलिल्युस्तत्र तत्र हेति प्रद्युम्नस्यागमनेऽपि तत्साम्यावगमादिति प्रस्तुतमनुसरामः ॥ ३ ॥

नेति तैरवतारितम् । तत्र किञ्चित्यस्य न केवलं युवयोरेव हानिः किन्त्वावयोरपीत्यर्थः । अतएव कारणेन व्यावर्त्तितां किन्त्वस्य पुत्रजातीया एवेति ज्ञेयम् । यद्वा मादृशयोरप्रयोजनकयोः युष्मयोस्तेनापि युष्मत्सुखदत्वं न स्यादेव किन्त्वावयोरेव सर्वसुखहानिर्जातेत्याह । नेति । कर्त्तरि सम्बन्धविवक्षया षष्ठी । अकारप्रश्लेषणाद्देवहतयोः कर्माधीनतारहितयोरिति तत्त्वार्थः । पितृगेहस्थत्वादेव पितृभ्यां लालिताः सन्तः । यद्वा । पितृगेहस्था एव स्वभावतो यां मुदं विन्दन्ते विशेषतस्ताभ्यां लालिता इति ॥ ४ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

उपलब्धार्थौ उपलब्धतत्त्वार्थौ ॥ १—२ ॥

पुत्राभ्यामावाभ्यामावयोः अन्यत्र इत्यतीतकालो गत इत्यर्थः ॥ ३–२६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अथ पितृसान्त्वनोग्रसेनराज्याभिषेचनोपनयनगुर्वभिगमनविद्याग्रहणगुरुदक्षिणाप्रकारात्मकं चरित्रमुपवर्णयति पञ्चचत्वारिंशेन । विज्ञाय जगदीश्वरौ इत्युक्तं तत्र भगवान्मयि पुत्रे सत्यनयोर्मद्विषयकं ज्ञानं न दुर्लभं किं तु मद्याथात्म्यानुभवादपि मयि पुत्रप्रेमजानन्दोऽतिरिच्यत इत्यालोच्य स्वविषयकयाथात्म्यज्ञानतिरोधापिनीं मायामाततानेत्याह । पितराविति । उपलब्धः विज्ञातः अर्थः निरतिशयपुरुषार्थरूप आत्मा याभ्यां तथाभूतौ पितरौ विदित्वा पुरुषोत्तमः भगवान्माभूदित्यविच्छिन्नं स्वयाथात्म्यज्ञानं माभूदिति जनमोहिनीं निजां मायां ततान विस्तृतवान् आच्छादितवानित्यर्थः ॥ १ ॥

ततः साग्रजः सत्तमः सात्वतर्षभः भगवान्निजमायया आत्मानं केवलं पुत्रमेव मन्वानौ पितरावुपेत्य प्रश्रयेण विनयेनावनतो नम्रः सादरं यथा तथा हे अम्ब ! हे तातेति सम्बोधयन्प्रीतिं जनयन्नुवाच ॥ २ ॥

उक्तिमेवाह । नेति सप्तभिः । हे तात ! अस्मत्तोऽस्मान्निमित्तं नित्यमुत्कण्ठितयोरपि युवयोः पुत्राभ्यां पुत्रयोरावयोर्बाल्याद्यवस्थाः क्वचिदप्यन्तिके नाभवन् अन्यत्रैयान्कालो गतः नतु युष्मदन्तिक इत्यर्थः ॥ ३ ॥

तदेवाह । न लब्ध इति । दैवेन हतयोर्हतभाग्ययोर्नावयोर्भवदन्तिके वासो न लब्धः आवामेव भाग्यहीनौ इत्यर्थः । पितृगेहस्था बाला यां मुदमिविन्दन्ति सा च न लब्धेति ॥ ४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

मुरारेर्भगवतो बन्धनशक्तेः प्रकारः प्रतिपाद्यतेऽस्मिन्नध्याये तत्र शुकः कंसवधानन्तरं श्रीकृष्णेन किमकारीति राज्ञो मानसं प्रश्नं परिहरति । पितराविति । उपलब्धः सम्यग्ज्ञातोऽर्थः वस्तु नित्यप्रातिकूल्यं भगवत्स्वरूपम् अस्मत्सुतौ नेति याभ्यां तौ तथा विधौ ज्ञात्वा माभूज्ज्ञातमत्स्वरूपौ माभूतामिति निरूप्य निजां मायां बन्धकशक्तिं ततान विस्तृतवान् ॥ १ ॥

प्रीणयन्प्रीतिमुत्पादयन् प्रश्रये प्रकृष्टसेवायामवनतो नम्रः ॥ २ ॥

अस्मन्निमित्तं नित्योत्कण्ठितयोर्युवयोः पुत्राभ्यामावाभ्यां

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

बाल्यपौगण्डकैशोरा वयोऽवस्थाः पित्रोरानन्दहेतवो नागमन् युष्मत्पुरतो बाल्याद्युचिता लीला न प्राप्ता इत्यर्थः ॥ ३ ॥

अप्राप्तौ निमित्तमाह । नेति । दैवहतयोर्भाग्यहीनयोः नौ आवयोः भवत्समीपे वासो न लब्ध इति यस्मात् ये बालास्ते पित्रोर्गृहे स्थिता यां मुदं विन्दन्ते सापि न लब्धेत्यन्वयः विन्दते इतिछान्दसः "अभयं प्रतिष्ठां विन्दत" इति श्रुतिः ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

उपलब्धार्थाविति उपोऽत्र हीने पुत्रप्रेम्णा प्रेक्ष्य दीनतया लब्धोऽर्थः मत्पारमैश्वर्य्यज्ञानं याभ्यां तादृशौ ज्ञात्वा तच्च मा भूदिति विचार्य्य मायां स्वविषयिकां कृपां वात्सल्यं ततान । तदुक्तं नन्दः किमकरोद्ब्रह्मन्नित्यादौ तेमं निरिश्चो न भव इत्यादौ च पुनः कीदृशीम् अंशेन जनमोहिनीं च किञ्चिदन्यथा वचनत्वेन पुरतः प्रतीयमानत्वात् ॥ १—५ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

साधारण्येन सर्वेषां द्विरूपोऽपि निरूप्यते ।
द्विचत्वारिंशेऽत्राध्याये निरोधः सर्वसम्मतः ॥
पित्रोरग्रस्तथान्येषां स्वस्यापि च निरूप्यते ।
द्विरूपे मध्यमे रोधे यादवत्वं प्रयोजकम् ॥
स्वस्य शब्दात्मके रोधः स्वाज्ञायां निखिलस्य च ।
देवे दैत्ये च सर्वत्र कालादिष्वपि सर्वतः ॥

पूर्वाध्याये विशेषतो निरोध उक्तः पित्रोः स चासौ लौकिकः लौकिकोऽपि कर्त्तव्य इति तयोर्बोधनेन तमाह । पितराविति । एकादशभिः । मध्यमत्वाद् गुणैर्ज्ञानभक्तिभ्यां चेति अन्यथा पूर्वस्मादपकर्षः स्यात् लौकिको निरोधः अलौकिके बोधे विद्यमाने न भविष्यतीति तदाच्छादनार्थं मायां विस्तारितवानित्याह । उपलब्धार्थौ पितरौ विदित्वा उपलब्धार्थता मा भवत्विति जनमोहिनीं निजां मायां ततान प्रयच्छत्येव सर्वे निरोधे । किं बहुना व्यापिवैकुण्ठमपि दत्तवान् तथापि वेषेण क्रीडतीति ज्ञानं न लीलौपयिकम् अतो बाधकत्वात् स माभवत्विति मायाच्छादनं ननु को दोषः स्यात्तत्राह । पुरुषोत्तम इति । मूलभूतः यदि कश्चिदंशः समागच्छेत् तस्य लोके ज्ञानं नात्यन्तं लज्जाकरं महतस्तु मूलभूतस्य भवत्येव । तत्फलं च भविष्यत्येव भक्तिः परमानन्दस्य तुल्यत्वात् । ननु मायया मोहे ततोऽप्यपकर्षो भवेत्तत्राह । निजामिति । सा हि स्वकीया यथा युक्तमेव कार्यं करिष्यतीति । ननु भगवदतिक्रमे दोषः स्यात्ततोऽनिष्टसाधकत्वं मामाया इत्याशङ्क्याह । जनानेव मोहयति ननु भगवदीयान् जनेषु च मोहयति न तु भगवति तत्र हेतुर्वा स्वेति तस्याः कार्यनिदर्शनार्थं जनमोहिनीत्वमुक्तम् ॥ १ ॥

अतः अलौकिकमुपायं विधाय लोकन्यायेन सापराधावेताविति एतस्मिन् कृते वसुदेवो दुःखं प्राप्नोतीति नालिङ्गनं कृतवानिति प्रतीतिमुत्पाद्य तद्दोषपरिहारार्थं तादृशानि वचनान्याह । उवाचेति । नमस्कारं परित्यज्य एत्य निकटे समागत्य बलभद्रस्तथा वक्तुं न जानातीति तस्यापि दोषः परिहर्त्तव्य इति तत्सहितः सात्वतामृषभः स्वामी भगवद्भक्तानां शिक्षकः सन्मर्यादां शिक्षयन् प्रश्रयेण विनयेन नम्रो बाल इव प्रीणन् प्रीतिमुत्पादयन् आदरपूर्वकमम्ब तातेति सम्बोधनमुवाच लज्जा सापराधत्वञ्च लोकदृष्ट्या सम्भवतः तत्र प्रथमं लज्जा निवारणीया पुत्रः स्वात्मैवेति न तेन कृते मोचने लज्जा भवति अतः पुत्रत्वं ज्ञापयन् अम्ब-तातेति सम्बोधनं कृतवान् उपचारव्यावृत्त्यर्थं सादरं कपट एवोपचारप्रयोगः तथापि तद्धृदये पूर्वस्मृतिनाशेऽपि विपरीता बुद्धिः कथमुत्पद्येत तत्राह । प्रीणन्निति । यथा प्रीतिर्भवति तथा मुखचेष्टां कुर्वन् अवगणनया पुत्रत्वेऽपि बोधिते प्रीतिर्नोत्पद्यते इति विनयप्रकाशनम् ॥ २ ॥

एवं लज्जां दूरीकृत्य अपराधनिराकरणे नास्माभिरपराधः कृत इति वक्तुं तत्साधनाय तयोरपेक्षितत्वं ज्ञापयति । नास्मत्त इति । नित्योत्कण्ठितयोरपि सर्वदा पुत्रयोर्बाल्यपौगण्डकैशोरा द्रष्टव्या इत्याकाङ्क्षा बाल्यादयो मुद इति सन्तोषे हि सर्वस्याकाङ्क्षा भवति पुत्राभ्यामिति पञ्चमी आवाभ्यां पुत्राभ्यां हेतुभूताभ्याम् आवयोः सम्बन्धिनः बाल्यादयः अन्येषां च कीर्त्तिमत्प्रभृतीनां न जाता भगवानुत्पत्स्यत इति श्रवणाल्लोकोपद्रव इति स्वस्यैव निमित्तता । स्वस्यापि बाल्याद्यदर्शने अक्लिष्टकर्मत्वाय स्वमेवोक्तवान् मां गोकुले नयेति अतः स्वयमेव निमित्तं समर्थावुपेक्षां कृतवन्तावित्यपि स्वधर्मपरिपालनं हि गोप्यता अक्लिष्टकर्मता स्वस्यैव रक्षणीया पित्रोस्तु बाधिकैव अतः स्वनिमित्तमेव बाल्यादीनामननुभवः ॥ ३ ॥

यद्यपि भवतां सुखाभावः तथाप्यस्माकं भूयान् क्लेशो भवतामल्प इति निरूपयति । न लब्ध इति । दैवहतयोः दैवं हतं याभ्याम् अर्थाद्भवदीयं ब्रह्मणो हि नादृष्टं दैवप्रेरितयोर्वा तथाप्यन्यथा प्रत्यायकः शब्दः मोहिकया मायया जनित इति न भगवद्वाक्ये बाधितार्थत्वविरोधः परोक्षता तु व्याख्यातैव लौकिकीयं भाषा अतो भगवान् गोप्य एव सर्वथा विक्षेरपीति फलिष्यति । भगवतापि बाल्यमाविष्कृतमिति तद्यादृशं लोके प्रशस्तं भवति तादृशं प्रकटीकर्तव्यम् इदं त्वस्मिन्वंशे विकलमिति श्रुत्वा यथार्थतापि भवति आत्मत्वेन तद्धर्माः परिगृहीता इति ऐक्यानिरूपणमिति न दोषाय स्वबाल्यस्य लोकप्रसिद्धत्वात् कथं विकलेत्याशङ्क्याह । यां बाला इति । लोकानां सन्तोष हेतुर्बाल्यं यद्यप्यस्मदीयं तथाप्यस्मत्सन्तोषहेतुर्न भवति नन्दादिषु तथा हृदयं न प्रकटीकृतमिति सहजो धर्मस्तेषु नोत्पन्नः कृत्रिमो हि न सुखदायी अन्यथा बन्धनं न कुर्यात् भारे वा भूमौ न स्थापयेत् तस्मात् सुष्ठूक्तं पितृगेहस्था एव बालाः पितृभ्यां लालिताः मुदं विन्दन्तीति । मुदमित्येकवचनं सर्वेषां बालानां तुल्यत्वाय तेनान्ये उत्कर्षहेतवो धर्माः स्थिता अथ प्रयोजका इति निरूपितम् ॥ ४ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

स्वपित्रोः सान्त्वनं कंसताते राज्यं प्रजेशितुः ।
समाधे पञ्चचत्वारिंशे स वासं गुरौ न्यधात् ॥

उपलब्धोऽर्थः अस्मदैश्वर्य्यज्ञानरूपं धनं याभ्यां तथाभूतौ पितरौ ज्ञात्वा माभूदिति स चार्थोऽनयोरस्तु किं तु

सर्वार्थसंभवो देहो जनितः पोषितो यतः ।
न तयोर्याति निर्वेशं पित्रोर्मर्त्यः शतायुषा ॥ ५ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

तदावरको वात्सल्यप्रेमैव संप्रत्यस्तु मम चानयोरत्र तेनैव परमानन्दलाभादिति मनसि विमृश्य निजामन्तरङ्गां मायां स्वैश्वर्य्यज्ञानमावरीतुं योगमायां ततान जनमोहिनीं "दीयमानं न गृह्णन्ति विना मत्सेवनं जना" इत्यत्र जनशब्देन भक्ता एवोक्तास्तान्मोहयितुं शीलं यस्यास्तां यद्वा जनयत इति जनौ जननीजनकौ तयोर्मोहिनीं श्रीस्वामिचरणाश्चात्र मयि प्रसन्ने सत्यनयोर्ज्ञानं नाम किं दुर्लभं स्यात् दुर्लभं तु मयि पुत्रतया प्रेमेति भगवदभिप्रायमाहुरत एव पितरौ वात्सल्यरसं ग्राहयितुमग्रिमश्लोकेषु तयोः कपटोक्तिरपि न दोषायेति ज्ञेयम् ॥ १ ॥ २ ॥

अस्मत्तः अस्मद्धेतोर्नित्यमुत्कण्ठितयोरपि युवयोः पुत्राभ्यामावाभ्यां कृत्वा बाल्यपौगण्डकैशोरास्तत्तदवस्थानुभवलालनादिसुखानि पुंस्त्वमार्षं ननु क चातिसुकुमाराङ्गौ किशोरौ नाप्तयौवनाविति पुरस्त्रीणामुक्तेः कथं कैशोरस्यातीतत्वमुच्यते "कौमारं पञ्चमाब्दान्तं पौगण्डं दशमावधि । कैशोरमापञ्चदशात् यौवनं तु ततः पर"मितिवचनात् पञ्चदशवर्षपर्य्यन्तमेव कैशोरं कृष्णस्त्वेकादशवर्षवया एव कंसं जघान "एकादशसमास्तत्र गूढोऽर्चिः सबलोऽवस"दित्युद्धवोक्तेर्व्रजभूमावुपनयनाभावाच्चैतत्तदानीं तयोः कैशोरस्यारम्भ एव न तु शेषोऽपीति सत्यं यद्यपि सामान्यतो वयोगणना इदृश्यैव तथापि "कालेनाल्पेन राजर्षे रामः कृष्णश्च गोव्रजे । अघृष्टजानुभिः पद्भिर्विचक्रमतुरञ्जसे"त्युक्ते राजकुमारादावपि क्वचित् क्वचिदतिसुखिनि पौगण्डवयस्यपि शरीरवृद्धिमतिकैशोरवच्चदर्शनात् कृष्णे तु कैमुत्यप्राप्तेर्वैष्णवतोषणी भक्तिरसामृतानन्दवृन्दावनादिमतमनुसृत्यैवं व्यवस्थेयं मासचतुष्टयाधिकवर्षत्रयस्यैव कृष्णे पञ्चवर्षीयमाणत्वात् तत्प्रमाणं प्रथमं वय एव कौमारं तत्र कृष्णस्य महावने स्थितिः ततः परमष्टमासाधिकषड्वर्षपर्य्यन्तं वयः पौगण्डं तत्र वृन्दावने स्थितिः ततः परं दशवर्षपर्य्यन्तं कैशोरं तत्र नन्दीश्वरे स्थितिः ततः सप्तमे मासि चैत्रे कृष्णत्रयोदश्यां मथुरागमनं चतुर्दश्यां कंसवध इति तत्र दशमवर्षे तु शेषकैशोरं तत्रच नित्यस्थितेस्तस्तदनन्तरं सर्वकालमेव तस्य कैशोरमेव ज्ञेयं कृष्णं मत्वा स्त्रियो ह्रीणा निलिल्युस्तत्र तत्र हेति किशोरस्य प्रद्युम्नस्यागमने तत्साम्यावगमात् सन्तं वयसि कैशोर इति सामान्योक्तेश्च आगमादिष्वपि त्रिंशाक्षरादिमन्त्राणां द्वारकालीलामयध्यानेष्वपि तथा दृष्टेश्च तस्मात् कंसवधदिने तस्य कैशोरापगमः कैशोरानपगमश्चेति कृष्णस्य पुरस्त्रीणां च वाक्यं संगच्छते स्म ॥ ३ ॥

किं चावामेव भाग्यहीनावित्याह । नेति । दैवहतयोर्हतभाग्ययोर्भाग्येन प्राप्तयोरिति वास्तवोऽर्थः । तृतीयार्थे षष्ठी बाला यां मुदं विन्दन्ते सा च न लब्धेति शेषः ॥ ४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अथ पञ्चचत्वारिंशेऽध्याये वसुदेवनन्दादिसान्त्वनोग्रसेनराज्याभिषेचनोपनयनगुरुगृहवासतत्परिचर्यादिरूपं भगवच्चेष्टितं वर्णयति पितराविति । उपलब्धः सर्वजनकः श्रीकृष्णो नास्मत्पुत्र इत्येवं बोधरूपोऽर्थो याभ्यां तौ तथाभूतौ विदित्वा पुत्रभावेनातिदुर्लभेन मां भजमानयोरनयोस्तादृशबोधरूपो ऽर्थो माभूदिति निजां मायां तयोस्ततान ॥ १ ॥

तदनन्तरमुवाच प्रीणन् प्रीणयन् हे अम्ब ! हेतातेति सादरं संबोधयन् ॥ २ ॥

किमुवाचेत्याकाङ्क्षायामाह । नास्मत्त इत्यादि । हे तात ! अस्मत्तः अस्मन्निमित्तं नित्योत्कण्ठितयोरपि युवयोः अवाभ्यां पुत्राभ्यां कृत्वा बाल्यपौगण्डकैशोराः तत्तदवस्थानुभवविनोदाः कर्हिचित्कस्मिंश्चिन्निमित्ते सति नाभवन् ॥ ३ ॥

किंच । दैवहतयोरिव नौ आवयोर्भवदन्तिके वासो न लब्धः । यां पितृगेहस्था बाला विन्दन्ते सा च न लब्धेत्यन्वयः ॥ ४ ॥

भाषा टीका ।

श्रीशुकदेवजी बोले पुरुषोत्तम भगवान ने जब पिता माता दोनों को अपने चरित्र से ज्ञान उत्पन्न देखा तब इनको ऐश्वर्य ज्ञान मत होजावै इस इच्छा से पुत्र प्रेम बढ़ाने के लिये जनों की मोहने वाली माया का विस्तार किया ॥ १ ॥

सात्वतवंशियों में श्रेष्ठ भगवान् बडे भ्राता के सहित प्रेम से नम्र होकर पिता माता के पास जाकर बडे आदर से हे माता हे तात इस प्रकार बोले ॥ २ ॥

हे तात ! आप दोनों सदा बडे प्रेम से उत्कण्ठित रहे तौ भी आपके सामने हम दोनों पुत्रोंके बाल्य पौगंड कैशोर अवस्था कभी नहीं भई कि जिनका सुख आप को होता ॥ ३ ॥

हम दोनों के ही प्रारब्ध हीन होने से आपके पास हमारा निवास नहीं होने पाया जिस वास से कि बालक सब पिता माता के घर में रह कर लालित होने से आनंद को प्राप्त होते हैं सो भी नहीं भया ॥ ४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका

एवं तावच्छ्लोकद्वयेन युवयोरावयोश्च कामहानिर्जातेत्युक्त्वाऽऽवयोः पुनर्युष्मत्परिचर्यालोपेन धर्महानिरपि जातेत्याह । सर्वार्थसम्भव इति । सर्वेषां धर्माद्यर्थानां सम्भवो यस्मिन्स देहो यतो याभ्यां जनितः पोषितश्च तयोः पित्रोर्निर्वेशं निष्कृतिमानृण्यं मर्त्यः शतसम्वत्सरमात्रेणाऽऽयुषा न प्राप्नोति ॥ ५ ॥

यस्तयोरात्मजः कल्प आत्मना च धनेन च ।
वृत्तिं न दद्यात्तं प्रेत्य स्वमांसं खादयन्ति हि ॥ ६ ॥
मातरं पितरं वृद्धं भार्यां साध्वीं सुतं शिशुम् ।
गुरुं विप्रं प्रपन्नं च कल्पोऽबिभ्रच्छ्वसन्मृतः ॥ ७ ॥
तन्नावकल्पयोः कंसान्नित्यमुद्विग्नचेतसोः ।
मोघमेते व्यतिक्रान्ता दिवसा वामनर्चतोः ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तन्मध्येऽपि तु यः पुत्रः कल्पः समर्थः सन्नपि देहेन धनेन च पित्रोर्वृत्तिं जीविकां न सम्पादयेत्तं प्रेत्य लोकान्तरे यमदूताः स्वस्यैव मांसं खादयन्तीति ॥ ६ ॥

किञ्च मात्रादिशुश्रूषामकुर्वन् विफलजीवितश्च भवतीत्याह । मातरमिति । अबिभ्रदपुष्णन् श्वसन्नपि मृततुल्य एवेति ॥ ७ ॥

तत्तस्मान्नौ आवयोः मोघं व्यर्थम् अनर्चतोरपूजयतोः ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

जननपोषणे पृथगेव कारणे विवक्षिते ताभ्यां पोषणाभावात् ॥ ५ ॥

यस्तयोरित्यत्र टीकायां तन्मध्येऽपि त्वित्येव पाठः नतु पितुरिति स्वस्य तस्यैव मांसं तं खादयन्ति ॥ ६ ॥

वृद्धं कुलवृद्धं कल्पः समर्थोऽपि श्वसन्मृत एव अकल्पस्तु सुतरामित्यर्थः ॥ ७ ॥

तदेवात्मनो निर्दिशति । तदिति । अकल्पत्वे हेतुः कंसादिति । वां युवाम् ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं युवयोरावयोश्च कामहानिर्जातेत्युक्तम् अथावयोः पुनर्युष्मत्परिचर्यालोपेन धर्महानिरपि जातेत्याह । सर्वार्थसम्भव इति । सर्वेषां पुरुषार्थानां धर्मादीनां सम्भवो यस्मिन् स देहो यतो याभ्यां जनितः पोषितश्च तयोः पित्रोर्निर्वेशं निष्कृतिमानृण्यं मर्त्यः शतवर्षमात्रेणाप्यायुषा नैति नाप्नोति ॥ ५ ॥

तन्मध्ये पितुर्यः पुत्रः कल्पः समर्थः सन्नात्मना देहेन धनेन च पित्रोर्वृत्तिं जीविकां न दद्यान्न कल्पयेत्तं प्रेत्य लोकान्तरे यमदूताः स्वस्यैव मांसं खादयन्ति हि ॥ ६ ॥

किञ्च समर्थोऽपि मात्रादीन् यथोचितमबिभ्रन्न पुष्णाति सः श्वसन्मृतः जीवन्नपि मृतप्रायः ॥ ७ ॥

तत्तस्मान्नित्यं कंसादुद्विग्नं भीतं चेतो ययोस्तयोर्वां युवयोरनर्चतोरपूजयतोः वामिति कर्मणः सम्बन्धविवक्षया षष्ठी असमर्थयोर्नावावयोर्मोघं वृथा अहव एते दिवसाः व्यतिक्रान्ताः यद्वा वामिति द्वितीया युवामनर्चतोस्तत्र हेतुरकल्पयोस्तत्रापि हेतुर्नित्यं कंसादुद्विग्नचेतसोर्नावावयोर्मोघमेते व्यतिक्रान्ता इत्यन्वयः कंसादुद्विग्नचेतसोरित्यनैश्वर्यमभिनयतोरुक्तिः ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

सर्वेषामर्थानां मोक्षादिपुरुषार्थानां सम्भव उत्पत्तिर्यस्मात्स सर्वार्थसम्भवो देहो याभ्यां जनितः पुनः पोषितश्च तयोः पित्रोः शतायुषा वर्षसहस्रेणापि निर्वेशं निष्कृतिं न याति मर्त्यः अल्पायुः ॥ ५ ॥

अल्पायुश्चेत्कथं निष्करोतीत्यतो यावदायुः पितृपरिचर्या कार्या अन्यथाऽनर्थः स्यादिति वक्ति । यस्तयोरिति । यस्तयोः पित्रोः आत्मना प्रेषितपुरुषमन्तरेण स्वयमेव धनेनालम्बुद्धिजनकेन च द्रव्येण च वृत्तिं जीवनं न दद्यात् तं प्रेत्य यमलोके स्वमांसं खादयन्ति यमभटा इति शेषः आत्मज औरसोऽपि निर्धनश्चेत्किं कुर्यादित्यत आह । कल्प इति । देहेन धनेन च कर्तुं समर्थ इत्यर्थः । हिनाऽत्र वृद्धौ च माता पिता वित्ति स्मृतिं प्रमाणयति ॥ ६ ॥

सूचितस्मृतिमर्थतः प्रतीकयति । मातरमिति । मातरं सर्वावस्थासु माननयोग्यां पितरं वृद्धं जरसा ग्रस्तं भार्यां भरणयोग्यामपि साध्वीमक्षतव्रतां सुतं शिशुं स्वजीवनप्रवृत्तावसमर्थं गुरुं ज्ञानोपदेष्टारं विप्रं ज्ञानपूर्णं प्रपन्नं शरणागतं च एतानबिभ्रद्भरणमकुर्वन्सः श्वसन्नपि जीवन्नपि मृतः मृतकल्प इत्यर्थः । कञ्चन वृद्धं काञ्चन साध्वीं कञ्चन शिशुं प्रेङ्खायां शयानं कञ्चन विप्रमिति पृथग्वान्वेतव्यमिति ॥ ७

नन्वेवमस्तु प्रकृते किमिति तत्राह । तन्नाविति । यत एवं शास्त्रार्थस्तस्मात्कंसात् कसि हिंसायामिति धातोः सर्वहिंसाधिकरणत्वेन तन्नाम्नो भोजपतेर्नित्यमहोरात्रमुद्विग्नचित्तयोः अत एव वामनर्चतोः परिचर्यामकुर्वतोः अकल्पयोः शक्तिसामग्रीहीनयोः नौ आवयोः एते इतः पूर्वे दिवसाः मोघं व्यतिक्रान्ता इत्यन्वयः ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

कल्पः सर्वेन्द्रियपाटवयुक्तोऽपि श्वसन्मृत एव । अकल्पस्तु सुतरामेवेत्यर्थः ॥ ६ ॥ ७ ॥

तदेवमात्मनो निर्दिशति अकल्पत्वे हेतुः कंसादिति ॥ ८ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

उपेक्षाशङ्का तु न कर्त्तव्यैव लोकतः स्वार्थमेवापेक्षितत्वात् वेदे तु तस्य बाधकत्वात्सदाह । सर्वार्थसम्भव इति । सर्वे अर्था धर्मादयः अस्मिन्नेव मानुषशरीरे सम्भवन्ति तथा

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

लीला अपि सामान्योक्तेः नात्यन्तं भगवत्परता वक्तव्या जनितः पित्रा पोषितो मात्रा आवश्यकपोषो हि तथैव भवति अथवा उभाभ्यां जनितः पोषितश्च भवति यथोपयोगं यतो याभ्यां यस्माद्वा तयोर्निर्वेशं निष्कृतिं प्रत्युपकारं शतायुषापि न भवति । मर्त्य इति मरणधर्मा स हि कालेनोपद्रुतः स्वयमेवासमर्थः जीवनेऽपि तयोः कमुपकारं करिष्यति अथवा नायमनृणः यतो मर्त्यो म्रियते न हि दोषाभावे म्रियते वर्षाणां शतेनाप्यानृण्यं न भवतीति । पूर्णमायुर्भुक्त्वापि म्रियते अन्यथा अग्रेऽपि जीवेत् पापेन हि दुःखमेव अन्यथा पुण्यपापोपभोगः सर्वत्रैव नियत इति एतच्छरीरत्याजनेन पुण्यपापयोः कः उपकारः स्यात् आनृण्ये तु तावत्कालं प्रतीक्ष्य तदधिकारिणः स्वसन्तानान् तं दूरीकुर्वन्ति तस्मान्मर्त्यता युक्ता भवति । शतायुषेति—परमावधिः कालस्य शतावृत्तावप्यनुपयोगे अग्रे नोपयोग एवेति तन्निवृत्तिः तत्रत्यानां देवानां पूर्वमेवाकाङ्क्षानिवृत्तौ शीघ्रं मरणम् अन्यथा तु ततोऽप्यधिकं जीवनमिति शतसंख्या उपलक्षिका ॥ ५ ॥

तत्र विशेषमाह । यस्तयोरात्मज इति । तयोः पित्रोः शरीरजातो न करोत्येव तयोर्निष्कृतिं बुद्धिपूर्वकं तिष्ठत्वन्यत् यो वृत्तिं जीविकां न दद्यात् तं प्रेत्य परलोके मृत्वा स्थित्वा प्रकर्षेण एत्यागत्य वा स्वमांसं तस्यैव मांसं खादयन्ति युक्तश्चायमर्थः तदुद्भवेन शारीरेणोत्पादितं तदीयमेव भवति यथा दासकृतं स्वक्षेत्रोद्भवं वा तद्वत् स्वार्थमेव विनियोगं कुर्यात् शरीरं पोषयेत् परलोकं वा साधयेत् तदा अविशेषात् शरीरेणापि तदुद्भवेन तत्साधयतु मुख्यत्वाच्च तस्मादयमेव दण्डो विहितः । निष्कृतिश्च भवति तदीयमनेन भक्षितमिति परस्वभक्षक एव भवेत् ननु तेन किञ्चित् अतो देवास्तदुपकारार्थं मृत्युभावाय निष्कृतेश्च सम्भावना नास्तीति तन्मांसमेव तं खादयन्ति । यो हि वृत्तिमेव न दधाति स किमन्यत्करिष्यतीति । एवं सामान्यविशेषप्रकारेण पितृविषयकं दैविकबाधकमुक्त्वा प्रसङ्गात्सामान्यतः तेषां पोषणाभावे जन्मैव निष्फलमिति मृत एवेति मृतवत् तादृश उपेक्षणीय एव स्वस्य जन्मवैयर्थ्यभयात् बुद्धिमांश्च नोपेक्षां करिष्यतीति ॥ ६ ॥

अपालने जन्मवैफल्यमाह । मातरं पितरमिति । पितृविशेषणं वृद्धमिति । अन्यथा स एव समर्थः माता त्वग्रिमविशेषणरहितापि पोषणीया साध्वीति भार्या विशेषणं शिशुमिति सुतस्य उपनीतः पश्चाच्छिक्षादिना स्वयमेव स्ववृत्तिं संपादयिष्यति । गुरुं विप्रं पुरोहितमिति यावत् अयं धर्मः क्षत्रियाणां तथैव प्रपन्नं च शरणागतं पृथगुपदेशात् शरणसाहचर्याच्च विप्रपदमुभयत्र सम्बध्यते कल्पः अविभ्रत् श्वसन्नेव मृतो भवति श्वासमात्रं तस्य परं न तु जीवनोपयोगोऽन्यः कश्चन अतो दोषत्रयेण स्वस्यैवायमपराधः ॥ ७ ॥

तेन चाकार्यं न तु भवतां काचित्क्षतिरिति निरूपयति । तन्नावकल्पयोरिति । तत्तस्मात्कारणाद्बाधकस्य ज्ञानस्य विद्यमानत्वात् नौ आवयोरकल्पयोरेव बाधकान्तराभावात् एते दिवसा मोघ व्यतिक्रान्ताः पुरुषार्थसाधका न जाताः तत्र हेतुः वाम् अर्चन्ताविति । युवयोरर्चामकुर्वतोः असामर्थ्ये लौकप्रत्या देशान्तरे स्थितः असमर्थो भवत्येव बालत्वाच्च यद्यपि लीलयैवार्चा भवति तथापि कंसान्नित्यमुद्वेग इति न तत्सम्पन्नमित्याह । कंसादिति । स हि विलं पूतनादिदैत्यान् प्रेषयति तत उद्वेगः वस्तुतस्तु युवयोर्निमित्तं स हि कदा वा भवत्स्वरूपं ज्ञात्वा उपद्रवं कारयिष्यतीति अत एवान्ते तथैव जातम् अत एवैते दिवसा भवदुपयोगाभावात् मोघा जाताः वां युवामनर्चतोः नमस्कारादिना महत्त्वात् पूजादिना च ॥ ८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

सर्वेषां धर्मार्थयोर्नां संभवो यस्मिन् स देहो यतो याभ्यां निर्वेशम् आनृण्यम् ॥ ५ ॥

यस्तु कल्पः समर्थः शास्त्रविधिना दातुं योग्यः कर्मेव स्वेभ्यि स्थितः इति यावत् वृत्तिं जीविकां तं प्रेत्य मृत्वा वर्तमानं यमदूताः स्वस्य तस्यैव मांसं बलात् तं खादयन्ति ॥ ६ ॥

अविभ्रत् अपुष्णन् ॥ ७ ॥

तत् तस्मात् नौ आवयोः अकल्पयोः अत्राकल्पशब्दः केवलासमर्थस्यैव वाचकः तत्र हेतुः कंसादिति अत एव मोघमिति दोषोक्तिः न विद्यते कल्पो याभ्यां तयोः कंसात् कंसमाकर्ण्य युद्धोत्साहवशात् नित्यमुदीरत एव विघ्नचेतसोः पुरीप्रतिचलितचेतसोः ओविजी भयचलनयोः मोघमित्यादि काकूक्तिरिति वास्तवोऽर्थः ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

यतो याभ्यां जनितः पोषितश्च तयोर्निर्वेशं निष्कृतिमानृण्यं शतायुषा शतसम्वत्सरात्मकेनायुषापि मर्त्यो न याति ॥ ५ ॥

कल्पः समर्थः स्वमांसं खादयन्ति यमदूता इति शेषः ॥ ६-७ ॥

नौ आवयोः अकल्पयोः बालयोर्वामनर्चतोः अपूजयतोः मोघं व्यर्थम् ॥ ८ ॥

भाषा टीका ।

संपूर्ण पुरुषार्थों के संपादन करने लायक देह जिन से उत्पन्न होता है और जिनसे पालित होता है उन दोनों पिता माता के प्रत्युपकार को मनुष्य सौ आयु से भी नहीं कर सका है ॥ ५ ॥

जो पुत्र सर्वथा धन से और शरीर से समर्थ है फिर पिता माता को सेवा वृत्ति नहीं देता है उसको यम लाक में यम भट अपना मांस खवाते हैं ॥ ६ ॥

वृद्ध माता पिता सती भार्या बालक पुत्र गुरू ब्राह्मण शरणागत इन सबों को समर्थ होकर जो नहीं पालन करता है सो तो मानों श्वास लेते ही मरा सरी का है ॥ ७ ॥

तिस से असमर्थ तथा कंस से नित्य ही उद्विग्न चित्त वाले हम दोनों के आप की सेवा करने बिना इतने दिन व्यर्थ ही चले गये ॥ ८ ॥

तत् क्षन्तुमर्हथस्तात ! मातर्नौ परतन्त्रयोः ।
अकुर्वतोर्वां शुश्रूषां क्लिष्टयोर्दुर्हृदा भृशम् ॥ ९ ॥

। श्रीशुक उवाच ।

इति मायामनुष्यस्य हरेर्विश्वात्मनो गिरा ।
मोहितावङ्कमारोप्य परिष्वज्यापतुर्मुदम् ॥ १० ॥
सिञ्चन्तावश्रुधाराभिः स्नेहपाशेन चावृतौ ।
न किंचिदूचतू राजन् ! बाष्पकण्ठौ विमोहितौ ॥ ११ ॥
एवमाश्वास्य पितरौ भगवान् देवकीसुतः ।
मातामहं तूग्रसेनं यदूनामकरोन्नृपम् ॥ १२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

दुर्हृदा कंसेन कृत्वा ॥ ९-११ ॥

आश्वास्य सान्त्वयित्वा ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

तदनर्थनं हे तात ! मातरिति पुनः सम्बोधनं स्नेहभरजननार्थं तात मातृत्वादेव शुश्रूषामकुर्वतोरपि नौ क्षन्तुमर्हथः । किञ्च परतन्त्रयोः निन्हुतवासेनास्वाधीनयोरतो दुर्हृदा कंसेन क्लिष्टयोरावयो रसामर्थ्याच्चेति भावः ॥ ९ ॥

तत्र श्रीशुक उवाचेति क्वचिदस्ति मोहितौ विस्मारितवात्सल्यव्यतिरिक्तसर्वौ तत्र हेतवः मायामनुष्यस्येति कृपाप्रधानेन नराकृतिपरब्रह्मणः । हरेरसमोर्द्ध्वमाधुर्येण सर्वमनोहरस्य विश्वात्मनः परमात्मत्वेन विश्वस्यापि निरुपाधिपरमप्रेमास्पदस्येति अङ्कमारोप्य ताविति शेषः ॥ १० ॥

चकार उक्तसमुच्चये । स्नेहपाशेनावृतौ सन्तौ पाशास्त्रवद्परिहार्येण दीर्घेण च प्रेम्णा बहिरन्त र्याप्यमानौ अतएव विमोहितौ न किञ्चिदप्यनुसन्धातुं बाष्परुद्धकण्ठौ च सन्तौ न किञ्चिदप्यूचतुश्च किन्तु केवलमश्रुधाराभिः सिञ्चन्तौ तयोरभिषेकमिव कुर्वन्तौ स्थितावित्यर्थः । हे राजन्निति स्नेहभरस्वभावो भवता गम्य एवेति भावः । तदिदं वृत्तं श्रीनन्दादीनामगोचर एव ज्ञेयम् उभयत्रैव भगवता पितृत्वव्यञ्जनात् ॥ ११ ॥

मातामहमित्यवश्यमान्यत्वेन पितृभ्यां सह सम्बन्धविशेषेण तत्सम्मतत्वेन च यदुराजयोग्यतोक्ता । अतएव तुशब्दस्तद्विधाने मुख्यं प्रयोजनं स्वस्य गोकुलगमनेच्छयैव ज्ञेयं तथाच श्रीहरिवंशे तं प्रति श्रीभगवद्वाक्यम् "अहं स एव गोमध्ये गोपैः सह वनेचरः । प्रीतिमान् विचरिष्यामि कामचारी यथा गजः । एतावच्छतशोऽप्येवं सत्येनैव ब्रवीमि ते । न मे कार्यं नृपत्वेन विज्ञाप्यं क्रियतामिदम् । भवान् राजा तु मान्यो मे यदूनामग्रणीः प्रभुः । विजयायाभिषिच्यस्व स्वराज्ये राजसत्तमे"ति । नृपं राजानमकरोत्तु पूर्ववदधिपं यतो भगवान् कर्तुमकर्तुमन्यथा कर्तुं समर्थत्वात् । भक्तवात्सल्येन ययातिशापमपि नापेक्षितवानिति भावः । अतः पूर्वेषां राजत्वन्तु स्वकपोलकल्पितमित्याख्यातम् । अस्य राजत्वविधानं बन्धनान्मोचयित्वा इति ज्ञेयम् । प्रथमाध्यायान्ते निगूढेत्युक्तेः । अतएव श्रीविष्णुपुराणेऽपि । "उग्रसेनं ततो बन्धान्मुमोच मधुसूदनः । अभ्यषिञ्चत्तथैवैनं निजराज्ये हतात्मजम्" मिति । हरिवंशे तु यदुग्रसेनस्य कंसशोकादिकं तत्तु लोकव्यवहारमात्रेणानुकृतमिति श्रीशुकेनानादृतं यच्च तस्य वसुदेवादेरपि कंसेनानिग्रहणं तादृशमन्यच्च कल्पभेदेन व्यवस्थितम् ॥ १२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

हे मातः ! परतन्त्रयोरावयोस्तत् युष्मदनर्चायां निमित्तभूतायां तदागोऽपराधं तत् क्षन्तुमर्हथः कथं भूतयोः भृशं नितरां क्लिष्टयोर्वां युवयोः शुश्रूषामकुर्वतोः त एव दुर्हृदो दुरात्मनः ॥ ९ ॥

इतीत्थं विश्वात्मनो मायया स्वसङ्कल्पेन न मनुष्यस्य हरेर्गिरा मोहितौ देवकीवसुदेवौ पुत्रावङ्कमारोप्य परिष्वज्य च मुदं प्रापतुः ॥ १० ॥

हे राजन् ! विमोहितावत एव पाशेन यन्त्रितौ वद्धावश्रूणां धाराभिः पुत्रौ सिञ्चन्तौ बाष्पं कण्ठयोर्ययो स्तौ किञ्चिदपि नोचतुः ॥ ११ ॥

इत्थं भगवान् देवकीसुतः पितरावाश्वास्य सान्त्वयित्वा मातामहमुग्रसेनं यदूनां नृपमधिपतिमकरोत् ॥ १२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

एतदेव विशिनष्टि । तत्क्षन्तुमिति । दुर्हृदोः दुः अयुक्तमनसोः दुष्टमनसोः स्वयोरिति यादवः ॥ ९ ॥

विश्वात्मनः सर्वान्तर्यामिणः ॥ १० ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

मोहितौ विस्मारितवात्सल्यातिरिक्ताखिलौ । तत्र हेतवः । माया मनुष्यस्य कृपाप्रधाननराकृतिपरब्रह्मणः हरेः असमोर्द्ध्वमाधुर्येण सर्वमनोहरस्य विश्वात्मनः परमात्मत्वेन विश्वस्यापि निरुपाधि परमप्रेमास्पदस्येति ॥ ९—११ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

नृपं राजानमकरोत् नतु पूर्ववदधिपम् । यतो भगवान् कर्तुमकर्तुमन्यथाकर्तुं समर्थत्वाद्भक्तवात्सल्येन ययातिशापमपि नापेक्षितवानित्यर्थः ॥ १२—१८ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

ननु सामर्थ्यस्य विद्यमानत्वात्तदैवसमागत्य कथं कंसो न हत इति चेत्तत्राह । तत्क्षन्तुमर्हथ इति । स त्वपराधोऽस्ति परमर्द्धे स्वयमेकाकिना आलौकिकेन प्रकारेण समागत्य हन्तुमुचितो भवति तथा सति अवतारवैयर्थ्यं हन्तुं च न शक्यते अलौकिकात्तस्य बधो वरान्निषिद्ध इति तथापीश्वरत्वात् पित्रोरनुरोधेन मारणीयो भवेत् तन्न कृतमित्यपराधः क्षन्तव्यः क्षमायां तात मातारिति मातृत्वं पितृत्वं—च प्रयोजकं नौ आवयोरिति उभयोरयं दोषः समानः किंच नैकान्ततो ऽस्मद्दोषः यतः परतन्त्रावावां तन्त्राधीनौ तथाहि बुद्धिरुत्पादिता तस्यातिक्रमे प्राणानेव त्यजेत् अतएव कालीयावसरे परीक्षितः तेन सहागमने परराष्ट्रवत् युद्धेन मारणं प्रसज्येत तत्तस्यैवानभिप्रेतम् एतच्च परीक्षितमिन्द्रयागभङ्गोपदेशेन अलौकिकत्वात्तैरङ्गीकृतमपि एतत्तु प्रजात्वादङ्गीकारमपि नार्हति अतः परतन्त्रयोरशक्या सेवा अपरामाह । अकुर्वतोर्वो शुश्रूषामिति । कंसादिमारणेन लोकेऽपि सामर्थ्यं प्रतीतामिति सेवायोग्यता स्वार्थं हि सर्वमिति पुत्रादपि सेवा मृग्यत एव दुर्हृदेति तस्य क्लेशदाने न कश्चित्पुरुषार्थः सिद्धः किं तु हृदयदोषात् केवल क्लेशितः तत्रापि भवदादिबन्धेन सुतरामेव क्लेशं प्रयच्छतीति भृशमित्युक्तम् ॥ ९ ॥

नन्वीश्वरः कथमेवमनीश्वरवद्वदतीतिचेत्तत्राह । इतीति । मायया मनुष्यो यथा कायिकं चेन्मायिकं वाचनिकमपि तथैव कर्तव्यमिति मनुष्यत्वमात्रं प्रदर्शितं मायिकमिति न भगवति काचित्क्षतिः मायिकेषु तु सर्वमेव मायिकं ननु कंसादिवधार्थं तथा कृतवान् अत्र प्रयोजनाभावात् जातं ज्ञानं किमिति नाशयतीत्याह । हरेरिति । अन्यथा तौ पूर्वमपि क्लिष्टौ ज्ञानं च क्लेशात्मकं साधनमेव परं तत्पुरुषार्थस्य चिन्ताद्यपगमात् तदानीमपि सुखमिव प्रति भाति अतो ज्ञानेन दुःखं प्राप्स्यतीति नन्वत्यन्तोपकारी फलाव्यभिचारिमार्गेण यतमानं किमिति व्यावर्तयति नानान्तरीयकश्च दुःखं नात्यन्त द्वेष्यमत आह । विश्वात्मन इति । स हि परमदयालुः सर्वस्यात्मा यथासुखं सर्वान् प्रेरयतीति मत्तैव स कृतार्थः कर्तव्य इति युवां मां पुत्रभावेनेति मुक्तेः सिद्धत्वात् सिद्धसाधनं ज्ञानमिति ज्ञाननिराकरणार्थं वाचा मोहनमुचितमेव ततो मोहितौ तदानीमे वपरिष्वज्य मुदमापतुः अन्यथा देहावसान एव सुखं स्यात् ॥ १० ॥

ततो लौकिकं सुखं महदेव जातमित्याह । सिञ्चन्ताविति । अश्रुधाराभिः पुत्रौ कर्म सिञ्चन्तौ जातौ अश्रूणां धाराभिः बहुकालवियोगस्मरणात स्नेहपाशेन च आवृतौ पाशपदेनैव लौकिकत्वं पुत्रत्वं चोक्तं ततः न किंचिदुक्तवन्तौ इदमप्येकं मोहकार्यं निर्भरतया पुत्रस्नेहपरत्वम् अन्यथा स्तुतौ अवश्यं गुणा वक्तव्या इति पुनरपि ज्ञानमुद्बोधितं स्यात् राजन्निति संबोधनं श्रवणार्थम् अवचने दृष्टं हेतुमाह । वाष्पकण्ठाविति । सर्वथा भगवत्स्पर्शेऽपि मोहोऽनुवृत्त इति अद्य तयोर्दृढं मोहमुत्पाद्य निश्चिन्तो जात इति वक्तुमाह । विमोहिताविति । अन्ते पुनर्विशेषेण मोहितौ यथा न कदाचिदपि आत्मज्ञानं भगवज्ज्ञानं वा तयोरुदेति ततः प्रस्यापात्तिं वक्ष्यति ज्ञानाध्याये अन्यथा भगवाननिष्टकर्ता स्यात् अतो निरोधे समाप्ते पश्चात् निरूपणम् ॥ ११ ॥

एवं पित्रोर्निरोधमुक्त्वा सर्वयादवानां निरोधं वदन् प्रथमतो राज्ञ उग्रसेनस्य निरोधमाह । एवमिति । पितरावाश्वास्य मातामहं यदूनां नृपमकरोत् मातामहत्वं स्पष्टयति । देवकीसुत इति । भक्तहितकारित्वाय यतोऽवतारः पितरि श्वशुरे च राजनि दुहितुर्जामातुश्च चिन्तारहितो महान् भोगो भवतीत्यनुसिद्धम् अतो न वसुदेवं राज्येऽभिषिक्तवान् स च क्लिष्टो भवेत् पुत्र हता इति एवं च सति उग्रसेनार्थमेव कंसो हत इति तेन गृहीतं राज्यं तस्मै दत्तमिति । तुशब्दः स्वपक्षं स्वसंबन्धिपक्षं च व्यावर्तयति नाम्ना तस्य सामर्थ्यमाह । उग्रसेनमिति । पूर्वं तु तस्य देशाधिपत्यं स्थितं यादवास्तु न मन्यन्ते आधुना तु यदूनां नृपमकरोत् यदूनामाधिदैविकरूप इति तदधीनाः सर्वे भगत्कृतं मन्यन्ते ॥ १२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ॥

नौ आवयोर्द्वितीयार्थे षष्ठी पक्षे परतन्त्रयोरिति दुर्हृदा कंसेन क्लिष्टयोरिति वामित्यस्य विशेषणे ज्ञेये ॥ ९ ॥

इति एवं माया कपटं मनुष्येषु यस्येति गद्यादिः ॥ १० ॥ ११ ॥

एवमाश्वास्येत्यादिकं श्रीनन्दस्य परोक्षमेव । मत्पुत्रं युद्धश्रान्तमेते परमानन्दसखाः स्नेहेन भोजयितुमन्तःपुरं नयन्ति तन्नयन्तु अहन्तु संप्रति पुत्रार्थं गतभीः स्वावासे एवान्हिकं कृत्यं करवै इत्युक्त्वा तेन तत्रैव गतत्वात् ॥ १२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

दुर्हृदा दुरात्मना कंसेन भृशं क्लिष्टयोः अतएव वां युवयोः शुश्रूषामकुर्वतोः तत्तस्मात् क्षन्तु मर्हथः ॥ ९ ॥

मायया दुष्टजनविशेषविमोहिन्या मनुष्यवत्प्रतीयमानस्य मायाश्रितानां नरदारकेणेत्युक्तेः ॥ १०—१२ ॥

भाषा टीका ।

अब हे पिता माता हमने परतन्त्र रहने से आप दोनों की सेवा नहीं की है और जो कंस ने आपको हमारे निमित्त से क्लेश दिया है तिसको आप क्षमा कीजिये ॥ ९ ॥

श्रीशुकदेवजी बोले इस प्रकार से माया मनुष्य विश्वात्मा श्रीहरिके वचन से मोहित होकर वसुदेव देवकी दोनों में

आह चास्मान्महाराज! प्रजाश्चाज्ञप्तुमर्हसि ।
ययातिशापाद्यदुभिर्नासितव्यं नृपासने ॥ १३ ॥
मयि भृत्य उपासीने भवतो विबुधादयः ।
बलिं हरन्त्यवनताः किमुतान्ये नराधिपाः ॥ १४ ॥
सर्वान् स्वान् ज्ञातिसम्बन्धान् दिग्भ्यः कंसभयाकुलान् ।
यदुवृष्ण्यन्धकमधुदाशार्हकुकुरादिकान् १५ ॥
सभाजितान् समाश्वास्य विदेशावासकर्शितान् ।
न्यवासयत्स्वगेहेषु वित्तैः सन्तर्प्य विश्वकृत् ॥ १६ ॥

भाषा टीका ।

दोनों पुत्रों को आलिंगन किया और परम आनंद को प्राप्त भये ॥ १० ॥

हे राजन् ! स्नेह के पाश में बंध गये आंसुओं की धारा ओं से उनको सींचन करते भये कंठ गद्गद होगया विशेष मोहित होगये फिर कुछ भी नहीं कह सके ॥ ११ ॥

देवकी पुत्र भगवान् ने इस प्रकार से पिता माता दोनों को आश्वासना देकर माता मह उग्रसेनजी को यदुओं का पति कर दिया ॥ १२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

त्वमेवाऽऽज्ञापयेति मा वदेत्याह । ययातिशापादिति । तव तु यादवत्वेऽपि मदाज्ञया न दोष इति भावः ॥ १३ ॥

मम तादृशी शक्तिर्नास्तीति चेत्तत्राऽऽह । मयीति । मत्प्रसादेन सर्वं भविष्यतीत्यर्थः ॥ १४ ॥

स्वान् ज्ञातीन् सम्बन्धांश्च दिग्भ्य आनाय्येति ॥ १५-१६ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

अस्मान् यादवान् ननु भवद्विधाज्ञापने मम का योग्यता तत्राह । प्रजा इति । त्वदधीनानित्यर्थः । तुशब्दो निर्द्धारणे हे महाराजेति यदुराजत्वेन साम्राज्यमभिप्रेतम् । अन्यत्तैः । किन्तु यद्यपि भवतामपि यदुत्वमेव तथापि भवतां भोजानां प्रायः परम्परा राज्यप्राप्तेरस्माकं वृष्णीनां तु प्रायस्तदप्राप्तेर्भवतामेव राज्यं योग्यमिति विशेषतो भावः ॥ १३ ॥

तदेव दर्शयति । मयीति, । अवनता भक्त्या नम्राः सन्तः बलिं हरन्तित्यर्थः । तथाच श्रीविष्णुपुराणे । ययातिशापाद्वंशोऽयमराज्यार्होऽपि साम्प्रतम् मयि भृत्ये स्थिते देवानाज्ञापयतु किं नृपैरिति । हरन्तीति पाठः हरिष्यन्तीत्यर्थः । अन्ये इतरेभ्यो न्यूना इत्यर्थः । नराधिपा अप्यन्ये इति वा ॥ १४ ॥

सर्वानिति युग्मकं स्वे आत्मीयाः सम्बन्धाश्च कृतवैवाहिकादिसम्बन्धाः दिग्भ्य आनाय्येति शेषः दिग्भ्य इति कर्मणि चतुर्थी वा गतावित्यनेनान्वयात् । यद्विति यदुभेदाः भोजादयः इत्यर्थः । आदिशब्देन सात्वतादयः भोजाश्च प्रायोऽक्रूरेण सह तत्रवासन् इत्येते यादवानामष्टौ भेदाः मुख्यतमा ज्ञेयाः ॥ १५ ॥

सभाजितान् सतः शीघ्रं यानप्रस्थापनादिमानेनेत्यर्थः । अतः सम्यक्सुखं शीघ्रं चानाय्य विदेशावासेन कर्षितान् कृशतां प्रपितान् अतो बहुळधनेन सन्तर्प्य नितरां गृहाद्युपस्कारपरिच्छदवृत्तिप्रदानादिना समहोत्सवमवासयत् । नन्वसङ्ख्यानां कथं तथा निवासनं द्रुतमेव सम्भवेत्तत्राह । विश्वकृदिति । अतस्तद्वैभवस्येन्द्रादिदुर्लभत्वमपि सूचितम् । तत्र श्रीरोहिणीमपि व्रजादानेष्यतीति ज्ञेयम् ॥ १६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तमुवाच च उक्तिमेवाह । अस्मानित्यादिना । नराधिपा इत्यन्तेन हे महाभाग ! त्वमस्मान् त्वत्प्रजाभूतानाज्ञप्तुं मर्हसि विधेयान्कर्तुमर्हसि अधिपतिं भवितुमर्हसीत्यर्थः ननु समर्थस्त्वमेव राजा भवितुमर्हसीत्यत आह । ययातिशापादिति नृपासेन नासितव्यं नोपवेष्टव्यं तव तु यादवत्वेऽपि ममाभिमततया न दोष इति भावः ॥ १३ ॥

नन्वहमसमर्थः कथमधिपतिर्भवितुमर्हामीत्यत आह । मयीति । त्वद्भृत्ये मयि त्वां सेवमाने सति विबुधश्रेष्ठाः अप्युपनताः सन्तो भवते बलिं हरन्ति समर्पयन्ति किमुतान्ये नराधिपाः अर्पयन्तीति मत्प्रभावात्सर्वं भविष्यतीत्यर्थः ॥ १४ ॥

ततो विश्वकृद्भगवान्सर्वान् स्वज्ञातीन् स्वसम्बन्धिनश्च यादवादीन् भयात्पलायिनान् दिग्भ्य आनाय्य तान्सान्त्वयित्वा सभाजितान्सम्मानितान्कृत्वा परदेशावासेन कृशीभूतान् वित्तैः सन्तर्प्य स्वस्वगेहेषु न्यवासयत् ॥ १५-१६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

स्वाः प्रजाः अस्मान् ज्ञप्तुमाज्ञप्तुं यद्वा प्रजाश्चाज्ञप्तुं कांश्चिद्दस्मानिति ययातिशापात् नृपासने यदुभिर्नासितव्यं न स्थातव्यमिति शङ्कां त्यजेति शेषः ॥ १३ ॥

शङ्का त्यागे कैमुत्येन निमित्तमाह । उपासीने सेवमाने सति ॥ १४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

विश्वं सर्वं सृजति ददातीति विश्वसृक् दिग्भ्य आनीय ॥ १५—१६ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

अत एव विश्वासार्थं कृत्यधिकं वाक्यमप्युक्तवानित्याह । आह चेति । चकारान्मनसापि तं राज्ये स्थापितवान् याद-वानां विधेयत्वार्थमाह । हे महाराज ! अस्मान्प्रजा आज्ञाप्तुमर्ह-सीति । वयमेव प्रजाः तुशब्देन सन्ततिरूपां प्रजां वारयति तर्हि-इममपि यादव इति प्रजास्वेवान्तर्भाव इति चेत्तत्राह । महारा-जेति । खण्डमण्डळाधिपतित्वं पूर्वमपि स्थितमिति यादृशी पूर्व-माज्ञापना तादृशी भवतीत्याशङ्क्य महत्त्वमुक्तं राज्ञा ह्यवश्य-माज्ञापनीया इति विधिवशादेवाज्ञापनं बोध्यते न त्वाज्ञाप्यत इत्यर्थः । ननु किं स्वगृहीतं राज्यं दीयते आहोस्वित् पूर्वसिद्धमेव परिपाल्यते आद्ये स्वयमादौ राज्यं गृहीत्वा पश्चाद्देयम् अतस्त्व-मादौ सिंहासने उपविश द्वितीयः पक्षस्तु कंसेन त्वया च निराकृतः महाराजत्वं चाधिकं कंसस्थं प्रायेण स तु तद्धा-तक एव भवति तत्कृत्य एव तद्धर्मस्तस्मिन् प्रविशति । अत-स्त्वयैव सिंहासने उपवेष्टव्यमित्याशङ्कायामाह । ययातिशापादिति । यदुभिर्नृपासने नासितव्यं यदुर्हिज्येष्ठ एवासीत् स चेत्पित्रा निवारितः ततः प्रभृति न मर्यादाराज्यम् अर्जुनादयस्तु पुष्ट्या सार्वभौमा जाताः अत एवहताः कंसोऽपि भगवता तु तत्र-कंसत्वं मर्यादार्थमवतीर्ण इति ईश्वरत्वं ज्ञापयितुं कदाचित्परं पुष्टिमव-लम्बते राज्यं तु सर्वं पुष्टिहेतुर्भवति यो हि यद्द्वेषं करोति स तस्य सहजा-नेव धर्मान् गृह्णाति नतु केनचित्कदाचिदन्यथा कृतम् अतोऽस्माभिः मुख्यशाखायामागतैः नासितव्यमेव भोजत्वादयश्च प्रान्तशाखाः अत एव विवाह उपपद्यते भगवान् सर्वेश्वर इति चरणाधिपत्यं कस्मैचिद्दद्यादपि नतु स्वयं गृह्णीयात् वैयर्थ्यादनीश्वरत्वापत्तेः सिद्धत्वाच्च ॥ १३ ॥

तर्हि मया कथं ग्राह्यं शापादीनां तुल्यत्वात् सामर्थ्याभा-वाच्चेति चेत्तत्राह । मयि भृत्य उपासीन इति । अवश्यं हि साधारणत्वं भजता कश्चित्प्रभुः स्वीकर्तव्यः स च कंसः स्थितः तस्य पुत्राभावात् पितापुत्रयोरैक्यात् अग्रे अनुवृत्त्यभा-वात् पितरि समागतः अतः स्थित एवानूद्यते अतो ग्रहणदा-नापेक्षिते क्रौर्याभावेनाङ्गीकरिष्यन्तीति चेत्तत्राह । मयि भृत्ये उप-समीपे आसीने सति भवतः भवते विबुधादयोऽपि बलिं हरि-ष्यन्ति ये मेर्वादिभूसंबन्धेन भोगं प्राप्नुवन्ति अन्ये नराधिपाः ये केवलभूसंबन्धिभोक्तारः ते किं वक्तव्याः । अवनता इति । नम्राः न तु प्रसादरूपेण प्रसन्नाः सन्तः नरास्तु भूमिष्ठा एव स्थूलसङ्घाताभिमानिनः देवास्तु सूक्ष्मेन्द्रियाद्यधिकारिणः भग-वान् "भर्त्ता सन् भ्रियमाण" इति श्रुतेः भरणीयोऽपि भवति साधारणयादवत्वस्य क्रीडायां स्वीकृतत्वात् राजनि भृत्यत्वमु-पपद्यते । यतः पुत्रत्वं वसुदेवे लौकिकत्वेषा सा सर्वथा भग-वान्गोप्य इति फलिष्यति । मन्निमित्तं वा यो भृत्यः सद्भिप्रेते स्थाने उपासीनो भवति तस्मै तुभ्यं विबुधादयोऽपि हरन्तीति वास्तवोऽर्थः एवं स निरुद्ध एव अन्यथा अतिविरक्तः कदाचि-ज्ज्ञानार्थं वा प्रयत्नं कुर्यात् अतो भगवान् स्वार्थमेव तं स्थापि-तवानिति भगवदर्थमेवेति निरोधः सिद्धः ॥ १४ ॥

सर्वेषां साधारणं निरोधमाह । सर्वानिति पञ्चभिः । स्वा भकाः ज्ञातयः गोत्रिणः संबन्धिनो विवाह्याः स्वशब्देन भ्रातरो वा बहव एव वसुदेवपुत्राः पित्रादयश्च । ते त्रिविधाः सात्त्वि-कादयः दिग्भ्यः समाहूय स्वगेहेषु न्यवासयदित्युत्तरेण सम्बन्धः विक्षु ता कंसभयाद्गतान् दिग्भ्य इति चतुर्थी वा भयेन दिश एवोद्देश्याः अनेन पुनरागमनाभाव उक्तः तत्र हेतुः कंसभया-द्गतानिति । कंसो ह्यतिक्रूरात्मा तथैव लोके प्रसिद्धः अत एव नन्द आह योऽवधीत्स्वस्वसुस्तोकानिति सर्वेषामेव भयं षड्विधा यादवा अपि गणिताः यदुवृष्ण्यन्धकेति आदिशब्देनान्येऽपि बहु-वस्तद्भेदाः सन्तीति ज्ञापितम् ॥ १५ ॥

तत्सम्बन्धिनो वा न केवलमाकारणमात्रेण पूर्वसिद्धदानं किन्तु अधिकमपि दत्तवानित्याह । सभाजितानिति । सभाजिताः सत्कारं प्रापिताः अयं तेषां मानसो ह्यधिकः ततः समाश्वा-सनं वाचनिकं ततः कायिकं वक्तुं तेषां भ्रममाह । विदेशावा-सेन परदेशस्थित्या कर्षितान् दुर्बलान् धनाद्यभावेन दीनान्वा केवलं गृहे स्थित्यापि सुखं न भविष्यतीत्याशङ्क्य परदेश-स्थित्या गतं धनादिकं ततोऽप्यधिकं सर्वेभ्यो दत्तवानित्याह । वित्तैः सन्तर्प्येति । ननु राज्यस्थं सर्वमेव द्रव्यं भक्षितं नाशि-तमिति कुत एतावद्दत्तवानित्याशङ्क्याह । विश्वकृदिति । स विश्वमेव कर्तुं समर्थः किं तेभ्यो ऽल्पदाने वक्तव्यमित्यर्थः ॥ १६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

भगवंस्त्वमेव नृपो भव त्वमेवास्मानाज्ञापयेति मावदेत्याह । ययातिशापादिति । तव तु यादवत्वेऽपि मदाज्ञया नास्ति दोष इति भावः ॥ १३ ॥

मम तादृशी शक्तिर्नास्तीति चेत्तत्राह । मयि भृत्ये तत्राप्यु-पासीने त्वदुपासनां कुर्वति सति ॥ १४—१८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

ननु त्वमेव राजा भवितुमर्हसीत्यत आह । ययातिशापाद्यदुभि-र्नृपासने नासितव्यम् भवतो यादवत्वेऽपि भोजत्वेन किञ्चिद्वैलक्ष-ण्यान्न दोष इति भावः ॥ १३-१४ ॥

कंसभयाद्विक्षु गतान् ताभ्यो दिग्भ्यः स्वान् ज्ञातीन् संबन्धांश्च आनाय्येति शेषः स्वगेहेषु न्यवासयदिति द्वयोरन्वयः ॥ १५ ॥ १६ ॥

भाषा टीका ।

फिर भगवान् बोले हे महाराज ! हमको तथा सब प्रजाओं को आज्ञा दीजिये यद्यपि ययाति के शाप से हम लोगों को राजासन पर नहीं बैठना चाहिये ॥ १३ ॥

तौ भी मैं भृत्य पास में रहूँगा तो देवतादिक आपको भेट देंगे और राजन का तो क्या कहना है ॥ १४ ॥

कृष्णसङ्कर्षणभुजैर्गुप्ता लब्धमनोरथाः ।
गृहेषु रेमिरे सिद्धाः कृष्णरामगतज्वराः ॥ १७ ॥
वीक्षन्तोऽहरहः प्रीता मुकुन्दवदनाम्बुजम् ।
नित्यं प्रमुदितं श्रीमत्सदयस्मितवीक्षणम् ॥ १८ ॥
तत्र प्रवयसोऽप्यासन् युवानोऽतिबलौजसः ।
पिबन्तोऽक्षैर्मुकुन्दस्य मुखाम्बुजसुधां मुहुः ॥ १९ ॥
अथ नन्दं समासाद्य भगवान् देवकीसुतः ।
सङ्कर्षणश्च राजेन्द्र ! परिष्वज्येदमूचतुः ॥ २० ॥

भाषा टीका ।

संपूर्ण जितने अपने ज्ञाति संविधि हैं वे सब कंस के भय से आकुल थे यदु वृष्णि अंधक मधु दाशार्ह कुकुरादिक सबों को दिशाओं से बुला लिये ॥ १५ ॥

विश्वकर्ता भगवान् ने विदेश के वास से कर्षित उनको सत्कार से आश्वासना देकर धनों से तृप्त करके अपने अपने घरों में उनका निवास कराया ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

सिद्धाः पूर्णाः कृष्णरामाभ्यां गतो निवृत्तो ज्वरस्तापो येषां ते ॥ १७ ॥

सदयस्मितं वीक्षणं यस्मिंस्तत् ॥ १८ ॥

प्रवयसो वृद्धा अप्यतिशयितं बलमोजश्च येषां ते ॥ १९ ॥ २० ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

अथ तेषां सर्वोत्तमां स्थितिमाह त्रिभिः । तत्र कृष्णेति युग्मकम् । प्रथमं तावत् कंसादिवधेन गतज्वराः ततश्च पुनर्वासादिना लब्धमनोरथाः तदनन्तरं श्रीकृष्णसङ्कर्षणभुजैर्गुप्ताः कंसभयादितो रक्षिता स्ततस्तैरेव लब्धमनोरथाः तदर्पितस्वाविर्भावसहितत्वाद्ग्राममथुरावासादिना पूर्णकामाः सन्तो रेमिरे ताभ्यां क्रीडां चक्रुः तेनैव सिद्धाः कृतकृत्याश्च बभूवुः । तत्र च कृष्णरामाभ्यामन्यनिरपेक्षतया तत्स्वरूपमात्राभ्यां गतज्वरा बभूवुः । ताभ्यां व्यतिरिक्ते सर्वत्रैव तापः सुखन्तु तयोरेव येषां तथा बभूवुरित्यर्थः । तत्तदर्थयोग्यतत्तन्नामनिरुक्तिस्तून्नेया ॥ १७ ॥

सुखमेव विवृणोति । वीक्षन्त इति । विशेषेण सन्निकृष्टत्वादिना मुखमीक्षमाणाः तथाप्यहरहर्वीक्षमाणाः प्रीता बभूवुः इति दर्शनसौख्यं नित्यमेवाधिकं दर्शितं तेनातृप्तिरपि दर्शिता । तत्र हेतवः । नित्यप्रमुदितं क्षणक्षणमेव प्रकर्षेण हृष्यत् । अतो नित्येति सर्वत्रैव व्यञ्जय क्षणक्षणमेव श्रीमत् प्रशस्तशोभं तथा सदयेत्यादिना ॥ १८ ॥

तत्र भागवतपार्षदत्वमेव तदावरणपूज्यदेवतानां श्रीमदुद्धवादीनामिति प्रवयस्त्वं न स्यादेव । ये केचिदन्धकादयो वा प्राचीनवृद्धास्तेऽपीत्यपि शब्दार्थः । अतः स कथं सेवया तस्य कालेन जरसङ्गत इति श्रीमदुद्धवमुद्दिश्य श्रीविदुरवाक्यन्तु प्राकट्यावसरप्रमाणचरमकक्षां गत इत्येवाभिदधाति अलौकिकगुणास्वादशालित्वात् सुधेव सुधा सौन्दर्यं मुखाम्बुजस्य सुधामिति तथाप्यलौकिकत्वं तामक्षैरक्षिभिः पिबन्त इति तेनैव तादृशं कमलमिति च पुनस्तयोः परमालौकिकत्वं व्यञ्जितं । मुहुः प्रतिक्षणं पिबन्तः प्रतिक्षणमतिशयेन युवानः शरीरेन्द्रियबलयुक्ताश्चासन् उपलक्षणञ्चैतत् सहआदीनामिति ॥ १९ ॥

अथ श्रीमद्व्रजराजस्य प्रस्थापनं प्रक्रममाणः श्रीकृष्णस्य भगवत्तायां देवकीसुततायाः प्रस्तावे च परीक्षितः समुल्लसन्मुखतामवेक्ष्य राजेन्द्रेति सम्बोधनेन तन्मुखमवलोक्य तदीप्सिततानुरूपं वदन्नपि श्रीकृष्णस्यैव वचनपरिपाटीभिर्निजाभीप्सितं स्थापनिष्यन्नाह । अथेति । अथ यादवानां तथा भावादनन्तरमिति अद्य सायमस्माभिः प्रस्थापितव्यं सायञ्च सति प्रातरित्येवं यदुकुळाश्वासनपौरसंमाननाद्यावश्यकृत्याद्यपेक्षया दिनकतिपयविलम्बविधानात् । यद्यहं सहसैव गोकुले गच्छामि तदा जरासन्धादिसम्मर्दस्तत्र स्यादत्रत्यानामरक्षा चेत्यङ्गीकृतनरलीलाघटितया शङ्कया तदसमाप्तौ तु कदाचिदेकान्ते सम्यगासाद्य पुत्रोचितनमस्कारादिसद्व्यवहारेणोपेत्य केवलवात्सल्योचितभावाविष्कारेण परिष्वज्य च । इदं श्लोकत्रयेण वक्ष्यमाणं केवलतत्पुत्रोचितमब्रवीत् । कोऽसौ भगवान् पूर्णसर्वैश्वर्येण निरपेक्षः । यश्च देवकीसुतः देवक्यां प्रकटितजन्मा स एव । तथा सङ्कर्षणश्च । तसन्निरुक्त्या यो वसुदेवात्मजत्वं प्राप्तस्तदनुषङ्गेन स चैवोचतुरिति भवद्भिर्यथार्थमेव मन्तव्यम । नच श्रीवसुदेवदेवक्योरिव यत् किञ्चिदन्यथाकर्तुं तत्र सिद्धान्तस्य प्रायो विरुद्धत्वादत्र तु नन्दस्त्वात्मज इत्यादौ सिद्धान्तस्य दर्शितत्वात् । तथा तत्र मायां ततान जनमोहिनीमितिवदत्र श्लेषेणाप्यनुक्तत्वात् श्रीनन्दप्रभृतीनां भावस्य श्रीब्रह्मशुकोद्धवादिभिः स्वाभाविकत्वेन सर्वदुर्लभत्वेन स्तुतत्वाच्च । अहो भाग्यमित्यादिभिर्नेमं विरिञ्च इत्यादिभिर्युवां श्लाघ्यतमावित्यादिभिश्चेति । तत्र राजेन्द्रेति राजेन्द्राणां भवतां महाराजकन्यायाः प्रपितामह्याः सम्बन्धेन तथैव निष्ठा युक्ता भिक्षुकाणामस्माकं तु यथारुच्यैवेति भावः ॥ २० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ततः कृष्णरामाभ्यां गतो निवृत्तो ज्वरस्तापो येषां लब्धः मनोरथो यैस्ते सिद्धाः पूर्णकामाः कृष्णसङ्कर्षणयोर्भुजैर्गुप्ताः पालिताः गृहेषु रेमिरे ॥ १७ ॥

दयास्मिताभ्यां सहिते वीक्षणे यस्मिंस्तच्छ्रीमत्सौन्दर्यवन्नित्यं प्रमुदितं विकासिवं मुकुन्दस्य वदनाम्बुजमहरहः पश्यन्तो रेमिर इत्यनुषङ्गः ॥ १८ ॥

तत्र तदा प्रवयसो वृद्धा अपि मुहुर्मुकुन्दस्य मुखाम्बुजसुधां नेत्रैः पिबन्तो युवानो नितरां बलीयसश्चासन् अति बलौजस इति पाठे अतिशयितं बलमोजश्च येषां ते आसन् ॥ १९ ॥

अथेति नन्दं समासाद्य समीपमेत्य हे राजेन्द्र ! तमालिङ्ग्येदं वक्ष्यमाणमूचतुः ॥ २० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

सिद्धा इति लुप्तोपमा मुक्ता इव कृष्णरामाभ्यां गतज्वराः नष्टसन्तापाः कृष्णे रामेण रमणेन रत्या वा ॥ १७ ॥ १८ ॥

तत्र मथुरायां प्रवयसो वृद्धा अपि युवानः आसन् तत्र किमौषधमिति तत्राह । पिबन्त इति ॥ १९ ॥ २० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

श्रीमदुद्धवादीनां तदावरणपूज्यदेवतात्वेन नित्यपार्षदत्वात् प्रवयस्त्वं न स्यादेव ये केचिदन्धकादयः प्राचीनवृद्धास्तेऽपि इत्यपिशब्दार्थः ॥ १९ ॥

इदं श्लोकत्रयं वक्ष्यमाणं केवलं पुत्रोचितमूचतुः ॥ २० ॥

श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी ।

एवं भगवत्कृतं दुःखाभावसुखभेदेन द्वयं निरूपितमधुना तेषां प्रपञ्चविस्मृतिर्भगवदासक्तिश्च वक्तव्या यतः स्वरूपं समागताः स्वस्था हि सर्वे सर्वत्राधिकृता भवन्ति एते गृहा भगवद्दत्ता इति पूर्वं एव सम्बन्धस्त्याज्यः स तु चिन्तात्मक इति पूर्वं तदभावो निरूप्यते राजसा हि विषयैरेव तदासक्ता भवन्ति अतः प्रथमं तेषां भगवद्दत्तो विषयभोगो निरूप्यते । इयमेव प्रपञ्चविस्मृतिस्तथात्वं निरूपयता भगवदासक्तिस्ततो निरूप्यते । तस्य च फलं कालातिक्रम इति राजसत्वात् फलमपि निरूप्यते परमैहिकं तत्र प्रथममाह । कृष्णसङ्कर्षणभुजैरिति । कृष्णसङ्कर्षणयोर्भुजाः एकः फलात्मा अन्यो जीवं ब्रह्मणि सम्यगाकर्षति इति साधनरूपः तयोः क्रियाशक्तयः सर्वपुरुषार्थसाधकाः ता हि नियतफलाः अतस्ते सर्वे गुप्ता लब्धमनोरथाश्च जाताः दुःखाभावपूर्वकं सुखं प्राप्तवन्तः अग्रेऽपि भयाभावाय गोपनम् अन्यथा अनुभूतभयाः कंससम्बन्धिनां जरासन्धादीनां विद्यमानत्वात् अतो निश्चिन्ता अन्तर्बहिः खेदरहिताः गृहेषु रेमिरे इदं रमणं मुक्त्युत्तरकालीनमिव तदाह । सिद्धा इति । तत्तत्कामनया पीडितास्तथा रमणं कृतवन्त इति पक्षो निवारितः चिन्ताभावायाह । कृष्णरामाभ्यां सर्वतो विगतज्वराः आध्यात्मिकादितापा मुक्तानामपि भवन्तीति तदर्थमुक्तं सिद्धानां तापाभावलक्षणं कृष्णरामौ फलसाधनभूतौ अथवा तेषां संसारे भगवद्दत्ते आपाततो रमणमुक्त्वा निषेधति निरोधार्थं कृष्णरामाभ्यां कृत्वा आगताः आगतो वा ज्वरो येषां गोपिकावत्सर्व एवैते विरहातुराः सर्वदा भवन्तीति तासां तु गुणैरपि रमणं भवति एतेषां तु तदपि नास्तीत्युभयोर्ग्रहणम् ॥ १७ ॥

एतदेव साधयितुं भगवदासक्तिमाह । वीक्षन्त इति । अहरहः प्रतिदिनं मुकुन्दवदनाम्बुजं वीक्षन्तः प्रमुदिता जाताः प्रतिक्षणमपूर्वेव प्रीतिः अतः परमार्थज्ञानाभावेऽपि वस्तुसामर्थ्यादेव भगवन्मुखारविन्ददर्शनं नित्यप्रमुदितं प्रीतिमुत्पादयति नित्यनूतनं वस्तुतस्तु रसस्यैवायं स्वभावः आदौ प्रीतिस्तु आकाङ्क्षावशादिति वस्तुरससंभूतमेव विषयबलाज्जायमाना प्रीतिः सर्वदैव जायते अतएव लौकिकोपाख्याने सूपकारविद्यायां तथा रसः प्रसिद्धः "रसो वै स रसं ह्येवायं लब्ध्वानन्दी भवती" ति श्रुतेश्च हीति युक्तता लोकवेदसिद्धा अन्यथा आनन्दमेव प्राप्यानन्दी भवतीति वक्तव्यं स्यात् अत एव कामशास्त्रोपयोगश्च सहजश्च काम इन्द्रियवदाकाङ्क्षारूपः न पुरुषार्थं साधयति ननु विषयत्वेनासक्तौ बन्धः स्यात् इत्याशङ्क्याह । मुकुन्द इति । तस्य रसरूपस्य मुखारविन्दस्य कदाचित्तिरोभावे प्रीता न न भविष्यन्तीत्याशङ्क्य नित्यप्रमुदितत्वमाह । तर्हि रसपुरःसरमेवानन्दं जनयतीति । रूपाद्यपेक्षार्थमन्यासक्तिः स्यात् यद्यपि विषया दत्तास्तथापि कामः समुद्र इति "समुद्र इव हि कामः नैव हि कामस्यान्तोऽस्ति न समुद्रस्यैवे"ति श्रुतेः अत आह श्रीमदिति । तल्लक्ष्मीयुक्तं सर्वविषयरूपं तथापि सर्वलौकिकसिद्धावपि धर्मार्थं भक्त्यर्थं च अन्यासक्तिरवश्यमपेक्षितेत्याशङ्क्याह । सदयस्मितवीक्षणमिति । दयाधर्मस्थानीया तदात्मको धर्म इति स्मितं भक्तिस्थानीयं वीक्षितं ज्ञानरूपं त्रितयमपि मुखारविन्दे वर्तत इति काण्डत्रयार्थमपि अन्यापेक्षा न युक्तेत्यर्थः ॥ १८ ॥

एवं निरुद्धानां कालातिक्रममाह । तत्र प्रवयस इति । अग्रे कालातिक्रमो न भविष्यतीति न वक्तव्यमेव योऽपि विषयः कालेन भक्षितः सोऽपि तस्य मुखात् निष्कास्यते तदाह । ये प्रवयसः स्थिताः वृद्धा वार्द्धक्ये बहिः शरीरकान्तिः अन्तर्बलं च गच्छति तदुभयमाह । युवानोऽपि जाताः अतिबलीयसश्चेति अलौकिकसामर्थ्यात् तथात्वमाशङ्क्याह । पिबन्तोऽक्षैरिति । मुखाम्बुजसुधां पिबन्त एव तथा जाताः ननु सुधाया अपि न तथा साधकत्वं यतस्त्रिदशाः कालेन च ग्रासं प्राप्नुवन्ति अत आह । मोक्षदातुर्मुकुन्दस्येति यो ह्यात्मस्वरूपं प्रयच्छति स कालातिक्रमं कारयत्येव तत्रापि तस्य मुखं प्रधानभूतं तत्राप्यम्बुजं परमशीतं सर्वतापनाशकं स्वभावत एव तादृशधर्मयुक्तं तत्रत्या च सुधा अलौकिकी भवत्येवेति कालेन भक्षितपदार्थानामपि पुनरुद्गमनं युक्तमेव तत्रापि मुहुरिति अनेन तेषाममृतमयत्वमेव युक्तं कियदेतदतिबलिष्ठत्वादि ॥ १९ ॥

एवं सर्वेषां निरोधमुक्त्वा नन्दादीनां प्रस्थापनेन तामसानामप्युत्कर्षार्थं राजसप्रकरणे विशेषमाह । अथ नन्दामिति षड्भिः । भगवतैव षड्गुणैस्ते व्यावर्तिताः अतिबलेन अन्यथा अत्याकृष्ट एव भवेयुरपि "सम्भाषणार्थमुद्योगः पूर्वस्थापनमेव च । निराकृतिश्च बाधानां प्रेषणाज्ञापनं ततः । दानं च प्रीतिसंसिद्ध्यै गमनं

पितर्युवाभ्यां स्निग्धाभ्यां पोषितौ लालितौ भृशम् ।
पित्रोरभ्यधिका प्रीतिरात्मजेष्वात्मनोऽपि हि ॥ २१ ॥
स पिता सा च जननी यौ पुष्णीतां स्वपुत्रवत् ।
शिशून् बन्धुभिरुत्सृष्टानकल्पैः पोषरक्षणे ॥ २२ ॥
यात यूयं व्रजं तात ! वयं च स्नेहदुःखितान् ।
ज्ञातीन् वो द्रष्टुमेष्यामो विधाय सुहृदां सुखम् ॥ २३ ॥
एवं सान्त्वय्य भगवान्नन्दं सव्रजमच्युतः ।
वासोऽलङ्कारकुप्याद्यैरर्हयामास सादरम् ॥ २४ ॥

श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी ।

चापि रूप्यते" अथेति भिन्नप्रक्रमे "प्रामाणिकत्वं दासत्वं स्वामित्वं च निरूपितम् । पुनः संस्थानतासिद्ध्यै नन्दसामीप्यमागतौ" । सम्यगासाद्य पूर्ववदेव भगवदिच्छाया बलिष्ठत्वात् पुत्रप्रतीतिर्दृढोत्पादितेति अन्यथा शङ्काभावात् सम्यगेवासाद्य भगवान् सर्वसमर्थः प्रत्यक्षदृष्टमप्यन्यथा कर्तुं समर्थः प्रेषणार्थं संकर्षणश्च उभौ मिलित्वेदमूचतुः उभयोरप्यन्यपुत्रत्वेन तुल्यत्वात् समानभावं च ख्यापितवन्तौ नन्वेवं किमिति कृतवान् कथं गोकुलपर्यन्तं न गत इत्याह । संकर्षण इति । चकारात्सोऽपि देवकीसुतः तर्हि कथं रोहिणीसुत इत्याशङ्क्य तदुदराद्यापादकं धर्मं सूचयितुं संकर्षण इत्याह । राजेन्द्रेति महामन्त्रयुक्तानां राज्ञामयं धर्म इति बोधयति परिष्वज्य विरहाभावाय स्वधर्मस्थापनार्थं बाला हि दूरादागत्य पितरमालिङ्गन्ति इदं वक्ष्यमाणम् ॥ २० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

प्रवयसो वृद्धा अपि ॥ १९ ॥

बहुदिवसीयकथां कथयित्वा कंसवधदिवसस्य परेद्यवि कस्याञ्चिद्रीतिमुख्याया दुरधिगमार्थाया: कथायाः कथनारम्भबोधनायाथशब्दः नन्दं सम्यगासाद्येति तत्पुत्रत्वाभिमानवत्त्वेनैवेत्यर्थः । देवकीसुत इति । देवकीसुतत्वाभिमानमपि गृह्णन्तित्यर्थः । भगवानित्युभयोः समाधात्रीं स्वीयामैश्वर्यशक्तिमेवाश्रित्येति भावः । संकर्षणश्चेति यदुनामपृथग्भावात् संकर्षणमुशन्त्यपीति स्वनाम्नो व्युत्पत्तिं दर्शयन्निति भावः । परिष्वज्येति प्रणामेऽवसराप्राप्तेरिति भावः । तदवसरप्राप्त्यभावश्च तयोर्दर्शनमात्रेणैवार्गलोपमाभ्यां भुजाभ्यां श्रीनन्देनानन्दसमुद्रनिमग्नेन युगपदेवोद्धृत्यातिविस्तीर्णे स्ववक्षसि तयोर्द्वयोरेव धारणात् अतस्तयोरत्र परिष्वङ्गकर्मत्वेनैव परिष्वङ्गकर्तृत्वमभूदिति बुद्ध्यते ऊचतुरिति तदनन्तरमुपविष्टे व्रजराजे तदासनमध्यास्य तद्भुजाश्लिष्टावेव तौ संप्रश्नोत्तरवृत्तबहुवृत्तान्तकथनानन्तरमिदं सविनयं सान्तः संकोचं यादवजनतापराधक्षपनपूर्वकं साश्वासं ससान्त्वनमूचतुः ॥ २० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

कृष्णरामाभ्यां गतास्त्रिविधतापलक्षणा ज्वरा येषां ते ॥ १७ ॥
सदयास्मितं वीक्षणं यस्मिन् तत् ॥ १८ ॥
अतिशायितं बलमोजश्च येषां ते ॥ १९-२० ॥

भाषा टीका ।

फिर तो कृष्ण तथा संकर्षण इन दोनों के भुजों से पालित होकर सब मनोरथों को पाकर सर्वार्थ सिद्ध होकर कृष्ण राम के हेतु से सब दुःखों से छूटकर सब मनुष्य मथुरा में रहने लगे ॥ १७ ॥

नित्य प्रति प्रसन्न रूप नित्य प्रमुदित शोभा युक्त दया हास से युक्त कटाक्ष सहित श्रीमुकुन्द के मुख कमल के दर्शन करते तृप्त रहे ॥ १८ ॥

उस मथुरा में श्रीमुकुन्द के मुख कमल रूपी अमृत को वारंवार नेत्रों के द्वारा पान करने से जो वृद्ध थे सो भी बड़े बल तेज वाले यौवन अवस्था वाले होगये ॥ १९ ॥

हे राजेंद्र ! कुछ दिनके अनंतर देवकी पुत्र भगवान् तथा संकर्षण भगवान् दोनों श्रीनंदरायजी के पास जाकर अलिंगन करके यह वचन बोले ॥ २० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

युवामात्मानोऽप्याधिक्येन पोषितौ नचाश्चर्यमेतदित्याह । पित्रोरिति । आत्मनो देहादप्यात्मजेष्वभ्यधिका हि प्रीतिरिति ॥ २१ ॥

देवकीवसुदेवयोः पुत्रौ युवां नास्मत्पुत्रावित्यपि नवाच्यमित्याह । स पितेति ॥ २२—२३ ॥

सव्रजं व्रजवासिभिः सहितम् कुप्यानि स्वर्णरजतादिव्यतिरिक्तकांस्यपात्रादीनि तत्प्रभृतिभिः ॥ २४-२५ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

तथैव हेतुर्हे पितः ! हि यस्मात् आत्मानमप्यतिक्रम्य पित्रोरात्मजेष्वौरसेषु अभ्यधिका प्रीतिः स्यात्तस्मादेव भृशमस्यर्थ

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

स्निग्धाभ्यां युवाभ्यां भोजनादिना पोषितौ स्नपनादिना लालितौ च तदिदं नाश्चर्यमिति भावः ॥ २१ ॥

अत्र सङ्कर्षणोऽपि नान्यथा मन्तव्य इति स्वयं श्रीकृष्ण आह । स पितेति । चकारोऽप्यार्थे । सोऽपि तस्मात् सङ्कर्षणोऽपि नान्यथा मन्तव्य इति मम तु जन्मादित्रयहेतू एव भवन्ताविति भावः । यद्वा । स एव पिता सैव जननी नतु त्यक्तवन्तः पूर्वपित्रादयः । तस्माद्यद्यन्यतो जन्म स्यात्तथापि किमुतात्मजादित्रयमित्यादि ॥ २२ ॥

तथैव सान्त्वय्येति । यातेति । वयमिति द्वित्वे "अस्मदोद्वयोश्च" इति वचनात् । चकारेणोद्धवं संगृह्णाति पूर्वमेतावागमिष्यतः पश्चात् स्वयमित्यर्थः । सुहृदां भवत्सख्यादिसम्बन्धेनैव पित्रादितया मतानां श्रीवसुदेवादीनां सुखं विधायेति तदिच्छया तत्तत्कार्यसाधनाय यद्यस्मिन् यादवपाण्डवादिमेलनेच्छया च तदौरसत्वख्यापनपूर्वकं तद्विद्वेषिदन्तवक्त्रपर्यन्तदुष्टवधावधिकमभीष्टं सम्पाद्येत्यर्थः । एतदर्थं भवतां यदुवंशोत्पन्नत्वमवलम्ब्य मातृपक्षेऽपि "ब्राह्मणादुग्रकन्यायामावृतो नाम जायते । आभीरोऽम्बष्ठकन्यायामायोगव्यान्तु धिग्वण" इति मनुस्मृतेस्तदुत्तमत्वमाळम्ब्य क्षत्रियकन्या अपि परिणेष्यामीत्यनुक्त्वा प्रार्थनव्यञ्जना च । आपातगमनेनैषां प्रीतिभङ्गः स्याद्भवतान्तु न कोटिकल्पान्तरेऽपीति भावः । तदेव स्थापयति ज्ञातीन् साक्षात् पित्रादीन् स्नेहदुःखितान् द्रष्टुमेष्यामः पश्यन्त एव स्थातुमागमिष्याम इत्यर्थः । तदर्थतायां विहितेन तु तुमुन्प्रत्ययेन तस्यैव पुरुषार्थत्वव्यञ्जनाव । यद्वा । तथापि भूमन्महिमागुणस्येत्यत्र वोधगोचरीभवितुमितिवदत्रापि दृष्टिगोचरीभवितुमिति व्याख्येयं नच यत् किञ्चिदेव दर्शनमात्रार्थं किन्त्वविच्छिन्नमेवेत्यभिप्रेत्याह । स्नेहदुःखितानिति । स्नेहस्य निरवधिकत्वे तद्धेतुकादर्शनदुःखस्य तादृशत्वमिति विचार्य यस्मात् करुणाकुलतया गमिष्यामस्तस्मान्नित्यनिजाविर्भावदानेन युष्माकं तद्दुःखमवश्यमेव दूरीकरिष्याम इत्यर्थः । अत्र सुखं विधायेति क्त्वाप्रत्ययेन तस्य तु पुनरपेक्षणीयत्वं दर्शितं तदेवं ज्ञातिषु भवत्सु नित्यावस्थानमेव युक्तं तेषु सुहृत्सु पुनरैच्छिकमेव तदिति भावः । किञ्च सुहृदां सुखं विधायेति मध्ये मध्ये समागमने कदर्थनैव स्यात् । आपातसमाधानार्थं साक्षात्कारतुल्यं ममाप्रकटळीलास्फोरणं तदुद्धव एव करिष्यतीति व्यञ्जितं तदेतदुद्धवसन्देशे व्याख्यास्यते । व्रजमागत्य श्रीकृष्णस्य नित्यावस्थितिश्च दन्तवक्त्रवधान्ते स्थापयिष्यते । श्रीनन्दस्तु तदेतत् सर्वं तदभिप्रेतं न तदानीं सम्यगवगतवान् क्रमेणैव तु बोद्धेति गम्यम् ॥ २३ ॥

सान्त्वय्येत्यत्र हेतुः । भगवान् सर्वं कर्तुं समर्थ इत्यर्थः । मत्पुत्रोऽयं सत्यवाक्यात् कदापि च्युतो न स्यादिति श्रीनन्दसम्भावनोत्पादनायेति भावः । सव्रजं सर्वव्रजजनैः सहितं ये तत्र सङ्गे गतास्तान् साक्षादेव तत्तादृशप्रणयवाक्येन तत्तत्प्रदानेन च ये च व्रजस्थाः श्रीयशोदादयस्तानपि तत्तत्प्रेषणेन चेत्यर्थः । कुप्यानि गोदोहनाद्यर्थं कांस्यादिपात्राणि आदिशब्दादुत्तम यानादीनि । व्रजस्य तत्सदाधिकसम्पत्सद्भावेऽपि तत्तद्दानं प्रीतिमयत्वाद्व्यञ्जिततमं गन्धपुष्पादिवत्तदेवाह सादरं यथा स्यात् । यद्वा । सादरं श्रीनन्दं पुत्रेण यदुच्यते क्रियते वा तत्र तत्रैव स्नेहभरेण प्रीयमाणमित्यर्थः । अर्हयामासेति श्रीवसुदेवोग्रसेनादीनानाय्य तद्द्वारा पूजयामास स्वयन्तु सान्निध्येनैव हेतुरासीदित्यर्थः । कारीषोऽग्निरध्यापयतीति वत् तदा युक्तत्वात् ॥ २४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

उक्तिमेवाह त्रिभिः । हे पितः ! स्निग्धाभ्यामनुरक्ताभ्यां युवाभ्यां भृशमात्मनोऽप्याधिक्येन पोषितौ पालितौ च न चाश्चर्यमेतदित्याहतुः पित्रोरिति । मातापित्रोरात्मनः स्वशरीरादप्यात्मजेष्वभ्यधिका प्रीतिरिति ॥ २१ ॥

ननु युवयोःपितरौ देवकीवसुदेवौ नावामित्यत्राहतुः । स पितेति । पोषणे रक्षणे चाकल्पैरसमर्थैर्बन्धुभिः उत्सृष्टांस्त्यक्तान् शिशून् यौ स्वपुत्रवत्पोषितवन्तौ तावेव पितरावित्यर्थः ॥ २२ ॥

अस्तु प्रकृते किं तत्राहतुः । यातेति । हे तात ! यूयं व्रजं प्रति गच्छत वयं त्वत्रत्यानां सुहृदां प्रियं विधाय अस्मत्स्नेहेन दुःखितान् युष्मान् द्रष्टुमेष्यामः आगमिष्यामः ॥ २३ ॥

इत्थं सभार्यं सव्रजं व्रजवासिभिः सहितं नन्दं सान्त्वयित्वा वस्त्रादिभिः सादरं यथा तथाऽर्हयामास तत्र कुप्यानि सुवर्णरजतादिव्यतिरिक्तानि कांस्यादिपात्राणि तत्प्रभृतिभिः ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावळी ।

आत्मनः स्वस्मादपि ॥ २१ ॥

पुष्णीताम् अपुष्णीतां पोषणमकुर्वत पोषरक्षणे पोषणरक्षणयोः ॥ २२ ॥

वयं नोऽस्माकं ज्ञातीन् स्नेहनिमित्तेन दुः खितान् युष्मान् द्रष्टुमेष्यामोऽधुना व्रजं यात इदानीमागन्तुककार्यमस्ति तत्संसाध्येत्याह । विधायेति ॥ २३ ॥

सान्त्वय्य सान्त्वयित्वा सव्रजं सगोपं वासोभिरलङ्कारैश्च कुप्याग्र्यैः रजतहेमादिव्यतिरिक्तद्रव्यश्रेष्ठैश्च अकुप्यं रूप्यहेमादि कुप्यमन्यद्धनादिकमिति हलायुधः ॥ २४—२५ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

ननु वसुदेवदेवक्यौ प्रतीव किञ्चित् किञ्चिदन्यथात्वेन जनमोहनमित्यर्थः । कोऽसौ भगवान् पूर्णसर्वैश्वर्यत्वेन निरपेक्षः । यश्च देवकीसुतः देवक्यां प्रकटितजन्मा स एव तथा सङ्कर्षणश्च तत्तन्निरुक्त्या यो वसुदेवात्मजतां प्राप्तः तदनुसङ्गेन स चैव१ तत्रेव हेतुः हि यस्मादात्मानमप्यातिक्रम्य पित्रोरित्यादि कोऽन्वः तदिदं नाश्चर्यमिति भावः ॥ २१ ॥

तदेतदप्यस्तु यतः स पितेत्यादि चकारोऽप्यर्थे । सोऽपि साऽपि । तस्मात् सङ्कर्षणोऽपि नान्यथा मन्तव्यः । मम तु जन्मादित्रयहेतू एव भवन्ताविति भावः ॥ २२ ॥

तदेव स्पष्टयति । यातेति । ज्ञातीन् पित्रादिरूपान् । इति भवन्मध्य एव मम वासो भवितेति भावः द्रष्टुमिति । भवद्दर्शनमेव मम तत्र पुरुषार्थः । सुहृदां भवत-

१ वङ्गपाठानुरोधेनात्रपतिता व्याख्येयं पूर्वश्लोकस्य.

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

सख्यादिसम्बन्धेनैव पित्रादि तया मतानां श्रीवसुदेवादीनां सुखं विधायेति तदिच्छया तत्तत्कार्यसाधनाय स्वस्मिन् यादवपाण्डवादिमिलनेच्छया तदौरसत्वख्यापनापूर्वं वां तद्विद्वेषिदन्तवक्त्रपर्यन्तदुष्टवधावधिकमभीष्टं सम्पाद्येत्यर्थः ॥ २३—४१ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

तदेवाह । पितरिति त्रिभिः । आदौ पूर्वकृतस्य परिपालनस्याभिनन्दनमाह । पितरिति संबोधनं पूर्ववत् तस्योपकारमनुवदति स्निग्धाभ्यां युवाभ्यां यशोदानन्दाभ्यां भृशं पोषितौ लालितौ च अवां तु यथा जनकः तथैव पोषकः तद्वक्ष्यति धर्मार्थमपि पालनं भवतीति तद्व्यावृत्त्यर्थं स्निग्धाभ्यामिति पोषणमात्रं स्नेहेनापि भ्रात्रादिष्वपि संभवति एतदर्थमाह । लालिताविति अल्पलालनं बालत्वाद्भ्रातृपुत्रादावपि भवति तत आह । भृशमिति स्वशरीरापेक्षया ऽप्यधिकं लालितौ एतच्च लालनं पुत्र एव भवति किंच न केवलं लालनं बाह्यमान्तरः स्नेहोऽप्यसाधारणः आवयोः कृत इति पित्रोरप्यधिका प्रीतिरिति आत्मनोऽप्यधिका आत्मजेषु पित्रोरेव भवति क्षेत्रजादिव्यावृत्त्यर्थमात्मजेष्वित्युक्तं प्रजा ह्यात्मनोऽन्तरन्तरेति श्रुतेः लोकेऽपि स्वानिष्टं परं वाञ्छति न पुत्रस्य तदाह । हीति ॥ २१ ॥

ननु सहजे पुत्रे एतदुचितं नतु कृत्रिम इत्याशङ्क्याह । स पिता सा च जननीति । पितृत्वं पुत्रत्वं वा जन्माविकारत्वात् । आत्मत्वेन परिगृहीतान्तःकोशो भवति तदंशं साधारणं तत्र यद्यन्य एवाभिमानं कुर्यात् तादृशं तदा तस्यैव भवति अन्नस्य साधारणत्वात् अन्यथा अन्योढ्वे भर्तरि भार्यायां च स्वाधिकस्नेहो न स्यात् स्नेहश्च कालीयप्रसङ्गे परीक्षितः नहि दृष्टे अनुपपन्नं नाम अतः सिद्धमेव पुत्रत्वं च स्नेहानुभवाभ्यां ननु लोके तथा न प्रसिद्धिः एकेन परिपालने उपचारोऽपि भवेत् न तु उभाभ्यां बहुभिरप्युपचारः तत्रापि पोषणे अबाह्याभ्यान्तरभावः पुत्र एव भवति चेत्तदा लोक इव स्वहृदयेऽपि सम्भवति तत्रापि विशेषः बन्धुभिः सर्वैरेव उत्सृष्टान् पुष्णीतः परित्यागे न दानरूपं परित्याजनं किन्तु पोषणं रक्षणं च एकवद्भावेन निरूपितम् अन्यतरसामर्थ्यनिराकारणाय तत्रासमर्थैः सर्वथा ॥ २२ ॥

एवं पूर्वसिद्धं पितृत्वं स्थापयित्वा सर्वस्वं च निवेद्य आज्ञापयति । यात यूयमिति । यूयं सर्वे गोपालाः व्रजं यात वयं च कार्यार्थं यास्याम इति चकारार्थः भवन्तः कुत्र गमिष्यन्तीत्याशङ्क्य देवगुह्यत्वात् परोक्षेणाह । ज्ञातीन् वो द्रष्टुमेष्याम इति गोपिष्वात्मभावः स्थापित इति सर्वात्मकता तेषु सिद्धा अतस्त एव ज्ञातयो भवन्ति ये यादवगोत्रजाः अथवा वयमिति अस्मत्सम्बन्धिनः पुत्रादयोऽपि सर्वे भवतामेवेति वयं सर्वे भवतामेव ज्ञातयः भवन्तश्चास्माकमयमधिको वरो दत्तः अत एवाद्यापि गोकुलसंबन्ध्येव भगवान् कथ्यते विवाहादिष्वपि कलाद्व विवाहः । भगवदिच्छयैव सर्वलोकानामपि तथा प्रतीतिः अत एव रुक्मिवचनं गोपाल इति तथैव श्रुतावुपासनाकाण्डेऽपि ज्ञातयः तस्माद्भवन्त एव ज्ञातयः तथाप्येतेऽपि सुहृदः अतस्तेषां सुखं विधाय पश्चादागमिष्यामः ज्ञातीनेव द्रष्टुं नतु गोकुलमित्यपि अत एव भगवान् वक्ष्यति गतांश्चिरायितान् शत्रुपक्षक्षपणचेतस इति आगमने हेतुः स्नेहदुःखितानिति नत्वन्यद्भयं भविष्यतीति भावः ॥ २३ ॥

एवं त्रयमुक्तम् अलौकिकं लौकिकमपि बहुदत्तवानित्याह । एवं सान्त्वय्येति । भगवानित्यङ्गीकारे सामर्थ्यं ननु कथमेवं पूर्वमर्थं स्थापितवान् लीलार्थमेव हि भगवतः सेवकाश्च ते कस्तेषामनुरोध इति चेत्तत्राह । अच्युत इति । स हि सर्वदा च्युतिरहितः पूर्वधर्मपरित्यागे धर्मतः च्युतिः स्यात् न केवलं गोपालानेवार्हयामास किन्तु सव्रजमिति स्त्रीणां पुरुषाणां च सर्वेषामेवार्थे वस्त्राण्याभरणानि च दत्तवान् कुप्याग्राणि व्यवहारपात्राणि सुवर्णरजतातिरिक्तधातुमयानि सादरमिति प्रत्येकं नामग्रहणेन गृहस्थवत् नतु महाराजवत् ॥ २४ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

प्रथमं ज्येष्ठत्वाद्बलदेव आह द्वाभ्याम् । हे पितर्युवाभ्यां मातापितृभ्यां यशोदानन्दसंज्ञाभ्यामित्यर्थः । एतच्च युक्तमेवेत्याह । पित्रोरिति । आत्मनो देहादपि आत्मजेष्वभ्यधिका प्रीतिः स्यादेव पोषितौ लालितावित्यत्र द्विवचनेन मित्रपुत्रे कृष्णे च युवयोस्तुल्यवात्सल्यस्य दृष्टत्वात् युवामेव यथा कृष्णस्य तथा ममापीत्यावयोर्द्वयोरपि पितराविति द्योतयित्वा युवां लालकौ विना कोटिप्राणप्रियतमं कृष्णं भ्रातरं च विना अत्र पुर्यामपरिचितायां देवकीवसुदेवयोः पित्रोर्गृहे मया स्थातुं न शक्यते इत्यनुद्योतितम् ॥ २१ ॥

ननु भो बलभद्र ! सत्यमेव त्वं वसुदेवस्य मन्मित्रस्यैवौरसः पुत्रोऽसि स च विपन्मुक्तश्चिरात् प्राप्तं स्वपुत्रं त्वां कथं त्यक्तुं प्रभविष्यत्यतः त्वं संप्रति स्वपितुस्तस्यैव गृहे तिष्ठ आवां तु त्वद्विच्छेदविदीर्णस्वहृदयं विवेकशिलया पिधाय कथं चञ्चलीकिष्यावो न तु वसुदेवस्य सख्युः दुःखं द्रष्टुं प्रभविष्यावो यत आवां तव पोषकावेव पितराविति चेत्तत्राह । स इति । तेषां शिशूनां स एव पिता सैव जननी नत्वाधानकर्तापि पिता स्वकुक्षौ धृतवत्यपि जननी ताभ्यामुत्सृष्टानां शिशूनां यदि प्राणा निरयास्यदास्तदा केषां तौ पितरावभविष्यतामतः शिशुभिरपि विवेकिभिः पोषकावेव पितरौ ताभ्यामपि सकाशाद्बहुमाननीयावतो मया नात्र स्थातव्यं यदि स्वयं ब्रह्माप्यागत्य वदेत्तेनापि ममायं हठो न शिथिलयितुं शक्यः । हन्त हन्त पितस्तव सङ्गे कृष्णो व्रजं गत्वा सुखेन खेलिष्यति अहं तु कृष्णविच्छेददावदग्धो मथुरायां स्थास्यामीति सर्वथैव न भवेत् तस्माद्भो पितरहं शपथमेवेदं ब्रुवे यदि कृष्णो मां हित्वा त्वत्सङ्गेन व्रजं यास्यति तदा मे प्राणाः सद्य एव यास्यन्तीति स्वाभिप्रायो द्योतितः ॥ २१ ॥

ततश्च हन्त हन्त किमहं करोमि यदि बलदेवं नीत्वैव व्रजं यामि तदा व्रजे महासुखं भविष्यति किं त्वत्र यादवानां विशेषतो वसुदेवस्य महादुःखं भविष्यति ममापि महाकलङ्को भावी हाहा कंसेन मे सर्वे पुत्रा हता यस्त्वेकस्तद्धस्तादपि रक्षितोऽवशिष्टोऽभूदयं बलभद्रस्तमपि नीत्वा नन्दो व्रजं जगाम तस्मै नायं सखा किं तु दैवहतस्य मम द्वितीयः कंस

इत्युक्तस्तौ परिष्वज्य नन्दः प्रणयविह्वलः ।
पूरयन्नश्रुभिर्नेत्रे सहगोपैर्व्रजं ययौ ॥ २५ ॥
अथ शूरसुतो राजन् ! पुत्रयोः समकारयत् ।
पुरोधसा ब्राह्मणैश्च यथावद्द्विजसंस्कृतिम् ॥ २६ ॥
तेभ्योऽदाद्दक्षिणा गावो रुक्ममालाः स्वलङ्कृताः ।
स्वलङ्कृतेभ्यः सम्पूज्य सवत्साः क्षौममालिनीः ॥ २७ ॥
याः कृष्णरामजन्मर्क्षे मनोदत्ता महामतिः ।
ताश्चाददादनुस्मृत्य कंसेनाधर्मतो हृताः ॥ २८ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

एवेति भावयन्नतिसंतप्तो वसुदेवः परस्सहस्रानभिशापान्मे दास्यति ततश्च मे कृष्णस्यापि कुतः कुशलमिति भावनासंकष्टस्तं नन्दं कतिशः क्षणांस्तूष्णीमेव स्थितमालक्ष्य तं युक्त्या प्रबोधयन् कृष्णः ससान्त्वनमाह । यातेति । हे तात! यूयं संप्रति व्रजं यात वयमित्यहं बलदेवो मधुमङ्गलादयः प्रियसखाश्च वो ज्ञातीन् द्रष्टुमेष्यामः संप्रति कतिशो दिनान्यत्रैव पुर्य्यां वसेमेति भावः । कदा आयास्यथेत्यत आह । वः सुहृदां वसुदेवादीनां सुखं विधायेति यथा त्वां कलङ्को न स्पृशेत् यथैषां च स्वपुत्रं बलदेवं प्राप्याभिमत्य संलाल्यास्मद्गृहे स्थास्यतीति विश्वस्य सुखं भवेत्तथा कृत्वेत्यर्थः ॥ २३ ॥

एवं सान्त्वय्येति । यद्यत्र मम कतिचिद्दिनाविलम्बो भवेत्तदापि न व्याकुलीभवितव्यं मम तत्रैव मनोऽस्त्यत्रत्वेतदनुरोधेनैव स्थितिरिति सव्रजं व्रजवासिभिः सहितं कुप्यानि स्वर्णरजतातिरिक्तकांस्यादिपात्राणि तत्प्रभृतिभिः ॥ २४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

आत्मनः स्वस्मादपि ॥ २१—२३ ॥

सव्रजं व्रजवासिभिः सहितं वासोऽलङ्कारादिभिः सादरं यथा तथा अर्हयामास तत्र कुप्यानि स्वर्णरजतातिरिक्तकांस्यादिपात्राणि ॥ २४-२६ ॥

भाषा टीका ।

हे पितः ! आप दोनों ने बड़े स्नेह से हमारा लालन पालन किया है पिता माता को तो अपने शरीर से भी पुत्रों पर बड़ी प्रीति होती है ॥ २१ ॥

वही पिता है वही माता है जो कि अपने पुत्र की नाईं उनके पोषण करते हैं जिन पुत्रों को कि पोषने रखने में समर्थ नहीं तिन से बंधुओं ने छोड दिया है ॥ २२ ॥

हे तात ! आप लोग व्रजको जाओ हम सब सुहृदों के सुख विधान करके स्नेह से दुःखित ज्ञाति आप लोगों के दर्शन को आवैंगे ॥ २३ ॥

इस प्रकार से अच्युत भगवान् ने नंदजी को सांत्वन करके वस्त्र अलंकार ताम्रादि पात्र द्रव्यों को देकर आदर पूर्वक सब व्रज वासियों सहित पूजन किया ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

पुरोधसा गर्गाचार्येण द्विजसंस्कृतिमुपनयनम् ॥ २६ ॥

गावो गाः रुक्मस्य माला विद्यन्ते यासां ताः क्षौमवस्त्रमालावतीः ॥ २७ ॥

याः पूर्वं मनोदत्ता आसंस्ता एवाददात् ननु ताः कंसेनापहृताः सत्यम्, राजगोष्ठादाच्छिद्याददात इत्याह । कंसेनाधर्मत इति ॥ २८ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

इत्युक्त इत्यस्य यात यूयमित्याद्यन्त पूर्वपद्यत्रयेण व्यवहितेनाप्यन्वयः । प्रणयविह्वल इति स्तम्भमोहादिकञ्च सूचयति गोपैः सहेति तेषामपि प्रत्येकमालिङ्गनं तथा प्रेमविह्वलत्वादिकं चोक्तम् । "अहो भगवतो नौमि बलात् सर्वप्रवर्तनम् । प्राहिणोत् यः स्व शून्येऽपि श्रीनन्दादीनपि व्रजे । त्वां व्रजेश्वरि ! शोचामि त्वाञ्च वृन्दावनेश्वरि ! कृष्णं विना गतेष्वेषु हा हा जीवित्यथः कथम्" ॥ २५ ॥

अथ तदनन्तरमिति युक्तत्वात् शूरसुत इति स्वपित्रा सहित इति सूचयति । अतः श्रीरोहिणीमपि व्रजादानयामास इति ज्ञेयम् ॥ २६ ॥

रुक्मेति तैर्व्याख्यातं तत्र विद्यन्त इति पदन्यासाद्रुक्ममालिनीरिति मत्वर्थीयान्तपाठस्तर्क्यते स च कुत्रापि न दृश्यते इति तद्विचार्य्यं स्वलङ्कृतेभ्य इति कर्मप्रत्ययेन दातृकर्तृकत्वमत्र बोध्यते ॥ २७ ॥

रामकृष्णयोर्जन्मनक्षत्रे तदुपलक्षितसमय इत्यर्थः । अतः कृष्णावतारोत्सवेत्यादिवत् रामजन्म श्रुत्वापि तथैवाददादिति बोद्धव्यं तथा दाने हेतुर्महामतिरिति । तज्जन्मसमये भाविद्धस्वासावधुना च तदनुस्मरणादिति भावः ॥ २८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका

इत्थमुक्तो नन्दः तौ रामकृष्णावालिङ्ग्य प्रणयेनानुरागेण विह्वलः अश्रुभिर्नेत्रे पूरयन् गोपैः सह व्रजं प्रति ययौ ॥ २५ ॥

अथानन्तरं शूरसुतो वसुदेवः पुरोधसा गर्गाचार्येण ब्राह्मणैश्च यथाविधि उभयोः रामकृष्णयोर्द्विजसंस्कृतिं द्विजत्वापादकसंस्कारम् उपनयनं सम्यगकारयत् ॥ २६ ॥

ततः सुष्ठ्वलङ्कृतेभ्यः तेभ्यः ब्राह्मणेभ्यः सम्पूज्य दक्षिणां गावो गाश्चादात् कथम्भूता रुक्मस्य सुवर्णस्य माला आसां सन्तीति तथा सुष्ठ्वलङ्कृताः वस्त्रैः सहिताः क्षौमवस्त्रमालावतीः ॥ २७ ॥

रामकृष्णजन्मनक्षत्रे याः गावो मनोदत्ताः ताश्चानुस्मृत्याऽदाद्दौ नन्वु ताः कंसेनापहृताः सन्त्यय राजगोष्ठादाच्छिद्यदत्ता इत्याह । कंसेनाधर्मतः इति ॥ २८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली

द्विजसंस्कृतिं ब्राह्मणसंस्कारम् उपनयनलक्षणम् ॥ २६ ॥

गावो याः रुक्मं सुवर्णं क्षौमाणि पुष्पमालाश्चासां सन्तीति क्षौममालिनीः ॥ २७ ॥

याः कृष्णरामयोः जन्मनक्षत्रे मनसा दत्ताः सङ्कल्पितास्ताश्च अद्दात् याः कंसेनाधर्मेण हृतास्ता अपि ॥ २८ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

दानानन्तरं गताविति शङ्कां वारयितुमाह । इत्युक्त इति । तौ कृष्णरामौ परिष्वज्य नन्दः प्रणयविह्वलः भगवद्दत्तसर्वार्थैः पूर्णः किञ्चिदपि वक्तुमसमर्थः तत्र अश्रुभिः नेत्रे पूरयन् गोपैः सह व्रजं ययौ भगवता गोपाला अपि प्रस्थापिताः नतु मित्राणीव केचित्स्थापिताः ॥ २५ ॥

एवमेतेषां निरोधमुक्त्वा वेदेन भगवतोऽपि निरोधमाह । अथेति यावदध्यायपरिसमाप्ति । तत्र प्रपञ्चविस्मृतिं पञ्चभिराह । शिष्टैर्वेदार्थासक्तिर्वक्तव्या अथ सर्वकार्यसिद्ध्यनन्तरं शिशिरे शूरसुतः वसुदेवः राजनीतिं क्षत्रियाणामवश्यकर्तव्य इति ज्ञापनार्थं पुत्रयोः सम्यगकारयत् पुरोधसा गर्गेण अन्यैश्च ब्राह्मणैः क्षत्रियाणां पुरोहित एवोपदेष्टा उपनयने मातामहप्राधान्यव्यावृत्त्यर्थं शूरपदं यथावत् स्वगृह्योक्तानुसारेण द्विजसंस्कृतिं येन द्विजो भवति चूडाकरणसंस्कारः पूर्वमेव जातः काकपक्षधराविति वचनात् उपनयनसंस्कारस्त्वत्र कृतः द्वादशे पशुकाममिति संवत्सरविचारेण तु एकादश एव भवति काम्यपक्ष एवात्राश्रयणीयः सम्प्रायश्चित्तमित्यन्ये ॥ २६ ॥

ततस्तेभ्यः उत्सवार्थं दक्षिणार्थं च दानानि दत्तवानित्याह । तेभ्य इति । गवादयं एव दक्षिणा विहिता वा रुक्ममालायुक्ताः सुष्ठु अलंकृताश्चस्वलंकृतेभ्यः संपूज्य तेभ्यश्च निधानपूर्वकमयुतद्वयं भगवज्जन्मनि रामजन्मनि च तावदन्यथा वा या मनोदत्ताः ब्रह्मामतिरिति स्मरणे पूर्वमेव सन्त्यतीति दाने वा ताः अनुस्मृत्य ब्राह्मणेभ्यः अदात् नन्वेतावत्यो गावः कुतस्त्या वसुदेवस्येति चेत्तत्राह । कंसेन गृहलुण्ठनसमये हृताः ॥ २७ ॥ २८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

प्रणयविह्वलः पुत्रविच्छेदोत्थमूर्च्छा विवशः व्रजं ययौ रामकृष्णौ तौ तु श्रीवसुदेवस्य गृहमागत्य सुखं वर्त्तेते स्मेति अत्र केचिद्रसज्ञाः प्रेम्णोऽणुमात्रमप्यपचयमसहमाना आक्षिपन्तो विवदन्ते इति तांश्च समाधित्सामो व्याख्यान्तरेण तच्च ये उपादित्सन्ते त एवोपाददतां तत्रायमाक्षेपः पितरौ युवाभ्यामित्यादिश्लोकपञ्चकस्य यथाश्रुतार्थः खलु प्रेमप्रतिकूल एव स्पष्टः एतावता व्याख्यानेनापि न प्रेमा स्थिरीभवति नन्दकृष्णयोर्मिथस्त्यागात् तत्रापि कृष्णः खल्वीश्वरो दुर्गमलीलो नन्दं पितरमपि त्यक्त्वा तिष्ठतु नाम नन्दस्तु कृष्णं त्यक्त्वा कथं व्रजं गन्तुमशकत् प्राणकोट्यधिकप्रेष्ठं तमप्युपेक्ष्य व्रजे गोधनाद्यपेक्षैव किं तस्य दुस्त्याजाभूत् मथुराप्रान्त एव तावत् कालं किं नावसत् तद्व्याख्यातं चैवं श्रीनन्दप्रबोधनामात्रोपक्षीणं न तु रामकृष्णयोस्तादृश्येव मनसि निष्ठा वास्तवी यतो रामोऽपि व्रजमायास्यन् दशमे वर्णितो न तु कृष्णः निखिलान् स्ववध्यान् शत्रून् दन्तवक्त्रपर्य्यन्तान् हत्वा निश्चिन्तीभूय यद्व्रजागमनं पद्मोत्तरखण्डदृष्टं यच्चाम्बुजाक्षासरसार भो भवान् कुरून् मधून् वेति प्रथमस्कन्धीयवाक्यज्ञापितं च वर्त्तते तदपि न प्रेमलक्षणसंगमयति तथा हि तास्तथा तप्यतीर्वीक्ष्य स्वप्रस्थाने यदूत्तमः । सान्त्वयामास सप्रेमैरायास्य इति दौत्यकैरिति शुकोक्तौ दौत्यकैर्दूतवाक्यैरिति टीकाकाराणां व्याख्यानं तत्र बहुवचनेन बहूनां दूतानां वाक्यैरेकस्यैव वा दूतस्य आयास्ये आयास्ये आयास्ये अवश्यमायास्याम्येवेति पुनः पुनरुक्तैरिति बुद्ध्यते कीदृशैः सप्रेमैः प्रेमसहितैरिति दुर्लङ्घ्यात्मस्य राज्ञो धनुर्मखदर्शनार्थकनिमन्त्रणानुरोधेनैवाद्य मथुरां युष्मांस्त्यक्त्वा यामि न तु स्वेच्छया अतः श्वो धनुर्मखं दृष्ट्वा परश्व आयास्यामि तत्र यदि कार्य्यान्तरमापतेत् तदपि श्व एव कृत्वा परश्वस्तु श्रीघ्रमायास्याम्येवेत्येषोऽर्थ एव कृष्णस्य यदि वाङ्मनसयोः स्यात्तदैव तद्वाक्यानां प्रेमसहितत्वं स्यादन्यथा तु कपटसहितत्वमेव यथा न लब्धो दैवहतयोर्वासो नौ भवदन्तिके । यां बालाः पितृगेहस्थाः विन्दन्ते लालिता मुदमित्यादिदेवकीवसुदेवमोहनार्थकानां तद्वाक्यानामिति सन्तु वा तद्वाक्यानि तादृशान्येव श्रीशुकदेवः कथं सप्रेमैरित्येनेन तानि विशिनष्टि स्म तत्तस्माद्यदि जरासन्धादिदुष्टदमनादिनानाकृत्यान्यनपेक्ष्यैव कंसवधपरादिन एव कृष्णः शीघ्रं व्रजमागच्छेत् तदैव तस्य गोपीनां प्रेम्ण्यपेक्षा स्यादन्यथा तूपेक्षैव सप्रेमैरिति पदार्थश्चालीक एव स्यात् तस्मादत्रोपपत्तीश्चन्तनीया तत्रैव चिन्ता वसुदेवादयोऽपि प्रेमवन्तो भवन्त्येवेत्येषामप्युपेक्षा अनुचिता नन्दादयस्त्वसमोर्ध्वप्रेमवन्तस्तेषामुपेक्षा सर्वथैवानुचिता जरासन्धादिदुष्टवधशिष्टपालनमप्यवतारप्रयोजनमवश्यं सम्पाद्यं रुक्मिण्यादिपारिजाताद्याहरणधर्मपुत्रादिसाहित्यविचित्रचरित्रात्मिका द्वारिकादिलीलाप्यवश्यप्रकाश्या धनुर्मखं दृष्ट्वायास्यामीति गोपीष्वागमनं प्रतिश्रुतं च सत्यं कार्य्यं वान्हव्याहेन कनकस्वरूपमिव महाप्रवासविप्रलम्भप्रकाशितं तासामसमोर्ध्वप्रेमस्वरूपञ्च मथुरागमनकालेऽपारकरुण्यमभिज्ञाचूडामणिमुद्रवं दर्शयित्वा तस्यैव

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

प्रेम्णः सर्वोत्कर्षश्च ख्यापनीय इत्याद्यावश्यकनिखिलकृत्य-समाधात्रीमतर्क्यैश्वर्य्यां स्वीययोगमायाशक्तिमाश्रित्य बलदेवसहित एव कृष्णः श्रीनन्दं पितरमासाद्य तदैव तेषां नन्दादीनां स्वस्य च द्वौ द्वौ प्रकाशावाविर्भाव्य प्रथमेन प्रकाशेन श्रीनन्दं प्रति पितर्युवाभ्यामिति श्लोकत्रयं यदुवाच तस्य एवं सान्त्वय्येति तदुत्तरस्य श्लोकद्वयस्य च व्याख्याकृतैव तत्रैव प्रकारान्तरेण वर्तमानौ कृष्णरामावाहतुः पितरिति युवाभ्यां स्निग्धाभ्यां आवां कृष्णरामौ द्वावपि पोषितौ लालितौ चेति युवयोरावां पोष्य पुत्रावेव न त्वात्मजौ किमित्यावाभ्यां त्वं पृच्छ्यसे अत्र तत्त्वं ब्रूहि अत्रत्यास्तु नन्दस्य पोष्यपुत्रावेवेत्युग्रसेनादयः सर्वे एव यादवा-ब्रुवन्ति अत एव देवकीवसुदेवौ आवामात्मजौ मत्वा लालनादिकं कृत्वा मथुरायामत्रैव बहुतरं निरुद्ध्य रक्षितुमीहेते त्वत्समीपमायातुमपि न दद्राते त्वं तत्प्रियसखोऽपि लौकिकरीत्या श्वो भोजनार्थमपि न निमन्त्रितः अद्यापि त्वां मिलितुमपि केऽपि यादवा नायान्ति आवां त्वतितरामुद्विग्नौ तैरलक्षितं बलात् पलाय्यैव त्वत्समीपमायाताविति भावः । ननु भोः कृष्ण ! त्वं पूर्वजन्मनि वसुदेवस्य पुत्र आसीरेव "प्रागयं वसुदेवस्य क्वचिज्जातस्तवात्मज" इति त्वन्नामकरणसमये गर्गेणोक्तं तेनैव वसुदेवं प्रत्यपि तथैवोक्तमित्यनुमिमे अतो वसुदेवस्त्वां गुणार्णवमतज्जन्मन्यपि पुत्रत्वेनाभिमत्य जिघृक्षति बलदेवं स्वपुत्रं तु स्वगृहं नेष्यत्येवेत्यहं जाने एव तत् त्वामप्यहं पृच्छामि एतेषां वाचैव त्वं किमावां पोषकौ पितरावेव संप्रति मन्यसे आवयोः किं त्वं पोष्य एव पुत्रोऽभूस्तत्र कृष्णः सास्रमाह । पित्रोः स्वत्वात्मजेष्वेव पुत्रेषु आत्मनो देहाद्व जीवात्मनश्चापि सकाशादप्यधिका प्रीतिर्भवेत् यद्यहं युवयोः पोष्य एव पुत्रः आत्मजस्तदा कथमहं युवयोरात्मप्राणकोटेरपि प्रियोऽभूवमतस्त्वद्वैरिणां वसुदेवादीनां मुखमप्यतः परं न द्रक्ष्यामीति भावः । ननु भो वत्स ! बलदेव ! तव कोऽभिप्रायस्तं ब्रूहीत्यत आह । स पितेत्यादि । तदहं वसुदेवस्य गृहे त्वां कृष्णं च हित्वा नैव स्थास्यामि यदि स्वयं ब्रह्माप्यागत्य वदेदिति पूर्वव्याख्यात एव भावः । ततश्च यदि बलदेवमपि नीत्वा व्रजं यामि तर्ह्येते महादुःखिनो भविष्यन्ति एतैः स्वार्थपरैर्मयि वैरभावः कृत एव अहं तु वैरं कथं करवाणीति क्षणं चिन्तयन्तं व्रजराजं तौ सत्वरमाहतुः । यातेति । हे ताततेति हे तात ! यूयं व्रजं यात वयं च व्रजं यामः न चात्र क्षणमपि विलम्ब्यतामिति भावः "ज्ञातिश्चेदनलेन किं यदि सुहृद्दिव्यौषधैः किं फल"मिति नीतिशास्त्रं जानास्येव तदपि स्वसाधुत्वेन यद्येषां दुःखगन्धमपि सोढुं न शक्नोषि तर्हि शृणु यद्ब्रूमहे इत्याहतुः । ज्ञातीनिति । वो युष्माकं यादवत्वेन ज्ञातीन् वसुदेवादीन् द्रष्टुम् एष्यामः सुहृदां तत्रत्यानां सौहार्दवतां जनानां स्वदर्शनदानादिना सुखं विधाय इति ताभ्यामुक्तस्तौ कृष्णरामौ वामदक्षिणाभ्यां भुजाभ्यां परिष्वज्यैव कृपणः स्वधनमिव न तु त्वाङ्गविच्युतीकुर्वन्नित्यर्थः । प्रणयानन्दविवशः अश्रुभिरानन्दधाराभिर्नेत्रे पूरयन्नेव कनकशकटमारुह्य व्रजं ययौ अतो योगमायाप्रभावात् परस्परालक्षित एको नन्दः कृष्णवियुक्त एव व्रजं ययावन्यस्तु कृष्णसंयुक्त इति एवं च व्रजस्थानामपि सर्वेषां गोपीगोपपश्वादीनां प्रकाशद्वयीकरणादेके कृष्णवियुक्तेन नन्देन सह दुःखसमुद्रे निमग्ना अन्ये कृष्णसंयुक्तेन नन्देन सहानन्दसमुद्रे निमग्ना व्रज एव तत्र परस्परमलक्षिता असंपृक्ता एव वर्त्तन्ते स्म यथा द्वारकायां नारददृष्टप्रकाशेषु एकत्र कृष्णं लालयन्ती भोजयन्ती देवकी परमानन्दनिमग्ना तदैवान्यत्र कृष्णवियुक्ता हन्त हन्त मृगयां कृत्वा अधुनापि मत्पुत्रो नायातः क्षुधातृषा व्याकुल इति वदन्ती परमदुःखे निमग्नैवेति यदुक्तम् भागवतामृते आश्चर्यमेकदैकत्र वर्त्तमानानपि ध्रुवम् । परस्परमसम्पृक्तस्वरूपाण्यत्र सर्वथेति" यद्यपि प्रकाशस्तु न भेदेषु गण्यते स हि नो पृथगित्युक्तेर्वस्तुतो न प्रकाशानां भेदस्तदप्यभिमानचेष्टादीनां लीलाशक्तिप्रभावाद्भेदस्तिष्ठत्येवेति योगमायाविभूत्यध्याये बहुलाश्वश्रुतदेवोपाख्याने च व्यक्तीभविष्यतीति प्रकाशद्वयस्य क्रमेण प्रयोजनद्वयं यथा स्वीयकनकस्यानर्घ्यस्य स्वरूपज्ञापनार्थमेव यथा वन्हिना तत्सन्दह्यते तथैव स्वीयसर्वप्रेमपरिकरमुख्यमप्युद्धवं दिव्योन्मादचित्रजल्पादिभिर्महाचमत्कारमयं व्रजप्रेम्ण उत्कर्षं ज्ञापयितुमेव प्रथमो वियोगमयः प्रकाशः प्रकाशितः अत एव व्रजं प्रत्युद्धव एव प्रस्थापयिष्यते स च प्रायस्तमेव वियोगमयं प्रकाशं दृष्ट्वा महाप्रेमचमत्कारमाप्नुवन्नेताः परं तनुभृतो भुवीति नायं श्रियोऽङ्ग इति आसामहो चरणरेणुजुषामित्यादिपद्यैस्तत्प्रेम्ण एव सर्वोत्कर्षमुद्घोषयिष्यति स एव प्रकाशः कुरुक्षेत्रं गत्वा देवकीवसुदेवादीन् रुक्मिण्यादींश्च स्वं दर्शयित्वा महाप्रेमचमत्कारं प्रापयिष्यति बलभद्रोऽपि व्रजं गतस्तमेव प्रकाशं प्रेमोन्मादमयं दृष्ट्वा चमत्कारमाप्स्यतीति व्रजविषयकं स्वाश्रयकं प्रेमाणं निश्चलमेव ज्ञापयितुं द्वितीयः संयोगमयः प्रकाशः अत एव विशोका अहनी निन्युर्गायन्त्यः प्रियचेष्टितमित्यत्राहनी इति द्विवचनेन द्वे अहनी व्याप्यैव विच्छेदो न तत इति ज्ञापितम् उद्धवेनापि हत्वा कंसं रङ्गमध्ये प्रतीपं सर्वसात्वताम् । यदाह वः समागत्य कृष्णः सत्यं करोति त" दिति तदा वर्तमानकाळ एव प्रयुक्तः तथा तेन व्रजप्रवेशे प्रथमं स संयोगमय एव प्रकाशः सामान्यतो द्रक्ष्यते यद्वक्ष्यते वासितार्थेऽभियुद्ध्यद्भिर्नादितं शुष्मिभिर्वृषैः रति गोदोहशब्दाभिरवं वेणूनां निस्वनेन चेति स्वलंकृताभिर्गोपीभिर्गोभिश्च सुविराजितमिति तादीपदीप्तैर्मणिभिर्विरेजु रज्जुविकर्षद्भजकङ्कणस्रजः चलन्नितम्बस्तनहारकुण्डलत्विषत्कपोलारुणकुङ्कुमाननाः सामान्यतो द्रक्ष्यते उद्गायतीनामरविन्दलोचनमित्यादि कृष्णसंयोगानन्दलक्षणमित्येवं प्रकाशद्वयस्य प्रयोजनं प्रमाणं चोक्तम् ॥ २५ ॥

पुरोधसा गर्गेण द्विजसंस्कृतिमुपनयनम् ॥ २६ ॥

क्षौमवस्त्रमाल्यवतीर्गाः २७ ॥

मनसा दत्ता या यावत्य आसन् कंसेनापहृता इति ता एव स्वीया राजगोष्ठादाच्छिद्य अददात् ॥ २८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

द्विजसंस्कृतिमुपनयनम् ॥ २६ ॥

तेभ्यः गावः गाः अदात् क्षौमवस्त्रमालावतीः ॥ २७—२८ ॥

भाषा टीका ॥

इतने कहने से नन्दजीने प्रेमसे विह्वल होकर राम कृष्ण

ततश्च लब्धसंस्कारौ द्विजत्वं प्राप्य सुव्रतौ ।
गर्गाद्यदुकुलाचार्याद्गायत्रं व्रतमास्थितौ ॥ २९ ॥
प्रभवौ सर्वविद्यानां सर्वज्ञौ जगदीश्वरौ ।
नान्यसिद्धामलं ज्ञानं गूहमानौ नरेहितैः ॥ ३० ॥
अथो गुरुकुले वासमिच्छन्तावुपजग्मतुः ।
काश्यं सान्दीपनिं नाम ह्यवन्तीपुरवासिनम् ॥ ३१ ॥
यथोपसाद्य तौ दान्तौ गुरौ वृत्तिमनिन्दिताम् ।
ग्राहयन्तावुपेतौ स्म भक्त्या देवमिवादृतौ ॥ ३२ ॥

भाषा टीका ।

दोनों को आलिंगन किया नेत्रों को आंसु से भरलाये फिर गोपों के सहित व्रजको चले गये ॥ २५ ॥

हे राजन् ! इसके अनंतर वसुदेवजी ने पुरोहित तथा ब्राह्मणों के द्वारा दोनों पुत्रों के यज्ञोपवीतादिक द्विजाति संस्कार कराये ॥ २६ ॥

उन ब्राह्मणों को दक्षिणा दिये ब्राह्मणों को अलंकार पहराये पूजा किया और सुवर्ण की माला अलंकार सहित और बछरों सहित रेशमों की माला पहराई गऊ दई ॥ २७ ॥

और श्रीकृष्ण जन्म समय में जो गउ मनसे दान किये थे उनको कंसने वंद कर दियाथा उनको भी स्मरण करके देते भये ॥ २८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

गायत्रं व्रतं ब्रह्मचर्यम् ॥ २९ ॥

प्रकर्षेण भवन्त्याभ्यामिति प्रभवौ अत एव सर्वज्ञौ स्वतः सिद्धममलं ज्ञानं प्रच्छादयन्तौ नरचेष्टितैः ॥ ३०-३१ ॥

यथा यथावत् उपसाद्य प्राप्य गुरौ वृत्तिमन्यान् ग्राहयन्तौ शिक्षयन्तौ गुरुमुपेतावुपगतौ सेवितवन्तावित्यर्थः ॥ ३२ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

गर्गादिति तच्छिक्षयेत्यर्थः । गायत्रमिति प्राजापत्यब्राह्मयोरप्युपलक्षणं तत्र गायत्रं गायत्रीमधीयानस्य त्रिरात्रव्यापि प्राजापत्यं वेदारम्भपर्यन्तं ब्राह्मं तत्समाप्तिपर्यन्तम् अतएव सामान्यतो ब्रह्मचर्यमेव तैर्व्याख्यातं सुव्रतौ सन्तौ ॥ २९ ॥

किञ्च प्रभवाविति युग्मकं सर्वविद्यानां प्रभवावपि अथो अनन्तरम् उपजग्मतुः रथमारुह्येति ज्ञेयम् । रथस्य वक्ष्यमाणत्वात् । काश्यं काश्यां जातम् ॥ ३० ॥ ३१ ॥

यथा समित्पाणित्वादि श्रुत्युक्तप्रकारेण दान्तौ तथा च श्रीहरिवंशे । "द्विवेद गोत्रं स्वाध्यायमाचारेणाप्यलङ्कृतौ । शुश्रुषू निरहङ्काराभुवौ रामजनार्दनाविति" । वृत्तिमनुवृत्तिं परमदैवतमिव आदृतौ सादरौ गुरुणा सम्मानितौ सन्तौ वा । स्मेति तद्वृत्तं प्रसिद्धमेवेत्यर्थः ॥ ३२ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

ईहितैः चेष्टाभिः ॥ ३०—३२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ततश्चेति लब्धः संस्कार उपनयनाख्यो याभ्यां तौ द्विजत्वं प्राप्य यदुकुलस्याचार्याद्गायत्रं व्रतं गर्गोपदिष्टं ब्रह्मचर्यमास्थितावाश्रितौ ॥ २९ ॥

अथो ततः सर्वभूतानां प्रभवौ प्रकर्षेण भवन्त्याभ्यामिति प्रभवावतः सर्वज्ञौ स्वतः सिद्धामलं ज्ञानं नरचेष्टाभिः प्रच्छादयन्तौ ॥ ३० ॥

गुरुकुलावासमिच्छन्तौ काश्यं काश्यपगोत्रजमवन्तीपुरवासिनं सान्दीपन्याख्यं गुरुमभिजग्मतुः ॥ ३१ ॥

तौ रामकृष्णौ यथावत् उपसाद्य दान्तौ जितेन्द्रियौ सन्तौ निर्दिष्टां गुरौ वृत्तिमन्यान् ग्राहयन्तौ शिक्षयन्तावादरयुक्तौ देवभक्त्या गुरुमुपेतौ सेवितवन्तौ इत्यर्थः ॥ ३२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

द्विजत्वमुपनीतत्वं प्राप्य लब्धसंस्कारौ लब्धदेहशुद्धी गायत्रं व्रतं गायत्रीजपनियमं ब्रह्मचर्यं वा ॥ २९ ॥

प्रभवौ मूलकारणे नान्येत्येकं पदं नगनाकशब्दवत् अन्यस्य सिद्धं न भवतीति नान्यसिद्धम् औत्पत्तिकम् अत एवामलं यज्ज्ञानं तन्नरेहितैः मनुष्यचेष्टाभिश्छादयन्तौ ॥ ३० ॥

यस्मादथो तस्मात् काश्यङ्काश्यपगोत्रजातम् ॥ ३१ ॥

यथावदुपसाद्य समित्पाणी उपेतौ स्म प्रापतुः भक्त्या देवमिवेत्यनेन "यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ" विति श्रुतिं सूचयति ॥ ३२ ॥

तयोर्द्विजवरस्तुष्टः शुद्धभावानुवृत्तिभिः ।
प्रोवाच वेदानखिलान् साङ्गोपनिषदो गुरुः ॥ ३३ ॥
सरहस्यं धनुर्वेदं धर्मान्न्यायपथांस्तथा ।
तथा चान्वीक्षिकीं विद्यां राजनीतिं च षड्विधाम् ॥ ३४ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

ततोऽन्येन निरोधे कारितेऽपि स्वतोऽपि कर्त्तव्यमिति व्रतात्मकं नियमं पूर्वसिद्धत्यागापरपर्यायं स्वयं कृतवन्तावित्याह । ततश्चेति द्वाभ्याम् । ग्रहणसमर्थनभेदेन तदनन्तरमेव संस्कारादिनं परित्यज्य दिनत्रयं मासषट्कं सम्वत्सरमात्रं वा सुव्रतौ शोभनवेदव्रतयुक्तौ ब्रह्मचर्यनियमयुक्तौ वा यदुकुलस्यैवाचार्यो गर्ग इति गायत्रं व्रतं सावित्रापरपर्यायं व्रतमास्थितौ जातौ ॥ २९ ॥

नन्वेतस्य व्रतस्य काम्यत्वं यथा सरसस्फूर्तिर्भवति तदत्र प्रकृते नोपयुज्यत इति किमिति व्रतमास्थितावित्याशङ्कायामाह । प्रभवाविति । यद्यपि सर्वविद्यानां प्रभवौ विद्यापेक्षाभावे स्वतोऽपि सर्वज्ञौ मास्तु वा ज्ञानं जगदीश्वरौ कर्तुमकर्तुमन्यथा कर्तुं समर्थौ क्रियाशक्तिरेवोत्कृष्टेत्यर्थः । तथाप्यनन्यसिद्धं स्वतः सिद्धमेव ज्ञानं नरेहितैर्मानुषलीलाभिः गूहमानौ गोप्यं कुर्वाणौ गायत्रं व्रतमास्थिताविति पूर्वेणैव सम्बन्धः । सर्वज्ञता ब्रह्मविदामिव कृत्रिमाऽपि भवतीति नान्यसिद्धेत्युक्तम् ॥ ३० ॥

एवं प्रपञ्चविस्मरणात्मकनिरोधमुक्त्वा आसक्त्यात्मकनिरोधमाह । अथो इति विंशत्या ततो द्वाभ्यां प्रत्यापत्तिं वक्ष्यति अन्यथा अग्रे क्रियमाणो निरोधः कर्तृरहितः स्यात् आत्मैकविद्य इति ब्रह्मस्थानीया एते धर्मा भगवतो निरूपि अवश्यं हि गुरुकुल एव विद्याग्रहणम् अतः गुरुकुले वासमिच्छन्तौ जातौ तत ईश्वरत्वात्कश्चिद्गुरुः । स्वयमुपस्थितः भगवता वा कल्पित इति शङ्कां वारयितुमथ जग्मतुः काश्यमिति । सान्दीपनिरिति सन्दीपनस्यापत्यं सान्दीपनिः "अत इञ्" पितृनाम्नैव तस्य प्रसिद्धिः काश्य इति एकदेशग्रहणेन काश्यपगोत्रजः काश्यो वा स्वतन्त्रः गोत्रप्रवर्तकः काश्यः कुत्सो गृत्समद इति गृत्समदात् शौनकः तथा काश्यस्यापि ब्रह्मवंशजनकत्वं यद्यपि विज्ञातो नोक्तं तथाप्यवगम्यते केचन ऋषयः पितृनाम्नैव प्रसिद्धा इति सन्दीपनिरेव निरुक्तः सम्यक् दीपनं बुद्धेर्यस्मादिति अवन्तीपुरं तु शैवं महाकालस्थानं तत्रापि यथा मुक्तिर्भवति साऽपि तीर्थवासेन विरक्तो महान् ॥ ३१ ॥

तत्र गत्वा यथा गुरुवृत्तिः कर्तव्या तथैव कृतवन्तौ नत्वैश्वर्येण धनादिना वा विद्याग्रहणमित्याह । यथोपसाद्येति । अरिक्तहस्ततया ब्रह्मचर्यमागामुपमानयस्वेत्यादि वाक्यात् उपसाद्य निकटे गत्वा आवश्यकधर्मपरिग्रहणार्थमाह । दान्ताविति । नन्वेवं किमर्थं कृतवन्तौ तत्राह । गुरौ वृत्तिमनिन्दितां ग्राहयन्तौ गुरावेवं गुरुशुश्रूषयैव नीचस्तैव विद्याग्राह्येति शिक्षयितुं निन्दिता वृत्तिर्धनादिना अत एव उपेतौ स्म यतः उपनीतौ गुरुणा समीपे आनीतौ अत्र प्रमाणं न वक्तव्यं गुरुः कथमेवं धाष्ट्र्यं कृतवानित्यपि नाशङ्कनीयं यतः स्मेति प्रसिद्धं भगवदिच्छा तत्र युक्तिः ततो ग्रहणानन्तरं विहितभक्त्या परमादरयुक्तौ प्रेमबहिरपि भक्तिधर्मोऽपि पदद्वयेनोक्तः देवामिव आराध्येष्टदेवतामिव उपेतौ स्म बहिरन्तश्च समीपं गतौ स्मेत्यर्थः ॥ ३२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

गायत्रं ब्रह्मचर्य्यम् ॥ २९ ॥

अनन्यसिद्धं स्वाभाविकं ज्ञानं नरचेष्टितैरेव यत आच्छादयन्तावथो अत एव गुरुकुले इत्यादि ॥ ३०—३१ ॥

यथा यथावत् गुरौ वृत्तिम् उपसत्तिम् अन्यान् ग्राहयन्तौ शिक्षयन्तौ उपेतौ स्म सेवितवन्तौ गुरुणा तेनाप्याहृतौ ॥ ३२ ॥ ३३ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

गायत्रं सावधिब्रह्मचर्य्यम् ॥ २९ ॥

ननु सर्वज्ञस्य सर्वगुरोः श्रीभगवतः तदवतारस्य बलस्य च गुरुकुले वासः किमभिप्राय इत्यत्र नरशिक्षार्थं इत्याह । प्रभवावित्यादिना । प्रकर्षेण भवन्त्याभ्यामिति प्रभवौ नरेहितैः नरशिक्षार्थकैः नरचेष्टितैः नान्यसिद्धं स्वाभाविकममलं ज्ञानं गूहमानौ प्रच्छादयन्तौ ॥ ३०—३१ ॥

तौ रामकृष्णौ यथा यथावदुपसाद्य प्राप्य गुरौ अनिन्दितां शुद्धां वृत्तिमन्यान् ग्राहयन्तौ शिक्षयन्तौ भक्त्या देवमिव गुरुमुपेतौ उपगतौ सेवितवन्तौ अत्र "यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ । तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः" इति । श्रुतिरनुसंधेया ॥ ३२ ॥

भाषा टीका ।

तिसके पीछे राम कृष्ण दोनों द्विज संस्कार के होने से द्विजत्व को प्राप्त भये सुंदर व्रतों को करने लगे और ब्रह्मचर्य व्रत को धारण करते भये ॥ २९ ॥

वे सर्वज्ञ हैं जगदीश्वर हैं सर्व विद्याओं के प्रभु हैं उनका ज्ञान स्वयं सिद्ध है तौ भी मनुष्य चेष्टाओं से उस ज्ञान को गुप्त करके रहते भये ॥ ३० ॥

इसके अनंतर गुरु कुल में वास करने की इच्छा से अवंतीपुर उज्जैन में रहने वाले काशीके काश्यपगोत्री सांदीपनी गुरूके पास जाते भये ॥ ३१ ॥

वे राम कृष्ण दोनों जितेंद्रिय होकर निर्मल वृत्ति गुरुके विषै करके औरों को गुरु सेवा सिखाते हुये भक्ति से देवता सरीका गुरू में आदर करते भये ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

शुद्धो भावो यासु ताभिरनुवृत्तिभिः साङ्गोपनिषदः अङ्गानि शिक्षादीनि उपनिषदश्च सहितान् ॥ ३३ ॥

सर्वं नरवरश्रेष्ठौ सर्वविद्याप्रवर्त्तकौ ।
सकृन्निगदमात्रेण तौ सञ्जगृहतुर्नृप ! ॥ ३५ ॥
अहोरात्रैश्चतुःषष्ट्या संयत्तौ तावतीः कलाः ।
गुरुदक्षिणयाऽऽचार्यं छन्दयामासतुर्नृप ! ॥ ३६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

सरहस्यं यन्त्रदेवताज्ञानसहितम् धर्मान्मन्वादिधर्मशास्त्राणि न्यायपथान्मीमांसादीन् आन्वीक्षिकीं तर्कविद्याम् षड्विधां "सन्धिश्च विग्रहो यानमासनं द्वैधमाश्रय" इत्येवं षड्विधां राजनीतिम् ॥ ३४ ॥

सकृन्निगदमात्रेणैकवारं गुरोरुच्चारणमात्रेण ॥ ३५ ॥

तावतीश्चतुःषष्टिकलाः ताश्च शैवतन्त्रोक्ता लिख्यन्ते यथा गीतम् ॥१॥ वाद्यम् ॥ २ ॥ नृत्यम् ॥ ३ ॥ नाट्यम् ॥ ४ ॥ आलेख्यम् ॥ ५ ॥ विशेषकच्छेद्यम् ॥ ६ ॥ तण्डुलकुसुमबलिविकाराः ॥ ७ ॥ पुष्पास्तरणम् ॥८ ॥ दशनवसनाङ्गरागाः ॥९ ॥ मणिभूमिकाकर्म॥१०॥ शयनरचनम् ॥ ११ ॥ उदकवाद्यमुदकघातः ॥१२॥ चित्रयोगाः ॥१३ ॥ माल्यग्रथनविकल्पाः ॥१४॥ शेखरापीडयोजनम् ॥१५ ॥ नेपथ्ययोगाः ॥ १६ ॥ कर्णपत्रभङ्गाः ॥ १७ ॥ सुगन्धयुक्तिः ॥ १८ ॥ भूषणयोजनम् ॥ १९ ॥ ऐन्द्रजालम् ॥ २० ॥ कौचुमारयोगाः ॥ २१ ॥ हस्तलाघवम् ॥ २२ ॥ चित्रशाकापूपभक्ष्यविकारक्रियाः ॥ २३ ॥ पानकरसरागासवयोजनम् ॥ २४ ॥ सूचीवायकर्म ॥ २५॥ सूत्रक्रीडा ॥ २६ ॥ वीणाडमरुकवाद्यानि ॥ २७ ॥ प्रहेलिका ॥ २८ ॥ प्रतिमाला ॥ २९ ॥ दुर्वचकयोगाः ३० ॥ पुस्तकवाचनम् ॥ ३१ ॥ नाटकाख्यायिकादर्शनम् ॥ ३२॥ काव्यसमस्यापूरणम् ॥ ३३ ॥ पट्टिकावेत्रबाणविकल्पाः ॥ ३४ ॥तर्ककर्माणि ॥ ३५ ॥ तक्षणम् ॥ ३६ ॥ वास्तुविद्या ॥ ३७ ॥ रूप्यरत्नपरीक्षा ॥ ३८ ॥ धातुवादः ॥ ३९ ॥ मणिरागज्ञानम् ॥ ४० ॥ आकरज्ञानम् ॥ ४१ ॥ वृक्षायुर्वेदयोगाः ॥ ४२ ॥ मेषकुक्कुटलावकयुद्धविधिः ॥ ४३ ॥ शुकसारिकाप्रलापनम् ॥ ४४ ॥ उत्सादनम् ॥ ४५ ॥ केशमार्जनकौशलम् ॥ ४६ ॥ अक्षरमुष्टिकाकथनम् ॥ ४७ ॥ म्लेच्छितकुतर्कविकल्पाः ॥ ४८ ॥ देशभाषाज्ञानम् ॥ ४९ ॥ पुष्पशकटिकानिर्मितिज्ञानम् ॥ ५० ॥ यन्त्रमातृकाधारणमातृका ॥ ५१ ॥ सम्पाठ्यम् ॥५२॥ मानसीकाव्यक्रिया ॥ ५३ ॥ अभिधानकोशः ॥५४॥ छन्दोज्ञानम् ॥ ५५॥क्रियाविकल्पाः ॥५६ ॥ छलितकयोगाः ॥ ५७ ॥ वस्त्रगोपनानि ॥ ५८ ॥ द्यूतविशेषः ॥५९ ॥ आकर्षक्रीडा ॥ ६० ॥ बालक्रीडनकानि ॥ ६१ ॥ वैनयिकीनाम् ॥ ६२ ॥ वैजयिकीनाम् ॥ ६३ ॥ वैतालिकीनाञ्च विद्यानां ज्ञानम् ॥ ६४ ॥

इति चतुःषष्टिकलाः छन्दयामासतुरुपलोभितवन्तौ ॥ ३६ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

शुद्धेन भावेन भक्त्या या अनुवृत्तयस्ताभिः । तद्विशेषश्चाग्रे श्रीदामविप्रोपाख्याने श्रीभगवन्मुखादेव व्यक्तो भावी । अत एवात्र स्वयं बादरायणिना न प्रपञ्चित इति ज्ञेयम् ॥ ३३ ॥

सरहस्यमिति सार्द्धकद्वयकम् अखिलान् चतुरोऽपीत्यर्थः । एतदुपदेशश्च शब्दमात्रतः । तदर्थज्ञानं मीमांसोपदेशेनैव भविष्यतीति तदनन्तरं तत्पाठशुद्ध्यर्थमावश्यकत्वादर्थसहितान्येवाङ्गानि तानि चोक्तानि । "शिक्षा व्याकरणं कल्पो ज्योतिषं छन्द एव च । निरुक्तञ्च निरुक्तानि षडङ्गानि मनीषिभि"रिति । ज्योऽतिङ्गत्वं तदर्थकालादिशुद्ध्यपेक्षणात् । अङ्गानन्तरं रहस्यत्वेनानुपदिष्टचरीरुपनिषदः एताश्च पूर्ववत् प्रथमतः शब्दत एव ततश्च क्षत्रियजातावावश्यकत्वाद्धनुर्वेद एतदादीन्यर्थतोऽपि ज्ञेयानि । ततश्च तत्तत्सर्वं विद्योपकारकत्वेनापेक्ष्याण्येव धर्मशास्त्राणि । ततश्च वैशिष्ट्यधनार्थं न्यायपथान् तत्तद्वेदार्थनिर्णायकान् जैमिनिकपिलपतञ्जलिबादरायणरचितान् पूर्वमीमांसादीन् शब्दानुगतयुक्तिग्रन्थान् । ततश्च बाह्यवादिनिरासार्थं स्वतन्त्रयुक्तिमयीमान्वीक्षिकीमपि एवं ज्ञातायां राजत्वयोग्यतायां राजनीतिमित्येवं क्रम एव सिद्ध्यति ॥ ३४ ॥ ३५ ॥

ततश्च कौतुकविशेषार्थं कला अप्युपदिदेश इत्याह । अहोरात्रैरिति । यावतीः कलाः सञ्जगृहतुरिति चतुःषष्टिकलाः संगृहे एतावन्त्यहोरात्राणि अखिलवेदादिसङ्ग्रहेणाप्यहोरात्राणि ज्ञेयानि । कलानां नामानि तैरेव लिखितानि स्वरूपाणि तु लेख्यानि । तत्र गीतं गानशिक्षा गीतनिर्माणं स्वजातिरागभेदाः तालमात्रादिरचनाप्रकाराः साधकबाधकस्वरादिमेलनानां परिज्ञानञ्च १ अथ वाद्यं चतुर्विधं तत्रापि शिक्षादयः पूर्ववज्ज्ञेयाः एवमुत्तरत्रापि २ नृत्यं सामान्यम् ३ नाट्यं रूपकमयं ४ आलेख्यं चित्रकर्म ५ विशेषकच्छेद्यं तिलकेषु नाना विच्छेदरचना ६ तण्डुलादिबलिविकारास्तण्डुलानां कुसुमानाञ्च पूजोपहाररूपाणां विकारा नानाप्रकाररचना ७ पुष्पास्तरणं पुष्पादिभिः शय्या रचनं ८ दशनवसनाङ्गरागास्तेषां तेषाञ्च रञ्जनभेदाः ९ मणिभूमिकाकर्म मयनिर्मितपाण्डवसभावन्मणिबद्धभूमिक्रिया १० शयनरचनं पर्यङ्कादिनिर्माणम् ११ उदकवाद्यं सरोवरादिस्थापितभाण्डे उदकपूरितपात्रे वा मधुरनानातानसमुत्थापनं १२ उदकघातः जलस्तम्भविद्या १३ चित्रा योगाः नानाद्भुतदर्शने सम्यगुपायाः १४ माल्येत्यादि सप्तकं सुगमं १५—२१ कौचुमारयोगः कुचुमारनाम्ना प्रकाशिता स्वस्मिन्नानारूपा व्यञ्जना २२ हस्तलाघवं चमत्कारलम्भनार्थमलक्षितेन हस्तसञ्चारेण तत्तद्वस्तुप्रवर्त्तनं २३ चित्रेऽति द्वयं चित्रमत्र नानाप्रकारं २४ पानकरसरागः पानकेषु रसस्य रागस्य च नानानिर्माणमित्यर्थः । तच्चासवयोजनञ्चेत्यर्थः । २५ सूचीति सुगमं २६ सूत्रक्रीडादि सूत्रसञ्चालनेन पुत्तलिकादिचालनं २७ प्रहेलिका अपहुतवागर्थपरिज्ञानं २८ प्रतिमाला सर्ववस्तु प्रतिकृति निर्माणं २९ दुर्वचयोगाः यद्वक्तुं न शक्यते तद्वक्तुमुपायाः ३० पुस्तकवाचनम् अतिशीघ्रमविद्यमानानपि वर्णान् योजयित्वा तद्वाचनं ३१ नाटकाख्यायिकादर्शनं तत्तच्छास्त्राणां परिज्ञानं निर्माणञ्च ३२ काव्यसमस्यापूरणं काव्येषु गुप्तपदस्य समस्यायाः सङ्क्षेपेणोक्तस्य सहसा पूरयितुमशक्यस्य श्लोकार्थस्यांशान्तरेण पूरणं ३३ पट्टिकावेत्रबाणविकल्पाः सूत्रेण त्रिपिटा-

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

कारस्य बन्धनादिसाधनस्य कलायां वाणस्य च कल्पनाः ३४ तर्कुमर्माणि सूत्र निर्माणसाधनलौहशलाकया साध्यानि विविधसूत्रकल्पानि ३५ तक्षणं तक्ष्णां कर्म ३६ वास्तुविद्या गृहोचितभूम्यादीनां तन्निर्माणभेदानाञ्च ज्ञानं ३७ रूप्यरत्नपरीक्षा रूप्यादीनां रत्नानां सदसत्ताज्ञानं ३८ धातुवादः स्वर्णादिकल्पनं ३९ मणिरागज्ञानं मणिषु रागनिर्माणज्ञानं ४० आकरज्ञानं दर्शनादेव मण्याद्युद्भवभूमिज्ञानं ४१ वृक्षेति त्रयं स्पष्टम् ४२–४४ उत्सादनं मन्त्रादिना परस्परासत्तित्याजनं ४५ केशेति स्पष्टम् ४६ ॥ अक्षरमुष्टिकाकथनम् अक्षराणामदृष्टानां तथा मुष्टिकास्थितवस्तूनाञ्च स्वरूपस्य सङ्ख्यायाश्च कथनं ४७ म्लेच्छितविकल्पाः । म्लेच्छविविधभाषाभरत शास्त्राणां ज्ञानं ४८ देशभाषाज्ञानमिति स्पष्टं ४९ पुष्पशकटिकानिमित्तज्ञानं पुष्पशकटोपाधिकायां कस्याश्चिद्विद्यायां निमित्तस्य ज्ञानं ५० यन्त्रमातृका पूजार्थे मातृका वर्णैर्यन्त्रनिर्माणं ५१ सैव धारणार्था चेद्धारणमातृका ५२ सम्पाट्यम् अभेद्यस्यापि हीरकादेर्द्वैधीकरणं ५३ मानसीकाव्यक्रिया परमनः स्थितस्यार्थस्य श्लोकनं ५४ क्रियाविकल्पाः एकैकस्याः क्रियाया विविधैरुपायैर्निष्पादनं ५५ छलितकयोगाः परवञ्चनोपायाः ५६ अभिधानेति सुगमं तत्राभिधानकोषयोर्नानार्थता पर्यायसमर्थता भेदाद्भेदः छन्दः तच्छास्त्रं एतानि च वेदाङ्गानि अन्यानि तत्ताद्विपश्चिन्निबद्धानि ५७ वस्त्रगोपनानि तूलसूत्रमयादिवस्त्राणां पट्टवस्त्रादितया दर्शनप्रक्रिया ५८ द्यूतेति स्पष्टम् ५९ आकर्षक्रीडा दूरस्थान्यपि क्रीडाद्रव्याणि यत्राकृष्यन्ते स क्रीडाविशेषः ६० वालेति स्पष्टं ६१–६३ वैनायिकी वैजयिकी वैतानिकी चेति विद्यात्रयमुन्नेयं ६४ केचित्तु कलाः कल्पसहितोक्ताः सुधियामेव प्रत्येकमेकाहोरात्रशिक्षणार्हाः क्षुद्रसिद्धिरूपाः परचित्तज्ञता दूरश्रवणदर्शनचिन्ता रत्नामृतविशेषनिर्माणाद्या अन्या एवाहुः यद्वा । तत्सर्वं कलाश्चाहोरात्रैश्चतुःषष्ट्या सञ्जगृहतुरित्यन्वयः । तथाच श्रीविष्णुपुराणे । "सहरस्यं धनुर्वेदं ससङ्ग्रहमधीयताम् । अहोरात्रैश्चतुःषष्ट्या तदद्भुतमभूद्द्विजे"ति श्रीहरिवंशे च "तौ च श्रुतिधरौ वीरौ यथावत् प्रतिपद्यताम् । अहोरात्रैश्चतुःषष्ट्या साङ्गं वेदमधीयता" मिति छन्दयासतुः तदनिच्छुकमपीच्छां कारितवन्तौ ॥ ३६ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

न्यायपथान् मीमांसान्यायान् आन्वीक्षिकीं तर्कविद्यां षड्विधां सन्धिविग्रहयानासनद्वैधीभावसमाश्रयरूपाम् ॥ ३४—४६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

शुद्धः भावो यासु ताभिरनुवृत्तिभिस्तुष्टो द्विजवरः गुरुरङ्गैः शिक्षाकल्पादिभिः षड्भिरुपनिषद्भिश्च सहितानखिलान्वेदांस्तयोः प्रोवाच ॥ ३३ ॥

तथा सरहस्यं मन्त्रदेवताख्यानसहितं धनुर्वेदं धर्मन्यायपथान्मन्वादिधर्मशास्त्राणि मीमांसान्यायादींश्चान्वीक्षिकीं तर्कविद्यां षड्विधां सन्धिविग्रहयानासनद्वैधीभावसमाश्रयरूपां राजनीतिं च प्रोवाचेत्यन्वयः ॥ ३४ ॥

हे नृप ! सर्वमिति । तावमरश्रेष्ठौ परमपुरुषावत एव सर्वविद्याप्रवर्तकावत एव सकृन्निगदमात्रेणैव तद्गुरूपदिष्टं सर्वं जगृहतुः सम्यग्गृहीतवन्तौ ॥ ३५ ॥

कियता कालेन कति विद्याः सञ्जगृहतुरित्यत्राह । अहोरात्रैरिति । अहोरात्राणाञ्चतुः षष्ट्या चतुःषष्टिसंख्याकैर्दिवसैश्चतुःषष्टिविद्याः संजगृहतुरित्यन्वयः ततो हे नृप ! गुरुदक्षिणयेति हेत्वर्थे तृतीया गुरवे देयदक्षिणार्थमाचार्यं छन्दयामासतुरभीष्टं वरयेति प्रलोभयामासतुः ॥ ३६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अङ्गैः शिक्षादिभिः उपनिषद्भिः वेदान्तैस्तदुपयोगिभी रहस्यज्ञानैर्वा सहितान् ॥ ३३ ॥

सरहस्यं प्रयोगोपसंहारसहितं धर्मपथः वर्णाश्रमधर्मलक्षणः पूर्वमीमांसालक्षणो वा न्यायपथान् ब्रह्मतर्कादि तर्कशास्त्रलक्षणांश्च आन्वीक्षिकीं मीमांसाशास्त्रं वेदेतिहासाद्यर्थनिर्णायकम्

सन्धिश्च विग्रहश्चैव यानमासनमेव च ।
द्वैधीभावं संश्रयञ्च षड्गुणान्कवयो विदुरिति ॥

षड्विधाम् ॥ ३४ ॥

सकृन्निगदमात्रेण एकवारं पाठमात्रेण ॥ ३५ ॥

चतुःषष्ट्या संख्यातैरहोरात्रैः कालावयवैस्तावतीः तावत्संख्याः कलाः चतुःषष्टिकला विद्या इत्यर्थः । संयत्तौ सम्यक् प्राप्तौ छन्दयामासतुः प्रार्थयामासतुः ॥ ३६ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

ततो गुरुकर्तव्यमाह । तयोरिति द्वाभ्याम् । स हि द्विजवरः ब्राह्मणश्रेष्ठः सर्वधर्मप्रवर्तकः प्रथमतस्तत्स्वरूपमज्ञात्वापि तयोरनुवृत्तिमेव दृष्ट्वा सन्तुष्टो जातः तत्रापि शुद्धेन भावेन सहिता अनुवृत्तिः अत्र भावशुद्धिः अलोलुपत्वादिः प्रसादातिरिक्तकामनाभावश्च ततो विद्यार्थमागताविति आदौ सर्वानेव वेदान् प्रोवाच चत्वारो वेदा बहुशाखावितताः ततोऽङ्गानि षट् उपनिषदश्च ब्रह्मप्रतिपादिकाः यतो गुरुरुपदेष्टा नत्वीश्वरः ॥ ३३ ॥

अन्या अपि विद्या उक्ता इत्याह । सरहस्यमिति । सरहस्यं मन्त्रसहितं धनुर्वेदं पाठितवान् क्षत्रियाणामिदं दृष्टोपयोगि उपवेदेषु नान्ये धर्मान् धर्मशास्त्रं न्यायपथान् न्यायमार्गान् सामादीन् आन्वीक्षिकी आत्मविद्या सांख्ययोगादिरूपा राजनीतिरन्या सा षड्विधा सन्धिविग्रहयानासनद्वैधीभावसंश्रयाख्या ॥ ३४ ॥

एतावतीं विद्यां कियता कालेन पाठितवन्तावित्याह । सर्वं नरवरश्रेष्ठाविति । यावद्गुरुणा उक्तं तावत्सकृन्निगदमात्रेणैव एकवारश्रवणेन सञ्जगृहतुः सम्यक् गृहीतवन्तौ यावता कालेनाध्ययनादिपरिपालनेन गुरुस्तावतीं विद्यामुच्चारितवान् तावता कालेन गृहीतवन्तौ नृपेति सावधानार्थं सम्बोधनम् ॥ ३५ ॥

किञ्च कौतुकविद्या अपि कलारूपाः पठितवन्तावित्याह । अहोरात्रैरिति । चतुःषष्टिसंख्यायुक्तैः अहोरात्रैः संयत्तौ तावतीः कलाः चतुःषष्टिकलाः सञ्जगृहतुरिति संबन्धः । एकस्यां कलायां बहुप्रकाराः बहवो ग्रन्थाः शिक्षा च महती तथा-

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

ष्येका कळा एकस्मिन्नेव दिवसे शिक्षिता। ताः कलाः शैवतन्त्रोक्ता लिख्यन्ते गीतं वाद्यं नृत्यं आलेख्यविशेषकच्छेद्यं तण्डुलकुसुमबलिविकाराः पुष्पास्तरणं दशनवसनाङ्गरागाः मणिभूमिकाकर्म शयनरचनम् उदकवाद्यम् उदकाघातः चित्रायोगाः माल्यग्रन्थनविकल्पाः शेखरापीडयोजनं नेपथ्ययोगाः कर्णपत्रभङ्गा गन्धयुक्तिः भूषणयोजनम् ऐन्द्रजालानि कौचुमारयोगाः हस्तलाघवं चित्रशाकापूपाश्चेति भक्ष्यविकारक्रियापानकरसरागासवयोजनं सूचीवानकर्म सूत्रक्रीडावीणाडमरुकवाद्यानि प्रहेलिका प्रतिमाला दुर्वाचकयोगाः पुस्तकवाचनं नाटकाख्यायिकादर्शनं काव्यसमस्यापूरणं पत्रिकाचित्रवाचनविकल्पाः तर्ककर्माणि तक्षणं वास्तुविद्या रूप्यरत्नपरीक्षा धातुवादः मणिरागज्ञानम् आकरज्ञानं वृक्षायुर्वेदयोगाः मेषकुक्कुटलावकयुद्धविधिः शुकसारिकाप्रलापनम् उत्सादनं केशमार्जनकौशलम् अक्षरमुष्टिकाकथनं म्लेच्छितकलिकल्पाः देशभाषाज्ञानं पुष्पशकटिकानिमित्तज्ञानं यन्त्रमातृकाः धारणमातृकाः सम्पाठ्यं मानसीकाव्यक्रिया अभिधानकोशः छन्दोज्ञानं क्रियाविकल्पाः एताश्चतुःषष्टिकलाः तत्र, गीतं गानशिक्षा गीतकारणं रागभेदाः तानमात्रादिरचनाप्रकाराः साधकबाधकतानानास्परिज्ञानं च एवमेकस्य गीतस्य तथैव वाद्ये चतुर्विधवादनसामर्थ्यं ज्ञानं तदाधाररचनं तद्भेदानां कारणज्ञाने साधकबाधकज्ञानं च पञ्चप्रकाराः सर्वत्र नृत्यमभिनयमात्रं नाट्यं ग्रन्थरूपम् आलेख्यं चित्रकर्म तत्र ये विशेषाः के कुत्सिताः भ्रामकाश्च सर्वे कप्रत्ययेन सङ्गृहीताः तेषां छेद्यं यथा छेदनप्रकारेण छिन्ने वैचित्री भवति तथा चणकाद्विदळेहस्तिशतलेखनं तण्डुलानां कुसुमानां च आरात्रिकाकारेण बलिविकाराः पूजायां वा स्थापनप्रकाराः पुष्पास्तरणं स्पष्टं शय्यादौ दशनवसनानां राग भेदाः अधरोष्ठयोः लक्षणपरिज्ञानं रसार्थमेषा परीक्षा मणिभूमिकाकर्म यथा मणयो यत्र यादृशाः अपेक्ष्यन्ते तत्र यादृशी भूमिः तत्क्रिया शयनं शय्यास्थानं तस्य रचनमुदकवाद्यं यथा स्वतएवोदके नादाः स्पष्टा भवन्ति उदकाघातः उदकस्याघातः यथा आहतमुदकमुपरिगच्छति अधोगच्छति विपरीतं च गच्छति चित्रा योगाः विचित्राः प्रकाराः सर्वत्र माल्यानां पुष्पाणां रचने विविधाः प्रकाराः शेखरस्य शिरसः केशबन्धस्य आपीडयोजनं केशादीनां पुष्पाणां मुकुटस्य वा योजनप्रकाराः नेपथ्ययोगाः नटशाळादिनिर्माणप्रकाराः कर्णपत्राणां कर्णाभरणपत्राणां भङ्गः अनेके भेदाः गन्धयुक्तिः गन्धयुक्तिश्चन्दनादेः पुष्पच्छायाकारेण निर्माणं नाना सुगन्धनिर्माणं वा भूषणानां योजनप्रकाराः ऐन्द्रजालाः मायादर्शनप्रकाराः यासु माया सु [illegible] विंशतिभेदा एते कौचुमारयोगाः बहुरूपप्रकाराः हस्तसाघवं स्पष्टं चित्रं शाकपूपाश्चेति प्रायेण शौल्यसङ्कोचौ भक्ष्यविकाराणां क्रिया पानकानां ये रसाः रागाश्च तेषामासावता मादकता [illegible] निर्देशः पानकानां रसानाम् आसवानां रागाणां सूचीवानकर्म सूच्या वानं सीवनमिव परिवयनं तत्र नानाप्रकाराः योजनप्रकारा वा सूत्रक्रीडा सूत्रैर्नानाविधा क्रीडा यथा भ्रमरादि भ्रामणं सूत्रोपरि चलनं च बन्धनप्रकारो वा वीणाडमरुकवाद्यानां वादनप्रकाराः प्रहेलिका कूटवाक्यानां परिज्ञानं प्रतिमाला वस्तूनामनुकरणं दुर्वाचकयोगाः चतुरक्षरादिप्रकाराः पुस्तकवाचनमतिशीघ्रमविद्यमानानपि वर्णान् योजयित्वा वाचनं नाटकाख्यायिकादर्शनं दीर्घव्यवधायक पदे नाटकाख्यायिकायां नाटकस्थितकथायाः प्रदर्शनं वस्त्रादिनिर्माणे वा नाटकस्थ कथायाः प्रदर्शनं काव्यं अविद्यमाने पदे तस्यैव पदस्य पूरणं कविकर्मानुसारेण वा समस्या पूरणं पत्रिकाचित्रवाचनविकल्पाः नाना विधाः पत्रिकाः व्यस्तसमस्तमेषयुद्धादिप्रकाराः तत्र विविधाः कल्पाः तर्ककर्माणि तर्केणैव सर्वपदार्थज्ञानं कृतिश्च तक्षणं चन्द्रावर्त्तादिप्रकारेण शिल्पभेदाः वास्तुनिर्माणं वास्तुविद्या गृहनिर्माणप्रकाराः रूप्यरत्नपरीक्षा रूप्याणां रत्नानां च परीक्षा इति त्रिंशतिः धातुवादः प्रसिद्धः मणिरागज्ञानं मणिषु रागनिर्माणज्ञानम् आकरज्ञानं राशिं दृष्ट्वैव एतावदस्तीति । वृक्षाणामायुर्वेदयोगाः वृक्षाणां जीवनप्रकाराः फले निर्बीजकरणं वृक्षान्तरात्फलोत्पादनमित्यादि मेषाणां कुक्कुटानां लावकानां युद्धप्रकाराः शुकसारिकादीनामशिक्षितानामपि प्रकर्षालापप्रकारः उत्सादनं यस्य कस्य चिद्युद्वेगोत्पादनेनान्यत्र गमनप्रकारः केशमार्जनं कौशलं स्पष्टमक्षरमुष्टिका कथनम् अक्षराणां परदृष्टानां मुष्टिकादीनां च मुष्टिकास्थितपदार्थानां कथनं म्लेच्छितकलिकल्पाः म्लेच्छितकल्पाः कलिकल्पाश्च यथा शत्रुर्म्लेच्छितो भवति सर्वैः सह कलिं च करोति तथोपायाः देशभाषाज्ञानं सर्वदेशेषु भाषापरिज्ञानं पुष्पशकटिकापुष्पैरेव शकटविमानादि रचनाप्रकारः निमित्तज्ञानं काकादिभिरन्यैर्वा भाव्यर्थपरिज्ञानं यन्त्रमातृका प्रतिमादिचालनभाषणादिप्रकाराः करपल्लवीवाधारणमातृका वस्त्रादिपदार्थधारण एव आदिमध्यान्तवर्णभेदमातृकावर्णपरिज्ञानं भवति सरूपाठ्यमभेद्यस्यापि हीरकादेर्द्वैधीकरणप्रकारः मानसी काव्यक्रिया मानसिकसमस्यापूरणमभिधानकोशः अन्योच्चारितानां सर्वेषामेव पदानां क्रमेण पुनरुच्चारणसामर्थ्यं पुरुषं दृष्ट्वैव तस्य छन्दोज्ञानमयमेवं कुर्वति । कामिन्यादीनां मनोज्ञानं वा क्रियाविकल्पाः सर्ववस्तुषु या प्रक्रिया पूर्वसिद्धा तामनादृत्य अन्यैरेव प्रकारैस्तन्निर्माणं विंशतिः कामादिसान्त्वनं उद्बुद्धानां शमनं तदुद्बोधः शत्रुमित्रकरणं सर्ववस्तूनामन्यथाकरणं प्रतिभानेन च तत्र उक्ताः पूर्वोक्तेषु वा अवान्तरभेदाः कश्चिद्ग्राह्याः ततो गुरवे तु वरं दत्त्वेति श्रुतेः । गुरुदक्षिणादेयेति दक्षिणार्थं भवस्यभीष्टा दक्षिणा ग्राह्येति छन्दयामासतुः स्वाच्छन्द्यं संपादयामासतुः विद्यासमाप्त्यनन्तरं या दक्षिणा गुरवे दीयते तथा कृत्वा स्वाच्छन्द्यम् "उपनीय तु यः शिष्यं वेदमध्यापयेद्द्विजः । सरहस्यं तदङ्गं च तमाचार्यं प्रचक्षते" इति । यद्यप्युभौ वरद्वयं न दास्यतस्तथापि उभयोः कर्तव्यमिति स्वच्छन्ददानं निरूप्यते । नृपेति । तादृशा राज्ञः स्थाने समागत्य कृतार्थो भवन्तीति अनुभवार्थं गुरुस्तु बहूनेवाध्यापयामास नैवं विप्रो कदाचित् दृष्टौ अत एताभ्यामलौकिकमपि दातुं शक्यत इति निश्चयं कृतवान् पत्नी च कदाचिद्गां दुहन्ती दोहनपात्रं विस्मृत्य सन्ध्यावन्दनार्थं नियमेनोपविष्टं भगवन्तं प्रार्थितवती तदा भगवान्नियमोल्लङ्घने गुरुपत्नीवाक्योल्लङ्घने च दोषं दृष्ट्वा उपविश्यैव हस्तं प्रसार्य दोहनपात्रं दत्तवान् तदा अनुत्थितं भगवन्तं स्वनिकटे दोहनपात्रं च दृष्ट्वा विस्मिता आसीदिति पुराणान्तरप्रसिद्धिः ॥ ३६ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

सरहस्यं मन्त्रदेवताज्ञानसहितं धर्मान् मन्वादिशास्त्राणि न्यायपथान् मीमांसादीन् आन्वीक्षिकीं तर्कविद्यां सन्धिनीं

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

विग्रहो यानमासनं द्वैधमाश्रय" इत्यमरोक्तां षड्विधां राजनीतिम् ॥ ३४ ॥ ३५ ॥

तावतीश्चतुःषष्टिकलाः ताः शैवन्तन्त्रे द्रष्टव्याः छन्दयामासतुः कामप्यभीप्सितां दक्षिणां गृहाणेत्युक्त्वा तत्प्राप्तीच्छां कारयामासतुरित्यर्थः। अभिप्रायवशौ छन्दावित्यमरः ॥ ३६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

गुरुरपि शुद्धो भावो ययोस्तु ताभिरनुवृत्तिभिः तुष्टः अङ्गैः "छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते। ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते। शिक्षा घ्राणन्तु वेदस्य मुखं व्याकरणं स्मृत" मिति षड्भिः उपनिषद्भिश्च सहितान् ॥ ३३ ॥

सरहस्यं मन्त्रदेवताज्ञानसहितं धर्मान् मन्वादिधर्मशास्त्राणि न्यायपथान् मीमांसादीन् आन्वीक्षिकीं तर्कविद्यां षड्विधां सन्धिविग्रहयानासनद्वैधीभावसमाश्रयरूपां राजनीतिं प्रोवाचेत्यनुषङ्गः ॥ ३४ ॥

हे नृप! तावपि सकृन्निगदमात्रेण एकदैवोच्चारणमात्रेण जगृहतुः ॥ ३५ ॥

अहोरात्रैश्चतुःषष्ट्या संयत्तौ तावतीः कलाः संयत्तौ रामकृष्णौ चतुःषष्टिसंख्याकैरहोरात्रैस्तावतीः चतुःषष्टिः कला विद्याः समगृह्णतुरित्यन्वयः। ताश्चोक्ता विद्यासङ्ग्रहनिबन्धे—

मुक्तिविद्या समाख्याता पराऽनेककला यथा।
मुमुक्षूणां हिता श्रेष्ठा परमार्थप्रदायिनी ॥
भक्तिविद्या तथा चात्र बुभुक्षूणां हिता मता।
भोगेच्छुस्तामनाश्रित्य किङ्करिष्यति बालिशः ॥
तत्र षष्टिकलास्तास्तु ह्युद्देशेन वदाम्यहम्।
सन्ति विद्याकलास्तिस्रो गान्धर्वेषु प्रतिष्ठिताः ॥
उत्तमा गीतसंज्ञास्ति १ वाद्यसंज्ञास्तु मध्यमा २।
नृत्याख्या तु कनिष्ठास्ति ३ गृहीता नारदादिभिः ॥
नाट्यविद्या ततो भिन्ना या गृहीता शिवादिभिः ४।
आलेख्याख्या कला ज्ञेया त्रिलोकीलिखिता यया ५ ॥
ज्ञेया विशेषकच्छेद्यविद्या यस्यां विशेषतः ६।
छेद्यते ६ न्या कला यत्र तण्डुलादिबलिक्रिया ७ ॥
पुष्पास्तरणसंज्ञान्या ८ दशनाद्यङ्गरञ्जना ९।
मणिभूमिक्रियाख्या च १० शयनरचनात्मिका ११ ॥
ज्ञेया चोदकवाद्याख्या १२ अन्या चोदकघातकः १३।
चित्रयोगसमाख्या च कला ज्ञेया बुभुक्षुभिः १४ ॥
माल्यग्रथनभेदाख्या १५ शेखरापीडयोजना १६।
नेपथ्यकक्रियाख्या च कला ज्ञेया सुबुद्धिभिः १७ ॥
या कर्णपत्रभङ्गाख्या १८ युक्तिर्यान्या सुगन्धिका १९।
भूषणयोजनाख्या च २० ऐन्द्रजालक्रिया तथा २१ ॥
कौचुमारक्रिया चापि २२ हस्तलाघवसंज्ञिका २३।
चित्रशाकस्वपूपादिविकारजननक्रिया २४ ॥
चित्रशाकस्वपूपादिविकारजननाक्रिया २५।
रसानामासवस्यापि पानके योजना तथा २५।
सूचीक्रिया २६ तथा सूत्रक्रीडाख्या च कलापरा २७ ॥
प्रहेलिका कला ज्ञेया २८ प्रतिमाला कला तथा २९।
या दुर्वाचकयोगाख्या कलान्या परिकीर्तिता ३० ॥
पुस्तकवाचनाख्या च ३१ नाटकाख्यायिका गतिः ३२।
ज्ञेया काव्यसमस्यासु पूरणाख्या कलापरा ३३ ॥
पट्टिकावेत्रवाणादिविकलाख्या तथापरा ३४।
तर्ककर्मसमाख्या च ३५ तक्षणाख्या परा मता ३६ ॥
वास्तुविद्या च ३७ रूप्यादिपरीक्षाख्यकलापरा ३८।
ज्ञेया च धातुवादाख्या ३९ मणिरागाद्यभिज्ञता ४० ॥
आकरज्ञानसंज्ञान्या कला प्रोक्ता मनीषिभिः ४१।
वृक्षायुर्वेदयोगाख्या कला चात्र प्रकीर्तिता ४२ ॥
मेषादियुद्धयुक्तिश्च ज्ञातव्या कलहप्रियैः ४३।
या शुकसारिकादीनां प्रलापनक्रिया कला ४४ ॥
उत्सादनक्रिया चापि ४५ केशानां मार्जनक्रिया ४६।
अक्षरमुष्टिकाप्रोक्तिः कला ज्ञेया विवेकिभिः ४७ ॥
म्लेच्छिततर्कभेदाख्या ४८ देशभाषा विधारणा ४९।
पुष्पशकटिकाहेतुबोधाख्या च कलापरा ५० ॥
यन्त्रमातृकया साकं ज्ञेया धारणमातृका ५१।
सम्पाठ्याख्या कलाचान्या ५२ मानसी काव्यसुक्रिया ५३ ॥
अभिधानकोशविद्या च ५४ तथा छन्दोऽवधारणा ५५।
क्रियाविकल्पसंज्ञान्या ज्ञेया च सूक्ष्मबुद्धिभिः ५६ ॥
या छलितकयोगाख्या ५७ वस्त्रगोपनसंज्ञिका ५८।
द्यूतविशेषविद्या च ५९ कर्षक्रीडा कलापरा ६० ॥
वालक्रीडनकाख्या च ६१ विद्या वैनायकीपरा ६२।
विद्या वैजयिकाख्या च ६३ ज्ञेया वैतालिकापरा ६४ ॥

इतिचतुःषष्टिकलाः आचार्यं गुरुदक्षिणया छन्दयामासतुरुपलोभितवन्तौ ॥ ३६ ॥

भाषा टीका।

वे द्विजोत्तम गुरु उन दोनों भ्रातों पर उनके शुद्ध भावों की अनुवृत्ति से संतुष्ट होकर अंग उपनिषदों के सहित सब वेदों का उपदेश करते भये ॥ ३३ ॥

मंत्रादि कों के सहित धनुर्वेद मनुस्मृति आदि धर्मशास्त्र न्याय मीमांसादितर्क विद्या संधि आदि छै प्रकार राज नीति को दिये ॥ ३४ ॥

हे राजन्! सब विद्याओं के प्रवर्तक सबनरों में श्रेष्ठ उन दोनों भ्रातों ने एक वखत के कहने ही से सब का ग्रहण कर लिया ॥ ३५ ॥

हे राजन्! चौसठि अहो रात्रों में चौसठ कला की विद्याओं को ग्रहण करलिये फिर गुरु दक्षिणा देने को आचार्य से प्रार्थना करते भये ॥ ३६ ॥

द्विजस्तयोस्तं महिमानमद्भुतं संलक्ष्य राजन्नतिमानुषीं मतिम् ।
सं मन्त्र्य पत्न्या स महार्णवे मृतं बालं प्रभासे वरयाम्बभूव ह ॥ ३७ ॥
तथेत्यथारुह्य महारथौ रथं प्रभासमासाद्य दुरन्तविक्रमौ ।
वेलामुपव्रज्य निषीदतुः क्षणं सिन्धुर्विदित्वाऽर्हणमाहरत्तयोः ॥ ३८ ॥
[1]तमाह भगवानाशु गुरुपुत्रः प्रदीयताम् । [1] तमाह वरुणो देव इति वि० पाठः
योऽसाविह त्वया ग्रस्तो बालको महतोर्मिणा ॥ ३९ ॥

समुद्र उवाच ।

नैवाहर्षमहं देव ! दैत्यः पञ्चजनो महान् ।
अन्तर्जलचरः कृष्ण ! शङ्खरूपधरोऽसुरः ॥ ४० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

प्रभासे क्षेत्रे महार्णवे मृतं बालं वरयामास ॥ ३७ ॥
ईश्वराविति विदित्वा समुद्रस्तयोरर्हणमाजहार ॥ ३८-३९ ॥
पञ्चजनस्त्वसुरोऽहार्षीत् स च महान्ममासाध्य इत्यर्थः ॥ ४०-४३ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

प्रभासे मृतमिति । तीर्थयात्रायां पितृभ्यां सह तत्र महाशिवक्षेत्रे गतस्य बालतया जळे क्रीडतः शङ्खासुरेण ग्रसनादिति ज्ञेयम् ॥ ३७ ॥

तथेति । स्वीकृत्येत्यर्थः । अथानन्तरं सद्य एवेत्यर्थः । महारथौ वीरप्रवरौ इति सर्वायुधसाहित्यादिकमुक्तं दुरन्तविक्रमौ अनन्तपराक्रमौ वेळां समुद्रतीरं निषेदतुरुपाविष्टौ निषीदतुरिति पाठस्त्वार्षः अर्हणममूल्यरत्नादिकम् ॥ ३८ ॥

भगवानित्यैश्वर्यं प्रदर्शयन्नित्यर्थः । असौ प्रकर्षेणाविकृतशरीरत्वादिना दीयतां देवरत्वात्तथा शक्तेरिति भावः । इह प्रभासे ॥ ३९ ॥

समुद्र उवाचेति क्वचिदस्ति क्वचित्तु न किन्तु टीकाकृद्भिस्तद्वाक्यत्वेन न स्पष्टीकृतं नचेत्यर्द्धकं नैवेति क्वचित् पाठः । देव हे क्रीडापरेति तं सर्वं जानन्नपि यदेवमाज्ञापयासि सयमेका तव क्रीडा इति भावः । अत्र दैत्य इत्यस्यैव असुर इति टीका ॥ ४० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

द्विज इति हे राजन् ! द्विजः सान्दीपनस्तयो रामकृष्णयोस्तं चतुःषष्टिदिवसैस्तावत्कलाग्रहणात्मकमद्भुतं महिमानममानुषीं मनुष्येष्वसम्भावितां गतिं चेष्टां चावलोक्य वा महापुरुषौ इमौ इति निश्चित्येति शेषः । पत्न्या सहालोच्य प्रभासे क्षेत्रे महार्णवे मृतं बालं स्वं पुत्रमयाचत स्मेति विस्मये मृतप्रत्यानमसम्भावितामिति विस्मीयत ॥ ३७ ॥

तदा तथेत्यङ्गीकृत्य महारथौ रामकृष्णौ रथमारुह्य दुरन्तोऽपारो विक्रमो ययोस्तौ प्रभासं सम्प्राप्य तत्र वेलां तीरं समुद्रस्येति शेषः । उपव्रज्य क्षणं निषीदतुः उपविष्टवन्तौ तदा सिन्धुः समुद्रो विदित्वा ईश्वराविमाविति ज्ञात्वा तयोरर्हणां पूजामाजहार समर्पयामास चकारेति यावत् ॥ ३८ ॥

ततः भगवान् सिन्धुमाह । किमिति । इह यो बालको गुरुपुत्रः त्वया कर्त्रा महतोर्मिणा तरङ्गेण ग्रस्तोऽन्तर्द्धापितः सोऽस्मद्गुरुपुत्रः आशु प्रदीयताम् इति ॥ ३९ ॥

इत्थमुक्तः प्राह सिन्धुः । नैवेति । हे देव तं द्विजपुत्रमहं नाहार्षं नापहृतवान् । किन्तु हे कृष्ण ! पञ्चजनाख्यो दैत्योऽहार्षीत्स च महान्ममासाध्य इत्यर्थः । तदेवाह सोऽसुरोऽन्तर्जलचरः शङ्खाकृतिधरश्चास्ते विवेक्तुमशक्य इति भावः । तेन पञ्चजनेन नूनमपहृत इति एतत्सिन्धोर्वचः श्रुत्वा श्रीकृष्णः ॥ ४० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

महार्णवे प्रभासे तीर्थे ॥ ३७ ॥

वेलां तीरसीमाख्यम् ॥ ३८ ॥

योऽसौ गुरुपुत्रः त्वया महतोर्मिणा ग्रस्तः स प्रदीयतामित्यन्वयः ॥ ३९ ॥

तं कृष्णम् शङ्खमत्स्यरूपधरः ॥ ४०-४३ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

अत उभयोरपि भगवन्माहात्म्यपरिज्ञानादलौकिकमेव याचनीयमिति निश्चित्य तथा याचितवानित्याह । द्विज इति । स हि यज्ञादीनां चिकीर्षुः पुत्रवांश्चाधिकारी तस्मिन्नुपहृते स्थगितः विचार्य च वंशकर्तृत्वेन तथोत्पादितः ईश्वरकृपाव्यतिरेकेण कालेन तदुपहृतं तथापि वेदप्रमाण्यात् ईश्वरेच्छामज्ञात्वा कालं प्रतीक्षन्नेव स्थितः अतस्तस्य तदावश्यकमिति ज्ञापयितुं द्विज इत्युक्त तृतीयजन्मापेक्षितं तयो रामकृष्णयोः तदलौकिकं महिमानं श्रुतं च दृष्टं च अद्भुतश्च महिमा दृष्टः तौ पाठयन् स्वयं ज्ञातवान्नहि पूर्वमयमेतादृशः स्थितः अन्यथा ऋषिभ्योऽप्यधिकः स्यात् अतस्तौ पाठयन् स्वयमेव पठितवान् वैपरीत्यमेवाद्भुतत्वं

श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी ।

संलक्षयति स ह्यूहापोहकुशलः स्वस्य पश्चात् पूर्णज्ञानं भगवत्कृतमेवेति निश्चित्य लोकन्यायेन भगवदिच्छयैव गुरुत्वं स्थापयितुं महार्णव एव मृतं पुत्रमयाचतेति सम्बन्धः । राजन्निति क्लिष्टत्वादादरेण सम्बोधनं विश्वासार्थं च किञ्च मतिरप्यलौकिकी न त्वलौकिक एव भावः यन्त्रादिष्विव अतः असाध्यमपि ज्ञास्यति करिष्यतीति निश्चित्य दृष्टादृष्टस्य साधनस्य विद्यमानत्वात् पत्न्या च यज्ञकर्मयोग्यया सम्मन्त्र्य एतदेव प्रार्थनीयमिति भावयतः सः प्रसिद्धः तदाकाङ्क्षी तदुपपादितं महार्णवे न तु सागरे मृतं ते प्रभासयात्रायां बहव एव गताः तत्र सकुटुम्बगमने अग्निकुण्डे बालको निमग्नः ननु कोऽयं निर्बन्धः मृत्युकालादीनां सत्यतापि स्यात्तत्राह । बालमिति । तत्रोत्पन्नः स्नेहः स निवृत्त इति प्रभासे मृतः पुनर्नायातीति मन्त्रादिनापि तदानयनमशक्यं वरयाम्बभूव वरत्वेन याचितवान् गुरुत्वे तु वरं दद्यादिति वरदानमावश्यकमिति हेत्याश्चर्यं विदितसर्वतत्त्वाः किं प्रजया करिष्याम इति श्रुतिवशात् प्रजाव्यतिरेकेणापि कार्यसिद्धिः तथापि याचितवानिति निरोधो भगवता तस्यापि कर्त्तव्य इति तथैव याचितवान् पुनः ॥ ३७ ॥

अलौकिके दत्ते स्वात्मानं ज्ञास्यतीति गोपनार्थं वृतोऽपि कालादिमर्यादापि दूरीकर्त्तव्येति कदाचिन्न करिष्यतीत्याशङ्क्याङ्गीकारमाह । तथेति । ओमिति वक्तव्या आकृतिरेव तुल्येति समानरूपं सङ्घातान्तरमेवानेष्यतीति शङ्काव्यावृत्त्यर्थं य एव सङ्घातः यादृशस्तथैवानेतव्य इति तथेति स्वाङ्गीकृता एतस्य शिष्यभावेन सम्भवतीति ऐश्वर्यं भावमाश्रित्य भिन्नप्रक्रमेण तदर्थं गतावित्याह । अथेति । महारथं सर्वगामिनं स्वयमपि महारथौ रथशिक्षायां निपुणौ एकमेव रथं समारुह्य पर्यायेण सारथित्वं सम्पादयन्तौ शीघ्रमेव प्रभासमासाद्य समुद्रादपि भयाभावायाह । दुरन्तेति विक्रमो ययोरिति । ततः समुद्रवेलामुपव्रज्य श्रापयन्ताविव क्षणमुपसेदतुः ततः सिन्धुर्भगवन्तं जामातरं गृहपतिं बन्धकं च ज्ञात्वा अर्हणं पूजां तयोराहरत् ॥ ३८ ॥

श्रेधा हि तस्य बालकस्य विनियोगः वियोजनं प्राणापानयोः समुद्रेण कृतं शरीरभोगः पञ्चजनेन गृहीतः अन्यश्च सङ्घातः सत्ववशात्पूर्वसूक्ष्मावस्थया सतः स जीवः यमपुर्यां तिष्ठति भगवता च तावती भूमिः समुद्रात् पृथक्कर्त्तव्या लीलौपयिकं भवति न वेति विचारणीयम् अतः समुद्रं प्रति भगवान् किञ्चिदुवाचेत्याह । तमाहेति । ननु पूजया तत्सापेक्षः सङ्कोचं च प्राप्य कथमेवमाज्ञां दत्तवानित्याशङ्क्याह । भगवानिति । स हि सर्वैश्वरः सेवकः सङ्कोच इति तथैवाज्ञां दत्तवान् आशु गुरुपुत्रः प्रदीयतामिति । मम स्थाने केति न वक्तव्यम् आधिदैविकं रूपं प्रदर्शयन्नाह । योऽसाविति । असौ यः अभिज्ञानार्थं प्रदर्शनं क्रिययापि समागत इत्याशङ्कायामाह । त्वया ग्रस्त इति । ननु ब्राह्मणः कथं ग्रासमर्हति तत्राह । बालक इति । अनुपनीतः ग्रासश्च न बुद्धिपूर्वक इत्याह । महतोर्मिणेति । महता तरङ्गेण तस्मात्तु दण्ड्यः ॥३९॥

प्रत्युत्तरमाह समुद्रः । तं नाहार्षमिति । शरणागतः पञ्चजन इति भगवता पेक्यात्समुद्र एव निरूक्तः त्वया ग्रस्त इति सुतस्थित्यर्थमेवाह प्रयोजकः न तु तत्कृतगुणदोषयोरिति तं पृथक्कृत्य आत्मनो दोषाभावमाह । तं नाहमहार्षम् ऊर्मयः क्रूरा भवन्ति न हि कदा दूरणे साधनत्वेन समागताः किंतु स्वभावत एव निमित्तत्वं जातमिति न दोष इति समुद्राभिप्रायः साक्षात्कर्तारं निर्दिशति । दैत्यः पञ्चजन इति । अत्र विश्वासार्थं देवेति सम्बोधनं प्रत्यक्षेणापि सर्वं पश्यति स कथं न निराकृत इत्याशङ्कायां दैत्य इत्याह । दैत्या हि बहवो बलिष्ठाश्च तत्राप्ययं पञ्चजनः वसवो रुद्रा आदित्या विश्वेदेवा मरुत इति पञ्चानामयमेवानुकल्प इति पञ्चजनरूपः पञ्चसम्वत्सरात्मको वा दैत्यरूपः पञ्चपर्वाविद्यारूपो वा तत्रापि महान्मयापि मारयितुमशक्यः तमसाध्यं निरूपयितुं स्वरूपमुक्तवान् स्थानं निरूपयति । अन्तर्जलचर इति । जलमध्य एव चरति न कदाचिदपि बहिरायाति रूपमात्रं दृष्ट्वा भीतः सन् परमन्यथा वदति । ननु स्वरूपं जानातीति शङ्कां वारयितुमाह । कृष्णेति । परिज्ञानार्थमाकृतिमाह । शङ्खरूपधर इति । अन्यथापि स वध्य इति वक्तुं तद्दोषमाह । असुर इति । सुरप्रतिपक्षी ॥ ४० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

प्रभासे मृतमिति । तत्र महाशिवक्षेत्रे बालतया जले क्रीडतस्तस्य शङ्खासुरेण ग्रसनादिति ज्ञेयम् ॥ ३७-३९ ॥

पञ्चजनोऽहार्षीदिति शेषः । स च महान् ममासाध्य इत्यर्थः ॥ ४० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

सः द्विजोऽपि तयोः रामकृष्णयोः अद्भुतमचिन्त्यं महिमानं संलक्ष्य प्रभासे क्षेत्रे महार्णवे मृतं बालं वरयांबभूव वरयामास ॥ ३७ ॥

प्रभासं क्षेत्रमासाद्य वेलां सिन्धुतीरमुपव्रज्य क्षणं निषीदतुः सिन्धुरपि भगवन्तौ स्वतीरस्थौ विदित्वा तयोरर्हणमाजहार ॥ ३८ ॥ ३९ ॥

पञ्चजनो दैत्यः अहार्षीत् शङ्खरूपधर इति "तमद्भुतं बालकमम्बुजेक्षणं चतुर्भुजं शङ्खगदाद्युदायुधम्" । इत्यादिषु प्रोक्तमनादिसिद्धम् त्वत्प्राप्त्यर्थं मयि वसन्तं पाञ्चजन्यमभिश्रित्य वर्तते इत्यर्थः । नन्वसुरस्य मच्छङ्खाश्रयणे कोऽधिकार इत्यत आह । महानिति । कश्चिद्भवद्भक्त एवेति भावः ॥ ४०—४२ ॥

भाषा टीका ।

हे राजन् ! उन गुरु ब्राह्मण ने उनकी अद्भुत महिमा को तथा अति मानुष बुद्धि को देखकर पत्नी के साथ सलाह करके प्रभास क्षेत्र में मरे हुये अपने बालक के लाने का वर मांगा ॥ ३७ ॥

तब उस बात को सुन कर अंगीकार करके महारथी दोनों रथ पर चढ़के बड़े विक्रम से प्रभास में पहुंच समुद्र के किनारे पर क्षण मात्र स्थित भये तब समुद्र ने खबर पाकर उन दोनों का पूजन किया ॥ ३८ ॥

भगवान् उस समुद्र से बोले कि श्रीगुरु के पुत्र को शीघ्र देओ जिस बालक को कि तुमने यहां पर बड़े लहरों से ग्रसित कर लिया है ॥ ३९ ॥

आस्ते तेनाहतो नूनं तच्छ्रुत्वा सत्वरं प्रभुः ।
जलमाविश्य तं हत्वा नापश्यदुदरेऽर्भकम् ॥ ४१ ॥
तदङ्गप्रभवं शङ्खमादाय रथमागमत् ।
ततः संयमनीं नाम यमस्य दयितां पुरीम् ॥ ४२ ॥
गत्वा जनार्दनः शङ्खं प्रदध्मौ सहलायुधः ।
शङ्खनिर्ह्रादमाकर्ण्य प्रजासंयमनो यमः ॥ ४३ ॥
तयोः सपर्यां महतीं चक्रे भक्त्युपबृंहिताम् ।
उवाचावनतः कृष्णं सर्वभूताशयालयम् ।
लीलामनुष्य ! हे विष्णो ! युवयोः करवाम किम् ॥ ४४ ॥

भाषा टीका ।

समुद्र बोला हे देव ! मैने नहीं हरण किया है किंतु हे कृष्ण ! पञ्चजन नामा एक दैत्य है सो बडा भारी है सो जल के भीतर रहता है शंख के रूप को धारण किया है ॥ ४० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

सपर्यां पूजाम् सर्वेषां भूतानामाशया अन्तःकरणानि तान्यालयो निवासो यस्य तम् ॥ ४४ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

जलमिति श्रीशुकोक्तिः । आविश्य सक्षोभमन्तः प्रविश्य अर्भकं तदस्थीन्यपीत्यर्थः । तदन्वेषणञ्च यद्यप्यस्थीन्यपि प्राप्स्यामि तदा गुरुप्रसादेन जीवयिष्यामीति समुद्रं प्रति लौकिकलीलाव्यञ्जनार्थम् । एकवचनादेकाक्येव श्रीकृष्णः प्रविष्ट इति ज्ञेयं तथाच श्रीविष्णुपुराणे । "इत्युक्तेऽन्तर्जलं गत्वा हत्वा पञ्चजनं तु तम् । कृष्णो जग्राह तस्यास्थिप्रभवं शङ्खमुत्तम" मिति । तच्च रथरक्षार्थं श्रीबलदेवस्य तीरे स्थापनात् ॥ ४१ ॥

तदङ्गप्रभवमिति तत्त्वतो विप्रशापापेक्षया नित्यपार्षदेन शङ्खेन दैत्यत्वानुकरणात् जयविजयवत् । अतएवेच्छया श्रीकृष्णहस्तेषु वाद्ययोग्यसूक्ष्माकारोऽप्यभवदिति ज्ञेयम् । अवन्तीखण्डमते तु "ततः पञ्चजनं हत्वा ग्राहरूपं महासुरम् । तन्मध्यस्थं स जग्राह शङ्खं ग्रस्तं हि यत् पुरा । तस्योदरे यदा बालं नातवांस्तं जनार्दनः । यमालयगतं मत्वा तदा वरुणमब्रवीत् । भगवन् ! यादसामीश ! रथो मे दीयतां महान् । येनाहं विहितात्मा हि पश्येऽहं सङ्गरे यमम् । पुराजिरे हता दैत्या दानवा बलगर्विताः । त्वया येन रथेनाद्य मह्यं स दीयतां रथ" इत्यादि । दयितामिति तत्र निवासनिश्चयादित्यर्थः ॥ ४२ ॥

जनार्दनः सर्वनिजजनाभीष्टपूरकः । अतएव हलायुधेनापि सहितस्तस्य तस्य दलप्रकटनमपि तदा ज्ञेयं शङ्खप्रध्वानानन्तरमवन्तीखण्डे त्वेवं । "तेन शब्देन वित्रस्ताः कृतान्तालयवासिनः । नरकान्तर्गता मर्त्याः पापाचारपरायणाः । सुखमापुः प्रशान्ताश्च बहवः कृष्णदर्शनात् । शस्त्राणि कुण्ठतां प्रापुर्यन्त्राणि विविधानि च । विदीर्णानि तदा व्यास वासुदेवस्य दर्शनात् । असिपत्रवनं नाम शीर्णपर्णमजायत । रौरवं नाम नरकमरौरवमभूत्तदा । अभैरवं भैरवाख्यं कुम्भीपाकमपाककम् । शृङ्गाटकमशृङ्गाटं लोहसूच्यप्यसूचिताम् । जगाम जगतामीशे प्राप्ते तत्र जनार्दने । हस्तमात्रतया जाता तदा वैतरणी नृणाम् । नरकान्ते तदा याते तत्र विश्वेश्वरे विभौ । पापक्षयात्ततः सर्वे विमुक्ता नारका नराः । पदमव्ययमासाद्य दृष्ट्वा विष्णुं तमोऽपहम् । विमानायुतसाहस्रैरारूढास्ते समन्ततः । समीक्ष्य पुण्डरीकाक्षं मुक्तास्ते सर्वपातकात् । ततः शून्यं मुने जातं सर्वं निरयमण्डलम् । दर्शनात्तस्य देवस्य विष्णोर्विश्वस्वरूपिण" इति प्रजा संयमन इति भयङ्करत्वमुक्तं सोऽप्यत्र युद्धञ्च सूचितं श्रीविष्णुपुराणे । जित्वा वैवस्वतं यममित्युक्तेः । अवन्तीखण्डे बहुशो वर्णितम् ॥ ४३ ॥

सर्वेति । तस्य तत्र निष्कपटतामपि जानन्तमित्यर्थः विष्णो व्यापकत्वेन विश्वप्रभो इत्यात्मनस्तत्सेवकत्वं सूचितं लीलाप्रधानमनुष्याकारयोः लीलामनुष्य हे इति क्वचित्पाठः किन्तु लीलामनुष्ययोर्विष्णोरित्येव पाठः स्वामिसंमतो लक्ष्यते एकसंबोधनस्याग्रत एव वत्सेत्यत्र करिष्यमाणसमाधानत्वात् किम् करवाम तदाज्ञापयेति शेषः ॥ ४४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

सत्वरं यथा तथा जलमाविश्य तं पञ्चजनं हत्वा तस्योदरे बालं नापश्यत् किं तु तस्य पञ्चजनस्याङ्गाज्जातं शङ्खं पाञ्चजन्याख्यमादाय रथमारुरोह ॥ ४१ ॥

ततो यमस्य प्रियां संयमनीं नामपुरीं गत्वा शङ्खं पाञ्चजन्यं दध्मौ ध्वनयामास ॥ ४२ ॥

तदा प्रजानां शास्तातिलङ्घिनां शास्ता यमः शङ्खनिर्ह्रादमाकर्ण्य आगत्य भक्त्युत्कलितां तयोर्महतीं पूजां चक्रे ॥ ४३ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

सर्वेषां भूतानामाशया हृदयानि तान्यालयानि यस्य तं कृष्णमवनतः सन्प्रोवाच किं हे लीलामनुष्य ! लीलार्थपरिगृहीतमनुष्यसंस्थान ! हे विष्णो ! युवयोः वः किं करवाम किङ्करा वयमित्यर्थः ॥ ४४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

सर्वभूतानामाशयो हृदयस्थानमालयो यस्य स तथा तम् ॥ ४४—४६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

तदङ्गप्रभवमिति । तत्ततो विप्रशापापेक्षया नित्यपार्षदेन शङ्खेन दैत्यानुकरणात् ॥ ४२—५० ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

यदि पञ्चजनोऽपि मृतः स्यात्तदापि व्याजत्वं संभवति तन्निवृत्त्यर्थमाह । आस्त इति । जीवतीत्यर्थः । तेनैवाहृतः तत्र प्रविष्टान्यो मारितवानिति शङ्कान्यावृत्त्यर्थमाह । नूनमिति । नयनमात्रं निषिद्धमिति संयोगविभागः अनेनैव कृत इति एतस्मात्संयोगः बलं च गृहीतं कालादीनां परिणामहेतूनां प्रतिलोमतया निवेशार्थम् उत्तम कार्य भगवान् गृह्णातीत्याह । तच्छ्रुत्वा दूरेमागच्छत्विति शीघ्रमेव समर्थत्वात्स्वयमेकाकी समुद्रजलं प्रविश्य पलायमानं तं शङ्खोद्धारे हत्वा तदुदरे तं बालकं प्राणेन्द्रियजीवसंघातरूपं नापश्यत् ततः कर्मवशात् अन्यत्र गत इति ननु गच्छत्वेऽन्यत्र किमिति जिज्ञासया दृष्टः इतो वेत्याशङ्क्याह । अर्भकमिति । बालकत्वाददनकर्माधीनो भविष्यतीत्याशङ्क्य दर्शनं हेतुः ॥ ४१ ॥

मारणे तु तदङ्गप्रभवं शङ्खमादायेति अत एव भगवतः शङ्खः पाञ्चजन्यः तत्र स्थितान् सूक्ष्मानवयवान् प्रति लोमतया मज्जमक्षणस्थितपर्यंतान् विधाय तान् पुनः यमलोके स्थितः देहे निवेश्य तत्र स्थितान् प्रतिलोमतया पुनरुत्क्रमेणावस्थास्थितान् कर्तुं रथमागमत् यत्र बलभद्रः ततः संयमनीं सम्यग् यमयति सर्वानेवेति मत्स्यदेवतायाः पुरीं नामेति प्रसिद्धां यद्भयात्सर्व एव सन्मार्गरता भवन्ति यद्यपि यमस्य बहूनि स्थानानि सन्ति तथापि सा दयिता ॥ ४२ ॥

अभयार्थमाह । जनार्दन इति । जनामविद्यामेव यत्रार्दयति तत्र कान्यवार्ता तत्रापि सहलायुधः पातालस्यापि पतिः समुद्रवयमस्यापि कृत्यमाह । शङ्खनिर्ह्रादमाकर्ण्येति । शङ्खनादनं तु सर्वप्रबोधनार्थं तत्रत्यानयनार्थं प्रेरणार्थं प्रजानां संयमन इति स्वस्वाधिकारख्यात्यर्थं च ॥ ४३ ॥

भीतः सन् तयोः महतीमेव सपर्यां पूजां वैष्णवत्वाद्भक्त्युपबृंहितां चक्रे स हि कृतार्थः सन् आत्मानं कृतकृत्यं मन्यमानः सन् कार्यविशेषात् समागतइति विज्ञाय स्वापराधनिवृत्तये तव पृच्छति । उवाचेति । नम्रः सन् कृष्णं सदानन्दकरणार्थमागतं वा भयाभावार्थमुक्तं ज्ञात्वैव पृच्छतीति शङ्काव्यावृत्त्यर्थमाह । सर्वभूताशयालयमिति । सर्वभूतानामाशयेष्वन्तःकरणेषु आलयो गृहं यस्य अज्ञात्वा कथं न व्यावर्तयति लीलामनुष्येति लीलामनुष्य हे विष्णो ! युवयोः करवाम किं वस्तुतस्तु विष्णुरेव भगवान् एवं सति युवयोरहं किङ्करः किङ्करवाणीति वा सर्वात्मतया परिगृह्य मर्यादां बाधकत्वेन वक्ष्यति ॥ ४४ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

अन्तर्जलचर इत्यत्रास्ते इति शेषो ज्ञेयः आस्ते तेनाहृतो नूनं तच्छ्रुत्वा सत्वरं प्रभुरिति पद्यार्द्धमधिकं क्वचिदिति वैष्णवतोषणी अत उत्तरत्रापि प्रभुरित्यध्याहार्य्यम् ॥ ४१ ॥

रथमागमदिति । रथं तत्रस्थं बलदेवं च तीरे स्थापयित्वैव स्वयमेकाक्येव कृष्णः सर्वज्ञत्वात्तज्जानन्नपि तदन्वेषणमिषेण स्वीयं शङ्खमान्वैषीदिति ज्ञेयं तदङ्गप्रभवमिति । चिन्मयत्वान्नित्यस्यापि पाञ्चजन्यस्य जयविजयवदसुरत्वमिति केचिदाहुः । "ततः पञ्चजनं हत्वा ग्राहरूपं महासुरम् । तन्मध्यस्थं स जग्राह शङ्खं ग्रस्तं हि यत्पुरे"त्यवन्तीखण्डवचनदृष्ट्या तदङ्गमध्ये प्रकर्षेण भवः स्थितिर्यस्य तमिति च केचिद्व्याचक्षते ॥ ४२ ॥

शङ्खं प्रदध्माविति तद्ध्वनिं श्रावयित्वा सर्वानेव नारकान् जीवान् कृपासिन्धुः संसारादुद्धारेत्यवन्तीखण्डदृष्ट्या यथा "असिपत्रवनं नाम शीर्णपत्रमजायत । रौरवं नाम नरकमरौरवमभूत्तदा अभैरवं भैरवाख्यं कुम्भीपाकमपाचक"मित्यादि अन्ते च "पापक्षयात्ततः सर्वे विमुक्ता नारका नराः । पदमव्ययमासाद्य"त्यादिना वैकुण्ठं च तान् प्रस्थापयामासेत्यपि ज्ञेयम् ॥ ४३ ॥

लीलामनुष्ययोर्विष्णोरिति लीलामनुष्य हे विष्णो इति च पाठद्वयम् ॥ ४४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

सम्यक् यमयतीति संयमनस्तथा सः ॥ ४३ ॥

सपर्य्यां पूजां सर्वभूताशयालयम् सर्वप्राणिहृत्पद्मनिलयम् । हे लीलामनुष्य ! लीलार्थं मनुवंशे आविर्भूत ! ॥ ४४ ॥

भाषा टीका ।

उसने उसका हरण किया है सो अवश्य वह बालक है इस बात को सुनकर प्रभु श्रीकृष्णजी ने शीघ्रता से जल में प्रविष्ट होकर उस शंखासुर को मारकर देखा तो उसके उदर में बालक नाहीं मिला ॥ ४१ ॥

फिर उसके अंग से बने शंख को लेकर रथ पर को आगये तिसके पीछे संयमनी नाम की यमराज की प्रियपुरी को गये ॥ ४२ ॥

बलदेवजी के सहित श्रीजनार्दन भगवान् उहां जाकर शंख को बजाते भये उस शंख के बडे शब्द को प्रजा के दंड देने वाले यम ने सुना ॥ ४३ ॥

तब यमराज ने भक्ति से भगवान् की बड़ी भारी पूजा की फिर सब भूतों के अन्तःकरण में रहने वाले श्रीकृष्ण

श्रीभगवानुवाच ।

गुरुपुत्रमिहानीतं निजकर्मनिबन्धनम् ।
आनयस्व महाराज ! मच्छासनपुरस्कृतः ॥ ४५ ॥
तथेति तेनोपानीतं गुरुपुत्रं यदूत्तमौ ।
दत्त्वा स्वगुरवे भूयो वृणीष्वेति तमूचतुः ॥ ४६ ॥

गुरुरुवाच ।

सम्यक्सम्पादितो वत्स ! भवद्भ्यां गुरुनिष्क्रयः ।
को नु युष्मद्विधगुरोः कामो नामावशिष्यते ॥ ४७ ॥
गच्छतं स्वगृहं वीरौ ! कीर्तिर्वामस्तु पावनी ।
छन्दांस्ययातयामानि भवन्त्विह परत्र च ॥ ४८ ॥

भाषा टीका ।

भगवान् से नम्र होकर बोला कि हे लीला मनुष्य ! हे विष्णो ! आपका हम क्या कार्य करें ॥ ४४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

निजं कर्मैव निबन्धनं यस्य तथाभूतमपि मदाज्ञापुरस्कारेण नयतस्ते न दोष इत्यर्थः ॥ ४५ ॥ ४६ ॥

वत्सेति प्राधान्येनैकस्य सम्बोधनम् गुरोर्निष्क्रयो गुरुदक्षिणा युष्मद्विधयोर्गुरोर्मम कामानां मध्ये कोऽनु कामो ऽवशिष्यते न कोऽपीति ॥ ४७ ॥

हे वीरौ ! ॥ ४८ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

निजं कर्म प्रारब्धलक्षणं निबन्धनमवश्यभोग्यं यस्य तथाभूतमपि हे महाराजेति तदत्यन्तातिक्रममभिप्रेत्य कृपया तत्प्रोत्साहनाय सादरं संबोधनं मदाज्ञानुवर्ती सन् अयं भावः । प्रारब्धस्यावश्यकत्वं मदाज्ञयैव अधुना च गुरुपुत्रानयने मदाज्ञयैव किन्तु विशिष्य साक्षान्मया क्रियमाणत्वादियमेव बलवतीति ॥ ४५ ॥

तथेत्युक्त्वा तेन यमेन उप समीपे आनीतं गुरुपुत्रमिति यादृशो मृतस्तादृशतच्छरीरकमेवेत्यर्थः । अवन्तीखण्डे ह्युक्तं तच्छ्रुत्वा धर्मराजस्तु पुत्रं सान्दीपनेस्तदा । ससर्ज बालरूपं च तदुन्मानं तदुद्भवम् पश्यतां सर्वदेवानां तदद्भुतमिवाभवदि"ति तच्च श्रीकृष्णाज्ञाप्रभावेणैवेति ज्ञेयं मच्छासनपुरस्कृत इत्यनेनैव क्रोडीकृतत्वात् यतो वक्ष्यते एकादशे "मर्त्येन यो गुरुसुतं यमलोकनीतं त्वां चानयच्छरणदः परमास्त्रदग्ध"मिति तत्र तेनैव शरीरेणेति तट्टीका च अत्र तत्प्रभाव एव हि विवक्षित इति तथाच श्रीविष्णुपुराणे" तं पाञ्चजन्यमापूर्य गत्वा यमपुरीं हरिः । बलदेवश्च बलवान् जित्वा वैवस्वतं यमम् तं बालं यातनासंस्थं यथापूर्वं शरीरिणम् । पित्रे प्रदत्तवान् कृष्णो बलश्च बलिनां वर" इति अत्र यातनासंस्थमिति प्राचीनावस्थोक्ता सर्वेषां यातनाशान्तेः अस्य वैकुण्ठागमनं तु भगवदिच्छया सर्व समुद्राहृतं च रत्नादिकं तस्मै दत्तमिति ज्ञेयं तथाच श्रीहरिवंशे "ततः सान्दीपनेः पुत्रं तद्रूपवयसं तदा । प्रादात् कृष्णः प्रतीतात्मा सहरत्नैरुदारधी" रिति स्वशब्देन गुरौ महाभक्तिर्बोध्यते अतः परामपि दक्षिणां वृणीष्वेति भूयः पुनरूचतुः तच्च युक्तमेवेत्याशयेनाह । यदूत्तमाविति । तादृशतद्धर्मप्रचारार्थं यदुकुलेऽवतीर्णत्वादित्यर्थः ॥ ४६ ॥

वत्सेति स्नेहविशेषाच्छ्रीकृष्णं प्रति तथा सम्बोधनं युष्मद्विधानामपि किमुत युवयोर्गुरोरित्यर्थः ॥ ४७ ॥

स्वगृह इति यद्यप्येतन्मद्गृहमपि युवयोरेव गृहं तथापि तत्र केवलनिजाभिमानात् स्वीये माथुरागृहे इत्यर्थः । स्वगृहमिति पाठः क्वचित् हे वीराविति तादृशदानात्तादृशशौर्याच्च ततस्तद्धादीन् प्रणम्य गच्छन्तावाशिषाभिनन्दयति । कीर्त्तिरिति ॥ ४८ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

को नु इति युष्मद्विधगुरोः युष्मद्विधानां गुरोः ॥ ४७—५० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

इत्थमुक्तः प्राह भगवान् । गुरुपुत्रमिति । इह त्वत्संनिधावानीतं त्वद्भटैरिति शेषः । निजकर्मनिबन्धनं स्वकर्माधीनं स्वकर्मणेह प्रापितमप्यस्मद्गुरुपुत्रं हे महाराज ! यम मच्छासनपुरस्कृतस्त्वमानय मदाज्ञापुरस्कारेणानयतस्तत्र न दोष इति भावः ॥ ४५ ॥

तथेत्यङ्गीकृत्य तेन यमेनोपानीतं गुरुपुत्रमादायागत्य स्वगुरवे दत्त्वा पुनर्वरान्तरं वृणीष्वेत्यूचतुः ॥ ४६ ॥

एवमुक्तः प्राह द्विजः । सम्यगिति । हे वत्सौ भवद्भ्यां गुरुनिष्क्रयः गुरुदक्षिणा सम्यक् सम्पादितः युष्मद्विधयोर्गुरोर्मम कामानां मध्ये को नु कामोऽवशिष्यते न कोऽपि ॥ ४७ ॥

गुरुणैवमनुज्ञातौ रथेनानिलरंहसा ।
आयातौ स्वपुरं तात ! पर्जन्यनिदेन वै ॥ ४९ ॥
समनन्दन् प्रजाः सर्वा दृष्ट्वा रामजनार्दनौ ।
अपश्यन्त्यो बह्वहानि नष्टलब्धधना इव ॥ ५० ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे
पूर्वार्धे गुरुपुत्रानयनं नाम
पञ्चचत्वारिंशोऽध्यायः ॥ ४५ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अतो हे वीरौ ! स्वगृहं गच्छतं वां युवयोः कीर्त्तिर्लोके पुनात्वस्तु विपुला भवतु ॥ ४८ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

भगवान् ईश्वरवाक्यमाह । गुरुपुत्रमिहानीतमिति । निज-कर्मव नितरां बन्धनं यस्य स्वतः कर्माधीनम् अतस्त्वया स्वार्थे नीतः भाविज्ञानेऽप्यतो नापराधः आज्ञामाह । आनयस्वेति । कथं मर्यादा मया त्यक्तव्येति शङ्कायां महाराजसम्बोधनं स हि कदाचित्पुष्टिमपि स्वीकरोतीति विशेषमप्याह । मर्यादातिक्रमे मच्छासनपुरस्कृत इति मम शासनमात्रेण पुरस्कृतं येन ॥ ४५ ॥

एवमधिकारवशादीश्वराज्ञया च निरूपितार्थे तदर्थे निःसंदिग्धं प्रवृत्त इत्याह । तथेति । तथैव करिष्यामीति तेनानीय दत्तं गुरुपुत्रं भगवत्कृपया पूर्वावस्थां प्राप्तं प्रति संक्रमेण दृष्टद्वारेण न त्वलौकिकप्रकारेण समानीय यादवश्रेष्ठौ यदुरपि धर्मपरायणः अतो गुरूक्तं तथैव कृतवन्तौ ततः स्वगुरवे दत्त्वा भूयो वृणीष्वेत्यूचतुः अयं तु वस्तुतो न दक्षिणारूपः किं तु तेषामेव तेभ्यो दत्तमिति प्रतिबन्धनिवर्त्तकत्वेनाज्ञाकारी जातः ॥ ४६ ॥

द्वितीयवारं वरो न याचनीय इति तस्य बुद्ध्या स एव वर इति लोकबुद्ध्या अप्रार्थयन्निव प्रार्थयति । सम्यक् संपादितो वत्सावित्ति । भवद्भ्यां गुरुनिष्क्रयः गुरोः प्रत्युपकाररूपः दक्षिणात्मकः । भवद्भ्यामेव सम्यक् संपादितः नत्वन्य असाध्यं कर्तुं शक्तः सर्वं सति शास्त्रप्रामाण्यात् शिष्याद्गुरुर्महान् भवतीति भगवत्कृपयैव महत्त्वे सिद्धे युष्मद्विधस्य गुरोर्मम कामानां मध्ये कः कामोऽवशिष्यते यः प्रार्थनीयः स्यात् परमेतदेव कर्त्तव्यमिति ॥ ४७ ॥

अभ्यनुज्ञारूपं द्वयं प्रार्थयति । स्वगृहं गच्छतं वीरौ भवतं गार्हस्थ्येन स्थातव्यं सर्वदा जय एव भवत्विस्यर्थः । कीर्त्तिश्च सर्वलोकपावनी भवतु आशीर्वादो वा वरो वा यथाधिकारं ज्ञातव्यः ॥ ४८ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

निजं कर्म प्रारब्धलक्षणमवश्यभोग्यं यस्य तथाभूतमपि । मर्त्येन यो गुरुसुतं यमलोकनीतमित्येकादशोक्तेः तेनैव शरीरेणैव युक्तमिति टीका व्याख्यानाच्च मच्छासनेति मदाज्ञा पुरस्कारेणानयतस्तव को दोष इति भावः ॥ ४५॥४६ ॥

युष्मद्विधानामपि गुरोः किमुत युवयोर्गुरोर्मम कामानां नानाविधानां मध्ये कः कामः ॥ ४७—५० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

निजानि कर्माण्येव निबन्धनानि यस्य तम् । मच्छासनं पुरोऽग्रे शिरसि कृतं येन सः ॥ ४५—४६ ॥

गुरोर्निष्क्रयो विद्यासमाप्तौ दक्षिणा ॥ ४७ ॥

हे वीरौ ! स्वगृहं गच्छतम् वां युवयोः पावनी लोकपावनी कीर्तिरस्तु ॥ ४८ ॥

भाषा टीका ।

श्री भगवान् बोले अपने कर्म वश होने से जिस गुरु पुत्र को तुम इहां ले आये हो सो हे महाराज ! मेरी आज्ञा को मानकर तुम उसको ले आओ ॥ ४५ ॥

यमराजने आज्ञा मान कर देदिया तब यदूत्तम राम कृष्ण दोनों गुरु पुत्र को लेकर गुरुजी को देकर फिर भी कुछ वर मांगो यह वचन बोले ॥ ४६ ॥

गुरु बोले हे वत्स ! तुम दोनों ने गुरु का उपकार अच्छा किया है तुम सरीके ईश्वरों का जो गुरु होगा उसकी कौनसी कामना बाकी रहेगी ॥ ४७ ॥

हे वीरौ तुम दोनों अपने घरको जाओ तुमारी बड़ी पवित्र कीर्ति होवै तुमारे वेदादि शास्त्र सदा काल नवीन पढ़े सरी के इस लोक में तथा पर लोक में रहेंगे ॥ ४८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अनिलवद्रंहो वेगो यस्य तेन पर्जन्यो मेघस्तद्वन्निनदो यस्य तेन ॥ ४९ ॥

श्रीधरस्वामिकृतभावार्थदीपिका

नष्टमदृष्टं तत्पुनर्लब्धं धनं याभिस्ता इवेति ॥ ५० ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
पञ्चचत्वारिंशोऽध्यायः ॥ ४५ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी।

गुरुणैवमनुज्ञाताविति अनुज्ञातौ स्वगुरुणेति च पाठद्वयं स्वपुरमिति। तत्र ममतया स्नेहो दर्शितः अतएवानिलरंहसेति शीघ्रमागमनमनिलरंहस्त्वादेव पर्जन्यो गर्जन्मेघस्तद्वन्निनदो यस्य तेन अतो विदूरादेव तच्छब्दश्रवणेन सर्वे ऽभिजग्मुरिति ज्ञेयं हे तातेति प्रहर्षात्॥४९॥

सर्वाः पौर्य्यो जानपद्यश्च तत्र जानपद्यः काश्चित्पथिदृष्ट्वा काश्चिच्च पुर्य्यामागताः सत्य इति ज्ञेयं तद्विशेषश्च श्रीहरिवंशे "ततः प्रत्युद्यताः सर्वे यादवा यदुनन्दनौ। सबला हृष्टमनस उग्रसेन पुरोगमाः। श्रेण्यः प्रकृतयश्चैव मन्त्रिणः सपुरोहिताः। सबालवृद्धा साचैव पुरी ससभिवर्त्तत। नन्दितूर्य्याण्यवाद्यन्त तुष्टुवुश्च जनार्दनम्। रथ्या पताकामालिन्यो राजन्ते स्म समन्ततः। प्रहृष्टमुदितं सर्वमन्तः पुरमशोभत। गोविन्दागमनेऽत्यर्थं यथैवेन्द्रमखेः तथा। मुदिताश्चाप्यगायन्त राजमार्गेषु गायनाः। जयाशीःप्रथिता गाथा यादवानां प्रियंकराः गोविन्दरामौ सम्प्राप्तौ भ्रातरौ लोकविश्रुतौ। स्वे पुरे निर्भयाः सर्वे क्रीडन्ति सहबान्धवैः। न तत्र काश्चिद्दीनो वा मलिनो वा विचेतनः। मथुरायामभूद्राजन् गोविन्दे समुपस्थिते। वयांसि साधुवाक्यानि प्रहृष्टा गोहयाद्विपाः। नरनारीगणाः सर्वे भेजिरे मनसः सुखम्। शिवाश्चवाताः प्रववुर्विरजस्का दिशोदश दैवतानि च हृष्टानि सर्वेष्वाययतनेषु च यानि लिङ्गानि बाकस्य बभुः कृतयुगे पुरा। तानि सर्वाण्यदृश्यन्त पुरीं प्राप्ते जनार्दने" इत्या दि॥५०॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे
श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिण्याम्
पञ्चचत्वारिंशोऽध्यायः ॥ ४५ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्।

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे
श्रीसुदर्शनसूरिकृतशुकपक्षीये
पञ्चचत्वारिंशोऽध्यायः ॥ ४५ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

इत्थं गुरुणानुज्ञातौ हे तात! अनिळवद्रंहो वेगो यस्य पर्जन्यो मेघस्तद्वन्निनदो यस्य तेन रथेन स्वगृहमाजग्मतुः ॥ ४९ ॥

तावद्बह्वन्यहानि अत्यन्तसंयोगे द्वितीया अपश्यन्त्यः प्रजा मथुरास्थास्तदा रामजनार्दनौ दृष्ट्वा नष्टमदृष्टं पुनर्लब्धं धनं याभिस्तादृशा इव समनन्दन् सञ्जहृषुः ॥ ५० ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
पञ्चचत्वारिंशोऽध्यायः ॥ ४५ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

गुरुनिष्क्रया गुरुकृतप्रतिक्रिया युष्मद्विधानां पुंसां गुरोः को नु कामानां मध्ये कामोऽवशिष्यते सर्वोऽपि कामः सिद्धो भवतीत्यर्थः ॥ ४७—४९ ॥

तौ अपश्यन्त्यः ॥ ५० ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्यां
त्रिचत्वारिंशोऽध्यायः ॥ ४३ ॥ ४५ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे
पञ्चचत्वारिंशोऽध्यायः ॥ ४५ ॥

श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी।

एतदपि गुरुवाक्यं कृतवन्ताविति वदन् प्रत्यापत्तिमाह। गुरुणैवमनुज्ञाताविति। भगवदिच्छानुसारेणैव गुरुणा उक्तौ क्षणमात्रेणैव अनिलरंहसा रथेन स्वपुरमायाताम् आगतौ वा स्वपुरत्वेन प्रत्यापत्तित्वमुक्तम् दूरादेव तापनाशकत्वाय पर्जन्यवन्निजदो यस्येत्युक्तम् ॥ ४९ ॥

भगवन्तं पूर्ववदुक्त्वा तत्सम्बन्धिनोऽपि पूर्ववदेव जाता भगवति निरुद्धा वेत्याह। समनन्दन्निति। सर्वाः विद्यानाधिकारिणोऽपि विद्यया तेजोऽनुभावौ भगवता प्रकटिताविति तदर्थमाह। दृष्ट्वा रामजनार्दनाविति। सामान्यतोऽपि दर्शनाकाङ्क्षायामाह। अपश्यन्त्य इति। बहून्येव दिनानि वर्षत्रयचतुष्टयात्मकानि अपश्यन्त्यः सत्यः दृष्ट्वा परमानन्दयुक्ता जाताः पूर्वापेक्षया अधिकत्वमाशङ्क्य तथा सति प्रमाणबळं भविष्यतीति तन्निराकरणार्थं दृष्टान्तमाह। नष्टः अदृष्टः क्वचिल्लीनः पुनर्लब्धश्चेत् धनादिश्चेत्तदा पूर्ववदेव जायमानमपि सुखविशिष्टमिव भवतीति भगवत्यपि तथा जातमित्यर्थः ॥ ५० ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे
श्रीमद्वल्लभदीक्षितविरचितायां सुबोधिन्याम्
द्विचत्वारिंशाध्यायविवरणम् ॥ ४२ ॥ ४५ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम्।
दशमस्य पञ्चचत्वारिंशोऽध्यजनि सङ्गतः ॥ ४५ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

पर्जन्यवन्मेघवन्निनदो यस्य तेन ॥ ४९ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

नष्टानि पुनर्लब्धानि धनानि याभिस्ता इव सर्वाः प्रजाः समनन्दन् सञ्जहृषुः ॥ ५० ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
पञ्चचत्वारिंशाध्यायार्थप्रकाशः ॥ ४५ ॥

भाषा टीका।

हे तात! गुरु के इस प्रकार आज्ञा देने से पवन के से वेग वाले मेघ कैसे शब्द वाले रथ पर चढकर अपने मथुरा पुर को भगवान् आते भये ॥ ४९ ॥

उहां पर राम जनार्दन दोनों के दर्शन करके सब प्रजा बड़े अनंदित भये जोकि पहिले बहुत दिनसे नहीं देखतेथे वे नष्ट धन सरी के उनको प्राप्त होकर कृत कृत्य होगये ॥ ५० ॥

इति श्रीमद्भागवत दशमस्कन्ध पूर्वार्ध पैंतालीस में
अध्यायकी भाषाटीका समाप्त ॥ ४५ ॥

इति श्रीमद्भागवते दशमस्कन्धे पूर्वार्धे पञ्चचत्वारिंशोऽध्यायः ॥ ४५ ॥

॥ षट्चत्वारिंशोऽध्यायः ॥

श्रीशुक उवाच

वृष्णीनां प्रवरो मन्त्री कृष्णस्य दयितः सखा ।
शिष्यो बृहस्पतेः साक्षादुद्धवो बुद्धिसत्तमः ॥ १ ॥
तमाह भगवान् प्रेष्ठं भक्तमेकान्तिनं क्वचित् ।
गृहीत्वा पाणिना पाणिं प्रपन्नार्तिहरो हरिः ॥ २ ॥
गच्छोद्धव ! व्रजं सौम्य ! पित्रोर्नः प्रीतिमावह ।
गोपीनां मद्वियोगाधिं मत्सन्देशैर्विमोचय ॥ ३ ॥
ता मन्मनस्का मत्प्राणा मदर्थे त्यक्तदैहिकाः ।
ये त्यक्तलोकधर्माश्च मदर्थे तान् बिभर्म्यहम् ॥ ४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

षट्चत्वारिंशके घोषमुद्धवं प्रेष्य तद्गिरा ।
यशोदानन्दयोश्चक्रे कृष्णः शोकापनोदनम् ॥
कामचारं द्विजातिः सन्परित्यज्यातिसंयतः ।
गुरोर्ज्ञानमनुप्राप्य सख्या गोपीरुपादिशत् ॥

गोपीनां सान्त्वनमपि रहस्यं सन्मन्त्रिसाध्यमिति तदर्थमुद्धवं विशिनष्टि । वृष्णीनामिति । बुद्धिसत्तमो बुद्ध्या ऽतिश्रेष्ठः ॥ १-३ ॥

गोपीनां विशेषतः सन्देशे कारणमाह । ता इति । मय्येव सङ्कल्पात्मकं मनो यासां ताः अहमेव प्राणो यासां ताः मदर्थे त्यक्ता दैहिकाः पतिपुत्रादयो याभिस्ताः ततः किमत आह । ये त्यक्तलोकधर्मा इति । मां भिमित्तं त्यक्तौ लोकधर्मावैहामुत्र सुखे तत्साधनानि च यैस्तान् बिभर्मि पोषयामि संवर्धयामि सुखयामीत्यर्थः ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

आर्त्तैकशरणं कृष्णमार्त्तान् व्रजजनांश्च तान् ।
तत्रार्त्ताश्वासकं भक्तमार्य्यं वन्दे दुराशया ॥

एवमात्मनः प्राथमिकावश्यसमाप्त्या तथा आयास्य इति द्रष्टुमेष्याम इति स्ववाक्यव्यभिचारतर्कतस्तेषामार्त्तिविशेषशङ्कया च व्रजं गन्तुमर्होऽपि यत् श्रीभगवान्नाजगाम तत्र श्रीनन्दयशोदादिप्रेमवश्यतया पुनस्तदागमनाभावमाशङ्कमानानां श्रीवसुदेवदेवक्यादीनां गुरुत्वेनालङ्घनीयवाक्यानामननुज्ञैव कारणं लक्ष्यते ज्ञातीन् वो द्रष्टुमेष्यामो विधाय सुहृदां सुखमित्याद्युक्तत्वात् । श्रीव्रजराजादिभिश्च तद्विधगुरुजनानामिच्छारक्षामप्युल्लङ्घ्य तदागमनस्य तत्र मङ्गलातिक्रमशङ्कया स्फुटमप्रार्थितत्वात् जरासन्धादिमहाशत्रुभ्यो रक्षा चास्यास्मद्व्रजे न स्यात् किंतु दुर्गादिसम्पत्तिमत्यां पुर्य्यामेव स्यादिति स्वयमपि विचारितत्वाच्च । अतः श्रीवसुदेवादिभ्यो गोपनानुसारेणैवोद्धवं प्रति भक्तमेकान्तिनं क्वचिदिति वक्ष्यते । "अपि स्मरथ नः सख्यः स्वानामर्थचिकीर्षया । गतांश्चिरायितान् शत्रुपक्षक्षपण चेतस" इति वक्ष्यमाणानुसारेण जरासन्धादिदुर्जननिर्जयादिकृत्यशेषोऽपि कारणान्तरवत् । अन्यथा तैर्यदूनां व्रजजनानामपि महानुपद्रवः स्यात् । अत औदासिन्यव्यञ्जनाय श्रीनन्दादीन् स्वनिकटेऽपि नाजुहाव । किञ्च युगपदुभयत्र पितृत्वादिव्यवहारस्याभिरुचितलीलावेशादीनां समञ्जसतायां दुर्घटता स्यात् निजप्रेयसीनां चानयनेऽनानयने चासमञ्जसत्वमिति । अतएव पूर्वमपि वयश्च स्नेहदुःखितान् । ज्ञातीन् वो द्रष्टुमेष्याम इत्येवोवाच । न त्वाह्वयिष्याम इति । अतस्तादृशानपि वो वयमेव द्रष्टुमेष्यामः नतु यूयमत्रागच्छतेति व्यञ्जनामभिप्रेत्यैव तयोर्दिदृक्षया स्वयं नन्दादयोऽतिनिरूढा अपि व्रजान्नागताः । तत्तदुपद्रवापातात् पुरे व्रजे च युगपत् प्रकटा स्थितिश्च न स्यात् । तज्ज्ञाने श्रीनन्दादीनामस्मदीयत्वे ज्ञानहान्या बन्धुभावहानिश्च स्यात् यथैव वक्ष्यते यथा क्रूरचरे प्रेष्ठ इत्यादि तस्मात्तथा स्थितिमपि न चकार । अप्रकटा स्थितिस्तु तस्य सर्वदास्त्यत्र तथैव प्रतिपादयिष्यते । मा शोचत महाभागा इत्यादौ । भवतीनां वियोगो मे नहि सर्वात्मना क्वचिदित्यादौ च किन्त्वसौ प्रकटलीलाविर्भाविनां तेषामनुभव गोचरो न भवति प्रकटलीलायामपि मध्ये यत्तस्य व्रजस्थं कञ्चित् काञ्चित् प्रति गुप्तमागमनं तदप्युत्कण्ठाप्रधानानां स्फुरणभ्रमकरत्वाद्विश्वासाय न भवति । तस्माद्दन्तवक्त्रवधान्ते वर्णयिष्यमाणं श्रीभागवतमते च व्यञ्जयिष्यमाणं यावत्तत्र निजगमनं सम्पद्यते

१ श्रीवैष्णवतोषिण्यादौ न इति सुबोधिन्यां नौ इति च पाठद्वयम् ।

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

तावत्तेषां यथा केनापि व्याजोपदेशेन तत्तद्विश्वासास्पदं स्यान्महाराजत्ववैभवं श्रवणं स्यात्तथा समाधातुं स्वयमगत्वा स्वस्यागमने केवलश्रीरामगमनञ्च दुःखकरं मत्वा स्वतुल्येन श्रीमदुद्धवाख्येन प्रियसखेन तादृशं सन्दिस्य श्रीव्रजवासिनः सान्त्वयामासेति क्रमप्राप्तां लीलां वक्तुमारभते अध्यायद्वयेन । वृष्णीनामिति । वृष्णीनामसङ्ख्यानामूर्ध्वोर्ध्वमहानुभावानां विविध भावानामपि सर्वेषामेव यादवानां सम्मतस्तादृशवचनाचरणः । प्रवर इति पाठेऽपि तथैवाभिप्रायः । इति परममाहात्म्यं परमसामञ्जस्यमभिप्रेतं तेन च व्रजजनानामपि तादृशां सान्त्वने सामर्थ्यं किञ्च मन्त्री गुप्तयुक्तिप्रदोऽमात्यविशेष इति विश्वासास्पदत्वेन युक्तिनैपुण्येन च तत्सामर्थ्यं तेन च पूर्वलिखितयुक्तिरपि श्रीभगवता तस्मिन् स्वयमेव कदाचिद्व्यञ्जितास्तीति गम्यते । न केवलमेतावत् किन्तु कृष्णस्य च दयितो दयाविशेषविषय इत्यनिर्वचनीयगुणत्वं तेनात्मीयतया स्वीकृतत्वं चोक्त्वा आत्मगम्यस्य प्रस्थाने श्रीगोपिकास्वपि सन्देशे योग्यत्वञ्च । एवमन्तरङ्गलोकदृष्ट्या यथोत्तरश्रेष्ठेन तन्महिमानमुक्त्वा तद्योग्यतावैशिष्ट्यं तथा सखा असङ्कोचप्रेम्णा दत्तसख्यपदवीकोऽपि इति । श्रीकृष्णेनापि गुणरूपवयआदौ साम्यं सर्वयादवेभ्यः तस्य परमासङ्कोचविस्रम्भास्पदत्वं चोक्त्वा बहिरङ्गलोकदृष्ट्याप्याह । बृहस्पतेः साक्षादेव शिष्यः नतु शिष्यादिद्वाराध्यापनादित्यर्थः । तच्च नीतिशास्त्रमारभ्य श्रीभागवतपर्यन्तस्येति ज्ञेयम् । बृहस्पतेरपि तत्र सङ्कर्षणसम्प्रदायान्तःपातादिति च परमवाग्मित्वमुक्त्वा तेषां श्रीकृष्णजित्वरशुद्धप्रेमवाक्यानां प्रत्युत्तरे तस्य तु यत्किञ्चित् सामर्थ्यं व्यञ्जितं सर्वत्र हेतुः बुद्धिसत्तम इति । एवं श्रीभगवत इव षड्गुणा दर्शिताः । एतदेव च मनसि विचारितं श्रीभगवता नोद्धवोऽण्वपि मन्यून इति उद्धव नामा श्रीवसुदेवस्य भ्रातुर्देवभागस्य पुत्रः तत्रास्तीति शेषः । यद्यपि हरिवंशे । "उद्धवो देवभागस्य महाभागः सुतोऽभवत् । पण्डितानां परं प्राहुर्देवश्रवसमुद्धव"मिति । द्वयोरपि भ्रात्रोरुद्धवनामानौ पुत्रौ कथ्येते तथाप्ययं देवभागसुत एव ज्ञेयः महाभागत्वं खलु तादृशश्रीकृष्णकृपायोग्यत्वं नतु पण्डितमात्रत्वं तदेवमेव काञ्चिदङ्ग महाभाग सखा नः शूरनन्दन इति स एव व्रजेश्वरेण तथा सम्बोधयिष्यते श्लेषेण साक्षादुत्सवः मूर्त्तिमानुत्सव इति ॥ १ ॥

तस्य श्रीकृष्णदयितत्वादौ हेतुं तत्र तत्परतां च विशेषणैर्दर्शयन् तादृशतद्वर्णनस्योद्देश्यमाह । तमिति । प्रेष्ठं बाल्यमारभ्यैवातिशयेन प्रीतिकर्त्तारं भक्तं परमादरेण सेवातत्परञ्च "यः पञ्चहायनो मात्रा प्रातराशाय याचितः । तन्नैच्छद्रचयन् यस्य सपर्यां बाललीलये"त्यादि तृतीयाद्युक्तेः अत एव एकान्तिनं तदेकापेक्षकं यथोक्तं श्रीगजेन्द्रेण "एकान्तिनो यस्य न कञ्चनार्थं वाञ्छन्ति ये वै भगवत्प्रपन्ना" इति श्रीवैष्णवेऽपि "विहाय पितृदेवादीन् परिनिष्ठाङ्गतो हरौ । तद्गाढप्रेमभिः पूर्ण एकान्तीति निगद्यत" इति अत्र सर्वयादवापेक्षामप्यतीत्य तस्यैकान्तित्वं ज्ञेयं तथा तथाभूतं तमाह किमर्थं प्रपन्नानां तत्त्वस्मीति सकृद्याचमानानामपि किमुत तदेकजीवनानां व्रजजनानां य आर्त्तिं हरति सः तेषामार्त्तिं हर्तुमित्यर्थः । तस्य तत्तज्ज्ञानतादृशानुग्रहादौ योग्यं पदं भगवानिति सार्वज्ञ्यदयादिगुणानां मर्य्यादावाराम्निधिरित्यर्थः नन्वपरिहार्य्यतानास्निग्धजनवेष्टितेन श्रीभगवता तादृशसन्देशो दुष्करः तत्राह । कच्चित्कथं चिल्लब्धे तदेकाद्वितीये स्थाने हन्त तादृशं सन्देशं कया मुद्रयोवाच तत्राह । गृहीत्वेति । तच्च निजेष्टप्रयोजने तस्यानुरागोत्पादनेच्छातः परमगोप्यत्वेन शनैर्निकटे विवक्षातः तदुक्तिप्रवृत्त्या प्रेमभरोदयस्वभावाच्च ॥ २ ॥

न इतिबन्धुत्वं तत्पितृकत्वेनात्मनो बहुमानात् किंवा मातृपितृत्वेन भवादृशामपि तौ पितरावित्यभिप्रायेण इति तयास्तस्य स्नेहं वर्द्धयति । नाविति कचित्पाठः कृष्णरामयोरित्यभिप्रायेण पित्रोर्मद्विच्छेददुःखितयोः प्रीतिं सुखम् भा सम्यग्वह स्वचातुर्य्येण बलादिव प्रापय मद्विना तयोः प्रीतेर्दुःसाध्यत्वात् यद्वा प्रवाहन्यायेन कुरु यथात्वत्पश्चादपि तयोः प्रीतिस्तिष्ठेदेवेत्यर्थः । ननु तत्र मम वराकस्य का शक्तिरित्याशङ्क्य सम्बोधयति हे उद्धवेति । उद्धव एव त्वमसीति पूर्वोक्तसद्गुणगणनिधित्वं सूचयति । उद्धवशब्दस्य श्लेषार्थश्चोक्त एव किञ्च सौम्य । हे शान्तमूर्त्ते मनोज्ञेति वा अस्तु तावत्तच्चातुर्य्यं त्वद्दर्शनमात्रेण च तयोः प्रीतिर्भवितेति भावः । इदं प्रोत्साहनार्थं गोपीनां तु मद्वियोगेन आधिस्त्वं तं विशेषेण मोचय दृढबन्धनवद्धृदिसंलग्नमपुनःस्पर्शतया एवमाधिविमोचनमात्रमेव त्याजयतासां नतु प्रीतिं कर्त्तुं शक्ष्यसीत्यर्थः तच्च मत्सन्देशैर्बहुभिरेव नतु त्वद्वाक्चातुर्यादिना नापि द्वित्रैर्वा ॥ ३ ॥

गोपीनां विशेषतः सन्देशे द्वाभ्यां विशेषावस्थावर्णनेन कारणं वक्तुं प्रथमतः साधारणावस्थां वर्णयति । ता मन्मनस्का इति । विशेषणत्रयेण क्रमेण तासां स्वं विना धर्माद्यशेषार्थेषु देहेषु लोकेष्वपि नैरपेक्ष्यमुक्तम् अन्यस्तैः तत्रादिग्रहणाद्भोजनपानादयश्च दैहिकाः यद्वा मन्मनस्का इतिबाह्यसर्वप्रियार्थानादरः मत्प्राणाः इति ततोऽपि प्रियाणामन्तरीणसर्वार्थानामनादरः मदर्थे इत्यादिना भोक्तृत्वे सुखदुःखानां पुरुषःप्रकृतेः पर इत्यात्मपर्यवसायिसर्वभोगानादरादात्मानादरश्च विवक्षितः तत्र तत्र हेतुमाह मामेव दयितं प्रनसागता निश्चितवत्यः नतु बाह्यान् विषयान् तथा प्रेष्ठं ततोऽपि प्रियतमं मामेव नतु नतोऽन्तरीणप्राणादीन् मद्वियोगे तत्तदनादरात् तथा निरुपधिप्रेष्ठमात्मानमपि मामेव नतु देहिनं मद्वियोगे तस्यापि शून्यायमानत्वात् मद्विना भूतानां तासामात्मान्यत्र प्रीतिमात्रं न स्पृशतीत्यर्थः तदेवं त्रिभिर्योग्यैः पदैर्मामेव पतिं निश्चितवत्य इत्यर्थः । ननु किंवदन्तीप्राप्तमन्यादित्यर्थः । तथैव ता एव वक्ष्यन्ते अपि बत मधुपुर्यामार्यपुत्रो धुनास्त इति इदं पद्यार्द्धं बहुत्र तत्त्ववादिनां टीकायामपि ध्रियते किन्तु स्वामिपादैरनाभिमतमिव लक्ष्यते मध्ये प्रविष्टस्य दुर्गमस्याप्यव्याख्यानात् । य इति । सामान्येन निर्देशः अधिकाराद्यनपेक्षया भरणस्यावश्यकताबोधनार्थं चकारात्तानपि किं पुनः प्राणाद्यनपेक्षिकास्ता इत्यर्थः यद्वा मम मनो यासु ताः किञ्च मम ता एव प्राणाः यतो मदर्थं इत्यादि तत्र हेतुः मामेवेत्यादि कैमुत्येन हेतुः य इत्यादि अहं ब्रह्मादि ध्येयोऽपि बिभर्मि अन्तर्धारयामि सदा चिन्तयामीत्यर्थः तथाचादिपुराणे "भक्ता ममानुरक्ताश्च कति सन्ति न भूतले । किन्तु गोपीजनः प्राणाधिकप्रियतमो मम"ेति अतःतासामाधिर्मदन्तःप्रवेशेन सदाहमप्याधिमानिति भावः । यद्वा ये ताभिस्त्यक्ताः सखीदास्यादिलोकाः भोजनादिदेहधर्मा लज्जादिसाध्वीधर्माश्च तानप्यहं बिभर्मि रक्षामि किमुत ताः ॥ ४ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

त्यक्तदैहिकाः त्यक्तदेहभूषणाः ॥ १—८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अथाध्यायद्वयेन भगवतः स्वसखोद्धवमुखेन गोपीसान्त्वनात्मकं चरित्रमनुवर्ण्यते गोपीनां सान्त्वनमतिरहस्यं सन्मान्त्रिसाध्यमित्येतदर्थमुद्धवं विशिनष्टि । वृष्णीनामिति । दयितः सखा प्रियसखः साक्षाद्बृहस्पतेः शिष्यः अनेन बुद्धिकौशळं सूचितं बुद्धिसत्तमः निसर्गतोऽपि बुद्धया श्रेष्ठः ॥ १ ॥

तमिति । क्वचिन्निर्जने देशे प्रपन्नार्त्तिहरः हेतुगर्भमिदं तत्त्वात्संदेशप्रेषणमुचितमिति भावः ॥ २ ॥

तदेवाह । गच्छेति सार्द्धैश्चतुर्भिः । हे उद्धव ! नोऽस्माकं पित्रोर्नन्दयशोदयोः प्रीतिमावह हर्षं जनय मत्संदेशैरित्यपकर्षःमद्वियोगाद्धेतोर्य आधिर्मनःपीडा तं विमोचय त्याजय ॥ ३ ॥

गोपीनां विशेषतः संदेशनयनकारणमाह । ता इति । मय्येव संकल्पात्मकं मनो यासाम् अहमेव प्राणो यासां ताः मदर्थे त्यक्तदैहिकाः त्यक्तदेहपोषणाः मामेव दयितं दयास्य संजातेति दयितस्तं दयावन्तं प्रियतमं तत्र हेतुमात्मानं मनसा आगमन् गत्यर्था बुद्ध्यर्थाः अध्यवसितवत्यः सन्त्वेवं विधास्ताः किंतवेत्यत आह । ये जना मदर्थे त्यक्ता लोकधर्मा यैस्तानहं बिभर्मि संवर्धयामि सुखयामीति यावत् ॥ ४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

भगवन्मनोवशीकरणार्थे भक्तिरेव प्रधानसाधनमिति दर्शयितुं हरेर्गोपीष्वनुकम्पित्वं निरूपयत्यस्मिन्नध्याये तत्र कृष्णेन उद्धवं गोकुलं गमयितु वक्ति । वृष्णीनामिति ॥ १ ॥

य एवंविधगुणोपेत उद्धवस्तमाह क्वचिद्रहसि ॥ २ ॥

मद्वियोगेन मम विरहेण य आधिस्तं मत्सन्देशैर्मदीयाज्ञावचनैः ॥ ३ ॥

अहमेव प्राणो जीवनं यासां तास्तथा त्यक्तदैहिकाः दूरीकृतदेहधर्माः दयितामिष्टस्य दातारं प्रेष्ठं स्वशरीरादेरपि प्रियतमम् आत्मानं सन्ततानुगतरूपम् ॥ १ ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

एवमात्मनः प्राथमिकावश्यकृत्यासमाप्त्या तथा आयास्य इति द्रष्टुमेष्याम इति स्ववाक्यव्यभिचारतर्कतः तेषामार्त्तिविशेषाशङ्कया च व्रजं गन्तुमनाअपि यच्छ्री भगवान्न जगाम तत्र श्रीनन्दयशोदादिप्रेमबहुलतया पुनस्तदागमनाभावमाशङ्कमानानां श्रीवसुदेवदेवक्यादीनां गुरुत्वेनालङ्घनीयवाक्यानामनुरोध कारणं लक्ष्यते । ज्ञातीन् वो द्रष्टुमेष्यामो विधाय सुहृदां सुखमित्युक्तत्वात् अतः श्रीवसुदेवादिभ्यो गोपनानुसारेणैव उद्धवं प्रति भक्तमेकान्तिनं क्वचिदिति वक्ष्यते ज्ञानहान्या बन्धुभावहानिश्च स्यात् । पुत्रादिरूपस्य स्वस्य महाराजताश्रवणेन तूत्कण्ठात्ययप्रेमानन्दवृद्धिः स्यात् यथैव वक्ष्यते । यथा दूरचरे प्रेष्ठे इत्यादि । तस्मात्तथा स्थितिमपि न चकार । अप्रकटा स्थितिस्तु तस्य तत्र सर्वदास्त्येव तथैव प्रतिपादयिष्यते माशोचत महाभागावित्यादौ भवतीनां वियोगो मे नहि सर्वात्मना क्वचिदित्यादौ च । किन्त्वसौ प्रकटलीलाविर्भाविणां तेषामनुभवगोचरो न भवति । तस्माद्दन्तवक्त्रवधान्ते पाद्मोत्तरखण्ड वर्णयमानं श्रीभागवत मते च वर्णयिष्यमाणं यावत्तत्र निजगमनं सम्पद्यते । तावत्तेषां यथा केनापि व्याजोपदेशेनाशावनुभवगोचरः स्यान्महाराजत्वे वैभवश्रवणं च स्यात् तथा समाधातुं स्वयमगत्वा स्वस्यागमने केवलं श्रीरामगमनञ्च दुःखकरं मत्वा स्वतुल्येन श्रीमदुद्धवाख्येन प्रेयस्त्वेन तादृशं सन्दिश्य श्रीव्रजवासिनः सान्त्वयामासेति क्रमप्राप्तां लीळां वक्तुमारभते अध्यायद्वयेन वृष्णीनामिति । ये त्यक्तेति । यच्छब्दसामान्यनिर्देशः । तन्निर्देशश्च विप्रत्वाद्यनपेक्षार्थः । चकारात्तानपि किमुत तन्मनस्का इत्यादि लक्षणास्ता इति ॥ १—५ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

त्रिचत्वारिंशकेऽध्याये स्वास्थित्यैव निरोधनात् ।
यशोदानन्दयोश्चैव द्युकोऽपि विनिरूप्यते ॥

गोपिकानां ततो वाच्यस्तेनोक्तं च समर्थितम् ।
राजसत्वं च संसिद्धं गुणोत्कर्षश्च रूपितः ॥

पूर्वाध्याये ज्ञातीन् वो द्रष्टुमेष्याम इति नन्दं प्रति भगवता निरूपितं तेषामेव च सम्बन्धः पुत्रत्वादिरूपः स्थापितः तत्र मध्ये विद्याग्रहणेन विलम्बो जात इति स्वस्यापि गमनं कार्यस्यावश्यकत्वात् न संभवतीति विद्यातः समागत्य नन्दादीनां सान्त्वनार्थमुद्धवं प्रेषयतीति निरूप्यते । तत्र सन्ति त्रिविधाः प्रकटसंदेशयोग्याः यशोदानन्दप्रभृतयः मित्रभूता गोपाः अत्यगोप्याः गोप्यस्त्वतिगोप्याः अत एतादृशेऽर्थे निपुणेन दूतेन भाव्यमिति उद्धवं प्रेषणार्थं वर्णयति । वृष्णीनां प्रवर इति । कुलीनः कर्मसु प्रशस्तः तत्रापि स्वगोत्रजः तत्रापि महानिति प्रेषणे स्वरूपयोग्यता निरूपिता दौत्यार्थे सहकारियोग्यतामाह । मन्त्रीति । स हि मन्त्रं न प्रकाशयति तद्वाचितमेव वदेन्नानुचितमिति भगवदुक्तमपि न वदेदतो गह्यार्थे प्रेषणमयुक्तमित्याशङ्क्याह । कृष्णस्य दयित इति । दयितोऽत्यन्तप्रियः । यद्यनभिप्रेतधर्मवान् भवेन् तर्ह्यत्यन्तप्रीतिविषयो न स्यात् । गुर्वादिरप्येतादृशो भवतीति पितृव्यत्वाच्च तथात्वे गुह्यं न वक्तव्यमित्याशङ्क्याह । सखेति । भगवतः समानशीलव्यसनत्वात् तथाप्यनीतिज्ञश्चेत् देशकालप्रकरणादिनिरपेक्षतया वदेत ततश्च यथार्थमपि भाषितं फलाय न भवेदित्यत आह । बृहस्पतेः देवगुरोः शिष्य इति । नीतिस्तत्रैव तिष्ठति । साक्षादिति । न ग्रन्थद्वारा साक्षादुद्धवो वा उत्सवात्मकः दूरे गतस्य बन्धोः पुनरागमनव्यापकः परस्परयोत्सवहेतुर्भवति अयं तु साक्षात् एव दृष्ट्वैव जानन्ति भगवद्दर्शनेनेव च सुखिता भवन्ति तथापि

१ एतन्मते वङ्गाक्षरे च मामेव दयितं प्रेष्ठमात्मनं मनसा गताः इत्यर्धमाधिकं दृश्यते

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

यावदुक्तार्थग्रहणसामर्थ्यं मृग्यत इति तादृशो वक्तव्य इत्यत आह । बुद्धिसत्तम इति । बुद्ध्या अत्यन्तं सन् बुद्धिमत्त्वेऽपि कार्यसिद्धौ स्वतोऽपि छायया गोकुलवासिनां दुःखदूरीकरणसमर्थ इति तथोक्तम् ॥ १ ॥

एवं दूतगुणानुक्त्वा तादृशे भगवन्नियोगमाह । तमाहेति । तेन कार्यं सेत्स्यतीति ज्ञानार्थमत्यनुरोध्येषु स्वागमनार्थं च प्रेष्ठोऽत्यन्तं प्रियः अतः स्वसमान इति प्रतिनिधित्वात्प्रेषणीयः तथापि स्त्रीषु विक्रियां प्राप्स्यतीत्याशङ्क्याह । भक्तमिति । स्वीकृतस्तथा भविष्यतीत्याशङ्क्याह । एकान्तिनमिति । एकान्ते स्थातुं योग्य उभयेषां विकारानालम्बनमिति क्वचिदेकान्ते यत्र कोऽपि न पश्यति तत्र पाणिना पाणिं गृहीत्वा आहेति सम्बन्धः । एवं निर्बन्धेन कथने को हेतुस्तत्राह । प्रपन्नार्तिहर इति । शरणागताः गोकुलवासिनः तेषामार्तिर्हर्तव्येति सहज एव धर्मस्तस्य तादृश इति न तद्धर्मपरित्यागः ॥ २ ॥

भगवद्वाक्यान्याह चतुर्भिः—

प्रमाणं च प्रमेयं च उपपत्तिश्च बाधकम् ।
चत्वारोऽत्रैव वक्तव्या अन्यथा प्रेषणं न हि ॥

आदौ नियोगमाह । हे उद्धव ! व्रजं गच्छ सौम्येति सम्बोधमान्नान्यः प्रेषयितुमुचित इति सूचितं गत्वा कर्तव्यमाह । पित्रोः यशोदानन्दयोः नौ आवयोः उभाभ्यां तास्मिन्नेव पितृत्वं स्थापितमिति तदुपपादितम् अतो यथैव प्रीतिर्भवति अस्मदागमनेनेव तथा प्रीतिमावह अयं प्रकटः सन्देशः गुप्तमाह । गोपीनां मद्वियोगाधिमिति । मम वियोगेन आधिर्मनःपीडा तां मत्संदेशैः मत्पत्रलिखितैः तत्र प्रकटीकृतैः विमोचय आधिग्रस्तास्ताः यथा तद्वासो गच्छति तथोपायं कुरु ॥ ३ ॥

ननु तासु को विशेष इत्याशङ्क्य तासां स्वरूपमाह । अस्मत्कथने प्रेमयवलत्वेन ता मन्मनस्का इति प्राणिनामात्मा मदीय एव सर्वसाधारणः सर्वासिद्धत्वात् ज्ञातेऽपि तथा नादरणीयः किं तु देहेन्द्रियमनांसि अन्यपराण्येवोत्पत्तिशिष्टानि तानि चेन्मत्पराणि स्युः तदा तत्संघाता मदीया भवन्ति तदाह । मय्येव मनो यासां मय्येव प्राणा इन्द्रियाणि च तदर्थमेव जीवति मय्येव सति जीवति सर्वाणीन्द्रियाणि मद्विषयकाण्येव कुर्वन्ति देहमपि मदर्थमेव कुर्वन्तीत्येतदर्थमाह । मदर्थे त्यक्तदैहिका इति । दैहिका हि देहोपयोगिनः तेषु विद्यमानेषु न भगवदर्थमेव देहो भवेत् अतस्ते त्यक्तव्याः ननु तेषां त्यागे देहनिर्वाहो न भवेत् तत्राह । ये त्यक्तलोकधर्माश्च मदर्थे इति । त्यक्तः लोकः धर्मो वैदिकश्च यैः त्यक्ता, तात्सर्वे लौकिकधर्मा वेदैश्च परिगृहीता एतादृशानहं बिभर्मि यथा मद्धस्तस्थितपदार्थः केनापि नोपहन्यते तथा त इत्यर्थः अतस्तेषां न कोऽप्युपद्रवः किं तु मद्विरहः ससन्देशो निराकर्तव्यः ॥ ४ ॥

———

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

षट्चत्वारिंशके गोष्ठं गत उद्धव उत्सवम् ।
ददर्शास्येशयोः कृष्णविरहादत्यनुत्सवम् ॥

सविच्छेदवतां व्रजस्थानां दुःखमनुस्मृत्य तेन स्वयं व्याकुलस्तद्दुःखहरं मत्सन्देशं प्रापयितुं तत्तत्प्रेम्णाञ्च सर्वोत्कर्षं ख्यापयितुमत्र पुर्यां कोऽनुरूपो यः खलु व्रजनगरस्थः तत्रस्थानां तत्तत्प्रेम्णाञ्च माधुर्यसुधासिन्धौ खेलितुं कृतपरःसहस्रतपस्कोऽस्तीति परामृशति भगवत्यकस्मात्तत्रैवागतमुद्धवं तत्कृत्यसाधकं ज्ञापयितुं विशिनष्टि । वृष्णीनां सम्मतः यदुवंश्यैः सर्वैरेव प्रमाणीकृतवचनाचरणादिरित्यर्थः । तेन व्रजादागत्य यदयं तत्तत्प्रेमाणमनुभूय श्रीयशोदानन्दयोः गोपानां गोपीनां प्रेम्णां सौभाग्योत्कर्षान् अत्र तेभ्योऽपि परःसहस्रान् वक्ष्यते तत्र सर्वेऽपि वृष्णयो विश्वासं प्राप्स्यन्ति । येऽमी परमेश्वरपुत्रकत्वेन देवकीवसुदेवयोरेव सौभाग्यस्य प्रेम्णश्च सर्वोत्कर्षं तत्सम्बन्धित्वेन स्वेषामेव च तं मन्यन्त इति भावः । मन्त्रीति व्रजस्थानां सान्त्वनं यया मन्त्रणया सम्भवेत्तदभिज्ञ इति भावः । कृष्णस्य दयितो वल्लभ इत्यत एव व्रजप्रेमसुधापानयोग्यतेति भावः । सखेति व्रजभूमौ सुबलस्येवास्याप्युज्ज्वलरससंलापवावदूकत्वं इद्युत्पन्नमेवाग्रतस्त्वदधिकमेवोत्पत्स्यते तथा नोद्धवोऽण्वपि मन्न्यून इति तृतीयोक्तेश्च कृष्णतुल्यत्वात् कृष्णप्रतिमूर्त्तिना अनेन कृष्णदूत्यं साधु सम्पत्स्यते इति भावः । बृहस्पतेः साक्षात् शिष्य इत्यस्य बुद्धेरति तैक्ष्ण्यं दृष्ट्वा स्वयमेव बृहस्पतिरिमं सर्वशास्त्राण्यध्यापयामास किन्त्वेकस्मिन् शास्त्रे बृहस्पतेरप्यगम्येऽस्य न्यूनतेत्यतस्तत् सर्वमुकुटोत्तमं कृष्णवशीकारकं प्रेमशास्त्रमेनं कृष्णदयितत्वात् व्रजे गोपिका एवाध्यापयिष्यन्तीति भावः । बुद्धिसत्तम इति । अतिबुद्धिमत्त्वात् तच्छास्त्रावधारणक्षममेनं कृष्णोऽपि रहसि पट्टमहिषीसभायां तच्छास्त्रमेव वाचयिष्यति । तदेव श्रुत्वा "व्रजस्त्रियो यद्वाञ्छन्ति पुलिन्द्यस्तृणवीरुधः । गावश्चारयतो गोपाः पादस्पर्शं महात्मनः" इत्युक्तिमत्यः पट्टमहिष्योऽप्यभिलषिष्यन्तीति भावः । उद्धवोऽयं वसुदेवभ्रातुर्देवभागस्य पुत्रः । तदुक्तं हरिवंशे "उद्धवो देवभागस्य महाभागः सुतोऽभवदित्यत एव कच्चिदङ्ग महाभागेति श्रीनन्देन सम्बोधयिष्यते । श्लेषेण साक्षादुद्धवो मूर्त्तिमानुत्सव इतीमं दृष्ट्वा व्रजस्था उत्सवं प्राप्स्यन्तीति भावः ॥ १ ॥

भक्तं तत्राप्येकान्तिनं "विहाय पितृदेवादीन् परिनिष्ठाङ्गतो हरौ । तद्गाढप्रेमभिः पूर्ण एकान्तीति निगद्यते" इति तल्लक्षणं तत्रापि प्रेष्ठं तेष्वतिप्रीतिविषयं क्वचित् विविक्ते गृहीत्वा पाणिना पाणिमिति स्वैवैयग्र्यद्योतना । प्रपन्नमात्रस्याप्यार्तिहरः किमुत प्रेमवच्छिरोमणीनां व्रजस्थानामिति भावः ॥ २ ॥

आ सम्यक् प्रापय विमोचयेत्यनेन मद्वियोगाधिस्तासां हृदि दृढेन ग्रन्थिना निबद्ध इति ज्ञापयति तद्विमोचनमपि मम सन्देशैरेव नतु तद्वाक्चातुर्यादिभिः । सन्देशैरपि बहुभिरेव नतु सन्देशेनैकेन ज्ञानयोगोपदेशेन नतु द्वाभ्यां तदनन्तरं वक्तव्याभ्यां सन्देशाभ्यां मत्प्राप्त्युपायाश्वासनाभ्यां तत्प्रेमवाडवाग्निज्वालया भस्मीभावित्वात् । किन्तु सर्वान्ते प्रकाशितैस्ताभ्योऽन्यत्र ज्ञापनानर्हैः सन्देशैः रहस्यव्यञ्जकैर्बहुभिरेव ॥ ३ ॥

मय्येव संकल्पात्मकं मनो यासां ताः अहमेव प्राणो यासां ताः त्यक्ता दैहिकाः पतिपुत्रपितृशयनभोजनपानादयोऽपि याभिस्ताः तत्र तत्र हेतुः मामेव नतु स्वस्वपतिमत्यं दयितं प्रियं मनसा गता ज्ञानवत्यः न केवलं दयितमेव अपितु प्रेष्ठं न च प्रेष्ठमेव किन्त्वात्मानं ताभिरहमेव स्वस्वजीवात्मा परमात्मा च

मयि ताः प्रेयसां प्रेष्ठे दूरस्थे गोकुलस्त्रियः ।
स्मरन्त्योऽङ्ग ! विमुह्यन्ति विरहौत्कण्ठ्यविह्वलाः ॥ ५ ॥
धारयन्त्यतिकृच्छ्रेण प्रायः प्राणान् कथं चन ।
प्रत्यागमनसन्देशैर्बल्लव्यो मे मदात्मिकाः ॥ ६ ॥

श्रीशुक उवाच ।

इत्युक्त उद्धवो राजन् ! संदेशं भर्तुराहतः ।
आदाय रथमारुह्य प्रययौ नन्दगोकुलम् ॥ ७ ॥
प्राप्तो नन्दव्रजं श्रीमान्निम्लोचति विभावसौ ।
छन्नयानः प्रविशतां पशूनां खुररेणुभिः ॥ ८ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

निश्चित इत्यर्थः । सचाहमत्र मथुरायामतस्ताभिः स्वस्वदेहान्निर्गतास्मान एव मन्यन्ते केवलं मदीययोगमाययैव दुस्तर्कया शक्त्या जीव्यन्ते इति भावः । येन्येऽपि साधकभक्ता अपि मन्निमित्तं लोकधर्मादींस्त्यजन्ति तानपि बिभर्मि किंपुनस्ताः ॥ ४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

षट्चत्वारिंशे भगवदाज्ञया व्रजं गतेनोद्धवेन यशोदानन्दयोः शोकापनोदनं कृतमिति वर्णयति । वृष्णीनामिति ॥ १॥२॥३ ॥

यशोदानन्दयोर्ममार्थयोरवश्यं सान्त्वनं करिष्यति मत्प्रियाणां गोपीनामपि सान्त्वनं तत्स्वभावानुसारेणायं करोत्वित्येतदर्थं तासां स्वास्मिन्प्रेमातिशयमाह । ता इति त्रिभिः । मय्येव मनो यासां ताः अहमेव प्राणो यासां ताः त्यक्तानि दैहिकानि देहसुखसाधनानि याभिस्ताः अतस्तान् बिभर्मि संवर्द्धयामि सुखयामीत्यर्थः । किंबहुना ये जनाः मदर्थे सकलोकधर्माः त्यक्तः लौकधर्मः । ऐहिकामुष्मिकलोकप्रापकः प्रवृत्तिरूपो धर्मो यैस्तान् सर्वांश्च बिभर्मीत्यर्थः ॥ ४ ॥

भाषा टीका ।

श्रीशुकदेवजी बोले वृष्णी वंश के बडे श्रेष्ठ मंत्री श्रीकृष्ण भगवान् के प्रिय सखा बृहस्पति के साक्षात् शिष्य बुद्धिमानो में उत्तम श्रीउद्धवजी हैं ॥ १ ॥

किसी दिन किसी एकांत स्थान में शरणागतों के दुःख के नाश करने वाले हरि भगवान् अपने प्रिय अत्यंत एकांति उन उद्धवजी के हाथ को हाथ से पकड कर यह वचन बोले ॥ २ ॥

हे सौम्य ! हे उद्धवजी ! आप ब्रजको जाओ हमारे पिता माता को प्रसन्न करो गोपियों को जो हमारे वियोग की पीडा है तिसको मेरे संदेशों से छुडाओ ॥ ३ ॥

उन गोपियों का मन मेरे हि में है मेरे हि में उनके प्राण हैं मेरे वास्ते उनने सब देह के काम छोडदिये हैं कोइ भी हो जिन ने मेरे वास्ते लोक तथा धर्म को छोड दिया है उनका पालन पोषण मैं ही करता हूं ॥ ४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तासां वियोगाधिं दर्शयति द्वयेन । मयि ता इति । विरहेणौत्कण्ठ्यं तेन विह्वलाः परवशाः ॥ ५ ॥

गोकुलान्निर्गमनसमये शीघ्रमागमिष्यामीति ये प्रत्यागमनसन्देशास्तैः मे मदीया बल्लव्यो गोप्यः मदात्मिका इति तासामात्मा यदि स्वदेहे स्यात्तर्हि विरहतापेन दह्येतैव तस्य मयि वर्तमानत्वात्कथञ्चिज्जीवन्तीति भावः ॥ ६ ॥

सन्देशं भवतीनां वियोगो मे नहि सर्वात्मना क्वचिदित्यादिकम् ॥ ७ ॥

निम्लोचत्यस्तं गच्छति सति छन्नं यानं यस्येति तदा गोपीभिरज्ञातत्वेन नन्दसङ्गं लब्धवानिति सूचयति ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

ननु या भवन्मनस्कादिरूपास्ता लब्धभवत्का एव तर्हि कथमनुशुच्यन्तां सत्यमन्तरनुसन्धाने तादृश्य एव ताः किन्तु बहिरवधाने जाते परमव्यग्रा भवन्तीत्याह । मयीति । गोकुलस्त्रीत्वेन तावन्मदीयदर्शनमात्रजीवनाः तत्रापि ताः अनिर्वचनीयस्वभावाः द्वयोः प्रकर्षे खलु तरवीयसुनौ बहूनांतु तमविष्ठनाविति प्रियं तावत्सर्वं ममतास्पदं ततोऽपि प्रियः प्रेयानहन्तास्पदमात्मा ते च यद्येकस्य बहवः सम्भवन्ति तदा तेषां कोटिसंख्यानामपि प्रेष्ठे तानप्यतिक्रम्य ये मत्संबन्धिनः प्रियास्तेभ्योऽप्यधिकप्रिय इत्यर्थः । एवं भूते मयि कुटिलकुन्तलं श्रीमुखं च ते जड उदीक्षतां पक्ष्मकृद्दृशामिति तद्वाक्यानुसारेण निकटस्थोऽपि महार्तिप्रदः सम्प्रति तु दूरस्थ इत्यर्थः । स्मरन्त्यः तत्र मम दूरस्थत्वं भावयन्त्यः तद्भावनारम्भत एव मुह्यन्ति मूर्छां

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

प्राप्नुवन्ति एवं तथा भावनायाः स्वल्पकालत्वं मूर्च्छायास्तु चिरस्थायित्वं व्यञ्जितं ततश्च हा कष्टं मद्भावनमपि कर्तुं न शक्नुवन्तीति भावः । वर्तमानप्रयोगेण स्मरणस्य मोहस्य च पौनः पुन्यं दर्शितं मोहे हेतुः विरहेति अतो बाळास्त्रावादेर समपस्माराख्यः संचारी भावः अतः कुजगतिं गमिता न विदामः कश्मलेन कबरं वसनं वेति पूर्वमपि तथावस्थास्पष्टानामेव मया त्यक्तानां सम्प्रति तु ळब्धतदतिशयानां मयि भावस्य सर्वतः प्रचारादपि साम्प्रतं तत्र गमेन मम ळज्जापि जायत इति भावः । अङ्गेत्यार्त्या संबोधनं श्लेषेण हे मदङ्गतुल्येति तासां सान्त्वनाय प्रोत्साहनं च ॥ ५ ॥

अथ तासां दशमीं दशामपि शङ्कते अत्यायासेनैव प्राणान् धारयन्ति निर्गच्छतोऽप्यवस्थापयन्ति अतोऽग्रे कतिदिनानि वा धारयितुं शक्ष्यन्तीति भावः । ननु कोऽसावायासः येन धारयन्ति तत्राह । कथं चनेति । केनापि प्रकारेण यत्नेन तदेवं स्ववाकुचलनळज्जया कारणं व्यक्तमनुक्त्वा पश्चाद्गत्यन्तराभावात्स्पष्टमेव निर्दिशति प्रतीति । सन्देशस्य वक्तुत्वं मध्ये सन्देशान्तराणामपि प्रेषितत्वात् इत्थं प्रथमोक्तमत्प्रत्यागमनदिनसम्भावनप्रपञ्चः । ततो विलम्बतर्कतो मूर्च्छा ततस्तस्यामेव उद्भूतस्वाभाविक तत्स्मरणं तच्चेतना पुनस्तत्संभावनादि पौनःपुन्यादायासेनैव धारयन्तीत्यर्थः मे वल्लव्य इति । ब्राह्मणस्यास्य ब्राह्मणीति वन्मम गोपरूपस्य गोपीरूपा भार्या इत्यर्थः पूर्वं हि पित्रोर्नः प्रीतिमावहेत्यनेन तु गोपाभिमानित्वं स्वस्य स्वयमेव व्यञ्जितं न केवलं साधारणलोकरीत्या तादात्म्यव्यवहारस्ताभिर्मम किन्तु मदात्मिका मत्स्वरूपभूतशक्तय इत्यर्थः । मन्मनस्का इत्यादिकं तूक्तमेव ब्रह्मसंहितायां तु स्पष्टमेव तदुक्तम्—

> आनन्दचिन्मयरसप्रतिभाविताभि-
> स्ताभिर्य एव निजरूपतया कलाभिः ।
> गोलोक एव निवसत्यखिलात्मभूतो
> गोविन्दमादिपुरुषं तमहम्भजामीति ॥

तस्मात्परदारतया कल्पनं तासां वागनिर्गलताप्रकटनाय लीलाशक्त्या कृतमिति प्रातीतिकमात्रं परशय्यासम्बन्धश्च तासां नासूयन्नित्यादौ प्रत्याख्यात एवेति भावः । यद्यपि मदीयत्वभावमयेन प्रेम्णा मद्वाक्ये विश्वासानपगमात् मत्प्राप्त्याशां कदाचिदपि न त्यक्तुं शक्नुवन्तीति तथापि प्राय इति काश्चिन्न धारयन्त्यपीति सम्भाव्यते अतः प्रत्यागमनपर्यवसानैरेव सन्देशैरधुनापि ताः सान्त्वनीया इति भावः । अत्र यद्यपि सर्वेऽपि व्रजवासिनस्तदेकजीवनत्वात्सान्त्वनार्हाः एषां घोषनिवासिनामित्यादिषु यद्धामार्थसुहृत्प्रियात्मतनयप्राणाशयास्त्वत्कृते इत्यादिभ्यः अहो भाग्यमहोभाग्यमित्यादिभ्यः कालियह्रदप्रवेशोत्थापनयोः पशूनां स्थावराणामपि सुखदुःखवर्णनाच्च दुस्त्यजश्चानुरागोऽस्मिन् सर्वेषां नो व्रजौकसाम् नन्द । ते तनयेऽस्माकं तस्याप्यौत्पत्तिकः कथमित्यादिभ्यश्च अतो मनसि चिन्तितं सर्वं भगवता तस्मान्मत्कृत्स्नं गोष्ठमित्यादि तत्रापि श्रीमदुपनन्दादयस्तत्रापि श्रीदामादयस्तदर्हाः तत्र तत्र तथा तथा प्रशस्तत्वात् अतः श्रीव्रजराजेन वक्ष्यते—

> अपि स्मरति नः कृष्णो मातरं सुहृदः सखीन् ।
> गोपान् व्रजं चात्मनाथं गावो वृन्दावनं गिरिम् इति ।

तथापि यस्तेषामनुल्लेखस्तस्मादिदङ्गम्यते केषु चिच्छ्रीपित्राद्यन्तः पातित्वेन केषु चित्त्वभिप्रायविशेषेण सान्त्वनाभाव एव सान्त्वनमभिप्रेतमिति तथाहि श्रीमति गोकुले प्रेमा खलु त्रिविधो दृश्यते औत्कण्ठ्यप्रधानो विस्रम्भप्रधानो विवेकशून्यश्चेति सचान्यत्रापि सर्वोऽपि गरिष्ठः सन् प्रेष्ठस्फूर्त्तिसाक्षात्कारमेव जनयति यथा श्रीलीलाशुकचरणैरुक्तम् "अग्रे समग्रयति कामपि केलिलक्ष्मीमन्यासु दिक्ष्वपि विलोचनमेवसाक्षी,,तितत्र चश्रीजयदेवचरणैरपि वर्णितं "श्लिष्यति चुम्बति जलधरकल्पम् हरिरुपगत इति तिमिरमनल्प,,मिति अत्रैव च वक्ष्यते व्रजराजेन मनो याति तदात्मतामिति तत्रोत्तरोभयभावानां साक्षात्कारबुद्धिजनिकैव सा भवेत् विस्रम्भाविवेकयोरन्यत्वप्रतीतिजननायोग्यत्वात् प्रथमभावानां तु साक्षात्कारेऽप्यप्रतीतिः स्यात् किमुत स्फूर्त्तौ उत्तरकाले तु सर्वथोत्कण्ठाया विकल्पस्वभावत्वात् यथा द्वारकाजलविहारे पट्टमहिषीणां वर्णयिष्यते अत उत्कण्ठाप्रधानप्रेमाणः पितरौ प्रेयस्यश्च वियोगिमानिन एवासन् यथैवोक्तं गच्छोद्धवेत्यादिना वक्ष्यते च इति संस्मृत्येत्यादिना इति गोप्यो हि गोविन्द इत्यादिना च अथ ये विवेकशून्यप्रेमाणो गवादयः ये च विस्रम्भप्रधानप्रेमाणः श्रीदामादयस्ते संयोगिमानिन एवासन् गवादीनां स्वानुभवेनैव निश्चयात् श्रीदामादीनां च मान्त्वेकान्ते मथुरात इहागत्य मिळतीति रहो मिथः संवादेन तद्राद्ध्यात् अत एवैषां हर्षोऽपि वर्णयिष्यते वासितार्थेऽभियुध्यद्भिरित्यादिना तस्मात्पित्रोःप्रेयसीनां च सान्त्वनमेव सान्त्वनम् अन्यथा समाधानाभावात् श्रीदामादिषु तु सान्त्वनाभाव एव सान्त्वनं सान्त्वने प्रत्युत संदेहापत्तेरिति तदेवं त्रिविधानामुत्कण्ठादिप्रधानानां सान्त्वनासान्त्वनव्यवस्थायां सिद्धायामन्येषां तत्तदनुगतमात्राणां तथैव तद्व्यवस्था यथा अक्रूर अगतः किं वा यः कंसस्यार्थसाधक इति वचनोपलक्षितानां दुःखं गोप्यः समुत्थायेत्यादि तदुपलक्षितानां सुखं वृक्षाणां पक्षिणां च तथा तथा वर्णयिष्यमाणानां प्राचीनतत्स्पर्शदर्शनादिसंस्कारविमुक्तानां सुखमिति कालियह्रदप्रवेशनिर्गमयोः स्थावराणामपि किमुत मृगपर्य्यन्तप्राणिनां दुःख सुखयोर्व्यक्तिस्तु तत्तदनिष्टेष्टतापरमातिशयलीलाविशेषश्लिष्टकालस्य तादृशस्वभावत्वादेव जातेति मन्तव्यं यत्र भुवि दिवि चामङ्गलमङ्गलानिमित्तानि जातानीति केचित्तु सखीनां गमनागमनाभिप्रायेण सान्त्वनमिति व्याचक्षते तत्तु न बुध्यते तत्र श्रीगोपेन्द्रप्रश्ने सखीनित्यस्यासारस्यात् तदेवमग्रिमग्रन्थोऽपि व्याख्येयः ॥ ६ ॥

भर्त्तुरिति तस्य तद्भावेन भक्तिभरो द्योत्यते रथमारुह्येतिशीघ्रगमनं बोधयति प्रकर्षेण प्रकृष्टमनोरथाचरणादिना यथो नन्दयतीति नन्दस्तस्य गोकुलमिति तद्गोकुलस्यापि श्रीकृष्णप्रेमानन्दकत्वमभिप्रेतम् ॥ ७ ॥

प्राप्त इति षट्कं श्रीमान् स्वशोभया रथशोभया च विराजमानः श्रीमन्निति पाठे सम्बोधनं किन्तु छत्रयानः । प्रविशतामिति । अनन्तानां पशूनां व्रजे प्रवेशेन खुररेणूनां महासम्वाराणां चाधिकाधिक्योत्थानं विवक्षितम् ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तासां वियोगाधिं दर्शयति द्वयेन । मयि ता इति । प्रेयसां प्रीतिविषयाणां मध्ये निरतिशयप्रीतिविषये दूरस्थेऽपि मयि

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

विषयभूते स्मरन्त्यः ताः गोकुलस्थाः स्त्रियः। अङ्ग हे उद्धव! विरहेण यदौत्कण्ठ्यं तेन विह्वलाः विवशाः विमुह्यन्ति देहधर्मान् विस्मरन्ति ॥ ५ ॥

किं च गोकुलान्निर्गमनसमये शीघ्रमागमिष्यामीति ये प्रत्यागमनसंदेशाः तैर्मदीया वल्लव्यो गोप्यः मच्चित्ताः कथंचित्कृच्छ्रेण क्लेशेन प्रायः प्राणान् धारयन्ति विरहतापेन दह्यन्त एव मच्चित्तत्वात्कथंचिज्जीवन्तीति भावः ॥ ६ ॥

इत्थमुक्त उद्धवो हे राजन्नादृतः भर्तुर्भगवतः संदेशं "भवतीनां वियोगो मे न हि सर्वात्मना क्वचि" दित्यादिना वक्ष्यमाणमादाय रथमारुह्य नन्दगोकुलं जगाम प्रातः ॥ ७ ॥

कदा कीदृशश्च प्राप्त इत्यत आह। प्राप्त इति। विभावसौ सूर्ये निम्लोचति अस्तं गच्छति सति श्रीमत्संपत्तिमन्नन्दव्रजं प्राप्तः अक्रूरवद्भक्त्युद्रेकान्मध्ये मध्ये विलम्ब्यास्तमयवेलायां व्रजं प्राप्त इति भावः। कथंभूतः प्रविशतां पशूनां खुररेणुभिः छन्नं यानं रथो यस्य सः अनेन गोपीभिरज्ञातः सन्नन्दसंगमं लब्धवानिति सूच्यते ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

स्वभक्तवात्सल्यं कथयति। य इति। ये ये जना मदर्थे मां निमित्तीकृत्य त्यक्तलोकधर्माः लोको देहस्तद्धर्माः अशनवसनानुलेपनादिलक्षणास्त्यक्ता यैस्ते तथ यद्वा त्यक्ताः स्वर्गादिलोकविषयाः धर्माः यागादिसुकृतलक्षणाः मदर्थे मन्निमित्ते निवृत्तौ वर्तमाना ये ते यद्वा मामुद्दिश्य त्यक्ता इता लोकधर्माः जनविषयाः नमनाद्याचारा यैस्ते अहं तान् बिभे मि तेभ्यः भीतोऽस्मि बिभर्मि रक्षितास्मि मत्सायुज्यमावहन्तीति भक्तवश्यतां दर्शयति बिभर्मि वा ॥ ५ ॥

विरहेणोत्पन्नमौत्कण्ठ्यम उत्कण्ठारागित्वं तेन विक्लवाः ॥ ६ ॥

प्रत्यागमनसन्देशैः आगमिष्यति युष्मत्प्रेष्ठः कृष्ण इत्यादिवाक्यैः मयि आत्मा मतिर्मननशक्तिः मतिर्बुद्धिर्यासां तास्तथा मत्स्वभावा वा ॥ ७ ॥

विभावसौ सूर्ये निम्लोचति अस्तं गच्छति सति सूर्यवन्ही विभावसू इति दिवाकर इतिकेचित् ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

धारयन्तीति। अतः प्रत्यागमनपर्यवसानैरेव सन्देशैरधुनापि ताः सान्त्वनीया इति भावः। मे वल्लव्य इति वस्तुतस्तस्यैव पत्नीत्वात्। मन्मनस्का मत्प्राणा इत्यनेन पौनरुक्त्यान्मदात्मिका मत्स्वरूपभूता इत्येवार्थः। तत्र यद्यपि सर्वेऽपि व्रजवासिनस्तदेकजीवनत्वात् सान्त्वनार्हाः। यद्धामार्थं सुहृदित्यादिभ्यः। तत्रापि श्रीदत्तुपनन्दादयः तत्रापि श्रीदामादयः। अतः श्रीव्रजराजेन वक्ष्यते। अपि स्मरति नः कृष्णो मातरः सुहृदः सखीन्। गोपान् व्रजं चात्मनाथं गावो वृन्दावनं गिरिमिति। तथापि यस्तेषामनुल्लेखस्तस्मादिदं गम्यते। केषुचित् श्रीपित्राद्यन्तःपातित्वेन सान्त्वनं केषुचित्स्वाभिप्रायविशेषेण सान्त्वनाभाव एव सान्त्वनमभिप्रेतं तथाहि श्रीमति गोकुले प्रेमा त्रिविधो दृश्यते। उत्कण्ठाप्रधानो विश्रम्भप्रधानो विवेकशून्यश्चेति स च सर्वोऽपि गरिष्ठः स्फूर्त्तिं साक्षात्कारमेव जनयति तत्रोत्तरभावानां साक्षात्कारबुद्धिजनिकैव सा भवेत विश्रम्भाविवेकयोरन्यत्वप्रीतिजननायोग्यत्वात्। प्रथमभावानां तु साक्षात्कारेऽप्यप्रतीतिः स्यात् किमुत स्फूर्त्तौ। उत्तरकाले तु सर्वथा उत्कण्ठाया विकल्पस्वभावत्वात्। अत उत्कण्ठाप्रधानप्रेमाणौ पितरौ प्रेयस्यश्च वियोगमानिन एवासन्। यथोक्तं गच्छोद्धवेत्यादि वक्ष्यते च इति संस्मृत्येत्यादि। अथ ये विवेकशून्यप्रेमाणो गवादयः। ये च विश्रम्भप्रधानप्रेमाणः श्रीदामादयस्ते संयोगमानिन एवासन् तत्तत्कनिष्ठप्रेमाणः पितृप्रेयसीतरगोप्यादयस्तु कासांचिदेव गवादीनां स्वानुभवेनैव निश्चयात्। अन्येषां मां तु एकान्ते मथुरात इहागत्य मिलतीति मिथः सम्वादेन तद्दाढर्यात्। यथैतेषां हर्षोऽपि वर्णयिष्यते वासिभार्थेऽभियुध्यद्भिरित्यादिना च। तस्मात् श्रीदामादिषु सान्त्वनं केषु चित्तत्तदन्तःपातित्वेनैव सान्त्वनमिति ॥ ६—१४ ॥

श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी।

ननु फलसाधकत्वात भक्तिमार्गे विरह एव पुरुषार्थ इति किमिति निराक्रियते तदाह। मयि ता इति। ता विमुह्यन्ति क्षणे क्षणे मूर्च्छां प्राप्नुवन्ति कातरा दीनाश्च भवन्ति प्राणा रक्ष्या दैन्यं च दूरीकर्तव्यं ननु मूर्च्छायां को हेतुः ज्ञानस्य मानसव्यापारस्य घातकत्वाभावात् प्राणघाते हि मूर्च्छा भवति तत्राह। ताः मयि दूरस्थे सति गोकुलस्त्रियः विचारचातुर्यविरहिताः प्रेयसामतिप्रियाणां सर्वेषामेव मध्ये प्रेष्ठे अतिप्रिये प्राणादप्यधिकप्रिये दूरे विद्यमाने सति स्मरन्त्य एव विमुह्यन्ति स्मरणमात्रेमेव मूर्च्छाहेतुः अङ्गेति सम्बोधनं तासु स्नेहात् तदर्थे प्रेषणीयेऽपि स्नेहसूचकं मरणमनेनैव भवत्यनेन नेति किंचिदुपपन्नमस्ति यथा महाभयात्प्राणाक्रमणमतिक्रूरदर्शनाच्च यथा वा पुत्राद्यपगमश्रवणे तथा तासामपि प्राप्तिसम्भावनारहिते मयि सति मत्स्मरणमात्रेणापि न हि दृष्टेऽनुपपन्नं नाम भगवत्प्राप्तिसम्भावनाभावसहिता भगवत्स्मृतिः महाप्रहार इव मूर्च्छाहेतुः प्रेष्ठत्वात् स्मरणमावश्यकम् अतोऽचिकित्स्यदोषात् निरन्तरं मूर्च्छैव। किं च पूर्वमनुभूतस्यार्थस्य साम्प्रतमभावो विरहः तेन तासामुत्कण्ठा महती अत औत्कण्ठ्येन कातरा दीनाश्च मत्स्मरणे मूर्च्छा मद्धर्मस्मरणे तु कातरत्वमिति उभयं मत्सन्देशो निवारयिष्यति ॥ ५ ॥

तर्ह्येवं मूर्च्छायां जीवने का प्रत्याशङ्केत्याशङ्कायामाह। धारयन्त्यतिकृच्छ्रेणेति। अतिकृच्छ्रेणेति अतिकष्टेन प्राणान्धारयन्ति वाह्या मृता इति प्रायग्रहणं देहेन्द्रियान्तःकरणानि तु विकलान्येव प्राणान् केवलं धारयन्ति तत्र का उपपत्तिरित्याशङ्कायामाह। कथंचिदिति। न काप्युपपत्तिः प्रसिद्धा वस्तुतस्तु मरणमेवोचितं जीवनमस्तीति किञ्चित्साधनं परिकल्प्यते अप्रसिद्धत्वात्कथञ्चिदित्युक्तं प्रमेयबलेनेति भगवदिच्छयेति जीवनमात्रं प्रमेयबलस्यापि दुःखदूरीकरणे न सामर्थ्यं किं तु धारणात्मकं भूत्वा कथञ्चिद्धारयन्ति तर्हि सन्देशेन किं कर्तव्यं तत्राह। प्रत्यागमनसन्देशैरिति। भगवान्प्रत्यागमिष्यतीति यो ममैव सन्देशः आयास्य इति तज्जीवने साधनं तत्कालेन जीर्णे चेत् मरणमेवेति। तदर्थमुपायान्तरं

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

कर्तव्यं स उपायः पत्रे स्पष्टो भविष्यतीति भावः । ननु स्त्रीणां स्थाने तत्रापि गुह्यसन्देशे कथं पुरुषाः प्रेष्यन्ते तत्राह । बल्लव्यो म इति । त्वयि न सन्देहः ता पुनः मे मदीयाः न हि मदीयानामन्यत्र मनो भवति मत्सम्बन्धस्यैव तथासमर्थ्यात् वल्लवीपदेन चैतत् ज्ञापयति वल्लवानां गोपानां स्त्रियः अहोरात्रं च गोपाः स्त्रीणां वलयप्राया इति ताः संवेष्ट्यैव तिष्ठन्तीति अतिकामुकाः नित्यं स्त्रीसुखदातारः तादृशानामपि स्त्रियो भूत्वा तान्परित्यज्य मत्पराश्चेत् अन्यस्मिन् शङ्कैव नेति । ननु मय्येव यदि तास्वन्यथा बुद्धिर्भवेत तदा का गतिरिति शङ्कायामाह । मदात्मिका इति । अहमेवात्मा यासां मत्स्वरूपास्ताः अतस्तव मद्बुद्धिरेव भविष्यतीति न काचिच्चिन्तेत्यर्थः ॥ ६ ॥

एवमुपपत्तिपूर्वकं गोकुळगमनार्थमाज्ञप्तस्तथा कृतवानित्याह इत्युक्त इति । राजन्निति ईश्वराज्ञा सेवकैरवश्यं कर्तव्येति ज्ञापनार्थं स हि उत्सवात्मकः यत्रैव गच्छति तत्रैवोत्सवः भर्ता हि स्वामी अनेन पातिव्रत्यं तस्योक्तं तेन निन्दा स्तुतिः लोकातिक्रमः परलोकादिबाधो वा सर्वमवगणय्य भर्तुः सन्देशमेवादाय नन्दस्य गोकुलं प्रययौ तत्राप्यादरपूर्वकं परमपुरुषार्थं प्राप्त इव भगवत्स्मरणेन मार्गे वैकल्ये गमनं बाधितं भविष्यतीति रथेन प्रययौ ॥ ७ ॥

गमनदिवसे सन्देशो वक्तुमशक्य इति आदौ नन्दश्च वक्तव्य इति स्मारकेण तासां विरहोऽधिको भविष्यतीति सन्ध्यायां गत इत्याह । प्राप्त इति । नन्दस्यैव व्रजं गतः विशेषाकारेण कालस्य तथा त्वात् अतिथिप्रकारेण गमनमाशङ्क्य निराकरोति श्रीमानिति । सर्वसम्पत्तियुक्तः विभावसौ सूर्ये निम्लोचति अस्तं गच्छति सति विशेषेण भा कान्तिरेव धनं यस्येति योगप्राधान्यात् सूर्यवाचकोऽग्निवाचकश्च अनेन सर्वेषां लौकिकवैदिककर्माणि वैयग्र्यात् स्वाज्ञानं सूचितं किं च प्रविशतां पशूनां खुररेणुभिः छन्नयानः आच्छन्नरथः प्रवेशे पशूनां वेगो भवति भगवद्राहितत्वात ॥८॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

ननु तासां यदि त्वमेव मनःप्राणादयः प्रेष्ठ आत्मा च तर्हि ताः कथमत्र नायातास्तत्र स्थातुमेव कथं शक्नुवन्ति तत्राह । मयि ताः खलु गोकुलस्य स्त्रियः गुञ्जागैरिकमुरलीमयूरपिच्छाद्यलंकृतेन गोपवेशेनैव मया सह तत्र गोकुले एव विलासे प्राप्तमनोतिष्ठा मयाप्यत्रानेतुमनभिप्रेताः कथमत्र वृष्णिपुर्य्यामागच्छेयुरिति भावः । ततश्च प्रेयसामपि प्रेष्ठे दूरस्थे सतीति प्रियं तावत्सर्वं ममतास्पदं ततोऽप्यधिकोऽहंतास्पदमात्मा प्रेयान् ते च यद्येकस्य बहवः सम्भवन्ति तदा तेषामपि कोटिसंख्यानां प्रेष्ठे इति यद्यात्मकोटिभ्योऽपि केचित् पदार्थाः प्रियाः सम्भवेयुस्तेषामपि मध्ये योऽतिप्रियस्तद्रूपे मयीत्यर्थः । अत एव विमुह्यन्ति विशिष्टां मूर्च्छां प्राप्नुवन्तीत्यर्थः । मदीयमुस्तकयैया शक्त्या जीव्यमाना अपि न जीवयितुमिव शक्यन्त इति भावः ॥ ५ ॥

अतिकृच्छ्रेणेति । तासां मत्प्राप्त्याशया प्राणधारणमेवातिकष्टं प्राणत्यागस्तु सुगम एवेति भावः । ननु केन प्रकारेण प्राणान् धारयन्त्यत आह । प्रतीति । गोकुलान्निर्गमनसमये शीघ्रमागमिष्यामीति ये प्रत्यागमनसंदेशास्तैरतो मत्प्राप्त्याशैव महाबलवती निर्गच्छतोऽपि प्राणान् बध्नातीति भावः । तव का भवन्ति तास्तत्राह । वल्लव्यः यद्यपि ता बल्लवानामेव स्त्रियस्तदपि मे मदीया एवं तासां महामाधुर्य्यमयरूपरसगन्धशब्दस्पर्शादिसम्बन्धगन्धमपि तत्पतयः स्वप्नेऽपि न लभन्ते किंत्वस्मद्भार्य्या इमा इत्यभिमानमात्रमेवेत्यतो रसशक्त्यैव स्वपुष्ट्यर्थमनादित एव नित्यपरकीयाः कृता अपि ता मद्भोग्या मदीया एव यतो मदात्मिकाः मत्स्वरूपशक्तेर्ह्लादिन्या अपि महासारप्रेमवृत्तित्वान्मत्स्वरूपभूता अपि सर्वोत्कृष्टह्लादरूपत्वान्मदाकर्षणसमर्था अत एवात्मारामस्यापि मम ताभी रमणसुखमत्यधिकम् अत एव मयात्मनः सकाशादपि ता अधिकमनुकम्पनीया इत्यनुकम्पार्थकः कप्रत्ययः प्रयुक्तः श्लेषेण ममात्मा मनो रमणार्थी यासु ता मय्येवात्मा तथा भूतो यासां ता इति वा मत्सम्भोग्यत्वान्मदीया इत्यर्थः ॥ ६—७ ॥

निम्लोचति अस्तं गच्छति सति छन्नयानः आच्छन्नरथः ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

विरहेण यदौत्कण्ठ्यं तेन विह्वलाः कातराः ॥ ५ ॥

आयास्ये इति दौत्यकैः प्रत्यागनसन्देशैः कथाञ्चित्प्राणान् धारयन्ति ॥ ६ ॥

भर्तुः श्रीकृष्णस्य भवतीनां वियोगो मे न हि सर्वात्मना क्वचित्यादिनिजवाक्यरूपम् ॥ ७ ॥

विभावसौ सूर्य्ये निम्लोचति अस्तं गच्छति सति तत्रापि खुररेणुभिश्छन्नयानो नन्दव्रजं प्राप्त इत्यनेन गोपीभिरलक्षित एव नन्दगृहे प्रविष्ट इतिसूच्यते ॥ ८ ॥

भाषा टीका ।

मैं उनका प्रिय से भी प्रिय हूं मेरे दूर होने से वे गोकुळ की स्त्री मेरे को स्मरण करके मोहित होति हैं विरह की उत्कंठा से विह्वल होजाती हैं ॥ ५ ॥

प्रायः करके वडे कठिन से किसी प्रकार से प्राणों को धारण करती हैं सो भी गोपी मेरे में प्राणों के रखने से मेरे संदेशो से जीती हैं ॥ ६ ॥

श्रीशुकदेवजी वोले हे राजन् ! इस प्रकार कहने से उद्धवजी अपने पति भगवान् के संदेशा को लेकर रथ पर वैठ कर नंदजी के गोगुल को जाते भये ॥ ७ ॥

वे श्रीमान् उद्धवजी सूर्य के अस्त होते समय मे जाते हुये पशुओं के खुरों की रेणुओं से रथ को छिपाकर नंद व्रज में पहुंच गये ॥ ८ ॥

वासितार्थेऽभियुध्यद्भिर्नादितं शुष्मिभिर्वृषैः ।
धावन्तीभिश्च वास्राभिरूधोभारैः स्ववत्सकान् ॥ ९ ॥
इतस्ततो विलङ्घद्भिर्गोवत्सैर्मण्डितं सितैः ।
गोदोहशब्दाभिरवं वेणूनां निःस्वनेन च ॥ १० ॥
गायन्तीभिश्च कर्माणि शुभानि बलकृष्णयोः ।
स्वलङ्कृताभिर्गोपीभिर्गोपैश्च सुविराजितम् ॥ ११ ॥
अग्न्यर्कातिथिगोविप्रपितृदेवार्चनान्वितैः ।
धूपदीपैश्च माल्यैश्च गोपावासैर्मनोरमम् ॥ १२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

व्रजं वर्णयति पञ्चभिर्वासितार्थ इत्यादिना । वासिताः पुष्पवत्यो गावस्तन्निमित्तमभितो युध्यद्भिः शुष्मिभिर्मत्तैर्वृषैर्नादितम्. वास्राभिर्धेनुभिः स्ववत्सकान्प्रति ॥ ९ ॥

विलङ्घद्भिरुत्पतद्भिः गोदोहशब्दैः सहाभितो रवाः मुञ्च मा मुञ्च नय आनय देहि गृहाणेत्यादयो यस्मिंस्तद्वेणूनां निःस्वनेन च मण्डितम् ॥ १० ॥

गायन्तीभिर्गोपीभिर्गोपैश्च सुविराजितम् ॥ ११ ॥

अग्न्याद्यर्चनान्वितैर्गोपगृहैर्धूपादिभिश्च मनोरमम् ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

तदेव वर्णयन् श्रीमदुद्धवानन्दभरं व्यनक्ति पञ्चभिर्वासितार्थ इति । युध्यद्भिर्युध्यमानैः वत्सकानित्यनुकम्पायां कन् ॥ ९ ॥

सितैरिति शुभ्रताधिक्यविवक्षया गोदोहशब्दमिश्रा अभिरवा यस्मिंस्तदिति टीकायां तु लेखकभ्रमः । निःस्वनेन च गोपैश्च सुविराजितमिति गोपीभिः प्रेयसीभ्य इतराभिः मदर्थे त्यक्तदेहिका इत्याद्युक्तेः श्रीगोपैः श्रीदामादिभिरन्यैश्च केश्चित् स्वलङ्कृतैरिति योज्यम् ॥ १० ॥ ११ ॥

एवं लौकिकशोभां वर्णयित्वा वैदिकशोभामपि वर्णयति । अग्नीति । नित्यहोमोपस्थानादिनाऽग्न्यर्कयोः ग्रासदानादिना गवाम् अतिथ्यादीनां चतुर्णां सत्कारादिना । यद्वाऽग्न्यादयः पञ्च भगवत्पूजाधिष्ठानान्येव पित्रादयश्च स्वगृहस्थानामवश्याच्चर्या एवेति वैष्णवानां तेषां ते च तदीयत्वेनैवेति तेषामर्च्चनान्वितैः यद्यपि महाभागवतैरप्युपास्यानां श्रीव्रजवासिनां विधिकैङ्कर्यं नास्ति तथापि श्रीभगवत इव तेषाञ्च कर्मकरणमिदं लीलयैवेति ज्ञेयं किन्तूभयथा वैश्याभीरतया द्विजत्वमेवैषां दर्शितं तदुक्तं श्रीकृष्णरामनामकरणे कुरु द्विजातिसंस्कारमिमिति । वैश्यस्तु वार्त्तया जीवेदित्यादौ । वार्त्ता चतुर्विधा तत्र वयं गोवृत्तयोऽनिशमिति च अन्तर्गृहशोभां वर्णयति । धूपेति ॥ १२ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

वासितार्थे संयोगार्थे शुष्मिभिर्मत्तैः ॥ ९—१४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

व्रज वर्णयति पञ्चभिः । वासिताः पुष्पिण्यो गावः तदर्थं संयोगार्थमिति यावत्परस्परं नियुध्यद्भिः शुष्मिभिर्मत्तैः वृषैर्नादितं तथा वास्राभिर्धेनुभिरूधोभारैरुपलक्षिताभिरिति शेषः वत्सान्प्रति धावन्तीभिर्मण्डितम् ॥ ९ ॥

तथा इतस्ततो विलङ्घद्भिः सितैर्वत्सैर्गोवत्सैर्मण्डितं गोदोहशब्दैः सहाभिरवा मुञ्च मा मुञ्च नय मानयेत्यादिविधास्तैर्वेणूनां निःस्वनेन च ॥ १० ॥

रामकृष्णयोश्चेष्टितानि गायन्तीभिर्गोपीभिर्गोपैश्च स्वलंकृतैरिति । लिङ्गव्यत्ययेन सम्बन्धः सुविराजितम् ॥ ११ ॥

अग्न्याद्यर्चनान्वितैर्गोपगृहैर्धूपादिभिश्च मनोरमं मनोरमैरिति पाठे तैर्गोपावासैर्धूपादिभिश्च सुविराजितमिति सम्बन्धः ॥ १२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

यानं रथः वासितार्थे सम्भोगार्थे वृषकामिनी वासिता वा शुष्मं क्षेमा दृढं बलमेषामस्तीति शुष्मिणः तैः ॥ ९ ॥

ऊधोभारेण युक्ताभिः वास्राभिर्वत्सलोलुपाभिर्गोभिश्च वत्सैश्च गुम्फितं नादितं गवां योनिनदीगुम्फेति यादवः इतस्ततो वधूभिर्गोपैश्च सुविराजितमिति पाठः वधूभिरुत्पतद्भिः नृत्यद्भिर्वा इतस्ततो विलङ्घद्भिरिति केचित् पठन्ति विलङ्घनं कुर्वद्भिः ॥ १०—१४ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

पञ्चधा वर्णयति गोकुलमैश्वर्यरहिताः अन्ये गुणाः सन्ति वीर्यं कामे प्रतिष्ठितमिति तत्र पञ्चानां कामलीलामाह । वासितार्थ इति । शुष्मिभिर्मत्तवृषैर्नादितं तेन पित-

सर्वतः पुष्पितवनं द्विजालिकुलनादितम्।
हंसकारण्डवाकीर्णैः पद्मषण्डैश्च मण्डितम् ॥ १३ ॥
तमागतं समागम्य कृष्णस्यानुचरं प्रियम्।
नन्दः प्रीतः परिष्वज्य वासुदेवधिया ऽर्चयत् ॥ १४ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी।

रोऽपि तृप्यन्तीति प्रसिद्धेः स च नादो जयपूर्वक इति वक्तुं युद्धमाह। युध्यद्भिरिति। वासिता भोगयोग्या गौः यथा ऋतुकाले स्त्री सा विरलैव भवतीति तदर्थं वृषाः युद्धं कुर्वन्ति वृषभाणामुक्त्वा गवामाह। धावन्तीभिरिति। वास्राः सद्यः प्रसूताः धेनवः सवत्साः पुनः इतस्ततो धावन्ति वत्सादर्शनात् सवत्सकानन्यान् स्थूलान् विलङ्घद्भिः गोवत्सैर्विशेषेण लङ्घद्भि मण्डितं वत्सकान् प्रति धावद्भिर्धेनुभिर्मण्डितं तानेव विलङ्घद्भिः गोवत्सैश्च मण्डितम् अथवा वास्राभिर्धेनुभिश्च नादितम् ऊधसो भारेण धावनमशक्यमिति तथापि धावनं प्रेमाधिक्यात् तत्तद्वीर्यमेव स्त्रीपुरुषैर्निरूपितम् ॥ ९ ॥

इतस्तत इति। श्रीवर्णनं श्वेतगोवत्सैः शोभातिशयो भवतीति गोदोहनशब्देन अभितो रवो यत्र वेणूनां निःस्वनेन च मण्डितं स्वरूपतः शोभा धनं श्रीकार्यं च वीणावादनं वेणुवादनमपि श्रीकार्यमेव चकाराद्वीणादिवाद्यान्यपि ॥ १० ॥

यशो गायन्तीभिश्चेति। बलकृष्णयोः शुभानि कौतुकलीलाकर्माणि गोकुलवासिनामुत्सवनिरूपणार्थं कर्मणां शुभत्वं निरूपितम् त्यक्त्वा गत इत्यपि कर्म भवति तथापि स्वस्य हितकरं न भवति तद्व्यावृत्त्यर्थं वा गानं च यशोरूपं स्त्रियश्चेद्गायन्ति अन्यथा भगवद्गुणगानस्य विहितत्वात् धर्मत्वमेव स्यात् अतो गोपाः गोपीश्च वर्णयति। स्वलंकृताभिर्गोपीभिः गोपैश्च स्वलंकृतैः सुष्ठु विराजितमिति ज्ञानार्थं धर्ममाह। प्रवृत्तिभावमेव ज्ञानमुपयोगीति ॥ ११ ॥

अग्न्यर्कातिथीति। अग्नयः अग्निहोत्रादिना पूज्यन्ते अर्कः सन्ध्यावन्दनादिभिः अतिथयः पूज्यन्त एव गावो व्रतादौ दाने च तथा विप्राः पितॄणां देवतानां च नैमित्तिके अर्चनम् अनेन श्रौतः स्मार्तश्च धर्मस्तत्र वर्तत इति निरूपितं देवता हविर्मन्त्राश्च श्रौते निरूपिताः पितरो देवताः स्मार्ते श्राद्धे होमे च तान्त्रिकधर्मोऽपि तत्र वर्तत इति ज्ञापयितुमाह। धूपदीपैश्च माल्यैश्चेति। अर्चनायामन्वितैर्धूपादिभिर्विराजितं मनोहरं वा व्रजस्य गृहाः सुन्दरा न भविष्यन्तीति धर्मप्रस्तावे आधारत्वेन निरूपितं गोपानामावासैरुत्तमगृहैः मनोरमं सर्वेषामेव मनोरतिजनकम् ॥ १२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

व्रजं वर्णयति। वासितार्थे इति पञ्चभिः। मदीयव्रजस्य शोभामुद्धवः पश्यत्विति भगवदिच्छाशक्तिप्रेरिता योगमाया निर्वेदविषाददैन्यादिलक्षणादिभिर्विधुरं कृष्णवियुक्तप्रकाशं सम्वृत्य हर्षात्सुक्यचापल्योत्साहादिभिरतिमनोहरं कृष्णसंयुक्तप्रकाशं प्रथमं सायं समये सामान्यत एवोद्धवं दर्शयामासेति ज्ञेयं वासिताः पुष्पवत्यो गावस्तन्निमित्तमभितो युध्यद्भिः मिथो युद्ध्यमानैः शुष्मिभिर्मत्तैः नादितं नादयुक्तीकृतं वास्राभिर्धेनुभिश्च नादितं स्ववत्सकान् नूतनान् प्रति धावन्तीभिः ॥ ९ ॥

गोदोहशब्दैः सह अभितोरवा मुञ्च मामुञ्च उपेहि अपसर त्वरस्व मात्वरस्व नयानय देहि गृहाणेत्यादयो यस्मिंस्तत् वेणूनां निःस्वनेन च गायन्त्यादिभिश्च विराजितम् अग्न्यर्केति गोपावासैरित्यस्य विशेषणम् ॥ १०—१२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

श्रीमद्व्रजमित्युक्तं तच्छ्रीमत्त्वमाह। वासितार्थे इति पञ्चभिः। वासितानां पुष्पवतीनां गवामर्थे अभितो युध्यद्भिः शुष्मिभिर्मत्तैः वृषैर्नादितम्। वास्राभिर्धेनुभिः ॥ ९ ॥

विलङ्घद्भिरुत्पतद्भिः गोदोहशब्दैः सह अभितो रवाः यस्मिन् तत् ॥ १०–११ ॥

अग्न्याद्यर्चनान्वितैर्गोपानामावासैर्गृहैः ॥ १२ ॥

भाषा टीका।

वह व्रज कैसा है कि पुष्पवती गऊ के वास्ते आपस में युद्ध करते भये मतवाले वृषभों से शब्दाय मान है और गऊ सब स्तनों के भारों से अपने बछरों पर दौडती हैं ॥ ९ ॥

और इधर उधर दौडते हुये शुक्ल वर्णके गऊओं के बछरों से वह व्रज शोभित है गोदोहन के शब्दों से तथा बंशीयों के शब्दों से युक्त है ॥ १० ॥

श्रीकृष्ण तथा बलरामजी के किये शुभ कर्मों को गान करती हुई सुंदर अलंकार वाली गोपियों से तथा गोपों से शोभित है ॥ ११ ॥

अग्नि सूर्य अतिथि गऊ ब्राह्मण पितृ देवताओं की पूजा से धूप दीप माला वाले गोपों के घरों से बडा मनोहर है ॥ १२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

षण्डैः समूहैः ॥ १३ ॥

आर्चयत्पूजयामास ॥ १४ ॥

भोजितं परमान्नेन संविष्टं कशिपौ सुखम् ।
गतश्रमं पर्यपृच्छत् पादसम्वाहनादिभिः ॥ १५ ॥
कच्चिदङ्ग ! महाभाग ! सखा नः शूरनन्दनः ।
आस्ते कुशल्यपत्याद्यैर्युक्तो मुक्तः सुहृद्वृतः ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

कशिपौ शय्यायां सम्विष्टम ॥ १५-१६ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

बहिः प्रदेशशोभां वर्णयति । सर्वत इति । पद्मषण्डैः सरोवरादिगतैः ॥ १३ ॥

आगतं स्वगृहद्वारि प्राप्तं समावास्यं श्रुत्वाऽभ्यन्तरतः सन्निकृष्टमागम्यानुचरं भक्तम् अतः प्रियं कृष्णस्यात्मनो वा वासुदेवधिया वैष्णवस्य तदधिष्ठानत्वात्तदभेदेन ॥ १४ ॥

पूर्वं परमान्नेन पायसेनोत्कृष्टान्नेन वा भोजितं ततः कशिपौ शय्यायां संविष्टं क्षणं कायं प्रसार्य विश्रान्तवन्तं ततश्च सेवकद्वारा पादसम्वाहनादिभिर्गतश्रमं सुखं सुखोपविष्टं पर्यपृच्छदित्यर्थः ॥ १५ ॥

तत्र श्रीकृष्णस्य विश्लेषदुःखवृद्धिशङ्कया सहसा स्पष्टं प्रष्टुमशक्यत्वादादौ तत्प्रश्नभूमिकारूपं श्रीवसुदेवस्य कुशलं पृच्छति । कच्चिदिति । हे महाभागेति श्रीकृष्णस्य सन्निहितत्वाद्भवान् प्रसिद्धायां महाभागतायां योग्य एव वयं तादृशताया-मयोग्यास्तेन परित्यक्तुं योग्या एवेति भावः । शूरनन्दन इति । तेन तत्पितुर्भाग्योदयो विवक्षितः । तच्च श्रीकृष्णस्य तत्र पुत्रासमानत्वाभिप्रायेण । मुक्तः सर्वापद्भ्यः अपत्याद्यैर्युक्त इत्यनेन च सामान्यतः सर्वेषां तथा श्रीकृष्णस्यापि कुशलं पृष्टम् ॥ १६ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

कशिपौ पर्यङ्के ॥ १५—२४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

परितः पुष्पितानि वनानि यस्मिन् द्विजानां पक्षिणां भृङ्गाणां च समूहैर्नादितं हंसैः कारण्डवैर्जलकुक्कुटैश्चावकीर्णं व्याप्तं पद्मसमूहैश्च मण्डितं हंसकारण्डवाद्याकीर्णं पद्मषण्डमण्डित सरः प्रान्तवर्ति द्विजालि कुलनादित पुष्पितवन मण्डित मित्यर्थः ॥ १३ ॥

तावत्कं चित् समागतं ततस्तं कृष्णस्यानुचरं प्रियं चोद्धव-माकर्याभ्यत्येति शेषः । प्रीतः परिष्वज्य भगवद्बुद्ध्या पूजयामास ॥ १४ ॥

ततः परमेणोत्कृष्टेनअन्नेन पायसेन भोजितं परमान्नेनेति कर्मणः करणत्वाविवक्षया तृतीया परमान्नं भोजितमित्यर्थः । कशिपौ पर्यङ्के सुखं यथा तथा संविष्टं गतः अध्वश्रमो यस्य तमुद्धवं पादसंवाहनादिभिः परिचरन्निति शेषः । पर्यपृच्छत् ॥ १५ ॥

प्रश्नमेवाह । कच्चिदित्यादिना । अङ्ग हे महाभाग । नोऽस्माकं सखा शूरनन्दनः वसुदेवः मुक्तः बन्धादिति शेषः सुहृद्भिर्वृतः अपत्याद्यैः सह कुशली सुखी आस्ते कच्चित् ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

कशिपौ शयनतल्पे ॥ १५ ॥

मुक्तः बन्धनक्लेशात् ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

पादसम्वाहनादिकं सेवकद्वारा सुहृदस्तन्मातुलादीन् १५-२८॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

वैराग्यं निरूपयन् गृहे उद्वेगे बहिर्निर्गतस्य महत्सौख्यं तत्रेति वदन् आह । सर्वतः पुष्पितवनमिति । सर्वतः पुष्पितानि यत्र वनानि अत्र वनशब्देन उपवनप्रायाणि वनानि जळानि चोच्यन्ते पुष्पाणामत्युत्कृष्टत्वाय तद्गन्धरसाभिज्ञान्निरूपयति । द्विजानामलीनां च कुलैर्नादितमिति । जळस्थानामुत्कर्षं वक्तुं विशेषणमाह । हंसैः कारण्डवैः आकीर्णमिति मुख्यानि पद्मानीति पद्मषण्डैः पद्मसमूहैः मण्डितमिति ॥ १३ ॥

एवं व्रजं वर्णयित्वा तादृशे गतस्य पूजादिकमाह । तमागतमिति । सम्यगासाद्याग्रे गत्वा तत्र हेतुद्वयं कृष्णस्यानुचरं पूर्वमपि प्रियमिति अतो नन्दः आगमनेनैव प्रीतः अनेन स्वशेषत्वमुक्तम् परिष्वज्येति समानत्वं वासुदेवाधिया भगवत्सेवके भगवद्बुद्धिः कर्त्तव्येति बुद्ध्या अर्चयन्ति यो यच्छ्रद्धः स एव स इति वाक्यात् ॥ १४ ॥

विजातीयत्वात् परमान्नेन पायसेन भोजनमिति केचित् । वस्तुतस्तुप्रकृष्टेनान्नेन ततः कशिपौ पल्यङ्के तूलिकायां सुखमुपविष्टमित्युपलक्षणतया राजोपचारा निरूपिताः ॥ १५ ॥

ततो गतश्रमं स्वयमन्येन वा पादसंवाहनादिभिः कुशलं पर्यपृच्छत्तदेवाह । कच्चिदङ्गेति । तस्य तु कुशलं स्वामिकुशलेनैवेति भगवन्तं पृच्छन् आदौ स्वमित्रं वसुदेवं पृच्छति परिशब्दार्थः हे अङ्ग परमस्निग्ध भगवद्भक्तत्वात् महाभागवतः सखा शूरस्य नन्दनः वसुदेवः अपत्याद्यैर्युक्तः बन्धनान्मुक्तः सुहृद्भिश्च वृतः कुशल्यास्त इति । अनेन रोहिण्यादयस्तत्रैव गता इति ज्ञापितम् । अन्यतोऽपि समागताः पुत्रादयश्चेत्यपि पृष्टं

दिष्ट्या कंसो हतः पापः सानुगः स्वेन पाप्मना ।
साधूनां धर्मशीलानां यदूनां द्वेष्टि यः सदा ॥ १७ ॥
अपि स्मरति नः कृष्णो मातरं सुहृदः सखीन् ।
गोपान् व्रजं चात्मनाथं गावो बृन्दावनं गिरिम् ॥ १८ ॥
अप्यायास्यति गोविन्दः स्वजनान् सकृदीक्षितुम् ॥
तर्हि द्रक्ष्याम तद्वक्त्रं सुनसं सुस्मितेक्षणम् ॥ १९ ॥
दावाग्नेर्वातवर्षाच्च वृषसर्पाच्च रक्षिताः ।
दुरत्ययेभ्यो मृत्युभ्यः कृष्णेन सुमहात्मना ॥ २० ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

स्वस्य साक्षित्वेन पुत्रस्थापनकल्याणयज्ञादिभिः वैमनस्यं परिहृतं परमानन्दं प्रापित इति शूरनन्दन इति विशेषणं तस्य स्वतो महत्त्वमुक्तम मुक्त इत्यनुवादोऽपि सर्वचिन्तानिवृत्त्यर्थः ॥ १६ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

अथोद्धवः कृष्णवियुक्तप्रकाशं नन्दालयं प्रविवेशेत्याह तमिति । समागत्य अभ्यन्तरतः समीपमागत्येति स्वपुत्रसारूप्यावलोकनेनोद्धवस्य च स्वदृष्टजनमात्रोत्त्ववदायित्वशक्त्या च श्रीनन्दस्य बाह्यव्यवहारानुसन्धानसम्भाषणादिसामर्थ्योदयो ज्ञेयः वासुदेवधिया अतिथिरूपेण मद्विष्ठदेवो नारायण एवागत इत्यार्चयत् पाद्यादिना ॥ १४ ॥

भोजितं परमान्नेनेति यद्यपि मथुराप्रस्थानदिनावधि व्रजस्थजनानां सर्वमेव महानससमार्जितमलिनं तृणपत्रधूलिभिः परिपूर्णं लूतातन्तुवितानमयमेवाभूत् परस्परप्रतिवेशिजनवत्सैर्दधिदुग्धतक्रादिभिरेव प्राणान् धारयन्तो हा हताः स्मेति वादिनः सर्वे विषीदन्त्येव तदपि तद्दिने हन्त हन्त मद्गृहमायातो ऽयमुद्धवोऽद्य मा क्षुधा विषीदत्विति व्रजराजस्याशयमभिज्ञाय कश्चित् परिजनो ब्राह्मणः खण्डतण्डुलपयोभिरेकपुरुषमात्रोऽयं परमान्नं पपाचेति ज्ञेयं पादसम्वाहनं सेवकवदेव उद्धवस्य तद्भ्रातुष्पुत्रत्वात् ॥ १५ ॥

कृष्णस्य प्रश्नेऽश्रुकण्ठावरोधादयः सहसोद्भविष्यन्तीत्याशङ्क्य प्रथमं वसुदेवस्य कुशलं पृच्छति मुक्तो बन्धनात् सर्वापद्भ्यश्च ॥ १६—१७ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

पद्मानां षण्डैः समूहैः ॥ १३-१४ ॥
श्रीनन्दभृत्यकर्तृकैः पादसम्वाहनादिभिर्गतश्रमम् ॥ १५-१६ ॥

भाषा टीका ।

सब तरफ फूले वनों से शोभित पक्षी तथा भ्रमरों के समूहों से शब्दायमान है हंस कारण्डव पक्षीओं से युक्त पद्म समूहों से मंडित है ॥ १३ ॥

इतने में श्रीकृष्ण के अत्यंत प्रिय अनुचर आये हुये उद्धव जी से मिलकर नंदजी ने बडे प्रसन्न होकर आलिंगन करके वासुदेव की बुद्धि से अर्चन किया ॥ १४ ॥

फिर रात्रि में उनको क्षीरान्न का भोजन कराया फिर सुख पूर्वक पलंग पर जब बैठ गये तब पादों की सेवाकरने से उनका श्रम चला गया तब उनसे नंदजी पूछते भये ॥ १५ ॥

हे महा भाग ! हमारे शूर पुत्र वसुदेवजी बंधन से छूटकर सुहृदों के सहित पुत्रादि के साथ कुशल से तो हैं क्या सो कहिये ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

साधूनामिति कर्मणि षष्ठ्यः ॥ १७ ॥
गावो गाः गिरिं गोवर्धनम् ॥ १८ ॥
अप्यायास्यत्यागमिष्यति किम् ॥ १९ ॥

श्रीकृष्णोपकारस्मरणादिभिरनुपमानन्देनाभिभूयमान आह । दावाग्नेरित्यादिना । वाताद्वर्षाच्चेति अन्येभ्यश्च वृषात्सर्पाच्च दुरतिक्रमेभ्यो मृत्युभ्यः श्रीकृष्णेन रक्षिताः स्मः ॥ २० ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

क्षणं निजधैर्यार्थं मुक्तत्वस्य मुख्यकारणमेव साक्षात् कृष्णप्रस्तावव्यवधानतया प्रस्तौति । दिष्ट्येति । स्वेनेति तद्वधने दोषः परिहृतः । पाप्मानमेवाह । साधूनां सदाचाराणामत एव धर्मपराणामतस्तदर्थं तत्र श्रीकृष्णगमनमस्माभिरप्यनुज्ञातमिति भावः ॥ १७ ॥

ततश्च धैर्ये चिरमक्षमः प्रष्टव्यमेव साक्षात् पृच्छति । अपीति । कृष्णः सर्वचित्ताकर्षको मत्पुत्रः किं स्मरति किं न विस्मृतवानस्तीत्यत्र नः इति बहुत्वमुपनन्दाद्यपेक्षया सा च सम्मानस्निग्धत्वविवक्षया । मातरमिति । तन्मातुर्निर्देशस्तु तस्या अत्यन्तदुःखदर्शनव्यग्रतया तदेकस्फुरणात् सुहृदः सम्बन्धि गोपाल-

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

तन्मातुलादीन् सखीन् श्रीदामादीन् गोपानिति साधारणान् एकशेषत्वेन गोपीरपि ताश्च तादृशीः आत्मा कृष्ण एव नाथो यस्य तम् । व्रजस्य तन्नाथत्वेन सर्वेषां तन्नाथत्वं सिद्ध्यतीत्यस्यैव विशेषणं दत्तम् । गावो गाः गौरवानुसारेण यथाक्रममन्यूनोक्तिः । वृन्दावनाद्रिरेरगुरुत्वं तदन्तर्भूतत्वात् । अथवा प्रथमत आत्मस्फूर्त्तेरेव लभ्यत्वात् पूर्वं न इत्युक्तं ततश्चोत्तरोत्तरस्यासङ्कोचस्थानत्वातिशयेन सान्निध्यातिशयात् स्मरणातिशयसम्भावनयैव संक्षिपर्यन्तानुक्रमोक्तिः अथ विशेषस्मरणासम्भावनया 'सामान्यत्वेनापि द्वयोस्तद्विषयत्वं पृच्छति पदद्वयेन तत्रापि सामान्योक्तिर्व्रजश्चेति । तत्र तत्रासम्भावनया पुनर्विशेषोक्तिर्गाव इति अहो अहरहस्तमपि त्यक्त्वा यत्सङ्गे यत्र चारमत ता गास्तद्वृन्दावनं च किं स्मरति तत्र च विचित्रक्रीडा सुखसम्पत् कल्पद्रुमं स्वयं प्रवर्त्तितपूजनं सप्ताहं स्वकरे धृतं गिरिं वा स्मरति मारितेऽप्येकस्मिन् कंसे तत्र तत्पत्नीद्वयावर्त्तिनामन्यत्र च तत्पितृपित्रादीनां परः कोटीनां दुरुद्यमभाजां प्रतिघातार्थे स्वजनानामपि यदूनां ततस्तत आनीय सुखवासार्थे व्यग्रचित्तत्वादात्मनः स्मरणमपि तस्य तत्र तत्र प्रतिरुद्धस्य न सुघटते किमुतान्येषामिति भावः ॥ १८ ॥

ननु धीमान् कृतज्ञोऽसौ सदा स्मरत्येव किन्तु विधाय सुहृदां सुखमित्युक्तेः कार्यवशात्किञ्चित् मात्र एव विलम्बः स्यादित्याशङ्क्य फलं द्वयमन्यत् पृच्छति । अपीति । गोविन्दो गोकुलपालकः इत्यागमनावश्यकतोक्ता स्वशब्देन स्नेहपात्रतयेक्षणावश्यकता आस्तां पौनः पुन्याशा सकृदपि तथैवास्तां सान्त्वनाद्याशा ईक्षितुमपि किमायास्यति तत्रेक्षितुमिति स्वेषां महाव्याधितानामिव तापः सूचितः सकृदिति तत्राप्यसम्भावितजीवनानामिव यन्मात्रेणास्मासु मरिष्यमाणानां पुनर्दर्शनाभावदुःखं कथंचिज्जीविष्यतां च पुनर्दर्शनासम्भावनदुःखम् उभयेषां चापाततस्तृष्णाया असह्यतादुःखं नङ्क्ष्यतीति भावः । तस्मिन्नपि तदागमने द्वयं फलान्तरं सवैयग्र्यमभिव्यनक्ति । कर्हीति । कदागमनं स्यात्कदा द्रक्ष्याम इत्यर्थः । सलोप आर्षः तर्हीति पाठे तर्ह्येवेत्यर्थः । ज्ञातीन् वो द्रष्टुमेष्याम इत्यत्रास्माकं तत्र गमनस्यानभिप्रेतत्वात् एवं श्रीमद्वक्त्रस्मरणे तदीयशोभाविशेषं मुग्धश्चिव स्मरति सुनसमित्यादि ॥ १९ ॥

ततः सधैर्यमिव स्वेषु तत्कर्तृकात्मदुःखाद्यनपेक्षितस्नेहशतं निजसान्त्वनार्थमिव स्मरन् प्रत्युत तेन हृदि विदीर्यन्निव विलपति दावाग्नेरिति अहोपरमबाल्यादेव तेनास्माकं रक्षामुहुरेव कृतास्ति कति वा वर्णयामः यत्र दावाग्नेरपि स्वयमनुकम्पावेशेन पातुमारब्धास्सतो गर्गादिष्टनारायणसमप्रभावत्वेन वा तं दृष्ट्वा भत एव भयया वा पीयूषीभूयाप्यायिततद्देहाश्रयं रक्षिता स्मः एवं वातवर्षाभ्यामपि योज्यं मृत्युभ्यो मरणाधिष्ठातृदेवताभ्य इतरेभ्यः सुष्ठु महात्मा कारुण्यप्रभावादिः निरुपाधिप्रेमास्पदादि स्वभाव औत्पत्तिकगुणो यस्य तेन ॥ २० ॥

श्रीमच्छ्रीवीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

पापः कंसः सानुगः स्वकीयेन दुष्टेन कर्मणा निदानेन हतः दिष्ट्या अयं नो महानानन्द इत्यर्थः । पापमेव व्यनक्ति । साधूनामिति कर्मणि षष्ठी यः कंसः साधून् धर्म एव शीलं येषां तान् यदून् द्वेष्ट्यद्विचदित्यर्थः ॥ १७ ॥

पित्रादिरूपाणोऽस्मानात्मा स्वयं नाथो यस्य तं व्रजं गावो गाः वृदावनं गिरिं गोवर्द्धनं चापि स्मरति किमित्यर्थः ॥ १८ ॥

अप्यायास्यत्यागमिष्यति किं तर्हि यदा आगमिष्यति तदा तस्य मुकुन्दस्य वक्त्रं द्रक्ष्यामः कथम्भूतं शोभना नासिका यस्मिन् सुस्मिते शोभनस्मितयुक्ते ईक्षणे यस्मिंस्तत् ॥ १९ ॥

भगवत्कृतानुपकारान् अनुस्मरति । दावाग्नेरिति । वाताद्वर्षाच्च वृषात्सर्पाच्चान्येभ्यश्च दुरतिक्रमेभ्यो मृत्युभ्यः कृष्णेन वयं रक्षिताः कथम्भूतेन सुमहात्मना आश्रितार्त्तिहारिस्वभावेन ॥ २० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

दिष्ट्या दैवेन सकृतेन यदूनामिति षष्ठी द्वितीयार्थे कर्मपदमित्यध्याहार्यं वा ॥ १७ ॥

मातरः मातॄः गावो गाः ॥ १८—२० ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

अतः परं भगवत्कुशलं पृच्छन्नादौ प्रातीतिकं दोषं परिहरति । दिष्ट्या कंस इति । कंसो यो हतः सानुगो मातुलः हितः तद्दिष्ट्यामयरूप इत्याशङ्क्य इति च इन्द्रादीनप्यशक्य इति मातुलो भगवता स हत इति तदर्थमाह । स्वेन पाप्मना हत इति भगवतापि मारणपक्षो दोषाभावाय पाप इति तस्योत्कटं पापमाह । साधूनां धर्मशीलानां यदूनां द्वेष्टीति षष्ठ्या तत्सम्बन्धि सर्वमेव द्वेष्टीति निरूपितं साधूनामिति ज्ञानमार्गोत्कर्षः । धर्मशीलानामिति कर्ममार्गः यदूनामिति भक्तौ अतः सन्मार्गमात्रमेव तस्य द्वेष्य इति उत्कटं पापं तद्वधश्च युक्त एवेति निरूपितं कार्यवशात् कादाचित्को दोषः नात्यन्तं विगीत इति सदेति एवं दोषं परिहृत्य भगवद्गुणानामाधिक्यं पराक्रमाश्चोच्यन्ते ॥ १७ ॥

एवं सति दशभिर्गुणातीतेन सह कुशलमुक्तं भवति तत्र प्रथमम् अस्माभिर्निरन्तरं स्मर्यते तत्स्मारकाणां बहूनां विद्यमानत्वात् तथापि किं सविस्मरति न वेति स्मारकाभावात् पृच्छति । अपीति । संभावनायां नः अस्मान् कृष्णोति स्नेहेन नामग्रहणं स्मारकाभावात् कथं स्मरणमित्याशङ्क्य सम्बन्धानाह । मातरमिति । आदिपदैश्चिन्ता तत्र संस्कारोद्बोधिका निरूपिता मातरं यशोदामिति पूर्वं स्वात्मानमुक्तवान् बहुवचनं तु सर्वापेक्षं सुहृदः अस्मानन्यांश्च उपनन्दादीन् सखीन् मित्राणि गोपान् व्रजं स्थानं तस्य स्मरणे हेतुः आत्मनाथमिति । आत्मैव नाथो यस्येति पाल्यमानत्वाद्वा गावः गा इत्यर्थः क्रीडास्थानं वृन्दावनं विशेषलीलाधारो गोवर्धन इति गिरिः ॥ १८ ॥

एवमष्टौ स्मरणहेतवः स्मरतीत्युत्तरं प्राप्याह । आप्यायास्यतीति । यो हि यत्स्मरति सर्वदा स तदभिलाषी सन् तत्र गच्छति अतोऽत्रापि सम्भावना नत्वत्र गुणभावः तत्र च राज्यमिति कथमागमनमितिचेत्तत्राह । गोविन्द इति । देवादिभिः संवरे·

स्मरतां कृष्णवीर्याणि लीलाऽपाङ्गनिरीक्षितम् ।
हसितं भाषितं चाङ्ग ! सर्वा नः शिथिलाः क्रियाः ॥ २१ ॥
सरिच्छैलवनोद्देशान् मुकुन्दपदभूषितान् ।
आक्रीडानीक्षमाणानां मनो याति तदात्मताम् ॥ २२ ॥
मन्ये कृष्णं च रामं च प्राप्ताविह सुरोत्तमौ ।
सुराणां महदर्थाय गर्गस्य वचनं यथा ॥ २३ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

वोत्रन्द्रत्वेन स्थापितः किञ्च स्वजनानिति स्वजना हि द्रष्टव्याः यद्यपि बहुधैवागमनमुचितं सकृदप्यायास्यतीति परमोऽभिलाषो द्योतितः आयास्यतीत्युत्तरे मनोरथमाह । तर्हि द्रक्ष्यामः तद्वक्त्रमिति । ईश्वरप्रेरणाभावात् आज्ञाभावाच्च गमनमसम्भावितं यतस्त निरुद्धाः आगमनमेवहि निरोधज्ञापकम् सुनसमिति । सौन्दर्यं निरूपितं सुस्मितसहितमीक्षणं यत्रेति तस्य सर्वे रूपादिभावा निरूपिताः ॥ १९ ॥

नित्यं निरीक्षितमपि प्रेमाधिक्यात् कामितमिव जातम् अस्माकं तु तत्स्मरणं सर्वदैव स्मारकाणां बहुत्वादिति वक्तुं भगवत्कृतोपकारान्निर्दिशति । दावाग्नेरिति । साक्षान्नन्देन यावद्दृष्टं तावद्गणयति विशेषतः दावाग्निः कालीयह्रदे वातवर्षात् गोवर्धनोद्धरणे वृषोऽरिष्टः सर्पः सुदर्शनः चकारात् सर्वे श्रुताः संगृहीताः द्वितीयचकारेण वरुणाद्युपद्रवात् किं बहुना दुरत्ययेभ्यो मृत्युभ्यः ये मृत्यवोऽप्रतीकार्याः कंसादयो दावानलादय एव वा कृष्णेन सुमहात्मनेति फलरूपेण साधनरूपेण आत्मत्वादुपकारानपेक्ष्यत्वं महत्त्वा बहूपकारत्वम् ॥ २० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

ततः साश्रुगद्गदं पृच्छति । अपीति । मातरमिति तन्मातुर्दुरवस्था त्वयैव द्रष्टव्यामिति तर्जन्या तां दर्शयति आत्मा स्वयमेव नाथो यस्य तामिममनाथं सम्प्रति निःशोभं व्रजं च पश्येति भावः गावः गाः ॥ १८ ॥

अप्यायास्यतीति किंस्विदुद्धव ! तन्मनोऽभिप्रायं जानासीति भावः । ननु जाजास्येव स आयास्यति युष्मान् सान्त्वयिष्यति निश्चलमत्रैव स्थास्यतीति तत्रास्मत्सान्त्वनं दूरे वर्ततां निश्चलवासोऽपि मा भवतु किन्तु तद्दर्शनमात्रमहं याचे इत्याह । गोविन्द इति । स्वस्वजनानस्मान् विरहमहाज्वरपीडितानद्य श्वो वा मरिष्यतो द्रष्टुमपि सकृदपि किमायास्यति गोविन्द इति परः पराद्धान् गास्तदुपलक्षितानि कोटिशः स्वर्णमुद्रामुक्ताहीरकादिरत्नराजितकानकपात्रविविधवस्त्रालङ्कारचन्दनागुरुकुङ्कुमाद्यनेकगृहद्रव्याणि स्वीयानि विन्दतां लभताम् आवयोर्मृतयोरेतेषु वस्तुषु कोऽन्यः स्वत्वं कल्पयेदत एतानि गृहीत्वा यत्र तस्य वस्तुमिच्छास्ति तत्रैव वसत्विति भावः । ननु किमेवं द्योतयासि तमागतप्रायं विद्धीति तत्र विलम्बमसहमान आह । कहीति । तर्हीति च पाठः

द्रक्ष्याम इति सलोप आर्षः तच्चन्द्रकोटितिरस्कारिवक्त्रं तां निरुपमां नासां तदमृतमधुरं स्मितं ते कमलदलाकारे सुदीर्घनयने अस्मिन्ननन्तकाले उपसन्ने दृष्ट्वैव म्रियेमहीत्याकाङ्क्षा महती वर्त्तते इति भावः ॥ १९ ॥

ननु नैव मरिष्यथ बहुकालमेव तं स्वसुतं लालयन्तो जीविष्यथेति तत्राधुना तु मृत्युहस्तान्न मुच्यामहे इति वक्तुमतीतान् मृत्यून् गणयति । दावाग्नेरिति । सुमहात्मना महास्नेहमयस्वभावेन किंत्वधुना सुमहावाडवानलात् कथं न तेन रक्ष्यामहे इति न जानीम इति भावः ॥ २० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

साधूनामिति कर्मणि षष्ठी ॥ १७ ॥
नः अस्मान् गावो गाः ॥ १८ ॥
अप्यायास्यति आगमिष्यति किम् ॥ १९ ॥
दुरत्ययेभ्यो दुरतिक्रमेभ्यः ॥ २० ॥

भाषा टीका ।

बड़ा पापी कंस अपने भाइयों के सहित मारा गया सो अपने पापहीं से मरा सो अच्छा भया जो कि सदा काल धर्म शील साधु यदुओं का द्वेष करता रहा ॥ १७ ॥

क्या कृष्ण माता सुहृत् सखा हम लोगों को स्मरण करते हैं कि नहीं और गोपों को अपने रक्षित व्रज को गउओं को वृंदावन को गोवर्धन पर्वत को स्मरण करते हैं कि नहीं ॥ १८ ॥

क्या अपने मनुष्यों को देखने को गोविंद इहां आवैंगे कि नहीं तब ही सुन्दर नासिका वाले सुंदर नेत्रवाले उस मुखारविंद का दर्शन करैंगे ॥ १९ ॥

दावानल से और पवन से वर्षा से अरिष्टासुर से सर्प से रक्षा किया है बड़े मृत्युओं से भी सुहृत् आत्मा कृष्ण चन्द्र ने हमारी रक्षा करी है ॥ २० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

किञ्च स्मरतामिति । लीलयापाङ्गेन निरीक्षितम् अङ्ग हे उद्धव ! ॥ २१ ॥

कंसं नागायुतप्राणं मल्लौ गजपतिं तथा ।
अवधिष्टां लीलयैव पशूनिव मृगाधिपः ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

न केवलं शिथिला एव किन्तु शनैरुपरमन्तीत्याह । सरिच्छैलेति । सरितश्च शैलाश्च वनोद्देशाश्च तान् आक्रीडान् क्रीडास्थानानि ॥ २२ ॥

सुराणामर्थाय महद्गम्भीरं गर्गस्य वचनं यथा ॥ २३ ॥

न केवलं तद्वचनानुसारेणैव व्यवहारसम्वाददपीत्याह । कंसमिति ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

एवं पद्यद्वयेन माधुर्यप्रभावौ स्मृतौ तत्रोभयथापि स्मरणे वैयग्र्यं लब्ध्वा एतदेव प्रात्यहिकमात्मदुःखं निवेदयति । स्मरतामिति । कृष्णेति । कृष्णस्येत्यर्थः सुपां सुलुगित्यादिना सुपो लुक् अत एव लीलेत्यादावप्यन्वयः कृष्णेति मुहुरुक्तिः पितुः पुत्रस्य मूलनामन्यासक्तेः वीर्याणि दावाग्निमोक्षणादिरूपप्रभावमयचरितानि न केवलं तानि अपि तु माधुर्यमयचरितानि चेत्याह । लीलेत्यादि । लीला नेत्रयोः स्वाभाविकविलासः तत्पूर्वकमपाङ्गेन लज्जास्वभावान्नेत्रैकदेशेनैव निरीक्षितं सर्वत्रैव स्निग्धस्वभावतया सावधानमीक्षणं तथा तत्रैव हसितं तत्रैव भाषितं च स्मरतां तद्व्यसनमापन्नानां सर्वा भोजनादिक्रियाः शिथिलाः अन्तर्व्यग्रतया बहिः प्रयत्नशून्याः ईश्वरेणैव प्रवर्त्तिता इत्यर्थः । क्रियाभिरन्यचित्ततया वा स्वस्थास्तिष्ठेम तदपि न सिध्येदिति भावः ॥ २१ ॥

ननु स्वगृहावस्थाने पुत्रस्मरणमधिकं स्यादिति तत्त्यागाय स्वयमेव गाः पालयता यमुनातीरादौ भ्रम्यतामित्याशङ्क्य तेनाप्यप्रतीकारं निवेदयति । सरिदिति । उद्देशाः प्रदेशाः तान् मुकुन्दस्य अजगरवरुणादिभ्योऽस्मदादिमुक्तिदातृत्वेन तन्नाम्ना व्रजे विख्यातस्य पदैश्चरणचिन्हैः श्रीपृथिवीदेव्यापि स्नेहादद्यापि निजाङ्के तथैव रक्ष्यमाणैर्विभूषितान् तथा आक्रीडान् तत्तत्क्रीडाचिन्हमनोहरान् ईक्षमाणानां प्राणिमात्राणां किमुतास्माकं मनस्तदात्मतां तत्स्फूर्त्तिमयतां याति अस्माभिः किं कर्त्तव्यमिति भावः ॥ २२ ॥

एवं हठात् पुनरागतेन माधुर्यस्फुरणेन लब्धचित्तास्वास्थ्यः पुत्रबुद्ध्या स्नेह एवात्यन्तार्तिहेतुरित्याशङ्क्य तदाच्छादनाशया विश्लेषविशेषमयप्रीतिजातिस्वभावात्तन्माहात्म्यकीर्तनेच्छया वा पुनः प्रभावान् स्मरति । मन्य इति चतुर्भिः । इह मद्गृहे प्राप्तौ स्वाच्छन्द्येनैव जन्मानुकृतवन्तौ सुरोत्तमौ नारायणसमौ कावपि मन्ये सम्भावयामीति पुत्रभावस्यैव सहजत्वमन्तर्गतत्वञ्च बोधयति ॥ २३ ॥

मल्लौ चाणूरमुष्टिकौ तथाशब्देन मल्लयोर्गजपतेश्च नागायुतप्राणत्वमुक्तम् । अवधिष्टां हतवन्तौ यो यश्च यथास्वमिति शेषः मृगाधिप इत्येकत्वं प्रत्येकदृष्टान्तत्वात् ॥ २४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

आत्मनोऽवस्थानप्रकारमाह द्वाभ्याम् । अङ्ग हे उद्धव । भगवतो वीर्याणि चेष्टितानि लीलया अपाङ्गेन निरीक्षणं च हसितं च भाषितं च स्मरतां नोऽस्माकं सर्वाः क्रियाः व्यापाराः शिथिलाः ॥ २१ ॥

न केवलं शिथिला एव किन्तु शनैरुपरमन्त्यपीत्याह । सरिदिति । सरितः शैलाश्च वनोद्देशाश्च तानाक्रीडान् क्रीडास्थानानि चेक्षमाणानां नो मनस्तदात्मतां कृष्णानन्यविषयकतां प्राप्नोति ॥ २२ ॥

अनितरसाधारणचेष्टितैर्लिङ्गैः रामकृष्णौ भगवदवतारावित्यध्यवस्यति । मन्य इति । रामं कृष्णं च सुरोत्तमौ वासुदेवसङ्कर्षणौ इह लोके प्राप्ताववतीर्णौ मन्ये किमर्थं सुराणां महतेऽर्थाय प्रयोजनाय तत्र शिष्टसम्वादं प्रमाणयति । गर्गस्य वचनं यथेति ॥ २३ ॥

तत्र लिङ्गान्याह । कंसमिति त्रिभिः । नागायुतस्य गजायुतस्य प्राणो बलं यस्य तं कंसं बहुवचनान्तपाठे तान्मल्लान् गजपतिं गजेन्द्रं कुवलयापीडं लीलयैवावधिष्टां हतवन्तौ यथा सिंहः पशूंस्तद्वत् ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

क्रियाः गृहादिविषयाः ॥ २१ ॥
तदात्मतां तस्मिन्नेव व्यासक्ताम् ॥ २२ ॥
महते अर्थाय प्रयोजनाय ॥ २३ ॥
नागायुतवद् प्राणो बलचेष्टा यस्य तथा तम् ॥ २४ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

एष्यदप्यप्रार्थितमपि सर्वमेव हितं करोतीति श्रुते तर्हि कथं न गम्यत इत्याशङ्क्याह । स्मरतामिति । कृष्णवीर्यं स्मरतामप्यस्माकं सर्वाः क्रियाः शिथिला भवन्ति भगवतः स्थाने गमनं प्रेम्णा भवति अस्मदीयो भगवान् किमिति तत्र तिष्ठति गत्वा समानेय इति तत्र वीर्याणि स्मृत्वा एतावन्तमुपकारं भगवान् कृतवान् किमस्माभिः कृतं के वा वयं कथं चैतत् धार्ष्ट्यमिति शैथिल्यं भवति । सुखार्थं चेत् कृष्णत्वात् सदानन्द इति स्मृत एव सुखं प्रयच्छति । अत उभयथापि गमनं बाधितम् । अथेन्द्रियसुखार्थं भगवान् द्रष्टव्य इति चेत्तत्राह । लीलापाङ्गनिरीक्षितमिति । लीलया यदपाङ्गनिरीक्षणं तत्स्मरतामिति भगवतो दृष्टिश्चेल्लभ्यते तावदेव पश्यतीति बुद्ध्या चक्षुः शाम्यति लीलापूर्वकं पश्यतीति लीलादर्शनेन प्राणास्तृप्यन्ति अपाङ्गेन यत्पश्यति तेनैश्वर्यं प्रकटयन् धार्ष्ट्यं दूरीकरोति हसितेन च मोहयति भाषितेन श्रोत्रादिसुखं सम्पादयति अतः सर्वार्थं प्रयत्नान् दूरीकरोति नास्माकं गमनसामर्थ्यमिति भावः । चकारात्सर्वं भगवच्चरित्रम् अङ्गत्वप्रतारणाय सर्वाः दैहिका मानसिका लौकिका वैदिकाश्च तदर्थमुद्योगे तत्स्मरणमावश्यकं स्मरणे च गमनासम्भवः ॥ २१ ॥

किञ्च क्षणे क्षणे वयं मुक्ताश्च भवाम इत्याह । सरिच्छैलेति । यत्र यत्र भगवता स्वानुभावः प्रकटीकृतः स्थापितः तद्दर्शनेनैव

तालत्रयं महासारं धनुर्यष्टिमिवेभराट् ।
बभञ्जैकेन हस्तेन सप्ताहमदधाद्गिरिम् ॥ २५ ॥
प्रलम्बो धेनुकोऽरिष्टस्तृणावर्तो बकादयः ।
दैत्याः सुरासुराजितो हता येनेह लीलया ॥ २६ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

मनस्तदात्मतां भगवदावेशमेव प्राप्नोति तेन सुतरामेव गमनाभावः सरिद्यमुना शैला गोवर्द्धनादयः वनोद्देशाः वृन्दावनभूमयः । एतेषु भगवदनुभावार्थमाह । मुकुन्दस्य मोक्षदातुः पदैर्भूषितानिति आभासित्रेतेष्वपि कदाचित्पदानि भवन्तीति तेषु भगवतस्तात्पर्यार्थमाह । आक्रीडानिति । आसमन्तात् क्रीडास्थानभूतान् ईक्षमाणानामिति नैकधा दर्शनमावश्यकम् । ईक्षणमेव च मनसस्तदात्मकत्वे हेतुः ॥ २२ ॥

ननु कथमेवं सामर्थ्यमवगतं विपरीतबुद्धेर्दृढत्वादित्याशङ्क्याह । मन्ये कृष्णं च रामं चेति । महत्त्वाद्वस्तुसामर्थ्येनैव मनस्तदात्मकं भवतीति श्रुतमपि कदाचिदसम्भावनया प्रतीतिं न गृह्णातु अनुभवः प्रतीतिं गृह्णातीति मन्य इत्याह । कृष्णं च रामं चेति । चकारद्वयं सर्वदेवगणसमुच्चयार्थं ननु तादृशयोः सुरोत्तमयोर्ब्रह्मादेरप्यधिकयोरिहागमने को हेतुरित्याशङ्क्याह । सुराणां महत्कार्यार्थमिह स्वयमेव समागतौ नतूत्पन्नौ येन विना तत्कार्यं न भवति ननु तर्को न प्रमाणमिति कथं निर्णेतुं शक्यते तत्राह । गर्गस्य वचनं यथेति । गर्गस्य तथैव वचनम् ॥ २३ ॥

अतः प्रमाणानुभवाभ्यां देवोत्तमत्वं सिद्धमिति माहात्म्यज्ञानं युक्तमेव सामर्थ्येनापि तन्निश्चीयत इत्याह । कंसमिति त्रिभिः । सात्त्विकी राजसी तामसी च लीला क्रमेण निरूपिता नागायुतस्य हास्तिनो दशसहस्रस्य यावद्बलं तावान् प्राणो बलं यस्य मल्लावपि चाणूरमुष्टिकौ नागायुतप्राणौ गजपतिः कुवलयापीडस्तथा वस्तुतोऽयमपि नागायुतप्राणः चाणूरस्तु स्वापेक्षया हीनत्वं युद्धार्थं वदन् तथोक्तवान् । सहस्राणां वा द्विपानां सत्त्वं बिभर्तीति तत्र योजनीयम् अन्यथाच तथेति वचनमसङ्गतं स्यात् । ततश्चतुर्णां बलं चत्वारिंशत्सहस्रगजपरिमितं भवति एतादृशानपि लीलयैवावधिषां तर्हि मन्त्रादिसामर्थ्येन हतवानित्याशङ्क्य दृष्टान्तमाह । पशूनिव मृगाधिप इति । सिंहः स्वभावत एव पशून् हन्ति गजो हि तस्य प्रतिपक्षस्यापि भवति ननु पशवो गवादयः अतस्तनोऽनन्तगुणं सामर्थ्यं भगवतः सूचितम् ॥ २४ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

ननु त्वदीयमुखचन्द्रस्मरण सुधयैव सर्वे सन्तापाः शाम्यन्तीति सत्यं तत् स्मरणं सर्वसन्तापहरमपि सम्प्रति दुरदृष्टवशादस्माकं सर्वसन्तापकरमेवाभूदित्याह । स्मरतामिति । क्रियाः शिथिला इति स्नानभोजनपानाद्या अभ्यासवशाज्जायमाना अपि सम्प्रति शिथिली भवन्त्यत एव न जीवाम इति भावः ॥ २१ ॥

ननु यद्येवं तर्हि गृहावस्थाने पुत्रस्मरणमधिकं स्यादतस्तत्त्यागाय स्वयमेव गाः पालयता भवता यमुनातीरादौ भ्रम्यतामित्याशङ्क्य तेनाप्यप्रतीकारं ज्ञापयति । सरिदिति । उद्देशाः प्रदेशाः तदात्मतां तत्स्फूर्त्तिमयतां तस्मिन् लीनतां वा ॥ २२ ॥

विश्लेषमयप्रीतिजातिस्वभावादेव सहसा स्फुरितेन तदैश्वर्येण क्षणं बन्धविवेक इवाह । मन्ये इति । इह मद्गृहे प्राप्तौ मम च वसुदेवस्य च भाग्यात् पुत्रावभूतामित्यर्थः । सुराणाम् अर्थाय कंसादिशत्रुवधलक्षणाय प्रयोजनाय महत् गम्भीरं गर्गस्य वचनं यथा ॥ २३ ॥ २४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अङ्ग हे उद्धव ! लीलया अपाङ्गेन निरीक्षितम् ॥ २१ ॥

आक्रीडान् क्रीडास्थानभूतान् सरिदादीन् ॥ २२ ॥

महद्गूढार्थं गर्गस्य वचनं यथा तथैवाहं सुरोत्तमौ सर्वदेवश्रेष्ठौ मन्ये ॥ २३ ॥

तयोः कर्माण्यपि तौ भगवन्तावेव सूचयन्तीत्याह । कंसमित्यादित्रिभिः ॥ २४—२६ ॥

भाषा टीका ।

कृष्णचंद्र के चरित्र लीला सहित नेत्र कटाक्षों से देखना हसना बोलना इनको स्मरण करने से हमारी सब क्रिया शिथिळ होजाती हैं ॥ २१ ॥

यमुनानदी गोवर्धन पर्वत वन के सब देश जो कि मुकुंद के पदों से भूषित हैं और जो उनके क्रीडा के स्थान उनों को देखने से हम लोगों के मन कृष्ण मय होजाते हैं ॥ २२ ॥

हमको मालूम होता है कि कृष्ण राम दोनों देवताओं में श्रेष्ठ हैं देवताओं के बडे कामों को करने के वास्ते इहां आये हैं जैसे कि गर्गजी का वचन है ॥ २३ ॥

दश हजार हाथि के बल वाले कंस को तथा दो मल्लों को तथा कुवलया पीड हस्ति को ऐसा मारा कि जैसे सिंह मृगों को मारता है ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

इभराड् यष्टिमिव तालत्रयप्रमाणं धनुर्बभञ्ज ॥ २५-३० ॥

॥ श्रीशुक उवाच ।

इति संस्मृत्य संस्मृत्य नन्दः कृष्णानुरक्तधीः ।
अत्युत्कण्ठोऽभवत्तूष्णीं प्रेमप्रसरविह्वलः ॥ २७ ॥
यशोदा वर्ण्यमानानि पुत्रस्य चरितानि च ।
शृण्वन्त्यश्रूण्यवास्राक्षीत्स्नेहस्नुतपयोधरा ॥ २८ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

तालः षष्टिहस्तप्रमाणकपरिपाततालवृक्षः । तालो नववितस्त्य इति देवबोधः । एकेन वामेनैव । यष्टिमिव इक्षुदण्डमिव बभञ्ज ॥ २५ ॥

येनेति येन येनेत्यर्थः ॥ २६ ॥

स्वत एव कृष्णानुरक्तधीः । विशेषत इति पूर्वोक्तं माधुर्यप्रभावमयनिजपालनञ्च सम्यक् मुहुः स्मृत्वा प्रेमवेगविवशः अत एवाश्रुपूर्णकण्ठः सन् तूष्णीमभूत् परं किञ्चिद्वक्तुं न शशाकेत्यर्थः । वीप्सया स्मरणस्य त्यागे शक्त्यभावो बोध्यते ॥ २७ ॥

पुत्रस्येति सुरोत्तमाविद्यादि श्रवणेऽपि प्रत्युत तया निश्चिते तत्रैवावेशो दर्शितः । चरितानि प्रभावमयानि । चकारात् किमुत सौन्दर्यादीनीत्यर्थः । अतएव वर्त्तमान शतृशानाभ्यां प्रवृत्तिमात्रेणैव नैरन्तर्येण चैवेत्यर्थः । अव समन्तात् निजवस्त्रादिकमाप्लाव्य असस्राक्षीत् विससर्जैव केवलं नतु किञ्चित् कर्त्तुं प्रष्टुं वक्तुं वा शक्तेत्यर्थः । एवं श्रीजेश्वरादावपि विशेष उक्तः स्नेहप्रस्नुतपयःपयोधरा च जातेत्यर्थः । इति चिरकालेऽतीतेऽपि तादृशत्वात् स्वाभाविकमहास्नेहः सूचितः ॥ २८ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

तालं परिमाणविशेषः ॥ २५—३० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तालं परिमाणविशेषः तत्त्रयपरिमितं महासारमयोक्तदृढं धनुर्बभञ्ज यथा गजेन्द्रो यष्टिमिक्षुदण्डं तद्वत् तथैकेन हस्तेन गिरिं गोवर्द्धनं सप्ताहमित्यत्यन्तसंयोगे द्वितीया सप्तदिवसपर्यन्तमदधाद्धार ॥ २५ ॥

तथा देवदानवजयिनः प्रलम्बादयो दैत्या येन श्रीकृष्णेन हताः एतान्यमानुषाणि चेष्टितानि परत्वलिङ्गानीति भावः । येनेति । प्रयोज्यप्रयोजककर्त्रोस्तन्त्रेण निर्देशः अतः प्रलम्बो हत इत्यस्याविरोधः ॥ २६ ॥

इत्थमिति कृष्णेऽनुरक्तानुरागयुक्ता धीर्यस्य अश्रूणि कण्ठे यस्य सः प्रेमसंरम्भेण प्रेमोद्रेकेण विह्वलः परवशः तूष्णीं बभूव न किञ्चिदुवाच ॥ २७ ॥

तथा यशोदा च वर्ण्यमानानि अश्रौषीत् शेषः । पुत्रचरितानि शृण्वन्ती स्नेहेन स्नुतौ प्रस्नुतौ पयोधरौ स्तनौ यस्याः साश्रूण्यवास्राक्षीत् आनन्दजनेत्रजलबिन्दून् ववर्ष ॥ २८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अङ्गुष्ठमध्यमे विस्तृते यत्परिमाणं स ताल इत्युच्यते एतादृशतालत्रयपरिमाणं प्रादेशस्तालगोकर्णइति यष्टिमिक्षुदण्डम् ॥ २५ ॥

सुरासुराञ्जयन्तीति सुरासुरजितः ॥ २६ ॥

प्रेमप्रसरेण प्रेमसन्दोहेन विह्वलः विवशः ॥ २७ ॥

अवास्राक्षीत् निरन्तरममुञ्चत् ॥ २८ ॥ २९ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

राजसीं लीलामाह । तालत्रयमिति । तालवृक्षस्य शतत्रयहस्तपरिमितस्य यावान् विस्तारः तालानां त्रयं यत्रास्ति । महासारमिति । अतिदृढधनुर्यष्टिमिति । धनुरेव यष्टिरूपमनम्रम् अनम्रस्य भङ्गः सुतरामेवाशक्यः अत्रापि प्रकारान्तरेण भङ्गाभावाय दृष्टान्तः इभराडिति यष्टिमिव वा । इभराडिति । यष्टिरपि इक्षुः यथेक्षुदण्डं मत्करीति वाक्यैकवाक्यतया तत्रापि एकेनैव हस्तेनेत्यत्रेऽपि सम्बध्यते सप्ताहमदधाद्गिरिमिति ॥ २५ ॥

तामसीमाह । प्रलम्ब इति । नात्र क्रमो विवक्षितः आदिशब्देन वत्सादयः सर्व एव दैत्याः मानुषैरवध्याः किञ्च सुरासुरजितः सुरा असुराश्च जिता यैस्ते सर्वे अस्मत्समक्षमेव लीलयैव हताः अतः सामर्थ्येनापि देवोत्तमत्वमेवेति निर्द्धारः ॥ २६ ॥

एवं स्निग्धाय भगवद्गुणानुवर्णने यत्कार्यं तज्जातमित्याह । अयमर्थः नोद्धवो बोधितः किन्तु पदार्थस्मरणाभिलाष एवेति उत्तमाधिकारं बोधयितुं संस्मृत्य संस्मृत्येत्युक्तं नतूक्त्वोक्त्वा यैरेव स्मरणानन्तरं वचने सामर्थ्यं बुद्धेरनुरागः मनस उत्कण्ठा तत्रैव तूष्णीं स्थित इति स्मरणतूष्णींभावयोर्मध्ये भावोदयमवान्तरव्यापाररूपमुत्पन्नमित्याह । कृष्णानुरक्तधीरुत्कण्ठ इति । चित्तस्य स्मरणं बुद्धेरनुरागः मनस उत्कण्ठा अतश्च वाचः पूर्वरूपं तत्र अनुरक्तबुद्ध्या औत्कण्ठ्येन च ज्ञानक्रियारूपाभ्यां शब्दोत्पत्तिप्रतिबन्धात्तूष्णीमभवत् । तर्हि तयोः प्रतिबन्धकत्वेन न पुरुषार्थपर्यवसायित्वमित्याशङ्क्य तथा स्वतन्त्रकार्यमाह । प्रेमप्रसरेण प्रेमप्रचारेण विह्वलो जात इति ॥ २७ ॥

एवं यशोदापि जातेत्याह । यशोदेति । नन्देनैव वर्ण्यमानानि भगवतश्चरितानि शृण्वन्ती चकारात्स्मरन्ती च अन्तःप्रेमपूर्णा अश्रूणि नेत्रयोरस्राक्षीद्विरहव्याकुला जाता अन्तर्भगवदावेशेन दृढप्रेम्णा स्नुतपयोधरा जाता यथानन्दे आवेशो विरहश्च एवमस्यामपि द्वयं वर्णितम् ॥ २८ ॥

तयोरित्थं भगवति कृष्णे नन्दयशोदयोः ।
वीक्ष्यानुरागं परमं नन्दमाहोद्धवो मुदा ॥ २९ ॥

। उद्धव उवाच ।

युवां श्लाघ्यतमौ नूनं देहिनामिह मानद ! ।
नारायणेऽखिलगुरौ यत्कृता मतिरीदृशी ॥ ३० ॥
एतौ हि विश्वस्य च बीजयोनी रामो मुकुन्दः पुरुषः प्रधानम् ।
अन्वीय भूतेषु विलक्षणस्य ज्ञानस्य चेशात इमौ पुराणौ ॥ ३१ ॥
यस्मिन् जनः प्राणवियोगकाले क्षणं समावेश्य मनो विशुद्धम् ।
निर्हृत्य कर्माशयमाशु याति परां गतिं ब्रह्ममयोऽर्कवर्णः ॥ ३२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

तालः षष्टिहस्तप्रमाणकपरिणततालवृक्षः एकेन वामेनैव ॥ २५ ॥ २६ ॥

कृष्णानुरक्तधीरिति । स्मृत्यारूढेन महैश्वर्य्येणापि हन्त हन्त एतादृशैश्वर्य्यवता गुणरत्नाकरेण स्वपुत्रेण दुरदृष्टवशाद्विश्लिष्टोऽवभूवमिति कृष्णे अनुरक्तैव धीर्वै तु वसुदेवस्यैवैश्वर्य्यगन्धेनापि शिथिलितस्वसम्बन्धासंकुचितानुरागा धीर्यस्य सः । प्रेमप्रसरविह्वल इति । अतिप्रमाणाधिक्यवतः प्रेम्णोऽगस्त्यस्याग्रे खल्वैश्वर्यस्य समुद्रोऽपि कियानिति भावः ॥ २७ ॥

एवं कृष्णस्य पिता नन्दो गाम्भीर्य्यबलादेव धृतिं धृत्वा लौकिक्या रीत्या उद्धवमातिथ्येन संमानयितुं सम्यगाक्षितुं परिश्रतुं कुशलं प्रष्टुं कृष्णस्य प्रभावमयं चरितं च वक्तुं शशाक माता श्रीयशोदा त्वधैर्य्यसिन्धुभ्रमिनिमज्जनोन्मज्जनवती तत्तत् किमपि कर्तुं न शशाकेत्याह । यशोदेति । मथुराप्रस्थानदिनमारभ्यैव शतशः स्त्रीपुंसजनैः प्रबोध्यमानापि पुत्रमुखं विना अन्यत् किमप्यहं न द्रक्ष्यामीति प्रतिक्षणमेव प्रतिजनानां मुद्रितनेत्रैव अश्रूणि अत्र समन्तात् निजवस्त्रादि कमाप्लाव्य मन्त्राक्षीत् विसर्जयैव केवलं नन्दवं परिचेतुं वात्सल्यविषयीकर्तुं स्वयं किंचित् प्रष्टुं पुत्रं प्रति किंचित् संदेष्टुं च शक्तेत्यर्थः । स्नेहेन पुत्रविषयकेण स्नुतपयसौ पयोधरौ यस्याः श्लेषेण स्नुतानां वर्षेण जलधारायमाणा ॥ २८ ॥

भाषा टीका ।

तीन ताल बरोबर लंबे धनुष को उनने जैसा तोडा है ऐसे बडा हाथी लाठी को तोड देवे सो भी एक ही हाथ से तोडा है और पहिले एक हाथ से सात दिन तक गोवर्धनपर्वत को धारण किया है ॥ २५ ॥

प्रलंब, धेनुक अरिष्ट तृणावर्त बकासुर आदिक दैत्यों को मारा है जिन ने कि सुर असुरों को जीत लिया है तिनको कृष्ण ने सहजही मार दिया ॥ २६ ॥

श्रीशुकदेवजी बोले इस प्रकार से स्मरण कर कर के नंदजी श्रीकृष्ण के विषे बुद्धि से अनुरक्त होगये वडी उत्कंठा होने से प्रेम के फैलने से विह्वल होकर चुप होगये ॥ २७ ॥

यशोदाजी भी वर्णन किये हुये पुत्र के चरित्रों को सुनकर आंसुओं को गिराती भई उनके स्तनों से दुग्ध बहने लगा ॥ २८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अखिलगुरुत्वमेव जनकत्वेन नियन्तृत्वेन चाह । एताविति । रामो मुकुन्दश्चेत्येतौ विश्वस्य बीजयोनी निमित्तोपादाने ननु पुरुषप्रधानयोर्बीजयोनित्वं प्रसिद्धमत आह । पुरुषः प्रधानमिति । पुरुषोंऽशः प्रधानं शक्तिः अतः प्रधानपुरुषावप्येतावेवेत्यर्थः । एवं जनकत्वमुक्तं किञ्च अन्वीयभूतेषु भूतेष्वनुप्रविश्य भूतानां तद्नुग्रहितस्य विलक्षणस्य नानाभेदस्य ज्ञानस्य जीवस्य चेशाते ईश्वरौ नियन्तारौ भवतः कुतः पुराणावनादी अनादित्वात्कारणत्वं ततश्च नियन्तृत्वमित्यर्थः ॥ ३१ ।

ननु सृष्ट्यादिकर्मावेशान्मनुष्यादिजन्मदर्शनाच्च तस्यान्येभ्यःको विशेष इत्याशङ्क्याह । यस्मिन्निति द्वाभ्याम् । कर्माशयं कर्मवासनां निर्हृत्य त्यक्त्वा ब्रह्ममयः स्वरूपज्ञानवानर्कवर्णः शुद्धसत्त्वमूर्तिः सन् परां गतिं तत्पदं याति॥ ३२ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

तयोः कीदृशौ भावौ तौ भवेतामिति सविस्मयं परिचिन्त्यमानयोः श्रीनन्दयशोदयोरित्थं पूर्वोक्तप्रकारेणानुरागं निरन्तरमाह । कृष्णेतिप्रश्रयमयस्नेहं भगवति सर्वेश्वरे वीक्ष्य विशेषेण साक्षात्कृत्य तत्रापि कृष्णे परमपूर्णाविर्भावे तस्मिन् वीक्ष्य तत्रापि परमं सर्वोत्कृष्टं वीक्ष्य उद्धवो नन्दं तस्यैव प्राधान्यात् स्वभावे प्रवृत्तत्वाच्च श्रीयशोदायास्तु परमवैयग्र्येण तत्प्रत्यशक्त्या तमेवाह उच्चैः सान्त्वयितुमिति शेषः । तच्च मुदा अहो मम भाग्यम् एतादृशदर्शनमपि जातमिति हर्षेण तदंशाविष्कारेणैवोपलक्षितः नतु तद्दुःखदर्शनमयदुःखांशाविष्कारेणेत्यर्थः । तस्य हि तदैश्वर्यस्फूर्तेरेव प्राधान्यात् तदनुरागस्यापि महिमांशस्फूर्तिरेव

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

प्रथमतो जाता नतु वैयग्र्यांशस्फूर्त्तिः । केवलवैयग्र्यांशस्फूर्त्तेर्योग्यत्वे तु सान्त्वनानधिकारिणं मन्यमानो भगवानपि न तं प्रास्थापयिष्यदिति भावः ॥ २९ ॥

अतस्तत्र प्रथमतस्तन्महिमवर्णनद्वारैव प्रोत्साह्य तौ सान्त्वयितुमिच्छन् तज्जातीयश्रीनन्दवाक्यावसरं प्राप्य तथैवाह । युवामिति द्वाभ्याम् । इह श्रीकृष्णावतारावतीर्णतदीयमहाभक्तगणपूर्णे जगति देहिनां तत्पर्यन्तानां सर्वेषां मध्ये ये श्लाघ्याः श्रीनारदादयः श्रीगोकुलवास्यन्तास्तेषामपि मध्ये श्रेष्ठौ हे मानदेति एवं युवाभ्यामेव तदीयानामस्माकं मानो दत्तः यतः श्रीकृष्णसम्बन्धिनः एवंविधा जाता इति लोकैः कीर्तयिष्यत इति भावः । यद्यस्मान्नारायणे नारस्य महत्स्रष्टृप्रभृतिपुरुषावतारसमूहस्याप्याश्रयेऽखिलगुरौ परमव्योमनाथादितोऽपि परमोत्तमप्रकाशे उभयथा परमोपादेये परमदुर्लभपरमभाग्यदुष्प्रापाश्रयमात्रे इत्यर्थः । तस्मिन्नीदृशी पुत्रभावतया तद्वश्यतातिशयकारिणी मतिः कृता विद्यते युवाभ्यामेवेति शेषः ॥ ३० ॥

हि एव एतावेव मुकुन्दश्चेति चकारान्वयः । भूतेषु प्राणिषु अन्वीय तद्विलक्षणस्य ज्ञानस्य शुद्धचिन्मात्रस्वरूपस्य जीवस्येशाते चकाराद्भूतानाञ्च सन्धिरार्षः । इमाविति पुनरुक्तिस्तयोरेव तादृशतां निर्द्धारयति । अन्यत्तैः । तत्रानादित्वात् कारणत्वमिव स्वातन्त्र्येणेति वैशिष्ट्यं ज्ञेयं जीवादेरप्यनादित्वादिति यद्वा । नारायणत्वमखिलगुरुत्वमप्याह । एताविति । अंशांशिनोरभिन्नत्वाद्येन रामेण सहैकस्वरूपो यो मुकुन्दस्तावेतौ रामकृष्णाभिधतया पृथग्दृश्यमानावेतावेव च विश्वस्य चकारादवतारादीनां च बीजयोनी द्वावपि निमित्तोपादानरूपौ विश्वस्य तत्तद्रूपतया नाम्नापि पुरुषः प्रधानमिति विख्यातौ । इमावेव तदेतद्द्वयं रामकृष्णरूपेण पुराणावनादिसिद्धौ सन्तौ भूतेषु अन्वीय तत्तदुपाध्यन्तर्यामिरूपेणानुप्रविश्य विलक्षणस्य ज्ञानस्य चाद्वयज्ञानस्वरूपस्य ब्रह्मणोऽपीशाते प्रकाशनाप्रकाशनयोः समर्थौ भवतः । यथोक्तं "प्रकृतिर्यस्योपादानमाधारः पुरुषः परः । सतोऽभिव्यञ्जकः कालो ब्रह्म तत्त्रितयं त्वह"मिति । विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगदिति ब्रह्मणो हि प्रतिष्ठाहमिति श्रीभगवद्गीताभ्यः । "मदीयं महिमानञ्च परंब्रह्मेति शब्दितम् । वेत्स्यस्यनुगृहीतं मे सम्प्रश्नैर्विवृतं हृदी" ति ॥ ३१ ॥

तत्र तयोश्चेतःप्रसत्तिमदृष्ट्वा तदेव पुनः कैमुत्येन विवृणोति । यस्मिन्निति युग्मकेन । तत्र कृष्णे एकस्य निर्देशो द्वयोरभेदाभिप्रायेण जनो यः कश्चिदपि जीवः मरणसमये क्षणमपि विशुद्धमपि मनः समावेश्य यथा कथञ्चिल्लब्धपदं कृत्वा आशु सद्य एव ब्रह्ममयः श्रीभगवत्पार्षदरूपतया चिच्छक्तिवृत्तिः शुद्धसत्त्वस्यैव तादृशमूर्त्तित्वेन स्वरूपप्रकाशप्रचुरः नतु प्राधानिकवत्तिरोहिततदंशः अतोऽर्कवर्णः स्वयमेव प्रकाशमानोऽन्यांश्च प्रकाशयन्नित्यर्थः । आदित्यवर्णः आदित्यवर्णं तमसः परस्तादितिवत् । अखिलेति तैर्व्याख्यातं तन्नात्मा स्वांशानामीश्वररूपाणां विभिन्नांशानां च जीवानां मूलरूपः हेतुश्च सर्वप्रकाशक इति ज्ञेयम् ॥ ३२ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

एतौ रामो मुकुन्दश्च बीजयोनी बीजभूतानां पृथिव्यादीनां कारणभूतौ पुरुषप्रधानं प्रधानं पुरुषमन्वीय अत एव योनिभूता वित्यर्थः । विलक्षणस्य ज्ञानस्य ईशाते प्रवर्त्तकावित्यर्थः ॥ ३१ ॥

तदेव विवृणोति । यस्मिन्निति । निर्हृत्य दग्ध्वा ब्रह्ममयः ज्ञानप्रचुरः अर्कवर्णः अप्राकृतरूपः ॥ ३२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका

इत्थं तयोर्नन्दयशोदयोः भगवति षाड्गुण्यपूर्णे श्रीकृष्णे परमं सर्वोत्कृष्टमनुरागमवलोक्य उद्धवः मुदा नन्दमाह ॥ २९ ॥

उक्तिमेवाह । युवामित्यादिना । एवं निशा सेत्यतः प्राक्तनेन ग्रन्थेन । हे मानद ! युवां दम्पती देवानामपि श्लाघ्यतमौ पूज्यतमावित्यर्थः कुतः यत् यस्मादखिलगुरौ नारायणे श्रीभगवति कृष्णे एवंविधाऽनुरागयुक्ता मतिः कृता अनेन कृतकृत्यत्वं सूचितं हितकृत्त्वेन जनकत्वेनाखिलगुरुत्वं विवक्षितम् ॥ ३० ॥

तदेवोपपादयति । एताविति । रामो मुकुन्दश्चेत्येतौ विश्वस्य बीजयोनी बीजभूतानां पृथिव्यादीनां कारणभूतौ ननु विश्वसजातीयौ प्रकृतिपुरुषौ तस्य बीजयोनी नैतावित्यत आह । पुरुषः प्रधानं प्रधानपुरुषशरीरकावेतावेव बीजयोनी इत्यर्थः । अनेन जनकत्वं स्पष्टीकृतम् इमौ पुराणौ पुरुषौ विलक्षणेषु देवमनुष्यादिरूपेण नानाविधेषु भूतेष्वन्वीयान्तः प्रविश्य ज्ञानस्य ईशाते विलक्षणस्येति पाठे शब्दादिविषयगोचरस्य ज्ञानस्येशाते नियन्तारौ प्रवर्त्तकौ भवत इति यावत् अनेन नियन्तृत्वमुक्तं यद्वा विलक्षणस्य ज्ञानस्येति सम्यग्ज्ञानस्य प्रवर्त्तकत्वेन हितकृत्त्वमीशात इति नियन्तृत्वमुक्तम् ॥ ३१ ॥

यत्कृतामतिरीदृशीत्यनेन सूचितां कृतकृत्यतामेवोपपादयति । यस्मिन्निति द्वाभ्याम् । यस्मिन्नित्यस्य तस्मिन्नित्युत्तरेणान्वयः क्षणं क्षणमात्रमपि विशुद्धं विषयान्तरविमुखं मनो यस्मिन्निधाय कर्माशयं कर्मवासनां निर्हृत्य दग्ध्वा ब्रह्ममयः ज्ञानप्रचुरः अर्कवर्णोऽप्राकृतरूपः परां गतिं तत्पदं याति ॥ ३२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

नूनमिदानीम् ॥ ३० ॥

नारायणशब्दार्थौ ऐरावतो नागरङ्ग इतिवत् नारायणो नाम कश्चित् किंन स्यादखिलगुरुश्च पाषाणवादिति तत्राह । एताविति । एतौ कृष्णरामौ विश्वस्य प्रपञ्चस्य बीजयोनी बीजत्वेन रतिहेतुत्वाद्रेतस्त्वेनोपजीव्यत्वेन वा योनित्वेन स्वमहिम्ना रतो निधानस्थानत्वेन कारणत्वेन वा कीर्तितावितिशेषः । बीजं शुक्रे फले सस्यान्ने इतियादवः योनिः स्त्रीणां भगस्थाने कारणे ताम्रके पणे इति च यद्वा विश्वनाम्नो हरेः बीजं फले निष्पन्नरूपौ योनी गोवर्धनस्योद्धरणादिकर्मणा तत्त्वस्य योग्यौ च योग्यं यत्नक्षमारूपध्यानोपाधिषु वन्दन इति लाभे निष्पत्तिभोगेच बीजं फलधने फलमिति च यद्ययं न विष्णुस्तर्हि गोवर्धनोद्धरणादिकर्म न कुर्यात् मानवबलासाध्यत्वादित्यादि हिशब्दो वक्ति अजामेकां लोहितशुक्लकृष्णां प्रधानादिदमुत्पन्नमित्यादिना प्रकृतेर्बीजयोनित्वप्रतीतेः कथमेतयोर्युज्यत इति तत्राह । इमाविति । यस्त्वेष पुरुषः प्रकृतिरिति

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

श्रुतेः प्रधानं प्रकृतिर्मूलकारणमित्यर्थः । अनेन विरिञ्चस्य कारणत्ववार्यपि चित्प्रयुक्तेत्याशयेनाह । पुरुष इति । "प्रकृतिं पुरुषश्चैव प्रविश्य पुरुषोत्तम" इत्यादेः तत्कारणत्ववाचोऽपि गतिरुक्ता भवतीति असङ्गस्य तत्प्रवेशः कथमित्यत उक्तं पुराण इति पुरमणति प्राप्नोतीति तदेवानुप्राविशदिति श्रुतेरसङ्गस्यापि प्रवेशो युज्यत इत्यर्थः यद्वा । बीजयोनित्वे हेतुमाह । प्रधानमिति प्रधानत्वात् सर्वस्मादुत्तमत्वात् एकमेवाद्वितीयमिति श्रुतिः उत्तमत्वं कुत इत्यत्राह । पुरुष इति । पुरातनपुरुषत्वात् अन्येषामर्वाचीनपुरुषत्वादित्यर्थः । केवलमवतारप्रयोजनं कंसादिहननं न भवति किन्तु स्वोपदिष्टज्ञानरक्षणं चेति भावेनाह । अन्वीयेति । इमौ पुराणौ पूर्णानन्दौ कृष्णरामौ विलक्षणेषु विविधलक्षणेषु नानाविधव्यावर्तकधर्मेषु भूतेषु अन्वीय अवतीर्य विज्ञाय व्यासाद्यात्मना विशिष्टज्ञानमुत्पाद्यासुरजनप्रकृतिजनेन तन्नाशं विज्ञाय तद्धननेन तिरोहितज्ञानापदेशेन च ज्ञानस्येशाते समर्थयेते रक्षत इत्यन्वयः ॥ ३१ ॥

अस्मादिकं श्रोतव्यं श्रीकृष्णस्यैव मोक्षहेतुत्वात्तस्येति भावेनाह । यस्मिन्निति । कर्माशयं शरीरारम्भकर्मसमूहं यस्मिन्मनो वा निगृह्य विनियम्य विनाश्य ब्रह्ममयः ज्ञानप्रधान इत्यर्थः । अर्कवत्स्फटिकवद्वर्णः प्रकाशो यस्य स तथा अतिस्वच्छ इत्यर्थः ॥ ३२ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

मुदा अहो मम भाग्यम् एतादृशदर्शनमपि जातमिति । हर्षांशाविष्कारेणोपलक्षितः । नतु तद्दुःखांशाविष्कारेणेत्यर्थः । तस्य हि तदैश्वर्यांशस्फूर्त्तेरेव प्राधान्यात्तदनुरागस्यापि माहिमांशस्फूर्तिरेव तावज्जाता नतु वैयग्र्यांशस्फूर्त्तिः वैयग्र्यांशमयत्वे तु सान्त्वनानधिकारिता स्यादिति ॥ २९ ॥

अतस्तत्र प्रथमतः तन्महिमवर्णनद्वारैव प्रोत्साह्य तौ सान्त्वयितुमिच्छन् तज्जातीयश्रीनन्दवाक्यावसरं प्राप्य तथैवाह । युवामिति द्वाभ्याम् । नारायणे नारस्य महत्स्रष्टृप्रभृतिपुरुषाकारसमूहस्याप्याश्रये अखिलगुरौ परमव्योमाधिपादितोऽपि महत्त्वप्रकाशे मतिः तद्वश्यताकारी वात्सल्यमयो भावः । भूतेषु प्राणिषु तद्विलक्षणस्य ज्ञानस्य शुद्धचिन्मात्रस्वरूपस्य जीवस्येशाते यद्वा । नारायणत्वमखिलगुरुत्वमप्याह । एताविति । विश्वस्य चकारादवतारादीनाञ्च यतः भूतेषु सर्वभूतेषु अन्वीयाऽपि तद्विलक्षणस्यान्तर्यामिणः तथा तादृशतया स्थितस्य ज्ञानस्य चिन्मात्रस्य ब्रह्मणस्तद्रूपस्यापि ईशाते प्रकाशनाप्रकाशनयोः प्रभवतः । तयोरप्याश्रयत्वात् विष्टभ्याहमित्यादि ब्रह्मणो हि प्रतिष्ठाहमित्यादिश्रीगीताभ्यः ॥ ३० ॥ ३१ ॥

तत्र तयोश्चित्तप्रसत्तिमदृष्ट्वा तदेव पुनः कैमुत्येन विवृणोति । यस्मिन्निति द्वाभ्याम् । जनः यः कश्चिदपि जीवः मरणसमयेऽपि क्षणमपि अविशुद्धमपि ब्रह्ममयः श्रीभगवत्पार्षदरूपतया चिच्छक्तिवृत्तिशुद्धसत्त्वस्यैव तादृशमूर्तित्वेन स्वरूपप्रकाशप्रचुरः । नतु प्राधानिकवत्तिरोहिततदंशः । अतोऽर्कवर्णः स्वयमेव प्रकाशमानोऽन्यांश्च प्रकाशयन्नित्यर्थः । आदित्यवर्णं तमसः परस्तादित्यादिवत् ननु नारायणश्चतुर्भुजस्तत्राह । सर्वकारणं यत्तत्त्वं तदेवामर्त्याकारा मूर्त्तिर्यस्य सः नराकृति परं ब्रह्मेत्यर्थः । भावमीदृशानुरागं तथाप्यजातशान्ति प्रत्युत त एवहितेऽपि तदुत्कर्षमेवं कथयन्तीति पितृत्वे हेतुः । भगवानपि सात्वतानां भक्तानां पतिः पालकः । तदभीष्टसुखसम्पादकः । ये यथा मामित्यादेः तत्तस्माद्धेतोः सत्यं सपथमेव कुर्वन्नास्त इत्यर्थः । सत्यं शपथतथ्ययोरित्यमरः ॥ ३२—३५ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

उभयेनापि अनुराग एव भाति परमप्रेमात्मको निरूपितो भवति परमं लौकिकः अयं च ज्ञानेनालौकिकः कर्त्तव्यः तत्कर्तुं प्रेषित उद्धव इति तदुपयोगिसर्वमाहेत्याह । तयोरित्थमिति । उभयोरपि भक्तौ मुख्यत्वान्नन्दस्य प्रथमतो नन्दग्रहणमसहजः सम्बन्धो लौकिको नास्तीति नन्दाद्यशोदायां विशेषः नन्दयशोदयोः भगवति कृष्णे आविर्भूते सदानन्दे परमनुरागं सर्वक्रियात्याजनपूर्वकं सर्वभावभगवद्ग्रहणात्मकं वीक्ष्य यशोदा कदाचिल्लज्जिता भविष्यतीति नन्दमाह । यतः स उद्धव उत्सवात्मकः तस्मिन्नागते शोकांशेन न भाव्यमिति मुदेति भगवद्भक्तान् दृष्ट्वा संभाषणेनाहमति कृतार्थौ भविष्यामीति वा स्नेहमभिनन्द्य विषयस्यालौकिकत्वं सम्बोधयति । येन माहात्म्यज्ञानपूर्वकः सर्वतोऽधिकः स्नेहो भवति ॥ २९ ॥

युवामिति । प्रथमतोऽभिनन्दनं तत्रापीह भूमौ युवां यशोदानन्दौ श्लाघ्यतमौ सत्कर्मणा श्लाघ्या भवन्ति । ततोऽपि ज्ञानेन ततोऽपि भक्त्या भक्तावपि परमप्रेम सर्वोत्कृष्टं प्रमाणाच्च प्रमेयबलमधिकं तेन स्वतन्त्रभक्त्यपेक्षयापीयं प्रमेयभक्तिः रसाला अत आह । नूनमिति । मानदेति सम्बोधनं मह्यं मानं प्रयच्छसीति मद्वाक्यमपि सत्यतया स्वीकुर्वित्यर्थः । ननु पुत्रे स्नेहातिशयः कथं स्तूयते तत्राह । नारायण इति । अयं हि नारायणो मूळपुरुषः नारायणशब्दोऽत्र पुरुषोत्तमवाची अखिलगुराविति प्रमाणरूपोऽपि सर्ववेदवक्ता नारायणः पुरुषोत्तम एवेति अतः सर्वशास्त्रार्थरूपे प्रमेयबलवति यद्यस्मात्कारणात् एतादृशी मतिः कृता देवोत्तमत्वं तु नन्देनोक्तकोटिकसंभावनया ज्ञातमेव तस्मादसंभावना न भविष्यतीति तत्र पुरुषोत्तमत्वं बोधितवान् अतः परं तस्मादधिको विषयो नास्ति भक्तेरप्यधिकं कर्त्तव्यं नास्तीति वक्तव्यम् ॥ ३० ॥

तत्र प्रथमं भगवतः सकाशादन्यो महान्नास्तीति आह । एतौ हीति द्वाभ्याम् । धर्म्युत्कर्षेण धर्मोत्कर्षेण च माहात्म्यं द्विविधमिति तत्र प्रथममाह । एक एव ताभ्यां जात इति आवेशिनमपि ज्ञापयितुं तुल्यतया सम्बन्धं च दूरीकर्तुं कृष्णरामौ निर्दिशति । एतौ हि निश्चयेन विश्वस्य बीजयोनी समवायिकारणं तन्निमित्तकारणं च बीजं हि समवायि कारणं तत्र भगवत्सामर्थ्येन सजातीयत्वमापद्यमानाः भूम्यवयवाः पुष्णन्ति ततो वर्द्धते सजातीयैव योनिरपि मृग्यते विजातीया नोत्पद्यते उत्पन्नमन्यथा स्यादेतदुभयमेव दृष्टं कारणम् अन्यत्तु जलान्नादिसाधनपोषकत्वेन तत्र यद्येकप्रकारेण भवतां वृद्धिह्रासौ आविर्भावतिरोभावौ न संगच्छेयातां ततो भगवानुभयात्मको भवति लोके तु उभयोः साधका अन्येऽपि मृग्यन्ते अत्र भगवानेवेति तदेकप्रयोजनाय च तथा जात इति न

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

सहकार्यपेक्षा अत एव प्रथमं प्रकृतिपुरुषरूपेण भवति एवं सति युक्तिर्ब्रह्मणि संगच्छते ब्रह्मवादे तु तदैव सर्वशक्तियुतं क्रमेणैवाभिव्यक्तो भविष्यामीति प्रथमस्रष्टौ तादृशमुत्पाद्य क्षयवृद्ध्यनपेक्ष्यं वा तादृशमेवोत्पाद्य पश्चाल्लोके बहूपकारसिद्ध्यर्थमेवैकस्य बहुधोपयोगाय शक्तिसमूहं विभज्य बीजयोन्यादिभावेन वस्तूनि परिकल्प्य स्थापितवानिति विशेषः । उभयथापि पश्चात्प्रकारद्वयं सिद्धमिति मन्तव्यम् अनुभवसिद्धत्वात् तथाप्यपि मोक्षसृष्ट्यादिचतुर्विधपुरुषार्थान् साधयितु सर्वस्यापि सर्वे माभवत्विति स्वशक्तिं विभज्य मोक्षभक्त्योः स्वयं बीजं योनिश्च रामः सृष्ट्यादौ तु विपरीतमिति उभावपि योनिबीजभावेन सर्वलोकानां हितार्थमवतीर्णौ अत एकस्यैव हितार्थत्वेन ग्रहणेन कोऽपि पुरुषार्थः सिद्ध्येत् अत एव सर्वत्राभ्युदयफलेषु रामस्य प्राधान्यं भगवतः सहभावमापन्नं क्वचिद्रामस्य प्राधान्यं प्रथमनिर्देशेन साक्षात् महती शक्तिः कृष्ण एवेति न क्वापि सहभावो निरूपितः निःश्रेयसे तु रामस्य सहभावः साधारण्यं द्वयोस्तुल्यतया निरूपणमिति सर्वत्रैव विमर्शः अतो भगवतो जगत्कारणत्वं मोक्षदातृत्वं निरूपयन् निरूपयति एषा युक्तिर्हिशब्देनोच्यते एतौ कृष्णरामौ विश्वस्य बीजयोनी उभावपि तौ गणयति । मुकुन्द इति । नाम्नाभ्युदयनिःश्रेयसफलं ज्ञापितम् एतावितिं भक्त्या प्रादुर्भूतौ प्रदर्शयन्निवाह द्रष्टुमेष्याम इत्यनेन सत्यं निरूपितं द्विरूपता किमर्थेत्याशङ्क्य दृष्टान्तमिव वदन् स्वरूपद्वयं निर्दिशति पुरुषः प्रधानमिति अनयोः प्रकृते विशेषमाह । अन्वीय सर्वेषु भूतेषु विलक्षणस्य विः काल एव लक्षणं यस्य तस्याभ्युदयस्येशानौ तथा ज्ञानस्य च मोक्षसाधकस्य विलक्षणत्वं प्रापञ्चिकाद्वैलक्षण्यं चकाराद्भक्तेरपि ईशाते समर्थौ भवतः एतदर्थमेवैतौ प्रादुर्भूतावित्यर्थः । एवं सति ब्रह्म भगवान् कार्यमिव एतत्प्रयोजकावेतावायिभूताविति शङ्का स्यात् तद्व्यावृत्त्यर्थमाह । इमौ पुराणाविति । एतावेव भूतौ पूर्वसिद्धावेवाभिव्यक्तिमूर्त्तिर्वा भगवतः ॥ ३१ ॥

एवं स्वरूपोत्कर्षमुक्त्वा धर्मोत्कर्षमाह । यस्मिन्जन इति । यद्यपि परः सहस्रं भगवद्धर्माः सन्ति तेषां माहात्म्यं च भगवत एव धर्मधर्मिणोरभेदात् भगवानेव धर्मरूपेण भवतीति सिद्धान्तात् धर्मान् परित्यज्य प्रमाणबलेन भावकेन भगवता परिकल्पितं भगवद्रूपं सर्वेषां स्वाधीनं मुदा तस्य माहात्म्यमाह यस्मिन्मानसे रूपे जनः प्राणी प्राणवियोगकाले क्षणं मनो विशुद्धं समावेश्य कर्माशयं निर्हृत्य परां गतिं याति साधनान्तरनिरपेक्षत्वज्ञापनाय यस्मिन्मानसे रूप इत्युक्तं जन इति सामान्यः ननु ब्राह्मण ऋषिर्वा तत्रापि प्राणवियोगकाले सर्वेन्द्रियवैकल्ये अशुद्धावस्थायां क्षणं चित्तं समावेश्य ननु बहुकालं नापि वा देहयोरनुवृत्तिः तदपि रूपं सर्वफलसाधकमिति विशुद्धमित्युक्तम् अन्यथा कामनायां तदेव फलिष्यतीति विशेषेण शुद्धिः कामनाभाव एव ननु "यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि स्थिताः अथ मर्त्योऽमृतोऽभवत्यत्र ब्रह्म समश्नुत" इति श्रुतेः कामने भाव एव पुरुषार्थसिद्धौ निष्कामं सदा समाधस्यैव भवतीति निरूप्यते येनान्यथा सिद्धं स्यात् किंतु क्षणं सम्यगावेशनेनैव मनो विशुद्धमपि भवति ततः कर्माशयं कर्माण्याशेरते ऽस्मिन्निति लिङ्गात्मकं संघातं च निर्हृत्य स्वाभिमानपरित्यागेन मृतमिव तदिति ज्वालानामिव तं कारणभूतमपि संघातं दग्ध्वा उत्तरत्र गमनसाधनान्तरमप्यनपेक्ष्य परां गतिं स्वरूपेणैव याति तत्रापि न सायुज्यार्थं जीवभावे गमनं किंतु ब्रह्ममयः ब्रह्मैव सन् ब्रह्माप्येतीत्येषा गतिर्भवति तत्रापि भगवद्धर्माणामपि सर्वेषां स्फूर्तिर्भवतीति ज्ञापयितुमर्कवर्ण इति । तस्माद्यावान् पुरुषार्थः सर्वैरेव ज्ञानादिभिर्भवति क्रमेणापि साध्यं सकृदेव च भवतीति भगवद्धर्माणां माहात्म्यमुक्तम् ॥ ३२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

वीक्ष्य ज्ञातचरतन्महाप्रेमकोऽपि विशेषेण ईक्षित्वा परमं देवकीवसुदेवाभ्यां सकाशादप्युत्कृष्टं मुदेति ममैतज्जन्मैव सार्थकमभूत् यदीदृशोऽनुरागो दृष्ट इति तयोर्दुःखदर्शनेऽप्युद्धवस्यानन्दः ॥ २९ ॥

इह जगति श्लाघ्येषु भक्तेष्वपि मध्ये देवकीवसुदेवौ श्लाघ्यतरौ ताभ्यामुत्कर्षात् युवां श्लाघ्यतमौ नारायणेऽखिलगुराविति मन्ये रामं च कृष्णं च प्राप्ताविह सुरोत्तमाविति तद्वाक्येनैव तस्य कृष्णैश्वर्यस्फूर्त्तिं ज्ञात्वा तदैश्वर्येणैव तौ सान्त्वयितुं तदेव व्याचष्ट स्मेति भावः ॥ ३० ॥

नारायणत्वमखिलगुरुत्वं चाह । एताविति । अंशांशिनोरभिन्नत्वाद्बहुमूर्त्यैकमूर्त्तिकमित्यक्रूरोक्तेश्च एतौ द्वावप्येक एव नारायण इत्यर्थः । विश्वस्य बीजयोनी द्वावपि निमित्तोपादानरूपौ द्वावेव पुरुषः प्रधानं शक्तिशक्तिमतोरैक्यादिति भावः । "प्रकृतिर्यस्योपादानमाधारः पुरुषः परः । सतोऽभिव्यञ्जकः कालो ब्रह्म तत्त्रितयं त्वह"मित्येतदुक्तेः भूतेषु अन्वीय अन्तर्यामितया प्रविश्य विलक्षणज्ञानस्य ईशाते प्रदानसमर्थौ भक्तेभ्यो भगवद्ज्ञानस्य ज्ञानिभ्यो ब्रह्मज्ञानस्य च कृपया दातारौ स्याताम्—

> तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम् ।
> ददामि बुद्धियोगं तं येन मामुपयान्ति ते इति

"मदीयं महिमानं च परंब्रह्मेति शब्दितम् । वेत्स्यस्यनुगृहीतं मे सम्प्रश्नैर्विवृतं हृदी"ति चैतदुक्तेः चकाराद्विलक्षणज्ञानस्य प्राकृतस्य स्वर्गादिसाधनस्यापि कर्मिभ्यो दातारौ ॥ ३१ ॥

निर्हृत्य दग्ध्वा परां गतिं वैकुण्ठलोकं ब्रह्ममयश्चिन्मयशरीरः सन् अर्कवर्णः सूर्यतुल्यतेजाः ॥ ३२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

विश्वस्य अयने प्रवेशनिर्गमनस्थाने विश्वहेतौ अखिलस्य प्राणिमात्रस्य गुरौ ज्ञानप्रदे श्रीकृष्णे ॥ ३० ॥

हेतुत्वं ज्ञानप्रदत्वं चाह । एताविति । विश्वस्य बीजयोनी निमित्तोपादानहेतू इति हेतुत्वमुक्तम् ज्ञानप्रदत्वमाह । भूतेषु अन्वीय अनुप्रविश्य विलक्षणस्य त्रिविधलक्षणस्य तत्तत्प्राणियोग्यस्य भोगमोक्षानुरूपस्य इमौ पुराणपुरुषौ ईशाते ईश्वरौ उद्बोधकाविल्यर्थः । ननु चेतनाचेतनपरमपुरुषभेदात्तत्त्वत्रयमस्ति तत्र परमपुरुषो विश्वहेतुरेकोऽस्ति एतौ बीजयोनी इति कथं द्विवचनमत्राह । रामो मुकुन्द इति । तदवतारत्वात् अत एक एव विश्वहेतुः ननु चेतना-

तस्मिन् भवन्तावखिलात्महेतौ नारायणे कारणमर्त्यमूर्तौ ।
भावं विधत्तां नितरां महात्मन् किं वाऽवशिष्टं युवयोः सुकृत्यम् ॥ ३३ ॥
आगमिष्यत्यदीर्घेण कालेन व्रजमच्युतः ।
प्रियं विधास्यते पित्रोर्भगवान् सात्वतां पतिः ॥ ३४ ॥
हत्वा कंसं रङ्गमध्ये प्रतीपं सर्वसात्वताम् ।
यदाह वः समागत्य कृष्णः सत्यं करोति तत् ॥ ३५ ॥
माखिद्यतं महाभागौ ! द्रक्ष्यथः कृष्णमन्तिके ।
अन्तर्हृदि स भूतानामास्ते ज्योतिरिवैधसि ॥ ३६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

चेतनात्मकविश्वहेतुत्वं पुरुषप्रधानयोर्युक्तमनुरूपत्वादित्यत्र पुरुषस्याल्पज्ञत्वादसर्वज्ञत्वात् प्रधानस्य जडत्वादसर्वात्मत्वाच्च उभयोर्मुकुन्दनिरपेक्षस्थित्याद्यभावाच्च न विश्वहेतुत्वं सर्वात्मा सर्वज्ञः श्रीमुकुन्द एव विश्वहेतुरित्याशयेनाह । पुरुषो जीवः जातावेकवचनम् स्वासाधारणेन रूपेण भिन्नोऽपि मुकुन्दनिरपेक्षस्थितिप्रवृत्त्यभावात्तदभिन्न एव तदंशत्वात् तथा प्रधानमपि मुकुन्द एव तच्छक्तित्वात् अतः सर्वात्मा सर्वगुणशक्त्याद्याश्रयः श्रीकृष्णः सर्वस्य हेतुर्गुरुश्चेति सिद्धम् ॥ ३१ ॥

अत एव कारणन्तु ध्येयमिति श्रुतिप्रोक्तस्य तद्ध्यानस्य मोक्षहेतुत्वमाह । यस्मिन्निति । यस्मिन्नित्यस्य तस्मिन्नित्युत्तरेण सम्बन्धः ब्रह्ममयः ब्रह्मप्रधानस्तत्परो जन्तो मुमुक्षुः यस्मिन् क्षणमपि प्राणवियोगकालेऽपि विशुद्धं मनः समावेश्य कर्माशयं कर्मवासनां निर्हृत्य त्यक्त्वा अर्कवर्णः प्रकाशरूपाप्राकृतमूर्तिः सन् परां गतिं तत्पदं याति ॥ ३२ ॥

भाषा टीका ।

उन नंद यशोदा दोनों के श्रीकृष्ण भगवान् में इस प्रकार के अनुराग को देखकर उद्धवजी बड़े आनंद को प्राप्त होकर नंदजी से बोलते भये ॥ २९ ॥

उद्धवजी बोले हे मानद ! नंदजी यह बात निश्चित है कि आप दोनों बड़ी श्लाघा के योग्य हो जिन तुमने कि सकल लोक के गुरु नारायण के विषै इस प्रकार की बुद्धि लगाई है ॥ ३० ॥

ए राम कृष्ण दोनों इस संसार के उपादान तथा निमित्त कारण हैं और प्रकृति पुरुष ए दोनों इनके ही अधीन हैं ए दोनों पुराण पुरुष हैं सो सवभूतों में प्रविष्ट होकर विलक्षण ज्ञान का नियम न करते हैं ॥ २१ ॥

जिस श्रीकृष्ण के विषै पुरुष प्राण वियोग के समय क्षणमात्र भी निर्मल मन को लगाने से शीघ्रही कर्म वासना को दूर करके दिव्य ज्ञानी होकर सूर्य सा प्रकाशित होकर परम गति वैकुण्ठ को चला जाता है ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अखिलस्यात्मा च हेतुश्च तस्मिन् कारणेन मनुष्याकृतौ महात्मन् महात्मनि परिपूर्णे भवन्तौ भक्तिं कुरुतः अतः कृतकृत्यावित्यर्थः ॥३३॥

प्रस्तुतमाह । आगमिष्यतीति पित्रोर्युवयोः ॥ ३४ ॥

"यात यूयं व्रजं तात ! वयं च स्नेहदुःखितान् । ज्ञातीन्वो द्रष्टुमेष्यामो विधाय सुहृदां सुखम् " इति यदाह कृष्णस्तत्सत्यं करिष्यतीति ॥ ३५ ॥

कालविलम्बमसहमानौ प्रत्याह । माखिद्यतमिति । हे महाभागौ अन्तिके इदानीमेव समीपे वा कुत इत्यत आह । अन्तर्हृदीति । तर्हि सर्वैः किमिति न दृश्यते तत्राह । ज्योतिरिवैधसीति । तद्यथा मथनं विना न दृश्यते तथा भक्तिं विना कृष्णोऽपीति भावः ॥ ३६ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

तत्र हेतुर्नारायणे । ननु स चतुर्भुजस्तत्राह । सर्वकारणं यत्तत्त्वं तदेव मर्त्याकारा मूर्तिर्यस्य तस्मिन्नराकृतिपरब्रह्मणीत्यर्थः । भावमीदृशानुरागं नितरामित्यनेन श्रीवसुदेवदेवकीभ्यामपि तदुत्कर्षं बोधयति हे महात्मन् ! तादृशानुरागशीलत्वात् परमोत्कृष्टस्वभाव ! श्रीव्रजेश्वर ! वाशब्दो भूक्षेपे तयोर्युवयोः किं कतरत् अवशिष्टं किन्तु सर्वं परिपूर्णमेव केवलं युष्मत्सन्तोषकं तस्यैव कृत्यमवशिष्यत इति स्वशब्दार्थः युवयोस्त्विति पाठे स एवार्थः ॥ ३३ ॥

तथाप्यजातशान्ती प्रत्युत हन्त त एव हि तेऽपि तदुत्कर्षमेवं कथयन्तीति तद्गुणचिन्तनेनात्यन्तार्त्तौ तौ वीक्ष्याधुना तु तद्वैयग्र्यस्पृष्ट आह । आगमिष्यतीति । अच्युतः सत्यसङ्कल्पत्वादिना तन्नामासौ प्रियमव्यभिचारिसङ्गमरूपम् । अवश्यं प्रियविधाने हेतुः पित्रोः यथा युवाभ्यां पितृभावमयेन महाप्रेम्णा वशीकृत्य पुत्रत्वेन सम्पादितोऽसौ तथा तेनापि पितृत्वेनैवाभिमतयोर्युवयोरित्यर्थः । ये यथा मामित्यादेः । यतो भगवानपि सात्वतानां पतिः पालकः तदभीष्टसुखसम्पादकः । यद्वा । भगवानपि यादवानां पतिरपि तादृशप्रेमवशत्वादिति भावः ॥ ३४ ॥

ननु तस्यागमनमत्र न प्रतीम इत्याशङ्क्याह । हत्वेति । यद्वा पितृत्वं विलम्बकारणञ्च तद्वाक्येनैव प्रतिपादयति । हत्वेति । करो-

---

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

तीति वर्त्तमानसामीप्ये वर्त्तमानवद्वा । किं वा । तत्तस्माद्धेतोरस्माभिः सह सत्यं शपथं करोति कुर्वन्नेवास्ते इत्यर्थः । सत्यं शपथतथ्ययोरित्यमरः ॥ ३५ ॥

आगमिष्यतीत्यप्यसहमानौ प्रत्याह । मा खिद्यतमिति महाभागावित्यधुना द्वयोः सम्बोधनं पुत्रागमनवार्त्तया तस्या अपि स्वं प्रति दृष्टिनिक्षेपं दृष्ट्वा । अथाल्पविलम्बमसहमानावाशङ्क्य शोकशमकलोकरीत्या तत्त्वोपदेशमारभमाण आह अन्तरिति । स कृष्णः भूतानां सर्वेषामेव प्राणिनामन्तर्हृदि हृदयाभ्यन्तरे यदन्तःकरणाख्यं हृदयं तत्राप्यास्ते किमुत बहिरिति । अप्रकटतामात्रांशे दृष्टान्तः । ज्योतिरिवेति दामबन्धनमृद्भक्षणलीलादौ श्रीमत्या मात्रैव तद्व्यापकत्वानुभवात् तत्रान्येषां सतां स्वतोऽप्यनुभावो नास्तीत्यसन् निवर्त्तते भवतोस्तु सदा स्फूर्त्तेर्हृदयाभ्यन्तरेऽपि सन्नेव विराजते इत्यलं बहिस्तदपेक्षया तथापि तदपेक्षा चेत् तदा शीघ्रमेव तदपि भविष्यतीत्यर्थः । अथवा भूतानामन्तर्हृदि परमात्मलक्षणं ज्योतिरिव एधसि चाग्निलक्षणं ज्योतिरिवाप्रकटः सन् अन्तिके युवयोर्निकटे तत्रैव स्वयं भवद्भ्यां दर्शिते गोलोकाख्ये प्रकाशे आस्ते स तु युवां निकटात् पश्यत्येव युवाञ्च मनसा तं पश्यथ एव चक्षुषापि शीघ्रं पश्यतमेवेति तात्पर्य्यम् ॥ ३६ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

किमवशिष्टं किं कर्त्तव्यं युवां कृतकृत्यावित्यर्थः ॥ ३३—३६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तस्मिन् नारायणे कारणमर्त्यमूर्तौ साधुपरित्राणरूपनिमित्तात्मसङ्कल्पोपात्तमनुष्यविग्रहे महात्मनि अखिलस्य चिदचिदात्मकप्रपञ्चस्यानुपते आत्मनि कारणभूते च भवन्तावत्यर्थं भावमनुरागं विधत्ताम् अकुरुतामतो युवयोः प्रियं विधास्यत इत्यर्थः ॥ ३३ ॥

प्रस्तुतमाह । आगमिष्यतीति । अदीर्घेण कालेनाच्युतो व्रजं प्रत्यागमिष्यति तथा भगवान्पित्रोर्युवयोः प्रियं संविधास्यते करिष्यति ॥ ३४ ॥

सर्वेषां सात्वतां यादवानां भगवद्भक्तानां वा प्रतीपं प्रतिकूलं कंसं रङ्गमध्ये हत्वा भगवान् कृष्णः वो युष्मान्प्रति यदाह "यात यूयं व्रजं तात ! वयं च स्नेहदुःखितान् । ज्ञातीन् वो द्रष्टुमेष्यामो विधाय सुहृदां प्रियम्" इति यदाह तत्सत्यं करिष्यति ॥ ३५ ॥

तथापि विलम्बमसहमानौ प्रत्याह । माखिद्यतमिति । हे महाभागौ ! माखिद्यतं खेदं मा कुरुतमन्तिके अनतिविप्रकृष्टकालेन कृष्णं द्रक्ष्यथः किं च भगवान् मथुरायामेवास्ते किं त्वत्रापीत्याशयेनाह । अन्तर्हृदीति । तर्हि सर्वैः किमिति न दृश्यते तत्राह । ज्योतिरिवैधसीति । यथैधसि दारुणि ज्योतिरग्निर्मन्थनाद्युपायमन्तरेण न दृश्यते तद्वद्भगवान् श्रीकृष्णः भक्तिं विना न दृश्यत इत्यर्थः ॥ ३६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

भावं भक्तिं यद्वा लीलादिकं वा यद्विषयमन्तरेण किमपि नास्तीत्यर्थः । व्यधत्तां व्यदधातां कृतवन्तावित्यर्थः । महात्मन् महात्मनि चेतनोत्तमे इत्यर्थः ॥ ३३-३४ ॥

प्रतीपं प्रतिकूलम् ॥ ३५ ॥

अन्तिके कालक्षेपं विना बालबुद्धिमन्तरेण कृष्णस्य दूरस्थत्वं नास्तीत्याह । अन्तर्हृदीति । एधसि काष्ठे ज्योतिरग्निः ॥ ३६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

मा खिद्यतं विशेषतश्च चिरं विलम्बमसहमानावाशङ्क्याह । मेति । अल्पविलम्बमप्यसहमानावाशङ्क्य शोकशमकलोकरीत्या तत्त्वोपदेशमाह । अन्तरिति । यद्यपि कारणान्तरेण प्रियाप्रियादयो न सन्ति तथापि साधुत्वेन प्रियादयः । तद्राहित्येनाप्रियादयश्च सन्तीत्याह । सदिति । सज्जातिरिं यमसज्जातिरिं यमित्यादरानादरावननुसन्धाय तासु तदनुकम्पिस्वरूपविग्रहेण प्रकटीभूय साधूनां साधुत्वेन प्रियादितया स्वीकृतानां सर्वतो रक्षणाय योग्यो भवतीत्यर्थः ॥ ३६—३९ ॥

श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी ।

एतादृशे च भगवत्स्वरूपे यैः सर्वात्मना सर्वदा सर्वभावेन मनो निहितं तेषां फले किं वक्तव्यमित्याह । तस्मिन् भवन्ताविति । यादृशं हि उपास्यं चिन्त्यं ध्येयं वा तादृशमेव भवतीति सर्वजनीनं भगवांश्च सर्वफलरूपः अतो नावशिष्यत इति वक्तुं सर्वहेतुत्वमाह । अखिलात्महेताविति । अखिलानामात्मा हेतुश्च सर्वस्यात्मा भवति सर्वमस्यात्मा भवति सर्वमस्यात्मा भवतीति फलं सिद्ध्यति किञ्च विकृतेऽपि हेतुपरमेति च वक्तुं अयं पुरुषो नारायण इत्याह । अयं पुरुषो नारायणः किञ्चित्कारणार्थं सर्वेषामुद्धारार्थमेव कपटवेशमपि कृतवान् अनेन फलावश्यकत्वं द्योतितं प्रायिकत्वशङ्काव्यावृत्त्यर्थं यतः लोकस्य व्यसनापनोदपरो दासस्य किं न क्षम इति सिद्धान्ते भवति तत्रापि नितरां भावं विधत्तां रसत्वव्यावृत्त्यर्थं भावपदं पुत्रत्वेऽपि देवत्वप्रतीतिस्तथापि फले स्वरूपयोग्यतापेक्ष्यत इति यथा मर्यादायां ब्राह्मणानामेव मुक्तिः पुष्टौ वा वैकुण्ठेषु पश्वादिरूपत्वं तद्व्यावृत्त्यर्थमाह । महात्मन्निति । महात्मत्वं भगवदागमना न्निश्चीयते अतः युवयोः कृत्यं नावशिष्यते अनेनैयमेवावश्यं पुरुषार्थ इति ज्ञापितम् ॥ ३३ ॥

एवं विषयं साधनं चाभिनन्द्य लौकिकभावेन खेदं वारयितुमाह । आगमिष्यतीति । अदीर्घेणैव कालेन व्रजमागमिष्यतीति यतः अच्युतः स्वरूपतो धर्मतश्च अन्यथा वाक्यतश्च्युतः स्यात् लौकिकभाषया न बाधनमिति केचित् शास्त्रार्थतः समागमिष्यतीति अन्ये भगवद्वाक्यानुरोधेन भगवदीयानां च कुरुक्षेत्र इति वाक्याच्च पितरोरिति विशेषवचनाच्च गतांश्चिरायितानिति वाक्यविरोधाभावात् नन्दं द्रष्टुं समागत एव भगवान् वरं यथा न गोपिकाप्रतीतिस्तथेति अर्थादवगम्यते आर्थिके विरोधा-

श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी ।

भावादिममर्थमेव ज्ञापयितुमाह । प्रियं विधास्यते पित्रोरिति । यथैव प्रियं भवति येन प्रकारेणागते च तथैव विधास्यति एतादृशकरणे सामर्थ्यमाह । भगवानिति । एवं गुप्ततयागमने हेतुमाह । सात्वतां पतिरिति । यादवानां भगवद्भक्तानां च पतिः यादवानुरोधान्मार्गानुरोधाच्च तथा समागमिष्यतीति भावः । प्रीतिमावहेति वाक्यादेवमुच्यते अन्यथा शास्त्रार्थमात्रमेव कथ्येत ॥ ३४ ॥

ननु भगवानेवमायास्यतीत्यत्रावश्यकत्वे च किं प्रमाणमिति चेत्तत्राह । हत्वेति । कंसं हत्वा यदा भगवान् वो युष्माकं स्थाने समागत्य तत्सत्यमेव करोतीति कंसो व्याजेनैव मारणीय इति परोक्षवादेनापि तावत्पर्यन्तं वदति अतो गोपिकाः प्रति समागमनकथाशास्त्रार्थत्वेनापि सङ्गच्छते कंसमारणानन्तरं तु प्रयोजनाभावान्न परोक्षकथायां निमित्तमस्ति कापट्यं हि शीघ्रं हतो भवत्यक्लिष्टकर्मा नान्यथेति वधश्च शीघ्रमेव कर्तव्य इत्यत्र हेतुमाह । प्रतीपं सर्वसात्वतामिति । सतां भक्तानां सर्वथा प्रतीपं प्रतिकूलं पूर्वमन्यथाकरणे ज्ञापकमाह । रङ्गमध्य इति । रङ्गस्थाने हि लीलाया न तु प्रधान्य तत्रापि मुरोधात् युष्मानागत्य तत्रापि कृष्णः फलरूपः सर्वनिरपेक्ष्यः । अनेन हेतुवादे प्रयोजनाभाव उक्तः अतस्सत्सत्यं करोत्येव वर्तमानप्रयोगेण साम्प्रतमपि तस्यागमनं सूचितं वर्तमानसमीपे च वर्तमानप्रयोगः अत आगमिष्यतीत्यविरुद्धम् ॥ ३५ ॥

ननु यथेदानीमागतो न दृश्यते तथाऽग्रेप्यागतो न द्रष्टव्य इति किमागमनेन सत्यवाक्यं न चेत्याशङ्क्याह । मा खिद्यतमिति । भगवद्दर्शनार्थं खेदं माकुरुतं दर्शने स्वरूपयोग्यो हेतुर्युवयोरस्तीत्याह । महाभागाविति । प्रतीत्या अनुमानेन च युवयोर्महाभाग्यं प्रतीयते तदवश्यं दर्शयतीति दर्शने न सन्देहः योगज्ञानादिना दर्शनं वारयति । अन्तिक इति । लौकिके भगवानेवापेक्षयत इति न नामग्रहणं तस्य प्रादुर्भावः सर्वत्रैव सुगम इति ज्ञापयितुमन्तर्निरूपयति । अन्तर्हृदीति । अन्यो भविष्यतीत्याशङ्कां व्यावर्त्तयति । स इति । यो भवद्भिरपेक्ष्यते स एव सर्वेषामन्तर्हृदये वर्तत इति तत्र प्रमाणमाह । भूतानामिति । अन्यथा ते कथं जाताः प्राणिनः आधारव्यतिरेकेण अन्नादिक्रियाणां स्थित्यसम्भवात् अतः सूत्रापेक्षयाप्याधारत्वेन सर्वत्रैव वर्तते अन्तर्हृदीति प्रतीत्यर्थं विशेष उक्तः जीवासत्ययोर्व्यावृत्त्यर्थं दृष्टान्तमाह । ज्योतिरिवैधसीति । भूरुहत्वाविशेषेऽपि यथा घटादयो निमज्यन्ते न ज्वलन्ति तथा न काष्ठादयः उत्पन्नानपि भूम्यंशान् स्वसमानान् न गृह्णन्ति अतो ज्ञायते स्वभावत एव ते वह्न्यात्मकाः जलेन च पुष्टा भवन्ति उभयोर्व्यवधायकाभावेन सूक्ष्माः पृथिव्यवयवाः उभयोरप्यपगमे यावद्भस्म तावन्मात्राः अतो भूयानंशस्तैजस एव जलस्थानीयो ह्यासन्यः । पृथिव्यंशस्थानीयो जीव इति सर्वत्र भगवानचेतनेषु उत्तम्भनचलनादिना वर्त्तत इत्यवसीयते अन्यथा मथनेनेव योगादिना न प्रादुर्भूतः स्यात् ॥ ३६ ॥ ७ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

अखिलानामात्मा च हेतुश्च तस्मिन् कारणं च मनुष्यमूर्तिश्च तस्मिन् युवयोस्तु कृत्यं किमवशिष्टमिति तुकारेण तस्य कृष्णस्यैव युष्मत्सान्त्वनप्रीणनवशीभवनादिकृत्यमवशिष्यते इति ज्ञाप्यते स्वकृत्यमिति पाठेऽपि स एवार्थः ॥ ३३ ॥

भो वत्स उद्धव ! त्वमतिबुद्धिमान् श्रुतः किं तु मुग्ध एवासि यदावामपि स्तौषि हन्त हन्त तादृशो गुणार्णवः पुत्रो यद्गृहादन्यत्र गतस्ततोऽधिको मन्दभाग्योऽधमो दुःखी त्रिभुवनमध्ये कोऽस्तीत्यावां सर्वैर्निन्दनीयावेवेति तदुक्तिमाशङ्क्य साश्वासमाह । आगमिष्यतीति । अच्युतः द्रष्टुमेष्याम इति सत्यवाक्यात् च्युतिरहितः सात्वतां यदूनां पतिः पालक एव केवलमत्रैव स्थित्वा भविष्यति युवयोस्तु प्रियं मनोऽभीष्टं करिष्यतीति ॥ ३४ ॥

यदाह । यात यूयं व्रजं तातेति श्लोकेन तत्सत्यं करोति करिष्यति वर्त्तमानसामीप्ये लट् वस्तुतस्तूद्धवेनादृष्टस्तत्रैव ताभ्यां तदैव लालितः स प्रकाशान्तरेण वर्तत एवेत्युद्धवमुखात् सत्यैव वाग्देवी निरगात् ॥ ३५ ॥

हन्त हन्त धिगावां ययोरभाग्यस्य प्राबल्यमेव सत्यवचसोऽपि पुत्रस्यागमने प्रतिबन्धकी भवतीति खिद्यन्तौ तौ प्रत्याह । मेति । नन्वन्तिके यत् द्रक्ष्यावस्तत् कस्मिन् दिने श्वः परश्वो वा पञ्चमे दिने दशमे दिने वा सम्प्रति निर्जिगमिषून् प्राणान् केनाश्वासेन स्थापयिष्यावस्तावत् न चेदागमिष्यति तदेव निश्चित्य ब्रूहि निर्यान्तु प्राणा मास्तु तान्निरोधनकष्टमावयोरित्युक्तवति श्रीनन्दे उद्धवः स्वहृदि परामर्शं हन्तात्र कमुपायमनुतिष्ठामि प्राकृतपुत्रवियोगातुराः खल्वेवं प्रबोध्यन्ते भो भोः ! किमिति सांसारिकमोहे मग्ना भवथ मिथ्याभूतपुत्रकलत्रादिष्वासक्तिमनर्थहेतुं परित्यज्य भगवत्यासक्तिः क्रियतामिति यस्य तु भगवत्येव पुत्रीभूते आसक्तिः स नन्दोऽयं कथं प्रबोधयितव्यः न च वसुदेवस्यैवास्य पुत्रभावः ऐश्वर्यप्रदर्शनया शिथिलयितुं शक्यः प्रत्युत तयोः सगाढत्वमेवापद्यते हन्त प्राकृतपुत्रमपि गृहे खेलन्तमदृष्ट्वा तत्पितरौ दुःखेन म्रियेते आवयोस्त्वतिभाग्यवशात् परमेश्वरोऽपि पुत्रीभूतो गृहे खेलति स्म आवयोः क्षणमपि लालनमप्राप्य खिद्यते स्म स्वगृहे तं पुत्रमदृष्ट्वा कथं जीविष्यावः धिगावां यत्तादृशादपि पुत्राद्वियुक्तावित्येवंविधानयोर्मनोनिष्ठा देवकीवसुदेवौ त्वेतत्पारमैश्वर्य्यानुभवे सति हन्तावयोरयमाराध्य एव न पुत्र इत्येतत्परिष्वङ्गलालनादावपि शङ्केते न च केवलमेषामेव कृष्णे ममताग्रन्थिर्दृढः किं तु परमेश्वरस्यापि तस्यैतेषु दृढैव ममता गृहीत्वा पाणिना पाणिं पित्रोर्नौ प्रीतिमावहेत्येतदर्थे तस्यापि व्याकुलता मया दृष्टैव दुस्त्यजश्चानुरागोऽस्मिन् सर्वेषां नो व्रजौकसां नन्द ते तनयेऽस्मासु तस्याप्यौत्पत्तिकः कथमिति गोपवागपि श्रुता स्मर्य्यते एव यदि पुनर्मथुरां गत्वा श्वस्तमानयामि तदा कंसभार्य्याद्वयोपजापकुपिते जरासन्धे मथुरां हन्तुमागमिष्यति सति तत्र एव वसुदेवादीन् यादवान् को रक्षेत यदि तद्रक्षार्थं कृष्ण एव पुनर्मथुरां गच्छेत् तदैते म्रियेरन् यदि वातश्चतुःपञ्चवर्षान्ते आयास्यतीति ब्रवीमि तदा तावत्कालपर्य्यन्तं धैर्य्यदिधीर्षाप्येतैर्दुष्करा चतुःपञ्चदिनान्ते आयास्यतीत्यलीकोक्त्या आश्वासने तद्दिन एव मदुक्तेरलीकत्वे व्यक्ते म्रियेरन् तस्मादुपायान्तराभावादद्भुतं कृष्णस्य परमात्मत्वेन सर्वत्रौदासीन्यं

नह्यस्यास्ति प्रियः कश्चिन्नाप्रियो वाऽस्त्यमानिनः[१]।
नोत्तमो नाधमो वापि समानस्यासमोऽपि वा ॥ ३७ ॥
न माता न पिता तस्य न भार्या न सुतादयः।
नात्मीयो न परश्चापि न देहो जन्म एव च ॥ ३८ ॥
न चास्य कर्म वा लोके सदसन्मिश्रयोनिषु।
क्रीडार्थं सोऽपि साधूनां परित्राणाय कल्पते ॥ ३९ ॥
सत्त्वं रजस्तम इति भजते निर्गुणो गुणान्।
क्रीडन्नतीतोऽत्र गुणैः सृजत्यवति हन्त्यजः ॥ ४० ॥

[१] अयं सुबोधिनीकारमते नास्ति।

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

तथा निर्विशेषब्रह्मस्वरूपत्वेन जन्मकर्मशरीरपित्रादिसम्बन्धराहित्यं तदनुकूलमध्यात्मयोगं च प्रपञ्चयानयोः प्रेमा संकोचनीयः तेन तेनाप्यप्रेमयो दुष्पारो दुर्निवारप्रेमा यदि प्रत्युत वर्द्धेतैव तदा मथुरां गत्वा कृष्णवसुदेवोग्रसेनादिमहासदस्यनयोः प्रेम्णो निरुपमां कीर्तिं कीर्तयित्वा सर्वान् विस्माप्य कृष्ण एव मत्तो-पालम्भनीय इति मनसि कृत्वा प्रथमं कृष्णस्य परमात्मत्वं द्योतयन्नाह। अन्तरिति। तर्हि सर्वैः किमिति न दृश्यते तत्राह। ज्योतिरिति। तद्यथा मन्थनं विना न दृश्यते तथैव कृष्णोऽपि तस्माद्युवाभ्यां तस्मिन् पुत्रे कृष्णे वैष्णवैरिव भक्तिः कर्तुं न शक्यते कथं स साक्षात्स्वगृहे द्रष्टव्य इति द्योतिते सति येन तेन प्रकारेण पुत्रः स गृहमायातु पुत्रेऽपि तस्मिन् भक्तिः कर्तव्येति नन्दयशोदाभ्यां मनसि विचारितम् अत एव मनसो वृत्तयो नः स्युः कृष्णपादाम्बुजाश्रया इत्युत्तरं प्रत्युपरिष्टाद्वक्ष्यते ॥ ३६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

तस्मिन् महात्मन् महात्मनि अखिलस्य आत्मा च हेतुश्च तस्मिन् कारणेन भजनमिति तेन ये मर्त्याः धृतमर्त्यशरीरास्ते मूर्तयः स्वमूर्तिवत्प्रिया यस्य तस्मिन् भक्तप्रिये भावं भक्तिं विश्रम्भा-मकुरुताम् ॥ ३३ ॥

पित्रोर्युवयोः ॥ ३४ ॥

वः युष्मान्प्रति यदाह "यात यूयं व्रजं तात! वयं च स्नेह-कातरान्। ज्ञातीन्वो द्रष्टुमेष्यामो विधाय सुहृदां सुख"मिति तत्स-त्यङ्करिष्यत्येव ॥ ३५ ॥

किं च अन्तिके समीपे कृष्णं द्रक्ष्यथः यतः स एव कृष्णः अन्तर्हृदि आस्ते अतो मा खिद्यतम् ॥ ३६ ॥

भाषा टीका।

हे महात्मन्! नंदजी सब संसार के हेतु भक्तोंके प्रेम से मर्त्यरूप श्रीनारायणके विषै तुम दोनों ने भावना किया है

तो अब तुम दोनों का कानसा काम बाकी रहा होगा ॥ ३३ ॥

सात्वतों के पति अच्युत भगवान् थोडे ही दिनों में व्रज को आवैंगे और माता पिता दोनों का संतोष करेंगे ॥ ३४ ॥

रंग भूमी में सब सात्वतों के शत्रु कंस को मारे पीछे आपसे भगवान् श्रीकृष्णजी ने जो कहा है उस बात को आकर सत्यही करेंगे ॥ ३५ ॥

हे महाभागो! आप दोनों खेद मत करो श्रीकृष्णजी को तुम अपने पास ही देखोगे वह तो सब भूतों के हृदय के मध्य में विराजमान हैं जैसे कि लकडी के भीतर अग्नि रहता है ॥ ३६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

अहो आस्तामेतत्तस्य त्विहागमनं स्वस्यातिप्रियान्पित्रादीन्वि-हाय न सङ्गच्छत इति मन्ये तत्राह। नह्यस्येति। अस्य प्रियादयो न हि सन्ति तत्र हेतुः अमानिनः समानस्येति च ॥ ३७-३८ ॥

सोऽपि जन्मकर्मादिरहितोऽपि क्रीडाप्रयोजनः सन्स साधूनां परि-पालनाय सदसन्मिश्रयोनिषु सात्त्विकराजसतामसयोनिषु यद्वा देवादिमत्स्यादिनृसिंहादियोनिषु कल्पते आविर्भवतीत्यर्थः ॥ ३९ ॥

ननु जन्मकर्मादिरहितस्य कुत एतदित्यत आह। सत्त्वमिति। क्रीडामतीतोऽपि क्रीडन् तथापि मायागुणैर्घटत इत्यर्थः ॥ ४० ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी।

न ह्यस्यास्तीति तैर्व्याख्यातम्। तत्रास्तामेतदिति न वयम-न्तर्हृदीत्यधिकं बुध्यामहे इत्यर्थः। यथा जीवानां तेन तेन लौकिकप्रकारेण प्रियादयः कर्मान्ताः चतुर्दश भावाः स्युस्तथा-स्यामी न सन्तीत्याह। नहीति त्रिकेण। अस्तीति सर्वत्र निषेधे योज्यम्। अस्य श्रीकृष्णस्य उपकाराद्विना प्रियोऽतिशयेन न ह्यस्ति एकांशेनापि नास्तीत्यर्थः। अपकारेणाप्रियोऽपि नास्ति कश्चि-दिति यथासम्भवमग्रेऽपि योज्यं तथा सौन्दर्यपाण्डित्यादिगुण-दृष्टिहेतोरुत्तमः स्तुत्यो न कौरूप्यकौमुख्यादिदोषदृष्टिहेतोरधमो निन्द्यो न तादृशगुणदोषाभावदृष्टिहेतोः आ सर्वतः सम उपेक्षा-बुद्धिविषयो न धातुद्वारोत्पादनहेतो र्मे माता न पिता च। अतः

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

सुतादयोऽपि न । विवाहसम्बन्धहेतोर्भार्या न । सर्वकारणादि-हेतोरात्मीयो न । तदभावहेतोः परोऽपि न । अभिन्नदेहदेहि-स्वरूपादन्यत्रात्मत्वाभिमानहेतोर्देहो न । अन्यादृशदेहस्वीकारा-ज्जन्मैव च न कुतो देह इत्यर्थः । अपूर्णोत्पत्तियोगत्वाभावात् । कर्म शुभाशुभमदृष्टं च नेति । सर्वत्र यथायथं हेतुः अमानिनः तत्तदभिमानशून्यस्य समानस्य विकाररहितस्येति प्रायः सर्वत्रैव नञः प्रयोगस्तन्निषेधनिर्द्धारणार्थः आद्यो वाशब्दः समु-च्चये अन्ये च तत्सम्भावनायामपि तन्निरासार्थाः । जन्म एव चेति च शब्दः काचित्कः ॥ ३७ ॥ ३८ ॥

किन्तु तस्यैवम्भूतस्यापि साधुत्वेन प्रियादयः साधुद्रोहित्वे-नैवाप्रियादयः सन्तीत्यभिप्रेत्याह । सादिति । सज्जातिरियमसज्जाति-रियमित्याद्यादरणानादरणननुसन्धाय तासु तदनुकारिस्वरूपविग्रहेण प्रकटीभूय साधूनां साधुत्वेनैव प्रियादितया स्वीकृतानां सर्वतो रक्षणाय योग्यो भवतीत्यर्थः । ननु सङ्कल्पेनैव तत् स्यात् किं तत्तत्प्रादुर्भावेन तत्राह । क्रीडार्थं "लोकवत्तु लीलाकैवल्यम्" इति न्यायेन क्रीडाप्रयोजनः सन्नित्यर्थः । अयमभिप्रायः । अन्यलेप-स्तस्मिन्न भवत्येव किन्तु परमसद्गुणशिरोमणये तस्मै साधुत्वं खलु रोचते साधुत्वस्य च तदेकनिष्ठतायामेव मुख्या वृत्तिः धर्मः प्रोज्झितकैतवोऽत्रेत्यत्र मोक्षेच्छापर्यन्तस्य कैतवतास्वी-कारात् । "न किञ्चित् साधवो धीरा भक्ता ह्येकान्तिनो मम । वाञ्छन्त्यपि मया दत्तं कैवल्यमपुनर्भवम् । साधवो हृदयं मह्यं साधूनां हृदयं त्वहम् । मदन्यत्ते न जानन्ति नाहं तेभ्यो मनाग-पी"ति स्पष्टत्वात् । तदेकनिष्ठता च तत्प्रेमतारतम्यैकतारतम्या-त्तद्वैविध्येन विविधा च प्रेमैकहेतुत्वात्तस्याः । तथाचोक्तं यथा-श्नतः स्युस्तुष्टिः पुष्टिः क्षुदपायोऽनुघासमिति । येषामहं प्रिय आत्मा सुतश्च सखा गुरुः सुहृदो दैवमिष्टमित्यादि । तच्च तत्प्रेम निर्गुणम् । "सात्त्विकं सुखमात्मोत्थं विषयोत्थन्तु राजसम् । तामसं मोहदैन्योत्थं मन्निष्ठं निर्गुणं स्मृतम् । सात्त्विक्याध्यात्मिकी श्रद्धा कर्मश्रद्धा तु राजसी । तामस्यधर्मे या श्रद्धा मत्सेवायान्तु निर्गुणा" इति श्रीभगवता निर्णयात् अतस्तादृशसाधुमात्रापेक्षी भगवान् । मद्भक्तानां विनोदार्थं करोमि विविधाः क्रिया इति पाद्मस्थतदुक्तानुसारेण तत्सुखमयस्वसुखाय क्रीडति यत्तत्तस्य स्वभाव एवेति स्थिते ये यथा मामिति न्यायात् यथावसरं प्रियादिरूपतामपि प्राप्नोति । सम्प्रति च वसुदेवदेवक्यादि-भ्योऽपि युवयोः शुद्धवात्सल्याख्यप्रेमातिशयस्तत्रात्तानपेक्ष्य युवयो-रक्षामिच्छन् युवयोः प्रेमभिराकृष्यमाणो युवयोरेव पुत्रत्व-मात्मानि बहु मन्वानो युवयोरग्रे तदुचितमनोहरलीलाप्रकाशन-लालसो व्रजमागमिष्यत्येवेति । तदुक्तं स्वयमेव । गच्छोद्धव व्रजं सौम्य पित्रोर्नः प्रीतिमावहेति ॥ ३९ ॥

सत्त्वमिति तैर्व्याख्यातम् । तत्र तथापीति तत्सान्निध्यबलेन तन्मायागुणास्तत्र कुर्वन्ति तत्तस्मिन्नारोप्यत इत्यर्थः । यद्वा इतः क्रीडा च तस्य स्वभाव एव यत्र प्राकृतसत्त्वादिनाप्यनुरक्ती करोतीति दर्शयति गुणेभ्यः सत्त्वादिभ्यो निष्क्रान्तस्तत्संसर्ग-रहितोऽपि क्रीडन् निजभक्तसुखमयनिजसुखक्रीडाहेतोः सत्त्वं रजस्तम इति गुणानपि भजते स्वीकरोति तर्हि तैराविष्टो भवति नहि नहीत्याह गुणैः स्वरूपभूतैर्ज्ञानादिभिस्तानतिक्रान्तस्तदना-विष्ट इत्यर्थः । अत एव अजः जन्मादिविकाररहितत्वे तन्नामे-त्यर्थः । प्राकृतसत्त्वादिमयीं क्रीडामप्याह । सृजतीति ॥ ४० ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

अमानिनः ममताभिमानरहितस्य समानस्य सर्वसमस्य ॥ ३७—३८ ॥

कल्पते कर्मवश्यो न भवति यद्वा स भगवान् परित्राणाय कल्पत इत्यर्थः ॥ ३९ ॥ ४० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अस्मत्तोऽपि प्रियतरान् वसुदेवादीन् विहायात्रागमिष्यतीत्येतदसं-भावितमित्यत्राह । न ह्यस्येति । अस्य भगवतः प्रियादयो न सन्ति तत्र हेतुरमानिनः समानस्येति च ममताभिमानरहितस्य सर्व-समानस्य चेति ॥ ३७ ॥

तथापि मात्रादयः सन्त्येवेत्यत्राह । न मातेति । तत्र हेतुर्न देह इति । देहस्यैवाभावे कुतस्तत्ससम्बन्धिनो मात्रादय इति भावः । ननू-पलभ्यते तस्यापि देहस्तत्कथं न चास्य देह इति ब्रूषे अत आह । कर्तैवेति । पुण्यपापात्मककर्मारब्ध देहो ऽस्य नास्तीत्यर्थः ॥ ३८ ॥

ननूपलब्धा तस्यापि देहोत्पत्तिस्तत्राह । न चास्य जन्मेति । तस्योत्पत्तिरवतारूपेति भावः ॥ किमर्थमवतारस्तत्राह । लोक इति । सोऽपि जन्मकर्मादिरहितोऽपि क्रीडार्थं साधूनां परित्राणरूप-परमप्रयोजनाय लोके सदसन्मिश्रयोनिषूत्तमाधममध्यमयोनिषु देवतिर्यङ्मनुष्ययोनिषु कल्पते आविर्भवति अनेन विलक्षणजन्म-कर्मादिभिर्जीववैलक्षण्यं सूचितम् ॥ ३९ ॥

तदेव विशदयति । सत्त्वमिति । निर्गुणः सत्त्वादिप्राकृतगुणेभ्यो निर्गतः गुणपारवश्यरहित इत्यर्थः । जीवस्तु सत्त्वादिगुणवश्य इति भावः । सत्त्वादीन् भजते स्वलीलोपकरणतया नियाम्यतया च तान्प्र-तिगृह्णाति जीवस्तु भोग्यतया नियमनाशक्त्या चताननुवर्तत इति भावः । गुणैरुपकरणभूतैः क्रीडन्नपि तानतीतोऽतिक्रान्तः स्वरूपतः स्वभावतश्च गुणैरनभिभूत इत्यर्थः । जीवस्तु तैः स्वभावतोऽभिभूत इति भावः । क्रीडन्नित्यनेन जीवस्य गुणकार्यशब्दादिविषयभोगः सूचितः काऽसौ क्रीडेत्यतस्तां दर्शयति । सृजतीति । विश्वमिति कर्मपदमध्याहर्तव्यम् अजः स्वयं विश्वगतोत्पत्यादिरहितः सृजत्य-वति रक्षति संहरति च जगद्व्यापारस्तस्य क्रीडेति दर्शितं भवति अनेन जीवस्तु सुखाद्यनुभवाय पुण्यपापात्मककर्माणि करोतीति सूचितम् अज इत्यनेन विश्वगतोत्पत्त्यादिभाङ्न भवतीति जीवस्तु जातोऽहं मृतोऽहमिति देहधर्मानात्मनि मन्यत इति विशेषः ॥ ४० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

प्रेष्ठानां ह्येव वर्तते नान्येषामिति नियमो नास्तीति भावे-नाह । नहीति । अमानिनः अहं ममाभिमानरहितस्य योग्यतानुसा-रेण समानस्य समोऽपि चेति पाठः ॥ ३७—३८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

नन्वेवंविधस्य हरेः कथञ्जन्मादिकमुपपद्यत इति तत्राह । लोक इति । सदसन्मिश्रयोनिषु सुरनरतिर्यग्योनिषु ॥ ३९ ॥

अनुगुणैस्तत्तत्कर्मानुकूलैः सत्त्वादिभिः ॥ ४० ॥ ० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

ननु सङ्कल्पेनैव तत् स्यात । किं तथा प्रादुर्भूतः तत्राह । क्रीडार्थं तत्प्रियादिभावमयक्रीडाप्रयोजनः सन्नित्यर्थः । "मद्भक्तानां विनोदार्थं करोमि विविधाः क्रियाः" इति पाद्मे तद्वाक्यात् । अयं भावः । सत्यसङ्कल्पस्तस्मिन भवत्येव किन्तु परमसद्गुणशिरोमणये तस्मै साधुत्वं खलु रोचेत साधुत्वस्य च तदेकनिष्ठायामेव मुख्या वृत्तिः । धर्मः प्रोज्झितकैतवोऽत्र परमो निर्मत्सराणां सतामित्यत्र मोक्षेच्छापर्यन्तस्य कैतवतास्वीकारात् तदेकनिष्ठता च प्रेमतारतम्यैकतारतम्या तद्वैविध्यतो विविधा च प्रेमैकहेतुत्वाच्चस्याः । तथाचोक्तं यथाश्नतः स्युस्तुष्टिः पुष्टिः क्षुदपायोऽनुघासमिति । येषामहं प्रिय आत्मा सुतश्च सखा गुरुः सुहृदो दैवमिष्टमित्यादि । अतस्तन्मात्रापेक्षी भगवान् इति स्थिते श्रीवसुदेवदेवक्यादिभ्योऽपि युवयोः शुद्धवात्सल्याख्यप्रेमातिशयतया तानप्यपेक्ष्य युवयो स्वामिच्छन् युवयोः प्रेमभिराकृष्यमाणो युवयोरेव पुत्रत्वमात्मनि बहु मन्वानो युवयोरग्रे तदुचितलीलाप्रकाशलालसो व्रजमागमिष्यत्येवेति । क्रीडामयसाधुपरित्राणमेव योजयति ॥ ३९ ॥

सत्त्वमिति । यथा निर्गुणो निर्गता गुणेभ्यः सत्त्वादिभ्यो गुणा यस्य तादृशोऽपि गुणान् सत्त्वादीन् भजते सान्निध्येनोपकरोति । तथा सत्त्वादिमयक्रीडातीतोऽपि क्रीडन् "लोकवत्तु लीलाकैवल्य" न्यायात् साधुपरित्राणमयक्रीडां कुर्वन् सान्निध्येन गुणैः सत्त्वादिभिः सृष्ट्यादिकं करोतीत्यर्थः ॥ ४० ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

एवं प्रादुर्भावे सुलभतामुक्त्वा तथापि दुर्लभ इति वक्तुं लौकिकप्रयोजकान् सर्वानेव सम्बन्धान् वारयति । न मातेति । अनेनासूयापि निवार्यते न हि भगवान् कस्यचिदुपालम्भ्यो भवतीति तस्य सर्वान्तर्यामिणः कृष्णस्य यशोदाद्या मातृत्वेन प्रसिद्धा अपि ता न मातरः तथा नन्दादयोऽपि न पितरः न च सीताप्रभृतयो भार्याः न वा कुशादयः सुताः आदिशब्देन न भ्रातरः गदादयोऽपि आत्मीयः स्वसात्मकः परः शत्रुः परकीयोऽपि पर एवेति न सम्बन्धी निरूपितः चकारान्नोदासीनः अयमर्थो निर्धारित इत्येवकारः नापि देहः यदर्थमेते अपेक्ष्यन्ते तस्य कारणं जन्मापि नास्ति एवकारः पूर्ववत् वेत्यनादरेण अनेन यत्किञ्चिदत्र सम्भावितं तदपि निषिद्धम् ॥ ३८ ॥

ननु कर्मसु विद्यमानेषु जन्माद्युच्छेदात् कर्मणां च प्रसिद्धत्वात्कथं जन्माद्यभाव इत्याशङ्क्याह । नचास्येति । नापि अस्यान्तर्यामिणो निर्लेपस्य अग्निवत्सर्वदाहकस्य सदसन्मिश्रयोनिषु उत्कृष्टापकृष्टमध्यभावेषु देवतिर्यङ्मनुष्यरूपेषु अस्य कर्मापि वेत्यनादरे जातेऽपि तेन न किञ्चित्कर्त्तव्यमिति तर्हि किमर्थमेतावत्करोतीत्याशङ्क्याह । क्रीडार्थं इति । अयं सर्वोऽपि भगवद्भावः क्रीडार्थः सोऽपि क्रीडाभावः साधूनां परित्राणाय तदपि नोद्देश्यः किन्तु कल्पते स्वयमेव समर्थो भवति तथा सूर्ये समागते स्वयमेवान्धकारो नश्यति ननु तदर्थं प्रयत्नोऽपि कर्त्तव्यः यथा महाराज्ञि क्रीडार्थमप्यागते चौरभयनिवृत्तिः ॥ ३९ ॥

एतदप्यङ्गीकृत्योच्यते मतान्तरे तु तदपि नास्तीति वदन् पूर्वोक्तमेवोपपत्तिमाह । सत्त्वं रजस्तम इति । स्वयं निर्गुण एव मूलभूतानेतान् क्रीडन् भजते तेषां विशेषप्रयोजनमाह तैः सृजत्यवति हन्तीति ॥ ४० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

अथापि प्रेमाणमसङ्कुचन्तमालक्ष्य भो व्रजराज ! कृष्णः साक्षात् परं ब्रह्मैव भवतीत्याह त्रिभिः अस्य प्रियादयो न सन्ति तत्र हेतुः अमानिनः समानस्येति च न मातेत्यादि प्रकटार्थो नन्दं ज्ञापयितुमभीप्सितः अप्रकटोऽर्थस्त्वन्य एव तत्र सदसन्मिश्राः सात्त्विकतामसराजस्यो या योनयस्तासु अस्य जन्म नास्ति जन्माभावादेव तदुत्तर कालभवं कर्मापि नास्ति तादृशजन्मा देहोऽपि नास्ति तेन देहेन क्रीडापि नैव अर्थः प्रयोजनं च नैव या गुणातीताः शुद्धसत्त्वस्वरूपा यशोदादेवकीकौसल्याद्यास्तासु जन्म च तदनन्तरं कर्म च तज्जन्मा देहश्च क्रीडा च प्रयोजनं चास्ति तद्रूपा मात्राद्याश्च सन्तीति भावः । किं त्वयं नन्दं ज्ञापयितुमनभीप्सितः सोऽपि एवं ब्रह्मस्वरूपोऽपि साधूनां स्वभक्तानां दुःखत्राणाय कल्पते योग्यो भवत्येव भक्तवात्सल्यादिति भावः ॥ ३७—३९ ॥

ननु यदि तस्य सर्वत्र साम्यात् प्रियाप्रियादयो न सन्ति तर्हि कथं तेन केचित् सुखिनः केचिद्दुःखिनश्च जगत्यत्र सृष्टास्तत्र गुणकृतमेव सुखदुःखादिकं न तत्कृतमित्याह । सत्त्वमिति । निर्गुणोऽपि स्वमायाशक्त्या वीक्षणादिना गुणांस्तदीयान् भजते स्वीकुरुते किमर्थं क्रीडन् क्रीडितुम् अतीतः क्रीडामतीत इति क्रीडापि तस्य नास्तीति नन्दं बोधयितुमभीप्सितोऽर्थः वस्तुतस्तु गुणान् अतीतः सन् अत्र मायिकलोकमध्ये कृष्णरामाद्यवतारेण स्वभक्तैः सह क्रीडितुमित्यर्थः । अतो गुणान् अतीतोऽपि गुणैर्जगत् सृजति यत एव प्राक्कल्पगतजीवाः स्वस्वशुभाशुभकर्मसाधनफलसिद्ध्यर्थं कुक्षीन्द्रियादीनि प्राप्य सुखिनो दुःखिनश्च भवन्तीति तत्र तस्य को दोषः न हि तस्य ते प्रिया अप्रियाश्चेति भावः ॥ ४० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

यद्यपि सर्वसमस्तथापि भवद्विधानां साधूनां विशेषतोऽनुग्रहाय्यावतीर्णस्तस्मात् युवयोरन्तिके आगमिष्यत्येवेत्याशयेनाह । नह्यस्येति त्रिभिः । अस्य श्रीकृष्णस्य अतिप्रियादयो न सन्ति तत्र हेतुगर्भं विशेषणम् अमानिन इति समानस्येति च ॥ ३७ ॥

किं च तस्य श्रीकृष्णस्य कर्मसाध्याः मात्रादयो न सन्ति

यथा भ्रमरिकादृष्ट्या भ्राम्यतीव महीयते [1] ।
चित्ते कर्तरि तत्रात्मा कर्तेवाहंधिया स्मृतः ॥ ४१ ॥

युवयोरेव नैवायमात्मजो भगवान् हरिः ।
सर्वेषामात्मजो ह्यात्मा पिता माता स ईश्वरः ॥ ४२ ॥

दृष्टं श्रुतं भूतभवद्भविष्यत्स्थास्नुश्चरिष्णुर्महदल्पकं च ।
विनाऽच्युताद्वस्तुतरां न वाच्यं स एव सर्वं परमार्थभूतः ॥ ४३ ॥

एवं निशा सा ब्रुवतोर्व्यतीता नन्दस्य कृष्णानुचरस्य राजन् ! ।
गोप्यः समुत्थाय निरूप्य दीपान् वास्तून् समभ्यर्च्य दधीन्यमन्थन् ॥ ४४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

यतः अस्य तन्निमित्तं लौकिकं कर्म नास्ति "जन्मकर्म च मे दिव्य" मितिश्रीवचनात् लोके प्राकृतलोके सदसन्मिश्रयोनिषु देवातिर्यङ्मनुष्ययोनिषु आविर्भावस्थानेषु स्वाभाविकनिजविग्रहयुक्त एव सोऽपि कर्मसाध्यमात्रादिजन्मान्तपदार्थसंबन्धवर्जितोऽपि क्रीडार्थः क्रीडाप्रयोजनः निजभक्तमनोरथसिद्धिप्रयोजनः साधूनां परित्राणाय च कल्पते आविर्भवतीत्यर्थः । देहारम्भकं कर्म नास्ति तदभावे देवादियोनिषु मातृविकारमयो देहो नास्ति तदभावे अपूर्वदेहग्रहणरूपं जन्म नास्ति तदभावे मात्रादयो न सन्तीति फलितोऽर्थः ॥ ३८ ॥ ३९ ॥

कर्माभावे देहतज्जन्मतन्निमित्तकमात्राद्यभाव इत्युक्तमथ तादृशं कर्मासौ भगवान् कुतो न करोतीत्यत्र प्राकृतगुणवश्यो जीवस्तादृशं कर्म करोति तद्देहादिसिद्ध्यर्थं स्वतः पूर्णकामो भगवांस्तु प्राकृतैर्नियम्यैर्गुणैः सृष्ट्यादि करोति नत्वात्मनो देहादिसिद्ध्यर्थं कर्म करोति प्राकृतगुणरहितत्वादित्याह । सत्त्वमिति । निर्गुणोऽपि प्राकृतगुणरहितोऽपि सत्त्वं रजस्तम इति गुणान् सृष्ट्याद्युपकरणतया गृह्णाति तैर्गुणैः विश्वं सृजत्यवति हन्ति स्वयमतीतोऽपि सृष्ट्याद्यविषयभूतोऽपि यतोऽजो नित्यविग्रहयुक्तः स्वरूपतस्तु जीवस्याप्यजत्वात् किं कुर्वन् क्रीडन् केवलं जीवहितायैव विहरन् स्वतः अवाप्तसमस्तकामत्वादित्यर्थः ॥ ४० ॥

भाषा टीका ।

ये परमात्मा मान रहित हैं इनका कोइ अति प्रिय भी नहीं है वैरी भी नहीं है वे सब को समान मानते हैं उनके कोई भी समान उत्तम या मध्यम नहीं है ॥ ३७ ॥

उनके कोइ माता पिता या भ्राता सुत आदिक नहीं हैं न कोई अपना है न पराया है न देह है न जन्म है ॥ ३८ ॥

इन सत् असत् तथा मिश्र योनियों में उनका कोई कर्म नहीं है तो भी वे साधुओं के रक्षा करने को क्रीडा में प्रवृत्त होते हैं ॥ ३९ ॥

ये प्राकृत गुण रहित होकर भी दिव्य सत्व रजः तमः गुणों को भजते हैं वे क्रीडा करते हैं प्राकृत गुणों से रहित होकर भी संसार की उत्पत्ति स्थिति प्रलय आदि को करते हैं ॥ ४० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अत्राविद्योपाधेर्जीवस्य कर्तृत्वं दृष्टान्तीकुर्वंस्तस्याविद्ययैव कर्तृत्वमिति सदृष्टान्तमाह । यथेति । भ्रमरिका परिभ्रमणं तयोपलक्षितया दृष्ट्या भूरपि भ्राम्यतीति यथा प्रतीयते एवं चित्ते कर्तरि सति तत्र चित्ते अहंधिया आत्माध्यासेनात्मा कर्ता स्मृतो यथा तद्वदिति ॥ ४१ ॥

किञ्च युवयोरेव नायमात्मजः किन्तु सर्वेषामपि तत्रापि नात्मज एव किन्तु शत्रुमित्रादिरूपोऽपीति सर्वात्मत्वनिरूपणेन मोहनिवृत्तेय सम्बन्धमनैकान्तिकी करोति युवयोरिति द्वाभ्याम् ॥ ४२ ॥

अच्युताद्विना तरां नितरां तत्त्वतो वाच्यं निर्वचनार्हं वस्तु नास्तीति ॥ ४३ ॥

दीपान्निरूप्य प्रज्वाल्य वास्तून् देहल्यादीन् ॥ ४४ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

तर्हि कथं तत्तद्गुणाविष्टः प्रतीयते तत्राह । यथेति । यथा जीवैर्भ्रमरिकादृष्ट्या कुम्भकारचक्रवन्निजदेहपरिभ्रमणसंस्कारवत्या दृष्ट्या मही भ्राम्यतीव प्रतीयते । यथा जीवैश्चित्तेऽपि कर्तरि सति तत्र चित्तेऽहंधिया चित्तमेवाहमिति बुद्ध्या शुद्धस्वरूप आत्मा स्वं कर्त्तेव स्मृतः स्मर्यते प्रतीयत इत्यर्थः । तथेश्वरोऽपि सृष्ट्याद्याविष्टः प्रतीयत इति शेषः ॥ ४१ ॥

अतः प्रेमविशेषवशत्वेनैव युवयोः पुत्रोऽसौ ततः कथञ्चि-

---

[1] अयं विजयध्वजीये नास्ति ।

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

दन्यत्र गतोऽप्यागमिष्यत्येव । यदि च प्रातीतिकेन जन्यजनकभावेन तस्मिन् पुत्रत्वं मन्यसे तदा सर्वात्मकत्वेन न केवलं युवयोरेव अपि तु सर्वेषां नच केवलं पुत्र एव अपि तु पित्रादिरपि तत्र तत्र च साक्षात्तदालम्बनकप्रेमाविशेषाभावान्न कदाचिदनुगच्छेदिति बोधयन्नाह । युवयोरेवेति द्वाभ्याम् । अयं माद्विधस्येश्वरः भगवानखिलैश्वर्ययुक्तः हरिः सर्वदुःखहर्त्ता । यद्वा । तस्मात् प्रेमविशेषसद्भावमात्रस्य तस्मिन् पुत्रत्वापादकत्वात् युवयोरेवायमात्मजः नैव ननु सर्वेषामात्मजः । हि यस्मात् सर्वेषामात्मा परमात्मा पिता जनयिता माता धारयिता ईश्वरः कर्मफलदाता चेति ॥ ४२ ॥

तत्र हेतुत्वेन सर्वात्मकत्वमेव दर्शयति । दृष्टमिति । अविनाभावत्वे हेतुः परमात्मभूतः सर्वेषां मूलस्वरूपः परमार्थभूतः इति पाठेऽपि स एवार्थः । अर्थो वस्तु ॥ ४३ ॥

एवं पूर्वोक्तप्रकारेण तत्र श्रीनन्दस्य तत्प्रकारो यथाकथञ्चित् स्वपुत्रागमनमात्रतात्पर्यकः श्रीमदुद्धवस्य तत्प्रकारस्तु सान्त्वनमात्रतात्पर्यकः । वीक्ष्यानुरागं परमं नन्दमाहोद्धवो मुदा इत्याद्युक्तेः । यथा अयमनयोर्भावः सर्वेषामेव श्लाघनीयः । एतादृशभावमूलकं चेदं विरहदुःखं तच्च सम्प्रति परमदुःसहं जातं श्रीकृष्णागमनञ्च न सम्प्रति घटते । तस्माद्भावश्लाघासहितेनैव तत्त्वोपदेशेन भावमेवैतं यत्किञ्चिद्विश्लथायमानं विधाय तद्दुःखञ्च तादृशं विधेयमिति सान्त्वनमात्रतात्पर्यकः । ब्रुवतोः सतोरिति शतृप्रयोगेण तु द्वयोरपि पुनः पुनस्तादृगुक्तिं बोधयति । सा तयोः संलापसम्बन्धिनी दीर्घापि निशैव विशेषेण निःशेषेणातीता । नच श्रीगोपेन्द्रस्य शोको नाप्युद्धवस्य तदर्थवाक्प्रयोगो विरराममित्यर्थः । कृष्णानुचरस्येति तदादेशानुसारेणाशेषवाक्चातुर्यवतोऽपीत्यर्थः । ततश्च प्रातःकृत्यार्थं त्वरया श्रीमदुद्धवो बहिर्निर्गत इति ज्ञेयम् । तदागमनज्ञानेन च गोप्यः प्रातर्गृहकृत्यं कर्तुं प्रवृत्ता इत्याह । गोप्य इति । गोप्योऽत्र विश्रम्भप्रधानान्तःपातिन्यः साधारण्ये वा । दाधिमन्थनमिदं प्रायः कृष्णाय नवनीतप्रेषणापेक्षया ॥ ४४ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

गुणैः सृष्ट्यादिव्यापारं कुर्वतोऽपि भगवतो जीवस्येव गुणकार्यभ्रमो नास्ति चेतनस्य व्यवस्थितस्यापि नास्तीत्याह । यथा भ्रमरिकादृष्ट्येति । अतिवेगभ्रमणक्रियानिष्ठदृष्ट्या मही भूमिर्भ्राम्यतीव ईयते प्रतीयते तत्र गुणवश्यतया जीवस्य चित्ते कर्तरि भ्रमः कर्तरि करणे कर्तृत्वोपचारः भ्रमहेतुर्भूमिर्भ्राम्यतीव ईयते प्रतीयते तत्र गुणवति जीवस्य मनस्यनवस्थितोऽपि आत्मा परमात्मा अकर्तैव भवति अहंधिया बुद्धिर्बुद्धिमतामस्मीत्यादि प्रकारेण तच्छरीरकोऽहमिति मन्यमानः स्थितोऽप्यकर्तैव भवतीत्यर्थः ॥ ४१ ॥

सर्वेषामिति । मातापित्रादिशरीरकः परमात्मेत्यर्थः ॥ ४२—४९ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका

एतदेव दृष्टान्तमुखेनोपपादयति । यथेति । भ्रमरिकाऽतिवेगभ्रमणक्रिया तयोपलक्षितया दृष्ट्या यथा भूरपि भ्राम्यतीव बभ्रम्यमाणेवेयते प्रतीयते तथात्मा कर्ता च सन्नेव जीवस्तत्रात्मन्यकर्तरि च चित्ते चित्तशब्दोपलक्षिते देहे अहंधिया स्वाभेदाभिमानेन स्मृतः मतः स्वगतकर्तृत्वात्मज्ञातृत्वादीन् विस्मृत्य देहमेव तथाविधं मन्यत इत्यर्थः । यद्वैवं जीवविलक्षणो भगवान् कृष्णः तद्याथात्म्यविद्भिः स्वतुल्यतया दृश्यते इति सदृष्टान्तमाह । यथेति । स्वयं भ्रमरिकारहितापि भूर्यथा भ्रमरिकादृष्ट्या भ्राम्यतीव प्रतीयते तथायं श्रीकृष्णोऽप्यहंधिया स्वतुल्यबुद्ध्या कर्ता पुण्यपापात्मककर्मकर्ता य आत्मा जीवः स इव चित्ते कर्तरि स्मृतः करणभूते चित्तेऽनुसन्धीयते त्यर्थः । यद्वा कर्तरीत्येव च्छेदः कर्तरि जीवे यच्चित्तं तस्मिन्नहंधिया तामेव प्रपञ्चयति तत्र चित्ते आत्मा कर्तैव पुण्यपापादिकर्ता तदायत्तदेहादिभाग्जीव इव स्मृतः मत इत्यर्थः ॥ ४१ ॥

एवं जीववैलक्षण्यमुपपाद्य तयोः तस्मिन् केवलं पुत्रत्वाभिमानं वारयन् तदनवगतसम्बन्धान्तराण्युपदिशन् तानि च सर्वजीवसाधारणानीत्याह । युवयोरिति । अयं ज्ञानादिकल्याणगुणगणाकरो निरस्तनिखिलदोषः आश्रितबन्धनहरः श्रीकृष्णः युवयोरेवात्मज एव न भवति किं तु सर्वेषामप्यात्मजः कुतः हि यस्मादात्मा सर्वान्तरात्मा तत्तदात्मजाद्यन्तरात्मतया तत्तच्छरीरकत्वेन तत्तद्रूपत्वादिति भावः । न केवलमात्मज एवापि तु पिता सर्वकारणत्वादिति भावः । माता च हितैककारित्वादिति भावः । यद्वा सर्वात्मकत्वान्मात्रादिरूपोऽपि स एवेति भावः । ईश्वरः स्वामी च अनेन "मात भ्राता पिता निवासः शरणं सुहृद्गतिश्च नारायण" इति श्रुत्यर्थोऽभिसंहितः ॥ ४२ ॥

सर्वेषामात्मेत्यनेनोक्तं सर्वात्मकत्वमेव प्रपञ्चयति । दृष्टमिति । दृष्टाद्यन्यतमं यत्किञ्चिद्वस्तु तदच्युतं विना नास्ति सर्वमच्युतायत्तसत्तादिमत्त्वेन तच्छरीकत्वेन च तदात्मकमेवेत्यर्थः । कुतः यतः परमार्थभूतः लोकत्रयमप्यन्तः प्रविश्य प्रशासनेन तस्य भर्ता व्याप्यगतदोषास्पृष्टश्चातः सर्वं जगत्स एव विशेषणबुद्धिशब्दयोराकृत्याधिकरणन्यायेन विशेष्यपर्यन्तत्वस्वाभाव्याद्विशेषणस्य विशिष्टवस्त्वन्तर्भूतत्वेन विशिष्टात्पृथगवस्तुत्वाच्च जगद्रूपेण स एवानुसन्धेय इत्यर्थः ॥ ४३ ॥

एवमिति । हे राजन् ! इत्थं कृष्णानुचरस्योद्धवस्य नन्दस्य च ब्रुवतोः सतोः सा निशा व्यतिक्रान्ता बभूव तदा निशायाः पश्चिमे यामे गोप्यः समुत्थाय दीपान्निरूप्य प्रज्वाल्य वास्तून् देहल्यादीन् समभ्यर्च्य गन्धादिभिरिति शेषः दधीन्यमन्थन्समन्थुरित्यर्थः ॥ ४५ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावळी ।

सम्यक्प्रणिहिते आत्मनि मनसि जायते प्रकाशत इत्यात्मज इत्यध्यात्मम् ॥ ४२ ॥

युवयोरेकं तत्त्वं सङ्क्षिप्य वदामीत्याह । दृष्टमिति । भविष्यत् भूतं भवद्वर्तमानं स्थास्नु स्थावरं चरिष्णु जङ्गमम् अच्युताद्विनाऽन्यत् ब्रह्मादिकं वस्तुतया स्वातन्त्र्येण नैवास्ति किं तु सर्वं स एव तदधीनमेव स कीदृशः परमार्थरूपः नित्याप्रतिहतस्वरूप इति बुध्यध्वमिति ॥ ४३ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

निरूप्य प्रज्वाल्य वास्तून् गृहद्वारिदेहल्यादिषु वास्तुदेवताः मार्जनालेपनाक्षतादिभिः सम्यगभ्यर्च्य अमन्थन् ममन्थुः ॥ ४४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

ईश्वरे साक्षात् कर्तृत्वादिकं तु जीवेनारोप्यत एवेति दृष्टान्तेन योजयति । यथेति ॥ ४१ ॥

तदेवं साधारणेषु तस्य साधारणं वैभवं वदन् तत्रैवार्थविशेषेण तयोः सम्बन्धविशेषं स्थापयति । युवयोरिति ॥ ४२ ॥

युवयोरेव सर्वात्मकत्वमिति दर्शयति । दृष्टमिति ॥ ४३ ॥

एवमिति । समाधानं तु न जातमिति भावः । गोप्यः साधारण्यः ॥ ४४—४६ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

यथा स्वयमजः स्वरूपतो न जायते अन्यथा तु कार्यरूपेण जननमावश्यकमेवमात्मसृष्ट्यभावे गुणैरेव सर्गे जीवानामपि औपाधिकभेदेनैव भेदसम्भवात् कुत्राप्यात्मनः कर्तृत्वं नास्तीति निरूपयन् अन्तःकरणाध्यासेनैव कर्तृत्वं न स्वत इति दृष्टान्तेनोपपादयन् कैमुत्यन्यायेन भगवति कर्तृत्वे निषेधमाह । यथा भ्रमरिकेति । यो हि वात्यावद्भ्रमति तस्य दृष्टिर्भ्रमरिका भवति तस्य दृष्ट्या भ्राम्यतीव मही दृश्यते वस्तुतस्तु दृष्टिरेव भ्रमति अन्यथा क्षणान्तरे अन्यैर्वा भ्रमणमुपलभ्यते तथा चित्ते कर्तरि सति कर्तृत्वाभिमानस्यैव प्रयोजकत्वात् प्राप्ताप्राप्तविवेकेन अहंकार एव कर्ता भवति तत्राहंधिया जीवोऽपि कर्तैव स्मृतः न तु वस्तुतः कर्ता एवं केचिद्दृष्टान्तदार्ष्टान्तिकभावेन एकवाक्यतया योजयन्ति वस्तुतस्तु दृष्टान्तद्वयमन्तर्बहिर्भेदेन अन्यथा इत्येव सङ्गतं स्यात् दृष्टान्ते च विषय अन्यथा बुद्धिर्दार्ष्टान्तिके तु कर्तृत्वे सति असामञ्जस्यं च स्यात् अनुपयुक्तार्थश्च नहि साक्षाद्भगवच्चरित्रे उपपद्यमाने प्रासङ्गिकत्वेन योजनमुचितं तत्र भगवान् ब्रह्मरूपः स्वयं तादृश एवाभिव्यक्तः नित्यस्वरूपगुणक्रियारूपः क्रमेण परं पुरुषाणां दृष्ट्या गृहीतः तत्र ग्राहिका दृष्टिः स्वधर्मं च तत्र योजयति ततो ब्रह्मरूपमेव प्राकृतसम्बन्ध्येव तत्र तत्र परिदृश्यमानं तथा कल्पयति तस्माद्भगवति नैते धर्मा युक्ताः स्वभ्रमादेव सच्चिदानन्दे प्राकृतत्वप्रतीतेः किञ्च यथा स्मृतौ सांख्यादिशास्त्रे चित्ते कर्तरि आत्मा कर्तैव दृष्टस्तदध्यासात् तथा भगवति स्वसम्बन्धारोपात्तद्भावः प्रतीयते न तु वस्तुतो भगवांस्तथा भवति ततः पूर्ण एव व्यापकः परिच्छिन्नदृष्ट्या तत्तत्पदार्थेषु अभिव्यक्त्या सूर्यवत्सम्बद्धस्तथा दृश्यते स्वधर्मारोपेण वा तथा मन्यते वस्तुतो दृश्यतेऽपि न अतः पूर्ण एव परमानन्दः परिच्छेदकदृष्ट्या तदिच्छया क्वचिदुपलभ्यते क्वचिन्नेति यथेदानीं भगवदिच्छया मथुरावासिभिर्दृश्यते न तु भवद्भिर्यथा वा अस्माद्दासैर्दृश्यमानमपि भवन्तो वदन्ति नात्र भगवान् किन्तु मथुरायामिति एवं भ्रमो भवदीयस्तस्मादिमं भ्रमं परित्यज्य सर्वत्रैव भगवान् ज्ञातव्य इत्यर्थः । साक्षात्कारस्तु तदिच्छया भविष्यति ॥ ४१ ॥

ननु अस्माभिरयं पुत्रत्वेन एतावत्कालं व्यवहृतः कथमिदानीमपुत्रत्वं स्वस्य वा भ्रान्तत्वं मन्यामह इत्याशङ्क्याह । युवयोरेवेति । यद्भवतोर्लीलया भगवान् पुत्रो जात इति तथैवाङ्गीक्रियत इति मतं तदा युवयोरेवं भूतो नान्येषामिति नास्ति किन्तु सर्वेषामेवायमात्मजादिः सर्वात्मा ह्ययं तेषां पुत्रत्वाकारेण यदि न भवेत् आधिदैविकप्रकारेण न वा तदा संसारे प्राणिनामानन्दो न भवेदिति को ह्येवान्यात्कः प्राण्यात् यदेष आकाश आनन्दो न स्यादिति श्रुतेः यतोऽयं हरिः अकारणसर्वदुःखहर्ता भगवान् समर्थः यदि समर्थो भूत्वा न दुःखं दूरीकुर्यात् तदा अयुक्तं भवेदिति अतो युक्तत्वादेव सर्वेषामात्मजः आत्मा च सङ्घातरूपः तथा पिता सङ्घातस्तु बीजं माता योनिः स च जीवः ईश्वरो नियन्ता अन्तर्यामी च एतावद्रूपो भगवान् सर्वेषां भवतीति किमाश्चर्यं भवतां पुत्रत्वेन स्वात्मानं ख्यापितवानिति ॥ ४२ ॥

ननु सर्वेषां तथात्वेऽपि न सर्वेषां तथा प्रतीतिः किं त्वस्माकमेव इदं च भगवता लीलयैव तथैव कृतम् अतः पुत्रोऽस्माकमेव न सर्वेषामिति चेत्तत्राह । दृष्टं श्रुतमिति । भगवान् सर्वेषामेव सर्वरूपो भूत्वा तथात्वं बोधयति तथा सति यदि कोऽपि न मन्यते तदा तेषामभाग्यं भवद्भिरपि भ्रममात्रं मन्तव्यं किन्तु सर्वत्वेन पुत्रत्वमपि मन्तव्यमिति न तु पुत्रत्वमेव परिच्छिन्नदृष्ट्या तावदेव गृहीतमिति तत्रान्यथा बुद्धिर्न कर्तव्येति दृष्टं प्रत्यक्षतः ऐहिकं श्रुतं श्रुत्यादिना पारलौकिकं च भगवानेवेत्यर्थः । भूतभवद्भविष्यदिति त्रिविधकालपरिच्छेद उक्तः अनेन कालपरिच्छिन्नमपि भगवानेवेत्युक्तम् अनेन परिच्छेद्यापरिच्छेद्यविरुद्धसर्वधर्माश्रय इत्युक्तं परिच्छिन्नेऽप्यवान्तरभेदवानयमेवेत्याह । स्थास्नुश्चरिष्णुरिति । स्थावरं जङ्गमं च तत्रापि तृणमेरुभावौ सिकताब्रह्माण्डभावौ वा मशकब्रह्मभावौ च भगवानेवेत्याह । महदल्पकं चेति । एवं चतुर्धा भिन्नो भगवान् चतुर्मूर्तिः स्वयमेव यतः अच्युतः अन्यथा केनाप्यंशेन परिच्छेदे च्युतत्वं स्यात् अतः अच्युताद्विना अच्युतव्यतिरेकेण इतरद्वस्तु न वाच्यं किन्तु स एव सर्वम् अच्युतमिति अच्युतं विभक्तमपि न भवति अच्युतभिन्नमपि न भवति नन्दस्य प्रथमाधिकारित्वात् आधिदैविकप्रकारेण विश्वासार्थं भगवतः सर्वत्वमाह । परमार्थभूत इति । परमार्थो भगवान् भूतः आधिदैविकः परमार्थ आध्यात्मिकः किं त्वर्थो भवति भौतिकस्त्वनर्थः अत एव ब्रह्मवादात् आधिदैविकवादः पूर्वमीमांसासिद्धः किञ्चिदपकृष्टः ततोऽपि भेदवादः आध्यात्मिकरूपः ततोऽपि मायावाद इति बोध्यते उत्तरोत्तरमपकृष्टप्रकाराः तत्राधिभौतिको भौतिकः मुक्तिश्च प्रमेयबलेनेति ॥ ४३ ॥

एवं नन्दोपदेशः समाप्तः रजनी च ततः समाप्तेत्याह । एवं निशेति । सा निशा एवं ब्रुवतोरेव व्यतीता यस्या मुखे समागतः परं भार्यया सह भगवद्गुणालापेनापि रात्रिर्व्यत्यगादिति तद्व्यावृत्त्यर्थं गणयति । नन्दस्य कृष्णानुचरस्येति । नन्दो भगवद्भक्तः प्रसिद्ध एव उद्धवः कदाचिदन्यदपि भवेदित्याशङ्क्य तन्निवृत्त्यर्थमाह । कृष्णानुचरस्येति । सेवको हि स्वामिकथामेव कर्तुमागतः स्वामिकथामेव करोति राजन्निति तदाभिज्ञत्वात्सम्बोधनं निशा प्रभातेत्यत्र निदर्शनमाह । गोप्यःसमुत्थायेति । सम्यगुत्थाय ननु रात्रावेव निमित्तवशादुत्थानं निरूप्य दीपानिति तासां सम्पत्तिरधिका निरूपिता वास्तून् समभ्यर्च्येति दीपानिति बहुवचनेन भगवतो मङ्ग-

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

वारात्रिकमपि सूचितं देहल्यादीनां सम्यगर्चनं कुलधर्मख्यापनार्थं भगवानत्र स्थित इति भक्त्या दर्शनानि नानाविधानि प्रातः कृतानि मध्याह्नकृतानि सायंकृतानि च मन्थनं रूपस्यैव लौकिको दोहस्त्रिवारं वैदिको द्विवारं त्रिवारमित्येके अनेन गोपिकानां सन्तोषार्थमयमागतः तासां सुखचरितेन तुष्यतीति नन्दातिथ्यवत् ताभिः कृतमातिथ्यं निरूपितम् ॥ ४४ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

जगत्स्रष्टृत्वमपि तत्र परमेश्वरे वस्तुतो नास्ति तस्यापि गुणकृतत्वादित्याह । यथेति । भ्रमरिका परिभ्रमणं वातादिधातुवैगुण्यात्तद्युक्तया दृष्ट्या जनेन मही कुम्भकारचक्रवद्भ्राम्यतीव ईयते प्रतीयते यथा च जीवेन चित्तेऽपि कर्त्तरि सति तत्रैवाहंधिया चित्तमेवाहमिति बुद्ध्या आत्मा कर्त्ता स्मृतः स्मर्य्यते तथैव गुणकृतैव जगत्सृष्टिरीश्वरे प्रतीयत इति शेषः । एवञ्च स्वरूपेणैव तस्य जगत्स्रष्टृत्वं नास्ति किन्तु स्वरूपभूतायाः अपि मायायास्तच्छक्तित्वेन तदभेदाज्जगत्स्रष्टृत्वमस्त्यपीति ज्ञेयम् ॥ ४१ ॥

अतः सर्वजगत्स्रष्टरि तस्मिन् परमेश्वरे पुत्रादिभावना सुखदुःखदत्वादिभावना च कर्त्तुं नोचिता तदपि परमेश्वरोऽपि स कृष्णो ममैव पुत्र इति यदि मन्यसे तदा शृणु तत्त्वमित्याह । युवयोरेव न आत्मजः किन्तु ये ये तस्मिन्नात्मजभावं कुर्य्युस्तेषां सर्वेषामेवात्मजः आत्मा आत्मवत्प्रेष्ठः ये ये तस्मिन्नात्मैवायमिति भावं कुर्य्युस्तेषामात्मा एवं पित्रादिभाववतां स पित्रादिः ईश्वर इतीश्वरत्वात्तस्मिन् किमपि नायुक्तमिति भावः ॥ ४२ ॥

वस्तुतस्तु भो व्रजराज युष्मदादिकं सर्वमिदं जगत् तच्छक्तिसृष्टत्वात्तदात्मकमेव जानीहि ब्रूहि च तदनुरूपमित्याह । दृष्टमिति । अच्युताद्विना वस्तु न तरां नैव वाच्यं प्रकृतिप्रत्यययोः पौर्वापर्य्याभाव आर्षः ॥ ४३ ॥

एवं तयोर्ब्रुवतोरेव सा निशा व्यतीता ननु नन्दयशोदयोः सान्त्वनं कर्त्तुमुद्धवः शशाक किमुद्धवस्य प्रबोधनं तौ जगृहतुरिति भावः । अत्र व्रजराजो मनस्येव विचारयामास अयं कृष्णः परमेश्वर एवेति प्राबोधयदुद्धवस्तत् किमहं न जानामि अस्य नामकरणसमय एव नारायणसमोऽयमिति गर्गमुखादश्रौषमेव नारायणस्य समस्तं विना कोऽन्यस्तस्मात्तथा पूतनाबकादिमारणगोवर्द्धनधारणदावानलोपशमनाद्वरुणलोकपालप्रणमनान्नारायणत्वमस्यान्वभूमैव नारायण एव परमात्मा स एव परब्रह्मेत्यत्रापि जानाम्येव तदप्ययमावयोरेव पुत्र इत्यत्रावाधितोऽस्मदनुभव एव प्रमाणं तस्मान्नन्दात्मजोऽयं ते इति श्रीगर्गमहामुनिवाक्यमपि परमेश्वरेऽपि तस्मिन्नाराध्यत्वबुद्धिमकृतवतोरपि स्वभुक्तशेषताम्बूलचर्वितादिकं समर्पितवतोरप्यावयोर्मनःप्रसादान्यथानुपपत्तिरपि कृष्णजन्मनः पूर्वमावयोरिष्टदेवो नारायणो ध्यातुं शक्य एवासीदधुना तु ध्यानमात्र एव स्फुरत्याविर्भवतीत्यावयोर्मनः प्रसादे लिङ्गमतः आवयोः पुत्रे तस्मिंस्तत्तद्व्यवहृतिर्न दोषः तथा कृष्णस्यावां पितरावेवेत्यत्र कृष्णस्यैवानुभवः प्रमाणम् आवयोस्ताम्बूलचर्वितप्रदानाङ्कारोहणपरिष्वङ्गचुम्बनादिलक्षणलालनस्याप्राप्तौ सत्यां तस्य मुखम्लानेर्बहुशो दृष्टत्वात् यदि तस्येयं माता न स्यात् तदा भाण्डस्फोटापराधे तं कथं बबन्ध बन्धने मुखम्लाने मया मोचने मुखप्रसादस्य च तदानीं दृष्टत्वात् आवयोः पितृत्वे सत्येव परमेश्वरोऽपि स विविधानुशासनभर्त्सनबन्धनादिकमङ्गीकुरुते स्म अन्यथा परब्रह्मणः सर्वव्यापकस्य परमेश्वरस्य कथं बन्धनमिति किन्तु सांप्रतं मथुरायां चाणूरकंसादिवधानन्तरं हे कृष्ण ! त्वं परमेश्वर एवेति सर्व एव ब्रुवते स्म तत्र देवकी त्वहन्ते मातेति वसुदेवः अहं ते पितेति केचिदन्ये वयं ते पितृव्या इति केचिच्च वयं भ्रातर इति आत्मीया इति बान्धवा इत्युक्त्वा बहव एव यदा तं स्वस्वगेहं प्रति नेतुं निमन्त्रयन्तो मथुरायामेव रोद्धुं प्रावर्त्तन्त तदा मत्पुत्रो महाभव्यशिरोमणिः स महासङ्कटे तत्तन्मुखापेक्षया जाले पतितः स्वीयं व्रजमप्यागन्तुमपारयन् सर्वत्रैव दाक्षिण्यादेवमब्रवीदित्यहमनुमिमे अहं खलु परमेश्वर एव सर्वविश्वस्रष्टा मम का माता कः खलु पिता क आत्मीयः को वा परः किन्तु यूयं सर्वशास्त्रं पश्यत यो मे भक्तिं करिष्यति तस्यैवाहं नान्यस्य तस्यैव गृहं यास्यामि स एव मे पित्रादिरिति अयं तूद्धवो बालक एव बुद्धिमानपि मत्पुत्रस्य तस्य महागाम्भीर्यहृदयमवगाढुमसमर्थस्तद्वाचं तां श्रुत्वा कृष्णस्यायमेवाशय इति मत्वा तत आगत्यात्र मां तथैव प्रबोधयति स्म किञ्च मत्पुत्रेण चातुर्य्यात् सम्यगेतदुक्तं यो मे भक्तिं करिष्यति स एव मे पित्रादिस्तस्यैव गृहे वसामीत्यतोऽहमप्युद्धवद्वारा संदेशमिमं संप्रेषयिष्यामि हे कृष्ण ! त्वच्चरणे मम भक्तिर्भवेत्तथा कृपया प्रसीद यथा त्वदीयश्रवणकीर्त्तनस्मरणप्रणमनादिभक्त्या त्वामहं प्राप्नुयामिति ततश्च सर्वेयादवसभासु मत्संदेशमिमं प्रथयित्वा भो भो यदुवंश्याः ! भवन्तोऽत्र मद्भक्तिं कर्त्तुं न शक्नुवन्ति नन्दस्तु करोत्यतः स एव पिता बन्धुः प्रियश्च तद्गृहमेव यामीत्युक्त्वा स शीघ्रमिहागच्छेदिति तदन्ते व्रजराजस्तमपि परामर्शं दैन्यसञ्चारिप्राबल्येन विसस्मारेव अथ प्रकृतमनुसरामः ब्राह्मे मुहूर्त्ते समुत्थाय दीपान् निरूप्य प्रज्वाल्य वास्तून् देहल्यादीन् ॥ ४४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

स्तम्भे नृहरिमूर्त्तिवत् भक्तमनोरथपूर्त्यर्थं प्रादुर्भूते ऽस्मिन् अजे पुरुषस्य जनकत्वबुद्धिस्तु भ्रान्त्यैवेत्याह । यथेति । भ्रमरिका परिभ्रमणरूपा क्रिया तयोपलक्षितया दृष्ट्या मही सुस्थिरापि भ्राम्यतीव ईयते प्रतीयते तथा तत्र तस्मिन्कर्तरि विश्वसृष्ट्यादिकर्तरि सर्वजनके आत्मा जीवात्मा पुरुषः कर्त्तेव जनकधिया स्वबुद्ध्या चित्ते स्वकीये एव स्मृतः नतु शास्त्रे तज्जनकः कश्चिदुपलभ्यते इत्यर्थः । "अजायमानो बहुधा व्यजायत" इति श्रुतेः ॥४१॥

भक्तितस्तु युवयोरेव तत्रापि नात्मज एव नायं श्रीकृष्णः किन्तु युवयोरन्येषामपि सर्वेषाम् आत्मजः पिता माता च "ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यह" मिति श्रीमुखोक्तेश्च हि हेतौ यतो हेतोः सः श्रीकृष्णः ईशः नियन्ता हरिः क्लेशहरः आत्मा च सर्वं कृष्णात्मकमित्यर्थः ॥ ४२ ॥

सर्वस्य श्रीकृष्णात्मकत्वं श्रीकृष्णस्य सर्वात्मत्वं चाह । दृष्टमिति । अच्युताद्विना तरां नितरां दृष्टश्रुतादिकं वस्तु न वाच्यं

ता दीपदीप्तैर्मणिभिर्विरेजू रज्जूर्विकर्षद्भुजकङ्कणस्रजः ।
चलन्नितम्बस्तनहारकुण्डलत्विषत्कपोलारुणकुङ्कुमाननाः ॥ ४५ ॥
उद्गायतीनामरविन्दलोचनं व्रजाङ्गनानां दिवमस्पृशद्ध्वनिः ।
दध्नश्च निर्मन्थनशब्दमिश्रितो निरस्यते येन दिशाममङ्गलम् ॥ ४६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

न कथनीयम् अतदात्मकवस्त्वभावात् यतः सर्वं चिदचिदात्मकं वस्तु परमार्थभूतः कारणभूतः स एव "सर्वं खल्विदं ब्रह्म तज्जलानिति" ति स्वरूपतश्चिदचिद्ब्रह्मपदार्थानामभेदासम्भवात् चिदचितोर्ब्रह्मानिरपेक्षस्थितिप्रवृत्त्याद्यभावाद्ब्रह्मणि सर्वात्मनि श्रीकृष्णे अभेद इत्यर्थः ॥ ४३ ॥

कृष्णानुचरस्योद्धवस्य निरूप्य प्रज्वाल्य वास्तून् देहल्यादीन् अमन्थन् ममन्थुः ॥ ४४ ॥

भाषा टीका ।

जैसे घूमते हुये पुरुष की दृष्टि में पृथिवी घूमती सी दीखती है तैसे ही आत्मा का जो अर्थ है तिसको चित्त देहादिकों में आरोप करके आत्मा देहादिकों को कर्ता मानता है ॥ ४१ ॥

ये भगवान् हरि तुमारे ही पुत्र नहीं हैं किंतु सब जीवों के पुत्र आत्मा भी हैं पिता भी माता भी हैं वही ईश्वर हैं ॥ ४२ ॥

जगत् में जो दृष्ट या श्रुत है भूत या भविष्यत् है स्थिर है चर है या बड़ा छोटा है सो सब अच्युत के विना कुछ भी नहीं है वही परमार्थ होने से सर्व स्वरूप हैं ॥ ४३ ॥

हे राजन् ! नंदजी के तथा कृष्णदास उद्धवजी के ऐसे बोलते ही सब रात बीत गई प्रातःकाल में गोपी सब उठीं और दीपक लगाकर वास्तु देवों का पूजन करके दधि का मथन करतीं भईं ॥ ४४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

मणिभिः काञ्च्यादिषु स्थितैः रज्जूर्विकर्षन्तु भुजेषु कङ्कणानां स्रजो यासां ताः चलन्तो नितम्बाः स्तना हाराश्च यासां ताः कुण्डलैस्त्विषन्तः स्फुरन्तः कपोला यासां ताः अरुणानि कुङ्कुमानि येषु तान्याननानि यासां ता एव ताश्च ताश्च ॥ ४५-४६ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

दीपैर्हेतुभिर्दीप्तैस्तत्प्रतिबिम्बेन विशेषतः विरेजुरिति स्वत एव रेजुः पुनश्च तादृशैर्मणिभिर्विशेषत इत्यर्थः । यद्वा । दीपादपि दीप्तैः । अतो विशेषतो रेजुः ततो दीपज्वालनं तु मङ्गलतयैव विराजमाने इत्यन्तरं रज्जुरित्यादि । स्रक् श्रेणी कुण्डलस्यापि चलनं प्रकरणवशाज्ज्ञेयम् । अरुणेति वाह्लीकदेशोद्भवानि कुङ्कुमानि व्यज्यन्ते ॥ ४५ ॥

सन्ततं श्रीकृष्णावेशयुक्तानामपि तासां व्रजव्यवहाररक्षणाय श्रीकृष्णैकरक्षिततत्संस्कारवशाद्दधिमन्थनेऽपि तदावेशं सूचयन् तत्र च योगावसरतया गानेनातिशयं दर्शयन् तेन जगतोऽपि मङ्गलं जातमित्याह । उदिति । उच्चैरित्यावेशो दर्शितः अरविन्दलोचनमिति । सौन्दर्यप्रधानं गानं व्रजाङ्गनानामिति तादृशप्रसिद्धैर्गाननैपुण्यञ्च । एवं प्रेम्णोच्चैर्गानात्तासां बाहुल्याच्च गीतध्वनेर्व्यापकता ज्ञापिता ॥ अत एव दिवमस्पृशत् तत्र हेतुः घनत्वञ्च दध्न इति । निर्मन्थनं निरन्तरविलोडनं चकारात् कङ्कणादिशब्दश्च शब्दः मिश्रितः दिशां दशदिग्वर्त्तिनां सर्वेषामेव लोकानाममङ्गलम् ऐहिकामुष्मिकाशेषदुःखं तन्मूलञ्च कर्म निरस्यते सवासनं दूरतः क्षिप्यते ॥ ४६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

मन्थन्तीस्ता वर्णयति । ता इति । ता मन्थन्त्यो गोप्यः दीपैर्दीप्ता ये काञ्च्यादिस्थिता मणयस्तैर्विरेजुः कथम्भूताः मन्थनदण्डरज्जूर्विकर्षन्तु भुजेषु कङ्कणानां स्रजो यासां ताः चलन्तो नितम्बाः स्तना हाराश्च यासां ताः कुण्डलैस्त्विषन्तः स्फुरन्तः कपोला यासां ताः अरुणानि कुङ्कुमानि येषु तान्याननानि यासां ताश्च ताश्च ॥ ४५ ॥

तादृशविकध्वनिं लक्षयति । उद्गायतीनामिति । अरविन्दलोचनं श्रीकृष्णम् उच्चैर्गायतीनां गोपीनां ध्वनिः दध्नो निर्मन्थनजशब्देन मिश्रितो ध्वनिः शब्दः दिवं स्पृशद्व्याप्तवान् येन ध्वनिना दिशाममङ्गलं निरस्यतेऽपनुद्यते ॥ ४६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

मन्थनरज्ज्वा विकर्षन्तः उल्लिखन्तः करकङ्कणा यासां ताः यद्वा मन्थनरज्ज्वाऽविकर्षन्तः चलद्भिर्नितम्बादिभिस्त्विषन्ति कपोलादीनि अरुणकुङ्कुमानि आननानि यासां तथा अरुणानि कुङ्कुमानि येषु तानि तथा वा ॥ ४५ ॥

येन ध्वनिना दिशाममङ्गलमित्यनेन दिगन्तवासिनां जनानामशुभं नश्यतीत्युच्यते ॥ ४६ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

यद्यपि स्वरूपस्थित्यैव सन्तुष्टो भवति तथापि तासामुत्कर्षमप्याह । ता दीपदीप्तैरिति । दीप्तैर्दीप्ता ये मणयः दीपप्रतिबिम्बप्रा-

भगवत्युदिते सूर्ये नन्दद्वारि व्रजौकसः ।
दृष्ट्वा रथं शातकौम्भं कस्यायमिति चाब्रुवन् ॥ ४७ ॥
अक्रूर आगतः किं वा यः कंसस्यार्थसाधकः ।
येन नीतो मधुपुरीं कृष्णः कमललोचनः ॥ ४८ ॥
किं साधयिष्यत्यस्माभिर्भर्तुः प्रेतस्य निष्कृतिम् ।
इति स्त्रीणां वदन्तीनामुद्धवोऽगात्कृताह्निकः ॥ ४९ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे
पूर्वार्धे नन्दशोकापनयनं नाम
षट्चत्वारिंशोऽध्यायः ॥ ४६ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

ष्टिणः तैर्विशेषेण रेजुः स्वरूपापेक्षयापि अधिका कान्तिरिति भगवद्वचनपरि... योग्यता निरूपिता । भगवद्गुणगानयोग्यता वा एवं स्वरूपं वर्णयित्वा... क्रियाभिनिवेशोऽपि शोभातिशयमाह । रज्जूनां विकर्षणकौ यौ भुजौ तत्र कङ्कणानां स्रजो यासु स्थूलकङ्कणपरिधानं भगवद्विरहात् क्षामत्वं वा बोध्यते चलन्नितम्बः स्तनौ च तत्र हाराः कुण्डले च यासां कुण्डलयोर्वा त्विट् कान्तिस्तद्युक्ते कपोले त्विष्यत्कपोले सामान्यतस्त्विट्युक्ते वा कपोले ताभ्यां कृत्वा अरुणः कपोलयोर्वारुणः अरुणकुङ्कुमयुक्तमुखाः सर्वाङ्गेषु सौष्ठवमाभरणान्युत्तमत्वं च निरूपितम् ॥ ४५ ॥

एवं स्वरूपतो भगवद्योग्यत्वेनातिथ्यमुक्त्वा भगवद्गुणपरत्वेनापि तथात्वमाह । उद्गायतीनामिति । धर्मबुद्ध्यापि गानं सम्भवतीति तद्व्यावृत्त्यर्थमाह । अरविन्दलोचनमिति । सहि कमलनयनः कोटिकन्दर्पसुन्दरः । ननु कथं ब्रह्मत्वादिगुणा नोक्तास्तत्राह । व्रजाङ्गनानामिति । ता हि व्रजस्त्रियः सौन्दर्येणैव वशीकृताः किं ब्रह्मत्वादिना प्रशस्तान्यङ्गानि यासामिति तावन्मात्रपरत्वे हेतुरप्युक्तः । अन्यथाङ्गप्राशस्त्यं व्यर्थं स्यात्तासां लौकिकवैदिकानपेक्षत्वाय गाने विशेषमाह । उद्गायतीः... ध्वनिर्दिवमस्पृशादिति । कार्यकारणसहितं गानं निरूपितम् । कारणाधिक्याल्लोकपरित्यागः तथा सति लोकविशिष्टत्वात् अस्वर्ग्यमाशङ्क्य तस्यैव स्वर्गबन्धः कः सन्देहस्तत्फलस्येति तेनैव चरितार्थत्वात् वैदिकानिरपेक्षता च तासां भगवदीयत्वेन स्वर्गस्यानपेक्षितत्वात् वाचनिककायिकयोरेव कर्मणोः स्वसंबन्धप्रतिपादनार्थं दध्नश्च निर्मन्थनशब्दमिश्रित इत्युक्तं चकारात्कङ्कणानामपि रणत्कारेण मिश्रितः भगवदीयानां संबन्ध्यपि गोपिकानां गवां च सम्बन्ध्यपेक्षत इति भगवानिव तद्गुणा अपि तत्सापेक्षा इति तासां महत्त्वं सूचितम् ननु सर्वधर्मपरित्यागे तासामपापं भवेदिति कथं तद्वर्णनेन आतिथ्यं माहात्म्यं चेत्याशङ्क्याह । येन ध्वनिना दिशामेवामङ्गलं निरस्यते किमु तत्सम्बन्धिनाम् ॥ ४६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

मणिभिः कङ्कणकिङ्किण्यादिषु स्थितैः रज्जूर्विकर्षन्तु भुजेषु कङ्कणानां स्रक् श्रेणी यासां ताः चलन्तः कम्पमाना नितम्बाः स्तना हाराश्च यासां कुण्डलैस्त्विष्यन्तः स्फुरन्तः कपोला यासां ... कुङ्कुमं यद्बाह्लीकदेशोद्भूतं तद्युक्तान्याननानि यासां ताश्च ... च ताः ॥ ४५ ॥

...तम् ॥

उद्गायतीनामित्य... पेतकं वस्त्रालङ्कारकुङ्कुमालेपमधुरगानादिकं विरहे न घटत इत्यतः कृष्णसंयुक्तप्रकाश एवोद्धवेन सामान्यतो रात्र्यन्तेऽपि दृष्टो यथा दिनान्ते इति ज्ञेयम् ॥ ४६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

ताः गोप्यः रज्जूर्विकर्षत्सु भुजेषु कङ्कणानां स्रजो यासां ताः चलन्तो नितम्बाः स्तना हाराश्च यासां ताः कुण्डलैः त्विषन्तः स्फुरन्तः कपोला यासां ताः अरुणानि कुङ्कुमानि येषु तान्याननानि यासां ताश्च ताश्च ताश्च मणिभिराभरणानि तैर्विरेजुः ॥ ४५ ॥ ४६ ॥

भाषा टीका ।

दीपों से प्रकाशित मणियों से वे गोपी बड़ी प्रकाशित भई मंथन करने की रस्सी के खैंचने से उनके भुजा और कंकण माला चलायमान होरही हैं नितंब कटि भाग भी चलायमान हैं स्तन भी हार भी कुण्डल चंचळ होरहे हैं तिनकी कांति के पडने से और कुंकुम से उनके मुख अरुण होरहे हैं ॥ ४५ ॥

कमल लोचन भगवान् के गान करने से जो व्रज नारियोंकी ध्वनि है सो दधि मंथन के शब्द के साथ मिलने से वह शब्द आकाश को स्पर्श करने लगा जिससे कि दशों दिशों के अमंगलों के नाश होते थे ॥ ४६ ॥

श्रीधरस्वामिकृतभावार्थदीपि ।

तदा व्रजौकसो गोप्यः ॥ ४७ ॥

श्री १०८ श्रीराधारमणो जयति ।

महर्षिप्रवरश्रीकृष्णद्वैपायनप्रणीतम्

श्रीमद्भागवतम् ।

श्रीश्रीपाद श्रीधरस्वामिकृतभावार्थदीपिका, श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी, श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी, श्रीमद्विशिष्टाद्वैतसिद्धान्तप्रतिष्ठापनाचार्यवर्यश्रीसुदर्शनसूरिकृतशुकपक्षीयसमाख्याटीका, तदनुगामिश्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका, श्रीमन्माध्वसिद्धान्तधुरन्धरश्रीमद्विजयध्वजतीर्थकृतपदरत्नावली, श्रीगौडीयवैष्णवाचार्य्यप्रवरश्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भाख्यटीका, श्रीमद्विष्णुस्वामिसिद्धान्तनिर्वाहकाचार्यप्रवरश्रीमद्वल्लभाचार्य्यकृतसुबोधिनी, श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी, धनपतिसूरिकृतगूढार्थदीपिका, श्रीनिम्बार्कसम्प्रदायि-श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपाख्यटीका इति एकादशभिर्व्याख्याभिर्भाषानुवादेन च समलङ्कृतम् ॥

तदिदं,

परमहंसपरिव्राजकाचार्य्यपूज्यपादश्रीमत्स्वामिप्रकाशानन्दसरस्वतीप्रवरशिष्येण,

श्रीनित्यस्वरूपब्रह्मचारिणा

सम्पादितम् ।

वङ्गदेशान्तर्गत ताडास भूपति श्रीराधाविनोद प्रेम सेवा परायण राजर्षि राय

"श्रीवनमालिराय बहादुरस्य"

सम्पूर्ण साहाय्येन

प्रकाशितञ्च ।

तच्च

वृन्दावन निवासि पं० श्रीलक्ष्मणाचार्यद्वारा संशोध्य

श्रीवृन्दावनधामनि

स्वकीये "श्रीदेवकीनन्दन" यन्त्रालये

मुद्रापितम् ।

सम्वत् १९६७

श्रीधरस्वामिकृतभावार्थदीपिका ।

सक्रोधमाहुः । अक्रूर इति । मर्थं साधितवानित्यर्थसाधकः तदाहुः । येन नीत इति ॥ ४८ ॥

कंसं घातयित्वा पुनः किमर्थमागत इत्याशङ्क्य स्वयमेव कारणं सम्भावयन्ति । किमिति । तदा साधितेन कार्येण प्रीतस्य तुष्टस्य भर्तुः पाठान्तरे प्रेतस्य मृतस्य कंसस्य निष्कृतिमौर्ध्वदेहिकमस्माभिः कृत्वा साधयिष्यते किम् अस्मन्मांसैः पिण्डान् कृत्वा दास्यतीत्यर्थः । इत्येवं वदन्तीनां स्त्रीणां ततस्तस्मिन्नवसरे कृताह्निकः कृतस्नानादिनियम उद्धव आगत इति ॥ ४९ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे

श्रीधरस्वामिकृतभावार्थदीपिकायाम्

षट्चत्वारिंशोऽध्यायः ॥ ४६ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

भगवतीति । तमोनाशनादिरात्र्यभिप्रायेण श्रीभगवत्पूजाधिष्ठात्वाद्दिना वा । तादृशी स्तुतिश्च तदुक्यस्य सर्वेषां व्रजवासिनां श्रीकृष्णवार्त्ताप्राप्तिसुखसमयहेतुतया सन्तोषेण । व्रजौकसः पुरुषाः । स्त्रीणां वक्ष्यमाणत्वात् । तच्छब्दप्रयोगश्च सदा व्रज एव निवासात्तद्रथापरिचये हेतुः । किञ्च शातकौम्भं स्वर्णपरिष्कृतमिति वैलक्षण्यमुक्तम् अतोऽयं कस्येत्यब्रुवन् । चकारादनुक्तं चान्यत् किञ्चित् समुच्चिनोति ॥ ४७ ॥

अथोत्कण्ठाप्रधानान्तःपातिनीनां कासाञ्चिद्वाक्यमाह । अक्रूर इति द्वाभ्याम् । मधुपुर्यधिकारित्वदैत्यत्वाभ्यां कंसोऽपि मधुः किञ्च तस्य पुरीमिति तस्यां तन्नयनायोग्यतोक्ता । कृष्ण इति । हन्त नास्मत्पुत्रादिरन्योऽपि किन्तु स्वयमेव कृष्ण इत्यर्थः । तत्रापि कमललोचन इति । विशेष्यसौन्दर्यविशेषसर्वतापहारितागुणविशेषस्मरणेन निजहृदयार्त्तिविशेषं निवेदयन्ति । अत एव तादृशस्य व्रजाद्बहिरपि नयनमयुक्तं किमुत मधुपुर्यामिति भावः ॥ ४८ ॥

यद्यपि स्वभर्तुः कंसस्यैवार्थसाधनाय श्रीकृष्णं नीतवांस्तथापि दैवात्तस्मिन् घातिते स्वार्थसाधनाय तत्रैव श्रीकृष्णं रक्षित्वा यत् पुनरत्रागतस्तन्नूनमेवमभिप्रायेणैव इत्यभिप्रेत्याहुः । किमित्यर्धेन । पूर्वं प्रीतस्य पश्चाद्दैवादेवान्यथात्वं प्राप्तस्येत्यर्थः । पाठान्तरे प्रेतस्यापि निष्कृतिमानृण्यमिति ततस्तादृशोक्तिश्रवणात् स्त्रीणां तत्तद्गृहवर्त्तिनीनां सर्वासामेवं वदन्तीनां तास्वपि तथैव परस्परं वदन्तीष्वपीत्यर्थः । षष्ठी श्रुत्वाप्यश्रुतवदाचरणेन श्रीमदुद्धवस्य तदादराव्यञ्जनात् । अगाद्यत्र श्रीकृष्णप्रेयस्यस्ता नित्यं मिथःसमदुःखतया मिलित्वा वसन्ति तमेव स्थानविशेषमेकान्तमन्विष्य गत इत्यर्थः । एवमुक्तः विस्तारदैर्घ्ययोश्चतुष्टौ क्रोशान् व्याप्तस्य व्रजस्य नानागृहस्थानां तासां परोक्षाणां युगपदेव सहसा तद्दर्शनासम्भवात् । अगृहाणामप्रतो न इति तासां गृहपरित्यागस्य व्यञ्जयिष्यमाणत्वात् । मिलित्वा कृतवनवासत्वादेवासनादिभिस्तदातिथ्यस्य भ्रमरागमनस्यापि वक्ष्यमाणत्वात् । रहस्यपृच्छन्नुपविष्टमासन इत्यहं भर्तुरहस्कर इति वक्ष्यमाणत्वात् व्रजस्य वर्त्मनि गृहे च कस्मिंश्चित्तत्तदसमावेशात् ॥ ४९ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिण्याम्

षट्चत्वारिंशोऽध्यायः ॥ ४६ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

अस्माभिः मृताभिरित्यभिप्रायः निष्कृतिं प्रतीकारम् ॥ ४९ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे

श्रीसुदर्शनसूरिकृतशुकपक्षीये

षट्चत्वारिंशोऽध्यायः ॥ ४६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ततो भगवत्यादित्ये उदिते सति व्रजौकसो गोप्यः नन्दद्वारि शातकौम्भं सुवर्णालङ्कारं रथं दृष्ट्वा कस्यायमित्यूचुः सक्रोधमिति शेषः ॥ ४७ ॥

तदेवाह सार्द्धेन । अक्रूर इति । किं वा सोऽक्रूरः आगतः कोऽसौ यः कंसस्यार्थं प्रयोजनं साधितवान् तदाहुः । येन च श्रीकृष्णो मधुपुरीं नीतः प्रापितः ॥ ४८ ॥

कंसं घातयित्वा पुनः किमर्थमागत इत्याशङ्क्य कार्यं सम्भावयन्ति । किमिति । तथा साधितेन कार्येण प्रेतस्य मृतस्य भर्तुः कंसस्य निष्कृतिमौर्ध्वदेहिकमस्माभिः कृत्वा साधयिष्यति किमस्मन्मांसैः पिण्डान् कृत्वा दास्यति किमित्यर्थः । इतीति शुकोक्तिः इत्थं स्त्रीणां वदन्तीनां तस्मिन्नेवावसरे कृतस्नानादिनियम उद्धवोऽगादाजगाम ॥ ४९ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्

षट्चत्वारिंशोऽध्यायः ॥ ४६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

शातकौम्भं शातकुम्भेन सुवर्णेन विरचितम् ॥ ४७–४८ ॥

प्रेतस्य मृतस्य भर्तुः कंसस्य निष्कृतिमानृण्यमस्माभिः करिष्यति अस्मद्दण्डेन कर्तुमिच्छति किमित्यर्थः । इतिवदन्तीनां कृताह्निकः अनुष्ठितप्रातःकालक्रियः ॥ ४९ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्यां

चतुश्चत्वारिंशोऽध्यायः ॥ ४४ ॥ ४६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

व्रजौकसः पुरुषाः स्त्रीणां वक्ष्यमाणत्वात् ॥ ४७—४८ ॥

अगात् यत्र श्रीकृष्णप्रेयस्यस्तं प्रत्यहं मिथःसमदुःखतया मिलन्ति तमेव स्थानविशेषमेकान्तमन्विष्य गत इत्यर्थः ॥ ४६ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे

षट्चत्वारिंशोऽध्यायः ॥ ४६ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

एवं तासां जिज्ञासापर्यन्तं निलीयैव स्थित इति वक्तुं जिज्ञासाप्रकारमाह । भगवत्युदित इति । वाक्यार्थानुपयुक्ता कथा नोच्यत इति उद्धवस्य प्रातः कृत्यं नोक्तं तद्दिनसूर्यः भगवत्स्मारक इति गोपिकानामुद्धवस्य च परमपुरुषार्थदायीति सूर्यस्य भगवत्त्वमुक्तं नन्दस्य राजगृहवाक्षिप्त एव व्रज इति तद्द्वार्येव रथः स्थापित इति मुख्यतया स्थितः । किं बहुना स्वयं एव वृत्तान्तानभिज्ञाः नन्दादीनां तत्सम्बन्धिनां वायं रथो न भवतीति ज्ञातकौशलत्वात् सर्वतः सुवर्णेनालंकृतत्वात् निश्चित्य कस्यायं रथ इत्यब्रुवन् चकाराद्विचारितवन्तः पृष्टवन्तश्च ॥ ४७ ॥

ततः कस्यचित्पुरवासिनो राजकीयस्य सम्बन्धी रथ इति निश्चित्य पूर्वमागतत्वात् अक्रूर एव लब्धस्वादुः पुनरागत इति सम्भावनां कृतवत्यः तदाह । अक्रूर आगतः किं वेति । प्रायेणाक्रूरेणैवेयं भूर्दृष्टेति अक्रूर एवागतः तथापि प्रयोजनाभावात् तस्यागमनं न सम्भवतीति बाधकज्ञानात् सम्भावना । ननु सर्वेषु विद्यमानेषु सुतरां वसुदेवादिषु किमित्यक्रूर एव सम्भाव्यत इत्यत आह । यः पूर्वं कंसस्य अर्थं पुरुषार्थं साधितवान् विपरीतोन्त्तया वदन्ति वस्तुतस्तु परमपुरुषार्थं मोक्षं साधितवानेव ननु भवतीनां तस्मिन् कोऽयं दोष इत्याहुः । येन नीतो मधुपुरीमिति । कृष्णः फलात्मा कमललोचनः फलसाधनमैहिकफलरूपो वा ॥ ४८ ॥

तर्हि तादृशस्य कृतकार्यस्य द्विष्टस्य च कथं पुनरागमनमिति चेत्तत्राहुः । किं साधयिष्यतीति । प्रायेणास्मान् गोपिकाः विशेषाकारेण नेतुमागतः नीत्वा च प्रेतस्य कंसस्य निष्कृतिं करिष्यति स हि स्वार्थं नीत्वा स्वपुरुषार्थमप्यसाध्य अस्मत्पुरुषार्थमपि नाशयित्वा जनैराकृष्टः तदापराधपरिहारार्थं कृष्णमत्र प्रेषयितुमसमर्थः अस्मानेव तत्र नेष्यति तावता निष्कृतिर्भवति भर्त्सनापवादः परिहृत इति । अन्ये तु मृतस्य कंसस्य दैत्यत्वाद्रुधिरं मांसप्रियस्य मांसं दातुं सुतरामस्मान्नयति तथा च सति यथापूर्वमनोरथो विपरीतो जातः एवमयमपि भविष्यति ततो भगवानेव वालिं दास्यति भ्रान्तोऽयं समागत इति उपहासमुक्तवत्य इत्याहुः तदेवाह । किं साधयिष्यति न किञ्चिदिति । इदं विशेषाकारेण वचनं स्त्रीणामेवेति वदन् पूर्वभावमुपसंहरति । स्त्रीणामिति वदन्तीनां सतीनां क्षणं विलम्बे शापमपि दद्युः भयादागत इति पक्षं व्यावर्त्तयति । कृताह्निक इति । प्रातः काल एव सर्वमाह्निकं कृतवान् अग्रे महती व्यावृत्तिरिति । उद्धवत्वादेव न भयं द्वितीयो भगवत्संदेशः गोपीनां मद्वियोगाधिमिति सोऽग्रे प्रारम्भणीय इति पूर्वसमाप्तिः ॥ ४६ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे

श्रीमद्वल्लभदीक्षितविरचितायां सुबोधिन्याम्

त्रिचत्वारिंशाध्यायविवरणम् ॥ ४३ ॥ ४६ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

व्रजौकसो विरहिण्यो गोप्यः ॥ ४७ ॥

सक्रोधमाहुः । अक्रूर इति । अर्थं साधितवानिति सः ॥ ४८ ॥

कंसं घातयित्वा पुनः किमर्थमागत इत्याशङ्क्य कार्यं सम्भावन्ति । किमिति । तदा साधितेन कार्येण प्रीतस्य भर्तुः प्रेतस्येति पाठे मृतस्य कंसस्य निष्कृतिमौर्ध्वदेहिकम् अस्माभिः कृत्वा साधयिष्यते अस्मन्मांसैः पिण्डान् कृत्वा । दास्यतीत्यर्थः इति वदन्तीनां समीपमगात् ॥ ४६ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
षट्चत्वारिंशकोऽध्यायो दशमेऽजनि सङ्गतः ॥ ४६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

व्रजौकसो गोप्यः ॥ ४७ ॥

कंसस्य अर्थं साधितवानित्यर्थसाधनः पूर्वं यः कंसं जीवितरूपादर्थाद्वियोज्य लोकान्तरमर्थं तस्य साधितवान् स अक्रूर आगतः किम् ॥ ४८ ॥

पुनरागमने प्रयोजनं सम्भावयन्ति । किमिति । प्रेतस्य मृतस्य निष्कृतिमानृण्यम् अस्माभिः कृत्वा साधयिष्यते किम् अस्मन्मांसैः पिण्डान् कृत्वा दास्यति किमित्यर्थः । कृताह्निकः कृतस्नानादिनियमः अगात् आगतः ॥ ४६ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे

षट्चत्वारिंशाध्यायार्थप्रकाशः ॥ ४६ ॥

भाषा टीका ।

तदनन्तर सूर्य भगवान् के उदय होने पर ब्रजवासी अब नंद द्वार में आये तब सुवर्ण मय रथ को देखकर यह रथ किसका है ऐसा पूछने लगे ॥ ४७ ॥

भाषा टीका ।

गोपी बोलीं क्या फिर अक्रूर आया है क्या जो कि कंस के अर्थ के सिद्ध करने वाला है जो कि कमळ दल लोचन श्रीकृष्ण चंद्र को मधुपुरी को लेगया था ॥ ४८ ॥

अव मरे भये अपने स्वामि का हमसे क्या कार्य सिद्ध करेगा इस प्रकार से गोपनारियों के बोलते ही में उद्धवजी भी स्नान संध्यादि क्रिया कर के उहां आ गये ॥ ४९ ॥

इति श्रीभागवत दशमस्कंध पूर्वार्ध छियालीस में अध्याय की भाषा टीका समाप्त ॥ ४६ ॥

इति श्रीमद्भागवते दशमस्कन्धे पूर्वार्धे षट्चत्वारिंशोऽध्यायः ॥ ४६ ॥

॥ सप्तचत्वारिंशोऽध्यायः ॥

श्रीशुक उवाच ।

तं वीक्ष्य कृष्णानुचरं व्रजस्त्रियः प्रलम्बबाहुं नवकञ्जलोचनम् ।
पीताम्बरं पुष्करमालिनं लसन्मुखारविन्दं मणिमृष्टकुण्डलम् ॥ १ ॥
शुचिस्मिताः कोऽयमपीच्यदर्शनः कुतश्च कस्याच्युतवेषभूषणः ।
इति स्म सर्वाः परिवव्रुरुत्सुकास्तमुत्तमश्लोकपदाम्बुजाश्रयम् ॥ २ ॥
तं प्रश्रयेणावनताः सुसत्कृतं सव्रीडहासेक्षणसूनृतादिभिः ।
रहस्यपृच्छन्नुपविष्टमासने विज्ञाय संदेशहरं रमापतेः ॥ ३ ॥
जानीमस्त्वां यदुपतेः पार्षदं समुपागतम् ।
भर्त्रेह प्रेषितः पित्रोर्भवान् प्रियचिकीर्षया ॥ ४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

सप्तचत्वारिंशकेऽथ कृष्णादेशेन गोपिकाः ।
बोधयित्वोद्धवस्तत्त्वमनुज्ञाप्यागमत्पुरीम् ॥

॥ १ ॥

अपीच्यं सुन्दरं दर्शनं यस्य सः अच्युतस्येव वेषो भूषणानि च यस्य सः कोऽयं कुतो वा कस्य चेति वदन्त्यस्तं परिवव्रुः ॥ २ ॥ ३ ॥

पार्षदं सेवकम् ॥ ४ ॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी

कृष्णमनुचरति भक्तिविशेषेणात्रैव सारूप्यादिप्राप्त्यानुगच्छतीति तथा तं व्रजस्त्रियः सदा श्रीकृष्णरूपवेशादिध्यानगानपरा इति भावः । अतो वीक्ष्य साक्षाद्दूरतो दृष्ट्वैव शुचिस्मिताः परमविस्मयं प्राप्ताः प्रायः श्रीकृष्णसारूप्यात् तदेव दर्शयति । प्रलम्बेत्यादिना । तत्राद्येन पदद्वयेन रूपतः ततोऽन्येन तद्द्वयेन परीत्यनेन च भूषणतः लसत् सुन्दरस्मितादिना शोभमानं मुखारविन्दं यस्य तमिति शोभातः यद्वा लसदित्यत्रैव हेतुः परिमृष्टेति ॥ १ ॥

दृश्यत इति दर्शनं रूपम् अनेनानुक्तमपि श्रीकृष्णसदृशाकारवयोवर्णादिकं सङ्गृहीतम् अच्युतेत्यनेन च तत्सदृशमौक्तिकहारादि तत्र वेषः नटवरच्छन्दः किं वा अच्युतस्य वेषो भूषणमेव भूषणं यस्य तं त्वयोपयुक्तस्रग्गन्धवासोऽलङ्कारचर्चिता इतिन्यायेन तदीयवस्त्रादिधारणात् अत एवोत्सुकाः सम्भ्रान्ताः समुत्कण्ठिता वा सत्यः सर्वाः एकैकशः स्वस्वस्थानादागताः किं वा विरहार्त्या सर्वासामेवैकत्र स्थित्या युगपदागताः परितो वव्रुः आवृतवत्यः यतः उत्तमश्लोकः श्रीकृष्णस्तत्पदाम्बुजमेवाश्रयो यस्य तमित्येकान्तितया गुणेनापि तत्सादृश्यमुक्तं यद्वा उत्तमश्लोकपदाम्बुजयोः संवाहनाद्यर्थमुपधानवदाश्रयमिति सतताऽत्यन्तसमीपवर्तिता परमप्रियता चोक्ता वाक्यभेदात्तमित्यस्यापौनरुक्त्यम् ॥ २ ॥

व्रजस्त्रियः परिवारणानन्तरमेव प्रश्रयेण विनयेन अवनता नम्रशिरसः सत्यः तं रहसि एकान्ते आसने उपविष्टमुद्धवं रमापतेः संदेशहरमिङ्गितेन विज्ञाय सव्रीडहासेक्षणसूनृतादिभिः सुसत्कृतं यथा स्यात्तथापृच्छन् व्रीडा च लज्जाविशेषः तत्सहितो हासश्च दरहसितं तेन युक्तमीक्षणं च मनागवलोकनमिति अयं भगवत्सारूप्यदर्शनजातस्य श्रीभगवति भावविशेषस्य स्वभावादुद्भूतं सूनृतं च स्वागतं कुशलं च इत्यादिप्रियवाक्यं तेन आदिशब्दादासनपाद्यार्पणादिभिश्च अत एव सुष्ठु सत्कृतं पूजितमित्युद्धवविशेषणं वा भगवद्भावदर्शनेन तदीयसुखविधानात् रमापतेः लक्ष्मीकान्तस्येति प्रियजनपरिपालकत्वेनात्मन्यपेक्षा तस्य सम्भाविता यद्वा रहसि प्राप्त्या सन्देशहरत्वं विज्ञाय रहसि गमनादिना निर्धार्यापृच्छन् ॥ ३ ॥

सम्यक् राजरथारोहणादिना श्रीव्रजेश्वरान्तिके आगतं जानीम एवेति तद्विशेषप्रश्नाश्निालमिति भावः । यदुपतेरिति । तस्याधुना व्रजजनेषूपेक्षा युक्तेति भावः । जानीम इत्येव विवृण्वन्ति । भर्त्रेति । तत्परित्यक्तेऽपि व्रजेऽत्र तवागमनं भर्त्राज्ञया भृत्येनावश्यपाल्यत्वादिति भावः । ननु मत्प्रेषणादत्र तस्य परमापेक्षावगम्यतां तत्राहुः । पित्रोरिति । केवलं तयोर्द्वयोरेव ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

तामिति युग्मकम् । रहसीत्यस्य तृतीयपद्यस्थस्याप्यत्रान्वयः कार्यः । कोऽयमित्यादिना वितर्क्य जानीमस्त्वामिति स्वयमेव निर्णयात् आह्निकं कृत्वा व्रजमागतश्चेत्तदाभविष्यत्तर्हि लोकसङ्घट्टे तस्मिन् परम्परायाः सोऽयं महारथी व्यक्त एवाभविष्यदिति व्रजस्त्रिय इति व्रजेऽपि श्रेष्ठत्वेन याः प्रसिद्धा भगवत्प्रेयसीरूपाः स्त्रियस्ता इत्यर्थः । व्रजस्त्रियः कृष्णगृहीतमानसा इत्यादिष्वपि तथैव तत्प्रसङ्गे तच्छब्दप्रयोगात् । तमुद्धवं वीक्ष्य तञ्च कृष्णानुचरं वीक्ष्य तदाकारतया निभाल्य तत्र हेतुः प्रलम्बबाहुमित्यादिः । तत्र पुष्करमाला तु प्रस्थापनसमये श्रीभगवतैव स्वकण्ठात् प्रसादीकृतेति गम्यते व्रजेऽप्येतादृशतत्समानवेशरूप एव तदनुचरा इत्यनुमानात्तदनुचरत्वेन वितर्क्येत्यर्थः ॥ १ ॥

अतः सुविस्मिता अन्यत्रापि कथमेतादृशोऽस्तीति तदेतदाहुः। कोऽयमिति । शुचिस्मिता इति पाठे तस्य प्रसादायारोपितस्मिता इत्यर्थः । दृश्यत इति दर्शनं रूपं वेशो वस्त्रातिलककेशबन्धादिः । भूषणं कटककुण्डलादि । यद्वा । अच्युतस्य वेशभूषणे एव वेशभूषणे यस्य तं त्वयोपयुक्तस्रग्गन्धवासोऽलङ्कारचर्चिता इत्येतद्वाक्यानुसारात् तत्राप्यापाततोऽसङ्कोचे हेतुः उत्सुकाः कालाक्षमत्वेन विचारशून्याः पश्चादपि तत्र हेतुः उत्तमःश्लोकः श्रीकृष्णः तत्पादाम्बुजमेवाश्रयो यस्य तं यद्वा । उत्तमःश्लोकपदाम्बुजयोः सम्वाहनाद्यर्थमुपधानवदाश्रयं यस्य तथा तदारमीयतां निर्धार्येत्यर्थः ॥ २ ॥

ततश्च तामिति तमुद्धवं रहसि रमापतेः संदेशहरं विज्ञाय स्वयमेव पूजाङ्गत्वेन दत्ते आसने उपविष्टं सन्तं प्रश्रयेणावनताः सत्यः पुनः सव्रीडहासेक्षणसूनृतादिभिः सुसत्कृतं सन्तमपृच्छन्निति क्रमः कर्त्तव्यः अत्रासन इति सामीपिकार्थमेवाधिकरणं ज्ञेयं ताद्विधासु तस्य महाभक्तेरेव निर्णेयमानत्वात् ।यतः सैरन्ध्र्यादिषु तस्य तादृशता वर्णयिष्यत इति कैमुत्यलाभाच्च । प्रश्रयेणावनताः विनयनम्रशिरसः व्रीडो व्रीडा हासः प्रसादः ताभ्यां युक्तमीक्षणमवलोकनं सूनृतं च स्वागतं कुशलञ्च इत्यादि प्रियवाक्यं तदादिभिस्तत्पुरःसरासनपाद्यादिभिः सुसत्कृतमादृतं ततश्च रहसि विजातीयभावागोचरे तत्रासन उपविष्टं सन्तं तादृशरहःस्थलागमनोपवेशादिहेतो रमापतेः संदेशहरं विज्ञाय अस्मास्वपि कमपि संदेशमानीतवानयमिति निश्चित्यापृच्छन् रमापतेरिति जयति तेऽधिकं जन्मनेत्यनुसारात्तादृशतत्सम्पत्तिदर्शनेन जातस्य तासामेवाभिप्रायस्य प्रकटनमिति विशेष्य व्याख्येयम् ॥ ३ ॥

तथा निश्चयेऽपि दुःखेन स्वसम्बन्धमपलपन्त्य आहुः । जानीम इति । सम्यगेतादृशपरिच्छेदतया व्रजजनसमीपागतं त्वां यदुपतेः पार्षदं जानीमः ततस्तत्प्रश्नेनालमिति भावः । आगमने हेतुः भर्त्रा तेन निजस्वामिना प्रेषितः स्वयमनागत्य तव प्रेषणमनादेशेऽपि लौकिकतामात्रादिति तत्परित्यक्तेऽपि व्रजे तवागमनं भर्त्राज्ञया भृत्येनावश्यपालयत्वादिति भावः । यदुपतेरिति । स्वेषु तत्स्थानादरं हेतुव्यञ्जकं स्वेषां तस्मिन्नयोग्यत्वं व्यञ्जयति । अतस्तञ्च भर्त्रेति च सौदासीन्यं वचनं प्रयोजनन्तु किञ्चिदेकमेव जानीम इति तथैवाहुः । पित्रोरिति । तथापि न स्वप्रेम्णेति भावः॥ ४॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

॥ १—५ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तमिति । कृष्णस्यानुचरं भृत्यं प्रलम्बावाजानुलम्बितौ बाहू यस्य नवकञ्जे विकसितपद्मदले इव लोचने यस्य पीते पिशङ्गे अम्बरे यस्य पुष्कराणां पद्मानां मालास्यास्तीति तथा व्रीह्यादित्वान्मत्वर्थीय इनिः मुख मरविन्दमिव मुखारविन्दम् उपमितं व्याघ्रादिभिरिति समासः लसन्मुखारविन्दं यस्य परिमृष्टे निर्मलीकृते कुण्डले यस्य तमुद्धवं वीक्ष्य व्रजस्त्रियः सर्वा उत्सुकाः सत्यः उत्तमश्लोकस्य पदाम्बुजमेवाश्रयो यस्य तमुद्धवं परिवव्रुः परिवेष्टितवत्यः ॥ १ ॥

किं कुर्वत्यः अपीच्यं सुन्दरं दर्शनं यस्य अच्युतस्येव वेषो भूषणानि च यस्य सः कोऽयं कुतो वा कस्य वेति वदन्त्य इति शेषः । स्मेति विस्मये ॥ २ ॥

तमिति । सव्रीडेन हासेनेक्षणेन सूनृतेन मधुरभाषणेनादिशब्देनार्घ्यादिभिश्च तं रहस्येकान्ते आसने उपविष्टं तं रमापतेः श्रीकृष्णस्य संदेशहरं वार्त्ताहर्तारं विज्ञाय ज्ञात्वाऽवनता नम्राः प्रणता इति यावत् प्रश्रयेण विनयेनापृच्छन् पप्रच्छुः ॥ ३ ॥

प्रश्नमेवाह । जानीम इति । त्वां यदुपतेर्भगवतः पार्षदं भृत्यमत्र समवस्थितं समागतं जानीमः किमर्थं समुपस्थितोऽहमित्यत्राहुः । भर्त्रेति । भर्त्रा यदुपतिना पित्रोर्नन्दयशोदयोः प्रियं कर्तुमिच्छयाऽत्र भवान् प्रेषितः ॥ ४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

गोपस्त्रीणां व्यामोहोक्तिभङ्ग्यापि श्रीकृष्णैकभक्तिं निरूपयत्यस्मिन्नध्याये तत्र गोपीनामुद्धवसंदर्शनात् हृष्टमनसां तत्त्वप्रश्नप्रकारं वक्तुमाह । तं वीक्ष्येति । परिमृष्टकुण्डलं शाणोल्लीढवत् द्योतमानकर्णाभरणम् ॥ १ ॥

अतीव प्रशस्ततमं दर्शनमवलोकनं यस्य स तथा अयमिति सामान्यप्रश्नः कुतो देशादागत इति च विशेषप्रश्नः अच्युतस्येव वेषभूषणानि यस्य स तथा वैष्णवलक्षणेनेतरव्यावृत्तोऽसौ कः वैष्णवेषु किन्नामधेय इति ततोऽपि विशेषप्रश्न इति मिथोऽनुव्रज्य सामान्यतोऽस्मत्प्रेष्ठ इति स्मृत्वा तं परिवव्रुः आवेष्टितवत्य इत्यन्वयः ॥ २ ॥

पुनस्ताभिः किङ्कृतमत्राह । तामिति । अनेन सामान्यज्ञानं विशिष्टज्ञानपर्यवसायीति निर्णायि प्रश्रयेणोपचारेण प्रियं सत्यञ्च सूनृतमिति च ॥ ३ ॥

पार्षदार्थं पार्षदानां समीपवर्तिनां भृत्यानां श्रेष्ठं तैः पूज्यस्वा अनुव्रतं भगवन्मनोऽनुकूलव्रतम् ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

व्रजास्त्रिय इति। व्रजेऽपि श्रेष्ठत्वेन याः प्रसिद्धा भगवत्प्रेयसीरूपाः स्त्रियस्ता इत्यर्थः ॥ १ ॥ २ ॥

सव्रीडहासेति। व्रीडो व्रीडा हासः प्रसादस्ताभ्यां युक्तमीक्षणं रहसि विजातीयभावागोचरे देशे रमापतेरिति जयति तेऽधिकं जन्मना व्रजः श्रयत इन्दिरा शश्वदत्र हि इत्यनुसारात्तादृशतत्सम्पत्तिदर्शनेन जातस्य तासामेवाभिप्रायस्य प्रकटनम् ॥ ३ ॥

पित्रोरिति तत्रापि न स्वप्रेरणेति भावः ॥ ४ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी।

चतुश्चत्वारिंशेऽध्याये गोपीनां ज्ञानदेशतः।
निरोधं सम्यगेवाह पूर्वस्माच्च विशेषतः ॥
याते कृष्णे लोकरीत्या नैकधा भावतः स्फुटम्।
न निरुद्धा इति प्रायः सर्वेषां च भवेन्मतिः ॥
सेवकेनोपदेशेन प्रीत्या चैव निरोधतः।
ज्ञानेनापि निरुद्धास्ता आत्मत्वेनैव सर्वथा ॥
वस्तुनिश्चयनं पूर्वमुपालम्भस्तथैव च।
व्याजोक्ता दोषगणना त्रिदोषो वण्यते पुरा ॥
अन्यथा ज्ञानसंदेशो व्यर्थः स्यादिति निश्चयः।
बीजं भक्तिस्ततः स्तोत्रमुपदेशस्तथैव च ॥
ततो दोषनिवृत्त्या च पूर्वस्नेहो निरूप्यते।
ज्ञानस्य च फलं चैव कृतार्थत्वं ततस्तथा ॥
सप्तधा विनिरुद्धास्ता गुणैर्भगवतापि च।

तत्र प्रथममुपालम्भ्यत्वेन उद्धव इति निर्द्धारं कृतवत्य इत्याह। तं वीक्ष्येति त्रिभिः। "आकृतिर्निश्चयश्चैव चेष्टया तु विशेषतः। स्वार्थमेव ततो ज्ञात्वा मानाद्दोषद्वयं ततः। तत्र प्रथमं मानार्थं भगवत्सारूप्यमुद्धवे गोपिकाभिर्दृष्टं वर्णयति। तमुद्धवम् आकृत्या कृष्णानुचरोऽयमिति वीक्ष्य अथवा न हि महतां चेतः अधर्मे पततीतिवत् तस्य दर्शने कामं वारयितुं कृष्णानुचरमित्युक्तं वस्तुत एव भगवतः अनुचरः तथापि महान्तं भूषितं दृष्ट्वा लज्जिता भवन्ति स्त्रियः, कथमयं पृष्ट इत्याशङ्क्याह। व्रजस्त्रिय इति। नागरीणामयं स्वभावो नान्यासां भगवत्सारूप्यत्वाय वर्णयति। प्रलम्बबाहुमित्यादिषड्भिः पदैः भगवत्त्वाय स्त्रीणां हि कामप्राधान्यात्तदुपयोगिषड्गुणा वक्तव्याः प्रकर्षेण लम्बौ बाहू यस्य स्मारकत्वेनास्यावयवा उपयुज्यन्ते क्रियाशक्तिः परिरम्भोपयोगश्च सूचितः नच कमलवल्लोचने यस्येति सर्वतापहारिका ज्ञानशक्तिः कामोद्बोधिका च निरूपिता एवं क्रियाज्ञानशक्ती निरूप्य मायाशक्तिं निरूपयति। अनावृते रसो न भवतीति पीतमम्बरं यस्य सवर्णो नीले अधिकां शोभामुत्पादयति सर्वत्रैव तद्वर्णनं पुष्करमालिनं कमलमालायुक्तं कीर्तिमत्त्वमुक्तं लसत् मुखारविन्दं यस्य श्रीर्निरूपिता मणिभिर्मृष्टे उज्ज्वले कुण्डले यस्येति वैराग्यमिव शास्त्रीयकान्तिः सर्वाभरणकृता निरूपिता ॥ १ ॥

एवं स्वरूपं वर्णयित्वा भगवत्सेवकोऽयमिति ज्ञातवत्य इत्याह। शुचिस्मितमिति। शुद्धं व्याजलोभाद्यनुपहतं स्मितं यस्य नैतादृशो गोकुले दृष्टः अक्रूरो वा अतः कोऽयमिति जिज्ञासा स्वयं मध्य एव कश्चिदुत्प्रेक्षकश्चेत् महान् भवेत् स वदत्विति कथयन्त्य इवाहुः किञ्च विरुद्धोऽस्मिन् धर्मो दृश्यते स्वरूपतोऽयं निष्कामः एतस्य च दर्शनमपीच्छं स्त्रीणां प्रियम् अतो विरुद्धधर्माश्रयत्वात् भगवदीयो भवितुमर्हति किं च न केवलमाकृतिस्वभावावेव भगवतः किन्तु वेशः पीताम्बरादिभूषणानि च भगवत एव कृतश्चेति उपमायां तु नाश्चर्यं स्वाभरणानि परिधाप्य किं भगवान् अहोस्वित् तद्रसाभिनयार्थं नटवत् समागतः अहोस्विद्भगवानेव रूपान्तरं कृत्वा समागत इति बहूनां विद्यमानत्वात् कुत इति विशेषजिज्ञासा युक्ता किं च कस्यायं पुत्रः पौत्रो वा सम्बन्धज्ञाने हि विशेषप्रीतिर्भवतीति जिज्ञासार्थमेव स्मेति प्रसिद्धे सर्वा एव परिवव्रुः ननु तासां किम्प्रयोजनं तत्राह। उत्सुका इति। औत्सुक्यस्वभावादेव कृष्णस्मारक इति कृष्णौत्सुक्या च तम्परितो वेष्टयामासुः ननु भगवत्स्त्रियस्ता रक्षिताः रक्षकाश्च कालादयः ततो रक्षकेषु विद्यमानेषु कथं गता इत्याह। उत्तमश्लोकस्य पदाम्बुजमेवाश्रित्य तिष्ठतीति भगवच्चरणसेवकः भक्तिमार्गानुसारी तत्रापि शास्त्रीय इत्यर्थः ॥ २ ॥

एवं निष्प्रत्यूहं संदिग्धा एव तं वेष्टितवत्यः ततो विशेषज्ञानं जातमित्याह। तं प्रश्रयेणेति। तमुद्धवं महान्तं दृष्ट्वा प्रश्रयेणावनता नम्रा जाताः ततः सुष्ठु आसनादिना सत्कारमपि कृतवत्यः पूर्वमेव वा वस्त्राभरणादिभिः सुसत्कृतः ततो भर्तृसम्बन्धिसेवकोऽयमिति ज्ञात्वा व्रीडा काम एवोद्दश्य इति ज्ञापयितुं हासः सत्कारे अन्या दृष्टिः क्रूरा रूक्षा वा भवतीति हास्यपूर्वकं निरूपितं सूनृतानि उत्तमवचनानि कुशलप्रश्नरूपाणि आदिशब्देन आसनपुष्पाद्युपचारान् एकान्ते यत्र नन्दादीनां न दृष्टिः रसार्थमेतत् सव्रीडादिभिः सहिता वा आसने उपविष्टमव्याकुलं तत्सत्कृतिग्रहणेन ज्ञातवत्यः अयमस्मदर्थमेव समागतः अन्यथा नास्माकमुपचारं गृह्णीयात् नापि सह तिष्ठेत् निष्कामश्चायम् अतः भगवत एवायं संदेशहारकः तच्छोकारणार्थं समागत इति रमापतिवचनं साम्प्रतं रमया सह तिष्ठतीत्यस्मदुपेक्षा इति क्यमप्रयोजिका इति केवलं मनोऽनुरञ्जनार्थं प्रेषितवानिति तासां मानमुत्पादयति ॥ ३ ॥

अनेनैको दोषो निरूपितः तेन द्वितीयोत्पत्तिमाह। जानीम इति सप्तभिः। स गोपिकार्थमागतोऽहमिति मन्यत इति बुद्ध्वा तदन्यथा कर्तुमन्यथा गमनं निरूपयन्ति अन्यथोपकारस्वीकारे उपालम्भो न घटेतेति बीजमेतत् तस्य च समर्थनमनन्यनिषेधनपूर्वकं स्वसम्बन्धस्य पूर्वसिद्धस्य औपाधिकत्वेन स्वार्थपरसाधनम् अन्यथोभयोरपि समानत्वात्को वा उपालम्भ्यः स्यात् ततो दृष्टान्तौ कृतघ्नतासमर्थनम् एवं पञ्चभिर्दोषं समर्थयित्वा तस्य साध्यत्वज्ञापनाय तासां देहादिस्मरणाभावमुपपादयति ततोऽपि सुसाध्यत्वाय भगवदासक्तिसाध्यो रोगः प्रतिष्ठितो भवति ततोऽग्रिमारम्भः स महादोष इति कस्याश्चिदेव तामसतामस्या वर्णितः आदौ तस्यागमनमन्यथा कथयन्ति तत्र ज्ञात्वा अन्यथा करणं युक्तमिति ज्ञानमाहुः। त्वां यदुपतेः पार्षदं जानीम इति। पूर्वं गोपिकापतिरधुना यदुपतिरिति नास्मदुपकारं करिष्यतीति भावः। तस्य च पार्षदः सभापतिरतिचतुरः अनेन त्वद्वाक्यमपि नादरणीयमिति सूचितं समुपागतमिति सम्यगुप-

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

समीपे समागतं तत्रापि सर्वतः कुशलं तत्रापि अन्यथा उपेक्षादोषायापि न भवेत् एवं भगवन्तमन्यथा कल्पयित्वा स्वयमेवैताः कदाचिन्नष्टा जाता इति शङ्का स्यात् तद्व्यावृत्त्यर्थं भर्त्रेत्याहुः । प्रसङ्गादागतत्वं न वदन्ति सर्वथा मिथ्या भविष्यतीति इहैव गोकुले प्रेषितः प्रयोजनमाहुः । पित्रोः प्रियचिकीर्षयेति । ये हि सत्तामात्रेण सुखिता भवन्ति ऐश्वर्याद्युत्कर्षेण च अतः कुशलमैश्वर्यं च ज्ञापयितुं भवान् प्रेषितः अनलंकृते साधारणे प्रेषिते ऐश्वर्ये संदेहः स्यात् अस्माकं तु न तावता सुखमिति त्वदागमनसाधनमिति अस्मदर्थं न प्रेषितवानेव ॥ ४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

सप्तचत्वारिंशकेऽस्मिन् चित्रजल्पान् दशोद्धवः ।
आकर्ण्य प्रोच्य संदेशान् गोपीः स्तुत्वा पुरीं ययौ ॥

शुचि शुद्धं स्मितं यासामिति कृष्णस्मारकवेषदर्शनोत्थेन हर्षेण स्मितं सुविस्मिता इति पाठे कृष्णस्यैव पीतोत्तरीयमिदं तदङ्गोत्तीर्णमेव कमलमाल्यञ्च कथमनेन प्राप्तमिति विस्मयः अपीच्यं सुन्दरं दर्शनं यस्य सः कोऽयङ्कुतः कस्य वा मनुष्य इति वदन्त्यः कृष्णवृत्तान्तप्राप्तिसम्भावनया उत्सुकाः ॥ १ ॥ २ ॥

प्रश्रयेणावनता विनयनम्रशिरसः व्रीडा स्त्रीयस्वभावोत्था मूर्द्धादेरीषद्वस्त्रावरणलक्षणा लज्जा सा ह्यादरणीयजनसामान्यदर्शने सहसैव भवेत् हासः स्वप्रियदास एवायमिति निश्चयेन मुखप्रसादः ताभ्यां युक्तमीक्षणं सम्पूर्णावलोकनं सूनृतं स्वागतं कुशलमित्यादि प्रियवाक्यम् आदिशब्दात् यथा समयं यथोपस्थितं च पाद्यादिकमातिथ्यं तैः सुसत्कृतमादृतं रहसि विजातीयजनागोचरे स्थले अपृच्छन् तादृशस्थले सहसैवागमनेन तं रहः संदेशहरं विज्ञाय रमापतेरिति गोपीपक्षपातिनः शुकस्यासूयाद्योतनं सम्प्रति मथुरायां स्पष्टमेव परमेश्वरं तं सुखयितुं रमा एवागमिष्यति किमेतासु संदेशप्रेषणदम्भेनेत्याकारकम् ॥ ३ ॥

जानीम इत्यत एवालं प्रश्नेनेति भावः । यदुपतेरिति स्वगोपजातिरपि सम्प्रति यदूनां पतिरभूदिति बृहत्पदप्राप्तस्य स्वयंकथमत्राजिगमिषा सम्भवेदिति भावः । अत एव भवान् प्रेषितः पित्रोः प्रियचिकीर्षया ननु स्वेषां तेन यशोदानन्दाभ्यां पितृभ्यां गोपजातिव्यञ्जकाभ्यां तस्य किं प्रयोजनमिति भावः । नन्दयशोदे कदाचित् म्रियेते कृष्णो मथुरायां राज्यं करोतीति लोकनिन्दा भयादेव त्वं प्रेषित इति मन्यामहे किन्तु भोश्चतुरवर्य्य ! तेन सुबुद्धिशेखरेण प्रेषितः पित्रोः प्रियचिकीर्षया त्वं चात्रायातोऽतः प्रयाहि यशोदानन्दयोः समीपं तौ हि त्वा प्राप्यानन्देन कृष्णं तं विस्मरिष्यते इति धन्यैव तस्य विवेकतीक्ष्णतेत्याद्याः बहव एव व्याजस्तुतिमयात्पन्नतिरस्कृतवाच्यध्वनेः पल्लवाः ॥ ४ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

रमाकान्तमखण्डेन्द्रवन्द्यमानपदाम्बुजम् ।
वन्दे प्रेमभराक्रान्तस्वान्ताश्च व्रजयोषितः ॥

सप्तचत्वारिंशकेऽथ गोपिकानां निरूप्यते ।
उद्धवभ्रमराभ्यां तु संवादः श्रोतृमोदद: ॥

अथ सूर्योदयानन्तरं स्वस्वगृहाद्बहिर्निःसृत्य शातकौम्भं रथं व्रजद्वारि स्थितमवलोक्य कस्यायं रथ इति ब्रुवन्त्यः स्थितास्ततो यमुनायां स्नात्वा समायान्तमुद्धवं दृष्ट्वा कोऽयमित्यादि वदन्त्यस्तत्सन्निधौ गत्वा तं परिवव्रुरित्याह । तमिति । ननु स्त्रीणामेवंविधं पुरुषं दृष्ट्वा लज्जया एकान्त स्वस्थानगमनमुचितमित्याशङ्क्याह । व्रजस्त्रियः नगरस्त्रीणामयं स्वभावो न तु ग्राम्यस्त्रीणामिति भावः । ननु तथापि तासां भयात्ततः पलायनं साम्प्रतमित्यत आह । कृष्णानुचरं व्रजाधीशकृष्णसखीनां कृष्णानुचरत्वाद्वा न भयसम्भावनेति भावः । ननु तथाविधानां तासां यः कश्चित्तदनुचरोऽपि नानुसरणीय इत्याशङ्क्याह । प्रलंबेत्यादि । प्रकर्षेणालम्बौ बाहू यस्य नवीनपद्मवल्लोचने यस्य पीतमम्बरं यस्य कमलग्रथिता माला विद्यते अस्य लसत् स्फुरत् मुखपद्मं यस्य मणिभिर्मृष्टे उज्ज्वले कुण्डले यस्य तथा च स्वस्वाम्यनुग्रहपात्रतया तद्दत्तवस्त्रभूषणादिधारी तदनुचरस्तदीयैरत्यर्थमादरणीयः अयं तु तदवयवसमानावयवधार्यप्रीति परममहान् भवतीत्यतोऽस्यानुसरणे नास्ति कश्चिद्दोष इत्याशयः प्रियविरहव्याकुलमनुभ्रान्तेन यत्किञ्चित्सादृश्यवानप्यादरणीयो भवति अयं त्ववयववस्त्रभूषणैः प्रियसदृशत्वात् तत्तत्प्रियावयवजनिततत्सुखस्मारकतया परमादरविषय इत्यपि ध्वनितम् ॥ १ ॥

तद्दर्शनेन तासां महान् सम्भ्रमो जात इत्याह । शुचीति । अपीच्यं सुन्दरमवयवदर्शनं यस्य अच्युतवत् वेषः पीताम्बरादिभूषणानि कुण्डलादीनि यस्येति पूर्वश्लोकोक्तविशेषणविशिष्टत्वेन दृष्टस्यानुवादः तथाचैवंविधस्य गोकुले अदृष्टचरत्वात् अक्रूरस्य चातादृशत्वात् कोऽयमिति जिज्ञासा चतुरशिरोमणिः काचिदस्ति चेन्निश्चित्य वदत्वित्यभिप्रायः नन्वपीच्यदर्शने पीतपटाद्यलङ्कृते दामोदरे आसक्तचित्ता व्रजाङ्गनास्तथाभूते मय्यप्यासक्ता भविष्यन्तीति दुराशया तादृशविग्रहवेषादिकं विधाय कश्चित्कामुकोऽयं समागत किं वा प्रियतुल्यविग्रहादिमन्तं मां दृष्ट्वा गोपिका बहुधनं दास्यन्तीत्याशया तत्सदृशो भूत्वा कश्चिल्लुब्धोऽयमागत इत्याशङ्क्याहुः । शुचि कामलोभादिदोषविनिर्मुक्तं शुद्धं स्मितं यस्य तथा च परमसज्जनत्वात् नायमुक्ततर्कगोचर इति भावः । अत एवंभूतोऽयं कः किंजातीयः किन्नामधेयः किं च कुतः कस्माद्देशादयमागतः किस्वाकारादिसदृशाकारादिकमेनं विधायास्मत्प्रियेणैवायं प्रेषितत्वात्तत्सकाशादागतः किं स्वत एव स्वगृहादागतः किञ्च कस्यायं पुत्रः पौत्रो वा विशिष्टसंबन्धं ज्ञात्वा प्रीत्यतिशयस्य विधीयमानत्वात्तत्संबन्धज्ञानमप्युचितमिति भावः । इति संशयव्याकुलमानसास्तन्निरासार्थमुत्सुकाः प्रियसादृश्यदर्शनेन तदीय एवायं कदाचित्स्यादिति तन्निश्चये उत्कण्ठितचित्ताः सर्वाः व्रजस्त्रियस्तं सर्वतो वेष्टयामासुः उत्सुकानामप्येवंविधसंशयाक्रान्तचेतसां दूतीद्वारा निर्णयं कृत्वा तत्सन्निधौ गत्वा तत्परिवेष्टनमुचितमित्याशङ्क्याहोत्तमेति उत्तमः श्लोको यस्य तत् भगवतः पादकमलमेवाश्रयो यस्य तं तथा च भगवत्पादपद्माश्रयणस्य सर्वाकर्षणकारणस्य तस्मिन्वर्तमानत्वात्तदङ्घ्रिसरोरुहाश्रयाणां तदीयानां लवमात्रविलम्बसहनाक्षमाणां तासामाकर्षणे को विस्मय इति भावः ॥ २ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

अथ परिवेष्टनानन्तरं स्वबुद्ध्यैव तं प्रियसंदेशहरं ज्ञात्वा सत्कृत्य पप्रच्छुरित्याह । तमिति । प्रियदूतत्वात्सव्रीडहासादिभिरयं सत्कारार्ह इति तैः सुसत्कृतं सव्रीडहासपूर्वकमीक्षणं सूनृतानि प्रियवचनानि कुशलप्रश्नाद्यात्मकानि आदिपदेनासनपुष्पाद्युपचारसंग्रहः तैः सुसत्कृतं क स्थितामित्यपेक्षायामाह । रहसि एकान्ते रसाविर्भावाय नन्दादिपुरुषमात्रदृष्ट्यगोचरे स्थाने सम्यग्वस्त्रादिभिर्निर्मिते कोमले आसने उपविष्टम् अव्याकुलतया स्वसन्निधौ निषण्णं तमुद्धवं प्रश्रयेण प्रेम्णा नम्राः सत्यः अपृच्छन् निष्कामस्यास्यास्मत्कृतसत्कृतिग्रहणमस्माभिः सहावस्थानं चास्मदर्थमेवातोऽयं प्रश्रयेण नम्रीभूय प्रष्टव्य इति भावः ननु प्रियसन्देशहारक इति किमिति ज्ञातवत्यः नत्वस्मदाकारणार्थमागत इत्यत उक्तं रमापतेरिति । इदानीं रमया लक्ष्म्या रमाभिः रामाभिर्नागरस्त्रीभिश्च सह वर्तमानस्य तस्यास्मदपेक्षाराहितत्वादप्रयोजिकानामस्माकमाकारणं न घटते किं तु मद्विरहव्याकुलचित्तानां मरणं भवेच्चेत्तर्हि मम पापं स्यादिति तद्भयेनास्मदनुरञ्जनहेतुसंदेशनार्थमेवायं प्रेषित इति ज्ञातवत्य इत्यर्थः ॥ ३ ॥

तं प्रियसंदेशहरं विज्ञाय स्वस्य उपेक्षणीयत्वमनुमाय प्रणयकोपाक्रान्तस्वान्तास्तदागमनमन्यथा वर्णयन्ति । जानीम इति । यदुपतेः पार्षदं न तु गोपिकापतेः तथा च त्यक्तगोपिकापतिभावस्य स्वीकृतयदुपतित्वस्यास्मदुपकाराय प्रवृत्तिरतिदुर्लभेति भावः । तस्य पार्षदः सभानायकोऽतिचतुरस्त्वमपि यथा राजा तथा प्रजेति न्यायात् तथाच वृथा सान्त्वनकुशलोऽविश्वास्यवचनोऽसीति भावः । एवम्भूतं त्वां सम्यगुप समीपे आगतं जानीमः तव समीचीनवस्त्रेणास्मत्समीपागमनेन च प्रियस्य तत्रत्यानां तदीयानां तव च कुशलमित्यपि विद्मः ननु पराधीनस्य ममात्रागमनं भवतीभिः कथं ज्ञातमिति चेत् तत्राहुः । भर्त्रेह भवान् प्रेषितः । ननु भवतीभिरेव तस्मिन् स्वपतित्वं त्यक्तम् अस्मत्पतेरिति वक्तव्ये यदुपतेरिति विशेषणदानात् स तु स्वात्मानं गोपिकापतिमेव मन्यते इत्याशङ्कानिवृत्त्यर्थं भर्त्रेति पदं तेनैवास्मद्भर्तृत्वं विहाय यदुपतित्वमुररीकृतं न त्वस्माभिस्तत्त्यक्तं यथा पूर्वमेव स्थानादिति भावः । यदुपतित्वमस्मद्भर्तृत्वं च तस्यैव विरुद्धमुत्कृष्टजातिनिविष्टत्वात् न त्वस्माकं निकृष्टत्वादित्यप्यनेन ध्वनितम् । अन्यत्र कांचित्प्रेषितः प्रसङ्गादिह समागत इति सर्वथान्यथाकरणस्य मिथ्याभाषणे पर्यवसानमभिप्रेत्येहेत्युक्तम् नन्विह प्रेषणं जानतीनां तदुपरि दोषारोपणमनुचितं परमप्रियाणां भवतीनां प्रियसम्पादनस्यैवात्र मत्प्रेषणप्रयोजनत्वादित्याशङ्क्याहुः । पित्रोरिति । नन्दयशोदयोः प्रियचिकीर्षया नत्वस्माकं पित्रोर्हि पुत्रास्तित्वतदैश्वर्यश्रवणेनापि सुखं भवतीति तत्सुखार्थम् अलङ्कृतत्वात्तदैश्वर्यकुशलताबोधको भवान् प्रेषितः नत्वस्मत्सुखार्थं तावता सुखासिद्धेरित्याशयेन भवानित्युक्तम् अस्मत्प्रियचिकीर्षा तस्य स्याच्चेत्तदालङ्कृतां कांचिद्दूतीं प्रेषयेन्नतु राजकार्यकुशलं दूतं भवन्तमित्यपि ध्वनितम् ॥ ४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

सप्तचत्वारिंशे गोपीनां भगवति प्रेमातिशयं भगवत्सन्देशेन तत्सान्त्वनं पुरीं प्रत्युद्धवागमनञ्चेति वर्णयति । तमिति । तमुद्धवं वीक्ष्य लसत् शोभमानं मुखारविन्दं यस्य तं परिमृष्टे उज्ज्वलीकृते कुण्डले यस्य तम् ॥ १ ॥

शुचि परदोषादिनिमित्तवर्जितं स्मितं यस्य तम् अपीच्यं सुन्दरं दर्शनं यस्य तम् अच्युतस्यैव वेषो भूषणानि च यस्य तं कोऽयं कुतो वा कस्य वेति परस्परं वदन्त्यः सर्वाः गोप्यस्तं परिवव्रुः आवेष्टितवत्यः ॥ २ ॥

तं रमापतेः सन्देशहरं विज्ञाय अवनताः नम्राः प्रश्रयेण विनयेन सव्रीडहासादिभिश्चोपलक्षिताः सुसत्कृतं रहस्येकान्ते उपविष्टम् अपृच्छन् ॥ ३ ॥

जानीम इत्यादीनि वाक्यानि याः श्रीकृष्णं केवलं कान्तं विदुस्तासाम् । पार्षदं सेवकम् भर्त्रा स्वामिना ॥ ४ ॥

भाषा टीका ।

श्रीशुकदेवजी बोले ब्रजस्त्रियोंने उद्धवजी को देखा कि ये श्रीकृष्ण के अनुचर हैं लंबे उनके भुजा हैं नये कमल सरीके उनके नेत्र हैं पीतांवर को पहरे हैं कमलों की माळा पहरे हैं मुखारविंद उनका अति शोभित है और मणिके अत्यंत उज्ज्वल कुंडलों से शोभित हैं ॥ १ ॥

तव उत्तम श्लोक भगवान् के चरण कमलके आश्रय करने वाले उन उद्धवजी को देखकर गोपी कहने लगी यह कौनहै जिसकी मनोहर हास है यह सुंदर रूप वाला है श्याम सुंदर के से इसके वेष और भूषण हैं यह किस का पुरुष है कहां से आया है ऐसा कहकर वडी उत्कंठा वाली होकर चारों तरफ से उद्धवजी को घेर लेती भई ॥ २ ॥

गोपीजनों ने जब जाना कि ए श्रीकृष्ण के संदेशा कहने वाले हैं तव उनको एकांत में लेगईं उत्तम आसन में बैठा दिया फिर वडे आदर के साथ लज्जा हास सहित दृष्टि मीठे वचन आदिकों से उनका सत्कार करके प्रेम से नम्र होकर पूछने लगीं ॥ ३ ॥

गोपी बोलीं हम तुमको जानती हैं कि तुम यदुपति कृष्ण के पार्षद हो इहां आये हो तुमारे स्वामीने तुम को इहां पर पिता माता के प्रसन्न करने को भेजा है ॥ ४ ॥

अन्यथा गोव्रजे तस्य स्मरणीयं न चक्ष्महे ।
स्नेहानुबन्धो बन्धूनां मुनेरपि सुदुस्त्यजः ॥ ५ ॥
अन्येष्वर्थकृता मैत्री यावदर्थविडम्बनम् ।
पुंभिः स्त्रीषु कृता यद्वत् सुमनस्स्विव षट्पदैः ॥ ६ ॥
निःस्वं त्यजन्ति गणिका अकल्पं नृपतिं प्रजाः ।
अधीतविद्या आचार्यमृत्विजो दत्तदक्षिणम् ॥ ७ ॥
खगा वीतफलं वृक्षं भुक्त्वा चातिथयो गृहम् ।
दग्धं मृगास्तथाऽरण्यं जारा भुक्त्वा रतां स्त्रियम् ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

पित्रोः प्रियचिकीर्षयेत्यत्र हेतुः स्नेहानुबन्ध इति ॥ ५ ॥

अन्यथा गोव्रजे तस्येत्यत्र हेतुः । अन्येष्विति । अर्थकृता कार्यनिमित्ता विडम्बनमनुकरणमात्रं नतु तात्त्विकी मैत्री पुंभिरिति दृष्टान्तौ ॥ ६ ॥

अस्यैवान्यार्थनिदर्शनैः प्रपञ्चः । निःस्वमित्यादिना । दत्ता दक्षिणा येन तं याज्यम् ॥ ७ ॥

पक्षिणो विगतफलं वृक्षम् रतामनुरक्तामतृप्तामित्यर्थः ॥ ८ ॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी

अन्यथा तौ विना गवां व्रज इति परदैन्येनात्मनो गोसादृश्यमननात् स्मरणीयं जनं किञ्चिद्वा न पश्यामः बन्धूनां बन्धुषु स्नेहस्य अनुबन्धप्रवृत्तिर्मुनेरात्मारामस्यापि किं पुनरैश्वर्य्याद्यपेक्षस्य तस्य ॥ ५ ॥

अन्येषु बन्धुव्यतिरिक्तेषु मैत्री स्नेहः अन्यत्तैर्व्याख्यातं यद्वा यद्यपि मुनेरपि सुदुस्त्यजस्तथापि न चक्ष्महे प्रियव्यतिरिक्तानां तस्य बन्धूनामत्राभावात् । ननु अबन्धुष्वपि स्नेहो दृश्यते सत्यं स त्वौपाधिको ऽस्थिर इत्याहुः । अन्येष्विति । सा ह्यर्थे सिद्धे पश्चाद्भिवानुवर्तत इत्याहुः । यावदर्थं निजप्रयोजनसाधनपर्य्यन्तमेवेति अत एव विडम्बनं कदाचित् कस्य चित्पुंसः कस्यांचित् स्त्रियां सह दृढमैत्रीदृष्ट्या दृष्टान्तान्तरं सुमनःस्विति श्लेषेण शोभनचित्तेष्विति न तेषां तत्र दोषः किन्तु चाञ्चल्यात् षट्पदानामिवेति भावः ॥ ६ ॥

निःस्वं पूर्वं धनवन्तमपि पश्चाद्व्ययादिना निर्द्धनं सन्तम् एवमग्रेऽप्यूह्यम् अकल्पं पालनासमर्थम् ऋत्विजो याजकाः ॥ ७ ॥

खगाः खे भ्रमन्तः फलानि दृष्ट्वा तदर्थमागताः अतिथयः निमन्त्रणेन क्षुधादिना वा भोजनार्थमेवागताः तथेति समुच्चये अतो नवतृणाद्यर्थमागता इति समवज्ञेयाः जारा इत्यत्यन्तदैन्यतात्मादृदृशसम्भवेऽपि सामान्येनैवोक्तं नत्वात्मोद्देशेनेति ज्ञेयं प्रेमविशेषेण तदेकपरत्वादिना तासु तस्य केवलप्राकृतजारत्वाभावात् । एवं क्रमेण धनपालनाध्ययनपूजाश्रयणभोजनोपजीवनरतयोऽष्टौ प्रायो लोकानामपेक्ष्यार्था उक्ताः ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

अन्यथा तौ विना तु तस्य यदुपतेर्गोव्रजे तन्मात्रधनगोपावासे स्मरणयोग्यमपि न पश्यामः किमुत स्मरणपथगतमित्यर्थः । यत्तु तयोरपि स्मरणं तदपि तयोरेव स्नेहस्य गुणो नतु तस्येत्याहुः । स्नेहेति । बन्धूनामिति बन्धुषु पित्रादिषु स्नेहानुबन्धः स मुनेः सन्न्यासिनोऽपि दुस्त्यजः कृच्छ्रेणैव विस्मर्तुं शक्यते नतु सहसा त्यक्तुमिति ततोऽपि काठिन्यमित्यर्थः ॥ ५ ॥

अन्येषु मैत्री अर्थकृता प्रार्थनीयपदार्थोपाधिका नतु बन्धुष्विव स्वाभाविकीत्यर्थः । सा च यावदर्थविडम्बनं यावन्तस्तेऽर्थास्तावदेव तस्या मैत्र्या अनुकरणमात्रम् । अस्मासु तु न काचिद्बन्धुता मिथुनतासम्बन्धश्च न स्थिरः स्यादिति । शालीनतया दृष्टान्तोपदेशेनैवाहुः । पुंभिरिति दृष्टान्तस्यैव दृष्टान्तः सुमनःस्विति श्लेषेण शोभनचित्तेष्विति न तेषां तत्र दोषः किन्तु लौल्यात् षट्पदानामेवेति भावः ॥ ६ ॥

मिथुनतासम्बन्धश्च यदि धर्मप्रधानतः स्यात्तदा स्थिरोऽपि स्यात् केवलग्राम्यधर्ममयश्चेत् अस्थिर एव स्यादित्यर्थान्तरन्यासव्याजेन तदेव पर्यवसाययन्ति । निःस्वमिति युग्मकेन । निःस्वं निर्धनीभूतम् अकल्पं पालनासमर्थीभूतम् ऋत्विजो याजकाः ॥ ७ ॥

दग्धं दग्धीभूत जारा भुक्त्वा रतां स्त्रियमित्यत्र दृष्टान्तपक्षेषु पुरुषेषु निन्द्यं जारपदं न्यस्तं स्त्रियान्तु तद्वत् पुंश्चलीपदं न न्यस्तं किन्तु रतापदमेव तत् खलु दार्ष्टान्तिकेषु स्वेषु तद्दोषसंक्रमणनिरसनार्थमेवं स्थिते वयमुत्पत्तित एव निजं तस्मिन्ननुरागं निर्णीय तमेवानन्यतया स्वयं वृतवत्यः । स पुनरस्मान् भुक्त्वा परित्यजन् जारायमाण एव जात इति तमेवानन्यभावाः जारा इति बहुत्वमुक्त्वा स्त्रियमित्येकवचनन्तु जारपरायाः स्त्रिया बहुजारत्वमपि सम्भवतीति तद्विधायां निन्दाया विवक्षया स्वेषां पुनरेतादृशतायां इति ज्ञेयम् एवं धनपालनाध्ययनपूजोपजीवनभोजनाश्रयणरतयोऽष्टौ प्रायो लोकानामपेक्षा अर्था भद्राभद्राश्च सर्वेऽप्युपाधय इति न स्नेहनिर्वाहका इति भावः ॥८॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

अर्थकृता प्रयोजनावधिकतया विडम्बनमात्रम् ॥ ६—११ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

कुतोऽयं निश्चय इत्यत्राहुः । अन्यथा पित्रोः प्रियचिकीर्षामन्तरेणेत्यर्थः । तस्यावाप्तसमस्तकामस्येति भावः । गोव्रजेऽतिहीन इति भावः । स्मरणीयं स्मर्तुं योग्यं वस्तु न चक्ष्महे न पश्यामः प्रियचिकीर्षयेत्यत्र हेतुः स्नेहानुबन्ध इति बन्धूनां पित्रादीनां सम्बन्धी स्नेहरूपोऽनुबन्धः पाशः मुनेरपि त्यक्तुमशक्यः ॥ ५ ॥

अन्येषु बन्धुषु तु मैत्र्यर्थकृता स्वप्रयोजनप्रयुक्ताऽतः सा यावदर्थनिबन्धना यावत्प्रयोजनं निबन्धनं कारणं यस्यास्तथाभूतेत्यर्थः । विडम्बनेति पाठे यावत्प्रयोजनं विडम्ब्यतेऽनुक्रियते इति तथाभूतेत्यर्थः । न तु सा तात्त्विकी मैत्रीति भावः किं कचिदेवं दृष्टमित्यत्राहुः । पुम्भिरिति । यद्वद्दृष्टा स्त्रीषु पुंश्चलीषु पुम्भिः कृता मैत्री यथा सुमनःसु मधुभरितेषु कुसुमेषु षट्पदैर्भृङ्गैः कृता च एते उदाहरणे न तु दृष्टान्तौ ॥ ६ ॥

उदाहरणान्तरमुखेन यावदर्थनिबन्धनत्वं स्पष्टयन्त्यः प्राहुः । निःस्वमिति द्वाभ्याम् । न विद्यते स्वं धनं यस्य तं गणिका वेश्यास्त्यजन्ति यावत्स्वमनुवर्त्य ततस्त्यजन्तीत्यर्थः । एवमुत्तरत्रापि अकल्पं प्रजापालनासमर्थं नृपमधीता विद्या यैस्ते शिष्या इत्यध्याहारः दत्ता दक्षिणा येन तं यजमानमृत्विजस्त्यजन्ति विगताति फलानि यस्मात्तं वृक्षं खगाः पक्षिणः तथा दग्धमरण्यं मृगास्त्यजन्ति तथा जारः स्त्रियं भुक्त्वा तां रतामनुरक्तामतृप्तामेव त्यजति ॥ ७—८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावळी ।

अन्यथा यशोदानन्दगोप्त्र्योः प्रियकरणेच्छामन्तरेण स्मरणीयं स्मरणकारणयोग्यं न चक्ष्महे न पश्यामः गोव्रजे भुवि गोष्ठे सुरभिलोकव्यावृत्त्यर्थो गोशब्दः गवां व्रजः समूहो यस्मिन् स्थाने तत्तथा तस्मिन्वा पशुजातियुक्तगोष्ठे वा ॥ ५ ॥

इतोऽपि स्नेहलक्षणानुग्रहं विना ऽन्यन्नास्तीति भावेनाहुः । अन्येष्विति । अन्येषु पितृव्यतिरिक्तेषु बन्धुषु मैत्री स्नेहानुवृत्तिलक्षणा मित्रभावोक्तिः अर्थकृता प्रयोजननिबद्धा इत्यन्वयः कथमित्येति तत्राहुः । यावदर्थेति । यद्वत् यथा पुम्भिः स्त्रीषु कृता मैत्री यावदर्थं यावत्प्रयोजनसमाप्तिपर्यन्तं विडम्बनमनुकरणमात्रं यस्याः सा तथा यावदर्थं विडम्बयत्यनुकरोतीति यावदर्थविडम्बना वा इममर्थं दृष्टान्तान्तरेण द्रढयन्ति । सुमनःस्विति षट्पदैः भृङ्गैः ॥ ६ ॥

निःस्वं वित्तहीनम् अकल्पं रक्षणादावसमर्थं दत्तदक्षिणं यजमानम्वा ॥ ७ ॥

वीतफलं फलरहितं प्रणयकोपातिरेकदर्शनार्थं बहुदृष्टान्तकथनं जार उपपतिः ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

यत्तु तयोरपि स्मरणं तदपि तयोरेव स्नेहस्य गुणो न तु तस्येत्याहुः । स्नेहेति । पूर्वत एव गोविन्दगतरागादयः विरहे त्यक्तलौकिकाः । कृष्णदूते व्रजायातेऽनुगायन्त्य इत्यादि ॥ ५-१० ॥

श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी ।

ननु भवतीनामपि सुखं कर्तव्यं सम्बन्धस्य तुल्यत्वात् कथमप्रेषणमिति चेत्तत्राहुः । यद्यपि अन्ये स्मर्तव्याः अस्मदादयोऽपि परं नन्दशेषत्वेन नन्दव्रजे तिष्ठन्तीति नन्दमाहात्म्यार्थम् इममुपाधिं परित्यज्य अन्यप्रकारान्तरेण भोगप्रकारेण गोव्रजे पशुयोग्ये स्थाने तस्य सर्वेश्वरस्य सर्वसमृद्धियुक्तस्य स्मरणीयं न चक्ष्महे अपेक्षितं हि स्मरन्ति लोकाः नन्वेवं सति नन्दस्याप्यस्मरणं स्यात् ईश्वरस्यापेक्षाभावात् तत्राहुः । स्नेहानुबन्ध इति । यथा अपेक्षा स्मारिका एवं स्नेहोऽपि तत्र भवतीष्वपि तुल्य इति चेत्तत्र विशेषमाहुः । बन्धूनामेव स्नेहानुबन्धः पूर्वमुत्पन्नः स्नेहेनानुबन्धो यस्येति न स्नेहमात्रमुभयेषां स्नेहस्य ग्रन्थिरिति यावत् स तु दुस्त्यजो भवति स्नेहकारणस्य सम्बन्धस्य सहजत्वात् आकाङ्क्षायाश्च कृत्रिमत्वात् यथा देहपरित्यागे दैहिकेषु स्नेहो गच्छति एवमाकाङ्क्षापरित्यागेऽपि तत्र तादृशविषयान्तरसम्भवे आकाङ्क्षा निवर्तत इति औपाधिकः सम्बन्ध इत्याहुः । अन्येष्वर्थकृतेति । यावद्देहसम्बन्धः तावत् न ज्ञानादिनापि स्नेहो निवर्तयितुं शक्यते किं वक्तव्यं विषयैः तदाह । मुनेरपि सुदुस्त्यज इति । लौकिकाद्वैदिकं बलिष्ठमिति ज्ञापनार्थमपिशब्दः सुशब्दो नित्यविवेकस्मरणेऽप्यशक्यत्वाय अन्येषु देहसम्बन्धरहितेषु अर्थकृता प्रयोजनकृता प्रयोजनं देहधर्मः धर्मिणो दुर्बलः औपाधिकोऽपि न चिरस्थायी यथा माञ्जिष्ठादिरागः चिरकालमपि तत्रापि तिष्ठति विडम्बनमेव अनुकरणमेव नटवत् अतोऽस्मासु भगवत्स्नेहः क्वापि न स्थितः अनुकरणमात्रं स्थितमिति विडम्बनमात्रत्वान्न स्मरति ॥ ५ ॥

अर्थकृतत्वं प्रतिपादयितुमौपाधिकं धर्ममाहुः । पुम्भिः स्त्रीष्विति । पुरुषाः स्वतन्त्राः सर्वसमर्थाः तद्विपरीताश्च स्त्रियः तासु स्नेहं न कुर्युरेव यदि कामो न भवेत् कामाच्च स्नेहमेव कुर्वन्ति अन्यथा सिद्धे गते वा कामे निवर्तते शास्त्रमपि विरागे त्यागं विधत्ते । यदहरेव विरजेदिति ननु तत्र धर्मोऽप्यस्ति पुत्रादिद्वारा च स्नेहो भवति ततश्चागन्तुकमपि सहजमिवेति भवति भवतीष्वपि तथा भगवत इत्याशङ्क्य तत्परिहारार्थं दृष्टान्तान्तरमाहुः । सुमनःसु षट्पदैरिवेति गमनक्रियाबाहुल्यार्थं षट्पदशब्दप्रयोगः तेषां मकरन्दग्रहणानन्तरं पुष्पनाशे न कापि क्षतिः अयमस्माकं युक्तो दृष्टान्तः ननु सर्वत्रैव दृष्टान्तः सुलभः ॥ ६ ॥

ननु तावता कार्यं सिध्यति ततः पुष्पाणामाशुतरविनाशयुक्तानां भ्रमराणां च बहूनां साधारणत्वात् भगवत एकत्वाद्भवतीनामसाधारणत्वाच्च न युक्तो दृष्टान्त इत्याशङ्क्य औपाधिकानामेषैव व्यवस्थेति वक्तुं दृष्टान्ताष्टकमाहुः । निःस्वमिति । यद्यपि नव कैशोर एव कामोपाधिकः किं त्वाबाल्यादेवेत्यतो निरुपाधिक एव तदपि कृष्णेन वयं त्यक्तास्तस्मात्तद्दृष्टान्तोऽपि तत्र

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

सर्वत्र बहुत्वं साधारणत्वं चोपाधिरस्त्येव तथापि बहुधा दर्शनात्
सन्दिग्धोपाधित्वं साधयितुं दृष्टान्तानां कथनं सर्वथा निरा-
करणे अचिकित्स्य एव दोषः स्यात् यथा मित्रातनयत्वं सांदि-
ग्धोपाधिकं दशमोऽपि चेत् श्याम एव स्यात् तदोपाधिर्न भवे-
देव अन्यथा तु भविष्यतीति एवं बहुत्वसाधारणत्वेऽपि भगवां-
स्त्यक्ष्यत्येव तदास्मास्वभावान्नोपाधिर्भविष्यतीति भावः । तत्र प्रथमं
स्त्रियः स्वभावतः अदुष्टाः पुरुषो दुष्ट इतीर्ष्यावशात् भगवान्
दूष्यत इति इमं पक्षं व्यावर्तयितुं स्त्रीणामेव प्रथमं स्वार्थाभावे पुरुष-
परित्यागमाहुः । निःस्वं त्यजन्तीति । ता हि प्रथमतः सर्वभावेन
भजन्ते नह्येवं कश्चिदात्मानं परस्मै निवेदयति तत्रापि यस्मै
कस्मैचित् अनेन धर्मार्थमपि भजनं निषिद्धं लोकेऽपि निन्दिताः
एवं लोके वेदे विरुद्धा अपि सर्वानपि परित्यज्य यं काञ्चित्
सर्वभावेन भजन्ते ताः सर्वोत्तमा भवितुमर्हन्ति यद्यर्थं न काम-
येयुः अर्थश्च न केवलं निर्वाहकः किन्त्वधिकोऽपि तस्मात्तासां
तावदर्थमेव निमित्ताभावे तादृशस्यापि त्यागात् यस्तु तथा
भूतानां विदित्वा सर्वस्वं निवेदयति तादृशमपि धनरहितं स्वश-
ब्देनोपार्जनेऽप्यसमर्थं गणिका वेश्यास्त्यजन्ति नहि तादृशः स्नेहो-
ऽन्यत्र भवितुमर्हति । ननु तथाप्येताः समभावेन भजनं कृतवत्यः
नतूत्कर्षभावेन सेवन्ते तेषु त्यागो न भविष्यतीत्याशङ्क्याहुः
अकल्पमसमर्थं नृपं राजानमपि प्रजास्त्यजन्ति पूर्वं सर्वभावेन
पाल्यमानाः प्रजाः स्वयमपि सर्वभावेन भजनयुक्ताः ।
तथापि पश्चात्पालनासामर्थ्ये तं परित्यज्य तच्छत्रो-
र्भवन्ति ताश्चेन्न भजेरन् न कोऽपि भवेद्राजा तथापि
कः प्रयासं करिष्यतीति अल्पेनापि निमित्तेन परंपरागतमपि
राजानं त्यजन्ति अनेन ज्ञायते देहसंबन्धव्यतिरिक्तेषु कथमपि
लौकिकं भजनं यावदर्थमेव ननु कदाचिदपि क्षणमात्रमपि
अनुपयोगे भजन्त इति । ननु लौकिके तथास्तु वैदिके
वाक्यप्रामाण्यात्तथा भविष्यतीत्याशङ्क्य परिहरन्ति । अधीतविद्या
इति पादद्वयेन । शब्दानुष्ठानभेदेन आदौ विद्या सर्वा यतो गृहीता
यतः सर्वोऽपि पुरुषार्थो भवति तादृशमपि प्राप्य ग्रहणपर्यन्त-
मेव आचार्यं सेवन्ते तत्वग्रे "उपनीय तु यः शिष्यं वेदमध्यापये-
द्द्विजः । सरहस्यं तदङ्गं च तमाचार्यं प्रचक्षते" इति एतादृशमपि
स्वकार्ये संपन्ने त्यजन्तीति सर्वथा अन्येष्वर्थकृतैव मैत्री किञ्च
यत्र वैदिकः सम्बन्धः सूतकव्यवहारः । अधीतस्यार्थोपयोगे
जीविका च स्वस्य भवति तादृशमपि दत्ता दक्षिणा येन दक्षिणामेव
प्राप्य शिष्ट्यर्थं यजमानं च त्यजन्ति कदाचिद्वा अदत्तदक्षिणं
तस्मादन्वयव्यतिरेकाभ्यां प्रयोजनकृतैव मैत्री ॥ ७ ॥

एवमेकेन श्लोकेन धर्मार्थापेक्षयैवेतरभजनं न स्वाभाविकं दैहिक-
वदित्युक्तम् अधुना कामार्थं लौकिकवैदिकप्राकृतनिषिद्धभेदेनापि
प्रवृत्ताः तत्तत्फलमनुभूय पश्चात्त्यजन्तीत्याहुः । खगा वीतफलमपि
कामो हि द्विविधः उपर्यधश्चेन्द्रियभोगभेदेन तत्र खगाः पक्षिणः
क्षुत्पीडिताः फलवन्तं वृक्षमाश्रयन्ति यदैव वीतफलो भवति
तदैव च त्यजन्ति उपलक्षणमेतत् छायार्थिनो गतच्छायं तत्तदर्थि-
नस्तत्तदर्थापगमे तथा अतिथयः असम्बन्धिनो ब्राह्मणाः क्षुत्पी-
डिताः भुक्त्वा चकारादन्यमपि सत्कारं प्राप्य तद्गृहं अनिष्टेऽपि
जाते निरीक्षणरहिताः गच्छन्ति कदाचिदेक एव कुर्यादिति सन्दे-

हव्यावृत्त्यर्थं सर्वे एव तथाविधा इति ज्ञापयितुं सर्वत्र बहुव-
चनं यस्मिन्नरण्ये मृगा उत्पन्नाः वृद्धिश्च गताः तादृशस्य
जातायामापदि अग्रे सम्पत्तिसम्भावनायामपि अल्पानुपयोग-
माशङ्क्य त्यजन्ति मृगाः सर्वत्र साधारणं मत्वा असाधार-
ण्येन तस्य नाशमपि कृत्वा गच्छन्तीत्याहुः । जारो भुक्त्वेति । साहि
परस्य स्त्री भोग्या स्वयं जारस्तदेकस्वभावस्तदुपजीवी वा तादृशोऽपि
भोगानन्तरं तां चेत्कश्चिद्धन्यात्तदपि अनपेक्षमाणस्त्यजत्येव तथै-
तज्जातमित्यभिप्रायः अथवा एतादृशविधान् दश दृष्टान्तानाहुः तत्र
सात्त्विकादिभावेषु तथा वचनं जारो भुक्त्वेत्यन्ते राजसतामस्याः
अथवा दृष्टान्ताष्टकमेवैतदवधि तामसतामसस्यास्तु सर्वभावा-
पन्नायाः भ्रमरकथायां स्वरूपं वक्तव्यम् अत एव काचिदित्येकां
निरूपयिष्यति ॥ ८ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

स्मरणीयं स्मरणयोग्यं जनं कमपि न चक्ष्महे न पश्यामः
स्मृतयोः यशोदानन्दयोः पित्रोरपि तेन यद्येवमनादरः कृतस्तदा
अस्मदादीनां तदीयस्मृत्येकभूमिकायामध्यारोहणयोग्यता कुत
एव स्यादिति भावः । मुनेः कृतसंन्यासस्यापि दुस्त्यजः षष्ठी आर्षी
कृष्णेन तु परस्त्रीपुञ्जेषु रममाणेनापि दुस्त्यज एवेत्यहो कृष्णस्य
वैराग्यतान्नतेति भावः ॥ ५ ॥

ननु कृष्णस्य पितृभ्यां भ्रात्रादिभिश्च निष्प्रयोजनत्वान्ममता
मास्तु युष्माभिः स्त्रीभिस्तु लम्पटत्वात् तस्य प्रयोजनमस्त्ये-
वेति यूयमेव स्मरणीया भवथेति तत्राहुः । अन्येष्विति । अर्थकृता
प्रयोजनवती निन्द्यैव मैत्री यावदर्थविडम्बनं यावत्तावच्च साकल्ये
इत्यभिधानात् सर्वार्थविडम्बनरूपाया मैत्र्याः कर्त्ता यश्च
मैत्र्याः प्रतियोगी यश्च प्रयोजकः यश्चोपकरणं तेषां सर्वेषामप्य-
र्थानां विडम्बनं तिरस्कारस्तद्रूपेत्यर्थः । अस्य प्रयोजनसद्भावे
मैत्र्याः सत्त्वं प्रयोजनाभावे मैत्र्या अभाव इत्यर्थः । तत्रापि पुंभिः
सुमनःस्विव पुष्पसदृशीषु सौन्दर्य्यसौरभ्यसौकुमार्य्यमाधुर्य्यवती-
ष्वपि स्त्रीषु श्लेषेण शोभनमनस्कास्वचञ्चलचित्तास्वपि मैत्री
तद्वत् कृता यद्वत् षट्पदैः कृतेत्यन्वयः । षट्पदा हि सौरभ्यादि-
गुणवन्त्यपि पुष्पाणि सकृत् पीत्वैव स्वचाञ्चल्यदोषात् यथा त्यजन्ति
तथैव पुमांसः स्वसम्भोगार्हमाधुर्य्यादिमतीरप्येकनिष्ठा अपि
स्त्रीः सम्भुज्य त्यजन्तीति प्रयोजनसद्भावेऽपि मैत्र्या अभाव
इत्यतिनिन्दा ॥ ६ ॥

तत्र स्वप्रयोजनाभाव एव मैत्र्या अभाव इत्यत्र दृष्टान्तान्
दीपकन्यायेनाहुः । निःस्वं गणिकास्त्यजन्ति तेन यावद्धनप्राप्तिस्तावन्न
त्यजन्तीत्येवमग्रेऽपि व्याख्येयम् अकल्पं पालनासमर्थं दत्ता
दक्षिणा येन यजमानं वीतफलं विगतफलं जाराः खलु रतां
रमणवतीमपि स्त्रियं त्यजन्ति तेन यावत्तस्या यौवनं तावन्न
त्यजन्तीति पूर्ववदर्थाभावात् यत् किञ्चित्प्रयोजनाभावेऽपि मैत्र्या
अभावः प्रतिपादितः तेन तस्य स्वप्रयोजनसिद्धिः पुरस्त्रीभिरेव
भवतीति कथं वयं स्मरणीया भवामेति कृष्णस्य खलु प्रेमा-
भावो व्यञ्जितः तत्रापि जारा इति बहुवचनेन स्त्रियमित्येकव-
चनेन च बहुजारपरायाः कामोपाधिकप्रीतिमत्यास्तैस्त्यागः
सम्भवतु अस्माकं तु बह्वीनामपि तदेकनिष्ठत्वमेव केवलं प्रेमापि

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

न सम्भवेदित्यभिव्यज्य निरुपमं नृशंसत्वमेव कृष्णस्य द्योतितम् ॥ ७—८ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

ननु दूतीप्रेषणे तयोः सन्तोषो न भवेदतोऽर्थान् सोऽपि भवत्वित्याशयेन भवतीनामेव प्रियचिकीर्षया युष्मद्भर्त्राहं प्रेषितो भवत्यस्तु वृथैवान्यथा वर्णयन्त्यः क्लिश्यन्तीत्याशङ्क्याहुः । अन्यथेति । पितरौ विना तस्य पशुपतेः गोव्रजे स्मरणविषयं न पश्यामः यदर्थं भवादृशं प्रेषयेत् त्यक्तगोपालत्वस्य प्राप्तयद्वाधिपत्यस्यानुपयुक्तत्वाद्गोगोपादिकमपि पशुपालादिस्थितियोग्ये स्थाने स्मरणीयं न चक्ष्महे अस्माकं तु स्मरणप्रसक्तिरेव नास्तीत्याशयः अन्यथास्मद्गृहानागत्यैकत्र स्थित्वास्मानाहूय प्रियसन्देशानुक्त्वा पश्चान्नन्दराजगृहे प्रवेशस्त्वया कृतः स्यान्न तु तथा कृतवानसि किन्तु स्वत एवास्माभिरागत्य परिवेष्टितोऽस्यतोऽस्मत्तर्को यथार्थ एवेति भावः । नन्वनपेक्षणीयत्वरूपहेतोः पित्रोरपि तुल्यत्वात्तत्स्मरणं तत्प्रियार्थं दूतप्रेषणादिकं चापि न संभवतीत्याशङ्क्याहुः । स्नेहेति । स्नेहेनानुबन्धः बन्धनं स्नेहेनानुसम्बन्धो यस्य स स्नेहग्रन्थिर्वा बन्धूनां मातापित्रादिसम्बन्धी सम्बन्धो मुनेस्तत्त्वविदोऽपि अत्यर्थं दुस्त्यजस्त्यक्तुमशक्यः ननूक्तहेतुर्भवतीष्वपि समान इत्याशङ्कानिवृत्त्यर्थं बन्धूनामित्युक्तं स्नेहमात्रं चेत् कदाचित्त्यक्तुमपि शक्येत परस्परस्नेहकृततद्ग्रन्थिस्तु यथोक्त एवेति बाधयितुमनुबन्धपदोपादानं सम्बन्धेन सह जातस्य स्नेहस्य सम्बन्धनिवृत्त्यैव निवृत्तिर्भवति औपाधिकभ्रमस्य यावदुपाधिसत्त्वनियमात् अत एव तत्त्वविदामपि यावद्देहस्तावत्तत्र स्नेहानुवृत्तिरुपलभ्यते यो मुनेरपि दुष्परिहरः स विषयिभिः कथं परिहर्तुं शक्य इत्यपिशब्देन बोधितं यथा चास्मदादिषु तस्य यावत्प्रयोजनमपेक्षाबुद्धिरासीत्सा च तदभावान्निवृत्तातो नान्यस्य स्मरणादियोग्यता नन्दराजमाहात्म्यात् तद्व्रजसम्बन्धीनां सर्वेषामपि न स्मरणं क्रियते चेत्तर्हि पराङ्गतया स्मरणादिकं नास्माकं सन्तोषकरमुत्कर्षानापादकत्वादिति भावः ॥ ५ ॥

क्लृप्त मेवैतत् न तु वयमपूर्वं कल्पयाम इत्याशयेनाहुः । अन्येष्विति । अन्येषु देहसम्बन्धरहितेषु अर्थकृता प्रयोजनोपाधिका मित्रता यावदर्थविडम्बनमनुकरणमात्रं नतु स्वाभाविकी अतोऽर्थनिवृत्त्या न तिष्ठति अस्मासु तु भगवत्स्नेहः कदापि न स्थितः किंतु तदनुकरणमात्रं स्थितमतो नास्माकं स्मरणादियोग्यतेत्याशयः तदुदाहरणानि निवेदयन्ति । पुम्भिरिति । तद्यथा पुम्भिः स्त्रीषु कृता मैत्री कामबाधानिवृत्तिरूपार्थपर्यन्तं विडम्बनमात्रं स्वतन्त्राः सर्वसमर्थाः पुमांसः अबलासु स्त्रीषु कामादेव स्नेहं कुर्वन्ति अन्यथा सिद्धे निवृत्ते वा कामे तदभावदर्शनात् "यदहरेव विरजेत्तदहरेव प्रव्रजे"दिति श्रुत्या तद्राहितस्य संन्यासविधानाच्च ननु तत्रौपाधिकोऽपि स्नेहः कदाचित्पुत्राद्युत्पत्त्या तद्द्वारा सहजोऽपि भवतीत्यरुच्योदाहरणान्तरमाहुः । सुमनः स्विति । यथा वा षट्पदैः कृता पुष्पेषु मैत्री मकरन्दग्रहणपर्यन्तं विडम्बनमात्रं तत्र मकरन्दाभावान्निवर्त्तते झटित्यत्र गमनक्रियाबाहुल्यसूचनार्थं षट्पदशब्दप्रयोगः ॥ ६ ॥

ईर्ष्यावशान् पुरुषाणामेव दूषणोद्भावनमेताभिरारब्धमित्याशङ्कानिरासार्थमाहुः । निःस्वमिति । गणिका वाराङ्गनाः लोकद्वयभयनिर्मुक्ताः परममैत्रीं विडम्बयन्त्यो धनवन्तं पुरुषं भजन्ते तस्य निर्धनतादशायां तं त्यजन्ति तथा चार्थकृता मैत्री स्त्रीष्वपि कृत्रिमैवातो न वयमीर्ष्यावशात् पुरुषेषु दोषमारोपयाम इति भावः । एवं चास्मदुक्तनियमस्य नास्ति क्वापि भङ्ग इत्याशयेनोदाहरणान्तरायाहुः । अकल्पमिति । पूर्वं सर्वभावेन पाल्यमानाः स्वयं च सर्वभावेन तद्भजनयुक्ताः प्रजाः पश्चात्तमेव परम्परागतं राजानं पालनाशकं त्यजन्ति पालनक्षमं तच्छत्रुं भजन्तीति प्रसिद्धम् अधीताविद्या यैस्ते शिष्याः ।

उपनीय तु यः शिष्यं वेदमध्यापयेद्द्विजः ।
सरहस्यं तदङ्गं च तमाचार्यं प्रचक्षते ॥

इत्युक्तं स्वयं सर्वपुरुषार्थहेतुभूतविद्याप्रदायकत्वात्परमोपकारिणमाचार्यं त्यजन्ति यथा वा दत्ता दक्षिणा येन तं याज्यम् ऋत्विजस्त्यजन्ति कदाचित् अदत्ता दक्षिणा येन तं तत्समीपमपि न गच्छन्तीति वा एतेन मूर्खाणामेवेयं कथा न पण्डितानामित्याशङ्कापि परिहृता ॥ ७ ॥

तथा खगाः पक्षिणः क्षुत्पीडिताः फलवन्तं वृक्षं सेवमानास्तदपगमे तं त्यजन्ति छायाद्यर्थिनस्तु द्रुहितमित्यस्यापीदमुपलक्षणं तथा अतिथयः असम्बन्धिनो ब्राह्मणादयः क्षुत्पीडिता भुक्त्वा चकारादन्यदपि सत्कारादिकं लब्ध्वा भोजनादिदातृगृहं त्यजन्ति तद्गृहे कस्मिश्चित् दाहादिरूपोपद्रवेऽपि जाते तदवलोकनमप्यकुर्वन्तो गच्छन्ति तथा यस्मिन्वने उत्पन्ना मृगाश्च गतास्तादृशमपि वनमुपयोगाभावात्त्यजन्ति न तावदेक एव कश्चिदेवं करोति किन्तु सर्व एव एवम्विधा इति सूचयितुं सर्वत्र बहुवचनप्रयोगः तथा रतां स्वपतिपुत्रादिकं परित्यज्य स्वस्मिन्नेवात्यर्थमनुरागवतीं भुक्त्वा स्वकार्यार्थं तदीयं लोकद्वयमपि नाशयित्वा अतृप्तामेव स्त्रियं जारस्त्यजति एवम्विधः कश्चिदेवास्मत्प्रियसदृश इति ध्वनयितुं जार इत्येकवचनम् इतः परमुदाहरणान्तरानुपादानमेतस्य कृतघ्नशिरोमणित्वख्यापनार्थम् ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

ननु पित्रोरपि प्रियचिकीर्षा तस्मिन् निःस्नेहे कथं सम्भावनीया इत्यत आहुः । स्नेहानुबन्ध इति ॥ ५ ॥

अन्येषु तु तन्मैत्री अर्थकृता प्रयोजननिमित्ता अत एव यावदर्थविडम्बनं यावत्प्रयोजनानुकरणं तावदेव पुम्भिर्दुर्वृत्तैः स्त्रीषु पुंश्चलीषु यथा प्रयोजननिमित्तकृता यथा वा सुमनःसु पुष्पेषु षट्पदैः भ्रमरैस्तद्वत् ॥ ६ ॥

इयं लोकरीतिरेवेति विमनस्का आहुः । निःस्वमिति द्वाभ्याम् । दत्तदक्षिणं याज्यम् ॥ ७ ॥

वीतफलं विगतफलं वृक्षम् रतामनुरक्ताम् ॥ ८ ॥

भाषा टीका ।

यदि ऐसा नहीं होतो उनको इस गउ के गोष्ठ व्रज में स्मरण करने योग्य कुछभी नहीं दीखता है परन्तु स्नेहका निमित्ततो मुनि को भी छोडना कठिन होता है ॥ ५ ॥

जो अपने निज नहीं हैं उन के तो मतलब मात्र की मित्रता

[1]इति गोप्यो हि गोविन्दे गतवाक्कायमानसाः ।
कृष्णदूते व्रजं याते उद्धवे त्यक्तलौकिकाः ॥ ९ ॥
गायन्त्यः प्रियकर्माणि रुदन्त्यश्च गतह्रियः ।
तस्य संस्मृत्य संस्मृत्य यानि कैशोरबाल्ययोः ॥ १० ॥
काचिन्मधुकरं दृष्ट्वा ध्यायन्ती कृष्णसङ्गमम् ।
प्रियप्रस्थापितं दूतं कल्पयित्वेदमब्रवीत् ॥ ११ ॥

गोप्युवाच ।

मधुप ! कितवबन्धो ! मास्पृशाङ्घ्रिं सपत्न्याः कुचविलुलितमालाकुङ्कुमश्मश्रुभिर्नः ।
वहतु मधुपतिस्तन्मानिनीनां प्रसादं यदुसदसि विडम्ब्यं यस्य दूतस्त्वमीदृक् ॥ १२ ॥

भाषा टीका ।

रहती है सो जब तक प्रयोजन होवै तवहीतक मित्रता रहती है जैसे कि दूसरे की स्त्रियों के साथ पुरुषों की और फूलों में भौरों की मित्रता रहती है ॥ ६ ॥

धन वीतजानेपर वेश्या उस पुरुष को छोड़ देती हैं असमर्थ राजा को प्रजा छोड़ देती है विद्या पढ लेनेपर विद्यार्थी अध्यापक को छोड देते हैं दक्षिणा देदेने पर ऋत्विज लोग यजमान को छोड देते हैं ॥ ७ ॥

पक्षी फल वीतने पर पेड़ को छोड़ देते हैं अतिथी लोग भोजन किये पीछे उस घर को छोड देते हैं जल जाने पर घांस के विना वन को मृग छोड देते हैं जार पुरुष भी भोगे पीछे प्रेम वाली भी स्त्री को छोड देता है ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

त्यक्तलौकिकास्त्यक्तलोकव्यवहाराः ॥ ९ ॥

प्रियस्य कर्माणि गायन्त्यस्तथा तस्य बाल्यकैशोरयोर्यानि कर्माणि तानि संस्मृत्य संस्मृत्य गतह्रियः सत्यो रुदत्यश्च तमपृच्छन्निति पूर्वक्रिययैव सम्बन्धः ॥ १० ॥

प्रियेण श्रीकृष्णेन मां प्रसादयितुं प्रस्थापितोऽयं दूत इति कल्पयित्वाऽब्रवीत् यद्वा तस्मिन्नुद्धवे प्रियप्रस्थापितं दूतमिति दूतदृष्टिं कृत्वा मधुकरापदेशेनोद्धवमेवाब्रवीदित्यर्थः ॥ ११ ॥

हे मधुप! कितवस्य धूर्तस्य बन्धो! नोऽस्माकमङ्घ्रिं मास्पृश मा मां नमस्कारेण प्रार्थयस्वेत्यर्थः । तत्किमित्यपेक्षायां कृष्णवर्णस्य तस्य श्मश्रूणां लोहितत्वे कारणमुत्प्रेक्षमाणाह । सपत्न्याः कुचाभ्यां लुलिता सम्मर्दिता या कृष्णस्य वनमाला अत एव तस्याः कुङ्कुमं येषु तैः श्मश्रुभिरुपलक्षितः किन्तु तासामेव मानिनीनां प्रसादं मधुपतिर्वहतु किमस्मत्प्रसादनेन तस्य यदुसदसि विडम्ब्यमुपहासास्पदम् कुतः यस्य दूतस्त्वमीदृशः ॥ १२ ॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

इति एतदुद्देश्य इत्यर्थः । यद्वा इत्येवं त्यक्तलौकिकाः स्वत एव पूर्वं गोविन्दे गोकुलेन्द्रे श्लेषेण सर्वेन्द्रियव्यापके भगवति अत एव गतानि प्राप्तानि वागादीनि यासां ताः तत्र कायप्राप्तिः निजाङ्गानां सर्वेषां प्राणानां वा समर्पणात् तदाऽविष्टतया कायस्य विस्मरणाद्वा यद्वा कायिकव्यापारस्य तदर्थं त्यागात् किंवा तदर्थकमात्रकर्म्माचरणात् पुनश्च कृष्णस्य स्वचित्ताकर्षकस्य प्रभोर्दूते तत्र चोद्धवे व्रजमायाते सति अन्यसर्व्वोख्यातं यद्वा गतह्रियो बभूवुरिति किंवा रुदत्यो मुमुहुरिति शेषः ॥ ९ ॥

पौगण्डस्य बाल्येऽन्तर्भावो ज्ञेयः कैशोरस्याद्यावुक्तिः तत्र रासादिक्रीडाविशेषापेक्षया ॥ १० ॥

काचित् कापि तासां मुख्यतमैका यद्वा के प्रेमसुखे आसमन्तात् चित् विज्ञानं यस्याः सा राधा यथा प्राग्नेये—

गोप्यः पप्रच्छुरुषसि कृष्णानुचरमुद्धवम् ।
हरिलीलाविहारांश्च तत्रैकां राधिकां विना ॥
राधा तद्भावसंलीना वासनाया विरामिता ।
सखीभिः साऽवधाच्छुद्धविज्ञानगुणबृंहिता ॥
इज्यान्तेवासिनं वेदचरमांशविभावनैः । इति

अस्य सार्धपद्यद्वयस्यार्थः राधिकां विना अन्या गोप्यस्तत्रोद्धवं हरिलीलाविहारान् पप्रच्छुः सा राधा तद्भावसंलीना तस्य कृष्णस्य भावेन महाभावेनैव वेदचरमांशविभावनैः वेदचरमांशा उपनिषदः तासां विभावनैर्विशेषभावनैः सारप्रकाशनैः इज्यान्तेवासिनं गीष्पतिशिष्यमुद्धवं मभ्यधात् कथंभूता प्रेम्णा शुद्धविज्ञानं तदेकरसतयानुभवः तेन बृंहिता उत्फुल्ला एतेन—

उपनिषत्सारसंग्रहरूपो भ्रमरगीताख्योऽयंसार उच्यते

महाभावविशेषस्य गतिं कामप्युपेयुषः ।
भ्रमाभा कापि वैचित्री दिव्योन्माद इतीर्यते ॥
उद्घूर्णाचित्रजल्पाद्यास्तद्भेदा बहवो मताः ।
तथा प्रेष्ठस्य सुहृदालोके प्रणयक्रोधजृम्भितः ॥
भूरिभावमयो जल्पश्चित्रजल्पस्तदुद्भवः ।

तदुद्भवः दिव्योन्मादोद्भवः अतोऽन्तिमपद्यं विहायान्यत्र सर्वत्रैव शेषव्यञ्जनं ज्ञेयमिति मधुकरं स्वयमकस्मात्तत्रैव प्राप्तं तत्र

[1] एवमुं गोपीर्गोविन्दमनोवाग्देहचेष्टितैः । कृष्णदूतो व्रजं प्राप्त उद्धवस्त्यक्तलौकिकाः ॥ इति वि० पाठः ।

श्रीमत्सनातनगोस्वामिकृतवृहत्तोषिणी ।

प्रियप्रस्थापितं दूतं मत्वा तत्र हेतुः ध्यायन्तीति कृष्ण-सङ्गमे चित्तस्य प्रवेशेन विरहार्तिविशृङ्खलितमहाभाववैवश्येन चानुसन्धानाभावतः श्यामत्वादिना मधुकरतया प्रतीतेरिति ॥ ११ ॥

स्वतः प्रेमजवार्तायां गोविन्दे लीनचेतसः ।
राधायाः केन वागर्थो वेद्यः स्यात्तत्कृपां विना ॥

मधुपेति । श्लेषेण हे मद्यपेत्यर्थः । मद्यपस्तु प्रायः परं वञ्चयत इति संबोधयति कितवः शठः श्रीकृष्णः अस्मत्-परित्यागेन न पारयेऽहं निरवद्यसंयुजामित्यादिवचनार्थव्यभिचा-रात् तस्य बन्धो ! तद्बन्धुत्वं दूतत्वादेव वर्णादिसाम्याद्वा किंवा त्वं मधुपः सोऽपि मधुपतिरिति नामसाम्यात् मद्यपकितवयोः प्रायः सख्यं भवतीति कर्मसाम्याद्वा सोऽयं कृष्णसन्देशहरसं-न्दर्शनेन वाढमुल्लङ्घितमर्यादस्य महाभावामृतराशेस्तरङ्गरूपैर्गाढा-सूयागर्वैर्ष्याद्युपहासादिभिर्भावविमाधुरीभरमेव नीयमानः श्रीरा-धाया जल्पः कस्य चिदेव बोधगोचरीभवितुमर्हतीति तत्र किंत-वेत्यसूया रक्तपाकुसुमधिया नखेषु पिपतिषन्तं भृङ्गं प्रसादनाय पाद-ग्रहणं कुर्वन्तं मत्वाह अङ्घ्रिं मास्पृशेति । वयं तु मानवत्यः परम-स्वतन्त्रास्तेन त्वद्विधेन प्रसादनीया न भवेमेत्यङ्घ्रिस्पर्शनेन किमित्यर्थ इति गर्वः किंवा कृष्णसङ्गमध्यानावेशेनात्मप्रसा-दनार्थमुद्यममेव तथा कुर्वन्तं मत्वाह एवं महाभावोन्मादेनोक्त-त्वाद्व्याख्यानामसङ्गत्या महागुणत्वेऽपि सतां प्रीतये कथञ्चित् काचित् सङ्गतिः कार्या सपत्न्याः लक्ष्म्याः पुरस्त्रिया वा कस्याश्चित् जातानेकत्वं वा विशब्देन दृढालिङ्गनत्वादिकं बोध्यते न इति बहुत्वं निजसखीवर्गापेक्षया गर्वेणैव वा एव-मपि मधुपस्य दूततया भगवदीयत्वेन तत्र च तद्वनमा-लायां निवासेन तस्यां च रतिसमये लग्नकुङ्कुमेन श्मश्रूणां लौहित्यसम्भावनया तथोक्तं यच्च केचिदित्थमुद्धवस्य रक्तश्म-श्रुलत्वं मन्यन्ते तदसङ्गतं अपीच्यदर्शन इत्युक्तत्वात् पक्षा-न्तरे तु भ्रमरतयोद्धवस्य कल्पनया तदीयारोपरूपगुणावेशवशे-ध्यासेन सर्वं सङ्गतमेव अहो सपत्न्या सह रत्यैव वयं तेन किल विस्मृताः स्म इति भावः । इतीर्ष्या अतस्तासां तेन रमितानां तदीयानां वा नागरीणां मानिनीनां सतीनां बहुत्वमे-कस्यां प्रसादितायामन्यस्या मानात् तस्यामपि प्रसादितायाम-न्यस्या इत्येवं बाहुल्याभिप्रायेण प्रसादं वहतु पादग्रहणादिना प्रयत्नेन नित्यं प्रापयतु मादृशां तेन किमायातमित्यर्थः इत्यना-दरः यतो मधुपतिः यदुकुलेश्वरः ऐश्वर्येण तद्युक्तमेवेति भावः । श्लेषेण मद्यस्वामी इत्यविचारः सौहृदाभावः सूचितः मद्यपे सौहृदं नास्तीति प्रसिद्धेः यद्यस्मात् उ इति संबोधने भो मधुप! यदु सदसि विदग्धसखीनां सभायां विडम्ब्यमुपहसनीयं तस्य चरितमिति शेषः । ईदृक् सपत्नीकुचकुङ्कुमाक्तश्मश्रुर्निर्लज्ज इत्यर्थः । यादृशः स्वामी तच्छीलास्तद्भृत्य इति न्यायात् त्वञ्च एव तत्स्वभा-वोऽपि ज्ञात एव यद्वा प्रसादनार्थं प्रेषितोऽपि बत सपत्नीकुच-कुङ्कुमयुक्तश्मश्रुभिरागतोऽसीति निर्बुद्धिरेवेत्यर्थः । स्वतः खैणत्वा-द्दूतस्य चेदृक्त्वाद्विडम्ब्यमेवेत्युपहासः अन्यच्च व्याख्यातं यद्वा श्मश्रुभिः कृत्वा मा स्पृश कुतः किंतवेति कितवबन्धुत्वादित्यर्थः । कैतवं च व्यञ्जितमेव सपत्न्या इत्यादिना तदस्मासु कैतवेनालं कुलस्त्रीष्वेव सदा तनोदित्याशयेनाह । वहत्विति । यस्य त्वमीदृक् मधुपो दूतः स मधुपतिः कथम्भूतं प्रसादं विडम्ब्यं विडम्बनार्हं पादग्रहणादिना विडम्बनमेव करोषीत्यर्थः ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

इति पूर्वोक्तवचनप्रकारेण गोप्यस्त्यक्तलौकिका अनादृतलोक-संकोचा बभूवुः क सति कृष्णस्य सर्वेषामप्याकर्षकतया तन्ना-म्नस्तस्य निजप्रेष्ठस्यान्यत्र गतस्य सतो दूते तत्राप्युद्धवे समा-याते सति तत्र हेतुः हि यस्मात् गोविन्दे पूर्वमेव गोकुलेन्द्रे श्लेषेण सर्वेन्द्रियव्यापके तस्मिन् गतानि वागादीनि यासां ताः तत्र कायेन गतिः निजाङ्गानां समर्पणात् तदर्थकमात्रकर्माचर-णात् तदाविष्टतया कायस्य विस्मृतत्वाच्च तस्मात्तासामिदानीमी-दृशीभवनं युक्तमेवेति भावः । इत्थमेव च पूर्वमनन्यतया स्वयं धृतवत्य इति व्याख्यातम् ॥ ९ ॥

ततश्च गतह्रियः सत्यो यानि कैशोरबाल्ययोः प्रियकर्माणि तानि मुहुः स्मृत्वा गायन्त्योऽपि बभूवुः रुदन्त्यो रुरुदुश्च बभूवुरित्यर्थः । कैशोरस्य प्रथमोक्तिस्तासां स्वरसोद्दीपनत्वेन बाल्यं कौमारपौगण्डात्मकं तदीयस्मरणमावाल्यस्नेहेनेति ॥ १० ॥

अथ "महाभावविशेषस्य गतिं कामप्युपेयुषः । भ्रमाभा कापि वैचित्री दिव्योन्माद इतीर्यते । उद्घूर्णाचित्रजल्पाद्यास्तद्भेदा बहवो मताः । प्रेष्ठस्य सुहृदालोके प्रणयक्रोधजृम्भितः । भूरि-भावमयो जल्पश्चित्रजल्पस्तदुच्यते" इति रसग्रन्थानुसारेण तास्वेव कस्या अपि दिव्योन्मादमयं चित्रजल्पं वक्तुमाह । काचि-दिति । काचित् कापि परमप्रेष्ठा सा च श्रीराधेत्यर्थः । श्लेषेण च के प्रेमसुखे आ समन्तात् चित् ज्ञानं यस्याः सेति कं सर्वेषां प्रेमसुखमाचिनोति क्षणे क्षणे वर्द्धयति या सेति च मुख्य-त्वात् सैव । तथैव सैषा एतस्मिन्नेव प्रतिपादिता वासना-भाष्येऽपि । तादृशी सा पीतपरागपिञ्जरश्मश्रुं कञ्चिद्भ्रमरम-कस्मात् दृष्ट्वा तं दूतं कल्पयित्वा वक्ष्यमाणभङ्गीमयमिदमब्रवीत् । ननु महाविरहदुःखेऽस्मिन् कुतो मानस्तत्राह । प्रियसङ्गमं ध्यायन्ती स्फूर्तिस्वप्नयोर्यः प्रियसङ्गमस्तमेव गुप्तं मुहुरागतस्यैव तस्य साक्षात्तया स्मरन्ती । ननु तथापि यद्यन्यनायिकया प्रियस्य तत्र प्रसङ्गः स्यात्तदा सम्भवत्यपि मानस्तत्राप्याह । कल्प-यित्वेति । या भ्रमरमपि दूतं कल्पयति सा तदपि कल्पयेदिति भावः । वक्ष्यति च सपत्न्याः कुचविलुलितेति प्रियेण स्वविषयक-परमप्रेमवता तेन प्रस्थापितं दूतं वितर्क्यैव चित्रजल्पाख्यं श्लोक-मब्रवीत् । अतो यत्तत्र वासनाभाष्योत्थापितमाग्रेयवचनम् । "गोप्यः पप्रच्छुरुषसि कृष्णानुचरमुद्धवम् । हरिलीलाविहारांश्च तत्रैकां राधिकां विना । राधा तद्भावसंलीना वासनाया विरामिता । सखीभिः साभ्यधाच्छुद्धविज्ञानगुणजृम्भितम् । इज्यान्तेवासिनं वेद-चरमांशविभावने"रिति । तदेतत् पूर्वं तस्या निर्वेदाख्यं भावान्तरं जातमासीदित्यपि ज्ञेयम् । यन्मूलतया प्रणयरोषमयोऽयमपि भाव-विशेषो जज्ञे । विचित्रसञ्चारिमयत्वाद्दशावस्थायाः प्रतस्व-द्भावमयवशामीदृशानन्तर्यपर्यालोचनया वासनाया विरामिता पुनस्तत्सङ्गमसम्भावनरहिता बभूव । ततश्च तज्जातीयवार्त्ता-मसहमाना तदाच्छादनाय वेदान्तरेष्वपि तद्दुःखपारावारमपश्यन्ती मुक्तिरेव वरमिति प्रतिपादनाय वा वेदचरमांशस्य ज्ञानकाण्डस्य विभावनेच्छाहरयो: कृष्णेत्यादि यथा व्यासस्थैवाभ्यधात् सम्वाद-

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

माचचार । न केवलं सा किन्तु सख्योऽपीत्याह । सखीभिरिति वाच्यम् । अथवा वेदयत्यस्मांस्तादृशभावप्रकाशको वेदः । वासना तादृशभावेतरः सर्व एव भावः शुद्धविज्ञानं च तादृशभावमयानुभव उच्यते । "यं सर्वे वेदा आमनन्ति मुमुक्षवो ब्रह्मवादिनश्चे" ति मुक्त्यवस्थोपरि सामान्यभक्तेरपि प्राशस्त्याम्नानात् । वाञ्छन्ति यद्भवभियो मुनयो वयञ्चेति श्रीगोपिकामात्राणामपि सर्वस्पृहणीयभावत्वात् । इत्यच्युताङ्घ्रिं भजतोऽनुवृत्त्या श्लाघ्यकाङ्क्षानुसारेण यथा भक्त्यैवानुभावोदयाश्च ॥ ११ ॥

"स्वतः प्रेमजवार्त्तया गोविन्दे लीनचेतसः । राधायाः केन वागर्थो वेद्यः स्यात् तत्कृपां विना" । सोऽयमसङ्गतिप्रायोऽपि कृष्णसन्देशहरसन्दर्शनेन वाढमुल्लङ्घितमर्यादस्य महाभावामृतराशेस्तरङ्गामैर्गूढासूयागर्वेर्ष्योन्मादोपहासादिभिर्माधुरीभरमेव वीयमानः श्रीराधाया दिव्योन्मादमयचित्रजल्पः कस्यचिदेव बोधगोचरी भवितुमर्हतीति तत्र मानिनीमन्याह । मधुपेति । श्लेषेण हे मद्यपेत्यर्थः । मद्यपस्तु प्रायः परं वञ्चयते इति सम्बोधयति । कितवः शठः श्रीकृष्णः अस्मत्परित्यागेन न पारयेऽहं निरवद्यसंयुजामित्यादिवचनव्यभिचारात् । तस्य बन्धो तद्बन्धुत्वं दूतत्वादेव वर्णादिसाम्याद्वा । किं वा त्वं मधुपः सोऽपि मधुपतिरिति नामसाम्यात् । मद्यपकितवयोः प्रायः सख्यं भवतीति कर्मसाम्याच्च । तत्र कितवत्वसूयाविष्कृता । रङ्गणकुसुमधिया नखेषु पिपतिषन्तं भृङ्गं प्रसादनाय पादग्रहणं कुर्वन्तं मत्वाह । अङ्घ्रिं मा स्पृशेति । वयन्तु मानधनाः परमस्वतन्त्रास्तेन त्वाद्विधेन प्रसादनीया न भवेमेति अङ्घ्रिस्पर्शे । किमित्यर्थः इति गर्वः स्पर्शनिषेधे तु विशेषमप्याह । सपत्न्याः अद्य श्वो यासु स रमते तासां मुख्यायाः कस्याश्चित् सपत्नीशब्दप्रयोगः स्त्रीणां स्वपत्युपपत्न्यां द्वेषे तथोक्तिस्वाभाव्यात् विशेष्येन दृढालिङ्गनत्वादिकं बोध्यते । न इति बहुत्वं निजवर्गापेक्षया गर्वेणैव वा । अयं भावः । प्रायो मधुपजातिरयं तदनुवर्त्ती वहोवेदी च तत्समीपत इतस्ततोऽप्यव्यक्तरवेण भ्रमणलीलत्वात् विशेषतो अस्मान् परितस्तथा चरितत्वात्तदीय दूत एव पीतश्मश्रुरसौ वनमालानिवासित्वात्तथैव सम्भाव्यत इति । तदेवं याभिः किल वयं विस्मारिता विदूरे परित्याजिताश्च तासां तत्रस्थत्वादयोग्यानामेव मानिनीनां प्रसादं वहतु इतीर्ष्या बहुत्वमेकस्यां प्रसादितायामन्यस्या मानात्तस्या अपि प्रसादिनाया मन्यस्या इत्येवं वाहुल्याभिप्रायेण । मधुपतिरिति वहत्विति चैश्वर्येण तदुक्तमेवेत्यस्माकं वा तेन किमित्यनादरः । श्लेषेण मद्यपस्वामीत्यविचारः सौहृदाभावश्च सूचितः ततश्च मद्यपतित्वान्मुख्ये मद्यपे सौहृदं नास्तीति प्रसिद्धेः स च प्रसादस्तेन स्वमाहात्म्यरूपेण मन्यमानोऽपि वैपरीत्या नैव सम्पत्स्यत इत्याह । यदुसदस्यपि विडम्ब्यमुपहासास्पदतां गमिष्यन्तं कथमसौ व्यक्तीभविष्यतीत्याशङ्क्याह । यस्य दूतोऽपि त्वमीदृक् व्यक्ततदीयसुरतचिह्नधारी तस्यैतद्व्यक्तौ किमाश्चर्यमित्यर्थः । इति तस्याः कौशलं दर्शितम् मन्यते । यद्वा । श्मश्रुभिः कृत्वा मा स्पृशेति ॥ १२ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

कुङ्कुमश्मश्रुभिनः मधुपतिः यदुपतिः मानिनीनां सपत्नीनां प्रसादं वहतु प्रसादपात्रं भवतु न वयं प्रसादनीया इत्यर्थः । यदुसदसि विडम्ब्यं हास्यं कृष्णस्य प्रणयित्वमधिक्षेप्यमित्यर्थः । यद्वा यथा विडम्ब्यं भवतीति क्रियाविशेषणम् ईदृक् भुक्तपूर्वपुष्पपरित्यागशीलस्त्वं यस्य भवत्वित्यन्वयः ॥ १२-१३ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

इतीति । इत्थं कृष्णस्य दूते उद्धवे व्रजं गते सति गोप्यः गोविन्दे गतानि निविष्टानि वागादीनि तद्व्यापाराश्च यासां ताः ॥ ९ ॥

तस्य प्रियस्य कृष्णस्य भगवतो यानि कैशोरबाल्ययोः कर्माणि तानि पुनः पुनः संस्मृत्य संस्मृत्य गायन्त्यः त्यक्तलज्जाः रुदन्त्यश्च त्यक्तलौकिकव्यवहारा अपृच्छन्निति पूर्वेणान्वयः ॥ १० ॥

तत्र काचिद्गोपी कृष्णसङ्गमं ध्यायन्ती मधुकरं भ्रमरं दृष्ट्वा तं प्रियेण प्रस्थापितं प्रेषितं दूतं कल्पयित्वा कृष्णेन मां प्रसादयितुं प्रेषितोऽयं दूत इत्यभिमत्येत्यर्थः इदं वक्ष्यमाणमब्रवीज्जगौ यद्वा तस्मिन् भ्रमरे प्रियप्रस्थापितोद्धवदृष्टिं कृत्वा मधुकरापदेशेन उद्धवमेवाब्रवीदित्यर्थः ॥ ११ ॥

तदेवाह दशभिः । मधुपेति । हे मधुप । भ्रमर हे कितवबन्धो नोऽस्माकमङ्घ्रिं चरणं मा स्पृश मा मां नमस्कुरु मा प्रार्थयस्वेत्यर्थः । तत्किमित्यपेक्षायां कृष्णवर्णस्य तस्य श्मश्रूणां लोहितत्वे कारणमुत्प्रेक्षमाणा सासूयं प्राह । सपत्न्याः कुचाभ्यां विलुलिता संमर्दिता या माला अत एव तस्याः कुङ्कुमं येषु तैः श्मश्रुभिरुपलक्षितस्त्वं मा स्पृशेति सम्बन्धः । किं तु यदुपतिः मधुपतिरिति पाठे मधूनां यादवविशेषाणां पतिः तासां नः सपत्नीनां मानिनीनां प्रसादं वहतु प्रसादपात्रं भवतु न वयं प्रसादनीया इत्यर्थः । कुत इत्यत आह । यत् यस्मात् उ इत्यवधारणे विडम्ब्यं प्रणयित्वमिति शेषः । यस्मात् यत्प्रणयित्वं सदसि विडम्ब्यमुपहास्यं कृष्णस्य प्रणयित्वं सभायामधिक्षेप्यमित्यर्थः । यस्माच्च यस्य भगवतो भुक्तपूर्वयोषित्यागिन ईदृग्भुक्तपूर्वपुष्पत्यागशीलो दूतस्त्वमागत इत्यर्थः ॥ १२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

उत्तरकथाप्रसङ्गः क इति तत्राह । ददर्शेति । गोविन्दगतमनआदिभिस्त्यक्तलौकिकाः त्यक्ताः लोकाचाराः पुरुषाग्रतः श्लथितवसनादिदृढीकरणादिलक्षणक्रिया याभिस्तास्तथा ॥ ९ ॥

गायन्त्यः गायतीः रुदन्त्यः रुदतीः कैशोरशैशवावस्थायां गताह्रिय इति लोकाचारविरुद्धाचरणं गानादिकम् ॥ १० ॥

तथाच कृष्णसङ्गमध्यानेन मुग्धा काचिन्मधुकरं दृष्ट्वा प्रियेण कृष्णेन प्रस्थापितं दूतं कल्पयित्वा इदं वक्ष्यमाणमब्रवीदित्यन्वयः ॥ ११ ॥

हे मधुप ! सपत्न्याः मथुरायां स्थितायाः समानभार्याया अधरमधुपानलोलोद्धव ! तस्या आलिङ्गनकाले दृढपीडितकुचाभ्यां विलुलितायामितस्ततो विक्षिप्तायां मालायामनुषक्तकुचकुङ्कुमेन रूषितश्मश्रुभिरङ्कितस्त्वमस्मान् मास्पृश प्रणयकोपात् कितवबन्धो इति सम्बोधयति कितवस्य नवनीतादिपरद्रव्यचोरस्य कृष्णस्य बन्धो ! न केवलं त्वमेव मास्पृश किन्तु स कितवो न स्पृशत्विति भावेन वक्ति । वहत्विति । स मधुपतिः श्रीकृष्णः तस्यां मथुरायां विद्यमानानां मानिनीनां

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

मानधराणां स्त्रीणां प्रसादं प्रणयकोपशान्तिलक्षणमनुग्रहं वहतु नतमूर्ध्नीति शेषः कीदृशं यदुसदसि विडम्ब्यम् अनुकरणयोग्यं सोत्प्रासपूर्वं वक्तव्यं सोत्प्रासः समनाक् स्मितमिति स्वकैतवं परस्मिन्नपि संक्रामयितुं पटुतम इति भावेनाह । यस्येति । यस्य कृष्णस्य दूतस्त्वमपीदृग्भूत इत्यर्थः । हे भ्रमर कितवबन्धो उन्मत्त-पुष्पबन्धो सपत्न्याः भृङ्ग्याः कुचस्पर्शेन विलुलितमाल उद्घुष्टकाम आसमन्तात् कुङ्कुमपुष्परजोमिश्रमुखरोमभिरस्मान्मा स्पृश ईदृक् त्वं यस्य वसन्तस्य दूतस्स मधुश्चायं पतिश्चेति मधुपतिः वसन्तनामा परिवृढः यत्सदसि पुष्पसमूहे विडम्ब्यं स्थिरीकि-र्तव्यमेतन्मानिनीनां भृङ्गीणां प्रसादं प्रसन्नमात्रं वहतु करोतु कृष्णवद्वैलक्षण्यं न करोत्विति वा उन्मत्तः कितवो धूर्त इत्यमरः ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

काचित् कापि परमश्रेष्ठा सा च राधेत्यर्थः । वासनाभाष्ये तत्र सैव व्याख्याता । यत्तत्र तदुत्थापितमाग्नेयवचनम् । "गोप्यः पप्रच्छु-रुषसि कृष्णानुचरमुद्धवम् । हरिलीलाविहारांश्च तत्रैकां राधिकां विना । राधा तद्भावसंलीना वासनाया विरामिता । सखीभिः सा व्यधाच्छुद्धविज्ञानगुणजृम्भिता ॥ इज्यान्तेवासिनं वेदचर-मांशविभावनै"रिति । तत्रैतत् पूर्वं तस्या निर्वेदाख्यं भवान्तरं जातमासीदित्यथापि श्रेयं तन्मूलकतया प्रणयरोषमयोऽपि भाव-विशेषो ज्ञेयः । विचित्रसञ्चारिमयत्वात्तादृशावस्थायाः ततस्त-स्याविमर्शदशमदशानन्तर्यालोचनया वासनाया विरामिता पुन-स्तत्सङ्गमसम्भावनारहिता बभूव । ततश्च तज्जातीयवार्तामसह-माना तदाच्छादनाय देहान्तरेऽपि तद्दुःखपारमपश्यन्ती मुक्ति-रेव वरमिति प्रतिपादनाय वेदचरमांशस्य ज्ञानकाण्डस्य विभावनैरुदाहरणैः । शुद्धेत्यादि यथा स्यात्तथैवाभ्यधात् सम्वादमकरोत् सखीभिः सहेति अथवा वेदचरमांशस्तादृशभा-वप्रकाशको वेदः वासना तादृशभावेतरः सर्व्व एव भावः । शुद्धविज्ञानं च तादृशभावमयानुभव उच्यते । यं सर्वे वेदा आमनन्ति मुमुक्षवो ब्रह्मवादिनश्चेति मुक्त्यवस्थोपरि सामान्य-भक्तेरपि प्राशस्त्याम्नानात् ॥ वाञ्छन्ति यद्भवभियो मुनयो वयं चेति श्रीगोपिकामात्राणामपि सर्वस्पृहणीयभावत्वात् इत्यच्यु-ताङ्घ्रिं भजतोऽनुवृत्त्येत्येकादशानुसारेऽपि यथा भक्त्यैवानुभावो-दयाच्च ध्यायन्तीति मध्ये मध्ये तत्स्फूर्तेः ॥ ११ ॥

मधुपेत्यादि किञ्च सपत्न्या अद्य श्वो यस्यां रमते तस्याः कस्याश्चित् ॥ १२ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

नन्वेवमसूयायां दुष्टा एव जाताः किं ज्ञानेन पुनः सज्जीकि-यन्त इत्याशङ्क्य तासां क्लेशवशादेवायं स्वभावो जातः वस्तुत-स्तूत्तमा इत्याह द्वाभ्याम् । इतीति । समाप्तौ प्रकारे च पूर्वोक्तदोषस्य तदासक्तिः फलं नतु नाश इति वक्तु, गतवाक्कायमानसा इत्युक्तं ननु कथमेवं कल्प्यते दुष्टा एव कथं न भवेयुरित्याशङ्क्याह । गोप्य इति ता मुग्धाः न कापट्यमवि-विवेकं च जानन्ति अतः खेदवशात्तथैव मनोवृत्तिर्भवति तथैव वदन्तीति न दुष्टाः हि युक्तश्चायमर्थः महता कष्टेन हि सर्वप-रित्यागो न सर्वभावेन पूर्वं भगवन्तं प्रपन्नाः किञ्च । गोविन्दो भगवान् तासामेवेन्द्रः सर्वैर्देवैः कृतः अन्यथा तेषां करणं व्यर्थं स्यात् दुष्टस्वामित्वं वा भवेत् । अत एतैर्वचनैर्गतवाक्कायमानसा एव ता इति ज्ञायते अथवा पूर्वमेव गोविन्दं स्वत एव गतानि कायवाङ्मनांसि यासामत एतान्यपि वचनानि न दोषः स्यात् भगवदीयत्वात्तेषां तासां सर्वपरित्यागे निदर्शनमाह । कृष्णदूत इति । साक्षाद्भगवति समागते को वेद किम्वा कुर्युः कृष्णस्य स्वामिनः दूतेऽपि उद्धवे व्रजमागते त्यक्तलौकिका जाताः सर्वापेक्षां परि-त्यज्य प्रकटा भूत्वा तेन सह यत उपविष्टाः किञ्च तस्याप्यग्रे प्रियस्यैव कर्माणि गायन्त्यो जाताः अनेन भगवत्येव निवेदिता वाक् नान्यतः सङ्कोचं लभत इत्युक्तं रुदन्त्यश्च जाताः ॥ ९ ॥

एवमुपवेशनेन कायं गानेन वाचं रोदनेनान्तःकरणमिति साधारण्येन त्रयमपि निवेदितमुक्तम् असाधारणस्वभावमपि त्यक्त-वत्य इत्याह । गतह्रिय इति । स्त्रीणां स्वाभाविको धर्मः लज्जा तामपि चेत्त्यक्तवत्यः किमवशिष्यते तासु । नन्वेतत्सर्वं कादाचि-त्कमित्याशङ्क्य तत्परिहारार्थं विशेषमाह । तस्य संस्मृत्येति । तस्य भगवतः कैशोरबाल्ययोः अवस्थाद्वयसम्बन्धीनि यानि संस्मृत्य पुनः पुनरादरेण स्मृत्वा ताः पूर्वोक्तविधा जाता इति सम्बन्धः ॥ १० ॥

एवमिममपि दोषम्महान्तं मत्वा महता प्रबन्धेन साध्यत्वं निरूपितं ततोऽप्याधिकं दोषं निरूपयन् प्रस्तावनामाह । काचिदिति । तस्य च साध्यत्वमग्रे वक्ष्यति तत उपदेशः अर्थसङ्गतिस्तु पूर्वमुपालम्भनमुक्त्वा स्वासक्तिख्यापनार्थं स्वगतान् भावान् रससङ्गो-पनार्थं काचिदाह तत्रापि व्याजेन अन्यापदेशन्यायेन अन्यथा रसः पुष्टो न भवेत् भगवान् वा गोपिकानां स्वरूपमुद्धवाय प्रदर्शयितुं भ्रमरमपि प्रेषितवान् तदा तं दृष्ट्वा आर्षज्ञानेन भगवदीयत्वं मत्वा काचिदाह यथोद्धवस्य मयोपकारः कृत इति गर्वो न भवेत् अन्या-पदेशन्यायेन तु पदान्युद्धवेऽपि योजनीयानि तदा दोषसम्भाव-नापि भवति द्वितीयेऽप्यर्थे न कापि सम्भावना स्यात् मधुकरो भ्रमरः वस्तुतोऽयं विपरीतनामा मधु भक्षयति नतु करोति अतो वसन्तो मधुकरः अयं मधुपोऽपि मधुकरत्वेनोच्यते अन्यथा पुष्पाणि तदभिमानिन्यो वा देवता एन न प्रवेशयेयुः पूर्वं हि सा कृष्ण सङ्गमं ध्यायन्ती स्थिता प्रथमतो भगवता सह मनसा सम्बन्धं प्राप्य पश्चान्मानवती जाता तदा भगवानन्यां गृही-तवानिति परिकल्प्य सा न समीचीनेति च पुनर्भगवान्मामेव प्रार्थ-यितुं भ्रमरं प्रस्थापितवान् इति ज्ञातवती तदाह । प्रियप्रस्था-पितं दूतं कल्पयित्वेति इदं वक्ष्यमाणमब्रवीदिति ॥ ११ ॥

आदौ हि मानवत्याः क्रोधेन पारुष्यं भवतीति ततः प्रथमं तामसतामसी तद्भावयुक्ता वा दूषणमाह । मधुपेति । सर्वत्र हि रसे विप्रलम्भे दूतो नायकश्च इष्यते यथा अज्ञातपीडागमा अधमस्ये-त्युभयोर्दूषणं तथात्राप्याह । मधुप कितवबन्धो इति । मतान्तरभाष-यामिति कामशास्त्रानुरोधिनी निरूपितेति न समाधिभाषायां भक्तिमार्गे वा विरोधः यद्यपि भ्रमरो मधु भक्षयति तथाप्यन्यार्थे-ऽपि सक इति तत्सूचकत्वेन निन्दापि भवति अन्यापदेशे तु यादवाः सर्वे पानरता इति लोक प्रसिद्ध्या निन्दा भवति यद्यपि भगवद्भक्ता भग-वांश्च न भवति अनुकरणं साधारणाविगीतधर्माणामेव नतु सर्वेषां

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ॥

तथापि साधारण्यं न प्राप्तो धर्मः श्रुतोऽत्यन्तं खेदाय भवति वस्तुतस्तु सरस्वती अन्यार्थमप्याह। भगवान् स्वामी कालश्च दूतः स्वयं च श्रुतय इति कालद्वारा हि भगवान् वक्तव्यो ज्ञातव्यो वा भवति अत्र सम्वत्सरात्मकः काल आदौ मधुं वसन्तं पात्येव ततः कितवस्य ग्रीष्मस्य वञ्चयित्वा सर्वसंहारकस्य बन्धुरपि भवति स चेद्भगवत्सम्बन्धिनं वृन्दावनादिभूप्रदेशं भगवच्चरणं वा तत्रत्यं स्पृशेत्तदा क्लेशो महानेव भवेदिति पादस्पर्शं निषेधति मास्पृशाङ्घ्रिमिति । पूर्वं तु भगवति विद्यमाने निदाघघन्ह्यर्कभवः क्षुधो रसं न गृहीतवानित्युक्तम् अधुना दूरे भगवानिति मत्वा कदाचित्स्पृशेदिति निषेधः अतो नमस्कारार्थमागतं भ्रमरमुद्धवं वा निषेधति । ननु नमस्कारे को दोष इत्याशङ्क्य मधुपत्वाच्चरणकमलमकरन्दमपि पास्यतीति निषेधति तदा चरणौ गतसारौ भगवदुपयोगाय न भवेयातां मधु मादकं च यः पिबति स न स्पृश्यो भवति ननु दूतोऽहं भगवता आकरणार्थं प्रेषितः नतु कश्चित् अहमुदासीनः स्त्रीणां च भोगार्थिनां तादृशी अवस्था उचितेत्याशङ्क्य स हि वञ्चनार्थमेव त्वां प्रेषितवानित्याह । कितवबन्धो इति । कितवोऽयं वञ्चकः तत्रापि धूर्तः अतः फलस्याभावास्मानापनोदनादिसाधनं व्यर्थमिति मदीय मास्पृशेति निषेधो युक्तः अनेनोद्धवस्यापि सम्माननार्थं निषेध एव इममर्थमभिप्रेत्यैव निषेधः किञ्च पत्न्याः कुचविलुलितमाला कुङ्कुमश्मश्रुभिरुपलक्षितः सपत्नी द्यौः तस्या मेघाः कुचस्थानीयाः तत्र विलुलिता माला विद्युतः तत्र कुङ्कुमसदृश्यो दीप्तयः तत्सहिताः श्मश्रुस्थानीया धाराः तैरपि सहितो मा स्पृश शरदेव परमस्माकं हितकारिणीति वर्षापर्यन्तं निषेधः न केवलं ममैव किन्तु सर्वासामेवेत्युक्तं न इति । यो हि सम्माननार्थमायाति सहि द्विष्टपदार्थं दूरीकृत्य समायाति ननु तत्प्रदर्शयन् भ्रमरस्य श्मश्रुस्थानीयानि रोमाणि मकरन्दसम्बन्धात् पीतानि भवन्ति तदङ्गसङ्गीकृत्य माल्यपुष्पेषु मकरन्दार्थं गमनं सूच्यत इति भगवत एव मालास्थपुष्पाणां मकरन्दसम्बन्धः तत्र प्रार्थितानां मकरन्देऽन्तःप्रवेशाभावात् श्मश्रुतत्सम्बन्धो बहिरेव तथा पीतत्वं कुङ्कुमसम्बन्धादेव नान्यथा घटेततथोद्धवस्यापि भगवदुपभुक्तमालाप्तौ आघ्राणेन कुङ्कुमसम्बन्धः सम्भवति तस्यापि श्मश्रूणि तादृशान्येव प्रायेणेति लक्ष्यते निरन्तरमालाघ्राणात् रञ्जितान्येव श्मश्रूणि आघ्राणं च मकरन्दपानं वा बहिःप्रदेश एवेति न भगवदङ्गरागेण पीतत्वं विलुलितपदेन च सम्भोगो लक्ष्यते न त्वालिङ्गनमात्रं तथा सत्यमुरोधेनापि तथाकरणं सम्भवति तदा नात्यन्तं द्वेष्यः श्रमश्च तस्याः सूच्यते तेन महासौरतं द्योतितं तस्मान्मानसृष्टिजनकत्वात् अर्थत्रयेऽप्यङ्घ्रिस्पर्शनिषेधो युक्तः ननु भवत्यो हि भगवदीयाः भगवांश्चेत्तथा मन्यते कथं भवतीनामस्वीकार इत्याशङ्क्याह । वहतु मधुपतिरिति । कालपक्षे ऋतुद्वयस्यैव निरोधः आद्यसङ्ग्रहार्थमाह । मधुपतिरिति । वसन्तसम्बन्धी सम्वत्सरः तत्रत्यानां मानिनीनां प्रसादं वहतु ता हि मानं परित्यज्य प्राप्तसन्तोषाः कालाय प्रसादं कुर्वन्ति यतो वर्णनायां तत्सम्बन्धेन महत्त्वमापद्यते अस्माकं तु न तत्रापि प्रसादः शरदेव भगवत्प्रसादस्य जातत्वात् ऋतुद्वये निषेधः वसन्ते शरदि च तस्य प्रशंसा तथापि वसन्ते भगवत्कृतः कालोत्कर्षः शरदि तु सर्वेषेति वसन्ते हि यज्ञा अग्नयः संस्काराश्चेति सपत्नीभिर्हि प्रसादतया भगवते कुचकुङ्कुमं दत्तं यो हीश्वरः स चेद्दासीनां प्रसादं लभते तदा यदुसभायां वाच्यता भवत्येव अन्योपभुक्तस्यान्येन ग्रहणं देवव्यतिरिक्ते वाच्यतापादकं महतः सुतरां तर्हि भगवता कथं स्वीकृत इत्याशङ्क्याह । मधुपतिः । मधुदेशस्य मथुरायाः पतिः ईर्ष्यया वा यथेष्टं मधुपानकर्ता अतो देशस्वाभाव्याद्वस्तुस्वाभाव्याद्वा प्रसादग्रहणं तादृशस्याप्ययं प्रसादं गृह्णातीत्ययमपि नादरणीयः अनेनैव सूचयति अत्रैवागत्य एकान्ते परं भोगः कर्तव्यः । ननु मथुरायां यादवा उपहसिष्यन्ति तत्र चावश्यं यादवत्वाद्यदुसभायां गन्तव्यं सजातीयवाच्यता च दुःसहा तथापि इतरसम्बन्धात्स एव तत्प्रसादं वहत्वयम् अस्मासु तु गतास्वपि तथैव करिष्यति प्रसादत्वेन परं कुङ्कुमं दास्यति एतच्च नापेक्षितमिति स्वार्थे निषेधः प्रशस्ता एव धर्मा भगवदीया ग्राह्या इति अप्राशस्त्यार्थे विडम्ब्यमित्युक्तम् ननु भवतीभ्योऽप्येतदेव दास्यतीति अत्र किं प्रमाणं वस्तुतस्तु तास्त्यक्ष्यतीशङ्क्याह । यस्य दूतस्त्वमीदृगिति । तत्सम्बन्धी भवांस्तस्यातिप्रियः तुभ्यं चेद्ददाति अस्मभ्यमपि दास्यति अन्यथा दैन्येन प्रेषयन् त्वां पीतश्मश्रुं न प्रेषयेत् अतो ज्ञापनार्थमेव तथाविधं प्रेषितवान् अनेन तथैवं ज्ञातमिति प्रतिभाति गाढसुरते व्यजनाद्यपेक्षणात् पुरे सर्वतो निरोधेन सहजवाय्वभावात् पुरुषस्य यादृशस्यापि तत्र स्थातुमयुक्तत्वात् पूर्वोपभुक्ताः अस्मान् तस्याः दासीकर्तुं व्यजनार्थमाकारयतीति एतच्च सर्वथा आवश्यकमिति भ्रमरोद्धवपक्षे निषेधो युक्तः वसन्तकृतश्चोत्सवः धर्मरूपः यादवसभायां विडम्ब्य एवानुकार्यः ते हि लौकिकप्रधानाः अनुकरणमात्रेण धर्मं करिष्यन्तीति कालकृतो धर्मः भगवदीयकृताधीन इति वा प्रमाणमित्याकाङ्क्षायां यस्य मुख्यस्य कालस्य भगवतो वा सम्बन्धी दूतः कलिस्वरूपस्त्वमीदृक् श्यामः नहि धर्मे उत्कृष्टे तदाधारः श्यामो भवति अतोऽस्मान् प्रति ऋतुत्रयनिषेध एव युक्तः पुष्टिमार्गे हि दक्षिणायनस्यैव प्राशस्त्यात् तत्र हि रात्रयः स्थूला दिवसाश्च सूक्ष्मा इत्यनङ्गीकारे मुख्यो हेतुः ॥ १२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

त्यक्तलौकिकाः स्वसुखेनैवोपपत्यस्पष्टीकरणात् त्यक्तलौकिकव्यवहारा बभूवुः ॥ ९ ॥

रुदन्त्यश्च बभूवुः कैशोरबाल्ययोरिति । बाल्यमारभ्यैव तस्मिंस्तासां प्रेमा निरुपाधिक एव न तु कैशोर एव कामोपाधिक इति भावः ॥ १० ॥

काचिदिति । ल्हादिनी शक्तिसारवृत्तिरूपस्य प्रेम्णोऽपि या सप्तमी भूमिका महाभावस्तन्मयी श्रीवृषभानुनन्दिनीयमिति वैष्णवतोषिणी कृष्णकर्तृकं सङ्गमं मथुराङ्गनासु ध्यायन्ती ध्यानेन कल्पयन्ती अत एव उद्भूतमाना प्रियेण श्रीकृष्णेन मां प्रसादयितुं प्रस्थापितोऽयं दूत इति कल्पयित्वा कमपि मधुकरमब्रवीत् यद्वा मधुकरापदेशेनोद्धवमेवाब्रवीदित्यर्थः ॥ ११ ॥

स्वचरणकमलसौरभलोभेन भ्रमन्तं भ्रमरं वीक्ष्य दिव्योन्मादवती श्रीवृषभानुनन्दिनी प्रजल्पति । हे मधुप ! भ्रमर ! कितवस्य धूर्तस्य एवं मदर्थोज्झितेत्यादिना न पारयेऽहमित्यादिना आयास्य इति दौत्यकेन च मिथ्यावचनवृन्देन वञ्चकस्य कृष्णस्य बन्धो ! बन्धुतारूपदौत्यकारिन् ! अङ्घ्रिं मास्पृश । ननु किमिति

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

नमस्कर्तुं न ददासि तत्राह । हे मधुप ! मद्यप मधु मद्ये पुष्परसे इत्यनेकार्थवर्गः मद्यपस्पर्शे चरणस्यापावित्र्यं स्यादतो नमश्चिकीर्षा चेद्दूरमपसृत्य नमस्कुर्वीति भावः । नन्वदुष्टेऽपि मयि मिथ्या मद्यपत्वपरिवादं किमर्पयसीति तत्र नायं परिवादः किन्तु यथार्थमेव वच्मीत्याह । मम सपत्न्याः कुचयोः कृष्णवक्षःसंघर्षेण विलुलिता विमर्दिता या माला किंवा कुचाभ्यामेव विलुलिता या कृष्णस्य वनमाला तत्सम्बन्धि कुङ्कुमयुक्तैः श्मश्रुभिर्मा स्पृशेति भ्रमरस्य स्वाभाविकश्मश्रुपीतिम्न एव तथारोपः तेन च मानिनीं मामनुनेतुं त्वमिहायातोऽस्यथ च तथाभूतकुङ्कुमश्मश्रुप्रक्षालनं विनैवेति विवेकाभाव एव मद्यपानलक्षणम् एतद्दर्शनया मानो वर्ध्येत एव नतु निवर्त्येत इति बुध्यस्वेति भावः । ननु यथा तथास्तु त्वं तावत् प्रसीदेति तत्राह । हे मधुप ! मद्यपालक ! तत्र गत्वा निजप्रभोः पेयं मद्यमेव पालय पिब च तत्कर्मैव त्वं कर्तुं शक्नोषि नतु दौत्यं निर्बुद्धित्वादिति भावः । नन्वेवं चेदलं मया सम्प्रत्यहं पुनर्मथुरामेव यामि स एव गोपेन्द्रनन्दनः स्वयमेत्य त्वां प्रसादयित्वित्यत आह । वहत्वित्यादि । मधूनां यादवविशेषाणां पतिः सम्प्रति सोऽभूत् ब्रजेश्वरीगर्भजातत्वेन गोपजातिरपि भाग्यवशात् क्षत्रियजातिरभूदतस्तन्मानिनीनां क्षत्रियस्त्रीणां प्रसादं वहतु प्राप्नोतु ता एव सदा प्रसादयतु किमस्माभिर्निकृष्टाभिर्गोपस्त्रीभिरिति भावः । अत्र बहुवचनेन वहधातुप्रयोगेण च मधुस्त्रीणामानन्त्यात्तासामेव तत्प्रभुत्वात् एकस्यां प्रसादितायामन्यस्या मानोत्पत्तेस्तस्यामपि प्रसादितायामन्यस्या इत्येवं तासां प्रवाहरूपेण प्रसादं प्राप्नोत्वित्यास्मत्सन्निधावागमने तस्यावसर एव नास्तीति भावः । ननु सदीयसर्वसौभाग्यनिधे ! देवि ! मैवं वादीर्यदि त्वयि तस्य मनो नास्ति तर्हि कथमहं तेन दूतः प्रस्थापितस्तत्राह । यस्य दूतस्त्वमीदृक् । क्षत्रियस्त्रीजनसुरतचिन्हधारी तस्य यदुसदसि विडम्ब्यं विडम्बनमेव यदुस्त्रीणां तत्कृतस्य धर्मलोपस्य व्यक्तीभावेन कुपितैस्तासत्पतिभिस्तस्य विडम्बनमेव करिष्यत इति भावः । यद्वा यस्य त्वमीदृक्दूतस्तस्ययत् यदुसदस्तत्र आधिकरण एव विडम्बनं भावि गोपेन तन्नारीणां भुक्तत्वात् यदूनां निन्दैव सर्वदेशे भाविष्यतीत्यर्थः । श्लेषेण यस्य दूतस्त्वमीदृक् स च मधुपतिर्मधूनां मद्यानां पतिरिति मद्यप एव यतो मदस्य विक्षेपेणैव त्वादृशो भ्रमरो दूतः कृत इति अत्र कितवेत्यसूया सपत्न्या इत्यादिनेर्ष्या अङ्घ्रिं मास्पृश इति मदः वहत्वित्यादिना अवधीरणं यदुसदसीत्यादिना अकौशलोद्गार इत्ययं प्रजल्पः यदुक्तमुज्ज्वलनीलमणौ "असूयेर्ष्या मदयुजा योऽवधीरणमुद्रया । प्रियस्याकौशलोद्गारः प्रजल्पः स तु कीर्त्यते" इति ॥ १२ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

इयं चेर्ष्या तासां विरहव्याकुलचेतसां प्रणयकोपनिबन्धना नतु द्वेषनिबन्धनातस्तदुपदेशार्थं भृत्यप्रेषणं भगवत उचितमित्याशयेनाह । इतीति । गोप्य इत्यपृच्छन्निति पूर्वक्रियया अन्वयः इति वदन्त्यः एवम्भूता जाताः इति वा । ननु प्रणयकोपवतीनामप्यत्युपालम्भो न युक्त इत्याशङ्कानिवारणार्थं गोप्य इत्युक्तं तथा चात्यन्तं विवेकहीनानां मुग्धानामियमुक्तिर्न दौष्ट्यमूलेति भावः । तासां दुष्टत्वे तु तत्पतित्वसिद्ध्यर्थं गवामिन्द्रादिभिर्भगवान्नाभिषिक्तः स्यादिति सूचयितुं गोविन्दपदप्रयोगः यद्वा यो यज्ञरक्षणार्थं सप्तदिनपर्यन्तं गोवर्द्धनं धृतवान् तेन च गवामिन्द्रत्वं प्राप्य गोविन्देति संज्ञामवाप्तवान् स च विरहानलज्वालासु ता निक्षिप्य यद्युपेक्षेत तर्हि तासामियमुक्तिर्नायुक्तेति ध्वनयितुं गोप्यो गोविन्द इत्युक्तं किञ्च प्रियगतवागादिव्यापाराणामुपालम्भात्मकव्यापारोऽपि तत्रैवोचित इत्याशयेनाह । गतेति । अत एव कृष्णदूते व्रजं प्राप्ते सति त्यक्तं लौकिकं गृहकृत्यादिकं याभिस्ताः प्रियदूतसमागमनाद्यासास्त्वेवम्भूता ह्रिया जाता तासां प्रियसमागमनसम्भाविता ह्रिया तु वाचामप्यगोचरश्रुता इति भावः । कृष्णेन मनः आकृष्य गतेनास्मत्स्वामिना वयं स्मृता यतोऽस्मद्व्रजे तेन स्वदूतः प्रेषितस्तस्माद्यावत्कालमस्यात्रावस्थानं तावत्कालं सर्वं लौकिकं विहायास्माकमत्रस्थितिरेतत्सन्निधावेव न्याय्येति विचार्य तथाभूता जाता इत्यर्थः ॥ ९ ॥

किञ्च तस्य यानि कैशोरबाल्ययोरवस्थयोः सम्बन्धीनि प्रियकर्माणि तानि संस्मृत्य संस्मृत्य गायन्त्यो रुदन्त्यश्च गतह्रियो जाता गायन्त्यो रुदन्त्यो गतह्रियश्च पूर्वमलोकोत्करूपा जाता इति वा गायन्त्य इति तासां वाग्व्यापारस्य रुदन्त्य इति कायव्यापारस्य संस्मृत्येति मनोव्यापारस्य भगवद्गतत्वं बोधितं सकललज्जा इत्यनेनासाधारणधर्मोऽपि याभिस्त्यक्तस्तासु किमवशिष्यत इति सूचितं स्मरणप्रागबोधनार्थं संस्मृत्येति द्विरुक्तिः तथा चानुक्षणं सर्वभावेन तासां तत्परत्वमित्यर्थः ॥ १० ॥

गोपिकासमुदायस्योपालम्भैः परितोषमलभमानायाः परममनस्वाः श्रीवृषभानुनन्दिन्याः ह्लादिन्याः शक्तेर्दुरवस्थादृतिं काचिदिति । काचित्कृष्णसङ्गं ध्यायन्ती मधुकरं दृष्टवती यद्वा च तं प्रियेण मां प्रति पृथक् प्रस्थापितोऽयं दूत इति कल्पयित्वा इदं वक्ष्यमाणमब्रवीत् मधुकरस्तु कश्चिदकस्मात्सौरभ्यलोभात्तत्र समागतः भगवतैव वा प्रेयसीप्रेमातिरेकमुद्भाव्य दर्शयितुं प्रेषितः स्वयमेव प्रेयस्याश्चित्रजल्पमाधुरीपिपासया तद्रूपेण समागत इति वा कृष्णसङ्गं लब्धवती पूर्वं प्राप्तं कृष्णसङ्गं स्मरन्तीति वा प्रियसङ्गमः कदा भविष्यतीति विलपतीति वा यद्वा नागरस्त्रीणां प्रियेण सार्द्धमिदानीं सङ्गमोऽस्तीति चिन्तयन्ती मम परितोषायेयं न समीचीनेति कोपनिवृत्त्यर्थं वाऽयं दूतः प्रेषित इति कल्पयित्वा वा च तद्व्याजेनोक्तं प्रत्येवोक्तवतीति वा मधुकरशब्दप्रवृत्तिस्तु तेनैव स्वपानार्थं प्राचीनकर्मणा मधुकृतं स्वकृतमेव सर्वोऽपि भुङ्क्ते इति प्रसिद्धेरित्यभिप्रायेण मधुकृन्तनाह ॥ ११ ॥

पादसरोजसौरभलोभात्तत्समीपमागतं तं प्रियशिक्षितोऽयं मां प्रसादयितुं मदङ्घ्रिं स्पृशतीति कल्पयित्वा प्रजल्पति । मधुपेति । हे मधुप ! नोऽस्माकमङ्घ्रिं चरणसरोजं मास्पृश मधुपत्वात्स्पृशन् अङ्घ्रिसरोरुहमकरन्दमपि पास्यसीति मदङ्घ्रिर्निःसारो भविष्यति तत्रत्यप्रेयस्या रममाणेन मदागमनभयान्मदङ्घ्रिभङ्गार्थं त्वं प्रेषितो न स्पर्शार्थमिति तव दौष्ट्यं मया बुद्धमतस्त्वं गत्वा स्वस्वामिनं प्रति ब्रूहि भो भगवन् ! सा वदति मया कदापि तत्र नागम्यते यथेष्टं रमतां तव स्वामी किमर्थं स्पर्शव्याजेन मदङ्घ्रिभङ्गार्थं त्वं प्रेषितः अन्यथान्यमेव प्रेषयेदितीति संबोधना-

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

शयः । यद्वा "मधु पुष्परसे मद्ये" इति कोशात् हे मद्यप ! तव स्पर्शोऽपवित्रतासम्पादकोऽतस्तवात्यन्तभक्तिरस्ति चेत्तर्हि दूरे स्थित्वा नमस्कारं कुर्विति भावः । ननु भवतीं प्रति त्वत्प्रियेणाहम्प्रेषितो भगवतोऽस्यै प्रियायाश्चरणस्पर्शेनात्मानं कृतार्थीकर्तुमिच्छामीति महापातकित्वेन मामुत्प्रेक्षस इति चेत्तत्राह । हे कितव बन्धो ! कितवस्य न पारयेऽहं निरवद्यसंयुजामित्याद्युक्त्वापि परित्यज्य गतत्वाद्वञ्चकस्य श्रीकृष्णस्य बन्धो ! स च मधून्पातीति मधुपस्त्वं च मधुप इति नामैक्यात् वर्णसाम्यात् वञ्चकत्वरूपधर्मसादृश्यात् मधुपतिदूतयोः सख्यावश्यम्भावाच्च तद्बन्धुस्त्वं तस्मान्न मया त्वयि दोष आरोप्यतेऽपि तु यथार्थमेवाऽभिधीयतेऽतस्त्वं न केवलं मधुपः किन्तु शठबन्धुरपीति सर्वथा त्वं दोषविनिर्मुक्तत्वात् परमपवित्राभिरस्माभिरस्पृश्योऽसीति भावः । किञ्च तेनाप्यागत्यास्मदङ्घ्रिसमीपे चिरं पतितेनाप्यस्मद्दुःखमपनेतुमशक्यं त्वद्विधेन दूतमात्रेण क्रियमाणचरणस्पर्शमात्रेण दुःखापनयस्य का प्रत्याशेति निष्फलमिदं कर्मणानुष्ठेयमित्यपि चरणस्पर्शनिषेधेन ध्वनितम् । ननु भो मातः दूरे स्थित्वैव श्मश्रुभिरेवाहं त्वदङ्घ्रिस्पर्शं करिष्यामि तेन च स्वस्वाम्याज्ञापालनं स्वपापापाकरणं च मम सेत्स्यतीत्याशङ्क्य ससम्भ्रममाह । श्मश्रुभिस्तु सर्वथा मा स्पृश किमर्थमित्यपेक्षायामाह । सपत्न्या इति । यर्ह्येदानीं रमते तस्याः कुचाभ्यां विलुलिता विमर्दिता या श्रीकृष्णवनमाला कुचयोः कृष्णवदनसङ्घर्षेण मर्दिता या मालेति वा तत्सम्बन्धि कुङ्कुमं येषु तैस्तथा च स्पर्शमात्रेण दहनक्षमविषसम्पृक्तश्मश्रुभिः स्पृष्ट्वा चरणमारभ्य शिखापर्यन्तं दग्धुं समागतोऽस्यतः कृपया दूरे तिष्ठेत्याशयः यद्वा ननु मयि मद्यपता मत्स्वामिनि कितवता च भीमत्या त्वया कथमवधारितेत्यपेक्षायामाह । सपत्न्या इति । तथा चास्मत्कोपोद्दीपकतादृशकुङ्कुमवद्भिरेव ननु प्रक्षालितैः श्मश्रुभिरस्मत्कोपनिवृत्त्यर्थमस्मच्चरणं स्प्रष्टुं तवागमनमेव विवेकशून्यस्य तव मद्यपत्वं बोधयति तव स्वाम्यपि यदि साधुः स्यात्तर्हि तत्र मत्वा उदासीनतया तिष्ठेत् तदनुरोधेन तदालिङ्गनमात्रं वा कुर्यात् ननु तथा तेन कृतं किन्त्वतिसौरतं कृत्वा श्रान्तो वर्तते श्रान्तत्वादेव विवेकोऽपि तस्य नष्टवत्प्रतिभाति यतस्त्वादृशं मद्यपं प्रेषितवान् नापि श्मश्रुक्षालनादिकृत्वा समाहितो भूत्वा गन्तव्यमिति शिक्षितवानत एव तत्कापट्यमस्माभिर्ज्ञातमिति तच्चेष्टा तस्य कितवत्वं ज्ञापयति यद्वा मधुपश्चासौ कितवश्च तस्य बन्धो ! मधवो यादवास्तत्पतिर्वा मधुपः तेषां प्रायेण मद्यपत्वादयमपि यादवत्वाद्वा तदर्थं मद्यपालकत्वाद्वा प्रियाधरामृतलक्षणमधुपानकर्तृत्वाद्वा मधुपः त्वमपि तच्छिष्यभूतः मधुपानादिकर्मानुष्ठानक्षमो ननु विवेकसाध्यं दौत्यं कर्तुं योग्यस्तस्मात् गुरुसमीपं गत्वा मधुरक्षणादिरूपायां तत्सेवायामेव स्थित्वा तिष्ठ ननु तथाभूतश्मश्रुप्रदर्शनेन तदपकीर्तिं लोके प्रसारयेत्याशयः । विप्रलम्भे शृङ्गाररसे दूतनायकयोरुभयोर्दूषणं तत्पोषकत्वाद्रसशास्त्रानुगुणं "निःशेषच्युतचन्दनं स्तनतटं निर्मृष्टरागोऽधरो नेत्रे नूनमनञ्जने पुलकिता तन्वी तवेयं तनुः । मिथ्यावादिनि दूति बान्धवजनस्याज्ञातपीडागमे वापीं स्नातुमितो गतासि न पुनस्तस्याधमस्यान्तिकम्" इत्यादौ तथा दर्शनात् सपत्न्या इत्येकवचनस्य न इति बहुवचनस्य चाभिधानेन स्वस्य तदपेक्षयोत्कृष्टता ध्वनिता तस्य श्मश्रुलौहित्ये कुङ्कुमसम्बन्धाल्लौहित्यमिति तदारोपः । नन्वेवं चेत्सम्प्रत्यहं मथुरां प्रति गच्छामि स्वयमेव श्रीयशोदानन्दनः समुपागत्य त्वां प्रसादयिष्यतीति चेत्तत्राह । वहत्विति । मधूनां यादवविशेषाणां मधुदेशस्य वा पतिः मधुमानिनीनां प्रसादं वहतु ताः प्रसन्नाः करोतु तथा च भाग्यवशाल्लब्धमधुपतित्वस्य स्वमानिनीनां प्रसादन एवास्ति सम्प्रत्यधिकारो न तु निकृष्टानां गोपिकानामस्माकमतो मिथ्यैव ब्रवीषि स्वयमेवेत्यादि तस्मात्सङ्कोचमपि विहाय तासां प्रसादं वहत्वित्यस्माभिरप्यनुज्ञायत इति भावः । तासां बाहुल्यात्प्रसादन एव तस्यायुर्गमिष्यति अस्मत्प्रसादनायागन्तुं तस्यावकाश एव दुर्लभ इति सूचयितुं मानिनीनामिति बहुवचनं यद्वा युष्मस्माभिस्त्वदागमनकृत्यं श्मश्रुभिस्तादृशकुङ्कुमरूपतन्मानिनीनां प्रसादं धृत्वास्मभ्यं दातुमागतोऽसि तस्य च मस्तके लापयितुमुचितस्य चरणे लापनं मद्यपस्य तवोन्मादविजृम्भितम् अस्माभिस्त्वेवंविधवस्तु चरणेनापि न स्पृश्यते गुरुदेवतातिरिक्तोपभुक्तैवंविधवस्तुधारणस्य निषिद्धत्वात् अहो नास्ति तवापराधः स एव धूर्ताधिराजोऽस्मदुपहार्यं निषिद्धवस्तुप्रदानाय त्वां प्रेषितवान् त्वमपि मद्यपत्वाद्विवेकमकृत्वैवागतवान् अतः कस्मादस्मांस्तत्र गमनार्थं प्रार्थयसि तत्र गतास्वप्यस्मासु प्रसादत्वेन परं कुङ्कुममेव दास्यति अतिप्रियाय तुभ्यमपि तस्यैव प्रदानात्तज्ज्ञापयितुमेव तथाविधश्मश्रुमतो दूतस्य प्रेषणाच्च अपरं कैतव्यं तस्य ज्ञातमस्माभिः किं तदिति चेद् शृणु गाढसुरते श्रमापनोदनार्थं खलु वायुरपेक्षितः स च स्वाभाविकः सर्वतो निरुद्धे पुरे दुर्लभः व्यजनवायुस्तु कर्तृसाध्यः तत्कर्ता पुरुषस्तु त्वादृशोऽपि तत्र स्थातुमयोग्यस्तस्मात्पूर्वोपभुक्ताः तदर्थं दासीः कर्तुमाकारयतीति तच्च अस्मास्वन्तरेऽप्यशक्यमिति । ननु स्वयमपि यं प्रसादं धारयति तद्धारणे भवतीनां को दोष इति चेत्तत्राह । वहतु मधुपतिरिति । मद्यपस्य तस्यैव तद्धारणं योग्यं न त्वस्माकमिति भावः । मद्यपत्वादेव ममापकीर्तिर्भविष्यति न तु तासां काचिद्ग्लानिरित्यपि तेन विचारितं नापि यदुसभायामुपहासकरमिदं कर्मेति चेत्याशयेन प्रसादं विशिनष्टि । यदुसदसि विडम्ब्यमुपहासास्पदं ननु तत्र केनैवंविधं कर्म ख्याप्यत इति चेत्तत्राह । यस्य दूतस्त्वम् एतत्पर्यन्तं ख्यापनायागतेन त्वया सन्निधाने कथं न ख्यापितं स्यादिति भावः । ननु तत्रावसराभावात्तूष्णीमेव मया स्थीयत इति चेत्तत्राह । ईदृक् एवंविधश्मश्रुधारिणस्तव दर्शनमपि तस्यापकीर्तिकरमिति भावः । ईदृक् मद्यपत्वात्पट्टसुरतचिह्नधारी सोऽपि मद्यपोऽतः स्वसदृशस्त्वमेव तेन दूतः कृतः विवेकी कश्चित्तस्य हितैषी यदि भवेत्तर्हि एवं बोधयेत् भो व्रजराजकुमार ! किमिह स्वस्य यदूनां चापकीर्तिकरं कर्म कर्तुं प्रवृत्तोऽसि व्रज एव गत्वा रहसि सखीभिरेव किमर्थं न रमसे इत्यप्यनेन ध्वनितम् । यदुसदसि प्रसादं वहतु सर्वत्र विडम्ब्यामिति वा एतदारभ्य दशभिः श्लोकैर्दशाङ्गश्चित्रजल्पोऽत्र मुनिना वर्णितस्तदङ्गानि तु प्रजल्पादीनि तदुक्तम्—

> चित्रजल्पो दशाङ्गोऽयं प्रजल्पः परिजल्पितः ।
> विजल्पो उज्जल्पसञ्जल्पौ अवजल्पोऽपजल्पितम् ॥
> आजल्पः प्रतिजल्पश्च सुजल्पश्चेति कीर्तितः इति ।
> असूयेर्ष्यामदयुजा यो ऽव धीरणमुद्रया ।
> प्रियस्याकौशलोद्गारः प्रजल्पः स तु कीर्तित इत्युक्तं ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

प्रथममङ्कमाद्यपद्य दर्शितं तत्र कितवेत्यमूया सपत्न्या इतीर्ष्यो अङ्घ्रिं मा स्पृशेति मदः वहत्वित्यवधीरणं यदुसदसीत्यकौशलो-द्गार इति उद्धवपक्षे हे मधुप ! मधुपते भगवद्ध्यानपरां तत्प्रि-यामवलोक्य तत्पादपद्मं द्रष्टुं नम्रीभूतं श्मश्रुभिर्मदङ्घ्रिं स्प्रष्टुमि-च्छतीति प्रकल्प्य निषेधति । मास्पृशेति । तिलकदानावसरे सम्प्रति वा श्मश्रुषु पतितान्कुङ्कुमकरणानालक्ष्याह । सपत्न्या इति । समा-नमन्यत् रसशास्त्रानुरोधेनेत्थं वर्णयता मुनिना स्वशास्त्रसि-द्धान्तोऽपि निरूपितः गोपिकानां श्रुत्यवतारत्वात् तथा हि काचि-त्तत्त्वमस्यादिरूपा मुख्या श्रुतिर्मधुकरं स्वकर्म... मधुसदृशतत्फ-लभोक्तारं जीवात्मानं दृष्ट्वा करुणाक्रान्तस्वान्ता तस्य कृष्णस्य सङ्गमं ध्यायन्ती "कृषिर्भूवाचकः शब्दो णश्च निर्वृतिवाचकः । तयोरैक्यं परं ब्रह्म कृष्ण इत्यभिधीयते" इत्युक्तत्वात्कृष्णेन सच्चिदानन्दस्वरूपेण परब्रह्मणा सङ्गममभिन्नत्वं ध्यायन्ती प्रियेणानन्दात्मत्वात्परमं प्रेमास्पदेन प्रख्या-तत्राभिशयवती पितं प्रवेशितं दूतं कल्पयित्वेदं वक्ष्यमाणमब्रवीत् जीवा-त्मनः प्रियप्रस्थापितत्वम् "अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणी"ति श्रुतिसिद्धं श्रुतिरूपनायिकासङ्गमानन्दानुभ-वार्थं ब्रह्मणो जीवात्मभावेन दूतत्वमवगन्तव्यं तथा च श्रुतिः रूपं रूपं प्रतिरूपो बभूव तदस्य रूपं प्रतिचक्षणायेति इदं वक्ष्यमाणं वाक्यं प्रियप्रस्थापितं दूतं कल्पयित्वा ब्रवीदित्यपि द्रष्टव्यं यदब्रवीत्तदुदाहरति । हे मधुप ! पानोदकंमधुतुल्य-विषय रसपानपरायण ! यद्यपि त्वं कर्तृत्वभोक्तृत्वविनि-र्मुक्तः सच्चिदानन्दघनस्तथापि यत्सम्पर्कादनर्थपरम्परां प्राप्तोऽसि तं त्वं न जानास्यतोऽहं त्वां बोधयामीत्याशयेनाह । हे कितव-बन्धो ! त्वत्तः सत्तां प्राप्य त्वामेव तत्तद्विषयसुखरूपमधुलवान्प्र-दर्श्य जन्ममरणादिलक्षणसंसारानलज्वालामालायां क्षेप्तुं प्रवृत्त-त्वात्परमशठस्य चित्तस्य बन्धुस्तथा च तत्तादात्म्यात्त्वापि संसारो न स्वत इति भावः । ननु संसारापादकान्तःकरणतादात्म्याध्यासिको हेतुः कथं च स्वस्वरूपप्राप्तिरिति चेत्तत्राह । मास्पृशेति । वस्तुतः सः त्रिगुणात्मकमायापतिः परमात्मैव त्वं स सपत्न्या मायया अङ्घ्रिं स्पृष्टवानसि तद्धर्मितया तत्पादप्रहारास्पदतां यतोऽसि तेन-चान्तः करणाध्यासेन संसृतिमापन्नोऽसि स्त्रीजितो यथा स्वामित्वं तिरोधाय कैङ्कर्यादिदुर्दशां भजते तद्वत् " सम्प्रति तव मोक्षे-च्छास्ति चेत्तर्हि तदङ्घ्रिं मास्पृशेत्यर्थः । तथा च श्रुतिः "द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते । तयोरन्यः पिप्पलं स्वाद्वत्त्यन-श्नन्नन्यो अभिचाकशीति । अजामेकां लोहितशुक्लकृष्णामजो ह्येको-जुषमाणोऽनुशेत" इत्याद्या स्त्रीपुरुषादिदेहतादात्म्याध्यासमपि तच्च-रणस्पर्शमाहात्म्यादेव प्राप्तोऽसीत्याशयेनाह । कुचेति । कुचाभ्यां तत्र स्फुरन्मालाकुङ्कुमाभ्यां श्मश्रुभिश्चोपलक्षितः तदुत्पन्नाविलक्ष-णोऽपि एतत्सङ्घातरूप एवाहमिति ज्ञातवानसीत्यर्थः । तर्हि तदधीन-त्वानिवृत्तौ क उपाय इति चेत्तत्राह । वहत्विति । समधुपतिर्भवांस्तेन मानिनीनां तत्प्रत्यगभिन्नं ब्रह्मैव प्रमाणं तात्त्विकमिति प्रतिपा-द्यत्वेनास्ति यासां तासां तत्त्वमस्यहं ब्रह्मास्मि प्रज्ञानं ब्रह्मेत्या-दिकानां यद्वा तत्र प्रामाण्यवतीनां नोऽस्माकं प्रसादं वहतु प्रत्य-गभिन्नं परमात्मानं मामेव सर्वाः श्रुतयः प्रतिपादयन्तीति सर्व-वेदान्तवाक्यसमन्वयावधारणरूपं प्रसादं धारयतु नन्वल्पज्ञस्य संसारिणो मम कथं समस्तश्रुतितात्पर्यविषयतेति चेत्तत्राह यदिति यदुसमास्त्वमेवासि उशब्दोऽवधारणे त्वय्यल्पज्ञत्वादेः परमेश्वरे सर्व-ज्ञत्वादेर्मायिकत्वात्सच्चिदानन्दरूपस्त्वं तत्स्वरूपं ब्रह्मैवासीत्यर्थः प्रसादोऽपि नवास्तवोऽन्यथा द्वैतापत्तेरित्याशयेन प्रसादं विशिनष्टि । विडम्ब्यमिति । यथा तव जीवभावेन संसरणं विडम्बनमात्रं तथास्वात्मबोधायस्वासिद्धश्रुतितात्पर्यावधारणमपि "यक्षानुरूपो बलिरिति न्यायादित्याशयेनाह । यस्य दूतस्त्वमीदृक् । यस्य स्वरू-पस्य ब्रह्मणःस्वरूपतोऽपि त्वमीदृक् अनुकरणमात्रेण दूतो न वस्तुत इत्यर्थः ॥ १२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

त्यक्ता लौकिकाः लोकव्यापारा याभिस्ताः ॥ ९ ॥

तस्य भगवतः कैशोरबाल्ययोर्यानि प्रियाणि मनोज्ञानि कर्माणि-तानि संस्मृत्य संस्मृत्य गायन्त्यः गतह्रियः रुदन्त्यस्तमपृच्छन्निति पूर्वेणान्वयः ॥ १० ॥

काचित् गोपी कृष्णसङ्गं ध्यायन्ती मधुकरं दृष्ट्वा प्रियेण श्रीकृष्णेन प्रस्थापितं दूतं कल्पयित्वा इदं वक्ष्यमाणमब्रवीत् कल्पयित्वेत्यस्यायमर्थः अस्मत्सान्त्वनार्थं श्रीकृष्णेनोद्धवः प्रेषित इति मन्वाना तं च श्रीकृष्णसन्देशविवक्षुमप्यलब्धावसरत्वात्तूष्णीं स्थितमवधार्य श्रीकृष्णस्नेहवैवश्यात्प्रेमसंरम्भवेगेनोद्धवस्य शृण्वतो भ्रमरमुद्धवस्थाने दूतमारोप्य प्रायः साक्षादुद्धवं प्रति कितव बन्धो ! इत्यादिवक्तुमशक्यत्वात्तदमब्रवीदिति ॥ ११ ॥

हे मधुप ! भ्रमर हे कितवबन्धो ! हे धूर्त ! दूत नोऽस्माकमङ्घ्रिं मास्पृश ननु तस्मिन्कृतेऽस्मन्तु मास्तु वा मयि को दोष इत्यत आह । सपत्न्याः कुचाभ्यां विलुलितायाः सम्मर्दितायाः कृष्णवनमालायाः कुङ्कुमं येषु तैः श्मश्रुभिः उपलक्षितः कृष्णवर्णस्य तव श्मश्रूणां लोहि-तत्वमन्यथा नोपपद्यते अतस्ताहशमाला सेवित्वात्त्वमपि धूर्त एवेति भावः । किन्तु यस्य त्वं दूतस्तस्य कृष्णस्य मानिनीनामी-दृगेव कुचकुङ्कुमं विडम्ब्यमुपहासास्पदं प्रसादं यदुसदसि मधुप-तिर्भगवान् वहतु उपहासास्पदीभूतप्रसादवाहं भवन्तं प्रति वयमसद्यो गताः प्रसन्ना भवन्तु किमस्मदङ्घ्रिस्पर्शनेनेत्यर्थः ॥ १२ ॥

भाषा टीका ।

इस प्रकार से श्रीकृष्ण के दूत उद्धवजी के ब्रज में जाते समय सम्पूर्ण गोपियों ने मन वचन कर्म से गोविंद तत्पर हो जाने से इस लोक के सब व्यवहारों को छोड दिया ॥ ९ ॥

केवल अपने प्रिय के कर्मों को गान करने लगी उन भगवान् के बालकैशोर अवस्था के जो कर्म हैं तिन को स्मरण करके और लज्जा को छोड कर रोदन करने लगीं ॥ १० ॥

कोइ एक गोपी श्रीकृष्णचन्द्र के सङ्गम के ध्यान करते समय आये हुये एक भौंराको देखकर अपने प्यारेका पहुंचाया हुआ समुझ कर इस गीत वचन को गाने लगी ॥ ११ ॥

वे श्रीराधिका गोपी बोलीं हे मधुप ! मधु के पान करने वाले भ्रमर ! तु कपटी का मित्र है हमारी सौतिन के स्तनों के मर्दन से लिपटी हुई माला के कुंकुम लगे हुये मूंछों से हमारे चरणों में नमस्कार करके मत छुवै इस ऐसे प्रसाद को तेरा

सकृदधरसुधां स्वां मोहिनीं पाययित्वा सुमनस इव सद्यस्तत्यजेऽस्मान् भवादृक् ।
परिचरति कथं तत्पादपद्मं तु पद्मा ह्यपि बत हृतचेता उत्तमश्लोकजल्पैः ॥ १३ ॥
किमिह बहु षडङ्घ्रे ! गायसि त्वं यदूनामधिपतिमगृहाणामग्रतो नः पुराणम् ।
विजयसखसखीनां गायतां तत्प्रसङ्गः क्षपितकुचरुजस्ते कल्पयन्तीष्टमिष्टाः ॥ १४ ॥

भाषा टीका ।

मधुपति हि धारण करैं जो कि प्रसाद यादवों के सभा में हंसने योग्य है सो उन्ही को उचित है जिनका कि तू उन्ही सरीका अविश्वासी काला दूत है ॥ १२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

ननु किमित्येवं तमवजानीथ किम्वस्तेनापकृतमत आह । सकृदिति । भवादृक् त्वादृशो दुर्मनाः सुमनसः कुसुमानि यथा त्यजति तद्वत् अहो बताविश्वस्य तस्य पादपद्मं श्रीः कथं सेवते विदितं मयेत्याह । अपीति । बतेति खेदे उत्तमश्लोकस्य जल्पैर्मिथ्याकथाभिः प्रलापैः प्रायो हृतचेताः वयं तु न लक्ष्मीवदविचक्षणा इति भावः ॥१३॥

झङ्कारान् बहुधा कुर्वन्तमस्मत्प्रसादलाभाय कृष्णं गायतीति मत्वाह । किमिहेति ॥ पुराणं पुरातनं बहुशोऽनुभूतम् विजयसखस्य श्रीकृष्णस्य साम्प्रतं याः सख्यस्तासामग्रतस्तत्प्रसङ्गो गीयतामिष्टाः कृष्णस्य प्रियाः तेन पूजिता इति वा तेनालिङ्गितेन क्षपिता कुचरुग्यासां तास्तवेष्टमपेक्षितं दास्यन्तीति ॥ १४ ॥

श्रीमत्सनातनगोस्वामिकृतवृहत्तोषिणी ।

सुष्ठु दधाति पिबतां चित्तं मादकत्वाद्गिना गृह्णातीति सुधा इति परममाधुर्य्यपायनं सूचयति सुमनस इति दृष्टान्तेन सदा तस्मिन्मनः शुद्धभावश्च ध्वनितः तथापि सद्यस्तत्याज इति तस्य निर्दयता वञ्चकता च । ननु साध्वीनां धैर्य्यं योग्यं यद्वा ननु तस्य पुरीप्रस्थाने किमिति भवतीभिर्विघ्नो न कृतः तत्राह । मोहिनीं बुद्धिभ्रंशिनीमिति भवादृशोति भवन्तं कथञ्चिद्यानुकरोति मधुमक्षिकादिः सोऽपि किं पुनर्भवानित्यर्थः इति तस्यात्यन्तास्थिरसौहृदत्वेन चापलं सूचितं पूर्वोक्तं बन्धुत्वमपि साधितं अन्यत्तैर्व्याख्यातं यद्वा भवानिव चपलप्रकृतिर्दृश्यत इति भवादृक् श्रीकृष्णः सुमनसो यथा सुहृदाघ्राय त्यजति लोकः स एव वा तद्वत् एवमस्थिरसौहृदत्वादकृतज्ञत्वादिना तस्यासेव्यत्वमभिप्रेतं तथापि लक्ष्म्याः सदा तत्सेवां स्मृत्वा तत्कारणमुत्प्रेक्ष्याह । परीति । नु अहो कथं कुतो हेतोः तस्य उक्तस्वभावस्य मधुपतेः पादपद्मं पद्मरूपकेण कमलहस्तायास्तस्या लीलाकमलवत् संवाहनादिना सदा तत्सेवनं ध्वन्यते अहो अविचक्षणत्वादित्याह । अपीति । सम्भावनायामुत्तमश्लोकस्य तस्य जल्पैः न पारयेऽहमित्यादिवत् कपटमिश्रगोष्ठीभिः यद्वा उत्तमः श्लोकस्तद्यशस्तस्य जल्पैः अनुत्तमस्यापि तद्यशसो वन्दिजनैरुत्तमतया गीयमानगाथाभिरित्यर्थः । यद्वा उत्तमश्लोकोऽयमिति जल्पैः मिथ्याभूततत्सेवकवार्ताभिः इति सपत्न्या मुग्धता स्वेषां चातुरी च सूचिता ॥ १३ ॥

हे षडङ्घ्रे इति जातिस्वभावेन गानचातुर्य्यात् तथा पशुश्चतुष्पात् त्वं तु षट्पदः तेन सार्द्धपशुत्वेन मुग्धभावादेव गायसि न तु विचारादित्यर्थः । तत्रापि बहु किं वा गायसि तत्रापि नोऽस्माकमग्रतः समक्षं चेत्तव दुर्निवारा गानेच्छा तर्हि सकृदेव परोक्षं गाय यद्वास्माभिरश्रूयमाणमपि तं मुहुः समक्षं किं गायसीत्यर्थः इति गूढमानगर्भासूया सूचिता । ननु निजेष्टसिद्ध्यर्थं तथा गायामि तत्राह । इह व्रज इति । पुर्य्यामेव तवेष्टसिद्धिर्न तु वनमध्येऽत्रेति भावः । ननु पुरीतोऽप्युत्तममिदं तत्राह । यदूनामधिपतिमिति । परिपाल्यमानानां तेषामेवाग्रे तद्गानं युक्तं न त्वन्येषामिति भावः । ननु युष्माकमपि स एव प्राणनाथः तत्राह । अगृहाणामित्यर्थः धन्यत्वेनास्माकं गीतार्थं ज्ञानादिकं नास्तीति भावः । इति सोत्कुण्ठोक्तिः ननु यूयमेव परमविदग्धाः तत्राह । पुराणं बहुशस्तद्गीतमस्माभिः श्रुतमेवास्तीत्यर्थः इति सेर्ष्यः कटाक्षः अन्यत्तैर्व्याख्यातं यद्वा नोऽस्माकमगृहाणां दारेषु च गृहा इत्यमरः असार्य्याणामप्रियाणामितियावत् अग्रतः पुराणं पुरा पूर्वमेव णं निर्वृतिरूपं सुखरूपं णश्च निर्वृतिवाचक इत्युक्तेः न तु साम्प्रतं साम्प्रतं दुःखकरमित्यर्थः । किं गायसि तर्हि क गायामि तत्राह विजयसखसखीनां विजयस्य जगत्पराजयकर्तुः सख्युः सहचरस्य कृष्णस्य सखीनां स्थाने तत्प्रसङ्गो गीयतां चपितकुचरुक्तयैव साम्प्रतं प्रियकरणादिष्टास्तास्तवेष्टं कल्पयिष्यन्तीति समात्सर्य्यकौटिल्यं यद्वा विजयते सर्वोत्कर्षेण वर्तते इति विजयः कृष्णस्तस्य सखे श्रीकृष्णबन्धुत्वेन तत्सखीनामपि त्वत्सखीत्वेन तवैव सखीनां तस्मिन् कृष्णे प्रसङ्गः परमासक्तिः यद्वा सः कुचरुक्क्षपणादिलक्षणः प्रसङ्गो गीयताम् अयं धार्ष्ट्यप्रदर्शनेनोपहासः क्षपिता श्रीकृष्णेनालिङ्गनेन नखक्षतादिरत्यापहृता कुचयो रुक् कामपीडा यासां ताः कल्पयन्ति तव प्रियं सदा कुर्वन्त्येव मत इष्टा एवं त्वया गानेन मानिताः सत्यो विशेषेण कल्पयिष्यन्तीत्यर्थः ॥ १४ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

तस्य कैतवमेव दर्शयन्ती माने कारणमाह । सकृदिति । अत्रेर्ष्याधिक्येनागृहीतमपि कर्तुर्नाम वाक्यस्य पूरयितव्यतया मधुपतिरिति पूर्वस्मादेवाकृष्यते तस्य कृतत्वाद्भ्वारागेत्यनेन मधुप एव लभ्यते । तत्रेयं योजना मधुपतिरसौ स्वाम् असाधारणीं निजामधरसुधामस्मान् सकृत् पाययित्वा बलाच्छलादपि साध्वीरस्मान् पानायापाद्य सद्यस्तत्याज कीदृशीमित्याशङ्क्याह । मोहिनीं बुद्धिं भ्रंशयित्वा दुःसहनिजदुरन्तलालसासम्पादिनीं तत्र तस्य तथापायने नास्त्येव दृष्टान्त इति त्यागे तु सोऽयं दृष्टान्तः क्रियत इत्याह । भवादृक् भवद्विधमधुपजातीयः सुमनस इवेति । अयमर्थः । भवद्विधमधुपजातिस्तदन्यजीविकत्वात्तासु बहुषु यत्र तत्र रसमल्पमल्पं

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

प्राप्य बुभुक्षाशान्त्यभावात्तां तां सुमनसं स्वसुखार्थं यत्त्यजति तद्युक्तमेव । मधुपतिस्तु सुधामयाधरत्वादन्यरसापेक्षामतीतः किन्तु दुःशीलत्वाच्छोभनमनसां दुःखदानमेव स्वसुखतया मन्यते तस्मात्त्वतापि तस्मिन् कितवे बन्धुता न कार्येति । अथवा भवादृगित्युभयत्र सम्बन्धनीयम् । तत्र दृष्टान्तपक्षे मधुपजातीयः दार्ष्टान्तिकपक्षे विदूरसौरभग्रहणसमागमनपरितो भ्रमणमधुरास्फोटनसहचुम्बनादिभिर्भवद्वच्चेष्टमानोऽपीति योज्यम् । ननु जयति तेऽधिकमित्यादिकभवद्वाक्यरीत्या पद्मायाः अपि तदासक्तायाः सम्प्रति तत्रापि तदुपासनं दृश्यते भवत्या कथमसौ निन्द्यते तत्राह । परिचरतीति । सकलपद्माधिकारिण्यपि पद्मा तत्पादपद्मं कथं नु परिचरतीति न युज्यते तदेतदुक्त्वा क्षणं विभाव्याह । अपि बतेति । अपीति सम्भावनायां बतेति खेदे हीति प्रसिद्धौ उत्तमःश्लोकस्यैव ये तस्य जल्पाः प्रलोभनमयानि भाषितानि तैर्हृतचेताः सती तत्परिचरतीति ज्ञातं ज्ञातमित्यर्थः । तदेवं तस्या अविचक्षणत्वं व्यज्य स्वस्य तु विचक्षणत्वं व्यञ्जितम् । तस्मात् कितवे तस्मिन्नस्माकमपि मान एव युक्त इति भावः । तत्रासकृत्पानस्पृहोत्कण्ठया विस्मृत्य सकृदेव पाययित्वेति तस्या नायासत एव वञ्चनाकरीं सामग्रीसम्पत्तिं दर्शयित्वा स्वस्य त्रासातिशयः प्रकटितस्तस्मिन्नीर्ष्यातिशयश्च सूचितः तथापि मोहिनीमित्युक्त्वा स्वलालसाव्यवच्छेदं प्रत्याख्याय मोहातिशयश्च व्यञ्जित इत्यादिकमूह्यम् ॥ १२ ॥

तदेवं तदीयसरोषचरणसरोजाविक्षेपेणापसृत्य पुरतो रुदन्तं मधुपमस्मत्प्रसादनायैव श्रीकृष्णं बहुधा गायत्यसाविति वितर्क्य तमवज्ञातुमन्यथोत्प्रेक्षते हे षडङ्घ्रे तज्जातिस्वभावा देव गानस्वभाव तस्माद्यद्गायसि तदिह व्रजे परमदुःखिते किं किमिति गायसि तत्रापि बहु किं गायसि तत्रापि यदूनामधिपतिं किं गायसि स यदूनां महाराजवंश्यानामसंख्यानामधिपतिः अत्रत्यास्तु गोपास्तत्रापि सम्प्रति तेनानादृताः अतस्तत्परिपाल्यमाना यदव एव गानजीविनस्तवेष्टं विधातुमर्हन्ति न त्वेते इति स्वल्पं वा बहु वा तत्रैव गातव्यमिति भावः । षडङ्घ्र इत्यस्य पशुश्चतुष्पात् त्वन्तु षट्पदः तेन सार्द्धपशुत्वेन बुद्ध्यभावातिशयादेव गायसि ननु विचारादिति च इत्यसूया । ननु व्रज एव सर्वाधिकप्रेमवानसौ ततो व्रज एव श्रेष्ठ इत्याशङ्क्य विशिनष्टि । पुराणं बहुशोऽनुभूतं तत्तत् सर्वं कापट्येनैवानुष्ठितवानिति निश्चितम् । यद्वा । चिरमतिक्रान्तसम्बन्धं पूर्वमेव व्रजस्य तत्तदासीत् नाधुनेति भावः यद्वा "कृषिर्भूवाचकः शब्द" इति धात्मकत्वेऽपि पुराणं पुरैव यं सदैव व्रजस्य सुखरूपम् अधुना तु केवलं कर्षति धात्वर्थसत्तारूपेणैवावशिष्टमित्यर्थः । किञ्च हन्त कुरुष्व नाम व्रजेऽपि गानमस्माकमग्रतः किं गायसि तत्रापि बह्वित्यादि । कथम्भूतानाम् अगृहाणां तेन स्वोच्छिष्टमोहनरसविशेषसकृत्पायनमात्रपूर्वकत्यागात् विशिष्य त्याजितगृहाणाम् अतो मधुपुरेऽपि तत्प्रेयस्य एव विशिष्टं तव गानस्थानमित्याह । विजयते सर्वं वशीकरोतीति विजयः श्रीकृष्णः स एव सखा त्वद्बन्धुस्तस्य सखीनां सह खेलन्तीनामेवाग्रतस्तत्प्रसङ्गस्य विजयस्य साम्प्रतमस्मत्परित्यागपूर्वकयादवकुलाधिपत्यफलं तत्पुरवनिताशतवशीकरणलक्षणस्य प्रसङ्गः । तत्सुखदः प्रस्तावो गीयताम् । ततस्ता दृष्टास्तेन त्वयैव वा सम्मानितास्तवेष्टं द्रुतमेव कल्पयिष्यन्ति । यद्वा । कल्पयन्ति सह कुर्वन्त्य एवासते । अधुना त्वस्मद्दुःखख्यातिं दृष्ट्वा तद्दर्पणपूर्वकेण तासां सौभाग्यख्यापनेन त्वया मानिताः सत्यो विशेषेण कल्पयिष्यन्तीत्यर्थः । यतश्च अर्पितकुच रुजः सम्प्रति श्रीकृष्णेनैव खण्डित कामपीडाः दुःखान्ते लोकाः समुल्लासाग्रन्थिभ्यो बहुशो ददति । इति समास्तस्याकौटिल्यं धार्ष्ट्यप्रदर्शनेन सकटाक्षोपहासश्च ॥ १४ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

अगृहाणां वनचरीणां विजयसखसखीनामिति अन्यासां कृष्णप्रेयसीनामग्रतो गीयतां ता तादृशाः तां ये ष्टकुलपयान्ति ता एव विशिनष्टि । तत्प्रसङ्गशमितकुचरुजः कृष्णकथाप्रस्तावनिरस्तस्तनतापाश्रयः ॥ १४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ननु किमित्येवमवजानीथ किं वरतेनापकृतमत आह । सकृदिति । मोहिनीं तापत्रयविस्मारिणीं स्वासाधारणामधरस्य सुधां सकृत्पाययित्वाऽस्मांस्तत्यजे त्यक्तवान् यथा त्वं सुमनसः । पुष्पाणि पीतमधूनि त्यजसि तद्वदतः स भवादृक् त्वमीदृगित्युक्तं भवति अत्र तु स भवादृगिति अयं भावः त्वं तादृशः स तु त्वादृशः अहो युवयोरेव स्वामिभृत्यभावो विधात्रा निर्मित इति इत्याक्षेपगर्भमिदं वचः न्यूनाधिक्ये एव स्वामिसेवकभावो न तु समयोरिति दिक् वयन्तु कदापि तादृश्यो न भवामः सोऽस्मादृशः कदापि न भवतीत्यतः सदा स्वामिसेवकभावसम्बन्धज्ञानप्रतिपादकश्रुतिस्मृत्याचार्यपरम्पराहार्दोऽव्युत्पन्नो नाचार्यो भवितुमर्हतीति गूढोऽभिप्राय इति दिक् अहो वताकृतज्ञस्य पादपद्मं कथं श्रीः सेवते विदितं मयेत्याह । अपीति । उत्तमश्लोकस्य जल्पैर्मिथ्याकथाभिर्हृतं चेतो यस्यास्तथाभूता तत्पादपद्मं परिचरति वतेति खेदे वयं तु न लक्ष्मीवदविचक्षणा इति भावः ॥ १३ ॥

झङ्कारान् बहुधा कुर्वाणं तमस्मत्प्रसादलाभाय श्रीकृष्णं गायतीति मत्वाह । किमिहेति । हे षडङ्घ्रे इहागृहाणां वनचारिणीनां नोऽस्माकमग्रतः पुरतः पुराणं बहुशोऽनुभूतं यदुपतिं किं किमर्थं गायसि नानेन तव काचिदिष्टसिद्धिरिति भावः । किंतु विजयसखस्य श्रीकृष्णस्य सखीनां पुरस्त्रीणामग्रतः तस्य विजयसखस्य प्रसङ्गो गीयताम् एवं चेत्तस्येष्टास्तास्तवेष्टं कल्पयन्त्यपेक्षितं दास्यन्ति तत्र हेतु वदन्ती ता विशिनष्टि । अर्पिता विजयसखालिङ्गनेन निरस्ता कुचरुग्यासां ताः ॥ १५ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

कृष्णस्य कितवत्वं कथमापाद्यते इत्यत एवमिति व्यनक्ति । सकृदिति । भवादृक् भवानिव पूज्य इव स्थितः कः पुरुषः मां त्यजेत त्यजति मत्त्यागे हत्यादोषो भवति ।—

> ब्राह्मणं स्वयमाहूय याचमानमकिञ्चनम् ।
> पश्चान्नास्तीति यो ब्रूयात्तमाहुर्ब्रह्मघातकमिति ॥

स्मृतिर्वदतीति भावेन कथितः स्वामधरसुधामधरोष्ठामृतं पाययित्वेति निषेधवचनाभावात्कथं दोषः कथं स्यादित्याशङ्क्य सकृत्पानेन बहुतृष्णाजननहेतुत्वात्ततोऽप्याधिक इवेति भावेनोक्तं सकृदिति ।

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ॥

तृष्णाजनकत्वञ्च कथमित्यत उक्तं मोहनीमिति बुद्धिमोहकरीं मोहिनीमिति पाठे मोहकत्वशक्तिरस्यास्तीत्यर्थः । अत्र निदर्शनमाह । सुमनस इति । यथा सुमनसः पुष्पस्य गन्धमाघ्राय पुनस्तदानीमेव तत्त्यागो षट्चरणस्तथेति । तस्य त्वत्तृष्णा नार्हति चेत्तवापि माभूदिति माशङ्कीति भावगर्भमाह । परिचरतीति । अत्र लक्ष्मीपद्ममरश्रीपदश्चाध्याहृत्य व्याख्येयं लक्ष्मीः मथुरां गता वा तस्य कृष्णस्य पद्मकिञ्जल्कवत् कोमलं पादं कथं केन प्रकारेण परिचरति शुश्रूषतीति शङ्कित्वा हेतुमाह । अपीति । सापि उत्तमश्लोकजल्पैः उत्तमश्लोकस्य हरेः जल्पैः मधुरवचनविशेषैर्हृतचित्ता मुग्धविश्वस्तवामुग्धवा परिचरतीत्येवं निश्चयं वल हर्षं चिन्ता उत्तमेति सम्बन्धकरणेन प्रियत्वातिरेकदर्शनार्थमेवं कथनं न तु दोषापादकत्वेन निर्दोषत्वात्तस्य सर्वैःलक्षण्यप्रदर्शनार्थञ्चेति ज्ञाप्यत इति सुमनस इव सद्य इत्यनेन शरीरदौर्गन्ध्यं कितवेति पाण्डित्यप्रदर्शित्वञ्चेति प्रत्ययस्त्वं त्यागनिमित्तानि सन्तीति सूचयति सुमनस इव पुष्पस्य सदृशी यथा पुष्पं सौरभ्येण घ्राणेन्द्रियतर्पकत्वेन च सेव्यं स्यात्तथाह सद्यः सद्यस्का यथा प्रत्यग्रवयसि वर्तमाना तरुणी तरुणैः परिहर्तुं न शक्या तथेति किञ्च सुमनसः मालत्या लतायाः तनुत्वं यथा मम मध्यं मुष्टिग्राह्यत्वमतेनालिङ्गने सुखोद्रेकं लक्षयति यथा सुमनसो देवाः स्वसेवकं न त्यजन्ति तथा मामपि यथा बुधाः कामकलाशास्त्रतरुणीं न मुञ्चतीति वा अतो भावादृगेव श्रीकृष्ण एव नृशंसत्वेन त्यक्तवानिति वा सुमनाः पुष्पमालत्योः स्त्रीदेवबुधयोः पुमानिति यादवः इतरत्सम परिहरतीति केचित्पठन्ति ॥ १३ ॥

स्वपुरतो वर्ण्यमानया प्रियवार्तयोद्बुद्धमदनकलिका पुनरपि श्रोतुकामा अवहमानेवाधिक्षिप्तं कोपनार्थमधिकं वक्तीति कृत्वा तमुद्धवमाक्षिपतीव चक्रे । किमिहेति । षट्सु दर्शनेषु सन्ध्यादिषु चाङ्घ्रिरवक्रगतिर्यस्य स यथा षट्सु विषयेषु भगवत्कथात्कपीरपरिस्थिषु अङ्घ्रिः पादो यस्य स तथेति वा तस्य सम्बुद्धिः हे षडङ्घ्रे उद्धव ! आघ रघि लघिगत्यर्था इति धातुः त्वमगृहाणां गृहाश्रमरहितानां वनचारिणामित्यर्थः । नोऽस्माकमिहाग्रतः पुराणं पुरे वर्तमानं यदूनामधिपतिं किम्बहुकर्णविलपूरं गायसि न शब्दयेत्यन्वयः कैगै शब्द इतिधातुः तस्य गृहान्तर्वर्तित्वेन वनमध्यवासिपुरतो गायनमनन्वितमित्यर्थः । तर्हीदं कस्याग्रतो युक्तमिति । तत्राह । विजयेति विजयोऽर्जुनस्तस्य सखा कृष्णः तस्य सखीनां मथुराङ्गनानामग्रतस्तस्य कृष्णस्य प्रसङ्गः गायतां गीयतां त्वयेति शेषः तत्र गातुस्तव फलसिद्धिं रण्यततीत्याह । क्षपितेति । तत्प्रसङ्गेन क्षपिता निरस्ता कुचानां रुक्सन्तापलक्षणा यासां तास्तथा इष्टाः कृष्णप्रियाः मथुराङ्गना उद्धात्रे ते तुभ्यमिष्टमभीष्टं धनादिकं कल्पयन्तीत्यन्वयः तस्मात्से ऽयं धनसभय इतिश्रुतेः तत्प्रसङ्गमितिपाठे भवान्गायतामित्यात्मने पदे लोट् तत्प्रसङ्गक्षपितेतिपाठे या यदुपतिविषया गीतिस्तां त्वं गायेति परस्मै पदे लोट् तस्य प्रसङ्गेन प्रकृष्टालङ्गनलक्षणेन विजयसखसखीनामग्रतो यदुपतिं गायतां पुंसां ते कृष्णेष्टाः स्त्रीजना अभीष्टं कल्पयन्तीति वा ॥ १४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

अथ जयति तेऽधिकं जन्मना व्रज इत्यादिरीत्या लक्ष्म्याः सदा तत्ससेवां स्मृत्वा सा कथं सिद्ध्यतीति व्रजचारित्वस्मरणेन सकारुण्यममिव वितर्क्य तत्र कारणमाभाषयन्ती स्वमानमेव द्रढयति । परीति ॥ १३ ॥

विजयते सर्वं वशीकरोतीति विजयः श्रीकृष्णः सखा तद्बन्धुः तस्य सखीनां सह खेलन्तीनामेवाग्रतः तत्प्रसङ्गः तस्य विजयस्य साम्प्रतमस्मत्परित्यागपूर्वकयादवकुलाधिपत्य फलतत्पुरवासिवनिताशतवशीकारलक्षणस्य प्रस्तावः क्षपितकुचरुजः श्रीकृष्णेनैवखण्डितकामपीडाः ॥ १४ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

ननु कथमेवं धाष्टर्येन भगवति दोषा आरोप्यन्ते अस्मास्वपि चेत्याशङ्क्याह । सकृदधरसुधामिति । यो हि यं वञ्चयति स तस्याक्रोशं करोति भगवांश्च सर्वथास्मान्वञ्चितवान् वञ्चनामेवाह । अधरसुधां पाययित्वा तत्याज इति । अस्मान् त्यक्त्वा गतः अधरेत्यनेन उच्छिष्टतया लोके जातिभ्रंशो निरूपितः मोहिका च सा सुधात्वात् पीता ननु तथोपकार एव कृतः यो हि जलमपि पाययित्वा गच्छति सोऽप्याक्रोशं नार्हति किम्पुनः सुधां सुतरां लोभात्मके स्थापितां तत्राह । मोहिनीमिति । मोहिका हि सा नहि मोहकानां लड्डुकादिकं दानफलमुपकारं वा जनयति । नन्वन्येन तर्हि तदुत्तारणं क्रियतां किमाक्रोशेनेत्यत आह । स्वामि स्वन्योपायसहस्रेणापि तत्कृतो मोहो निवर्तयितुं न शक्यते ननु मोहनस्य न फलं किञ्चिज्ज्ञातं त्वसकृत्सम: पीत इत्याशङ्क्याह । सकृदिति । बहुवारं चेत्पाययेत् तथाप्यन्ततः सुखं भवेत् किन्तु सकृदेव अन्यथा सकृदेवाधरसुधाप्राप्त्या पुष्पाणि च यथा मृदितानि सर्वकार्यानुपयुक्तानि भवन्ति तथा भगवता वयं वीर्यविवेकादिभिर्हीनाः कृताः अतोऽस्माकं सर्वनाशं कृत्वा यदर्थमस्माभिः सर्वं त्यक्तं तमपि हत्वा इतो गतवान् तर्हि कथं न धृत इत्याशङ्क्याह । सद्यस्तत्यज इति । भवादृगिति भ्रमरतुल्यः स हि पीत्वा निः सारान् कृत्वा गच्छति तथा भगवानपि पाययित्वेति विशेषः अग्रेऽपि रसानुत्पादनार्थमन्यथा कमलादिवत् सूनरसः स्यात् अतः पाययित्वा भगवान् गतः पीत्वा च भ्रमर इति वैषम्यात् समाधानं परिहृतं सुधापानेनासक्तिर्जनिता अधरसम्बन्धेन लोकस्याजितः मोहेन विवेकाद्यभावात् ज्ञानभक्ती निवारिते परित्यागादाश्रयोऽपि निराकृतः अतोऽस्माकं न पूर्वसिद्धा इमे लोका अपि भगवानित्युभयतो भ्रष्टा वयं जाता इति युक्त एवोपालम्भः । ननु भवत्य एव भगवतो जाताः भगवदीयत्वमेव परमपुरुषार्थः अतः कथं शोक इति चेदुच्यते नहि भगवदीया भगवांस्त्यजति त्यक्ताश्च न भगवदीयाः प्रत्यासत्तिश्च न भवति मोहेन तत्र दृष्टेर्गतत्वात् । ननु भगवान् मोहं किमिति सम्पादयति नापि स्वार्थं त्यक्तत्वात् नापि तासामर्थे दोषनिवृत्तावपि गुणाभावात् दोषेवावश्यकर्तुः स्वनिवृत्तिः तदभावाद्दोषश्च तस्मादयुक्तं मोहनमिति चेत् सत्यं भवेदेतदेवं यदि तासां मनसो भगवत्यनुवृत्तिर्न स्यात् अतो मोहाभावे स्वस्थानगमनकृतोऽपि निरोधो व्यर्थः स्यात् तात्पर्याज्ञानादयं मोहः एतत्कृतो या अग्रे स्मरणेन च परिहर्तव्य इति तदर्थमेव वायमुद्योगः । ननु

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

भगवानेतादृश एव नहि सर्वोऽप्येकविधो भवति तस्मान्नोपालम्भ्य इति चेत्तत्राह । परिचरतीति । स्त्रीणां मध्ये मूलभूता चतुरा लक्ष्मीः सा कथं भगवन्तमेतादृशं ज्ञात्वा सेवितवती । अथ साप्येवं वञ्चिता तथापि केनचिदुपायेन सा पुनः सेवते तथोपायश्चेज्ज्ञातः स्यात् तदास्माभिरपि सेव्यते इति प्रश्नार्थो वा कथंशब्दः पद्मेत्युत्तरं वा साहि परिचरणे भाति अत एव चरणस्य कमलत्वं सापि कमला चरणात्मकं तं प्राप्य सा तिष्ठतीति न तस्याः क्वापि क्षतिः गोपिकानामपि भूमौ निरन्तरं चरणे वा सम्बन्धे जाते घटते नान्यथेति अपि च पुनश्च पद्मासम्भूतेति वाक्यात् रूपान्तरेषु सौम्येष्वप्यादित्योऽत्यन्तं कठिनो भ्रमणश्च स्वभावतश्च तत्र कथं सेवां कृतवतीति प्रश्नः उपालम्भो वा तादृश एवायमवतारः प्रति भातीति भावः । एकत्र स्थैर्याभावात् । ननु लक्ष्म्या अवतारो न जात इति शङ्कां वारयितुमाह नु इति वितर्के साहि भगवन्तं विना क्षणमपि स्थातुमक्षमेति पद्मेति प्रमाणं चोक्तं परिचरतीति वर्तमानप्रयोगादिदानीमपि सेवा लक्ष्यते भगवांस्तूदासीन इति तु निर्विवादं तर्हि का उपपत्तिरिति चेत्तत्राह । अपीति । प्रमाणमत्र बाधितं परं किञ्चित्सम्भाव्यते उत्तमश्लोकजल्पैः हृतचेताः प्रायेण तथा सति वृत्त खेदे उत्तमश्लोकाः कीर्तिमन्तो ये भक्ताः ये नारदादयः तेषां जल्पाः स्वपक्षस्थापनपूर्वकपरपक्षनिराकरणरूपाः कथास्तेन वादिन्यायेन प्रायेण सा परिगृहीता यथानभिप्रेतमपि युक्त्या साधितमर्थं प्रतिवादी मन्यते तर्हि लक्ष्मीपक्षेऽपि कथं न युक्तिरिति चेत्तत्राह । उत्तमश्लोकेति । तेषां तु कीर्त्तिरुत्तमा लक्ष्म्यपेक्षयापि अतो लोके प्रतिष्ठितत्वात् भक्तानामेव जयः न लक्ष्म्याः प्रायेणैवं भविष्यतीत्यर्थः ॥ १३ ॥

एवं भ्रमरगतिं पादस्पर्शत्वेन निषिध्य तदागमनं च परिहृत्य तत्कृतं शब्दं निषेधति । किमिह बहुषडङ्घ्रे इति । उद्धवस्याग्रे वाक्यमप्यनेन निषिध्यते कालगतानि सर्वाण्येव प्रमाणानि चैतैः प्रमाणैः भगवद्धृता धर्माः दोषाः परिहर्तुं गुणा वा वक्तुं शक्याः अतो व्यर्थमिति त्रिष्वपि साधारण्यं हे षडङ्घ्रे इह अस्मत्समीपे किमिति गायसि नन्वन्यत्र गन्तुमशक्त इति चेत्तत्राह । बहुकिमिति । गायसीति स्थानान्तरे गानं नापि कदाचिद्गानशङ्का यतो बहु गायसि । ननु भवतीनां स्वामी कृष्ण इति भवत्समीपे गानं युक्तमिति चेत्तत्राह । यदूनामधिपतिमिति । यादवानामधिपतिर्न त्वस्माकं साम्प्रतम् अतो यादवानामग्रे गानमुचितं नत्वन्येषां ननु सर्वेश्वरो भगवान् यादवत्वेऽपि न दुष्यति अतः सर्वेषामुपकारार्थं स्वार्थं च सर्वत्रैव गानमुचितमिति चेत्तत्राह । अगृहाणामिति । गृहरहितानां वयं त्यक्तगृहा मार्गे उपविष्टाः नाप्यस्माकं स्वगृहं नापि भगवद्गृहमिति तादृशीनामग्रे गानेन किं फलं भवेत् गृहस्था एव हि किञ्चित् दातुं शक्ताः । ननु त्वमेका नेत्थंप्रयच्छसि अन्या दास्यन्तीत्याशङ्क्याह । न इति । सर्वा एव वयं तादृश्यः ममाद्युनाद्युपकाराभावेऽपि धर्मो भविष्यतीति भवतीनां च अपूर्वार्थप्रदर्शनेन सन्तोषे आशीर्वादेन वा कृतार्थता भविष्यतीति कथङ्गानं निषिध्यत इत्याशङ्क्याह । पुराणमिति । नायमपूर्वो वादः किन्तु बहुधैव श्रुतो भगवान् । ननु भगवद्गुणान् श्रुत्वा न कोऽपि विरज्यते । कथमेता विरक्ता इति चेत् । सत्यं पूर्वं श्रवणेन हि वयमेवं जाताः हृताऽधिकं च फलं न पश्यामः पुनश्चेत् श्रोष्यामः स्वरूपेणापि निवृत्ता भविष्याम इति वयमेतदुपेक्षया अश्रवणमेव स्थिते स्वरूपे तु भगवान् कदाचित्प्राप्येतापि संसारपतनभयञ्चेत् सम्भाव्येत तदा पुरातनत्वादेव सुलभत्वात्तदैव गानं भवत्विति साम्प्रतं नोपयोग इति भावः । ननु वयं गायका एव भगवांस्त्रीप्रियः पुरुषास्तथा न रसिकाः स्त्रीणं चाग्रे गानमावश्यकमतोऽनन्यगत्या गानं क्रियत इति चेत्तत्राह । विजयसखसखीनामिति । सन्ति स्त्रियः सुखिताः विजयसखस्य भगवतः सख्यः भगवता तुल्यभावं प्रापिताः परमानन्दयुक्ताः । यथर्थमर्जुनवत् मलक्ष्यादि मत्स्यादिवेधमपि कृत्वा यथेष्टलक्ष्मणाप्रभृतीनां विवाहं करोति विविधश्च जयस्तस्येति लुण्ठने वधे एव स्त्रियः प्राप्यन्ते अर्जुनेनापि दीयन्ते सखित्वात् स्वयमपि तादृशः । अर्जुनसखित्वेन कालरूपतया सर्वमारकत्वं चोक्तं ततश्च तत्स्त्रीणां विलापे दुःखसम्मार्जनं कुर्वन् सखेव भवति ता गतभर्तृकाः भोगनिरपेक्षाः कथायां मुख्याधिकारिण्यः न तु वयं भोगसापेक्षा इति भावः । वक्रोक्त्या वा द्योतितास्तस्य मारयिष्यन्तीति । यथास्ति प्रभृतयः विजय एव प्रकृष्टजयः सखा यस्य सखीनां योऽहि सर्वत्रजयं प्राप्नोति तमेव मन्यन्ते नान्यान् वयं त्वेकनिष्ठा इति प्ररोचनार्थमपि गानं नोपक्ष्यत इति अतस्ताः सर्वा एव क्षपितकुचरुजः सत्यः युद्धे कठिनभावं प्राप्तेन हस्तेन मर्दितवक्षः भारक्षपनाशेन सूचिताः ते इष्टाः सत्य इष्टं सङ्कल्पयिष्यन्ति यदेवेष्टं तव नहप्रासपुरुषार्थः काश्चिदन्यैष्ट सम्पादयति अत उद्धवं प्रत्यपि तावद्दौत्यं कर्त्तव्यं भगवद्गुणवर्णनेन नास्मासु अनुभूतेऽर्थे वचनस्य दुर्बलत्वात् कालपक्षेऽपि ऋतुभिः षडङ्घ्रिर्भवति सम्वत्सरः स हि ऋतुभेदेन कोकिलादि शब्दैर्वेदैश्च भगवन्तं स्मारयति ते च शब्दा भगवत्सहितानां ज्ञानिनां धर्मपराणां वा उदासीनानां भक्तानां वा भगवति मिलितानां सुखदा भवन्ति नत्वस्मत्सदृशीनां सर्वत्रासक्तिरहितानां धर्मिणामेवापेक्ष्यमाणानां कालादि निरपेक्षाणां तैः शब्दैः सुखं भवति पूर्वावस्थाप्राप्तौ तु तादृशशब्दानां सुलभत्वात् तदानीमेव सर्वथा श्रवणे न किञ्चित् प्रयोजनमित्यर्थः ॥ १४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

ननु भ्रमरजातेर्ममायं स्वाभाविक एव श्मश्रुपीतिमा नतु सुरतकुङ्कुममिदं तस्य च त्वदेकतानमानसस्य मधुपुर्यां कामपि स्त्रियं स्वप्नेऽप्यपश्यतः कोऽपराधो यतस्त्वमीदृशं मानमाविष्करोषीति तत्राह । सकृदिति । पायनस्यासकृत्त्वेऽपि सकृदित्युक्तिरनुरागेण तत्र तृष्णाधिक्यं व्यञ्जयति । अधर एव सुधा तामित्यत एव एतावद्भिरपि सन्तापैर्न म्रियामहे इति भावः । एता मदुक्तैः कष्टैर्यदि मरिष्यन्ति तदाहं कार्ष्ण्यैः कष्टं दास्यामि तस्मादासां मरणाभावाय स्वामधरसुधां पाययामीति स पुरैव विचारयामासेति भावः । अतः सकृदेव पाययित्वा सद्यस्तत्क्षण एवास्मांस्तत्याज । अतोऽस्मत्सुखदाने तात्पर्यं सति सुधापायनस्यासकृत्त्वं स्यादिति त्वमेव विचारयेति भावः । तत्रापि पाययित्वेति णिचा तस्य बलात्कारो दर्शितः । नन्वेवञ्चेत् साध्व्यो भवत्यः कथं तस्मै स्पृहयन्ति तत्राह । मोहिनीं बुद्धिभ्रंशिनीम् । अतस्तेनास्मदादयो लोकद्वयत एव भ्रंशिता इति "विषवृक्षोऽपि सम्वर्द्ध्य स्वयं छेत्तुमसाम्प्रतमि"ति न्यायोऽपि कृष्णेन न गणित

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

इति भावः । किञ्च तस्य प्रीत्यप्रीती द्वे एवातिचित्रे इत्याह । सुमनसो देवश्रेणीरिव विष्णुः कृष्णोऽस्मान् सुधां पाययित्वा सुमनसो मालतीर्भवादृक् भ्रमर इवास्मांस्तत्याजेति पायनत्यजनयोः कर्मणि कर्त्तरि च पृथक् पृथक् दृष्टान्तः । देवपक्षे हे अधर ! निकृष्टेति सम्बोधनं "सुपर्वाणः सुमनस" इत्यमरः । नन्नु तस्य युष्मत्कर्मकत्यागे युष्माकमेव कोऽपि दोषः कारणमस्ति तस्य वेति तत्राह । सुमनस इवास्मान् स भवादृक् तत्याज । भ्रमरो यन्मालतीस्त्यजति तत्र दोषः कस्येति त्वयैव विचार्यतामिति भावः । "सुमना मालती जाति"रित्यमरः । सौरभ्यसौकुमार्यपावित्र्यसर्वोत्कर्षादिभिः सुमनःसाधर्म्यात् शोभनमनस्कत्वाच्च वयं सुमनस इति व्रजे प्रसिद्धा एव स च भ्रमरसाधर्म्यात् चपलः स्वसुखमात्रार्थी प्रसिद्ध एवेति नेदं कवितामात्रमिति ध्वनिः । ततश्च चाञ्चल्यदोषादेव मालती र्वह्वीरपि त्यक्त्वा निकृष्टेष्वपि पुष्पेषु विषज्जति आविषज्जति वा भ्रमरे इव कृष्णे कथं वयं मानिन्यो न भवाम इत्यनुध्वनिः । ननु कृष्णस्य निर्दोषत्वं शास्त्रप्रसिद्धमेव शास्त्रज्ञेन गर्गेण नारायणसम इत्युक्तत्वात् । तत्र भवतु स नारायणस्तथापि परवञ्चनादिदोषाणां तत्र प्रत्यक्षत एव दृष्टत्वात्ते कथमपलपनीया भवन्त्विति विमृश्य सविचिकित्समाह । परिचरतीति । पद्मा लक्ष्मीः परिचर्यायामपि हेतुं स्वयमेवोद्भावयन्त्याह । अपि वतेति । उत्तमःश्लोक इति ये जल्पास्तावकलोकानां स्तुतिमात्राणि तैर्हृतं चेतो यस्याः सा । तेन लक्ष्मीरति ऋजी वयन्तु वैचक्षण्यवैदग्ध्यवुद्धिवैचित्र्यादिगुणानां विधात्रा दत्तत्वात् कथं तादृश्यो भवितुं प्रभवामेति भावः । अत्र पाययित्वेति मोहिनीमिति च तस्य शाठ्यं सद्यस्त्यागान्निर्दयत्वं भवादृगिति चापल्यं लक्ष्म्या आर्जवव्यञ्जनया स्वविचक्षणत्वम् आदिशब्दात् कृतघ्नत्वप्रेमशून्यत्वादिकं तु सर्वत्रैवानुस्यूतमित्ययं परिजल्पः । यदुक्तम् ।

> प्रभोर्निर्दयताशाठ्यचापलाद्युपपादनात् ।
> स्वविचक्षणता व्यक्तिर्भङ्ग्या स्यात् परिजल्पितम् ॥ १३ ॥

भ्रमरजातिस्वभावेन हुंकारान् कुर्वन्तं तं मत्कृतेन तिरस्कारेणाप्तः संरम्भोऽयं स्वीयं गानगुणं प्रकाशयतीति मत्वाह । इह गोपीसभासु किं गायसि अज्ञस्य तव गाने नैताः प्रसीदन्तीति भावः । तदपि पुनः पुनर्गायसि । तत्रापि यदुपतिं यदूनां पतित्वेन ख्याप्यमानं तत्रापि नोऽस्माकमग्रतः । कीदृशीनाम् अगृहाणां तेनैव त्याजितगृहाणामिह वनप्रदेशे उपविष्टानां तुभ्यञ्चाकमुष्टिभिक्षादानेऽप्यसमर्थानाम् । ननु स्वाङ्गोत्तीर्णपुरातनवस्त्रमाल्यादिकं किञ्चिद्देहीति चेत् तुभ्यं सर्वथैवानभिज्ञाय नैव ददामीत्याह । पुराणं गायसि तस्य यदुपतित्वे पुराणं प्रमाणयसीत्यर्थः । हे षडङ्घ्रे ! इति पशुस्तावच्चतुष्पात् त्वन्तु षट्पदः सार्द्धपशुः कुत्र किं वा गातुमुचितमिति वुद्ध्यभावाच्च जानासि पशुत्वात् पुराणं वा कथं जानास्यतः कथं भिक्षां प्राप्स्यसीति भावः । किन्तु तव पशुत्वात्तुभ्यं वयं न कुप्यामः किन्तु गानोपजीविनस्तद्व्याख्यानमुपदिशामः गृपिवत्याह । विजयेति । कामयुद्धे विशिष्टो जयो यस्य विगतजयो वा यस्य स चासौ सखा चेति विजयसखस्तस्य सखीनां तव सखा कामयुद्धे या जयति याभिर्वा विजीयते तासामेवाग्रतस्तत्प्रसङ्गः सुरतजयपराजयविरुदावली गीयतां श्लेषेण पूर्वं सुवलसख आसीत् सम्प्रति विजयोऽर्ज्जुनस्तस्य सखा अभवदिति भाविवार्त्तापि तस्या मुखात् स्वयं निःसृतेति ज्ञेयम् । ततश्च ताः क्षपितकुचरुजः खण्डितकुचज्वालास्तवेष्टं वाञ्छितं कल्पयिष्यन्ति त्वया च त्वद्गानश्रावणया इष्टाः पूजिताः सत्यः अत्र उत्तरार्द्धे असूया मानगर्भा सर्वत्रैव उपहासात्मकः कटाक्षः कृष्णे पर्याप्नोतीत्ययं विजल्पः । यदुक्तम् ।

> व्यक्तयासूयया गूढमानमुद्रान्तरालया ।
> अघद्विषि कटाक्षोक्ति र्विजल्पो विदुषां मतः ॥

इति ॥ १४ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

ननु मदन्यया प्रेयस्या मत्प्रियो मथुरायां रमत इति केन प्रमाणेन श्रीमत्या ज्ञातं प्रत्यक्षेणोतानुमानेन किम्वा शब्देन नाद्यः अयोग्यत्वात् न द्वितीयः धूलीपटले धूमभ्रमवत् श्मश्रुनिष्ठस्वाभाविकलौहित्ये तादृशकुङ्कुमलौहित्यभ्रमात् न तृतीयः अनाप्तवाक्यस्याप्रमाणत्वादयथार्थवादिनोऽनाप्तत्वात्तस्मात्सर्वदा त्वत्सङ्गमध्यानपरे स्वप्नेऽपि त्वदन्यस्त्रीसमागमरहिते त्वद्विरहव्याकुलस्वान्ते परमप्रेष्ठे श्रीव्रजराजनन्दने परमभक्त्या भगवत्प्रियायाश्चरणसरोजं द्रष्टुं स्प्रष्टुं च तदाज्ञयागते मयि च किमित्येवं दोषा आरोप्यन्त इति चेत्तत्राह । सकृदिति । असकृत्पायनेऽपि तत्पिपासाया अनिवृत्तत्वात्तदुपकारतिरोधानाय प्रवृत्तत्वाद्वा सकृदित्युक्तम् अधरसुधां सकृत्पाययित्वा यद्योऽस्मांस्तत्याज उत्कृष्टवस्तुलाभनिश्चयं विना पूर्वसिद्धं वस्तु केनापि न त्यज्यते प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तत इति न्यायात्तथा च ; त्यागान्यथानुपपत्त्येदं कल्प्यत इत्यर्थापत्तिप्रमाणेन मयेदं ज्ञातमिति भावः । ननु यः सुधां पाययित्वा गच्छति स किमुपालम्भविषयो भवति पिपासितस्य जलमपि पाययित्वा यो गच्छति स कृतज्ञैः सर्वदा स्तूयत एव ननु निन्द्यत इत्यपि शङ्काऽनेन निरस्ता शुष्ककाष्ठैर्यो दहति तदपेक्षया आर्द्रगोमयेन यो दहति सोऽत्यन्तदुःखप्रद इति न्यायोऽत्र घटते ननु त्वदुक्तस्तथा च मरणे दुःखाननुभवात्सुधां पाययित्वा गतो नत्वस्मदुपकारार्थं तथा कृतवान् येन तदवहेलनेऽस्माकमकृतज्ञतादोषः स्यादन्यथा पुनः पुनस्तत्पायनं कुर्यात् त्यागं च न कुर्यादिति अधरपदेन जातितोऽपि वयं भ्रंशिता इति ध्वनितं नन्वेवम्विधा सुधा किमर्थं भवतीभिः पीतेत्याशङ्कानिवृत्त्यर्थं बलात्कारः सूचितः । ननु तदर्थं सन्तापो न कार्यस्तत्राह गत्वेदं कथयिष्यामि स च श्रुत्वैव तां सुधां कनकपात्रे निधाय प्रेषयिष्यति यां पीत्वा तृप्ता भविष्यथेति चेत्तत्राह । स्वां स्वेन दानं विना तदधररूपपात्रं विना च पातुमयोग्याम् अधरवियोगे तु तस्याः सुधात्वमेव नश्येदिति भावः । नन्वलभ्यवस्तुस्पृहा न युक्तेति विचार्य स्वस्थचित्ता भवथेति चेत्तत्राह । मोहिनीं विवेकं नाशयित्वा दुरन्तलालसोत्पादिनीं दृष्ट्वा तेन त्यागः कृतः स्यादित्याशङ्क्याह । सुमनस इति । सुमनस इवास्मान्स भवादृक् तत्याज तथा च भ्रमरकर्तृकमालतीत्यागे यथा नास्ति तासां कश्चिद्दोषः तथा साधुमनसां तत्समानामस्माकमपि तथा च स्वस्थानस्थितत्वाद्वयं मालतीसमाः स तु अन्यत्र गतत्वाच्चञ्चलो भ्रमरसम इतीदं प्रत्यक्षमेव न तु कल्पनेति भावः । अत एव सद्यस्तत्याज एतेन ननु भवतीभिः कुतो न धृत इत्याशङ्कापि परिहृता यथा त्वं मालतीभिर्धर्तुमशक्यस्तद्वदतिचञ्चलस्यातिबलिष्ठस्य च तस्यास्माभिर्धर्तुमशक्यत्वात् यद्यपि भ्रमरः

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

गायसीति चेत्तत्राह । हे षडङ्घ्र ! इति छिपादपि बहुदूरं गन्तुं शक्नोति त्वं तु षट्पदत्वादन्यत्र किमर्थं न गच्छसि किमित्यस्मद्दुःखदानाय प्रवृत्तोऽसीति भावः । ननु व्रजे तस्य प्रेमातिशयादहमपि व्रजं दृष्ट्वा प्रसन्नः सन् गायामीति चेत्तत्राह । पुराणं प्रेमातिरेकस्तस्यास्माभिर्बहुशोऽनुभूतो न त्वया वर्णनीयः सकपटैव तत्प्रीतिः स्थितेति भावः । यद्वा यावत्कालं स इह स्थितस्तावत्कालं तस्य प्रीतिरासीन्नाधुनेति भावः । यदि व्रजे एव गानं मया कर्तव्यमिति तवाग्रहस्तर्हि यत्र स्थितस्य तव गानशब्दोऽस्मत्कर्णपथं नावगाहेत तत्र स्थित्वा गानं कुर्वित्याह । नोऽस्माकमग्रतः किं गायसि । कुत इति चेत्तत्राह । अगृहाणामिति । न गृहं गृहमित्याहुर्गृहिणी गृहमुच्यत इत्युक्तत्वादगृहिणीनां तेन त्याजितगृहिणीभावानां तथा च दुःखितानामस्माकं दुःखदाने तव को लाभः यद्वा सर्वेश्वरस्य भगवतो यदुपतित्वेनापि गानं तच्छ्रवणं च नानुचितमिति चेत्तत्राह । अगृहाणामिति । त्वं स्वार्थं गायसि किं वास्मदर्थं नाद्यः यतो यदगृहास्तेनैव त्याजितपूर्वगृहाः स्वगृहे च न स्थापितास्तस्मात्स्वगृहे भगवद्गृहे विदुराणां मार्गप्रतीक्षाणां वनकुसुमाभिलाषेऽप्यवकाशाभावे कामफलं तव किं फलं सेत्स्यति सर्वो कल्पेयमिया इति बोधयितुं बहुवचननिर्देशः ननु गुप्तरूपत्वात् रोगहर्तुमसमर्थोऽपि श्रीकृष्णसमालाशीर्वादादिभिरेवाहं कृतकृत्यो भविष्यामि धर्मं वा लप्स्यामीति चेत्तत्राह । पुराणमिति । भगवतो बहुधा दृष्टत्वाच्छ्रुतत्वाच्च तद्गानस्य विस्मयकारित्वाभावादुक्तं फलमपि दुर्लभं नान्यत्र तद्गाने तव कश्चिद्धर्मविशेषः अस्माकं तेन सुखाभासः एतेन द्वितीयः पक्षोऽपि निरस्तस्तच्छ्रवणस्यानिष्टापादकत्वात् श्रवणादिनैवं दृष्टाप्राप्यफलत्वेनानुभूतस्य सर्वानिष्टमात्रादिकामितः परं पदं न प्राप्स्याम इतोऽधिकफलादर्शनेन पारिशेष्यात्तेन स्वरूपमात्रस्यैव सम्भावितत्वात् स च स्वरूपे सति भगवान्कदाचित्प्राप्येतेत्याशंसनीयो नास्माकमनिष्टोऽतो नास्मदर्थमपीहेदं तव गानमिति अथ मन्दमङ्कारान्कुर्वन्तं खिन्नचित्तं मत्वा भो भ्रमर ! माविषण्णो भव विवेकशून्ये गानोपजीविनि न वयं कुप्यामोऽपि तु तव प्राप्त्युपायं वदाम इत्याशयेनाह ॥ विजयेति । विशेषेण जयते सर्वोत्कर्षेण वर्तत इति विजयः श्रीकृष्णः स चासौ तव सखा चेति विजयसखस्तस्य सखीनामेवाग्रतस्तस्य प्रसङ्गं अस्मत्त्यागपूर्वकपुरस्त्रीवश्यतावाक्यसन्दर्भो गीयतां तवस्ता इष्टास्तेन सम्मानिताः अस्मद्दुर्दशापूर्वकतत्सौभाग्यगानेन त्वया वा सम्मानिताः सत्यस्तवेष्टं विशेषतः करिष्यन्ति यद्वा कामयुद्धे विशिष्टो विगतो वा जयो यस्य सः स चासौ सखा चेति तथा तस्य सखीनां प्राप्तजयपराजयानामग्रतः सुरतजयपराजयनिरूपकसंदर्भो गीयतां यद्वा प्रकृष्टो जयश्च सखा यस्य तस्य सखीनां तथा च ता एवंभूतास्तस्य सख्यो वयं त्वेकनिष्ठत्वान्न तथाभूता अत्र प्ररोचनार्थं गानं नापेक्षितमिति भावः । यद्वानवच्छिन्नभगवद्ध्यानलब्धसर्वज्ञया भावी वृत्तान्तोऽपि भूतवन्निर्दिष्टः तथा च विजयस्यार्जुनस्य सखा विजयसखस्तस्य सखीनां हरणादिना प्राप्तव्यानां कल्पयन्ति कल्पयिष्यन्ति यद्वा इन्द्रादिकृतगवेन्द्राभिषेकमारभ्य श्रीकृष्णस्य गोविन्देति नामधेयं यथा प्रतिष्ठितमभूत्तथा स ह्यर्जुनस्तव सखा भविष्यति स च त्वया पालनीय इतीन्द्रोक्तिमारभ्य विजयसख इत्यपीति तदभिप्रायेण भगवति तच्छब्दः प्रयु-

क्तस्तथा च स्त्रिय एव तत्प्रिया रसिकाश्चेत्यतो गायके तु मया तत्सन्निधावेव गानं विधेयं न तु पुरुषाणां समीप इति यदि तवाभिप्रायस्तर्हि विजयसखसख्यो यथोक्तलक्षणत्वात्तच्छ्रवणधारिण्यो नेदानीं वयमिति भावः । अप्राप्तपुरुषार्थस्यान्येष्टसम्पादनाशक्तत्वात्ता एव लब्धपुरुषार्थत्वात्ता एव तवेष्टसम्पादनायालमित्याशयेनाह । क्षपितेति । कामयुद्धे गाढालिङ्गनेन कठिनभावं प्राप्तेन हस्तेन वा मर्दनेन क्षपिता नाशिता कामकृतकुचपीडा यासां ता इति सकटाक्षमुपहासः अत्र विजल्पः तदुक्तं "व्यक्तयासूयया गूढमानमुद्रितलीलया । अलं द्विषि कटाक्षोक्तिर्विजल्पो विदुषां मत" इति उद्धवपक्षे हे बहुषडङ्घ्रे ! पुष्करमालासौरभाकृष्टानां बहूनां षडङ्घ्रीणां तत्सन्निधौ विद्यमानत्वात् बहवः षडङ्घ्रयो यस्य स तथा समानमन्यत् श्रुतिपक्षे ननु प्रकृतेः परमेश्वरपराधीनत्ववर्णनमनुपपन्नं परमविद्भिः सांख्यैरीश्वरमनङ्गीकृत्य त्रिगुणात्मिकायाः प्रधानापरसंज्ञायाः प्रकृतेः स्वतन्त्राया एव जगत्कारणत्वाभिधानात् न चाचेतनायाः प्रकृतेः स्वतन्त्राया जगत्कारणत्वमनुपपन्नं तदैक्षतेत्यादिश्रुतौ जगत्कारणस्येक्षितृत्वश्रवणादिति वाच्यम् अचेतनेऽपि प्रधाने चेतनवदुपचारात् दृष्टो ह्यचेतनेऽपि कूले कूलं पिपतिषतीति चेतनवदुपचारः यथा लोके चेतनो देवदत्तादिः स्नात्वा भुक्त्वा चापराह्णे रथं नगरं प्राप्स्यामीत्यालोच्यानन्तरं नियमेन तथैव प्रवर्तते तथा प्रधानस्यापि महदाद्याकारेण नियमेन प्रवर्तनात्तत्र चेतनस्योपचारः तत्तेज ऐक्षत ता आप ऐक्षन्तेति एवं बहुस्यामित्यादिश्रुतयस्तु मुक्तजीवपरास्तस्मात्कथमुक्तमीश्वरः सर्गाद्यर्थं स्वशक्तिभूतां प्रकृतिमधितिष्ठति अद्यापि चेति चेत्तत्राह । किमिहेति । श्रोत्रं चक्षुः स्पर्शनं च रसनं घ्राणमेव च अधिष्ठाय मनश्चायं विषयानुपसेवत" इत्युक्तं मनः षष्ठानीन्द्रियाणि अङ्घ्रयो गमनागमनसाधनानि यस्यात्मनः स षडङ्घ्रिस्तस्य सम्बोधनं हे षडङ्घ्रे इह स्वस्वरूपभूतपरब्रह्मोपलब्धिसाधनेऽधिकारिशरीरे ऊनां न्यूनां जडात्मत्वादपरां "भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च । अहङ्कार इतीयं मे भिन्ना प्रकृतिरष्टधा । अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे परा"मिति भगवतोक्ता बहुस्वतन्त्रेयमित्यादिना पुनः पुनरुत्कृष्टत्वेन यद्गायसि तत्राप्यस्माकं श्रुतीनामग्रतः श्रुतिसिद्धान्तत्वेन तार्किं न किमपि तद्गानमयुक्तमिति यावत् इह श्रुतिमस्तकेषु जडत्वेन प्रतिपादितामिति वा तर्हि किं युक्तमिति चेत्तत्राहाधिपतिमिति । अवासुदेवाधिपतिं प्रकृत्यधिष्ठातारं तत्सत्तास्फूर्तिप्रदत्वेन ततोऽपि पुरातनत्वात्पुराणम् अवासुदेवः गृहाणाम् अयमर्थः स य एषोऽणिमा ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो इति प्रकृतस्य जगत्कारणस्यात्मत्वेनोपदेशात्तदनात्मभूतायाः प्रकृतेर्न स्वातन्त्र्येण जगत्कारणत्वं श्रुतिसिद्धम् उदाहृतदृष्टान्तेष्वपि सदधिष्ठितत्वप्रयुक्तमेवेक्षितृत्वमतः प्रकृतिस्वातन्त्र्यवादस्य श्रुत्यनभिमतत्वात्तदनुसरणं त्वया न कार्यमिति यः सर्वकारणं भगवान्वासुदेवः स एव त्वं नान्योऽतोऽहमेव वासुदेव इति स्वात्मत्वेन तं गृहाणेति सम्बोधनाशयः यद्वा अधिपतौ मा प्रमा यस्य स तस्य सम्बोधनं हे अधिपतिम तथा च श्रुतिबहिर्भूतं मतमुपेक्ष्य सर्वानर्थहेतुमायातरणार्थं तदधीशविषयकप्रमामेव सम्पादय "दैवी ह्येषा गुणमयी मम माया दुरत्यया । मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते" इति भगवद्वचनादिति भावः । आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः श्रोतव्यः श्रुतिवाक्येभ्यो मन्तव्यश्चोपपत्तिभिः सततं

दिवि भुवि च रसायां काः स्त्रियस्तद्दुरापाः कपटरुचिरहासभ्रूविजृम्भस्य याः स्युः ।
चरणरज उपास्ते यस्य भूतिर्वयं का अपि च कृपणपक्षे ह्युत्तमश्लोकशब्दः ॥ १५ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

कीर्तयन्तो मामित्युक्तत्वात्प्राप्त्युपायं श्रवणादिकमाह । विजयेति । "ब्रह्म ह देवेभ्यो विजिग्ये ब्रह्मणो वा एतद्विजये महीयध्व" मित्यादिश्रुत्या विशेषेण जयो यस्य स विजयः परमात्मा सयुजा सखायेति श्रुत्या तत्सखा जीवात्मा तस्य सम्बोधनं हे विजयसखेति नोऽस्माकं सखीनां "यतो वा इमानि भूतानि जायन्ते सदेव सोम्येदमग्र असीत् एकमेवाद्वितीयं सत्यं ज्ञानमनन्तं विज्ञानमानन्दं ब्रह्म अदृष्टं द्रष्टृश्रुतं श्रोत्रमतं मन्तृ नान्योऽतोऽस्ति द्रष्टेत्यादीनां तस्मिन् प्रत्यगभिन्ने परमात्मनि प्रसङ्गः समन्वयो यस्य तस्य सखीनामस्माकमिति वा विजयसखत्वात्तवेदमेवोचितमिति संबोधनाशयः तत्प्रसङ्गं विशिनष्टि । क्षपितेति कुत्सितं चरति अनर्थहेत्वहंकाराद्यात्मना परिणमत इति कुचरु अज्ञानं तस्माज्जातः सर्वोऽपि संसारः कुचरुजः क्षपितो नाशितः समूलः कुचरुजो येन सः एवं सम्मानिता उक्तसख्यस्तद्गानपरायणस्य तवेष्टं मोक्षं कल्पयन्ति प्रतिपादयन्ति "तरति शोकमात्मवित् ब्रह्मविदाप्नोति परं ब्रह्म वेद ब्रह्मैव भवती"त्यादिश्रुतेः वर्तमानापदेशेन मोक्षप्राप्तेः कालान्तरसाध्यत्वं वारयति "अत्र ब्रह्म समश्नुते विमुक्तश्च विमुच्यते ब्रह्मैव सन् ब्रह्माप्येती" त्यादिश्रुतेः ॥ १४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

काश्चित् श्रुततत्त्वा आहुः । सकृदिति । भवादृक् यथा त्वं सुमनसः पीतमधूनि पुष्पाणि त्यजसि तद्वत्प्रियवस्तुत्यागित्वात्त्वत्समः मोहिनीमधरसुधां नः सकृत्पाययित्वा वतेति खेदे सद्यः अस्मान् तत्यजे नु वितर्के अपि अहो पद्मा श्रीः तत्पादपद्मं कथं परिचरति अन्या आहुः उत्तमश्लोकस्य उत्तमकीर्तेः जल्पैर्मनोहरैर्वचनैः हृतचेताः मोहितचित्ता परिचरतीति ॥ १३ ॥

भ्रमरशब्दं श्रीकृष्णगुणगीतं कल्पयित्वा अन्या आहुः । किमिहेति हे षडङ्घ्रे ! पुराणं पुरातनं बहुशोऽनुभूतं यदूनामधिपतिं कृष्णम् अगृहाणां वनचरीणां नोऽस्माकमग्रतोऽग्रे किमर्थं त्वं बहु गायसि विजयसखस्य अर्जुनमित्रस्य सखीनां पुरवासिनीनामग्रतस्तत्प्रसङ्गो गीयताम् ताः इष्टाः कृष्णस्य प्रियाः क्षपिता कुचरुक् यासां ताः ते इष्टं वाञ्छितं कल्पयन्ति दास्यन्ति ॥ १४ ॥

भाषा टीका ।

वे श्रीकृष्ण तुमही सरीके हैं जैसे तुम लोगफूलों के रस को चूस कर छोड देते हो तैसे उनने भी सब के मोह करने वाली अपनी अधर सुधा का एक ही वखत पान करा कर हमको छोड दिया है पद्मवन में वास करने वाली लक्ष्मी जाने कैसे उनके चरण की सेवा करती है हां मालुम पडता है कि उन उत्तमश्लोक कृष्ण के मीठे वचनों से चित्त के हरण हो जाने से सेवा करती होगी ॥ १३ ॥

हे षट्पद ! भ्रमर हमतो विना घर द्वार वाली हैं हमारे आगे तू उन पुराने देखे सुने यदुपति की कीर्ति को क्या गाता है तू इहां से जाकर अर्जुन के सखा की सखियों के आगे गान कर तौ वे कृष्ण की प्यारी हैं उनके स्तनोंका कामाग्नि रोग मिट गया है वे तेरे मनोरथ को पूरा करैंगी ॥ १४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

भो मातर्मैवं वोचस्त्वामनुस्मृत्यानङ्गविक्लवस्त्वां प्रसादयितुं मामादिष्टवानित्यत आह । दिवीति । दिवि भुवि रसातले च याः स्त्रियः स्युस्ताः का नाम दुरापा न काश्च तदित्यव्ययम् तस्येत्यर्थः । कपटेन रुचिरेण हासेन भ्रूविजृम्भो यस्य तस्य हे कपट इति वा किञ्च यस्य चरणरजः श्रीः सेवते तत्र वयं काः अपि च यद्यप्येवं तथापि कृपणपक्षे कृपणानुकम्पिनि पुंस्युत्तमश्लोकशब्दो भवतीति तथा कथनीयं त्वयेति भावः ॥ १५ ॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

दिवि भुवि रसायां चेति । ऊर्ध्वमध्याधोलोकत्रय इत्यर्थः । चरणस्य रज उपास्त इति सुष्ठु नीचतया सेवोक्ता हि निश्चितं अन्यैस्तत्संख्यातं यद्वा ननु भवत्य एव केवलं तन्नाद्रियन्ते सर्वत्र यावत्यो युवतयस्तावत्य एव तद्वशे वर्तन्ते इत्यत आह । दिवीति सर्वभुवनेषु काः स्त्रियः क्षुद्रस्त्रियोऽपि यास्तास्तद्दुरापाः स्युः किं वा याः काः स्त्रियः काश्चन स्त्रियः सर्वा इत्यर्थः । तस्य दुरापाः स्युः इत्यवहेलनं तत्र हेतुः कपटेनैव रुचिरो हासयुक्तो भ्रुवो विजृम्भो नर्तनं भ्रूविजृम्भो भ्रुकुटी वा यस्य तस्य इति स्त्रीजनप्रतारणमात्रचातुर्येण तस्य कुहकता ननु किमेवं ब्रूषे सुन्दरीवृन्दश्रेष्ठा यदिन्दिरापि तत्पदारविन्दरजो वन्दते इति चेत्तत्राह । चरणेति । यस्य चरणरजो भूतिश्चोपास्ते तर्हि उपास्तान्नाम तत्र वयं काः किमस्माकमायातं न हि मद्विधानां मध्ये श्रीवदेकतमापीत्यर्थः इति गर्वैश्वर्ययोः सूचनम् अपि च कृपणानां पक्षः सहायो यस्तस्मिन्नेव उत्तमश्लोक शब्दो नाम ख्यातिर्वा भवति अतः कृपणानामुपेक्षया गानकारणयशोहानेस्तस्य गानमेव न युज्यत इति भावः यद्वा ननु उत्तमश्लोकशब्दाश्रयत्वादेव लोकोत्तरे तस्मिन्नुपेक्षा नोचितेत्यत आह । अपि चेति । कृपणपक्षेऽपि च कृपणो निष्ठुरो बद्धमुष्टिर्वा तेन स्वदर्शनादिसौख्यादानात् अदातृत्वं लक्ष्यते तत्पक्षेऽपि तद्विषयेऽपीत्यर्थः तस्मिन्नुत्तमश्लोक इति शब्दस्तद्विधैरेव मृषा स्तावकैः सेवकैः क्रियत इत्यर्थः इत्यसूयया तदाक्षेपः ॥ १५ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

उन्मादस्वाभाव्यादकस्मादेनो मानभङ्गीं परित्यज्य कलहान्तरिताभङ्ग्याह । दिवीति । ऊर्ध्वमध्याधोलोकत्रय इत्यर्थः । कपटत्वं सच्छलत्वमन्यजनवञ्चनाय चरणस्य रज उपास्त इति ।

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

कृष्णेतु नीचतया सेवोक्ता हि निश्चितम् अन्यत्तैः तत्र तस्य दुरापा इति सम्बन्धविवक्षया षष्ठी । अथवा मान एवानुवर्त्तनीयः तथा हि नन्वेवं चेत्तर्हि तत्सम्बन्धे प्रथमत एव कथं न सावधाना जाताः स्थ इत्याशङ्क्य स्वदोषं परिहरन्ती मायया ग्रह इव गृहीतवानस्मानबलाजनानधुनाप्यसौ परित्यजतादिति सदैन्य-मिव सेर्ष्यं संदिशन्ति । दिवीति । कपटेन माययैवापातरुचिरौ हासभ्रूविजृम्भौ यस्य तस्य अन्यत् पूर्ववत् । अत उत्तमः श्लोकत्वेऽपि कटाक्ष एव व्यञ्जितः । यद्वा । दिवि भुवीत्यादिना तस्य प्रभावानुवादं सासूयं ज्ञात्वा तथापि शेषं तदवशत्वं सूचयन्ती सदैन्यमिव सेर्ष्येण गर्वेण सोल्लुण्ठमाह । का दुरापा इति । अपि तु यत्राक्रन्दुमिष्यन्ते तत्रैव सुलभाः । लक्ष्मीस्तु तत्र तत्रैवानुगच्छन्ती चरणरज उपास्ते तत्र वयं का इति । अपिचेति कृपणा एव तत्रोत्तमश्लोकत्वं जल्पन्ति नतु मादृशाः कृपणा इति एवमाक्षेपः ॥ १५ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

रसातले च ताः कास्तवदुरापाः न काश्चिदपीत्यर्थः कपटरुचि-रहासभ्रूविजृम्भस्य यस्येत्यन्वयः कृपणाः कदर्यः लुब्धकोऽपि तस्य पक्षे इत्यर्थः ॥ १५ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ननु यदि पौरस्त्रियः तद्वशङ्गतास्तदालिङ्गेन क्षपितकुच-रुजो भवेयुस्तदा मदिष्टं कल्पयेयुस्तस्य ता एव दुष्प्रापा इत्य-त्राह । दिवीति । दिवि स्वर्गे भुवि रसायां पाताले च याः स्त्रियः स्युस्तासां मध्ये काः स्त्रियः तदिति पृथक् पदमव्ययं तस्य श्रीकृष्णस्य दुरापाः दुष्प्रापाः सर्वाः अपि स्त्रियः सुलभा एवे-त्यर्थः । तत्र हेतुं ब्रुवन्ती विशिनष्टि । कपटो रुचिरः सुन्दरश्च हासो भ्रूविक्षेपश्च यस्य तस्यात एव यस्य भगवतश्चरण-रेणुं भूतिर्लक्ष्मीरप्युपास्ते कपटरुचिरहासभ्रूविजृम्भाभ्यां च तद्वशगा तच्चरणरजः सेवत इत्यर्थः । वयन्तु विचक्षणाः ताभ्यां न तद्वशगा इति भावः । तदाह । वयं का हीति । तद्वशगानां मध्ये न काश्चिदित्यर्थः । किञ्च कृपणपक्षे कृपणानां दीनानां जनानां पक्षे कोट्यामेव ह्युत्तमश्लोकशब्दः उत्तमश्लोकप्रसङ्गो-त्तरः शब्दो गेय इति शेषः । नत्वदीनपक्षेऽस्मत्समुदाये इति भावः । एवं भ्रमणशीलं भ्रमरं स्वपादमूले वर्त्तमानमात्मानं प्रसाद-यितुमिवालस्य तं प्रत्युक्तम् ॥ १५ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

ननु प्रगल्भा चेत्त्वमेवं प्रलपनं चित्त ! मत्तकारिन्या लज्जाभा-वात्कृष्ण आगमिष्यतीति शङ्का माभूदित्याह । दिवीति । स्वर्गा-दिषु विद्यमाना देवस्त्रियः तस्य कृष्णस्य दुरापाः दुष्प्रापाः स्युः किन्तु सुप्रापा एव कर्षेण मन्त्रमाह । कपटेति । याः स्त्रियः कपटश्च रुचिरश्च हासयुक्तो यो भ्रूविजृम्भः भ्रूभङ्गस्तस्य विषया लक्ष्मी-भूताः स्युः अध्यात्मकमानन्दं घटयति गमयतीति कपटो रुचिं स्पृहां राति ददातीति । कपटे रुचिरः हे कपटेति वा तत्र हेतुमाह । चरणेति । भूतिर्लक्ष्मीर्यस्य हरेश्चरणरज उपास्ते तदनुग्रहार्थमिति शेषः । ननु भवत्योऽपि तथा कुर्वन्त्वित्य-त्राह । वयमिति । तत्र वयं वनचारिण्यः काः स्याम अपि च पुनरपि शृणु कृपणस्य किम्पचानस्यास्मद्विधस्य जनस्य पक्षे अन्तिके उत्तमश्लोकशब्द एव कर्णविषयो नतु वाच्योऽर्थश्चक्षुर्विषय इत्यर्थः । यद्वा उत्तमश्लोकशब्दः कृपणपक्षे दीनपक्षपाती श्रुतः सोऽप्यस्मद्विषयो नाभूदित्यर्थः ॥ १५ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

उन्मादस्वाभाव्यादकस्मान्मानभङ्गीं परित्यज्य कलहान्तरिताभ-ङ्ग्याह । दिवीति । कपटत्वं सच्छलत्वम् अन्यजनवञ्चनाय सोल्लु-ण्ठमेवेदं वचनम् ॥ १५ ॥ १६ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

प्रार्थनां वारयितुं तस्य भगवतः स्त्रीसौलभ्यमाह । दिवीति । लोकत्रये याः स्त्रियः तासां भगवान् दुरापः नतु भगवतस्ताः स्त्रियो हि त्रिविधास्तत्र लोके तास्तु भगवतः सुलभा एव तत्र हेतुं वक्ष्यति चकाराद्ब्रह्माण्डाद्बहिः स्थिता इति स्त्रीणां हि रमणमपेक्ष्यते नाना विलासैर्हि रमणं देवस्त्रीणां प्रत्येक-नियततया रमणं भूस्त्रीणां विलासतया च रमणं कचिद्भूस्त्रीणां परं निरोधस्तुल्यः अतिगुप्ततया रमणं रसास्त्रीणां भगवति पूर्वश्लोके-क्तप्रकारेण त्रिविधत्वमप्यस्ति प्राकट्यविलासरूपः प्रथमं निरू-पितः विरुद्धतया द्वितीये अतिप्रयासेन अतिगुप्ततया सुभद्रा-हरणवत् विजयसखित्वेन रमणनिरूपणात् गुप्ततया द्वितीये अति-प्रयासेन रमरमणमुक्तं किञ्च सुतरां स्त्रियः येन धर्मेण वशे भवन्ति स धर्मो भगवति वर्त्तत इत्याह । कपटेति । कपटपूर्वकं यो रुचिरो हासः तेन भ्रूविजृम्भः स्थलादिसर्वसूचनपूर्वकं रत्यर्थमाकारण-रूपः स यस्य वर्तते धर्मस्यैव वा याः स्त्रियो भवेयुः तदधीनास्ताः यदि कश्चित् यथा न प्रकटी भवति तथा गोप्यं विधाय तथा समर्थः यथैव तासां मनःप्रीतिर्भवति तथा रमणं कुर्वन् सर्व-सामग्रीं सम्पाद्य समाकारयति चेन्न कापि स्त्री दुर्लभा भवति अत एव क्वचित् श्लोकः "स्थानं नास्ति क्षणो नास्ति नास्ति प्रार्थ-यिता नरः । तेन नारद ! नारीणां सतीत्वमुपजायते" इति अत एता-वत्यर्थे कृते प्रार्थना व्यर्था अकृतेऽपि व्यर्थेति उभयथापि प्रार्थना न कर्तव्येति भावः । किञ्च एतदस्माभिर्दृष्टोपायत्वेन निरूपितम् अलौकिकोपाये तु किमपि न कर्त्तव्यमित्याह । चरणरज उपास्त इति । सर्वैरेवार्थार्थिभिः सेव्यमाना विभूतिर्लक्ष्मीः यस्य स्वतः सामर्थ्यात् वस्तुमाहात्म्याद्वा चरणरज उपास्ते अत्यादरेण दासीत्वं प्रार्थयते तत्रैवं विधेऽर्थे च वयं काः तस्या कोटयंशभूताः तस्मादस्मान्प्रति न किञ्चिदेतावत्कर्त्तव्यं किञ्च एतदप्यस्माभि-र्विचारेणोच्यते वस्तुतस्तु भगवति विचारोऽपि न कर्त्तव्य इत्याह । अपिचेति । उत्तमश्लोकशब्दः कृपणपक्षे सति भवतीति नान्यथा भगवांश्च सर्वलोकप्रसिद्धः उत्तमश्लोक इति वयमतीव दीनाः अस्म-त्पक्षपातं करिष्यत्येव अन्यथा कथमुत्तमश्लोकजल्पो भवेत् युक्तश्चायमर्थः तस्मात्प्रमाणबलेन प्रमेयबलेन लोकप्रसिद्ध्या भगवान् दीनानुकम्पीति यथैवास्माकं युक्तं तथैव करिष्यति न

श्रीमद्वल्लभाचार्यकृतसुबोधिनी।

दूतोऽपेक्षते नापि वचनानीति निर्गुणगोपिकाया वचनं तद्भावापन्नाया वा एतत्सामसप्रकारेण तमोरजःसत्त्वानि गुणतीतश्च प्रकारो निरूपितः अतः परं राजसप्रकारेण ततोऽग्रे सात्त्विकप्रकारेण चौभयत्र त्रैविध्यं निरूपयिष्यति। रजस्तमःसत्त्वानां तमोरजःसत्त्वानां च क्रमः श्लोकानां ज्ञातव्यः॥ १५॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

ननु भोः कृष्णप्रेयसीशिरोमणे तत्र स्थितः स रात्रिन्दिवमेव त्वां ध्यायन् कामशरार्द्दितः खिद्यति। त्वञ्चेत् प्रसीदसि तदैव तस्य निस्तार इति तत्र सासूयमाह। दिवीत्यादि। अयमर्थः। कृष्णस्य स्त्रीभिर्विना कालो न यातीत्यहं सुष्ठु जानामि तत्र यदि मथुरायां स्त्रियो न मिलन्ति तदा सोऽस्मान् ध्यायतु प्रसादयतु तत्र नेतुं तादृशं दूतञ्च प्रस्थापयतु। न च गोपजातिं तं पुरस्त्रियः क्षत्रियजातयः कथमङ्गीकरिष्यन्तीति वाच्यम्। यतो दिवि भुवीति। तदित्यव्ययं तस्य का दुरापाः यदि स स्वर्गे गच्छेत् तदा देव्योऽपि रसायां रसातलादिषु नागपत्न्योऽपि स्वस्वपतींस्त्यक्त्वा तमागच्छेयुर्मथुराङ्गनानां का वार्त्तेति भावः। न च तत्तदङ्गनाप्राप्तौ तस्य किञ्चित् पणादिकमपेक्षितव्यमित्याह। कपटेनापि रुचिरौ सर्वासां मनोहरौ भ्रूविजृम्भहासौ यस्य तथा भूतस्यैव तस्य या देव्यादयः स्युः। ननु स्वस्वपतीनामित्यर्थः। सकपटहासमूल्येनैव ताः स्वयमेव क्रीता भूत्वा स्वस्वपतींस्तास्त्यजन्ति। कपटपदेन कृष्णस्तु ताः ताः सकृदेव भुक्त्वा त्यजति नवप्रियत्वादिति भावः। देव्यादयो दूरे वर्त्तन्तां भूतिर्लक्ष्मीर्नारायणस्यापि स्त्री चरणरज उपास्ते तदङ्गसङ्गार्थमिति नागपत्नीवाक्यं वयं पौर्णमासीमुखाच्छ्रौष्म। अतो वयं काः कस्यां गणनायां तिष्ठामो यतो मानुष्यस्तत्रापि गोप्यस्तत्रापि वृन्दावनीया इति भावः। इदं दैन्यमयवाक्यमपि समस्तकादेधूननस्वरविशेषेण गर्वगर्भितामीर्ष्यामेव व्यनक्ति। सा चेर्ष्या स्वेषां लक्ष्म्यादितोऽपि प्रेमाधिक्यं रूपलावण्याधिक्यञ्चानुव्यनक्ति। अपि च। किञ्च उत्तमःश्लोकशब्दो हि कृपणपक्ष एव सन्ततदीनहीनजनान् यो दयते स ह्युत्तमःश्लोक उच्यते कृष्णे तु तल्लक्षणाभावान्मिथ्यैवोत्तमःश्लोकत्वमित्यर्थः। यद्यस्माद्विधान् कृपणजनान् स नानुःखयिष्यत्तदा स्वस्मिन् कथमुत्तमःश्लोकशब्दवाच्यत्वमधास्यदिति वा आक्षेपध्वनिः। अत्र पूर्वार्द्धे दिवि भुवीत्यादिना कुहकताख्यानं चरणरज इति तृतीयचरणे गर्वगर्भिता ईर्ष्या। अपिचेति चतुर्थपादे सासूय आक्षेप इत्ययमुज्जल्पः। यदुक्तं।

> हरेः कुहकताख्यानं गर्वगर्भितयेर्ष्यया।
> सासूयश्च तदाक्षेपो धीरैरुज्जल्प ईर्यते॥

इति॥ १५॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका।

ननु भो मातश्चातुर्यसागरभूते मथुराख्ये पुरे क्षत्रियाङ्गनानां स्वान्तःपुरेऽवस्थितानां दर्शनस्यापि दुर्लभत्वाद्भगवतश्च त्वदासक्तचित्तत्वेन त्वां चिन्तयतस्त्वद्वियोगेन विह्वलतया वर्त्तमानत्वान्नासौ यथोक्तोपालम्भविषयोऽतः प्रसीद त्वदनुस्मरणोत्थमन्मथाविष्टपरवशेन तव प्रियेण त्वत्प्रसादार्थमेवाहं प्रेषितस्त्वत्प्रसादमप्याकर्ण्य तस्य सुखं भविष्यत्यतस्तदुपरि करुणां कुर्वित्याशङ्क्य करमर्दनशिरःकम्पपूर्वकं सेर्ष्यमाह। दिवीति। दिवि स्वर्लोकादारभ्य ब्रह्मलोकान्तेषु लोकेषु भुवि सभुवर्लोके रसायां सप्तसु पातालेषु चकाराद्ब्रह्माण्डाद्बहिरपि वा स्त्रियस्ताः का नाम तत् तस्य दुरापाः दुष्प्रापा न काश्चनापि तथा च स्वर्लोकादौ गतस्त्वत्रैव वा तदाकर्षणपरस्य स्त्रीमात्रमपि यदा न दुष्प्रापं तदा मधुपुरस्त्रीणां का कथेति भावः। यद्वा तत्तल्लोकस्थिता दुष्प्रापा अपि याः स्त्रियस्ता अपि तस्य स्युः ननु स्वपतीनां यतस्तद्वशीकरणसामग्री तत्सन्निधौ पुष्कला वर्त्तत इत्याशयेन तं विशिनष्टि। कपटेति। कपटेन रुचिरेण चारुणा हासेन च भ्रूविजृम्भो यस्य कपटेन रुचिरौ हासभ्रूविजृम्भौ यस्येति वा कपटपूर्वकं यो रुचिरो हासस्तेन भ्रूविजृम्भः स्थानादिसूचनपूर्वकरत्यर्थमाकारणरूपो यस्येति च तथा चैवंविधस्य न कापि स्त्री दुर्लभेत्यर्थः। तदुक्तं "स्थानं नास्ति क्षणो नास्ति नास्ति प्रार्थयिता नरः। तेन नारद! नारीणां सतीत्वमुपजायते" इति किं चालौकिकसामग्री तस्य निकटे या वर्त्तते तत्सत्त्वे लौकिकसामग्र्यपेक्षैव नास्तीत्याशयेनाह। चरणेति। सर्वैरर्थार्थिभिरर्थ्यमाना विभूतिर्लक्ष्मीः यस्य स्वतः सामर्थ्याद्वस्तुमाहात्म्याद्वा चरणरज उपास्ते परमादरेण किङ्करीवत्सेवते यद्वा अन्यासां स्त्रीणां का कथा परमसतीत्वेन प्रसिद्धा नारायणाङ्कविभूतिरपि तच्चरणरज उपास्त इत्याह। चरणेति। तत्रैवंविधस्य तस्य निकटे वयं का विभूतिकोटिकोट्यंशादपि न्यूना व्रजस्त्रियः कस्यां गणनायां स्याम यास्याः अत एव वयं तेन निकृष्टाः एवं सति किमस्मास्वेव कपटं कर्तुमागतोऽसीत्याशयेन हे कपटेति सम्बोधनम् एवं स्वज्ञायोग्यत्वमापाद्य परिहसति अपि चेति। यद्यप्येवं तथापि कृपणपक्षपातिनि दीनानुकम्पावति पुरुषे उत्तमश्लोकशब्दः प्रवर्त्तते इति प्रसिद्धं तथा चोत्तमश्लोकशब्दवाच्यस्य तस्य दीनानामस्माकं पक्षपात उचितो यथा चैवं भवेत्तथा त्वयास्मत्प्रियो वक्तव्य इति भावः। यद्वा यद्यप्येवं तथाप्युत्तमश्लोकशब्दः तस्मिन्मिथ्यैव प्रयुज्यते कृपणपक्षपातित्वरूपतत्प्रवृत्तिनिमित्ताभावात् तथा च तच्छब्दयाथार्थ्ये च यदि तस्य प्राप्त्यर्थास्मद्विधदीनजना दुःखसागरादुद्धर्तव्या इति भावः। अनया वक्रोक्त्या विभूतिसहितस्योपेक्षया स्वस्थानमत्यजन्त्यो वयमेवोत्तमा इति ध्वनयति यद्वा यथा वयं तस्यागण्यास्तथाऽस्माकं सोऽप्यगणनीयः कार्पण्याभावादित्याशयेनाह। अपिचेति कृपणा एव तस्योत्तमश्लोकत्वं जल्पन्ति तदर्थमनुसन्धाय तदधीनाश्च भवन्ति नत्वस्मादृशो निःस्पृहस्य तृणं जगदिति न्यायादित्यर्थः। अत्रोज्जल्पस्तदुक्तं "हरेः कुहकताख्यानं गर्वगर्भितयेर्ष्यया। सासूयश्च तदाक्षेपो धीरैरुज्जल्प इष्यते" इति इदं पद्यमुद्धवपक्षेऽपि समानं श्रुतिपक्षे ननु ब्रह्मणोऽपि श्रुतिप्रतिपाद्यत्वमसङ्गतं प्रत्यक्षादिविषयपरिनिष्ठितवस्तुप्रतिपादने हेयोपादेयरहितप्रयोजनाभावात्। अत एव जैमिनिना "आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थाना" मित्याशङ्क्य "विधिना त्वेकवाक्यत्वात् स्तुत्यर्थेन विधीनां स्यु" रित्यर्थवादवाक्यानां विधिस्तावकत्वेनार्थवत्त्वमुक्तं मन्त्राणां चेष्टे स्वाधीनां क्रिया तत्साधनाभिधायकत्वेन तत्त्वमुक्तं तस्मादुपनिषदामपि कर्मापेक्षितकर्तृस्वरूपदेवतादि-

विसृज शिरसि पादं वेद्म्यहं चाटुकारैरनुनयविदुषस्ते ऽभ्येत्य दौत्यैर्मुकुन्दात् ।
स्वकृत इह विसृष्टापत्यपत्यन्यलोका व्यसृजदकृतचेताः किन्नु सन्धेयमस्मिन् ॥ १६ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

प्रकाशनेन क्रियाविधिशेषत्वमास्थेयमिति चेत्तत्राह । दिवीति- स्वर्गादौ काः आनन्दघनब्रह्मसम्बन्धिन्यः याः स्त्रियः पतिव्रता- स्त्रीत्वस्वार्थाविनाभूताः याः स्युः तत् ताः कपटरुचिरहा- सभ्रूविजृम्भस्य कर्मकर्तुर्दुरापाः प्रतिपादकत्वेन प्राप्तुमशक्याः रुचिरौ हासभ्रूविजृम्भौ मायापरमेष्ठिधिष्ण्ये यस्य कपटश्चासौ रुचिरहासभ्रूविजृम्भश्च "तस्य हासो जनोन्मादकरी च माया तद्- भ्रूविजृम्भः परमेष्ठिधिष्ण्यम्" इत्युक्तत्वात् हासभ्रूविजृम्भाभ्यां मायासत्यलोकौ गृह्येते भ्रूविजृम्भ इत्युपलक्षणं लोकान्तराणा- मपि रुचिरौ स्त्र्यादिहासभ्रूविजृम्भौ यस्येति वा तथा च विचि- त्रवासनाक्रान्तत्वान्तस्य दुःखासत्याद्यात्मके कार्यकारणभूते प्रपञ्चे सुखसत्याद्यात्मकत्वभ्रान्तिमतः स्त्र्यादिविषयासक्तचि- त्तस्य कर्मकर्तुः प्रतिपादन उपनिषदां नास्त्युपयोगः "सदेव सोम्येद- मग्र आसीदात्मा वा इदमेक एवाग्र आसीत् तदेतद्ब्रह्मापूर्वमन- परमनन्तरमबाह्यमयमात्मा ब्रह्मसर्वानुभूः ब्रह्मैवेदममृतं पुरस्तात् अचक्षुरश्रोत्रम् अप्राणो ह्यमनाः शुभ्र इत्यादिश्रुतिकदम्बस्य प्रत्य- गभिन्ने ब्रह्मणि समन्वितस्यान्यपरत्वमुपचरितार्थत्वं कल्प- यितुमिन्द्रादेरप्यसमर्थत्वात् यद्यपि परिनिष्ठितं ब्रह्म तथापि तं त्वौपनिषदं पुरुषं पृच्छामीति श्रुत्या प्रत्यक्षाद्यविषयत्वा- त्तत्त्वमसीति ब्रह्मात्मभावः शास्त्रमन्तरेण नावगम्यते नच हेयो- पादेयरहितत्वादुपदेशानर्थक्यं शङ्क्यं हेयोपादेयविधुरब्रह्मसाक्षा- त्कारादेव समस्तक्लेशविनिवृत्त्या पुरुषार्थसिद्धेः ननु जातिगुणकर्म- स्वरूपसंज्ञासम्बन्धानां शब्दप्रवृत्तिनिमित्तानां ब्रह्मण्यभावात् कथं तस्य युष्मत्प्रतिपाद्यत्वमित्याशङ्क्यैवं चेत्तदा तव ज्ञानं तर्हि परम- सिद्धान्तं शृण्वित्याशयेनाह । चरणेति । तथा चानन्तकोटिब्रह्माण्ड- रचनायां समर्था विभूतिः सकलैश्वर्यवती महामायाशक्तिरपि यस्य स्पृशति तत्र निर्गुणे ब्रह्मणि वयं कास्तद्द्वयमपि दूरत एव तत्स्व- रूपं लक्षयामः तथा च श्रुतयः "यतो वाचो निवर्तन्ते अप्राप्य मनसा सह । को अद्धा वेद क इह प्रावोच" दित्याद्या इति भावः । नन्वेवं तर्हि किमिति महता प्रयासेन श्रुतिप्रतिपाद्यत्वं ब्रह्मणः स्थापितमिति चेत्तत्राहापि चेति । यद्यप्येवं तथापि उत्तमश्लो- कस्य प्रतिपादकः शब्दरूपः श्रुतिकदम्बः कृपणस्याज्ञस्या- सम्भावनाविपरीतभावनाविष्टचित्तस्य जीवस्य पक्षे तत्पक्षपाती तदुपकारायेति यावत् तथा च श्रुतिः "आत्मानमविदित्वा योऽस्मा- ल्लोकात्प्रैति स कृपणः तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठं स उपसन्नाय प्राह" त्याद्या ॥ १५ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

ननु युष्मान् प्रसादयितुं प्रेषितोऽस्मि श्रीकृष्णेन इत्यत आहुः । दिवीति । तदित्यव्ययं पृथक्पदम् । हे कपट ! तस्य रुचिरः सुन्दरः हासः भ्रूविजृम्भश्च यस्य तथाभूतस्य दिवि भुवि रसायां रसातले याः स्त्रियः स्युः ताः का दुरापा न काश्चन. किञ्च यस्य चर- णरजः भूतिः श्रीरप्युपास्ते तत्र वयं काः सर्वथा तस्याऽनीप्सिता एवेत्यर्थः । किञ्च कृपणानां भगवतोऽनीप्सितानामस्माकं पक्षे उत्तमश्लोकस्य पुण्यकीर्तेः श्रीकृष्णस्य शब्दः संदेशशब्दोऽपि दुराप इत्यर्थः । दुरापशब्दस्य वचनव्यत्ययेनान्वयः ॥ १५ ॥

भाषा टीका ।

उन कृष्ण के कपट की हांसी मनोहर है भौं का चलाना उत्तम है तो उनके लिये स्वर्ग मर्त्य पाताल तीनों लोकों में कौन स्त्री ऐसी है कि जो न मिलसकैगी महालक्ष्मी भी जिनके चरण के रजकी उपासना करती है उनके लिये हम कौनसी हैं तो भी दुखियों पर दया करने ही से उत्तम श्लोक नाम होता है यह उनसे तुम कहदेना ॥ १५ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

पादमूले प्रविशन्तं क्षमापयिष्यन्तमिव मत्वाह । विसृजेति । शिरसि न्यस्तं पादं विसृज तथाप्यमुञ्चन्तमाह । वेद्मीति । मुकुन्दादभ्येत्य सतः शिक्षितवेत्यर्थः । दौत्यैर्दूतकर्मभिश्चाटुकारैः प्रियोक्तिरचनाभिरनुनयविदुषः प्रार्थनाचतुरस्य ते तव सर्वमहं वेद्मि मुकुन्दवत्त्वमप्यविश्वसनीय इति भावः । ननु तेन किमपराद्धं तत्राह । स्वकृत इति । तदर्थमेव विसृष्टा अपत्यपत्यन्यलोकाः अप- त्यानि पतयश्चेतीह लोकेऽन्यलोके धर्मसाध्याश्च याभिस्ता नः अकृ- तचेताः असंयतचित्तो यो व्यसृजदस्मिन्किन्नु सन्धातव्यमिति ॥ १६ ॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

अहमिति अन्या नजानातु नाम अहन्तु विचक्षणा जानाम्येवेत्यर्थः । दौत्यैर्दूतकृत्यैश्चाटुकारैः यद्वा चाटुकारैर्दौत्यैश्च पादग्रहणादिभिः यद्वा मुकुन्दात्तत्सकाशात् दूतत्वैरभ्येत्य बहुत्वं गौरवात् तत्र च मुक्तिं कुत्सितामपि ददातीति लोकवञ्चनया धूर्तत्वमभिप्रेतं तदीयत्वेन पुनश्च दूतस्य धूर्तस्वभावत्वेन परमधूर्ततोक्ता श्लेषेण मुखे कुन्दतुल्या दन्ता यस्येति सौन्दर्यमेवास्ति न च विचार इत्यर्थः अन्यत्तैर्व्याख्यातं यद्वा कमलबुद्ध्या पादोपरि पतितं मृदु रुवन्तं भ्रमरमवेक्ष्य भो देवि मा रोषं कार्षीः सकृदपि मे विज्ञप्तिं कृपया शृण्विति याचमानमिव तं मत्वाह । विसृजेति । त्वां मुकुन्दश्च युवयोः शीलञ्च सर्वमहं वेद्मि तस्मान्मे पादं ते त्वदीयैरसाधारणैश्चाटुकारैः सह विसृज मत्पादं निजचाटुकारांश्च त्यजेत्यर्थः । कथम्भूतैः अनुन- यविदुषो मुकुन्दादभ्येत्य दौत्यैः दूतकृत्यैः । ननु स्वामिनि तेन प्रेष्ठेन सह विग्रहेच्छयालं सकृदपराधं क्षान्त्वा मया गीतेन सन्धिरेव कर्तुं युज्यते इति तत्राह । स्वेति । विसृष्टाः पतयश्चापत्यानि च अन्ये च गृहादयः लोकाश्च सर्वे ऐहिकामुष्मिकसुखभोगसहायाः यद्वा किञ्चिद्विशेषनिर्देशेन अयं परश्चेति लोकौ याभिस्ताः अकृत- चेताः न विद्यते कृते चेतो यस्य सः अस्माकं स्वस्य च कृत-

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

मननुसन्धानः । अकृतज्ञ इत्यर्थः यद्वा न कृतमस्मासु चेतः एता अनन्यगतय इति मनोऽपि येन सः यद्वा स्वकृते स्वार्थमस्मान् विसृष्टाप-त्यपत्यन्यलोका अकृत चकार इताश्च प्राप्तास्तु व्यसृजत् तु अहो अस्मिन् ईदृशेऽति कठोरे शठवरे किं सन्धेयं संयोज्यम् अपि तु नैवेत्यर्थः इत्याक्षेपः ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

अहमित्यन्या न जानन्तु नाम अहं तु विचक्षणा जातास्मीत्यर्थः । दौत्यैर्दूतकर्मभिश्चाटुकारैर्दूत्यैरिति काचित्कं मुकुन्दादित्यस्माकं सर्वासां गृहादिसर्वपरित्यागं ददातीति तथानाम्नः इत्यनेन धूर्तत्वं क्रूरत्वञ्चाभिप्रेतं तदीयत्वेन दूतस्य च धूर्तत्वभावत्वेन तस्य तु परमा-विश्वसनीयत्वमुक्तम् अन्यत्ते । यद्वा कमलबुद्ध्या पुनरुपसृत्य पादो-परि तं मृदु रुवन्तं भ्रमरमवेक्ष्य मां देवि मा रोषं कार्षीः सकृदपि मे विश्वसि कृपया श्रृण्विति याचमानमिव च तं मत्वाह विसृ-जेति । तत्र सोल्लुण्ठमाह त्वां मुकुन्दश्च युवयोः शीलञ्च सर्वमहं वेद्मि तस्मान्मे पादं ते त्वदीयैस्तादृशपैश्चाटु-कारैः सह विसृज मत्पादं निजचाटुकारांश्च युगपत्त्यज इत्यर्थः । कथम्भूतैः । अनुनयविदुषो मुकुन्दादभ्येत्य कृतैर्दूतकृत्यैः । ननु स्वामिनि तेन श्रेष्ठेन सह विग्रहेणालं सकृदपराधं क्षान्त्वा मया गीतेन सन्धिरेव कर्तुं युज्यत इति तत्राह । स्वेति । विसृष्टाः पतयश्चापत्यानि चान्ये च गृहादयो लोकाश्च सर्वे ऐहिका-मुष्मिकसुखभोगलक्षणाः । यद्वा । किं विशेषणायं परश्चैत लोकौ यामिस्ताः । अकृतचेताः न विद्यते कृते उपकृते चेतो यस्य सः अकृतज्ञ इत्यर्थः । यद्वा । न कृतमस्मासु चेतः एता अनन्य-गतय इति मनोऽपि येन सः अथवा स्वकृते स्वार्थम् अस्मान् विसृष्टापत्यपत्यन्यलोका अकृत अकार्षीत् इताश्च प्राप्तास्तु व्यसृजत् । नु अहो ईदृशेऽस्मिन् कठोरे शठवरे किं सन्धेयं सन्धातुमर्हमपि तु नैवेत्यर्थः इत्याक्षेपः ॥ १६ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

शिरसि पादं त्वच्छिरसि निहितं पादम् अकृतचेतः अकृत-ज्ञः ॥ १६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अथ स्वशिरसि भ्रममाणं तं श्रोत्रान्तमुपांशु प्रियोक्तीरभिधातुं चरन्तमिवालक्ष्याह । विसृजेति । शिरसि पादं न्यस्तमिति शेषः । विसृज पादेन मच्छिरो मास्पृशेत्यर्थः । तथाप्यमुञ्चन्तमाह । वेद्मीति । मुकुन्दादभ्येत्य ततः शिक्षितवेत्यर्थः । दौत्यैर्दूतकर्मभिश्चाटुकारैः प्रिय-वचनैश्चालमनुनयविदुषः प्रार्थनाचतुरस्य ते वेद्मि सर्वं विल-क्षितं वेद्मीत्यर्थः । मुकुन्दवचनमपि न विश्वसनीय इति भावः । ननु तेन किमपराद्धं तत्राह । स्वकृत इति । स्वकृते तदर्थमेव विसृष्टान्य-पत्यानि पतयोऽन्ये लोका धर्मसाध्या याभिस्ता अस्मान् व्यसृ-जत्स्ततोऽन्यो महानपराध इति भावः । अतो ऽसावकृतचेताः अकृतज्ञः कृतघ्न इति यावत् अतोऽस्मिन् किंतु सन्धेयं सन्धिना साध्यं किमस्तीत्यर्थः । नहि कृतघ्नेन सन्धिरुचितः नवा कृतोऽपीष्टसाध-नमिति भावः ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली

प्रणतकृष्णशिरःस्थितस्वपादस्मरणातिरेकविवशा स्वपादमुभ्र्मर-शिरसि स्थितं मत्वा वाक्ति । विसृजेति । तव शिरसि स्थितं मम पादं विसृज मुञ्च अहं त्वां वेद्मि अनुनयसारैः सान्त्वनवि-षयैश्चाटुकारैरापातरमणीयैः प्रियवचनैः अलं पर्याप्तं किञ्च क्रौर्ये स्थितस्त्वं मुकुन्दं याहि किमित्येवं कोपनमेवन्तं वदसीति तत्राह । स्वकृत इति । स्वकृते स्वनिमित्तं कृष्णार्थमित्यर्थः विसृष्टापत्यपत्यान्य-लोकाः त्यक्तपुत्रभर्तृबन्धुजनाः अस्मानिह वने व्यसृजन्निति यदतो ऽकृतचेताः अकृतज्ञः कृतघ्न इत्यर्थः । इतोऽहं त्वां सन्दधामीति तत्राह । किन्विति । अस्य कृष्णस्यानुसन्धेयं किन्तु न किमपीत्य-न्वयः अनुनयसारैः श्रेष्ठैर्वा—

उमाप्रणामसङ्क्रान्तचरणालक्तकः शशी ।
सन्ध्यारुण इवाभाति यस्य पायात्स वः शिव ॥ इति

वचनात् ईश्वरोऽप्यङ्गजनमोहनार्थमेवं विचलीलो जयतीति ॥ १६ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

ननु नास्माभिर्ज्ञाताः भवत्यः क्रुद्धाः इति उदासीना इति वा तथा सति दौत्येन नागच्छेम अधुना तु समागताः किञ्चित्क-र्तव्यमिति प्रार्थनया भगवता सह सन्धिः कर्तव्य इति ससाष्टाङ्ग-प्रणामं भ्रमरस्तद्वो वा करोतीत्यभिप्रेत्याह । विसृजेति । शिरसि बलात् स्थापितं पादं विसृज नह्येतावता उपपत्त्यभावात् अस्माभि-रङ्गीकर्तुं शक्यते अतः वृथैव पादग्रहणनिर्बन्धः । ननु यथैव भवतीभिर्वक्तव्यं तथैव करिष्याम इति कथं निषेध इति चेत् तत्राह । वेद्म्यहमिति । इममर्थं करिष्यति भगवान् न वेतीममर्थमहं वेद्मि सन्दिग्धे हि वचनेन बोधनम् अस्माकं तु विपरीतनि-श्चय एव ननु कश्चित्तापमानं करोति अनभिप्रेत्य कार्यं तस्मात् न निरादरणं कर्तव्यमित्याशङ्क्याह । चाटुकारैरनुनयविदुष इति । अयं प्रकारस्तु स्वकपोलकल्पितः ननु भगवताप्युक्तः यतः स मुकुन्दो मोक्षदाता मारयिष्यत्येवेति भावः । ननु जीवतीना-मस्माकं सुखं करिष्यति ततश्च त्वमागतो ऽस्मदभिप्रेतं करिष्या-मीति कथं वदस्यतः स्वामिविरुद्धवाक्यत्वाद्दूतस्त्वं वञ्चक एव । ननु तदकथनं मया कृतः शिक्षितमिति चेत्तत्राह । अनु-नयविदुष इति । अनुनयं कर्तुमत्यन्तमभिज्ञस्त्वमतस्ते विद्यां जानामि । न केवलं वृथानुनय एव किन्तु चाटुकारैः सहितोऽपि अतः उत्पत्त्या उपपत्त्या च तव मनो न शुद्धं कायेन वाचा च वञ्चना-र्थमनुनयाभिनयं करोषीति भावः । ननु कथमेवं निषिध्यते अन्तःकरणस्याप्रत्यक्षत्वात् कायवाग्भिरेव तदभिज्ञानावतः क्रोध-वशादेवान्यथा स्फुरति नत्वस्मासु दोषोऽस्तीति चेत्तत्राह । स्वकृत इह विसृष्टेति । नहि युक्तिबाधितं वेदोऽपि बोधयति भगवानी-श्वरः वयं गोपिकाः यावत्कर्तव्यमस्माभिः तावत्कृतं स सर्वसम-र्थोऽपि न किञ्चित्कृतवान् एवमर्थे पूर्वं जाते पुनरधुना किं कर्तव्यं तत्राह । स्वकृते इहैव त्यक्ताः अपत्यानि पतयश्च अन्ये च

मृगयुरिव कपीन्द्रं विव्यधे[1] लुब्धधर्मा स्त्रियमकृत विरूपां स्त्रीजितः कामयानाम् ।
बलिमपि[2] बलिमत्त्वाऽवेष्टयद्ध्वाङ्क्षवद्यस्तदलमसितसख्यैर्दुस्त्यजस्तत्कथाऽर्थः ॥ १७ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

इति निर्दयत्वपरद्रोहित्वप्रेमशून्यत्वान्यादिपदाद्राह्यानि उद्धवपक्षेऽपि तथा करिष्यन्तं तमाक्षिप्य सुक्तिः समाना श्रुतिपक्षे एवमविद्यावृतस्य जीवस्यान्तःकरणादितादात्म्याध्यासादनर्थपरंपराप्राप्तिः समस्तोपनिषत्तात्पर्यविषयप्रत्यगभिन्नब्रह्मसाक्षात्काराच्चन्निवृत्तिरित्युक्तमथेदानीं तदन्तरङ्गसाधनभूतां भगवदनुवृत्तिं विधत्ते विसृजेति । मुकुन्दान्मुक्तिप्रदानाय वेदरूपेण कृष्णादिरूपेण च तदुपायोपदेशपरायणात् निसृष्टैर्दौत्यैः दूतभावं प्राप्तैरिव वाक्यैः 'देहान्ते देवः परं ब्रह्म तारकं व्याचष्टे यस्य देवे परा भक्तिः परीत्य भूतानि परीत्य लोकान् परीत्य सर्वाः प्रदिशो दिशश्च उपस्थाय प्रथमजामृतस्यात्मनात्मानमभिसंविवेश पुरुषः स परः पार्थ ! भक्त्या लभ्यस्त्वनन्यया । तेषां सततयुक्तानां भजतां प्रीतिपूर्वकं ददामि बुद्धियोगं तं येन मामुपयान्ति ते । तमेव शरणं गच्छ सर्वभावेन भारत ! तत्प्रसादात्परां शान्तिं स्थानं प्राप्स्यसि शाश्वतम् । मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु । मामेवैष्यसि सत्यं ते प्रतिजाने प्रियोऽसि मे" । इत्यादिभिः चाटुकारैरभ्येत्य तमनुसृत्यानन्यशरणो भूत्वा प्रत्यक्तानुनयस्य प्रायो विमुखस्याभिमुख्यरूपानिवृत्तिरतश्छिन्धि परमात्मनः पादं शिरसि विसृज धारय कदापि तत्पादपद्मं मामुञ्च मनसा प्रपन्नत्वनिश्चयः वचसा तवास्मीति प्रार्थना शिरसा तच्चरणोदकादिधारणं चेति मनोवाक्कायैर्भगवदाराधनं त्वया सर्वदा कार्यमेतदिदमेव तव निःश्रेयस्करमित्यवमहं वेद्मीत्यर्थः ॥ इममेवार्थं तदनुवृत्तिरहितनिन्दया द्रढयति । स्वकृत इति । स्वस्य जीवस्य कृते धर्मार्थकाममोक्षार्थम् अपत्यानि पतयो भर्त्तारः स्वामिनो राजादयश्चान्ये पितृभ्रातृभार्यादयः लोकाः स्वर्गादयः विसृष्टा रचिताश्च ते अपत्यादयश्च ते यस्मिन् वर्तन्ते तथाभूतेऽस्मिन् परमात्मनि अकृतचेताः विवेकविधुरः कृतघ्नो वा इहाधिकारिशरीरे सन्धेयं संधिसाधनं किमिति व्यसृजत् त्यक्तवान् अयोग्यमिदमित्यर्थः । यद्वा अत्र शिष्टाचारं प्रमापयति । स्वेति । स्वकृते स्वाभीष्टसिद्ध्यर्थं विसृष्टास्त्यक्ता अपत्यादयो यैस्ते भगवत्यर्पितसर्वार्था इमाः मोक्षं गताः हे अकृत अत्र ! अस्मिंश्च एवंभूतेऽपि भगवति सन्धेयं किन्न व्यसृजत् तथा च श्रुतयः "आराममस्य पश्यन्ति न तं पश्यति कश्चन । न तं विदाथ य इमा जजान अन्यद्युष्माकमन्तरं बभूव नीहारेण प्रावृता जल्प्या चासुतृप उक्थशासश्चरन्ती"त्याद्याः ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

कान्तमाज्ञानवती काचित् शिरसि निहितचरणं कर्णौ सन्देशशब्दविवक्षुमिव मत्वाह । विसृजेति । शिरसि निहितं पादं विसृज पादं मदीयं शिरसि माकुर्वित्यर्थः । मुकुन्दादभ्येत्य ततः शिक्षित्वा दौत्यैर्दूतकर्मभिः चाटुकारैः प्रियवचनैश्च अनुनयविदुषः शिक्षाकुशलस्य ते सर्वमहं वेद्मि मुकुन्दसन्देशैरस्मत्स्नेहार्थं प्रवृत्तोऽसीति भावः तत्स्नेहस्तु अनुभूतपूर्व इत्याह । स्वकृत इति । स्वकृते मुकुन्दकृते विसृष्टाः पत्यादयो यया तां माम् अकृतचेताः अकृतं नार्पितं मयि चेतो येन सः व्यसृजत् एवम्भूतेऽस्मिन्मुकुन्दे पुनः किन्नु सन्धेयं न किमपीत्यर्थः ॥ १६ ॥

भाषा टीका ।

अपने शिर पर जो तैंने पाद रखा है तिस को छोड दे मैं जानती हूं कि तू मुकुंद के पास से आया है तू दूतों के मीठे से मीठे प्रिय वचनों से मनाने करने जानता है इन कृष्ण में हम कैसे विश्वास करें जिनने कि अपने पीछे इस लोक में जिनने पति पुत्र लोक वेद सब को छोड दिया है उन सबों को भी सन्तोष करे बिना ही त्याग कर के उपकार को भी न समुझकर चले ही गये हैं ॥ १६

श्रीधरस्वामिकृतभावार्थदीपिका ।

किञ्च कृष्णस्य पूर्वाणि कर्माण्यनुसन्दधाना बिभेम्यहमस्मादित्याह । मृगयुरिवेति । मृगयुर्लुब्धक इव यः कपीन्द्रं वालिनं विव्यधे आविध्यत् लुब्धधर्मा क्रौर्यवान् अलुब्धधर्मेति वा लुब्धको हि तन्मांसमत्तुकामो विध्यत्ययन्तु न तथाऽतो वृथा कठिन इत्यर्थः । तथा स्त्रियं शूर्पणखां स्त्रीजितः सीतापरतन्त्रः काम एव यानं प्राप्तिसाधनं यस्यास्तां विरूपां छिन्नकर्णनासिकामकरोद्वाराराधिरूपेण तथा बलिमपि वद्दत्तं बलिमत्त्वा भक्षयित्वा ध्वाङ्क्षवत्काकवदवेष्टयद्बबन्ध वामनरूपेण बलिमत्त्वाऽक्षिपद्विष्टपादिति पाठे बलिं पूजां गृहीत्वा विष्टपात्स्वर्गादधोऽक्षिपदित्यर्थः । तत्तस्मादसितस्य कृष्णस्य सख्यैरलं एवञ्चेत्किमिति तं नित्यं गायथ तत्राह । दुस्त्यजस्तु तस्य कथारूपोऽर्थ इति ॥ १७॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

कपीनामिन्द्रं परमश्रेष्ठमिति निर्दोषत्वादिकमभिप्रेतं स्त्रीजित इति । लक्ष्म्या सह सापत्न्येन तदवतारश्रीसीतायामपि सापत्न्यात् ध्वाङ्क्षवत् काको यथा बलिमत्त्वापि लोकं हिनस्ति तथेत्यर्थः । यद्वा काकमिव इति महावज्ञा बन्धनदृढता निर्दयता च सूचिता एवमकृतज्ञत्वादिकमप्यभिप्रेतम् । असितेति । श्यामा ईदृशा

---

[1] यः किरातः [2] विलब सं वेदविसर्गबन्ध ।

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

एव भवन्ति तत्कस्यापि श्यामस्य सख्यैरलमिति भावः।बहुत्वं सर्वस्यै-तत्सख्यस्य निरसनार्थम् अन्यत्तैर्व्याख्यातं यद्वा अहो श्रूयतां तस्य तत्र सख्युर्गुणा इति सोपालम्भमाह । मृगयुरितिभारेण महीं कम्पयतीति कपीन्द्रो वृषवरः "महीं महाककुत्कायः कम्पयन् खुरविक्षता" मित्युक्तेः तं नत्रिषाणेनैव व्याधवद्धर्मविमुखो विव्याध तथा लुब्धधर्मा लुब्धाचारः कामुकः विरूपां स्त्रियं कुब्जां कामयानामकृत चकमे इत्यर्थः स्त्रीजितः कुस्त्रीवश्यः तथा गोपैर्गिरये दत्त बलिम् उपहार-मत्वा इन्द्रस्यापि बलिं पूजां विष्टपाद्धोऽक्षिपत् ननु तर्हि मिथस्तद्वा-र्ता किमिति क्रियते तत्राह तस्य कथैवार्थः प्रयोजनं यस्य सः व्रज इति शेषः व्रजस्य सदा तद्वार्तापरत्वेनास्माकमपि तत्सङ्गत्या तद्वार्ता स्यात् न च स्वेच्छया स च व्रजस्त्यक्तुं न शक्यते अहो बत किं कार्यमिति भावः । यद्वा, ननु नाख्येयं परदूषणमिति हि निषेधः सत्यं निषिद्धत्वादकुमयुक्तमपि तद्वैगुण्यं तस्य पर-मान्याय्यकारित्वादुत्पद्यमानेन महता रोषावेशेन त्यक्तुं न शक्यत इत्याह दुस्त्यज इति । तद्वैगुण्यरूपकथाप्रयोग इति ॥ १७ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

किञ्च न केवलं तस्य तादृशचेष्टितादेव बिभेमि अपि तु श्यामतास्वभावादपीति तद्गुणयोगेन तदभेदबुद्ध्या धीरोदात्त-त्वादिगुणतया प्रसिद्धेष्वपि श्रीरामवामनादिरूपेषु दोषं दर्श-यन्ती तद्रूपं कैमुत्यं दर्शयति । मृगयुरिवेति । मृगयुर्व्याध इव निर्दयो गुप्तश्च सन् एको योऽसितः सोऽपि कपीनामवध्या-मासीनामपि वालिनं विव्यधे । प्रसिद्धस्य मांसादिलुब्धस्य धर्माः क्रौर्यादयो यत्र तादृशः । अलुब्धधर्मा तद्धर्मरहितोऽपीति वा । तद्व्यास्तां य एव स्त्रियं तत्रापि कामयानां कामयमानामपि साक्षाच्छ्रियः प्रभवां विरूपां छिन्नकर्णनासामकृत ॥ तस्य च क्षत्रियजातितया क्रूरस्य तत्तदपि सम्भवेन्नाम । योऽन्योऽसितो ब्राह्मणजातितया तत्रापि ब्रह्मचारितया शान्त्यादिगुण-योग्योऽपि बलिं परमधर्मात्मानमपि तत्रापि बलिं तस्य पूजामुप-हारम् अत्वा भुक्त्वा गोप्यवदात्मसात्कृत्यापि छलेन दानपूर्त्ति-ममत्वा विष्टपात् त्रैलोक्यराज्यादक्षिपत् भ्रंशयामास तत्राप्यधोऽ-क्षिपत् भूविवरे चिक्षेप पाठान्तरे त्ववेष्टयत् बबन्ध ध्वाङ्क्षव-दिति । काको यथा बलिं जग्ध्वापि लोके वेष्टयति स्वजा-तीयानन्यानाहूय तद्गृहमावृणोति तद्वत् । अत्र विव्यध इत्यादिभिः काठिन्यं स्त्रीजित इति कामित्वं बलिमपीति धौर्त्यमभिप्रेतं तस्मात्तदिति तस्यासितमात्रस्य सख्यैर्बहुषु सख्यप्रकारेष्वेकं-नाप्यलं नतु प्रयोजनमित्यर्थः । ननु तर्हि कथं तस्य कथा-रूपोऽर्थो मुनिभिरपि न त्यज्यते तत्राह । दुस्त्यज इति । सोऽय-मिति तस्यैको दुरन्तो मोहनः स्वभाव इति भावः । इति भियेव सेर्ष्योक्तिः । यद्वा । ननु नाख्येयं परदूषणमिति हि निषेधः सत्यं निषिद्धत्वादकर्तुमशक्यमपि तद्वैगुण्यं तस्य परमान्याय्यकारि-त्वादुत्पद्यमानेन रोषावेशेन त्यक्तुं न शक्यते इत्याह । तद्वैगुण्य-रूपकथाप्रयोगो दुस्त्यज इति ॥ १७ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

कपीन्द्रं वालिनं निरपराधमिति भावः । असितसख्यैः कृष्ण-सख्यैः ॥ १७ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

न केवलमयमकृतज्ञ एवापि तु क्रौर्यकाठिन्यादियुक्तश्चेत्याह । मृगयुरिवेति मृगयुरिव व्याध इव वञ्चित्वा कपीन्द्रं निरपराधिनं वालिनं विव्यधे जघानातोऽयं लुब्धधर्मा लुब्धस्येव धर्माः क्रौर्यकाठि-न्यादयः तद्युक्त इत्यर्थः यद्वा अलुब्धधर्मेतिच्छेदः मृगयु-रिवेत्यनेनैव तत्सादृश्यलाभात् अलुब्धधर्मा लुब्धेऽप्यसम्भाविता ये धर्मास्तद्युक्त इत्यर्थः लुब्धको हि मांसमत्तुं मृगान् हन्ति अयन्तु न तथेति वृथा काठिन्यादिमानिति भावः । तथा स्त्रीजितः स्त्रिया सीतया जितः तद्वशङ्गत इत्यर्थः । कामयानां काम एव यानं प्राप्तिसाधनं यस्याः कामेन याति स्वेच्छया चरतीति तथा तामिति वा नन्द्यादित्वात्कर्तरि ल्युः स्त्रियं शूर्पणखां विरूपामकृत छिन्नकर्ण-नासिकामकरोदित्यर्थः । एवं दाशरथिरूपेण कृतं तथा वामन-रूपेण यो ध्वाङ्क्षवत् वायसवत् बलिं पूजां वैरोचनिसमर्पितामत्त्वा भुक्त्वा परिगृह्येत्यर्थः बलिं वैरोचनिमवेष्टयत्पाशैरिति शेषः बबन्धे-त्यर्थः । तत्तस्मादसितस्य श्रीकृष्णस्य सख्यैरलम् असितेत्यनेन नैल्यं दुष्टं हीति प्रासङ्गिकोऽभिप्रेतः एवञ्चेत्यङ्कि तं गायत्यत्राह । दुस्त्यज इति । तस्यासितस्य कथारूपोऽर्थो दुस्त्यजस्त्यक्तुमशक्यः ॥ १७ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

प्रणयकोपातिरेकेणासख्येयत्वे दोषानुत्पादयति । मृगयुरिति । यो रामनामा भूत्वा कपीन्द्रं वालिनं विव्यधे हिंसितवान् क इव मृगयुर्लुब्धक इव यथा लुब्धकः उपाश्रये स्थित्वा विध्यति मृगं तथायमपीत्याक्षेपार्थः कपेः सुग्रीवस्य इन्द्रियं द्रावितवा-न्नित्यपराधं दृष्ट्वेति स्तुत्यर्थः । किञ्च किरातः निषाद इव स्त्रियं विरूपां छिन्ननासिकाकर्णत्वेन सौन्दर्यहीनामकृत परामृष्टायाः शूर्पणख्या मे पतिर्भवेति विरूपं विपरीतशब्दं श्रुत्वा विरूपा-मकरोत् नतु शुद्धस्त्रियमिति निष्कृष्टोऽर्थः किन्नः परमानन्दिनो मुक्ताः शतं मित्रं यस्य स किरातः स्त्रीजितः स्त्रैणः स्त्री जिता पराभूता येन स तथा कामयानां पतिमिच्छन्तीं काम एव यानं यस्याः सा तथा स्मरनामरथाधिरूढत्वादुष्टामित्यर्थः । किञ्च वामनावतारे महाधह्रपर्वे यज्ञे सबहुमानं बलेः त्रिपदपरिमितं भूम्युपहारमादाय कृतघ्न इवायं बलिनामानं दैत्यं बिलवासं पातालवासिनम् अकृत पूजायां हेतुमाह । वेदेति । वेदविदामृषीणां वर्गेण समूहेन वन्द्य इति यत्तस्मान्मुग्धाद्बलेः पूजामवाप्यापि तं बद्ध्वा पातालनिवासिनमकरोदित्यर्थः । बलपरिवर्तनेन इति धातोः वाक्ष्मिन्द्रस्य विद्यमाने त्रैलोक्ये परिवर्त्त परकीयं स्वीयवद् वशं कृत्वा चरणलक्षणं चौर्याख्यापराधं दृष्ट्वा कुद्धविक्षणं कृतवानित्याध्यात्मार्थः बकारवकारयोः अन्योऽन्यात्मकमनुशा-सनसिद्धं कृष्णः कीदृशः वेदविदां वैदिकानां वर्गो वर्जनं येषु ते वेदविद्वर्गा वन्द्यादयः तैः वन्द्य इत्यनेनाविद्यमानकथननिपुण-त्वेनास्मन्मनो मोहनं कृत्वा हतवानिति सूचितं निन्दास्तुतौ

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

उपसंहरति । तदिति । यतोऽयं कृष्णोऽस्मासु शोकाधानमकरोत्तस्मादसितेन मलिनेन कृष्णेन सह सख्यैः सहासनशयनादिलक्षणैरलं वारितम् असितस्य मेघश्यामस्य नित्यमुक्तस्य वा षिञ् बन्धन इति धातुः हरेः सख्यशब्देनार्चनादिकमुपलक्ष्यते । अर्चनादिभिरलम्भूषणमात्मन इति शेषः । निर्विण्णा चेत्किमिति तत्प्रसङ्गं करोषीति तत्राह । दुस्त्यज इति । तस्य कृष्णस्य कथार्थः चरितविषयव्यवहारो दुस्त्यजस्त्यक्तुमशक्यः पारवश्यादिति शेषः । किञ्च दुःखं त्यजतीति यद्वा तस्य कथानिवृत्तिः अशोभनं ददातीति ॥ १७ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः

तदिति । तस्य असितस्य श्याममात्रस्य सुपां सुलुगित्यादिछान्दससूत्रेण सुपो लुक् । दुस्त्यजः । इत्ययमप्ययंकस्तस्य दुरन्तो मोहनस्वभाव इति भावः ॥ १७ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

नन्वेवमस्ति सख्यं सख्यमिति पूर्वं हि प्रपन्ना अपि भवत्यः भगवता त्यक्ताः अधुना प्रार्थनया तं दोषं परिहृत्य तेन सह सख्यं कर्तव्यमिति चेत्तत्राह । मृगयुरिति । "न वै स्त्रैणानि सख्यानि" इति वयं सख्ये अनधिकृता एव ईश्वरोऽपि सख्ये नाधिकृतः राजा मित्रकेन दृष्टं श्रुतं वेति सुतरां भगवता सह सख्यं न भवति स्थलत्रये अनिष्टदर्शनात् आर्षज्ञानेन भगवत्स्वरूपं ज्ञात्वा स्वस्मात् पूर्वावस्थां भावयति । तत्र भगवान् रामः पूर्वतनः तेन सह सख्यं पुरुषेण स्त्रिया च कृतं तयोर्मरणं जीवन्मृतत्वं च जातमिति सुग्रीवेण सहाग्निसाक्षिकं मैत्रीं कृत्वा तस्यैव भ्राता वाली भगवता हतः तद्भ्रात्रा सह सख्यं कृतमेव कपीनां च सुन्दराणां कार्यार्थितापि निवारिता तेन ततोऽपि आधिक्यं कार्यं भवतीति नहि कश्चित् कपिभिः सह सख्यं करोति अनेन सख्यशास्त्रानभिज्ञता च सूचिता ॥ तत्रापि सर्वसमर्थः युद्धेन न हतवान् किन्तु हरिणान्तरं योजयित्वा यथा आरण्यं हरिणं मारयति लुब्धकः तद्वत्सुग्रीवं योजयित्वा तेन सह युध्यमानमविध्यत् ननु हरिणादयः सर्वैरेवमेव हन्यन्ते को दोष इति चेत्तत्राह । अलुब्धधर्मेति । लुब्धकस्यैव नास्मिन् धर्मः तन्मांसस्याभक्ष्यत्वात् ईश्वरत्वेन तदपकाराभावाच्च किञ्च स्त्रियं सूर्पणखां काममोहितां सर्वथा सम्माननीयां विरूपां छिन्नकर्णनासिकामकृत ननु युक्तमेवोर्ध्वरेतसरूपातिक्रमे तथा स्वामिति चेत्तत्राह । स्त्रीजित इति । सीतया वशीकृतः अन्यथा तदुक्तं न कुर्यात् सापि न प्रतिबन्धिका तादृक्वेव किन्तु कामयाना काम एव यानं यस्या इति वा तत्र दूषणद्वयं ततोऽपि पूर्वजन्मनि दोषं निवारयन्ती परशुरामे अलभमाना वामने दृष्टमित्याह । बलिमपीति । बलिर्हि अत्यन्तं यत्किरूप एव पूज्यात्मकः अतः श्रद्धया तथा पूजां कृतवान् ब्राह्मणक्षत्रिययोः तुल्यता सख्यं च भवति तत्राप्यन्योऽन्यकार्यसाधकयोः व्याजेन लोकत्रयग्रहणं न दोषाय यथाकथञ्चित् स्वकीयं ग्राह्यमेवेति किन्त्वन्यदस्तीति पूर्वमनुवदति बलिम् अरवा जग्ध्वा नात्र धात्वादेशः बहुलं छन्दसि त्यग्रे वक्ष्यमाणत्वात् आवेष्टयत् गर्तविशेषे बद्ध्वा स्थापितवान् ध्वाङ्क्षवत् द्वितीयार्थे वतिः अयुक्तो हि काकः पायसादिभक्षण इति तथा कृतवन्तं दुष्टं करोति प्रभुः तथा कपिरपि इन्द्रवद्भ्यापिर्यमाणो हन्तव्यः मृगत्वात् व्याजेनैव मारणीयः ब्रह्मणा तथैव तेषां मृत्युर्निर्मित इति मत्स्यानां तु बद्ध्वैव स्त्रीजित इत्यनेनैव स्त्रियैव स्त्री विकृता ननु भगवता अत एव ताः सजातीयातिक्रमं न कुर्वन्ति तथा वयमपि न करिष्यामः कृते त्वनिष्टं स्वधर्मत्यागादि च तथा हीना वयं नोत्तमभावं प्राप्स्यामः "अयोग्यामिच्छन् पुरुषः पतत्येव न संशयः" इति वाक्यात् मर्यादोल्लङ्घने तद्रक्षकैः दण्ड्यत इत्यपि चेदि स्त्रियो जिता अनेनेति नहि रामः स्त्रीवश्यः जितानां च हितं कर्तव्यमिति तथा नगरे अस्मदनुपभोग्यो भगवान् यथा बलेस्तन्मन्वन्तरकालः अतः हीनत्वात् स्वायोग्य स्त्रीत्वात् अतिक्रमणमन्याविसरत्वाच्च कालमर्यादोल्लङ्घनं च कर्तव्यमिति प्रार्थनया सख्यं न करणीयं तदाह । तदलमिति । तत्तस्मादसितसख्यैरशुद्धसख्यैरलं कपटसख्यानि न कर्तव्यानि यतो विपरीतफलानि तामसभावाद्वा कृष्णवर्णपरोऽसितशब्दः ननु सर्वं परित्यज्य भगवदवलम्बनं कृत्वा भगवन्तमपि परित्यज्य क यास्यथेत्याशङ्क्याह । दुस्त्यज इति । यस्य कथारूपोऽर्थो दुस्त्यजः कथामवलम्ब्य तिष्ठामः सोऽपि त्यक्तव्य इत्यस्ति मनःप्राणबाधात् तथापि त्यक्तुमशक्य इति दुस्त्यजः सापि भगवानिव चेत्स्वयं त्यक्ष्यति तदा त्यजतु नाम न त्वस्माभिस्त्यक्तुं शक्यत्यर्थः । यद्वा कालेऽपि भगवद्धर्मा बोध्यन्ते श्रवणादयः धर्मत्वेन तत्रापि सख्यमात्मनिवेदनं च बोध्यते यथा सुपर्णावेतौ सखेव सन् ब्रह्माण्यतीति वदा यज्ञाश्च न कालात्मका इति शिर उपनिषदो मन्त्रत्वेन तत्र भगवन्निरूपणं न कर्तव्यमिति पुष्टिश्रुतीनामभिप्रायः इतरथा अन्यथासिद्धिः स्यात् ननु भक्तिमार्ग इव तत्रापि भगवदुत्कर्षः प्रतिपाद्यत इति कथं निषेध इत्याशङ्क्याह । वेदव्यहमिति । स हि भगवदभिमतः परमात्मा मोक्षप्रद एव तस्य दूतेनात्यन्तनिपुणेनापि मोक्ष एव फलति प्ररोचनार्थमेव भक्तिमिव प्रेमेव वदति न वारे पुत्राणां कामायेत्यादिभिः यमेवैष वृणुत इति च किञ्च शास्त्राणां सर्वपरित्याजनपरत्वं यथा आत्मकामः सर्वं परित्यजेत तादृशविरक्तस्यापि नित्यमात्मानुसन्धानयुक्तस्य यदि नात्मस्फूर्तिः किन्तस्योपनिषदा गुरुभिर्वा भविष्यति तस्मात् सख्यादिकमनभिप्रेतमेव तथापि वैदिकत्वेन भाव्यमन्यथा पाषण्डत्वं स्यात् एवं सर्वत्र योजनीयम् ॥ १७ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

नन्वतिकोमलमनाः स त्वामेव ध्यायंस्तत्रास्माभिर्दृश्यत इति । तत्र त्वमर्वाचीना दासस्तस्य तत्त्वं न जानासि न केवलं सम्प्रत्येव जन्मनि कठोरः किन्तु पूर्वपूर्वजन्मस्वपीति पौर्णमासी मुखादस्माभिः श्रुतत्वादित्याह । यदा स क्षत्रियजातौ रामचन्द्रोऽभूत्तदा क्षत्रियधर्मं परित्यज्य मृगयुर्व्याध इव कपीनामिन्द्रं वालिनं विव्यधे विव्याध । निर्दयो गुप्तः सन्नित्यर्थः । अधर्मकथापि तदुपाख्याने ज्ञेया । अत्रापि लुब्धस्य व्याधस्यापि धर्मरहितः । न हि व्याधो वानरान् हिनस्ति तन्मांसस्याभक्ष्यत्वेन केनाप्यक्रेयत्वादिति भावः । अन्यमधर्मं श्रुणिव-त्याह । स्त्रियं सूर्पणखां कामयानां तमेव कामयमानां तां विरूपां

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

छिन्नकर्णनासामकृत । अन्योऽपि कोऽप्येतां न सम्भुक्ष्यामीति क्रौर्येणेति भावः । ननु जटावल्कलधारित्वाद्वैराग्येणेत्यत आह । स्त्रिया सीतया जितः । तथा तत्पूर्वजन्मनि स ब्राह्मणोऽभूत्तदापि ब्राह्मणधर्मं क्षान्त्यकैतवादिकं परित्यज्य बलिं परमधार्मिकमपि तत्रापि बलिं तत्पूजोपहारम् अरवा भुक्त्वा विष्टपात् त्रैलोक्यराज्यादक्षिपत् तत्रापि भूविवरे । पाठान्तरे अवेष्टयत् छलेन बबन्ध । ध्वाङ्क्षवत् काकवत् स यथा बलिं जग्ध्वापि स्त्रीजनं वेष्टयति स्वजातीयानन्यानाहूय समावृणोति कदर्थयति च । तस्मादसितस्य कृष्णवर्णस्य तस्य सख्यैः सर्वैः शैलमस्माकं गौरीणां तत्सम्बन्धिनः सख्यस्य यावन्तः प्रभेदास्तेषामेकोऽपि न भद्र इति बहुवचनेन द्योतितम् । असिताः खलषुद्धचित्ता भवन्तीति तेभ्यो भयस्यावश्यम्भावित्वादिति भावः । नन्वभीक्ष्णं परनिन्दां कुर्वती किं शुद्धचित्तासीति तत्राह । तस्य कथायाः प्रतिजन्मचरित्रस्यार्थो व्याख्या दुस्त्यजः सोऽस्मानेवं दुःखयति । अस्माभिस्तत्कथाया अन्यर्थो न वक्तव्य एव किम् अत्र निन्दा वा भवतु यथार्थभाषणत्वेनानिन्दा वा भवतु । असौ त्यक्तुमशक्य एवेति भावः । यद्वा । स त्वस्माभिस्त्यक्त एव किन्तु तत्कथारूपोऽर्थो वस्तुविशेषस्तु दुस्त्यज एव । कर्तृपदानुक्त्या सर्वैरेव मुन्यादिभिरपीत्यर्थः । अत्र विव्यधे इति काठिन्यं स्त्रीजित इति कामित्वं वलिमपीति धौर्त्त्यम् असितसख्यैरित्यासक्त्ययोग्यता भयमीर्ष्या चेत्ययमवजल्पः । यदुक्तं "हरौ काठिन्यकामित्वधौर्त्यादासक्त्ययोग्यता । यत्र सेर्ष्याभियेवोक्ता सोऽवजल्पः सतां मत" इति ॥ १७ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

ननु भो मातः ! निरपराधापकाराय तु न प्राकृतोऽपि प्रवर्तेत स पुनः कृतज्ञाग्रणीः शोभनगुणालङ्कृतो भगवानपराधनिर्मुक्तानां युष्माकं दुःखाय प्रवृत्त इति का वाचोयुक्तिरतः स्वासु कश्चिदपराधोऽन्वेषणीय इति चेद्दर्शनश्रवणाभ्यां निरपराधपीडाकरमेतदीयं स्वभावं वर्तमानप्राचीनजन्मसम्बन्धितया सञ्जानतीनामस्माकमग्रे किमित्येवमबुद्ध्वा जल्पसीत्याशयेनाह । मृगयुरिवेति । यः दाशरथिर्भूत्वा मृगयुरिव कपीन्द्रमपराधविनिर्मुक्तं वालिनं विव्यधे यथा व्याधः मृगचर्मणा स्वशरीरमाच्छाद्य मृगं वेधयति तथा वृक्षेणायमपि तमपि अविध्यत् यतः लुब्धस्य धर्मैः क्रौर्यादिभिर्युक्तः यद्वा व्याधा अनुपकारिणं स्वोपकाराय नाशयन्ति स तु ततोऽपि विलक्षण इत्याह अलुब्धेति । वानरस्याभक्ष्यत्वात्सीतान्वेषणस्य वालिनातिसुकरत्वाद्वृथैव तं नाशितवानित्यर्थः । स्त्रियं शूर्पणखां निरपराधां विरूपां छिन्नकर्णनासामकृत न केवलं निरपराधामपि तु सेवनाय कामयानामपि काम एव यानं प्राप्तिसाधनं यस्यास्तां कामयमानामिति वा यतः स्त्रीजितः सीतापरतन्त्रः तथा यः वामनो भूत्वा बलिमपि निरपराधं प्रत्युत त्रैलोक्यार्पणात्परमोपकारिणमपि तद्दत्तबलिमत्वा भक्षयित्वा ध्वाङ्क्षवत् काकवदवेष्टयत् काको यथा बलिं जग्ध्वा अन्यान् काकानाहूय बलिदातारं सर्वत आवृणोतीति तद्वद्बबन्ध वामनोऽधिक्षिपद्य इति पाठे इति बलिं पूजां गृहीत्वा तं त्रैलोक्यराज्यादधः पातितवानित्यर्थस्तस्मादसितस्यैवंभूतस्य कृष्णस्य सख्यैः दुःखसागरे पतितत्वादितः परं तत्सख्यसम्पादनजन्यदुःखभोगसामर्थ्यमस्माकं नास्तीत्यर्थः । नन्वेवं तर्हि किमिति नित्यं तत्कथापरायणा यूयमिति चेत्तत्राह । दुस्त्यज इति । यद्यप्येवं तथापि तत्कथारूपं वस्तु त्यक्तुमशक्यं किं कुर्मस्तत्त्यागे उपायं न पश्याम इत्यर्थः । यद्वा कथं तर्हि कृष्णस्य तत्तदवतारकथा मुनिभिर्न त्यज्यत इति चेत्तत्राह । दुस्त्यज इति । तत्कथायां का वा मोहनशक्तिरिति न जानीमः । यद्वा ननु नास्त्येवं परदूषणमिति निषेधात् किमिति दूषणाख्याने यूयमुद्युक्ता इति चेत्तत्राह । दुस्त्यज इति । यद्यप्येवं तथापि रोषावेशात् तूष्णीं स्थातुं न शक्यत इति भावः । यद्वा ननु सर्वं विहाय भगवत्सख्यमास्थिता इदानीं तदपि परित्यज्य किं करिष्यथ इति चेत्तत्राह । दुस्त्यज इति । तत्कथामवलम्ब्य स्थास्यामः अस्माभिस्तु स त्यक्तुं न शक्यते स एव कृष्णस्त्यक्ष्यति चेत्तदा तु मरणमेव भविष्यतीति भावः । यद्वा ननु सख्या केनचित्कारणेन प्राप्तेऽपि यत्किञ्चिद्वैमनस्ये तन्मार्जयित्वा पुनः सख्यमेव सम्पादयितुमुचितं न तु सर्वदा विग्रहपालनमित्याशङ्क्याह । मृगयुरिवेति । अहो किमित्येवं त्वया बोध्यते कृष्णात्प्राप्तदुरन्तदुःखाभिरस्माभिरितः परं शठत्वकामित्ववञ्चकत्वादिदोषाक्रान्तत्वात्कृष्णवर्णेन केनापि सख्यं न सम्पाद्यमिति निश्चयः कृतोऽतः पुनस्तेन सख्यसम्पादनं तु दूरापास्तमिति भावः । नन्वेकत्र कृष्णे वञ्चकत्वादि दृष्ट्वा यत्र यत्र कृष्णत्वं तत्र तत्र वञ्चकत्वादिकमिति व्याप्तिः कथं गृहीतेत्याशङ्क्य भूयो दर्शनेनेत्याह । मृगयुरिति । तथा च स्वधर्मनिष्ठस्य क्षत्रियस्य रामचन्द्रस्य तथाविधकर्मानुष्ठाने तदेव प्रयोजकम् एवं शान्त्यादिगुणालङ्कृतस्य ब्राह्मणस्य ब्रह्मचारिणो वामनस्य तथा चान्यत्र प्रयोजकान्तरसत्त्वेऽपीदमेव प्रयोजकमाश्रयणीयमनुगतत्वात् इदञ्च शठत्वादीनामप्युपलक्षणं कोऽपि सख्यभेदोऽसितवर्णेनोपेक्षित इति सूचनाय सख्यैरिति बहुवचनं नन्वेवं तर्हि तत्कथयाप्यलङ्कृतो न क्रियत इति चेत्तत्राह । दुस्त्यज इति । तत्कथार्थोऽपि परित्याज्य इति सर्वदाप्यस्मन्मनो वर्तते तथापि त्यक्तुं न शक्यते किं कुर्मः अशक्यत्वाद्दुःखं सहामः कृष्णोऽपि नास्माभिः परित्यक्तः किन्तु स एवास्मान् परित्यज्य गतस्तद्वदयमपि यदि त्यक्ष्यति त्यजतु नाम नास्माकं तत्त्यागसामर्थ्यमित्यर्थः ।

हरौ काठिन्यकामित्वधौर्त्यादासक्त्ययोग्यता ।
यत्र सेर्ष्यभियेवोक्ता सोऽवजल्पः सतां मतः ॥

इत्युक्तेरत्रावजल्पः उद्धवपक्षेऽपि समानमिदं श्रुतिपक्षे भगवानेव शरणीकरणीय इतीममर्थं द्रढयितुं तत्तदवतारे कृतं भगवतो भक्तपक्षपातमावेदयति । मृगयुरिवेति । अलुब्धधर्मा पूर्णकामत्वाल्लुब्धादिधर्मैरसंस्पृष्टोऽपि कपीनामिन्द्रं मारणायोग्यमपि मृगयुरिवायोग्योपायेनापि स्वभक्तस्य सुग्रीवस्य परित्राणाय विव्यधे तथा स्त्रियमपि तत्रापि कामयानां विरूपत्वानर्हामपि भक्तिमत्या सीतया जितो वशीकृतः विरूपामकृत तथा बलिं परमधार्मिकं बलिमपि तदीयां पूजां गृहीत्वापि महेन्द्रादिभिः तदर्थमाराधितत्वादवेष्टयत् यथा काकः स्वजातिपक्षपाती तद्वत् एवं भूतो यः स्वभक्तपालनायाकृत्यमपि करोति तस्य कथारूपार्थस्तदनन्यशरणैर्दुस्त्यजः तत्कथैव परमपुरुषार्थत्वेन तैः सेव्यते ननु तैः प्रार्थ्यत इति ज्ञापनार्थपदं तत्तस्मादसितानां मलिनानां भार्यापत्यधनादीनां मालिन्यैः संसारार्थप्रदैः सख्यैरलम् असङ्ख्यातकल्पेषु तत्फलं भुक्तमितः परं तानि परित्यज्य वासुदेवैकशरणो भवेत्यर्थः ॥ १७ ॥

यदनुचरितलीलाकर्णपीयूषविप्रुट् सकृददनविधूतद्वन्द्वधर्मा विनष्टाः ।
सपदि गृहकुटुम्बं दीनमुत्सृज्य दीना बहव इह विहङ्गा भिक्षुचर्यां चरन्ति ॥ १८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

मां तु सप्राणां साङ्गां सधनाञ्च व्यसृजदहो मम भाग्यमन्ये त्वनेन केचित्प्राणतः केचिदङ्गतः केचिद्धनतश्च वियोजिता इत्याह । मृगयुरिवेति । यः कृष्णः मृगयुरिव व्याध इव कपीन्द्रं राजानं सिरपरायिनं विव्यधे अविध्यत् व्याधस्तु मांसमत्तुं मृगं हन्ति अयन्तु वृथैवाविध्यत् यतः अलुब्धधर्मा तन्मांसभक्षणलोभाभावात् नापि धर्मयुद्धे अविध्यत् किन्तु ध्वाङ्क्षवत् ध्वाङ्क्षमिव यथा ध्वाङ्क्षं काकं छलेन कश्चिद्धन्ति तद्वत् तथा काम एव यानं प्राप्तिसाधनं यस्यास्तां कामातुरां स्त्रियं सूर्पणखां स्त्रिया स्वप्रियया जितः विरूपां छिन्नकर्णनासिकाम् अकृत अकरोत् दाशरथिरूपेण तथा बलिमपि बलिं तद्दत्तां पूजामत्त्वा भक्षयित्वा अवेष्टयत् नागपाशैर्बबन्ध वामनरूपेण ध्वाङ्क्षं यथा कश्चिद्वेष्टयति तद्वत् तदस्माकमसितस्य कृष्णस्य सख्यैरलम् तर्हि किमर्थोऽयं तच्चिन्तकः प्रलापः अत्राह । तत्कथार्थोऽर्थस्तु दुस्त्यज इति ॥ १७॥

भाषा टीका ।

जिनने रामावतार में कपीन्द्र बाली को बधिक की नांई मारा है सीता स्त्रीके वश होकर सूर्पणखा को नाक कान काट कर कुरूप कर दिया है जिनने वामनावतार में बलि राजा की भेंट को लेकर भी कौआ की नांई फिर उसी बलिको बांधकर नीचे पाताल मे रख दिया है उनका क्या कहना है तिससे काले पुरुषों की मित्रता कभी नहीं करनी चाहिये फिर क्या करैं उनकी चर्चा कथा तो छोडी नहीं जाती है ॥ १७ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अपि च आनीम एव तत्कथापि त्रिवर्गलतामूलोन्मूलनीति तथापि न त्यक्तुं शक्नुमः किं कुर्म इत्याह । यदनुचरितेति । यस्यानुचरितमेव लीला सदेव कर्णपीयूषं तस्य विप्रुट् कणिका तस्याः सकृदद्नं सेवनं तेन विधूता निरस्ता द्वन्द्वधर्मा रागादयो येषां तेऽत एव विनष्टा असत्तुल्या दीनं दुःखितं गृहकुटुम्बं विहाय दीना भोगहीना विहङ्गा अपि भिक्षुचर्यां प्राणवृत्तिमात्रं चरन्त्यतस्त्याज्यस्तथापि त्यक्तुं न शक्नुम इति निन्दापरत्वेऽप्ययं ताश्चर्ग्लोतोऽर्थः दुस्त्यजत्वेऽपि पारमार्थिकोऽयमर्थः विधूतद्वन्द्वधर्मा इत्यन्तःसमासः पूर्ववत् नतस्ते च ते अविनष्टाश्चेति समासः इतरे : पुनर्द्वन्द्वधर्माणो विनष्टा एव सपदि तत्क्षणमेव दीनं तुच्छं गृहसहितं कुटुम्बं विहाय दीना इवाकिञ्चनाः धीरा इति वा पाठः बहवो विहङ्गा हंसा इव सारासारविवेकचतुरा भिक्षुचर्यां पारमहंस्यं चरन्ति तस्मादेवं परमपुरुषार्थरूपत्वाद्दुस्त्यज एव तत्कथार्थ इति ॥ १८ ॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

तस्य निष्ठुरता किं वाच्या तच्चरितलवमपि ये केचित् सकृदपि शृणुयुः तेऽपि निष्ठुराः स्युरित्याह । यदिति । अनुचरितं तस्य अनुकूलं कर्मैव लीला बालचेष्टितवत् स्वच्छन्दखेलामात्रमिति निर्देव लोकहितार्थकर्मणा सह लीलायाः प्रतियोगित्वात् तदेव कर्णपीयूषं शब्दतः कर्णसुखप्रदं तत्त्वर्थतो मनःप्रीतिकरमित्यर्थः । तस्यापि विप्रुट् न तु बाहुल्यं तस्या अपि सकृदप्यदनं कथंचित् किञ्चिद्ग्रहणं तेनापि विशेषेण धूता द्वन्द्वधर्मा मिथुनाचाराः स्वादनपानादिरागा वा यैस्तथाभूताः सन्तः विहङ्गाः पक्षिणोऽपि तत्रापि बहव एव न तु छिन्नाः सपदि लीलाश्रवणानन्तरमेव दीनमपि गृहस्य कुटुम्बं तातजननीभार्यादिकं सर्वपरिवारमवश्यापेक्ष्यमपि इह सर्वसमृद्धियुक्ते वृन्दावनेऽपि स्तुतिपक्षे इह संसारे बहवो जनाः विहङ्गा इव विहङ्गाः हंसवद्विवेकिन इत्यर्थः । अत एव तैरपि व्याख्यातं हंसा इवेति एवमिवेत्येव पाठः । एष च सर्वटीकाकृतां सम्मतः यद्वा विश्यः पक्षिभ्यो नष्टा अदर्शनं प्राप्ताः विविक्तवासत्वात् भिक्षुचर्याम् इन्द्रियप्रमाणमिदम् ॥ १८ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

यस्यानुचरितं तस्यानुकूलं कर्मैव लीला बालचेष्टितवत् स्वच्छन्दखेलामात्रमिति निर्देव लोकहितार्थकर्मणा सह लीलायाः प्रतियोगित्वात् । तदेव कर्णपीयूषं शब्दतः कर्णसुखप्रदं तत्त्वर्थतो मनःप्रीतिकरमित्यर्थः । तस्यापि विप्रुट् न तु बाहुल्यं तस्या अपि सकृदप्यदनं दूरदेशात् कथञ्चित् किञ्चिदास्वादनं तेन विशेषेण धूता द्वन्द्वधर्मा मिथुनाचारा उष्णशीतादिभोगा वा यैस्तथाभूताः सन्तः विहङ्गाः आकाशगामित्वाद्दूरादागता हंसादयः पक्षिणोऽपि तत्रापि बहव एव न तु छिन्नाः । सपदि लीलाश्रवणानन्तरमेव । दीनमपि गृहस्य कुटुम्बं तातजननीभार्यादिकं त्यक्त्वा स्वयमपि दीना विनष्टाश्च सन्त इह तल्लीलास्थाने वृन्दावने समागत्य भिक्षुचर्यामेव चरन्ति । धीरा इति पाठे तेषां दुःखताक्षुभिताः कठोरचित्ताः सन्त इत्यर्थः । बहव इवेति पाठः सर्वटीकाकृतां सम्मतः । श्रीस्वामिभिरपि स्तुतिपक्ष एव हंसा इवेति गौणवृत्तिद्योतनायैव इवशब्दो दत्त इति । अयं भावः । येऽमी पक्षिणो दृश्यन्ते नूनं न प्राचीनाः तेषां तद्वियोगे जीवनासम्भवात् ततोऽमी आगन्तुका एव । तत्र तादृशमागमनमीदृशी भिक्षुचर्या च तेनैव सम्भवति यथा भवदागमनं दौत्येनैवेति । यद्वा तस्य निष्ठुरता किं वाच्या तच्चरितलवमपि ये केचित् शृणुयुस्तेऽपि निष्ठुराः स्युरित्याह । यदिति । अर्थः पूर्ववत् । यद्वा । तर्हि कथं मां गातुं निषेधसि तत्राह । यदिति । अर्थः पूर्ववदेव । विशेषतश्च इह बहव एव विहङ्गास्तदावेशात्सङ्गानशीला भिक्षुचर्यां चरन्ति तत्र को वा वराको भवान् तत्र च ते प्रायो व्रजपत्यलीलामेव गायन्ति

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

तथापि न रोचन्ते भवांस्तु यादुपत्यलीलामिति कथंतरां रोचतां नामेति ॥ १८ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

यदनुचरिताः विहङ्गाः पक्षितुल्याः ॥ १८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

न केवलमस्माकमेव तत्कथार्थो दुस्त्यजः किन्त्वन्येषामपि नापि वयमेव तदर्थे विसृष्टापत्यादयः अपि त्वन्येऽपीति स्तुतिगर्भम् निन्दन्त्याह । यदनुचरितेति । इह लोके बहवो जना यस्यानुचरितमेव लीला तदेव कर्णयोः पीयूषममृतं तस्य विप्रुट् कणिका तस्याः सकृददनं सेवनं तेन विधूता निरस्ता द्वन्द्वधर्मा रागद्वेषादयो येषां तेऽत एव विनष्टा असुतुल्याः अचेतनप्राया इति यावत् लब्धात्मस्वरूपसत्ताका इति स्तुतिरप्यभिप्रेता समस्तत्वेऽविनष्टा इतिच्छेदात् सपदि तदैव दीनं दुःखितं गृहकुटुम्बं विहाय दीना विहङ्गा इव भिक्षुचर्यां चरन्ति संन्यासिवद्भिक्षावारणमात्रं कुर्वन्ति ॥ १८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली

गुणा अप्यनेन सूचिता इति प्रकटनायोत्तरवचनेन गुणानेव वक्ति । यदनुचरितेति । यस्य कृष्णस्यानुवचनमनुगुणमवतारं वाचयिता लीलैव कर्णपीयूषं कर्णामृतं तस्य विप्रुट् बिन्दुस्तस्य सकृददनेन एकवारश्रवणलक्षणेन विधूता द्वन्द्वधर्मा रागादिलक्षणा येषां ते ते चाविनष्टा अनुच्छित्तिधर्मा च अनुच्छित्तिधर्मेति श्रुतेः विनष्टा इति पृथक्पदं वा विगतं नष्टं नाशनं येभ्यस्ते तथा मुक्तावपि स्वरूपभेदधर्मरहिता न भवन्तीत्यर्थः । "स वा अयमात्मा ब्रह्म विज्ञानमयो मनोमय" इत्यादिश्रुतेः सपदि वैराग्यज्ञानानन्तरं दीनं दारिद्र्यापादकं कुटुम्बं विसृज्य दीनाः दीङ्क्षय इति धातोः दीना निर्दोषा इत्यर्थः । बहवो विहङ्गाः विहायसा नाम्नाकाशेन हरिणाधारेण गच्छन्तीति विहङ्गाः संन्यासिन इह जीवराशौ भैक्ष्यचर्यां ज्ञानलक्षणामुद्दिश्य चरन्ति देहयात्रां कुर्वन्ति ज्ञानार्थमेव तेषां देहधारणं नोदरपूरणार्थमित्यर्थः । "प्रव्रजन्त्येतद्धस्मवैते पूर्वे विद्वांसः प्रजां न कामयन्ते किम्प्रजां करिष्यामो येषां नोऽयमात्मा यं लोक इति ते ह स्म पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्यां चरन्ती"ति श्रुतेः ॥ १८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

यस्यानुचरितं तस्यानुकूलं कर्मैव लीला बालचरितवत् स्वच्छन्दखेला । सैव कर्णयोरस्य पीयूषं न तु मनसः आपाततः सुखप्रदा परिणामतस्तु दुःखदैवेत्यर्थः । तस्यापि विप्रुट् नतु बाहुल्यमित्यादि स्वयं दीना विनष्टाश्च सन्तः इह तल्लीलाख्याने । धीरा इति पाठे तेषां दुःखेनाक्षुभिताः कठोरचित्ताः सन्तः ॥ १८ ॥ १९ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

ननु तर्हि कथामेव कुर्वन्तु किमिति भगवतो दोषा उच्यन्ते नहि भगवद्गुणतत्परा भगवद्दोषान् कथयन्ति नवा तेषामन्यथा स्फुरतीति चेत्तत्राह । यदनुचरितेति । यथा भगवान् तथैव तत्कथापि ततोऽप्यधिकापि वयं हि स्त्रियः नात्यन्तं विवेकवत्यः भगवता बहुकालं स्थित्वा कथंचित्कथामोहिताः तत्रापि न भिक्षां प्रार्थयामः नापि भ्रान्ता इव जातिभ्रष्टा जाता नापि त्यक्तस्थानाः कथा त्वदीयस्यापि महान्तमनर्थं सम्पादयति इत्याह । यस्य भगवतः अनुचरितं भगवतातु पूर्वमाचरितं तत्पुनः व्यासादिभिरुपनिबद्धमनुचरितं आतमनेन शब्दव्यवहितमपि तथा कार्यं सम्पादयतीत्युक्तं यथा निदाघे वस्त्रादिव्यवहितोऽपि भानुः सन्तापयत्येव तत्रापि ग्रहणसौकर्यार्थमाह । लीलेति । दुर्जरत्वं ज्ञात्वा अभक्ष्यमपि रसव्यामोहितो भक्षयति । तत्रापि न प्रयत्नसाध्यता कापीत्याह । कर्णपीयूषेति । निमीलिताक्षेणापि कर्णामृतं पातुं शक्यं चक्षुपाने तु को भेदः किं वा भवेत् किन्तु तस्यामृतस्य विप्रुट् बिन्दुमात्रं तस्यापि सकृददनं सादरमनसा ग्रहणं तेनैव विधूता द्वन्द्वधर्मा रागादयो येषां तैर्वकस्तिष्ठति अतस्तदभावात् विनष्टा भवन्ति "णश अदर्शने" यथा सर्वप्रतीत्या गृहीता भवन्ति तथा गच्छन्तीत्यर्थः । लौकिकवैदिकमार्गादपि पुष्टिमार्गं एवाभिनिवेशात् अन्यानुरोधेनापि तेषां स्थितिं निवारयति । सपदीति । रागिणो विरक्ताः कर्मिणोऽपि स्वार्थमपेक्षाभावेऽपि परार्थमपेक्षन्ते एतेषां तदपि नास्ति यतः सपद्येव गृहस्थितमपि कुटुम्बं दीनमपि उत्सृज्यं त्यक्त्वा स्वयमपि दीनाः सन्तो बहव एव विहङ्गा जाताः इहास्मिन् जन्मन्येव हंसाः परमहंसा वा विहङ्गपदं गताः साधारण्यप्रतिपादनार्थमितो गताः काका गृध्रा हंसा वा भवन्तु परं गच्छन्त्येवेति ज्ञापनार्थं तेषां तु आकाशगतिरिव सर्वविलक्षणा भवतीति । ननु तादृशाः कथमुपलभ्यन्ते तत्राह । भिक्षुचर्यां चरन्तीति । भिक्षुश्चतुर्थाश्रमवान् तस्य चर्यामाचारं गृह्णन्ति तदनधिकारिणोऽपि तत्फलानभिलाषिणोऽपि तन्मार्गरहिता अपि तदाचारं गृह्णन्तीत्यर्थः । एवं स्वधर्मं परित्याज्य परधर्मं ग्राहयति दुःखितांश्च करोति तान् सत्सम्बन्धिनश्च स्वसुखमपि बहुताननुभावयति अतः कथापि त्यक्तव्यैव परमशक्यत्वाच्च त्यज्यत इति भावः । पुष्टिमार्गश्रुतीनामपि भगवन्मर्यादाश्रुतयोऽपि नात्यन्तद्वेष्याः किन्तु ग्राह्या एव परं नाभिप्रेता इति तृतीयपर्याये प्रथमं तामस्याः ॥ १८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

वयं साक्षात्तेन सह सख्यं कृतवत्यो यद्दुःखिन्योऽभूम तत्र किं चित्रं तल्लीलाकथापि सर्वजगत्सन्तापनीत्याह । यस्यानुचरितं प्रतिक्षणचेष्टितमेव लीला सैव कर्णपीयूषं शब्दमात्रेणैव सुखदं किं पुनरर्थत इति भावः । तस्या अपि विप्रुट् तस्या अपि सकृदप्यदनं किञ्चिदास्वादनं तेनापि विधूता विशेषेण खण्डिता द्वन्द्वधर्मा स्त्रीपुंसादिपरस्परसम्बन्धरूपधर्मा येषां ते तत्कथां स्त्री चेत् शृणोति सद्य एव पतिस्नेहं त्यजति । पतिश्चेत् स्त्रीस्नेहम् एवं पुत्रश्चेत् पितरं मातरञ्च । माता चेत् पुत्रमित्येवं परस्परत्यागाद्विशेषेण नष्टा इति तेषां नाशः तथा न दुःखं यथा वैराग्य इति सांसारिकलौकिकानुभव एव प्रमाणमिति भावः । किञ्च । ते जनाः

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

स्निग्धमनसोऽपि कठोरस्य कृष्णस्य लीलाश्रवणादतिकठोरा निर्दया कृतघ्नाश्च भवन्तीत्याह। सपदि कथाश्रवणक्षणमात्र एव गृहकुटुम्बं पितृश्वश्र्वादिपर्यन्तमपि दीनम् अन्यस्योपार्ज्जकस्याभावात् श्वो यद्भोक्ष्यते तद्धनरहितमपि। यद्वा तद्विच्छेदकातरम् उत्सृज्य मृत्यवे कुशवारिसंयोगेन सम्प्रदायैवेत्यर्थः। हन्त हन्त ते स्त्रीपुत्रादयो म्रियन्तां नाम स्वयमपि सुखिनो नैव भवन्तीत्याह। दीनाः गृहं त्यक्त्वा गच्छन्तश्चित्तविक्षेपाद्वराटकमात्रमपि ग्रन्थौ न गृह्णन्तीति भावः। धीरा इति पाठे भार्यादिरोदनदर्शनेऽप्यश्रुस्यन्तो महाकठोरा इत्यर्थः। नच ते एकद्वा द्वित्रा वा चतुःपञ्चा वा किन्तु बहवः परःशताः परःसहस्राश्च। ननु ततस्ते कया जीविकया जीवन्तीत्यत आह। विहङ्गाः पक्षिण इव भिक्षुचर्यां गोधूमादिकणभिक्षापरिपाट्यैव जीवन्ति नतु केनापि दत्तया स्थूलभिक्षयापीति भावः। इहेति पाठे अत्रैवास्मद्दुःखस्थाने वृन्दावन एवागत्येति अस्मत्सङ्गादपि महादुःखिनो भवन्तीति भावः। तेन तत्कथाया बडिशमत्स्यपिण्डिकामयधुस्तूरबीजचूर्णत्वं कथावाचकस्य साधुवेशच्छद्ममहाघातकत्वम्। पुराणपुस्तकस्य जालत्वम् अत एव ते वनाद्वनं भ्रमन्तोऽपि स्वकक्षगृहीतपुस्तका एव दृश्यन्ते व्यासादीनां जालनिर्मातृत्वं कृष्णस्य परमेश्वरत्वेन तत्तदादेष्टृत्वम् एतदर्थमेव कृष्णेन परमेश्वरता गृहीता गोप्य इव सर्वलोका अपि दुःखाब्धौ पतन्त्विति तस्य विचारः। ईदृशपरदुःखदर्शनमेव तस्य सुखम् अत ईदृशपरदुःखदानजन्यफलभागी यथा स भविष्यति न तथा व्यालादय इति परःशता एव ध्वनयोऽस्य पद्यस्य सर्वे एव सिद्धास्ततो व्याजस्तुत्या भक्तेः सर्वोत्कर्षव्यञ्जका ज्ञेयाः। अत्र खगं सदृशीकृत्य सज्जनानां खेदनात्तस्य त्याग एव समुचित इत्यनुतापमयं वाक्यमित्यभिजल्पः। यदुक्तम्। "भङ्ग्या त्यागौचिती तस्य खगानामपि खेदनात्। यत्र सानुशयं प्रोक्ता तद्भवेदभिजल्पितम्"॥ १८॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका।

यद्यपि तत्कथार्थोऽन्यपुरुषार्थमूलोच्छेदक इति जानीमस्तथापि त्यक्तुं न शक्नुमः किं कुर्म इत्याशयेनाह। यदिति। यस्यानुचरितमेव लीला स्वच्छन्दक्रीडा तदेव कर्णपीयूषं तस्यापि विप्रुट् कणिका तस्यापि सकृददनं दूरात्कथञ्चिदास्वादनं तेन निरस्ता द्वन्द्वधर्मा रागादयः मिथुनीभूताचाररत्यादयो वा यैः तत्कथां पुरुषश्चेच्छृणोति सद्य एव भार्यादिस्नेहं जहाति स्त्री चेत्पत्यादिस्नेहं पुत्रश्चेत् पित्रादिस्नेहं माता चेत्पुत्रादिस्नेहमिति परस्परत्यागात् विनष्टा मृतावपि संबन्धिनो विरक्तास्तस्मादधिकदुःखस्य सांसारिकानुभवगोचरत्वाद्विशेषेण नष्टाः सपदि लीलाश्रवणाव्यवहितक्षण एव गृहं तत्र स्थितं कुटुम्बं पितृभार्यादिपोष्यवर्गं च दीनं जीवनोपायरहितत्वाद्धनोपार्जकत्वाविरक्त्वरकातरं परित्यज्य स्वयमपि दीनाः निष्किञ्चनत्वात् भोगहीना धीरा इति पाठे इतः पित्रादीनदृष्ट्वाप्यतिकठिनचित्तत्वात् धैर्यमत्यजन्त एवंविधा असंख्याताः पक्षिण इव भिक्षुचर्यां चरन्ति गोधूमादिकणभिक्षापरिपाट्यैव जीवनवृत्तिं सम्पादयन्ति इहेति पाठे विहङ्गास्तद्वदपरिग्रहराहित्याः इहास्मद्वृन्दावने अस्मत्समक्ष एवागतास्तेषां तत्कथार्थकृतामुक्तदशां प्रत्यक्षेणानुभूयापि वयं ततो निवृत्तिं न भजाम इति महत्कष्टमित्यर्थः। एतेन कृष्णादिष्टव्यासादिकृतपुस्तकात्मकजालास्थितकथारसास्वादनकृतजालबन्धनमवाप्य बहवोऽपि दुर्दशां प्राप्ता इति निरूपणेन कृष्णस्यैवं परदुःखज्ञातसुखार्थिनः समस्तदुःखाय गृहीतेश्वरभावस्य मूलकारणस्य दुःखदानजन्यफलभाक्त्वमित्यपि ध्वनितं यद्वा ननु सर्वथा दोषवत्त्व एव कृष्णश्चेत्तर्हि तत्कथार्थत्यागे कः प्रयासः दोषदर्शनस्यैव वैराग्योपायत्वाभिधानाद्गोपिकानां तत्कथार्थत्यागासामर्थ्यमात्रे किं चित्रं यतस्तल्लवोऽपि महतोऽपि महदनर्थसम्पादक इत्याशयेनाह। यदिति। यस्य कृष्णस्यानुचरितं यादृशः कृष्णस्तादृशमेव तदनुचरितमधिकानर्थसम्पादकत्वादधिकमपि भगवता पूर्वमाचरितं पश्चाद्व्यासादिभिरुपनिबद्धं तस्माच्छब्दव्यवहितमपि तथा कार्यसम्पादकं वस्त्रादिव्यवहितस्यापि ग्रीष्मसूर्यस्य तापजनकत्वं यथेति भावः। अन्येषां पीडाकरमपि तस्य सुकरमिति ज्ञापनाय इह लीलेति दोषसहस्राक्रान्तमपि विजातीयरसलोभविमोहिता भक्षयन्तीति सूचयन्त्याह। पीयूषेति। कर्णामृतं निमीलिताक्ष्यापि पातुं शक्यमिति भावः। श्रवणमात्रस्यापीति वा तत्रापि बिन्दुमात्रं बहुपाने तु किं स्यादिति भावः। एवंभूतस्य बिन्दुमात्रस्याप्यल्पावयवस्य ग्रहणं तेनैव विधूता द्वन्द्वधर्मा रागादयो येषां ते तद्रूपधूर्तत्वाद्विनष्टाः अहश्यत्वं प्राप्ता गृहकुटुम्बादिकं दीनमुत्सृज्य स्वयमपि दीनाः सन्तः इहास्मिन्नेव जन्मनि विहङ्गा हंसाः परमहंसा वा जाताः। ननु तादृशाः कथमुपलभ्यन्त इति चेत्तत्राह। भिक्षुचर्यां भिक्षाटनादिरूपमाचारं चरन्ति कुर्वन्ति अस्मद्गृहद्वारि भिक्षार्थमागत्य स्थिता इत्युपलभ्यन्त इत्यर्थः। तथा च महान्तोऽपि तत्कथालवेनाप्येवंविधदुःखमनुभवन्तोऽपि यदा तं न त्यजन्ति तदा त्यागे अस्माकं किं सामर्थ्यमिति भावः। यद्वा ननु तत्कथार्थो दुस्त्यज इति यदि जानासि तर्हि किमर्थं तद्गानं कुर्वन्तं मां निषेधसीति चेत्तत्राह। यदिति। इह बहवो विहङ्गास्तद्गानशीलाः सन्तो भिक्षुचर्यां चरन्ति तत्र को वराको भवान् ते च गोपिकापतिं गोपिकाश्च गायन्तो नादरं लभन्ते भवांस्तु यदुपतिं तत्सखीश्च गायन् कथं तत्रादरं लभतामित्याशयः। समानमन्यत् यद्वा मास्तु तत्कथात्यागात्यागकथा स तु सर्वदुःखप्रदत्वात्त्यक्तुमेवोचित इत्याशयेनाह। यदिति। "भङ्ग्या त्यागौचितिस्तस्य खगानामपि खेदनात्। यत्र सानुशयं प्रोक्ता तद्भवेदभिजल्पितम्" इत्युक्तेरत्राभिजल्पः उद्धवपक्षेऽप्येवं श्रुतिपक्षे शृणु तत्कथालवस्याप्यलौकिकं माहात्म्यमित्याह। यदिति। पूर्वार्द्धमेकपदं यथोक्ताश्च ते अविनष्टाश्च यद्द्वन्द्वधर्माणस्ते विषभक्षकत्वाद्विनष्टाः तदुक्तम्—

> भोगा विषयसम्भोगा भोगा एव फणावताम्—
> स्पृशन्नपि मनाग्दृष्टो दृष्टो नष्टः प्रतिक्षणम्। इति

त्यक्तविषयत्वात्पीतामृतत्वादेत एवाविनष्टाः सपदि तत्क्षणमेव दीनं तुच्छं गृहकुटुम्बं विहाय दीना औद्धत्यरहिता विनयसम्पन्ना निष्किञ्चना वा धीरा इति क्वचित्पाठः बहवो विहङ्गा हंसा इव सारासारसत्यासत्यादिविवेकचतुराः भिक्षुचर्यां पारमहंस्यं चरन्ति इहेति पाठे अस्मिन् अधिकारिशरीरे विहङ्गाः

वयमृतमिव जिह्मव्याहृतं श्रद्दधानाः कुलिकरुतमिवाज्ञाः कृष्णवध्वो हरिण्यः ।
ददृशुरसकृदेतत्तन्नखस्पर्शतीव्रस्मररुज उपमन्त्रिन् ! भण्यतामन्यवार्ता ॥ १९ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

मन्नु किमेवं ब्रूषे पूर्वं त्वयैव साकं रहसि विहरन्तं किमेवं मावोच इत्यत आह । वयमिति । हे उपमन्त्रिन् ! दूत ! आस्तामियं वार्त्ता । वयं कुलिकस्य मृगयोः रुतं गीतमज्ञा यथा श्रुतं सत्यमिति श्रद्दधानाः कृष्णस्य हरिणस्य वध्वो भार्या हरिण्यः शरैः क्षताः सत्यो रुजो ददृशुः एवं जिह्मस्य कुटिलस्य तस्य व्याहृतमृतमिव श्रद्दधानाः स्पृहयन्त्यो वयमसकृदेतद्ददृशिम किं तत् तस्य नखैः स्पर्शः तेन तीव्रः स्मरस्तेन रुजः पीडाः तस्मादन्या वार्त्ता भण्यतां कथ्यतामिति ॥ १९ ॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

अहो तल्लीलाश्रवणाद्बहवो व्यसनं प्राप्ता इति किमवक्तव्यं वयमपि तत्कपटोक्त्या महादुःखमन्वभूमेत्याह । वयमिति । असत्यमपि ऋतमिति श्रद्दधानाः कृष्णवध्व इति असितअमलधूर्तत्वेन तद्युक्तमेवेति पूर्वोक्तमलमासितत्ववैरिस्येतदेव दृढीकृतम् अन्यत्तैर्व्याख्यातं यद्वा भो देवि ! तव प्रेयान् संदिशति प्रिये ! प्रसीद न कदापि पुनर्वियोक्ष्ये ततः शीघ्रमत्रागत्य मामनुगृहाणेति चेत्तत्राह । वयमिति । अशब्दादेव पूर्वं कृष्णवध्वः सत्यः तन्नखस्पर्शतीव्रस्मररुजो वयं साम्प्रतं तु जिह्मस्य कुटिलस्य तस्य व्याहृतं गमनसमये आयास्ये इति दूतद्वारा कथम् तथा सातीव वो द्रष्टुमेष्याम इति मधुपुराद्दूतद्वारा च कथम् ऋतमिति श्रद्दधानाः इवेति लोकोक्तौ एतत् किमप्यनिर्वचनीयं प्रगाढाशाभरेण देहधारणलक्षणम् असमोर्ध्वदुःखं ददृशिम इति सनिर्वेदो विषादः अन्यस्य कृष्णेतरस्य वार्ता ततश्च कराभ्यां गाढं वक्षो धृत्वा व्याकुळा क्षणं विमुह्य भूमौ निपपातेति एतत्कण्ठध्वनितोऽर्थः अतो मधुकरोऽपि प्रस्थित इति ज्ञेयम् ॥ १९ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

तत्कथापि प्रवृत्तिमार्गविरोधिनीत्याह । यदनुचरितेति । इह बहवो जनाः यस्य कृष्णस्य अनुचरितमेव लीला तद्रूपकर्णपीयूषस्य विप्रुट् कणिका तस्याः सकृदद्दनेन सेवनेन विधूता निरस्ता द्वन्द्वधर्मा येषां ते अतः विनष्टाः लोकद्वयकार्यानपेक्षया सहतुल्याः दीनं वियोगकातरं गृहेण सहितं कुटुम्बं सपदि उत्सृज्य दीनाः केनोपायेन सुलभेतरस्य कृष्णस्य प्राप्तिः स्यादिति तन्मयुक्ताः विहङ्गाः प्रवृत्तकर्मत्यागात् कृष्णप्राप्त्युपायस्वीकारात् हंसवद्विवेचकाः भिक्षुचर्यां चरन्ति उपाश्रितं विषयानन्दं त्यक्त्वानुपस्थितं किमपि कृष्णप्राप्तिसुखं वाञ्छन्ति अतः प्रसिद्धसुखतत्साधनप्रवृत्तिमार्गविरोधिन्यपि तत्कथा तथापि सा दुस्त्यजा तस्मात्कथ्यतामिति भावः ॥ १८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

... विपाकादागाः तथा च यत्कथाश्रवणमात्रप्राप्तियामपि यदा कृतकृत्यता तदा तदनन्यकरणानां माहात्म्यं किं वक्तव्यमित्यर्थः । तथा च तत्कथाप्रसादक्षतरवणायां माहात्म्यप्रतिपादिका श्रुतयः "यथा पुष्करपलाश आपो न श्लिष्यन्ते एवमेवंविदि पापं कर्म न श्लिष्यते न कर्मणा लिप्यते पापकेन तत्सुकृतदुष्कृते विधूनुते" इत्याद्याः ॥ १८ ॥

भाषा टीका ।

जिनकी लीला चरित्र रूपी कान के अमृत के बिंदु का एक बखत भी जिनने पान किया है वे लोग सब रागद्वेष धर्मों से छूट गये हैं और अकिंचन होकर दुखित भी अपने गृह कुटुंब को छोडकर आप भी संसार से दुखी होकर बहुत से मनुष्य पक्षि से बन कर इस संसार में भिखारी के आचरण को करते हैं सो उनकी कथा का सुनना ठीक नहीं है ॥ १८ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

वयमिति । तैरवतारितम् । तत्रैवमिति जानीम यथेत्यादि पूर्वपद्यार्थतारिकात्मकं पूर्वपद्यार्थमित्यर्थः । उत्तरैवशब्दोऽपि तदर्थः । पूर्वः किंशब्द आक्षेपे । उत्तरस्तु प्रश्ने । आस्तामिति तद्वाक्यं यदि प्रमाणं स्यात्तदैव त्वया प्रष्टव्यं नत्वन्यथा । यतस्तद्वाक्यप्रामाण्यबुद्ध्यैव वयं दुःखसागरे मग्ना इत्यर्थ इति । यद्वा । अहो तल्लीलाश्रवणमात्रेण बहवो व्यसनं प्राप्ताश्चेत् कथं तत्कपटोक्त्या महादुःखं वयमन्वभूमेति किमाश्चर्यमित्याह । वयमिति । यद्वा ननु देवि ! प्रथमतः प्रियसंदेशं शृणु ततो विचारय ततस्तुष्य कुप्य वा तत्राह । वयमिति । वयं जिह्मस्य पूर्वोक्तस्य कितवस्य त्वद्बन्धोरसकृद्व्याहृतं न पारयेऽहमित्यादिकम् आयास्य इत्यन्तं वचनसहस्रम् ऋतं सत्यमिवासकृच्छ्रद्दधानाः यथा महतां वाक्यं सत्यं तद्वत् निश्चिन्वानाः मुहुर्व्यभिचारेऽपि मुहुः श्रद्दधाना इत्यर्थः । ततो मोहेन कृष्णस्य तस्यैव वध्वोऽपि अन्यस्तोऽसकृन्नखस्पर्शेन मुहुः स्वस्मिस्तच्चिह्नदर्शनात् तीव्रस्मररुजः तीव्रा स्मररुक् यासां तथाभूताश्च सत्यः एतद्तादृशं दुरवस्थानमेव नतु कदापि स्मरसुखं ददृशुः ददृशिम प्राप्तवत्य इत्यर्थः । तिङां तिङो भवन्तीति छान्दसवार्त्तिकात् स्वतस्तून्मादेनास्मत्प्रयोगाननुसन्धानात् अतः परोक्षप्रयोगोऽपि तदानीं बोधावरणं सूचयति यत एवं तस्मात् वयमज्ञा एवेति । तत्र दृष्टान्तो हरिण्यः कुलिकरुतमिवेति यथा हरिण्यः कुलिकरुतं सत्यमिवास्मदनुकूलमेवेदं न पुनरन्यथारूपमिति मन्यमानाः भवद्बन्धुनखसदृशकुलिकबाणस्पर्शेनात्मतः स्मररुक्सदृशरुजः सत्यः एतदस्मदीयदुरवस्थासदृशां दुरवस्थां ददृशुः प्राप्नुवन्तीत्यर्थः । उभयत्र तत्रोच्यतार्थे

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

विशेषणमज्ञा इति । ननु भवत्यस्तावत् कुलवध्वस्तास्तु पशुजातीः मनुष्यभक्ष्यास्तां दुरवस्थां प्राप्तुमर्हन्त्येव इति तासु कथं स्वसाम्यं निर्दिशसीत्याशङ्क्य स्वपक्षान्तःपात्यमानानां तासां पक्षपातमाचरन्ती श्लाघामाह । कृष्णवध्व इति । तद्भर्त्तारोऽप्यात्मानं परमोत्कृष्टकृष्णनामतया ख्यापयन्ति ततस्त्वद्बन्धुतस्तेषां को निकर्षो येन तासामपि निकर्षः स्यात् । ततो यथा तादृशीषु तासु कुलिक एव दुःखदायी स्यात् तथास्मासु भवद्बन्धुरेवेति भावः । ततो हे उपमन्त्रिन् ! दाम्भिकतया तूष्णीं स्थितस्यास्य तन्मन्त्रिणः प्रतिनिधे । यद्वा । तत्रोपमन्त्रिणो रामानाहास्यरसैर्विभुमित्यत्र तथा व्याख्येयानुसारेण हे भण्डविद्यापण्डित ! अन्या वार्त्ता भण्यतामुपहासस्त्यज्यतामिति । "उन्मादवचने तासां या कृष्णकृतार्थसङ्गतिः । तदुत्कर्षाय सा भातीत्यनूक्तं मुनिभिस्तथेति" ॥ १९ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीया ।

वयं कृष्णवध्वः कुलिककृतं भूतानामाश्वासनकर्तुः छद्मगानम् उपमन्त्रिन् ! दूत ॥ १९ ॥ १७ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तर्ह्येवं विलक्षणास्तत्र पूर्वं कथं तद्वशं गता इत्यत आह वयमिति । कृष्णस्य हरिणस्य वध्वो हरिण्यः अज्ञाः कुलिककृतमिव मृगविश्वासकतुर्गीतस्य गानरूपवाक्यमिव एवं जिह्मस्य कुटिलस्य तस्य व्याहृतं भाषणमनृतं सत्यमिति श्रद्दधानाः तस्य नखरूपशैलक्षतैः तीव्रा स्मररुजा यासां तथाभूताः असकृदेतत्कृष्णचिह्नं स्वात्मनि स्ववक्षसि स्वात्मस्वरूपेवेति शेषः प्रणयुक्तं स्वात्मानमिति वार्थः एवदीमाङ्गाकम अतो हे उपमन्त्रिन् ! दूत अन्यवार्त्ता भण्यतां कथ्यतां तद्वार्त्तया स्खलमिति भावः ॥ १९ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

कृष्णवध्वो वयं यस्य जिह्मं कुटिलं व्याहृतं वचनामृतं सत्यमिति श्रद्दधानाः यथा अज्ञाः कृष्णमृगवध्वो हरिण्यः कुलिकस्य मृगविश्वासकर्तुः रुतं गीतं नानाप्रकारं श्रद्दधते आसक्त्युद्धिं कुर्वन्ति तथा तस्यैतस्य सकृन्नखस्पर्शनेन नखस्पर्शोपतापेनोत्पन्नेन तीक्ष्णेन स्तनानां रुजेन क्षतेन जाता या तां परमाम् अत्युत्कटातिसुखलक्षणां पीडां इदानीम् अनुभूयमिति वसतोऽस्य वार्त्ता भण्यतां श्रुतया तयाप्यानन्दमाशास्महे इति जिह्मं मन्दमल्पमपि व्याहृतमिति वदतः श्रद्दधानाः ईश्वराणां वचः सत्यं तथैवाचरितं क्वचिदिति वचनात् जिह्मं मन्देमवक्रयोरिति उच्चनिसादव्याहारिणीनां कुलिकरुतमशल्यं न त्वसत्यं तद्विरूप्यात्मं योज्यम् अन्यवार्त्तेति केचित् अन्यविषयं वचनं नत्वेतद्विषयं सर्वस्मादन्यस्य विलक्षणस्य भिक्षस्येति वा ॥ १९ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

ननु यावन्ति दूषणान्युच्यन्ते तानि सर्वाण्येवासङ्गतानि प्रमाणविरोधात् तत्राह । वयमृतमिति । वयमपि पूर्वं प्रमाणपरा एव जाताः भगवता हि पूर्वमुक्तं न मयोदितपूर्वं वा अनृतमिति अतः न पारयेऽहं निरवद्यसंयुजामिति साधनकाले फलकाले च वाक्यद्वयं जिह्मव्याहृतं कपटेनोक्तमन्यथोक्तमन्यथा प्रतीतिं जनयति भगवता उक्तं पूर्वं मया नानृतमुक्तं भवदर्थं वक्ष्यामीति भवतां साधुकृत्यं न पारये इति न करिष्यामीति परं परिज्ञाने अस्माकमेवान्यथा बुद्धिर्जाता अयमस्मान् प्रति अनृतं न वक्ष्यति कृतिस्ववचनात् कदाप्युदासीनो न भविष्यामीति अत एव वयं जिह्मव्याहृतमपि ऋतमिति सत्यमिति श्रद्दधाना जाताः नान्विकार्मी विचारचतुराः पूर्वं कथं भ्रान्ता जाता इत्याशङ्क्याह । कुलिकरुतमिति । वयमप्यारण्याः हरिणोऽपि हरिणवेषं कृत्वा मृगयुर्गायति तदा हरिण्यो मुग्धाः पूर्वं हारिणवेनं विचित्रं मत्वा हरिणोऽयं हरिणकार्यमधिकं करिष्यति गानादिकमधिकं चेति भ्रमात् पूर्वहरिणं परित्यज्य तत्स्थाने गताः तदाह । अज्ञाः कृष्णवध्व इति । भ्रमादेव द्वितीयकृष्णसारस्य वध्वो जाताः । यथा वयं कृष्णपत्न्यः । ननु को दोषो जात इति चेत्तत्राह । हरिण्य इति । हरिणस्य हि ता भार्याः न त्वाकुलिकस्याद्न्यस्य इमा लोकभार्याः नापीश्वरस्य नापि क्षत्रियस्य नापि यादवस्य परं स एव गोपत्वेन स्थित इति भ्रमेण एवाम्मस्मस्थितं करिष्यतीति प्रवृत्ताः पश्चात्स ईश्वरः एवेश्वरो जातः गोपिकाः परं नष्टा इति भावः । नष्टा किमिति नाथो भण्यते हरिवधस्तु तेन स्थिता न तु भवस्य इति चेत्तत्र तुल्यार्थतामाह । दद्भुरिति । एतद्दद्भुः स्वावस्थामभिनयेन प्रदर्शयन्तीः हरिणीनां साम्यवस्थामाह । हरिण्योऽप्युभयतो भ्रष्टा जाताः स्वयमेव हरिणीनां बोधने दृष्टान्तभूता इति पूर्वं हरिण्युपक्रमेण निरूप्यमाणमप्यर्थं पश्चात्स्वप्राधान्येन निरूपयति । तन्नखस्पर्शेति । नखकामयोः स्वामिभेव प्रसिद्धिरिति बाणवेदनमुपलक्ष्यते तदा भगवतः नखानां यः स्पर्शः तेन तीव्रा या स्मररुक् सा यासां कटाक्षादयो विस्मृता अपि भवन्ति न नखादयः अन्या वेदना त्वौषधेनापि शाम्यति स्मरणेनैव तथा भवति इति तस्योपमानत्वम् उपमन्त्रिन्निति सामीप्येन नीतिज्ञत्वेन च सम्बोधनमाह । एतत्प्रकटी कर्त्तव्यं ज्ञायते च भगवत्स्वरूपमिति अतो भगवद्वार्त्तया लेश एव भवतीति अन्यवार्त्ता भण्यताम् अन्यार्थमागतः कश्चिदहमन्य इति ज्ञाप्यतामित्यर्थः । तदेवमुपलम्भं न करिष्यामः ॥ १९ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

नन्वेवमेव परमविज्ञाभिर्भवतीभिः कृष्णे तस्मिन् कथं सख्यं कृतं तत्राह । वयं तस्य न न पारयेऽहं निरवद्यसंयुजामित्यादिकं जिह्मव्याहृतमपि ऋतमिव सत्यमिव श्रद्दधाना अज्ञा अभूम कुलिकस्य व्याधस्य रुतं श्रद्दधाना हरिण्यः कृष्णवध्वः कृष्णसारस्त्रिय इव ततः किकिमिमुत आह । एतत् कुलिकरुतं ददृशुः इत्यर्थः । तथैव कृतस्य दुर्वानास्वभावात् तत्फलं शराघातं ददृशुरित्यर्थः ।

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

वयमपि तन्नखस्पर्शेन तीव्राः स्मररुजः कन्दर्पपीडा दहशिमेत्यर्थः असकृदिति ॥ एकवारं तत्फलदर्शनेऽपि पुनरपि विश्वासात् पुनरपि तत्फलदर्शनाद्दुःखत्वाधिक्यं हरिणीनां तथैवास्माकमपि लब्ध-पुनःपुनर्मानोत्थदुःखदशानां तस्मात् उपमन्त्रिण ! हे विदूषक अन्य-वार्त्ता भण्यतां तस्य तद्वार्त्तायाश्च दुःखदत्वादन्यकथैव सम्प्रत्य-स्माकं सुखदा इत्यर्थः । अत्र तस्य कौटिल्यं तद्वार्त्तायां दुःख-दत्वम् अन्यवार्त्तायाः सुखदत्वामित्ययमाजल्पः । यदुक्तम्

जैह्म्यं तस्यार्त्तिदत्वञ्च निर्वेदाद्यत्र कीर्त्तितम् ।
भङ्ग्यान्यसुखदत्वञ्च स आजल्प उदीरितः ॥ १९॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

ननु पूर्वं तेन सत्यमासाद्य रमिता त्वं किमिदानीमेवं वक्तुं प्रवृत्तासि परमाभिज्ञया त्वया प्रथममेव विचारणीयं स्थितमतः प्रियसंदेशमाकर्ण्य ततो विचार्य मुञ्च वा कुप्य वेत्याशङ्क्याह । वयमिति । यद्वा दूरस्थितास्तत्स्वभावानभिज्ञा आपातरम्यां तत्कथा-माकर्ण्य यथोक्तदशां प्राप्नुवन्ति येत्याप्नुवन्तु नाम यूयं तु तत्सहचर्यैः बाल्यमारभ्य तत्स्वभावाभिज्ञाः कथं तस्मिन् विश्वसैवंविधां दुर्दशां प्राप्ता इति चेत्तत्राह । वयमिव अज्ञाः बहुवर्त्तेऽपि ग्रामीणस्वाद्यकल्यादिलक्षणतत्स्वभावाभिज्ञाः जिह्मस्य सकपटस्य स्वच्छन्दो व्याहृतमसकृत्तदीय एवाहमित्यादि-विप्रभाषितं सत्यं वेद वाक्यमिव श्रद्धाना विश्विन्वानाः यद्वा कपटेनान्यथा प्रयुक्तमन्यथा प्रतीतिं जनयित्वा स्वाभिप्रायेण भावितं न प्रयोगिततत्पूर्वं वा अनृतमिति बाधककाले न पार-येऽहं निरवद्यसंयुजामिति फलकाले इदं वाक्यद्वयं पूर्वं मया नानृतमुक्तं भवदर्थं तु वच्मि भवतीनां साधुकृत्यं न पारये न करिष्यामीत्यर्थविवक्षया तेन प्रयुक्तम् अस्माभिस्तत्कपटानभि-ज्ञाभिः अन्यथैव युक्तमिति भ्रान्त्या सत्यमिव श्रद्धानाः कचि-त्सत्यमितीति पाठः स्वाज्ञानहेतुं ज्ञापयन्ती अनुरूपं दृष्टान्तमाह । कुलिकेति । कुलिकस्य मृगवेषं विधाय गायमानस्य रुतं तत्प्राणा-पहारणाभिप्रायेण प्रयुक्तं गीतशब्दं सत्यमिव श्रद्धाना अयं कृष्णसारो मत्कृष्णसाराद्विशिष्टः तत्कार्यं करिष्यति गानं चेति मत्वा तद्रुतं कृष्णसाररुतं सत्यमिव श्रद्धानास्त-द्बन्धुत्वार्थं तत्सन्निधौ गताः यथा गोपभार्या वयं गोपत्वेना-च्छन्नं यादवमीश्वरं वा कृष्णं गोपं मत्वा कृष्णवध्वो जाता इति सूचनायाह । कृष्ण वध्व इति । शरैः क्षताः सत्यो रुजो ददृशुस्तथा वयमेतद्ददृशिम किमित्यपेक्षायामाह तस्य नखस्पर्शे-स्तेन तीव्रः स्मरस्तेन रुजः पीडाः एता इदानीमप्यनुभूयमाना-स्तन्नखस्पर्शतीव्रस्मररुज इति वा यद्वा ननु यूयमेवंविधवि-शालनेत्राः किमिति वञ्चनां प्राप्ता इत्याशङ्क्य प्रज्ञाचक्षुर्विधुरा वञ्च्यन्त एवातो न वयमेवोपालम्भनीया इत्याशयेनाह । वय-मिति । यथा जिह्मव्याहृतं सत्यं श्रद्धाना अज्ञा वयं तन्नखस्प-र्शेन तीव्रः स्मरस्तेन रुक्पीडा यासां तथाभूता जातास्तथा कृष्णसारवध्वो हरिण्योऽपि कुलिककृतं श्रद्धाना अज्ञा एतदेव ददृशुः अस्मदनुभूयमानदुःखसमानशराघातजन्यं दुःखं ददृशुः कटाक्षादयः कदाचिद्विस्मर्यन्ते ननु नखक्षतानि स्मारकचिह्नानां विद्यमानत्वादिति ध्वनयितुं नखस्पर्शेत्युक्तम् अन्याः पीडास्त्वौ-षधैः स्वनिदानानिवृत्त्या निवर्तन्ते एतास्तु न कदापि एतन्निदा-नस्य स्मरणस्य सर्वदा सत्त्वादिति सूचयितुं स्मर इत्युक्तं यद्वा तिष्ठत्वस्माकमन्येषां च याऽसौ तिर्यग्योनिजा अपि दुर्दशां प्राप्ता इत्याह । वयमिति । तन्नखस्पर्शतीव्ररुजो वयमिवाज्ञाः कृष्णसा-रवध्वो हरिण्यो व्याधगीतसदृशं कृष्णस्य मुखेन वेणुना व्याहृतम् रुतं श्रद्धाना एतदस्माभिरनुभूयमानं कामजन्यं दुःखमस-कृद्ददृशुर्यं नखस्पर्शेन यां दशामधिगतास्तास्तां तद्व्याहृत-श्रवणेनैव प्राप्ता इति कोऽस्माकमपराध इति भावः । तस्माद् हे उपमन्त्रिन् ! अन्यवार्ता भण्यतां कृष्णवार्तायाः क्लेशप्रदत्वादन्यार्थ-महमागतोऽहमन्यो न तु कृष्णस्य देशहरः इत्युक्त्वा अन्यवार्ता कथ्यतां तदोपालम्भं न दास्याम इत्यर्थः । तत्स्वरूपस्य ज्ञातत्वात्तवच तन्निकटव-र्तित्वात् गुह्यवार्ताधारित्वात्तद्गुह्यस्य प्रकटीकरणस्यायुक्तत्वाच्च मास्तु सहास्तीति सम्बोधनाशय यद्वा हे हास्यप्रधानभाण्डाविद्यानि-धानोपहास्यवार्तातिरिक्तवार्ता प्रोच्यतां रुदतीनामस्माकमुपहास-वार्ताया हृदयविदारकत्वादिति भावः—

जैह्म्यं तस्यार्त्तिदत्वं च निर्वेदाद्यत्र कीर्त्तितम् ।
भङ्ग्यान्यसुखदत्वं च स आजल्प उदीरितः ॥

इत्युक्तत्वादयमाजल्पः द्वयपक्षे हे उपमन्त्रिन् ! अन्तरङ्गमन्त्रिन् समाचरमन्वत् श्रुतिपक्षे यतु—

अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवति
अपाम सोमममृता अभूम

इत्यादिभिर्वेदवाक्यैः—

यन्न दुःखेन सम्भिन्नं न च ग्रस्तमनन्तरम् ।
अभिलाषोपनीतं च तत्सुखं स्वः पदास्पदम् ॥

इत्याद्यभिधायकवाक्यैश्च स्वर्गसुखस्यनित्यत्वाभिधानात्सुगमे तत्प्राप्त्यु-पाये सति किमर्थं सर्वत्यागरूपे महत्यायासे नियोजयसीति चेत्तत्राह । वयमिति । कपटेन व्याहृतं हि वाक्यमन्यार्थाभिधायकमन्यथाप्रतीतिं जनयति उदाहृतवाक्यमपि कर्मप्राशस्त्यबोधनाय प्रयुक्तं तत्फल-नित्यत्वबोधकत्वाज्जिह्मेन व्याहृतं तदज्ञाः कर्मश्रद्धाभराकान्ताः यज्जन्य तदनित्यमिति व्याप्तिज्ञानविधुरत्वान्मन्दमतयः क्रतु यथोक्तार्थकमिव श्रद्धानाः नखानीन्द्रियाणि तैः स्पृश्यन्त इति स्पर्शा विषयाः तेषु तीव्रो यः स्मरः कामः स्मरपदस्याभिलाषे लक्षणा तेन स एव वा रुक् येषां ते असकृत् पुनः पुनः एतज्जन्ममरणादि-लक्षणं संसृतिचक्रं ददृशुः कृष्णवध्वो हरिण्यो यथा कुलिक-रुतं श्रद्धानाः दुःखं ददृशुस्तद्वत् तथाचोक्तं भगवता—

यामिमां पुष्पितां वाचं प्रवदन्त्यविपश्चितः ।
कामात्मानः स्वर्गपरा भोगैश्वर्यगतिं प्रति ।
गतागतं कामकामा लभन्ते ॥

इत्यादि यस्मादुदाहृतवाक्यजातं न स्वार्थे प्रमाणं—

तद्यथेह कर्मचितो लोकः क्षीयते एवमेवामुत्र
पुण्यचितो लोकः क्षीयते इति ॥

तर्कानुगृहीतश्रुतिवाक्यैः कर्मफलस्यानित्यत्वाभिधानात् तत्-स्मात्त्वं उपमन्त्रिन् ! प्रपञ्चानित्यत्वब्रह्मनित्यत्वप्रतिपादकान्त-रङ्गमन्त्रार्थं वयमिवान्यम् प्रतिपादयामस्तद्वत् तथा च श्रुतिः—

प्लवा ह्येते अदृढा यज्ञरूपा अष्टादशोक्तमवरं येषु कर्म ।
एतच्छ्रेयो येऽभिनन्दन्ति मूढाः जरामृत्युं ते पुनरेवापियन्ति ॥
यस्मिन् द्यौः पृथिवी चान्तरिक्षमोतं मनः सह प्राणैश्च सर्वैः ।

प्रियसख ! पुनरागाः प्रेयसा प्रेषितः किं वरय किमनुरुन्धे माननीयोऽसि मेऽङ्ग ! ।
नयसि कथमिहास्मान् दुस्त्यजद्वन्द्वपार्श्वं सततमुरसि सौम्य ! श्रीर्वधूः साकमास्ते ॥ २०

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

तमेवैकं जानथ आत्मानमन्या वाचो विमुञ्चथ ।
नानुध्यायेद्बहून् शब्दान् वाचो विग्लापनं हि तत् ॥

इत्याद्या ॥ १९ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अन्यास्तु आस्तां बहुदुःखदस्य कृष्णस्य कथाऽन्यवार्ता कथ्यतामित्याहुः । वयमिति । हे उपमन्त्रिन् ! दूत कृष्णवध्वः कृष्णमृगभार्याः हरिण्यः अज्ञाः कुलिकहार्दानभिज्ञाः कुलिकस्य व्याधकस्य रुतं गीतम् अमृतमिव श्रद्दधानाः शरैः क्षताः सत्यो रुजो ऽऽपुः एवं वयं जिह्मस्य दुर्ज्ञेयहार्दस्य व्याहृतममृतमिव श्रद्दधानाः असकृदेतत् दर्शितम् किन्तत् तस्य नखस्पर्शेन धर्षिताः कामस्तेन रुजः पीडाः तस्माद्दुःखदस्य कथां हित्वा ऽन्यवार्ता भवद्भिः कथ्यताम् ॥ १९ ॥

भाषा टीका ।

जैसे कपटी व्याध के गान के ऊपर श्रद्धा कर के कृष्णसार मृग की वधू हरिणी बंध जाती हैं तैसे हम भी अज्ञानवाली हो कर इन कपटी कृष्ण के वचनों को सुन कर लुभाय गईं परंतु वारंवार उन कृष्ण के नखों के स्पर्शों के देखने से हम को बडी काम की पीडा होती है तिस से हे कृष्णदूत ! तू अब उन की वातों को छोड कर दूसरों की वातों को कर ॥ १९ ॥

श्रीवीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

पराबृत्य गत्वा पुनरागतं प्रत्याह । प्रियसखेति हे प्रियस्य सखे प्रेयसा कृष्णेन पुनः प्रेषितः किमागतोऽसि अङ्ग हे दूत ! मे माननीयः पूज्योऽसि अतो भवान् किमनुरुन्धे प्राप्तुमिच्छतीत्यर्थः तद्वरय वृणीष्व सम्मानितं प्रत्याह । नयसीति । इह स्त्रीः अस्मान् दुस्त्यजं द्वन्द्वं मिथुनीभावो यस्य तस्य पार्श्वं समीपं कथं नयसि नेष्यसि तथा हि हे सौम्य ! श्रीर्नाम वधूः साकं सहैव सततमास्ते तत्राप्युरसि वक्षस्येव ॥ २० ॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

क्षणात् स्वस्थोत्थिता सती मधुपमभ्यागतं दृष्ट्वाह । प्रियेति । उद्धवपक्षे च संभ्रमभरेण जलाद्याहरणार्थं वेगेन गतं तं पुनरागतं दृष्ट्वेति हे प्रियसखेति पुनरागमनात् प्रेयसेति तस्य पुनरागमनेन तत्प्रेषणमननात् तत्कृपाधिक्यमेव दर्शयति । सततमिति । हे सौम्य ! शान्तप्रकृते अतस्तेन सह तत्र सख्यमनुचितमिति भावः । अन्यैस्तव्याख्यातं वक्ता पुरःस्थमपि तं प्रेमोन्मादाकुलमेव संभाव्य ततश्च भावान्तरापत्त्या पुनरागतं च मत्वा सविस्मयमिवाह । प्रियेति । प्रेयसा प्रेषितोऽपि किं किमिति त्वं पुनरागाः मादृशां मानधनानां त्वदागमनाशङ्केः भवतु "यथोक्तवादिनो दूता भवन्ति न कदाचन" इति न्यायेन मे माननीयोऽसि ततः किमनुरुन्धे कमनुरोधमनुसृत्य करोति कं ते कामं पूरयामीत्यर्थः । ननु युष्माकं मधुपुरीगमनमेव वृणोमि तत्राह । नयसीति । सौम्य हे सोमवत् प्रियदर्शन ! अतो रूपमेवास्ते न तु बुद्धिरिति भावः । दुस्त्यजं द्वन्द्वं पुरस्त्रीभिः सह मिथुनीभावो येन तस्य पार्श्वं सदा पुरस्त्रीभिः सह तस्य प्रसङ्गात्तत्रास्माकं गमनं व्यर्थमिति भावः । इतीर्ष्यां मनु युष्मासु प्रयातासु ताः सद्यः परित्याज्याः तत्राह । सततमिति । सा नित्यं तत्प्रियत्वादिना प्रसिद्धा कं सुखं यथा स्यात्तथास्ते उरसीति विपरीतरत्या वक्ष आक्रम्येति श्लेषः इत्यसूया ॥ २० ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

ततो भ्रमरस्वभावतो व्यवधानमपि प्राप्तं वा प्रदेशान्तरमेव गतं वा निजोन्मादमूर्च्छाविशेषस्तस्तत्रैवास्थितमप्यननुसंहितं वा क्षणं तमदृष्ट्वा स्वप्रेमोत्कण्ठास्वभावतस्तदुपेक्षामाशङ्क्य मद्वधूकलहान्तरितावस्थामिव प्राप्नुवन्ती दैवात्तं पुनरागतं वास्तवमेव सा तमेवानुसंहितं वा दृष्ट्वा दृष्टवत्याह द्वयेन तत्र सस्तुतिक्रममाह अर्द्धेन । पूर्वोपकारपरत्वात् प्रियसख!अभिसन्धितमित्रेति प्रेयसेति च परमोल्लासात् किमनुरुन्धे अनुरुन्से कामयसे । पूर्ववत् तिङ्व्यत्ययः । यद्वा । कामये पतमेव कामविषये कर्तुमिच्छामीत्यर्थः । हन्त युष्माकं मधुपुरीगमनमेव वृणोमि तत्र स्वकार्यं सयुक्तिकं सकाकु प्रत्याख्यानमाह अर्द्धेन । दुस्त्यजं द्वन्द्वम् अस्मद्विजातीयनगरनागरीभिर्मिथुनभावो येन तस्य स्वबन्धोः पार्श्वं कथं कथा युक्त्या नयसि । ननु भवद्गमने सर्वास्ताः स्वयमेव न्यक्करिष्यन्ते सत्यं ता वराक्यः काः किन्त्वसमदूर्ध्वतस्तेन सहैव गता सा लक्ष्मीरेव तत्र सम्भवात् तं यश्यतीति तां प्रत्यपि सेर्ष्यमाह । श्रीरिति । सा तस्य वधूः श्रीरानुरागुण्येन कं सुखं यथा स्यात्तथा उरस्यास्ते वसति तदेतच्च लक्ष्मीरेषामेव तत्सुखितत्वोत्प्रेक्षामयम् । गोप्यः किमाचरदयं कुशलं स्म वेणुरितिवत् । श्लेषेण तस्या विपरीतरतिमिच्छया धाष्ट्यातिशयश्च व्यञ्जितः । इति मत्सराभूये । अथ भावः । यद्यप्यत्रापि सा तद्वाणिज्युतैवासीत् तथापि श्रीमन्नन्दव्रजस्वामाव्येन तस्य तदा प्रेममात्रादरान्न तादृशस्तादृशो दृष्टः । तत्र तु सम्पत्तिमात्रपुरुषार्थत्वान्महानेव तदादरः इत्यतो वयं कथं तत्र यास्याम इति तस्मादयेव तमानयेति गूढोऽभिप्रायः । एवमीर्ष्यासूया स्पृहा च ॥ २० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

परावृत्य पुनरागतं प्रत्याह । प्रियसखेति । हे प्रियस्य सखे पुनः प्रेयसा प्रियतमेन श्रीकृष्णेन प्रेषितस्त्वमागाः किमागतोऽसि किं तर्हङ्ग हे भ्रमर मम समाननीयोऽसि पूज्योऽसि अतः कियत्किञ्चिदनुरुन्धे भवान्प्राप्तुमिच्छति तद्वरय वृणीहि इह स्थिता इति शेषः अस्मान् कथं दुस्त्यजं द्वन्द्वं मिथुनीभावो यस्य तस्य भगवतः पार्श्वे समीपं नयसि नेष्यसि तथा हि हे सौम्य ! श्रीर्लक्ष्मीर्नाम वधूः साकं सहैव तत्राप्युरसि इति वक्षस्येव सततमास्ते इति ॥ २० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

आत्मनः कृष्णैकचित्तत्वं दर्शयन्ती ग्रहाविष्टेव वक्तिप्रियेति । हे प्रियसख ! प्रियस्य कृष्णस्य सखे पुनरागाः पश्चाद्व्यावृत्यागतोऽसि पुनरप्रथमे प्रश्ने व्यावृत्तावधारण इति त्वं प्रेयसा कृष्णेन पुनः प्रेषितः असि किमनुरुन्धे कमर्थमस्मत्तः स्वीकर्तुमिच्छति तं वरय प्रेष्ठबन्धुत्वात्त्वमस्माकं माननीयोऽसि आत्मनो नेतुमागत इति भ्रान्तबुद्धिराह । अङ्गेति । अङ्ग भो उद्धव इह स्थितानस्मान् दुस्त्यजं बन्धोः कृष्णस्य पार्श्वे समीपं नयसि किं दौर्घट्यमित्यतः सपत्नीबुद्ध्या न शक्यमित्याह । सततमिति । श्रीनामवधूस्तस्योरसि सततमास्ते सततशब्दः आपेक्षिक इति तत्राह । साकमिति । अधीक्षित्वेन आस्त इति सपत्न्याः लक्ष्म्याः कदापि वियोगाभावात् त्वस्मीनां तद्दर्शनमपि दुर्लभं किम्पुनः सम्भाषणं किन्तरां तच्चर्वितास्वादं कुतस्तमां सुरतलीलानुभवं इत्यास्तामयं प्रसङ्ग इति ॥ २० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

श्रीर्वधूः साकमास्ते इति लक्ष्मीरेखामेवोद्दिश्योत्प्रेक्षितम् ॥ २०—२२ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

एवमुक्त्वा सम्बन्धं विनिवार्य मूर्च्छिता जाता पुनः सात्त्विकराजसभावेनाह । प्रियसखेति । बहव एव दोषा निवृत्ताः सत्त्वप्राधान्याद्गुणकथनाद्वा अतस्त्वां दृष्ट्वा प्रथमपर्यायात् अन्यथाबुद्धिजनकत्वेन प्रकारान्तरेणागमनं सम्भावयति । भ्रमरमपि पुनरागतमिव भगवतो दोषान् श्रुत्वा तत उत्थाय मूर्च्छितायामुद्धवः पुनरागत इति वा इदानीमपि किं प्रेयसैव प्रेषितः तदा आकाङ्क्षाधिक्यादस्मत्कार्यं भविष्यतीति भावः । हेमन्ते तासां साधनोपक्रम इति पुनर्नवस्युक्तौ व्याप्रियत इति नवमश्लोके हेमन्ते प्रथमो मासो भवति । पुनर्द्दण्डकलितवशावृत्तिर्भविष्यतीति मत्वा फलदात्रा भगवता प्रेयसा प्रेषित इति तथेत्यङ्गीकृत्येत्याह । वरयेति । वरं ब्रूहि साधनेनेदं कार्यं सेत्स्यति अयुक्तमपि वरेण सिध्यति सात्त्विकः कालः भक्तानुगुणो वा तदीयप्रमाणान् उररीकृत्य भागवतादिकामिव प्रदर्शयन् पुनरागमनमाह । तत्रापि मन्त्रदेवतावरेणैव तत्कार्यं भवति नान्यथेति ज्ञापयितुं वरयेत्युक्तम् । उद्धवेऽप्याशीर्वादो देयः भ्रमरस्याप्यामोदोपभोगः कारणीय इति किमिह पुनरुन्धे तुभ्यं दास्यामि तत्कथयेत्यर्थः । ननु कोऽयं निर्बन्ध इति चेत्तत्राह । माननीयोऽसीति । अङ्गेति स्नेहसम्बोधनं मित्रत्वात् उपकारं हि कुर्वन् माननीयो भवति । ननु तथास्माभिर्न दीयते तथा त्वयापि न देयमित्याशङ्क्याह । नयसीति । त्वं तु नयनार्थमागतः अयमेवोपकारः परं नयने साधनापरिज्ञानादस्माकं सन्देहोऽस्ति तत्कथयेत्याह । कथमिहास्मानिति । वयं बह्व्यः स्त्रियः गोकुलं च निरोधस्थानं त्वं चैकः किञ्च दुस्त्यजो द्वन्द्वो यस्य भगवान् हि नित्यभार्यः विभज्यैव शक्तिं कृष्णो भगवानवतीर्ण इत्यवोचाम नतु सांप्रतं कापि तिष्ठति चेत्तत्राह । सततमुरसीति । सौम्येति सम्बोधनं साधुत्वाय श्रीरेव वधूः नतूरसि लक्षणमात्रं लोकप्रदर्शनार्थं लक्षणत्वमापन्ना वस्तु साकमास्ते सहैव तिष्ठति सौम्यत्वात् । संमतिर्दर्शने निरूपिता ॥ २० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

अथोन्मादेन तत्रैव भ्रमन्तमपि तं भ्रमरमननुसन्धाय क्षणमन्तर्हितं वा तमपश्यन्ती सखेदं परामसर्श । हन्त हन्त मम तीक्ष्णया गिरा सन्तप्तेनानेन दूतेन मथुरां गतेनावेदितसर्ववृत्तान्तः कृष्णो मामुपेक्षाञ्चक्रे इति कलहान्तरितां दशां प्राप्ता प्रेमाम्बुधिना तद्गुणमौलिना मत्कान्तेन पुनरपि स एव प्रेषितो दूतोऽयमायात्विति तद्वर्त्म निरीक्ष्यमाणा अकस्माच्च विलोक्य सादरमाह । हे प्रियसख ! मत्प्रियस्य सखे पुनरागाः मद्वाक्शरताडितोऽपि स्वसाद्गुण्येन मदपराधमगणयित्वैव आगाः । आं जानामि प्रेयसा मय्यतिप्रेमवता मदपराधकोटीरप्यगणयता तेनैव किं प्रेषितः तर्हि वरय वृणु किम् तुरुन्ध अनुरुन्त्से कामयसे इत्यर्थः । यद्वा । कमनुरोधं ते सम्पादयामीत्यर्थः । तव मथुरागमनमेव वृणोमीति चेद्यामि मथुरामित्युक्त्वापि पुनः परस्त्रीवेष्टितं तं तत्र पश्यन्त्या मेऽवश्यं मानो भवतीति । परामृश्याह । नयसीति । दुस्त्यजं द्वन्द्वं मिथुनीभावो यस्य तस्य पार्श्वे नन्वेकाकी तत्र स वर्त्तत इति शपथं ब्रवीमीति तत्राह । हे सौम्य ! आर्यबुद्धिरसीति भावः । श्रीरेव वधूः साकं सहैव तत्रापि सततं तत्राप्युरसि पुरुषायितत्वेनैवेति भावः । अयमर्थः । श्रियो देवीत्वेन नानारूपधारित्वशक्तेः कृष्णो यदा अन्याः स्त्रीः सम्भुङ्क्ते तदा स्वर्णरेखारूपैव तद्वक्षसि तिष्ठति । यदा तमन्याः स्त्रियो नायान्ति तदा रेखारूपतां हित्वा प्रकटमेव युवतिर्भूत्वा तं रमयतीति । अत्र दूतं सम्मान्यापि तदुक्तिमङ्गीकृत्याप्यनौचित्यं ज्ञापयन्ती नाङ्गीकुरुते इत्ययं प्रतिजल्पः । यदुक्तम्—

> दुस्त्यजद्वन्द्वभावेऽस्मिन् प्राप्तिर्नार्हेत्यनुद्धतम् ।
> दूतसंमाननेनोक्तं यत्र स प्रतिजल्पकः ॥ २० ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

एवं हस्तक्षेपादन्यत्र गतं तत्रैव भ्रमन्तं वा विह्वलत्वादपश्यन्ती अहो असौ मदुक्तं स्वस्वामिन आवेदयितुं मथुरायां गतः भवतु द्रष्टव्यं मत्प्रियस्तन्निवेदितान्मदुक्तोपालम्भानाकर्ण्य मामुपेक्षते किं वा मदनुनयार्थमन्यं तमेव वा प्रेषयति स्वयमेव वा ससम्भ्रममायातीत्यादि मनसि भावयन्ती तदागमनपथि दत्तदृष्टिः पुनरपि सौरभलोभात् स्वसन्निधावागच्छन्तमवलोक्य

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

क्षान्त्यादिगुणगणाकरेण प्रेमभराक्रान्तस्वान्तेन मत्कान्तेन प्रेषितः स एव पुनरागत इति मत्वा विकसितवदनारविन्दा सादरमाह । प्रियसखेति । हे मत्प्रियस्य श्रीकृष्णस्य सखे अन्यथा मां प्रति त्वामेव पुनः पुनः किमिति प्रेषयेदिति भावः । प्रेयसा प्रेषितस्त्वं किं पुनरागतोऽसि मत्प्रेमातिरेकदृष्टिमेदपराधानगणयित्वा मत्प्रेयांस्त्वां पुनः प्रेषितवान् किं वा मया तिरस्कृतत्वादितो गतः स्वसौजन्येन मदपराधमुपेक्ष्य सन्देशान् गृहीत्वा गन्तव्यमिति विचार्य मार्गमध्यात्परावृत्य स्वयमेवागतोऽसीति किंशब्दार्थः उभयथापि मानार्हस्त्वामित्याह । वरयेति । अङ्ग हे प्रियदूत ! भवान् किमवरुन्धे प्राप्तुमिच्छति यदिच्छसि तदेव वरय वृणीष्व त्वन्मनसेप्सितं वरस्त्वहं दातुमिच्छामि यतः संमाननीयः पूज्योऽसि तत्सन्निधौ त्वमेव मुख्यः इतः पूजामप्राप्य प्रत्युत तिरस्कारमवाप्यापि तत्र गतस्त्वं न मदुक्तोपालम्भानुक्तवान् किन्तु मत्प्रेमातिरेकमेवाबोधितवानतः सज्जनशिरोमणिश्चेति पुनस्त्वदागमनेन मयावगतमतो यथेष्टत्वत्पूजां कर्तुं मम स्पृहा महती वर्तत इति भावः । यदीप्सितं वरं दातुं प्रवृत्तासि तर्हि प्रेयसा सार्द्धं त्वत्समागममेवाहं प्रार्थये स्वामिकार्यमेवेप्सितं तात्स्विध्यनन्तरमनुग्रहेण यद्दास्यसि तद्ग्रहीष्यामीति चेत्तत्राह । नयसीति । अहो मां तत्र नीत्वा मथुरायां तेन सार्धं संयोजयितुमिच्छासि परं भयादेवं न ब्रवीमि भगवत्या सर्वज्ञया मदभिप्रायानुरोधेनेदमुक्तमतः अवश्यं तत्र चलनीयमिति चेत्तत्राह । कथमिति । अस्मान्नेतुमेव त्वमागतश्चेत्तदुपकरणं शिविकादिकं किमर्थं नानीतवानसि तद्विना च कथमस्मान्नयसीति भावः । किं चेह गोकुले सत्यः तथाच निरोधस्थाने स्थिता वयं तत्रापि बहवस्त्वञ्चैकोऽतोऽस्मान्नेतुमशक्तोऽसीति भावः ननु यद्यप्यहं भवतीर्नेतुमशक्तस्तथापि भवत्यो गन्तुं शक्ता इति चेत् सत्यं तथापि पुरस्त्रीवेष्टितं द्रष्टुं न शक्ता इत्याशयेनाह । दुस्त्यजेति । दुस्त्यजं द्वन्द्वं तत्रत्यस्त्रीभिर्मिथुनीभावो येन तस्य त्वत्स्वामिनः पार्श्वे ननु त्वां प्रतीक्षन् एकाकी स वर्तते सशपथं ब्रवीमीति चेत्सन्तु ता नास्ति ताभ्यो मम भयं मदागमने ता वराक्यः स्वत एव धिक्कृता स्युस्तथापि तेन सार्धमित एव गता श्रीस्तं रमयतीति सेर्ष्यमाह । सततमिति । श्रीरेव वधूः साकं सदैव तत्रापि सततं तत्राप्युरसि श्रियो नानारूपग्रहणसामर्थ्यात्कृष्णो यदा अन्याभिः स्त्रीभिः क्रीडते पुरुषेषु च तिष्ठति तदा रेखारूपेण सा तदुरसि तिष्ठति यदा रहसि स वर्तते तदा प्रकटमेव वधूर्भूत्वा तं रमयतीतिति तत्साहित्यं सर्वदा तस्य वर्ततेऽतोऽस्मद्गमनं तत्र नोचितमिति भावः । यद्वा याऽस्मद्भयाद्रेखारूपेण तिरोहिता आसीत् सा श्रीरिदानीं निर्भयस्थाने स्थितत्वात्कं सुखं यथा स्यात्तथा च वधूर्भूत्वा सततमुरसि आस्ते इदानीं प्राप्ताधिकारायास्तस्या अस्माकं भयमतस्तत्सार्धमस्मत्समागमं कर्तुमिच्छसि चेत्तमेवात्रानयेतिभावः । यद्वा प्रेयसा त्वत्समागममहमिच्छामीति चेत् किमस्मांस्तत्र प्रापयसि किं वा तमत्रेति विकल्प्य नाद्यः अस्माकं मानिनीनां तत्र गमनायोगादित्याद्यपेक्षायोगमभिप्रेत्य द्वितीयं प्रतिक्षिपति । नयसीति । इह इत्युक्तेः अस्मिन्व्रजे अस्मान्प्रति दुस्त्यजद्वन्द्वपार्श्वं कथम्प्रापयसि दुस्त्यजं द्वन्द्वपार्श्वे यस्य तं द्वन्द्वसम्बन्धस्य दुस्त्यजत्वात्तत्साहित्येनास्मान्प्रत्यागमनस्य च दुर्घटत्वात्कथमित्यर्थः । ननु भवत्यर्थे सर्वमपि तस्य सुत्यजमिति चेत्तत्राह । सततमिति । हे सौम्य ! साधो त्वं पक्षपातं विहायैतत्सर्वं ज्ञातुं योग्योऽसीति सम्बोधनाशयः "दुस्त्यजद्वन्द्वभावस्य प्राप्तिर्नो-हेत्यनुद्धृतम् । दूतसम्मानेनोक्तं यत्र स प्रति जल्पक" इत्युक्तत्वादत्र प्रतिजल्पः उद्धवपक्षे भगवतो दोषान् श्रुत्वा तत उत्थाय गतः गते च तस्मिन्मूर्च्छितायां तस्यां पुनरागतः निवृत्तमूर्च्छा पुनरागतं तमवलोक्याह । प्रियेति । यद्वा स्वाम्युपालम्भानाकर्ण्य खिन्नचित्तं तमालक्ष्याश्वासयति । हे प्रियसखेति । प्रियसन्निधावितोऽप्याधिकं वयं वक्तुं शक्ताः सोऽपि तच्छ्रुत्वा प्रत्युत्तरं दातुं मनासि खेदं वा दातुं न समर्थस्तस्य सखा त्वं किमिति खिन्नोऽसीति संबोधनाशयः वयं तथोपरि प्रसन्ना यतस्त्वमस्मान् प्रत्येवागतः पूर्वमिदमबुद्ध्वैवैव मुक्तमित्याह । पुनरिति । पित्रोः प्रियचिकीर्षया प्रेषितो नागतोऽसि किं पुनः किन्तु अस्मत्प्रियचिकीर्षया प्रियेण प्रेषितः आगतोऽसि तथात्वे सति वरयेत्यादिपूर्ववत् श्रुतिपक्षे यद्वैमुख्येन कृतकर्मणां फलभोगाय संसृतिचक्रे प्रवेशितोऽसि सर्वभावेन तदाश्रयणेनैव तव मोक्षो नान्यथेत्याह । हे प्रियसख प्रेयसा परमेश्वरेण प्रेषितः प्रेरितः किमपि अनिर्वचनीयं संसृतिचक्रमागतः आसमन्तात्प्राप्तवानसि तमेव वरय शरणत्वेनाश्रय किमवरुन्धे संसारपाताय तदतिरिक्तं भवान् किमभिलषितवान् "तम्ह्येष एव साधु कर्म कारयति यमेभ्यो लोकेभ्य ऊन्निनीषति तमुह्येष एवासाधु कर्म कारयति यमेभ्यो लोकेभ्यः अधो निनीषति तं ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये अज्ञो जन्तुरनीशोऽयमात्मनः सुखदुःखयोः । ईश्वरप्रेरितो गच्छेत्स्वर्गं वा श्वभ्रमेव वा ॥ ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति । भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायया । तमेव शरणं गच्छ सर्वभावेन भारत तत्प्रसादात्परां शान्तिं स्थानं प्राप्स्यसि शाश्वतम्" इत्यादिश्रुतिस्मृतिभ्यः एवं चेदनन्यभावेन भगवदाराधने त्वं प्रवृत्तस्तदा मम हे सौम्य ! माननीयः अधिकारिसम्पत्सम्पत्त्या मदर्थविचारतत्फलप्राप्तियोग्यः अन्यथा तु नास्ति मोक्षो नापि भोग इत्याह । कथमिति । तत्त्वज्ञानान्तरङ्गसाधनभगवद्वाक्किल्भ्यभगवत्प्रसादाभावे इह स्वस्वरूपभूतपरमात्मनि समन्विता अस्मान्प्रति दुस्त्यजद्वन्द्वपार्श्वं मनः कथं नयसि द्वन्द्वं रहस्ये कलहे पार्श्वोन्तिके कक्षाद्यवयवे च पापे पशुगणेऽपि चेतिकोशात् दुस्त्यजद्वन्द्वपार्श्वं कलहपापे येन तत् दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिरित्यादिषु स्वस्यैकाग्रमनसो ब्रह्मसाक्षात्कारकरणत्वाभिधानात् निष्कामकर्मभगवद्ध्यानविनिर्मुक्तं कलहादिदोषाविलं यन्मनस्तेन क्रियमाणो वेदान्तविचारो न फलाय कल्पत इति भावः । तथा श्रीर्वधूः साकं सहैव तत्रापि सततमुरस्येवास्ते यद्वा या सर्वैर्भोगार्थिभिरभिलष्यते सा श्रीरपि वधूः कं सुखं यथा स्यात्तथा तस्य भगवतः उरस्येव सततमास्ते तथा च भगवदनुग्रहं विना कथं तत्प्रसादस्तमृते च कथं भोगस्तस्माद्भोगमोक्षार्थिभिर्भगवान् वासुदेव एव सर्वभावेनानुक्षणमाराधनीय इति भावः ॥ २० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

काचित्पुनरागतं प्रत्याह । प्रियसखेति । हे प्रियसख ! मधुकर प्रेयसा अतिप्रियेण श्रीकृष्णेन पुनः प्रेषितः त्वमागतः आगतोऽसि किम् तर्हि हे अङ्ग दूत ! त्वं मे माननीयोऽसि भवान्

अपि वत मधुपुर्यामार्यपुत्रोऽधुनाऽऽस्ते स्मरति स पितृगेहान् सौम्य ! बन्धूंश्च गोपान् ।
क्वचिदपि स कथा नः किङ्करीणां गृणीते भुजमगुरुसुगन्धं मूर्ध्न्यधास्यत्कदा नु ॥ २१ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

किमनुरुन्धे प्राप्तुमिच्छति तद्वरय वृणीष्व मां नेतुं पुनः प्रेषित इतिचेत् तर्हि इह सतीः अस्मान् दुस्त्यजं दुर्निवारं द्वन्द्वमन्यसाहित्यं यस्य तस्य श्रीकृष्णस्य पार्श्वे वामाङ्के कथं नयसि नेष्यसि अन्यसाहित्यं दर्शयति । हे सौम्य मधुकर ! श्रीवधूः श्यामाख्यवधूः सार्कं सहैवोरसि नित्याचिन्त्यापरिमितश्रीमन्मङ्गलविग्रहैकदेशे वक्षसि सततं निरन्तरं कालत्रयेऽपि आस्ते अनेनापि श्रीविग्रहस्य नित्यता द्योत्यते ॥ २० ॥

भाषा टीका ।

हे प्रिय के सखा ! क्या फिर आया है क्या तेरे को प्यारे ने भेजा है अब तू मांग ले मैं तेरे को क्या देऊं हे प्रिय ! तू मेरा मान्य है जिनके संग को पुर स्त्री छोडा नहीं चाहती हैं उस कृष्ण के पास हम को तू कैसे ले आयगा हे सौम्य वे तो सब वखत लक्ष्मी वधू को हृदय मे रख कर साथ ही मे रहते हैं ॥ २० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तेन समन्त्रिता सती ब्रूते । अपिवतेति । वत हर्षे हे सौम्य ! गुरुकुलादागत्यार्यपुत्रः कृष्णोऽधुना किं मधुपुर्यां वर्तते कदाचिदपि नोऽस्माकं वार्ताः किं ब्रूते अगरुवत्सुगन्धं भुजं नो मूर्ध्नि कदा नु धास्यतीति ॥ २१ ॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

एवं निजप्राणनाथे सर्वसद्गुणमये विरहार्त्तिभरजनितक्रोधोद्रेकेण कठिनतरोक्तया विशेषतः प्रेमवेगोदयेन परमार्ता सती सार्जवमिव सगाम्भीर्य्यं सदैन्यं सचापलं सोत्कण्ठमुच्चैर्वदती पृच्छति । अपीति प्रश्ने अस्य वाक्यत्रयेणैवान्वयः वत भो दूत यद्वा सुखमित्यर्थः । आर्यस्य श्रीगोपेन्द्रस्य पुत्रः अस्मत्स्वामीति वा प्राग्रयं प्रश्नः मधुपुर्य्यामवस्थित्या नैकट्येन व्रजागमनसंभवात् ननु देवि तत्रासौ सुखमास्त एवेति चेत्तर्हि अत्रत्यान् किं स्मरतीत्यन्यत् पृच्छति एवमग्रेऽपि व्याख्येयं पूर्वपूर्वाभिमतवृत्त्योत्तरोत्तरप्रश्नो ज्ञेयः स मधुपुरनिवासी व्रजजनैकजीवातुर्वार्य्यपुत्रः पितुः श्रीव्रजेन्द्रस्य गेहान् गेहानि इति जन्मभूमित्वादिना स्मरणयोग्यतोक्ता बहुत्वं व्रजस्यैतस्ततो गमनेन पुत्रसुखार्थं स्थाने स्थाने विचित्रगृहनिर्माणात् यद्वा नित्यनिवासभूतस्थाने श्रीनन्दीश्वराख्य एव दिव्यमहाप्रासादबाहुल्यात् किं वा निकुञ्जाद्यपेक्षया एवं पित्रोः स्मरणप्रश्नोऽप्यायात एव यद्वा पितरौ गृहांश्च निजान् स्मरति तेषामेव तद्गृहत्वाद्विशेषणाप्रयोगः तत्स्मरणेनापि तत्सम्बन्धेन निजस्मरणसम्भावनया किं वा स्वतस्तेषु स्नेहेनैव तत्स्मरणप्रश्नः हे सौम्य ! सोमवंशोद्भव महाकुलप्रसूतत्वाद्वञ्चना न कार्य्येति भावः । बन्धून् ज्ञातीन् उपनन्दादीन् गोपांश्च श्रीदामादीन् यद्वा गोपानामेव विशेषणं बन्धून् सखीनिति अयं स्मरणे हेतुः कच्चित् कस्मिंश्चित् प्रसङ्गे स्थानेऽवसरे वा सः श्रीदामप्रियसखोऽस्मत्प्राणनाथो वा गृणीते स्वमुखेनोच्चारयेदपि तत्र योग्यतामाह । किङ्करीणामिति । बहुधा कृतसेवानां किं वा स्वयमेव दासीभूतानामित्यर्थः । कथा इति बहुत्वं किङ्करीणां बहुत्वात् किं वा प्रत्येकं कथाया वैचित्र्या स्वत एव बाहुल्यात् अगुरुसुगन्धमिति ध्यानविशेषेण साक्षात्सौरभ्यमनुभवन्तीव भावविशेषं द्योतयति मूर्ध्नि धास्यतीति स्पर्शविशेषापेक्षया यद्वा तन्मात्रेणापि कृतार्थतामननात् तत्र च मूर्ध्नीति सर्वाङ्गश्रेष्ठे धारणेन सर्वाङ्गेष्वेव धारणासिद्धेः किं वा परमदैन्येन तस्मिन् धारणस्यापि बहुमानात् यद्वा रासाभिप्रायेण कण्ठ इति वक्तव्ये लज्जादिना मूर्ध्नीति धारणे हेतुः किङ्करीणामित्येव तु प्रश्ने पूर्वमपीत्युक्तेऽपि पुनर्नुशब्दोत्यन्तार्तिप्रश्नात् यद्वा किन्वित्यादिवत् कदाचिदित्येकमेव पदम् एवं प्रश्नानां चतुर्णामेषां यथोत्तरं लालसाधिक्येन श्रेष्ठ्यमूह्यम् अन्यत्तैर्व्याख्यातं यद्वा वत खेदे अधुनाप्यास्ते किम् एतावन्तं बहुकालं तत्र स्थातुं नार्हतीति भावः । वत आर्य्यपुत्रः सौम्याश्च ते बन्धवश्च तान् इति सुप्रकृतित्वादिना स्मरणयोग्यतोक्ता मूर्ध्नीत्येकत्वं लालसाविशेषेण दैन्यभरेणैव वा केवलमात्मापेक्षया मे इति साक्षादनुक्तिः धाष्ट्र्यपरिहारार्थं वैदग्धीविशेषेण वा प्रेमभरस्वभावेनैव वेति दिक् ॥ २१ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

अहो किं किं मया प्रलपितं प्रष्टव्यं तु न पृष्टमिति पर्य्यवसाने सार्जवं सगाम्भीर्यं सदैन्यं सचापलं सोत्कण्ठं सगद्गदवाष्पधारं पृच्छति । अपीति । अपि प्रश्ने अस्य चरणत्रयमयवाक्यत्रयेणाप्यन्वयः वत भो दूत ! आर्य्यपुत्र इति रूढ्या वृत्त्या आर्यस्य श्रीगोपेन्द्रस्य पुत्र इति तच्छब्देन स एवास्माकं वास्तवः पतिः अन्यस्तु लोकप्रतीतिमात्रमयः बाल्यारभ्यान्यत्रास्मदीयभावाभावादिति व्यञ्जितं तदुक्तम् इति गोप्यो हि गोविन्दे इत्यादिना इत्यार्जवं तत्र मधुपुर्यामास्त इति प्राग्रयं प्रश्नश्चिरात्संदेशस्याप्यनागमनात् ननु केवलतयातिदूरगुरुकुलगमनश्रवणात् तच्छ्रवणे सति व्यग्रतया प्रथमं तदेव पृच्छ्येत ननु मानभङ्गी प्रसङ्गं लभेत यस्मादेव व्रजनरदेवेनापि तत्र पृष्टं तदश्रवणं च प्रथमं लब्धगायत्रीपुरश्चरणार्थं गुप्तवासव्याजेन तत्प्रख्यानात् स च व्याजः शत्रुभिरतिक्रान्तिभयात् व्रजस्थानामेषां महादुःखस्य च शङ्कितत्वादिति ज्ञेयं तदेवमन्यत्र गमनाज्ञानेऽपि सोऽयं प्रश्नस्तूपालम्भकं गाम्भीर्यं व्यनक्तीति गाम्भीर्यं ननु देवि तत्रासौ सुखमास्त एवेति चेत्तर्हि अत्रत्यान् पित्रादीन् किं स्मरतीत्यन्यत् पृच्छति स्मरतीत्यादि एवमग्रेऽपि व्याख्येयं पूर्व-

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी।

पूर्वस्मिन्नतृप्त्योत्तरोत्तरः प्रश्नो ज्ञेयः तत्र पित्रादिस्मरणगर्भितं तद्गृहस्मरणं पृच्छति। स मधुपुरीनिवासी रोचमानतत्पुरनिवासो वा तत्र विलम्बमानो वा व्रजजनैकजीवातुर्वा आर्यपुत्रः पितुर्व्रजेन्द्रस्य गेहान् इति जन्मभूमित्वादिना स्मरणयोग्यतोक्ता बहुत्वं व्रजस्यैतस्ततो गमनेन पुत्रसुखार्थं स्थाने स्थाने विचित्रगृहनिर्माणात् श्रीनन्दीश्वराख्ये शैले एव दिव्यप्रासादबाहुल्याद्वा गेहशब्देन तत्स्थपितृमातृतल्लालनं तत्र स्वकीयबाल्यलीलादिकमुपलक्ष्यते बन्धून् ज्ञातीनुपनन्दादीन् गोपांश्च श्रीदामादीन् कच्चित्कस्मिंश्चित् स्थाने ऽवसरे वा स श्रीदामप्रियसखोऽस्मत्प्रियनाथो वा गृणीते स्वमुखेनोच्चारयेदपि तत्र योग्यतामाह। किङ्करीणामिति। बहुधा कृतसेवानामिति दैन्यं बहुत्वं किंकरीणां बहुत्वात् विविधसुबहुवृत्तान्तगर्भवाक्यप्रबन्धरूपाः इति प्रत्येकं कथाः वैचित्र्या स्वत एव बाहुल्याच्च कथामिति पाठे एकामपि अगुरुसकाशादपि सुष्ठु गन्धो यस्य तादृशं भुजामिति ध्यानविशेषेण साक्षात् सौरभमनुभवन्तीवोत्कण्ठावशं द्योतयति मूर्ध्निधास्यतीति दैन्यात् किङ्करीत्वमेव सर्वविघ्ननिवारणपूर्वकं स्थापयिष्यतीत्यर्थः। इति चापलं कदेति तत्रानिश्चयेन परमवैकल्यं सूचयति तत्रापि वितर्के नुशब्दो विचारतो ऽप्यनिश्चयं सूचयतीति परमोत्कण्ठापरकाष्ठा दर्शिता पूर्वमार्य्यपुत्र इत्युक्ता तस्य तद्भूत्ये स्थापयित्वा सम्प्रति किंकरीत्वस्थापनप्रार्थना दैन्यादेव तात्पर्यं तु तद्भूत्य एव यथा नन्दगोपसुतं देवि पतिं मे कुरुते नम इति सङ्कल्प्यापि श्यामसुन्दर ते दास्य इति कुमारीभिरुक्तं तद्वत् तस्याह गृहमार्जनीत्यादि श्रीकालिन्द्यादिवचनवच्च अन्यैस्तैः यद्वा वत खेदे अधुनापि मधुपुर्यामेवास्ते किमेतावन्तं कालं तत्र स्थातुं नार्हति किन्तु शीघ्रमागन्तुमर्हतीति भावः। यतः आर्यपुत्रः सौम्याश्च ते बन्धवश्च तान् इति सुप्रकृतित्वादिना स्मरणयोग्यतोक्ता॥ २१॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

अपि वतेति हर्षे हे सौम्य! आर्यपुत्रः श्रीकृष्णोऽधुना मधुपुर्यामास्ते किम्पितृभ्यां गेहैश्च सहितान् बन्धून् गोपान् स्मरति च किं कच्चिदपि कदाचिदपि किङ्करीणां नोऽस्माकं कथां वार्तां गृणीते किं कदा नु कदा वा अगरुवत्सुगन्धं भुजं नो मूर्ध्नि अधास्यन्निधास्यति॥ २१॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

इदं चोन्मत्तप्रलपितसममित्याह। अपीति। अधुना आर्यस्य पूज्यस्य वसुदेवस्य पुत्रः श्रीकृष्णः मधुपुर्यां वत लोकस्य मनः सन्तोषं विधाय आस्ते अपि किं किञ्च स कृष्णः पितुर्नन्दस्य गेहम्भार्यां यशोदां नश्च पितरं स्मरत्यपि किञ्च बन्धुभूतान् गोपांश्च स्मरति अपि च स कृष्णः कच्चित्कञ्चनकालसाद्यायं किङ्करीणां नोऽस्माकं गृहीतोऽपि अनुग्रहं करोति किम्वद कोऽयमनुग्रह इति तत्राह। भुजमिति। कदा नु अगुरुवत्सुगन्धं भुजमस्ममूर्ध्नि अधास्यत् धारयिष्यति तदापि वक्तव्यमित्यर्थः। यद्वागमिष्यत्यद्यधास्यत्व सन्देहः तवागमनं कदान्विति पृच्छामीति वा॥ २१—२२॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी।

मुखेन नेष्यामीति स्वीकृतवन्तमिवाह। अपि वतेति। अपीति सम्भावनायां वतेति हर्षे भगवान् उपनीतो विद्यार्थं गत इति श्रुतं ततः समागत्य मधुपुर्यां पुष्टिपुर्यामार्यस्य नन्दस्य वसुदेवस्य वा पुत्रः भर्तृत्वेन नामाग्रहणं सत्कुले प्रादुर्भूतः नास्मांस्त्यक्ष्यतीति भावः। अधुना किमास्ते अथवा नीत्वा यावदागमनं स्थापयिष्यतीति सन्देहात्प्रश्नः विद्यमानोऽप्यन्याभिनिविष्टश्चेत् न कार्यं सेत्स्यतीत्यभिप्रायेणाह। स्मरति स पितृगेहानिति। तदा गोकुलस्मरणादस्मत्परत्वं बहुवचनेन स्वच्छन्दरमणमपि सूचितम्। एवं वचनं पुरुषान्तरम् अयुक्तमित्याशङ्क्याह। सौम्येति। सम्बोधनं व्याजेन पृष्ट्वा विशेषतोऽपि पृच्छन्ती आह बन्धूंश्च गोपानिति। नन्दगोत्रिणो बान्धवाः अन्ये च गोपाः चकाराद्गोकुलस्थाः सर्वे तदाभिनिवेशो ज्ञायत इति एवं पृष्ट्वा पुनः स्थातुमशक्ता स्ववार्तामपि पृच्छति। कच्चिदपीति। रसभावकथायां लौकिककथायां वा पूर्वस्वामी नोऽस्माकं सर्वोत्तां कथामपि स्मरणे हेतुः किङ्करीणामिति। नन्वन्तः करणवार्ता कथं ज्ञायत इत्याह। गृणीते कच्चिदिति। तथोत्तरं दत्तमिति ज्ञात्वा पूर्वमपि परमसन्तापानन्तरं प्रादुर्भूतमिव कथं द्रक्ष्यामीति मनोरथाभिलाषमाह। भुजमगरुसुगन्धमिति॥ कदा वा अगरुसुगन्धं भुजम् अगर्वपेक्षया वा अगरुणा वा कदा वा पुनः मूर्ध्नि अधास्यद्धास्यति॥ २१॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

हन्त हन्त मयोन्मत्तया किं प्रलप्यते प्रष्टव्यं तु न पृच्छ्यते इत्यनुतप्य ससंभ्रममाह। अपि वतेति॥ मधुपुर्यामास्ते व्रजमिव तामपि त्यक्त्वा अन्यत्र किं स्विन्न यियासतीति भावः। इतः समीपवर्तिन्यां तत्र पुर्यां तस्य स्थितिरत्रागमनसंभावनामप्युत्पादयतीत्यभिप्रायेण यद्वा सुखमास्ते इत्यनुकेरस्मत्प्रणयस्मरणव्याकुलोऽनुरोधवसादेव तत्रास्ते यत आर्यस्य यदुभिर्दुर्विनीतैः प्रतार्यमाणत्वात् सारल्यसमुद्रस्य श्रीव्रजराजस्य तदेकप्राणस्य पुत्रः हन्त हन्त मत्पितापि मां व्रजं नेतुं नाशकत्सदहं तत्र गन्तुं कमुपायं करोमीति स्वविलम्बमसहमानस्त्वां प्रस्थापयति इमेति भावः। तेन मधुपुर्यामास्ते इति तस्य को दोषः यत आर्यस्यातिसरलस्य स्वपरिणामदर्शित्वेनापि शून्यस्य नन्दस्य पुत्रः तादृशं पुत्रं तादृशः पिता यदुपुर्यां त्यक्त्वा व्रजमायास्यतीति को जानाति यद्यज्ञास्यत् व्रजपक्षी सा तावदक्रूररथारूढैव स्वपत्रं कण्ठे कुर्वत्येव मथुरामयास्यत् तामनु गोपिकाश्रेण्यश्चेति व्रजराजस्यार्य्यत्वमेवास्माकं सर्वनाशे कारणमभूदिति भावः। अतस्तादृशस्यापि पितुरतिसरलस्य वसुदेवेन महाप्रतारकेणाच्छिद्य गृहीतपुत्रस्य व्रजमागत्य मूर्छया पतित्वा स्थितस्य गेहान् कोशागाररत्नागारशयनागारादीन् संप्रत्यमार्जितालिप्तत्वेन तृणधूलिपत्रलूतातन्तुवृतान् शून्यायितान् स्मरति कच्चित् तथा गेहान्तरेषु बन्धून् सुबलादीन् संप्रति

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

मूर्च्छितान् क्वचिदपीति यद्वा तस्य मनोऽभिरुचितं कैङ्कर्यं कर्तुं पुरस्त्रियो न जानन्ति तदेव तत्सुखमनुपलब्धवतीभिस्ताभिः सुखानुपलम्भकारणं पृष्टो नोऽस्माकं कथां गृणीते वनमालागुम्फने स्थासकसंपादने वीटिकानिर्माणे वीणावादने रागतालादिसृष्टौ गीतनृत्यरासादौ सौन्दर्य्यलावण्यवैदग्ध्यादिषु प्रश्नोत्तरविलासे संप्रयोगलीलायां प्रेमस्नेहमानप्रणयादिषु यथास्मद्व्रजस्था गोप्यो मां सुखयन्ति न तथा यूयमिति गच्छत भो यदुस्त्रियः स्वस्वपतीनेवालमलं युष्माभिः अहं तु श्वः प्रातर्व्रजमेव गच्छन्नस्मीत्युक्त्वा अत्रागत्य अगरुसुगन्धभुजमस्माकं मूर्ध्नि कदाधास्यत् धास्यति तेन च समाश्वासितः भोः प्राणप्रेयस्यः सशपथमिदमहं ब्रवीमि भवतीस्त्यक्त्वा न क्वापि यास्यामि त्रिभुवनमध्ये क्वापि युष्मत्सादृश्यगन्धलेशमपि नोपलब्धवानस्मीति वक्षयिष्यति अत्र प्रथमे पादे आर्जवं द्वितीये स्वप्रसङ्गानुत्थापनेन गाम्भीर्यं तृतीयचतुर्थयोर्दैन्यचापलोत्कण्ठा इत्ययं संजल्पः यदुक्तम् "यत्रार्जवात् सगाम्भीर्यं सदैन्यं सहचापलम्। सोत्कण्ठं च हरिः पृष्टः स सुजल्पो निगद्यते" इत्येवं दशविधो दिव्योन्मादप्रभेदश्चित्रजल्पो, अयं स च दिव्योन्मादो महाभावोत्कृष्टभागस्य मोहनस्य विलासविशेषो वृन्दावनेश्वर्यां वर्णितः—

प्रायो वृन्दावनेश्वर्यां मोहनोऽयमुदञ्चति।
एतस्य मोहनाख्यस्य गतिं कामप्युपेयुषः॥
भ्रमाभा कापि वैचित्री दिव्योन्माद इतीर्य्यते।
उद्घूर्णा चित्रजल्पाद्यास्तद्भेदा बहवो मताः॥
प्रेष्ठस्य सुहृदालोके गूढरोषाभिजृम्भितः।
भूरिभावमयो जल्पो यस्तीव्रोत्कण्ठितान्तिमः॥
चित्रजल्पो दशाङ्गोऽयं प्रजल्पः परिजल्पितः।
विजल्पोज्जल्पसंजल्पाः अवजल्पोऽभिजल्पितम्॥
आजल्पः प्रतिजल्पश्च सुजल्पश्चेति कीर्तितः॥ इति

प्रेयस्याश्चित्रजल्पमाधुरीपिपासया कृष्ण एव भ्रमररूपमधादिति केचित्॥ २१॥ २२॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका।

ननु युष्मांस्तत्र नेष्यामीत्यङ्गीकृतवन्तमिव मत्वाहापीति। सम्भावनायामपि बतेति हर्षे उपनीतो भगवान् विद्याध्ययनार्थं गत इति श्रुतं तत आगत्याधुना आर्यस्य नन्दस्य वसुदेवस्य वा पुत्रो मधुपुर्य्यामास्ते भर्तृत्वेन नामाग्रहणम् अस्मद्गमनपर्यन्तं तत्र स्थास्यति न वेति संदेहाद्वा प्रश्नः विद्यमानोऽप्यन्याभिनिविष्टश्चेन्नास्मत्सुखावह इति तस्मिन्नाभिनिवेशजिज्ञासार्थं पृच्छति। स्मरतीति। यद्वा अहो कामाक्रान्तभ्रान्तत्वादुन्मत्तया मया वृथैवैतत्प्रलपितं प्रष्टव्यं तु न पृष्टमिति पश्चात्तापेन सरलहृदया सती ससम्भ्रमं पृच्छति। अपि बतेति। बतेत्याश्चर्ये आर्यपुत्रोऽधुना मधुपुर्य्यामास्ते किम् अहो अस्माभिर्ज्ञातं सतोऽप्यन्यत्र गतः नो चेन्निकटस्थाने वसन् किमिति स्वयं नागच्छेत्संदेशहरं कञ्चिदेतावत्कालपर्यन्तं न प्रेषयेत्तथा चास्मदृष्ट्या तत्र नास्त्येवेति व्यङ्ग्यं यद्वा आर्यस्य वसुदेवस्य पुत्रः सन्नधुना मधुपुर्य्यामेवास्ते किं वा नन्दराजपुत्रत्वं परित्यज्य वसुदेवपुत्रः सन् यथेतो मथुरायां गतस्तथा तत्पुत्रत्वमप्यपहायान्यपुत्रः सन् ततोऽप्यन्यत्र गत इति व्यङ्ग्यं यद्वा तत्र तस्य स्थितौ निकटवर्त्तित्वात्तदागमनस्यापि सम्भावना वर्तत इति कृत्वैवं पृच्छामीति भावः। यद्वा सुखमास्त इति वक्तव्ये तत्स्थितिमात्रं पृच्छन्त्या अयमाशयः अस्मत्प्रेमातिरेकस्मरणव्याकुलमानसोऽसौ तत्रत्यानुरोधेनैव तत्रास्ते न सुखपूर्वकमित्यहं जानामि यत आर्यस्यातिसरलस्य वसुदेवादिकृतं प्रतारणमजानतस्तदेकप्राणस्य पुत्रः अहो मत्पितापि व्रजं प्रति मां नेतुं नाशकत् उपायान्तरं च नास्त्यतः किं कर्तव्यमित्युत्कण्ठया व्याकुलमना यथाकथञ्चिच्चित्तसमाधानाय त्वां प्रेषितवान् अहो प्राणप्रियपुत्रपरित्यागपरिणामाज्ञानरूपसरलता श्रीनन्दरायस्य न ज्ञाता नोचेत्तन्माता स्वपुत्रं कण्ठे कुर्वन्त्येव मथुरामयास्यत् तामनुगोपिकाश्रेण्यश्चेति व्रजराजार्यत्वमेवास्माकमनर्थकरं जातमिति अतः पितृगेहान् स्मरति पितुरतिसरलस्य वसुदेवेन महाप्रतारकेणाच्छिद्य गृहीतपुत्रस्य व्रजमागत्य मूर्च्छया निपतितस्य गेहान् कोशागारधनागारादीन् सम्प्रत्यमार्जितालिप्तत्वेन तृणधूलिपत्रलूतातन्तुवृतान् शून्यायितान् स्मरति कच्चित् हे सौम्य! त्वद्विरहव्याकुलमानसान् मूर्च्छितप्रायान् बन्धूनुपनन्दादीन् गोपान् श्रीदामप्रभृतीन् तव दर्शनेन किं चित्तापोपशमनं जातमिति संबोधनाशयः यद्वा सौम्याश्च ते बन्धवश्चेति स्मरणयोग्यतासूचनाय विशेषणं चकारात् गोवर्द्धनादिसंग्रहः स अस्मत्प्राणनाथः क्वचिद्देशे काले वा उपहासकथायां लौकिककथायां वा नोऽस्माकं कथां गृणीते स्वमुखेन कथयति तत्र योग्यतामाह। किङ्करीणामिति। बहुधा कृतसेवानाम् अस्मद्वत्कैङ्कर्यं कर्तुमसमर्थाभिः पुरस्त्रीभिरुदासीनं तमालक्ष्यौदासीन्यकारणे पृष्टे अस्माकं किङ्करीणां कथां गृणीत इति भावः। वार्ताकथनेन स्मृत्यात्मिकां तदन्तःकरणवृत्तिं विज्ञातवानस्यतः कथयेति भावः। यद्वा अस्मान्नेतुं किमर्थं त्वमागतः स एव कुतो नागत इत्याशयेनाहापीति। बतेति खेदे विस्मये वा आर्यपुत्रोऽधुनापि मधुपुर्य्यामेवास्ते कंससंहाररूपस्य कार्यस्य जातत्वादेतावत्पर्य्यन्तं तत्र किमर्थं स्थितः अत्र कुतो नागतः आर्य्यपुत्रोऽपि मधुपुर्य्यामपीत्यनेनार्यस्य पितुरत्रागतत्वान्मद्यपानादिविनिर्मुक्तपुत्रत्वाच्च मद्यपप्रधाने पुरे किमर्थमास्त इति ध्वनितं ननु तदीयं चित्तं तत्र संलग्नमतो नागत इति चेन्न तदीयं मनोऽहं जानाम्यतोऽत्र स्थितापि तदन्तःकरणवृत्तिं ब्रवीमीत्याशयेनाह। स्मरतीति। पितृगेहतुल्यानां स्वक्रीडायोग्यस्थानानामलाभेन पितृगेहादिविरहव्याकुलचित्त एव तत्रास्त इत्यहं जानामि दुःखितस्य तत्र निरोधो भवतां नोचित इति सूचनाय संबोधयति हे सौम्येति यद्वा स आर्यपुत्रोऽधुना मधुपुर्यामास्त इत्येव ननु तत्स्थित्या तस्य तत्रत्यानां वा कश्चिदुपकारोऽस्ति सर्वदा पितृगेहादिस्मरणादिना व्याकुलचित्तत्वादित्याशयेनाह। स्मरतीति। यद्वा मधुपुर्य्यां प्रियस्य स्थितिं जानत्यपि प्रयोजनाभावात्तत्रास्ति न वेति न जानामीति स्वगाम्भीर्यद्योतनायाजानतीव पृच्छति। मधुपुर्य्यामिति। सर्वमेवमेवेत्यङ्गीकृतवन्तमिवालक्ष्याह। भुजमिति। तादृशक्रीडायोग्यस्थानानां तथाविधबन्धुगोपादीनां वनमालागुम्फनवीटादिनिर्माणगीतनृत्यरससौन्दर्य्यलावण्यवैदग्ध्यप्रश्नोत्तरविलाससम्भोगलीलारासक्रीडाविलासादिसहकारुणाढ्यानां चानादर्शनान्मम मनो नात्र लगति श्वः परश्वो वा व्रजमेवाहं गन्तेत्युक्त्वाऽऽगत्य अगरुसुगन्धं भुजमस्माकं मूर्ध्नि

श्रीशुक उवाच ।

अथोद्धवो निशम्यैवं कृष्णदर्शनलालसाः ।
सान्त्वयन् प्रियसंदेशैर्गोपीरिदमभाषत ॥ २२ ॥

उद्धव उवाच ।

अहो यूयं स्म पूर्णार्था भवत्यो लोकपूजिताः ।
वासुदेवे भगवति यासामित्यर्पितं मनः ॥ २३ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

कदा अधास्यत् धास्यति तेन समाश्वासयेत् भो प्राणप्रेयस्यः सशपथमहं ब्रवीमीतः परं भवतीस्त्यक्त्वा कापि न यामि लोकत्रये युष्मत्सादृश्यगन्धलेशस्याप्यनुपलम्भनादिति पूर्वमपि तिरोहितः पुनश्चाविर्भूत इति कृत्वा तदागमनाशा मम महती वर्तते इति भावः "यत्रार्जवं सगम्भीर्यं सदैन्यं सहचापलम् । सोत्कण्ठं च हरिः पृष्टः स सुजल्पो निगद्यत" इत्युक्तत्वादत्र सुजल्पः उद्धवपक्षेऽपि समानं श्रुतिपक्षे अथ स्वस्वरूपभूतं परमात्मानं विस्मृत्य देहादावहंममाभिमानवन्तं जीवात्मानमालक्ष्य सखेदमाहापीति । "कार्योपाधिरयं जीवः कारणोपाधिरीश्वरः । ममैवांशो जीवलोके जीवभूतः सनातन" इत्यादिश्रुतिस्मृतिभ्यामार्यस्य परमात्मनः पुत्रः अंश इवांशः भगवानधुना अज्ञानावस्थायां मधुपुर्यां मधुलवसदृशविषयरसोपभोगायतनभूतदेहलक्षणनवद्वारनगर्याम् आस्ते अहमेवेति तादात्म्याध्यासेन तद्रूपो भूत्वा तिष्ठति मधुपुर्यामपीत्यपिशब्दोऽत्यन्तविलक्षणेन देहेन तादात्म्यमत्यन्तानुचितमिति द्योतयति अधुनापि अधिकारिशरीरं लब्धापि देहादितादात्म्यं न त्यजसीति वापिशब्दार्थः आर्यस्य सर्वत्र पूर्णस्य परमात्मनः पुत्रस्तदात्मभूतः "आत्मा वै पुत्रनामासी"तिश्रुतेः तथाभूतोऽपि किं देहमात्रपरिच्छिन्नाभिमानेन परिच्छेदं प्राप्तोऽसीति वापिशब्दार्थः । तदनुरूपैव तव प्रवृत्तिर्दृश्यत इत्याह । स्मरतीति । पित्रा परमात्मना निर्मितान् गेहान् गृहान् भूरादिलोकांश्च स्मरति हे सौम्य । बन्धून् सहोदरादीन् बान्धवान् चकाराद्भार्यापुत्रादीन् गोपान् तत्तद्विषयसम्भोगार्थं तत्तदिन्द्रियाधिष्ठातृदेवान् स्मरति न तु स्वस्वरूपभूतं परमात्मनं कदाप्यनुसन्धत्ते कचिदपि अहो देहाद्विलक्षणोऽहं स्वकर्मानुसारेण स्वर्गनरकभोक्तेति विद्वद्दशायामपि नोऽस्माकं किङ्करीणां स्वर्गकामो यजेतेत्यादिकानां श्रुतीनां कथां गृणीते न त्वस्माकम् अतो ऽस्माकं महत्युत्कण्ठा वर्तते अगरुसुगन्धं तत्स्थानीयं साधनचतुष्टयसम्पत्तिलक्षणं भुजस्थानीयमन्तःकरणं श्रुतीनां मूर्ध्नि मस्तके कदा अधास्यत् धास्यति यद्वा प्राप्ताधिकारिशरीरं जीवात्मानमालक्ष्येदं शरीरमासाद्य स्वोद्धार एव त्वया कर्तव्य इति ससम्भ्रममाहापीति । अधुना आर्यपुत्रो भवान् ब्रह्मानन्दपर्यन्तमधुमात्रसाधनभूतायां मनुष्यशरीरलक्षणपुर्यामास्ते अपि बतेत्यलभ्यलाभोक्तिः तत्रापि सर्वविवेकसमर्थोऽसीत्याह । स्मरतीति सर्वयोग्यतां त्वयि दृष्ट्वाहमत्युत्कण्ठितास्मीत्याह । भुजमिति । यद्वा हितोपदेशमाकर्ण्य देहाद्यभिमानं विहाय भगवदाराधनपरायणं जीवात्मानमालक्ष्य तत्पराक्रमानुवादपूर्वकमुर्वरितग्रहणे सोत्कण्ठामाविष्करोतीति । अपिबतेति । बत हर्षे मधुपुर्यां सर्वासक्तिस्थानभूतायामपि देहलक्षणपुर्यामार्यपुत्रः भगवदंशभूतो देहादिविलक्षणो नगरस्थानीयदेहस्वरूप इत्येवमास्ते तत्र स्थितिरपि तव न भोगायापितु भगवदाराधनायेत्याह । स्मरतीति । पितुः परमेश्वरस्य गेहान्मथुराद्वारवत्यादिरूपान् यद्वेमान् देहान् चतुर्दशभुवनानि पितुर्गेहान् देवालयभूतान् स्मरति हे सौम्य । तद्बन्धून् बलदेवादीन् चकारान्नन्दादीन् गोपान् श्रीदामप्रमुखान् स्मरति किङ्करीणां गोपाङ्गनानां कथां च भवान् कचिद्गृणीते यद्वा बन्धून् गोपात्मकान् स्मरति नोऽस्माकं श्रुतीनां मध्ये किङ्करीणां भगवत्कैङ्कर्यप्रतिपादिकानां सर्वदा भगवत्परायणो भवानस्ति अतोऽवशिष्टमपि सम्पादयतु अगरुसुगन्धभुजं निरुक्तमन्तःकरणं श्रुतिमस्तके कदाधास्यत् ॥ २१ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अन्या अतिस्निग्धस्वभावा आहुः । अपीति । हे सौम्य ! आर्यपुत्रः श्रीकृष्णः अधुना मधुपुर्याम् आस्ते सः श्रीकृष्णः पितृगेहादीन् स्मरति कचित्सः अस्माकं प्रियः नोऽस्माकं किङ्करीणामपि कथा गृणीते ब्रूते अगुरुवत्सुगन्धं भुजं नो मूर्ध्नि कदा नु धास्यत् धास्यतीति ॥ २१ ॥

भाषा टीका ।

क्या इस समय में श्री व्रजराज के पुत्र मथुरा ही में अच्छे तो हैं हे सौम्य ! वे पिता के घरों को बंधुओं को गोपों को स्मरण करते हैं कि नहीं किसी समय में वे हम दासियों की कथा को भी गाते हैं कि नहीं अगरु आदि से सुगंधित भुजा को हमारे मस्तक पर कभी धारण करेंगे क्या सो पूछ लेना ॥ २१ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

श्रीकृष्णदर्शनोत्सुका गोपीः प्रियस्य संदेशैः सान्त्वयन् प्रथमं ताश्चिदमभाषत ॥ २२ ॥
तदाह षड्भिः । अहो इति । स्म नूनं यूयं पूर्णार्थाः कृतार्थाः ॥ २३ ॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ॥

अथेत्यारम्भे संदेशारम्भे प्रवर्तमान इत्यर्थः । तादृशप्रेमवैकल्योदये सद्यः किञ्चिदपि वक्तुमयोग्यत्वात् पश्चादारम्भं कृतवानित्यर्थः । एवमेतत् अननुभूतपूर्वप्रेमविज्ञापितं निशम्य सान्त्वयन् सान्त्वयितुं प्रियस्य संदेशैरिति तेषामपि प्रियत्वं ध्वनितं यद्वा प्रियैः संदेशैः प्रकृतत्वात् कृष्णस्यैवेत्यर्थः । वक्ष्यमाणानां सन्देशानां प्रियत्वं कृष्णसंबन्धादेव यद्वा हे प्रियेति श्रीपरीक्षित् संबोधनं प्रेमभरोदयात् प्रेमवैकल्योपशान्तावेव सत्यां संदेशास्ते श्रुतिपथं प्रविशेयुः सफलाश्च स्युरिति दैन्यविरोधिधन्यताप्रतिपादनेनादौ वैकल्यं त्याजयितुं पूर्ववदिदं वक्ष्यमाणमभाषत ॥ २२ ॥

अहो आश्चर्ये हर्षे वा स्म एव अस्य यथापेक्षं सर्वैरप्यन्वयः पूर्णाः साकल्येन संसिद्धा अर्थाः सर्वसाध्यपदार्थाः यासां तथाभूता यूयमेव ननु लक्ष्म्यादयः अत एव लोकानां चतुर्दशभुवनानां सर्वजीवानां वा पूजिताः वर्तमाने क्तप्रत्ययः पूज्या इत्यर्थः यूयमिति प्राक् प्रहर्षोदयेन पश्चाच्च भक्त्या भवत्य इति एवमप्रेऽप्यूह्यं वासुदेवे सर्वान्तर्यामिणि भगवति षड्गुणैश्वर्ये यद्वा श्रीवसुदेवनन्दने भगवति साक्षात्परमेश्वरे श्रीकृष्णे वसुदेवगृहे साक्षाद्भगवान् पुरुषः पर इत्यादि प्रसिद्धया यद्वा वसुश्रेष्ठनन्दने श्रीगोपेन्द्रतनये भगवति स्वयमनु भूतासमोर्ध्वसौन्दर्यविलासाढ्ये श्रीपुरुषोत्तमे इति श्रीकृष्णस्य सर्वत आधिक्यकथनेन तासां पूर्णार्थतातिशयबोधनार्थमिति एवं प्रेमविशेषेण यासां याभिर्मनोऽर्पितम् ॥ २२ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

एवं पूर्वोक्तप्रकारं साक्षात्परम्परया श्रुतचरं प्रेमवचनं निशम्य अथ तादृशप्रेमविकारशान्तेरनन्तरं सान्त्वयन् सान्त्वयितुम् इदं श्रीकृष्णैश्वर्यतत्प्रेममहिमज्ञापनमयतया तादृशप्रेमविकारस्तम्भनाय तासां श्लाघामयतया दैन्यशमनाय च तथा प्रयुक्तं वक्ष्यमाणम् अन्यथा श्रावणाशक्तेः गोपीः सम्भ्रमेण श्रीराधां साक्षादसम्भाष्यमाणां श्रावयन्नन्याः ॥ २२ ॥

अहो आश्चर्ये ऽदृष्टाश्रुतं खल्वेतदिति भावः । स्म निश्चये यूयमेव यूयं भवत्य इति पदद्वयेन तासामावृत्तिरत्यन्तादरेण वर्तमाने क्तः । पूर्णस्वरूपेण सर्वैश्च गुणैः सर्वोद्रिक्तः अर्थः श्रीकृष्णप्रेमलक्षणो यासां ता इति स्वतः सम्पत्तिः । अत एव लोकैरन्यैः सर्वैरेव पूजिता इति परतोऽपि यद्वा । यूयं पूर्णार्था इति श्रीराधायाः प्रति । भवत्यो लोकपूजिता इति अन्याः प्रति- श्रेयं यासां वासुदेवे सर्वाश्रये सर्वांशिनि भगवति सर्वैश्वर्यादीनां परमाश्रये स्वयं भगवति श्रीकृष्णे इत्यर्थः । अनेन महाप्रेमप्रकारेण । यासामिति भर्तरि सम्बन्धमात्रविवक्षया षष्ठी । मनश्च स्वातन्त्र्येण कर्मकर्तृत्वबोधनार्थम् ॥ २३ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अथेति । श्रीकृष्णदर्शनोत्सुका गोपीर्निशाम्य दृष्ट्वा प्रियप्रेषितैः संदेशैः सान्त्वयिष्यंस्तावदिदं वक्ष्यमाणमभाषत ॥ २२ ॥

तदेवाह षड्भिः । अहो इति । स्म नूनं यूयं पूर्णार्थाः कृतार्थाः भवत्यो यूयं लोकेषु पूजिताः उभयत्र हेतुं वदंस्ता विशिनष्टि । यासां युष्माकम् इतीत्थं भगवति वासुदेवे मनोऽर्पितं निहितम् ॥ २३ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली

पूर्णार्थाः कृतकृत्याः इतिशब्दो हेत्वर्थः ॥ २३ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

एवं सर्वभावेन सर्वावस्थासु उत्कृष्टापकृष्टास्वपि भगवत्परत्वं बोधितं प्रातीतिको दोषोऽप्युक्तः ततो दोषनिर्हरणार्थमुपदेशात्पूर्वमुत्सवोऽभिनन्दनं कृतवानित्याह । अथोद्धव इति । स हि उत्सवात्मकः ताभिः दोषगुणमिश्रतया निरूपितानपि भगवद्धर्मान् गुणत्वेनैव स्वीकृतवान् अतो भिन्नप्रक्रमेणैव निशम्य दोषाभावात् तात्पर्यतः एवं कृष्णदर्शनलालसाः विदित्वा यथा सभायामपि भुजगगुल्मगन्धमिति मनोरथाभिलाषः एतादृशाः अवश्यं सान्त्वनीया इति ताः सान्त्वयन् तत्रापि प्रियसंदेशैनैव न तु स्वतः यतो गोप्यः भगवदीयाः आज्ञा च भगवतस्तथैवेति इदं स्तोत्ररूपं वक्ष्यमाणमभाषत ॥ २२ ॥

तासां स्वाभाविको दोषोऽपि भगवत्कृत इति भगवद्गुणैः गुणा एव इति ज्ञापयितुं षड्भिः स्तोत्रमाह । अहो इति । तासामभिनन्दनं हि भक्तत्वात् भक्तेश्च तासु भक्तिस्थापनं च—

तत्राप्यनन्यता तासां सर्वभावेन च स्थितिः ।
अतिकृपा हरेर्युक्ता सफलत्वाय सोच्यते ॥

अहो इत्याश्चर्यमस्मदादीनामपि दुर्लभो भावः एतास्विति स च भावः सर्वदा सिद्धः कादाचित्को हि न तथा सामान्यतो भक्तस्तोत्रव्यावृत्त्यर्थं यूयमिति पूर्णः अर्थो यासां भक्तिः स्वतन्त्रफलेति ततश्च यथा भगवान् स्वतन्त्रस्तथा भवत्योऽपि जाता इत्याह । भवत्यो लोकपूजिता इति । भवच्छब्दलोकशब्दौ सर्वसाधारण्यार्थौ तेषां भ्रमात् प्रवृत्तिं वारयति । मनः अर्पितमिति ॥ २३ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

अहो इति । स्म नूनं यूयं पूर्णार्थाः कृतार्थाः यासां मन इति एवं प्रकारेण भगवत्यर्पितमित्यन्वयः अन्येषामपि भक्तानां मनो भगवत्यर्पितं दृष्टं किं त्वेवं प्रकारेण तु न दृष्टमिति भावः ॥ २३ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

एवं भगवत्प्रियावाक्यामृतपानासक्तमानसः किञ्चिदपि वक्तुमवसरमलभमानस्तत्प्रेमातिरेकमवलोक्यातिचकितहृदयो हाहेत्यादि मनस्येव वदन् तद्वचनानि शृण्वन् तूष्णीमास्थितः भगवत्प्रियाश्चेतःपरं वक्तुमक्षमावशिष्टसख्यश्च चित्रवत्तूष्णीं स्थितास्तदनन्तरं तदाश्वासनार्थमुद्धव उवाचेत्याहाथेति एवं विरह-

दानव्रततपोहोमजपस्वाध्यायसंयमैः ।
श्रेयोभिर्विविधैश्चान्यैः कृष्णे [1]भक्तिर्हि साध्यते ॥ २४ ॥
भगवत्युत्तमश्लोके भवतीभिरनुत्तमा ।
भक्तिः प्रवर्तिता दिष्ट्या मुनीनामपि दुर्लभा ॥ २५ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

व्याकुलमानसानां लोकोत्तरप्रेमाक्रान्तानामुपालम्भवाक्यान्याकर्ण्योद्धवः कृष्णदर्शनलालसा गोपीः प्रियसंदेशैः सान्त्वयन्निदं वक्ष्यमाणमभाषत उत्कृष्टः सर्वोत्तमः श्रीकृष्णो धवः स्वामी यस्य स तथा भगवद्भृत्यस्य भगवत्प्रियाणामाश्वासने प्रवृत्तिरुचितेति भावः । चित्तमाकृष्य गतस्य कृष्णस्य दर्शने लालसा यासां ताः । ननु किमिति मथुरायां गत्वा दर्शनं न कृतवत्य इत्यत आह । गोपीः गोपपराधीनाः तत्र गन्तुमशक्ताः यद्वा गोपस्य कृष्णस्येमाः गोपकृष्णदर्शनाभिलाषाः । ननु यदुपतिकृष्णदर्शनलालसाः सान्त्वयन् तत्रापि प्रियस्य कृष्णस्य संदेशैः ननु स्वतः यद्वा प्रियसंदेशैर्नं त्वायाति प्रिय इत्युक्त्वा अत एव सान्त्वयन्नतु हर्षयन् इदं वक्ष्यमाणमब्रवीत् ॥ २२ ॥

यदाहाहो यूयमिति । वसन्ति भूतान्यस्मिन्निति वासुः वसतीति वा वासुः स चासौ देवश्च वासुदेवस्तस्मिन्भगवति षड्गुणैश्वर्यसम्पन्ने यासामिति इत्थं मनः समर्पितं ता यूयं स्म नूनं कृतार्थाः स्मेति प्रसिद्धमिति वा किं च भवत्य एवंविधप्रेमातिरेकवत्यो लोकपूजिताः अस्मदादिभिर्लोकैः पूज्यतां गताः "यं लब्ध्वा चापरं लाभं मन्यते नाधिकं ततः" इत्युक्ते वासुदेवे सर्वात्मभूते परब्रह्मणि अर्पितमानसत्वात्पूर्णार्थाः भगवति ब्रह्मादिपूज्यपादपाथोरुहे तस्मिन्नासक्तचित्तत्वात् लोकपूजितास्तस्मात्स्वात्मानं दुःखितं हीनं च मावगच्छतेति भावः ॥ २३ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

कृष्णदर्शने लालसा औत्सुक्यं यासां ताः गोपीः प्रियस्य श्रीकृष्णस्य संदेशैः सान्त्वयन् प्रथमं तावदिदं वक्ष्यमाणमभाषत २२ ॥

स्मेति नूनम् पूर्णार्थाः कृतकृत्याः ॥ २३ ॥

भाषा टीका ।

श्री शुकदेवजी बोले श्रीकृष्ण भगवान् के दर्शन मे लालसा वाली उन गोपियों को देख कर उद्धवजी संतुष्ट होकर प्यारे के संदेशों से उनको सांतत करने के लिये गोपियों से इस वचन को बोलते भये ॥ २२ ॥

उद्धवजी बोले, अहो आश्चर्य है आप सबों के सब मनोरथ पूर्ण हो गये हैं आप सब लोकों मे पूजने योग्य हो जिनके कि श्रीवासुदेव भगवान् मे इस प्रकार से मन अर्पित हो गये हैं ॥ २३ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

श्रेयोभिः श्रेयःसाधनैः ॥ २४ ॥
अनुत्तमा अतिश्रेष्ठा ॥ २५ ॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

ननु श्रीकृष्णप्राप्त्यैव पूर्णार्थता स्यान्नतु मनोऽर्पणमात्रेण तत्राह । दानेति द्वाभ्याम् व्रतं कृच्छ्रादि तपः स्वधर्मं होमो हवनं यज्ञः स्वाध्यायो वेदाभ्यासः संयमः सर्वेन्द्रियनियमः दानजपौ प्रसिद्धौ एते च प्राय आवश्यकत्वात् सर्वकर्मश्रेष्ठतया लोके प्रसिद्धत्वाच्च व्यक्त्योक्ताः श्रेयांसि ज्ञानादीनि अन्ये च मोक्षादयस्तैः विविधैरिति श्लेषेण सर्वेषां विशेषणं तत्र मोक्षस्य विविधत्वं न्यायवेदान्तादिसिद्धान्तभेदेन सालोक्यादिभेदेन वा अन्यत्स्पष्टं दानादीनामेषां भक्तिसाधनत्वे यथोत्तरं श्रेष्ठ्यं कृष्णे परमेश्वरे हि एव भक्तिरेव या काचित् साध्यते अन्यथा तेषां वैयर्थ्यात् तथोक्तमेव धर्मः स्वनुष्ठीतः पुंसामित्यादिना ॥ २४ ॥

भवतीभिस्तु भगवति सर्वनिजैश्वर्यप्रकटके अत उत्तमश्लोके तस्मिन् अनुत्तमा प्रेमलक्षणा प्रवर्त्तिता स्वाचारेण लोकेषु प्रचारितेति यत् एतद्दिष्ट्या भद्रं जातमित्यर्थः । स्वत एव सर्वलोकस्य परमहितसिद्धेः नत्वेषात्मानुभावेन सर्वेषां सुलभा मन्तव्येत्याह । मुनीनामिति । श्रीसनकादीनामपि एवं भक्तिरेव परमफलं ततश्च श्रीकृष्णः स्वत एव वश्यः स्यादिति तात्पर्यम् ॥ २५ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

तदेव कैमुत्येन प्रतिपादयति । दानेति । दानाद्यात्मकानि यानि श्रेयांसि अन्यैश्च विविधैर्योगसाङ्ख्यज्ञानादिभिः कृष्णेऽर्पितैः साध्यैः नैष्कर्म्यमप्यच्युतभाववर्जितमित्याद्युक्तेः । कृष्णे स्वयं भगवति भक्तिः श्रवणादिरुचिमात्रं साध्यते । स वै पुंसां परो धर्मो यतो भक्तिरधोक्षजे इति । धर्मः स्वनुष्ठितः पुंसां विष्वक्सेनेत्यन्वयव्यतिरेकाभ्याम् । तत्र व्रतं नियमः तपः कृच्छ्रादि संयम इन्द्रियनिग्रहः ॥ २४ ॥

भवतीनां तु महाभावात्मिका भक्तिर्नित्यसिद्धैव । ततः सा किं श्लाघ्या किन्तु तच्छिक्षया लोकानां भाग्यमेव श्लाघ्यमित्याह । भवतीभिर्भगवति सर्वनिजैश्वर्यप्रकटके अत उत्तमश्लोके तस्मिन् अनुत्तमा सर्वतोऽपि श्रेष्ठा महाप्रेमलक्षणा प्रवर्त्तिता स्वदर्शनश्रवणप्रभावेण लोकेषु प्रचारितेति यत् । यथा वक्ष्यते सर्वात्मभावोऽधिकृत इत्यादि । यथा च प्राचे । विक्रीडितं व्रजवधूभिरित्यादि । एतद्दिष्ट्या भद्रं जातमित्यर्थः ॥ २५ ॥

[1] भक्तिर्न साध्यते इति वीररा० पाठः ।

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

कथं तदर्पणमात्रेण पूर्णार्थता पूजितता चेत्यत्राह । दानेति ॥ दानादिभिरन्यैश्च श्रेयःसाधनैः नानाविधैर्यो भगवति वासुदेवे भक्तिर्न साध्यते न साधयितुं शक्यते ॥ २४ ॥

सा भक्तिरनुत्तमोत्कृष्टा मुनीनामपि दुर्लभा युष्माभिर्दिष्ट्या सुखेनैव भगवति प्रवर्तिता यद्वा दिष्ट्या अयमस्माकं महानानन्द इत्यर्थः । तत्र दानं सत्पात्रे वित्तत्यागः तपोऽनशनादिः स्वाध्यायो वेदाध्ययनं संयम इन्द्रियनिग्रहः अत्र "नाहं वेदैर्न तपसा" इत्यादि भगवद्वचनार्थोऽभिप्रेतः "नान्यः पन्था" इति श्रुत्यर्थश्च ॥ २५ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

शास्त्रतो नियमकरणं व्रतं संयम इन्द्रियनिग्रहः हितसाधनानुष्ठानं श्रेयोविधिः ॥ २४ ॥

दुर्लभेति वचनं भक्तेः कर्तव्यत्वपरं ननु मुनीनां तादृशी भक्तिर्नास्तीति ॥ २५ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

गोप्यः किमाचरदितिवत् भक्तिः श्रवणादिरूपा साध्यते ॥ २४ ॥

भवतीनां तु महाभावात्मिका भक्तिर्नित्यसिद्धैव । ततः सा किं श्लाघ्या किं तु तच्छिक्षया लोकानां भाग्यमेव श्लाघ्यमित्याह । प्रवर्तिता स्वाचारेण लोकेषु प्रचारितेति यत् एतद्दिष्ट्या भद्रं जातमित्यर्थः ॥ २५ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

नन्वयं भावः सुलभः कामाच्च जात इति तत्राह । दानव्रतेति । दानादिभिः सर्वैः कृष्णे स्नेह एव साध्यते स चेत्कामेनैव जातः किं दानादिना स्नेहे वैलक्षण्याभावात् फले वैलक्षण्याभावे साधनवैजात्यमप्रयोजकं तदग्रं हित्वेति विशेषस्तूक्तः दानं तुलापुरुषादि व्रतमेकादश्यादि तपः कृच्छ्रादि होमः काम्यः अग्निहोत्रादिरपि जपो मन्त्रादिः स्वाध्यायो वेदाध्ययनं वेद एव वा सर्वविधोऽपि संयमो योगादिः अन्यानि श्रेयांसि कूपारामादीनि सर्वेषामेषाम् "एकस्य तूभयत्वे संयोग पृथक्त्व"मिति न्यायेन तत्तत्फलसाधकत्वं भक्तिसाधकत्वं च अन्यैरित्यविहितैरपि कृष्णे सदानन्दे तस्यैव फलत्वमिति एतदर्थमेवाविर्भूत इति वा भक्तियोगविधानार्थमिति वाक्यं विशब्देनोच्यते साध्यत इत्यनेन आत्मत्वेन नित्यस्नेहो निवारितः ॥ २४ ॥

तर्ह्यस्मद्भक्तिरन्यादृशीति चेत्तत्राह । भगवतीति । सत्यं भिन्ना परं सर्वोत्तमा उत्तमैरपि श्लोक्यत इति तेषामपि वाक्यमेव भवति तत्त्वेवम्भूतं मनः भवतीभिरिति बहुत्वं सामर्थ्यं च द्योतितं न उत्तमा यस्याः भवदीयायाः अन्या भक्तिरस्ति अतो ब्रह्मकल्पमारभ्य अद्यप्रभृति भक्तिर्वृक्षा अद्य पर्यवसिता यतो भवतीभिरेवेयं दर्शिता एतदस्मदादीनां भाग्येन एतादृशी भक्तिरस्तीति । ननु बहिर्मुखेष्वेवैता उत्तमा इति चेत्तत्राह । मुनीनामपि दुर्लभेति । अन्यथेदं परित्यज्य मननार्थं कथं प्रवृत्ता भवेयुः ॥ २५ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

दानादिभिः साधनैः कृष्णे भक्तिः साध्यते तत्र दानं विष्णुवैष्णवसम्प्रदानकं व्रतमेकादश्यादिकं तपः कृष्णार्थभोगत्यागादि होमो वैष्णवः जपो विष्णुमन्त्राणां स्वाध्यायो गोपालतापन्यादिपाठः श्रेयांस्यपि भक्त्यङ्गान्येव ज्ञेयानि अन्येषां दानादीनां भक्तिहेतुत्वाभावस्य प्राक् प्रतिपादितत्वात् ॥ २४ ॥

भवतीनां भक्तिस्त्वन्यैव सर्वविलक्षणेत्याह । भगवतीति । अनुत्तमा सर्वश्रेष्ठा । प्रवर्त्तितेति प्रागियं नासीत् परन्तु भवतीनां रागात्मिकां भक्तिमनुसृत्यैव रागानुगा भक्तिर्लोकैः क्रियमाणा प्रचरिष्यतीत्यर्थः । प्रवर्त्तितेति "आशंसायां भूतवच्च" इति निष्ठा । दिष्ट्या लोकानामतिभाग्येन ॥ २५ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

ननु जारबुद्ध्या भगवति वासुदेवे समासक्तचेतसां दानव्रतादिभक्तिसाधनविधुराणामस्माकं कथं पूर्णार्थता कथं वा लोकपूज्यतेत्याशङ्क्य "येन केनाप्युपायेन मनः कृष्णे निवेशयेत्" इत्युक्तत्वात्कृष्णे मनः सन्निवेशरूपभक्तेः फलस्य साधनतयोपायसाध्यस्यानुज्ञातत्वादेकेनोपायेन तस्य जातत्वान्नोपायान्तरान्वेषणं युक्तमप्रयोजकत्वादित्याशयेनाह । दानेति । दानं तुलापुरुषादि व्रतमेकादश्युपवासादि तपः कृच्छ्रचान्द्रायणादि होमः अग्निहोत्रादि जपः प्रणवादिमन्त्राणां मनसावृत्तिः स्वाध्यायो वेदाध्ययनं विविधैर्वापीकूपतडागारामादिनिर्माणप्रमुखैः श्रेयःसाधनैः कृष्णे भक्तिर्हि साध्यते उत्पाद्यते हिः प्रसिद्धिं द्योतयति यद्यपि "तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसा नाशकेने"ति श्रुत्या यज्ञादीनां संयोगपृथक्त्वन्यायेन विविदिषाया वेदनस्य वा साधनत्वमभिहितं तथापि भक्त्या लभ्यस्त्वनन्यया भक्त्या मामभिजानातीत्यादिवचनानामेतस्य चानुरोधेन भक्तिद्वारा तेषां तत्साधनत्वं व्याख्येयं तथा च दानादीनां भक्तिरेव फलं सा च जन्मान्तरेष्वनुष्ठितदानादिसर्वसाधनानां युष्माकमेवं विधप्रेमातिरेकवतीनां कृतार्थतादौ नास्ति संशय इति भावः ॥ २४ ॥

नन्वस्माकं व्रजराजकुमारविषयककामवतीनां कथं भक्तिमत्त्वं कामस्य तदुपायत्वानभिधानादिति चेत्तद्विषयककामस्य दानादिभिरपि दुर्लभत्वात् तज्जन्येयं भक्तिरनुत्तमेत्याशयेनाह । भगवतीति । उत्तमैर्नारदादिभिः श्लोक्यते स्तूयते इत्युत्तमश्लोकस्तस्मिन् अनेन भवतीभिः स जिन्यते भवत्यस्तु तेन स्तूयन्त इति महान्विशेष इति ध्वनितं भवतीतरेषां स भगवान् भवतीनां तु याच्ञाविमानिति सूचनाय भगवतीति दिष्ट्या अहो भाग्यमस्मदादीनां याभिर्भवतीभिरेवैवंविधा भक्तिः प्रवर्तिता आविर्हिता भक्तिरपि प्रकटिता तासां दर्शनादिना अस्मदादयो भाग्यातिरेकवन्तः सम्पन्ना युष्माकं भाग्यं तु वक्तुमशक्यमित्यर्थः । न चासौ शास्त्राविहितत्वाल्लोकाप्रसिद्धत्वाच्च निकृष्टेति भ्रमितव्यम् उक्तहेतुभ्यः सर्वोत्कृष्टत्वादित्याशयेनानुत्तमा न विद्यते उत्तमा यस्याः सा यतो मुनीनां दानादिसाधनकदम्बवतामपि दुर्लभा तदधिकाराभावात् अत्रेदमवधेयम् उपायपूर्वकं भगवति मनःस्थिरीकरणं भक्तिः सा द्वेधा विहिता अविहिता च तत्राद्या द्वेधा मिश्रा शुद्धा च मिश्रा त्रेधा कर्ममिश्रा

दिष्ट्या पुत्रान् पतीन् देहान् स्वजनान् भवनानि च ।
हित्वावृणीत यूयं यत् कृष्णाख्यं पुरुषं परम् ॥ २६ ॥
सर्वात्मभावोऽधिकृतो भवतीनामधोक्षजे ।
विरहेण महाभागाः । महान्मेऽनुग्रहः कृतः ॥ २७ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ॥

कर्मज्ञानमिश्रा ज्ञानमिश्रा च कर्ममिश्रा त्रेधा तामसी राजसी सात्त्विकी चेति तत्र तामसी त्रेधा हिंसार्था दम्भार्था मात्सर्यार्था चेति राजसी च त्रेधा विषयार्था यशोऽर्था ऐश्वर्यार्था च सात्त्विकी च त्रेधा कर्मक्षयार्था विष्णुप्रीतिसिद्ध्यर्था विधिसिद्ध्यर्था च कर्मज्ञानमिश्रा त्रेधा उत्तमा मध्यमा अधमा चेति ज्ञानमिश्रा त्वेकधा गुणकार्याणामनुपलम्भान्निर्गुणा शुद्धाप्येकधा अहैतुक्यव्यवहिता कर्मज्ञानाभ्याममिश्रत्वाच्छुद्धा एवं विहिताया श्चतुर्दश भेदाः अविहितापि चतुर्धा कामजा द्वेषजा भयजा स्नेहजा चेति तत्र कर्ममिश्रा नव गृहस्थानां कर्मज्ञानमिश्रास्तिस्रो वनस्थानां ज्ञानमिश्रैका भिक्षुकाणां शुद्धैका सर्वेषां कामजा गोप्यादिसमानां द्वेषजा शिशुपालादितुल्यानां भयजा कंसादिसमानानां स्नेहजा पाण्डवादिसदृशानामेवं भक्तेरष्टादश भेदास्तत्र सर्वोत्कृष्टा कामजा अन्येषु तद्भेदेषु तथाविधमनःस्थिरीकरणस्यालभ्यत्वादिति ॥ २५ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अन्यैश्च श्रेयोभिः कल्याणोपायैः —
जन्मान्तरसहस्रेषु तपोदानसमाधिभिः ।
नराणां क्षीणपापानां कृष्णे भक्तिः प्रजायते ॥
इति पुराणान्तरात् ॥ २४ ॥
अनुत्तमोत्कृष्टा ॥ २५ ॥

भाषा टीका ।

दान व्रत तप होम जप वेदाध्ययन संयम तथा और भी अनेक प्रकार के धर्म इन सबों से श्रीकृष्ण चरण में भक्ति ही सिद्ध की जाती है ॥ २४ ॥

आप सबों ने तो उत्तम श्लोक भगवान् के विषै उत्तम भक्ति को संपादन किया है जो कि भक्ति मुनि जनों को भी दुर्लभ है सो यह बड़ा मंगल है ॥ २५ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

अवृणीत वृतवत्यः ॥ २६ ॥

सर्वात्मभावः एकान्तभक्तिः अधिकृतः प्राप्तः भगवत्प्रेमसुखप्रदर्शनेन ममैव महाननुग्रहः कृत इति ॥ २७

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

ननु तर्हीदृशभक्तिमती लक्ष्मीरेव श्लाघ्यतां वयं तु परमास्वतन्त्रत्वात्तादृशभजनासमर्थाः तत्राह । दिष्ट्येति । एतत्तातीव भद्रं जातमित्यर्थः स्वजनं भ्रातृभगिन्यादिकम् अवृणीत स्वकान्ततया स्वीकृतवत्यः परं पुरुषं पुरुषोत्तमं तत्र च कृष्ण इति आख्या नाम ख्यातिर्वा यस्य तम् इत्यशेषरूपगुणादिप्रकटनेन माहात्म्यविशेष उक्तः पुत्रादीनां त्यागः तत्तत्स्नेहत्यागेन साक्षात् परित्यजनेनैव वा ततश्च देहानां त्यागस्तत्र नैरपेक्ष्येण मृततुल्यतावाप्तेः त्यागस्य यथोत्तरं न्यूनताभिप्रायेण तत्तत्क्रमेण निर्देशः अत एवाप्यर्थे चकारः इति भक्तेरेव प्रकारविशेषेण लक्ष्मीतोऽपि यूयं परमधन्या इति भावः ॥ २६ ॥

ननु तर्हि तेन सह वियोगो न स्यात् सत्यं स तु भक्तेरेवोत्कर्षविशेषार्थमित्याह । सर्वेति । अधोक्षजे इन्द्रियवृत्त्यगोचरेऽपि भगवति सर्वात्मना सर्वेन्द्रियवृत्तीनां तदेकनिष्ठत्वादिना भावः प्रेमा विरहेणाधिकं कृतः हे महाभागाः ! इति परमभाग्यवतीनां भवतीनामेवायं सम्भवेत् नत्वन्यजनस्येति सर्वप्रियजनेभ्यो यूयं धन्यतमाः किम्पुनर्महालक्ष्म्याः सकाशात् यतोऽस्मत्प्रभुरसौ भवतीभिरेव वशीकृत इति भावः । महानिति तैर्व्याख्यातं यद्वा ईदृशोऽद्भुतः कोऽपि महाभाव एकोऽवश्यं वर्त्ततेवेति श्रुतया चिरमनुमीयमानोऽप्यदृष्टाश्रुतत्वान्मादृशां भक्तानां विश्वसनीयो न स्यात् अधुना तु साक्षादनुभवेन ममात्राप्युल्लस इति महानेवानुग्रहो भवतीभिः श्रीभगवतैव वात्र प्रेषणेन कृतः ॥ २७ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

भक्तिप्रवर्त्तनरीतिमेव स्पष्टयति । यद्यस्मात् पुत्रादीन् तत्तन्मन्यान् निजकृष्णैकालम्बनस्वाभाविकभावबलेन हित्वा अवास्तवबुद्ध्या परित्यज्य कृष्णेति आख्या ख्यातिर्यस्य तं परं पुरुषं नराकृतिपरब्रह्मरूपं यूयमवृणीत वास्तवकान्ततया स्वीकृतवत्यः । तद्दिष्ट्या भद्रं लोकानां महद्भाग्यमित्यर्थः । भवतीनां तादृशचरितं दृष्ट्वा श्रुत्वान्ये च तथा प्रवर्त्तंस्यन्तीति ॥ २६ ॥

अधिकृत इति शीलादित्वात् वर्त्तमाने क्तः । तद्योगे च भवतीनामिति कर्त्तरि षष्ठी । ततश्चाधोक्षजे सर्वात्मना परिपूर्णत्वेन यो भावो महाभावपर्यन्तस्तद्दशां प्राप्तः निरन्तरतदाविर्भावकः प्रेमा स भवतीभिरधिक्रियते वशीकृत्य स्थाप्यत एव । यद्वा । तस्मिन् यः सर्वत्रात्मभावः । "आततत्वाच्च मातृत्वादात्मा हि परमो हरि"रिति न्यायेन सर्वत्र स्फुरति स भवतीष्वेव दर्शनाद्भवतीभिरेव वशीक्रियते इत्यर्थः । अतः सोऽपि भवतीनां न दूर इति भावः । अत एव हे महाभागास्ततो विरहो नामायं बहिरङ्ग एवेति न तत्रान्तःकरणावेशो युज्यत इति । किन्तु मह्यमेतादृशप्रेममहिमदर्शनानुग्रहार्थमेवासौ विरहो बहिः स्फुरतीति मन्ये इत्याह । विरहेणेति । विरहेण कर्त्रा ॥ २७ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

किञ्च पुत्रादींस्त्यक्त्वा यद्यस्माद्यूयं श्रीकृष्णाख्यं परमपुरुषं वृणीत वृतवत्यः एतदपि दिष्ट्या भद्रं जातमित्यर्थः । अतः भवत्यः पूर्णार्थाः लोकपूजिताश्चेति सम्बन्धः ॥ २६ ॥

भवतीभिरहमपि कृतार्थीकृत इत्याह । सर्वात्मभाव इति । हे महाभागाः ! विरहेण हेतुना ऽधुनाधोक्षजे भवतीनां कर्तरि षष्ठी युष्माभिर्यत्सर्वात्मभावोऽधिकृतः प्रस्तुतः सर्वात्मना करणत्रयेण भावो भक्तिः सर्वोऽप्यात्मनो मनसः भावोऽभिप्रायविशेषोऽधिकृतः प्रस्तुतः प्रकाशित इति वा एष मे मह्यं महाननुग्रहः कृतः तत्स्मारणेनाहमपि कृतार्थीकृत इत्यर्थः ॥ २७ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

यूयं कृष्णाख्यं परमपुरुषं वृणीतेति यत्तद्दिष्ट्या सदैवानुग्रहः ॥ २६ ॥

भवतीनां सर्वात्मना अखण्डस्वामिना हरिणा सह भावो लीलाधिगतः प्राप्त इति यदतो विरहेण महाननुग्रहः कृत इति मन्ये ॥ २७ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

भक्तिप्रवर्त्तनरीतिमेव स्पष्टयति । दिष्ट्या पुत्रानिति ॥ २६ ॥

भवतीनां तु सर्वात्मना परिपूर्णत्वेन यो भावो महाभावपर्यन्तदशां प्राप्तः प्रेमा यस्त्वधोक्षजेऽपि कृतः अधिकारितया प्रवर्त्तितस्तद्वशकारीत्यर्थः । अतः सोऽपि भवतीनां दूर इति भावः । किन्तु मह्यमेतादृशप्रेममहिमदर्शनार्थमेवासौ भवतीष्वभ्युदित इति मन्यतामित्याह । विरहेणेति । विरहेण कर्त्रेति भवतीनामित्यादि ॥ २७ ॥ २८ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

न केवलं स्नेहोत्कर्षेणैव भवतीनामुत्कर्षः किं तु प्रपत्तिरप्युत्कृष्टेत्याह । दिष्ट्येति । प्रपत्तिबाधका एते पुत्रादयः पुत्रादीनामासक्तिजनकत्वात् अनासक्तो हि प्रपद्यते स्त्रीणां सुतरामेवैते प्रतिबन्धका इति गणयति । देहाः स्वस्यैव अवस्थाभेदेन भिन्नाः नानाविधोपयोगा इति तदपेक्षाभावाय बहुवचनं स्वार्थे विनियोगाभावात्त्यागः अन्यथा भगवतः स्थाने गच्छेयुः किं तु भगवदाकाङ्क्षामेव भावयमानास्तिष्ठन्तीति पुत्रादिवत् देहत्यागोऽपि तथा भिन्नानां स्वजनानां गोपिकानां परस्परमपि प्रासङ्गिकः समाजः गृहाणामाधारभूतानामपि परित्यागः पूर्वमुपपादितः चकारात् लोकानामपि वृथा परित्यागं वारयति । वृणीतेति । पुरुषत्यागो दोषायेति तदर्थमाह । एषमिति । व्यभिचारिण्यो पतिं यदि भजन्ति तदापि पूर्वदोषं परित्यज्य कृतार्था भवन्ति जगति प्रायेण चर्षणीरूपाः व्यभिचारिण्य एव परं दिनजन्मव्यवस्थाः अतः परः पुरुषः सेव्य एव ननु पूर्वमपि स्थिताः यथा दोषाक्रान्तोपगता एवमग्रेऽपि भविष्यन्तीति किं परमपुरुषप्रपत्त्येत्याशङ्क्याह । वृणीतेति । इदानीं हि वरप्राप्तौ भगवान् पूर्वमिच्छयति विशेषः किं च कृष्णाख्यमिति स हि तदर्थमेवाव-तीर्णः प्रमेयबलेनापि न त्यक्ष्यति पुरुषत्वेन फलान्तराभावेन न काचित् क्षतिः ॥ २६ ॥

एवं भक्तिप्रपत्ती निरूप्य सर्वात्मभावं निरूपयति । सर्वात्मभाव इति । तदुपपादितं दशधा तत्रापि विशेषमाह । विरहेणेति सम्भोगे भवेदपि तादृशी मतिः सर्वोऽप्यात्मनो भावः भगवत्येवाधिकृतः उत्तरोत्तरवृद्धिमारब्ध इव । विषयस्याप्यलौकिकत्वमाह । अधोक्षज इति । अधः अक्षजं यस्मात् इति कोऽपि भावः तत्र कर्तुमशक्यः तादृशे सर्वात्मभावो दुर्लभः तत्रापि स्त्रीणां तत्रापि साधनरहितानां तर्हि साधनाभावे दृश्यमानं कार्यं भ्रमप्रपन्नं भविष्यतीति माशङ्क्याह । हे महाभागाः ! इति भवतीनामुत्पत्तिशिष्टमेव तादृशं भाग्यं साधनमिति न साधनाभावः ननु स्तुतिरेवैषा क्रियते न वस्तुत इत्याशङ्क्याह । महान्मेऽनुग्रहः कृत इति । न हि कोऽपि परस्तोत्रं कुर्वन् आत्मनो गुणभावमङ्गीकरोति । अतः स्वाभिप्रायप्रदर्शनेन त्वयाप्येवं कर्तव्यमिति उपदेशेन महानेवानुग्रहः कृतः ॥ २७ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

पुत्रादीन् ममतास्पदानि त्यक्त्वा कृष्णाभिधानं परं पुरुषं स्वसम्भोक्तृत्वेन यत् अवृणीत एतद्दिष्ट्या ममातिभाग्येनैव ॥ २६ ॥

ननु वयं धर्मं त्यक्त्वा यत् परपुरुषं वृतवत्यस्तत्र भवतः किं भाग्यमभूत्तत्राह । सर्वात्मेति । अधोक्षजे अन्यैः प्रत्यक्षीकर्तुमप्यशक्ये श्रीकृष्णे प्रेमैव तावद्दुर्लभः । भवतीनां तु सर्वात्मभावः सर्वात्मना सर्वेणैव स्वरूपेण सहितः परिपूर्णो यो भावः स महाभाव इत्यर्थः । सूर्यो यथा सर्वांस्तापसङ्क्रमणेन व्याप्नोति चन्द्रो यथा सर्वान् शैत्यसङ्क्रमणेन व्याप्नोति तथा यः सर्वान् स्वधर्मसङ्क्रमणेन अतति व्याप्नोतीति । सर्वात्मा चासौ भावश्चेति स इति श्लेषेण तल्लक्षणमपि प्रकटीकृतं । यदुक्तम् "अनुरागः स्वसंवेद्यदशां प्राप्य प्रकाशितः । यावदाश्रयवृत्तिः स्याद्भाव इत्यभिधीयत" इति । स च महाभावः प्रेम्णः सप्तमो विलासः भवतीनां न त्वन्यासां लक्ष्म्यादीनामपीत्यर्थः । कीदृशः अधिकृतः अधिकारविषयीकृतः तत्राधिकारो भवतीभ्य एव परमेश्वरेण दत्तो नान्याभ्य इति भावः । अत एव विरहेण कर्त्रा मे मम महान् अनुग्रहः कृतः दिव्योन्मादचित्रजल्पादिमहाभावभेदान् दर्शयित्वेति भावः । यदि भवतीनां विरहो नाभविष्यत्तदा कृष्णो न मां प्रास्थापयिष्यत् । अहञ्च एतदाश्चर्यं नाद्रक्ष्यमिति स्वभाग्यपरावधिरुक्तः ॥ २७ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

"स्वकृत इह विसृष्टा" इति पश्चात्तापो न विधेयस्तेनैव कृतार्थत्वसम्पादनादित्याह । दिष्ट्येति । देहाभिमानस्य देहव्यापाराणां च परित्यागाद्देहत्यागः अत एव मथुरां न गच्छन्ति पुत्रादीन् हित्वा तद्योगक्षेमाद्यनुसंधानं विहाय यत्कृष्णाख्यं परं पुरुषं वृणीत तद्दिष्ट्या महद्भाग्यं पुत्राद्यासक्तिरेव भगवदासक्तौ प्रतिबन्धिका तदासक्तित्यागश्चातिदुष्करः तत्रापि यूयं स्त्रियः यासां पुत्राद्यासक्तित्यागः परमदुष्करः न तत्त्यागो वृथा यतः परं

श्रूयतां प्रियसंदेशो भवतीनां सुखावहः ।
यमादायागतो भद्रा ! अहं भर्तुरहस्करः ॥ २८ ॥
श्रीभगवानुवाच ।
भवतीनां वियोगो मे नहि सर्वात्मना क्वचित् ।
यथा भूतानि भूतेषु खं वाय्वग्निर्जलं मही ।
तथाऽहं च मनःप्राणभूतेन्द्रियगुणाश्रयः ॥ २९ ॥
आत्मन्येवाऽऽत्मनाऽऽत्मानं सृजे हन्म्यनुपालये ।
आत्ममायानुभावेन भूतेन्द्रियगुणात्मना ॥ ३० ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

सर्वोत्कृष्टं पुरुषं पूर्णं परमात्मानं वृणीत ननु स्त्रीणां स्वपुरुषत्यागः परपुरुषस्वीकारो अतिदोषावहत्वेन शास्त्रे प्रतिपादितः "पतिशुश्रूषणं स्त्रीणां परो धर्मो ह्यमायये"त्यादिना भगवता च पतिशुश्रूषणादिरेव धर्मत्वेन निरूपित इत्याशङ्कानिवृत्त्यर्थमुक्तं कृष्णाख्यं सच्चिदानन्दाख्यपरमेश्वरस्यैव सर्वपतित्वात्तं विहाय पत्यादिशुश्रूषणस्य परमानर्थावहत्वात्पतिशुश्रूषणमपि वासुदेवबुद्ध्यैव श्रेयस्करं किं पुनर्वक्तव्यं साक्षात् परब्रह्मासक्तमतीनां भवतीनां माहात्म्यं यथा व्यभिचारिण्योऽपि पुनरासक्तिपूर्वकं स्वपतिशुश्रूषणात्कृतार्था भवन्ति तद्वत्स्वपतिकृष्णत्यागाद्व्यभिचारित्वं तत्रैव पुनः समासक्तिसम्पादनात्परमपतिव्रततेति भाव ॥ २६ ॥

ननु प्रियविरहानलज्वालामालाव्याकुलहृदयानां क्षणमात्रमपि स्वास्थ्याभावादुभयभ्रष्टानामस्माकं कुतस्त्यं कृतार्थत्वमित्याशङ्क्याह । सर्वात्मेति । सर्वात्मना भाव एकान्तभक्तिः अधिकृतः प्राप्तः यद्वा सर्वोऽपि आत्मनोऽन्तःकरणस्य भावः प्रीतिमात्रं भवतीनामधोक्षज एवाधिकृत उत्तरोत्तरं वृद्धिं नेतुमारब्धः भवतीनां साधनविधुराणां तथापि यद्वीनां तत्राप्यधः अक्षजं वृत्तिमात्रं यस्मात्तस्मिन् वृत्तिमात्रागोचरे परमात्मनि कामजस्तादृशो भावो विरहेण पुष्टिं गमिष्यति अतो नायं विरहोपकारकः अथो न क्षीयते जातिवति लिवत्वया च सत्यस्वरूपे तस्मिन् पुष्टिं गतो भावः प्रियवियोगाभावाय फलिष्यतीति भावः । ननु साधनैर्विना कथमेवं जातं कार्यमात्रस्य साधनसाध्यत्वनियमादित्याशङ्क्याह । हे महाभागाः ! पूर्वपुण्योत्थभाग्यवशादस्मिन् जन्मनि भगवद्भक्तिसाधनेषु दानादिषु प्रवृत्तिर्भवति पूर्वजन्मनि सम्यगनुष्ठितसाधनानां तु महाभाग्यशालिनां नास्मिन् जन्मनि साधनापेक्षा तस्मान्महाभागानां भवतीनामिदानींतनसाधनविरहेऽपि तथा भूतभावोत्पत्तौ न विरोध इति भावः । न चैवं प्रशंसामात्रमिति शङ्क्यं ममाप्येवंविधभावस्य साध्यत्वादित्याशयेनाह । महानिति । तादृशभावबोधनेन तत्रोत्कण्ठाभुत्पादयन्तीभिर्भवतीभिर्ममोपरि महानपरिच्छिन्नोऽनुग्रहः कृत इत्यर्थः ॥ २७ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

परं निःसमानातिशयं वृणीत वृतवत्यः ॥ २६ ॥

सर्वैरात्मभिः मनोवचनदेहैर्यो भावो भक्तिः स तथाभूतः अधिकृतः प्राप्तः विरहो वियोगस्तेन अत्र मम आगमनेन हेतुभूतेन मम महाननुग्रहः कृतः ॥ २७ ॥

भाषा टीका ।

आप सब पुत्र पति देह स्वजन घर इन सबों को छोड कर परम पुरुष श्रीकृष्णको ही चाहती हो सो बडा मंगल है ॥ २६ ॥

आप सबोंका अधोक्षज भगवान् के विषें विरह के मारे सब प्रकार से आत्मभाव होगया है सो हे महाभागो ! तुमने जो मेरे को दर्शन दिया सो बडा अनुग्रह किया है ॥ २७ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

भर्तुः कृष्णस्य रहस्करो रहस्यकार्यकर्ता ॥ २८ ॥

भवतीनां मे मया सह वियोगो नास्ति कुतः सर्वात्मना सर्वस्योपादानकारणेन अत एव सर्वेषु मनआदिकार्येष्वहमनुगतत्वेन स्थित इति सदृष्टान्तमाह । यथेति । भूतेषु चराचरेषु महाभूतानि वाय्वग्निर्वायुसहितोऽग्निः वायुश्चाग्निश्चेत्यर्थः । यथा तथाहञ्चेति मनआदीनि कार्याणि गुणाः कारणं तेषामाश्रयत्वेनानुगत इत्यर्थः ॥ २९ ॥

ननु कारणत्वे सर्वानुगतत्वे च कार्यकारणभेदः स्यादत आह । आत्मन्येवेति । ननु नित्यसिद्धस्य कुतः सृष्ट्यादिरूपता अत आह । भूतेन्द्रियगुणात्मना बुद्धीन्द्रियेति वा पाठः तद्रूपेणेति । ननु निर्विकारस्य कुतस्तद्रूपतेति तत्राह । आत्ममायानुभावेनेति ॥ ३० ॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

पञ्चमाध्यायस्य किं चित्स्वास्थ्यमुपलभ्य वक्तव्यमाह यद्वा तथापि वैकल्यह्रासमपेक्ष्य व्यग्रः सन् तत्संदेशेनैव वा स्वास्थ्यं भवेदिति सम्भाव्य तमेव वक्तुमारभते । श्रूयतामिति । ननु तेन संदेशेनालं येनाशु तत्प्राप्तिर्न स्यात् तत्राह । भवतीनां परमोत्कण्ठितानां सुखावहः तत्प्राप्तेर्निर्द्धारणात् यद्वा भवतीनां प्रियस्य संदेशः

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

तदर्थमेवात्रागतोऽस्मि नत्वन्यार्थमिति तस्मिन्नादरं जनयति । यमिति । अन्यथा गोव्रजे तस्येत्यादिकमनेन प्रत्युत्तरितं भर्तुरित्यात्मनस्तद्भृत्यत्वं बोधितं तत्र च रहस्करः इत्यात्मनः परमाप्तत्वेन तत्सन्देशादानयोग्यत्वं तथा संदेशस्य गोप्यत्वं किं च भद्राः ! हे साध्व्य इति तासामपि तत्संदेशैकपात्रत्वं तथा संदेशस्यापि भद्रमादरार्थ सूचितम् अत्र पक्षे श्रूयतामिति तासां विरहवैकल्येन लेखवाचनाशक्तिं किं वा प्रवहदश्रुधारया लेखलोपं सम्भाव्य पत्रं दर्शयित्वा तन्मुद्रामुन्मुच्य स्वयमेवावाचयदिति ज्ञेयम् एवं पूर्वोक्तं बुद्धिसत्तमत्वं तथा बृहस्पतिशिष्यतया वाग्मित्वादिकं च दर्शितम् ॥ २८ ॥

हि निश्चितं क्वचित् कदाचिदपि अन्यत्तैर्व्याख्यातं यद्वा सर्वात्मना सर्वेण प्रकारेण वियोगो नास्ति भवतीनां प्रकाशविशेषैरेव सह नित्यं रासादिलीलाभिर्व्रजे विहरमाणत्वादिति नित्यलीला सूचिता यद्वा सर्वत्रैव बहिरन्तश्च सदा मत्स्फूर्तेरिति सदृष्टान्तमाह । यथेति । खमित्यादि । यथाक्रमनिर्देशेन खादीनामपि पूर्वपूर्वस्य कारणत्वेनोत्तरस्मिन् कार्ये स्थितिः सूचिता तथाहमपि भवतीनां मनआदीनि गुणाश्च सौशील्यादयः किम्वा मनआदीनां गुणा वृत्तय एवाश्रयो यस्य तथाभूतः तत्र तत्र सदा वसन् परिस्फुरामीत्यर्थः ॥ २९ ॥

नचैवमत्र पुर्यां वर्तमानस्यापि तत्र तत्र स्थितिर्ममासम्भाव्येति मन्तव्यं मच्छक्तेर्दुर्वितर्क्यत्वादित्याह । आत्मनीति । सृजे प्रकटयामि हन्मि अन्तर्धापयामि अनु निरन्तरं पालये विचित्रविभूतिभिर्विभूषयामि तत्र चात्मन्येवेत्यादिना सृष्ट्यादेराधारः करणं कर्म कर्ता चाहमेवेति तत्र कारकान्तरसम्बन्धो निरस्तः । ननु नूनं त्रिगुणात्मिकया मायया सृजसि तत् किं नश्छलेनेत्यत आह । आत्ममायानुभावेन । आत्ममाया स्वरूपभूतमाया चिच्छक्तिः तस्याः प्रभावेण । ननु किमस्माकमन्येन त्वदीयरूपेण वयं तु त्वामेव व्रजेन्द्रनन्दनं लब्धुमिच्छामः तत्राह । भूतेन्द्रियगुणात्मना विशिष्टमात्मानमेव सृजे भूतानां सर्वजीवानाम् इन्द्रियाणि चक्षुरादीनि सौन्दर्यादिरागुणायति स्वस्मिन्नावर्तयतीति भूतेन्द्रियगुणो य आत्मा स्वभावस्तेन भवतीनां मनोहरं रूपमेवेत्यर्थः ॥ ३० ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

एवमाश्वास्य किञ्चित् स्वास्थ्यमुपलभ्य वक्तव्यमाह । यद्वा । तथापि वैकल्यह्रासमदृष्ट्वा व्यग्रः सन् तत्सन्देशेनैव वा स्वास्थ्यं भवतीति । सम्भाव्य तमेव वक्तुमारभते । श्रूयतामिति । प्रियस्य सन्देशः । ननु तेन सन्देशेनालं येनाशु तत्प्राप्तिर्न स्यात् तत्राह । भवतीनां परमोत्कण्ठितानां सुखावहः आश्वेव तत्प्राप्तेर्निर्द्धारणात् । तदर्थमेवात्रागतोऽस्मि न त्वन्यार्थमिति अस्मिन्नादरं जनयति । अन्यथा गोव्रजे तस्येत्यादिकमनेन प्रत्युत्तारितम् । भर्तुरित्यात्मनस्तद्भृत्यत्वं बोधितं तत्र च रहस्कर इत्यात्मनः परमाप्तत्वेन तत्संदेशादानयोग्यत्वं तथा सन्देशस्य गोप्यत्वं किञ्च भद्रा हे साध्व्य इति तासामेव तत्सन्देशैकपात्रत्वं तथा सन्देशस्यापि भद्रत्वमादरार्थं सूचितम् ॥ २८ ॥

तत्र च श्रीभगवानुवाचेति तत्तदक्षरैणैवाहं तद्वक्ष्यामीति भावः । तत्र च सुप्तोऽहं किल विललाप हेतिवत् लिट्! परोक्षनिर्देशस्तदर्थं तु नाहं विवेक्तुं शक्नोमि किन्तु भवत्य एव विचारयन्त्विति व्यनक्ति तथैवाह । भवतीनामित्यादि । तत्रापातप्रतीतो ज्ञानरूपः प्रथमार्थो रहस्यार्थान्तरगोपनाय प्रयुक्तोऽपि लोकरीत्या शोकशमक इव च भवतीति स्वयं भगवता विचार्य प्रयुज्यते स्म । तत्र न ज्ञानं नच वैराग्यं प्रायः श्रेयो भवेदिहेति नात्यन्तिकं विगणयन्त्यपि ते प्रसादमिति साधारणभक्तैरपि ज्ञानस्य तत्फलस्य च हेयतां शुद्धमत्प्रेममाधुर्यस्य सर्वातिशयितां स्वानुभवेनैव निश्चिन्वतीनां तासां स्फुरिष्यतीति विचार्य प्रेमानुभवप्रमाणकसिद्धान्तमयस्तासां प्रतीतये मध्ये न्यस्तः । अथ तथापि तासां तत्र स्फूर्तिमात्रप्रतीत्या समुत्कण्ठाक्लेशपराकाष्ठामाशङ्क्य ताभिरस्यामवस्थायामनुभूयमानो नित्यलीलारूपस्तृतीयस्त्वर्थः सद्यः शान्तये स्यात् । तदनुसन्धानञ्च मदुपदेशप्रभावेण भविष्यतीति विचार्यैव निर्दिष्ट इति ज्ञेयं तत्र भवतीनामित्यर्द्धकं मुख्यवाक्यम् । अस्य प्रथमोऽर्थस्त्वेवं मे मया सह भवतीनां वियोगः क्वचिदपि न हि स्यात् तत्र हेतुः । सर्वात्मना सर्वेषामात्मना उपादानरूपेणान्तर्यामिरूपेण चेति । अथ द्वितीयः । सर्वत्रैव बाहिरन्तश्च सदा मत्स्फूर्तेः सर्वात्मना सर्व प्रयत्नेन सर्वथैव मया सह वियोगो नास्तीति तदेव सदृष्टान्तमाह । यथेति । तत्राहमपि भवतीनां मनआदीनि गुणाः सौशील्यादयः मनआदीनां गुणवृत्तय एव वा आश्रयो यस्य सः । तेषामेवाश्रयरूपो वा तथा भूतोऽहं तत्र तत्र सदा वसन् परिस्फुरामीत्यर्थः । अथ तृतीयः सर्वात्मना सर्वेण प्रकाशेन वियोगो नास्ति किन्त्वेकेनानेन प्रापञ्चिकलोकप्रकटप्रकाशेनैव साम्प्रतोऽयं वियोगः अन्येन तदप्रकटप्रकाशेन तु संयोग एवेत्यर्थः । कथं तत्राह । यथा खादीनि भूतानि स्वस्व कार्येषु वाय्वादिषु अप्रकटप्रकाशेन वर्त्तन्त एव तथाहञ्च तत्र तत्र वर्त्ते इत्यर्थः । किमाकारस्तत्राह । भवतीनां बुद्ध्याद्याश्रयाकारः श्यामसुन्दरवेणुविलासिरूप एव सन्नित्यर्थः । एतदुक्तं भवति वृन्दावने मथुरायां द्वारकायामपि नित्यैव तस्य स्थितिः श्रूयते । वृन्दावने यथास्कान्दे तत्र वृन्दावनं रम्यं वृन्दादेवीसमाश्रितम् । हरिणाधिष्ठितं तच्च ब्रह्मरुद्रादिसेवितमिति । वत्सैर्वत्सतरीभिश्च सदा क्रीडति माधवः । वृन्दावनान्तरगतः सरामो बालकैर्वृत इति च । पाद्मपातालखण्डे । अहो अभाग्यं लोकस्य न पीतं यमुनाजलम् । गोगोपगोपिकासङ्गे यत्र क्रीडति कंसहेति । यमुनाजलकल्लोले सदा क्रीडति माधव इति च । बृहद्गौतमीये च इदं वृन्दावनं रम्यं मम धामैव केवलम् । इत्यारभ्य सर्वदेवमयश्चाहं न त्यजामि वनं क्वचित् । आविर्भावस्तिरोभावो भवेन्मेऽत्र युगे युगे । तेजोमयमिदं रम्यमदृश्यं चर्मचक्षुषेति । श्रीगोपालतापनीश्रुतौ । गोविन्दं सच्चिदानन्दविग्रहं वृन्दावनभूसुररुहतलासीनं सततं समरुद्गणोऽहं परमया स्तुत्या परितोषयामीति । जन्मजराभ्यां भिन्नः स्थाणुरयमच्छेद्योऽयं योऽसौ सौर्ये तिष्ठति योऽसौ गोषु तिष्ठति योऽसौ गाः पालयति योऽसौ गोपेषु तिष्ठतीत्यादि । मथुरायां यथादिवाराहे । अहोऽतिधन्या मथुरा यत्र सन्निहितो हरिरिति । पातालखण्डे । अहो मधुपुरी धन्या यत्र तिष्ठति कंसहेति । वायुपुराणे । चत्वारिंशद्योजनानां ततस्तु मथुरा स्मृता । यत्र देवो हरिः साक्षात् स्वयं तिष्ठति सर्वदेति गोपालतापनीश्रुतौ । प्राप्य मथुरां पुरीं रम्यां सदा ब्रह्मादिसेविताम् । शङ्खचक्रगदाशार्ङ्गै रक्षितां मुसलादिभिः । यत्रासौ

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

संस्थितः कृष्णस्त्रिभिःशक्त्या समाहितः।रामानिरुद्धप्रद्युम्नै रुक्मिण्या सहितो विभुरिति । अत एवोक्तम् मथुरा भगवान् यत्र नित्यं सन्निहितो हरिरिति। द्वारकायां यथैकादशस्कन्धान्ते। द्वारकां हरिणा त्यक्तां समुद्रोऽप्लावयत् क्षणात्। वर्जयित्वा महाराज ! श्रीमद्भगवदालयम्। नित्यं सन्निहितस्तत्र भगवान् मधुसूदनः । स्मृत्याशेषाशुभहरं सर्वमङ्गलमङ्गलमिति । अत्र श्रीविष्णुपुराणे त्वयं विशेषः।यदुदेवगृहन्त्वेकं नाप्लावयदिति कृष्णक्रीडाकरं स्थानमिति च। सर्वत्र जयति जननिवास इत्यादिकमुदाहरणीयम् । अतस्तत्र तत्र नित्यैव तस्य स्थितिर्वर्त्तते अथ च जन्मादिलीलायां गमनत्यागौ च श्रूयेते इति प्रकाशभेदेनैवोभयविधत्वं व्यवतिष्ठते तथाहि नचान्तर्न बहिर्यस्येत्यादिदामोदरलीलादृष्ट्या मृद्भक्षणलीलादौ च श्रीव्रजेश्वर्य्यादीनां तथानुभूत्याच श्रीकृष्णविग्रहस्य मध्यमत्वे एव विभुत्वं दृश्यते। तच्च विरोधिधर्मद्वयमेक एतास्मिन्नासम्भवम् अचिन्त्यशक्तित्वात्। तस्य च "श्रुतेस्तु शब्दमूलत्वात्" इत्येतन्न्यायसम्मतत्वात्। तदेवं विभुत्वे सति युगपदनेकस्थानाद्यधिष्ठानार्थं रूपान्तरसृष्टिः विष्टपेषिता । किन्तु युगपन्मध्यमत्वविभुत्वप्रकाशिकया तयैवाचिन्त्यशक्त्या तदिच्छानुसारेणैक एव श्रीविग्रहोऽनेकधा प्रकाशते।बिम्ब इव स्वच्छोपाधिभिः किंतु तत्रोपाधिमात्रजीवनत्वेन साक्षात्स्पर्शाद्यभावेन वैपरीत्यादिनियमेन बिम्बस्य परिच्छिन्नत्वेन च प्रतिबिम्बत्वम् । अत्र तु स्वाभाविकशक्तिस्फुरितत्वेन साक्षात्स्पर्शादिभावेन यथेच्छमुदयेन तद्विग्रहस्य विभुत्वेन च बिम्बत्वमेवेति विशेषः। तत्र तेषां प्रकाशानां तयैवाचिन्त्यशक्त्या पृथक्पृथगेव क्रियादीनि भवन्ति अत एव युगपदाविर्भूतानां प्रकाशभेदावलम्बिनां निमेषोन्मेषादिक्रियाणामविरोधः। अत एव विभोरपि परस्परविरोधिक्रियागणाश्रयस्यापि तत्तत्क्रियाकर्तृत्वं यथार्थमेव तद्यथार्थत्वे नष्टु श्रीभागवतादि वर्णितं विदुषां तदुद्भवं सुखं नोत्पद्यते इति तदन्यथानुपपत्तिश्चात्र प्रमाणम् । इत्थमेवाभिप्रेत्य भगवता नारदेन "चित्रं बतैतदेकेन वपुषा युगत् पृथक्" इत्यादौ वपुष एकत्वेऽपि पृथक् प्रकाशत्वं तेषु प्रकाशेषु पृथक् पृथक् क्रियाधिष्ठानादित्वं तादृशमुन्यादावपि न सम्भवतीति स्वयं चित्रत्वं च वक्ष्यते। एष प्रकाशः क्वचिदात्मशब्देनोच्यते क्वचिद्रूपादिशब्देन च। यथात्रैव नहि सर्वात्मना क्वचिदिति। अन्यत्र कृत्वा तावन्तमात्मानमिति । तावद्रूपधरोऽव्यय इति कृष्णेनेच्छाशरीरिणेति च। तत्र नानाक्रियाद्यधिष्ठातृत्वादेव लीलारसपोषाय तेषु प्रकाशेष्वभिमानभेदं परस्परमननुसन्धानञ्च प्रायः स्वेच्छयाङ्गीकरोति भगवानित्यपि गम्यते एवं तच्छक्तिमयत्वात्तत्परिकरेष्वपि ज्ञेयम् । तत्र तेष्वपि प्रकाशभेदो यथा कन्याषोडशसहस्रविवाहे श्रीवसुदेवदेवक्यादिषु । वक्ष्यते च टीकाकृद्भिः । अनेन देवक्यादिबन्धुजनसमागमोऽपि प्रतिगृहं यौगपद्येन सूचित इति । तेषु श्रीकृष्णे च प्रकाशभेदादभिमानभेदो यथा नारददृष्टयोगमाया वैभवे । तत्र तत्र ह्येकत्र। दीव्यन्तमक्षैस्तत्रापि प्रियया चोद्धवेन च । पूजितः परया भक्त्या प्रत्युत्थानासनादिभिरिति । तत्रान्यत्र मन्त्रयन्तं च कस्मिंश्चित् मन्त्रिभिश्चोद्धवादिभिरिति । तत्र भावभेदादभिमानभेदो लक्ष्यते । अयमेतद्वयस्थोऽहमत्रास्मीति एवं षोडश सहस्र कन्याविवाहे कुत्रचित श्रीकृष्णसमक्षं कर्म कुर्वत्या देवक्यास्तद्दर्शनसुखं भवति तत्परोक्षं तद्दर्शनोत्कण्ठेति । यथा योगमायावैभव एव क्वचिदुद्धवेन संयोगः क्वचिद्वियोग एव इति विचित्रता। तदेवं तत्र प्रकाशभेदे सति तद्भेदेनाभिमानक्रियाभेदेचावस्थिते सति स च प्रकाशो द्विविधो ज्ञेयः॥ प्रकटोऽप्रकटश्च। तत्र प्रकटः प्रापञ्चिकेष्वभिव्यक्तिः॥ अप्रकटस्तेष्वनभिव्यक्तिः। तत्र पूर्वमष्टाविंशेऽध्याये यो गोलोकतया दर्शितः श्रीवृन्दावनस्यैव प्रापञ्चिकेष्वप्रकटः प्रकाशविशेषस्तत्र तदानीमपि स्थितेन श्रीकृष्णस्याप्रकटाख्येन प्रकाशविशेषेण तासामप्यप्रकटप्रकाशैः संयोगः श्रीवृन्दावनप्रकटप्रकाशे प्राक्स्थितेन सम्प्रति मथुराप्रकटप्रकाशं गतेन श्रीकृष्णस्य प्रकटप्रकाशेन तु तासां प्रकटप्रकाशैर्वियोग इति। तदेव सदृष्टान्तमाह। यथेति। तत्र प्रथमार्थे खं वाय्वग्निर्जलं महीति। खादीनि भूतानि यथा भूतेषु वाय्वादिपार्थिववस्त्वन्तेषूपादानतयानुगमितानि तथा अहं सर्वेष्वित्यर्थः। अथ द्वितीयः। यथा भूतानि भूतेषु कार्यरूपेषु भूतानि कारणरूपाणि आश्रयत्वेन वर्त्तन्ते तथाहमपि भवतीनां ये मनआदयो गुणाश्च धैर्यादयस्तेषां मत्स्फूर्त्त्येकजीवनानामाश्रय इत्यर्थः। अथ तृतीयः। तत् कथं तत्राह। यथा खादीनि भूतानि स्वस्वकार्येषु वाय्वादिषु अप्रकटप्रकाशेन वर्त्तन्त एव तथाहमत्र वर्त्ते इत्यर्थः। किमाकारस्तत्राहं भवतीनां मनआद्याश्रयाकारः श्यामसुन्दरवेणुविलासिरूप एव सन्नित्यर्थः॥ २९॥

आत्मन्येवेति। तत्र प्रथमार्थः। नन्वेकस्योपादानत्वमन्तर्यामित्वं च तु घटे घटादौ मृत्तिकादेरन्तर्यामित्वासम्भवात् मतान्तरेऽप्युपादानरूपाणां परमाणूनामचेतनानामन्य एव चेतन ईश्वरस्तन्नियामकः तत्राह। आत्मन्येवेति। आत्मन्येवाधिष्ठाने आत्मना निमित्तेनात्मानमुपादानरूपं भूतेन्द्रियगुणात्मना भूतरूपेणेन्द्रियरूपेण गुणरूपेण जीवरूपेण च सृजामि प्रकटयामि भूतेन्द्रियेति पाठे भूतान्युपलक्षणीयानि। नन्वात्मा खल्वेक एव तस्याधिष्ठानादित्वं युगपत्कथं सिद्ध्यतीत्याशङ्क्य सर्वाशङ्कानिरसनार्थमाह। आत्ममायानुभावेन अचिन्त्यशक्तिप्रभावेण "श्रुतेस्तु शब्दमूलत्वात्" इति न्यायेन चिन्तामण्यादिष्वपि तादृशत्वदर्शनेन चेति भावः। द्वितीयो यथा ननु सत्यमस्मासु तथैव त्वं स्फुरसि त्वयि तु न वयं संयोगो नाम च स्वप्नादिव्यतिरिक्तं मिथो मिलनमेव तत्राह। आत्मनि चित्ते निर्विकारेऽपि आत्मना मनसा सङ्कल्पविकल्पात्मकेन आत्मानं प्रयत्नं भवत्संयोगविलासात्मकमेकं सृजे करोमि आत्मा देहमनोब्रह्मस्वभावधृतिबुद्धिषु प्रयत्ने चेति विश्वप्रकाशः। न केवलं सृजे अनुपालयामि चिरकाळं व्याप्य संवर्द्धयामि च तथा हन्मि विलासान्तरार्थे तं दूरीकरोमि च एवमन्यमपि जानीतेत्यर्थः। कीदृशेनात्मना आत्मनः स्वस्य माया भवतीषु दया आत्मनि स्वस्मिन् भवतीनां वा दया तस्या अनुभावः प्रभावो यत्र तादृशेन पुनः कीदृशेन भूतानि सिद्धानि साक्षात् स्थितान्येव इन्द्रियाणि चक्षुरादीनि गुणा रूपादयः आत्मनः अहङ्कारास्पदानि च यत्र तादृशेन भूतेति पाठे ननु मनोरथमात्रमिदं भवतः कथं सत्यं स्यात्तत्राह। बुद्धिगुणाः विवेकादयः इन्द्रियगुणा दर्शनादयश्च आत्मानस्तदात्मतां प्राप्ता यत्र तादृशेन विचारसिद्धप्रत्यक्षसंवलितेनेत्यर्थः तस्मादुभयानुभवाद्बहिः प्रातीतिकोऽयं वियोगो नादरणीय इति भावः। तृतीयो यथा। ननु तथा तथा प्रकाशः कथं सम्भवति तत्राह। आत्मनि विग्रहस्वरूपेऽधिष्ठाने आत्मनि तेनैव करण-

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

भूतेन आत्मानं तत्प्रकाशविशेषं सृजे तदात्मानं सृजास्यहमितीति वत् आविर्भावयामि अनुपालयेऽभीष्टलीलापर्यन्तं रक्षामि हन्मि तदवसानेऽन्तर्धापयामि । ननु कथं तेनैव सृजसि तत्राह । आत्ममाया अचिन्त्यशक्तिस्तस्या अनुभावो यत्र तादृशेन तेन पुनः कीदृशेन भूतानि नित्यसिद्धानीन्द्रियाणि गुणा रूपादयश्च आत्मा स्वरूपं च यस्य तादृशेन बुद्धीति पाठे बुद्ध्योऽन्तःकरणानि च इन्द्रियाणि च गुणाश्च आत्मानः स्वरूपभूतान्येव यत्र तादृशेन अतस्तत्र तत्र प्रकाशमात्रमेव स्यात् न तु विकार इति भावः ॥ ३० ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

रहस्करः रहस्यप्रकाशकः ॥ २८ ॥

तथाहं चेति । व्याप्य स्थित इति शेषः स्वमेव विशिनष्टि । मन इति । मनः प्राणाद्याधारभूतः स्थित इत्यर्थः ॥ २९ ॥

मायानुभावेन स्वसङ्कल्पानुभवेन भूतेन्द्रियगुणात्मना भूतेन्द्रियादिरूपेण सृजामीत्यर्थः ॥ ३० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका

एवं ताः प्रशस्याथ प्रियसन्देशः श्रूयतामित्याह श्रूयतामिति । हे भद्राः भवतीनां सुखकरः प्रियस्य सन्देशः श्रूयतां सन्देशं विशिनष्टि भर्तुः रहस्करः भगवतः रहस्यप्रकाशकः अहं यं सन्देशमादायागतः ॥ २८ ॥

स्वसन्त्यात्मभ्रमदेहात्मभ्रमरूपमोहशान्तये चिदचिदीश्वरतत्त्वोपदेशपराणि प्रियसन्देशवचनान्येव सान्त्वनरूपाण्याह । भवतीनामिति नवभिः । मे मम सर्वात्मना भावप्रधानो निर्देशः सर्वेषामन्तरात्मतया भवतीनां वियोगो मद्विश्लेषो नास्ति नह्यात्मानं विहाय शरीरं तिष्ठतीति भावः । सर्वकारणतयापि न वियोग इति दृष्टान्तमुखेनाह । यथा भूतेषु देवमनुष्यादिशरीरेषु कार्येष्वाकाशादीनि महाभूतानि वर्तन्त इति शेषः । वाय्वग्निजलमिति समाहारत्वैनैकवचननिर्देशः यथा महाभूतानां तत्कार्याणां च मिथो वियोगो नास्ति कारणतया तेषां तेषु समन्वयादित्यर्थः । तथाहमपि मनआदीनामाश्रयः आधारः तद्विशिष्ट इति यावत् कृत्स्नजगदन्तर्भूतचिदचिदात्मकपदार्थेषु कारणतया समन्वितः अत्र प्राणो जीवः इन्द्रियाणि श्रोत्रादीनि गुणाः शब्दादयः साश्रयाः गुणपदेन मुख्यप्राणोऽपि सङ्गृह्यते वायुपरिणामविशेषरूपत्वात् अयं भावः महदादिपृथिव्यन्ताचेतनवर्गशरीरकः कृत्स्नजगद्रूपेण परिणतोऽहमतो न वियोगः नहि कारणं विहाय कार्यं तिष्ठति कारणस्यैवोत्तरोत्तरावस्थाविशिष्टस्य कार्यत्वादिति ॥ २९ ॥

सत्यं कार्यं न कारणाद्वियुज्यते मनआदिशरीरकत्वरूपविशिष्टविशेषण त्वं कृत्स्नजगदुपादानकारणं तथापि मनआदीनामन्यकारणकत्वेन तव कृत्स्नजगदुपादानत्वसिद्धिः तथाधारोपकरणकर्महेतुस्थितिलयकारणानामन्यत्वेऽपि नेत्यत आह । आत्मन्येवेति । आत्मन्येवेत्यनेनाधारान्तरव्यावृत्तिः आत्मनेत्यनेनोपकरणान्तरस्यात्मानमितिसृज्यान्तरस्य सृज इत्यनेन निमित्तान्तरस्यानुपालये हन्मीति पदाभ्यां स्थितिलयकारणान्तरयोः एवं न केवलं व्यष्टिरूपेणैव सृजाम्यपि तु समष्टिरूपेणापीत्याभिप्रायेण भूतेन्द्रियगुणात्मनेत्युक्तम् अनेन महदादिपृथिव्यन्तानामपि स्वोपादानकत्वसिद्धिः । आत्ममायया स्वसङ्कल्पः एकोऽहं बहु स्यां प्रजायेयेत्येवं रूपः तस्यानुभावेन प्रभावेण हेतुना अनेन हेत्वन्तरव्यावृत्तिः कारणत्वोपयुक्तसार्वज्ञ्यसर्वशक्तित्वादिगुणयुक्तिश्चाभिप्रेता अत्र "ब्रह्म वनं ब्रह्म स वृक्ष आसीत् तदात्मानं स्वयमकुरुत" इत्यादिश्रुत्यर्थोऽभिप्रेतः तत्राधारत्वनिमित्तत्वस्थितिकारणत्वान्यविशिष्टब्रह्मगतान्युपादानत्वोपकरणत्वसृज्यत्वव्यष्टिसृष्टिसंहारकारणत्वानि तु चिदचिच्छरीरकब्रह्मगतानीति विवेकः ॥ ३० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

इदानीं कृष्णसन्देशं वक्तुमुपक्रमते । श्रूयतामिति ॥ २८ ॥

सर्वात्मना सर्वप्रकारेण निरूप्यमाणे सति एनमर्थं दृष्टान्तेनोपपादयति । यथेति । यथा पञ्चभूतानि भूतेषु चराचरशरीरेषु कारणत्वेनानुगतानि तथाहं कानि तानि भूतानीत्यत आह । खमित्यादिना । वाय्वग्निरिति छान्दसः प्रयोगः ॥ २९ ॥

सामान्यतउक्तं विशिनष्टि । मन इति । नन्वत्र मुख्यकारणत्वं कस्येति तत्राह । आत्मना परमेरणामन्तरेणात्मानं देहादिसंघं सृजे हन्मि संहरामि अनुपालये रक्षामीति ननु तर्हि भूतकर्त्वं तद्भिन्नः किमित्यत उक्तम् आत्मनीति ॥ ३० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

अत्रापातप्रतीतो ज्ञानरूपः प्रथमार्थो रहस्यान्तरगोपनाय प्रयुक्तोऽपि लौकरीत्या शोकशमक इव भवतीति प्रयुज्यते स तत्राकाचिदाशङ्कया द्वितीयस्त्वर्थः प्रेमानुभवप्रमाणकसिद्धान्तमयो मध्ये विन्यस्तः । अथ तासां तथाप्युत्कण्ठापराकाष्ठामाशङ्क्य तामिरस्यामवस्थायामनुभूयमानो नित्यलीलारूपस्तृतीयस्त्वर्थः । सद्यः शान्तये सहसैव निर्दिष्ट इति ज्ञेयम् । तत्र प्रथमोऽर्थष्टीकायामेव दृश्यः । तृतीयः कृष्णसन्दर्भे । अथ द्वितीयो यथा । सर्वत्रैव बहिरन्तश्च सदा मत्स्फूर्तेः सर्वात्मना सर्वथैव मया सह वियोगो नास्ति तदेव सदृष्टान्तमाह । यथेति । तथाहमपि भवतीनां मनआदीनि गुणाश्च सौशील्यादय आश्रयो यस्य तथाभूतः सन् तत्र तत्र सदा वसन् परिस्फुरामीत्यर्थः इत्यादिकं श्रीदशमटिप्पण्यां दृश्यम् ॥ २८—४८ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

अतोऽनुगृहीतेन धाष्टर्यात् किञ्चिद्विज्ञाप्यत इत्याह । श्रूयतामिति । स्तोत्रवदेतदप्यनभिप्रेतं शास्यन्तीत्याह । प्रियसंदेश इति । भगवतोऽयं संदेशपरेन चैतत् ज्ञापयति तदुक्तं भवतीभिरवश्यं कर्तव्यमिति । अन्यथा तदुपदेशं शृणुतेत्येव वदेत् । प्रियेणोपदिष्टत्वात् असाध्यता दुःसाध्यता च निवृत्तैव कदाचिदन्यार्थमुपकारवद्वदेत् तद्व्यावृत्त्यर्थमाह । भवतीनां सुखावह इति । इष्टफलापेक्षा भवत्यः सुखं चावहतीति तत एव सुखं न तु भवतीनां पुनः साधनान्तरापेक्षापि । नन्वेतादृशत्वे किं प्रमाणं तत्राह । यमादायागत इति । मया हि प्रथमतः सोऽर्थो ज्ञातः ज्ञायते च भवतीनामधिकारः एवमपि सति यत्पुनः तमेव संदेशमाद

श्रीमद्वल्लभाचार्यकृतसुबोधिनी।

याहमागतः भर्तृरहस्करः भर्त्ता हि सः भवतीनां ममापि स तमुपायं न वक्ष्यत्येव येन वयममृता भवामः नापि प्रायिकोऽर्थः यतोऽहमेकान्त एवाभिप्रेतं करोमि एकान्तं वा करोमि एकान्तं गूढकर्त्ता न प्रतार्यते भर्त्ता च न प्रतारकः अतः संदेशो यथोक्तफलकः ॥ २८ ॥

तमेवाह दशभिः। भवतीनामिति—

षड्भिः स्वरूपकथनं पुरुषार्थास्ततः परैः।
जीवब्रह्मविभेदेन द्वेधा रूपं निरूप्यते ॥
दोषाणां मूलभूतस्य विरहस्य निवारणे।
बन्धमोक्षव्यवस्थायां जीवो द्वेधा निरूप्यते ॥
आश्रयत्वाच्च कर्तृत्वाद्द्वेधा ब्रह्मापि रूप्यते।
दोषाभावप्रतिज्ञाद्यैर्हेतुभिर्विनिरूप्यते ॥
फलं जीवेति येनैषा बुद्धिर्नश्यति सर्वथा।
गुणा विभाजका यस्मात् तदा त्रिभिरुदीर्यते ॥

तत्र प्रथमं वियोगाभावाय मूलहेतूनवदन् प्रतिजानीते। भवतीनामिति। वियोगः स्वाभाविकः औपाधिकः अज्ञानतश्चेति त्रेधा भवति आत्मनां जीवानामेकत्वात् परस्परभेदाभावेऽपि औपाधिको भेदो हि तत्रोपायः उद्यमो वा माया वा भगवदिच्छा वा अज्ञानं चेति वादान्तरं जीवब्रह्मणोस्तु भेदे अज्ञानमेव हेतुः सुतरां वियोगे ब्रह्मणस्तु तदुभयाभावात् न जीवैः सह कथञ्चित् भेदः भगवांस्त्यक्त्वा गत इति हि ईर्ष्यादौ हेतुः स नापि त्यजति नापि त्यागं मन्यते जीवास्तु भगवन्तं त्यक्ष्याम इति वदन्तः भ्रान्ता एव अतोऽयमर्थो निरूपणीयः तत्र द्वेधापि प्रतिजानीते। भवतीनां वियोगो मम नास्ति मम च वियोगो भवतीनां नास्ति। एकत्र कृतघ्नता अपरत्र दुःखं च फलति वस्तुस्वरूपेण वियोगाभावेऽपि एकदेशेन वृक्षकपिवियोगवत्कालभेदेन च स्त्रीपुरुषवच्च वियोगः सम्भवति तदुभयं निषेधति। नहि सर्वात्मनेति। क्वचिदिति काले सर्वात्मना केनाप्यंशेनेति देशे एवं चतुर्द्धा भवति अत्र प्रायेण साधनचतुष्टयप्रतिपादकम् अर्द्धमन्तरितमिति प्रतिभाति आत्मत्वात् भक्तवश्यत्वात् सत्यवाक्त्वात् स्वभावत इत्येवं रूपं गोपिकावियोगो भगवतो नास्ति भगवानात्मेति भगवद्वियोगश्च न गोपिकानां भक्तवश्यत्वात् कालभेदेनापि न वियोगः न पारयेऽहमिति नह्येतावदुक्त्वा एतावत्यर्थे तासामिच्छां किन्तु पूरयेत् भगवतश्चायं स्वभावः यत् स्त्रीषु कृपावान् अतः केनाप्यंशेन ता न परित्यजन्ति विशेषहेतव एते चत्वारि भवन्ति सामान्यहेतूनाह। यथा भूतानीति द्वाभ्याम् भगवानाश्रय इति ता विहाय यास्यति अन्यथा आधारात्तासां भावे स्वरूपमेव न तिष्ठेत्। अथ देहभावेन आत्मा गौण इति देहेन सह वियोगः आविर्भूतस्योच्येत तदपि न घटते समवायिकारणत्वेन तेषु वर्त्तत इति अन्यथा देहा निःस्वभावाः स्युः आविर्भूतेन वियोगस्तु हितकारी अन्यथा स्वरूपनाश एव स्यात् यथाग्निकाष्ठयोः सर्वसम्बन्धेनैवैता अर्द्धदग्धा पुनः सम्बन्धेन संदाह एव स्यात् सुखानुभवस्तु स्वान्तःस्थितान्याभिव्यक्तिवत् स्वान्तः स्थित भगवदभिव्यक्त्या सर्वदाभिव्यक्तौ काष्ठांशो ज्वलिष्यतीति न सम्भवते यतो भगवान् प्रलयकर्ता स्थितिहेतुत्वात् नैकदेशेनापि वियोगः सम्भवति तदाह। दृष्टान्तेन यथा भूतानि महाभूतानि अन्येषां भूतानामाधारभूतानि सन्ति तेभ्यो न वियुक्तानि भवन्ति तथा भगवानपि देहांशेन न वियुक्त इति दृष्टान्तेनैव साधितं प्रकारेणैव तल्लभ्यमिति अनन्यलभ्यो हि शब्दार्थः साधारणदृष्टान्तेन च चकारात् पुनरुक्तेन दृष्टान्तान्तरमाह। यथाहमिति। देहव्यतिरिक्तानि च मनःप्राणबुद्धीन्द्रियगुणात्मकानि तेषामप्यहमाश्रयः समसङ्ख्यार्थं पञ्च गणिताः सत्त्वादिगुणेषु प्रकृतेरन्तर्भावः अहङ्कारस्य च त्रिगुणात्मकत्वात् बुद्धौ चित्तस्य प्राणाः दशेन्द्रियाणि च सङ्कल्पादि सर्वधर्मसहितं च मनः क्रमेण च अन्नमयं हि सौम्य मनः आपोमयः प्राणः तेजोमयी वागिति सा हि बुद्ध्यात्मिका ज्ञानप्रधाना यथारूपं क्रियाप्रधान इन्द्रियाणि प्राणेन वायुना पुष्टानि गुणास्त्वाकाशे अत एवाप्रतमःप्रकाशाः आकाशे भवन्ति च खं वाय्वग्निर्जलं महीत्युत्पत्तिप्रकारेणाधारत्वेन वा गणना अन्नं महीपर्यायः एतेषु जीवास्थितेषु कारणभूतानि सन्तीति वक्तव्येऽपि प्रसिद्धभावात् नोक्तम् ॥ २९ ॥

अतः परं कारणभूतत्वात् कार्यस्य न कारणव्यतिरेक इति भगवद्विरहो गोपिकानां नास्तीति वक्तुमाह। आत्मन्येवेति। कर्ता भगवान् "यतो वा इमानि भूतानि जायन्ते" इति श्रुतेः समवायश्च भगवान् "तस्माद्वा एतस्मादिति" श्रुतेः स आत्मानं स्वयमकुरुतेति श्रुतेश्च कार्यमपि स्वयमेव जीवपरत्वेऽपि सुतरामत्र न संदेहः आधारे संदेह इति समवाय्यतिरिक्ताधारं निरूपयन्नाह। आत्मन्येवेति। यथा कुलालश्चक्रे घटं करोति आत्मानात्मसङ्करप्रतिषेधाय एवकारः करणस्य भिन्नत्वमाशङ्क्याह। आत्मनेति। वैषम्यनैर्घृण्यादिदोषाभावाय कार्यस्याप्यन्यत्वं निवारयति। आत्मानमिति। कदाचिदानीय कश्चित् घटादिकमपि स्वस्मिन् स्थापयति स्वपादं च स्वजघने स्फोटयति च स्वस्मिन् तन्निषेधाय उत्पत्त्यादीनाह। सृजे हन्मि नाशयामि पालये परंपरया वा तत्त्वेष्वेव भवत्कारणता प्रतीयते न भौतिकेषु अत एव भूतैर्यदा पञ्चभिरित्यादि वाक्यानि तत्राह। आत्ममायानुभावेनेति। अहमेव तत्रापि करोमि परं मन्मायानुभावेन लोकोऽन्यथा मन्यते मायया वहितः मायां पुरस्कृत्य वा करणात्। ननु वाक्यानुभावाभ्यां पृथिव्यादेरेव कारणत्वं प्रतीयते तत्कथमत्र व्यामोह इति चेत्तत्राह। भूतानि। इन्द्रियाणि गुणाश्च आधिभौतिकादिभिन्नास्त्रिविधाः तदात्मभूता माया तेषु प्रविष्टा सा हि यत्र प्रविशति तत्रान्यदेव भासयति अकरणेषु करणत्वम् ॥ ३० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

ननु किमेतयैवास्मत्स्वश्लाघया चास्मान् सान्त्वयितुं त्वमिहायातः किञ्चिदस्ति वा कृष्णसंदेशादिकमस्मद्दुःखोपशमकं तद्ब्रूहीत्यत आह। श्रूयतामिति। भर्तुः कृष्णस्य रहस्करः रहस्यकार्यकर्त्ता ॥ २८ ॥

अत्र प्रथमो ज्ञानोपदेशरूपः संदेशः परमविज्ञान् प्रति तत्प्रेम्णोऽन्याधर्षणीयः महाबलवत्त्वज्ञापनार्थकः मन्दधियः प्रति तत्प्रेममाहात्म्याच्छादनार्थकश्च तथा हि मया गोपीभ्यो दातुमुद्धववद्वारा ज्ञानामृतं प्रेषितं तदपि तासां प्रेमाग्निं निर्वापयितुमसमर्थं प्रत्युत तत्तापेनैवालीढं बभूवेत्यहो तासां प्रेमप्रावल्यं यन्मनो योगेश्वरेण मयाप्युपदिष्टो ज्ञानयोगो वैयर्थ्यमगात्। यथा रासारम्भे कर्मयोग इत्यन्तरङ्गानिज्ञभक्तान् प्रेम्णः प्राबल्यं प्रकाशया-

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

मास । महाप्रेमवतीष्वपि गोपीषु सर्वहितकारिणा परमेश्वरेण मोक्षसिद्ध्यर्थं ज्ञानोपदेशः कृतः इत्यन्यान् पण्डितमन्यान् मन्दधियः प्रति प्रेम्णो माहात्म्यमाच्छादयामास रहस्यत्वादित्येवं भक्ताविबुधान् प्रेमामृतस्य प्रदानेन पुष्णाति अभक्तांस्तुरासुप्रदानेन वञ्चयतीत्युभयमेव मोहिनीसधर्मणः शास्त्रस्यास्य प्रयोजनं ज्ञेयम् अथ प्रकृतमनुसरामः भगवानुवाचेत्युद्धववाक्यं तत्रोवाचेति लिटा महाप्रेमवतोऽपि मत्प्रभोरेतादृशो वचनस्य प्रयोजनं मम दुर्गमत्वात् परोक्षमेवेति ज्ञापितं भवतीनां मे मया सह सदा वियोगो नास्त्येव कथं रुदित्वा रुदित्वा मर्त्तुमीहध्वे इति भावः। कुतःसर्वेषामात्मनापरमात्मनाअहं हि परमात्मा भवामि अत्र सर्वशास्त्राणि सर्वे गर्गादयो मुनयश्च वरुणादयो देवाश्च प्रमाणं तस्मात्परमात्मरूपेण भवतीनां देहेष्वहं वर्त्ते एवेत्यतो मया सह सदा संयोग एवेति भावः । अत्र च यथा रासारम्भे धर्मोपदेशवाक्ये ऽप्यभ्यन्तरी शृङ्गारकथा स्वोपालम्भतद्दोषनिवृत्त्यर्थी स्थापिता तथा हि दिनान्तरे भो कृष्ण ! कामुकशिरोमणे त्वया रासकेलिदिने कथमस्मासु धर्मोपदेशः कृत इति प्रेयसीभिः सोपालम्भमुक्ते सति भो आविकुल्यः मया तु तद्दिने सम्भोगकृत्योपदेश एव कृतः कथं मुग्धाभिर्भवतीभिर्धर्मोपदेश एवावधारितः इत्युक्त्वा रजन्येषा घोररूपा इत्यादिवाक्यानां सम्भोगकथारूपं द्वितीयमर्थं कृष्णो व्याचष्ट स्म तथैव सुदूरप्रवासान्ते भाविनि संयोगे भोः प्राणनाथ ! कथमस्मासु महाविरहिणीषूद्धवद्वारा त्वया ज्ञानोपदेशः कृत इत्याभिर्गोपीभिर्वक्ष्यमाणे भो अविदग्धा मया तूद्धवद्वारा प्रेमरीत्युपदेश एव कृतः कथं युष्माभिर्ज्ञानोपदेश एवावधारित इत्युक्त्या भवतीनां वियोगो मे इत्यादिवाक्यानां द्वितीयं प्रेमरीतिमयमर्थं व्याख्यास्यतीत्यत एतेषु वाक्येषु वर्त्तमान एव द्वितीयः प्रेमरीतिमयोऽर्थो व्याख्येयः स यथा भवतीनां मया सह विरहो न सर्वेणात्मना किं त्वेकेन देहेनैव आत्मशब्दस्य देहजीवमनोबुद्धिवाचित्वात् प्रेमा ह्यात्मधर्म एव ममात्मबुद्धीन्द्रियादयो भवतीष्वेव स्थिताः केवलमेको देह एव मथुरामानीतः भवतीनामप्यात्मानो बुद्धीन्द्रियादयो मय्येव वर्त्तन्ते केवलं देहा एव तत्र व्रजे स्थिताः किं त्वहं सर्वशास्त्रेषु सर्वैः प्रेमाधीन एव निरूपितः अत एव प्रेम्णि मम नास्ति स्वातन्त्र्यं प्रेमवतामस्माकं परस्परदेहविच्छेद एव विप्रलम्भस्तमारुह्य प्रेमा सम्प्रत्यतिवर्द्धितुमिच्छति अतो मया सोत्कण्ठेनापि स्वदेहः कथं साम्प्रतं व्रजमानेतुं शक्यः किं तु स एव प्रेमा स्वाभीप्सितां वृद्धिं प्राप्य विप्रलम्भं दर्शयित्वा यदा सम्भोगभूमिकामारोक्ष्यति तदैव मया तदधीनेन स्वदेहो व्रजमानेतव्य इति देहेनापि वियोगोऽपयास्यतीति भावः । किं त्वहम उपादानकारणत्वादपि सर्वभूतेषु वर्त्ते एवेत्याह । यथेति । भूतेषु चराचरेषु भूतानि महाभूतानि तान्येव कानीत्यत आह । खमिति । वाय्वग्निः वायुसहितोऽग्निः यथा वर्त्तते तथैवाहं मनआदीनि कार्याणि गुणास्तेषां कारणं सर्वेषामपि परमकारणत्वेनाश्रयः । तत्र तत्रानुगतो वर्त्ते एवेत्यर्थः । पक्षे मां सदा प्रेम्णा ध्यायन्तीनां भवतीनां मनःप्राणबुद्धीन्द्रियगुणान् शब्दादींश्च आश्रयामीति सः आश्रित्य तत्र तत्र स्फुरन्नेवाहं सदा वर्त्ते इत्यर्थः ॥ २९ ॥

किञ्चाहमेव कर्त्ता अधिकरणं कर्म चेत्याह । आत्मन्येवाधिष्ठाने आत्मनैव कारणेन आत्मानमेव जगद्रूपं सृजे सृजामि । ननु त्वं सच्चिदानन्दस्वरूपः । जगदिदं ततो भिन्नं प्रतीयते तत्राह । आत्मनो मम या माया शक्तिस्तस्या अनुभावः कार्यं तेन भूताद्यात्मना सृजामि । तस्या मद्बहिरङ्गशक्तित्वाज्जगतोऽस्य मद्रूपत्वं नतु मत्स्वरूपत्वमिति भावः।पक्षे भवतीनामात्मनि मनसि आत्मना प्रयत्नेन आत्मानं स्वं सृजाम्याविर्भावयामि सम्भोगादिलीलार्थं मुहूर्त्तमनुपालयामि । ततो हन्मि अन्तर्द्धापयामि केन प्रयत्नेन आत्ममायाप्रभावेण योगमायाप्रभाव एव मम प्रयत्न इति भावः।आत्मानं कथम्भूतं भूतान्यङ्गानि इन्द्रियाणि चक्षुरादीनि गुणाः सौन्दर्यमाधुर्यवैदग्ध्यादयः । आत्मानो बुद्ध्यादयस्तेषां द्वन्द्वैक्यं तेन सहितम् ॥ ३० ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

"तेषां सततयुक्तानां भजतां प्रीतिपूर्वक"मिति भगवद्वाक्यात् भगवद्भक्तिमूलं तत्त्वज्ञानं भगवद्वाक्यैर्वक्तु मवतारयति। श्रूयतामिति । ननु नेमानि स्तुतिवाक्यान्यस्माकं सुखजनकानि प्रियेणास्मान्प्रति किंचिदुक्तं चेत्तर्हि तद्वदेति चेत्तदेवेदानीं निवेदयामीत्याह । प्रियेति । सम्यगुपदेशरूपः संदेशः अवश्यकर्तव्यःप्रियसम्बन्धित्वाच्च प्रियवदादरणीयः तथापि भवतीनां सर्वसाधनफलैरेवंविधप्रेमवतीनां सर्वासामस्मिन्नेव जन्मनि सुखावहः नतूत्कृष्टसाध्यसाधनेषु प्रवर्त्ततेन दुःखजनकः अत एवायं संदेशः भगवन्मुखपद्मादादायाहमागतो नत्वन्यायः कश्चित् यतोऽहं भर्तू रहस्करः रहस्यकार्यकर्त्ता तथा च रहस्यमेवार्थं तेनोपदिष्टं वक्तुमहमागत इति भावः । यतः भवत्यो भद्राः कल्याणरूपिण्यस्तत्पात्रभूताः एतेन भर्त्रेह प्रेषित इत्याद्युपालम्भो निराकृतः युष्मत्प्रियचिकीर्षया समागतोऽप्यहमेतद्रोपनार्थमादौ तत्पितृगृहं प्रविष्ट इत्याशयात् ॥ २८ ॥

तत्र सर्वोपालम्भकारणं व्यसृजदकृतचेता इत्युक्तं त्यक्त्वा तद्वमनं भगवत्संदेशेन निराकरोति । भवतीनां मे मया सार्द्धं वियोगो नास्तीति प्रतिज्ञा तत्र हेतुगर्भितं विशेषणं सर्वात्मनेति सर्वस्यात्मना उपादानकारणेन"तदनन्यत्वमारम्भणशब्दादिभ्य" इति न्यायात् तस्मात्कारणात्परमार्थतोऽनन्यत्वं व्यतिरेकेणाभावः कार्यस्यावगम्यते कुतः "यथा सौम्यैकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं स्याद्वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्य"मित्यादिश्रुतिभ्यः आदिशब्दादैत"दात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि सर्वं ह्ययमात्मा ब्रह्मैवेदं सर्वम् आत्मैवेदं सर्वं नेह नानास्ति किंचने"त्येवमाद्यात्मैकत्वप्रतिपादनपरं वचनजातं गृह्यते तथा च यथा घटाद्याकाशानां महाकाशात् यथा च मृगतृष्णोदकादीनामूषरादिभ्यो नान्यत्वं दृष्टं तद्रूपत्वात्स्वरूपेणानुपाख्यत्वाच्चैवमस्य भोग्यभोक्त्रादिप्रपञ्चस्य ब्रह्मव्यतिरेकेणाभावः । ननु यथा वृक्षो नैकशाख एवमनेकात्मकमनेकशक्तिप्रवृत्तियुक्तं ब्रह्मात एकत्वमनेकत्वमुभयमपि सत्यमेव तथा मृदादिदृष्टान्ता अप्यस्मिन् पक्षे नाननुरूपा इति चेन्न मृत्तिकेत्येव सत्यं तत्सत्यमिति दृष्टान्तदार्ष्टान्तिकयोः प्रकृतिमात्रस्य सत्यत्वावधारणात् तत्त्वमसीति शारीरस्य ब्रह्मभावोपदेशाच्च उक्तमर्थं स्फोरयितुं सदृष्टान्तमाह । यथेति । भूतेषु स्थावरजङ्गमसंघातेषु महाभूतान्याकाशादीनि वायुसहितोऽग्निर्वाय्वग्निः ॥ २९ ॥

यथा भूतेषु चराचरेषु स्वस्मिन् कल्पितनामरूपत्वाद्वाचार

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

म्भणमात्रेषु प्रकृतित्वात्सत्याधिष्ठानरूपेण महाभूतानि वर्तन्ते तथाहमपि वाचारम्भणमात्राणां कार्यभूतानां मनआदीनां तत्कारणभूतानां सत्त्वादिगुणानां चाश्रयः अधिष्ठानरूपत्वात्सत्यत्वेनानुगतः ननु कार्यकारणयोरनुगतव्यावृत्तयोर्लोके भेदोपलम्भात् कथं सर्वकारणात्सर्वानुगतात्परमात्मनः सर्वस्यानन्यत्वमित्याशङ्क्याह । आत्मन्येवेति । वाचारम्भणमित्यादिश्रुत्या विकारमात्रस्य मिथ्यात्वबोधनात् तत्प्रतियोगिकतद्धर्मिकभेदासत्यत्वावधारणात्तत्प्रतीतिर्भ्रान्तिनिबन्धनेति भावः । तथा च श्रुतिरेकोऽहं बहुस्यां तदात्मानमकुरुतेत्याद्या । नन्वेकस्मिन्नाधारत्वकारणत्वकार्यत्वरूपविरुद्धधर्मसबन्धः कथं युज्यत इति चेत्तत्राह । भूतेति । तथा च सत्तास्फूर्तिप्रदातृत्वेनाधारत्वं भूताद्यात्मना कार्यत्वं गुणात्मना कारणत्वमित्यवच्छेदभेदान्नास्ति विरोध इत्यर्थः । नन्वसङ्गस्य निर्विकारस्य कथं तद्रूपतेति चेत्तत्राह । आत्ममायेति । स्वात्मनः प्रकाशाल्लब्धसत्ताकाया मायाशक्तेरनुभावः अन्यस्यान्यात्मनावभासनसामर्थ्यं तेन तथा चानिर्वचनीयमायाकृतमेवानिर्वचनीयं ब्रह्मणस्तदात्मत्वमिति भावः ॥ ३० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

रहस्करः रहस्यकार्यकरः ॥ २८ ॥

विरहसन्तप्तानां संयोगेन शान्तिः स्यात् स च वियोगो हि भगवत्संयोगः सर्वोपादानकारणत्वेन सर्वान्तर्यामित्वेन सर्वसाधरणः "तदैक्षत बहु स्यां तदात्मानं स्वयमकुरुत सच्च त्यच्चाभवत् तत्सृष्ट्वा तदेवानुप्राविशदि"त्यादिश्रुतिप्रसिद्धः श्रीमूर्तिमत्त्वेनचानेकविधः तत्तदधिकारिविशेषविषयः तत्र कार्यकारणरूपप्रकृतिसम्बन्धरहितानां मुक्तानामप्राकृतलोके सदा पश्यन्ति सूरयः निरञ्जनः परमं साम्यमुपैतीत्यादिश्रुतिप्रसिद्धः प्राकृतलोके च अनुकूलानां प्रतिकूलानाञ्च जीवानां भगवत्संयोगो यथोपयोगं प्रसिद्ध एव एवं सति गोपिकानां भगवत्प्रियाणां कारणत्वेनान्तर्यामित्वेन संयोगः श्रीमूर्तिवियोगे तु ध्याने निष्ठा भवत्वित्येवं रूपं कारणं भगवत्पदप्राप्तिरूपं ध्यानफलं च भगवद्वाक्येनैव वर्णयति । भवतीनामित्यादिना । मे मया सर्वात्मना सर्वस्योपादानकारणेन अन्तर्यामिरूपेण च भवतीनां वियोगः क्वचिदपि नास्ति "एतदात्म्यमिदं सर्वम् अन्तर्यामी"त्यादिश्रुतेः एतदेव सदृष्टान्तमाह । यथेति । खं वायुसहितोऽग्निश्च जलं च महीचेत्येवं नामकानि महाभूतानि यथा भूतेषु चराचरेषु कारणत्वेन समन्वितानि तथा अहं परमकारणभूतः मनआदीनि कार्याणि गुणाः कारणं तेषामाश्रयः कारणम् अत्र मनआदिकरणनिर्देशो जीवोपलक्षणार्थः गुणनिर्देशः सर्वप्राकृतपदार्थोपलक्षणार्थः तेषामाश्रयः सर्वचेतनाचेतनात्मके विश्वस्मिन् कारणत्वेन समन्वितोऽहमित्यर्थः चकारादन्तर्यामित्वेन प्रविष्टोऽस्मीति बोध्यम् ॥ २९ ॥

एतदेवोपपादयितुं स्वस्य सर्वकारणत्वं दर्शयति । आत्मनीति । अत्र उपलक्षणतया अपादानं सम्प्रदानञ्चेति कारकद्वयमप्यूह्यम् एवं सति चिदचिच्छक्तिमानहं कर्ता आत्मनि अधिकरणे आत्मना करणेन आत्मनः अपादानरूपात् कारकात् आत्मानं विश्वं कर्मरूपम् कारकम् आत्मना भूतेन्द्रियादिचिदचिद्रूपेण सृजे अनुपालयामि हन्मि च ननु भवतो ब्रह्मणः अपादानत्वे परिणामित्वप्रसङ्गात् कर्मत्वे अनित्यत्वप्रसङ्गात् सम्प्रदानत्वे संसारित्वप्रसङ्गात् सर्वे दोषाः त्वयि ब्रह्मण्येव भवेयुरित्यत आह । आत्ममायानुभावेनेति । आत्मा जीवश्च माया च तयोश्चेतनाचेतनरूपयोःमत्प्रकृत्योः "भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च । अहङ्कार इतीयं मे भिन्ना प्रकृतिरष्टधा । अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम् । जीवभूतां महाबाहो ! ययेदं धार्यते जगत्" इति श्रीमद्गीतोक्तयोः अनुभावः संसारित्वविकारित्वादिरूपो यस्मिन् तेन इन्द्रियोपलक्षितचेतनोऽपि प्राह्यः तथा च सचेतनेन भूतेन्द्रियादि सृज्यरूपेण आत्मानं सृजामीति संबन्धः अतः संसारित्वपरिणामित्वादयो धर्माः प्रकृतिद्वयस्य ननु प्रकृतिमति मयि ब्रह्मणि दोषप्रसङ्ग इति सिद्धान्तः एवं चिदचिद्ब्रह्मपदार्थानां स्वरूपतो हि भेदः चिदचितोः ब्रह्मशक्तित्वेन पृथगवस्थानाभावादभेदः इति स्वाभाविको भेदाभेदसंबन्धः पूर्वाचार्यैर्वेदान्तकौस्तुभादौ सुदृढं निर्णीतः ये केचित्तु स्वाभाविकभेदवादेऽपि ब्रह्मणः स्वत एव जीवभावाभ्युपगमाद्गुणवद्दोषाश्च स्वाभाविका भवेयुरित्याधाहुः ते एतेन प्रत्युक्ताः किञ्च तदात्मानं स्वयमकुरुतेत्यादिश्रुतिभिः ब्रह्मणः स्वत एव विश्वभावोऽभ्युपगम्यते ब्रह्मणो जीवभावमात्रस्यैव शङ्का अपरया प्रकृत्या परया च नित्यसिद्धया देहदेहिभावं ब्रह्मैव प्राप्नोतीति सिद्धान्तात् किंच तैरपि ब्रह्मणः जगदुपादानकारणत्वमभ्युपगम्य कार्यावस्थकारणावस्थयोर्ब्रह्मणोरैक्यमभ्युपगम्यते एवं सति तन्मते एव सर्वे दोषाः ब्रह्मण्येव तदुक्त्यैव भवेयुरित्यलं विस्तरेण ॥ ३० ॥

भाषा टीका ।

हे गोपि हो ! आप के प्रिय श्रीकृष्णचंद्र के सँदेश को अच्छी तरै से श्रवण करो वह संदेश तुमारे सुख का देने वाला है हे भद्रा रूप गोपियो ! मैं अपने पति का एकांत कार्य करने वाला हूं सो इस संदेश कूं लाया हूं, सो सुनो ॥ २८ ॥

श्रीभगवान् के वाक्य हैं हे गोपियो हो तुमारा हमारा तो किसी प्रकार से किसी समय में कहीं पर भी वियोग है ही नहीं जैसे कि आकाश वायु अग्नि जल पृथिवी इन पांचों भूतों का किसी प्राणी के साथ वियोग नहीं होता है तिसी प्रकार से हम भी सब जीवों के मन प्राण पंचभूत इन्द्रिय गुण इनके आश्रय हो कर रहते हैं ॥ २९ ॥

हम अपने दिव्य ज्ञान संकल्प के प्रभाव से भूत इंद्रिय गुण रूप होकर अपने शरीर होने से अभिन्न जो जगत् तिस को अपने स्वरूप से आप ही मे सृजते हैं पालन करते हैं तथा नाश करते हैं ॥ ३० ॥

आत्मा ज्ञानमयः शुद्धो व्यतिरिक्तोऽगुणान्वयः ।
सुषुप्तिस्वप्नजाग्रद्भिर्मायावृत्तिभिरीयते ॥ ३१ ॥
[1]येनेन्द्रियार्थान् ध्यायेत मृषा स्वप्नवदुत्थितः ।
तन्निरुन्ध्यादिन्द्रियाणि विनिद्रः प्रत्यपद्यत ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

तन्वात्मनो भूतादिरूपत्वे तद्दोषप्रसङ्गः स्यात्तत्राह । आत्मेति । आत्मा तु शुद्धः कुतः अगुणान्वयः न गुणेऽन्वेतीति तथा तत्कुतः व्यतिरिक्तः तदपि कुतः ज्ञानमयो ज्ञानस्वरूपः नन्वहंप्रत्यये स्वसंवेद्यमेवात्मनो नानावस्थावत्त्वमिति कुतः शुद्धतेति तत्राह सुषुप्तीति । मायाकार्यमनोवृत्तिभिर्विश्वतैजसप्राज्ञरूपेण प्रतीयते न स्वत इत्यर्थः ॥ ३१ ॥

कुतः मनोनिरोधे तदभावादिति व्यतिरेकं दर्शयितुं मनोनिरोधं विधत्ते । येनेति । उत्थितः पुमान् यथा मिथ्याभूतमेव स्वप्नं ध्यायत्येवं बाधितानपीन्द्रियार्थान् शब्दादीन् येन मनसा ध्यायेच्चिन्तयेत् ध्यायंश्च येनेन्द्रियाणि प्रत्यपद्यत प्राप तन्मनोऽनिद्रोऽनलसः सन्निरुन्ध्यान्नियच्छेदिति ॥ ३२ ॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

अहो बत मायया स्वजामीति कथमुच्यते जीवस्यापि तत्त्वतो मायिकदेहेन संबन्धो नास्ति मम तु कुतः स्यादिति दृष्टान्तमाह । आत्मेति । मनो वृत्तिभिरिति । तस्य विश्वादिभेदो मायिक एव न वस्तुत इत्यर्थः । अन्यत्तैर्व्याख्यातं यद्वा मयापि सदा भवत्यो दृश्यन्त इत्याह । आत्मेति । परमादरात् आत्मना सह प्रेमविशेषेणाभेदाद्वा भवतीत्यर्थः । तासां चान्योऽन्यस्नेहभेदाभावात् एकत्वं सुषुप्त्याद्यवस्थाभिः अन्याभिश्च मनोवृत्तिभिरीयते तत्र तत्र दृश्यत इत्यर्थः । यद्यपि जीवस्यैवावस्थायामिदं तथापि श्रीभगवतोऽपि लीलाविशेषोऽयं सम्भवेत् सुषुप्तौ दर्शनासम्भवेऽपि तथोक्तिर्दर्शनस्याविच्छेदविधाने तात्पर्यार्था यद्वा सुषुप्तिस्तदेकाग्रतया समाधिरूपा ननु दुर्भगानामस्माकं कुतस्तद्योग्यमित्याशङ्क्य तदेव दर्शयति । ज्ञानेत्यादि चतुर्भिर्विशेषणैः आत्मपदविशेषणत्वात् पुंस्त्वं ज्ञानमयः जीवेश्वरभक्त्यादितत्त्वज्ञानपूर्णः अत एव शुद्धः माया गुणाद्यस्पृष्टः अत एव व्यतिरिक्तः प्रपञ्चाद्विलक्षणः अत एव गुणानां नित्यसद्रूपयोः वैदग्ध्यादीनामन्वयो यस्मिन् सः यद्वा आत्मा भवतीनां देहः ननु प्राकृतमिन्द्यास्मदीयदेहस्य त्वया सदा दर्शनं न घटत इत्याशङ्क्य तस्य सच्चिदानन्दघनतां द्योतयति । ज्ञानमयः ज्ञानघन इत्यर्थः । यतः शुद्धः अतो व्यतिरिक्तः अन्यत्समानम् ॥ ३१ ॥

अहो अन्तर्यामित्वेन सर्वेन्द्रियप्रवर्तकत्वेन च सर्वत्र प्रकाशमानमपि मां भवतीर्विना न कोऽपि विषयासक्तया द्रष्टुमर्हतीति विषयेभ्योऽन्येन सर्वेण मनो नियन्तव्यमेवेति प्रसङ्गात्तासां माहात्म्यार्थमेवाह । येनेति । तैर्व्याख्यातं यद्वा ततश्च विनिद्रः निर्मायः सन् इन्द्रियाणि प्रति सर्वेन्द्रियेष्वेव मां मद्भक्तः प्रत्यपद्यत प्राप्तेर्निश्चयार्थमतीतनिर्देशः प्रतिपद्यत एवेत्यर्थः । यद्वा शुद्धार्थं पूर्वपूर्वसदाचारो दर्शितः अन्यत्समानम् ॥ ३२ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

आत्मा ज्ञानमय इति । प्रथमार्थः । नन्वेतावन्तं कालं तवात्मानं घनश्यामवर्णं परिमितसर्वाङ्गं परमाश्चर्यकरं रूपवन्तमेव मन्यामहे स्म । सम्प्रति भवता त्वचिन्त्यशक्तिमयस्तत एव सर्वेषामुपादानतया अन्तर्यामितया च व्यापक एव स इत्यस्माकं भवता सह न वियोग इत्युपदिश्यते । स च न केनापि दृश्य इत्यरूपश्चेत्यवगते तत्तद्रूपता च तव भवदेकगम्येति भवतु नामायं सन्देशः । वयन्तु स्वं स्वमात्मानं परिच्छिन्नदेहरूपमेवानुभवामः ततः कथञ्चिज्जातीयेनानेन तादृशस्य भवदात्मनः सङ्गममनुभविता स्मः । तत्राह । आत्मा ज्ञानमय इति । सर्वैरप्यात्मा सुषुप्त्यादिभिर्मनोवृत्तिभिस्तत्तद्रूपासु तद्वृत्तिषु प्रतीयते एव सुषुप्तावपि सुखमहमस्वाप्समिति प्रत्यभिज्ञाबलात् किमुतान्ययोरिति भावः । यतो ज्ञानमयः प्रकृतिज्ञानस्वरूपत्वात् स्वयं प्रकाशः । यतोऽसौ तत्तद्गुणानुगतोऽपि व्यभिचारिणीभ्यस्तत्तद्वृत्तिभ्यो व्यतिरिक्तत्वात् शुद्ध इत्यर्थः । तस्मात् ज्ञानरूपेण सर्वेषामुपादानेन व्यापकेन मदात्मना ज्ञानरूपस्य निजात्मनस्तादात्म्यभावनया सुखिन्यो भवत किमनया बहिर्योगदुःखमयभावनयेति भावः। मायावृत्तिभिरिति पाठेऽपि स एवार्थः । द्वितीये त्वर्थे । यो मम तादृशविग्रहरूपात्मा भवतीभिर्निर्धारितः स तु सुषुप्त्यादिवृत्तिषु भवतीभिरीयते अनुभूयते एव मत्समाधेरेव भवतीषु सुषुप्तवद्भासमानत्वात् यथोक्तं "जाग्रत्स्वप्नसुषुप्तेषु योगस्थस्य च योगिनः । या काचिन्मनसो वृत्तिः सा भवेदच्युताश्रयेति" । तमेवात्मानं विशिनष्टि । ज्ञानमयो नानाविद्याविदग्धः शुद्धो दोषरहितः व्यतिरिक्तो विशेषेण सर्वोत्तमः गुणान्वयः सर्वगुणशालीति । तृतीयेऽप्यर्थे भवतीभिर्यत् सुषुप्त्यादिषु स्वीयमनआद्याश्रयस्तादृशो यो ममात्मानुभूयते स च गौतमीयतन्त्रादिस्थस्य । "नवीननीरदश्यामं नीलेन्दीवरलोचनम् । वल्लवीनन्दनं वन्दे कृष्णं गोपालरूपिणमिति वर्त्तमानवन्दनात्मकस्य सार्वदिकानुशीलनीयस्य श्रीगोपालस्तवराजादेर्दृष्ट्या नित्यतत्तद्विध एव ज्ञेय इति भावः ॥ ३१ ॥

येनेति । तैर्व्याख्यातं तत्र चिन्तयेत् चिन्तयति प्राप प्राप्नोतीत्यर्थः । द्वितीयोऽर्थो यथा । ननु सत्यं साक्षात्कारनिभा सा

[1] अयं विजयध्वजीये नास्ति ।

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

स्फूर्तिः किन्तु न सदेति बहिर्दृष्ट्या वियोगस्फूर्तेरप्येक उपायः उच्यते । बहिर्वृत्तितो मनो निरोध एवेति योगशास्त्रक्रियामुपदिशति । येनेति । तृतीयेऽपि । हन्त यद्यस्मिन् प्रकाशो वियोग एव च तद्दृष्टिश्चास्माकं हातुमशक्या भवतश्च नागमनं तर्हि कथमिव कालं क्षिपाम इत्याशङ्क्य ममागमनं यावन्मनोनिरोधः क्रियतामित्यभिप्रेत्याह । येनेति ॥ ३२ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

आत्मा जीवः अगुणान्वयः स्वतो गुणान्वयरहित ॥ ३१ ॥

येनेन्द्रियर्थानिति । येन मनसाः विनिद्रः । निवृत्ताज्ञानः प्रतिपद्यते ॥ ३२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तदेवमब्रह्मात्मकस्वतन्त्रवस्तुभ्रमो निरस्तः अथ देहात्मभ्रमं निरस्यति । आत्मेति । आत्मा जीवः व्यतिरिक्तः देहेन्द्रियमनःप्राणादिभ्य इति शेषः । अतएवागुणान्वयः वस्तुतः प्राकृतसत्त्वादिगुणान्वयरहितः यद्वा गुणान्वय इति छेदः व्यतिरिक्तः कर्मनिमित्तो गुणानामन्वयो यस्मिन्निति तथाभूतः अत एव स्वतः स्वरूपतः शुद्धः निर्मलः अस्तु किन्तत्स्वरूपं तत्राह । ज्ञानमयः । अन्योऽन्तर आत्मा विज्ञानमय इत्यत्रेव स्वार्थिको मयट् ज्ञानमयस्वरूप इत्यर्थः । यद्वा प्राचुर्ये मयट् नच ज्ञानप्राचुर्यमज्ञानाल्पमवगमयतीति शङ्क्यं तत्प्राचुर्यस्य तदल्पस्यैव व्यावर्तकत्वाद्व्यतिरिक्तस्य कथं न तथा प्रतीतिः कथं वा देवोऽहं मनुष्योऽहं सुप्तोऽहं किल विललाप सुखमहमस्वाप्समित्यादि रूपेण प्रतीतिस्तत्राह । सुषुप्तीति । मायावृत्तिभिः प्रकृतिपरिणामभूतमनो व्यापारविशेषात्मिकाभिर्जाग्रत्स्वप्नसुषुप्तिभिर्देवादिशरीरात्मतादात्म्यादिविषयाभि दैवादिरूपेण प्रतीयत इत्यर्थः । तत्र जाग्रन्मायावृत्तिर्बाह्येन्द्रियद्वारा बाह्यविषयगोचरा आन्तरसुखदुःखादि गोचरा च नतु व्यतिरिक्तात्मस्वरूपगोचराऽतो देवोऽहमिच्छामि द्वेष्मि सुख्यहं दुःख्यहमिति प्रतीतिः स्वप्नवृत्तिस्तु तद्दशायां तत्स्वप्नद्रष्टृकर्मानुगुणं तदेककरणतया तत्कालमात्रावस्थायितया च परमपुरुषसृष्टचक्षुरादीन्द्रियद्वारिका सा तदेकानुभाव्यतत्कालमात्रावस्थायिपरमपुरुषसृष्टविषयदेहादिगोचरा नतु व्यतिरिक्तात्मगोचरेति तदा न तथा प्रतीतिः सुषुप्तौ तु यद्यपि न मनसो व्यापारः अत एव न देवाद्याकारप्रतीतिरेवं च व्यतिरिक्तात्मस्वरूपप्रतीतिरपि सुलभा तथाप्याप्रबोधमहमित्येव प्रकाशते नतु देहेन्द्रियादिभ्यो व्यतिरिक्तोऽहमिति प्रतियोगिग्राहकमनोव्यापाराभावात्प्रतियोगिन एवाप्रतीतेः यद्यपि सुषुप्तावहमिति प्रतीतिर्न मायावृत्तिस्तथापि छत्रिन्यायेन मायावृत्तिभिरित्युक्तम् ॥ ३१ ॥

तदेवं संसृतिहेतुभूतदेहात्मभ्रमादिर्मनः पारवश्यकृत इत्युक्तं भवति कथं तर्हि तत्पारवश्यनिवृत्तिरित्यपेक्षायां तन्नियमनमेवेत्याह । येनेति । उत्थितः स्वप्नादिति विभक्तिविपरिणामेन संनिहितत्वात् सम्बध्यते प्रबुद्धः स्वप्नवत्स्वाप्नार्थानिव येन मायापरिणामरूपेण मनसा इन्द्रियार्थान् मृषा शब्दादिविषयान् सम्प्रत्यविद्यमानानपि पूर्वानुभूतानप्यनुभूतसजातीयान् दुर्लभान् ध्यायीत तन्मनो निरुन्ध्यादभियत्तेद्दिति सम्बन्धः "ध्यायतो विषयान्पुंसः सङ्गस्तेषूपजायते सङ्गात्संजायते कामः" इत्याद्युक्तरीत्या विषयध्यानतत्सङ्गाद्यापादनद्वारा मनसो बन्धकत्वमिति येनेन्द्रियार्थान् ध्यायीतेत्यनेनोक्तं येनेत्युपात्तं मनो विशिनष्टि । येन चेन्द्रियाणि बाह्यानीन्द्रियाणि प्रत्यपद्यत प्राप कथंभूतः विनिद्रोऽनलसः निरुन्ध्यात् यद्वा तन्मन इन्द्रियाणि चेति शेषः । विनिद्रः देहात्मभ्रमरहितः अन्तर्बाह्येन्द्रियाणि निरुन्ध्यात् प्रत्यपद्यतेत्यस्य मामित्यादिः येन निरुद्धेन मनसा मां यथावज्जानीयादित्यर्थः । यद्वा तादित्यव्ययं तेभ्यो विषयेभ्यो ध्यातेभ्य इन्द्रियाणि निरुन्ध्यात् यथेन्द्रियाणि तत्प्रावण्यरहितानि भवेयुस्तथा निरुन्ध्यादित्यर्थः । अनेन तावन्मनसा बाह्येन्द्रियनियम उक्तः कथम्भूतः विनिद्रः पूर्ववदर्थः अनेन मनोनियमनोपयुक्तदेहात्मभ्रमराहित्यमुक्तम् एवमान्तरेन्द्रियनियम उक्तः कथमेतदुभयं लभ्यं तत्राह । प्रत्यपद्यत मामिति पूर्ववच्छेषः मां प्रति पद्येतेत्यर्थः । मद्विषयज्ञानेन तत्सुलभमिति भावः ॥ ३२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

स्वाधारत्वेनाततत्वेन आत्मनेत्युक्तं विवृणोति । आत्मेति । आत्ममायानुभावेन स्वरूपेच्छानिश्चयेन निश्चयं विशिनष्टि । भूतानीति भूतादीन् व्याप्य वर्तमानेन अनेन भूतादीनामवान्तरकारणत्वेन तत्कारणत्वोक्तिविरोधः भूतेन्द्रियगुणात्मनेत्यनेन जडरूपत्वं परमात्मनः प्राप्तं निवारयति । आत्मेति । ज्ञानमयः पूर्णज्ञानः गुणानां सत्त्वादीनामन्वयो यस्य स तथा न केवलं ज्ञानमेव गुणोऽस्य किन्त्वन्येऽप्यानन्दादयः सन्तीत्यतो वोक्तं गुणान्वय इति आनन्दादिगुणानामन्वयो यस्मिन् स तथा उक्तार्थे किम्प्रमाणमिति तत्राह । सुषुप्तीति । मायया हरेरिच्छया वृत्तिः स्वरूपलाभो यासां तास्तथा ताभिः स्वापादिकं सकर्तृकं कार्यत्वात् घटवदित्याद्यनुमानं पक्षधर्मतावलम्ब्यते ज्ञायत इत्यर्थः ॥ ३१ ॥ ० ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

एवं ब्रह्मधर्मनिरूपणेन वियोगाभावं निरूप्य जीवधर्मनिरूपेणापि तदभावं निरूपयन्नाह । आत्मेति । आत्मा जीवः गोपिकाः अहमिति मन्यन्ते स देह एवेति प्रतीतिसिद्धत्वात् तद्व्यतिरेकार्थमाह । ज्ञानमय इति । मयट् प्राचुर्ये सच्चिदानन्दरूपत्वात् ज्ञानप्रचुरोऽयमात्मेत्यर्थः । तर्हि वैषयिकज्ञानमयो भविष्यतीत्याशङ्क्याह । शुद्ध इति । ननु शुद्धमात्मानं तु पश्यामः अतः प्रमाणाभावात् प्रतीतस्य चाशुद्धत्वात् बाधितार्थ इति चेत्तत्राह । व्यतिरिक्त इति । अस्माद्देहादिसंघाताद्व्यतिरिक्तः यथा तप्तवालुकातः सूर्यो व्यतिरिच्यते । नन्वत्र व्यतिरेके का उपपत्तिरिति चेत्तत्राह । अगुणाश्रय इति । स हि गुणानाश्रित्य न तिष्ठति गुणाश्रया अन्ये स तु तद्व्यतिरिक्तः अत्र सर्वत्रानुभवं प्रमाणयति सुषुप्तीति । मायाया गुणमय्यास्तिस्रो वृत्तयः जाग्रत्स्वप्नसुषुप्तिभेदाः तिसृष्वप्यलौकिकत्वमस्त्यर्थात् मायाग्रहणम् अन्यथा सुषुप्तौ

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

परमानन्दस्य स्फूर्तिः स्वप्ने नानाविधपदार्थानां जागरणदशायां च चतुर्विधपुरुषार्थसिद्धिर्न स्यात् अत्र सर्वत्र आत्मनः अन्वयो दृश्यते एकस्यां वृत्तौ द्वितीयवृत्तिव्यतिरेकश्च तद्धर्माणां च अतो ज्ञायते यदा मूलभूतगुणाद्व्यतिरिच्यते अयमात्मा तदा सङ्घातव्यतिरेके किमेव कव्यमिति अतो वस्तुत आत्मा सङ्घातात् व्यतिरिक्त इति आत्मनैव अहं प्राप्तव्यः ॥ ३१ ॥

ननु देहसंहितेन उत्तमः पदार्थैः स्वोपभोग्यो धनैः सह भोक्तुमर्हः । अतोऽस्मात्सङ्घातादादौ निवृत्ता भवत पश्चान्मदुपभोगं कुरुतेति तात्पर्यम् साधनाकाङ्क्षायां तदुपदिशति । येनेन्द्रियार्थान् ध्यायेतेति । येन मनसा इन्द्रियार्थान् रूपादिविषयान् मृषा अविद्यमानान् असम्भावितांश्च ध्यायेत् पुरुषः यस्मिन् विद्यमाने ध्यानमावश्यकमिति । नन्वयमपि पुरुषार्थ इति चेत्तत्राह । स्वप्नवदिति । जन्मान्तरोत्पत्त्यर्थमेव तस्य ध्यानं यथा स्वप्नः सूचकः तथा ध्यायमानं मनोऽपि जन्मान्तरं सूचयति ननु स्वरूपतः किञ्चित्पुरुषार्थसाधकमतोऽनर्थसूचकं तन्मनो निरुन्ध्यात्तस्यापि निरोधे इन्द्रियानिरोधः कारणमिति इन्द्रियाणि च निरुन्ध्यादित्याह । इन्द्रियाणीति । उभयनिरोधे किं स्यादित्याशङ्क्याह । विनिद्रः प्रतिपद्यत इति अवस्थाद्वयं समीचीनम् आनन्दोऽभिव्यज्यते पुरुषार्थोऽस्चान्यत्रेति अतः स्वप्न एव व्यर्थ इति सूचयितुं वैयर्थ्यापगमाय विनिद्रः सन् आत्मानमयमस्मीति प्रतिपद्यते व्यतिरिक्तम् ॥ ३२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

ननु तर्हि तव स्वरूपं किं लोकैः कथं वा ज्ञेयमिति चेत् मत्स्वरूपं तु गुणातीतमन्तर्यामिसंज्ञं सर्वत्र प्रतीयत एवेत्याह । आत्मा परमात्मा ज्ञानमयः ज्ञानं मायातीतं चित् तन्मयः गुणैः सृष्ट्यादिकर्तृत्वेऽप्यचिन्त्यशक्त्या तत्सम्बन्धाभावाच्छुद्धः । शरीरमध्यवर्त्तित्वेऽपि व्यतिरिक्तः । गुणाधिष्ठातृत्वेऽपि न गुणान् अन्वेतीति सः । स तु सर्वैरप्यनुमानगम्य इत्याह । सुषुप्तेति । ईयते अनुमीयते । यदुक्तं पञ्चमे "गुणप्रकारैरनुमीयते भवान् इति भगवान् सर्वभूतेषु लक्षितः स्वात्मना हरिः । दृश्यैर्बुद्ध्यादिभिर्द्रष्टा लक्षणैरनुमापकै"रिति च आत्मा अहं ज्ञानमयः अत्र स्थितोऽपि युष्मद्विषयकातिशयज्ञानवान् ननु कदाचिदपि युष्मान् विस्मरामीत्यर्थः । स्थितोऽपि मथुराङ्गनासङ्गदोषरहितः यतो व्यतिरिक्तः युष्मद्वियोगखिन्नः कथमन्या रोचयामीति भावः । यतो गुणान्वयः युष्मद्गुणान् सौन्दर्यमधुरकटाक्षावलोकादीन् अन्वेमि ध्यानेन निरन्तरं प्राप्नोमीत्यर्थः । एवम्भूतो युष्माभिरपि सदैवाहमनुभूय इत्याह । सुषुप्तेति । तत्र सुषुप्तेन ममात्मनोऽनुभूतचरस्य रूपगुणादिसामान्यं स्वप्ने न तद्विशेषः । जागरेण तु हास्यलास्यादिसम्भोगमाधुर्यमयः । साक्षादात्मैव ईयते अनुभूयत एव ॥ ३१ ॥

उपदिष्टोऽयं ज्ञानयोगो मनोनिरोधे सति फलतीति मनोनिरोधं विधत्ते । येन मनसा इन्द्रियार्थान् विषयान् ध्यायेत उत्थितः प्रबुद्धो जनः स्वप्नवत् स्वप्ने यथा मृषाभूतानप्यर्थान् ध्यायेत् तन्मन इन्द्रियाणि च निरुन्ध्यात् यतो विनिद्रः सावधान एव जनः प्रत्यपद्यत । प्रतिपन्नो ज्ञानवानभूदिति पूर्वाचारः प्रमाणितः । पक्षे उत्थितः मूर्च्छातः प्रबुद्धो भवद्विधो जनः इन्द्रियार्थान् मद्दर्शनसंस्पर्शनाधरपानालिङ्गनादीन् विषयान् मदाविर्भावजनितत्वात् सत्यानेव येन मनसा स्वप्नवन्मृषाभूतानेव ध्यायेत तन्मनो निरुन्ध्यात् तिरस्कुर्वीत तदप्रामाण्यादिति भावः । यतो विनिद्रः निद्रारहित एव भवदादिः इन्द्रियाणि स्वनेत्रादीनि प्रत्यपद्यत प्रत्यक्षत एव निरञ्जनीरागानिश्चन्दनानि अपद्यत ज्ञातवानेव युष्माभिरनुरागान्धाभिर्महाविरहोत्कण्ठाविगतविचाराभिर्मत्कर्तृकयुष्मत्कर्मकनानाविध सम्भोगोऽपि यन्मृषाभूत एव मन्यते एतदेव मे महद्दुःखम् । अत एव तत्तत्सत्यापनार्थकमेतत्सन्देशप्रेषणं ममेति भावः ॥ ३२ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

परमार्थतस्तु आत्मा ज्ञानमयः ज्ञानस्वरूपः ज्ञानमित्युपलक्षणं सच्चिदानन्दरूपः सत्यं ज्ञानमनन्तं विज्ञानमानन्दं ब्रह्मेत्यादिश्रुतेः अज्ञानोपहितमेवात्मरूपं केचिदङ्गीकुर्वन्ति तान्निराह शुद्ध इति । अविद्योपाध्यसंस्पृष्टः निरवद्यं निरञ्जनमित्यादिश्रुतेः अत एवाहङ्कारादिभ्योऽपि व्यतिरिक्तः "अप्राणो ह्यमनाः शुभ्र" इत्यादिश्रुतेः अत एवागुणान्वयः गुणसंबन्धरहितः "साक्षी चेता केवलो निर्गुणश्चे" त्यादिमन्त्रवर्णात् देहादिवैशिष्ट्यप्रतीतिस्त्वौपाधिकीत्याह । सुषुप्तेति मायाजनितैर्जाग्रत्स्वप्नसुषुप्तिभिरन्तःकरणधर्मैरीयते विश्वतैजसप्राज्ञरूपेण प्रतीयते स्वतः यद्वा सुषुप्त्यादिभिर्मनोवृत्तिभिर्गुणान्वयः प्रतीयते तथा चान्तःकरणतादात्म्याध्यासात्तदवस्थावत्त्वेन प्रतीयत इति भावः । यद्वा सुषुप्त्यादिभिर्व्यतिरिक्तः ईयते अनन्वागतः स तेन भवतीत्यादिश्रुत्या सर्वावस्थास्वनुगतादात्मनोऽवस्थानां व्यतिरेकाभिधानात् अत एवागुणान्वयः गुणकार्यावस्थात्रितयसंबन्धशून्यः नन्वेवमात्मन एकत्वैकान्ताभ्युपगमे नानात्वाभावात्प्रत्यक्षादिप्रमाणानि विधिप्रतिषेधमोक्षशास्त्रं च व्याहन्येतेति चेन्न स्वप्नव्यवहारस्य प्राक् प्रबोधादिवत् सर्वव्यवहाराणां प्राक् ब्रह्मात्मत्वप्रबोधात् सत्यत्वोपपत्तेः । नन्वसत्येन वेदान्तवाक्येन कथं सत्यब्रह्मात्मत्वप्रतीतिरितिचेन्न शङ्काविषादिनिमित्तमरणादिकार्योपलब्धेः कल्पितादपि ह्रस्वत्वादिधर्मान्नगो नाग इति पर्वताविषयकप्रमोत्पत्तिदर्शनाच्चेति संक्षेपः ॥ ३१ ॥

तथा च मानसः संसारो मनोनिरोधाच्छाम्यतीत्याह । येनेति । यथा निद्राया उत्थितः पुमान्मिथ्याभूतमेव स्वप्नं ध्यायति तथा बाधितानपि इन्द्रियार्थान् शब्दादिविषयान् येन मनसा ध्यायेच्चिन्तयेत् ध्यायंश्च येनेन्द्रियाणि प्रत्यपद्यत प्राप्तवान् तन्मनः विनिद्रोऽनलसः सन्निरुन्ध्यान्नियच्छेत् यद्वा मनोनिरोधान्वयव्यतिरेकाभ्यां संसारभानानिश्चयात्संसारविनिर्मुक्तात्मस्वरूपावगत्यर्थं मनसो निरोधः सम्पाद्य इत्याह । येनेति । उत्थितः समाधेः सकाशादुत्थितो येन मनसेन्द्रियार्थान् ध्यायेत् स्वप्नवत् मृषा भूतान्मिथ्याभूतानपि चिन्तयति समाधिस्थश्च न चिन्तयति तस्मात्तन्मनो निरुन्ध्यादिन्द्रियाणि च निरुन्ध्यात् तत्रापि विनिद्रः लयशून्यः प्रत्यपद्यतात्मस्वरूपमवाप्नोतीत्यर्थः । यद्वा एवम्भूतात्मज्ञानमपि नात्मसकाशात्पृथगस्त्यतदपि निरुन्ध्यादन्यथा द्वैतापत्तेरित्याशयेनाह । येनेति । उत्थितो देहादिभ्यो व्यतिरिक्तात्मज्ञानाभ्या-

एतदन्तः समाम्नायो योगः सांख्यं मनीषिणाम् ।
त्यागस्तपो दमः सत्यं समुद्रान्ता इवापगाः ॥ ३३ ॥
यत्त्वहं भवतीनां वै दूरे वर्ते प्रियो दृशाम् ।
मनसः सन्निकर्षार्थं मदनुध्यानकाम्यया ॥ ३४ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

सर्वान् येन ज्ञानेनेन्द्रियार्थान् स्वप्नवन्मृषा मिथ्याभूतान्ध्यायेत् तज्ज्ञानमिन्द्रियाणि बहिरन्तर्भेदेन द्विविधानि कारणानि च निरुन्ध्यात् ततश्च विनिद्रः अज्ञानतत्कार्यविनिर्मुक्तः प्रत्यपद्यत ब्रह्म सम्पद्यत इत्यर्थः ॥ ३२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

ननु विश्वभावापन्नस्य तव संसारित्वादयो दोषा मा भवन्तु पराप्रकृतिनाम्न आत्मनस्तु कार्यत्वेनानित्यत्वे सति कस्य पुनस्त्वत्प्राप्तिलक्षणमोक्ष इत्यत्र प्रलयकाले सङ्कुचितज्ञानस्य सृष्टिवेलायां देवमनुष्यादिदेहतादात्म्यात्तदनुरूपज्ञानविकासादिना कार्यत्वं न स्वरूपत इत्याह । आत्मेति । ज्ञानमयः ज्ञानप्रचुरः शुद्धः निर्विकारः देहादिभ्यो व्यतिरिक्तः एवम्भूतो ममांशः आत्मा क्षेत्रज्ञः सृष्टिसमये गुणेषु गुणकार्येषु देवमनुष्यादिदेहेन्द्रियादिषु अन्वेति तादात्म्यं प्राप्नोति इत्यन्वयः एवं कार्यभावं प्राक् कर्मसाक्षिणा मया नीतः न स्वरूपतःकार्यभावापन्नोऽतो नानित्य इति भावः । ननु देहेन्द्रियादितादात्म्यं गतः अनित्येभ्यः देहेन्द्रियादिभ्यः पृथक् कथं ज्ञातुं शक्योऽत आह । सुषुप्त्यादिभिर्मनोवृत्तिभिरीयते देहादिभ्यो मनोवृत्तिविषयेभ्यः ग्राहकत्वेन पृथक् प्रतीयते ॥ ३१ ॥

एवं जगत्कारणं सर्वदा सन्निहितं मां ममैवांशभूतः क्षेत्रज्ञो मच्छक्तिपरिणामरूपं जगज्जलधिं तर्तुं "कारणं तु ध्येय"मिति श्रुत्युक्तरीत्या ध्यायेदित्याह । येनेति । पूर्वं स्वप्नवान् दृष्टस्वप्नः पश्चादुत्थितः प्रबुद्धो जनः स्वप्नदृष्टं पदार्थं यथा मृषा प्रबोधवेलायामसन्तं ध्यायति तथेन्द्रियार्थान् दृष्टश्रुतान् शब्दादीन् ध्यानवेलायामविद्यमानानेव अतीतान् अनागतान् येन मनसा ध्यायेत् तन्मनः इन्द्रियाणि च निरुन्ध्यात् नियच्छेत् तदनन्तरं विनिद्रः सन् क्षेत्रक्षेत्रज्ञमूलभूते सर्वनियन्तरि मयि "या निशा सर्वभूतानां तस्यां जागर्ति संयमी"त्येवं प्रबुद्धः सन् प्रत्यपद्यत मद्ध्यानेन मां प्राप्त एव भवेदित्यर्थः ॥ ३२ ॥

भाषा टीका ।

आत्मा तो ज्ञान स्वरूप है शुद्ध है सब देहादिकों से भिन्न है तीनों गुणों से रहित है परन्तु प्रकृति सम्बन्ध से जाग्रत् स्वप्न सुषुप्ति इन अवस्थाओं में प्रकाशित होता है ॥ ३१ ॥

जैसे स्वप्न में से उठने पर जिस मन से स्वप्न के विषयों का अनित्य ज्ञान होता है वैसे जाग्रत् अवस्था में जिस मन से इंद्रिय के विषयों का ध्यान होता है उस मन को तथा उन इंद्रियों को रोक देवै तब सावधान होने से मेरे स्वरूप को जान जाता है ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तावता च कृतार्थो भवतीत्याह । एतदन्त इति एष मनोनिरोधः अन्तः समाप्तिः फलं यस्य सः समाम्नायो वेदः स तत्र पर्यवस्यतीत्यर्थः । योगोऽष्टाङ्गः सांख्यमात्मानात्मविवेकः त्यागः सन्न्यासः तपः स्वधर्मः दम इन्द्रियदमनं मार्गभेदेऽप्येकत्र पर्यवसाने दृष्टान्तः समुद्रान्ता आपगा नद्य इवेति ॥ ३३ ॥

ननु किमन्यानिवास्मानात्मविद्यया प्रलोभयसि वयं तु सर्वसुन्दरसकलगुणगणालङ्कृतेन त्वया विरहं नैव सहाम इतिचेदत आह । यत्त्वहमिति । दृशां दूरे यद्वर्ते तन्मदनुध्यानार्थम् तच्च ध्यानं मनसः सन्निकर्षार्थमिति ॥ ३४ ॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

एष मनोनिरोधः किं वा एषा सर्वेन्द्रियेषु मत्प्राप्तिरेव अन्तो यस्य अस्य लिङ्गविपरिणामेन सर्वैरप्यन्वयः मनीषिणां बुद्धिमतामिति निर्बुद्धीनां लाभपूजाख्यात्यर्थमेवेति भावः । आम्नायः शास्त्रं ज्ञापकं योगादयः साधनानि तत्र सत्यं विविधकर्म्मस्वपि सदा वित्तशाठ्यादिवर्जनं योगः सांख्यं च सर्वेषामेव सामान्यो धर्म्मः त्यागादयः क्रमेण प्रायो यतिवनस्थब्रह्मचारिगृहिधर्म्माः अन्यत्तैर्व्याख्यातं यद्वा त्यागो दानं गृहिधर्मः सत्यं समदर्शनं यतिधर्म्मः यद्वा सर्व एवैते मुख्याः सामान्यधर्म्माः ॥ ३३ ॥

ननु एवं वञ्चनयालं साक्षादेव त्वां द्रष्टुमिच्छामः तत् किमर्थं तत्र चिरं विलम्बसे तत्राह । यत्त्विति द्वाभ्याम् । तुशब्दो भिन्नोपक्रमे प्रिय इति दूरस्थित्ययोग्यतोक्ता तथापि दूरे वर्ते दृशामिति साक्षाच्चक्षुर्गोचर एव केवलं न वर्ते अन्येन्द्रियेषु च सदा वर्त्त एवेत्यर्थः । तच्च ममानुध्यानं निरन्तरं भवत्कर्म्मकं चिन्तनं तत्काम्यया पाठान्तरेऽपि स एवार्थः तच्च मन्मनः भवतीनां सन्निकर्षार्थं नैकट्याय अयमर्थः यथा सर्वपरित्यागेन भवतीनां मनो मयि सदा सुस्थिरं तथा मम न भवतीषु अतो लज्जया शेषापेक्षया निजमनसा भवतीनां सदा सामीप्यप्राप्त्यर्थमन्तिष्ठामीति ॥ ३४ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

एतदिति तैर्व्याख्यातम् । किञ्च आम्नायः शास्त्रं ज्ञापकं योगादयः साधनानि अत्र सत्यं विविधकर्मस्वपि सदा वित्त-

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

शाठ्यादिवर्जनम् । योगः साङ्ख्यश्च सर्वेषामेव सामान्यधर्मः । त्यागादयः क्रमेण यतिवनस्थब्रह्मचारिगृहिधर्माः । यद्वा । त्यागो दानं गृहिधर्मः । सत्यं समदर्शनं यतिधर्मः । यद्वा । सर्व एवैते मुख्याः सामान्यधर्मा इत्यर्थत्रयेऽपीदं समानम् ॥ ३३ ॥

तदेवमप्रकटप्रकाशे वियोग एव नास्तिप्रकटप्रकाशेऽपि बहिः प्रातीतिकःप्रायिक एव च कदाचित् स्फूर्त्तेरपि साक्षात्करपदवी प्राप्तत्वात् स चकेनापि मम स्वाभाविकेन दुराग्रहेणैवास्तीति ज्ञायतामित्याभिप्रेत्य तमेवाग्रहं दर्शयति । यत्त्विति द्वाभ्याम् । तुशब्दो भिन्नोपक्रमे कंसवधलक्षणमहाकार्यानुरोधेनैव तावदत्रागतः । सम्प्रति तु कार्यविशेषपरित्यागपूर्वकागमनयोग्यत्वेऽपि यदहं भवतीनां यादृशो नेत्राणि तासामेव दूरे वर्त्ते । ननु भवतीनामपि अप्रकटप्रकाशेन तत्र विद्यमानत्वात् । तत्रापि केवलं वर्त्ते ननु सुखेनास्मीत्यर्थः । तत् खलु मत्कर्तृकं यदनुध्यानं तत्कामाय तद्धेतोरेव ध्यानं भवत्कर्तृकं क्षणं युगशतमिव यासां येन विनाभवदिति प्रसिद्धया पूर्वत एव सिद्धं मद्विषयम् अनुध्यानं तदनुगतं तत् सदृशतां प्राप्तं मत्कर्तृकं भवद्विषयं प्रेयसीकर्तृकस्याग्रे वक्ष्यमाणत्वात् तन्मम मनस्युदियादिति वाञ्छयेत्यर्थः । तच्च किमर्थं तत्राह । मनसो यः सन्निकर्षः भवतीनां सान्निध्ययोग्यता तदर्थमित्यर्थः । यतस्तां विना मम चेतसि सदैव लज्जा जायत इति भावः । उक्तञ्च स्वयमेव । न पारयेऽहं निरवद्यसंयुजामित्यादि । एवमीदृशभवदुपासनयैव तद्योग्यता स्यादिति ईदृशमपि दुःखं सेहे इति वाक्यार्थः । उक्तं हि मुनिभिः

न विना विप्रलम्भेन सम्भोगः पुष्टिमश्नुते ।
कषायिते हि वस्त्रादौ भूयान् रागो विवर्द्धते इति ॥ ३४ ॥

———

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

एतदन्तः समाम्नाय उपदेशः ॥ ३३—३६ ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

किं मनोनियमनेनेत्यत्राह । एतदन्त इति समाम्नायादयःसत्यान्ता एतदन्ता मनोनियमनान्ता अन्तः फलं मनोनियमनफला इत्यर्थः । एतदन्त इत्येकवचनं समाम्नायादि प्रत्येकाभिप्रायकं नियमने च मनसि मत्प्राप्तिः सुलभेति भावः । तत्र दृष्टान्तमाह । समुद्रान्ता इवापगा इति । समुद्रपर्यन्तगमनमेव नदीभिः कार्यं ततः तत्प्राप्तिर्यथा सुलभा तद्विषयान्तरेभ्यो मन आकृष्य मयि नियन्तव्यं ततो मत्प्राप्तिरयत्नलभ्येति तात्पर्यं यद्वा प्रत्यपद्यतेतीन्द्रियनियमः तस्य यथावत्सविषयकज्ञानं फलमिति सूचितं तदेव सदृष्टान्तं विवृणोति एतदन्त इति । तत्र समाम्नायः तदुपदेशः वेदार्थज्ञानानुष्ठाने वा योगः विवेकादिसाधनसप्तकानुगृहीतः साङ्ख्यं प्रत्यगात्मयाथात्म्यावलोकनं त्यागो दानं तपोऽनशनादि दम इन्द्रियनिग्रहः सत्यं सत्यवचनम् ॥ ३३ ॥

यद्यप्युक्तरीत्या त्वद्वियोगो नास्ति तथापि निरतिशयसुखावहं स्वविग्रहं किं न दर्शयसीत्यत्राह यत्त्विति । हे प्रियाः ! अहं भवतीनां दृशां दूरे वर्ते वर्तमान इति यत्तु मदनुध्यानकाम्यया मदनुध्यानार्थं तच्च मनसः सन्निकर्षार्थम् ॥ ३४ ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली

उपजीव्यप्रमाणाभावेनानुमानस्य दुर्बलत्वं स्यादिति तत्राह । एतदन्त इति । समाम्नायः निर्दोष आगमः एतस्यानुमानार्थस्यान्तो निर्णयो यस्मात्स तथा अन्तोऽस्त्यवसिते मृत्याविति च न केवलमनुमानेनायमर्थःसम्पद्यते वेदादिनापीति भावेन चाह एतदन्त इति । हरितत्त्वनिर्णायकः एतज्ज्ञानपर्यवसायीत्यर्थः "वासुदेवपरा वेदा वासुदेवपरा मखाः । वासुदेवपरा योगा" इत्यादेः त्यागो दुर्दर्शनाभ्यासवर्जनं सत्यं सत्यभूतं वाक्यम् अत्र दृष्टान्तमाह । समुद्रान्ता इति ॥ ३३ ॥

कस्त्यजेन्मां भवादृगित्युक्तिपरिहारमिवाह । यत्त्विति । योऽहमन्तिके वर्तमानोऽपि भवतीनां दृशां दूरे वर्तीति प्रतीयत इति यत्तन्मदनुध्यानकाम्यया निरन्तरमदुपासनेच्छया मनःसन्निकर्षार्थं कृतमित्यन्वयः ॥ ३४ ॥

———

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

ननु शास्त्रेषु वेदादिषु बहून्येवात्मज्ञानार्थसाधनान्युक्तानि तत्कथं मनोनिरोधमात्रमुच्यते इत्याशङ्क्याह । एतदन्तः समाम्नाय इति । वेदो हि साधनान्युपदिशति तस्यापि मनोनिग्रह एव अन्तः पर्यवसितसाधनमेतदेवान्तो यस्य तादृशः समाम्नायो वेदः सर्वे मनोनिग्रहलक्षणान्ता इति शास्त्रात् योगस्य त्वेतदेव प्रयोजनं साङ्ख्यमप्यभ्यासं निवर्तयन् मूलकारणं मन एव व्यावर्तयति । ननु लोका नैवं व्याचक्षते तत्राह । मनीषिणामिति । विवेकिनामेतद्व्याख्यानं मनस ईषिणो मनीषिणः आत्मसम्बन्धः साक्षात्मनस्यवेतिहेतुरप्युक्तः ननु स्वतन्त्राणि मोक्षफलानि साधनानि श्रूयन्ते यथा सन्न्यासः यथा तपो वनस्थस्य यथा वा दम इन्द्रियसंयमो गृहस्थस्य सत्यं ब्रह्मचारिणो वेदाध्ययनरूपम् एतेषामाश्रमधर्माणामपि मनोनिग्रहपर्यवसायित्वमेव तत्र हेतुं वदन् दृष्टान्तमाह । समुद्रान्ता इवापगा इति । वहन्तीरापः भूमौ न पर्यवसिताः तथा सति स्थावरा इवात्रैव तिष्ठेयुः अतो भूम्यन्ताय प्रसर्पन्ति तत्रावधिः समुद्र एव तथा सङ्घातेऽपि प्रविष्टाः लौकिकवत्तत्रास्थिराः तदपगमाकाङ्क्षिणः सन्मार्गे प्रवृत्ताः न्यासाधिकारिणः मध्ये स्थितिमलभमानाः साक्षान्मनसि सम्बन्धमात्मानं मोचयन्तः तन्निग्रह एव विश्रान्ता भवन्ति ॥ ३३ ॥

एवं वियोगाभावं वियोगस्यात्तमत्वं च परमार्थतो निरूप्य लौकिकप्रतीतौ तद्द्वयाधिकरणमिति मत्वा दूरे स्थितिलक्षणस्य वियोगस्य चतुर्विधपुरुषार्थसाधकत्वमाह । यत्त्वहमिति चतुर्भिः । गोपिकानां धर्मादयो भगवानेव परं प्रकारविशेषमापन्नः तत्र धर्ममाह । तुशब्दः तत्त्वनिरूपणं व्यावर्तयति अहं भवतीनां यत् दूरे तन्मनसः सान्निकर्षार्थं दृशो दूरे स्थितो मनसि संनिकृष्टो भवति तत्र हेतुमाह । प्रिय इति । अयमर्थः बहिर्भगवति गोपिका दृष्टिं प्रक्षिपन्तो स्वधर्मान् दृष्टिधर्मान् वा योजयति ननु स्वयं भगवद्धर्मान् गृह्णाति मनसि तु भगवति समागमे मनो ममवद्-

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

मान् गृह्णाति एतत्तु हिताचरणं प्रियस्य कार्यम् अनेन योगाद्यपेक्षयापीयमवस्था समीचीनेति ज्ञापितं योगे हि चक्षुरेव मनोऽपि स्वधर्मानेव भगवत्यारोपयति परं स्वयं निर्माणार्थं चाऽतः तद्धर्मान् गृह्णातीति विशेषविरहेण स्मरणे तु बलादागत इति भगवानेव धर्मान् स्थापयति मनोधर्माणां दुर्बलत्वात् विपरीतत्वाच्च भगवतः यतोऽहं प्रियः अतो दूरे वर्ते मनसा ह्यात्मा सम्बद्ध इति च तथा सत्यात्मगामि भवति विषयेषु तु तेषामभावात् जन्मान्तरसाधकत्वेन अनर्थहेतुत्वमेव किञ्च न केवलं संनिकर्षमात्रं फळं किन्त्वन्यदप्यस्तीत्याह । मदनुध्यानकाम्ययेति । ममानुध्यानमेव ममाभिप्रेतं गोपिकाश्चेन्मदभिध्यानं कुर्वन्ति तदाहं तासु रतिं करोमि नत्वन्यथा अक्लिष्टकर्मत्वात् अतः स्वार्थमप्येवं करोमीत्यर्थः । कामेन हि सम्बन्ध उभयोः स च मनसि प्रतिष्ठितः मनसो दूरभावे मानादिना सम्बन्धाभावादहमपि निवृत्तो भवामि ॥ ३४ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

मनोनिरोधार्थका एव सर्वशास्त्रोक्ता सर्वेऽप्युपाया इत्याह । एतदन्त इति । एष मनोनिरोध एव अन्तः समाप्तिः फलं यस्य सः समाम्नायः सम्पूर्णो वेदः स तत्र पर्यवस्यतीत्यर्थः । योगोऽष्टाङ्गः सांख्यमात्मानात्मविवेकः मार्गभेदेऽप्येकत्र पर्यवसाने दृष्टान्तः समुद्रान्ता आपगा नद्य इव पक्षे यथा मनोनिरोधे सत्येव संसारतरणं तथैव भवतीनामपि मद्विरहतरणं मनोनिरोधादेव यत् खलु मनः सत्यमपि मत्सङ्गं भवतीरलोकत्वेन प्रत्याययतीति भावः । अर्थस्तूभयत्र तुल्य एव ॥ ३३ ॥

भो उद्धव ! एतेन सन्देशेनास्मांस्त्वं द्विगुणं ज्वालयसि स्म । तस्मात्तं सन्देशप्रेषकं कालदेशपात्रानभिज्ञं किं भ्रमस्त्वां वा परामर्शशून्यं किमाक्षिपामः । एतद्ब्रह्मज्ञानं खलु व्रजभूमावस्यां कः क्रेष्यति यस्य भावस्त्वया एतावत् दूरमानीतः । किमेते गोपीजना जन्मावधि श्रीकृष्णसौन्दर्यामृतपायिनः सम्प्रति ब्रह्मज्ञाननिस्वरसं पास्यन्ति महादुर्भिक्षे हि वरमिह स्त्रियः प्राणान् जहति तदपि घासं नाश्नन्ति । शृणु रे महामूर्ख शृणु इदं ब्रह्मज्ञानं खलु संसाररोगस्यौषधं महामुनिचिकित्सकानां हृदयपर्णशालायां तिष्ठति । किमिदं कृष्णप्रेममहारोगस्य भेषजं भवति ते चिकित्सका अपि किमिमं रोगं तावत् कदापि परिचिन्वन्त्यपि सान्दीपनिमुनेः सकाशाच्चिकित्साशास्त्रमधीत्य त्वामुद्धवमभ्याप्य अस्मभ्यं प्रेमज्वालोपशमकमौषधं प्रेषयामास । गच्छाधुनैवास्मत्प्रेषितमिदमौषधं नीत्वा स एव एतत् पीत्वा अस्मद्विषयकस्य प्रेमरोगस्य ज्वालां न्यवर्तयत् पुनरपि रोगशेषं निवर्त्तयतु अस्माकं प्रेमानलमहाज्वालेशतजन्मपर्यन्तं वर्त्ततां नचैतदौषधस्पर्शोऽपि किमरे दावानलोपशमकोऽप्यम्बुराशिवज्ज्ञानलमुपशमयितुं शक्नोति । किञ्चास्य सन्देशस्यान्तरस्मत्किञ्चिदनुकूलोऽप्यर्थो यो यथा कथञ्चिदास्ते स किं तदभिप्रेतो घुणाक्षरन्यायेनायातो वेति न तत्र विश्वसिम इति ससंरम्भं ब्रुवाणासु तासु भो स्वामिन्यः क्षणमवधत्त ब्रह्मज्ञानादन्यमपि सन्देशमानीतवानस्मीत्युक्त्वा तत्र श्रोतुं श्रद्दधानास्ताः प्रति कृष्णवाक्यमाह । यत्त्वहमिति । भवतीनां दृशां प्रियोऽपि यदधुना दृशां दूरे वर्त्ते तन्मदनुध्यानकाम्ययैव । तदनुध्यानं मनसः सन्निकर्षार्थम् । अतोऽधुना भवतीनां मनसः समीप एव वर्त्ते । एकत्रोपलक्षणमेतत् मम दृशां प्रिया अपि भवत्यो यदधुना दृशां दूरे स्थितास्तन्मनसः समीप एव वर्त्तध्वे इत्यप्यर्थः । तेन च दृक्समीपवर्त्तित्वे मनोदूरवर्त्तित्वं मनःसमीपवर्त्तित्वे दृग्दूरवर्त्तित्वमासक्तिविषयीभूतस्य वस्तुनो भवति अत्रापि मनोदृशोर्मध्ये मनस एवाभ्यर्हितत्वात् मनःसमीपवर्त्तित्वमेव मदभीप्सितं तदेव भवतीनामप्यभीप्सितं भवत्विति भावः ॥ ३४ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

एतत्सिद्धौ कृतकृत्यता भवतीत्याह । एतदन्त इति । इयं ब्रह्मसम्प्राप्तिः अन्तः समाप्तिः फलं यस्य सः समाम्नायः कर्मकाण्डरूपो वेदभागः योग उपासनाकाण्डलक्षणो वेदभागः साङ्ख्यं ज्ञानकाण्डात्मकस्तद्भागः यद्वा समाम्नायः काण्डत्रयात्मको वेदः ननु वेदस्य कर्मादिप्रतिपादनपरत्वदर्शनात्कथमेतदन्तत्वमित्याशङ्क्य फलवदर्थावबोधनपरस्य वेदस्यैतदन्तत्वमेव न्याय्यमेतदतिरिक्तस्य मुख्यफलत्वाभावादित्याशयेनाह । योग इति । कर्मयोग उपासनायोगश्च सांख्यमात्मानात्मविचारात्मको ज्ञानयोगः ननु सर्वं एवं कुतो न प्रतिपन्ना इत्याशङ्क्याह । मनीषिणां पण्डितानाम्—

> सांख्ययोगौ पृथग् बालाः प्रवदन्ति न पण्डिताः ।
> एकं सांख्यं च योगं च यः पश्यति स पश्यती

त्यादिशास्त्रात्तत्तत्काण्डोक्तसाधनान्यप्येतदन्तान्येवेत्याह । त्यागः आहुतित्यागदानादिसंन्यासपर्यन्तः तपः कृच्छ्रचान्द्रायणादिमनःसंयमान्तं दमः इन्द्रियदमनं सत्यं यथार्थभाषणमिदमहिंसादेरप्युपलक्षणं तत्रानुरूपदृष्टान्तमाह । समुद्रान्ता इति । यथा आपगाः सर्वा नद्यः साक्षात्परम्परया च समुद्रान्तास्तद्वत् ॥ ३३ ॥

नन्वात्मस्वरूपेण यद्यपि न त्वं वियुक्तस्तथापि सौन्दर्यसौष्ठवादिगुणालंकृतविग्रहनन्दनन्दनात्मा दृशां प्रियो ऽस्माविरहः किमर्थं दूरे वर्तत इति चेत्तत्राह । यत्त्वमिति । दृशां प्रियो यदि निकटे वर्तते तदा कदाचिन्मनोऽसन्निकृष्टमपि भवति दूरे तु तस्मिन्मनः सन्निकृष्टमेव भवति अतः भवतीनां मनः सन्निकर्षार्थं भवतीनां दृशां प्रियोऽहं दूरे वर्ते वै निश्चयेनैवं ज्ञातव्यं यो मदनुध्यानं करोति स मम प्रिय इति कृत्वा मदनुध्यानकाम्ययाहं दूरे वर्ते अनुध्यानेन च परस्परं मनः सन्निकृष्टं भवतीत्यर्थः ॥ ३४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

एवम्भूतः मत्प्राप्तिफलको वेदः अत एव वेदोक्तानि कर्मज्ञानवैराग्यादिसाधनानि च मत्प्राप्तिफलकानीत्याह । एतदिति । एषा मत्प्राप्तिः फलं यस्य स तथा समाम्नायो वेदः न वेदवेदी महतीं विनष्टिमित्यादिश्रुतेः यदर्थपरो वेदस्तदर्थबोधकतया वेदो यस्यास्तीति वेदी स महतीं विनष्टिं पुनः पुनर्जन्ममरणलक्षणां न वेद किन्तु वेदार्थप्राप्तिलक्षणां मुक्तिं प्राप्नोतीतिश्रुत्यर्थः वेदार्थः श्रीकृष्णः वेदैश्च सर्वैरहमेव वेद्य इति श्रीमुखोक्तेः योगः वेदोक्तः कर्मयोगो विविदिषोत्पादनद्वारा एतदन्त एव तमेतं ब्राह्मणा यज्ञेन ज्ञानेन तपसानाशकेन विविदिषन्तीति श्रुतेः सांख्यं वेदोक्त

यथा दूरचरे प्रेष्ठे मन आविश्य वर्त्तते ।
स्त्रीणाञ्च न तथा चेतः सन्निकृष्टेऽक्षिगोचरे ॥ ३५ ॥
मय्यावेश्य मनः कृत्स्नं विमुक्ताशेषवृत्ति यत् ।
अनुस्मरन्त्यो मां नित्यमचिरान्मामुपैष्यथ ॥ ३६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

हि आत्मानात्मपरमात्मविवेको ज्ञानम् एतदन्तमेव ब्रह्मविद्भवतीति परमिति श्रुतेः अत्र योगशब्देन सांख्यशब्देन च केनापि मुनिना पतञ्जलिना कपिलनामकेन च प्रोक्तं पातञ्जलं योगशास्त्रं सांख्यशास्त्रञ्च वेदविरुद्धं सूत्रकारविदूषितं न ग्राह्यमिति द्योतयितुमाह । मनीषिणामौपनिषदानां यो योगः यत्सांख्यमित्यर्थः । त्यागो मद्भजनविरोधिवस्तुषु वैराग्यम् "किम्प्रजया किंधनेन त्यागेनैकेनामृतमानशु"रिति श्रुतेः तपः मदर्थतीर्थे वासदेहशोषणशाकाहारब्रह्मचर्य्यैकादश्युपवासादि दम इन्द्रियनिग्रहोपलक्षितमभ्यानं भक्तिः "आत्मा वारे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः "कृष्ण एव परो देवस्तं ध्यायेदि"त्यादिश्रुतिभ्यः तथा सत्यं सत्यान्मत्तोऽनपेतं सत्यमनुर्क्तमत्प्राप्तिसाधनमात्रमित्यर्थः । सर्वेषां वेदानां तदुक्तानां योगादीनामेकत्र पर्य्यवसाने दृष्टान्तः समुद्रान्ता इवापगा इति समाम्नायग्रहणेनैव सर्वग्रहणेऽपि तद्विरुद्धशास्त्रोक्तयोगादित्यागार्थस्तत्प्रपञ्च इति ज्ञेयम् ॥ ३३ ॥

ननु सत्यमुक्तरीत्या सर्वेश्वसर्वशक्तेः सर्वकारणकारणस्य सर्वान्तर्यामिणः सर्वत्र संयोगोऽस्ति तथापि कान्त्यादिगुणयुक्तमनोहरविग्रहादर्शनेनातिव्याकुला एवमित्यत आह । यत्त्वहमिति । भवतीनां दृशामहं दूरे वर्त्ते इति यत्तत्तु मदनुध्यानकाम्यया मनसः सन्निकर्षार्थम् एकाग्रेण मनसा मद्ध्यानार्थमित्यर्थः ॥ ३४ ॥

भाषा टीका ।

बस इस मन का रोकना ही सब विद्वान् लोगों का वेदार्थ है यही योग है यही सांख्य है यही शम दम है यही सत्य है जैसे कि सब नदियों की समाप्ति समुद्र में हो जाती है ॥ ३३ ॥

जो मैं तुमारी दृष्टि का प्रिय हो कर भी दूर में रहता हूं सो तो तुमारे मन के एकाग्र से लगने के लिये है जिस से मेरे ध्यान के होने से मन स्थिर हो जावेगा ॥ ३४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

एतदुपपादयति त्रयेण । यथा दूरचर इति ॥ ३५—३६ ॥

श्रीमत्सनातनगोस्वामिकृतवृहत्तोषिणी ।

तत्र स्थित्या कथं तत् सिद्ध्येत्तदुपपादयति । यथेति । च अपि स्त्रीणां प्रेष्ठेऽपि दूरचरे सत्येव यथा तस्य मनः आविश्य वर्त्तते स्त्रीष्वाविष्टं भवति स्त्रीणामिति स्त्रीष्वित्येव वार्थः ॥ ३५ ॥

ननु तथापि तदर्थं चिरं तत्र स्थातुं नार्हसि सत्यम् अधुना तत् सुसिद्धम् अतो मामागतप्रायं जानीथेत्याह । मयीति । अचिरादेव मां नित्यम् अवलम्बनतया प्राप्स्यथ नित्यमिति पुनर्विरहं निरस्यति । ननु सर्वशक्तिहीना वयं तत्र निजं किमपि साधनं न पश्यामः तत्राह । मयीति विशेषेण मुक्तास्त्यक्ता अशेषा वृत्तयः सन्यसङ्कल्पविकल्पाद्यात्मिका येन तत् इति स्वरूपमात्रकथनं स्वतः सुखेनावेशबोधनार्थं किञ्च कृष्णे भवतीनां चित्ताकर्षकं इति अतो मामेवैकमनुस्मरन्त्यः ईदृशेन भवतीनां मदनुस्मरणेनैवाहमाकृष्य तत्र नेतव्यः तत्र भवतीनां साधनान्तरेण किमित्यर्थः ॥ ३६ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

ननु भवतु नाम भवतो भावसिद्धिस्तत्रास्माकं किमित्याशङ्क्याह । भवतीनामपि तदाधिक्यं स्यादिति कामनयापीत्याह । यथेति । स्त्रीणामन्यासामपि किमुत भवतीनां चेत्युक्तार्थसमुच्चये । अतो मिथः प्रेमवर्द्धनाभिलाषजो दुर्निग्रहोऽयं मम दुराग्रहो भवतीभिः क्षन्तव्य इति भावः ॥ ३५ ॥

तदेतावत् सन्दिश्य पुनर्विचारयति स्म मया यत्त्रिधा समाधानं कृतं तद् यद्यप्रकटलीलामयत्वे सम्भावनया तान् मंस्यन्ते मनोनिरोधे च नोत्सहिष्यन्ते तर्हि प्रकटलीलायामेव साक्षान्मत्प्राप्तिः समाधानाय कल्पेतेति । तदेतद्विचार्य सोऽपि मम दुराग्रहो भवतीनामाग्रहेण चिरादेव नङ्क्ष्यतीत्याह । मय्यावेश्येति । पद्येऽस्मिन्नुत्तरत्र च मयीत्याद्यस्मच्छब्दप्रयोगस्य त्रिस्त्रिरावृत्त्या तत्राप्यादित एव कृष्ण इति विशिष्य सर्वत्राप्युन्नेयमिदमित्याधिकारनिर्मित्या कृष्णपदं यथायथं योज्यम् । तच्चावश्यकत्वायान्याकारप्राप्तिपरिहाराय च गम्यमिति स्थिते सोऽयमत्रार्थः । यद् यस्माद्विमुक्ते तथाशेषवृत्तिकं मनो मयि कृष्णे यथाकथञ्चिदाश्रयिभ्यः स्वदायकतया प्रसिद्धेऽस्मिन् कृष्णतया प्रसिद्धाकारे आवेश्य निरन्तरं मां कृष्णतया प्रसिद्धाकारमेव स्मरन्त्यः स्थ तस्मादचिरादेव मां कृष्णतया प्रसिद्धाकारम् उपसमीपे पश्यथ प्राप्स्यथैव । न तु ममात्र स्वातन्त्र्यमिति भावः । नन्वेवञ्चेत् पुनरपि तथा दुराग्रहो भवतः स्यात्तत्र सत्यादुत्प्राह । नित्यमिति । सहासेनैव तथाकरवं किन्त्वितः उर्द्धं न करिष्यामीति भावः ॥ ३६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

किञ्चक्षुर्गोचरे त्वय्यनुध्यानं मनसः सन्निकर्षार्थं न लभ्यते इत्यतो नेत्याह । यथेति । प्रेष्ठे प्रियतमे दूरचरे सति तस्मिन् यथा स्त्रीणां मन आविश्य वर्तते स्थिरतयेति शेषः तथा, तासां चेतः संनिकृष्टेऽक्षिगोचरे प्रियतमे न वर्तते तद्वत् ॥ ३५ ॥

किं तदनुध्यानेन मनः सान्निकर्षेण च साध्यमित्यत आह । मयीति- विमुक्ता अशेषा वृत्तयः व्यापाराः यस्मात्तन्मन स्तन्मयि कृत्स्नं कात्स्न्येन निवेश्य मामेव नित्यमनुस्मरन्त्योऽचिरादेव मामु- पैष्यथ ॥ ३६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

निदर्शनेनैतमर्थमुपपादयति । यथेति चशब्दात्पुरुषाणामिति ग्राह्यं प्रेष्ठे प्रियतमे पदार्थे पूर्वानुभूते इति शेषः अक्षगोचरे इन्द्रियविषये ॥ ३५ ॥

लोके प्रियतमस्मरणे फलसन्देहो न तथा मत्स्मरणं फलानिश्च- यादिति भावेनाह । मयीति । यद्विमुक्ता अशेषा वृत्तयो यस्य तत्तथा तन्मनः मय्यावेश्य नित्यं मामनुस्मरन्त्यो यूयं शीघ्रं मां तथा उपैष्यथेत्यन्वयः ॥ ३६ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

ननु किमेतदुच्यते अस्माकं तु सर्वदैव त्वयि मन इति चेत्तत्राह । यथा दूरचर इति । अयमेव च गोपिकानां धर्मः यथा सर्वदा मां स्मरन्ति ममाप्ययं धर्मः यथा ताभ्यः आनन्दं प्रयच्छामि एतदुभयं तदैव घटते नान्यथेति धर्मो निरूपितः अर्थोऽपि भगवानेव परं गुप्ततया संरक्ष्यतयैवहिगोपायति यत्र निरन्तरं मनस्तिष्ठति अन्यथा क्षणमपि प्रमादे अर्थो गच्छेत् अतः पाक्षिकः कदाचित्कोऽपि दोषः परिहरणीय इति सन्निकर्षापेक्षया विप्रकर्षे मनसः स्थैर्यमाह । दूरचरे दूरेऽप्यस्थिरे अन्यथा त्वयं गच्छेत् निराशो वा भवेत् अतो दूरचरे आवश्यके प्रेष्ठे यथा मनो वर्तते निश्चलं सर्वदा तत्रापि स्त्रीणां निकटे हि शीघ्रमेव मानादिदोषोत्पत्तिसम्भवात् चकारादन्येष्वपि सम्बन्धेषु यथा पुत्रं माता स्मरति पिता च वा एवमन्य अपि सन्नि- कृष्टे चेतो न स्मरति अयं हि बहिः पूर्वस्त्वान्तरः किञ्च अय- मक्षिगोचरः नह्यन्यविषये अन्यदिन्द्रियं स्वतन्त्रतया प्रवर्तेत अत एवाक्षिगोचरे न चेतः प्रवर्तेत बलिष्ठं च चेतः अन्यथा प्रत्यक्षे विषये अन्यचित्तता न स्यात् ॥ ३५ ॥

नन्वस्माभिः त्वत्प्राप्त्यर्थं चिन्ता क्रियते तथा सति किं मनः स्थापनेन किं निरन्तरसम्बन्धेन वा कामार्थं हि प्रयत्नः लोके च यादृशः व्यवहारसिद्धः तत्र क्षणं मनश्चाञ्चल्यमप्यावश्यकत्वात् न विगीतामित्याशङ्क्याह । मय्यावेश्येति । अहं हि कृत्स्नप्रसादे- नापि प्रायः कृत्स्नेनापि साधनेन प्राप्तुं योग्यः साच कृत्स्नता अस्यामेवावस्थायां भवति नान्यथा कृत्स्नतायां हेतुं वदन् अवस्थान्तरे तदभावमाह । विमुक्ताशेषवृत्तीति । विमुक्ताः सर्वेभ्यो विषयेभ्यो अशेषा दशापि वृत्तयो यस्य एकादश द्वादश वा सहजाश्चेव् गुणकृतास्तु यथैव ताः भ्रमरवाक्येषु निरू- पिताः "एकादशासी नमनसो हि वृत्तय" इत्यत्र स्वाभाविका अपि निरूपिताः । ननु सर्ववृत्त्यभावे स्वरूपनाश एव स्यादित्याशङ्क्याह । तदिति । प्रसिद्धं तन्मनः इदानीं त्वहमाविष्टः अतः परं भव- तीभिर्मय्यावेश्य बलान्मयि मनोनिवेशनं कृत्वा पश्चात् शीघ्र- मेवाहं प्राप्तव्यः । ननु वस्तुविचारे मनस्त्वन्यदेव तस्मिन्निविष्टे कथं भगवत्प्राप्तिरिति चेत्तत्राह । अनुस्मरन्त्य इति । मनोद्वारा आत्मापि स्मरति यद्यपि स्मरणं चेतसो धर्मः तथाप्यनुस्मरण- मात्मन एव अनेनोभयविधोऽपि सम्बन्धो निरूपितः मनोद्वारा स्वयं भगवति प्रविष्टाः स्मरणद्वारा च भगवांस्तास्वनु प्रविष्ट इति एवं सत्यचिरादेव मामवाप्स्यथ परस्परया नित्यं सम्बन्धे संघर्षादन्तरास्थितं गच्छति तथा मनोविलये चित्तस्यापि विल- यादचिरादेव प्राप्तिः आत्मगाम्येव कामेन फलरूपोऽहं मुख्य इति तात्पर्यम् ॥ ३६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

एतदेव स्त्रीपुंसानामनुभवदर्शनायोपपादयति । यथेति । स्त्रीणा- मिति चकारात् पुंसाञ्च दूरवर्तिन्यां प्रेष्ठायां यथा मन आविश्य वर्तते । न तथा सन्निकृष्टायामक्षिगोचरीभूतायाञ्चेत्यर्थः ॥ ३५ ॥

हं हो उद्धव । एषोऽपि सन्देशः सम्प्रति त्वया स्वहृदय- सम्पुट एव स्थाप्यतां सम्प्रति कृष्णेन याः स्त्रियः सम्भुज्यन्ते कदाचित्तासां दशां दूरवर्तिनि कृष्णे भविष्यति सति । तास्य एव तदानीं त्वया दातव्यः । सम्प्रति व्रजस्थास्तु नास्य ग्राहिकाः । यासां पूर्वं व्रजवर्तिन्यापि दृग्गोचरीभूतेऽपि तस्मिन् कृष्णे एकैकनिमेषेणैकैकयुगकालं व्याप्य सहग्दूरवर्तीकृत एवाभूत् तदा तदेव सहस्रशः विरहेषु सहस्रकल्प एव मनःसन्निकर्षः खल्व भूद्देवासामिति सावहेलमाचक्षाणासु तासु भोः स्वामिन्यः यद्येषोऽपि न रोचते तर्ह्यस्मादप्यन्यं सन्देशं शृणुत मयातु बहव एव सन्देशा आनीता इति प्रोच्य पुनः कृष्णवाक्यमाह । मयीति । विशेषेण मुक्तास्त्यक्ता गृहपत्यादिविषयाः अशेषाश्च स्ववृत्तयो येन तथाभूतं मनः मयि कृष्णे आविश्य मां नित्यमनुस्मरन्त्यो यद्यत्तेष्वे तदाचिरादेव मामुप स्वसमीप एव वर्तमानम् एष्यथ प्राप्स्यथ ॥ ३६ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

ननु किमित्येवमुच्यते अस्माकं तु सन्निकृष्टेऽपि त्वयि मनः सन्निकृष्टमेवासीदिति चेत्सत्यं तथाप्यस्ति विशेष इत्याह । यथेति । यथा प्रेष्ठे दूरचरे तच्चिन्तया मनसस्तस्मिन्नेव सन्निविष्टत्वं न तथा सन्निकृष्टे नैश्चिन्त्यार्थः । यद्यपि पुरुषाणामप्येवं तथापि स्त्रीणां विशेषतः इत्थमिति द्योतयितुं स्त्रीणामित्युक्तं चकारात्पुरुषाणा- मपि ॥ ३५ ॥

एतत्फलमाह । मयीति । कृत्स्नमित्येतद्विवृणोति निवृत्ता अशेषा- स्तत्तद्विषयगोचरा वृत्तयो यस्य तथाभूतं यत् तन्मनो मय्या- वेश्य मामेवानुक्षणं स्मरन्त्योऽचिरात्मान् मामेवाप्स्यथ ॥ ३६ ॥

या मया क्रीडता रात्र्यां वनेऽस्मिन् व्रज आस्थिताः ।
[१] अलब्धरासाः कल्याण्यो मापुर्मद्वीर्यचिन्तया ॥ ३७ ॥
श्रीशुक उवाच ।
एवं प्रियतमादिष्टमाकर्ण्य व्रजयोषितः ।
ता ऊचुरुद्धवं प्रीतास्तत्सन्देशागतस्मृतीः ॥ ३८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

तथाह । यथेति ॥ ३५ ॥

ध्यानफलमाह । मयीति । माम् अनुस्मरन्त्यो ध्यायन्त्यः अचिरान्मामेवैष्यथ प्राप्स्यथ ॥ ३६ ॥

भाषा टीका ।

जिस प्रकार से अपने प्रीतम के दूर रहने से स्त्रियों का मन लगता है तैसे स्त्रियों का चित्त पास में नेत्र के गोचर होने से नहीं लगता है ॥ ३५ ॥

मेरे दूर रहने से सब विषयों से, छूटे हुये संपूर्ण मन को मेरे मे लगाने से नित्य मेरा स्मरण करने से थोड़ेही काल मे तुम मेरे मे प्राप्त हो जाओ गी ॥ ३६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

उपैष्यथेति माधुर्यमात्रमितिचेदत आह । या इति । हे कल्याण्यः स्वभर्तृभिः प्रतिषिद्धा या वने क्रीडता मया सहालब्धक्रीडास्तास्तदैव मामापुः प्रापुः ॥ ३७ ॥

तस्य सन्देशेनागता स्मृतिर्यासां ताः प्रथमार्थे द्वितीया ॥ ३८ ॥

श्रीमत्सनातनगोस्वामिकृतवृहत्तोषिणी ।

ननु तत्र विश्वासं कर्तुं न शक्नुमः तत्राह । या इति । मया क्रीडता सह किंवा मयि क्रीडति सतीत्यर्थः । अस्मिन्निति सदैव चित्तान्तःसाक्षादिव तद्वृत्तेः किम्वा तत्रागमनस्याविलम्बताबोधनार्थं मा न माशब्दो नञर्थ अलब्धरासा न वृत्ताः किन्तु मम वीर्याणां रासक्रीडादिलक्षणानां चिन्तया ध्यानेन वा मामापुरेव यतः कल्याण्यः युष्मत्सदृश सौभाग्यवत्य इत्यर्थः । मद्ध्यानस्यायं प्रभावो व्यक्त एवेति विश्वासः कार्य एवेति भावः ॥ ३७ ॥

एवमेतत् स्मृतिर्ज्ञानं अन्यत्तैर्व्याख्यातं यद्वा अहो वत तथापि तासां शोको न निवृत्तः विशेषतश्च तत्सन्देशाज्ञातस्मृतिवेगेन सर्वा अपि विलेपुरित्याह । एवमिति । ईदृशमप्याकर्ण्य प्रीता हृष्टाः किं कारका नैवेत्यर्थः । यतो व्रजस्त्रियः तद्दर्शनैकजीवना इत्यर्थः । अतस्तत्सन्देशादागता विशेषेणोद्गता तत्स्मृतिर्यासां तथाभूता ऊचुः । यद्वा तत्सन्देशेन कृष्णसन्देशेन आगता रासे सखीनां तासां कृष्णप्राप्तौ स्मृतिर्यासां ताः अत एव विश्वासेन प्रीताः ॥ ३८ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

तत्र प्रमाणं दर्शयति । या इत्यस्मिन् प्रकटप्रकाशात्मके वृन्दावने रात्र्यां तस्यां क्रीडता मया कृष्णतया प्रसिद्धाकारेण सह अलब्धरासाः तत्र हेतुर्व्रज आस्थिता रुद्धा इत्यर्थः ता अपि मद्वीर्यचिन्तया मम कृष्णतयाप्रसिद्धाकारस्य सर्वातिक्रमिमद्गुणप्रभावेण मा मां कृष्णतया प्रसिद्धकारमापुरेव अप्रकटप्रकाशात्मकेवृन्दावनेइतिभावः कल्याण्य इति सम्बोध्य भवत्यस्तु साक्षादेव प्राप्स्यन्ति ननु जड़गुणमयं देहमिमिति रीत्येति व्यञ्जितम् ॥ ३७ ॥

एवमिति क्रमेण यदा यदा यच्छ्रुतं तदा तदा तत्रार्थत्रयस्यापि ताभिस्तारतम्येनानुसंहितत्वात् प्रथमार्थे स्वप्रेयसि तस्मिन् । पूर्वं यत् पत्यपत्यसुहृदामित्यादिषु या सर्वतनुभृतां निरुपाधिप्रेमास्पदत्वादिना परमात्मता स्थापिता सम्प्रतितेन ज्ञानमयेन सन्देशेनागता तदात्मिका स्मृतिर्यासां ताः । तन्त्रेण तु तेन ज्ञानमयेनापि सन्देशेन न गता स्मृति निजभावोचितानुसन्धानरूपा यासां ताः । तत्र हेतुः । प्रीताः तस्मिन् स्वाभाविकतादृशप्रेमवत्य इत्यर्थः । प्रियतमादिष्टमिति सोऽप्येवमस्मासु नोपदिशेदिति विभाव्येति भावः । द्वितीयार्थे । तेन प्रेमकृतसाक्षात्कारसूचकेन सन्देशेनागता स्मृतिः साक्षात्कारस्य स्मरणं यासां ताः । तृतीयार्थे तेनाप्रकटप्रकाशे संयोगं सूचयता सन्देशेनागता स्मृतिर्जातिस्मरवत्तत्संस्काररूपा यासां ताः । अन्त्यार्थद्वये अत एव प्रीताः प्राप्तपरमानन्दाः अत एव तिश्वासे हेतुः प्रियतमेति । अथ मय्यावेश्य मनः कृष्ण इति चतुर्थपक्षे सा स्मृतिस्तु पूर्वं स्ववर्गवज्जातपूर्वानुरागतया दृष्टानां तासां रासे तु तत्रादृष्टानामप्येतावन्तं कालं स्वीयश्रीकृष्णानुरागावेशेनाननुसंहितानामनेन तु सन्देशप्रभावेणानुसन्धानरूपेति ज्ञेयम् । अत्रैवं श्रीभगवतोऽभिप्रायः मम सम्प्रति गमनादिकं न सम्भवत्येवेति सान्त्वनसन्देशो प्राप्ते प्रथमत आगमनप्रतिज्ञैव समञ्जसा भाविनि कालविलम्बे तु न केवला सा समञ्जसेति विविधसमाधानसन्धायकविविधार्थसम्बन्धे सन्देशोऽपि योग्यः । यस्य पर्यवसानार्थेन मुहुस्तत्रत्यनित्यविहारानुसंधानमपि भवेत् । कदाचिद्वादिरनुसन्धाने तु मद्दर्शनतृष्णा च मुहुस्तत्स्फुरणरसानन्दचमत्कारहेतुः स्यात् । आयत्यां मत्साक्षात्कारे परमचमत्कारः स्यादिति ॥ ३८ ॥

१ अलब्धावासकल्याणा आपुर्मां मद्विचिन्तया इतिविज० पाठः

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्।

या रात्रयः क्रीडया नीताः तासु मामापुरित्यन्वयः ॥ ३७—३८॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका

व्यामोहनमात्रमेतदित्यतो निदर्शयति । या इति । हे कल्याण्यः याः स्त्रियः व्रज एवास्थिता भर्त्रादिप्रतिबन्धादिति भावः । वने क्रीडिता मया सह न लब्धः रासः क्रीडा याभिस्तथाभूताः मदीयानां मच्चेष्टितानामनुचिन्तया मामेवापुः प्रापुः खलु ॥ ३७ ॥

एवमिति । इत्थं प्रियतमेन भगवतादिष्टं श्रुत्वा तस्य सन्देशेनागता स्मृतिर्यासां ताः व्यत्ययेन द्वितीया प्रीता हृष्टा उद्धवमूचुः ॥ ३८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

अस्मिन्नर्थे स्वानुभूतमर्थं प्रमाणयति । यन्मयेति । यद्यथा व्रजे आस्थिता अस्मिन् वने अलब्धावासकल्याणाः अप्राप्तगृहसुखाः यूयं मया रात्रीः क्रीडिताः मद्विचिन्तया मामापुः एवमिति श्लोकः ॥ ३७ ॥

तत्सन्देशेनागतभगवद्विशेषस्मरणाः ॥ ३८ ॥

श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी।

एतस्य निदर्शनं वदन् मोक्षप्रकारमाह । या इति । भवत्यः समागताः गृह एव स्थिताः तास्तदैव सर्वप्रकारेण मां प्राप्तवत्यः अनेनैव निदर्शनेन भवतीभिरप्यहं प्राप्तव्यः तस्मान्मदर्थजीवनस्थापनमिति पक्षो निरर्थकः । अन्यथा समागतानां भवतु अनुभवसिद्धश्च क्लेशः । ननु ताः प्रतिबन्धेन तथाभूताः कथं स्तुत्या इत्याशङ्क्याह । कल्याण्य इति । तासां महद्भाग्यमस्तीति अवश्यं प्रतिबन्धरूपं दुरितं दृष्टं एवोपक्षीणमिति कण्टकेन कण्टकोद्धारवद्देहनिराकरणं एवोपक्षीणं भवतीनां तु तद्दुरितं पश्चादिमामवस्थां प्रापितवत् अतो मदुक्तप्रकारेण दोषं परित्यज्य तामवस्थां प्राप्स्यथेति भावः । रात्र्यां क्रीडता मया सहाळब्धरासाः क्रीडा स्वतः सिद्धेति निरूपणार्थं तथोक्तं प्रतिबन्धाभावाय रात्र्यामिति वन इति साधनसंपत्तिः मयैव क्रीडा क्रियत इति न तासां प्रयासः अस्मिन्नेव वन इति भगवानपि तत्रैव स्थित्वा वदतीति ज्ञापितम् अस्मिन्निति व्रजसम्बन्ध्यपि अस्मिन्नेव व्रजे ता आस्थिता इति भवतीनामपि निर्बन्धेनाग्रैवास्थापनम् । अलब्धरासा इति तासां भाग्यमुपभोगेन नोपक्षीणमिति ज्ञापितम् अत एव पूर्णभाग्याः । ननु तासां किं साधनमित्याकाङ्क्षायामाह । मद्वीर्यचिन्तयेति । ता हि गमनार्थं प्रवृत्ताः भर्त्रादिभिः प्रतिबद्धाः तत्प्रतिबन्धाभावाय भगवत्पराक्रमं स्मृतवत्यः ततो भगवद्धर्मा अप्यक्लिष्टा इति एव पराक्रमः वीर्यं तेभ्यो दत्वा स्वबालकमिव दोषान्निवार्य भगवन्तं समधायास अतो मत्पराक्रमस्यैव चिन्तोचिता ननु दोषपुरःसरं मसेति भावः । यद्वा अन्तश्चिरान्मामवाप्स्यथेत्यनेन व्रजे समागतस्य भगवतः पूर्वकाम्भिळब्धक्षणः प्रातिरुच्यत उतान्तर्गतगोपभार्याणामिव लोच्यते आचार्यचेदोमिति ब्रूमः अन्या चेदनिष्टत्वान्नेदं समाधानमित्यत आह । या मयेति । या गोप्यो व्रजस्थिता एव वने स्थितं मामापुराक्षेपलभ्यत्वादमङ्गलत्वाच्च तद्देहत्यागः स्पष्टतया नोक्तः देहत्यागपूर्वकं तासां स्वप्राप्तौ हेतुभूतविशेषमाह । रात्र्यां क्रीडता मया सह पूर्वमलब्धरासा यतो व्रजस्थिता एव सत्यो वने स्थितं मामापुरित्यर्थः । भवतीनां लब्धरासत्वान्न तथा भविष्यतीति भावः । अत एव कल्याण्य इति सम्बोधनम् अत्रायं भावः रासे हि पूर्णस्वरूपानन्द एतासु स्थापितः स च भगवत्स्वरूपात्मक इति तदनुभावेन विरहेऽपि जीवनमेव सम्पद्यते । न वैपरीत्यं भवितुं शक्नोति । यद्यप्ययं भावोऽति कठिनोऽत एव प्रियेणाप्यतिकृच्छ्रेण प्रायः कथं च नेति पदत्रयमुक्तम् अग्रे च प्रत्यागमनसन्देशैरिति प्राणधारणे हेतुरुक्तः तथापि सन्देशानुसन्धानेऽप्युक्तधर्मकार्यमेवेति ज्ञेयम् अन्यथैतस्य सर्वतिरोधायकत्वेनातितीक्ष्णत्वेन क्षणमात्रेणैवान्यथा भवेदतः सुष्ठूक्तं देहत्यागे तामामलब्धरासत्वं हेतुरिति । तथा च तासु विरहसामयिकजीवनहेतूक्तरूपधर्माभावात्तथात्विरभूद्भवतीनां तु तद्भत्त्वाद्यथा पूर्वमेव मेलनं भाविष्यतीति अत एव जन्मोत्सवेऽप्यात्मानं भूषयाञ्चकुरित्यत्र शरीरपदं त्यक्त्वात्मपदं तद्वाचकमुक्तमविकृतत्वज्ञापनाय अन्यथा संक्रीडातो लब्धरासेऽकिंप्रयोजनं न पश्याम इति ॥ ३७ ॥

एवमुपदेशेन तासां दोषो निवृत्त इत्याह । एवमिति पञ्चदशभिः । विज्ञारूपास्ता इति तासां चतुर्दशवाक्यान्युपक्रमश्चापरः तथा सति सर्वा एव भगवत्कलास्तासु सिद्धा इति निरूपितं भवति प्रतारणशङ्काभावायाह । प्रियतमेनादिष्टमिति । आज्ञापूर्वकमुक्तम् अमानने दण्डोऽपि निरूपितः व्रजयोषित इति शुद्धाः कापट्यरहिताः ताश्च भगवता अनुगृहीता उक्तार्थफलं स्वस्मिन् जातमिव ज्ञापयितुमिव उत्सवरूपम् उत्सवेऽपि प्रियस्मरणं इदं भवतीति उपदेशेनैव प्रीताः पूर्वासूयादिक्लेशान् त्यक्तवत्यः । ननु कथं पूर्वमाक्रोशः कथमिदानीं प्रीतिः विरहस्य तुल्यत्वादित्याशङ्क्याह । तत्सन्देशेन तादृशसन्देशेन पूर्वं ज्ञात एवार्थः मध्ये कालादिदोषाद्विस्मृतः भावान्तरमुत्पादितवान् स पुनरिदानीं स्मृतः अस्मरणकार्यं दूरे चकार ॥ ३८ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

अत्रार्थे भवतीनां मध्ये पूर्वमन्तर्गृहनिरुद्धा या गोप्यस्ता एव प्रमाणमित्याह । या इति । अस्मिन् वृन्दावने रात्र्यां क्रीडता मया सह या अळब्धरासा अभवन् कुतः व्रजे आस्थिताः भर्तृभिर्निरुद्धत्वादिति भावः । ताः स्वमनोरथासिद्ध्या मद्विच्छेदमहापीडया च मर्त्तुकामा अपि कल्याण्यः कल्याणवत्यो जीवन्त्य एव मदीयचिन्तया मां आं तदैवापुः । तत्रैवाविर्भूय रममाणेन मया सार्द्धमेव तस्यां रात्रौ व्रजे स्थिताः तत्परत्रिषु रासमपि प्राप्ता इत्यर्थः ॥ ३७ ॥

ता अन्तर्गृहनिरुद्धचर्या एवोचुः । तेन सन्देशेन आगताः स्मृतिर्यासां ताः । द्वितीया आर्षी । आं सत्यमेव तस्यां रात्रौ तेन रममाणेनैव सह वयमास्मेति स्मरन्त्यः स्वानुभवं प्रमाणीकृत्य उद्धवं प्रति प्रीतास्ता एव लौकिकरीत्या उद्धवं पप्रच्छुः ॥ ३८ ॥

गोप्य ऊचुः ।

दिष्ट्याऽहितो हतः कंसो यदूनां सानुगोऽघकृत् ।
दिष्ट्याप्तैर्लब्धसर्वार्थैः कुशल्यास्तेऽच्युतोऽधुना ॥ ३९ ॥
कच्चिद्गदाग्रजः सौम्य ! करोति पुरयोषिताम् ।
प्रीतिं नः स्निग्धसव्रीडहासोदारेक्षणार्चितः ॥ ४० ॥
कथं रतिविशेषज्ञः प्रियश्च वरयोषिताम् ।
नानुबध्येत तद्वाक्यैर्विभ्रमैश्चानुभाजितः ॥ ४१ ॥
अपि स्मरति नः साधो ! गोविन्दः प्रस्तुते क्वचित् ।
गोष्ठीमध्ये पुरस्त्रीणां ग्राम्याः स्वैरकथान्तरे ॥ ४२ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

नेदं त्वच्युतपादकमात्रमपि तु यथास्थितमदनुस्मरणफलस्य सखीषु भवतीभिर्दृष्टत्वादित्याह । या मयेति । स्वभर्त्रादिभिः प्रतिबद्धत्वाद्या व्रजे स्थिताः अस्मिन्वने रात्र्यां क्रीडता मया अलब्धरासाः मद्वीर्यचिन्तया मां प्रापुः कल्याण्यः जन्मान्तरेषु अनुष्ठितसुकृताः यद्वा मदनुचिन्तया मत्प्राप्तिप्रतिबन्धकदुरितक्षयात्कल्याण्यः यद्वा अलब्धरासा अपि मां प्रापुः भवत्यस्तु लब्धरासा अत एव कल्याण्यः तथा च ब्रह्मलोकावधिभोगमात्रं यदपेक्षया तुच्छं तन्मया सह क्रीडनं प्राप्तवतीनां युष्माकं मत्स्वरूपप्राप्तिरेवात्रावशिष्यते न त्वन्यत्सा च यथोक्तोपायेन भविष्यत्येवाऽतोऽसूयादिकं विहायानन्यतया मदनुस्मरणं कार्यमिति भावः । "ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहं" मित्यनुरोधेनास्मिन्नित्युक्तम् अहमपि युष्मत्संनिधावेव तिष्ठामि मन्मनसो युष्मासु प्रविष्टत्वात् ॥ ३७ ॥

एवमुक्तप्रकारेण प्रियतमेनानुप्रेक्षणीयवचनेनाप्ततमेन तत्राव्यादिष्टमाज्ञापूर्वकमुपदिष्टमाकर्ण्य सम्यगवधार्य प्रीताः अस्मदुपकाराय भगवानिमं दूतं प्रेषितवानिति विचार्य प्रसन्नचित्ताः यतः प्रियतमसन्देशैरागता स्मृतिर्वयमनुचर्यो भगवान्स्वामी सर्वदासूयादिदोषनिवृत्तिपूर्वकमनुसन्धेय इत्यादिलक्षणं स्मरणं यासां ताः अनुगृहीता यतः व्रजयोषितः अनुकम्प्य स्थानवासिन्यः सरलचित्ता उद्धवमूचुः ॥ ३८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

एतदेवोपपादयति । या इति । हे कल्याण्यः ! भर्त्रादिभिः प्रतिरुद्धाः याः वने क्रीडता मया सह अलब्धरासाः ता मद्वीर्यचिन्तया मद्गुणानुध्यानेन मा मामेवापुः प्रापुरिति ॥ ३७ ॥

तस्य भगवतः सन्देशेनैव आगता स्मृतिर्यासां ताः आगतस्मृतीः आगतस्मृतयः प्रथमार्थे द्वितीया ॥ ३८ ॥

भाषा टीका ।

हे कल्याणीयो हो ! इस व्रज में रहते समय इस वन में रात्रि में जब मैंने रासक्रीडा करी तव जिन गोपियों को रास क्रीडा नहीं मिली वे गोपी मेरे पराक्रम को चिन्तन कर के मेरे को प्राप्त हो गई ॥ ३७ ॥

श्रीशुकदेवजी वोले इस प्रकार से अपने प्रियतम के संदेश को सुन कर सव व्रज स्त्री वडी प्रसन्न होकर उस संदेश से भगवान् के स्मरण होने से उद्धव जीके प्रति वोलती भई ॥ ३८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

यदूनामहितः शत्रुः अघकृद् दुःखदः दिष्ट्येत्यानन्दे आप्तैः प्राप्तैर्हितैर्वा सह ॥ ३९ ॥

अन्या ऊचुः । कच्चिदिति । नो ऽस्माकं करणीयां प्रीति कच्चित्पुरयोषितां करोति स्निग्धश्च तत्सव्रीडहासेनोदारमीक्षणं तेनार्चितस्ताभिरस्माभिर्वा ॥ ४० ॥

अन्या ऊचुः । कथमिति । तासां वाक्यैर्विभ्रमैश्चानुभाजितः पूजितः ॥ ४१ ॥

पुनरन्या ऊचुः किमनया चिन्तया ऽस्मान् क्वचित्प्रस्तुते प्रसङ्गे स्मरति किं ग्राम्या अविदग्धाः ॥ ४२ ॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

अहो अस्माकं निजसुखेन सिद्धेनासिद्धेनैव वा किं तस्य सुखमेवास्माकं सर्वमङ्गलमित्यभिप्रायेणादौ तदभिनन्दन्ति । दिष्ट्येति । लब्धसर्वार्थैरिति । तेषामप्यशेषसुखासिद्ध्या तदर्थचिन्ता निरस्ता अतः कुशली सुखी अच्युत इति कथमपि सुखतश्च्युतिराहित्याभिप्रायेण । अधुनेति पूर्वमत्रासौ बहुधा दुःखं प्राप्तोऽस्तीति भावः । अन्यैस्तैर्व्याख्यातं यद्वा दिष्ट्या एतदेव भद्रमित्यर्थः अहितः तद्द्वेष्टा यदूनामघकृत् आप्तैस्तत्र प्राप्तैर्बन्धुभिः अन्यत्समानम् ॥ ३९ ॥

श्रीमत्सनातनगोस्वामीकृतवृहत्तोषिणी ।

अत्र बहुधा वाक्यभेदेन वक्तृभेदकल्पनायां योग्यायामपि यथाकथञ्चित् सङ्गतिः पूर्ववत् कार्य्या सुखस्थिति-प्रकारमेव प्रेमलालसोत्कर्ष्येन पृच्छन्ति । कच्चिदिति । गदाग्रज इति । पौरस्त्रीजनसङ्गत्या पुरस्त्रीप्रीत्या स्मरणार्हतोक्ता उदारम् उत्कृष्टम् अन्यत्तैर्व्याख्यातं यद्वा नोऽस्मदीयः स्वामी गदाग्रज इत्यन्वयः अथवा अधुनास्मासु कृपां किं करोतीति प्रेमार्त्या पुनः पृच्छन्ति । कच्चिदिति । पुरयोषितां स्निग्धसव्रीडहासादिभिरर्चितोऽपि नोऽस्माकं प्रीतिं किं करोति करिष्यति सामीप्यापेक्षया वर्तमाना ॥ ४० ॥

अहो तत् किं पृच्छ्यते सन्देह एव तत्र नास्तीत्याहुः । कथमिति । प्रियश्च रूपवेशोपकारादिना तथा तासां वाक्यविभ्रमैरनुभाजितः एवं मिथः प्रीतिहेतुवैदग्ध्यादिकमुक्तम् अतः कथं नानुबध्येत कुतस्तास्वासक्तो न भवेत् अपितु भवितैवेत्यर्थः । यद्वा तद्वाक्यविभ्रमैर्नानुबध्येत न वशीक्रियेत तैरेवानुभाजितश्च अन्यत् समानं पक्षान्तरे ननु तस्य ताभिः सङ्ग एव नास्तीति चेत्तत्र सम्भवतीत्याहुः । कथमिति । अर्थः स एव अतस्तास्वासक्तोऽस्माकं प्रीतिं न कर्तवेति भावः ॥ ४१ ॥

सुषुप्त्यादिष्वपि भवत्यो दृश्यन्त इति सन्देशतः श्रुतेऽपि स्वसौभाग्ये पुनः प्रेमविशेषणाशान्त्या पृच्छन्ति । अपीति । क्वचित् कस्मिंश्चित् प्रस्तुते प्रस्तावे तमेवाहुः । पुरस्त्रीणां या गोष्ठी सभा तन्मध्ये या स्वैरकथा स्वच्छन्दवार्त्ता तस्या अन्तरे मध्ये ग्राम्या अपि नः किं स्मरति गोविन्दः गोकुलेन्द्र इति स्मरणार्हतोक्ता हे साधो ! इति तत्र कदापि किञ्चिन्मिथ्या न वाच्यमिति भावः यद्वा क्वचिदित्यस्याग्रेऽप्यन्वयः अहो अन्यप्रस्तावे क्वचिन्न स्मरतु नाम गोष्ठीमध्येऽपि क्वचित् स्मरति तत्रापि स्वैरकथान्तरेऽपि क्वचित् स्मरति अन्यत् समानं पक्षान्तरे अहो प्रीतिमस्माकं न करोतु नाम कदाचित् किं स्मरत्यपीति पृच्छन्ति । अपीति । अर्थः स एव एवमग्रेऽन्यदप्यूह्यम् ॥ ४२ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

अथागतस्मृतितया किञ्चिदाश्वासयुक्तानां पुनरननुसंहित-प्रकटप्रकाशतया जातविरहस्फूर्त्तीनां वाक्यानि दर्शयितुमाह । गोप्य ऊचुरिति । अहो अस्माकं निजसुखेन सिद्धेनासिद्धेनैव वा किं तस्य सुखमेवास्माकं सर्वमङ्गलमित्याभिप्रायेणादौ तदभिनन्दन्ति । दिष्ट्येति । लब्धसर्वार्थैरिति । तेषामप्यशेषसुखसिद्ध्या तदर्थचिन्ता निरस्ता अतः कुशली सुखी अच्युत इति कथमपि सुखतश्च्युतिराहित्याभिप्रायेण । अधुनेति पूर्वमत्रासौ कंस-सम्बन्धेन बहुधा दुःखं प्राप्तोऽस्तीति भावः । अन्यत्तैः । यद्वा दिष्ट्या एतदेव भद्रमित्यर्थः । अहितस्तद्द्रुह्य यदूनामघकृच्च । आप्तस्तत्र प्राप्तैर्यदुभिः । अन्यत् समम् ॥ ३९ ॥

अत्र वक्तृभेदेऽपि सङ्गतिरुत्तरोत्तरमैकमत्येनोक्तकार्यैव तथाहि अथ सुखस्थितिप्रकारं प्रेमलालसोत्कर्ष्येनैव पृच्छन्त्यः तदीयविलासविशेषस्फूर्त्तैः पुरस्त्रीणां स्मरणात् सापत्न्यस्वभावेनेर्ष्यामङ्कुरयन्ति । कच्चिदिति । सप्तम्यर्थे षष्ठ्यौ । गदाग्रज इति । गदोऽयं प्रथमो देवरक्षितायाः पुत्रः श्रीकृष्णानुजः तस्मिंश्च सम्प्रत्यनुजताभिमननेन तस्याधिक्ये प्रीतिं श्रुत्वा गोकुलसम्बन्धः शिथिलीभूत इति व्यञ्जयन्त्यः स्वेषु तद्वत्स्नेहशैथिल्यं पुरस्त्रीषु तदाधिक्यं व्यञ्जितवत्यः उदारमुत्कृष्टम् ॥ ४० ॥

अहो तत् किं पृच्छ्यते सन्देह एव तत्र नास्तीत्याहुः । कथमिति । प्रियश्च रूपवेशोपकारादिना तथा तासां वाक्यविभ्रमैरनुभाजितः । तद्वाक्यैर्विभ्रमैश्चेति क्वचित् । एवं मिथः प्रीतिहेतुकवैदग्ध्यादिकमुक्तम् अतः कथं नानुबध्येत कुतस्तासु आसक्तो न भवेत् अपितु भवितैवेत्यर्थः ॥ ४१ ॥

अथोत्कण्ठया सोल्लुण्ठं पृच्छन्ति । अपीति । क्वचित् कस्मिंश्चित् प्रस्तुते प्रस्तावे । प्रस्तावमेव विशिंषन्ति । पुरस्त्रीणां या गोष्ठी सभा तन्मध्ये या स्वैरकथा स्वच्छन्दवार्त्ता तस्या अन्तरे मध्ये ग्राम्या अपि नः किं स्मरति । गोविन्दः गोकुलेन्द्रः इति स्मरणार्हतोक्ता । हे साधो ! इति तत्र कदापि किञ्चिन्मिथ्या न वाच्यमिति भावः । यद्वा । क्वचिदित्यस्याप्यग्रेऽप्यन्वयः । अहो अन्यप्रस्तावे क्वचिन्न स्मरतु पुरस्त्रीणां गोष्ठीमध्येऽपि क्वचित् स्मरति तथापि स्वैरकथान्तरे क्वचित् स्मरति । अन्यत् समम् ॥ ४२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

दिष्ट्येति । यदूनामहितः शत्रुरघकृत् दुःखकृत् कंसः हतः किलैतद्दिष्ट्या अयमस्माकं महानानन्द इत्यर्थः । लब्धाः सर्वेऽर्थाः पुरुषार्था यैस्तैराप्तैर्मित्रैः सहाच्युतोऽधुना कुशल्यास्ते किल ॥ ३९ ॥

कच्चिदिति । हे सौम्य ! गदाग्रजः श्रीकृष्णः पुरयोषितां स्निग्धं च तत्सव्रीडहासेनोदारमीक्षणं तेनार्चितो बहुमतो वशीकृत इति भावः । तासां प्रीतिमस्मासु कर्तव्यां करोति कच्चिदितीष्टप्रश्ने ॥ ४० ॥

ननु स्वतन्त्रः स कथं तद्वशः स्यादत आहुः । कथमिति । तद्वाक्यैः पुरयोषिन्मधुरवाक्यैः तद्विभ्रमैश्चानुभाजितः कथं नानुबध्येत अनुबध्येतैवेत्यर्थः ॥ ४१ ॥

अपीति । हे साधो ! पुरस्त्रीणां गोष्ठीनां मध्ये तत्रापि ग्राम्यस्वैरकथान्तरे ग्रामे भवा ग्राम्या जनास्तेषां सम्बन्धि यादृच्छिककथान्तरं तस्मिन् प्रस्तुते सति तदा नोऽस्मान् स्मरति किं प्राधान्येनास्मान् न स्मरत्येव यदृच्छयापि स्मरति किमित्यर्थः ॥ ४२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

यदूनामहितः आप्तैर्जनैः ॥ ३९—४० ॥

तासां वाक्यैः कथं नानुबध्येत विभ्रमैः शृङ्गारचेष्टाभिः अनुभाजितः सभाजितः ॥ ४१ ॥

ग्राम्याणां शब्दादिविषयलालसानां स्वैरकथान्तरे स्वच्छन्दविषयस्य व्यवहारविशेषे प्रस्तुते प्रसक्ते ॥ ४२ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

भगवद्वीर्यस्मरणावश्यकमिति कृतमभिनन्द्य भाविवीर्यस्मरणार्थं कुशलं पृच्छन्ति । दिष्ट्येति । दोषरहितास्त एव भावाः पुरुषार्थसाधका इति सिद्धानेव कीर्तयन्ति । दिष्ट्या अस्मदादिभाग्येन

श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी ।

कंसो हतः अदृष्टस्य कारणत्वमातुलवधदोषाभावाय पूर्वं हि नाः अक्रूर आगतः किंवेति वाक्ये तं दोषं गृहीतवत्यः तस्य प्रतिप्रसवोऽत्र निरूप्यते यतः अहितः न ह्यस्य नान्येषामतस्तस्यापि भाग्येन स हतः किञ्च सुतरां यदूनां भक्तानामहितः अनेन प्रसङ्गात् भ्रातृवधः कृत इति निराकृतः केवलं हितमेव न करोतीति न किन्तु अघकृत् पापं सम्पादयति हितं न करोति पापं च कारयति येन तेषां परलोकनाशः स्यात् तस्मादेतादृशो हन्तव्य एव किञ्च आप्तैर्बन्धुभिः पुनर्भगवत्कृपया लब्धोऽर्थः सर्वोऽपि पुरुषार्थो यैः यत्र कालातिक्रमोऽपि स्वतः सिद्धः अनेन तेषामहितं दूरीकृत्य हितं च सम्पाद्य अग्रे तदनुवृत्त्यर्थमधुना कुशली किमास्ते केवलमयमनुवादः यतः सोऽच्युतः नं तस्य काचिदन्या सम्भावनास्ति ॥ ३९ ॥

एवं माहात्म्यज्ञानं सर्वोपकारकत्वं च भगवतो निरूपितं ततः पुरस्त्रीषु मात्सर्याभावज्ञापनार्थमाहुः । कच्चिद्गदाग्रज इति । गदाग्रजत्वेन वंशजननसामर्थ्यमुक्तम् अस्मिन् गते मथुरायां रोहिण्या गदो जातः अनेन भगवतः प्रद्युम्नरूपता निरूपिता अत एव स्त्रीणां सर्वकामनापूरक इति पुरयोषितां प्रीतिं कच्चित् करोतीति प्रश्नः सङ्गच्छते सौम्येति संबोधनं तथा सति दोषदृष्ट्यभावाय । ननु ता धाष्टर्येन कथं प्रसन्ना भविष्यन्तीत्याशङ्क्याहुः । नः स्निग्धसव्रीडहासोदारेक्षणार्चित इति । लोकः पूजितपूजक इति प्रथमतोऽस्माभिः स्निग्धादिभावैरर्चितः अनेनास्माभिः पूजित एव नतु भगवानुपभुक्त इति कामाभावः सूचितः । अनेन रसाभासोऽपि निरूपितः कुत्सितेऽपि रसे कदाचित्पुरुषः प्रवर्तत इति भगवतोऽप्यस्मासु प्रवृत्तिः इत उत्तमाः पुरस्त्रियः तत्रापि न स्वतः प्रवृत्तिः किन्तु तदिच्छयेति ज्ञापयितुं तासां प्रीतिं करोतीति आदौ धाष्टर्यसिद्ध्यर्थं स्निग्धा भगवति दृष्टिः तत उदारा भगवत्संप्राप्तिः सूचिता भगवतोऽपि सौख्यदायिनी शब्दव्यवहितापि सर्वेषां सर्वपुरुषार्थदायिनी च मध्ये हासः स्वपुरुषार्थसूचकः तस्यापि प्रथमप्रवृत्तौ पश्चात्कृतार्थतेति ज्ञापयितुं व्रीडाप्युक्ता एवंविधैरीक्षणैरर्चितः प्रथमतः स्नेहेन परिग्रहः ततः भगवति प्रसन्ने प्रथमप्रवृत्त्या व्रीडा ततो निर्भरानन्देन हासः ततः सर्वामेव कलां प्रयच्छतीति उदारा भवति ॥ ४० ॥

ननु विलेपो भगवान् किमित्येवं करिष्यतीति आशङ्क्याभिप्रायमाहुः । कथमिति । स हि सर्वरतिविशेषान् जानाति नागरिको बन्धो नागरीष्वेव भवति अन्यथेदं ज्ञानं व्यर्थं स्यात् कदाचिदेतदवश्यप्रकटनीयं स्वकीयासु तु न भवत्येव किञ्च उत्तमस्त्रीणां स प्रियः प्रीतिविषयः अन्यथोत्तमत्वमेव न स्यादतस्तासां जन्मसाफल्याय ज्ञानसाफल्याय स्वस्य ज्ञानसाफल्याय च कथं तद्रसाभिनिविष्टो न भवेदित्याहुः । नानुबध्येतेति । अनुबन्धो नाम निरन्तरं वर्द्धमाना प्रीतिः यथा रेतोमात्रेण न प्रीतिर्नाप्युत्ते नाप्यल्पवृद्धे नापि जातमात्राङ्कुरे यथा सर्वगुणसम्पन्ने पुत्रे भवति अयमनुबन्धः अतः कथं निरन्तरं वर्द्धमानया प्रीत्या नानुबध्येत । ननु तथापि पोषकाभावात् मूर्खे पुत्र इव नानुबन्धः स्यात्तत्राह । तद्वाक्येति । तासां वाक्यानि विभ्रमाश्च मनोऽनुरञ्जनं चकारार्थः एवं कायवाङ्मनसामुत्तमधर्मैः अनुभावितः अनुभावितः अनुभवपर्यन्तं नीतः भावकद्रव्यैरेव वा भावितः भावयुक्तो वा कारितः अभिनिविष्टो हि रसः स्वानुभावं जनयति वाक्यादीनि वोद्दीपकानि अतो भगवान् प्रकारद्वयनापि विभक्तवीर्यः आविर्भूतः सम्यग्भावित इति गोपकानां दोषाभावपूर्विका सर्वगुणसिद्धिर्निरूपिता ॥ ४१ ॥

भगवानिदानीमुपदेशेन गुरुर्जातः अस्माभिस्तु पूर्ववासनया पूर्वावस्थोऽवश्यं स्मर्त्तव्यः तथा सति भगवता चेत् स्वभावस्त्यज्यते तदा अस्माकमपराधो भवतीति भगवतः अस्या अवस्थायाः स्मरणं पृच्छन्ति । अपि स्मरतीति । असम्भावनया प्रश्नः । ननु स्मरणाभावे कथमुपदेशार्थं प्रेषणमिति चेत्तत्राहुः । पुरस्त्रीणं गोष्ठीमध्य इति । ननु शास्त्रार्थज्ञानभावनादृशायां नन्वेवमुपदेष्टा स्मरिष्यतीति का सम्भावना तत्राहुः । गोविन्द इति । स ह्यस्माकामेन्द्रः इन्द्रत्वायैव चास्मदुपयोगं कृतवान् किञ्च अनुभूतत्वात्तादृशपदार्थानुभवे सदृशादयः संस्कारबोधका इति कदाचित्स्मरणं भवेत्तदाहुः । प्रस्तुते क्वचिदिति । तदा हि भगवान् स्वाभिलषितावस्थः सत्यसंकल्पश्च ततस्तामप्यवस्थां सम्पादयेत् किञ्च व्यावर्त्तकत्वे स्मरणमावश्यकमित्याहुः । ग्राम्या इति । कथमेवमन्यथा बन्धं करोषि गोपिकेवेति स्वैरकथायाः स्वेच्छाकथायाः अन्तरे मध्ये । नन्वेतदहं कथं जाने इति चेत्तत्राहुः । साधो ! इति । सर्वोपकारी च भगवान् अतो गुह्यमपि वक्तव्यमिति ॥ ४२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

दिष्ट्या भद्रमित्यर्थः । अहितः शत्रुः ॥ ३९ ॥

अन्याः सेर्ष्यमाहुः । कच्चिदिति । गदाग्रज इति । गदो देवरक्षितायाः प्रथमः पुत्रः देवकीपुत्रमात्मानं मत्वा सम्प्रति तस्याग्रजोऽभूदिति गोकुलसम्बन्धस्तस्य शिथिलीभूत इति द्योतयामासुः । नोऽस्माकं स्निग्धं च तत् सव्रीडहासेनोदारं च यदीक्षणं तेनास्माभिरर्चितः स सम्प्रति पुरयोषितां प्रीतिमुत्पादयति सहासावलोकादिभिस्ता अर्चयति किं शिव शिव अस्मदर्चनीयः संस्तासामर्चकोऽभूदित्यस्माकमेव दौर्भाग्यमिति भावः ॥ ४० ॥

अयि मुग्धाः ! किमिदमपि जिज्ञासध्वे अत्र सन्देह एव नास्तीत्यन्याः सोल्लुण्ठं सान्तःकोपमाहुः । कथमिति । रतिविशेषज्ञः स साम्प्रतं पुरयोषितां योऽभूत् कथं नानुबध्येत नासक्तो भवेत् । तासां वाक्यैस्तादृशैर्विभ्रमैश्च अनुभाजितः निरन्तरं ता भजन्नसौ तैर्भाजितः भजनं कारित इत्यर्थः । तेन वयं ग्रामयोषितः रतिविशेषज्ञ महामत्ताय तस्मै न दित्सामहे । तादृशीं वाचमनुकूलां विभ्रमांश्च न जानीम इत्यतो वयं तेन ताः प्राप्य त्यक्ता एवेति निश्चिनुध्वमिति पृच्छ्यते इति भावः ॥ ४१ ॥

अपीति । सख्यः ! सत्यमेव त्यक्तुमर्हत्वात्तेन वयं त्यक्ता एव किञ्च लोके हि अतिनिकृष्टा अपि सम्भुक्तत्यक्ता अपि केन चिद्गुणांशेन दोषांशेन वा स्मृत्यारूढाः कदाचिद्भवन्तीति पृच्छ्यते इत्याहुः । ग्राम्या अविदग्धाः स्वैरकथान्तरे गाननर्मप्रहेलीकवितादिरचनाकथामध्ये भोः पुरस्त्रियः यूयं यथा गानादिकं जानीध्वे एवमस्माकोष्ठे गोप्योऽपि प्रायः किञ्चित्

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

किञ्चिज्जानन्ति । यद्वा । एवं नैव ता ग्राम्यत्वाज्जानन्तीति किमस्मानुल्लिखतीत्यर्थः ॥ ४२ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

यदूचुस्तदाह । दिष्ट्येति । अहितः शत्रुः प्रेषणेन विरहकारणत्वादस्माकमपि यदूनामघकृत् दुःखदः यद्वा यदूनामहितः ब्राह्मणादिदुःखकरत्वात्पापकृत् हतस्तत्रापि सानुगः अनुजसहितः तद्दिष्ट्या परमानन्दकरं यच्च लब्धसर्वार्थैराप्तैर्वसुदेवादिभिः सहाच्युतोऽधुना कुशली आस्ते तदपि दिष्ट्या यद्यपि प्रियतमसन्देशैर्लब्धस्मृतयस्तथाप्यारूढसख्यभावा विरहव्याकुलचित्ता उक्तवाक्येन स्वदुःखमपि व्यञ्जयन्ति यदूनां शत्रुर्हतः अस्माकं तु सर्वेऽपि यदव एव सम्प्रति शत्रवो जीवन्ति च लब्धसर्वार्थाः संपन्ना वयं तु नष्टसर्वार्थाः तेषामिदानीं संनिहितत्वादच्युतोऽस्माकं तु प्रच्युत इति तेषां भाग्यातिशयोऽस्माकं भाग्यानतिशय इति ॥ ३९ ॥

हृदिस्थं स्वभावभूतं मात्सर्य्यं गूहितुमशक्ताः स्पष्टं समात्सर्यमाहुः । कथमिति । सः अनुभूतपूर्वः रतिविशेषान् जानातीति रतिविशेषज्ञः अत एव पुरयोषितां प्रियः प्रीतिविषयः स्वदत्तसुखविशेषाभिज्ञस्य प्रीतिविषयत्वनियमात् तद्वाक्यैर्व्यङ्ग्यार्थगर्भितैर्विभ्रमैः कटाक्षादिनेत्रादिविचेष्टितैश्चकारान्मनोवृत्तिभिश्च तथा च वाक्कायमानसव्यापारैरनुभावितः अनुभवपर्यन्तं नीतः अनुभवयुक्तो वा कारितः पूजित इति वा अनुभाजित इति क्वचित्पाठः कथं नानुबध्येत प्रेमशृङ्खलयाबद्धः कथं न भवेत् अस्माकं तादृशनयनसामग्रीविधुरत्वादितो गतस्तद्देशात्क्वापि न गमिष्यतीति भावः । पुरेण सहितानां योषितां प्रिय इति वा तथाच पुरवासिनां तत्पत्यादीनामपि तदासक्तचित्तत्वान्नास्ति तादृशबन्धनप्रतिबन्धकं किञ्चिदिति भावः ॥ ४० ॥

अस्मासु करणीयां प्रीतिं तासु करोतीत्यनुसन्धाय सदुःखमाहुः । कच्चिदिति । स्निग्धं च तत्सव्रीडहासेनोदारमीक्षणं तेनार्चितः अस्माकं तादृशकटाक्षेणार्चितो रामानुजो यथा च प्रीतिं करोति स्म तथेदानीं गदाग्रजः पुरयोषितां तेनार्चितस्तासां तथा प्रीतिं करोति कच्चित् यद्वा अस्माकं तेनार्चितः प्रीतिं न कृतवान् अपि तु विहाय गतः पुरयोषितां तु प्रीतिं करोति कच्चित् यद्वा न तेनार्चितः प्रीतिं पुरयोषितां करोति कच्चिन्न सौम्यस्त्वमतस्त्वामेवं पृच्छाम इति संबोधनाशयः यद्वा अस्माकं तादृशकटाक्षेणार्चितोऽस्मास्वासक्तचित्तस्तासां प्रीतिं मन्दोऽनुरञ्जनमात्रं करोति कच्चित् यद्वा स्त्रियः कामितकामिन्यः लोकः पूजितपूजक इति न्यायादस्माकं तादृशेक्षणेनार्चितोऽतस्तासामपि तेनार्चितः ॥ ४१ ॥

यद्यप्यधुना भगवान् अस्मत्परोक्षत्वाद्गुरुर्जातस्तथापि सखिस्वभावनाभावितत्वात्तासामस्माकं तथात्वेनैव स्मृतिपथमारोहति न गुरुत्वेन नापि परमात्मत्वेनातो भगवानपि सखीत्वेनैवास्मान् स्मरति तत्राह नास्त्यस्माकमपराध इति मनसि निधाय पृच्छन्ति नोऽस्मान् स्मरति स्मरणसम्भावनया प्रश्नः । ननु स्मरणाभावे कथमुपदेशार्थं मां प्राहैषीदित्याशङ्क्य नोपदेशार्थं स्मरणं वयं पृच्छामः किन्तु पूर्वानुभूतवृत्तान्तसंबन्धित्वेनेत्याशयेनाहुः । पुरस्त्रीगोष्ठीमध्ये ननु तत्र भवतीनां स्मरणे का सम्भावनेति चेत्तत्राहुः । प्रस्तुते कस्मिंश्चित् एकसंबन्धिज्ञानमपरसंबन्धिस्मारकमिति न्यायात् कस्मिंश्चिदस्मत्सदृशप्रसङ्गे प्रस्तुते सति । ननु युष्मत्संबन्धिस्मरणे कः प्रसङ्ग इति चेत्तत्राह । स्वैरकथान्तरे अहो व्रज इवात्र स्वैरतया प्रवृत्तिं कर्तुं न शक्तोऽसीत्येवं कथान्तराले किञ्च व्यावर्त्यत्वे वा न तु स्मरणमावश्यकमित्याशयेनाहुः । ग्राम्या इति । स्वस्मिन्स्मरणकर्मत्वयोग्यतामुपपाद्य तस्मिंस्तत्कर्तृत्वयोग्यतामाहुः । गोविन्द इति । अस्मद्रक्षणेन लब्धगोविन्दपदो भगवान् कृतान्यस्माभिः सार्द्धं विचेष्टितानि स्मर्तुं योग्य इति सा न्नोति परकार्यमिति साधुस्त्वमस्मत्सुखावहमेतदुत्तरं निर्व्याजेन देहीति सम्बोधनाशयः ॥ ४२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अघकृत् दुःखकृत् आप्तैः शिष्टैर्यदुभिः सह ॥ ३९ ॥

अन्या आहुः । हे सौम्य ! नोऽस्माकं करणीयां प्रीतिं पुरयोषितां कच्चित् किं करोति स्निग्धश्च तत् सव्रीडहासेनोदारमीक्षणं तेनार्चितस्ताभिः सत्कृतः ॥ ४० ॥

अन्याः आहुः । कथमिति । विभ्रमैर्विलासैश्चानुभाजितः पूजितः ॥ ४१ ॥

अन्या आहुः । अपीति । हे साधो ! पुरस्त्रीणां गोष्ठीमध्ये स्वैरकथान्तरे यादृच्छिककथान्तरे प्रस्तुते प्रवृत्ते सति ग्राम्याः अविदग्धाः नः अस्मान् स्मरति किम् ॥ ४२ ॥

भाषा टीका ।

गोपी बोलीं सब यादवों को क्लेश देनेवाले कंस शत्रु को मारा सो अच्छा किया है और सर्वार्थ सिद्धि को प्राप्त होने वाळे अति प्रिय यादव बांधवों के सहित अच्युत भगवान् इस वख्त कुशली हैं सो अछा है ॥ ३९ ॥

हे साम्य ! गदा अज भगवान् मथुता पुर की स्त्रियों के मनोहर हास लज्जा उदार कटाक्षों से पुजित होकर कभी हमारे पर भी प्रेम करते हैं कि नहीं ॥ ४० ॥

जो कृष्ण विशेष रतिके जानने वाळे हैं उत्तम स्त्रियों के बडे प्रिय हैं तो उन स्त्रियों के कटाक्षादिक से पूजित होने से उनके वचनो से अवश्य बंध जांयगे ॥ ४१ ॥

हे साधो ! उद्धवजी किसी समय मथुरा पुरकी स्त्रियों की समाज मे किसी प्रकार विनोद की कथाओं में प्रसंग चळने पर श्रीगोविन्द ग्रामवाली हम स्त्रियों को कभी स्मरण करते हैं कि नहीं ॥ ४२ ॥

तः किं निशाः स्मरति यासु तदा प्रियाभिर्वृन्दावने कुमुदकुन्दशशाङ्करम्ये ॥
रेमे क्वणच्चरणनूपुररासगोष्ठ्यामस्माभिरीडितमनोज्ञकथः कदाचित् । ४३ ।
अप्येष्यतीह दाशार्हस्तप्ताः स्वकृतया शुचा ॥
संजीवयन्नु नो गात्रैर्यथेन्द्रो वनमम्बुदैः । ४४ ।

श्रीधरस्वामिकृतभावार्थदीपिका।

अन्या ऊचुः। ताः किमिति। कुमुदैः कुन्दैः शशाङ्केन च रम्ये वृन्दावने क्वणन्ति चरणनूपुराणि यस्यां तस्यां रासगोष्ठ्यामस्माभिः प्रियाभिरीडिता मनोज्ञाः कथा यस्य स तदा यासु निशासु रेमे ताः कदाचित्किन्नु स्मरति वा न वेत्ति॥ ४३॥

स्वनिमित्तेन शोकेन तप्ता नोऽस्मान् गात्रैः करस्पर्शादिभिः सञ्जीवयन् किन्नु इहैष्यतीति॥ ४४॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

अहो नागरीगणप्राप्त्याऽस्मान् वा न स्मरतु तद्रासक्रीडारात्रीरपि कच्चित् स्मरेदिति पृच्छन्ति। ता इति। तासां स्मरणयोग्यतामाहुः। यास्विलादिना। तत्र बहुत्वेन तासामसङ्ख्यत्वमुक्तं क्वणन्ति तस्यास्माकं च नूपुराणि यस्यां रासलक्षणायां गोष्ठ्यां क्रीडायां किं वा तादृशरासे पश्चाद्या गोष्ठी गोपीनां सभा तस्यामीडितमनोज्ञकथः। अस्माभिरिति। सत्सहायाः वृन्दावन इति सत्स्थानं कुमुदेति सूचितया शरदा सत्कालस्तथा सत्पुष्पादिरत्युपकरणं च क्वणदिति सल्लीला तत्र च क्वणच्चरणनूपुरेति सन्नृत्यगतिः ईडितेति तत्र सदुत्साहहेतुश्च अन्यत्तैर्व्याख्यातं यद्वा तदा तदानीं याः प्रियाः प्रियतया स्वीकृतास्ताभिरस्माभिः सह रेमे ईडिता तदानीं व्योमन्यागतैर्देवादिभिः स्तुततया गीता मनोज्ञा जगतां तस्यैव वा चित्ताकर्षिका कथा विविधवैदग्ध्यादिवार्ता यस्य स इयमप्येका स्मरणयोग्यता। यद्वा। तत्र तैः पुरस्त्र्यादिभिरीडितमनोज्ञकथः सन् स्मरति किमिति मनोज्ञकथाप्रसङ्गश्चेत्तत्स्मरणयोग्यत्वेवाभिप्रेता॥ ४३॥

ननु स्मरत्येवेति चेत्तर्हि तस्यात्रागमनं नैव प्रतीम इत्याशयेन किं वा रासस्मरणजनितोत्कण्ठ्यभरेण पृच्छन्ति। अपीति। दाशार्हः यदुकुलोद्भव इति तत्पालनार्थं व्यग्रोऽपीति भावः। यद्वा दाशो दानं व्रजजनेषु निजदर्शनदानं तदर्हतीति दाशार्हस्तेनात्रागमनयोग्यत्वमभिप्रेतं शुचा विरहशोकेन तप्ता इति तद्दर्शनैकप्रतीकारत्वं स्वकृतयेति। अन्यथा कृतघ्नत्वस्य स्त्रीवधस्य च प्रसङ्गः स्यादिति गात्रैः सम्यग् जीवयन्निति तत्स्पर्शानामसृतमयत्वं तत्र तु वर्तमानया समागमकाल एव करस्पर्शादिकं च। यद्वा। संजीवयितुं यथेति दृष्टान्तेन तात्कालिकत्वं तदेकसाध्यत्वं च दृढीकृतम्॥ ४४॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी।

अहो नागरीगणप्राप्त्यास्मान् वा न स्मरतु तद्रासक्रीडारात्रीरपि कच्चित् स्मरतीति पृच्छन्ति। ता इति अयमर्थः। यः अस्माभिर्दुर्भिक्षभिक्षुकीभिरिव साम्प्रतमीडिता मनोज्ञा तस्य युष्माकं च मनोरमा कथा दिष्ट्या हितो हतः कंस इत्यादिरूपा यस्य स तत्रेश्वरसाक्षान्नामनिर्देशेन लघूकर्तुं शङ्कनीयस्ताः साम्प्रतिकीभ्यः पराभ्यश्च विलक्षणाः तत्र च बहुत्वाद्विस्मर्तुमपारणीया निशाः किं कदाचिदपि स्मरति। यासु मुकुदकुन्दशशाङ्करम्यत्वाद्विलक्षण एव वृन्दावने तदानीं या काश्चन तस्य प्रिया आसन्। एषा भवतास्मासु दृश्यमाना दुःखावस्था तासु न सम्भवतीत्यस्मादृशीभ्यः सर्वाभ्योऽप्यन्याभिरेव ताभिः सह तस्य तासां च क्वणच्चरणनूपुरतयातिमनोहरायां रासगोष्ठ्यां रेमे स्वयं चिक्रीडेति॥ ४३॥

ननु स्मरत्येवेति चेत्तर्हि तस्यात्रागमनं नैव प्रतीम इत्याशयेन रासस्मरणजनितोत्कण्ठ्यभरेण तदागमनसन्देशविस्मृत्यैव वा पृच्छन्ति। अपीति। दाशार्हः दाशार्हाणां राजा तत्पालनार्थं व्यग्रोऽपीति भावः। स्वकृततया शुचेति तत्स्पर्शैकप्रतीकारत्वम् अन्यथा अस्निग्धहृदया विज्ञत्वं स्त्रीवधादभीरुत्वञ्च ज्ञापितम्। गात्रैः सम्यग् जीवयन्निति तत्स्पर्शानाममृतमयत्वम्। तत्र तु वर्त्तमानप्रयोगेण समागमकाल एव करस्पर्शादिकञ्चेति विलम्बासहत्वञ्च। यथेति दृष्टान्तेन तात्कालिकं तदेकसाध्यत्वञ्च दृढीकृतम्। गर्जनादिनेव सन्देशादिना च तापापनोदनं निराकृतम्॥ ४४॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

पुनरन्या ऊचुः। ताः किमिति। कुमुदैः कुन्दैः शशाङ्केन च रम्ये वृन्दावने क्वणन्ति चरणनूपुराणि यस्यां तस्यां रासगोष्ठ्यामस्माभिः प्रियाभिरीडिता मनोज्ञा कथा यस्य तथा यासु निशासु रेमे ताः कदाचित्किं नु स्मरति॥ ४३॥

अप्येष्यतीति आगमिष्यति किं स्वनिमित्तेन शोकेन सन्तप्ता नोऽस्मान् दाशार्हः कृष्णः दाशार्हेति पाठे हे उद्धव! स्वकरस्पर्शादिभिः संजीवयिष्यति किं यथेन्द्रः यथा वनमिन्द्रोऽम्बुदैः संजीवयति तद्वत्॥ ४४॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

यासु निशासु॥ ४३॥
गात्रैरवयवैः॥ ४४॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी।

तादृशधर्मविशिष्टाश्चेत् वयं स्मृताः तदा भगवत्परितोषणे गुरुदक्षिणायामपि न किञ्चिद्देयं स्यात् ताः पूर्वं वरे दत्ता मयेमा रंस्यथ क्षपा इति स्वदत्तान् हि स्मरति सर्वोऽपि किं कालस्-

श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी।

रयोनेत्याशङ्क्य तद्गतं विशेषमाहुः। यास्विति। यासु तदा रेमे ननु साम्प्रतं कालदेशयोर्विद्यमानत्वेऽपि रमणाभावात् पुनः पुनः स्मरणं तदा वा वयं प्रियाः अधुना तु शिष्याः वृन्दावन इति स्वच्छन्दलीलास्थानमुक्तं नैव लीला नगरेषु सम्भवति कुमुदैः कुन्दैः शशाङ्केन च रम्ये क्वचिद्दोषोऽप्यन्यत्र गुणः यद्यपि शशाङ्कस्तथापि कामे उद्बोधकः कुमुदमपि रात्रिविकासि चन्द्रः सम्भ्रमप्रोक्तः तत्र रतिवर्द्धनोऽस्तीति ज्ञापयितुमेवं प्रक्रिया निरूपिता कुन्दाः सर्वकालीनपुष्पाणि रात्रिविशेषपुष्पाणि साधारणानि तेषां विकासहेतुश्च यत्र रतिवर्द्धनः तत्रापि रसोत्पत्त्यर्थ क्वणच्चरणनूपुराणां स्त्रीणां यो रासः तत्समायामस्माभिः सर्वाभिरेव ईडिता मनोज्ञाः कथा यस्य कदाचिदिति तस्या अवस्थाया दुर्लभत्वं यदीदानीमपि भवेत् मनोज्ञकथया ईडितो भवेत् ततो लौकिकमपि कुर्यात् अस्माभिरिति प्रमाणमुक्तं क्वणन्ति चरणेषु नूपुराणीति भगवदवलम्बनादिति भावः सूचितः। योऽस्मान् नसेवेत ततो नृत्यगीतादिना समाराधितो भगवान् तत्रे स्मरिष्यति तदा साधनरहिता अपि कृतार्था भविष्यामः दोषनिवृत्त्यैव तात्पर्यमिति भगवतोऽपि मनोनिग्रहो नाभिप्रेतः उपदेशेन वयं तथा भविष्यामः॥ ४३॥

एवं तथापि पूर्ववत् पुनः किं कृपां करिष्यतीत्यभिप्रायेणाहुः। अप्येष्यतीति। अन्यथा नोचेद्वयम् इति वाक्यं श्रुत्वा किमिति भोगमङ्गीकृतवान् तस्मादुत्कटं कामं दूरीकृत्य कोमले जाते पश्चादुपदेशफलं भविष्यतीति पुनः पूर्ववदाकाङ्क्षा तत्र गमने तु सुखं न भविष्यतीति ज्ञातं स्वच्छन्दभावात् नन्वीश्वरः कथमायास्यतीति चेत्तत्राहुः। दाशार्ह इति। दाशानामर्हः योग्यः यो हि दयालुः सुतरां परदुःखाभिनिविष्टः एवं तापहारकः भगवद्धर्मो निरूप्य स्वतापमाहुः। तप्ता इति। आध्यात्मिकादिताप व्यावृत्त्यर्थं ज्ञानोपदेश एव क्रियत इति चेत्तत्राहुः। स्वकृतया शुचा इति। अयं शोको भगवतैव सम्पादितः स्वनिर्गमात् शुचा च द्रवमाणा अतः इति साम्प्रतं शूद्रा एव कथमुपदेशयोग्या इति भावः। तस्मिँल्लोके गत एवाधिकारः किञ्च जीवने हि जाते पश्चात्सर्वमेतत् सकाममरणे तु न मुक्तिः अत इदानीं जीवनं यथा भवति तथा गात्रैः मुखारविन्दादिभिः नोऽस्मान् सञ्जीवयन् किमायास्यति तुशब्दो ज्ञानपक्षं वारयति। ननु विशेषतो भगवत एवं करणे को हेतुरिति चेत्तत्राह। यथेन्द्र इति। साधारणमेव वनं खाण्डववनं वा न हि पर्जन्यादन्यः दावानलं शमयति। गृहदाहादयस्तु जलान्तरेणापि शाम्यन्ति॥ ४४॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

भो भो गोप्यः! वक्रोक्त्या अलं तासां तस्य च निन्दया स्पष्टमेव किं न ब्रूथ्वे अन्यद्वैदग्ध्यादिकमस्मद्दौर्भाग्यवशात् कृष्णेन विस्मर्यतां नाम स्ववासः कथं विस्मृत इत्यन्याः सरोदनमाहुस्ता इति। कुमुदकुन्दशशाङ्कैर्वृन्दावनीयपुलिनस्य सर्वसुखीकृतत्वाद्रम्ये क्वणन्ति चरणनूपुराणि यस्यां तस्यां रासगोष्ठ्यां प्रियाभिरस्माभिः सह रेमे। ईडिता विमानस्थाभिर्दिव्याङ्गनाभिरपि स्तुताः कथा यस्य स इति तेन पुराङ्गना वराकाः का वा कथा जानन्ति मथुरायां क्व पुलिनमेतादृशं तदभिमतानि नृत्यगीतवादित्राणि चूडामुकुटश्वासकवनमालावीटिकादिरचना वा तत्र काः कर्त्तुं जानन्तीति मथुरायां स्थित्वा कृष्णस्य सर्वमेव सुखमस्तंगतमिति तदीयानन्दाभावमेव स्मृत्वा वयं दुःखेन म्रियामहे वयमिव तत्र काश्चित्तदभिमता विलासिन्यः स्युश्चेत्ताभिः सह रासलास्य वेणुवाद्यादिविनोदश्च शृणुयाम चेत्तदात्र तद्विरहेऽपि वयं सुखेनैव वर्त्तेमहीति ध्वनितम्॥ ४३॥

भो सख्यः! अत एव तस्मात् पुराकुटिलः कृष्णः शीघ्रमायात्विति तदागमनमाशासनम्। अन्यास्तत्समभावा आहुः। अपीति। स्वनिमित्तेन शोकेन तप्ता अस्मान् स्वगात्रैर्दर्शितैः सञ्जीवयन् किं नु इहैष्यतीति॥ ४४॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका।

अहो रासक्रीडाधिकरणभूता निशास्त्ववश्यं तेन स्मर्तव्यास्तत्सम्बन्धेनास्माकमपि स्मरणमावश्यकमित्याशयेन तत्स्मरणं पृच्छन्ति। ता इति। ताः मयेमा रंस्यथ क्षपा इति पूर्वं वरे दत्ताः सदत्तं वस्तु स्मर्य्यते सर्वैरिति भावः। किञ्च दुःखाधिकरणभूतः सुखाधिकरणभूतो वा कालोऽवश्यं स्मरणपथमवरोहतीत्याहुः। यासु तदाख्यायकतादृशायां रेमे तत्रापि प्रियाभिरस्माभिः यदा तस्य स्मरणमपेक्षितं स्थितं तदा वयं प्रियाः कान्ताः इदानीमितरप्रियालाभे वयं शिष्या इति आहुः तत्रापि वृन्दावने स्वच्छन्दलीलास्थाने नागरूपतस्य या लीला नगरेषु नारीभिः सम्भवतीति भावः। कुमुदैः कुन्दैः शशाङ्केन च रम्ये अनेनोद्दीपनसामग्री सत्यमुक्ता तत्रापि क्वणन्ति चरणनूपुराणि यस्यां रासगोष्ठ्यां तस्यां प्रियाभिरस्माभिरीडिता मनोज्ञा अतिरम्याः कथा यस्य तथा चैवन्विधालम्बनोद्दीपनजन्यस्य वैकुण्ठलोकमप्यतिक्रम्य सुखस्याधिकरणभूता निशाः कदाचित्कस्मिंश्चित्काले स्मरति किं यदि स्मरति तर्हि सर्वसाधनसंपन्ना गुरुदक्षिणा वयं प्रियत्वेनैव तं स्मरिष्यामो नतु गुरुत्वेन नापि परमात्मत्वेनेति भावः॥ ४३॥

स्मरति नवेतीति तु मुख्यमस्मदभिलषितं यथा यदूनूहीत्याशयेनाहुः। अप्येष्यतीति। ननु युष्माभिरेव तत्र कुतो न गम्यत इत्याशङ्कानिवृत्त्यर्थमिहास्मिन् वृन्दावने इत्युक्तं तत्र स्वच्छन्दाद्यभावात्तादृशरसोत्पत्तिर्न सम्भाव्यत इति भावः। ननु स्वतन्त्रोऽसौ कथमायास्यतीतिचेत्तत्राहुः। दाशार्ह इति। यथा तेषां दुःखनिरासाय तत्र गतस्तथास्मत्तापनिवृत्त्यर्थमत्राप्यायास्यतीति भावः। जीवनदानात्परं दानं नास्तीति विचार्य्यायास्यतीत्यस्यास्माकं सम्भावनेत्याशयेनाहुः। तप्ता नः स्वगात्रैर्मुखारविन्दादिभिः सञ्जीवयन् जीवनापगमे तदुपदिष्टार्थाभ्यासः कथं भविष्यति सकामतया मृतानामस्माकं मुक्तिरपि दुर्लभा तस्मात्स्वोपदेशसाफल्यायापि तदीयमागमनमुचितमिति भावः। तुशब्देन यथोक्तज्ञानोपदेशेनोऽस्माकं जीवनलाभ इति द्योतयन्ति। ननु सकलतापोच्छेदकात्मोपदेशादपि युष्माकं तापनिवृत्तिः कथं न भवतीतिचेत्तत्राहुः। स्वकृतया शुचेति। नन्दनन्दनविरहजनितेन शोकेन तप्तास्तथा च तद्विरहजनितशोकस्य तदुपगम एव निवर्तको नान्यत आत्मज्ञा-

कस्मात्कृष्ण इहायाति प्राप्तराज्यो हताहितः ॥
नरेन्द्रकन्या उद्वाह्य प्रीतः सर्वसुहृद्वृतः । ४५ ।
किमस्माभिर्वनौकोभिरन्याभिर्वा महात्मनः ।
श्रीपतेराप्तकामस्य क्रियेतार्थः कृतात्मनः ॥ ४६ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

तस्य सांसारिकदुःखनिवर्तकत्वादिति भावः । यद्वोक्तशोकेन तदात्मत्वात्तैनं द्रवमाणानां शुद्धत्वाद्वा तापनिवृत्तिं विनात्मोपदेशाधिकाराभावात्स्वयमेवात्रागत्य तापं निवर्तयतु आत्मज्ञानं चोपदिशतु भगवानिति भावः । तत्रानुरूपं दृष्टान्तमाहुः । यथेति । गृहादिदाहस्तु जलान्तरैरपि शाम्यति वनदाहस्त्विन्द्रनियुक्तपर्यादेरेवोपशाम्यति तत्तद्देवत्रायमस्माकं तापः प्रेष्ठप्रदर्शितस्वमुखारविन्दादिनैवोपशान्तिं गमिष्यति नान्यथेत्यर्थः ॥ ४४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अन्याः आहुः । ता इति । कुमुदैः कुन्दैः शशाङ्केन च रम्ये वृन्दावने क्वणन्ति चरणनूपुराणि यस्यां तस्यां रासगोष्ठ्यां यासु निशासु तदा अस्माभिः सह रेमे ताः निशाः ईडिताः मनोज्ञाः कथाः यस्य सः कच्चित्स्मरति किम् ॥ ४३ ॥

स्वकृतया स्वेन दूरं गतेन कृता उत्पादिता तया शुचा शोकेन तप्ता नोऽस्मान् ॥ ४४ ॥

भाषा टीका ।

उन रातों को वे कभी स्मरण करते हैं कि नहीं जिन रात्रियों में कुमुदिनी के फूल तथा चन्द्रमा से सुशोभित वृन्दावन में शब्दायमान नूपुर वाले चरणों के शब्दों से वे हम प्यारियों के साथ रमण क्रीडा करते थे और हम उनके मनोहर कथाओं की स्तुति करके किसी समय पर गाती रहीं ॥ ४३ ॥

वे दाशार्ह वंश वाले कृष्ण कभी इहां आवैंगे क्या। अपने शोच से तपायमान हमको जैसे मेघवन को शीतल करता है तैसे अपने अंगों से हमारे प्राणों को कभी बचावैंगे क्या ॥ ४४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अन्या ऊचुः । कस्मादिति । अनन्यगतित्वेन पूर्वमत्रावसत्सम्प्रति महैश्वर्यं प्राप्तः कस्मादिहागमिष्यतीति ॥ ४५ ॥

अन्यास्तु परमार्थमूचुः । किमस्माभिरिति । वनचरीभिरन्याभिर्वा राजकन्याभिर्महात्मनो धीरस्य किञ्च श्रीपतेः तदपि आप्तकाम, स्वत एवाऽऽप्तकामस्यात एव कृतात्मनः पूर्णस्य किं कोऽप्यर्थः क्रियेत न कश्चिदिति ॥ ४६ ॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

ननु एष्यत्येवेति चेत्तन्न घटतेत्याहुः । कस्मादिति । कृष्णः परमानन्दपरिपूर्ण इति भावः । तदेव दर्शयन्ति प्राप्तेत्यादिना । ननु तस्य राज्यापेक्षा नास्तीति चेत्तथाप्यागमनं न सम्भाव्यत इत्याहुः । हताहित इति । शत्रुवधोपायार्थमेवात्रासीत् अधुना तत् सिद्धौ कुतोऽत्रैष्यतीति भावः । ननु तथापि भवतीनां विरहार्त्त्या एष्यत्येव तत्राहुः । नरेति । नरेन्द्राणां महाराजानां कन्या इति महादैन्येनात्मनः सकाशात्तासामुत्कर्षः सूचितः भाविन्यपि प्रीत इत्यतीतत्वं तस्यातिसान्निध्यान्निर्द्धाराच्च । ननु तथा सत्यपि पितृमात्रादीनामत्रत्यानां परमसुहृदां प्रीत्यर्थमेष्यत्येव तत्राहुः । सर्वेति । तत्रैव सर्वे पितृमात्रादयो निजसुहृदो लब्धाः परेष्वधुना कापेक्षेत्यर्थः । यद्वा तत्रत्यैः सुहृद्भिरत्रागच्छन्नसौ निवारयितव्य इति भावः ॥ ४५ ॥

ननु तथापि भवतीषु परमापेक्षयात्रैष्यत्येव तत्राहुः । किमिति । अर्थः प्रयोजनम् अन्यस्तैर्व्याख्यातं यद्वा किं क्रियेत अपि तु नैवेत्यर्थः । तत्र हेतुः महात्मना जगदादृतस्य जितेन्द्रियस्येति वा ननु तथापि प्रेमविलासपरिपाकरूपतया भवतीनां सम्भोगरसिकशेखरस्य तस्येच्छास्त्येव तत्राहुः । श्रीपतेरिति । तदर्थं लक्ष्मीर्विभात्येव किमन्याभिरित्यर्थः । ननु लक्ष्मीतोऽपि भवतीष्वधिकापेक्षा तत्राहुः । आप्तकामस्य । अस्माभिः सह कृतरतेरित्यर्थः । ननु तथापि तत्र तस्य तृप्तीर्नास्तीति चेन्नेत्याहुः । कृतात्मन इति । अन्यत् समानम् एषातिदैन्योक्तिः सोल्लुण्ठोक्तिरेव वा प्रियजनपरवशस्य तस्य कदापि तादृशत्वाननुभवात् ॥ ४६ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

नन्वेष्यत्येवेति चेन्न घटतेत्याहुः । कस्मादिति । तदेव दर्शयन्ति । प्राप्तेत्यादिना । ननु तथापि भवतीनां विरहार्त्त्या एष्यत्येव तत्रान्यथा सम्भावयन्ति । नरेति । प्रीत इति । अस्मद्वोपजातेस्तस्य तेनैवाभीष्टक्षत्रियजातित्वसिद्धेः कान्ताविशेषलाभाच्च । ननु तथा सत्यपि मातापुत्रादीनामत्रत्यानां परमसुहृदां प्रीत्यर्थमेष्यत्येव तत्राहुः । सर्वेति । सर्वे ते लब्धाः परेष्वधुना कापेक्षेत्यर्थः । यद्वा । तत्रत्यैः सुहृद्भिरत्रागच्छन्नसौ निवारयितव्य इति भावः ॥ ४५ ॥

नरेन्द्रकन्योद्वाहस्य हेतुत्वमाक्षिप्य तास्वपि कारुण्यं व्यञ्जयन्त्य इव तस्य नैरपेक्ष्यमेव हेतुं सेर्ष्यमाहुः । किमिति । तत्र हेतुर्महात्मनः महान् तदुपर्यपि वर्त्तमान आत्मा चित्तं यस्य यतः श्रीपतेः श्रियः सर्वैराश्रयितुमभीष्टाया अपि तत्र तत्र तद-

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी।

नुगामिन्या लक्ष्म्याः पत्युः। अत एवाप्तकामस्य यथेष्टविषयपूर्णस्य तत एव कृतात्मनः लब्धधृतेरिति ततः काचिदपि कन्यका तस्य विवाहाय नाहर्त्तव्येत्युद्धवं प्रति च निगूढः प्रयत्नः सूचितः ॥ ४६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

अन्या ऊचुः। कस्मादिति। अनन्यगतित्वेन पूर्वमत्रोषितवान् अधुना तु प्राप्तं राज्यं येन हता अहिताश्च शत्रवो येन तथाभूतः नरेन्द्रकन्या उद्वाह्य प्रीतः सुहृद्भिश्च वृतः अतः कस्माद्वेतोरिहागमिष्यति ॥ ४५ ॥

अन्यास्तु परमार्थमूचुः। किमस्माभिरिति। वनवासिनीभिरन्याभिः पुरयोषिद्भिर्वा महात्मनः श्रीकृष्णस्य किं को वार्थः प्रयोजनमित्यर्थः क्रियेत तत्र हेतुं वदन्त्यो विशिंषन्ति महात्मनः श्रियः पतेः तदप्यास्तां स्वत एवावाप्तसमस्तकामस्य ॥ ४६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

अदीर्घेण कालेनागमिष्यामीति यदुक्तं तत्स्तोभनमात्रम् आगमने निमित्ताभावादित्याहुः। कस्मादिति ॥ ४५ ॥

कृतात्मनः पूर्णरूपस्य अर्थो विषयः किं क्रियेत किं सुखं कुर्यात् ॥ ४६ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी।

तस्मात् क्लिष्टानां तापनाशश्चेदादौ भवेत् पश्चाज्ज्ञानं प्रवर्त्ततामिति समग्रमनोरथसम्भावनयैतदुक्त्वा युक्त्या निषेधमाहुः। कस्मादिति। कस्मात्कृष्ण इहायास्यतीत्यर्थः। वर्त्तमानप्रयोगेणैतत् ज्ञापयन्ति यद्यागच्छेत् इदानीमेवागच्छेत् द्वयमपि कृत्वा गच्छेत् विलम्बे प्रयोजनाभावात् ननु साम्प्रतं नागर्यः स्त्रियो भक्ता इति तासां समाधानानन्तरमायास्यतीति चेत्तत्राहुः। प्राप्तराज्य इति। उत्तरोत्तरमागमने प्रतिबन्धा एव भविष्यन्तीति आदौ राज्यमेव ततो मारणीयाः शत्रवः ततो दिग्विजये नरेन्द्रकन्यानामुद्वाहः ततस्तासु प्रीतिः ततः सर्वसुहृद्वृतः पुत्रपौत्रादिभिः परिवृतः ततः सर्वानुरोधयुक्तः कथमायास्यतीति भावः ॥ ४५ ॥

यथा ते अनुरोधाः तथा यूयमपीति ततः समायास्यतीति चेत्तत्राहुः। अस्मत्तापो वा आगमने हेतुः भगवदपेक्षा वा आद्ये इदानीमेवागच्छेत् नन्विदानीं महत्कार्यमस्तीति चेत्तत्राहुः। अन्याभिर्वेति। स्वोपकारात् कार्यावश्यकत्वं नत्वन्योपकारात् तथा सति वयमेवावश्यकाः स्वार्थं तु किमस्माभिरन्याभिर्वा स्वस्य सर्वथा अप्रयोजकत्वमाहुः। वनौकोभिरिति। वनचर्यो वयमनेन वानरतुल्यत्वात् सद्धर्मो बहिष्कारः सूचितः अस्तु वा धर्मवत्त्वं तथापि भगवता न कोऽप्युपकार इत्याह। अन्याभिर्वेति। चेत्यनादरे सर्वत्र हेतुर्महात्मन इति स हि महानेव न हि महतोऽन्यापेक्षा तत्राप्यात्मनः स हि सर्वान् स्वत एव व्याप्नोति महानुभावस्य वा इत्यलौकिक उपाय उक्तः लौकिकमाह। श्रीपतेरिति। स हि लक्ष्मीपतिः सर्वापेक्षा पूरिका हि सा सेवकानामपि किमुत स्वामिनः किञ्च आत्मकामस्येति आप्तः स्वत एव कामा येन अन्येषामपि कामानां फलदाता स्वयं कथं पूर्णकामो न भवेत् अतो ऽस्मदादिभिः कोऽवा अर्थः क्रियेत किञ्च कृतात्मन इति कृताः स्वार्थमात्मानो येन सर्वे हि क्रीडार्थमेव तेन जनिताः वशीकृत चित्ता इति एके ॥ ४६ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

तत् श्रुत्वा अन्या वाम्यमयस्वभावाः भोः सख्यः! कृष्णस्य रासादिभिः किं सुखं तावत् मुग्धा यूयं किमपि न जानीध्वे तदभिमतसुखं मन्मुखात् शृणुतेति वक्रोक्त्याहुः। कस्मादिति। अत्र गोचारणक्लिष्टस्तत्र तु प्राप्तराज्योऽभूत्। अत्र गोपजातिभिस्तत्रापि परकीयाभिः किं सुखं अत्र गोपस्तत्र तु नरेन्द्र इत्यादि उद्वाह्येति क्वचित्। पुराणे मथुरास्थस्य कृष्णस्य रुक्मिण्युद्वाहः कल्पभेदेन ज्ञेयः। प्राप्य मथुरामित्यधिकृत्य रामानिरुद्धप्रद्युम्नै रुक्मिण्या सहितो विभुरिति गोपालतापन्याञ्च श्रूयते ॥ ४५ ॥

भोः सहचर्यः! प्रेमशून्ये कृष्णे ईर्ष्यासूयादिकं त्यज्यतामिति वदन्त्यस्तस्य सर्वत्रौदासीन्यमन्या आहुः। किमिति। ननु श्रीपतित्वात्तस्यां तस्य प्रेमास्ति चेत्तत्र आप्तकामस्य कृतात्मनः पूर्णस्वरूपस्य तयापि किं कोऽर्थः क्रियते। युगपर्याप्तयोः कृतमित्यमरः। पर्याप्तिः परिपूर्णता ततश्च काचिदपि कन्यका तस्य विवाहार्थं नाहर्त्तव्येत्युद्धवं प्रति किमपि निगूढं तत्त्वं सूचितम् ॥ ४६ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका।

तदागमनसम्भावनयैतदुक्त्वा पुनर्विचार्य्यानागमनहेतूननुसन्धाय तदागमनं न सम्भवतीत्याहुः। कस्मादिति। वर्तमानकाले अत्रागमनहेतुं न पश्यामः यतः प्राप्तराज्यः पूर्वं हि आपद्ग्रस्तत्वादिहागत्य स्थित इदानीं लब्धराज्य इह गोपालनादिनिकृष्टाधिकारस्थाने कस्मादायाति किञ्च हतः यद्भयात्पलाय्यात्रागतः स चाहितः हतः शत्रुः कंसो येन स तथा च तादृशशत्रुरपीदानीं तत्र नास्ति यद्भयादत्रायाति अत्रापि स नास्ति यद्धननार्थं वात्रायातीति भावः। ननु अत्र लब्धमुपकारं स्मृत्वा प्रत्युपकारार्थं सद्य एव यातीति शङ्कानिरासाय कृष्ण इत्युक्तं श्यामवर्णत्वात्सकपटस्तस्मान्नास्ति प्रत्युपकारेण प्राप्तिसम्भावनेत्याशयः नन्विदानीं नव्यानां प्रियाणां नगरस्त्रीणामनुरञ्जने लब्धे नीराज्यास्थित्युपकरणसम्पादनादौ च व्यापृतत्वान्नायाति पश्चादवकाशदशायामायास्यतीति चेत्तर्ह्येवं विधप्रतिबन्धकानामुत्तरोत्तरं बहूनां सम्भावितत्वात्कदापि तस्यावकाशो दुर्लभः उद्वाहनोद्योगस्ततः पुत्रोत्पादनोद्योगस्ततः पुत्रपौत्रादिसुहृद्वृतत्वं तत्र प्रीतत्वं तदनुरोधपरायणत्वं चेति सर्वदा निरवकाशः कस्मादायास्यतीति भावः ॥ ४५ ॥

ननु श्रीपतेस्तस्य किं राज्येन किम्वा नरेन्द्रकन्याभिरिति चेत्तर्हि सर्वापेक्षया निकृष्टाभिरस्माभिरपि किं यदर्थमायास्यतीत्याशयेनाहुः। किमिति। धर्मार्थकाममोक्षाख्य पुरुषार्थेषु तत्सा-

परं सौख्यं हि नैराश्यं स्वैरिण्यप्याह पिङ्गला ।
तज्जानतीनां नः कृष्णे तथाप्याशा दुरत्यया ॥ ४७ ॥
क उत्सहेत सं त्यक्तुमुत्तमश्लोकसंविदम् ।
अनिच्छतोऽपि यस्य श्रीरङ्गान्न च्यवते क्वचित् ॥ ४८ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

धनेषु कामनावद्भिरेव सर्वैः समाश्रीयते न चासौ धर्माभिलाषु-रित्याहुः । कृतात्मनः । कृतकृत्यस्य नाप्यर्थाभिलाषुरित्याहुः । श्रीपतेरिति । सर्वार्थमूलभूतायाः श्रियः पतिस्तस्य नापि कामाभिलाषुरित्याहुः आप्तकामस्य नापि मोक्षार्थीत्याहुर्महात्मनः परब्रह्मणो मोक्षस्वरूपस्य मुमुक्षुत्वायोगात् एवंभूतस्य तस्यास्माभिर्वनौकोभिर्वनचरीभिः पशुतुल्याभिरन्याभिः सर्वोत्कृष्टाभिर्नरेन्द्रकन्योर्वश्यादिभिर्वा कः अर्थः क्रियेत किं वा प्रयोजनसम्पादनं न किमपीत्यर्थः । इदं राज्यादेरप्युपलक्षणम् । यद्वा । महात्मनः परमात्मनः अत एव श्रीपतेरत एवाप्तकामस्यात एव कृतात्मनः पूर्णस्य ॥ ४६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अन्या आहुः । कस्मादिति ॥ ४५ ॥
तत्रज्ञा आहुः । किमिति । किं कः अर्थः क्रियेत न कोऽपि ॥ ४६ ॥

भाषा टीका ।

अब तो श्रीकृष्णजी ने शत्रु को मार लिया उनका उसका राज्य मिल गया बडे राजाओं की कन्या का उनने विवाह कर लिया बंधुओं से मिलकर प्रसन्न हैं अब वे इहां क्यों आवेंगे ॥ ४५ ॥

वे तो लक्ष्मी पति हैं सर्व काम परिपूर्ण हैं उन महात्मा का हम जंगल वाली स्त्रियों से अथवा और कोइ स्त्रियों से क्या कार्य हो सकेगा अर्थात् कुछभी नहीं होगा ॥ ४६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

यतोऽघटमाना या कृष्णस्य सङ्गतिः सैवास्मान् व्याकुलयत्यतो नैराश्यमेव परमं सुखं तथापि दुष्करमित्याहुः । परं सौख्यमिति । स्वैरिणी कामचारिणी ॥ ४७ ॥
संविदमेकान्तवार्ताम् ॥ ४८ ॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

परं परमं हि एव नैराश्यमेव स्वैरिणीत्वेन तथा वक्तुमनर्हापीत्यपिशब्दार्थः न च मन्तव्यं तद्वयं न विद्म इत्याहुः । तत् तस्या वाक्यं क वा नैराश्यमेव सुखमिति जानतीनां यद्वा तज्जानतीनामपीत्यन्वयः तथा तादृशी आशा दुरत्यया कथमपि त्यक्तुमशक्येत्यर्थः । कुतः कृष्णे चित्ताकर्षके श्रीव्रजेन्द्रनन्दन इत्यर्थः । यद्यपि श्रीकृष्णाशापि तत्त्वतः परमानन्दमयी सैव जीवनावलम्बनं च तथापि विरहार्त्या जीवननैरपेक्षेण तथोक्तम् अन्यैस्तैर्व्याख्यातं तत्र अघटमानायाः श्रीकृष्णसंगतेराशैवेति लब्धे या श्रीकृष्णसङ्गतिः सैवेति लेखकभ्रमादिति अथवा तत् तदीयसत्यवाक्यत्वादिकं जानतीनामनुसन्दधानानामिति दुरत्ययत्वे एव हेतुः ॥ ४७ ॥

तदेवाभिव्यञ्जयन्ति । क इति । को जन इति सामान्यनिर्देशः सर्वलोकापेक्षया यद्वा कः पुमानपि किं पुनः स्त्रीत्यर्थः । उत्सहेत उत्साहमध्यवसायमपि कुर्यात् किं पुनस्त्यजेदिति संयुक्तं विस्मर्तुमपि किं पुनस्तदाशां क्षणमपि त्यक्तुम् उद्गतं तमो यस्मात्तथाभूत श्लोको यशो यस्येति यस्य यशः श्रवणादपि तमोहानिस्तस्य किं वा उत्तमा श्लोकाः गुणरूपादिवर्णनेन कवीनां पद्यानि यस्मिन्निति माहात्म्यविशेष उक्तस्तस्य संविदं संत्यक्तुमिति संशब्देन कदाचित् कथञ्चित् त्याज्यता निरस्ता कुतस्तदाहुः । अनिच्छत इति । श्रियमनपेक्षमाणस्यापि समन्ततः परिपूर्णत्वात् श्रीर्लक्ष्मीः अङ्गात् वक्षसः क्वचित् कदाचिदपि न च्यवते नापयाति अन्यैस्तैर्व्याख्यातम् । यद्वा । संविदमेकं सङ्केतनर्मापि श्रीः शोभा अङ्गात् श्रीमूर्तेः अन्यत्समानम् ॥ ४८ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

परं परमं हि एव नैराश्यमेव स्वैरिणीत्वेन तथा वक्तुमनर्हापीत्यपिशब्दार्थः । न च मन्तव्यं तद्वयं न विद्म इत्याहुः । तन्नैराश्यमेव सुखमिति जानतीनामपीत्यन्वयः । तथापि तादृशी आशा दुरत्यया कथमपि त्यक्तुं न शक्येत्यर्थः । कुतः कृष्णे चित्ताकर्षके श्रीव्रजेन्द्रनन्दन इत्यर्थः । अन्यैस्तैः । तत्राघटमानायाः श्रीकृष्णसङ्गतेराशैवास्मानाकुलयतीत्युन्नेयम् । स्वैरिण्यपीत्यनेन "तन्मनस्कास्तत्प्राणास्तदर्थे त्यक्तदैहिकाः । तमेव दयितं प्रेष्ठमात्मानं मनसा गताः" । वयं स्वैरिण्यस्तु न मन्तव्या इति व्यज्य श्रीभगवता वल्लव्यो मे मदात्मिका इतिवत् तथा स्वयमपि जारा भुक्त्वा रतां स्त्रियमित्यर्थान्तरन्यासीकृत्य तस्मिंस्तत्परिहारवन्मधुपुर्यामार्यपुत्रोऽधुनास्त इति साक्षादुक्तिवच्च परमसाधुशिरोमणावुद्धवे सङ्कोचः परिहृत इति च ज्ञेयम् ॥ ४७ ॥

तदेवाभिव्यञ्जयन्ति । क इति । को जनो लोकमात्रं किं पुनः स्त्रीत्यर्थः । उत्सहेत अध्यवसायमपि कुर्यात् किं पुनस्त्यजेदिति सन्त्यक्तुम् । अदाक्ष्यज्ञानैरपि अवज्ञातुं किं पुनर्विस्मर्तुम् । उत्तमाः श्लोकाः गुणरूपादिवर्णा अपि यस्य तस्य संविदं न पारयेऽहमित्यादिरूपां संत्यक्तुमिति संशब्देन मानादावप्यन्तस्त्यागो निषिद्धः । कुतस्तदाह । अनिच्छत इति । नाहमात्मानमाशासे

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

इत्यादिवन्नवनवप्रियजनानुरागेण श्रियमपेक्षमाणस्यापि श्रीलक्ष्मी-रेखारूपेण वर्त्तमानाऽङ्काद्वक्षसः क्वचित् कदाचिदपि न च्यवते नापयाति ॥ ४८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अन्याः पुनराहुः । परं सौख्यमिति । यत्पिङ्गलाख्या वेश्या प्राह । नैराश्यं परमं सौख्यं इति । तज्जानतीनामपि नोऽस्माकं तथापि नैराश्यसुखहेतुत्वदर्शनेऽपि कृष्णे कृष्णविषये आशा दुरत्ययाऽपरिहार्या ॥ ४७ ॥

युक्तं चैतदिति काश्चिदाहुः । क इति । उत्तमश्लोकस्य संविदमेकान्तवार्तां त्यक्तुं को जनं उत्सहेत न कोऽपीत्यर्थः । तत्संवित्त्यागानुत्साहमेव दृष्टान्तमुखेन दर्शयन्त्यस्तं विशिषन्ति । अनिच्छतोऽपीति । श्रीलक्ष्मीरनिच्छतोऽकामयमानस्यापि यस्योत्तमश्लोकस्याङ्काद्उरःस्थलात्कचित्कदाचिदपि न च्यवते ॥ ४८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली

कृष्णस्य पूर्णकामत्वात्तत्तथास्तु युष्माकं सुखनिमित्तं किं तत्राह । परमिति । आशा अतितृष्णा ॥ ४७ ॥

न केवलमस्माकमेव कृष्णाशा दुस्त्यजा अन्यस्यापीत्याहुः । क इति ॥ ४८ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

तर्ह्येवं सति किङ्कर्त्तव्यमित्याशङ्क्य कांचिदुपायं परिकल्प्य दूषयन्ति । परं सौख्यमिति । आशा हि सर्वेषां दुःखहेतुः सा त्यक्तव्येति साधनं "प्रजायत आशाया वै शाम्यती"ति श्रुतेः अतो नैराश्यमेव श्रुत्यनुभवसिद्धं साधनं तस्य फलाव्यभिचारमाहुः परं सौख्यमिति । स्वभावतोऽपि परमसुखरूपं युक्तश्चायमर्थः "औपस्थ्यजैह्व्यकार्पण्याद्गृहपालायते नरः" इति किञ्च या हि स्वैरिणी सा मनोविक्षेपसहिता अन्यथैकत्र प्रतिष्ठिता स्यात् सापि नैराश्यं कृतवतीत्याहुः । स्वैरिणीति । यथा संछिद्य कान्ताशामित्यग्रे वक्ष्यति अनेन आशाया अन्तो नास्तीत्यपि सूचितं पिङ्गलानाम वेश्या इयमपि कथा नारदादिभिः श्रुत्वा आर्षज्ञानेन वा ज्ञायते तज्जानतीनामपि प्रकारतः फलतः उपपत्तितश्च नोऽस्माकं सर्वासामेव कथं न स पक्ष आद्रियत इति चेत्तत्राहुः । कृष्णे तथाप्याशा दुरत्ययेति । पिङ्गला हि कृष्णाशया इतराशां त्यक्तवती सर्वस्मात् कृष्णोऽधिक इति वयं किमाशया कृष्णाशां त्यक्ष्यामः उत्कर्षः कृष्ण एव पर्यवसित इति अर्थोदर्कत्वात् एतासामाशापूर्त्त्युपायापरिज्ञानं कृष्णाशा ततोऽपि सिद्धा भवेत् नवेति सन्देहश्च तमाशाब्रवीदित्यत्र तथा निर्णीतम् ॥ ४७ ॥

नन्वाशापरित्यागे पदार्थविस्मरणं हेतुरास्ति तस्मिन् कृते आशा निवर्त्तिष्यत इति चेत्तत्राहुः । क उत्सहेतेति । उत्तमश्लोकस्य भगवतः संविदं स्मरणात्मकं संयुक्तं क उत्सहेत संविच्छब्देन सम्बन्धो ज्ञानं चोच्यते उत्तमैः श्लोक्यते एव ननु संबन्धमभिप्राप्नुवन्ति । सर्वैरेव श्लोक्यत इति सुलभं भगवत्स्मरणम् अविगीतत्वात् बाधराहितं विस्मर्त्तव्यत्वं सम्बन्धो वा दूरीकर्त्तव्य इति को वा उत्साहमपि कुर्यात् अशक्यत्वात् अत्यन्तमीप्सितत्वाच्च ज्ञानपक्षे अशक्यत्वमुत्तमश्लोकपदेनैव साधयित्वा सम्बन्धत्यागेच्छाभावे विद्यमानेऽपि हेतौ न जायत इत्युपपादयन्ति । अनिच्छतोऽपीति । इच्छामात्राभावे कामाभावः सुतरां सिद्धः तादृशे हि स्त्रियो विरक्ता भवन्ति तत्रापि स्वतः प्रौढाः तत्रापि पित्रादेर्गृहे लब्धप्रतिष्ठाः स्थिता अपि औदासीन्येन तिष्ठन्ति धर्मपरिपालका इव भगवाननिच्छन् भवति तादृशस्यापि अङ्काद्वक्षस्थलात् श्रीः अर्थार्थिभिः सर्वदा सेव्यमानापि कदापि न च्यवते च्युता न भवति ॥ ४८ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

तर्हि तत्प्राप्त्याशा त्यज्यतामिति चेन्न सा सर्वथैव त्यक्तुमशक्येत्याहुः। परमिति । तदपि कृष्णे आशा कृष्णविषया ह्याशा दुरत्यया सर्वैरेव दुस्त्यजा । पिङ्गलायाः खलु पुरुषान्तर एवाशासीदतः सा तया त्यक्तेति भावः ॥ ४७ ॥

किञ्च लोभी खलु लोभ्यं वस्तु प्राप्नोतु न प्राप्नोतु वा किन्तु तत्रौत्सुक्यं त्यक्तुं नोत्सहते इत्याहुः । क इति । उत्तमःश्लोकस्य कृष्णस्य संविदं सौन्दर्यमाधुर्याद्युपलब्धिं त्यक्तुं क उत्सहेत न कोऽपि । श्रियमनपेक्षमाणस्यापि यस्य श्रीलक्ष्मीरेखारूपेण वर्त्तमाना अङ्काद्वक्षसः कदापि न च्यवते नापयाति ॥ ४८ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

तथा चैवंविधनिरपेक्षापेक्षवतीनामस्माकं नास्ति तापनिवृत्तिकरः कश्चिदुपायः यद्यप्यस्ति नैराश्यरूप एकस्तथापि नासावस्माभिरनुष्ठातुं शक्य इत्याशयेनाहुः । परमिति । आशायाः सर्वदुःखनिदानत्वात्तन्निवृत्तिरेव परं सौख्यं हि शब्दः "प्रजायत आशायाः शाम्यति औपस्थ्यजैह्व्यकार्पण्याद्गृहपालायते नरः यतो यतो निवर्त्तेत विमुच्येत ततस्ततः । निवर्तनाद्धि सर्वतो नवेत्ति दुःखमेव मि"त्यादि श्रुतिस्मृतिप्रसिद्धिं द्योतयति अतिपामरप्रसिद्धोऽप्ययमर्थ इत्याशयेनाहुः । स्वैरिण्यपीति । तथा तज्जानतीनामप्यस्माकं कृष्णे या आशा सा आशा दुरत्यया त्यक्तुमशक्या पिङ्गला हि वेश्या कृष्णाशयान्याशां त्यक्तवती सदानन्दरूपस्य परमात्मनः सर्वोत्तमत्वाद्वयं किमाशया कृष्णाशां त्यक्ष्याम इति भावः ॥ ४७ ॥

नन्वत्यन्तालभ्यविषये किमित्याशया संतप्तचित्ताः स्थ इत्याशङ्क्य यथा सावत्यन्तालभ्यस्तथा तद्विषयकाशापीत्यर्थः । दुरत्यया केनाप्यत्यक्तत्वादतो न वयमेवोपालम्भनीया इत्याशयेनाहुः । क इति । उत्तमश्लोकस्य संविदम् एकान्तवार्तां ज्ञानं वा सम्बन्ध एकान्तवार्तादिविषयिकामाशां कः संत्यक्तुमुत्साहमपि कुर्यात्त्यागस्य तु का वार्ता यतोऽसावुत्तमैरपि श्लोक्यते श्लाघ्यते अन्येषां

सरिच्छैलवनोद्देशा गावो वेणुरवा इमे ।
संकर्षणसहायेन कृष्णेनाचरिताः प्रभो ! ॥ ४९ ॥
पुनः पुनः स्मारयन्ति नन्दगोपसुतं वत ।
श्रीनिकेतैस्तत्पदकैर्विस्मर्तुं नैव शक्नुमः ॥ ५० ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

का वार्ता ब्रह्मादिभिः प्रार्थनीयकरुणाकटाक्षा सर्वोत्तमा श्रीश्च-लापि अनिच्छतोऽपि यस्य भगवतोऽङ्गाद्वक्षःस्थळात्क्वचिन्न च्यवते कदाचित्कुत्रचिदपि प्रच्युता न भवति तस्याशां वयं वराक्यः कथं त्यक्तुं शक्ष्याम इत्यर्थः ॥ ४८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

स्वैरिणी स्वेच्छाचारिणी ॥ ४७ ॥
सम्विदं रहस्यवार्ताम् ॥ ४८ ॥

भाषा टीका ।

आशा नहीं करना ही वडा सुख है इस वात को पिंगला वेश्याने भी कहा है इस वातको हम जानती भी हैं तौ भी श्रीकृष्ण के विषै वडी दुस्तर हमारी आशा है सो नहीं छूटती हैं ॥ ४७ ॥

उन कृष्णकी एकान्त वार्तो को कौन छोड सकैगा जिनके कि नहीं चाहने पर भी लक्ष्मी जिनके अंग में से वक्षःस्थल में से कहीं नहीं जाती है ॥ ४८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

किञ्च तद्विस्मृतौ न तावद्दुःखमस्ति सापि नास्माकं सम्भवतीत्याहुः । सरिच्छैलेति त्रिभिः । आचरिताः सेविताः ॥ ४९—५० ॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

अहो तद्विस्मरणे सत्याशापि हीयेत तच्च नैव घटेतेत्याहुः । सरिदिति । यदि जलान्तिके यामस्तदा सरितः गृहे चेत्तिष्ठाम स्तदा शिलाबद्धभूभागेन स्मार्यमाणा अत्युच्चत्वाद्वा दृश्यमानाः शैलाः यदि वा वनानि प्रविशामस्तदापि वनस्थानानि जळ-स्थलवनानि सर्वाण्येवेत्यर्थः । इमे इत्यस्य लिङ्गविपरिणामेन सर्वैर-प्यन्वय इति तेषां सर्वेषामेव प्रत्यक्षतोक्ता यद्वा इमे तद्विरहातुराः साक्षादत्रैवैते निपातिताः श्रीदामसुबलादयस्तत्सहचराः तेषाम-प्यन्तश्रीकृष्णस्मारकहेतुमहार्तिजननान्नामाग्रहणम् एवं सरि-दादीनां यथोत्तरं स्मरणे श्रैष्ठ्यमूह्यं सम्यक् कर्षति श्रीकृष्णस्य क्रीडासुखार्थं सखीन् किं वा स्नेहभरेण तस्य चित्तमेवाकर्षतीति सङ्कर्षणः सहायः सङ्गी यस्य तेन किम्वा सङ्कर्षणस्य सहायेनेत्युभयथापि मिथः स्नेहेन सुखक्रीडा सूचिता कृष्णेन जगच्चित्ताकर्षकक्रीडे-नेति तत्क्रीडास्पदानां सरिदादीनामपि चित्ताकर्षकत्वमभिप्रेतम् आचरिताः सेविता इति तैर्व्याख्यातम् । यद्वा । स्वक्रीडासाधनत्वं नीताः यद्वा आचरिताः कृता इति वेणुरवाणामेव विशेषणं ततश्च सङ्कर्षणसहायेनेति तदुपगायनत्वेन तेषामेव माधुर्य्यविशेषः सूचितः सरिदादीनां तु श्रीकृष्णाक्रीडत्वं व्यक्तमेव यद्वा आच-रिताः प्रवर्तिता गोपानां वेणुरवाः इमे इदानींतनाः तत्तद्व्रज-जातत्वेनैव तत्प्रकारविशेषशिक्षणात् ॥ ४९ ॥

पुनः पुनरिति कथञ्चित् प्रयत्नेन तच्चिन्तायां त्यक्ताया-मपि पुनः स्मारणात् पुनस्तथैव त्यक्तायामपि पुनः स्मरणादित्येवम-सकृदित्यर्थः किम्वा अविरतमेवेति प्रभो ! इति परमदैन्येन सम्बो-धनं यद्वा हे वोढुं समर्थेति भवतेदं बुद्ध्यत एवेति भावः नन्दो गोपो महाराजस्तस्य सुतमिति प्रयत्नशतैरीश्वरत्वेन स्मर्तुमिष्यमाणमपि श्रीवल्लवेन्द्रकुमारत्वेनैव स्मारयन्तीत्यर्थः वत खेदे ननु तत्र श्रीकृष्णसम्बन्धानां बलात्त्यक्तु तं विस्म-रत तत्राहुः श्रीनिकेतैः ध्वजाद्यसाधारणलक्षणैः श्रियः सर्वस्याः सम्पदः शोभाया वा निकेतैः तस्य नन्दगोपसुतस्य पदकैः कोमलपदैः सर्वत्रोदितैः तदानीमपि तथैव तेषामनुवृत्तिः प्राक्-व्युत्पादितैव ॥ ५० ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

अहो तद्विस्मरणे सत्याशापि हीयते तच्च नैव घटत इत्याहुः । सरिदिति युग्मकेन । वनोद्देशेन व्रजोऽपि गृह्यते । तदन्तर्वर्त्तित्वात्तस्येति । सर्वाण्यवस्थानानीत्यर्थः । वेणुरवा इदानी-मपि कैश्चित् क्रियमाणाः । इमे इति स्फूर्त्या प्रत्यक्षा इव क्रियन्ते तत्र गाव इत्यत्र लिङ्गं विपरिणमनीयम् । आचरिताः सेविता अनुशीलिता इत्यर्थः । अन्यकृतवेणुरवस्यापि तदनुशीलित्वं जात्यैक्यात् । सङ्कर्षणसहायेनेति । तत्र तत्र शोभादिपरिपोषात्तेनापि सहागमनमीहितम् ॥ ४९ ॥

पुनःपुनरिति स्मरणाविच्छेदेऽपि स्मरणविशेषाणां पुनःपुनरतिश-यिता ध्वनिता प्रभो ! इति परमदैन्येन यद्वा हे प्रभो ! सर्वदा समर्थेति त्वमेवात्र न्यायकर्त्ता भवेति भावः । श्रीनन्दाभिधस्य गोपस्य राज्ञः सुतमिति भवाद्विधोपदेशात् प्रयत्नशतैरीश्वरत्वेन स्मर्त्तयिष्य-माणमपि तद्रूपं तथैव स्मारयन्तीति ज्ञानाद्यनवसरो व्यञ्जितः । ननु तत्र तत्रानुसन्धानमात्रं बलात् त्यक्त्वा तं विस्मरत तत्राहुः श्रीनिकेतैर्ध्वजाद्यसाधारणलक्षणैः श्रियः सर्वस्याः सम्पदः शोभाया वा निकेतैस्तस्य पदकैः सर्वत्रोदितस्तल्लीलाभेदेन पदचिन्हानां प्रकारैः । स्थूलादित्वात् प्रकारे कन् । तदानीमपि तेषामनु-वृत्तिः प्रागव्युत्पादितैव ॥ ५० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

किं च तद्विस्मृतौ तु नास्माकं दुःखमस्ति सापि न संभवतीत्याहुः त्रिभिः । सरिदिति । प्रभो ! हे उद्धव ! सङ्कर्षणसहितेन कृष्णेन सरिदादय आचरिताः सेविताः ॥ ४९ ॥

ततः किमित्यत आहुः । पुनःपुनर्नन्दगोपसुतं स्मारयन्ति वत कैर्लिङ्गैरित्यत आहुः । श्रीनिकेतैः श्रियः सौन्दर्यसम्पदो निकेतैराश्रयैः तस्य भगवतः पदकैः पदानीव पदकानि "इवे प्रतिकृतौ" इति कः प्रत्ययः. तैः स्मारयन्तीति पूर्वेण संबन्धः अतस्तं विस्मर्तुं नैव शक्नुमः ॥ ५० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

आक्रीडितैः क्रीडारङ्गीकृताः इमे सरिदादयः ॥ ४८ ॥

नन्दगोपसुतं पुनःपुनः स्मारयन्ति वत आश्चर्यं ननु सरिदादिदर्शन एव श्रीकृष्णस्मरणम् अन्यदा नास्तीत्यायातमिति तत्राह । श्रीनिकेत इति । तस्य श्रीकृष्णस्य पदके प्रशस्तपदे प्रशस्तत्वं कुत इत्यत उक्तं श्रीनिकेत इति ॥ ५० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

वेणुरवा इदानीमपि कैश्चित् क्रियमाणा इमे इति स्फूर्त्या प्रत्यक्षा इव श्रूयन्ते स्म एषां तत्राचरितत्वं जात्यैक्यात् ॥ ४९ ॥

पुनःपुनरिति । स्मरणाविच्छेदेऽपि स्मरणविशेषाणां पुनः पुनरतिशयिता भणिता ॥ ५०—५२ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

स्मरणत्यागाशक्यतामुपपादयन्ति । सरिच्छैलेति त्रिभिः । स्मारका हि बहवः येऽवश्यं प्रवृत्तिः सर्वपरित्यागेऽपि जलार्थमवश्यं गन्तव्यं बहिर्निर्गत उच्चैः स्थितं पश्येदेव अतो यमुनागोवर्द्धनदर्शनमावश्यकं विहारार्थमवश्यं वनोद्देशाश्च द्रष्टव्याः एते त्रयः सरत्रादिभेदाः गृहेऽप्यवश्यं द्रष्टव्या गावः निमीलिताक्षाणामपि इमे वेणुरवाः स्मारकाः ये इदानीमप्यनुभूयन्ते अतः स्मारकाः सर्वत्र किं च भगवतः आचरितान्यपि भगवत्स्मारकाणीत्याहुः । सङ्कर्षणेति । बहिर्वृत्तिनिरोधे पूर्वोक्ता न स्मारका भगवच्चरितानि तु चौर्यादीनि दैत्यादिमारणेन पालनरूपाणि स्वच्छन्दरमणरूपाणि च आचरिता इत्युच्यन्ते सङ्कर्षणसहायत्वं लीलादौ निर्भयत्वाय तत्रापि कृष्णेन सदानन्देन अस्मदर्थमेवाविर्भूतेन स्मारणार्थमेव तादृशकर्ता प्रभो ! इति सम्बोधनं तादृशार्थविस्मारणे कदाचित्तव सामर्थ्यं भवेत् न त्वस्माकमिति ज्ञापितम् अनेन स्वदृष्टान्तेन भवतीभिरपि दुःखम् स्थातव्यमिति पक्षो निवारितः अत एव त्वं स्वस्थो वर्त्तसे न वयम् ॥ ४९ ॥

स्मारकाणिकृत्य तैः क्रियमाणस्मरणस्य बलिष्ठतामाहुः । पुनः पुनः स्मारयन्तीति । स्मरणेन पीडया मूर्च्छायां जातायां विस्मरणमाशंसमानानां सर्ववृत्तिनिरोधे स्मारयिष्यन्तीति भयात्स्मृता एव भान्त्यतः पुनः पुनः स्मारयन्ति किं च पीडायां समर्थाश्रयणं कर्तव्यमिति विचारेऽपि नन्दश्चेत् स्मृतः तदा नन्दगोपसुतः इति स्मृत एव भवति भगवान् किं च लक्ष्मीस्थानरूपाण्यतिसुन्दराणि सर्वत्रोदितानि पदान्यच्युतत्वादाधारस्थिते अतिरोभावस्वभावानि तादृशैः तस्यैव भगवतः पदैरसाधारणैर्हृदयादिषु स्थापितैर्वा सानुभावैः दृष्टादृष्टोपायेन बलिष्ठैः कृत्वा विस्मर्तुं नैव शक्नुमः ॥ ५० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

किञ्च तद्विस्मृतौ सत्यामाशापि हीयते सा त्वस्मस्माकं नैव घटत इत्याहुः । सरिदिति त्रिभिः । आचरिताः सेविता, अनुशीलिताः । श्रीनिकेतैर्ध्वजवज्रादिचिन्हशोभायुक्तैः शिलादिष्वद्यापि वर्त्तमानैः ॥ ४९ ॥ ५० ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

एतद्दुःखस्य भैषज्यं यदेतन्नानुचिन्तयेत् । एतद्विज्ञानसामर्थ्यं न चलेः समतामियादित्यादिना, नन्वस्मरणं यद्यपि दुःखौषधमुक्तं तथाप्यस्माकं तदतीव दुर्लभं स्मारकाणां प्रबलानां बहूनां विद्यमानत्वादित्याहुः । सरिदिति । सरित् सर्वत्यागेऽपि जलानयनार्थमवश्यं गन्तव्या नदी यमुना बहिर्गताभिरनिवारितदर्शन उच्चैः स्थितः शैलो गोवर्द्धनः विहारार्थमवश्यं गन्तव्या वनोद्देशा वृन्दावनस्य तत्तत्प्रदेशाः गृहादाववश्यं द्रष्टव्या गावो निमीलितनेत्राभिरवारितश्रवणा, वेणुरवाः संकर्षणसहायेन कृष्णेन सदानन्दस्वरूपेण स्मृतिसन्ततिसंपादनार्थं संकर्षणेन सह कृतावतारेणाचरितास्तदाचरणसंबद्धा इमे सरिदादयः अवश्यमनुभूयमानाः पुनः पुनः स्मारयन्तीति परेणान्वयः. यद्वाच चौर्यदैत्यमारणादिस्मृत्या पालनलालनस्वच्छन्दस्मरणादिरूपाणि भगवच्चरितानि निरुद्धश्रोत्रादिवृत्तीनामपि स्मारयन्ति प्रभुणा प्रेषितस्त्वमप्यस्माकं प्रभुरतोऽस्मद्दुःखमाकर्ण्य निवारयेति सम्बोधनाशयः तद्विस्मरणे त्वं प्रभुः स्याः न तु वयमिति वा ॥ ४९ ॥

कदाचिन्मूर्च्छादौ क्षणमात्रं विस्मरणे पुनः पुनः स्मारयन्ति इति स्मारकाणां प्राबल्यमुक्तं तत्रापि नन्दगोपसुतं महत्यां पीडायां प्रबलाश्रयणं कार्यमिति विचारे नन्दराय इचेत्स्मृतिपथमारोहति तदा तत्सुतत्वेन श्रीकृष्णोऽपीति भावः यद्वा ननु दूरस्थितं वस्तु स्मर्यते भगवांस्तु न दूरस्थितः किं तु सर्वेषामात्मत्वादत्यन्तनिकटवर्ती अत एव भवतीनां वियोगो मे न हि सर्वात्मना कश्चिदिति भगवतोक्तमित्याशङ्कानिरासायोक्तं नन्देति किं च श्रियः सर्वलावण्यकारणभूताया निकेतैश्चो संस्थानैस्तस्य पदकैः कोमलैश्चरणारविन्दैः हृदि कृतदृढस्थानैः स्मरणपुष्कलकारणैः कृत्वा विस्मर्तुं नैव शक्नुमः अतोऽति खेदे अहो कष्टं न प्राणं शक्यते नापि विस्मर्तुं किं कुर्मः क्व गच्छाम इत्यर्थः ॥ ५० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

हे प्रभो ! उद्धव ! कृष्णेन आचरिताः सेविताः सरिच्छैलवर्द्धना-

गत्या ललितयोदारहासलीलाऽवलोकनैः।
माध्व्या गिरा हृतधियः कथं तं विस्मरामहे ॥ ५१ ॥
हे नाथ ! हे रमानाथ ! व्रजनाथार्तिनाशन ! ।
मग्नमुद्धर गोविन्द ! गोकुलं वृजिनार्णवात् ॥ ५२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

शादयः तस्य पदकैः चरणचिन्हैः सहिताः पुनः पुनः स्मारयन्ति विस्मरणेन कदाचित्स्वास्थ्यसम्भावनायां विस्मर्तुं नैव शक्नुमः इति द्वयोरन्वयः ॥ ४९ ॥ ५० ॥

भाषा टीका ।

हे प्रभो ! उद्धवजी ये सब नदी वनों के देश ये गऊ ये वंशी के शब्द जो हैं इनसे बलदेवजी के साथ में रह कर श्रीकृष्णचंद्र ने विहार किये हैं ॥ ४९ ॥

ये सब देश नंद गोपराजके पुत्र को वेर वेर स्मरण कराते हैं और उनके चरण चिन्ह जो लक्ष्मी, के स्थान हैं, तिनके देखने से हम उनको भूल नहीं सकती हैं ॥ ५० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

हे उद्धव ! तं कथम्विस्मरामेति ॥ ५१-५२ ॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

ननु तेषु दृष्टिमकृत्वा बुद्ध्या मनोऽन्यत्र नीत्वा सर्वं तदीयं विस्मृत्यासौ विस्मर्य्यतां तत्राहुः । गत्येति । देहचेष्टोपलक्षिता उदारहासाश्च लीलयावलोकनानि च तैरिति माधुरीभिर्मनोभावविशेषः बहुत्वं तेषां प्रत्येकं परंपरया माध्व्या शब्दतोऽर्थतश्च मधुरया एवं त्रिधा हृतबुद्धयः ततृगत्यादिकं तदीयसौहृदं वा कथं केनोपायेन विस्मराम अपि तु कथमपि विस्मर्तुं नैव शक्नुम इत्यर्थः । तत्तत्स्मरणेन तस्यैव स्मृत्युत्पादनात् तमिति पाठो वा ॥ ५१ ॥

ततश्च प्रेमार्त्तिभरोदयेन श्रीभगवन्तमेव साक्षादिव सम्बोध्यार्तनादेन प्ररुदत्यआहुः । हे कृष्णेति । स्वतः परमानन्दघनमूर्ते न चानन्दपरिपूर्णत्वादन्यापेक्षास्तीत्याहुः । हे रमानाथ ! लक्ष्मीपते इति । अत्यन्तार्त्या पुनः पुनर्हेशब्दः न च रमानाथत्वादन्यजनोपेक्षास्तीत्याहुः । व्रजनाथ ! हे व्रजपालकेति । यद्वा हे रम ! हे कान्त रम कान्ते रमा लक्ष्म्याम् इत्यभिधानात् हे अनाथ ! व्रजनाथ ! न विद्यते त्वां विना नाथोऽन्यो यस्य तस्य व्रजस्य नाथ ! तत्र च कदापि तव दीनजनोपेक्षा नास्त्येवेत्याहुः । आर्तिनाशनेति । एतच्चात्मोद्देशेनोक्तम्

अतो दुःखसमुद्रे मग्नं गोकुलं सर्वानत्रत्यान् प्राणिन उद्धर सकृन्निजदर्शनेन सर्वं दुःखमपास्य पुनर्जीवयन् सुखीकुर्वित्यर्थः तच्च तवावश्यकृत्यमेवेत्यभिप्रायेण सम्बोधयन्ति गोविन्द ! गोकुलेन्द्रेति मग्नमित्यतीतनिर्देशेनार्णवरूपकेण च स्वतोऽप्रतिकार्य्यतया महादैन्यं सूचितमिति ॥ ५२ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

ननु वस्त्रेण नेत्रमावृत्य बुद्ध्या मनोऽन्यत्र नीत्वा सर्वं तदीयं विस्मृत्य स विस्मर्यतां तत्राहुः । गत्येति । अनया देहचेष्टामात्रमुपलक्षितम् उदारहासश्च लीलावलोकनानि च तैरिति तदीयभावविशेषः बहुत्वं तेषां प्रत्येकं परम्परया । माध्व्या शब्दतोऽर्थतश्च मधुरया एवं त्रिविधचेष्टया हृतबुद्धयः । तद्गत्यादिकं तदीयसौहृदं वा कथं केनोपायेन विस्मरामः अपि तु न कथमपीत्यर्थः । यद्वा पुनरन्यो वा तदुपाय उपदिश्यतामित्यर्थः ॥ ५१ ॥

ततश्चास्माकं दुःखमस्योपदेशान्नापगच्छेदिति तमुद्धवमप्यनादृत्य समुत्थिततया मथुराभिमुखीभवन्त्यः समुन्नतनादेन स्वकान्तमेव सम्बोधयन्त्यः सदैन्यरोदनमाहुः तत्र च तस्य गोकुल प्रियतास्मरणेन गोकुलदुःखासहनतया स्वदुःखमप्यनादृत्य गोकुलरक्षामेव प्रार्थयन्ते हे कृष्णेति । सर्वतंदीयाद्भुतरूपगुणक्रीडाकोटीकारितया सन्ततं निजान्तःस्फुरता विशेष्यनाम्ना प्रथमतः सम्बोधनं हे रमानाथेत्यादिना । विशेषेण नामभिरिति ज्ञेयम् । हे कृष्णेत्यत्र हे नाथेति क्वचित्पाठः प्रथमतः स्वीयभावस्फूर्त्तिः हे सर्वासामस्माकमासां स्वामिन्नित्यर्थः हे रमानाथेति रमापर्यन्तनाथ्यमानकृपादृष्टितया परमदुर्ल्लभ ! तत्र च तस्मान्मच्छरणं गोष्ठं मन्नाथमित्याद्यनुसारेण व्रजस्य नाथः आर्त्तिनाशनश्च सन् निर्वाहिततादृशसङ्कल्प ! अतोऽधुना तु दुःखसमुद्रे मग्नं गोकुलं सर्वान् तत्र च हे गोविन्देति सम्बोध्य गोकुलेन्द्रतयाभिषिक्तस्य तव गोविन्दतापालनार्थमप्यवश्यमेवेदं कृत्यमिति सूचितवत्यः । "स्वेषामात्मवियोगार्त्तिमप्यमप्यवश्यमेवेदं ... व्रजाय वल्लभाः । व्रजस्य हर्त्तुं वृणवाना निरस्येत् कथमच्युतः" ॥ ५२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

किं च गत्यादिभिर्हृता धीर्यासां ता वयं कथं कृष्णं विस्मरामहे ततश्च स्मारकैर्लिङ्गैस्ततस्स्मृतिरवर्ज्जनीया ततश्च दुःखमपीति भावः ॥ ५१ ॥

ततश्चेदं दुःखं स एव भगवानपनुदतु इति प्रार्थयन्ते तत्र बुद्ध्यासन्निधापितस्य भगवतः संबोधनानि हे नाथेत्यादीनि ।

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका

वृजिनार्णवे दुःखाब्धौ मग्नं गोकुलमुद्धर नाहं शक्त इत्यत्र संबोधयन्ति । हे नाथेति ईश्वरस्य न किमप्यशक्यमिति भावः । नन्वीश्वरो निगृह्णात्यपीत्यत आहुः । हे रमानाथेति । "लक्ष्म्या सह हृषीकेशो देव्या कारुण्यरूपया । रक्षकः सर्वसिद्धान्त" इत्युक्तरीत्या केवलकारुण्यमूर्त्या पुरुषकारभूतया लक्ष्म्या नित्ययुतस्य तवानुग्रह एवोचित इति भावः । नन्वेवमपि कांश्चिन्निगृह्णन्नेव दृश्ये इत्यत्राहुः । व्रजनाथेति । व्रजन्त्वनुगृह्णन्नेव दृश्यस इत्यभिप्रायः तमेवाविष्कुर्वन्ति हे आर्तिनाशनेति विषजलाप्ययाद्व्यालराक्षसाद्वर्षमारुताद्वैद्युतानलादिति तत्तत्प्रयुक्तपीडाहारित्वं बहुशो दृष्टमिति भावः ॥ ५२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

उक्तमेव द्रढयन्ति । गत्येति ॥ ५१ ॥

नित्यं स्वजाप्यं विज्ञापयन्ति । हे नाथेति ऐश्वर्यमूर्ते ! रमाया अपि आशीःप्रद ! व्रजनाथानां गोपानाम् आर्तिनाशन ! मग्नं दुःखार्णवे इति शेषः गवां विन्दो लाभो यस्मात्स तथा गोविन्द इति ५२ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्यां पञ्चचत्वारिंशोऽध्यायः ॥ ४५ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

किं च विस्मरणे हि मनोनिरोधः साधनं मनश्च अमलया बुद्ध्या निरुध्यते सा बुद्धिः पूर्वमेव भगवता हृतेति कोऽन्य उपायो विस्मरण इति पृच्छन्त्य इवाहुः । गत्येति । बुद्धिर्हि त्रिविधगुणैस्त्रिविधा तामपि बुद्धिं कायवाङ्मनोविषयां त्रिविधा धर्मा हरन्ति तत्र प्रथमं भगवतः कायिकचेष्टया देहविषयिणी बुद्धिर्हृतेत्याहुः । ललितया गत्येति । गतिर्हि स्वयं गच्छन्ती बुद्धिमपि नयति ललिता तु सर्वतो निरोधेन नयति तदंशमनसो हरणात् मनसो हरणे उपायमाहुः । उदारहासलीलावलोकनैरिति । मनो हि सङ्कल्पविकल्पात्मकं तत्र सङ्कल्पांशं भगवता हासो निवारयति मोहात्मकत्वात् सङ्कल्पसाधनरूपं सुखं च बहुधा प्रयच्छतीति फलेनापि न सङ्कल्पः साधयितुं शक्यते तदाहुः । उदारेति । भ्रान्तो हि विकल्पं करोति तन्निवृत्त्यर्थं च लीलावलोकनानि ज्ञानात्मकत्वादवलोकनस्य विकल्पं नाशयत्येव तत्रापि फलाभावात् ज्ञानं दुर्बलं भवेत्तन्निषेधार्थं लीलेति स्वतः पुरुषार्थमित्यर्थः वाक्प्रधानन्तु गीर्हरति सजातीयहारिणी स्त्री स्त्रियं चेद्धरेत् न कोऽपि प्रतिबन्धको भवति । तत्रापि फलरूपत्वाय माध्व्येति एवं लोकप्रसिद्धप्रकारेण विस्मरणासम्भवात् तत्कथं विस्मरामहे इति प्रश्नः । तस्मिन् हि विस्मृते साधनान्तरे प्रवृत्तिः सम्भवति अतो भगवदुक्तं ज्ञानं पूर्वोर्ध्वविस्मरणे भवतीति अशक्यमेवोपदिष्टवान् ॥ ५१ ॥

एवं लौकिकप्रकारेण वैदिकप्रकारेण च वयं सर्वथा दुःखसागराग्निस्तीर्णा भविष्याम इत्याहुः । हे नाथेति । प्रमेयबलादेवोद्धर्तव्याः नतु प्रमाणबलेन तथा करणे आवश्यको हेतुः तथात्वं नन्वच्युतोऽहमक्षरोऽहं च अतो ममाप्यशक्यो रमणेनैव भवतीनामुद्धारो भवतीति चेत्तत्राहुः । हे रमानाथेति । रमणैकस्वभावा हि सा उत्तरोत्तरं वर्द्धमाना नित्या च तस्यास्त्वं नाथ इति सर्वजनीनं साप्यस्मत्प्रकारेणैव साध्या भवति लक्ष्मीत्वादेव न पोषणादिकमपेक्ष्यते ननु तदावश्यकमिति कथञ्चिन्निर्वाह्यत इति चेत्तत्राहुः । व्रजनाथेति । यथा त्वं लक्ष्मीपतिः सर्वजनीनः एवं व्रजपतिरिति लक्ष्मीव्रजयोस्तुल्यत्वाद्दोषगुणास्तुल्या इति भावः । ननु साप्यशक्या चेत्त्यज्यत एवेति कोऽयं दृष्टान्त इति चेत्तत्राहुः । आर्तिनाशनेति । हरिस्त्वम् आर्तिं नाशयस्येव कुर्याद्वान्यन्न वा कुर्यात् आर्तिं तु नाशय अन्यथा हरित्वमेव न स्यादतः स्वरूपरक्षार्थमेतदवश्यं कर्तव्यं किं च इदं हि सर्वमेव गोकुलं दुःखसमुद्रे निमग्नं तदुद्धर पूर्वं ह्येको गजः सोऽपि पुष्करिण्यामर्द्धनिमग्न एव स्थितः सोऽपि दयया चेदुद्धृतः किमस्मदुद्धारे दयाया विलम्बो भवेत् मग्नोद्धारे त्वमेव समर्थः यथा मन्दरोद्धारे ननु तेऽस्मद्वाक्यात्प्रवृत्ता इति तदर्थमुद्धृताः भवत्यस्तु नास्मद्वाक्यात् प्रवृत्ता इति चेत्तत्राहुः । गोविन्देति । त्वं ह्यस्मदिन्द्रत्वेन सर्वैरभिषिक्तः अतो यावदधिकारत्वादाधिकारिकमिति न्यायेन यावद्गोकुलं जीविष्यति तावदस्य रक्षा भवत आवश्यकी अन्यथा प्रमाणबलं त्वयैव नाशितं स्यात् पूर्वमपि मत्स्यादिभावेन वेदा उद्धृताः तथा गोविन्दभावेन वयमप्युद्धर्तव्याः नतु स्वेन तथा सति जघन्यतापत्तिरिति भावः ॥ ५२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

ननु तर्हि सरिदादिषु कुत्राप्यगत्वा वस्त्रेण नेत्रमावृत्य धिया मनोऽन्यत्र नीत्वा स विस्मर्यतां तत्रास्माकं धीर्नास्त्येव तेनैव हृतत्वादित्याहुः । गत्येति । माध्व्या मधुरया । हे उद्धव ! ॥ ५१ ॥

ततश्चोद्धवमप्यनादृत्य परमार्त्या मधुरामिमुखीभवन्त्यः कृष्णाभिमुखेनैव संबोधयन्त्यः सदैन्यरोदनमाहुः । हे कृष्ण ! अयोग्यानामप्यस्माकं चित्ताकर्षक हे रमानाथ ! रमयापि नाथ्यमानाद्भुतमाधुर्यरसविलासादिमहासम्पत्ते ! हे व्रजनाथ ! व्रजस्त्वां नाथति हे आर्तिनाशन ! पूर्वं गोवर्द्धनं धृत्वा इन्द्रकृतामार्तिमनाशयत् भवानित्यर्थः । सम्प्रति तु त्वद्विरहादेव सर्वतोऽप्यधिके वृजिनस्यार्णव एव अद्य श्वो वा नश्यदेव गोकुलं स्वयमेवागत्योद्धर हे गोविन्द ! स्वपालितचरीः स्वीयगवीर्विन्दस्व ! अलं दूतप्रस्थापनयेति भावः ॥ ५२ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

किं च बुद्ध्या विस्मरणसाधनं मनोनिरोधः संपाद्यते इत्यविवादमस्माकं सा भगवता पूर्वमेव हृतातोऽस्माभिस्तद्विस्मरणे क उपाय आश्रयणीय इत्याशयेनाहुः । गत्येति । महस्या सेनया हृतास्माकं बुद्धिः पुनः समानेतुमशक्येति आपन्नार्थं गत्येत्यादि गतौ ललितत्वं हासे उदारत्वम् अवलोकने तु लीलापूर्वकत्वं गिरि मधुरत्वमित्युक्त्या यथोक्तविशेषण विशिष्ट गत्यादीनां कुत्राप्य-

श्रीशुक उवाच ।

ततस्ताः कृष्णसन्देशैर्व्यपेतविरहज्वराः ।
उद्धवं पूजयाञ्चक्रुर्ज्ञात्वात्मानमधोक्षजम् ॥ ५३ ॥
उवास कतिचिन्मासान् गोपीनां विनुदन् शुचः ॥
कृष्णलीलाकथां गायन् रमयामास गोकुलम् ।५४।

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

नुपलम्भात्तद्गत्यादीनां प्राबल्यं बोधितं तथा च भगवान् दूतबुद्धित्वादस्मान् विस्मरतु नाम वयं तु हृताधियः तदीयं गत्यादिकं कथं विस्मरामहे तन्न सम्भवतीत्यर्थः । त्वं तदुपायं जानासि चेत्तर्हि वदेति प्रश्नो वा यदा अनुस्मरन्त्यो मां नित्यमचिरान्मामुपैष्यथेति भगवत्सन्देशोत्तरत्वेन विस्मरणाशक्तिप्रतिपादनपरो ग्रन्थो योजनीयस्तथा चैवंविधस्मरणवतीनामस्माकं प्रवृत्तप्रवर्तनरूपोऽयमुपदेशः तादृशस्मरणे सत्यप्यद्यापि तस्यालाभाद्व्यर्थश्चेति भावः ॥ ५१ ॥

एवं वर्णयन्त्यः स्वदुःखनिवृत्तावुपायमपश्यन्त्यः साक्रोशं तमेव प्रार्थयन्ति हे नाथेति गोकुलवासिगोपिकाजनं त्वद्विरहजनितदुःखसागरे निमग्नं सोद्धाराशक्तं त्वमेव दुःखसमुद्रादुद्धर अत्र त्यतृणपर्णादयोऽपि त्वद्विरहजनितदुःखार्णवे निमग्ना इति ज्ञापयितुं गोकुलमित्युक्तम् । यतस्त्वमेव सर्वस्य नाथः स्वामी यथा गजेन्द्रमन्दराचलादयस्त्वयोद्धृतास्तथा स्वाम्यत्वाविशेषाद्गोकुलमप्युद्धरेत्याशयेनाहुर्हे रमानाथेति । तत्र तत्सङ्गागमोत्सवादिनिरपेक्षत्वादेकस्मरणस्वभावा रमा यथा सर्वदा स्वसंप्रदानेनानुगृह्यते तथानुग्रहाकाङ्क्षावत्यो वयमिति भावः । ननु रमानाथत्वेन विशेषतः प्रसिद्धत्वात्तन्मनोरथं पूरयामीति चेत्तत्राहुर्हे व्रजनाथेति तथा च विशेषतो व्रजनाथत्वेनापि प्रसिद्धस्त्वं तद्दुःखं किमिति नापकरोषीति भावः । किञ्च स्वीयानां सर्वेषां दुःखापहारकत्वाद्धरिः सर्वार्तिनाशनस्त्वं स्वस्वरूपरक्षणार्थमस्मदार्तिं नाशयेत्याशयेन सम्बोधयन्ति हे आर्तिनाशनेति किंच गोकुलरक्षणेन गोविन्दाख्यां प्राप्तवतस्तव तद्रक्षणं नाचितमित्याशयेनाहुः हे गोविन्देति । यद्वा महेन्द्रभयाद्रक्षितं गोकुलं स्वभये किमर्थं निमज्जयसीति सम्बोधनाशयः यद्वा पूर्वं मत्स्यरूपेण गोकुलं स्वभये किमर्थं श्रुतिसमुदायं यथोद्धृतवांस्तेन च गोविन्दनाम लब्धवान् तद्वद्वर्तमानगोकुलोद्धारोऽप्युचित इति अतः सर्वथाप्यस्य दुःखनिवर्तकत्वमेव तवोचितमित्यर्थः ॥ ५२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

तत परं अस्य मित्रस्य श्रीकृष्णं हे उद्धव! कथं विस्मराम ॥ ५१ ॥ ५२ ॥

भाषा टीका ।

हम श्रीकृष्णजी की मनोहर गति सुंदर हँसी कौतुक सहित विलोकन मधुरी बोली इनो से हमारी बुद्धि हरण होगई है सो हम उनको अब भूल सकती हैं ॥ ५१ ॥

हे नाथ ! हे रमानाथ हे व्रजनाथ हे आर्तिनाशन हे गोविंद ! दुःख सागर में डूबे हुये इस व्रज का जल्दी उद्धार करो ॥ ५२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

श्रीकृष्णमधोक्षजं ज्ञात्वा तञ्च स्वात्मानं ज्ञात्वा ॥ ५३ ॥

विनुदन्नपनयन् ॥ ५४–५५ ॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

ततः तस्माद्विलापादेः पश्चादिति क्षणं निश्चेष्टतया निपत्य वृत्तानां तासामथ कथञ्चिद्धैर्यतः किञ्चित्स्वस्थतायां सत्यामित्यर्थः कृष्णस्य परमाकर्षकस्य सन्देशैरिति तत्सन्देशानामपि चित्ताद्याकर्षकत्वमभिप्रेतम् अत एव अधोक्षजमिन्द्रियज्ञानागोचरमपि भगवन्तं किं वा सकटाक्षाधो महासंकटात् पुनर्जातमिव श्रीव्रजेन्द्रनन्दनम् आत्मानम् उक्तप्रकारेण सदा सर्वथा स्वव्यापकं ज्ञात्वा विश्रामरूपेणापेतो विरहस्य ज्वरः बाह्याभ्यन्तरतापोद्रेको यासां तथाभूताः सत्यः उद्धवं तादृशसन्देशप्रापणादिना साक्षादुत्सवरूपं भागवतप्रवरं पूजयां चक्रुः श्लाघादिना सम्मानितवत्यः तस्य प्रीत्यर्थं किं वा तच्छ्रवणेन श्रीकृष्णस्य सुखार्थं शोकशान्त्यर्थं यद्वा व्यपेतविरहज्वरा एव सत्य अधोक्षजमात्मानं ज्ञात्वेति योज्यं तादृशज्ञानासम्भवात् एतच्च श्रीपरीक्षिच्चित्तसमाधानार्थमुक्तम् अथवा आत्मानं प्रियम् अधोक्षजं व्रजराजकुमारं कृष्णस्य तस्यैव सन्देशैर्भवतीनां वियोगो मे इत्यादिलक्षणैर्ज्ञात्वा अधुनाऽत्रैव पश्यमेति विज्ञायेत्यर्थः । अत एव व्यपेतविरहज्वरा उद्धवं सम्मानितवत्यः ॥ ५३ ॥

गोपीनां शुचः शोकान् विनुदन् हेतौ शतृप्रत्ययः विनोदयितुं कतिचित् दशैकादश वा मासान् उवास व्रजेऽवसत् एवं तस्य तत्र वासस्य मुख्यप्रयोजनमुक्त्वाऽन्यदप्याह । कृष्णेति । गोकुलं तत्रत्यान् मनुष्यपशुपक्षिवृक्षादीन् सर्वानेव रमयामास सुखयामास उपनन्दादिवृद्धेषु तत्पत्न्यादिषु वृद्धासु च कृष्णस्य वन्दनादिना तथा श्रीदामादिवयस्येषु परिरम्भादिना विज्ञापनादिना तथा पशुपक्षिवृक्षादिषु प्रत्येकं कुशलप्रश्नादिना यथायथं रमणं ज्ञेयं गोकुलस्थेषु वन्दनादिविज्ञापनादिकमेव हरिलीलाकथागानमित्यर्थः । यद्वा किमर्थं रमणं कृष्णलीलाकथा गायन् गातुं गोकु-

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

लरमणं विना तत्रत्यश्रीकृष्णलीलाश्रवणाभावेन तत्कथागानासिद्धेः इत्थं प्रागुक्तं वृष्णिकुलसम्मतत्वं मन्त्रित्वं च तस्य दर्शितम् यद्वा गोपीनां शुचो विशेषेण नुदन् तत्र तत्र कृष्णसंदर्शनेन नोदनस्य वैशिष्ट्यम् अत एव सर्वत्र कृष्णप्राकट्यदर्शनेन उत्फुल्लः कृष्णलीलानां कथाः प्रबन्धान् ॥ ५४ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

अतः पुनरपि तासां वैयग्र्यं दृष्ट्वा कथितैर्भवतीनां वियोगो म इत्यादिकैर्मय्यावेश्य मनः कृष्ण इत्याद्यन्तैर्महामन्त्रैरिव कृष्णसन्देशैर्व्यपेतो विरहोत्थज्वरो महासन्तापो न तु तत्प्राप्त्यैकनाश्यो विरहो यासां तादृश्यः सत्यः सम्प्रत्येवोद्धवं यथा स्वावस्थमातिथ्योचितं पूजयाञ्चक्रुरिति पूर्वमारब्धापि पूजा दुःखेन वितथा जातेत्यधुना तु विशेषेणैवेत्यर्थः । ननु सन्देशमात्रेण कथं व्यपेतविरहज्वरत्वं तत्राह । ज्ञात्वेति । तत्र प्रथमार्थे यस्यात्मनो ज्ञानं सन्दिष्टं तमात्मानमधोक्षजं श्रीकृष्णमेव मत्वा नत्वन्यम् । तत्रायमभिप्रायः । अनुवादमनुक्त्वा तु न विधेयमुदीरयेदिति न्यायादत्र तदुपदेशात् ज्ञातत्वेन तस्यात्मत्वमनूद्य पुनरधोक्षजापरपर्यायश्रीकृष्णत्वमेवाभिधीयते । तत्रात्मशब्देन सर्वात्मोच्यते । अधोक्षजशब्देन रूढिवृत्त्या प्रसङ्गसङ्गत्या च श्रीकृष्ण एव प्रतिपाद्यते । तत्रैव योगवृत्त्या सर्वेन्द्रियाधिकारित्वञ्च तत्र च सति मया सर्वात्मनेति यत् पूर्वमुपदिष्टं तत् खलु लक्षणया निर्विशेषस्वरूपत्वेनैवेत्यविद्यावादिनः । परमविशेषवत् परमस्वरूपत्वेनैवेत्यचिन्त्यशक्तिवादिनः । तादृशविशेषवत्त्वेऽपि मे मयेत्युक्तेः कृष्णतया विलक्षणेनेति प्रकरणार्थदर्शिनः । तथैव हि कृष्णमेनमवेहि त्वमात्मानमखिलात्मनामित्यादौ स्वाभाविकपरमप्रेमास्पदत्वोचितं सर्वात्मत्वं स्थापयित्वा देहीवाभाति माययेत्यत्र देहिशब्दोक्तजीवत्वं निषिद्धमिति तत्र व्याख्यातमेव । तत्र यद्यपि गोवर्द्धनमखप्रवर्त्तनाय कर्मवादादिवदभीष्टमप्यत्र प्रथमार्थे परमरहस्योत्तरार्थद्वयाच्छादनाय स्वस्मादुपरततया विरहसन्तापमयकालक्षपणाय च श्रीभगवता निर्विशेषत्वमेव प्रतिपादितं प्रथमतस्ताभिरप्यपेक्षितम् । तथापि पुनस्ताभिस्तच्छ्रवणाद्विलक्षणस्वरति स्वाभाव्येन श्रीकृष्णस्यैव सदा सर्वत्र स्फुरणान्निजसर्वेन्द्रिय प्रवर्त्तकत्वेनाभिगमाच्च । तत्र श्रीकृष्णत्वमेव पर्यवसाय्यते स्म । तदेवास्माभिरप्यनूद्य विधेययोरात्माधोक्षजशब्दयोः क्रमबलाद्दृश्यते । अन्यथा अद्वैतावेशे सति पूज्य पूजकत्वाननुसन्धानात्तथाभिरुद्धवस्य पूजनं न प्रसज्जते चेति । द्वितीयेऽर्थे । यथा सावस्मान् सदानुभवति तथा वयमपि तमित्यविनाभावस्फूर्त्तेरात्मानमधोक्षजतादात्म्यापन्नं मत्वेति व्याख्येयम् । तृतीयेऽर्थे । यथा तेन संदिष्टं तथैवात्मानमधोक्षजं मत्वेत्यर्थः । मय्यावेश्य मनः कृष्णे इति । चतुर्थपक्षे तु । यथा कृष्णेनादिष्टं तथात्मानमचिरात् कृष्णं प्राप्स्यन्तं तथैवाधोक्षजश्च कृष्णमाचिरात् स्वं प्रापयिष्यन्तं ज्ञात्वा निश्चित्येत्यर्थः । च शब्दं विनापि तदर्थः स्वयं गम्यते । ब्रह्मेति परमात्मेति भगवानितिवत् । किन्तु ततस्ताः कृष्णसन्देशैर्ज्ञात्वात्मानमधोक्षजम् । व्यपेतविरहज्वराः पूजयाञ्चक्रुरुद्धवमिति क्रमम् अकृत्वा । यदुद्धवमित्याद्यनन्तरं ज्ञात्वा आत्मानमधोक्षजामिति पठितम् । तत् खलु यथा श्रीनन्दस्य गर्गदर्शने तं दृष्ट्वेत्यादावानर्चाधोक्षजधिया इति तथोद्धवदर्शने वासुदेवधियार्चयदित्यातिथ्यतोचिता तथैव सङ्गच्छते यदत्रापि विशेषणद्वयेन तासां तत्र परमात्मदृष्टिरेव निर्दिष्टेति ॥ ५३ ॥

ततश्च श्रीगोपीप्रमुखानां श्रीकृष्णस्फूर्त्तौ साक्षात्कारत्वप्रतीत्या तन्नित्यलीलायां मानसप्रत्यक्षमयप्रवेशेन मय्यावेश्य मनः कृष्ण इति तदाश्वासने च प्रायो विच्छिन्न एव शोक इत्याह । उवासेति त्रिभिः । विनुदन् वहिर्विरहानुसन्धानेन विस्मृतौ सत्यां पुनः पुनस्तैः सन्देशैरपनयन् । एतदुपलक्षणत्वेन श्रीनन्दयशोदयोरपि तथा तदुपनयनं ज्ञेयं यत्वन्यद्गोकुलं तज्जनवृन्दं तत्स्फूर्त्त्यैव तत्साक्षात्कारप्रतीतिमयं तदपि माथुरीगोकुलसम्बन्धिनीश्च श्रीकृष्णस्य लीलाकथा गायन् रमयामास तत्तल्लीलानां साक्षादिव स्फोरणेन प्रीणितवान् ॥ ५४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तत इति । ता गोप्यः कृष्णसन्देशैर्व्यपेतो विरहज्वरो यासां ता अधोक्षजं श्रीकृष्णमात्मानं सर्वान्तरात्मानं ज्ञात्वा कृष्णसंदेशैरधोक्षजमात्मानं ज्ञात्वा व्यपेतो विरहज्वरो याभिस्ता इति वा उद्धवं पूजयामासुः ॥ ५३ ॥

उवासेति शुचः दुःखानि वितुदन्नपनयन् रमयामास सुखयामास ॥ ५४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ॥

भक्तिमेव निरूपयत्यस्मिन्नध्याये तत्रादौ गोप्यः उद्धवं कृष्णबुद्ध्या पूजयान्ति स्मेत्याह । शुक इति ॥ १ ॥

विनुदन् परिहरन् कृष्णस्य लीलाः यासु तास्तथा ॥ २ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

तत इति । यथा तेन संदिष्टं तथात्मानमधोक्षजं ज्ञात्वेत्यर्थः । विनुदन् वहिर्विरहानुसन्धानेन विस्मृतौ सत्यां पुनः पुनस्तैः सन्देशैरपनयन् एतदुपलक्षणत्वेन श्रीनन्दयशोदयोरपि तदपनयनं ज्ञेयम् । तत्त्वन्यत् गोकुलं तज्जनवृन्दं तत्स्फूर्त्त्यैव तत्साक्षात्कारप्रतीतिमयं तदपि माथुरीगोकुलसंबन्धिनीश्च श्रीकृष्णलीलाकथा गायन् रमयामास ॥ ५३—५५ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

एवं तासां विलापं श्रुत्वा पुनस्तमेवार्थमुपादिष्टवानित्याह । तत इति । तदनन्तरमपि कृष्णसन्देशैः विशेषेण अपेतः विरहज्वरः यासाम् एतत्सर्वं भगवदुक्तार्थाज्ञानाद्भवति वियोगे हि सति दुःखं चिन्ता उद्धरणादिकं न हि विस्मृतकण्ठचामीकरस्य चामीकरस्मारणादतिरिक्तं दुःखविस्मारकं साधनमास्ति अतः प्रथमोपदेशेन अभिप्रायः सिद्धः अगम्यति दोषबुद्धिर्नि-

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

वृत्ता ततो निर्दुष्टानां भावः पुनर्वर्णितः सोऽपि पदार्थः पुनरुपदेशस्मारणेन निवर्त्तितः तदा भगवति आत्मत्वं ज्ञातमित्याह । ततः कृष्णसन्देशैः कृत्वा विशेषेण अपेतविरहज्वराः ज्वराभावे दृष्टमेव द्वारं जातमित्याह । अधोक्षजमात्मानं ज्ञात्वेति । स्वात्मैवाधोक्षजः अधोक्षजपदेन चैतज्ज्ञापितमिन्द्रियाध्यासात् संघातात्मबुद्ध्याच भगवानात्मत्वेन प्रतीतः तद्गपमेऽप्रतीत इति अथवा अन्तः स्वरूपं प्राप्ताः यथा कोशमध्ये प्रतिमा तथा तासां सङ्घातमध्ये आत्मानं जीवं स्वस्मिन् अन्तर्भाव्य तत्प्रदेशे वा स्वयमाविर्भूय तत्रैव वा आनन्दांशमिव्यक्तादेव तत्स्वरूपत्वेन सम्पाद्य पश्चादपरोक्षतया स्वप्रकाशत्वेन वा आत्मानं ज्ञापितवान् इति अन्यथा अध्यारोपन्यायेन प्रतीतिः स्यात् शब्दमात्रे तु विरहाभावः आत्मा न भेदेन प्रतीतः यतः संयुक्तः तथा हि भगवत्कृतिर्भगवत एवेत्यासां ज्ञानमेव ततो गुरूपदेशः प्राप्त इति साक्षाद्गुरुत्वाभावेऽपि श्रूयतइत्याद्युपदेशात् निगरणार्थस्य विद्यमानत्वात् पूजयांचक्रुः आत्मविदं वा सन्मानितवत्यः अथवा पूर्वं भगवन्तं भिन्नतया ज्ञातवत्यः इदानीमात्मत्वेन अग्रे तु तथैव भविष्यतीति अग्रभावयोग्यता निरूपिता । तथैव् नाभिलषितं स्याच्चदा न भवेत् इत्युत्कटेच्छां ज्ञापयितुमुद्धवपूजा निरूपिता ॥ ५३ ॥

कोमलकटकन्यायेनायं भावः अदृढश्चेत् पूर्वभावेन बाध्येतेति पुनः पुनः स्मारणार्थं किञ्चित्कालं तत्रैव स्थित इत्याह । उवास कतिचिन्मासानिति । स्थितस्य प्रयोजनमाह । गोपीनां विनुदन् शुच इति । पुनः पूर्ववासनया भेदः स्फुरति स्फुरणमात्रे च क्लेशो भवति तद्दूरीकरणार्थं स्थितिः यावत्स भावो न स्फुरति सजातीयप्रत्ययसंचालितमेतदेव वर्तमानं ज्ञानं भेददुःखानुत्पाद समर्थमिति देशादिधर्मैः अन्तःकरणावरणे भेदज्ञानमावश्यकमिति तन्निराकरणार्थं भगवज्ज्ञानं कृतवानित्याह । कृष्णलीलाकथाः गायन्निति लौकिकाः कथामात्र एवासक्ता भवन्ति सर्वे लीलायां कथायां मुक्ता भक्ताश्च कृष्णकथायामिति योगसमुदायाभ्यां प्रतिपाद्यते ॥ ५४ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

ततश्च तासु दुःखेनाशामपि शिथिलयित्वा मर्तुमुद्यतासु अन्यानप्यतिरहस्यान् संदेशानुक्त्वा उद्धवस्ता आनन्दयामासेत्याह । ततस्ता इति । ततस्तदनन्तरं ये कृष्णसंदेशाः पूर्वसंदेशेभ्यो भिन्नास्तैरित्यन्वयः ते च संदेशाः श्रीशुकेनाविवृता अपि फलतो ज्ञेयाः यथा भोः प्राणप्रेयस्यः ! मत्प्रेषितस्योद्धवस्याग्रे युष्माभिश्चक्षूंषि मुद्रयितव्यानि ततश्च पूर्वं यथा गोपबालकाश्चक्षुर्मुद्रणेन मुञ्जाटवीदावानलादुद्धृतास्तथैव विरहानलाक्रान्तीरप्युद्धरिष्यामि पश्यत मे योगबलमिति संदेशश्रवणेन ता यदैव चक्षूंषि मुद्रयामासुस्तत्क्षणमध्य एव शतकोटिवर्षसमयं योगमायया प्रवेश्य तत्र ताभिः सह रासवृन्दावनविहारद्यूतमधुपानजलविहारहिन्दोलनादि विलासानन्यालक्षितान् कृष्णस्तावच्चक्रे यावद्भिः सा विरहपीडा सम्यगेव विस्मृता भवेत् ततश्च तासामङ्गान्यानन्दप्रमुदितान्यालक्ष्य मुहूर्तानन्तरं भोः स्वामिन्यः ! सांप्रतं चक्षूंष्युन्मीलयतेत्युद्धवेनोक्ते सति ताश्चक्षूंष्युन्मील्य अधोक्षजम् अधः कृतेभ्योऽक्षिभ्यो निमीलितेभ्यो नेत्रेभ्यः परस्सहस्रानन्दप्राप्त्या पुनर्जातामिव आत्मानं स्वं ज्ञात्वा पूजयांचक्रुः भोः प्रेमवत्यः ! यदि यूयं प्राणांस्त्यक्तुमीहध्वे तर्हि युष्मद्दशां श्रुत्वा अहमपि प्राणांस्त्यक्ष्यामि नात्र सन्देहः शपथसहस्रं कुर्वन्नहं ब्रवीमि यूयमेव प्राणा भवथ व्रजं गन्तुं प्रतिक्षणं यतमानोऽप्यहं यन्न शक्नोमि तत्रायं काल एव कर्मैव वा व्याख्यातलक्षणः प्रेमैव वा प्रतिबन्धक इत्यहं शङ्के इत्येवं प्रकारकैः संदेशैर्व्यपेतो विरहज्वरः स्वेषु तत्प्रेमाभावनिश्चयलक्षणः संतापो यासां ताः अधोक्षजं कृष्णमात्मानम् आत्मतुल्यं विरहसन्तापजर्जरं ज्ञात्वा किं वात्मानमात्मनः स्वानेव अताः प्राणा यस्य वथाभूतमधोक्षजं कृष्णं ज्ञात्वा उद्धवं पूजयांचक्रुरिति भो उद्धव ! साधूक्तमतः परं कष्टेनापि स्वप्राणान् वयं रक्षिष्याम एवं यदीमं सन्देशं त्वं नाख्यास्यस्तदा वयममरिष्यामैव ततश्च सर्वनाश एवाभविष्यदतोऽस्मदिष्टा सर्वरक्षा त्वया कृतेति तं संमानयामासुः आत्मानं स्वस्वं जीवात्मानम् अधोक्षजं परमात्मानं ज्ञात्वेतिप्रकटोऽर्थोऽसुरमोहनार्थ एव न तु वास्तवः शास्त्रस्य अस्य मोहिनीसाधर्म्यात् न हि केनापि प्रेमरसास्वादिना भक्तेनात्मैक्यज्ञानं कदापि रोचितम् आभ्यः प्रेमिभक्तमुकुटमणिभ्यस्तत् कथं रोचतां "त्वत्कथामृतपाथोधौ विहरन्तो महामुदः।कुर्वन्ति कृतिनः केचिच्चतुर्वर्गं तृणोपम"मित्यार्षशास्त्रतात्पर्याभिज्ञैः स्वामिचरणैरप्युक्तम् नापि बलवता अध्यात्मज्ञानेन संपूर्णः प्रेमा काप्यावरीतुं शक्यो दृष्टः वसुदेवार्जुनयोरपि महैश्वर्यदर्शनोद्दीपितदास्यभक्तवात्सल्यसख्यभावावृवावृतौ न तु ब्रह्मज्ञानेन यत्तु ते तु ब्रह्महृदं नीता मग्नाः कृष्णेन चोद्धृता इति व्रजौकसां ब्रह्मरसनिमग्नत्वं श्रूयते तदपि ब्रह्मज्ञानस्य तदरोचकत्वज्ञापनार्थमेव ते एव तत्रोद्धृता इति पदं प्रयुक्तम् यथा संसारकूपाज्जीवा उद्ध्रियन्ते तथैव ब्रह्मरसात्ते व्रजौकस उद्धृता इति किं चासामुत्पन्ननिर्भेदात्मज्ञानवत्त्वे गोप्यो हसन्त्यः पप्रच्छुः रामसंदर्शनादृताःकच्चिदास्ते सुखं कृष्णः पुरस्त्रीजनवल्लभ इति कथं नु गृह्णन्त्यनवस्थितात्मनो वचः कृतघ्नस्य बुधाः कुलस्त्रियः इत्याद्याग्रिमवचनानि साभिमानान्यज्ञानद्योतकानि न सम्भवेयुरिति विवेचनीयम् ॥ ५३ ॥ ५४ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

एवं प्रियविरहानलज्वालाव्याप्तमानसानां तासां तद्दुःखैः कीदृश्यवस्था सम्वृत्तेत्यपेक्षायां श्रीशुक उवाच ततः स्वदुःखानिवेदनानन्तरमुद्धवेन त एव प्रियसन्देशाः पुनः श्राविताः तैः प्रियस्य सन्देशैः भवतीनां वियोगो मे नहि सर्वात्मना क्वचिदित्यादिकैः प्रियेण परमाप्तेन प्रेषितत्वाद्यथार्थत्वप्रतीतिजनकैस्ताः प्रियमधोक्षजं सर्वेन्द्रियजन्यज्ञानाविषयं नित्यं ज्ञात्वा तं च स्वात्मानं ज्ञात्वा व्यपेतो विशेषेण निवृत्तो विरहज्वरो यासां ताः उद्धवं भगवदुपदेशप्रापकत्वाद्गुरुप्रतिनिधिं मत्वा पूजयांचक्रुः सम्मानं कृतवत्यः तथाच तत्त्वज्ञानमवाप्य जीवन्मुक्तदशां प्राप्ताः सफलजन्मवत्यः सम्पन्ना इति भावः ॥ ५३ ॥

ताभिः समर्चित उद्धवस्ततः किं कृतवानित्यपेक्षायामाह । उवासेति । गोपीनां पूर्ववासनया गोपालस्वरूपं प्रियविरहानुसन्धानवतीनां पुनः पुनरुत्थितान् शोकान् विनुदन् भगवत्स्वरूपो-

उवास कतिचिन्मासान् गोपीनां विनुदन् शुचः ।
कृष्णलीलाकथां गायन् रमयामास गोकुलम् ॥ ५४ ॥

यावन्त्यहानि नन्दस्य व्रजेऽवात्सीत्स उद्धवः ॥
व्रजौकसां क्षणप्रायाण्यासन् कृष्णस्य वार्तया ॥ ५५ ॥
सरिद्वनगिरिद्रोणीर्वीक्षन् कुसुमितान् द्रुमान् ॥
कृष्णं संस्मारयन् रेमे हरिदासो व्रजौकसाम् ॥ ५६ ॥

श्रीवनमालिसूरिकृतभागवतगूढार्थदीपिका ।

पदेशावृत्त्या सम्यगपनयन् कतिचिन्मासानुवास अभ्यासवशात्कृष्णलीला कथास्वेव तत्रत्यानां रमणमालोक्य ता एव गायन् गोकुलं रमयामास कृष्णस्य परब्रह्मणो या गोवर्द्धनोद्धारणादिरूपा लीलास्तासां कथानां गानं मुमुक्षूणां मुक्तानां च रमणस्थानमतः शोकापनोदकात्मज्ञानोपदेशावसरे तद्गानमपि परमानुकूलमेवेत्याशयेनोद्धवस्य तथा प्रवृत्तिरित्यर्थः ॥ ५४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

ततः श्रीमदुद्धवं भवतीनां वियोगो मे नहीत्यादिकृष्णसन्देशैः अधोक्षजं सर्वेशं सर्वात्मानं सर्वगतं ज्ञात्वा आत्मानं च क्षेत्रज्ञमल्पशक्त्यादिना भिन्नमपि तदंशत्वात्तदभिन्नं ज्ञात्वा व्यपेतविरहज्वराः सत्यः उद्धवं पूजयाञ्चक्रुः अत्र "आत्मेति तूपगच्छन्ति ग्राहयन्ति च" इति सूत्रमप्यनुसन्धेयम् ॥ ५३ ॥

शुचः शोकान् दुःखानीत्यर्थः । विनुदन् अपनुदन् ॥ ५४॥५५ ॥

भाषा टीका ।

श्रीशुकदेवजी बोले तिसके अनन्तर वे गोपी श्रीकृष्ण के संदेशों से कुछ दुःख से निवृत्त होकर उद्धवजी के आत्मा को भगवान् की बुद्धि से मान कर पूजन करती भई ॥ ५३ ॥

फिर उद्धवजी श्रीकृष्ण लीलाओं की कथाओं का गान करते हुये गोपियों के शोकों को दूर करते हुये कितने एक महीना तक गोकुल में निवास करते भये ॥ ५४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

सरिद्वनगिरिदर्यादिषु प्रत्येकं श्रीकृष्णं लीलाप्रश्नादिभिः संस्मारयन् रेमे ॥ ५६ ॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

स प्रागुक्तमाहात्म्यः तथा तथा गोकुलरमणो वा तावन्ति बहुतराण्यहानि व्रजवासिनां सर्वेषामेकक्षणतुल्यान्यासन् कुतः कृष्णस्य वार्तया उद्धवेन पुनरेव वा कथ्यमानया लीलाकथया कृष्णवार्तास्वभावेन परमानन्दजननात् यद्वा कृष्णस्य वार्तया तत्र तत्र वर्तनेन ॥ ५५ ॥

स तु तेषां सङ्गेन श्रीवृन्दावने परिभ्रमन् परमसुखीबभूवेत्याह । सरिदिति । हरेर्विचित्रप्रसादादिना निजमनोहरस्य श्रीभगवतो दासः साक्षाद्विविधवेषलिङ्गः कृष्णं प्रति तत्तद्वार्तया व्रजौकसः सम्यक् स्मारयितुं सरिदादीन् वीक्षमाणो रेमे इति तेषां सङ्गत्या तत्र तत्र परिभ्रमणेन वीक्षणे गुणविशेष उक्तः एवं यदा कदापि भगवत्प्रियजनसङ्गेन तल्लीलास्थलदर्शनस्य परमानन्दकारित्वान्माहात्म्यविशेषोऽपि दर्शितः यद्वा अमूः सरिदाद्यास्तु तत्र तत्र सदा पुष्पितद्रुमांश्च प्रति कृष्णं वीक्षमाणो रेमे व्रजौकसां गोपीनां कर्मणि षष्ठी ताः प्रति भवतीनां वियोगो मे इत्यादि तत्सन्देशस्य यथार्थतां संस्मारयन् ॥ ५६ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

तदेव विवृणोति । यावन्तीति द्वाभ्याम् ॥ ५५ ॥

सम्यक् स्मारयन् साक्षात्कृतनिर्विशेषं कुर्वन्नित्यर्थः । तादृशानामपि तेषां स्मरणे यत् सम्यक्त्वं तत्तथैव पर्यवस्यतीति अत एव स्वयमपि रेमे । गवादिवत् स्फूर्तिविशेषात् द्रुमाणामपि कुसुमितत्वमुक्तम् ॥ ५६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

यावन्तीति । उद्धवो नन्दस्वामिके व्रजे यावन्त्यहानि दिनानि अवात्सीत्तावन्त्यहानि कृष्णस्य वार्तया क्षणतुल्यानि बभूवुः ॥ ५५ ॥

सरिदादीन् पश्यन् तेषु प्रत्येकं कृष्णलीलाप्रश्नादिभिस्तं व्रजौकसां स्मारयन् रेमे सुखयामास ॥ ५६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अवात्सीत् उवास क्षणप्रायाणि क्षणकल्पानि ॥ ३ ॥

पार्श्वद्वयोन्नतनिम्ना निम्नकुसुमितवृक्षततिविष्टा स्थली द्रोणी सानुविशेषः व्रजौकसां कृष्णक्रीडास्मरणं यथा भवति तथेति क्रियाविशेषणं सुखं कृत्वा रेमे हरिदास उद्धवः ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

सरिदिति । तत्र तत्रत्यलीलाविष्टतया सम्यक् स्मारयन्नित्यर्थः । जगाविति प्रत्यहं गमनागमनसमये किञ्चिद्व्रजबहिर्देशे स्थित्वेति ज्ञेयम् ॥ ५६–५७ ॥

दृष्ट्वैवमादि गोपीनां कृष्णावेशात्ममिक्लवम् ॥
उद्धवः परमप्रीतस्ता नमस्यन्निदं जगौ । ५७ ।
एताः परं तनुभृतो भुवि गोपवध्वो गोविन्द एव निखिलात्मनि रूढभावाः ।
वाञ्छन्ति यद्भवभियो मुनयो वयं च किं ब्रह्मजन्मभिरनन्तकथारसस्य ॥ ५८ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

किञ्च सर्वमेव गोकुलं रमयामास अन्यथा संसर्गतोऽपि दुःखं भवेदिति एतत्कृतं गोकुलं आसमित्याह । यावन्त्यहानीति । नन्दस्य व्रजे अयमवात्सीत् वसोऽयमुत्सवात्मकः तावन्त्यहानि क्षणप्रायाणि जातानि आकाङ्क्षायाः परस्परं प्रतिक्षणं वृद्धत्वात् क्षणमिव बभूव इति प्रायग्रहणं बहिः संवत्सरे हि दिनात् विगणना ते ह्यात्मत्वेनैव भगवन्तं ज्ञात्वा तन्मया एव जाता इति कालातिक्रमः सुगमः उद्धवास्तत्वा तथात्वमाशङ्क्यत इति निवृत्त्यर्थमुक्तमपि हेतुं पुनः स्मारयति कृष्णस्य वार्तयेति ॥ ५५ ॥

ननु परार्थे कथं बहुकालं तिष्ठेत् भगवन्तं परित्यज्येत्याशङ्क्याह । सरिद्वनेति । भगवल्लीलास्थानानि तत्रत्यानि सर्वाणि स्वयं द्रष्टव्यानीत्येव पूर्वमेव मनोरथः अतः प्रसङ्गाद्गतः भगवद्वाक्यमिति पालितं भवति भगवल्लीलापि दृष्टा भवतीति शास्त्रार्थस्य च श्रुतत्वात् भगवल्लीलार्थमेव बहुकालं तत्र स्थितः सरिद्यमुना वृन्दावनं गोवर्धन उभयतः पर्वतानां मध्ये निम्ना भूमिः द्रोणीसमा गोकुलेऽपि कुसुमितान् द्रुमान् चम्पकादीन् अपर्तावपि भगवदनुभावेन सार्वकालिकपुष्पयुक्तान् एतावान् स्वार्थः कृष्णं स्मारयन्निति भगवदाज्ञाकरणम् अत उभयार्थस्य संपन्नत्वात् रेमे हरिदास इत्यनेनान्यो भावो निवारितः तत्सङ्गस्य प्रसङ्गादप्यागमस्य फलमाह । व्रजौकसामिति । सामान्येन सर्वेषां प्रह्वं भगवता उभयोरेव सुखजननमाज्ञप्तं अयं तु सर्वानेव भगवद्भावापन्नान् कृतवानित्यर्थः ॥ ५६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

क्षणप्रायाणीति । उद्धवस्यान्वर्थलाभत्वाद्भगवताप्यानन्ददातृत्वसंशयस्वर्पणाद्वेति गम्यते ॥ ५५ ॥ ५६ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

एषा प्रवृत्तिश्च सफलाऽभूदित्याह । यावन्त्यहानीति । स उद्धवो यावन्ति दिनानि नन्दस्य व्रजे नन्दनन्दनासक्तमानसवासस्थाने अवात्सीत् वासं कृतवान् तावन्ति व्रजवासिनां कृष्णस्य परब्रह्मणो वार्तया तत्त्वोपदेशरूपया गृहीतनन्दनन्दनावतारस्य च वार्तया लीलाकथया हेतुभूतया क्षणप्रायाण्यासन् क्षणादपि न्यूनत्वबोधनाय प्रायः पदं बहिर्मुखैर्हि दिनानि गण्यन्ते न तु कृष्णाभिन्नात्माभिन्नैरपि तल्लीलाकथाश्रवणाद्यासक्तचेतोभिरिति भावः ॥ ५५ ॥

ननु भगवन्तं परित्यज्य किमिति तदर्थं बहून्मासान् तत्र स उवासेत्याशङ्क्य भगवद्दासस्य तस्य लीलास्थानानि सर्वाणि स्वयं गत्वा साक्षाद्द्रष्टव्यानीति चिरकालादारभ्य मनोरथ आसीत्तस्य सर्वाभिप्रायविदा भगवता प्रेषितस्तदाज्ञापालनस्वपरप्रयोजनसिद्ध्यर्थं तत्रैव बहुकालमुवासेत्याशयेनाह । सरिदिति । यमुनावृन्दावनगोवर्धनतद्दरीः भगवदनुभावेनापर्तावपि कुसुमितपुष्पयुक्तान् चम्पकादिवृक्षान् साक्षात्पश्यन् अत्र श्रीकृष्ण इमां लीलां कृतवानत्रेमामिति व्रजवासिभिः प्रदर्शितानि तत्तत्स्थानानि साक्षात्कुर्वन् परं व्रजौकसां च तत्तत्प्रश्नद्वारा कृष्णसन्देशप्रदानेन च कृष्णं परमेष्टं परमात्मानं संस्मारयन् रेमे तथा च भगवदाज्ञापालनतत्रत्येष्टसम्पादनाविरोधेन स्वार्थं सम्पादयामास हरिदास इत्यनेन तत्र मलिनभावेन तस्य वासो निवारितः सामान्येन सर्वदुःखहारिभगवद्दासत्वाच्च सामान्येन सर्वेषां तत्रत्यानां दुःखं निवारयामासेति द्योतनाय व्रजौकसामित्युक्तम् ॥ ५६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

हरिदासः उद्धवः सरिदादीन् पश्यन् तेषु प्रत्येकं कृष्णलीलाप्रश्नादिभिः कृष्णं व्रजौकसां संस्मारयन् रेमे ॥ ५६ ॥

भाषा टीका ।

जितने दिन तक वे उद्धवजी नन्दजी के व्रज में रहे तब तक श्रीकृष्णजी की चर्चा होने से व्रजवासियों के दिन क्षणमात्रसरीके बीत गये ॥ ५५ ॥

वृन्दावनकी यमुना नदी निकुंजादिवन गोवर्धन पर्वत की गुफा खिले हुये फूलों के वृक्ष इन सबों के दर्शन कर कर के उद्धवजी व्रजवासियों को श्रीकृष्ण स्मरण कराते हुये रहे ॥ ५६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

कृष्णावेशेनाऽऽत्मनो मनसो वैक्लव्यं वैक्लव्यं ता गोपीर्नमस्यन्नमस्कारिष्यन् उत्तमस्यात्मनो गोपस्त्रीनमस्कृतिरन्यथाऽन्यथा न भवतीति दर्शयितुं तासां महत्त्वं पञ्चभिर्जगौ उवाच ॥ ५७ ॥

एता इति । एताः परं केवलं तनुभृतः सफलजन्मानः रूढभावाः परमप्रेमवत्यः । यदिति । यं रूढं भावं भवभियो मुमुक्षवो मुनयो मुक्ता अपि वाञ्छन्ति यं च भक्ता अपि अतोऽनन्तस्य कथासु रसो रागो यस्य तस्य ब्रह्मजन्मभिर्विप्रसम्बन्धिभिः श्रौतसावि-

श्रीधरस्वामिकृतभावार्थदीपिका।

अथायाज्ञिकैस्त्रिभिर्जन्मभिः किं कोऽतिशयः यत्र तत्र जातः स एव सर्वोत्तम इत्यर्थः। यद्वा। अनन्तकथासु रसो यस्य तस्य ब्रह्मजन्मभिश्चतुर्मुखजन्मभिरपि किमित्यर्थः॥ ५८॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी।

एवमुक्तप्रकार आदिर्यस्य तत् आदिशब्दान्मुहुरुन्मत्तवद्वचनादिकं मुहुर्मूर्च्छादिकं च ज्ञेयं यद्वा आदिगोपीनां नित्यप्रियाणां व्रजसुन्दरीणां, कृष्णे आवेशेन तथा तथानुभवात् सम्यगभिनिवेशेन आत्मनो विक्लवं दिव्योन्मादं दृष्ट्वा साक्षादनुभूय नमस्यन् अग्रे नमस्कर्तुं प्राक् स्तोत्रतया किं वा परमभक्त्या साक्षादेव प्रणमन् इदं वक्ष्यमाणं जगौ उच्चैः सुस्वरं कीर्तयामास कुतः परमप्रीतः निजेश्वरेऽननुभूतपूर्वप्रेमविशेषदर्शनेनात्यन्तहृष्टः सन्॥ ५७॥

"गोपीमाहात्म्यविद्वर्य्यसर्वभागवतोत्तमम्। तमुद्धवं प्रपद्येऽहं तद्गीतार्थविलुब्धधी" एताःश्रीव्रजेन्द्रव्रजवासिन्यःगोपवध्वो गोप्यःभुवि पृथ्वीमध्ये इति अत्रैव सुष्ठु साधनादिसंपत्त्या जन्मसाफल्यसिद्धेः अखिलात्मनि सर्वान्तर्यामिणि परमेश्वरे तत्रापि गोविन्दे रूढभावाः जातप्रेमविशेषा बभूवुः तत्रापि एवमनेन सर्वनैरपेक्ष्येण तथा निर्वचनीयातिळालसार्ति विकारभङ्ग्यादिना प्रकारेण तत्र च जगच्चमत्कारकारिभावविशेषेण वाञ्छन्त्येव केवलं न तु लभन्ते यं वयमपि वाञ्छामः एवं मुमुक्षुमुक्तभक्तेभ्योऽधिकमाहात्म्यमुक्तम् अत ईदृशमेव जन्म सर्वोत्तमं न तु जगत्स्रष्टृत्वादिना सर्वश्रेष्ठतया प्रसिद्धं श्रीब्रह्मजन्मापीत्याह। किमिति। बहुत्वं गौरवेण किं वा बाहुल्यापेक्षया श्रीभगवत्कथारसेन श्रीब्रह्मजन्मतोऽप्याधिकफलसिद्धेः अथवा अखिलस्यात्मनि प्रियतमे इत्यर्थः। तथापीदृशो भावोऽस्मिन्न कस्याप्यन्यस्यास्तीति भावः। अन्यत्तैर्व्याख्यातं यद्वा ब्रह्मजन्मभिः ब्रह्माकारमनोवृत्तिभिरपि किं बहुत्वं गौरवेण समग्रतापेक्षया वा यद्वा ईदृशभावाभावेन ब्रह्मजन्मनापि न किमपीत्याह अकारप्रश्लेषेण अनन्तकथायां न रसो यस्य तस्य तद्रसेनैव ब्रह्मजन्मनामपि साफल्यसिद्धेः आसां च कथादिसाधनभावविशेषसंपत्त्या सर्वतः श्रैष्ठ्यं युक्तमेवेति भावः॥ ५८॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी।

एवं यद्यपि सर्वेषामेव व्रजवासिनां श्रीकृष्णे सर्वविलक्षणः प्रेमा तथापि श्रीगोपीषु तस्य परमचमत्कारमयी भक्तिर्जातेति दर्शयति। दृष्ट्वेत्यादिना। एवमुक्तप्रकार आदिर्यस्य तच्चरितमिति शेषः। कृष्णावेशेनात्मनो विक्लवो दिव्योन्मादादिर्यत्र तदननुभूतं दृष्ट्वा परमप्रीतः तद्दर्शनात् स्वभाग्यस्फुरणेन चासां गुणानुमोदनेनैव चात्यन्तहृष्टः नमस्यन् नमस्कर्तुं स्तोत्रतया जगौ आवेशेन सुस्वरं तुष्टाव। किंवा कदिति प्रणमन्नेव जगौ प्रत्यहं गमनागमनसमये किञ्चिद्व्यवहितदूरे स्थित्वेति ज्ञेयम्॥ ५७॥

"गोपीमाहात्म्यविद्वर्यं सर्वभागवतोत्तमम्। तमुद्धवं प्रपद्येऽहं तद्गीतार्थविलुब्धधीः"। ननु भवाद्भिः क्षत्रियतनुभिर्ब्राह्मणतनव एव नमस्या इति स्थिते "क्वेमाः स्त्रियो वनचरीर्व्यभिचारदुष्टा" इति कस्यचित् दुर्मतमाशङ्क्य तासामेव सर्वोत्तमतनुत्वं त्रिभिः स्थापयन् प्रथमं तावद्भगवन्महाप्रेमप्रकाशाकारत्वेन स्थापयति तदाह। एता इति द्वाभ्याम्। एताः श्रीनन्दव्रजवासिन्यः श्रीभगवत्प्रेयस्यः परं केवलं सम्प्रति श्रीभगवदवतारसहभावसम्पन्नतद्भक्तिसाधकासिद्धनित्यसिद्धालङ्कृतायां भुवि तनुभृतः परमोत्तमतनुधारिण्य इति स्त्रीत्वादिदृष्ट्या नावमन्तव्याः। कथं तत्राह। अखिलात्मनि सर्वांशिनि स्वरूपत्वादेव सर्वेषां तावन्निरुपाधिताद्दशपरमप्रेयसीयोग्ये तथापि गोविन्दे परमरूपगुणसीमता विख्यातश्रीगोकुलेन्द्रतया प्रकाशमाने रूढभावा उद्भूतमहाभावाः तत्राप्येवमित्यनुभवैकवेद्येनानिर्वचनीयप्रकारेणेत्यर्थः। तस्मात्ताद्दशभावात्तेजोमय्यस्तनवोऽप्यासां सर्वतोऽप्युत्तमा इति भावः। तत्र प्रमाणानि तु समनन्तरमेव दर्शयिष्यन्ते तदर्थं ताद्दशभावमहिमानमाह। यद्भावमात्रमासां तावद्दूरतस्तद्विशेषवार्त्तां मुमुक्षवो मुक्ताश्च वाञ्छन्ति वयमपि नित्यतत्साङ्गिनो भक्ताः महिमदृष्ट्या केवलं वाञ्छामः नतु प्राप्नुमः। दूरतस्त्वन्ये भावस्यास्य सन्निदानं तन्माधुर्यविशेषानुभवस्तदलाभादिति भावः। टीकायाम् अत इत्यस्याप्येतदेव तात्पर्यम्। अन्यच्चैः। यद्वा ईदृशभावाभावेन ब्रह्मजन्मभिरप्यलमित्याह अकारप्रश्लेषेण। अनन्तस्य परममाधुरीभिरपारस्य तस्य कथास्वपि अरसो रुचिमात्रस्याभावो यस्य तस्येति तेषां द्वितीयपक्षेऽपि अरस इत्येव पाठो युज्यते। अन्यथा पूर्वत्र चतुर्मुखजन्मभिर्वेति मात्रमवक्ष्यतेति॥ ५८॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

दृष्ट्वेति। एवं प्रदर्शितमादिर्यस्य तद्गोपीनां कृष्णावेशेनात्मनो मनसो विक्लवं वैक्लव्यमधाष्टर्यं दृष्ट्वा नितरां प्रीत उद्धवस्ता गोपीर्नमस्यन्नमस्करिष्यन्निदं वक्ष्यमाणं जगौ उत्तमस्यात्मनो गोपस्त्रीनमस्कृतिरन्याय्या न भवतीति दर्शयितुं तासां महत्त्वं पञ्चभिर्जगावित्यर्थः॥ ५७॥

एता इति। एता गोपवध्वः परं केवलं तनुभृतः सफलजन्मानः तत्र हेतुं वदन् गोपवधूर्विशिनष्टि। एवमित्थमात्मनि सर्वान्तरात्मनि गोविन्द एव रूढः भावः प्रेमात्मको यासां ताः कुतस्तावतैव तनुभृत्त्वमित्यत आह। यद्यस्मात्कारणाद्भवभियो मुमुक्षवः मुनयः शुभाश्रयमननशीला वयमभक्ताश्चास्मदादयः वाञ्छन्ति रूढभावमिति विभक्तिविपरिणामेन संबन्धः यद्गूढभावत्वमिति वा यत एवमतः अनन्तस्य गोविन्दस्य कथासु रसोऽनुरागो यस्य तस्य ब्रह्मजन्मभिः शौक्लसावित्रयाज्ञिकैः त्रिभिर्जन्मभिः किं कोऽतिशयः अनन्तकथारसत्वमेवातिशयावहं नतु ब्रह्मजन्मेति भावः। यद्वा। अनन्तकथारसस्य ब्रह्मजन्मभिश्चतुर्मुखजन्माभिरपीत्यर्थः॥ ५८॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

गोपीनामेवमादिकृष्णावेशात्माविक्लवं दृष्ट्वा नमस्यन् प्रावणं कुर्वन्॥ ५॥

अखिलात्मनि पूर्णात्मनि गोविन्दे दृढभावाः एवं नित्यमति·

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

वर्धमानभक्त्या एता गोपवध्वस्तनुभृतां मध्ये परमुत्तमं शरीरभरणफलभाज इत्यन्वयः मुन्यादिषु सत्सु किं विशिष्योच्यत इति तत्राह । वाञ्छन्तीति । भवाधियः भद्रबुद्धयोऽपि मुनयः यद्भक्तिलक्षणं मुक्तिसाधनं वाञ्छन्ति वयं च वाञ्छामः नात्वित्थं प्रभवामः तत्र को हेतुरित्यतो वोक्तं भवाधिय इति संसारोद्विग्नबुद्धित्वादित्यर्थः । भवभयादिति पाठे संसारभयं सन्दृश्येति ल्यब्लोपे पञ्चमी मुनीनां ब्रह्मकुलोत्पन्नोत्तमत्वात्किंनिनिन्दिषुरिव ब्रवीषीति तत्राह । किं ब्रह्मेति । यत्र येषु ब्राह्मणजननेषु अनन्तस्य हरेः कथा नास्ति तैः किं न किमपि प्रयोजनं जीवन्मृतत्वादित्यर्थः ॥ ६ ॥

———

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

एता इत्यादिकम् तत्र या वै श्रियार्च्चितामित्यत्र तथापि श्रिया यत्तदप्राप्तिस्तत्खल्वेतासामिव तस्मिन्नमस्यत्वभावादिति ॥ ५८—६४ ॥

———

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

एवं भगवदाज्ञां कृत्वा इतस्तस्य निर्गमनमाह । दृष्ट्वेति । प्रत्यहमुद्धवेन प्रत्यह्वैकल्यमेवमुभयं दृष्ट्वा आत्मतत्त्वेऽपि बहिः संवेदनमात्रेणैव तासां भगवदाकाङ्क्षेवोत्पद्यते परं निर्दुष्टा एवं तासां दृष्ट्वा कृष्णावेशेन आत्मनो देहस्य विकलवं दृष्ट्वा अन्तर्निष्ठा वा विरहो वा द्वयमेव नतु तासामन्या लौकिकी अवस्था एवं दृष्ट्वा अन्तर्निष्ठा वा विरहो वा द्वयमेव दृष्ट्वा परम प्रीतो जात एवमेव स्थातव्यं भक्तेनेति पश्चात्तासूभयं दृष्ट्वा स्वस्मिन्नेकमेवेति आधिक्यात् ता नमस्यन् मनोदोषशङ्काभावाय तासां स्तुतिरूपमिदं वक्ष्यमाणं जगौ ॥५७॥

तस्यैव वाक्यान्याह । एताः परमिति षड्भिः । तासु भगवतः सर्वधर्मेश्वरत्वाय आदौ तासां स्तुतिमाह । तनुभृतश्चेत् एता एव नापि ज्ञानिनो नापि लौकिका नापि भक्ताः तत्र लौकिकास्तु व्यर्थजीवना एव नहि रज्वा बद्धः पाशी भवति स्वाधीनः पाश एव तथा एवं तनुभृतोऽपि येषां स्वाधीना तनुः ज्ञानिनां तु ज्ञानप्राप्तिपर्यन्तमेव साधनत्वेन शरीरोपयोगादग्रे व्यर्थमेव देहः अनपेक्षितभारवत् गृह्णातीति भक्त्या अपि मौग्ध्यात् देहमेवात्मानं मन्यमानाः तत्रैव न पर्यवसितमतयो बहिर्मुखत्वात्तद्रूपा एव नतु भूतः कालान्तरे परं सफलम् अस्मदादयस्तु भक्ता अपि प्राप्तज्ञाना अपि मन्दभावं प्राप्ताः नोत्कर्षेण तनुभृतः अतः परमुत्कर्षेण एता एव तनुभृतः नन्वेतादृश्यः सन्ति तनुभृतः लक्ष्मीप्रभृतयस्तत्राह । भुवीति । ननु भुव्यपि उत्कटभक्ताः प्रह्लादादयः सन्त्येव तत्राह । गोपवध्व इति । एतादृशीमवस्थां प्राप्य न कोऽप्येवंविधो जात इत्याश्चर्यं किञ्च गोविन्दे स्वकीयत्वेन ज्ञाते वस्तुतः अखिलात्मनि एवं रूढभावाः अतो देहस्य स्वाधीनस्य तदेव फलमिति सर्वात्मत्वेन ज्ञात्वापि निर्दोषपूर्वभावनिष्ठा एव ननु ज्ञानावस्थोत्तरेति आत्मलाभान्न परं विद्यत इति एता भगवता ज्ञाननिष्ठाः कृताः इति च वस्तुत एवाग्रे देहस्यानुपयोगात्कथमेषा स्तुतिरिति चेत्तत्राह । वाञ्छन्तीति यं भावं भवात् भीः येषां ते मुनयो मुक्ताः वयं भक्ताः चकारात्सर्व एव धर्ममार्गपरा अपि अवश्यं हि विदेहकैवल्यपर्यन्तं सर्वेषां बहिः सम्वेदनास्त्येव जीवन्मुक्तानां तथा श्रवणात् तत्र लौकिक एव भावः सर्वेषां जायत इति कालावच्छेदेनजन्मवैयर्थ्यमेव अन्येषां तु वैयर्थ्यं सिद्धमेव नारदादीनामपि कदाचित्प्राकृतवद्व्यवस्था अन्यथा लौकिकसमानकार्यं न स्यात् प्रह्लादस्यापि राज्यादिकरणात् तथावसीयते बहिः सम्वेदने तु एषैवावस्था सर्वशास्त्रपर्यवसितातोऽन्या क्वचिदप्यस्तीति अवस्थायां विचार्यमाणायामेता एव तनुभृतः । नन्वेतदपेक्षया ये श्रोत्रिया ब्रह्मविदो ब्राह्मणा वसिष्ठादयस्ते महान्तो भविष्यन्तीत्याशङ्क्याह । किं ब्रह्मजन्मभिरपि ब्रह्मभावनापन्नानां जन्मभिः शुक्लसावित्र्याज्ञिकैः किं न किञ्चित् यद्यपि बहिः सम्वेदने तेषां वेदार्थानुष्ठातृत्वं दीर्घसत्रित्वादिरूपम् अन्तर्निष्ठतायां तु ब्रह्मपरत्वमिति तथापि कर्मापेक्षया भक्तिरधिका कर्म हि प्रपञ्चे स्वास्थ्यं सम्पादयति न तु भक्तिः यो हि दुष्टं मन्यते स दुष्ट इति निर्द्धारः तत्तत्प्रकरणे तत्तत्प्रशंसा तु प्रकरणानुरोधिनी अतः अनन्तकथायामरसस्य ब्रह्मजन्मभिः कर्मोपयोगिभिरपि न किञ्चित् । ननु तथाप्युत्कर्षहेतुर्लोके तद्भवतीति युक्त्या बाधेऽपि प्रसिद्ध्यैव उत्तमफलत्वं पर्यवसानविधया कल्प्यत इति चेत्तत्राह । अनन्तकथायां रसयुक्तस्य पूर्वोक्तैः ब्रह्मजन्मभिः न कोऽपि पुरुषार्थः साधनीयः ततोऽप्युत्कृष्टस्यैव साधनदशायां फलदशायां च फलस्य सिद्धत्वात् कर्मापेक्षयापि भक्त्यैव ज्ञाने अधिकारकरणाच्च ॥ ५८ ॥

———

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

एवमादि चरितमिति शेषः । कृष्णावेशेनात्मनो मनसो विक्लवो दिव्योन्मादादिर्यत्र तत् । नमस्यन्निदं नमस्कारमन्त्रमिव जगादुच्चैरुच्चारयामास । क्षत्रियजातेरपि स्वस्य गोपस्त्रीनमस्कृतिरन्याय्या न भवतीति दर्शयितुमिति श्रीस्वामिचरणाः ॥ ५७ ॥

तासां सर्वोत्कृष्टं माहात्म्यमाह पञ्चभिः । एताः परं केवलं तनुभृतः सफलजन्मानः । रूढभावाः महाभाववत्यः । यदिति यं निरूढभावं भवभियो मुमुक्षवः । मुनयो मुक्ताः वयञ्च श्रीकृष्णसङ्गिनोऽपि भक्ताः वाञ्छन्ति नतु प्राप्नुवन्ति । अतोऽनन्तकथासु रसो रागो यस्य तस्य ब्रह्मजन्मभिर्विप्रसम्बन्धिभिः शौक्लसावित्रयाज्ञिकैस्त्रिभिर्जन्मभिश्चतुर्मुखजन्मभिर्वा किं कोऽतिशयः न कोऽपि । यतोऽनन्तकथासु राग एव सर्वोत्कर्षप्रतिपादको नान्य इति भावः । यद्वा । अनन्तकथासु अरसो यस्य तस्य विप्रजन्मभिर्वा किम् । यतस्तत्कथासु रागाभाव एव तत्तत्सर्ववैफल्यप्रतिपादक इति भावः ॥ ५८ ॥

———

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

क्षणमात्रं कृष्णमात्मत्वेन ज्ञात्वा व्यपेतविरहज्वरत्वेनावस्थानं क्षणमात्रं ते प्रेष्ठं मत्वा तद्विरहतापव्याकुलत्वेनेत्येतद्द्वयमेकत्र दृष्ट्वातिविस्मितस्वान्तउद्धवोऽतिप्रीतो जात इत्याह । दृष्ट्वेति । गोपीनां स्वीकृतगोपवेशप्रियाणां कृष्णस्य चित्ताकर्षकस्य श्यामसुन्दरस्य प्रेष्ठस्यावेशेन हा क गत इति तत्सम्बन्धिविरहजनितदुःखावेशेना-

केमाः स्त्रियो वनचरीर्व्यभिचारदुष्टाः कृष्णे क्व चैष परमात्मनि रूढभावः।
नन्वीश्वरोऽनुभजतोऽविदुषोऽपि साक्षाच्छ्रेयस्तनोत्यगदराज इवोपयुक्तः॥ ५९॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका।

त्मनो मनआदेर्विक्लवं वैक्लव्यं गोपस्य सर्वेन्द्रियपालकतया स्वान्तर्निविष्टस्यांशभूतत्वेन तदात्मना कृष्णस्य सच्चिदानन्दरूपस्य परमात्मन आवेशेन सम्यगभेदसम्परया आत्मनो देहादेर्वैक्लव्यमहम्भावत्यागाच्छैथिल्यमुत्कर्षप्रकारकादिरूपं दृष्ट्वा उद्धवः परमप्रीतः अहो एतासामुत्कर्षातिशयः समाहितचेतसां ब्रह्मस्वरूपेणावस्थाने ऽप्युत्थितमनसां तदीयविरहव्याकुलत्वेन न त्वेतासां देहाद्यनुसन्धानं लोकव्यवहारानुसन्धानं तु दूरापास्तमित्यनुसन्धाय परमप्रसन्नो जातः एवमेव च भगवद्भक्तैरवस्थेयमेतद्द्वयमप्यस्यत एता मत्तोऽप्यधिका इति मनसि निश्चित्य ता नमस्यन् उत्तमस्य तव गोपाङ्गना नमस्कृतिरयुक्तेति लोकाशङ्कानिरासायेदं वक्ष्यमाणं तासां महत्त्वं जगौ॥ ५७॥

तदुदाहरति। एता इति। परं केवलम् एता एव तनुभृतः सफलजन्मानः न तु तनूरूपा इति वा यतः अखिलात्मनि गोविन्दरूपेण प्रेष्ठत्वमापन्ने रूढभावाः रूढः पराकाष्ठांगतो भावः प्रेमा यासां गोविन्दे स्वप्रेष्ठे भगवत्सन्देशैरखिलात्मत्वेमावगते एवं रूढभावा वासुदेव एवाखिलात्मा नातोऽन्यत्किंचिदस्तीति दृढनिश्चयवत्यस्तथा च नैवम्विधा लौकिकाः देहतादात्म्याध्यासवत्त्वादस्वाधीनसङ्घातत्वाच्च ननु सन्ति लक्ष्मीप्रमुखा एवंविधा इति चेत्तत्राह। गोपवध्वः लक्ष्म्याद्यास्तु नारायणवध्वस्तेन कदापि न वियुक्ता अतस्तस्मिन् यद्यपि प्रेमवत्यस्तथापि नैवम्विधरूढभावा इति भावः। यद्वा ता उत्कृष्टा एतास्तु गोपवध्वो निकृष्टजात्युत्पन्नास्तत्रापि भुवि तास्तु वैकुण्ठादौ स्थिताः भूमौ लब्धस्य जन्मन एवंभूतरूढभावसम्पादनेनैव साफल्यं तच्च तद्व्यतिरिक्तस्य सर्वस्यापि दुर्लभमित्यपि भुवि गोपवध्व इति पदाभ्यां ध्वनितम् इदमेव स्पष्टयति। वाञ्छन्तीति। यत् यं रूढभावं भवभियो भवाज्जन्ममरणलक्षणसंसृतिचक्राद्भीर्भयं येषां ते मुमुक्षवो वाञ्छन्ति मुनयस्तत्त्वविदो जीवन्मुक्ता वयं भगवद्भक्ताश्च मुमुक्षूणां तूभयविधोऽपि भावोऽप्राप्तत्वाद्वाञ्छाविषयः तत्त्वविदां तु सर्वात्मनि रूढभाववत्वेऽपि तादृशरूढप्रेमाभावाद्वाञ्छा भक्तानां केषाञ्चिदेतत्सत्वेऽपि सर्वात्मनिष्ठत्वाभावात्तद्वाञ्छा यद्यपि नारदप्रह्लादादीनामुभयविधभावो वर्तते तथापि स्वदेहाधिकारानुरूपलौकिकव्यापारपरतापि दृश्यतेऽतो नैवंविधरूढभाववत्त्वमिति भावः। ननु केचित् ब्रह्मर्षयः अन्तर्मुखतादशायां ब्रह्मनिष्ठाबहिर्मुखतादशायां दीर्घसत्राद्यनुष्ठातृत्वेन परमात्माराधनपरायणाश्च दृश्यन्ते ते चोत्कृष्टजन्मवत्त्वादेताभ्यः श्रेष्ठाः स्युरित्याशङ्क्य तेषामपि तत्तत्कर्मानुष्ठानरूपस्य व्यवधानस्य सत्त्वात्सैर्वामित्याशयेनाह। किमिति। अनन्तस्य कथासु रसो यस्य तस्य ब्रह्मजन्मभिः तत्सम्बन्धिभिः शौक्लसावित्र्याज्ञिकैस्त्रिभिर्जन्मभिः किं न कोऽप्यतिशयः यथोक्तभाववान् यत्र कुत्रापि जातः सर्वस्मात्सान्तकथारसादुत्तमः यद्यनन्तकथारसस्य यस्य कस्याप्येवं तर्हि किं वक्तव्यं भगवत्प्रियाणां तासामित्याशयः ननु यद्यप्येवं तथापि जातितस्ता निकृष्टा इत्याशङ्क्याह। किमिति। जातेरुत्कृष्टताया अपकृष्टताया वा अप्रयोजकत्वादिति भावः। यद्वा एताभिर्लब्धं पदं सर्वे वाञ्छन्ति एतासां तु चतुर्मुखजन्मसहस्रमपि नाभिलाषास्पदमित्याशयेनाह। किमिति। तथा च ब्रह्मादिवन्द्यपादपद्मानामग्रे के वयं वराका इति भावः॥ ५८॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

एवमादिपूर्वोक्तमादिर्यस्य तत् कृष्णावेशेन आत्मनो मनसो विक्लवं वैक्लव्यं दृष्ट्वा ताः गोपीर्नमस्यन् नमस्करिष्यन् इदं वक्ष्यमाणं तासां महत्त्वं श्रेष्ठस्यापि कनिष्ठहरिभक्तनमस्कृतिरन्याय्या नेति अन्यान् ग्राहयितुं पञ्चभिर्जगौ उवाच॥ ५७॥

मुनयोऽन्तर्वृत्तय ऊर्ध्वरेतसः वयञ्च गृहस्थाः भवभियो मुमुक्षवः इत्युभयत्र सम्बध्यते अखिलात्मनि यद्रूढं भावं वाञ्छन्ति गोपवध्वस्तु रूढः प्राप्तविषयः प्रीत्यात्मको भावो यासां ताः अत एव एताः परन्तु केवलं तनुभृतः सफलजन्मानः अतः अनन्तस्य विष्णोः कथासु रसो रागो यस्य तस्य ब्रह्मजन्मभिः बृहद्भिः शौक्लसावित्रयाज्ञिकैस्त्रिभिर्जन्मभिः किं काधिकता विष्णुकथारागी यत्र क्वचन जातोऽपि सर्वोत्तम इत्यर्थः। यद्वा अनन्तस्य कथासु अरसो यस्य तस्य ब्रह्मजन्मभिरन्यैश्चतुराननजन्मभिरपि किं न किमपीत्यर्थः। भगवद्भजनपरः सर्वोत्तम इति फलितोऽर्थः॥ ५८॥

भाषा टीका।

पूर्वोक्त प्रकार से गोपियों की श्रीकृष्णजी में बड़ी भारी आसक्ति होने से उनकी बड़ी विह्वलता देख कर उद्धवजी बड़े ही प्रसन्न होकर उन गोपियों को नमस्कार करते हुये इन गीतों को गाते भये॥ ५७॥

अहो इस पृथिवी में केवल गोपस्त्री हि देहधारणके फल को प्राप्त भई हैं जिनके कि केवल गोविन्द चरण ही में सब भाव लगे हैं जिस भाव को कि संसार से डरने वाले मुनि लोग तथा और हम लोगभी चाहते ही हैं इससे यह निश्चित है कि भगवत्कथा के रसके चाहने वाले को कुछ ब्राह्मण जन्मही कारण नहीं है केवल प्रेमही चाहिये॥ ५८॥

श्रीधरस्वामिकृतभावार्थदीपिका।

किञ्च ईश्वरप्रसादो महत्त्वे कारणं तस्य च न जातिराचारो ज्ञानं वा कारणं किन्तु केवलं भजनमेवेत्याह। केमा इति। साक्षाद्भजतः पुंसः ननु अहो उपयुक्तः सेवितः अगदराजोऽमृतं यथेति॥ ५९॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी।

अहो ममायोग्यस्याप्याभिः सङ्गः केवलं श्रीभगवत्कृपाया विशे-

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

येनैव संसिद्ध इत्याशयेनाह। केति। इमाः प्रोक्तमाहात्म्याः क वनचरीः वनचर्य्यः यद्वा अकारप्रश्लेषेण अस्य विष्णोर्वने वृन्दावने चरन्ति सह तत्प्रेम्णा परिभ्रमन्तीति तथाभूताः अत्र यस्य आसामहो चरणरेणुजुषामहं स्यामित्यादिप्रार्थना तस्योद्धवस्य व्यभिचारदुष्टा इत्यतीवानुचितो वाक्प्रयोगस्तासु परमाराध्यासु कदापि न सम्भवत्येवेति ततश्चायमर्थः क च मादृशाः इत्यर्थात् कथम्भूता मादृशाः व्यभिचारदुष्टाः व्यभिचारः सत्कर्मणि अन्यथात्वं परामुङ्क्ष्वतेति यावत् तेन दुष्टाः यद्वा पूर्वपद्यस्थस्य वयमित्यस्योत्कृष्टया व्यभिचारदुष्टा वयं च केति बहुत्वं स्वसदृशानामन्येषां ग्रहणार्थं परमविस्मितः सन् सरोमाञ्चं साभिनयमाह। कृष्णे मादृशामीश्वरे परमेश्वरे वा एव ईदृशः रूढ भावो महाभावः परां कोटिकामारूढभावविशेषः स्यात् संभवेत् यद्वा स्त्रियः स्त्रीत्वेन सलज्जत्वादन्यसमक्षमागन्तुमप्ययोग्याः मादृशास्तु पुमांसः तत्रापि वनचर्य्यः मादृशास्तु पुरवासिनः तत्रापि इमाः ईदृश्यः परमाश्चर्य्यमहाभावविलक्षणशीलाः मादृशास्तु कृष्णे व्यभिचारदुष्टा व्यभिचारो महापराधः तेन दुष्टा इति वैसादृश्येनासां सङ्गस्य सर्वथातिदुर्लभतोक्ता इमा इति सूचितं माहात्म्यभरमेव व्यञ्जयति यः परमात्मनि रूढभावः परमश्चासावात्मनि रूढभावश्चेत्येकं पदम् आत्मनि चित्ते नितरां रूढो निरूढः अतिप्रसिद्धो वा भावः स एष एव। ननु विस्मये वितर्के निश्चये वा अविदुषः भक्तिमाहात्म्यादिकमजानतोऽपि अनुगतानुगतिकत्वेन किं वा कस्यचिदनुगतत्वेन अनुकाररूपेण वा भजतोऽपि साक्षात्प्रत्यक्षमेवाव्यवधानेन श्रेयः परमहितं विस्तरेण करोति यतः ईश्वरः परमस्वतन्त्रः किं वा मत्प्रभुः परमदयालुः श्रीकृष्णः अज्ञाने सेवाभासेनापि श्रेयोविस्तारणेदृष्टान्तःअगदेति तत्र नुहीति लेख्ये नन्विति लेखकभ्रमात् तथा नन्विति च न व्याख्यात स्पष्टार्थत्वात् लु इति तु अनुभजत इति निरासार्थमिति उपयुक्तः उप सामीप्येन आघ्राणमात्रेण वा स्पर्शमात्रेण वा अज्ञानेनापि गृहीतः श्रीकृष्णस्य तथास्माञ्च माहात्म्यादिकमजानतोऽपि ममाभिः सङ्गतिः केवलं यथाकथञ्चित्तस्य संबन्धप्रभावादेवेत्यर्थः ॥ ५९ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

तदेवं पूर्वपद्येन बहिर्मुखानां निगृह्य तदेवात्र केमा इत्यादि पद्ये प्रथमचरणेन साभ्यसूयमनुयुज्यते । यत्र च "निगृह्यानुयोगे" इति वाक्यस्य टेः प्लुतो विभाषितोऽस्ति यथाह काशिकायां स्वमतात् प्रच्यावनं निग्रहःअनुयोगस्तस्य मतस्य आविष्करणं तत्र निगृह्यानुयोगे यद्वाक्यं वर्त्तते तस्य टेः प्लुतो विभाषा । अनित्यः शब्द इति केनचित् प्रतिज्ञातं तदुपपत्तिभिर्निगृह्य साऽभ्यसूयमनुयुङ्क्ते। अनित्यः शब्द इत्यात्थ इत्यादि इह च तद्वदेव पराक्षेपानुयोगगर्हितं सिद्धान्तमाह। केति। कृष्णे क चेत्याद्यर्थस्य सद्भावे सति केमाः स्त्रिय इत्याद्यर्थस्य सम्भावना नैव घटते इत्यर्थः । अत्र च तदेव पूर्वपद्यवत् द्वितीयेन चरणेन दार्ढ्यार्थं स्वसिद्धान्तमनूद्य परार्द्धेनाज्ञानेनाप्युपयुक्तस्यामृतादेर्दिव्यतनुताकारित्वमीश्वरशक्तेः । कैमुत्यातिशयं साधयतीति व्याख्येयं प्रथमचरणे स्थितस्य

निकृष्टभूमिकया च कस्य केत्यस्य प्रतियोगितया द्वितीयचरणे क चेति निर्दिष्टं यदि कृष्णविषयकरूढभावात्मिका परमोत्कृष्टभूमिका ताभिर्लब्धा तदा तासां निकृष्टभूमिका स्थितिः कुत्र स्थिता एताः परं तनुभृत इति तदीयतनुव्यवसायभावानां श्लाघितत्वात्। यन्नामधेयश्रवणानुकीर्त्तनादित्यादेः विप्राद्द्विषड्गुणयुतादित्यादेः । भक्तिः पुनाति मन्निष्ठा स्वपाकानपि सम्भवादित्यादेश्चात्र कैमुत्यलाभात्। ध्रुवस्यापि पार्थिवदेहस्य सद्यो हिरण्मयत्वश्रवणात् किञ्च स्वतन्त्रश्रीमदुद्धवेन तासु तादृशनिकृष्टवचनं न प्रमोक्तव्यम् । उपक्रमोपसंहाराद्यादिषु तस्य परमादरात् वस्तुतस्तु व्यभिचारस्तासां नास्त्येव गोपीनां तत्पतीनाञ्च इति श्रीशुकसिद्धान्तात्। अत्र च श्रीमदुद्धवेनैव पूर्वमखिलात्मनि तत्र च परमात्मनीति तस्य सूचनात्। न च तासां स्वाभाविकोऽनाचार आशङ्क्यः आर्यपथञ्च हित्वेति वक्ष्यमाणानुसारेण स्वतः सदाचारत्वप्राप्तेः ननु स्त्रीत्वं दूषणं लक्ष्म्यादेरपि स्त्रीत्वात्। न चेमा इति निन्दावचनम् आसामहो इत्यादावासामित्यनेन इदन्तानिर्देशेन स्तुतेरेव व्यञ्जयिष्यमाणत्वात्। न च वनचरीत्वं निन्द्यम् । वनस्यास्य तद्भूरिभाग्यमित्यादिना ब्रह्मणापि प्रार्थ्यमानत्वात् । आसामहो इत्यादिना स्वयमपि । उत्तरार्द्धे तु अगदराजस्तावद्देहमेव दिव्यं करोतीत्येकैनकांशेन दृष्टान्तः। तादृगगदराजादिस्वभावमूलकारणमीश्वरस्वभावस्तु सर्वमपि श्रेयः स्वमविदुषोऽपि जगतः कुर्यादेव तासां तदीयगुणग्रामविद्वद्वराणामिति तस्मात् परकीयाभ्यसूयाख्यसञ्चार्य्येतुवाक्यस्य तदुत्तरस्थया कृष्णे क चेत्यादिवाक्यमय्या सञ्चारिलक्षणया मत्या आराध्यत्वेनोक्तत्वात् गुणत्वमेव यदुक्तं काव्यप्रकाशे । सञ्चार्यादेर्विरुद्धस्य वाक्यस्योक्तिर्गुणावहेति । अत्र च यथा तिष्ठेत् कोपवशात् प्रभावपिहिता दीर्घं न सा कुप्यतीत्यत्र पिहितेत्यनन्तरं नैव घटत इति निर्देशं विनाप्युत्तरा प्रतिपत्तिः पूर्वां बाधते इति न्यायेनान्वयो लभ्यते तद्वदप्यत्र तं विनापीपि न किञ्चिदप्यसमञ्जसम् । अथवा ननु भवतीप्रभृतयो यूयमप्युत्तरोत्तरं महान्त एव कथं तद्वाञ्छथ तत्राह । केमा इति। स्त्रिय इति जात्यैव सुकोमलत्वं दर्शितं तत्र चेद्या इति। सचमत्कारनिर्देशेन विशेषतः । अत्रेमाः स्त्रियः इति सर्वोत्तमत्वं दर्शितम्। तथा वनञ्च प्रस्तुतत्वात् श्रीवृन्दावनम्। तच्च श्रीकृष्णैकान्तविहारास्पदं तच्चारिण्य इति सामान्यतस्तावन्माहिमा सूचितः। ता इमाः कृष्णविषये क तमाश्रित्य कस्य मूर्द्धभूमिकायां वर्त्तन्ते। तथा ईदृशगाढतदासक्त्या भाव एव व्यभिचारः। अत्र परमविस्मितमानसो सरोमाञ्चं साभिनयं हेतुमाह। परमात्मनि सर्वेषामेव निरुपाधिपरमप्रेमयोग्येऽपि तादृशतयानुभावितुं परमदुर्लभे तस्मिन् एष ईदृशतया आसु दृश्यमानो रूढभावः परां कोटिमारूढो महाभावः तत्वस्मासु तल्लेशोऽपीत्यर्थः। न चासामेव तस्मिन्नेतादृशसौहृद्यं ननु तस्यासु इति वाच्यं तस्य परमेश्वरस्य परमसहृदयतया असाधारणेष्वपि दृश्यते किमुत तादृशीष्वित्याह। नन्वीश्वर इतीननु निश्चये अनु सादृश्ये। भजनानुकरणमपि कुर्वतः अविदुषस्तन्माहात्म्यमजानतोऽपि दैन्यान्मादृशस्यापीत्यर्थः। साक्षादव्यवधानेन श्रेयः एतासां दर्शनादिप्रसादमयं परमहितं तनोति किमुतासां तन्माधुरीपरमोत्कर्षानुभावित्वेन तन्माहात्म्यपरमकाष्ठाभिनिविष्टानामिति भावः ॥ ५९ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

ननु वर्णाश्रमधर्मानुग्राह्यो निरूढभावस्तदभावेऽपि कथमाभिर्लब्ध इत्यघटितघटनदर्शनेनेश्वरः स्वयमेव स्वप्राप्तौ केनापि व्याजेन हेतुरिति सम्भावयन्नाह। क्वेमा इति। इमाः स्त्रियः जात्यापि हीना इति भावः। वनचरीरित्यनेन सत्सङ्गादिसाधनाद्यभावोऽभिप्रेतः व्यभिचारशीला इत्यनेन बाधकसद्भावः एवं विधानां सर्वथाधिकाररहितानां परमात्मनि परमात्मनि श्रीकृष्णे रूढभावः क दुर्घटमेतदिति भावः। यद्यप्येवं तथापीश्वरः स्वात्मयाथात्म्यमजानतोऽप्यनुभजतः केनापि भावेनानुवर्त्तमानस्य साक्षात्स्वयमेव श्रेयस्तनोति ननु स्वत्वविदुषामपि श्रेयःकार्यकर्तृत्वे दृष्टान्तमाह। अगदेति। यथाऽगदराजऔषधश्रेष्ठः उपयुक्तः भुक्तः आरोग्यमेव तनोति तद्वत् ॥ ५९॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

इमाः स्त्रियः क कृष्णो एष रूढभावः क अन्वयानुपपत्तेः कथमिति तत्राह। वनचरा इति। तपोऽर्थं वनचरत्वं कि न स्यादित्यत उक्तं व्यभिचारशीलाः अनैकान्तिकस्वभावाः अनियतभर्तृभिः रतितृप्ता इत्यर्थः "शीलं वृत्तस्वभावयो"रिति कृष्णोऽपि कश्चिद्राघः किं न स्यादित्यत उक्तं परमात्मनीति अनन्वये किमर्थं श्रेयः प्रयच्छतीत्यतो भक्तिरेव प्रयोजिकेत्याशयेनाह। नन्विति। अविदुषोऽपि शास्त्रोक्तिमजानतोऽपि अनुभजतः स्वयोग्यतानुरोधेन भक्तिं कुर्वतः पुंसः ईश्वरः साक्षाच्छ्रेयस्तनोति नन्वित्यनेन भक्त्वात्वनन्यया शक्य अहमेवंविधोऽर्जुनेत्यैतिह्यं दर्शयति प्रश्नावधारणेति ह्यसमीहानुमते नान्विति उपयुक्तः सेवितो ऽगदराजः औषधश्रेष्ठो यौगिकर्मानुकूलं फलं ददाति यथा तथात्रापीति ॥ ७ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी।

तर्ह्येवमवस्थाप्रापकाणि ब्रह्मजन्मानि भविष्यन्तीत्याशङ्क्य व्यभिचारात्परम्परयाप्युपभोगाभावमाह। क्वेमा स्त्रिय इति। इमा इति गोप्यः जातिहीनाः तत्रापि स्त्रियो योनितो निकृष्टाः स्थानतोऽपि निकृष्टत्वमाह। वनचरीरिति। ग्रामोत्पन्ना एव वनचरणादिना उत्कृष्टा भवन्ति तदर्थमेवोच्यते वने तु सात्त्विको वास इति अन्यथा वानराणामप्युत्कर्षः स्यात् वनचरीरित्यनेन स्वच्छन्दचारित्वमपि सूचितम् अनेन द्रव्यादिसर्वापकर्षः सूचितः अन्तःकरणापचारमाह। व्यभिचारदुष्टा इति। व्यभिचारबुद्ध्या दुष्टा इति केचित् ननु धर्मशास्त्र एतत्प्रायश्चित्तोक्त्यभावादविवाहितपुरुषभजनं न व्यभिचारः स्त्रीमात्रस्यैतद्दोषत्वेन तत्प्रसूतानामधर्मजातत्वेनाग्निहोत्रादिधर्मानधिकाराच्च चतुर्वर्गोच्छेदप्रसङ्गश्च तद्बोधकमानवैयर्थ्यं च स्यात् भगवत्पुत्राननुद्दिश्याकथनात्, भगवत्पत्न्यतिरिक्तासु सतीपदप्रयोगश्च भागवतादावनुपपन्नः स्यात् इति चेत् अत्रायमाशयः वर्णाश्रमाणां देहनिष्ठत्वेन तानधिकृत्य च धर्मशास्त्रस्य प्रवृत्तत्वेन दैहिकधर्मनिरूपकं तन्न तु भगवद्धर्मनिरूपकं भिन्नाधिकारात् अध्यासेनात्मसात्कृतत्वाद्देहस्य तद्धर्मेषु स्वधर्मप्रयोगः वस्तुतस्त्वात्मधर्माः एव स्वधर्माः स्वशब्दस्य तत्रैव शक्तेः अत एवाविद्वदधिकारित्वं तेषु उच्यते ब्रह्मविदां तत्रानधिकारो भक्तौ मुख्योऽधिकारश्च तदुक्तमवतारहेतुनिर्णयप्रस्तावे तथा परमहंसानां मुनीनाममलात्मनां भक्तियोगवितानार्थमिति। मुक्तोपसृप्यव्यपदेशात् इति तत्त्वसूत्रं च प्रकृते च भक्तिमार्गमधिकृत्य सर्वोऽर्थो निर्णीयते तत्र च भगवदतिरिक्तभजनस्य दोषहेतुत्वमेवेति सिद्धान्तः अत एव आज्ञायैवं गुणान् दोषान्मयादिष्टानपि स्वकान्। धर्मान् संत्यज्य यः सर्वान् मां भजेत्स च सत्तम" इत्यादिवाक्यैस्तत्त्यागपूर्वकं भजनमत्रोच्यते अन्यत्रोक्तन्यायेनास्वधर्मस्यापि स्वधर्मत्वेनोक्त्या कापट्यं मन्वानो व्यासो भक्तिशास्त्रं निरूपयन् धर्मः प्रोज्झितकैतवोऽत्रेति प्रतिज्ञातवान् एवं सति भक्तिमार्गीय विहिता निषिद्धाकथनं धर्मशास्त्रे युक्तमेव भिन्नविषयत्वात् वात्स्यायनीय इव धर्मशास्त्रीये तदकथनं न हि तद्दोषमिति धर्मशास्त्रे न तद्बाधकं न वा धर्मशास्त्रं बाधकमिति तद्विरुद्धोपदेशो वात्स्यायनीये कामरसनिरूपणे हि तत्प्रवृत्तं स च यादृशं न्यरूपयदिति न काप्यनुपपत्तिः प्रकृतेऽपि भगवतोऽतिदुरापत्वे यत्स्वातन्त्र्येण स्थितौ स्त्रीणामुत्कटभोगेन यथेच्छाचाराभासो भविष्यतीति भगवान् धर्ममार्गीयास्ताः कृत्वा विषयरागपूर्तिपूर्वकं तदुक्तनियमस्थाः कृतवान्न ह्येतावता नायं व्यभिचारः सहजभर्त्रतिरिक्तभजनात् अत एवाद्य श्रीमहिष्या गीतं "त्वक्श्मश्रुरोमनखकेशपिनद्धमन्तर्मांसास्थिरक्तकृमिविट्कफपित्तवातम्। जीवच्छवं भजति कान्तमतिर्विमूढा या ते पदाब्जमकरन्दमजिघ्रती स्त्री" इति अतस्तद्दुरापत्वेऽपि तदाशया तद्भजनमन्यभजनरहितं कुर्वद्भिरेव सर्वैः स्थेयमिति भक्तिमार्गनिष्कर्षः एतास्तु भगवदर्थमेव प्रकटिताः अतः सुष्ठूक्तं वस्तुतस्त्वित्यादि यद्वा धर्मो द्विविधोऽन्तरङ्गो बहिरङ्गश्च सोऽपि प्रत्येकं त्रिविधः तथा हि विहितत्वेन क्रियमाणो भगवद्विषयकः श्रवणादिरन्तरङ्गतमो धर्मः योगादिसाधनैरात्मचिन्तनं तादृकरः "अयं हि परमो धर्मो यद्योगेनात्मदर्शनम्" इति स्मृतेः फलानुद्देशेनेश्वरार्पणधिया क्रियमाणो यागादिरन्तरङ्गः वर्णाश्रमधर्मत्वेन स्वर्गादिफलोद्देशेन क्रियमाणो वैदिको धर्मो बहिरङ्गः ततस्तुच्छस्वर्गादिफलको विविधस्त्रीपुरुषाधिकारिकपातिव्रत्यादिविविधदेवताव्रतादिः स्मार्त्तो बहिरन्तरः ऐश्वर्यारोग्यादिफलकविविधदेवताग्रहादिभजनरूपः स्मार्त्तो बहिरङ्गतमः अत्र पूर्वपूर्वप्राबल्यं ज्ञेयं पूर्वपूर्वासम्भव उत्तरोत्तरकर्त्तव्यता च प्रेमानन्तरं स्वस्य सम्मतः क्रियमाणः श्रवणादिर्न धर्मस्तल्लक्षणाभावात् पूर्वोक्ते सर्वत्र प्रवृत्तिनिवृत्त्योस्तदधिकार एव प्रयोजकः भगवान्मर्यादापुष्ट्योर्मध्ये यं जीवं यस्मिन्मार्गे मनुते तस्मिंस्तस्य तदेवाधिकाररूपं तत्तच्छास्त्रं च तत्तन्मार्गीय धर्मनिरूपकं पूर्वोक्ताधिकारवता स्वस्वाधिकारवता स्वस्वाधिकारैकधर्माकरणे च दोषः अत एव पार्थस्य पुष्ट्यङ्गीकारान्मर्यादामार्गे निषिद्धस्यापि गुर्वादिहननस्याकरणे भगवाननिष्टं फलमाह। अथ चेत्त्वमहङ्कारान्न श्रोष्यसि विनङ्क्ष्यसीति प्रकृतेऽपि स्त्रीरत्नानामासां पुष्टिपुष्ट्यामङ्गीकार इति न मर्यादामार्गीयधर्मेऽधिकारः किं त्वविवाहेऽपि भगवत एव भजने अत एव मर्यादाधर्मो भगवतोक्तोऽपि नैताभिरङ्गीकृतः अङ्गीकारे तत्राधिकारस्य हेतुत्वात् न ह्यनधिकारिहृदि धर्मः स्फुरति एतज्ज्ञापनायैव हि भगवताप्युक्तम् एतेन मर्यादामार्गस्य पुष्टिमार्गीयधर्मानङ्गीकार इत्यपि ज्ञेयम् एवं च सति मर्यादामार्गीयो धर्म एतासां परधर्म इति विवाहितपुरुषभजनमपि व्यभिचार एवेत्यभिप्रेत्य तथोक्तं सहजभर्तृत्वेऽपि भगवतो विवाहकरणं तु तादृशभक्तनिरोधार्थं तत्तद्रसानुभवार्थं मर्यादा-

श्रीमद्वल्लभाचार्यकृतसुबोधिनी।

स्थापनेन लोकशिक्षार्थं च अदित्यादीनां लीलार्थं मातृत्वेनाङ्गीकारात्पुत्रभावेनैव भजनं भगवत्प्रापकं कश्यपादिषु च पितृत्वेनाङ्गीकारात्तासां तासां तत्तत्पतिभजनमेव स्वधर्मः भगवता तथैवाङ्गीकृतत्वात् नतु तत्र विवाहप्रयोजकः तद्विवाहस्य भगवल्लीलोपयोगित्वेन भगवद्विवाहतुल्यत्वादित्यलमधिकोक्त्या वस्तुतस्तु भगवता स्वार्थमुत्पादिता मध्ये कालविळम्वे अन्यान् गोपालान् भ्रमात्पतिबुद्ध्या गृहीत्वा व्यभिचारं कृतवत्यः तेन दुष्टा अपि जाता पुत्राद्युत्पत्त्या यथा अहल्याभ्रमात् प्रवृत्ता दुष्यति अतो जाते दोषे अयं भावो निवर्त्तितुं योग्यः यथा भर्त्रा व्यभिचारिणी त्यज्यत इति तथापि भगवद्भाव उत्पन्न एवेत्याश्चर्यमित्याह। कृष्णे क चैष इति। केचित्तु निवेदनानन्तरं पुनर्गोपसम्बन्धाद्व्यभिचारमाहुः-बलादपि नाशिता नाशितैवेति तत् मन्यमानाः स्वपार्श्वस्थानिति भावेनैव तत्पतीनां रमणं न तु ताभिः सह यथा नाशशङ्का स्यात् तां रीतिं न हि ते तासु कर्तुं शक्ताः तासामेवानुभावेन भगवता वा भस्मसाद्भवेयुः किं च यदि क्रमानन्तरं दोषः स्यात् भावश्च न भवेत् तदाह। कृष्ण इति। न हि सदानन्दे फळरूपे भावो दोषाय तथा सति फलार्थं कोऽपि न कुर्यात् उद्धारार्थं वा परमानन्दः प्रकट इति तत्र य एतादृशो भावः सोऽवश्यं सर्वपुरुषार्थसाधक इति ब्राह्मण्यादिरहितानां सर्वपुरुषार्थसाधको भावो जातः। ननु कथमेवमकारणककार्योत्पत्तिः विरुद्धस्य वा कारणतेति चेत्तत्राह। नन्विति। सत्यमेवैतत् विरुद्धमेतदुभयमिति तथाप्येवं वितर्के ईश्वरः अविदुषोऽपि अनुभजतः स्वानुरूपमेव श्रेयः करोति नतु सेवकानुरूपं यद्यप्ययमर्थः लोके वेदे प्रसिद्धः तथापि गोपिकासु दृष्टत्वादेव वितर्कः उपपत्तिरीश्वरत्वादेव ईश्वरो हि कचित्सेवां न मन्यते विपरीतमपि फलं प्रयच्छति प्रमादादप्यपराधे प्राणानेव वियोजयतीति कचिदधिकमेव फलं तत्रादृष्टं नियामकमिति चेत् न ईश्वरत्वभङ्गप्रसङ्गात् लोके परमेश्वरत्वाभावात्तथा कल्पनायां प्रमाद एव लोकेन्यार्थेनाप्येकदेशेन दृष्टान्तमाह। अगदराज इवेति। अमृतं हि प्रमादादप्युपभुक्तं प्रसादं सम्पादयत्येव अप्रमादग्निस्पर्शोऽपि दाहहेतुर्भवति न गदो यस्मादिति गदनिवर्तकं वा अगदमौषधं सर्वेषां शक्तिरत्र प्रतिष्ठिता राजत्वमापादयतीत्यगदराजोऽमृतं भगवतः स्वानुरूपमेतदेव प्रमाणानां तु बलमेकमेव तदपि न परमकाष्ठामापद्यते अन्यथा केषाञ्चिदेव स्यादतः प्रमेयबलादेवैवं भाव इति लक्ष्यते अनुभजत इति भगवदिच्छया भजनमभिप्रेतं "यदेव विद्यया करोति" इति श्रुत्या ज्ञानाभावे भजनं न फलसाधकमिति शङ्कापरिहारार्थमपिशब्दः साक्षाद्भजत इति विशेषः अनेन मन्त्रादिद्वारा भजनं तु भजनानुरूपमेव फलतीति सूचितम् उपयुक्त इति। समीपे निःसंदिग्धः सर्वलोके नत्वन्यत्र मिश्रितः अथवानन्तकथारसस्य किं ब्रह्मजन्मभिरित्युक्ते प्राप्ताशङ्कायामाह। केमा इति। आशङ्का तु न तु स्त्रियः पुरुषमात्रे कामुक्यः स्वभावत एव भवन्ति भगवांश्च पुरुषोत्तमः तथा च कामभावेन भगवति भक्तानामेतासां कथं ब्रह्मजन्मादिवद्भ्योऽप्युत्कर्षो युज्यत इति तन्निरासायात्र सर्वाभ्यः स्त्रीभ्यः सर्वेभ्यः पुरुषेभ्यश्चाधिक्यमुपपाद्यते। तत्रापि स्त्रीभावेन भक्तानां कथमुत्कर्ष इति शङ्कानिरासाय प्रथमं स्त्रीभ्यो वैलक्षण्यमुच्यते इमाः क साधारण्यः स्त्रियश्च क अल्पसाधर्म्यं एवमन्योऽन्यं नास्तीत्यसम्भावनापूर्वकं कथनम्। अन्यासु स्त्रीशब्दप्रयोगादेतासु स्त्रीत्वमपि न निरूपयितुं शक्यमिति ज्ञायते। स्त्रीणां कामद्वारैव पुंसि स्नेहस्य नियतत्वात्। एतासामतथात्वात् यद्यपि कामलीलाप्येतासु निनिरूप्यते तथापि न तदुपाधिकः स्नेहोऽत्र किं तु निरुपाधिरेव भगवान् स्वयं तादृग्रसदानार्थं तं भावं संपाद्य तं रसं ददातीत्यवोचाम वैलक्षण्यमेवाह। अवनचरीरिति। एतास्तु भगवता कालकर्मादिसम्बन्धेभ्योऽपि सर्वदा रक्ष्यते किं पुनः पुरुषान्तरसम्बन्धादित्यवने रक्षण एव चरन्तीति तथा। पुत्रोत्पत्त्यादिकं तु सर्वभवनसमर्थादलौकिकप्रकारात्भगवत एव गोपानां तु मन्यमानाः स्वपार्श्वस्थानिति न्यायेनाभिमानमात्रमेव सर्वत्र व्यवहारमात्ररक्षयैतद्वार्ता गोपनेनैतद्रसपोषायैव भगवता क्रियते। अतः केवलभगवदीयत्वं नान्यासु तदेवाह। व्यभिचारदुष्टा इति। स्त्रीणां विशेषणं जीवमात्रस्यैव भगवानेव भर्त्ता तत्रापि स्त्रीणां तथा वान्येष्वेव सदा तासां सम्बन्धात्ताः सर्वा व्यभिचारदुष्टा एव अतो बह्वेव वैलक्षण्यमिति भावः। अतः परं पुरुषेभ्योऽप्युत्कर्षमाह। कृष्ण इति। सन्ति नारदब्रह्मादयो भगवति भाववन्तस्तथाप्येष भावः क तेषु वर्त्तत इति। चकाराद्व्यभिचारादिदोषरहितायां लक्ष्म्यामपि नायं भावः। एष इति स्वानुभव उक्तः तेनान्यत्रैतत्सजातीयभावश्रवणस्याप्यभावात्कथमन्यत्रैषोऽस्तीति मन्तव्यमिति भावः। अथवा बर्हापीडेति श्लोके गोपिकानामेव भावरूपस्तदर्थमेव कोटिकन्दर्पलावण्यं प्रकटीकृत्य तद्भोग्यत्वेन प्रकटः कृष्णशब्दार्थ इति विवृतं तथा च ब्रह्मादीनां भावो यद्यप्यस्ति तथापि कृष्णे पूर्वोक्तलक्षणे क भाव इत्यर्थः। न हि कदाचिद्भगवांस्तद्भोग्यत्वेन तदर्थं प्रकट इति भावः। विषयतो वैलक्षण्यमुक्त्वा स्वरूपतो वैळक्षण्यमाह। एष भावः केति। अनुभवैकवेद्यो लोकवेदाप्रसिद्ध इत्यर्थः। प्रकारतोऽपि वैलक्षण्यमाह। परमात्मनि केति। आत्मा हि प्रियः सर्वत्र प्रियत्वस्य तदुपाधिकत्वात्। एतासां तु आत्मनः सकाशात्परमोऽधिकः प्रियो यस्तस्मिन् भावः तेन नात्मार्थं भगवान् प्रियः किं तु भगवदर्थं स्वात्मेत्यायाति ब्रह्मादीनां तु भगवान्नियामकत्वेनात्महितकर्तृत्वेनैव प्रियोऽतो बहुवैलक्षण्यमित्यर्थः। उत्पत्तितोऽपि वैलक्षण्यमाह। रूढभावः केति। रूढः सहजो लोकवेदाद्यजनित इत्यर्थः। अन्येषां त्वेतादृशभावाभाववत्त्वाद्वैलक्षण्यं किं च रूढभावपदेन प्रमाणतो वैलक्षण्यम् एष भाव इति प्रमेयतः। परमात्मनीति साधनतः कृष्ण इति फलतश्च। अन्यत्र नैवं रूपत्वमुक्तं तथापि भगवति ईश्वरत्वेन ज्ञानाभावाल्लौकिकत्वज्ञानस्य जघन्यत्वात्कथं ब्रह्मादिभ्योऽत्रोत्कर्ष इत्याशङ्क्याह। भाव इति। अत्रायं भावः फलाधिक्येनैवाधिक्यं नतु साधनप्रकारविशेषैः तच्चैतास्वेव दृष्टं नान्येषु एतदेवाह। अविदुषोऽपि ईश्वरत्वेन स्वरूपमविदुषोऽप्यनुभजतः शास्त्रार्थत्वेन ज्ञात्वा भजतः पुरुषस्य साक्षात्स्वयमीश्वरः किं श्रेयस्तनोतीति काकूक्तिः किं तु न तनोतीर्थः। तेषां भगवज्ज्ञानवचनभक्त्यादिभगवद्धर्मैरेवाखिळपुरुषार्थसिद्धिः न तु स्वयं भगवानागत्य किञ्चित्करोतीति तथा अस्तु वा कदाचिद्भक्त्यतिशयेन गजेन्द्र इव पुरुषार्थदानं तथाप्यगदराज इव किं श्रेयस्तनोत्यन्येषु विवक्षितार्थस्यातिगोप्यत्वात् दृष्टान्तव्याजेनाह। अत्रायमर्थः "एका तदङ्घ्रिकमलं स तमास्तनयोर्दधातीति"

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

स्यायेन विरहानलसन्तप्तहृदयगतस्मररोगशमनाय यथैकैकमङ्गं भगवतः सुहृदयादिदेशेष्वेताः स्थापयन्ति न तथा ब्रह्मादयः यत ईश्वरसान्निध्यं ते बिभ्यत्येव तत्राप्येतासु भगवतो न स्वातन्त्र्यं प्राधान्यं वा किं तु तासामेतदाह । उपयुक्त इति पदेन यथौषधस्य तापरोगनिवर्तकत्वे नैवोपयोगो न मुख्यत्वं पुरुषस्यैव मुख्यत्वं तथेत्यर्थः । यथा रोगनिवृत्त्यनन्तरमपि पोषकं रस्यं च यदि भवत्यौषधं तदा यथेच्छं भोगस्तस्य तथा तत्रापि विरहतापोपशमनानन्तरं यथेच्छं भोग इति ज्ञापनाय राजपदम् अथवा साक्षाच्छ्रेयस्तत्किं तनोत्येष इति योजना इतररसविस्मारकत्वेनास्यैव रसस्य साक्षाच्छ्रेयोरूपत्वादेतदन्येषु तद्दानाभावः अथवा विदुषो जनस्य भगवान् श्रेयस्तनोतीति सत्यं तथापि किमनुभजतो विदुषस्तथाकरणमिति अत्रानुभजनं भगवद्भजनानन्तरं स्वभजनं विरचितचाटुलवचनम् इत्यादिगीतोक्तन्यायेन नह्येत्तं ब्रह्मादिषु सम्भवति अथवा प्रतिपदं काकूक्त्या तथा हि विदुषो जनस्य किमीश्वरः श्रेयस्तनोति अयमर्थः कर्तुमकर्तुमन्यथा कर्तुं समर्थो हीश्वरः तर्हि ब्रह्मादिष्वेवं रूपं प्रकटीकृत्य फलं ददाति एतासु पूर्णकामत्वात्मारामत्वादीन् स्वरूपधर्मानन्यथा कृत्वा ददाति । तेषु वाङ्मयीनामपि नान्यथाः करोतीति तथा अनुभजतः किं तनोतीति पूर्ववत् । अन्यस्य यच्छ्रेयस्तनोति तत्किं विदुषस्तनोति किं त्वविदुष एव तज्ज्ञानानुरूपं श्रेयस्तनोतीत्यर्थः । स्वरूपस्यानन्दरूपत्वात्तस्य चानुभवैकवेद्यत्वेन वाक्चक्षुराद्यवेद्यत्वाद् ब्रह्मादीनां च पुरुषत्वेन भगवद्दानाच्च साक्षात्स्वरूपानुभवाभावादविद्वत्त्वम् एतासां तथा प्रसिद्धं साक्षाच्छ्रेयोऽपि किं तनोतीति पूर्ववत् । साक्षात्त्वयं किं तनोतीत्यप्युक्तं तनोति किमित्यपि एषु श्रेयः सकृद्ददाति न तु विस्तारयति विस्तारणं च तदेकपरचित्तत्वं तदर्थैकप्रयत्नवत्त्वादिकम् । तदुक्तम् तत्र मम हृदयमतियत्नं प्रति विशति वितनोत्यन्यो न कोऽपीत्यादिना । न ह्येवमन्यत्र करोतीति तथा अगदराज इव किमिति पूर्ववत् उपयुक्तः किं श्रेयस्तनोतीति । न हि ब्रह्मादीनामुप समीपे एकस्मिन्नासने शयनादौ वा युक्तो भगवान् भवति यतो भगवद्दर्शनमपि तेषां दुर्लभम् एतासामुपयुक्तस्तथेति बहुव तारतम्यमित्यर्थः यद्वा ननु भक्तिमार्गेऽन्यभजनराहित्येन भजनं मुख्यमित्येतासां स्वपतिसम्बन्धेन कथमेताः परं तनुभृत इत्याशङ्कानिरासायोच्यते इमाः स्त्रियो व्रजस्त्रियो व्यभिचारदुष्टाः क नेत्यर्थः । अवनचरीरिति सर्वदा स्वस्य भगवदुपभोगयोग्यतां ज्ञात्वा रक्षणपरा इत्यर्थः । किं च यदि तादृश्यस्तदा कृष्णे एव रूढभावः क च असम्भावितत्वात् तथाहि रूढपदेन भावस्यावाच्छिन्नत्वमुच्यते तेनान्तर्बहिर्भेदो नाहर्निशं भगवद्रमणस्य जायमानत्वात्तद्भावरहितत्वं न कदाप्येतासामिति क तत्सम्भावनापि अत्र विवाहितपतिभजनमेव व्यभिचारशब्दवाच्यं तदप्येतासां नास्तीत्युच्यते । ननु शुश्रूषन्त्यः पतीन् काश्चित् ता वार्यमाणाः पतिभिरित्यादिकथनात्तत्सम्बन्धाभावो न वक्तुं शक्य इति चेत् न तत्सम्बन्धस्तासामाभिमानिक एव न तु वास्तवः अस्प्राक्ष्म तत्प्रभृति नान्यसमक्षमङ्गः स्थातुं त्वयाभिरमिता इत्यत्र मन्यमानाः स्वपार्श्वस्थानित्यत्रापि तथोक्तत्वात् पुंलिङ्गदारपदेनापि तत्सम्बन्धाभाव एव तासु व्यज्यते न चाभिमानिकस्यापि तस्य सदोषत्वमेवेति वाच्यं स एतावानासेति श्रुतेरेतत्सृष्टेः स्वरूपात्मकत्वेन रसार्थं च प्रभुणैव तथा स्थापितत्वात् न च भगवत्सम्बन्धात्पूर्वं तथात्वं वाच्यम् उक्तोपपत्तेः न च यथा भगवत्सम्बन्धात् पूर्वं तथात्वं न तथोक्तहेतोस्तदनन्तरमपीति वाच्यं तासां तत्स्वरूपातिरिक्ते तदात्मकत्वास्फूर्तेः वस्तुतस्तु फलप्रकरणीयरमणात्पूर्वमपि तासां स्वप्नेषु तत्सम्बन्धः समजनीति लक्ष्यते अन्यथास्प्राक्ष्म त्वयाभिरमिता इति च सम्बन्धस्य भूतार्थतां न वदेयुः किं च अन्यसमक्षं स्थातुं न पारयामः इत्युक्त्वा यत्रान्यत्र समीपस्थितिरप्यशक्या तत्र तदनन्तरभाविन्याः कृतेः किं वाच्यमिति भावो व्यज्यते तेन तासामेतत्संबन्ध कालो न कदापीति नोक्तानुपपत्तिः भगवत्सम्बन्धस्य तु तथात्वं वक्तुमयुक्तं सर्वप्रमाणविरोधात् अन्तर्गृहगतानां तादृशबुद्धियुक्तत्वेन प्रतिबन्धाभावाच्च परमात्मपदेनाप्येतदेव ज्ञाप्यते तद्भजनस्यातथात्वात् ननु पूर्वं ज्ञानादिसाधनवतामेतद्भावाभावेनाकृतार्थतोक्त्या तदतिरिक्तं साधनं किमेताभिः कृतं येनैतादृशं फलमित्याशङ्क्याह । नन्विति । ईश्वरः साधननैरपेक्ष्येण सर्वकरणसमर्थः विदुषोऽपि ज्ञानयुक्तस्यापि पुरुषस्य नैष्कर्म्यमप्यच्युतभाववर्जितमिति वाक्यात्केवलज्ञानस्यापुरुषार्थसाधकत्वं ज्ञात्वा अनु पश्चात् भजतः भजनं कुर्वतः साक्षात् स्वयं भजनातिरिक्तसाधनानपेक्षः श्रेयः फलं तनोतीत्यर्थः । परं ये यथा मां प्रपद्यन्त इति वाक्यात्तदधिकारानुसारेण आपेक्ष्येण परं स्वार्थसाधनत्वेनापि भजनकर्तुः श्रेयः स्वयं साक्षात्तनोति तत्र तदर्थैकभजनपराणामेतासां साक्षात्त्वयं तनोतीति ज्ञाप्यते प्रत्युत न पारयेऽहं निरवद्यसंयुजामित्यत्रैतद्भजनानुरूपस्य श्रेयस एव भावाभावः सर्वकरणसमर्थेन प्रभुणाप्युक्तः अत एव यथैतासां तत्तनोति न तथा पूर्वोक्तस्येति ज्ञापनाय दृष्टान्तमाह । अगदराज इवेति । अत्रायं भावः यथामृतं स्वभजनकर्तुरभीष्टं साक्षात्स्वयमनुपानादिसाधनव्यतिरेकेणापि तनोति न तु तेनामृतस्य तत्तन्यते तथा स्वार्थसाधनत्वेन भजनकर्तुर्ज्ञानिनोऽप्यभीष्टं भगवांस्तनोति ननु तेन भगवतस्तत्तन्यते स्वार्थपरत्वात् अत्र तु यथैतासामभीष्टं प्रभुस्तनोति तथैता अपि तस्य तत्तन्वन्तीति नानुपपत्तिः काचित् अथवा निषेधस्य ताप्तिपूर्वकत्वेनान्यत्र तदभावात्प्रकारान्तरेण व्याख्यायते एताः परं तनुभृत इत्यनेन व्रजसीमन्तिनीनां सर्वोत्कर्षं निरूप्य तत्रैवोत्तरार्द्धे साधनानां तदसाधकत्वोक्त्या तदभावे कथमेवमेतासामित्याश्चर्यमिव मन्यमानो यत्र भगवत्कृपया सर्वसाधनरहितासु हीनजातीयासु पुलिन्दीष्वप्युत्कर्षसिद्धिस्तत्र किं वाच्यमङ्गसङ्गाधिकारवतीष्वेतास्वित्याशयेनाग्रे पुलिन्दीराह । क्वेमा इति । इमाः स्त्रियः पुलिन्द्यः क कृष्णे एष रूढभावः क च यद्यपि ता नमस्यन्निदं जगावित्युक्तेरतद्वीक्षणस्य कालान्तरीयत्वेऽपि भावनया पश्यन्निव वदतीति इति प्रदर्शनं यदि पुष्टिमार्गीयं वा किमपि साधनं भवेत्तदा सम्भवेदपि एतासां तदुभयाभावादसम्भावितमिवोच्यते तत्र पुष्टिमार्गीयं वा किमपि तदुभावायाह । व्यभिचारदुष्टा इति । अत्रापि व्यभिचारपदं विवाहितपतिभजनपरं यतोऽस्मिन्मार्गे साधनं सर्वात्मभावस्तन्मतत्यागस्यापि विहितत्वेनाङ्गीकृतिः संत्यज्य सर्वविषयान् पतिसुतान्वयभ्रातृबान्धवानित्याद्युक्तेः तेनैतासामेवं भावाभावेन व्यभिचारदुष्टत्वमेवेति पुष्टिसाधनाभावः सूचितः मर्यादामार्गीयतदभावायाह । वनचरीरिति । मर्यादायामधिकारिणामेव साधननिष्पत्तिरुच्यते

श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी ।

अतो वनचरीत्वेनातिक्षुद्रजातीयत्वेनाधिकाराभावात्तदभावः जन्मान्तरीयं तदिति नाशङ्कनीयं प्रमाणाभावात् तादृशाधिकारस्याप्यजातत्वात् तर्हि कथमेवमेतासामिति चेत् तत्रोपपत्तिमाह । नन्विति । ईश्वरः साधनानपेक्ष्यः सर्वकरणसमर्थः साक्षात्स्वयं श्रेयस्तनोतीत्यर्थः ननु स्वरूपस्योभयत्र साधनत्वे फलस्याविशेषात् कथमेतदपेक्षयोत्कर्षस्तत्प्रियास्वित्याशङ्कानिरासायाधिकारभेदात्फलभेद इत आधिक्यं चेति विशेषणद्वयेनाह । अनुभजतोऽविदुष इति । व्रजरत्नप्रियाणां स्वागतं वो महाभागा इत्यपि तत्कृतनिषेधेऽपि स्वभावदाढर्यात् भजनकर्तृत्वेन नानुभजनं प्रत्युत मानापनोदनादिषु प्रभोरेव तथात्वमस्ति नन्वेतासामेतादृशत्वं क्वचित्सिद्धं तत्रापि दयितास्तनमण्डितेन कुङ्कुमेनाननकुचेषु लिम्पन्त्यस्तदाधिं जहुरित्यत्र दयितापदेन व्रजदेवीनामुक्तत्वात्तत्सम्बन्धिकुङ्कुमेन प्रभुसम्बन्धाधिकारस्य जातत्वाद्भजनादनुभजनमेतासां सिध्यतीत्यनुभजत इत्युक्तं किं च "रसो वै स" इति श्रुतेर्भगवतो रसात्मकत्वेन तत्स्वरूपाभिज्ञत्वं वीक्ष्यालकावृतमित्युक्तरीत्या तत्प्रेयसीनामेवोच्यते एतासां तदभावादविद्वत्त्वमित्यविदुष इत्युक्तं विदुष इति पदच्छेदे माहात्म्यज्ञानवत्त्वेन तदभावराहित्यमेव अधिकारानुसारेण ज्ञानं ज्ञानानुसारेण फलमिति मल्लानामशनिरित्यत्रोपपादितम् एकवचनं जात्यभिप्रायेण सामान्यत्वज्ञापनाय तादृशभोग्यशरीराभावाय पुंलिङ्गनिर्देशः ईश्वरत्वाद्यज्ञानाधिकारिणामपि श्रेयस्तनोति तत्र किं वाच्यं तास्वित्यपिशब्देन द्योत्यते तत्र दृष्टान्तमाह । अगदराज इवेति । यथामृतं सम्बद्धं सदधिकारिणं विचारयति तथात्रापीत्यर्थः । अपि च अत्रामृतादिपदानि विहाय केवलरोगनिवर्त्तकत्वापादकागदपदोपादानेन पुलिन्दीनां भगवत्सम्बन्धः स्मररोगशान्त्यर्थमित्यवगम्यते जहुस्तदाधिमित्यत्र तन्निवृत्तिमात्रस्यैव मनोरथत्वेन कथनात् व्रजस्थितिसमुद्भूतरत्नानामेतासां तु विरहदशोत्पन्नस्मररोगापगमे जातेऽप्यग्रे विविधरतिकेळिकलापैराखिलरसमयप्रियतमस्वरूपमतिस्वादनमुख्यमिति नैतद्दृष्टान्तत्वं पूर्वोक्तस्येति ज्ञेयं वस्तुतस्तु व्रजपरिवृढप्रेयसीनां प्रियवियोगकाळीनार्तिरूपस्यापि भावस्य ता मन्मनस्का इत्यादि भगवदुक्त्या तदात्मकत्वेनानन्दरूपत्वात् गदत्वमनुपपन्नमिति तथोच्यते उपयुक्तपदेनापि पुलिन्दीनामुपसमीपे स्थितिरेतासां तु साक्षादङ्गसङ्ग इति महद्वैलक्षण्यं सूच्यते तथा चात्र पुलिन्दीकथनमेव सुष्ठु यद्यपि दृष्ट्वैवमादिगोपीनामित्यत्र ता नमस्यन्निदं जगावित्युक्तेस्तत्प्रसङ्ग एवात्र समायाति तथाप्युद्धवः कालान्तरे पुलिन्दीष्वपि भगवद्भावानुभावं दृष्टवानिति लक्ष्यते "सरिद्वनगिरिद्रोणीर्वीक्षन् कुसुमितद्रुमान्" इत्यनेन गिरिस्थितानां तासामपि वीक्षणस्यानूक्तसिद्धत्वात् तथा च पूर्वमेताः परं तनुभृत इत्यनेन घोषसीमन्तिनीः स्तुत्वा तत्राश्चर्यमिव मत्वा पुनः पुलिन्दीः स्मृत्वा यत्र तास्वप्येवं तत्र किं वाच्यं तत्प्रियास्वित्याशयेनेदमुक्तमिव गम्यते तेन तासामेवात्र स्तुतिरिति नोक्तानुपपत्तिः किं च इमा इति प्रदर्श्यैवं कथनं प्रभुवल्लभासु नोद्धवस्य सङ्गच्छते तत्रापि केत्यसम्भावनापूर्वकं किं च तासां निरुपधिभाववत्त्वेन स्त्रीत्वकथनमपि नोपपद्यते स्त्रीणां कामोपाधिकभावस्यैव नियतत्वात् उक्तत्वेन वनचरीपदं तदङ्गसङ्गिनीषु न प्रयोक्तुं शक्यं द्वितीयविशेषणं वा तत्स्वरूपाभिज्ञत्वात् अपरं च कृष्णस्य दयितः सखा । तमाह भगवान् प्रेष्ठं भक्तमेकान्तिनं क्वचित् । तं वीक्ष्य कृष्णानुचरमित्यादिवाक्यैरत्यन्तरङ्गभक्तस्योद्धवस्यासामहो चरणरेणुजुषामिति तच्चरणरजःसम्बन्धिजन्मप्रार्थनमिति विरुद्ध्यते अतः पूर्णाः पुलिन्द्य इत्यत्र तासां भगवत्सम्बन्धस्योक्तत्वादुक्तानुपपत्तेश्च ता एवात्रोच्यन्त इति सर्वमनवद्यम् ॥ ५६ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

तस्माज्जनानां महोत्कर्षे भक्तिरेव कारणं न तु तपोज्ञानादिकं सा च भक्तिः स्वयं सर्वोत्कृष्टापि सर्वळोकप्रतिष्ठितत्वेन सर्वोत्कृष्टेऽपि स्थले न तिष्ठति सर्वलोकविगीतत्वेनातिनिकृष्टेऽपि स्थले तिष्ठति स्थित्वा च तदेव स्वास्पदं सर्वोत्कृष्टं सर्वपूज्यं सर्वदुर्लभपदवीकञ्च करोतीति सविस्मयं सरोमाञ्चमाह । केति द्वाभ्याम् । इमाः स्त्रियः इति स्त्रीत्वेन गोपसन्ततित्वेन च जात्या विगीताः । वनचरीर्वनचर्यं इति वनभ्रमणशीलत्वात् स्वभावेनापि व्यभिचारदुष्टा इत्याचारेणापि विगीता इमाः क्व कृष्णे परमात्मनि वैकुण्ठनाथादिभ्य आत्मभ्योऽपि परमे सर्वांशिनि पूर्णस्वरूपे रूढभावः भक्तेरपि परममहान् विलासो महाभावः केत्यन्तासम्भवे कद्वयप्रयोगः । अहो मत्वाश्चर्यमिति विमृश्य क्षणं विभाव्य ज्ञाततत्त्वो नैतदत्याश्चर्यमित्याह । नन्विति । निश्चये नु भो इति स्वमन एव सम्बोध्योक्तिः । ईश्वरो भगवान् भजतो जनस्य नापि भजनसिद्धस्य अविदुषोऽपि तत्पदार्थत्वम्पदार्थज्ञानरहितस्यापि साक्षाच्छ्रेयः संसारमुक्तिपूर्वकस्वप्रेमरसास्वादरूपं मङ्गलं सर्वमुक्तैरपि दुर्लभं वस्तु तनोति यथा अगदराजोऽमृतम् उपयुक्तः पीतः सन् तत्स्वरूपमजानतोऽपि जनस्य श्रेयः सर्वव्याधिप्रशमनपूर्वकमपूर्वास्वादविशेषं तनोति किं पुनरासां भक्तिसिद्धनित्यसिद्धशिरोमणीनां तत्स्वरूपरूपगुणैश्वर्यमाधुर्यमहाविदुषीणां तत्परिचर्योपकरणीकृतस्वीयबुद्धीन्द्रियसर्वगात्रयौवनालङ्कारपरिच्छदानां नारदादिसर्वभक्तदुर्लभं रूढभावं न तनुयादिति भावः । रूढभावस्य लक्षणमुज्ज्वलनीलमणौ दृश्यम् । व्यभिचारदुष्टा इति स्त्रीणां त्रैविध्यात् । व्यभिचारस्त्रिविधः पतिमुपपतिञ्च रमयन्त्या एकः स हि लोकशास्त्रयोर्विगीतः । पतिं त्यक्त्वा उपपतिमेकमेव रमयन्त्याः अन्यः स हि लोकशास्त्रविगीतत्वेऽपि एकपुरुषमात्रप्रीतिमत्त्वेन रसशास्त्रसङ्गीतः । स्वपतिं त्यक्त्वा उपपतिबुद्ध्या भगवन्तमेव रमयन्त्या अपरः स ह्यनभिज्ञलोकविगीतत्वेऽप्यभिज्ञलोकसङ्गीतत्वाल्लोकशास्त्रयोः परमार्हणीयत्वाच्च यद्यपि न व्यभिचारस्तथापि व्यभिचार साधर्म्यादेव व्यभिचार उच्यते व्रजसुन्दरीणाम् अतोऽत्र व्यभिचारेण दुष्टा इवेति व्याख्येयम् ॥ ५८ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

अथात्यन्तायोग्यत्वात्कथमेवंविधं ब्रह्मादिभिरपि प्रार्थनीयभावं प्राप्ता इत्यालोच्य विस्मितचित्त आह । केति । द्वौ कशब्दौ महदन्तरं बोधयतः तदुपपादकानि विशेषणानि इमा इत्यादीनि तत्रेमा गोप्यो हीनजात्युत्पन्नास्तत्रापि स्त्रियो योनितो निकृष्टतापादकवनवासवत्यः ननु वने तु सात्त्विको वास इत्युक्तत्वात्कथं वनवासस्य निकृष्टतापादकत्वमुक्तमिति शङ्कानिरासाय वनचरी-

नायं श्रियोऽङ्ग उ नितान्तरतेः प्रसादः स्वर्योषितां नलिनगन्धरुचां कुतोऽन्याः ।
रासोत्सवेऽस्य भुजदण्डगृहीतकण्ठलब्धाशिषां य उदगाद्व्रजवल्लवीनाम् ॥ ६० ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

रित्युक्तं तथा चोत्कृष्टजात्युत्पन्नानां शास्त्रोक्ततपआद्यनुष्ठानपराणां वनवासः सात्त्विकः न तु यथोक्तानां स्वच्छन्दचरीणां वानरादिसमानाम् अनेन लौकिकचातुर्थशास्त्रीयानुष्ठानतदाराधनोपकरणाद्यभावः सूचितः अन्तःकरणतोऽपि हीना इत्याह । व्यभिचारबुद्ध्या दुष्टाः लोके व्यभिचारेण दुष्टत्वेन प्रसिद्धा इति वा कृष्णे सदानन्दरूपे परमात्मनि रूढभावः क्वेति महदाश्चर्यं तथा च जात्याचारज्ञानादिहीनानां सर्वोत्कृष्टपदप्राप्तिदर्शनात् भगवद्भजनलब्धतत्प्रसाद एव परममहत्त्वे हेतुर्न तु जात्यादिकमिति निश्चीयत इत्याशयेनाह । नन्वीश्वर इति । भजनाधारवतोऽविदुषोऽपि भगवत्स्वरूपानभिज्ञस्यापि साक्षाच्छ्रेयस्तनोति न तु परम्परया तत्रानुरूपं दृष्टान्तमाहागदराजः अमृतम् उपयुक्तः स्वरूपेणाज्ञातोऽपि यथा तद्वत् यद्वा ननु जारबुद्ध्या भगवति भक्तानां स्त्रीणामासां कुतस्त्यमेवम्विधं माहात्म्यमित्याशङ्क्याह । क्वेति । इमा भगवत्प्रियाः क्व अन्या लौकिकास्त्रियश्च क्व अतस्तत्साजात्यमात्रेणा नैतास्वपकृष्टताबुद्धिर्विधेयेति भावः । यतः सामान्यस्त्रियः प्रायेण व्यभिचारदुष्टा भवन्ति एतास्तु वनचरीः भवने भगवता क्रियमाणे सर्वतो रक्षणे चरन्तीति तथा एवं यासां भगवत्सम्बन्ध एव न तु गोपसम्बन्धः मन्यमानाः स्वपार्श्वस्थानित्युक्तत्वाद्गोपानां तत्सम्बन्धस्य प्रातीतिकत्वात् तथा पुत्रादिसम्बन्धोऽपि तासां लोकप्रतीत्येति भावः । एवं लौकिकस्त्रीभ्यो वैलक्षण्यमुक्त्वा ब्रह्मादिभ्य उत्कृष्टत्वमुक्तमुपपादयति । कृष्ण इति । एष लोकवेदाप्रसिद्धः गोपाङ्गनाभिस्त्वनुभूयमानः क्व ब्रह्मादौ लक्ष्म्यादौ च दुर्लभस्तत्रापि कृष्णे तदर्थमेव प्रकटीकृतकोटिकन्दर्पाधिकलावण्यादिगुणवत्कृष्णविग्रहे तत्रापि परमात्मनि सर्वस्यात्मार्थं सर्वं प्रियं भवति एतासां तु तदर्थमेव आत्माप्रिय इति विशेषः यद्वा बहिर्मुखतादशायां यथोक्तस्वरूपे कृष्णे अन्तर्मुखतादशायां परमात्मनि तत्रापि रूढः परां काष्ठां प्राप्तस्तथा चैवम्विधे विषय एवंविधस्य भावस्य कुत्राप्यसम्भवात्सिद्धं सर्वोत्तमत्वमासामिति भावः । ननु स्वरूपमविज्ञायानुरक्तानामासां स्वस्मिन्नेवम्विधो भावः किमिति भगवता ताभ्यो दत्त इत्याशङ्क्याह । नन्विति । ननु निश्चयेन यतोऽसावीश्वरः कर्तुमकर्तुमन्यथाकर्तुं वा समर्थोऽतो नु भजतोऽविदुषोऽपि साक्षाच्छ्रेयस्तनोतीत्यर्थः । यद्वा स्त्रियस्तत्रापि निकृष्टजात्युत्पन्नास्तत्रापि वनचर्यः प्रायेण व्यभिचारदुष्टा दृष्टाः इमा अपि तद्धर्मवत्त्वात्तथात्वयोग्या अपि क्व क्व चैव परमात्मनि कृष्णे रूढभाव इत्यहो परमाश्चर्यमित्यादि पूर्ववत् केचित्तु भगवता स्वार्थमुत्पादिताः मध्ये कालविलम्बे अन्यान् गोपालान् भ्रमात्पतिबुद्ध्या गृहीत्वा व्यभिचारं कृतवत्यस्तेन दुष्टा इत्याहुः । अन्ये तु भगवत्सम्बन्धानन्तरं पुनर्गोपसम्बन्धरूपेण व्यभिचारेण दुष्टा इति वदन्ति ॥ ५९ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

भगवद्भजनपरो जनः सर्वोत्तम इत्युक्तमत एव भगवानप्युपनयनगुरुकुलवासयथार्थज्ञानादिविहीनस्यापि कथंचिद्भजतः श्रेयस्तनोतीत्याह । क्वेमा इति । एषः शास्त्रप्रसिद्धः विधिप्राप्तोपनयनेन लब्धगुरुकुलवासेन स्वोचितकर्मभिः प्रक्षालितान्तःकरणमलेन सुज्ञातपरमात्मस्वरूपगुणादियाथात्म्येन लभ्यो रूढभावः मुक्तिहेतुः क्व इमाः स्त्रियः द्विजातिसंस्कारवर्जिताः क्व तथापि आसां जात एवेत्यर्थः । अत इमाः वनचरीः वनचारिण्यः व्यभिचारदुष्टाश्च न किन्तु भगवत्प्रियाः भगवत्प्रियेषु जनेषु कस्याञ्चिदपि जातौ स्थितेषु केनापि भावेन भजत्सु पूज्यत्वबुद्धिर्युक्तेति भावः । ईश्वरोऽपि नु अहो अविदुषोऽपि क्रमप्राप्तस्वात्मयाथात्म्यज्ञानरहितस्यापि साक्षाद्भजतः केनाऽपि भावेन साक्षात्स्वरूपमनुवर्तमानस्य श्रेयस्तनोति मुक्तिं ददाति उपयुक्तः साक्षात्सेवितः अगदराजः अमृतं श्रेय आरोग्यं तनोति यथेति ॥ ५९ ॥

भाषा टीका ।

देखो इन स्त्रियों की महिमा कौन कह सके जिनको कि अज्ञानी लोग व्यभिचार वाली दूषित स्त्री कहते हैं इनको देखो तो श्रीकृष्ण परमात्मा में इन का बड़ा दृढ भाव प्रेम हो रहा है तिससे यह निश्चित है कि जो अज्ञानी कोइ हो वै तिसका भी ईश्वर कल्याण करते जैसे कि विना जाने भी अमृत अपने गुण को करही देत है ॥ ५९ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अत्यन्तापूर्वश्चायं गोपीषु भगवतः प्रसाद इत्याह । नायमिति । अङ्गे वक्षसि उ अहो नितान्तरतेरेकान्तरतिमत्याः श्रियोऽपि नायं प्रसादोऽनुग्रहोऽस्ति नलिनस्येव गन्धो रुक्कान्तिश्च यासां तासां स्वर्गाङ्गनानामप्सरसामपि नास्ति अन्याः पुनर्दूरतो निरस्ताः रासोत्सवे कृष्णभुजदण्डाभ्यां गृहीत आलिङ्गितः कण्ठस्तेन लब्धा आशिषो याभिस्तासां गोपीनां य उदगादाविर्बभूव ॥ ६० ॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

अहो हरिप्रियेति प्रसिद्धा महालक्ष्मीरप्येतादृशप्रसादाश्रयो न स्यादित्याह । नेति । नञः प्राङ्निर्देशो निषेधदार्ढ्यार्थः सप्तम्यर्थे षष्ठी तथा विमलोत्कर्षिणीज्ञानादीनां स्वर्योषितां दिव्याङ्गनानां नलिनगन्धरुचामिति रासयाग्यताक्ता तत्र रुक्शब्देन कोमलगौरकान्तिर्ग्राह्या अन्याः मानुष्याद्याः रास एवोत्सवस्तस्मिन् दण्ड-

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

रूपकेण दृढालिङ्गनं ध्वनितं व्रजस्य सुन्दरीणामिति व्रजस्त्रियो रमादिभ्योऽप्युरुमाधुर्यमण्डिता इति बृहद्वामनानुसारेण रमादिभ्यो ष्याकुलया प्रकृत्या च माधुर्य्यैणासामेव रासार्हता समर्थिता अन्यैस्तैर्व्याख्यातं यद्वा उशब्दः परमविस्मयाक्रोशविशेषे नितान्ता गाढा चासौ रतिश्च नितान्तरतिः प्रेमा तस्या यः प्रसादः प्रसन्नता उत्कर्ष इति यावत् रासोत्सवे व्रजसुन्दरीणाम् उदगात् प्रकटोऽभूत् अयं श्रियोऽपि नास्ति तथा हि रासे "गोप्यो लब्ध्वाऽच्युतं कान्तं श्रिय एकान्तवल्लभम् । गृहीतकण्ठ्य-स्तद्दोर्भ्यां गायन्त्यस्तं विजह्रिरे" । अस्यार्थः श्रियः कान्तं वल्लभं आत्मन एकान्तवल्लभं नितान्तप्रेष्ठम इति सर्वतः श्रैष्ठ्यमासां प्रेमातिशयमाकलय्यैवादरायणिनोक्तं तथा ताभिरपि तत्रैव गीतम् "अटति यद्भवानह्नि काननमि"त्यादि यदा श्रिय एवैवं वार्त्ता तदा स्वर्योषितां कुतः स्वर्योषितो वैकुण्ठदेव्यः धरणीलीलाद्याः तासाम् अन्याः कान्ताद्याः दाक्षिणाद्याश्च ॥ ६० ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

ननु परमव्योमनाथकृष्णयोरभेद एव निरूप्यते । तत्र पूर्वस्य च सदा वक्षःसङ्गिनी लक्ष्मीः सर्वभक्तशिरोमणिस्तस्यां भावः कथं नाभिनन्द्यते किञ्च यथा दूरचरे प्रेष्ठ इत्यादिरीत्या वियोग-मयभावस्योत्कर्षः सर्वत्र लभ्यते । ततो यदि संयोगेऽप्यासां तेनाधिक्यं स्यात्तर्हि तथा वर्ण्यताम् । संयोगे तु लक्ष्म्या एव तदा-धिक्यं गम्यते । किञ्च लक्ष्मीर्हि स्वरूपशक्तिस्तदपेक्षया स्वरूपे-णामून्यूनाः स्युः कथमेता एव स्तुतेर्विषयीक्रियन्ते तत्र सप्रौढि प्राह । नायमिति । अङ्गे मदीश्वरस्य श्रीकृष्णस्य मूर्त्तिविशेषे तस्मिन् संसक्ता या श्रीस्तस्या अप्ययम् एतावान् प्रसादस्तदङ्गसङ्ग-सुखोल्लासः उ निश्चितं न विद्यते कीदृश्या अपि तस्याः नलिनस्य दिव्यस्वर्णकमलस्येव गन्धो रुक कान्तिश्च यासां तासां स्वर्योषितां स्वश्चूडामणिं शुभगयन्तमिवात्मधिष्ण्यमित्युक्त-दिशा दिव्यसुखभोगास्पदलोकगणशिरोमणिवैकुण्ठस्थितानां योषितां भूलीलाप्रभृतीनां मध्ये नितान्तरतेः परमप्रेमयुक्तायाः । तदेवं सति कुतोऽन्याः सर्वा एव स्त्रीजातयो दूरत एव परास्ता इत्यर्थः । तं प्रसादमेव दर्शयति । रासेति । व्रजसुन्दरीणां नित्य-स्थित एव यो यावान् रासोत्सवे उदगात् प्राकट्यं प्राप । कीदृशीनाम् अस्येत्यासां समीपे यन्मर्त्यलीलौपयिकमित्याद्यनु-सारेण परमव्योमनाथादप्युत्कृष्टस्य मया साम्प्रतं साक्षादिवानु-भूयमानस्यापि श्रीकृष्णस्य यौ भुजदण्डौ ताभ्यां गृहीतः स्वल्प-स्यापि विश्लेषस्य भयादिव यः कण्ठः कण्ठालिङ्गनं यत्कृत-मित्यर्थः । तेन लब्ध आशिषो मनोरथा याभिस्तासाम् । तस्मा-ल्लक्ष्मीतोऽपि सर्वथा वैलक्षण्यमासां स्वरूपेण चास्मिन् प्रेयसी-भावेन च वैलक्षण्यं दर्शितम् । अत एव लक्ष्मीविजयवाक्येऽस्मिन् व्रजसुन्दरीणामित्युक्त्या सौन्दर्यादीनामप्याधिक्यं दर्शितम् । यस्यास्ति भक्तिरित्यादिरीत्या भक्तितारतम्येन तारतम्याद्युक्त-मेव चेदम् । व्रजवल्लवीनामिति पाठे तु व्रजस्य च तासाञ्च प्रसिद्धिः सूचिता ॥ ६० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अत्यन्तापूर्वश्चायं गोपीषु भगवतः प्रसाद इत्याह । नायमिति । अङ्गे वक्षसि वामाङ्के वा उ अहो नितान्तरतेः एकान्तरतिर्यस्यास्तस्याः श्रियो लक्ष्म्याः नायं प्रसादोऽनुग्रहोऽस्ति नलिनस्येव गन्धो रुक्कान्तिश्च यासां तासां स्वर्योषितां स्वर्गाङ्गनानामप्सरसामपि नास्त्यन्याः इतरास्त्रियस्तु कुतः प्रसादाविषया इति शेषः दूरतो निरस्ता इति भावः । कोऽसौ प्रसादो यः श्रिया स्वर्योषिद्भिश्च न लब्ध इत्यत्राह । रासोत्सव इति । रासक्रीडायां कृष्णस्य भुजदण्डाभ्यां गृहीत आलिङ्गितः कण्ठस्तेन लब्धा आशिषो याभिस्तासां गोपीनामुदगादाविर्बभूव वल्लवीनां मध्ये उदगाज्जगावितिं वा ॥ ६० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

यः प्रसादः व्रजवल्लवीनां गोष्ठस्थानां गोपीनाम् उदगात् उदितः अयं भक्त्या नितान्तरतेः श्रियः स्वर्योषितां च नास्ति नन्वस्माभिरनुज्ञातं न तु शास्त्रेणेत्यर्थः । कीदृशीनां स्वर्गाङ्गनानां ललिताङ्गरुचाम् अखिलविलासोपेतशरीरकान्तीनां कथम्भूतानां गोपीनां रासक्रीडोत्सवे अस्य कृष्णस्य भुजदण्डेन गृहीतकण्ठाश्च लब्धाशिषश्च सुरतसुखोद्बोधकशुभवाक्यप्रबन्धाश्च यास्तासां अन्याः अन्यासां स्त्रीणां बहुलं छन्दसीति विभक्तिव्यत्यय-विधानात् अन्यस्त्रियं ईदृशप्रसादं नापुरिति कुत इति वा ॥ ८ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

नन्वेतदन्योऽन्याश्रितम् एवं भावो भगवति उत्तमकारणाभावे कथं भवतीत्याशङ्क्य ईश्वरस्तथा कृतवानित्युक्तम् ईश्वरः कथं करोतीत्याशङ्कायां तदिच्छानुसारेण भजनादित्यनुभजनेन निरूपितम् इच्छानुसारिभजनमकारणमिति पुनः स दोषस्तदवस्थः अत एकं निश्चित्य साधनं वक्तव्यं भगवदिच्छाकारणानन्तरं चेति आद्ये तासां न कापि स्तुतिः कारणान्तरे तु किं ब्रह्मजन्मभिरिति विरुध्यत इत्याशङ्क्याह । नायं श्रियोऽङ्ग इति । वस्तुतो भगव-दिच्छैव नियामिका परमियमेतावता कालेन न कापि जातेति तासां स्तुतिरुच्यते अन्यथा यादृशस्तासु प्रसादस्तादृशोऽन्यत्रापि भवेत् तत्र सम्भावितस्थानान्यनूद्य परिहरति । एकान्ततो रति-र्यस्यां तादृशी लक्ष्मीः तस्यापि निरन्तरं रसं प्रयच्छन्नपि न प्रसादं दत्तवान् स्वर्योषितामपि इन्द्रोपेन्द्रादिभावापन्नोऽपि बहुभिः सह रममाणोऽपि न दत्तवान् नलिनवत् गन्धो रुक् कान्तिश्च यासां तेन कमलभ्रमोऽपि तासु सम्भवति कमलाप्रियश्च भग-वानिति कमलखण्डे पूजित इव कदाचित्तासु तिष्ठेत्तस्या अपि निषेधः अन्याः पुनस्तत्तदवतारेषु सम्बद्धा अपि कुतस्तत्प्रसादं प्राप्नुवन्तीत्यर्थः । स कः प्रसाद इत्याकाङ्क्षायामाह । रासोत्सव इति । अस्य भुजदण्डैर्गृहीतकण्ठैर्लब्धा आशिषो याभिः न हि कदाचिदप्यनेकरूपाणि कृत्वा रमणार्थमेवं रसाभिनिविष्टो भवतीति तत्रापि व्रजवल्लवीभिः सह तादृत्वसंवृता दध्यादिविक्रये सर्वत्र पर्यटनपरा महतामपि प्रार्थनया कदाचिद्भगवानेवं रूपं गृह्णाति महति कार्ये आनन्दश्च तासां सर्वोत्तमः संपादितः अनेकधा

आसामहो चरणरेणुजुषामहं स्यां वृन्दावने किमपि गुल्मलतौषधीनाम् ।
या दुस्त्यजं स्वजनमार्यपथञ्च हित्वा भेजुर्मुकुन्दपदवीं श्रुतिभिर्विमृग्याम् ॥ ६१ ॥
या वै श्रिया ऽर्चितमजादिभिराप्तकामैर्योगेश्वरैरपि यदात्मनि रासगोष्ठ्याम् ।
कृष्णस्य तद्भगवतश्चरणारविन्दं न्यस्तं स्तनेषु विजहुः परिरभ्य तापम् ॥ ६२ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

रसमुत्पादयतो अतो ज्ञायते नैतादृश्यः काश्चन नाप्येतादृशः क्वापि भगवत्प्रसाद इति अतो ज्ञायते अवस्थापि तासामेतादृशी प्रमाणेष्वश्रुतापि सर्वोत्तमेति ॥ ६० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

यथा सर्वावतारश्रेष्ठ एव कृष्णो गोचारणवानरबालकैः सहभोजित्वदधिचौर्यपरस्त्रीचौर्यादिलोकविगानं गृहीत्वैव सर्वसङ्गीतः सर्वोत्कर्षसीमानं प्राप तथैव सर्वाह्लादिनीशक्तिशिरोमणिभूता अपि इमाः स्त्रियो गोपस्त्रीत्ववनचारित्वव्रजलोकविख्यातव्यभिचारादिविगानं गृहीत्वैव लक्ष्म्यादिभ्योऽपि परमसौभाग्योत्कर्षसीमानमवापुरित्याह । नायमिति । अयं प्रसादः उ अहो अङ्गे नारायणस्य वक्षसि वर्त्तमानायाः श्रियोऽपि नितान्तरतेः प्राप्तात्यन्तरमणाया अपि कदापि नोदगात् कुतः पुनः स्वर्योषिताम् उपेन्द्राद्यवतारपत्नीनां नलिनस्येव गन्धो रुक् कान्तिश्च यासामिति सौन्दर्यसौरभ्यादिमत्त्वे सत्यपीति भावः । अन्यावतारास्त्रियः पुनः कुत एतत्प्रसादभाजः स्युरित्यर्थः । रासोत्सवे अस्य तु भुजदण्डाभ्यां गृहीत आलिङ्गितो यः कण्ठस्तेन लब्धा आशिषो याभिस्तासां तेन भक्तिमज्जनानां मध्ये सर्वोत्कर्षकोट्यां गोप्य एव स्थिताः साक्षात् श्रेयसोऽपि मध्ये सर्वोत्कृष्टकोट्यां दास इति सूचितम् ॥ ६० ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

यथैव विरूढभावः कुत्रापि नास्ति तथा भगवता यः प्रसाद एतासु कृतः स तु कुत्रापि न कृत इत्याह । नायमिति । अङ्गे स्ववक्षसि नितान्तरतेः एकान्तरतिमत्याः श्रियोऽपि नायं प्रसादोऽनुग्रहः न अहो अत्याश्चर्यं स्ववक्षसि स्थाप्य निरन्तरं रतिं प्रयच्छन्नपि नेमं प्रसादं दत्तवान् तथा स्वर्योषितां स्वर्गाङ्गनानां नलिनस्य कमलस्येव गन्धो रुक्कान्तिश्च यासां तासामपि अयं प्रसादो न दत्तः इन्द्रोपेन्द्रादिरूपमापन्नोऽपि बह्वीभिः सह रममाणोऽपि नेमं प्रसादं दत्तवान् अन्यास्तु तत्तदवतारेषु लब्धसम्बन्धा अपि कुतः कस्माद्धेतोरिमं प्रसादं प्राप्नुयुः अत्यर्थं दुर्लभं प्रसादस्वरूपमाविष्करोति । रासोत्सव इति । अस्य तिरस्कृतकोटिकन्दर्पविग्रहस्य भुजदण्डाभ्यां गृहीत आलिङ्गितः कण्ठस्तेन लब्धा आशिषो याभिस्तासां गोपीनां य उदगात् आविर्बभूव तथा च ब्रह्मादीनामपि प्रार्थनया कदाचिदेकमेव रूपं गृह्णाति न त्वनेकरूपाण्याविष्कृत्य यथोक्तरसाभिनिविष्टो यथोक्तं प्रसादं करोतीत्यहो व्रजवल्लवीनां तादृशप्रसादप्राप्त्युपायविधुराणामपि यथोक्तप्रसादलाभे भगवदिच्छैव कारणमिति भावः ॥ ६० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

गोपीषु भगवतोऽनुग्रहातिशयमाह । नायमिति । अङ्गे भगवद्वक्षसि । उ अहो नितान्तरतेः एकान्तरतिमत्याः श्रियो लक्ष्म्या अपि अयं प्रसादः अनुग्रहः नास्ति । नलिनस्येव गन्धः रुक् कान्तिश्च यासां तासां स्वर्गाङ्गनानामप्सरसामपि नास्ति । अन्याः स्त्रियस्तु तादृशप्रसादविषयाः कुत इत्यर्थः । कोऽसौ प्रसाद इत्यत आह । रासोत्सवे इति । रासोत्सवे अस्य श्रीकृष्णस्य भुजदण्डाभ्यां गृहीतेन आलिङ्गितेन कण्ठेन लब्धा आशिषो याभिस्तासां व्रजसुन्दरीणां य उदगात् आविर्बभूव ॥ ६० ॥

भाषा टीका ।

यह भगवान की कृपा यथार्थ सदा रति वाली प्रेम करने वाली लक्ष्मी पर नहीं है और कमल के से सुगंध वाली देव स्त्रियों पर भी नहीं भई है और स्त्रियों की तो क्या बात है जो कि प्रसाद रासक्रीडा में ईश्वर के भुजा तथा कंठको ग्रहण करने से मनोरथों के प्राप्त होने से व्रजवासि गोपियों को प्राप्त भया वह प्रसाद किसी को नहीं होना है ॥ ६० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

किं च आस्तां तावद्गोपीनां भाग्यं ममत्वेतावत्प्रार्थ्यमित्याह । आसामिति । गोपीनां चरणरेणुभाजां गुल्मादीनां मध्ये यत्किमप्यहं स्यामित्याशंसा कथम्भूतानाम् या इत्यादि आर्याणां मार्गं धर्मञ्च हित्वा ॥ ६१ ॥

पुनस्ता एव विशिनष्टि । या वा इति । योगेश्वरैरप्यात्मन्येवार्चितं स्तनेषु न्यस्तं परिरभ्य तापं जहुरिति ॥ ६२ ॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

एवं श्रीगोपीनां सर्वतः श्रैष्ठ्यं गीत्वा तासां दास्यमन्तरिच्छन्नपि सुदुर्लभं मत्वा तत्पदाम्बुजैकरससम्पर्कमप्याशास्ते आसामिति । अहो अत्यन्तदुर्लभलालसाखेदे वृन्दावने इति सदा तत्रैव तासां भ्रमणादिना सांनिध्यात् गुल्मस्तम्बः अप्रकाण्डे स्तम्बगुल्मविरुधमरः वृक्षादीनामनुक्तिः अत्युच्चत्वेन तेषां तच्चरण-

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी।

रेणुजोषणासिद्धेः गुल्मादीनां यथोत्तरं न्यूनत्वमूह्यं परमदीनतया आत्मनोऽतिनीचत्वमननेन तृणत्वमात्रप्रार्थने पर्य्यवसानात् गीतमपि तासां माहात्म्यं पुनरप्यत्यौत्सुक्येन गायति। या इति। दुस्त्यजमत्याज्यं स्वजनं पतिपुत्रादिकं मु मुक्तिः कुत्सिता यस्मात् प्रेम्णः तं भजमानेभ्यो ददातीति मुकुन्दो भगवान् श्रीकृष्णः तस्य पदवीम्। अनुवृत्तिं भेजुः भक्त्याकुर्वन् यद्वा तद्दर्शनार्थं सन्ध्ययोरनुगमनाभिगमनाभ्यां तद्गमनागमनमार्गं भेजुः असेवन्त इति मुकुन्दे परमप्रेमासक्तिरुक्ता। ननु स्वजनस्यार्य्यपथस्य च त्यागो वेदविरुद्धः साधुवर्गपूज्यपादाभिस्ताभिस्त्यक्तुं न युज्यते तत्राह। श्रुतिभिर्विमृग्यामेव केवलं न तु प्राप्तां प्राप्यां वेत्यर्थः। अतो धर्मज्ञानाद्युपदेष्टॄणां श्रुतीनां दुर्लभतरस्य वस्तुनो लब्धये तदधीनतानर्हत्वेन तत्तत्त्यागः युक्त एवेति भावश्चायं श्रुतीनां धर्माद्यपेक्षास्ति एताश्च सर्वं परित्यज्य भावविशेषेण तमेकमेवाभजन्। अतः श्रुतीनामद्यापि विमृग्यामेव तथा श्रीब्रह्मस्तुतौ अद्यापि यत्पदरजः श्रुतिमृग्यमेवेति एतास्तु सम्यक् प्रापुरेवेति ताभ्योऽप्यासामुत्कर्ष एवेति अथवा त्वं मे भृत्यः सुहृत्सखेति त्वं तु भागवतेष्वहामित्यादि श्रीभगवद्वचनादिना त्वं भक्तवर्गश्रेष्ठतमोऽत एव साक्षाच्छ्रीभगवद्विचित्रसेवाप्रसादविशेषयोग्योऽसि कथमेवं प्रार्थयसे तत्राह। या इति। स्वजनाद्यत्यागान्मम तदृशी भक्तिर्नास्त्येवेत्यर्थः। ननु गृहस्थस्य तत्तत्त्यागो वेदविरुद्धः तत्राह। श्रुतिभिरिति। भक्तवर्गादिगुरुश्रीब्रह्मणोऽपि ज्ञानप्रदत्वादिनादि गुरूणां श्रुतीनामप्राप्यतया तदनुवर्तितात्यागेन श्रीमुकुन्दप्राप्त्यर्थं श्रीगोपीनामेवासामनुगत्वाय तत्पदाब्जरजःस्पर्शिजन्मैव युक्तमित्यर्थः एवमुक्तमाहात्म्यभरस्योद्धवस्येदृशप्रार्थनया श्रीगोपीनां महानुत्कर्षः सिद्ध एव पश्चात्तद्भूरिभाग्यमिह जन्म किमप्यटव्यां यद्गोकुलेऽपि कतमाऽङ्घ्रिरजोऽभिषेकमिति श्रीब्रह्मप्रार्थनतोऽस्यायं प्रार्थनाविशेषः सोऽस्यैव तस्य सेवकत्वाद्यभावेन तथा चतुर्मुखत्वादिना महावैलक्षण्येन व्रजे चिरं स्थातुमप्ययोग्यत्वेन यस्य कस्यापि गोकुलीयस्य पादरजोऽभिषेकार्थं तत्र तृणादिकिञ्चिज्जन्मप्राप्त्यैव कृतार्थतया तादृशप्रार्थनाया योग्यत्वात् अस्य तु सदानिकटतरसेवकतया तथा व्रजे चिरवासादिना तत्रत्यानामनुग्रहभरसंपत्त्या च भावविशेषोदयादतृप्त्या ततोऽप्युत्कृष्टाय मधुराय श्रीमुकुन्दभावविशेषाय श्रीगोपिकादास्यार्थं तादृशप्रार्थनस्यौचित्यादुपपद्यत एवेति दिक्॥ ६१॥

ननु सर्वैरपि भक्तैः श्रीभगवदर्थं प्रायः स्वजनादयस्त्यज्यन्त एवेत्यनेन को नाम गोपीनां विशेष इत्याशङ्क्य परमदुर्लभस्य लाभविशेषेण माहात्म्यविशेषं साधयति। या वा इति। श्रिया महालक्ष्म्या आर्चितं प्रेमसंवाहनादिभिः संलालितम् अत एव अजो ब्रह्मा आदिशब्दाच्छ्रीरुद्रादयः यद्वा अजा ब्रह्मादिसेव्या योगमाया आदिशब्दाद्विद्याशक्त्यादयस्ताभिरर्चितं विविधोपासनया संमानितम् आप्तकामैर्मुक्तैरपि रक्तत्वादिना तापहरत्वादिना मधुररसस्रावित्वादिना च तत् यद्वा प्रकृष्टं सर्वथोत्कृष्टमात्मन्येव आर्चितं वैष्णवकृपया मुक्तितुच्छताविज्ञानेन परमफलतयाश्रितं योगो भक्तियोगस्तस्मिन् ईश्वराः समर्थाः समग्रभक्तिप्रचारनिष्ठा इत्यर्थः तैरपि सदात्मनि सन् उत्तमः विशुद्धो य आत्मा चित्तं तस्मिन्नेवार्चितं प्रेमध्यानादिना सेवितं तेषामपि सर्वेषां प्रायस्तस्य साक्षाद्दर्शनाभावान् मनस्येवार्चनात् यद्वा सदेत्यस्य परेणान्वयः एवं शशाङ्कांशुविराजिता निशा इत्युक्तेः तच्च तत्रैव व्याख्यातं तेन परमदौर्लभ्यमभिप्रेतम् अर्चकानामजादीनामेषां यथोत्तरं श्रैष्ठ्यं प्रायो यदर्चितमित्याद्यक्रूरोक्तवदूह्यम् एवमजाद्यर्चितत्वेन क्रमेण सर्वार्थप्रदत्वं परमफलत्वं परमाराध्यत्वं च माहात्म्यमुक्तम् अर्चितमित्यतीतनिर्देशः सर्वांशैः परिपूर्णतयाऽवतीर्णस्य स्वच्छन्दं गोकुले विक्रीडतोऽनन्यापेक्षस्य श्रीभगवतोऽधुनान्यैरर्चयितुमलभ्यत्वात् कृष्णस्य परमानन्दघनमूर्त्तेः तत्रापि भगवतः निजाशेषैश्वर्य्यं प्रकटयतः यद्वा कृष्णस्य जगदीश्वरस्य भगवतः परमस्वच्छन्दस्य तदिति बहुधा संसेवितमनुभूतरूपगुणादिमाहात्म्यं चिरविरहोदितप्रेमभरेण संस्मरति। किं वा रूपगुणादिनाऽनिर्वचनीयमित्यर्थः। प्रपदं पादाग्रमेवारविन्दं रक्तत्वादिना तापहरत्वादिना मधुररसस्रावित्वादिना च तत् यद्वा प्रकृष्टं सर्वथोत्कृष्टं पदारविन्दं या गोप्यो रासरूपायां गोष्ठ्यां क्रीडायां यद्वा रासे रासोपक्रमे या गोष्ठी गोपीनां सभा तस्यां तथा हि तत्रैव एका तदङ्घ्रिकमलं सन्तप्तास्तनयोरधादिति अत्र एकेत्युपलक्षणार्थं किं वा भजतो नु भजन्त्येक इत्यादिप्रश्नोत्तराभ्यां श्रीकृष्णेन सह संलापस्तस्यां स्तनेषु न्यस्तं संलग्नं यथा स्यात्तथा परिरभ्य गाढमालिङ्ग्येत्यर्थः। सस्पर्शनेनाङ्कृताङ्घ्रिहस्तयोरिति तत्रैवोक्तत्वात् यद्वा प्रेमवैवश्यात्स्वयमेव भगवतैव वा नागरशेखरेण धृतं परिरभ्य स्तनोपर्य्येव निधायालिङ्ग्य तापं कामज्वरं विरहदाहं वा विशेषेण जहुः वै एतत् प्रसिद्धमेवेत्यर्थः। अक्रूरेणापि पथि मनोरथे यद्गोपिकानामित्यादिना वर्णितत्वात् एवं तेषामोत्मन्येव तस्यार्चनम् आसान्तु क्रीडाविशेषे साक्षात्तादृशपरिरम्भणमपीति माहात्म्यं स्वतः सिद्धमेव तत्र भगवतः कृष्णस्येत्यजादिभ्यः सकाशात् प्रपदारविन्दं साक्षात्परिरभ्येत्याप्तकामेभ्यः स्तनेष्विति मधुररसविशेषाभिव्यञ्जनात् योगेश्वरेभ्यः रासगोष्ठ्यामिति लक्ष्मीतोऽपीत्येवं विवेचनीयम् एवमुद्धवस्य श्रीगोपीसङ्गप्रभावेण तादृशभावोत्पत्तिश्रेया अतः सख्यामिव प्राप्तस्यास्य गूढोऽयमभिप्रायः तथा त्यक्तताप नामासां वताधुना विरहतापनोदार्थं मया प्रयत्नः कार्य्य इति यद्वा कृष्णस्य श्रीव्रजेन्द्रनन्दनस्य यत्प्रपदारविन्दं तदीयासमोर्ध्वसौन्दर्य्यसारसर्वस्वमवेक्ष्य मोहितया श्रिया तदुपलब्धयं तपआदिभिरर्चितमिति पूर्वमेव गोप्योऽन्तरेण भुजयोरपि यत्स्पृहा श्रीरित्यत्र लिखितमेव॥ ६२॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी।

अथ पूर्वोक्तरीत्या तस्य नित्यप्रेयसीनामपि तासां जन्मादिलीलाविस्मृततादृशदशानां तादृशीनामपि तास्मिन्नु द्बुद्धलोकधर्मातिक्रमिरागाणां तादृशीनामपि श्रुतिदुर्ल्लभतापदवीभाजामनुगतिं वाञ्छन् तच्चरणरज एव तत्र साधनं निश्चिन्वन् प्रचुरतत्स्पर्शयोग्यं तत्र स्थावरजन्माप्याशास्ते। आसामिति। अहो इत्यत्यन्तदुर्लभलालसा खेदे। वृन्दावन इति। सदा तत्रैव तासां भ्रमणादिना सान्निध्यात्। गुल्मः स्तम्बः। अप्रकाण्डे स्तम्बगुल्मावित्यमरः। वृक्षादीनामनुक्तिरत्युच्चत्वेन सम्यक् तज्जोषणासिद्धेः गुल्मादीनामनुक्रमेणोक्तिर्नीचनीचतया रजसां सम्यक् प्राप्तेरुत्तराभिलाषाधिक्यात् दैन्याच्च। गुल्मादीनां यथोत्तरं न्यूनत्वमूह्यम्। परमदीनतयात्मनोऽतिनीचत्वमननेन तृणत्वमात्रप्रार्थने

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

पर्यवसानात् । गीतमपि तासां माहात्म्यं पुनरत्यौत्सुक्येन गायति या इति । या मुकुन्दस्य पदवी तत्प्राप्त्येकोपायः पूर्वमुक्तो रूढभाव एव । मुकुन्देति मुक्तिं ददातीति निरुक्त्या ताद्दशभावस्य दुर्लभतां सूचयति । मुक्तिं ददाति कर्हिचित् स्म न भक्तियोगमिति प्रेममात्रदानकार्पण्यसूचनात् । कीद्दशीं श्रुतिभिः कर्त्रीभिर्विमृग्यां परमपुरुषार्थतयान्वेषणीयां किं कृत्वा भेजुः स्वजनमार्यपथञ्च हित्वा लोकमर्यादां वेदमर्यादाञ्च त्यक्त्वेत्यर्थः । तत्तु दुस्त्यजं पूर्वोक्तैः श्रीप्रभृतिभिः सर्वैरप्यत्याज्यं ते खलु सर्वलोकसर्वमहावेदपुरुषार्थसारबुद्ध्यैव भजन्तीत्यतो न तेषु रागोत्कर्षमेव कारणमित्येता एवासमोर्द्ध्वरागा इति भावः । तदेवं मुकुन्दपदवीमिति तत्रापि श्रुतिभिर्विमृग्यामिति तस्याः नित्यत्वं सर्वोत्तमत्वञ्च गम्यते । तत्रापि तास्तां भेजुरिति तं शीघ्रं ग्रहीष्यन्त्येव । गृहीतश्चासौ नात्मानं मोचयितुं शक्ष्यतीति नित्यतत्सङ्गित्वं बोध्यते । परमान्तरङ्गेणाप्युद्धवेन तासां यथाकथञ्चित् चरणसम्बन्धेन जन्मप्रार्थनात् । तत्रापि वृन्दावन एव तत्सम्भवमननात्तासां तस्य च तद्विधत्वं बोध्यते इति ज्ञेयम् ॥ ६१ ॥

न केवलं ताद्दशतल्लाभसाधनस्य ताद्दशरासक्यैवोत्कर्षेण तासां माहात्म्यम् अपि तु भगवल्लाभस्यापीत्याह । या इति । वै प्रसिद्धं सर्वलोकचमत्कारकरं यथा स्यात्तथा । कृष्णस्य भगवतः कृष्णस्तु भगवान् स्वयमित्यादावसमोर्द्ध्वरूपत्वेन प्रसिद्धस्य तस्य तत्ताद्दशभावैकभाव्यं प्रपदारविन्दं गोप्यस्तपः किमचरन्नित्यादिरीत्या प्रकृष्टाविर्भावं पदारविन्दं परिरभ्य यत्ते सुजातचरणाम्बुरुहं स्तनेष्वित्यादिरीत्या परमस्नेहमयेन रागेणालिङ्ग्य तापं जहुः । ताद्दशतत्प्राप्तितः पूर्वं यः कश्चिद्भावः स सर्वोऽपि ताद्दशभावानां खल्वनुभवेन ताप एव तत् सर्वं तत्यजुरित्यर्थः । पदमात्रोपादानेन भक्तिव्यञ्जनया ताद्दशश्रीकृष्णस्य परमदुर्लभता सूचिता । तत्रापि लिट्प्रयोगेण तत्त्यागस्य स्वपरोक्षतां सूचयित्वा स्वपर्यन्तमहाभागवतागम्यत्वं सूचितम् । श्रीभगवतोऽपि ताभिः परिरम्भे रागं दर्शयति न्यस्तं तेन बलादिवार्पितम् । तत्र समयवैशिष्ट्यमप्याह । रासगोष्ठ्यां रासोपक्रमसभायां तस्यां परमापूर्वलीलायां प्रवर्त्तमानायामित्यर्थः । संस्पर्शनेनाङ्कृताङ्घ्रिहस्तयोरिति तदानीन्तनप्रसिद्धेः । ततश्च तदानीं तासामाविरभूदित्यादित्रैलोक्यलक्ष्म्यैकपदं वपुर्दधदित्याद्यनुसारेणात्यन्तसमयान्तरादपि परमापूर्वाविर्भावत्वमिति भावः । कथम्भूतम् अपि श्रिया वैकुण्ठलक्ष्म्यापि आत्मनि मनस्येव सदार्चितं भावविशेषेण बोध्यमानमेव वर्त्तते । न तु तथा प्राप्तं यद्वाञ्छया श्रीर्ललनाचरत्तप इत्युक्तेः । अत एव सुतरामजादिभिर्ब्रह्मरुद्रादिभिराधिकारिकभक्तैराप्तकामैरात्मारामभक्तैर्योगेश्वरैः सर्वयोगानामीश्वरैः । शुद्धभक्तियोगिभिरपीति मनस्येवार्चितमिति मूर्त्तत्वाद्दुर्लभाने कः । तस्मात् सर्वदुर्लभचरणारविन्दस्य तस्याभिरेव ताद्दशतया लब्धत्वादचिरादेवाकृष्य वशयितव्य इति भावः । यदात्मनीति चरणारविन्दमिति क्वचित् पाठः ॥ ६२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

किं तासां भाग्यं सर्वेषां दुर्लभमेव मम त्वेतावदेव प्रार्थ्यमित्याह । आसां गोपीनां चरणरेणुजुषां गुल्मलतौषधीनां मध्येऽहं किमपि स्याम् , केनापि तृणकीटादिरूपेण तच्चरणरेणुसंस्पर्शयोग्येनोद्भवेयमिति तत्र हेतुं वदंस्ता विशिनष्टि । या इति । या गोप्यः स्वजनमार्याणां पन्थानं च धर्मं च हित्वा श्रुतिभिर्वेदैरपि विमृग्यां मुकुन्दस्य पदवीं भेजुः मुकुन्दस्वरूपरूपगुणानुचिन्तनपरा बभूवुः इत्यर्थः ॥ ६१ ॥

पुनस्ता एव विशिनष्टि । या वा इति । यद्भगवतः श्रीकृष्णस्य चरणारविन्दं रासगोष्ठ्यां स्तनेषु न्यस्तं निहितं तत् या गोप्यः परिरभ्य तापमान्तरं बाह्यं च जहुरिति सम्बन्धः चरणारविन्दं विशिनष्टि । श्रिया लक्ष्म्यार्चितं तथाप्तकामैरजादिभिश्चतुर्मुखादिभिश्च तथा योगीश्वरैरात्मनि चित्ते चार्चितम् ॥ ६२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अहम् आसां गोपीनां चरणरेणुजुषां वृन्दावने प्ररूढानां गुल्मलतौषधीनां मध्ये गुल्मादिकं किमपि स्याम् उद्भवेयम् अहो अमीषां पूर्वजन्मार्जितपुण्यराशिः या गोप्यः त्यक्तुमशक्यं स्वजनं भर्त्रादिकम् आर्यपथं स्मार्तमार्गं नियतस्वभर्तृसङ्गविषयं हित्वा वेदशिरोभिरपि मार्गणीयां मुकुन्दपदवीं भेजुरित्यन्वयः ॥ ९ ॥

श्रियाऽजादिभिः ब्रह्मादिभिराप्तकामैः सत्यसङ्कल्पैः योगेश्वरैः सनकादिभिरपि आत्मनि हृदये निधाय यदार्चितं या गोप्यः कृष्णस्य भगवतस्तच्चरणारविन्दं स्तनेषु न्यस्य परिरभ्य कामनिमित्तसन्तापं विजहुः आसामिति पूर्वेणान्वयः ॥ १० ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

नन्वीर्ष्यया तासामवस्थां श्रुत्वा किमीश्वर एतदेव प्रार्थ्यते तथा सति स्वाभिलषितत्वात् न वस्तुनिरूपणे तात्पर्यमिति नोत्कर्षः सिद्ध्येदित्याशङ्क्याह । आसामहो इति । अहमासां दासानुदासत्वेऽपि न योग्यः कथमेतद्भावयिष्यामि "अयोग्यमिच्छन् पुरुषः पतत्येव न संशय" इति आसां चरणरेणुजुषां गुल्मलतौषधीनां मध्ये किमप्यहं स्याम् आदौ जङ्गमत्वाधिकारो नास्ति तथा सति क्रियया ततोपगमनं स्यात् व्यवहारयोग्ये तु समतया भावः स्यात्तदप्ययोग्यं स्थावरत्वे वृक्षादिभावे चिरकालावस्थितौ न शीघ्रं भगवत्प्राप्तिः स्यात् अतो यो यस्य चरणरजो वाञ्छति स तद्भवति तदीयो वा भवतीति वा अल्पायुः चरणरजः प्राप्तियोग्यं जन्माभिलषितम् अतो गुल्मलतौषधीनां तामसराजससात्त्विकानां तत्रापि रजःसम्बन्धयोग्यानां न तु तुलसीकुन्दजातीब्रीह्यादिषु तेषु हस्तसम्बन्धः तदीयानां भगवत्सम्बन्धिशिरःसम्बन्धश्च भवेदिति व्याजेनोत्कर्षप्रार्थनं भवेत् वृन्दावनं हि परमोत्कर्षापादकं भक्तिजनकञ्च अहो इत्याश्चर्यं न ह्येतदपि भविष्यतीति साधनप्रकारेणैव जात उत्कर्षः फलपर्यवसायी भवति नान्यथा किमपीत्यादरे नात्र सत्त्वाद्युत्कर्षोऽभिप्रेतः रजःसम्बन्ध एवोत्कर्षजनक इति तस्य तुल्यत्वात् नन्वेतासां रजसा क्रमेणैतद्भाव एव भवतु न तु

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

भगवद्भावः ततः किमित्येवं प्रार्थ्यत इत्याशङ्क्याह । या दुस्त्यजमिति । भगवद्भावः आसां सुलभः न त्वन्यत्र । तथैवोपपादितत्वात् दृष्टश्च तदसम्भावितामिति मत्वा पुनस्तासां धर्मानतिवदति । दुस्त्यजाः स्वजनाः पुत्रादयः तत्रापि दुस्त्यजः आर्यमार्गः "संभावितस्य चाकीर्त्तिर्मरणादतिरिच्यत" इति अयमार्यमार्गो लौकिकः यादृशास्ते स्वजनाः वस्तुतस्तु भगवानेव स्वजनः आर्यमार्गश्च अन्यथा फले व्यभिचारश्च एवं त्यक्त्वा चकाराद्भगवदुपदेशं च अन्यथा बहिः संबन्धे स्वास्थ्यं भवेत् पश्चान्मोक्षदातुः पदवीं भेजुः यो हि यन्मार्गे गच्छति स तावति धर्मे तत्तुल्यो भवति तत एता अपि मोक्षदात्र्यो जाताः तथा वयमपि भविष्याम इति भगवद्भजनापेक्षयाप्येतदुत्तमामिति भावः । नन्वेवं सति ब्रह्मभावद्वयमपि कथं वेदेनोक्तस्तत्राह । श्रुतिभिर्विमृग्यामिति श्रुतयोऽपि वक्तुं विचारयन्ति परमिदमित्थन्तया वक्तुं न जानन्ति, दृष्टान्तापरिज्ञानात इदानीमेव हि गोपिकाः भगवता दृष्टान्तीकृताः भगवदभिप्रायः श्रुतीनामपि ज्ञातुमशक्य इति न सर्वज्ञत्वाविनापि दूषणं तदुपपादितं व्यासादिरिदं वेदेत्यादीति इममेवार्थमुररीकृत्य यस्यामतं तस्य मतमित्यादिश्रुतयः अज्ञानमेव तुष्टुवुः तथापि स्वाधर्मज्ञाने विद्वज्जिज्ञासाया अवश्यंभावात्स्वभावसामर्थ्यमवश्यं मन्यमानाः मृगयन्त्येव तत्रापि सर्वोत्कृष्टत्वाद्विशेषेण मृग्यम् ॥ ६१ ॥

किं च यत्सर्वेषां पूज्यमाराध्यं तत्तासां तापहारकत्वेन नियुक्तं तापे हि पूज्यस्पर्शोऽपि निषिद्धः पूजार्थमपि तत्राप्यङ्गार्थं प्राप्त इति विशेषतः उत्कर्षमाह । या वै श्रियार्चितमिति । सर्वत्र फलरूपा लक्ष्मीः तयापीष्टसिद्ध्यर्थम् अर्चितं न तु यथेष्टं विनियोक्तुं शक्यं किं च अजादयो ब्रह्मादयो सनकादयश्चाप्तकामाः योगेश्वराः सिद्धादयः ये सर्वे कर्तुं समर्थाः सर्वोऽपि पुरुषार्थः प्राप्तो वशीकृतः सर्वसाधवाश्च तेऽपि ततोऽप्युत्तमफलसिद्ध्यर्थं तच्चरणमानर्चुर्बहिरवस्थायाम् अर्चनं भविष्यतीत्याशङ्क्य विशेषमाह । यदात्मनीति । यदात्मन्यर्पितं ध्यानं कृत्वापि पूजितमित्यर्थः । तादृशमपि कृष्णस्य सदानन्दस्य फलरूपस्य तत्रापि तत्प्रसिद्धं स्वतन्त्रफलदातृत्वं तत्र भक्तिमार्गप्रवर्त्तकं भगवतः सर्वे समर्थस्य एवं स्वतः संबन्धतोऽप्युत्कृष्टायां रासगोष्ठ्यां कौतुकक्रीडायां स्वयं स्वेच्छया नर्त्तनं कृत्वा श्रान्ताः सत्यः कमलादिकमिव व्यजनवायुमिव चन्दनमिव तन्मन्यमानाः स्तनेषु न्यस्य तापं जहुः धाष्टर्यात् अयुक्तमेव तथा कृतवत्य इति शङ्कानिवृत्त्यर्थं भगवतैव न्यस्तमित्युक्तं भगवानप्यत्यन्तवशः तासां शीघ्रं तापापनोदनार्थं स्वयमपि शीघ्रं तत्स्तनेषु स्थापितवान् अत आह । न्यस्तमिति ततस्तत्परित्यज्य स्वाधीनं कृत्वा तापं जहुरिति प्रमाणतः प्रमेयतश्च ता उत्कृष्टा इत्यर्थः । अन्यार्थमेवैषा प्रशंसेत्याशङ्क्य पूर्वमपि नमस्कारार्थमेतदारब्धमिति प्रमाणतः प्रमेयतश्च ता उत्कृष्टा इत्यर्थः ॥ ६२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी

तस्मादासां भावे परमदुर्लभे मनोरथस्थाप्यनौचित्यं वाञ्छन्ति यद्भवभियो मुनयो वयञ्चेति यन्मयोक्तं तदविचारादेव । साम्प्रतन्तु सविचारमाशासे एतदेव मे भूयादित्याह । आसामिति । इमा यासामुपरि चरणौ विन्यस्यन्ति तासामतिक्षुद्रजातीनां गुल्मलतौषधीनां मध्ये किमप्यहं स्यां ननु भजनस्य सर्वोत्कृष्टकाष्ठा का खल्वेतासु वर्त्तते । यामेवालक्ष्य त्वमासामेव चरणरेणून् वाञ्छसि ननु लक्ष्म्यादीनामपीत्यत आह । या इत्यादि । लोकधर्मधैर्यलज्जामर्यादादित्रोटनपूर्वकं महारागेण भजनमेवं मया न क्वापि दृष्टमत एव प्रतिरजनि यदा यदा स्वकुलधर्मादिमर्यादा वज्रशलाका अपि महारागबलेन त्रोटयित्वा कृष्णमभिसरिष्यन्ति तदा कृष्णपार्श्वे प्रतिगमने वर्त्मावर्त्मविचारो नासामिति तृणादिरूपस्य मम मूर्ध्नि चरणावर्पयिष्यन्ति अधुना तु कोटिशः सकाकु प्रार्थिता अपि नैता मन्मूर्ध्नि चरणान्नाधित्सन्तीत्यतस्तदैव मम धन्यजन्मता भविष्यतीति भावः ॥ ६१ ॥

पुनरपि तासां लक्ष्म्यादिदुर्लभवस्तुलाभान्माहात्म्यमाह । या वै या एव स्तनेषु न्यस्तं कृष्णस्य चरणारविन्दं परिरभ्य तापं जहुः यत् खलु श्रिया लक्ष्म्या अजादिभिश्च आत्मनि मनस्येव अर्चितं न तु साक्षात् स्प्रष्टुं शक्यमिति भावः यद्वाऽज्ञया श्रीळेलनाचरसप इत्यादेरासगोष्ठ्यां रासस-भायाम् ॥ ६२ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

एवं तासामुत्कर्षं वर्णयित्वा तत्पदमयोग्यत्वादप्रार्थयन्स्वयोग्यां पदवीं प्रार्थयति । आसामिति । वृन्दावनगुल्मलतौषधीनां मध्ये किमपि अहं स्यां तत्राप्यासां चरणरेणुजुषां एतावतैव मम कृतार्थता भविष्यतीति भावः । एतावदप्यतिदुर्लभमिति बोधनाय तासां माहात्म्यमनुवदति । याः दुस्त्यजं स्वजनं पतिपुत्रादिकम् आर्यपदं कीर्तिपदं पतिशुश्रूषणादिरूपं शिष्टमार्गं तत्साध्यं परलोकसुखं च हित्वा मुकुन्दस्य मोक्षप्रदस्य भगवतः पदवीं स्वरूपं भेजुः स्वरूपं भेजुः आयुर्यथा भगवान् श्रवणादिना मोक्षप्रदस्तथैता अपि सम्पन्ना इति द्योतनाय मुकुन्दपदवीमित्युक्तं सा च पदवी परमविलक्षणत्वात्केनापि न लभ्येत्याशयेनाह । श्रुतिभिर्विमृग्यां श्रुतिभिरपि परमात्मस्वरूपं दूरत एवान्विष्यते यतो वाचो निवर्तन्ते अप्राप्य मनसा सहेत्यादिश्रुतेस्तथा च श्रुतिभिरपि या विमृग्या तत्रान्येषां का गणनेति भावः ॥ ६१ ॥

किञ्चान्यदपि यत्ताभिर्लब्धं न तत्केनापीत्याह । या इति । याः व्रजाङ्गना रासगोष्ठ्यां भगवतश्चरणारविन्दं परिरभ्य संन्यस्य तस्याप्राप्तिजनितं मनस्तापं जहुः तत्यजुः तदालिङ्गनं च तासां भगवदनुग्रहादेव सम्पन्नमित्याह । न्यस्तमिति । तीव्रतरहतत्प्राप्त्याशावर्जनादिजनितपरिश्रमादिना सन्तप्तेषु भगवतानुग्रहात्तत्तापनिवृत्त्यर्थं न्यस्तं तदपि भगवतः समग्रैश्वर्यादिषड्गुणसम्पन्नस्य चरणन्यासमात्रेण भगवत्तापादकस्य तत्रापि कृष्णस्य तदर्थमेव गृहीतकृष्णविग्रहस्य कीदृशं तच्चरणारविन्दं सर्वोत्तमया श्रियापि समर्चितमेव न तु यथेष्टं विनियुक्तं तथा ब्रह्मादिभिराप्तकामैरितरैश्च योगेश्वरैर्वशीकृतसर्वसिद्धिभिरपि यदात्मनि मनस्येव ध्यानादिना समर्चितं तथा चैवंविधं स्वपदारविन्दं भगवता तत्स्तनेषु न्यस्तमिति किं वक्तव्यं तासां माहा-

वन्दे नन्दव्रजस्त्रीणां पादरेणुमभीक्ष्णशः ।
यासां हरिकथोद्गीतं पुनाति भुवनत्रयम् ॥ ६३ ॥
श्रीशुक उवाच ।
अथ गोपीरनुज्ञाप्य यशोदां नन्दमेव च ।
गोपानामन्त्र्य दाशार्हो यास्यन्नारुरुहे रथम् ॥ ६४ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

त्व्यमित्यर्थः । तत्रापि स्तनेष्विति बहुवचनात् चरणारविन्दमित्येकवचनात्तापनिवृत्त्यर्थं परमत्वरयाऽसंख्यातस्तनेषु तत्स्थापनजनितपरिश्रमो भगवता न गणित इत्यहो भगवतस्तदनुग्राहकता- विशेष इति ध्वनितम् ॥ ६२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

आसां व्रजसुन्दरीणां चरणरेणुजुषां गुल्मादीनां मध्ये यत् किमपि वृन्दावने अहं स्यां भवेयं कथं भूतानां या इत्यादि अहो याः दुस्त्यजं स्वजनम् आर्य्यपथमार्य्याणां मुमुक्षुशिष्टानां पन्थानं च हित्वा श्रुतिभिर्विमृग्यां मुकुन्दस्य पदवीं भेजुः—

यत्पत्यपत्यसुहृदामनुवृत्तिरङ्ग
स्त्रीणां स्वधर्म इति धर्मविदा त्वयोक्तम् ।
अस्त्वेवमेतदुपदेशपदे त्वयीशे
प्रेष्ठो भवांस्तनुभृतां किल बन्धुरात्मा ॥

इत्याद्युक्तरीत्या मुमुक्षुपथं जगृहु रित्यर्थः ॥ ६१ ॥

तासां पुनः कथंभूतानां या इत्यादि यत् कृष्णस्य चरणारविन्दं श्रिया अजो ब्रह्मा तदादिभिश्च अर्चितं योगेश्वरैर्ज्ञानभक्तियोगनिष्ठैः आत्मनि हृदि अर्चितम् तथाः स्तनेषु न्यस्तं परिरभ्य तापं जहुस्तासाम् ॥ ६२ ॥

भाषा टीका ।

अहो इन गोपियों के चरण रजों की सेवन करने वाली लता गुल्मों में मैभी कोई एक जन्म होजाऊं तो अच्छा होवै जिन गोपियों ने कि अपने बंधु तथा श्रेष्ठ भी मार्ग को छोड कर सब श्रुति जिसको ढूंढ रही हैं ऐसी मुकुंद भगवान् की पदवी को ग्रहण किया है ॥ ६१ ॥

जिन गोपियों ने लक्ष्मीजी से तथा सर्वार्थ सिद्धि वाले ब्रह्मा रुद्रादिकों से भी जो चरणारविंद अर्चित है योगेश्वर भी जिस चरणार विंद का अंतःकरण में ध्यान करते हैं उस कृष्ण भगवान् के चरणार विंद को रास गोष्ठी के मध्य में अपने स्तनों पर स्थापन करके आलिंगन करके अपनी सब मन की पीडा को नाश किया है ॥ ६२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

इदं महत्त्वं प्रतिपाद्य नमस्करोति । वन्द इति ॥ ६३ ॥

अनुज्ञाप्यानुज्ञां याचित्वा आमन्त्र्य पृष्ट्वा ॥ ६४-६५ ॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

अतःसाक्षाच्छ्री भगवांस्तद्व्रजसेवापि मे दूरे तावदास्तामीदृशभावासिद्ध्ये श्रीगोपी रेवैताः प्रणमामीति यद्वा आसामीदृशमाहात्म्यगाने मम का शक्तियोग्यता केवलं यत्र तत्र निपतितमासां पादाब्जरज एवैकं नमामि इत्येवमेव सदा वन्द इत्याह वन्द इति । नन्दव्रजस्य स्त्रीणामिति किम्पुनरासां श्रीभगवत्प्रियतमानाम् आसां सम्बन्धेन सर्वासामपि नन्दव्रजवर्तिस्त्रीजातीनामित्यर्थः । यासां हरेः सर्वथा सर्वमनोहरस्य भगवतःकथाया उद्गीतम् उच्चैर्गानं भुवनत्रयमूर्ध्वाधो मध्यलोकान् जगदेव पुनाति मुमुक्ष्वादिसर्वमनः शोधयति तथा च प्रागुक्तम् उद्गायतीनामित्यादि यद्वा हरिकथायाः उद्गीतं यासामुच्चैर्माहात्म्यगानं माहात्म्यनिबन्धमुक्तकीर्ति वा यद्वा यासामुद्गीतमेव हरिकथा इत्यासां माहात्म्यगानमेव मम कृत्यम् अत्र चिरवासादिना श्रीयदुकुलापचापलेऽपि न मे किञ्चिद्भयमिति गूढभावः । इदं गानवन्दनञ्च तासां साक्षादेव श्रेयं ततश्च नन्दव्रजस्त्रीणामिति प्रत्यक्षत्वेऽपि परोक्षवदुक्तिः तेनैव शब्देन तासां माहात्म्यभरबोधनात् किम्वा गौरवविशेषेण तथैव वाच्यत्वात् अत एव यूयमित्याद्यनिर्देशः यद्वा परमलज्जादिगुणवतीनां तासां माहात्म्यस्तुत्यसहिष्णुतया परोक्षमेवेति ततश्च एता इति आसामिति च नैकस्थेन प्रस्तुतत्वेन वा किम्वा सदा हृदि वर्त्तमानत्वेन प्रत्यक्षत्वादिवेति ॥ ६३ ॥

तं श्रीमदुद्धवं वन्दे कृष्णभक्तवरोऽपि यः ।
गोपीपादाब्जधूलीस्पृक्तृणजन्माप्ययाचत ॥

अथ कालान्तरे अप्यर्थे एवशब्दः चशब्दः समुच्चये चकारात्तद्दासदासीगणवार्दीश्चामन्त्र्य गोप्यादीनां यथोत्तरं श्रीभगवत्प्रेमतारतम्येन तत्तदनुज्ञादिप्रार्थनेऽपि तत्तत्क्रमेण निर्देशः अत एव गोपानामामन्त्रणमेव दाशार्हः यदुकुलोद्भव इति यादवानां हितार्थमिति भावः । अन्यथा सर्वोपकारपरसम्भन्त्र्यभावेन तेषां दुःखापत्तिः आरुरुह आरोढुमुद्यतः ॥ ६४ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

तस्मादहो आस्तामातिसुग्धस्य ममासां साक्षान्नमस्कारसाहसः एतत् सजातीयत्वात् अन्यासामपि पादरेणुमेव नमस्करवाणि न च साक्षादेव ता इति सकम्पगद्गदं चाटुमाह । वन्द इति । यासामिति याभिः कर्त्रीभिरित्यर्थः । हरिकथाया उद्गानम् उद्गायतीनामरविन्दलोचनमित्येतत्प्रकारं यद्वा । यत्सम्बन्धिहरिकथाया

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

उद्गानं तत्तन्महानुभावैरुच्चैर्गानं सम्बन्धपरम्परया भुवनत्रयम् ऊर्ध्वाधोमध्यलोकं सर्वमपि पुनाति । एतद्विपरीतोदासीनसर्वभावापसारतः शोधयति मन्दाकिन्युक्तो भुवनं पुनातीति वत् प्रकरणेऽस्मिन् श्रीवेदव्यासमहावक्तॄणां तात्पर्यमिदम् । सर्वभागवतानां मध्ये श्रीकृष्णसम्बन्धिनः खलु परमश्रेष्ठास्तस्यैव स्वयं भगवत्त्वात् । तत्रापि तल्लीलापरिकरा एवान्तरङ्गाः अन्येषां तदनुगतत्वात् तेष्वपि श्रीमानुद्धवः त्वन्तु भागवतेष्वहं भक्तमेकान्तिनं क्वचित् । अहं भर्तुरहस्करः कृष्णस्य दयितः सखा नोद्धवोऽण्वपि मन्न्यून इत्यादिदर्शनात्तस्य चेदृशी तद्भावस्पृहा तास्वादरो दैन्यञ्च श्रूयते न जातु पट्टमहिषीष्वपीति केन वा तासाञ्च चरणारविन्दं नानुगमनीयं तत्रापि श्रीराधाया इति ॥ ६३ ॥

तं श्रीमदुद्धवं वन्दे कृष्णश्रेष्ठवरोऽपि यः ।
गोपीपादाब्जधूलिस्पृक् तृणजन्माप्ययाचत ॥

अथ कालान्तर एव चशब्दः समुच्चये । अनुज्ञाप्य तेषां चित्तसमाधनपूर्वकमाज्ञां प्रार्थयित्वा । गोप्यादिनिर्देशक्रमोऽयं तदादीनां प्रेम्णो यथापूर्वप्रकर्षमनुभूय तत्क्रमादेवानुज्ञा प्रार्थितेति व्यनक्ति । पूर्वोक्तयुक्त्या सान्त्वनाया मुख्यत्वात् गोपांस्त्वामन्त्र्य यथायथं श्रीव्रजेश्वराद्यनुज्ञाश्रावणसहितं सम्बोध्य हे अमुक ! तेषामाज्ञा जातास्ति सम्प्रति गच्छाम इति प्रतिजनं सम्भाष्येत्यर्थः । दाशार्ह इति तत्कुलोद्भवत्वेनैव सर्वनीतिज्ञः किं पुनः स वैशिष्ट्येनेति भावः ॥ ६४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

इत्थं व्रजस्त्रीणां पूज्यतां प्रतिपाद्य नमस्करोति । वन्द इति । अभीक्ष्णशः पुनः पुनर्नन्दव्रजस्थस्त्रीणां पादरजो वन्दे सेवे कथंभूतानां यासां नन्दव्रजस्त्रीणां हरिकथोद्गीतमिति भावे क्तः हरिकथोद्गानं लोकत्रयं पुनाति तथाभूतानाम् ॥ ६३ ॥

अथानन्तरमनुज्ञाप्यानुज्ञां याचित्वा आमन्त्र्य पृष्ट्वा दाशार्ह उद्धवः यास्यन् "लक्षणहेत्वो" रिति शत्रादेशः यातुं रथमारुरुहे ॥ ६४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

वन्दे स्तौमि ॥ ११—१३ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

अन्यार्थमेवैषा प्रशंसेत्याशङ्क्य पूर्वमपि नमस्कारार्थमेतदारब्धमिति प्रतिज्ञातत्वात् ता नमस्यति । वन्दे नन्दव्रजस्त्रीणामिति । तासां नमस्कारेऽपि नास्माकमधिकारः किन्तु नन्दस्य स्त्रीमात्रस्य पादरेणुमेवैकम् अभीक्ष्णशो वन्दे अस्मदपेक्षया स रेणुः महानेवोत्कृष्टः फलरूपश्चेत्पादरेणुं वन्दे । ननु कथमेवमत्याश्चर्यम् उच्यत इत्याशङ्क्य लोके तदुपपादयति । यासां हरिकथोद्गीतमिति । हरिकथापेक्षयापि हरिकथया वा सह ऊर्ध्वं गीतं यासां सम्बन्धि गीतं भुवनत्रयमेव पुनाति गानमात्रेणैव पुनातीति गङ्गातोऽप्युत्कर्षः गुणानां साधकत्वं बाधकत्वं वा नास्तीति ज्ञापनाय त्रयमिति ॥ ६३ ॥

एवं भगवत्कृतं तासां निरोधं समर्थयित्वा तादृशमपि भगवान् करोतीत्यवगतभगवन्माहात्म्यः भिन्नप्रक्रमेण भगवत्स्थाने समागत इत्याह । अथ गोपीरिति । अनुज्ञां प्रार्थयित्वा तथा यशोदां नन्दमेव च त्रय एवात्र प्रकरणे मुख्याः ततोऽमित्रभूतान् गोपानामन्त्र्य गच्छामीत्युक्त्वा यतोऽयं दाशार्हः यादव श्रेष्ठः दाशार्हभेदः वस्तुतो भक्तिप्रधानो भक्तिहितकारी ततो यास्यन्नतु विश्रामार्थं रथमारुरुहे स पूर्वमप्येवं बहुधा चकार ततो नोद्यमनमात्रेण गमनौपयिकं कोऽपि करोति ॥ ६४ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

एवं महत्त्वं प्रतिपाद्य प्रणमति । वन्द इति । पादरेणुमभीक्ष्णं तत्रापि शस्प्रत्ययेन प्रतिक्षणमेव न तु त्रिकालं पञ्चकालं वेत्यर्थः यावदनायासेन तत्प्राप्त्यनुकूलतृणादिजन्मभाग्यं मे नाभूदिति भावः । यासामुद्गीतं यस्य कर्मकमुच्चैर्गानमेव हरिकथा भुवनत्रयं पवित्रीकरोत्यविद्यामालिन्यादिति भावः । प्रकरणेऽस्मिन् व्यासादिमहावक्तॄणां तात्पर्यमिदं सर्वभागवतानां मध्ये कृष्णसम्बन्धिनः श्रेष्ठाः कृष्णस्य तस्यैव स्वयं भगवत्त्वात् तत्रापि तल्लीलापरिकरा एवान्तरङ्गाः अन्येषां तदनुगतत्वात् तेष्वपि श्रीमानुद्धवः त्वं तु भागवतेष्वहमिति नोद्धवोऽण्वपि मन्न्यून इत्यादि दर्शनात्तस्यापीदृशी भावस्पृहा तास्वादरोऽधिकः न जातु पट्टमहिषीष्वपीति केन वा तासां चरणकमलं नानुगमनीयं तत्रापि श्रीराधाया इति श्रीवैष्णवतोषणी ॥ ६३ ॥

अनुज्ञाप्य अनुज्ञां याचयित्वा आमन्त्र्य पृष्ट्वा ॥ ६४ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

एवं तदीयं महत्त्वं प्रतिपाद्य तासां साक्षान्नमस्कारे स्वाधिकाराभावं मन्यमानस्तत्पादरेणुं नमस्करोति । वन्द इति । तात्रप्येकमेव रेणुमभीक्ष्णशः पुनः पुनः कोटिकोटिवारं परमादरेण वन्दे न चास्मदाद्यपेक्षया तत्पादरेणुमहत्त्वे विस्मयः कार्यो यतः स्नानादिना पावनशक्तिमतीनां श्रीगङ्गाप्रमुखानां सरिद्वराणां पुलिनरेणुरपि वन्द्यते नन्दव्रजयोषितस्तु गानमात्रेण सर्वपावनशक्तिमत्य इत्याशयेनाह । यासामिति । हरेः पापहारकस्य कथापेक्षयापि उत्कृष्टं गीतं हरिकथासहितमूर्ध्वं गीतमिति वा हरिकथारूपम् उच्चैर्गीतमिति वा भुवनत्रयं समस्तं ब्रह्माण्डं पुनाति तथा चैवम्भूतानां तासां पादरेणुवन्दनेनापि वयं कृतार्था इति भावः ॥ ६३ ॥

एवं यदर्थं भगवता प्रेषितस्तत्सर्वं सम्पाद्य पुनर्भगवत्सन्निधौ गन्तुं प्रवृत्त इत्याह । अथेति । गोपीर्भगवदीयाः यशोदां तत्पूज्यां तन्मातरं तथा तत्पितरं श्रीनन्दरायं च एवकारेण तत्त्रयाणामेवात्र प्राधान्यं बोधितम् अत एवानुज्ञाप्यानुज्ञां प्रार्थयित्वेत्युक्तं ततस्तन्मित्राविभूतान् गोपानामन्त्र्य गच्छामीत्युक्त्वा यास्यंस्तु विश्रमार्थं रथमारुरुहे यतो दाशार्हेषु यादवभेदेषु मुख्यः तथा भगवदादिभिराकाङ्क्षितसन्निधानः ॥ ६४ ॥

तं निर्गतं समासाद्य नानोपायनपाणयः ।
नन्दादयोऽनुरागेण प्रावोचन्नश्रुलोचनाः ॥ ६५ ॥
मनसो वृत्तयो नः स्युः कृष्णपादाम्बुजाश्रयाः ।
वाचोऽभिधायिनीर्नाम्नां कायस्तत्प्रह्वणादिषु ॥ ६६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

एवं गोपीनां महत्त्वमुक्त्वा नमस्करोति । वन्द इति ॥ ६३ ॥ दाशार्हैः महाकुलप्रसूतोऽपि गोपीः हरिप्रियाः अनुज्ञाप्य आज्ञां याचित्वा आमन्त्र्य पृष्ट्वा ॥ ६४ ॥ ६५ ॥

भाषा टीका ।

इन व्रजस्त्रियों की चरण रजको मैं निरंतर वंदना करूंगा जिनकी गाई हुई हरिकथा का गान तीनों भुवनों को पवित्र करता है ॥ ६३ ॥

श्री शुकदेव जी वोले इस के अनंतर उद्धव जी गोपी तथा नंदजी एवं यशोदा जी इन सबों से आज्ञा मांग कर पूंछ कर और गोपों से भी मिल कर जाने के लिये रथपर चढते भये ॥ ६४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

नोऽस्माकं मनसो वृत्तयः कृष्णपादाम्बुजाश्रयाः स्युः अभिधायिनीरभिधायिन्यः ॥ ६६ ॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

निर्गतं व्रजाद्बहिर्निर्गतं सन्तं समासाद्य दूरतः सङ्गम्य यद्वा सम्यक् आसाद्य ज्ञात्वा निश्चित्येत्यर्थः वारं वारं कृतप्रस्थानस्यापि तस्य दूरतो विदूरतोऽपि निवृत्तः नानेति निजमुद्रालाञ्छितं पुत्रार्थं श्रीव्रजेश्वर्या दत्तनवनवनीतक्षीरलड्डुकादिकं पृथक् तथा श्रीबलरोहिण्यर्थं श्रीदेवक्यर्थं च पृथक् पृथक् श्रीव्रज देवीभिश्च निजप्राणेश्वरार्थं निजनिजशिल्पचिह्नितं गुञ्जाहारादिकं पृथक् श्रीदामादिभिश्च प्रियसखार्थं तत्परिचितवन्यफलमूलादिकं पृथक् श्रीव्रजेश्वरेणापि पुत्रार्थं कस्तूरीगजमौक्तिकहारादिकं श्रीवसुदेवार्थं घृतपक्वादिकमुग्रसेनार्थं च गोरसादिकं पृथक् पृथगित्येवं नानाविधैरुपायनैर्युक्तपाणयः सन्तः अनुरागेणाश्रुयुक्तलोचनाश्च सन्तः अत एव प्रकर्षेण आर्त्तस्वरगद्गदभाषादिना सर्वचित्ताकर्षकत्वादिनावोचन् ॥ ६५ ॥

कृष्णस्य कृष्ण इत्याख्यया प्रसिद्धस्य साक्षाद्भगवतः पादाम्बुजमेवाश्रयो विषयो यासां तथा भूताः स्युः सन्तु वृत्तय इत्यनेन सदा सर्वथैवान्तस्तत्तत्परिस्फूर्त्तिरभिप्रेता वाचो गिरः वागिन्द्रियस्य च वृत्तयो वा तदिति तस्य एवमत्रापि तत्सम्बन्धः इत्य कृष्णस्य नाम्नां श्रीकृष्णदामोदरगोविन्दादीनां किंवा गौरवेण बहुत्वं कृष्णेति नाम्नः अभिधायिनीः कीर्त्तनशीलाः प्रह्वणं भक्त्या प्रणामः आदिशब्दात् परिचर्य्यादयश्च तेषु एवं मानसवाचिककायिकभक्तिप्रकाराः प्रार्थिताः विशुद्धवात्सल्यभाजोऽपि श्रीव्रजेशस्य कृष्णपादाम्बुजाश्रया इत्यादिषु पादादिशब्दप्रयोगः प्रबलप्रेमविश्लेषजन्मदैन्यवैवश्येनैवेति ज्ञेयं यद्वा नन्दादयो ऽश्रुलोचनाः सन्तः प्रावोचन्नित्यत्र वक्तुं प्रवृत्तस्य व्रजेशस्याश्रुरुद्धकण्ठत्वे जातेऽपरे गोपाः प्रावोचन्नित्यत्रातद्गुणसंविज्ञानो बहुव्रीहिः यतो मनसो वृत्तयो नः स्युरिति तस्य प्रार्थना न घटते स्मरतां कृष्णवीर्य्याणीत्यादिना सदैव तत्स्मरणस्योक्तत्वात् ॥ ६६ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

रथारोहणपरिपाटीमाह । निर्गतं रथारोहणार्थं व्रजद्वारि निर्गत्य स्थितं सन्तं नानेति निजमुद्रालाञ्छितं पुत्रार्थं श्रीव्रजेश्वर्या दत्तं नवनीतक्षीरलड्डुकादिकं तथा श्रीबलदेवरोहिण्यर्थं श्रीदेवक्यर्थञ्च श्रीव्रजदेवीभिश्च प्राणेश्वरार्थं निजशिल्पचिह्नितं गुञ्जाहारादिकं श्रीदामादिभिश्च प्रियसखार्थं तत्परिचितवन्यपुष्पफलमूलादिकं श्रीव्रजेश्वरेणापि पुत्रार्थं कस्तूरीगजमौक्तिकहारादिकं श्रीवसुदेवार्थं घृतपक्वान्नादिकमुग्रसेनार्थञ्च गोरसादिकं सर्वैश्च श्रीमदुद्धवार्थं वस्त्रालङ्करणादिकं पृथक् पृथगित्येवं नानाविधैरुपायनैर्युक्तपाणयः सन्तः प्रकर्षेण गद्गदत्वादिगुणयुक्ततया अवोचन् ॥ ६५ ॥

अनुरागेण प्रावोचन्नित्युक्तवान्मनस इत्यादिरनुरागकृतैवोक्तिर्नतैश्वर्यज्ञानकृता । तस्मात्तस्यैश्वर्यप्रधानं मतमालोच्य स्वात्यन्तदुःखव्यञ्जकेन तदभ्युपगमवादेनैव स्वाभीष्टं प्रार्थयन्ते । मनस इति द्वाभ्याम् । यदि भवद्भिरसावीश्वरत्वेनैव मन्यते यदि चास्माकं तत्प्राप्तिर्दूरतः एव तथापि तत्रैवास्माकं तदुचिता वृत्तयः सर्वाः स्युर्नतु तत उदासीना इत्यर्थः । प्रह्वणं प्रह्वाणं नम्रत्वं तदादिषु आदिग्रहणात् सेवादिकम् ॥ ६६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तमिति । निर्गतं व्रजान्निष्क्रान्तं तमुद्धवं समासाद्यानुरागेण प्रोचुः कथम्भूताः नानाविधान्युपायनान्यर्हवस्तूनि पाणिषु येषामश्रूणि लोचनयोर्येषां तथाभूताः ॥ ६५ ॥

उक्तिमेवाह । मनस इति । नोऽस्माकं मनसो वृत्तयः कृष्णपादाम्बुजविषयाः स्युः, वाचस्तु तन्नामाभिधायिन्यः स्युः काया देहास्तु तन्नमस्कारादिषु प्रवणाः स्युः ॥ ६६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

नोऽस्माकं मनसो वृत्तयो व्यापाराः कृष्णपादपद्माश्रयाः स्युः अस्माकं वाचो नाम्नामभिधायिनीर्वदन्त्यः स्युः अस्माकं कायस्तस्य प्रवणादिषु नमस्कारादिषु स्यादित्यन्वयः ॥ ६४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

रथारोहणपरिपाटीमाह । तमिति । निर्गतं रथारोहणार्थं व्रजद्वारि निर्गत्य स्थितं सन्तम् ॥ ६५ ॥

अनुरागेण प्रावोचन्नित्युक्तत्वान्मनस इत्यादिरनुरागकृतैवोक्तिर्न त्वैश्वर्यज्ञानकृता तस्मात्तत्प्रधानं मतमालोक्य स्वान्तर्दुःखव्यञ्जकेन तदभ्युगमवादेनैव स्वाभीष्टं प्रार्थयन्ते । मनस इति द्वाभ्याम् । यदि भवद्भिरसावीश्वरत्वेनैव मन्यते । यदि वास्माकं तत्प्राप्तिर्दूरत एव तथापि तत्रैवास्माकं तदुचिता वृत्तयः सर्वाः स्युः न तु तदुदासीना इत्यर्थः ॥ ६६ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

यदा पुनः स निर्गत एव तदा तदर्थं भगवदर्थं च उपायनान्यानीय प्रस्थापनार्थं समागता इत्याह । तं निर्गतमिति । समागत्याग्रे मिलित्वा नानोपायनानि पाणौ येषां स्नेहेन नन्दादयः अश्रुलोचनाः सन्तः प्रावोचन् ॥ ६५ ॥

तदुपदिष्टोऽर्थः तेषां हृदये समागत इति ज्ञापनार्थं तत्फलसिद्ध्यर्थं गुरुं प्रार्थयन्ति । मनसो वृत्तय इति द्वाभ्याम् । अस्माकं कायवाङ्मनांसि कृष्णसम्बन्धिकार्यपराण्येव भवन्तु अयमेवोत्कर्षः प्रार्थनीयः न तु लोके प्रसिद्धः अन्यः कोऽप्युत्कर्ष इति ज्ञापयितुं कर्मभिर्भ्राम्यमाणानां यत्र क्वचिद्योनौ सतां तदर्थं प्रार्थनायामुदासीनानां स्वैरेव मङ्गलाचरितैर्दानैश्च मङ्गलाचरितानि सर्वसाधारणानि दानं विशेषधर्मः वैश्येष्वेव दयामुनिवृत्तिः कृष्णे रतिरसाधारणी इतोऽप्युत्तमास्माकमस्तु द्वयं प्रार्थितं सङ्घातस्य भगवति विनियोगः आत्मनश्च भगवति स्नेह इति मनसो ह्येकादश वृत्तयः ताः सर्वाः कृष्णपादाम्बुजमेवाश्रित्य तिष्ठन्तु क्रियया ज्ञानेनाभिमत्या च अम्बुजे हि रूपरसगन्धस्पर्शाः स्पष्टाः शब्दोऽन्यत्रापि स्वतन्त्रतया विनियोक्ष्यत इति न न्यूनता कापि आश्रयपदेन प्रसङ्गात्करणं निवारितम् वाचोऽपि नाम्नामेवाभिधायिन्यः न तु तत्रैव पर्यवसितसर्वशक्तिरूपं भवति नत्वेवंविधानि गुणकर्माणि पदार्थान्तरवाचकत्वाच्छान्दसप्रयोगाल्लौकिकपरा वाचो मा भवन्त्विति ज्ञापितं कायः शरीरं च तस्य भगवतः प्रह्वणादिनमस्कारादिपूजासाधनादिषु भवतु प्रकरणेन प्रार्थना कर्मभिरवश्यं भ्रमणम् ईश्वरस्यापि तथैवेच्छेति न कर्मस्वातन्त्र्यम् अत एव स उत्कर्षः अप्रयोजक इति यत्र क्वापीत्युक्तं ननु वाङ्मनसां भगवति विनियोगे मङ्गलाचरितानि कुत्रत्यानीति चेत् सत्यं यावदेतद्भविष्यति तावत्कर्माणि न त्यक्तानीति तेषामन्यथा फलं मा भवत्विति तथा प्रार्थयन्ति किं च ईश्वरभाव एव कृष्णे सर्वदा भवत्वित्यपि प्रार्थनात्रयम् ॥ ६६ ॥ ६७ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

नानोपायनानि कृष्णस्य पौगण्डकैशोरविलाससमय एव यानि सञ्चितानि बहुरत्नस्वर्णमुद्रामुक्तालङ्कारादीनि यौवने सति कृष्णस्य परिधास्यमानानि तदा तु तद्वियोगात्तेषु ममतात्यागात्तान्येवोपायनत्वेन कल्पितानि ज्ञेयानि ॥ ६५ ॥

भो आयुष्मन्नुद्धव ! आवयोर्मातापित्रोस्तादृशेऽपि महारूपगुणशीलसमुद्रेऽपि बालके महाकठोरत्वमेवासीदधुनापि वर्त्तत एव तदानीं यद्बहुतरस्नेहलालनादिकं कृतं तत् सर्वं कृत्रिममेवेत्यधुनाऽवगतं यत्तद्विरहेऽप्यावाभ्यां जीव्यते पिता खलु जगत्येकः स एव दशरथो यः पुत्रं रामं विदूरगतं श्रुत्वैव प्राणांस्तत्याज आवयोस्तु तस्मिन् पुत्रे कृष्णे प्रेमगन्धोऽपि नास्तीत्यत एवाभिज्ञचूडामणिरस्मत्पुत्रः सः स्वाननुरूपौ पितरौ परित्यज्य परमेश्वरत्वेनातर्क्यविचित्रत्वादन्यावेव देवकीवसुदेवौ पितरौ चकार तद्विगावां त्रिजगत्यतिदुर्भगौ यशोदानन्दौ तदपि कस्मिंश्चिदपि भाविजन्मनि तस्मिन्मतिः स्ताद्रतिः स्तादिति प्रार्थयते द्वाभ्याम् । मनसो वृत्तयो न स्युरिति । महानुरागमहावर्त्त एवायम् अत एव मनआदीन्द्रियाणां प्रतिक्षणमेव कृष्णरूपादिनिमग्नत्वेऽपि मनसो वृत्तयः कृष्णपादाम्बुजाश्रयाः स्युरिति रतिः स्यादिति प्रार्थनायां लिङ् दैन्यसञ्चारिणो महाप्राबल्यं ज्ञापयति किं च सख्यवात्सल्योज्ज्वलप्रेमवतां स्वभाव एवायं यत् विरहवैवश्येन विषयालम्बनस्य स्वस्मिन्नौदासीन्य ज्ञानेन च जनिते महादैन्ये स्वस्वभावविच्युतिर्दास्यभावग्रहणं च यथायमपि कृष्णे नाद्यावधि नः विश्वस्तमौदासीन्यादेवेति मत्वा बलदेवेन प्रायो मायास्तु मे भर्तुरित्युक्तं दास्यास्ते कृपणाया मे इति श्रीवृन्दावनेश्वर्याः क्वचिदपि स कथां नः किङ्करीणां गृणीते इति श्रीगोपीभिर्मनसो वृत्तयो नः स्युरिति श्रीनन्दाद्यैः न तु सुखसमयेऽपि देवकीवसुदेवाभ्यामिव युवां न नः सुतावित्यादिकमैश्वर्यज्ञानजनितस्वसम्बन्धत्यागपूर्वकं कदाप्युक्तम् ॥ ६६ ॥ ६७ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

तद्गमनस्य कस्याप्यनभिलषितत्वात्पूर्वं केनाप्युपायनाद्यानयनोद्योगो न कृत इत्याशयेनाह । तमिति । अकस्मात्तं निर्गतमेव संमासाद्योपलभ्य नानोपायनानि पाणौ येषान्ते नन्दादयः अनुरागेणाश्रुभिरन्धीकृतलोचनाः सन्तः प्रकर्षेणोच्चैरवोचन् ॥ ६५ ॥

तत्प्रवचनमुदाहरति । मनस इति । नोऽस्माकं मनसो वृत्तयः कृष्णस्य सदानन्दरूपस्य परमात्मनोऽस्मदर्थं गृहीतकृष्णावतारस्य पदाम्बुजमाश्रयो यासां तथाभूताः स्युस्तथा चास्मन्मनसो या वृत्तिरुदेतु सा तदाश्रयैवोदेतु न त्वन्यालम्बना तदतिरिक्तं वस्तुमात्रमस्मच्चित्ते कदापि मा प्रविशतु तथा वाचोऽपि कृष्णस्य नाम्नामभिधायिन्यः स्युः तथा कायस्तस्य श्रीकृष्णस्य वन्दनार्चनादिषु स्यात् तथा च सर्वदा तद्गतकायवाङ्मानसाः स्यामेत्यस्मत्प्रार्थना श्रीकृष्णाग्रे वक्तव्येत्यर्थः ॥ ६६ ॥

कर्मभिर्भ्राम्यमाणानां यत्र क्वापीश्वरेच्छया ।
मङ्गलाचरितैर्दानैरतिर्नः कृष्ण ईश्वरे ॥ ६७ ॥
एवं सभाजितो गोपैः कृष्णभक्त्या नराधिप ! ।
उद्धवः पुनरागच्छन्मथुरां कृष्णपालिताम् ॥ ६८ ॥
कृष्णाय प्रणिपत्याह भक्त्युद्रेकं व्रजौकसाम् ।
वसुदेवाय रामाय राज्ञे चोपायनान्यदात् ॥ ६९ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे
पूर्वार्धे उद्धवप्रतियाने
सप्तचत्वारिंशोऽध्यायः ॥ ४७ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

नोऽस्माकं मनसो वृत्तयः अभिधायिनीः अभिधायिन्यः ॥ ६६—६९ ॥

भाषा टीका ।

जाते हुये उन उद्धव जी को देख कर नंदादिक सब गोप हाथों में नाना प्रकार के भेटों को लेकर अनुराग के वश होकर नेत्रों मे आंसू लाकर वोलते भये ॥ ६५ ॥

हम सब लोगों की मनकी वृत्ति सब श्रीकृष्ण चरण कमल में लगी रहैं हमारे वचन उनके नामों को कथन करैं हमारे शरीर उनके प्रणामादिकों में लगे रहैं ॥ ६६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

कृष्णे रतिः स्यादिति ॥ ६७-६८ ॥

कृष्णादिभ्यो भक्त्युद्रेकमाह । उपायनानि चादादिति ॥ ६९ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
सप्तचत्वारिंशोऽध्यायः ॥ ४७ ॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

नच प्रार्थितैरेतैर्भक्तिप्रकारैश्च शुभकर्मभिः श्रीकृष्णप्रेम विनाऽन्यत्किञ्चिद्वाञ्छाम इत्याहुः । कर्मभिरिति । ईश्वरस्य तस्यैव कर्मफलदातुरिच्छया कर्मभिर्यत्र क्वापि भूमावूर्ध्वलोके वा भ्राम्यमाणानां नोऽस्माकं मङ्गलाचरितैर्नित्यनैमित्तिकादिशुभकर्मभिः पृथगभावादिदानैश्च मङ्गलाचरितान्तर्भूतानामपि दानानां पृथगुक्तिः गोपेन्द्रस्य परमवदान्यत्वात् यद्वा प्रार्थितैर्मनोवृत्त्यादिरूपैर्मङ्गलाचरितैः दानैश्च तस्मिंस्तत्समर्पणैः बहुत्वं प्रत्येकं सर्वेषामेवार्पणेन तद्बाहुल्यात् कृष्णे रतिरस्तु "न कर्मबन्धनं जन्म वैष्णवानां तु विद्यते" इति पाद्माद्युक्त्वा वैष्णवानामेव तावत् कर्मभिर्भ्रमणं नास्ति तत्रापि नित्यप्रियाणां व्रजवासिनां तथापि श्रीभगवदिच्छानुसारिलीलानिमग्नत्वेन संसारित्वाभिमानादेतैस्तथोक्तम् ॥ ६७ ॥

एवम् ईदृशमिति तादृशमन्यदपि बोधयति । तच्चासकृच्छ्रीकृष्णागमनादिकं ज्ञेयम् । यद्वा एतदित्यर्थः तस्यापि प्रीत्यधीनत्वात् कृष्णे भक्तिः प्रेमलक्षणतयैव हेतुना सम्यक् प्रार्थितं यतो गोपैस्तत्तत्काप्रियैरित्यर्थः प्रेम्णो दैन्योत्पादनशीलत्वात्तद्वतां तादृशप्रार्थनं श्रीभगवत्प्रियवरे तस्मिन् युक्तमेवेति भावः । तच्च त्वया बुद्धचत एवेत्याशयेन सम्बोधयति । नराधिपेति । यद्वा कृष्णभक्त्येत्यस्य परेणान्वयः गोपानां कृष्णभक्त्या हेतुना तद्विज्ञापनार्थं मथुरामगच्छदित्यर्थः । उद्धव इति तदागमनेन गृहे परमोत्सवोऽभूदिति भावः नन्वेतावन्तं कालं सन्मन्त्रादिप्रदेन तेन विना कथं तत्रत्याः सुखमासन् तत्राह । कृष्णेन पालितामिति । एतेन तत्र पूर्वतोऽधिका विविधसम्पत्तिरपि सूचिता ॥ ६८ ॥

प्रणिपत्य साष्टाङ्गं प्रणम्येति भक्तिस्वभावात् तत्रापि चिरप्रवासागमनात् किं वा विज्ञापनाविशेषार्थम् आह अकथयत् भक्तेः उद्रेकं विरहे विवृद्धिम् अतः साक्षात्त्वद्दर्शनादेव तेषां प्रीतिर्दुःखशोकनिवृत्तिश्च न तु मद्वार्तादूत्येण त्वत्सन्देशेनेति भावः । ननु तर्हि कथमत्र ते नायान्ति तत्राह । व्रजौकसामिति । तत्रैव त्वत्सन्दर्शनमिच्छन्ति न त्वत्र स्वातन्त्र्यरहिते पदे इति भावः । त्वर्थे चकारः कृष्णाय वसुदेवरामाभ्यां च भक्त्युद्रेकमाह । राज्ञे उग्रसेनाय तु उपायनान्यदात् न च भक्त्युद्रेकमाह राजत्वेन तस्य मात्सर्यशङ्कया यद्वा समुच्चये चकारः कृष्णादिभ्यः प्रणिपत्य भक्त्युद्रेकमाह । उपायनानि च तान्यदात् ॥ ६९ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे
श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिण्याम्
सप्तचत्वारिंशोऽध्यायः ॥ ४७ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

कृष्णे ईश्वर इति । ईश्वररूपेऽपि कृष्ण एवेत्यर्थः । तदिच्छयेत्यनुक्त्वा ईश्वरेच्छयेति पृथगीश्वरपदोक्तिः स्वभावानुसारेण कर्मभिरिति नरलीलापन्नत्वादात्ममि साधारणयमनेनेन मङ्गलाचारैतैः पुण्यकर्मभिः । दानस्य पृथगुक्तिस्तेषां खलु प्राचुर्यात् । अथ च वाक्यद्वयमिदं वियोगमयपितृवात्सल्येनापि सम्भवतीति ॥ ६७ ॥

एवमध्यायद्वयोक्तिक्रमेण सभाजितः कृष्णभक्त्या कृष्णासक्त्यैवेति पूर्ववत् । नन्वासामहो इत्यादिरीत्या तादृशवृन्दावनासक्तश्चेत् कथं मथुरां पुनरागच्छत्तत्राह । कृष्णपालिताम् । सम्प्रति श्रीकृष्णेन सा पाल्यत इति तत्प्रियतमभृत्यैस्तैस्तत्रागमनं कथमिव कर्तुं शक्यत इति भावः ॥ ६८ ॥

प्रथमं तावन्निजान्तःपुरस्थिताय श्रीकृष्णाय प्रणिपत्य प्रणिपातपूर्वकं तत्कृतालिङ्गनकुशलप्रश्नादिकं पूर्वं वृत्तं निर्वाह्य क्रमतस्तत्कृतप्रश्नविशेषमुपलभ्य व्रजौकसां तत्पित्रादीनां भक्त्युद्रेकं प्रेमातिशयं तत्तद्वचनचेष्टात्मकं यथावसरं यथायोग्यं सर्वमेवाह । तच्च साक्षात्तद्दर्शनादेव तेषां प्रीतिर्दुःखशोकनिवृत्तिश्च सम्यग् भवति न तु मच्चातुर्येण त्वत्सन्देशैर्वेत्यभिप्रायात्मकमिति ज्ञेयम् । तदनन्तरं यथावसरं पूर्ववत् यथाक्रमं वसुदेवादिभ्यस्तेषां भक्त्युद्रेकं यथायुक्तमाह । तदनन्तरमेव यथावसरं तस्मै तेभ्यश्चोपायनान्यप्यदादिति विवेचनीयम् ॥ ६९ ॥

सोऽयमुद्धवसन्देशः श्रीरामस्य व्रजागमः ।
दन्तवक्त्रवधस्यान्त्या टिप्पणी च पुरेक्ष्यताम् ॥
व्रजैकजीवनैः शीघ्रं व्रजे कृष्णगतीप्सुभिः ।
तत्रत्युक्तं गवेन्द्रस्य व्रजागमनमङ्गलम् ॥
अन्तर्हत्य व्रजौकोभिर्नित्यक्रीडासु शर्म च ।
पश्चाद्यथेष्टमन्यच्च दृश्यतां तस्य पुष्टये ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिण्याम् सप्तचत्वारिंशोऽध्यायः ॥ ४७ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

[1] स कृष्णेन चरिता इति सरिच्छैलवनोद्देशविशेषणम् ॥ ४८—५६ ॥

कृष्णावेशात्मविक्लवं कृष्णसमावेशेन मनसो वैक्लव्यम् ॥ ५७ ॥

यद्येन गोविन्द एव रूढभावः यद्रूढभावत्वं भवभियः संसाराद्भीतिमन्तः ब्रह्मजन्मभिः ब्राह्मणजन्मभिः ५८ ॥ ६० ॥

अविदुषामप्यकर्मकरत्वे मनो ग्राह्यैकदृष्टान्तमाह । आसां गोपीनां चरणरेणुजुषां गुल्मलतौषधीनां याः तासां मध्ये अहं किमपि स्याम् ॥ ६१ ॥ ६५ ॥

ब्रह्मण्यं प्रणामः ॥ ६६ ॥ ६९ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे श्रीसुदर्शनसूरिकृतशुकपक्षीये सप्तचत्वारिंशोऽध्यायः ॥ ४७ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

कर्मभिरिति यत्र क्वचिदीश्वरेच्छया कर्मानुगुणया कर्मभिः पुण्यापुण्यात्मकैर्भ्राम्यमाणानां संसरतामस्माकं यदि मङ्गलाचरितानि शुभकर्माणि दानानि च सन्ति तर्हि तैर्हेतुभिः कृष्णे भगवति रतिरनुरागः स्यादिति मलाङ्कचरितप्रदर्शनार्थं दानैरित्युक्तम् ॥ ६७ ॥

एवमिति । हे नराधिप ! राजन् इत्थं गोपैः कर्तृभिः कृष्णभक्त्या करणभूतया सभाजितः संमानितः स इति पृथक् पदं वा उद्धवः कृष्णेन पालितां लालिताम् इति पाठे अनुरञ्जितां मथुरां पुनराजगाम ॥ ६८ ॥

ततः श्रीकृष्णाय नमस्कृत्य प्रीत्या हर्षेण व्रजौकसां भक्त्युत्कर्षं प्राह वसुदेवाय श्रीकृष्णाय रामाय राज्ञे उग्रसेनाय च उपायनानि नन्दादिभिः समर्पितान्यर्हवस्तून्यदात् समर्पितवान् ॥ ६९ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम् सप्तचत्वारिंशोऽध्यायः ॥ ४७ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

यत्र क्वापि देवयोनिषु अचेतनस्य कर्मणः प्रवर्तकत्वं कथं घटत इत्यत उक्तम् ईश्वरेच्छयेति । रतिर्भक्तिलक्षणा ॥ १५-१७ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम् षट्चत्वारिंशोऽध्यायः ॥ ४६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

कृष्ण ईश्वर इति । ईश्वररूपेऽपि कृष्ण एवेत्यर्थः । तदिच्छयेत्यनुक्त्वा ईश्वरेच्छयेति स्वभावानुसारेण । कृष्णभक्त्या कृष्णासक्त्यैव ॥ ६७ ॥

नन्वासामहो इत्यादिप्रार्थना चेत् कथं मथुरां पुनरागच्छत् तत्राह । कृष्णपालितां सम्प्रति । श्रीकृष्णेन पाल्यत

[1] अयं पाठः पश्चाल्लब्ध इत्यत्रै निवारितः

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

इति तत्प्रियतमभृत्यैस्तैस्तत्रागमनं कथमिव कर्त्तुं शक्यत इति भावः ॥ ६८ ॥ ६९ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे

सप्तचत्वारिंशोऽध्यायः ॥ ४७ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

ततः स तुष्टः तथेति मनसैवाभ्यनुज्ञाय मथुरामागत इत्याह । तेषां प्रार्थनया स्वोत्कर्षो वा तेषाम् अन्यभजनं वा ज्ञातमिति शङ्कां वारयितुं कृष्णभक्त्येत्युक्तं नराधिपेति सम्बोधनं सेवकानुवृत्तिः स्वाम्यर्थेति ज्ञापनार्थं तस्य प्रीतिरेव मुख्येति परमप्रीत इत्युक्तं वचनं तु निर्बन्धादपि वदेदित्यप्रयोजकं मथुरां पुनरागच्छत् भगवांस्तावत्पर्यन्तं मथुरायामेव स्थितः कृष्णपालितामिति विशेषतो भयशङ्कया स्वयमेव पालयतीति भगवदनागमने विशेषहेतुरुक्तः अनेन तादृशं स्थानं परित्यज्य किमित्युद्धवः समागत इति शङ्का निवर्त्तिता ॥ ६८ ॥

एतत्सर्वं दासभावेनैव कृतमिति ज्ञापयितुं निवेदनमाह । कृष्णायेति । उपायनान्यदादिति सम्बन्धः भगवन्तं प्रणिपत्य भक्त्युद्रेकमाह एतावानर्थः पूर्वं भगवता नोक्त इति प्रायेण भगवान् न विचारितवान् इति ततो वसुदेवायाप्युपायनान्यदादित्यत्र सम्बन्धः तिष्ठतीति ज्ञापयितुं रामाय चाददात्पूर्वावस्था तथैव तिष्ठतीति मर्यादामप्यङ्गीकुर्वन्तीति ज्ञापनार्थं राज्ञे चकारादक्रूरादिभ्योऽपि दोषाभवज्ञापनार्थम् ॥ ६९ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे

श्रीमद्वल्लभदीक्षितविरचितायां सुबोधिन्याम्

चतुश्चत्वारिंशाध्यायार्थविवरणम् ॥ ४४ ॥ ४७ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

कृष्णभक्त्या महानुरागमय्या कृष्णपालितामित्यत एवोद्धवेन व्रजभूमावत्यनुरक्तेनापि तत्र गतम् सम्प्रति मथुरा कृष्णेन पाल्यते व्रजः कथं न पाल्यते इत्युपालम्भमेवेति मुनेराशयः ॥ ६८ ॥

व्रजौकसां भक्त्युद्रेकं मथुरौकोभ्यः सकाशादित्यर्थस्तेन भोः प्रभो ! कृष्ण ! त्वं भक्तिवशगो भक्तिप्राप्यो भक्तिदृश्य इति सर्वशास्त्रार्थस्तेषां च मया त्वदीयसर्वभक्तेभ्योऽपि सकाशात् भक्त्युद्रेक एव दृष्टो यतः "श्वेतीकृताखिलजनं विरहेण तवाधुना । गोकुलं कृष्ण ! देवर्षेः श्वेतद्वीपभ्रमं दधे" त्वत्पितुर्नन्दस्य तु महानुरागभ्रमिरियं त्वय्येव बोद्धुं शक्या यदुक्तं मनसो वृत्तयो नः स्युः इति पद्यद्वयं त्वन्माता तु गद्गदरुद्धकण्ठी नैव किमपि वक्तुं शशाकेति श्रुत्वा कृष्णो विगलितधैर्यो मध्ये सभमप्युच्चै रुरोद तत्प्रेयसीनां प्रेमवाडवानलस्तु रजन्यां कुत्रचिद्रहस्येवोद्धाटय दर्शितस्तत्प्रेयसीशिरोमणेस्तु दिव्योन्मादचित्रजल्पादिदिङ्मात्रमेवाविष्कृतं यदवधार्य कृष्णस्तां रात्रिं सर्वां जज्वालैवेति ॥ ६९ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।

सप्तचत्वारिंशकोऽयं दशमेऽजनि सङ्गतः ॥ ४७ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

एतत्फलं च नोऽस्माकं न स्वर्गादिमोक्षपर्यन्तसुखमस्माकाङ्क्षितं किं तु तस्मिन् रतिरेवेत्याशयेनाहुः । कर्मभिरिति । कर्मभिर्निमित्तभूतैस्तत्तत्कर्मफलप्रदानायोद्भूता या फलप्रदातुरीश्वरस्येच्छा तया यत्र क्वापि भ्राम्यमाणानामस्माकं तथा च तत्तन्निवृत्तिरस्माभिः प्रार्थ्यते इति भावः । मङ्गलभूतैराचरितैर्भगवद्वन्दनादिभिर्दानोपलक्षितैर्वर्णाश्रमोचितसमस्तकर्मभिरिहैव जन्मनि प्राचीनजन्मसु वा कृतैः कृष्णाख्ये ईश्वरे नोऽस्माकं रतिरुत्तरोत्तरं वर्धमाना स्यादिति प्रार्थनारूपः सन्देशोऽस्मदीयः स्वस्वामिसन्निधौ त्वया वक्तव्य इत्यर्थः ॥ ६७ ॥

इतः परं वक्तुमशक्तास्ते तूष्णीं स्थिता उद्धवश्च तावतैव तैः सम्पूजितो मथुरां प्रत्यागादित्याहैवमिति । एवमुक्तरीत्या गोपैः भगवदीयैः सभाजितः पूजितः पूजोपकरणमाह । कृष्णभक्त्येति । तत्कृता कृष्णभक्तिरेव तेन स्वस्य पूजोपकरणत्वेन गृहीता तत उत्कृष्टायाः पूजाया अभावात् यद्वा किमर्थं तैः सभाजित इत्यपेक्षायामाह । कृष्णभक्त्येति । न तु तेषामैश्वर्यादिकं किञ्चिदपेक्षितमासीत् न चैवंविधभक्तानां सङ्गं विहाय किमिति मथुरां प्रति गतवानित्याशङ्क्याह । कृष्णपालितां तथा च भगवत्संनिधानार्थं तत्र भगतवानिति भावः । किं च नराधिपानामप्याज्ञा नोपलङ्घितुं शक्या किं पुनर्ब्रह्माद्यधिपस्येति सम्बोधनाशयः ॥ ६८ ॥

तत्र गत्वा यत्कृतवान् तदाह । कृष्णायेति । प्रणिपत्य सम्यक् प्रणामं विधाय व्रजौकसां भक्त्युद्रेकं प्राह । तत्प्रेषितं मुख्यमुपायनं निवेदितवान् वसुदेवाय पूर्वसख्यस्थितिख्यापनाय रामाय पूर्वस्नेहस्थितिबोधनाय राज्ञ उग्रसेनायादरज्ञापनाय चकारादक्रूरादिभ्यस्तद्दोषागणनासूचनाय तैः प्रेषितान्युपायनान्यदात् "सकलनिगमबोध्यं सच्चिदानन्दरूपं हराविधिहरिमुख्याभ्यर्च्यपादारविन्दम् । व्रजयुवतिसुखार्थं स्वीकृतानेकलीलं धनपतिरहमीशं नौमि गोपालबालम्" ॥ ६९ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यबालगोपालतीर्थश्रीपादशिष्यदत्तवंशावतंसरामकुमारसूनुधनपतिसूरिकृतायां श्रीमद्भागवतगूढार्थदीपिकायाम्

दशमस्कन्धे पूर्वार्धे सप्तचत्वारिंशोऽध्यायः ॥ ४७ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे

सप्तचत्वारिंशाध्यायार्थप्रकाशः ॥ ४७ ॥

भाषा टीका।

ईश्वरकी इच्छा से कर्मों के वश होकर हम लोग जहां कहीं घूमते रहैं तहां पर उसी जन्म में मंगळा चरण दान आदि कर्मों से हमारी मति श्रीकृष्ण मे लगी रहै॥ ६७॥

हे नराधिप! परीक्षित् जी! इस प्रकार से कृष्ण भक्ति से गोपों के पूजा करने पर उद्धवजी उंहां से श्रीकृष्ण पालित मथुरा को चले आते भये॥ ६८॥

उद्धवजी उहां मथुरा में जाकर श्रीकृष्ण तथा बलराम जी को प्रणाम करके ब्रजवासियों की भक्ती की बडी प्रशंसा करके कहते भये और वसुदेवजी को तथा राजा उग्रसेन को सब प्रकार की भेट देते भये॥ ६९॥

इति श्रीभागवत दशमस्कंध पूर्वार्ध
सैंतालीस में अध्याय की
भाषा टीका समाप्त॥ ४७॥

इति श्रीमद्भागवते दशमस्कन्धे पूर्वार्धे सप्तचत्वारिंशोऽध्यायः समाप्तः॥ ४७॥

अष्टचत्वारिंशोऽध्यायः ॥

श्रीशुक उवाच ।

अथ विज्ञाय भगवान् सर्वात्मा सर्वदर्शनः ।
सैरिन्ध्र्याः कामतप्तायाः १प्रियमिच्छन् गृहं ययौ ॥ १ ॥
महार्होपस्करैराढ्यं कामोपायोपबृंहितम् ।
मुक्तादामपताकाभिर्वितानशयासनैः ।
२धूपैः सुरभिभिर्दीपैः स्रग्गन्धैरपि मण्डितम् ॥ २ ॥
गृहं तमायान्तमवेक्ष्य सा ऽऽसनात्सद्यः समुत्थाय हि जातसम्भ्रमा ।
यथोपसङ्गम्य सखीभिरच्युतं सभाजयामास सदासनादिभिः ॥ ३ ॥
तथोद्धवः साधुतयाऽभिपूजितो न्यषीददुर्व्यामभिमृश्य चासनम् ।
कृष्णोऽपि तूर्णं शयनं महाधनं विवेश लोकाचरितान्यनुव्रतः ॥ ४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अष्टचत्वारिंशकेऽथ कृष्णः कुब्जामरीरमत् ।
अक्रूरस्य गृहं गत्वा तं गजाह्वयमादिशत् ॥
सैरन्ध्रीकाममापूर्य पूरयित्वा मनोरथान् ।
अक्रूरस्य ततः कृष्णस्तेन पार्थानसान्त्वयत् ॥

॥ १ ॥

महार्हैरनर्घ्यैरुपस्करैर्गृहोपकरणैरन्वितं कामोपायैस्तदुद्दीपकैः सुरतबन्धादिलेख्यैरुपबृंहितम् ॥ २ ॥

यथा यथोचितम् ॥ ३ ॥ ४ ॥

नन्‌ु कुतस्तस्यास्तादृशमपि वाञ्छितं विधित्सितवान् ज्ञातवांश्च तत्राह । सर्वेति । सर्वात्मत्वेन सर्वहितकारित्वात्तदपि कर्तुमुचितः सर्वदर्शनत्वेन तदपि ज्ञातमित्यर्थः । कामोपाया मधुताम्बूलादयः उपस्करानेव प्रपञ्चयति । मुक्तेत्यादिना । मुक्तादामानि गृहस्यान्ते पताकाश्चोपरीति ज्ञेयं सुरभिभिरिति । यथायथं वितानादिभिरपि योज्यम् ॥ २ ॥

अवेक्ष्य दूरे दृष्ट्वा सम्यगत्युल्लासेनोत्थाय हि पादपूरणे । तच्च करणं तस्याः सम्भ्रमक्रमेण । उल्लासकार्यमाह । जातसम्भ्रमा सम्भ्रमाच्चित्तत्वरा अच्युतमिति प्रतिज्ञातच्युतिराहित्याभिप्रायात् ॥ ३ ॥

तथेत्युक्तसमुच्चये । उद्धवश्च साधु यथा स्यात्तथा तया सैरिन्ध्र्या अभितः पूजित उर्व्यां न्यषीददिति भक्त्या आसनमभिमृश्य स्पृष्ट्वेति तस्याः प्रीत्यर्थं वन्दित्वेत्यर्थो वा । महाधनम् अमूल्यरत्नादिमयमित्यर्थः । तूर्णं विवेशेति पूजायां पूर्वमासने निविष्टस्तत उत्थाय सत्वरं गृहान्तःशय्यायां स्वयमेवोपविवेशेत्यर्थः । तत्र हेतुः । लोकानामाचरितानि स्वैरस्त्रीगृहमध्ये रत्यर्थं स्वेच्छयैवाशु तच्छय्याधिष्ठेयेति पर्यन्तलक्षणानि सर्वाण्येवानुवृतोऽनुसृतः । स्वीकृतलौकिकलीलत्वादित्यर्थः । अत इदमपि रात्रावेव बोद्धव्यम् ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

"सैरिन्ध्रीमपि संत्यक्तुमहं शक्तोऽस्मि नोद्धव ! किमुत व्रजलोकांस्तानिति व्यञ्जन्निमामगात् । श्रीसैरिन्ध्र्यै नमस्तस्यै यत्कृपाकृष्टमानसः । स्वयं गृहं गतो रन्तुमसङ्कोचं रमापतिः"। अथेति सार्द्धद्वयकं भगवान् श्रीकृष्णः । अथेत्युद्धवस्यागमनहेतोर्विज्ञाय बहूनि दिनानि व्याप्य तन्मुखाद्व्रजौकसां पित्रादीनां प्रत्येकं सान्त्वनप्रायं विशेषणानुभूय कदाचित् सैरिन्ध्र्या गृहं ययौ । कीदृश्याः कामतप्तायाः स्वार्थाभिलाषविशेषेण दह्यमानायाः तर्हि किमेषोऽपि कामी नेत्याह । प्रियमिच्छन् मत्प्रीत्यर्थमस्यावङ्गरागं मह्यमर्पितवती तस्मादहममुष्याः प्रीतिविशेषमेव कृत्वा अनृणः स्यामिति विचारयन्नित्यर्थः ॥ १ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

॥ १—१८ ॥

१ प्रीतिं यच्छन् इति वि० पाठः २ कामशास्त्र कृतालेख्यैर्नानावर्णैः सुशोभनैः इत्यधिकं श्रीमच्छुकदेववीरराघवीयपाठे ।

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

पूर्वं त्रिवक्रया अक्रूरेण च प्रार्थितो भगवांस्तयोर्गृहान्प्रत्येष्यामीत्युक्तवानित्युक्तम् अधुना स्वं वचः सत्याययितुं भगवांस्तयोर्गृहान् गत्वा तदिष्टं चकारेत्यनुवर्णयत्यष्टचत्वारिंशेन । अथेत्यादिना । अथोद्धवगमनानन्तरं विज्ञायागमिष्यामीत्युक्तं त्रिवक्राक्रूरयोरभिप्रेतं चानुस्मृत्य तत्र हेतुः सर्वान्तरात्मात एव सर्वदर्शनः युगपत् सर्वसाक्षात्कारकर्ता तावत् कामेन तप्तायाः सैरन्ध्र्याः प्रियमिच्छन् कर्तुमिति शेषः ॥ १ ॥

गृहमनुवर्णयति द्वाभ्याम् । महार्हैरनर्घ्यैः गृहोपकरणैराढ्यमन्वितं कामोपायैः क्रीडोपकरणैरुपबृंहितं समृद्धं वितानैर्विपुलैः शयनादिभिः शय्यादिभिः वितानैः गृहोपरि चन्द्रोदयैश्शयनादिभिश्चेति वा ॥ २ ॥

सुरभिभिर्दीपैः स्रग्भिर्गन्धैश्च मण्डितमलङ्कृतं तथा नानावर्णैः सुशोभनैः सुन्दरैश्च कामशास्त्रकृतालेख्यैः कामशास्त्रोपदिष्टरतिबन्धादिभिरालेख्यैरभिमण्डितम् ॥ ३ ॥

गृहमिति । उक्तविधं गृहं प्रत्यायान्तं श्रीकृष्णमवलोक्य सुजातः सम्भ्रमो यस्याः सा सैरन्ध्री सद्यस्तदैवासनात्समुत्थाय सखीभिः सह यथा यथोचितमुपसङ्गम्याभिसमेत्य समीचीनैरासनादिभिरादिशब्दादर्घ्यादिभिश्च सभाजयामास पूजयामास ॥ ४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

भक्तभक्तिमालिङ्गितगात्रः श्रीनारायणः सत्सङ्कल्पवाञ्छितार्थसाधनार्थमवतीर्ण इत्येतमर्थमभिप्रेत्यास्मिन्नध्याये तत्रादौ सैरन्ध्र्या अभीष्टसाधनार्थं तद्गृहगमनं वक्ति । अथेत्यादिना । अथ कथान्तरारम्भः सैरन्ध्र्याः गन्धकारिकायाः कृष्णागमनकामेन तप्तायाः यदिच्छन् ददत् ॥ १ ॥

महार्हैः महता योग्यैरुपस्करैः उपकरणैरुपेतं कामोपायैः कामभोगसाधनैः उपबृंहितं पूर्णम् एतानेव दर्शयति । मुक्तेति । वितानमुपरिपिष्टिका ॥ २ ॥

येन प्रकारेणोपगमनं कार्यं यथोपसङ्गम्य सदासनादिभिः ॥ ३ ॥

साधुतया उचिततया अभिमृश्य परिमृज्य स्पृष्ट्वेत्यर्थः । दान्तं गजदन्तरचितं महाधनेन विक्रीयते आपाद्यते चेति महाधनम् ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

सैरिन्ध्रीमपि सत्यक्तुमद्य शक्तोऽस्मि नोद्धव ।
किमुत व्रजलोकांस्तानीति व्यञ्जन्नमाम गात् ॥

अथ उद्धवागमनानन्तरं श्रीगोकुलस्य किञ्चिदाश्वासेन ज्ञात एव सर्वात्मा सर्वदर्शनोऽपि ॥ १—३ ॥

न्यसीददुर्व्यामिति साक्षात् स्थितस्य स्वप्रभोगौवात इति ज्ञेयम् ॥ ४—७ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

एवं पूर्वनिरोधस्य सान्त्वनोत्कर्षवर्णनम् ।
कृत्वा भविष्ययोश्चैव सान्त्वनं विनिरूप्यते ॥
मथुरावासिनः सर्वे राजसाः परिकीर्तिताः ।
सात्त्विकाः पाण्डवा भक्तास्तयोः सान्त्वनमुच्यते ॥
राजसत्वप्रसिद्ध्यर्थं स्त्रीपुंसोरत्र वर्णनम् ।
प्रक्रियान्तररूपा हि किञ्चिद्द्वारा तथा कृताः ॥
अक्रूर उद्धवान्मुख्यस्ततोऽग्रे प्रेषणं मतम् ।
दासभावेत्युद्धवस्तु सात्त्वतस्त्वयमेव हि ॥
स्त्रीसान्त्वनं तु पुरतो राजसत्वात्सरूपतः ।
राजोन्यस्य निरूप्येत हि स्तुत्या च प्रेषणेन च ॥
पञ्चचत्वारिंशोऽध्याये कुब्जाक्रूरादिसान्त्वनम् ।
कायेन वचसा चक्रे भाव्यर्थमिति वर्ण्यते ॥

प्रथममेकादशभिः कुब्जायाः कथामाह साधिकैः । अथ विज्ञायेति । तस्या हि सर्वा मनोवृत्तयः पूरणीयाः ततोऽप्यधिकं च कर्तव्यमिति आदौ भगवान् तस्या गत इत्यर्थः । अथेति । अथ भिन्नप्रक्रमे भक्तत्वभावात् परं तस्याः दुःखं तुल्यमिति तन्निवृत्त्यर्थं गत इत्यभिप्रायेणाह । विज्ञायेति । प्रकरणात् कामसन्तापज्ञाने सामर्थ्यं भगवानिति तथा करणे दोषाभावे चावश्यको हेतुः सर्वात्मेति दृष्टावश्यं प्रतीकारः कर्त्तव्य इति सर्वदर्शन इति फलमुखो हेतुरुक्तः पूर्वमयोग्यता देहे स्थितेति न तस्याः कामपीडा इदानीं तु देहयोग्येऽपि स्त्रीचर्यां सर्वो जानातीति तस्याः कामपीडा महती जातेत्याह । सैरन्ध्र्या इति । सैरन्ध्री हि अन्तः पुरे अधिकारिणी स्त्री स्त्रीचरित्रं जानातीति कामतापो युक्त एव तस्याः आगमनसामर्थ्याभावात् स्वयमेव गृहे यथा सङ्गमनमात्रेणैव तस्यास्तापो निवर्तते एव तथापि प्रियमिच्छन् यथा मनसा तस्याः प्रियं भवत्विति विचारितवान् ॥ १ ॥

ननु किमेवं विचारेण कर्तव्यमेव हि प्रियं तद्गमनेनैव भविष्यतीत्याशङ्क्य तन्निराकरणार्थं भगवदिच्छया जातत्कर्षं गृहं वर्णयति । महार्हेति साधेन । यथा प्राकृतमपि गृहं भगवदिच्छयैव जातम् एवं सापि गोपिका तुल्या भविष्यतीति प्राकृतायाः तथात्वं कर्त्तव्यमिति प्रियेच्छा युक्तैव महार्हाण्यमूल्यानि गृहादीनि पात्रादीन्युपस्करा यस्य तैर्वा आढ्यं सम्पन्नं कामोपायाः कामशास्त्रोक्तानि साधनानि उद्दीपकानि प्रियाणि पुष्पादिसम्पत्तिः इन्दुर्मन्दिरमित्यादीनि तैरुपबृंहितं लौकिकस्तच्छास्त्रीयश्च उत्कर्ष उक्तः अलौकिकोत्कर्षमाह । मुक्तादामभिः पताकाभिश्च बहिर्मण्डितं वितानैश्चन्द्रातपत्रैः शयनार्थमुपवेशनार्थं च सुखस्पर्शास्तरणैः प्रत्यहं वैशेषिकैरपि मण्डितमित्याह । धूपैरिति । अगरुसम्भवाः आमोदाः दीपा अग्निमयाः मणिमया वा स्रग्भिः गन्धैश्च शैत्यार्थं सर्वत्र लेपनं मण्डनम् ॥ २ ॥

एवं त्रिविधोऽप्युत्कर्षः भगवदिच्छया तस्मिन्गृहे जात उक्तः ततो गते भगवति यद्वक्तव्यं तदाह । गृहं तमायान्तमिति । भगवदिच्छाविषयत्वाद्गृहस्यापि कर्मता यतस्तं तादृशं भगवन्तमायान्तमवेक्ष्य तथैवासनादुत्थाय प्रथमं जातसम्भ्रमा जाता इति कर्त्तव्यतामूढा जाता युक्तश्चायमर्थः ततः यथावदुपसङ्गम्य सखीभिः सहिता सभाजयामास । ननु कान्तोऽयं पूजया विलम्बितः निवृत्तकामो भवेत् तत्राह । अच्युतमिति । सदासनादिभिरिति । सुवर्णमयान्यासनानि शय्यामयानि वा अनुपभुक्तानीति सत्पदेन ज्ञापितम् ॥ ३ ॥

तथोद्धव इति । तथैव उद्धवोऽपि पूजितः परं साधुतया अनेन भगवान् भर्तृतया पूजित इति ज्ञायते कामोऽपि दोषात्मक इति अर्थात् व्यावृत्तिः फलति उर्व्यामेवोपविष्टः आसनमुपस्पृश्येति राजधर्मपरिज्ञाने निरूपितं तस्या कृत्ये जाते भगवानपि स्वकार्य

सा मज्जनालेपदुकूलभूषणस्रग्गन्धताम्बूलसुधासवादिभिः ।
प्रसाधितात्मोपससार माधवं सव्रीडलीलोत्स्मितविभ्रमेक्षितैः ॥ ५ ॥
आहूय कान्तां नवसङ्गमह्रिया विशङ्कितां कङ्कणभूषिते करे ।
प्रगृह्य शय्यामधिवेश्य रामया रेमेऽनुलेपार्पणपुण्यलेशया ॥ ६ ॥
सानङ्गतप्तकुचयोरुरसस्तथाक्ष्णोर्जिघ्रन्त्यनन्तचरणेन रुजो मृजन्ती ।
दोर्भ्यां स्तनान्तरगतं परिरभ्य कान्तमानन्दमूर्तिमजहादतिदीर्घतापम् ॥ ७ ॥
सैवं कैवल्यनाथं तं प्राप्य दुष्प्रापमीश्वरम् ।
अङ्गरागार्पणेनाहो दुर्भगेदमयाचत ॥ ८ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

कृतवानित्याह । कृष्णोऽपीति । तदर्थार्थमारोपिते कामे क्षणविलम्बि तद्भवेत् अगत्कामममयमेव स्यादिति तूर्णमेव शयनं विवेश नन्वनिर्दिष्टमुपभुक्तं वा सर्वेदिति भगवदर्थं वा अन्यार्थं वेत्यपि शङ्कां व्यावर्तयितुमाह । महाधनमिति । महत् धनमुपपादनार्थं तस्य तत्तुल्कृष्टं भगवदर्थमेवेति विवेशेति पूर्वोपवेशख्यानात् विविक्त इति ज्ञापयितुं ननु भगवानक्लिष्टकर्मा किमित्येवं प्रार्थनाव्यतिरेकेण स्वयमेव गत इति चेत्तत्राह । लोकाचरितानुव्रत इति । सा हि लौकिकी लोकरीत्यैव शोचति तस्यास्तथैव मनोरथः सा गृहस्थवत् ईश्वरस्वभावं न जानाति गुप्तत्वात् बहुव्यवहारं तु जानाति प्रकटत्वात् अतस्तथैव मनोरथ इति लोकानां साधारणानि चरितानि भगवानप्यनुव्रतो जातः ॥ ४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

अष्टचत्वारिंशकेऽगात् कुब्जां रमयितुं हरिः ।
स्तुतोऽक्रूरेण तद्गेहे प्राहिणोत्तं गजाह्वयम् ॥

विज्ञाय उद्धवोक्तं विशेषतो ज्ञात्वा तत्र समाधानं पूर्वमेव कृतवानित्याह । भगवान्महातकैश्वर्यादेव मथुरायां स्थितोऽपि प्रकाशान्तरेण व्रजमगादेवेत्यर्थः । सर्वात्मत्वादेव सर्वमनोरथं पूरयितुमित्यर्थः । किन्तूद्धवसमाधानार्थं सर्वदर्शनः तदा उद्धवं प्रति स्वीयप्रकाशद्वैतविरहप्रकाशोऽप्यविलासादिकमतिरहस्यमपि ज्ञापयामासैवेत्यर्थः । ततश्च पूर्वं यत् प्रतिश्रुतं तत् कर्तुं तेन सह कुब्जाया गृहं जगामेत्याह । सैरन्ध्र्या इति ॥ १ ॥

महार्हैरिति संभोगोत्सवोपयोगिबहुपकरणान्वितमित्यर्थः । कामोपायैः कामोद्दीपकालेख्यविशेषा औषधविशेषाश्च ॥ २ ॥

यथा यथोचितम् ॥ ३ ॥

उर्व्यां न्यषीददिति कृष्णप्रियया तया स्वहस्तदत्तासने दासस्य तस्योपवेशनौचित्यात् । अभिमृश्य स्वहस्तेन स्पृष्ट्वेति तस्याज्ञापालनार्थम् । शयनमन्तर्गृहस्थितशय्याम् ॥ ४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

सैरन्ध्र्यकूरगृहगमनादिभगवच्चरितमष्टचत्वारिंशे वर्णयति ।

अथेति । अशोकवागमनानन्तरम् पश्यामि ते गृहं सुभ्रु इति स्ववाक्यं विज्ञाय यथा जीवानामन्योऽन्यसंयोगे विधिनिषेधौ भवतः नतु पृथिव्यास्तत्संयोगे तस्यास्तदात्म्यत्वादेवं जीवानामन्योऽन्यसंयोगे विधिनिषेधौ भवतः नतु श्रीकृष्णस्य तत्संयोगे इत्याह । सर्वात्मेति ॥ १ ॥

कामोपायैः कामोद्दीपकैः ॥ २ ॥

यथा यथोचितमुपसंगम्य अभिसमेत्य सदासनादिभिः सभाजयामास पूजयामास ॥ ३ ॥

आसनं श्रीकृष्णासनमभिमृश्य शिरसा संस्पृश्य ॥ ४ ॥

भाषा टीका ।

श्रीशुकदेवजी बोले इसके अनंतर सब के अंतर्यामी सब जानने वाले भगवान् समय जान कर काम के तपायमान सैरंध्री कुब्जाके प्रियकी इच्छा करके उसके घरको जाते भये ॥ १ ॥

उसका घर कैसा है कि बडी भारी सामग्रीयों से युक्त है काम के सब उपायों से संयुक्त है मुक्ता के माला पताका चांदनी पलंग आसन धूप सुगंध द्रव्य दीप पुष्प माला इन सबों से मण्डित है ॥ २ ॥

उस कुब्जाने अपने घर में आते हुये उन भगवान् के दर्शन करते ही मात्र शीघ्रही आसन से अछी तरह से उठ कर बडी संभ्रमित होकर सब सखियों के सहित अच्युत भगवान् से संभाषणादि से मिलकर सुंदर आसनादिक देकर भगवान् का पूजन किया ॥ ३ ॥

तिसी प्रकार से अच्छे पूजित होकर उद्धवजी भी पृथवी पर आसन में हस्त लगा करके बैठते भये श्रीकृष्ण भगवान् भी जल्दी से बडी संपत्ति युक्त शयनागर में लोक रीति के अनु वर्तन करते हुये प्रविष्ट भये ॥ ४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

प्रसाधिती योग्यतामापादित आत्मा देहो यया सा सव्रीडं यल्लीलयोद्गतं स्मितं तद्येषु विभ्रमेषु तद्युक्तैरीक्षितैरुपलक्षिता ॥ ५ ॥

अनुलेपार्पणादन्यत्तस्याः पुण्यं नास्तीति दर्शयितुं पुण्यलेशयेत्युक्तं नतु पुण्यस्याल्पत्वविवक्षया ॥ ६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

कुब्जादीनां रुजो मृजन्ती जिघ्रन्ती च चरणम् ॥ ७ ॥

काममेव प्राकृतदृष्ट्या अयाचत न च गोप्य इव सा तान्निच्छतीति दुर्भगेत्युक्तम् , कृतार्थत्वे तु तस्या न सन्देहः ॥ ८ ॥ ९ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

आलेपश्चन्दनादिपङ्कः गन्धो बहिः सम्पर्कजश्चन्दनादिनिर्यासः । सुधावदासवो मधु । उपससार समीपे शनैर्गता । माधवं लक्ष्मीकान्तमिति । अहो दीनविषयकृपापारवश्यं कियद्वर्णनीयमिति भावः ॥ ५ ॥

नवसङ्गमह्रिया विशङ्कितामित्यनेन तस्याः प्राचीनतत्स्पर्शप्रभावेण तदास्तदेव शरीरं परमदिव्यकुमारीभावाय सम्पन्नमित्येतद्व्यञ्जितं कङ्कणभूषित इति सुकोमलाङ्गीत्वात् कङ्कणोपर्येव प्रगृह्येत्यर्थः । तादृशानुग्रहे भक्तिरेव हेतुरित्याह । अनुलेपेति । तैर्व्याख्यातम् । यद्वा अनुलेपार्पणलक्षणं पुण्यं लान्ति आत्मसात् कुर्वन्तीत्यनुलेपनलाः तेषामीशया अनुलेपार्पकभक्तवर्गश्रेष्ठयेत्यर्थः । स्वयं भगवति श्रीकृष्णे तत्रापि साक्षात् तत्रापि समयविशेषेऽनुलेपार्पणात् ॥ ६ ॥

अनङ्गतप्तेत्यस्य उरसाक्षिभ्यामप्यनुषङ्गः । अनङ्गतप्तेति असमस्तत्वेऽपि सम्प्लुतत्वात् अनन्तस्यापरिच्छिन्नमाधुर्यतया, न तस्य तथा नाम्नश्चरणेन स्वयं तेन वा तत्र तत्र निहितेन रुजः कामपीडा मृजन्ती अपसारयन्ती, एतच्च स्तनान्ते चेयं स्तनान्तरगतं स्तनरूपावकाशं प्रसमन्तरमवकाशान्तर्धीति अमरनानार्थात् । अत एवानन्दमूर्तौ तत्रापि कान्तं मधुरभावविशेषमयम् अत एवात्यन्तदीर्घमपि तत्प्राप्तितापं सद्यो जहौ ॥ ७ ॥

ईश्वरं परमस्वतन्त्रम् अत एव परमदुष्प्रापं तथापि अङ्गरागार्पणमात्रेण । एवमुक्तप्रकारेण तत्रापि केवलशुद्धभक्तेस्तस्य भावः कैवल्यमेकान्तरतिः । कैवल्यसम्मतपथस्त्वथ भक्तियोग इत्यत्र कैवल्यमित्येव सम्मतः पन्था यो भक्तियोग इति स्वामिव्याख्यानात् । यथा वर्णविधानमपवर्गश्च भवतीत्यादिपञ्चमस्कन्धगद्यानुसाराच्च तस्य नाथं तत्प्रदानप्रभुं तत्तया प्राप्य प्रकर्षेण लब्ध्वा दुर्भगा पूर्वं कुब्जात्वदासीत्वलक्षणदौर्भाग्ययुक्तापि न तु श्रीगोपीवत् स्वतः श्रीविजयितत्तद्गुणयुक्ता अहो आश्चर्यम् इदं वक्ष्यमाणं सुदुर्लभं पदमयाचत । अस्या दुर्भगावस्थत्वस्य प्राचीनत्वेन निर्देशः किमनेन कृतं पूर्वमवधूतेन भिक्षुणेत्यादिवत् ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अथेति । अथोद्धवस्तया सैरन्ध्र्या साधु यथाभिपूजितस्तया समर्पितमासनमभिमृश्य संस्पृश्य उर्व्यामेव न्यषीददुपविवेश न त्वासने भगवता साम्यमनुचितं मन्वानः केवलमुर्व्यामेवोपविष्टवानित्यर्थः । कृष्णस्तु लोकानां कामुकानां चरितानि चेष्टितानि अनुवृतोऽनुसरन्नूतनं नवीनं केश्चिदप्यनधिरूढं महाधनमनर्घ्यं शयनं पर्यङ्कमाविवेश सेति । सा सैरन्ध्री मज्जनादिभिः प्रसाधिता योग्यतामापादित आत्मा देहो यया तथाभूता सती यल्लीलयोद्धतं स्मितं तत् येषु विभ्रमेषु तद्युक्तैरीक्षितैरुपलक्षिता माधवमुपससार उपजगाम ॥ ५ ॥

आहूयेति । नवसङ्गमे विषये या ह्रीलज्जा तया विशङ्किता सहगन्तुं लज्जन्तीमित्यर्थः । तां कान्तामाहूय कङ्कणेन भूषिते हस्ते गृहीत्वा शय्यामधिवेश्य त्रिलेपार्पणमेव पुण्यलेशो यस्यास्तया स्त्रिया रामया सह रेमे अनुलेपार्पणादन्यत्तस्याः पुण्यं नास्तीति दर्शयितुं तद्विशेषणम् ॥ ६ ॥

सेति । जिघ्रन्ती सन्निहितत्वादनन्तचरणमिति । विभक्तिविपरिणामेन सम्बन्धः । अनन्तस्य भगवतश्चरणं जिघ्रन्ती तेनानन्तचरणेन हेतुनाऽनङ्गेन कामेन तप्तयोस्तनयोरुरसोरणोश्च रुजः पीडाः मृजन्त्यपनयन्ती कुचादिषु निधाय तेन तद्गताः पीडा निराकुर्वन्तीत्यर्थः । स्तनान्तर्गतं कुचमध्यगतं यथा तथा कान्तं प्रियमानन्दघनं भगवन्तं दोर्भ्यामालिङ्ग्येति दीर्घं बहुकालानुवृत्तं तापमनङ्गतापमजहात्तत्याज ॥ ७ ॥

सैवमिति । सा सैरन्ध्री कैवल्यं प्रकृतिसम्बन्धराहित्यं तस्य नाथं मोक्षदं योगिभिरपि दुष्प्रापं तं भगवन्तमेवमित्थं केवलमङ्गरागार्पणेनैव हेतुभूतेनानुभूयेति शेषः । दुर्भगा भाग्यहीनेदं वक्ष्यमाणमयाचत अहो इति । खेदे साक्षान्निरतिशयपुरुषार्थभूतमोक्षदं प्राप्यापि केवलं तुच्छमेवायाचतेति । दुर्भगेति । मुनिः खिद्यति ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

सुधाकल्पासवादिभिः प्रसाधितात्मा अलङ्कृतदेहा सव्रीडलीलादिभिर्युक्ता ॥ ५ ॥

रतौ निमित्तमाह । अनुलेपेति । अनुलेपार्पणेन हरेर्गन्धसमर्पणेन लब्धः पुण्यलेशः पुण्यैकदेशो यया सा तथा तया ॥ ६ ॥

रुजः कामज्वरान् संसारज्वरान् वा सास्तनान्तरगतं वक्षस्स्थलगतम् ॥ ७—१० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

सैवमिति द्वयम् ॥ ८ ॥ ९ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

नन्वनुवादकमेतत्पदं निरोधविरोधापत्तेः ततः सापि गतेति तस्याः संस्कारपूर्वकं गमनमाह । सा मज्जनालेपनेति । आलेपः सुगन्धादिभिः स्नानार्थमेव भगवदिच्छया पूर्वमेव तस्यास्तथात्वं सुधासव इति शक्त्यर्थं देहाविस्मरणार्थञ्च कामशास्त्रोक्तद्रव्यपानमुक्तम् आदिशब्देन तथोद्बोधकानां पदार्थानामपि चन्द्रावर्त्तादीनां स्थापनम् एवमेतैः प्रसाधितशरीरा तत्तद्भावापन्ना लक्ष्मीपतिरयमिति तथाकरणे शङ्कारहिता माधवमुपससार तथा भगवति सर्वे भावाः स्वान्तःस्थिताः क्रमेण सूचिता इत्याह । सव्रीडेति । स्त्रीभावात् प्रथमसम्बन्धे व्रीडा ततो हासः प्रवृत्तायाः ततो भगवच्चेष्टानां सादरं निरीक्षणं ततोऽप्यभिलषितानां भाषणं सूनृतम् अयमग्रे क्रमो भगवता कर्तव्य इति प्रथमतस्तादृशीं चेष्टां कुर्वाणैव गतेत्यर्थः ॥ ५ ॥

ततः सा कान्ता जाता भगवद्धर्मावेशात्ततो यथाभिलषितं कृतवानित्याह । आहूयेति । स्वतः प्रवृत्त्यभावे हेतुमाह । नवसङ्गमह्रिया विशङ्कितामिति गतायां शङ्कायामाह । कङ्कणभू-

श्रीमद्वल्लभाचार्यकृतसुबोधिनी।

षिते करे प्रगृह्येति। कङ्कणानां परिधानं सुवासिन्याः अस्यास्तु भगवद्व्यतिरिक्तः पतिर्नास्तीति भगवांश्चेत् न परिगृह्णीयात्तदा कङ्कणपरिधानं व्यर्थमेव भवेदिति सूचितम् शय्यामधिवेश्येति प्रथमसुरतमेवोक्तम्। नन्वेषां कास्त्री सम्बन्धा न सर्वत्र कर्त्तव्या इति चेत्तत्राह। रामयेति। भोगार्थमेवैषा स्त्री नाग्निं चित्वा रामामुपेयादिति विशेषनिषेधादन्यदा तया सम्बन्धो न दोषाय न त्ववश्यं सुखानुभवे धर्मो हेतुः ततः परमानन्दं कथमनुभवतीत्याशङ्क्याह। अनुलेपार्पणपुण्यलेशयेति अनुलेपार्पणादन्यानि लेशमात्राणि यस्याः अनुलेपार्पणस्य वा पुण्यमात्रं लेशो यस्याः अथवा सा त्वनुलेपार्पणपुण्यलेशयुक्तैवातस्तस्याः सहभाव एव कृतः भगवान्स्वयमेव रेमे तावत्फलं स्वयमेवाधिकं दत्तवान् न तु कर्मणा जातमिति तथोक्तम् अथवा भगवान्सर्वसमर्थः। तस्यास्तावन्मात्रमेव सुखं तथा दत्तवानिति ज्ञापयितुं तथोक्तम्॥ ६॥

तथा सापि लब्धधाष्टर्या स्वाभिलषितं कृतवतीत्याह। सेति। सा सैरन्ध्री अनङ्गेन तप्तयोः कुचयोः मध्ये या उरसः वक्षःस्थलस्य अनन्तचरणेन एतेषां रुजं मृजन्ती जाता स्वरूपतः केनचित्सम्बन्धेन तत्तापस्योभयत्र व्याप्तत्वात् बहिःस्पर्शेन तापापगमेऽपि अन्तस्तापनिवृत्त्यर्थमुपायमाह। जिघ्रन्तीति। अर्थादनन्तचरणमेव अनन्तत्वादेव पर्यायेण तापनाशो निवारितः तथा सति शीघ्रं तापाभावो न स्यात्। केवलं दुःखाभावः तस्याः फलितः किं तु परमानन्दोऽप्यनुभूत इत्याह। दोर्भ्यामिति। पूर्वमेव स्तनान्तरे हृदये निविडं बहिर्दोर्भ्याम् आलिङ्ग्य तापं जहौ स्तनान्तः आगतं वा कान्तत्वात् तथाकरणे नापराधः न केवलं पर्यवसानवृत्त्या सुखजनकत्वं किं तु स्वरूपतोऽपि तथात्वमित्याह। आनन्दमूर्त्तिमिति। अत एव अतिदीर्घमपि त्रिविधमपि तापं जहौ कामताप एव वा जन्मकोटिष्वनुस्यूतो दीर्घो भवति॥ ७॥

एवमनुलेपार्पणफलमुक्त्वा फलानुभावार्थं या भगवतः सेवा कृता निरुत्पादिता तस्याः फलं व्यक्तमिति तन्निरूपयति सैवमिति त्रिभिः। इदं हि पूर्वस्मात् उत्कृष्टमपि वरत्वेन पर्यवसितं तथा सति न फलं काचिन्मर्यादा इयदेवेति तथापि भाग्यमेवाल्पमिति तादृश्येवेति अल्पमेव याचितवतीति शुकस्तां निन्दति। दुर्भगेदमयाचतेति। दातरि समर्थे प्रसन्नेऽपि अल्पयाचनं भाग्याभावादेव भवति। सा पूर्वोक्ता एवं जाता तं तथोपकारिणं स्वयमागत्य सर्वसुखदातारं कैवल्यस्यापि नाथं सर्वैरेवोपायैः दुष्प्रापमीश्वरत्वात् अन्यथा साधनाधीनत्वात् तादृशमपि प्राप्य मोक्षं गोपिकावदवस्थां वा न प्रार्थितवती किं तु कालपरिच्छिन्नं भगवत्सम्बन्धमेव यद्यपि स्वरूपतो महान् तथापि कालेन परिच्छिन्नः फलत्वान्न साधनतामापद्यते अतो दुर्भगैव॥ ८॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

गन्धोऽगुरुधूपः प्रसाधितः रतियोग्यतामापादित आत्मा देहो यया सा॥ ५॥

नवसङ्गमेति। विशङ्कितेति पदाभ्यां मन्दधियः अति तस्याः अनन्यभोग्यत्वं ज्ञापितं तत्र तस्याः महासुन्दर्या अपि कुब्ज एव रक्षकः आसीदिति भावः। अनुलेपार्पणलक्षणस्तत्प्रापकः यस्या पुण्यलेश इति। न तु साधनसिद्धानां ब्रजस्त्रीणां पुरस्त्रीणामिव वा पुण्यपुञ्ज इति भावः॥ ६॥

कुचादीनां रुजो मृजन्ती चरणं जिघ्रन्ती च॥ ७॥

सा तं कैवल्यैनैव नाथम् अयाचत। केवलया मयैव सह रमस्व न त्वन्यया कयाचिदपि इति प्रार्थयामासेत्यर्थः। तथाभूतवरस्य कृष्णेनाप्रदास्यमानत्वात् दुर्भगा॥ ८॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

सा सैरन्ध्री मज्जनादिभिः प्रसाधितो योग्यतां नीत आत्मा देहो यया सा सव्रीडं यल्लीलयोद्गतं स्मितं तत् येषु विभ्रमेषु विलासेषु तद्युक्तैरीक्षितैरुपलक्षिता॥ ५॥

अनुलेपार्पणपुण्यलेशयेत्युक्तिः कृष्णार्थे किंचित्कृतमपि महाफलं भवतीति द्योतयति॥ ६॥

अनन्तस्य चरणेनेत्यादरोक्तिः अनन्तेनेत्यर्थः। यद्वा अनन्तचरणेन अनन्तचरित्रेण भगवता बहुधा रममाणेन कामतप्तानां कुचादीनां रुजो मृजन्ती आनन्दमूर्तिकार्यकारणप्रकृतिविलक्षणा आनन्दरूपा मूर्तिर्यस्य तं परिरभ्य तमेव जिघ्रन्ती अतिदीर्घतापम् अजहात्॥ ७॥

इदमयाचतेति अरण्ये प्रविष्टो महाराजः कयाचित् फलपुष्पादिना स्वल्पेन पदार्थेन तोषितः तस्यै मनसा स्वसामीप्यं दत्त्वा स्वेष्टं देशं गन्तुं प्रवृत्तस्तया दुर्भगया महाराजसङ्कल्पः न ज्ञातः कृतार्थयापि प्रभो! मयेदं वस्तु न भुक्तं तद्देहीति याचितो भवति तद्वत् कैवल्यनाथं प्राप्य अर्थाच्चत्कृपया आसन्नमोक्षापि दुर्भगा औपस्थ्यसुखलम्पटा औपस्थ्यसुखमात्रप्रदं भगवन्तं मत्वा इदं काममयाचत इदं चरित्रं तन्मनोरथसिद्ध्यर्थमिति फलितोऽर्थः॥ ८—१०॥

भाषा टीका।

वह कुब्जा स्नान करनो चंदन लगाना सुन्दर वस्त्र पहरना भूषण धारण करना माला पहरना अतर लगाना पान खाना मादक पदार्थों का सेवन करना इस प्रकार से अपने देह को सजा कर लज्जा सहित हंसी क्रीड़ा मंदहास के कटाक्ष आदि विभ्रमों के सहित माधव भगवान् के पास उपस्थित होती भई॥ ५॥

भगवान् उसको नूतन संगम से लज्जित तथा शंकित देख कर कंकणो से भूषित उसके हस्त को पकडकर उसको लाकर पलंग पर वैठा कर जिसके केवल चंदनही देने से सब पुण्यहो चुके हैं उस कुब्जा के साथ रमण करते भये॥ ६॥

वह कुब्जा कामसे तपायमान कुचों पर और छाती मे नेत्रों में भगवान् के चरणों को लगा कर नासिका से सूंघ कर अपने मनकी पीडाको नाश करके दोनों भुजाओं के मध्य में स्थित आनन्द मूर्ति कान्त श्री कृष्ण का आलिंगन करके वडे दिनों के भारी ताप को दूर करती भई॥ ७॥

वह कुब्जा इस प्रकार से मोक्ष दाता भगवान ईश्वर को चंदन के अर्पण करने से प्राप्त होकर अहो लौकिक बुद्धि से यही सुख मागती भई॥ ८॥

आहोष्यतामिह प्रेष्ठ ! दिनानि कतिचिन्मया ।
रमस्व नोत्सहे त्यक्तुं सङ्गं तेऽम्बुरुहेक्षण ! ॥ ९ ॥
तस्यै कामवरं दत्त्वा मानयित्वा च मानदः ।
सहोद्धवेन सर्वेशः स्वधामागमदर्चितम् ॥ १० ॥
दुराराध्यं समाराध्य विष्णुं सर्वेश्वरेश्वरम् ।
यो वृणीते मनोग्राह्यमसत्त्वात्कुमनीष्यसौ ॥ ११ ॥
अक्रूरभवनं कृष्णः सहरामोद्धवः प्रभुः ।
किञ्चिच्चिकीर्षयन् प्रागादक्रूरप्रियकाम्यया ॥ १२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

कामं एव वरस्तं दत्त्वा मानयित्वा चालङ्कारादिदानैः ॥ १० ॥ मनोग्राह्यं विषयसुखम्, असत्त्वात्तुच्छत्वात् ॥ ११ ॥ किञ्चिच्चिकीर्षयन् हस्तिनापुरप्रस्थापनं कारयितुमिच्छन्नित्यर्थः । अक्रूरप्रियकाम्यया च ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

तद्देवाह । सहेति । आहोष्यतामिति पाठः सर्वत्र स तु पुनरुक्तः अयोचतेत्युक्तत्वात् । याचनमेव विवृणोति । सहेति । इह मद्गृहे मया सहोष्यतां त्वया तत्र प्रयोजनमाह । रमस्वेति । तत्रापि मया सहेति योज्यम् । ननु ममान्यत्र कृत्यानि बहुतराणि सन्तीति चेत्तत्राह । नोत्सहे इति । अतस्त्वं यत्र यास्यसि तत्रैवाहं यास्याम्यन्यथा प्राणं त्यक्ष्यामीति भावः । कुतः हे प्रेष्ठेति प्राणादीनां त्वमेव परमालम्बन इति भावः । तत् कुतः हे अम्बुरुहेक्षण । परमसौन्दर्यादिगुणयुक्तत्वेनाकृष्टमदीयसर्वेन्द्रियत्वादिति भावः ॥ ९ ॥

कामः सहोष्यतामित्यादिना तथा प्रार्थितः स्मरोपभोगः स एव वरोऽभीष्टार्थः । आगत्यागत्य रंस्य इति तत्सङ्कल्पात्मकस्तम् इति श्रीगोपीवत् शुद्धप्रेमविशेषाभावो दर्शितः यत्ते सुजातचरणाम्बुरुहमित्यादिरीत्या तासां तदीयसुखैकसुखदत्वादस्यास्तु स्वसुखमात्रोद्देशात् "किन्तु लक्ष्मीसहस्रकोटीनामप्याविर्भावेन च प्रभोः सैरिन्ध्याः स्वीकृतिः सेयं व्यनक्ति स्म परां कृपाम्" । तत्र च तस्य स्वाभाविककरुणैव कारणमित्याह मानद इति उद्धवेन सहित इति । यथा तेन सह गतस्तथा एवागतः । तच्च लोकाचारितमनुसृत्य तस्य परमधर्मनिष्ठस्य सङ्गेनापलयनार्थमिव । वस्तुतस्तु परमप्रणयेनेति भावः । स्वधाम श्रीवसुदेवान्तर्गृहम् । तत्र तत्र च च तस्य लीलेच्छैव कारणमित्याह । सर्वेश इति । ऋद्धिमत् सर्वविधप्रियजनतत्सेवोपकरणसम्पन्नमिति तत्रागमनयोग्यतोक्ता । अत्रेयं माथुरहरिवंशकथेति श्रूयते । पूर्वजन्मनीयं राजकन्यासीत् तेन नारदात् श्रीभगवद्गुणगानश्रवणेन तस्मिन् जातानुरागा बभूव । पश्चाच्च श्रीनारदं प्रति तस्या योग्यवरे राज्ञा पृष्टे स उवाच । तामेव कन्यां पृच्छामः कोऽभिप्रायस्तस्या इति ततश्च पृष्टा साप्युवाच यं भवान् सर्वोत्तमत्वेन गायति स एव मम वरः इति । ततः श्रीनारदेन तत्प्राप्त्यवसम्भावनायां दर्शितायामपि जन्मकोटिभिरपि वरयिष्यामीति तद्वचनं श्रुत्वा विवाहस्य च सा तत्प्राप्तिसाधनमुपदिष्टा चिरं तपस्तप्तवती तदाकाशवाणी जाता जन्मान्तरे भवती कुब्जा सती यत्स्पर्शेन सौन्दर्यं लप्स्यते सोऽहं तव पतिः स्यामिति ततश्च कंससम्बन्धिवैश्यगृहे सा तत्रैव जाता केन सा प्रार्थ्य निजगन्धयुक्तौ निर्दिष्टेति । एवमक्रूरागारप्रेरणेन इति यथायुक्तिकं दृष्टमेवेति ज्ञेयम् । कल्पभेदकथा विस्मयमेवेत्ये वा ॥ १० ॥

तदेवं तत्कथां समाप्य तस्या लौकिककामिनीवत् प्रतीयमानत्वेऽपि निन्दां निराकुर्वन् प्रशंसामेव व्यनक्ति । दुराराध्यमिति । विष्णुं सर्वव्यापकं परिपूर्णं स्वयं भगवन्तमित्यर्थः । अतः सर्वेषामीश्वराणां महत्स्रष्ट्रादिपुरुषाणामपीश्वरमाविर्भावादिहेतुं सर्वेश्वरेश्वरमिति पाठे सर्वेषां वरणीयानामर्थानां मुक्तिभक्तिपर्यन्तानामीश्वरं प्रदानसमर्थम् अत एव दुराराध्यं तादृशमपि सम्यगाराध्य यो मनोग्राह्यं वस्तु वृणीते स्वप्रीतिजनकत्वेन प्रार्थयते । असावेव जनः कुमनीषी कुत्सितबुद्धिः । तत्र हेतुरसत्त्वात् अतितुच्छानित्यानर्थकार्यार्थवरणात् एषा तु वाङ्मनसागोचरानन्दमूर्त्तिं श्रीभगवन्तमेव तादृशत्वेन प्रार्थितवतीति परमसुबुद्धिरेवेत्यर्थः । यथैव प्रार्थितं श्रीप्रह्लादेन । या प्रीतिरविवेकानां विषयेष्वनपायिनी । त्वामनुस्मरतः सा मे हृदयान्मापसर्पत्विति । विष्णुपुराणे श्रीप्रह्लादप्रार्थनमपि तादृशमिति भावः ॥ ११ ॥

श्रीसैरिन्ध्र्या इवाक्रूरायापि दत्तं वरं सम्पादयंस्तद्गृहं गत इत्येतद्दर्शन प्रसङ्गसाजात्याल्लीलाक्रममप्याह । अक्रूरेति । रामोद्धवाभ्यां सहित इति । आर्यसमन्वित इति भगवता पूर्वं तथाङ्गीकारात् तथाग्रजं विना स्वातन्त्र्येण तादृशकार्यविधानानौचित्याच्च । रामसाहित्यमुद्धवसाहित्यञ्च सर्वत्रैव तस्य तदनुगत्वात् । कार्यविशेषनिर्द्धारणार्थं मन्त्रिवरसापेक्षत्वाच्च ॥ १२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

याचनमेवाह । आहेति । हे अम्बुरुहेक्षण ! तव सङ्गं त्यक्तुमहं नोत्सहे न प्रभवामीति हे प्रेष्ठ मया सह कतिचिद्दिनानि रमस्वात इह मद्गृहे उष्यतां त्वयेतिशेषः एवमाह ॥ ९ ॥

तस्यै इत्थं याचमानायै सैरन्ध्र्यै मानयित्वा मधुरभाषणादिभिः संमानयित्वा काम एव वरस्तद्दत्त्वा याचितं सफलीकर्तुं पुनरेष्या-

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

मीत्युक्त्वेत्यर्थः । मानदः संमानाचरणशीलः अतस्तस्यैव संमानं वरदानं च युक्तमिति भावः । उद्धवेन सह सर्वसम्पत्समृद्धं गृहं स्वगृहमाजगाम ॥ १० ॥

तस्या दौर्भाग्यमेव स्पष्टयति । दुराराध्यं भक्तिप्रपत्तिव्यतिरिक्तोपायैर्दुःसाध्यं सर्वेश्वरो ब्रह्मा तस्यापीश्वरं भगवन्तं समाराध्य केवलमङ्गरागदानेनैव प्रसाद्य या सैरन्ध्री मनोग्राह्यं शब्दादिविषयसुखमसत्त्वादसारत्वाद्वा तुच्छत्वात्तद्यतो ऽयाचत ततोऽसौ सैरन्ध्री कुमनीषी कुबुद्धिर्दुर्मूर्खा दुर्भगेति भावः ॥ ११ ॥

एवं सैरन्ध्री मनोरथं सफलीचकारेत्युक्तम् । अथाक्रूराभिमतं सफलीकर्तुं तद्गृहं जगामेत्याह । अक्रूरभवनमिति । किञ्चिद्धस्तिनापुरप्रस्थानं कारयितुमिच्छंस्तावद्रामोद्धवाभ्यां सहितो भगवान् कृष्णः अक्रूरस्य प्रियं कर्तुमिच्छया तस्य भवनं प्रति प्रागात् ॥ १२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

मनोग्राह्यं शब्दाद्यविषयं मनसोऽप्यग्राह्यमसत्त्वाद्रागदुष्टत्वात् [illegible] एवं कुमतिः कास्तिते शब्दादौ मतिर्यस्याः सा तथा ॥ ११ ॥

मद्गृहमागन्तव्यमिति प्रागुक्तं सत्यं कर्तुम् अक्रूरगृहगमनं कृष्णस्य वक्ति । अक्रूरेति । किञ्चित् पाण्डववृत्तान्तज्ञानायाक्रूरप्रेषणकार्यं कर्तुमिच्छन् ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

काम एव वरः आगत्य रंस्य इति लक्षणस्तम् ॥ १०—१२ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

याचनमाह । आहोष्यतामिति । इहैवोष्यतामिति विवाहस्याकृतत्वात् क्वचिच्छयनं कर्तव्यं तदिहैव कर्तव्यमित्यर्थः । किमित्येवं प्रार्थ्यत इत्याशङ्कायामाह । प्रेष्ठेति । परमप्रियस्तथोच्यत इति तत्राप्युत्तमामिवत् [illegible] वारयति कतिचित् दिनानि मया सह रमस्व ननु कोऽयं निर्बन्धः अयमेव वर इति कामादिवोक्तं न प्रार्थ्यत इत्याशङ्क्याह । नोत्सहेत्युक्तं [illegible] इति । तत्र हेतुः अम्बुरुहेक्षणेति दृष्ट्वैव सर्वसुखदायककामोद्बोधकेति वा ॥ ९ ॥

भगवान् यद्यपि केवलं सुखं दास्यामीति विचारितवान् तथापि याचितं दत्तवानित्याह । तस्यै कामवरं दत्त्वेति सत्यसङ्कल्पत्वात् [illegible] मपि दत्तवानित्याह । मानयित्वेति । तां मानितवान् हि मोक्षं भक्तिश्च दातुमागतः येभ्यो दास्यति तन्मध्ये एतामप्यङ्गीकृतवानित्यर्थः । चकारादात्मानमपि मानद इति । भगवान् सर्वेभ्यो मानं ददातीति स्वधर्मत्वात् [illegible] मानं दत्तवान् ततो बहिरागत्य उद्धवेन सहितः [illegible] धर्मान्तरमपि परिगृह्य कार्ये स्वसम्पन्ने पुनः सह-

जमेव धर्मं गृहीतवानित्याशङ्क्याह । सर्वेश इति । अनेन तस्या यथा कियद्दिनरमणं भवति तथैव कृतवानित्यपि लक्ष्यते यथा नारदस्य मायया क्षणमध्यषष्टिसम्वत्सरप्रतीतिः तथा अस्या अपीति इतो गतस्य पुनरागमनाभावः सूचितः ननु आकाङ्क्षया पुनर्गच्छेदित्याशङ्क्याह । ऋद्धिमत् स्वधाम अगमदिति ॥ १० ॥

भगवन्तं प्राप्य स्वयं न किञ्चित् प्रार्थनीयं भगवानेव यत्करिष्यति तत्करोतु अन्यथा स कुमनीष्येव भवतीत्याह । दुराराध्यमिति । प्रथमतः स आराधयितुमेवाशक्यः । अत एवास्मदादीन् मुक्त्वा अपि तथैव स्थिता तादृशमप्याराध्य तत्रापि प्रासादपर्यन्तं सम्यक् विष्णुं पालनार्थमेवागतमनाराधनेऽपि पालकं तत्रापि सर्वेश्वराणां कालादीनामपीश्वरं नियन्तारं सर्वेषां हि कालग्रासो ऽनिवारणीयः । एवं सति यो मनोग्राह्यं वृणीते स कुमनीषी महाराजस्थाने गत्वा स्वयं क्षुधितः सर्वोपद्रवयुक्तोऽपि स्वसम्बन्धिने मर्कटाय यथौदनं प्रार्थयते तद्वत् स्वयमात्मा मर्कटरूपाय मनसे हितं प्रार्थयतीति । नन्वेवमस्तु तथाप्यल्पमेव प्रार्थितं भवेत् न तु मर्कटवदित्याशङ्क्याह । असत्त्वादिति । न हि मनोधर्माः स्वस्य भवन्ति अध्यारोपितास्त्वसन्त एव तर्हि कथं प्रार्थयत इत्याशङ्क्याह । कुमनीषीति । स हि दुर्बुद्धिः अतः प्रमादादन्यथा प्रार्थयत इत्यर्थः ॥ ११ ॥

प्रकरणान्तरमारभते । अक्रूरभवनमिति । तस्मिन्नेव दिवसे अक्रूरायापि वरो दत्त इति तस्यापि गृहे भगवान् गतः ननु पूर्वं तस्मै वरो दत्त इति कथं व्युत्क्रमेण निरूप्यते तत्राह । कृष्ण इति । स हि तासामर्थे समागत इति पूर्वमवोचाम तत्र बलभद्रस्यापि कार्यमस्तीत्यत आह । सहराम इति । उद्धवो हि उत्सवासक्तत्वात् रसप्रधान एव रमणं तु स्त्रीभिरेव अतः कुब्जायाः गृहे उद्धवेन सह गमनं भगवांस्तत्र प्रधानमिति बलभद्रस्य क्वचिदपि स्यात् आवेशभूत इति रमणारमणाभ्यां रसाभासानौचित्ये स्याताम् अत्र तु अक्रूराय सम्पूर्णो भावो नेय इति रमणारमयोर्भावार्थं रामं निमित्तभावार्थमुद्धवं च सह नीतवान् नन्वनाकारितः किमिति गत इत्याशङ्क्याह । प्रभुरिति । सर्वेषां हि स्वामी सेवकगृहेऽपि सेवकसम्माननार्थं गच्छति कस्तमाकारयितुं समर्थः प्रयोजनमाह । किञ्चित् काचित् प्रेषणं चिकीर्षयन् चिकीर्षामुत्पादयन् अक्रूरे तदर्थं स्वतोऽपि अक्रूरप्रियकाम्यया च प्रकर्षेण प्रभुरीत्या अगात् अस्योपाख्यानं स्मार्ततरैः प्रतिपाद्यते अयं हि स्मार्त इति ज्ञापयितुम् ॥ १२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

तत्रापि कतिचिद्दिनानि इहान्तर्गृहे एव उष्यतां न तु बहिर्निष्क्रम्यतां भोजनपानादिव्यवहारसिद्धिरेतद्गृहमध्य एव सर्वा वर्तत इति भावः । सहोष्यतामाहोष्यतामिति च पाठद्वयम् ॥ ९ ॥

कामवरं दत्त्वेति मत्कर्तृकपूर्णसम्भोग एव तत्राभिप्रेतः स च ममान्यस्त्रीसत्त्वेऽपि ते सेत्स्यतीति प्रतिश्रुत्येत्यर्थः । मानयित्वा तत्र तां स्वसमतां कारयित्वा निरन्तररमणं तु तद्गृहे न सम्भवेत् किंवदन्तीभयादिति चोक्त्वा अगमत् गमनागमनयोरुद्धवसाहित्यं लोकवितर्काभावाय तस्य महाशिष्टशिरोमणित्वेन सर्वत्र ख्यातत्वात् कुब्जेयं भूपाकेर्विभूतिरिषेण्या एवाख्यायतामित्यनेन ॥ १० ॥

स तान्नरवरश्रेष्ठानाराद्वीक्ष्य स्वबान्धवान् ।
प्रत्युत्थाय प्रमुदितः परिष्वज्याभिनन्द्य च ॥ १३ ॥
[१]ननाम कृष्णं रामश्च स तैरप्यभिवादितः ।
पूजयामास विधिवत्कृतासनपरिग्रहान् ॥ १४ ॥
पादावनेजनीरापो धारयन् शिरसा नृप ! ।
अर्हणेनाम्बरैर्दिव्यैर्गन्धस्रग्भूषणोत्तमैः ॥ १५ ॥
अर्चित्वा शिरसाऽऽनम्य पादावङ्कगतौ मृजन् ।
प्रश्रयावनतोऽक्रूरः कृष्णरामावभाषत ॥ १६ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

प्रसङ्गात् प्रेयसीभावेन भजतो जनान् शिक्षयति । दुराराध्यमिति । मनोग्राह्यं स्वेन्द्रियसुखं तेन कृष्णेन्द्रियसुख एव सर्वथा दृष्टया यद्यानुषङ्गिकं त्विन्द्रियसुखं स्यात्तदा न दोषः भक्तिमात्रैककामित्वेऽपि संसारध्वंसवदिति क्षेयम् ॥ ११ ॥

अक्रूरप्रियकाम्ययैव किञ्चित् चिकीर्षयन् दासस्य स्वविषयकशुश्रूनिर्दशस्यैव प्रियत्वमननात् ॥ १२ ॥ १३ ॥ १४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

मनोग्राह्यं प्राकृतं सुखम् असत्त्वात् असाधुत्वात् ॥ ११ ॥

किंचिच्चिकीर्षयन् पाण्डववृत्तान्तजिज्ञासया हस्तिनापुरप्रस्थानं कारयितुमिच्छन् अक्रूरप्रियकाम्यया च रामोद्धवाभ्यां सहितः अक्रूरभवनं प्रागात् ॥ १२ ॥

भाषा टीका ।

कुब्जा बोली हे प्यारे ! इहां ही पर कुछ दिन तक रहिये मेरे साथ विहार कीजिये हे कमल लोचन ! आपको मैं नहीं छोडना चाहती हूं ॥ ९ ॥

तदनंतर भगवान् उसको मनोरथ वर देकरके उद्धवजीके साथ मिलकर अतिशय पूजित अपने स्थान पर जाते भये ॥ १० ॥

बडे कठिन से आराधन करने योग्य सबके ईश्वरों के ईश्वर विष्णु की आराधना करके जो जीव इंद्रिय भोगही को मांगता है सो बडा दुर्बुद्धि है ॥ ११ ॥

फिर कभी बलदेवजी के तथा उद्धवजी के सहित प्रभु भगवान् अक्रूरजी की मनो कामना पूरी करने को तथा कुछ और अपने काम कराने को अक्रूरजी के घर को गये ॥१२॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

आराद्दूरादेव ॥ १३ ॥ १४ ॥

आ अप इतिच्छेदः अप आ सर्वतो धारयन्नित्यन्वयः ॥१५-१६॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

श्रीकृष्णस्य तदीयं पाण्डवीयञ्च सौहृदांशं प्रकाशयैव तत्र गतत्वात् प्रथमतोऽक्रूरस्यापि तादृशो भावो जात इत्याह । स इति । नरवरेषु श्रेष्ठान् आरात्तदर्थं प्रायश्चन्द्रशालिकाद्युपविश्य स्थापयित्वा दूरादेव स्वयं विलोक्य प्रमुदितः सन् प्रत्युत्थाय प्रत्युद्गम्य चेति क्षेयम् । ततः परिष्वज्य शुभाशंसनादिनाभ्यनन्दत् । अभिनन्द्य चेति पाठे युग्मकम् ॥ १३ ॥

पश्चादातिथ्यकरणे भक्त्यंशमवलम्ब्य स्वभावोदयेनैश्वर्यस्फूर्त्तिस्तदनुक्रमेणैव कृष्णं रामश्च ननामेत्यन्वयः । उद्धवन्तु वैष्णवे बन्धुसत्कृत्या इत्यनेन बन्धूचितमेव सत्कारोति क्षेयम् । तत्रापि पूर्वयुक्त्या तैः श्रीकृष्णादिभिरभिनन्दित एव अभिवादित इति पाठान्तरम् ॥ १४ ॥

पादेति युग्मकम् । पादौ अवनिज्येते अवनिके याभिस्ताः । धारयन्निति सामीप्ये वर्त्तमानवद्वा । अर्हणेन चतुर्विधान्नताम्बूलपर्यन्तेनार्हणद्रव्येण तदनन्तरं पूर्वतोऽप्यपूर्वाम्बरादिभिश्चार्चयित्वा शिरसानम्य पादसम्वाहनारम्भे भक्त्या तौ शिरसा स्पृष्ट्वा पादाविति श्रीकृष्णरामयोः सह विश्रान्तयोरेकमेकमित्यर्थः । तथाभिप्रेत्यैव श्रीकृष्णेन तथा विश्रान्तत्वात् । मृजन् सम्वाहयन्नित्यर्थः । श्रीकृष्णरामावुत्तानशायिनौ ॥ १५ ॥ १६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

स इति । सोऽक्रूरस्तान्नरवरेभ्योऽपि श्रेष्ठान् रामकृष्णोद्धवान् आराद् दूरत एवोद्वीक्ष्य प्रत्युत्थाय नितरां मुदितः परिष्वज्याभ्यनन्दताभिनन्दितवान् ॥ १३ ॥

ननामेति । सोऽक्रूरः कृष्णं रामञ्च ननाम ववन्दे चकारादुद्धवञ्च तथा तैः रामकृष्णोद्धवैरप्यभिवादितः कृत आसनपरिग्रहो यैस्तान् विधिवत्पूजयामास ॥ १४ ॥

हे नृप ! सोऽक्रूरः पादाववनिज्येते प्रक्षाल्येते याभिस्तथा ता आपः आ अप इति छेदः विशेषणस्य द्वितीयान्तत्वात् सर्वतः

[१] अयं विजयध्वजीये नास्ति

दिष्ट्या पापो हतः कंसः सानुगो वामिदं कुलम्।
भवद्भ्यामुद्धृतं कृच्छ्राद्दुरन्ताच्च समेधितम् ॥ १७ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

शिरसा धारयन् अर्हणेनार्घ्यादिना वरादिभिश्चार्चित्वा दिव्यैः इति पूर्वोत्तरान्वयी ॥ १५ ॥

अङ्कगतौ उत्सङ्गे निधापितौ पादौ शिरसा प्रणम्य मृजन् स्वोत्तरीयेणेति शेषः। यद्वा। सम्वहन् प्रश्रयेण विनयेन नम्रः कृष्णरामौ प्रत्यभाषत ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

आरात् दूरात् तान् वीक्ष्य ॥ १३ ॥ ० ॥

पादावनेजनीः पादप्रक्षालिनीः आपः इतिच्छेदः आ इत्याखाय अपो धारयन् अर्हणेन योग्यपूजासाधनेन ॥ १६ ॥

मृजन् परिमृजन् मृदु पीडयन्नित्यर्थः ॥ १६ ॥ १७ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

श्री कृष्णस्य तदीयपाण्डवीर्य च सौहृदानां प्रकाश्यैव तत्र गतत्वात् प्रथमतोऽक्रूरस्यापि तादृशो भावो जात इत्याह। स तानिति। पश्चादातिथ्यकरणे भक्त्यंशमवलम्ब्य स्वभावोदयेनैश्वर्यस्फूर्तेस्तदनुक्रमेणैव कृष्णं रामञ्च ननामेत्यर्थः ॥ १३—॥ २१ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी।

ततो गतानामक्रूरकृतं सत्कारमाह। धर्मप्रतिपादनाय स तानिति। तस्य सर्वे तुल्या अतो मर्यादया पूजयतीति न बलभद्रादेरपि वैमनस्यं नरवरेभ्योऽपि श्रेष्ठान् नरो नरवरो नरवरात् ज्येष्ठश्चेति वा उद्धवरामस्वामिनः क्रमेणोद्दिष्टाः आराद् दूरादेव दृष्ट्वा स्वबान्धवानिति अवश्याभ्युत्थाने लौकिकोऽपि हेतुः प्रत्युत्थाय प्रथमतः प्रमुदितो जातः भक्तत्वाभावात् न साष्टाङ्गप्रणामः पूर्वोक्तरूरस्तु मुक्त एव प्रमोदानन्तरं परिष्वङ्गः तेषांऽभिनन्दनम् ॥ १३ ॥

एवं कायिकं वाचनिकमुक्त्वा मानसिकं नमस्कारमाह। ननामेति। बहिर्नमस्कारस्तु व्यावहारिकः अत एव भगवतापि ताभ्यां सह नमस्कृतमित्याह। स तैरप्यभिवादित इति। पूर्वचकारात् फलाद्युपायनादानं द्वितीयाद्युक्तं च स त्रिभिरप्यभिवादितः अपि शब्दस्तुल्यतामापादयति ततो गृहागता इति पूजयामासेति विधिवत् शास्त्रदृष्टेन प्रकारेण यथा महापुरुषानभ्यागतान् पूजयति लोकः कृतः आसनपरिग्रहो यैः अत्रोद्धवेनापि धर्मानुरोधात्तुल्यतया आसनं गृहीतं यथा श्राद्धे गुरुशिष्यौ ॥ १५ ॥

ततः पादावनेजनीरापः शिरसा धारयन् इयं धर्मनिष्ठायामधिका भक्तिः नृपेति धर्मपरिज्ञानार्थं ततः दिव्यैर्गन्धैः स्रग्भूषणोत्तमैः सहितेन अर्हणेन पूजयामासेति पूर्वेणैव सम्बन्धः पूजासाधनरूपा पूजयामासेत्याराधयामासेत्यर्थः ॥ १५ ॥

ततो यत् कृतवांस्तदाह। अर्चित्वेति। उच्चासने स्थितस्य भगवतः स्वाङ्कगतौ पादौ मृजन् सेवनार्थं सम्वाहयन् प्रश्रयेण अवनतो भूत्वा अक्रूरः पूर्वोक्तः कृष्णरामावुभौ पूर्ववदुभाविति अभाषत स्तोत्रं कृतवानित्यर्थः ॥ १६ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

आ सर्वतः अपः शिरसा शिरसि धारयन् मृजन् हस्ताभ्यां मर्दनेन संवाहयन् ॥ १५ ॥ १६ ॥ १७ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

अक्रूरः आरात् दूरत एव ॥ १३ ॥ १४ ॥

पादौ अवनिज्येते प्रक्षाल्येते याभिस्ताः पादावनेजनीः अपः आ सर्वतः शिरसा धारयन् अर्हणमर्घ्यं तेन अम्बरादिभिश्च अर्चित्वा पादौ मृजन् अक्रूरः कृष्णरामौ अभाषतेति अन्वयः ॥ १५ ॥ १६ ॥

भाषा टीका।

अक्रूरजी ने उन तीनों उत्तम पुरुषों के दर्शन करते मात्र दूरही से बडे प्रसन्न होकर सब का आलिंगन करके प्रणाम करके राम कृष्ण दोनों को नमस्कार किया ॥ १३ ॥

उन तीनोंने भी उनको नमस्कार किया अक्रूरजी उनको दिव्य आसनों पर बैठाकर उनका पूजन करते भये ॥ १४ ॥

हे नृप! उनके चरणों के धोये जलों को मस्त में धारण किया बडी पूजा से वस्त्रों से दिव्य चन्दनादि गन्धों से माळाओं से भूषणों से उनका पूजन करते भये ॥ १५ ॥

श्रीकृष्ण का पूजन करके मस्तक भूमी में लगाके प्रणाम करके चरणों को गोद में रखकर दबाने लगे फिर अक्रूरजी प्रेम से नम्र होकर राम कृष्ण दोनों से यह वचन बोलकर स्तुति करने लगे ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

वां युवयोरिदं कुलमुद्धृतं समेधितं च ॥ १७ ॥

युवां प्रधानपुरुषौ जगद्धेतू जगन्मयौ ।
भवद्भ्यां न विना किञ्चित्परमस्ति नचापरम् ॥ १८ ॥
आत्मसृष्टमिदं विश्वमन्वाविश्य स्वशक्तिभिः ।
ईयते बहुधा ब्रह्मन् ! श्रुतप्रत्यक्षगोचरम् ॥ १९ ॥
यथा हि भूतेषु चराचरेषु मह्यादयो योनिषु भान्ति नाना ।
एवं भवान् केवल आत्मयोनिष्वात्मात्मतन्त्रो बहुधा विभाति ॥ २० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

वामिदं कुलमित्या दिव्यवहारदृष्ट्योक्त्वा परमार्थमाह । युवामिति । जगन्मयौ युवाम् कुतः जगद्धेतू तदपि कुतः प्रधानपुरुषौ तदात्मकौ अतो भवद्भ्यां विना परं कारणमपरं कार्यं च नास्तीति ॥ १८ ॥

ननु प्रत्यक्षादिसिद्धं कथं नास्तीत्युच्यते इत आह । आत्मसृष्टमिति । हे ब्रह्मन् ! परमेश्वर ! ब्रह्मेति वा पाठः रजआदिस्वशक्तिभिरात्मनैव सृष्टमिदं विश्वमन्वाविश्य कारणत्वादननुप्रविष्टोऽप्यनुप्रविश्येव स्थितः श्रुतप्रत्यक्षगोचरं यथा भवति तथा बहुधा भवानेव प्रतीयते ॥ १९ ॥

एकस्यैव बहुधा प्रतीतिं सदृष्टान्तमाह । यथा हीति । योनिषु स्वस्यैव रूपान्तरेणाभिव्यक्तिस्थानेषु चराचरेषु यथा महीप्रमुखानि कारणान्येव नाना भान्ति आत्मयोनिषु स्वकारणेषु भूतभौतिकेषु जीवोऽपि नरमृगादिशरीरेषु बालयुवाद्यवस्थासु च तथा तथा प्रतीयत इति तद्व्यवच्छेदार्थमात्मतन्त्रग्रहणम् ॥ २० ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

सम्यगेभिस्तञ्च विचित्रैर्भवैः । वां युष्मदीयमिति तद्युक्तमेवेत्यर्थः ॥ १७ ॥

इदं कुलं वां किमुच्यते जगदपि युष्मदीयमेवेत्याह । युवामिति । एकस्यापीश्वरस्य द्विधाविर्भावाद्द्वित्वेन निर्देशः । बहिरन्तरङ्गशक्तिभ्यां प्रधानपुरुषौ सन्तौ जगद्धेतू जगदुपादाननिमित्तकारणे । अत एव ताभ्यामेवांशाभ्यां जगन्मयौ तत्तादात्म्येनापि स्थितावित्यर्थः । तथैकादशे । आसीज्ज्ञानमथो अर्थ एकमेवाविकल्पितम् । तन्मायाफलरूपेण द्विधा खमभज्जद्बृहदित्यादि । अतो भवद्भ्यां विना भूतं भिन्नं कारणं कार्यञ्च किञ्चिन्नास्ति इति जगदेव युवाभ्यामुद्धार्यं समेध्यं चेति भावः ॥ १८ ॥

तादृशतत्कार्यस्य विश्वस्य तद्व्यतिरेकेण तदभिन्नत्वं साधयन् पुनस्तद्यामितया तद्व्याप्तत्वेन च साधयति । आत्मेति । श्रुतं प्रत्यक्षञ्च गोचरो यस्य तादृशं यथा स्यादित्येवञ्जहल्लिङ्गस्यापि नपुंसकत्वम् ॥ १९ ॥

ननु मह्यादिवद्विकारीत्याह । केवलः शुद्धः अचिन्त्यशक्त्या विकाररहित इत्यर्थः । अत एव आत्मतन्त्रः स्वतन्त्रः ॥ २० ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

प्रकृतिपुरुषकालैः सृष्टमित्यन्वयः सत्त्वरजस्तमोभिरेवेत्यर्थः ईयते प्रतीयते श्रुतिप्रत्यक्षगोचरः प्रत्यक्षश्रुतिगोचरः वेदान्तयोगिप्रत्यक्षगोचरो वा ॥ १९ ॥

केवल एकरूपः आत्मा स्वयं योनिरुपादानं येषां तेषु पदार्थेषु स्वेन रूपेणावस्थितस्य गुणकर्मान्वयाभाव उक्तः ॥ २० ॥ २१ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

भाषितमेवाह । दिष्ट्येत्यादिना । दिष्ट्या परमानन्द इत्यर्थः किं सानुगः सानुचरः पापात्मा कंसः हतः वां युवयोरिदं कुलं दुरन्ताद्पाराद् कृच्छ्रात् कंसकृतात् दुःखादुद्धृतं समेधितं स्वस्थ्यार्द्धितं चेति ॥ १७ ॥

युक्तं चैतत् युवयोरित्याह । युवामिति । प्रधानपुरुषौ श्रेष्ठपुरुषौ पुरुषोत्तमौ इत्यर्थः । जगतो हेतू कारणभूतावत एव जगन्मयौ स्वार्थे मयट् जगद्रूपौ प्रधानपुरुषाविति विशेषणद्वयार्थस्य दर्शयति भवद्भ्यां विना परमुत्कृष्टं किञ्चिदपि नास्तीति भवन्तावेव सर्वोत्कृष्टावित्यर्थः जगन्मयावित्यस्य व्याख्यर्थमाह । न चापरमिति । अपरमन्यदतदात्मकं नास्तीत्यर्थः । यद्वा । प्रधानपुरुषावित्यनेन प्रकृतिपुरुषशरीरकत्वं विवक्षितं "यस्याव्यक्तं शरीरं यस्याक्षरं शरीरम्" इति प्रकृतिपुरुषयोः परमात्मशरीरत्वश्रवणात् शरीरवाचिशब्दानामपृथक्सिद्धविशेषणवाचिनां गवादिशब्दानां व्यक्तिपर्यन्तबोधकत्ववत् आत्मपर्यन्तबोधकत्वात्तत्सामानाधिकरण्योपपत्तेः जगद्धेतू इत्यनेन प्रकृतिपुरुषशरीरकत्वविशेषण जगदुपादानत्वं विशेष्याकारेण तन्निमित्तत्वं चाभिप्रेतम् । यतो विशिष्टाकारेणोपादानत्वमत एव कार्यस्य कारणादभिन्नत्वात्तद्व्यतिरेकेण नास्तीत्यभिप्रायेणोक्तम् । जगन्मयौ नचापरमिति जगन्मयावित्यन्वयमुखेन जगन्मयतादात्म्योक्तिः । नचापरमिति व्यतिरेकमुखेनेति विवेकः । न चास्ति परमित्यनेन निमित्तकारणान्तरव्युदासः युवयोर्जगदुदयविभवलयैककारणत्वात् यथात्मसत्कुलं कंसादिसंहारः स्वकुलोद्धारश्च उचित एवेति भावः ॥ १८ ॥

ननु लोके विविधकार्यवर्गाणां विविधोपादानकत्वदर्शनात् कथं जगतोऽस्मदेककारणत्वं कथञ्चैकस्य समानैकदेवमनुष्यादिपदार्थात्मकत्वमत आह । आत्मसृष्टमिति । शक्तिभिः स्वविशेषणभूतैः प्रकृतिपुरुषकालैरात्मसृष्टमात्मना

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

प्रकृतिपुरुषशरीरकत्वात्स्वस्मादुपादानभूतात् सृष्टमात्मना प्रकृतिपुरुषयोर्नियन्त्रा स्वेन संसृष्टमित्यर्थद्वयमत्र तन्त्रेण विवक्षितम् अनेनोपादानान्तरस्य निमित्तान्तरस्य च व्यावृत्तिः इदं नामरूपविभागविभक्तं चिदचिदात्मकं विश्वमन्वाविश्य नियन्तृतयान्तरात्मतया चानुप्रविश्य हे ब्रह्मन् ! बहुधा ईयसे प्रतीयसे ईयत इति पाठे भवानित्यध्याहारः स्वात्मन्याधारभूते स्वेनैव कर्त्रा स्वात्मानं प्रकृतिपुरुषशरीरकं जगद्रूपेण परिणमय्य तत्र नियन्तृतयात्मत्वेन चानुप्रविश्य स्वपर्य्यन्तं देव मनुष्यादिशब्दबुद्धिविषयतया नाना प्रतीयत इत्यर्थः । अनेन कृत्स्नं विश्वं प्रति परमपुरुषस्यैकस्यैव प्रकृतिपुरुषविलसच्छरीरकत्ववेषेणोपादानत्वं स्वस्वरूपेण निमित्तत्वं तदुभयकारणत्वोपयुक्तसर्वज्ञत्वसर्वशक्तित्वादिगुणयुक्तत्वं देवादि बुद्धिशब्दयोरात्मभूतपर्यन्तत्वं चोक्तम् भवति । ननु लौकिकानां देवादिबुद्धिशब्दयोर्देवादिमात्रविषयत्वेनानुभवसिद्धत्वात्कथं तयोस्तत्पर्यन्तता विश्वस्य मदेकोभयकारणत्वे च प्रमाणमित्यतस्तं विशिनष्टि । श्रुतिप्रत्यक्षगोचर इति । श्रुतिप्रत्यक्षयोर्गोचरो विषयः तद्धैतत्पश्यन्नृषिर्वामदेवः प्रतिपेदे अहं मनुरभवं सूर्यश्च काक्षिवान्नृषिरस्मिविप्र इति श्रुतिप्रसिद्धानां साक्षात्कृतब्रह्मपर्यन्तस्वात्मयाथात्म्यानां तत्पर्यन्तत्वेन गृहीताचिदचिद्विशिष्टशब्दार्थशक्तीनां वामदेवादीनां प्रत्यक्षस्य अयमात्मा ब्रह्म तत्त्वमसि ऐतदात्म्यमिदं सर्वं सर्वं खल्विदं ब्रह्मेत्यादि श्रुतीनां चोक्तविधत्वेन विषय इत्यर्थः अहि देहात्मभ्रमस्वतन्त्रात्मभ्रमयुक्तम् लौकिकानुभवमात्रेण देवादिबुद्धिशब्दानां तत्पर्यन्तत्वहानिरिति भावः । श्रुति प्रत्यक्षगोचरमिति पाठे क्रियाविशेषणम् ज्ञेयम् ॥ १९ ॥

उक्तमेवोपादानकारणत्वं कारणस्य तदवस्थायामेकत्वेनावस्थितस्यापि कार्यावस्थायां नानात्वेन भावं च सदृष्टान्तमुपपादयति । यथा हीति । दृष्टान्ते योनिष्वित्यस्य स्वोत्यादिः दार्ष्टान्तिके आत्मयोनिष्वित्यात्मशब्दप्रयोगात्स्वे मह्यादयो योनयः उपादानकारणानि येषां तेषु चराचरात्मकेषु भूतेषु व्यष्टिभूतेषु मह्यादिषु समष्टयः नाना भान्ति कारणानि समष्टिभूतानि एकैकशोऽवस्थितान्यनेककार्यात्मना भान्ति इति दृष्टान्तार्थः एवं भवान्केवलमेकरूपः अविभक्तं नामरूपप्रकृतिपुरुषकालशरीरक आत्मा योनिः कारणं येषां तेषु व्यष्टिसमष्ट्यात्मकसर्वपदार्थेषु बहुधा विभाति योनिष्वात्मयोनिषु इत्युभयत्र सप्तमीनिर्देशस्यायमभिप्रायः अवस्थाभेदमात्रमेव नतु कार्यं नामकारणातिरिक्तं वस्त्वस्तीति कार्यावस्थायां कारणमेव तत्तत्कार्यावस्थाविशेषविशिष्टतया बहुधा प्रतिभातीति न केवलं तत्र कारणतयैव कार्यतायां बहुधा भानमपित्वन्तरात्मतयाऽपीत्यभिप्रायेण विशिनष्टि । आत्मेति । अयंभावः यथैकस्य जीवस्य क्रमेण देवमनुष्याद्यनेकशरीरविशिष्टत्वाकारेण बहुधा प्रतीतिः यथा च सौभर्यादेर्युगपदनेकशरीरविशिष्टत्ववेषेण तथा भवतः कृत्स्नचिदचिदन्तरात्मत्वाच्च तच्चिदचिद्विशिष्टत्वाकारेण बहुधा भानमिति ननु जीवदृष्टान्तेन यथैकस्यानेकधा तत्तच्छरीरविशिष्टताकारेण भानं तर्हि तद्वदेव कर्मवश्यतापि चेदस्त्वतो विशिनष्टि । आत्मतन्त्र इति । स्वतन्त्र अकर्मवश्य इत्यर्थः । नह्येकस्यानेकधावस्थानमेव कर्मवश्यत्वापादकमपि तु सुखदुःखादिभोक्तृत्वं तत्तु न तवास्ति तथाच श्रूयते अनश्नन्नन्योऽभिचाकशीति भावः । अनेन जीववैलक्षण्यं सूचितम् ॥ २० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

जगन्मयौ जगद्व्यापिनौ एतदेव विशिनष्टि । भवद्भ्यामिति ॥ १८ ॥

अन्वाविश्य पदार्थानामणुत्वमहत्त्वानुकूलतया प्रविश्य स्वशक्तिभिः इच्छादिस्वरूपशक्तिभिः श्रुतेः प्रत्यक्षस्य च विषयः "अनृतेन हि प्रत्यूढाः वाचारम्भणं विकार" इत्यादिश्रुतिः अयं घटोऽयं पट इत्यादिनिर्दोषार्थेन्द्रियसन्निकर्षलक्षणं प्रत्यक्षं तत्सृष्ट्वा तदेवानुप्राविश,,दिति श्रुतेः "ऋतस्य तन्तुं विततं वितत्य तदपश्य"दित्यादिश्रुतेः ब्रह्मादिज्ञानिप्रत्यक्षस्य च विषयो वा ॥ १९ ॥

इममेवार्थं सदृष्टान्तं दर्शयति । यथेति । योनिषु भोगस्थानेषु उत्पत्तिमत्त्वात् भूतशब्दवाच्येषु चराचरेषु पूर्वादृष्टवशात् गम्यमेषु वस्तुषु पृथिव्यादयो नानाशुक्लनीलपीताद्यात्मना भान्ति आत्मा स्वयं योनिः कारणं येषां तानि तथा तेषु आत्मा परमात्मा केवल आत्मतन्त्र इति विशेषणद्वयेन महान् विशेषोऽस्ति मह्यादिभ्य इति सूचयति ॥ २० ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

तां स्तुतिमाह । दिष्ट्येति—

> दशभिस्तुतिरुक्ता हि प्रार्थनैकेन दोषनुत् ।
> सर्वैर्भावैरिह स्तुत्यो निरोधे ह्यधिकारिभिः ॥
> सर्वेष्वेव च भावेषु कृष्णोत्कर्षो निरूप्यते ।
> अयुक्तं प्रार्थयेद्यस्तु तस्मै दद्यान्न सर्वथा ।
> न दत्तं पूर्वगोपीभ्यः नोत्तरस्यापि दास्यति ।
> निरोधो ह्यन्यथाद्य स्यात्फलार्थं कर्मतद्भवेत् ॥
> ईश्वरः सर्वहितविदविरोधो न दूषणम् ॥
> तथा बालकरोधो हि पित्रापि विनिरूपितः ।
> निवर्त्तयति कामांस्तान् ज्ञानेन गृहिला मतिः ॥
> यदि स्यादुत्कृष्टा दुष्टा निर्दुष्टा वा विचारतः ।

प्रथमं भगवत्कृतकर्मणामभिनन्दनरूपां स्तुतिमाह । स्वसाधनधर्मत्वेन युवयोर्युवाभ्यामिदं कुलं कृच्छ्राद्दुरन्तादुद्धृतम् अनेन कुलसम्बन्धेन कुलस्यानिष्टशङ्कितं निवारितं प्रत्युतेष्टमेव कृतमिति किं च तस्यैकस्य निवारणेन समुदायपर्यवसितं यदैश्वर्यं कुलस्य तत्प्रत्येकं पर्यवसितमपि कृतमित्याह । समेधितमिति । चकारादनुक्तमपि कृतं पूर्वसम्बन्धे पापाद्धृतमिति ॥ १७ ॥

एवं तैन दृष्टं द्वयमेवेति तावदेवाभिनन्दितं स्वरूपमाह । युवां प्रधानपुरुषाविति । योनिबीजवदत्रापि व्याख्येयं प्रधारुषत्वम् आधिदैविकं भविष्यतीति ब्रह्मत्वेनैव स्तुतिर्निर्धर्मिका पर्यवस्यतीत्याशङ्क्याह । जगद्धेतू इति । कारणार्थमेव प्रधानपुरुषौ निमित्तत्वमात्रं भविष्यतीत्याशङ्क्याह । जगन्मयाविति । विकारे वा तत्प्रकृतवचने वा मयटोऽर्थविधाने भगवन्मयत्वं जगतो नयापि यद्यपि तथापि भगवत्त्वेन कारणत्वेन जगत्सत् इति वक्तुं भगवत एव तन्मयत्वमुक्तम् अन्यथा असतः सत्ता स्यात् भगवतो

श्रीमद्वल्लभाचार्यकृतसुबोधिनी।

वा परिणामः स्यात् "विष्टभ्याहमिदं कृत्स्न"मिति वाक्यात् लोके जगतो महत्त्वविधानात् तेन भगवन्माहात्म्यं वक्तुम् अन्नमयो यज्ञ इतिवत् जगन्मयेत्युक्तम्। ननु तथापि भगवतः साधारणं कारणत्वं स्यात् कालादिवत् समवायि कारणत्वमपि साधारणमेव मृदादिवत् तत्राह। भवद्भ्यामिति। भवद्भ्यां कृष्णरामाभ्यां विभक्तशक्तिभ्यां विना परमुत्कृष्टमपरमपकृष्टं चकारात्तदवान्तरभेदा वा न भवन्ति त्वन्मूलकमेव सर्वं यत्र स्वसामर्थ्यं बहुप्रकटयसे तदुत्कृष्टं यत्राल्पं तदपकृष्टमिति॥ १८॥

एवं कारणत्वेन च भगवन्तं निरूप्य भगवन्तमेवाधेयत्वेनापि निरूपयति। भेदाभेदपक्षपरिहाराय आत्मसृष्टमिति। यद्यप्यात्मसृष्टेष्वभेदाभेदो दोषाय भवति तथापि भिन्नसृष्टावपि यथेदं दूषणं न भवेत् तदर्थमेतदुच्यते स्वेनैव सृष्टमिदं सर्वमेव विश्वं सृष्ट्यनुसारेण सृष्ट्यनन्तरमेव वा अनु पश्चादाविश्य स्वशक्तिभिरिति सर्वथा सामर्थ्ययुक्तः बहुधा ईयते अनन्तप्रकारेण प्रतीयत इत्यर्थः। तथापि वैदिकार्थोऽन्य एव भविष्यति "विरोधः शब्द इति चे"दित्यपि तथापि निरूपणात् भ्रमप्रतिपन्नं च भिन्नं स्यात् अतो न कर्तृत्वं भगवतः सम्भवतीत्याशङ्क्याह। श्रुतिप्रत्यक्षगोचरमिति। श्रुतिप्रतिपादितो विषयो वा प्रत्यक्षविषयः सोऽपि सर्वे त्वमेव साधारणप्रत्यक्षस्य तव स्तुतिरूपकत्वमित्यभिप्रायेण सामान्यग्रहणं गोचरशब्दोऽपि विशेष्यनिघ्नो भवति अन्वाविश्येत्यस्य वा कर्म ब्रह्मन्निति सम्बोधनं ब्रह्मसम्वादे सर्वेषोपपत्तिः सिद्ध्यति नायमर्थः पुनः साधनीय इति ज्ञापयितुम्॥ १९॥

नन्वेकस्य नानात्वं वैचित्र्यं वा लोके नास्तीति लौकिकन्यायव्यतिरेकेण केवलमलौकिकमङ्गीकुर्वाणान् प्रति लोकानुसारेणापि एकस्यानेकरूपत्वे दृष्टान्तमाह। यथा हि भूतेष्विति। स्थावरजङ्गमेषु सर्वेष्वेव भूतेषु वस्तुतः पार्थिवेषु कारणभूतानां पृथिव्यादीनां विलक्षणस्य सिद्धत्वेऽपि जीवसामर्थ्येन तत्र कारणत्वेन प्रविष्टा मह्यादयः नाना भान्ति तत्रोपपत्तिमाह। योनिष्विति। चराचराणां भूतानि योनिवशादेव तथोत्पद्यन्त इति कदाचिन्मह्यादीनामकारणता प्रतीयेत बीजस्यापि वापनानन्तरं स्वरूपतो नाशात् योनित्वापत्तिरिति योनिष्वित्युक्तं तत्र मह्यादीनां बहीजं शक्तिवशात् तथात्वमुपपद्यते तदा बीजापन्नं ब्रह्म पूर्वमेव भगवति विद्यमानं जगद्रूपं स्वसामर्थ्येन शिष्टं स्वाभिलषितप्रकारेण योनिभावापन्नं स्वस्मिन् प्रवेशयन् अनन्तजगदाकारेण वृद्ध्यादिषु बहुलपपरिग्रहाविर्भावेन भगवानपि केवल एव आत्मयोनिषु आत्मरूपासु योनिषु जगद्रूपेषु बहुधा विभाति शक्तिवशादविद्यमानस्थाने आकर्षणादनित्यता स्यादिति तद्व्यावृत्त्यर्थमाह। आत्मेति। सर्वत्र व्याप्त एव अपकृष्ट एवाभिव्यक्तो भवतीत्यर्थः। दृष्टान्ते पारतन्त्र्यं प्रतिभासत इति तद्व्यावृत्त्यर्थम् आत्मतन्त्र इत्युक्तं तदपेक्षयाप्यनेकप्रकारत्वं ज्ञापयितुं दृष्टान्तेन नानात्वे समागतेऽपि प्रकारान् विधत्ते बहुधेति। नन्वद्वमेवेत्यत्र किं प्रमाणं वादिप्रतिपन्नमतेष्विव भिन्नतयैव तथा जगद्भवत्विति चेत्तत्राह। विभातीति। कारणापेक्षयाल्पयाधिक्यन कार्ये भानं दृश्यते यथा चित्रपटादिषु अतो भगवानेवत्यध्यवसीयत इत्यर्थः॥ २०॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

इदं कुलं वामिति किमुच्यते जगदपि युष्मदीयमित्याह। युवामिति। एकस्यापीश्वरस्य द्विधाविर्भावाद्विवित्वेन निर्देशः तेन त्वमेव प्रधानं त्वमेव पुरुष इत्यर्थः। जगद्धेतू जगन्मयाविति त्वमेव कारणं त्वमेव कार्य्यमित्यर्थः। एतदेव व्यतिरेकेणाह। भवद्भ्यामिति। परं कारणमपरं कार्य्यम्॥ १८॥

एक एव भगवान् जगद्रूपेण नाना भवतीत्याह। आत्मसृष्टं स्वकार्य्यं विश्वमिदमन्वाविश्य अत्र प्रविश्य स्थित इत्यर्थः बहुधा देवगन्धर्वादिरूपेण मनुष्यगवादिरूपेण च ईयते अवगम्यते यतो विश्वमिदं श्रुतप्रत्यक्षगोचरम् श्रवणदर्शनविषयीभूतं क्लीवत्वमार्षम्॥ १९॥

एकस्यैव नानारूपत्वे दृष्टान्तमाह। यथा भूतेषु भौतिकशरीरेषु चराचरेषु योनिषु जातिषु मह्यादयः हेतवो नाना भूत्वा भान्ति एवं केवल एक एव आत्मयोनिषु आत्माभिव्यक्तिस्थलेषु आत्मा भवान् बहुधा विभाति आत्मतन्त्र स्वतन्त्रः॥ २०॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

वां युवयोरिदं कुलम्॥ १७॥

प्रधानपुरुषौ मुख्यपुरुषौ जगतो हेतू निमित्तोपादानकारणभूतौ अत एव जगन्मयौ कारणस्यैव कार्य्याकारेण स्थितत्वात्कार्यरूपावित्यर्थः। स्वार्थे मयट् परं कारणमपरं कार्यम् भवद्भ्यां विना नास्तीत्यतः सर्वकार्यकारणरूपौ भवन्तावेवेत्यर्थः। रामकेतु श्रीकृष्णः एक एव बलस्तत्कलाभूतः समीपस्थो ऽतो द्विवचनम्॥ १८॥

ननु कारणसदृशं कार्यं भवति प्रकृते तु वैपरीत्यम् अहं चेतनः जगदचेतनमिति अतोऽचेतनात्प्रधानाज्जगदुत्पत्तिर्युक्तेत्यत आह। आत्मसृष्टमिति। हे ब्रह्मन्! परमात्मन् इदं श्रुतिप्रत्यक्षयोर्गोचरं विषयभूतम् आत्मसृष्टत्वेन श्रुत्या "यतो वा इमानि भूतानि जायन्ते" इत्युपक्रम्य स आत्मेत्यादिश्रुत्या प्रतिपादितम् प्रत्यक्षेऽपि घटरथाद्युत्पत्तिश्चेतनादेव अत आत्मसृष्टम् चेतनसृष्टम् त्वया निर्मितम् नहि अचेतनात्कार्योत्पत्तिः श्रूयते दृश्यते वेति भावः। यदुक्तं कारणसदृशं कार्य्यं भवतीति तदयुक्तं गोमयादौविसदृश वृश्चिकाद्युत्पत्तिदर्शनात्। ननु जगदुपादानत्वस्वीकारे मम विकारित्वं स्यान्नेत्याह। स्वशक्तिभिरात्मसृष्टमिति। एवमनन्तशक्तिस्त्वं स्वरूपतो निर्विकारोऽपि जगदभिन्ननिमित्तोपादानहेतुरसीति सिद्धान्तः किञ्च "तत्सृष्ट्वा तदेवानुप्राविश"दिति श्रुतेः भवान् अन्वाविश्य तत्तन्नियन्तृतया बहुधा ईयते प्रतीयते॥ १९॥

कार्यकारणयोः विश्वपरमात्मनोः सदृष्टान्तं भेदाभेदसम्बन्धमाह। यथाहीति। यथा योनिषु कारणदर्शनस्थानेषु भूतेषु मह्यादिकार्येषु मह्यादयः हेतवः तत्तदाकारेण नाना भान्ति एवं भवान् सर्वकारणकारणः चिदचिच्छक्तिः आत्मा स्वयं योनिः कारणं येषां तेषु स्वदर्शनस्थानेषु वा स्वकार्येषु केवलः कारणत्वेन एक एव भवान् सर्वात्मा नाना तत्तदाकारेण आत्मान्तर्यामिरूपेण च आत्मतन्त्रः पारवश्यादिसर्वदोषास्पृष्टस्वरूपो भाति सर्वेषु चेतनाचेतनेषु भवदात्मकेषु अनुकूलाचाराध्यवसायः कर्त्तव्यो मुमुक्षुभिरिति भावः॥ २०॥

सृजस्यथो लुम्पसि पासि विश्वं रजस्तमःसत्त्वगुणैः स्वशक्तिभिः।
न बध्यसे तद्गुणकर्मभिर्वा ज्ञानात्मनस्ते क्व च बन्धहेतुः ॥ २१ ॥
देहाद्युपाधेरनिरूपितत्वाद्भवो न साक्षान्न भिदात्मनः स्यात्।
अतो न बन्धस्तव नैव मोक्षः स्यातां निकामस्त्वयि नोऽविवेकः ॥ २२ ॥
त्वयोदितोऽयं जगतो हिताय यदा यदा वेदपथः पुराणः।
बाध्येत पाखण्डपथैरसद्भिस्तदा भवान् सत्त्वगुणं बिभर्ति ॥ २३ ॥
स त्वं प्रभोऽद्य वसुदेवगृहे ऽवतीर्णः स्वांशेन भारमपनेतुमिहासि भूमेः।
अक्षौहिणीशतवधेन सुरेतरांशराज्ञाममुष्य च कुलस्य यशो वितन्वन् ॥ २४ ॥

भाषा टीका।

पापी कंसको उसके अनुचरों सहित जो आपने मारा सो अच्छा भया और आपने इस यदुकुळ को बडे कष्ट में से उद्धार किया है और वर्धन किया है सो अछा किया है ॥ १७ ॥

आप दोनों श्रेष्ठ पुरुष हौ सब जगत के कारण हौ और सब जगत में व्याप्त हौ आप दोनों के विना कार्य कारण स्थूल सूक्ष्म कुछ भी नहीं है ॥ १८ ॥

हे ब्रह्मन् आपने बनाये इस जगत् में प्रविष्ट होकर आप अपनी शक्तियों से वेद तथा प्रत्यक्ष प्रमाण के गोचर होकर बहुत प्रकार के मालूम पडते हौ ॥ १९ ॥

जैसे स्थावर जंगम इन भूतों में पृथिव्यादिक तत्व रह कर नाना रूप से प्रतीत होते हैं इसी प्रकार से आप भी अपनी बनाई नाना योनियों में स्वतन्त्रता से प्रवेश होकर नाना प्रकार से मालूम पडते हौ ॥ २० ॥

———

श्रीधरस्वामिकृतभावार्थदीपिका।

ननु सृष्ट्यादिकर्तृत्वेन च मम किञ्जीववद्बन्धउक्तो न हि नहीत्याह। सृजसीति। तद्गुणकर्मभिर्वा त्रैगुणैः कर्मभिर्वेत्यर्थः। यतः क्व च कदाचिदपि बन्धहेतुरविद्या तव नैवास्ति कुत इत्यत आह। ज्ञानात्मन इति। मायाया आश्रयानावरकत्वादिति भावः ॥ २१ ॥

किञ्च आस्तां तावत्तव बन्धशङ्का यतोऽविद्योपाधेर्जीवात्मनोऽपि न वस्तुतो बन्धोऽस्तीत्याह। देहाद्युपाधेरिति। भवो जन्म तन्मूला भिदा च साक्षात्स्वरूपतो न स्यादिति ननु मम बन्धाभावं वदता त्वया किम्मोक्षोऽङ्गीक्रियते ओमिति चेत्तर्हि बन्धाभावे मोक्षासम्भवादापन्नो बन्धोऽपीत्याशङ्क्याह। अत इति। यतो नाविद्या अतो न बन्धो मोक्षश्च एवमुभौ न स्यातामित्यर्थः। ननूलूखले मां बद्धं श्रुतवान् यमुनाह्रदे मुक्तं दृष्टवानस्यतः कथमुभयं नास्त्यत आह। निकाम इति। स्वाभिप्रायानुरूपस्त्वयि नोऽस्माकमाविवेक एव परमेवम्भूत इति यद्वा नोऽविवेक एव तवोभौ स्याताभिति ॥ २२ ॥

ननु तर्हि ममावताराश्चतच्चरित्राणि च शुक्तिरजतवदविद्याकल्पितान्येव किं न हि न हि इयन्तु तव लीलेत्याह द्वयेन। त्वयोदित इति ॥ २३ ॥

सुरेतरांशा ये राजानस्तेषामक्षौहिणीशतानां वधेन भूमेर्भारमपनेतुं स्वांशेन रामेण सहावतीर्णोऽसि ॥ २४ ॥

———

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी।

ननु भवत्वचिन्त्यशक्तित्वाच्चिन्तामण्ययस्कान्तादिवदुपादाननिमित्तत्वेऽप्यविकारित्वं कथं नाम वीक्षणादिचेष्टामयसृष्ट्वा किं कथम्वा तेन न बन्धः तत्राह। सृजसीति। सिद्धान्तमाह। ज्ञानात्मनः। चिच्छक्तिविलासमात्रप्रयत्नस्य मायाविलासोऽपि यस्तव प्रयत्नः प्रतीयते सोऽपि तत्सम्बन्धेनैवेत्यर्थः। एतदुक्तं भवति मायिकप्रपञ्चेऽपि चिच्छक्तिविलासास्त्वद्भक्त्यादिरूपा अनुगता दृश्यन्ते तथा चैकादशे। "सात्विक्याध्यात्मिकी श्रद्धा कर्मश्रद्धा तु राजसी। तामस्यधर्मे या श्रद्धा मत्सेवायान्तु निर्गुणे" इत्यादि। ततो मायिकवैभवान्तर्गतसाधकभक्तजनार्थमेव वीक्षणादिकं कुर्वति त्वय्यानुषङ्गिकमेवान्यसृष्ट्यादिकं भवतीति। पासीति पश्चान्निर्देशस्तस्य तात्कालिकत्वेन दृष्टान्ततया विन्यासात्। यथोक्तं प्रथमे श्रीकुन्त्या। "तथा परमहंसानां मुनीनाममलात्मनाम्। भक्तियोगविधानार्थं कथं पश्येमहि स्त्रिय" इति तदेवं मायाविलास एव विकारित्वं ननु चिच्छक्तिविलासे तत्र तन्निषेधात्। यथोक्तं द्वितीयस्कन्धे वैकुण्ठवर्णने। न यत्र मायेति न च काल विक्रम इति च। तथा मायाविलासनशक्तेः तेन न बन्धः ततो न दोष इति भावः ॥ २१ ॥

देहेति। तैर्व्याख्यातं तत्रोलूखले बन्धश्रवणात् नराकृतिमूर्त्तौ संसारबन्धोऽपि सम्भाव्यते। यमुनाह्रदे दृष्टदेवाकृतिमूर्त्तौ तत्तदैश्वर्यसामग्री दर्शनात्। ततो मुक्तत्वञ्च प्रतीयत इत्यभिप्रायः। अनिरूपितत्वादनिर्वचनीयत्वादित्यर्थः। यद्वा यदि वा स्यातां तादृशौ तदा नोऽस्माकं प्रियवर्गाणां नितरां काम एव तौ द्वौ तव स्यातां प्रेमजातिविशेषोचितमनोरथविशेषं प्राप्यैव तादृश्यो लीलास्तवोदयन्ते। यथा श्रीयशोदाया वात्सल्यमनोरथविशेषेणार्भकभावमयलीलाविशेषोदयात् बन्धनादिप्राप्तिलीलोदय इति भावः। ननु कथं प्रकटैश्वर्येऽपि मयि

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी।

तेषां तादृशभावः सम्भवति तत्राह। न तिष्ठति विवेकः ऐश्वर्यदर्शनेऽपि तदनुसन्धानं यस्मात् तादृशोऽपि निकाम इति अतः "अहं भक्तपराधीनो ह्यस्वतन्त्र इव द्विज। साधुभिर्ग्रस्तहृदयो भक्तैर्भक्तजनप्रिय" इत्युक्तेस्तवापि तादृशो भावः स्यादिति भावः ॥ २२ ॥

अतः स्वभक्तितात्पर्यपर्यवसानं वेदमार्गं रक्षन् तदभिव्यक्तिस्थानं सत्त्वगुणमपि पुष्णातीत्याह। त्वयेति। त्वयेश्वरेणोदित उक्त इति भ्रमादिदोषचतुष्टयराहित्यात् प्रामाण्यम् अवश्यपाल्यत्वञ्च न चैत्थं कृत्रिम इत्याह। पुराणः अनादिः। तवानादित्वेन त्वत्त एवानादितो मुहुराविर्भावित्वेन चेति भावः। स यदा यदा तादृशत्वदपेक्षाहंभकवृन्दाभावात्त्वदौदासीन्येनासद्भिः बाध्येत अतिशयेन पीडितः स्यात्तदा दैवात् श्रीप्रह्लादस्येव कस्यचिद्भक्तजनस्यैकस्य बहूनां वा प्राकट्ये सति तत्पोषणार्थं स्वयमवतीर्य सात्त्विकगणवर्द्धनेन वेदपथं पुष्णन् स्वयमेव सत्त्वगुणं भवान् बिभर्त्ति पुष्णातीत्यर्थः ॥ २३ ॥

तदेवमुपोद्घातानन्तरं दिष्ट्या पापो हतः कंस इत्यादि निर्दिष्टं प्रकृतमेवानुवर्त्तयति। स इति। एवमुक्तमाहात्म्यो मुहुरेवावतीर्य सन्मार्गप्रवर्त्तकस्त्वं विभो हे सर्वैश्वर्यपरिपूर्ण वसुदेवस्य यादवश्रेष्ठस्य श्लेषेण वसु भक्तिलक्षणो धर्मस्तेन दीव्यति द्योतत इति तथा तस्य ॥ २४ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्।

अथ जीवशरीरकस्यापि तस्य जीवगतबन्धमोक्षाद्यस्पर्शनमाह। देहादीति। अनिरूपितत्वात् भोगार्थतया निरूपितत्वाभावात् चिदात्मनः जीवान्तरात्मनः तव भवः संसारः साक्षान्नास्ति शरीरभूतजीवस्येत्यर्थः। यथा सिंहस्य श्वेत इत्यत्र श्वैत्यं देहगतं तद्वत् कामाद्यभावहेतुरविवेकाभावः ॥ २२—२३ ॥

वितन्वन्निति "लक्षणहेत्वोः क्रियायाः" मिति शतृप्रत्ययः यशो विस्तारयितुमवतीर्णोऽसीत्यर्थः ॥ २४ ॥ २५ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

तदेवोपपादयति। सृजसीति। स्वशक्तिभिः कार्योपयुक्तस्वापृथक्स्थितविशेषणात्मकैरजआद्याख्यैः प्रकृतिगुणैर्विश्वं सृजसि लुम्पसि हरसि पासि रक्षसि रजःप्रचुरचतुर्मुखाख्यजीवशरीरकत्ववेषेण सृजसि तमःप्रचुररुद्राख्यजीवशरीरकत्ववेषेण लुम्पसि सत्त्वप्रवर्त्तकस्वावतारेण पासीत्यर्थः। यद्यप्येवमथापि तैर्गुणैः कर्मभिः रजआदिगुणमूलकसृष्ट्यादिक्रियापारैश्च न बध्यसे गुणपारवश्याभावात् सृष्ट्यादिकर्मणां पुण्यापुण्यमूलकत्वाभावाच्च सुखदुःखादिभोक्तृत्वापादककर्मबन्धो नास्तीत्यर्थः। बन्धाभावहेतूपन्यासेन बन्धहेतुं निराकुर्वन् विशिनष्टि ज्ञानात्मन इति। स्वस्वरूपेणावस्थितस्य अत एव निरस्तनिखिलदोषस्य समस्तकल्याणगुणस्य गुणपारवश्यापादकपुण्यापुण्यरूपकर्मान्वयराहित्यस्य तव बन्धहेत्वभावात्प्रत्युत बन्धप्रतिभटधर्मयोगाच्च न बन्धशङ्काहेतुसम्भावनापीत्यर्थः। जीवस्तूक्तविधत्वद्विपरीत इति भावः ॥ २१ ॥

तदेवं स्वेन रूपेणावस्थितस्य जीववैलक्षण्यापादकगुणकर्मान्वयाभावस्तत एव बन्धाभावश्चोक्तः अथ जीवशरीरकस्यापि तस्य जीवगतबन्धमोक्षाद्यस्पर्शमाह। देहाद्युपाधेरिति। देवमनुष्यादिदेहादिरूपोपाधेरनिरूपितत्वात् भोगाद्यर्थतया निरूपितत्वाभावाच्चिदात्मनः जीवान्तरात्मनस्तव भवः संसारः साक्षान्नास्ति शरीरभूतजीवस्येवेति भावः। यथा सिंहः श्वेत इत्यत्र श्वैत्यं देहगतं न त्वात्मगतं तद्वत् भिदात्मनः स्यादिति पाठान्तरं तदा भिदात्मन इत्यनेन दृष्टान्तोऽभिप्रेतः यथा शरीरगता देवत्वमनुष्यत्वादिभिदा न तदात्मनः साक्षात्स्यादपि तु शरीरद्वारा तथा जीवगतो भवोऽपि न साक्षाद्भवतः स्यादपि तु जीवद्वारा स्वरूपतस्तु भवान्वयरहित एव भवानित्यर्थः। यद्वा आत्मन इति। हेतुगर्भं विशेषणम् आत्मनः चिदचिदन्तरात्मत्वात्तव न शरीरभूतचिदचिद्गता भिदास्ति नहि शरीरगतबाल्यादिभिदा शरीरिणि प्रसजतीति भावः। ननु शरीरगतधर्मान्वयरहितेऽपि जीव इव भवान्वयो दुर्वार इत्यत आह। देहाद्युपाधेरनिरूपितत्वाद्भवो नेति। जीवस्य कर्ममूलकसुखदुःखादिभोगार्थतया करणकलेवराद्युपाधेर्निरूपितत्वाद्भवोऽस्ति तव तु क्रीडार्थतयेति न भवोऽस्तीति भावः। यतो न भवोऽस्त्यतः न बन्धः भवनिदानभूतः कर्मबन्धः नास्ति तस्मान्मोक्षश्च नास्ति बन्धाभावात्तदवधिकमोक्षश्च नास्त्यतस्तावुभौ न स्याताम् इति नञा वृत्त्या वाक्यभेदेनान्वयः अतो बन्धो मोक्षश्च न स्यातामित्यन्वये तु नञन्तरवैयर्थ्यं प्रत्येकान्वये तु स्याताम् इति द्विवचनान्वयानुपपत्तिः यद्वा नञा बन्धमोक्षयोः प्रत्येकमेव निषेध्यत्वाद्गतेर्मोक्षश्च प्रत्येकमेव क्रियान्वयित्वावगमस्त्वावश्यकत्वाच्च स्यातामिति द्विवचनमतन्त्रं स्यादित्यर्थः। नन्वहमपि रामकृष्णादिरूपेणागतः कर्मवश्य इत्यत आह। स कामस्त्वयीति। स रामकृष्णादिरूपदेहाद्युपाधिः कामः काम्यत इति कामः केवलं स्वेच्छामूलको न तु कर्ममूलक इत्यर्थः तर्हि तथा सर्वैः किं नावसीयते इत्यत आह। नोऽविवेक इति। नोऽस्माकमविवेकः जीवेश्वरयाथात्म्यविवेकाभावप्रयुक्तः त्वद्देहाद्युपाधेः कर्ममूलत्वोद्भावनमित्यर्थः ॥ २२ ॥

ननु देहाद्युपाधेः कर्ममूलत्वभ्रमत एव तत्फलभूतसुखदुःखाद्यखिलभोगार्थत्वं च जीवेषु निश्चितं मद्देहाद्युपाधेर्मदिच्छैकमूलकत्वे किं तत्प्रयोजनमित्यत आह। त्वयेति द्वाभ्याम्। जगतो हितार्थं यस्त्वयोपदिष्टः पुराणो वेदमार्गः त्वन्निःश्वसितभूतवेदबोधितो धर्ममार्गः स यदाऽसद्भिः समीहितासाधनैः प्रत्युतानर्थावहैः पाषण्डपथैः वेदपथविरोधिभिः बाध्येत तदा भवान् सत्त्वगुणं शुद्धसत्त्वमयं विग्रहं बिभर्त्ति "यदा यदा हि धर्मस्य परित्राणाय साधूनाम्" इति श्लोकद्वयोक्तप्रयोजनार्थमवतरसि न तु कर्मफलभोगार्थं जीववज्जन्ममरणादिमच्छरीरद्वारा जायस इति भावः ॥ २३ ॥

स इति। यो रामादिरूपेणावतीर्णः स त्वं हे प्रभोऽधुना इह लोके वसुदेवगृहे स्वांशेन बलरामेण सह सद्भूतरूपन्नाननन सात्वतोऽसि किन्तु सुरेतराणामासुरप्रकृतीनां राज्ञां कंसादीनामक्षौहिणीनां यानि शतानि तेषां वधेन भूमेर्भारमपनेतुं निराकर्तुमस्य यादवकुलस्य यशो वितन्वन् "लक्षणहेत्वो" रिति शत्रादेशः विस्तारयितुं चेत्यर्थः ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

विश्वस्यात्मयोनित्वं स्पष्टयति । सृजतीति । केवलत्वं स्पष्टयति नेति । गुणैः सत्त्वादिभिः उत्पत्तिहेतुत्वमभवादितियुक्तमितिभावेनाह । त इति । शून्यस्त्वमिति नेत्याह । ज्ञानात्मन इति । क च कस्मिंश्चिद्देशे काले च ॥ २१ ॥

जनितोऽत विष्णुरिति जन्मप्रतीतेर्जातस्य हि ध्रुवो मृत्युरिति मरणस्य अवश्यंभावात् कथन्नैव हेतुरित्युच्यत इति तत्राह । देहेति । देहादिरेवोपाधिः देहाद्युपाधिः तस्योत्पत्तौ कारणभूतगुणकर्मणामनिरूपितत्वादसम्भावितत्वात्साक्षाद्भवः शुक्रशोणितसम्पर्कलक्षणं जन्म न स्यात् हि यस्मादतस्तव देहबन्धो न स्यात् देहवियोगलक्षणो मोक्षश्च नैव स्यातां यावन्यत्र स्यातामतो नो निकामं यावद्योग्यं त्वयि विवेकः तत्त्वनिश्चायकं ज्ञानं स्यादित्यन्वयः ॥ २२ ॥

साक्षाद्भवो नास्तिचेत्तर्हि कीदृशोऽस्तीति तत्राह । त्वयेति । त्वयोदितः प्रकाशितः अयं भवो देहयोगलक्षणो जगतो हिताय ज्ञानलक्षणाय भवति कथमिति तत्राह । यदेति ॥ २३ ॥

एतदेव विशिनष्टि । स त्वमिति अमुष्य कुलस्य यदूपपदस्य ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

यत एवं जीवस्यापि वास्तवो न बन्धः अतो न तरां ततो न तमां मोक्षः यदि वा स्यातां तादृशौ तदा नोऽस्माकं प्रियवर्गाणां नितरां काम एव तौ द्वौ स्याताम् । प्रेमजातिविशेषोचितमनोरथविशेषं प्राप्यैव तादृशयो लीळास्तत्रोदयन्ते । यथा श्रीयशोदाया वात्सल्यमनोरथविशेषेणार्भकभावमयळीलाविशेषोदयात् । बन्धनादिप्राप्तिलीलादय इति । कीदृशो निकामः ऐश्वर्यादिदर्शनेऽपि न विद्यते विवेको यत्र तादृशः ॥ २२—२६ ॥

श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी ।

एवं जगद्रूपतां निरूप्य कर्तृत्वे प्राप्तान् दोषान् वारयितुमाह । सृजस्यदो लुम्पसीति । अदः प्रसन्नं भगवन्तं दृष्टवतः प्रपञ्चास्फुरणादद इति परोक्षनिर्देशः अनेनास्फुरणे हेतुरप्युक्तः रजसा सृजसि तमसा लुम्पसि सत्त्वेन च पासि रजस्तमः रूपाणां स्वधर्मप्रतिपादनाय गुणत्वं तथापि स्मृतिन्यायेन भगवतः कर्तृत्वं न भविष्यतीत्याशङ्क्याह । स्वशक्तिभिरिति । ननु, प्रकृतिधर्मैः धर्मत्वेऽपि सामर्थ्यमापन्नानीति शक्तित्वं यद्यपि शक्तिपदेनैवाभ्यासो नास्तीति कर्मबन्धो निवारित एव तथापि लौकिकन्यायेनापि दूषणं परिहर्तुं ज्ञानेन तदभावमाह । न बध्यसे तद्गुणकर्मभिर्वेति । तद्गुणैर्बन्धो मोहवशाद्बन्धो ह्यनिच्छयापि चेतनादेः काळेनापि न सम्बन्ध इति सुतरामेव तुच्छैर्लौकिकैः तत्र हेतुमाह । ज्ञानात्मनस्त इति । ज्ञानेनापि बन्धाभाव इति सर्वशास्त्राणि भवांस्तु ज्ञानस्याप्यात्मा त्वत्सामर्थ्यादेव ज्ञानं तथा करोतीत्यात्मपदेन सूचितम् अत एव बन्धहेतूनां निराकृतत्वात् ते सर्वसमर्थस्य को वा बन्धहेतुर्भवति इत्याह । केति । चकारात् देशे काले अवस्थायां च ॥ २१ ॥

ननु तथापि अवतारान्यथानुपपत्त्या सोपाधिरेव सत्त्वगुणाभिमानिनो ऽवतार इति लोकप्रसिद्धेश्च सुतरामेवावतारे बन्धो भविष्यतीत्याशङ्क्याह । देहाद्युपाधेरिति । देह इन्द्रियाण्यन्तःकरणं स्वभावः कर्म कालो वा यस्योपाधिभूता भवन्ति तस्यात्मनः प्रथमं भावो भवति ननु ममापि वसुदेवाद्भवो दृश्यत इति चेत्तत्राह । साक्षादिति । नटवत् वेषार्थं जन्मप्रकाशनं न जन्म किञ्च आत्मनो भिदापि न स्यात् पूर्वसङ्घातपरित्यागेन सङ्घातान्तरग्रहणं भेदोऽत्र विवक्षितः यतः अयमात्मा नहि सर्वत्र व्याप्तस्तथा भवितुमर्हति आत्मत्वान्न भेदः भेदाभावाच्च न जन्म यतो मूलभूते विष्णौ भगवति वा अत एव हेतोः तवापि न बन्धो नैव च मोक्षः येन सत्कर्मैकरणार्थं धर्मस्थापनादिकं कुर्यात् अत एव बन्धमोक्षौ न स्याताम् । ननु यावदधिकारं त्वाधिकारिकमिति न्यायेन विष्णोरप्यधिकारान्नो स्मार्त्तसम्मता मुक्तिः ब्रह्मवादिनोऽप्येकदेशिनः यद्ब्रह्मविद्यया सर्वं भवन्तो मनुष्या मन्यन्ते तद्ब्रह्म किं भवेदित्याशङ्क्य ब्रह्म वा इदमग्र आसीत् आत्मानमेवावेदहं ब्रह्मास्मीति तस्मात्सर्वमभवदिति वाक्यानुरोधात् प्रपञ्चभवनवत् ब्रह्मविदाप्नोति परमित्यत्रापि ब्रह्मज्ञानेनैव ब्रह्मणोऽपि परत्वप्राप्तिरित्यध्यवसीयते कर्मकाण्डेऽपि परमेष्ठिनो वा एष यज्ञोऽग्र आसीदित्युपक्रम्य सर्वेषामुत्कर्षो दर्शपूर्णमासाभ्यां निरूपितः एवं परब्रह्मणोऽपि दर्शपूर्णमासाभ्यामेव उत्कर्षः प्रतीयते परमेष्ठिशब्दश्च ब्रह्मपर्यायः इन्द्रे प्रजापतौ ब्रह्मणीत्युपक्रमेण तत्प्रकरणस्थानामेवोपलम्भात् अतः सर्वेषामेव बन्धमोक्षौ स्त इति मन्यन्ते किञ्च "इमां विद्यां कृष्णाय देवकीनन्दनाय प्रोवाच"इत्युपाख्याने ब्रह्मविद्याग्रहणमपि श्रूयते अतः सम्भावितत्वात् बन्धमोक्षौ प्राप्ताविति तन्निराकरणं युक्तमेव एते तु निरूपिताः पूर्वपक्षाः अविवेकेनैव प्राप्ता इत्याह । निकामस्त्वयि नोऽविवेक इति । नोऽस्माकं सर्वेषामेव भ्रान्तानां निकामः स्वेच्छया अविवेकः अधिकारस्तु न स्वामिपरः लोके महाराजे अधिकारपदप्रयोगाभावात् परमेष्ठिब्रह्मशब्दौ चतुर्मुखवाचकौ अन्यथा यज्ञो वै विष्णुरिति श्रुत्या दर्शपूर्णमासयोर्यज्ञत्वविधिर्व्यर्थः स्यात् ब्रह्मविद्याद्यधिकारोऽपि सन्दीपनेरिव लीळया सम्भवति अतोऽस्माकमेवाविवेकः ॥ २२ ॥

ननु परब्रह्मणि बन्धमोक्षौ कथं चित्सम्भवत इति चेत्तत्राह । त्वयोदित इति । यदैव त्वयोदितो वेदमार्गः पाषण्डपथैः विरुद्धमार्गप्रतिपादकैः पुरुषैः बाध्येत तदा तेषां च, बलिष्ठत्वात् कालविशेषात् सर्वेषामेव बुद्धिनाशात् भगवानेव शक्त इति तदा भगवान् सत्त्वगुणं बिभर्त्ति भगवद्गृहीतं सत्त्वं बलवत् सर्वरजस्तमसोरभिभावकं भवतीति अनेन वैषम्यदोषः परिहृतः नैर्घृण्यदोषस्तु अवतीर्णे नास्तीति न तन्निषेधकं वचनम् ॥ २३ ॥

नन्विदानीं वेदानां पीडाभावात् व्यासावतारस्य जातत्वात् बुद्धावतारस्याद्याप्यजातत्वात् किमनेनावतारेणेत्याशङ्क्याह । स त्वं प्रभोऽद्येति । स एव त्वं सर्वरक्षकः न केवलं वेदमात्ररक्षकः तदाह । प्रभो इति । क्रियाशक्तेरपि पूर्णाया विद्यमानत्वात् वसुदेवस्य गृहे सत्त्वरूपस्य गृहे अभिमानस्थाने अभिमानप्रकारेण पालयिष्यामीत्यवतीर्णः स्वांशेन बलभद्रेण सह इहैवागत्य आरभ्यपनत्तु नतु वैकुण्ठे स्थित्वा मनसा अवतीर्णोऽसीति संमतिमिव पृच्छन्नाह भारस्य महत्त्वख्यापनायाह । सुरेतराणां दैत्यानां शतस्य वधेनेति ननु न दैत्याः साम्प्रतं प्रतीयन्ते इत्यत आह । राज्ञामिति ।

अद्येश ! नो वसतयः खलु भूरिभागा यः सर्वदेवपितृभूतनृदेवमूर्तिः ।
यत्पादशौचसलिलं त्रिजगत्पुनाति स त्वं जगद्गुरुरधोक्षज ! याः प्रविष्टः ॥ २५ ॥
कः पण्डितस्त्वदपरं शरणं समीयाद्भक्तप्रियादृतगिरः सुहृदः कृतज्ञात् ।
सर्वान् ददाति सुहृदो भजतोऽभिकामानात्मानमप्युपचयापचयौ न यस्य ॥ २६ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

प्रयोजनान्तरमप्याह । अमुष्य वसुदेवकुलस्य यशो वितन्वन्निति रूपद्वयेनावतारेण प्रयोजनद्वयमुक्तम् ॥ २४ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

अतस्त्वमेवैको जगदीश्वर इत्याह । सृजसीति । तत्तदभिधैस्तैर्गुणैस्तैस्तैः कर्मभिश्च जीव इव त्वं न वध्यसे ननु कुतोऽहं न वध्ये तत्राह । ज्ञानात्मनः ज्ञानस्वरूपस्य परब्रह्मणस्तव बन्धहेतुरविद्या क जीवस्येव तव सा नास्तीत्यर्थः ॥ २१ ॥

ननु मे यद्यविद्या नास्ति तदात्मदेहोऽयमाविद्यकः कुत आयातस्तत्राह । देहादीति । तव देहाद्युपाधेरनिरूपितत्वादिति । तव देहादिरुपाधिराविद्यक इति केरपि शास्त्रज्ञैर्न निरूपित इत्यर्थः । अत एव तव न भवः जीववत् संसारो जन्म वा नैव स्यात् तत्रापि देहादिरविद्यको यदि भवेत् तदा त्वमपि ज्ञातन्द्येऽपि जीवतुल्य एव जन्मादिमानेव स्या इत्यर्थः । अतस्तव देहादेरुपाधित्वाभावात् जीववत् साक्षात् पैतृकधातुकधातुसम्बद्धं जन्म न स्यात् किन्त्वाविर्भावात्मकमेव जन्म भवेत् । तथा आत्मनो देहाद्भिदा भिन्नत्वं जीवस्येव तव नास्ति स्वदेहोऽपि त्वमेवेत्यर्थः । देहदेहिविभागोऽत्र नेश्वरे विद्यते क्वचिदित्युक्तेः । अतस्तव ब्रह्मत्वादेवाविद्याविद्याभ्यामतीतस्य नैव बन्धो नैव मोक्षः उलूखले मात्रा निबद्धस्य कालियह्रदान्मुक्तस्य मम बन्धमोक्षौ स्त इति चेत् स्यातां तौ तु ते न निषिद्ध्येते इति भावः । कुतस्त्वयि स बन्धः स मोक्षश्च मोऽस्माकं भक्तानां निकामो ध्येयत्वादभीष्ट एव । यतो विवेकः स बन्धो मोक्षश्च विवेक एव मायिकत्वाभावात् ज्ञानस्वरूपस्य तव तु न तावज्ञानसंज्ञौ भवबन्धमोक्षावित्यर्थः ॥ २२ ॥

तदेवं गुणातीतस्वरूपलीलोऽपि त्वं धर्ममार्गरक्षया शिष्टजनपालनार्थं सत्त्वगुणं पुष्णन्नाविर्भवसीत्याह । त्वया उदित उक्तः वेदपथः धर्ममार्गः पुराणः प्राचीनः ॥ २३ ॥

स्वांशेन रामेण सह । सुरेतरांशा ये राजानस्तेषामक्षौहिणीशतस्य वधेन भूमेर्भारमपनेतुम् ॥ २४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

आत्मतन्त्रत्वमुपपादयति । सृजसीति । स्वशक्तिभिः प्रकृतिकालादिभिः रजआदिभिर्गुणैश्च विश्वं सृजसि लुम्पसि पासि अथापि तैर्गुणैर्विश्वसृष्ट्यादिगुणैः कर्मभिश्च न वध्यसे अत आत्मतन्त्रोऽसीत्यवसीयते यतो ज्ञानात्मनः परज्ञानस्वरूपस्य सर्वात्मनस्ते बन्धहेतुश्च न क्वापीत्यर्थः ॥ २१ ॥

बन्धहेतुश्च ते नास्तीत्येतदुपपादयन् न वध्यसे इत्येतत्प्रपञ्चयति । देहाद्युपाधेरिति । साक्षादात्मनः स्वाश्रयस्वरूपस्य तव बन्धहेतोः प्राकृतदेहतन्मूलकर्माज्ञानाद्युपाधेरनिरूपितत्वात् न भवः अपूर्वदेहग्रहणरूप उद्भवः न भिदा देहत्यागश्च अतो न बन्धो न मोक्षश्च तव स्यात् किन्तु नोऽस्माकं देहग्रहणत्यागौ बन्धमोक्षौ च स्याताम् अत्र हेतुरस्तीत्याह । निकामः मायामोहितजीवानुरूपः त्वयि नो जीवानामविवेकः अविवेकोपलक्षितं पराङ्मुखत्वमित्यर्थः ॥ २२ ॥

एवं भूतानामविवेकिनां त्वयि विवेकः नावेदविन् मनुते तं बृहन्तमिति व्यतिरेकश्रुतेः त्वदुक्तवेदमार्गाश्रयणेनैव भवति तमपि असन्तः यदा यदा दूषयन्ति तदा स्वावतारैस्तद्रक्षणं भवानेव करोति इत्याह । त्वयोदित इति । नियम्यभूतं सत्त्वगुणं बिभर्ति वेदपथत्राणार्थमिति शेषः ॥ २३ ॥

स एव वेदपथरक्षकस्त्वम् अमुष्य यदुकुलस्य यशो वितन्वन् सुरेतराणामसुराणां राज्ञामक्षौहिणीनां यानि शतानि तेषां वधेन भूमेर्भारमपनेतुं स्वांशेन सह यदुकुले वसुदेवगृहे अवतीर्णोऽसि ॥ २४ ॥

भाषा टीका ।

आप इस संसार को रजोगुण तमोगुण सत्वगुण वाली तीनों शक्तियों से सृजते हो और पालते हो तथा नाश करते हो तौ भी इनके गुण कर्मों से आप नहीं बंधते हो ज्ञान स्वरूप आपको बंधन का हेतु कहां से होगा ॥ २१ ॥

देहादिक की उपाधि आप के वास्ते नहीं है तिससे आप को साक्षात् किसी वस्तु से भेद वियोग भी नहीं है और बंध तथा मोक्ष भी नहीं है यदि कोइ आपका बंधन मानता है सो तो हम लोगों का अविवेक है और कुछ नहीं ॥ २२ ॥

आप का उपदेश किया हुआ यह पुराना वेद मार्ग जब असत्पुरुषों के पाखंड मार्गों से बाधित होता है तब उसके रक्षा करने को सत्वावतार मूर्ति को आप धारण करते हो ॥ २३ ॥

हे प्रभो ! आप इस समय अपने अंश के सहित वसुदेवजी के घरमें अवतीर्ण भये हो असुर वंशी राजाओं के सैकडों अक्षोहिणी सेना को मार कर पृथिवी के भारको दूर करके इस यदुकुल के यशको विस्तार करोगे ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अत एवंभूतस्य तवागमनेन कृतार्थोऽस्मीत्याह त्रयेण । अद्येति । हे ईशाद्य ! नो वसतयो गृहास्तपोवनादपि बहुपुण्याः कुतः या

दिष्ट्या जनार्दन ! भवानिह नः प्रतीतो योगेश्वरैरपि दुरापगतिः सुरेशैः ।
छिन्ध्याशु नः सुतकलत्रधनाप्तगेहदेहादिमोहरशनां भवदीयमायाम् ॥ २७ ॥
इत्यर्चितः संस्तुतश्च भक्तेन भगवान् हरिः ।
अक्रूरं सस्मितं प्राह गीर्भिः सम्मोहयन्निव ॥ २८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

वसतीस्त्वं साक्षात्प्रविष्टः कथम्भूतः यस्य तव पादसलिलमेव गङ्गा त्रिजगत्पुनाति यश्च त्वं पञ्चयज्ञदेवतामूर्तिः स त्वं जगद्गुरुरिति ॥ २५ ॥

स्वमनोरथः परिपूरित इति तुष्यन्नाह । कः पण्डित इति । ऋतगिरः सत्यवाचः त्वत्तोऽपरं शरणं कं समीयाद्गच्छेत् यतो भवान् भजतः सर्वानभितः कामांश्च ददात्यात्मानमपीति ॥ २६ ॥

नोऽविवेकिनाम् तत्रापीह गृह एव ॥ २७-२८ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

यादवेषु चाहं त्वया नितरामनुगृहीत इत्याह । अद्येति । ईश हे सर्वेश्वर भूरिभागा बलि प्रभृतिभ्योऽपि बहुमाहात्म्याः । यतः देवादयो मूर्त्तयोऽधिष्ठानानि यस्य यज्ञरूपांशावतारे । यस्य च तव श्रीवामनरूपांशावतारे पादशौचसलिलमपि त्रिजगत् पुनाति स त्वं जगद्भयः सर्वेभ्यः स्वाविर्भावेभ्योऽपि गुरुर्महान् या मद्वसतीरेव प्रविष्टः न त्वद्यापि अन्ययादवगृहानित्यर्थः । जगद्गुरुत्वादेव हे आधोक्षज सर्वज्ञानातीत ! ॥ २५ ॥

भक्तस्तद्वेशादिना पूतनादिभ्योऽपि तादृशपददानात् । प्रीतिविषयत्वेन प्रसिद्धो यस्य तस्मात् । तथोक्तं श्रीमदुद्धवेनापि अहो बकीयमित्यादि । तत्प्रियत्वेऽपि ननु कथमप्यनवधानादिना तत्पालनप्रतिज्ञाव्यभिचारः स्यादित्याह । ऋतगिरः सत्यसङ्कल्पात् कदाचित्तस्य परमभक्तान्तरावेशेऽपि संकल्पस्यैव तत्कार्यसाधकत्वादिति भावः । नचोपकारात्मकस्य भजनस्याप्यपेक्षा किन्तु कथञ्चिदाश्रयमात्रस्य इत्याह । सुहृदः नचोपकारानभिज्ञतेत्याह । कृतमुपकारं जानाति बहुमन्यत इति कृतज्ञात् । तच्चोपकाराभासस्यापि बहु मन्यमानत्वे पर्यवस्यतीत्याह । सर्वानिति यस्य विषयलाभालाभादिना उपचयापचयौ न स्तः स । भजतः भजनमात्रं कुर्वतः पुष्पपत्रादिनापि सेवमानाय सर्वांस्तदभीष्टान् कामान् ददाति तत्र सुहृदः सौहृद्ययुक्तार्थं यत आत्मानमपि सुहृद्रूपेण ददाति तदधीनं करोतीत्यर्थः । तस्मान्मदीयगृहागमनमपि तव नाश्चर्यमिति भावः ॥ २६ ॥

तादृशतत्कृपां श्लाघमानः सलज्जः सन् निजतदेकानिष्ठतान्तरायव्याहतिं प्रार्थयते । दिष्ट्येति जनार्दन इति । हे ब्रह्मादियाच्यमानदर्शन तदेव दर्शयति । योगेति । योगेश्वरैः सनकादिभिः सुरेशैर्ब्रह्मभवादिभिर्गतिर्ज्ञानं यस्य सः प्रतीतः प्रत्यक्षं प्राप्तः एतद्दिष्ट्या अहो अस्माकं भाग्यमहिमेत्यर्थः । छिन्धीत्यादिकं नरलीलोचितं वचनम् आप्ताः सुहृदः ॥ २७ ॥

सम्यक् निजाज्ञाप्यार्थानुकूलवचनतया स्तुतः । स त्वं प्रभो ! इत्यादिमिश्रत्वात् । गीर्भिरिति तद्वैशिष्ट्यं बोधयति । शुद्धप्रेममयलौकिकलीलाविशेषाभिरुचेस्त्वन्नो गुरुरित्यादिलक्षणाभिर्गीर्भिः सम्मोहयन् मूर्च्छयन् इवेति चेतनायामपि विवेकलोपात् । तत्र शक्तिद्योतकं भगवान् सर्वैश्वर्यादिसम्पन्नो हरिर्मनोहारिलीलश्चेति ॥ २८ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

ऋतगिरः सत्यवाक्यात् त्वत्तः अपरमित्यन्वयः आत्मानमपीति ददासीति मोक्षप्रदत्वमुक्तं यस्य आत्मनः उपचयापचयौ वृद्धिह्रासौ न ॥ २६—२९ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

इत्थं भगवन्तं स्तुत्वा सम्प्रति तदागमनेनात्मतदनुबन्धिनां कृतार्थतामाविष्करोति । अद्येति । हे ईश ! अधुना नोऽस्माकं वसतयः गृहा भूरिभागा बहुभाग्यवत्यः तत्र हेतुं वदन् भगवन्तं वसतीश्च विशिनष्टि । हे अधोक्षज ! जगद्गुरुः त्वं या वसतीः प्रविष्टः कथम्भूतः यो भवान् सर्वे देवा ब्रह्मरुद्रेन्द्रादयश्च पितरश्च भूतानि च नृदेवाश्च मूर्त्तिः शरीरं यस्य तथा भूतः स आत्मा अङ्गान्यन्या देवता इत्यादि श्रुत्यर्थोऽत्रानुसंहितः यस्य च तव पादयोः शौचं क्षालनेन पवित्रं सलिलं गङ्गात्मकं कर्तृ त्रिजगत् त्रिलोकीं पुनाति सर्वदेवपितृभूतनृदेवमूर्तिरिति देवादीनां शरीरत्वकथनेन पारतन्त्र्यमुक्तम् ॥ २५ ॥

अत एव को ह्येवान्यात्कः प्राण्याद्यदेष आकाश आनन्दो न स्यात् एष एवानन्दयतीति श्रुत्युक्तरीत्या काममोक्षप्रदस्तदुपायभूतश्च त्वमेवेति वक्तुम् उपायत्वोपयुक्तगुणैस्तमेव विशिंषन् तदन्यशरणमिच्छुर्मूर्ख इत्याह । क इति । पण्डित इत्यस्य चेदिति शेषः पण्डितश्चेत्को वा त्वत्तोऽन्यं शरणं समीयाद्व्रजेत् समीहितसाधनत्वेनाध्यवस्येदित्यर्थः । योऽन्यं शरणं समीयात्स मूर्ख इति भावः । तत्र बहुव्रीहिपक्षे भक्तानां प्रीतिविषयत्वोक्त्या प्राप्यत्वोपयुक्तगुणवत्त्वम् ऋता सत्या गीर्वाग्यस्य तस्मात् पार्थ नैवेह "नामुत्र विनाशस्तस्य विद्यते न मे भक्तः प्रणश्यति अनृतं नोक्तपूर्वं मे न च वक्ष्ये कदाचन" ति सप्रतिज्ञं सत्यमेव ब्रूत इत्यर्थः । अयमपि शरण्योपयुक्तगुणः कृतज्ञात् कृतं यादृच्छिकं प्रासङ्गिकानुषङ्गिकाद्यन्यतमं तत्कृतमविज्ञातं स्वतस्त्वकृतमपि सुकृतत्वेन जानातीति तथा तस्मात् रक्षणे व्याजमात्रापेक्षिणो नतु पुष्कलकारणापेक्षिण इति भावः । अनेन दयालुत्वं फलितं सुहृदः हितैकाचरणशीलात्

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

सुहृदः हितैकाचरणशीलात् अनेन कंसादिमारणम् अन्ततः शिक्षेवेति गूढोऽभिप्रायः ततस्तद्धितार्थैचति भावः । कुतः यतो भवान् सुहृद भवत्तोषैककरवर्णाश्रमोचितधर्मानुष्ठाननिष्ठस्य भजतो भक्तिं कुर्वतः पुरुषस्याभिकामान् सर्वान् समीहितान् ददाति कियदेतदभिकामान् ददाति यतो, निरतिशयानन्दरूपमत एव निरतिशयपुरुषार्थरूपं चात्मानमपि ददाति अनेन मोक्षप्रदत्वमुक्तं भवति कथं भूतमात्मानं यस्यात्मनः स्वस्य उपचयापचयौ वृद्धिह्रासौ न भवतस्तम् अनेनानिर्विकारत्वं तएवाचिदचिद्वैलक्षण्यञ्च फलितम् ॥ २६ ॥

अथैवम्भूतस्य दुर्दर्शस्य तथा तस्य केवलं स्वमांसचक्षुर्विषयतापत्त्या तस्मिन्सौलभ्यतया स्वस्यालभ्यलाभरूपमहानन्दप्राप्तिं च वदन् तन्मायानिवृत्तये तमेवोपायत्वेन प्रार्थयते। दिष्ट्येति। हे जनार्दन सर्वान्तरात्मनः सुरेशैर्ब्रह्मादिभिर्योगीश्वरैः सनकादिभिश्च दुरापा दुष्प्रापा प्राप्तुमशक्या गतिः प्रकारो याथात्म्यम् इति यावत्सा यस्य स भवानिह मनुष्यलोके नोऽस्माकं केवलमज्ञानां प्रतीतः चाक्षुष साक्षात्कारात्मकप्रतीतिविषयो जातः दिष्ट्या महानन्दोऽस्माकमित्यर्थः । इहेत्यद्यास्मिन् गृहे एवेत्यर्थः । ननु मद्दर्शनमेव किंबहुमन्यसे नतु समीहितं याचसे इति चेदिदं याचे इत्यभिप्रायेणाह। छिन्धीति । नोऽस्माकं भवदीयमायाकार्यभूतां सुतादिषु मोह एव रशना पाशस्तामाशु छिन्धि इदमेव मम प्रार्थनीयमित्यर्थः ॥ २७ ॥

इतीति । भक्तेनाक्रूरेण स्तुतश्च हरिः सास्मितं स्मितेन सहितं यथा तथाक्रूरं प्राह कथम्भूतो वाग्भिरेव तं संमोहयन्निव स्वयाथात्म्यविषयकमोहं जनयन्निव इवशब्देनैवमपि न तस्य नित्यनुकस्य मोह इति सूच्यते ॥ २८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

हे अधोक्षज ! सर्वे देवादयो मूर्तयः प्रतिमा यस्य स तथा जगद्गुरुः सत्वं या वसतीः प्रविष्टः हे ईश ! अद्य ता वसतयो नोऽस्माकं गृहाः भूरिभागा पूर्णभाग्याः अभवन् खलु नैतच्चित्रमित्याह। यत्पादेति ॥ २५ ॥

एकमेवाद्वितीयमिति श्रुत्यर्थं गुरुमुखात्सम्यक् ज्ञातवानहं त्वामतः स्तौमीत्याशयेनाह। क इति । भक्तप्रियात् ऋत गिर इति पदच्छेदः भक्तप्रियादृतगीश्चेति वा तस्माद्भजतः सेवमानस्य सुहृदः फलापेक्षारहितस्य आत्मानमपि स्वात्मानमपि सायुज्यलक्षणं मोक्षमपि सारूप्यरूवा यस्योपचयापचयौ वृद्धिक्षयौ च न स्त इत्यनेन कृष्णस्य बालवार्धकादिकं न स्वाभाविकमिति दर्शितम् ॥ २६ ॥

योगेश्वरादिभिरपि दुरापगतिः दुष्प्रापस्वरूपो भवान् नः प्रतीतः प्रतीतिविषयं गत इत्यत इदङ्कर्तव्यमिति प्रार्थयते किन्तदिति तत्राह । छिन्धीति । भवदीयमायां भवदाज्ञाकारीं बन्धकशक्तिं छिन्धीत्यन्वयः किम्विधामत्राह । सुतेति । मोहलक्षणां रशनां रज्जुम् ॥ २७ ॥

लोकविषयाभिर्गीर्भिः सम्मोहयन् तत्त्वज्ञानम् अन्यथा कुर्वन्निव स त्वक्रूरस्येत्यन्वयः ॥ २८-२९ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

एवं भगवदवतारं प्रसङ्गात् कर्माणि च श्रुत्वा भगवदागमनं स्तौति । अद्येश न इति । नो वसतयो गृहाः अद्य भूरिभागाः अस्मत्कुले भवतीर्णे इति वयं पूर्वमेव भूरिभागाः वसतयस्त्वद्य इति बहुवचनं भ्रात्राद्यभिप्रायं ननु निरोधाधिकारिणो भवन्तः तदर्थमागमनं नतु धर्मार्थमिति कथं वसतीनां कृतार्थतेति चेत्तत्राह। ईश इति । उभयमपि कर्त्तुं समर्थ ननु भगवत्सम्बन्धादेव तेषां भाग्यमस्तु पृथक्किमिति निरूप्यत इत्याशङ्क्याह। भूरिभागा इति। मद्भाग्यं चेत् यदैव ममेच्छा तदैवागच्छेत् अतो गृहस्यैव भाग्यं ननु गृहं हि त्रिगुणात्मकं गुणातीतो हि भगवदनुगुणो भवतीति कथमेवमुच्यत इति चेत्तत्राह । यः ससर्वदेवपितृदेवनृदेवमूर्त्तिरिति । गृहाणामपि स्वोत्कर्षो येन सिद्ध्यति तदपि रूपं भगवति वर्त्तते गृहं हि देवतायोग्यं भवति पितॄणां नराणां तत्र ये हि लोके गृहे सुखिता भवन्ति तेषां स्वदेवत्वमुत्कर्षदेवमात्रे सन्तुष्टे गृहं युक्तं भवत्यन्यथा व्यर्थमेवमित्यनयोस्तत्र देवोत्तमो भगवानिति तत्प्राप्तौ भवत्येव सर्वोत्कर्षः योग्यता च एवमितरयोः किञ्च शुद्धिरप्यपेक्षिता सापि जातेत्याह । यत्पादशौचसलिलमिति । पादशौचसलिलं गङ्गा सा परम्परासम्बद्धापि देशकालव्यवहितापि जलान्तरेण मिश्रिता लोकत्रयमपि पुनाति अत्र तु साक्षादेव पततीति किं गृहभाग्यं वक्तव्यमित्यर्थः । ननु रूपभेदात् वैलक्षण्यं भविष्यतीत्याशङ्क्याह । स त्वमिति । अत्रापि प्रमाणत्वमेवेत्यत आह । जगद्गुरुरिति । तर्हि कथं लोका न जानन्तीत्याशङ्क्याह । अधोक्षजेति बहिर्मुखत्वादज्ञानं याः वसतीः पुनर्ग्रहणं तासामभिनन्दनार्थं च ॥ २५ ॥

एवं भगवदागमनं स्तुत्वा भगवति प्रत्यापत्तिं स्तौति । स्वचिकीर्षितताम् । कः पण्डित इति । स्तुत्यनन्तरं हि फलं प्रार्थनीयं तत्प्रपत्त्यतिरिक्तं नास्तीति ज्ञापयितुं प्रपत्तिमेव स्तौति प्राणिनां कर्त्तव्यतया प्रपत्तिरेव कर्त्तव्येति विवेकवान् हि पण्डितः इममेवार्थमधिकृत्य "पण्डितो मोक्षबन्धवित्" इत्युक्तं तत्रानायासेन फलसिद्धिर्विद्यमाने स्वोत्कृष्टे समाश्रयणमेव युक्तम् आश्रयो हि स्वाधीनं सर्वमेव यच्छति मनस्तु क्षणिकमिति सर्वपदार्थाभिलाषि भवतीति कदा वा किं प्रार्थयेदिति तत्तत्साधनेष्वशक्तो हि प्रपत्तिमार्गमवलम्बते तदपि कृत्वा चेत्फलं न प्राप्नुयादसमर्थभजनात् तदा प्रपत्तिर्व्यर्थेति को वा विवेकी त्वत्तः अपरं शरणं समुपगीयात् साधनत्वेन गुरुत्वेन वा अनुवृत्तिं कुर्यात् ननु शरणं गच्छेत नन्वाहत्य कथं त्वं प्राप्तव्यः अतोऽन्यानुवृत्तिः प्रथममावश्यकीति कथमन्यनिरोधः क्रियत इति चेत्तत्राह। त्वदपर इति। त्वमपरो यस्य नियामकत्वे ननु बुद्ध्या गृहीतः गुर्वादिस्तु नैवं विधो भवतीति न दोषः भगवतः शरणागतौ हेतूनाह। भक्तप्रियादृतगिरः सुहृदः कृतज्ञादिति । षट् हेतवोऽहि भगवति तत्र फले हेतुद्वयं साधने चतुष्टयमिति साधनेऽपि स्वधर्मपुरस्कारेण हेतुर्वक्तव्यः अन्यथा फलं काकतालीयं स्यात् यो हि सेवकानपेक्ष्यते स सेवकेभ्यः प्रयच्छति स ईश्वर एव न भवति तत्रापि सेवकधर्मं चेदुररीकुर्यात् तदैव सेव्यो भवति तदाह । भक्तप्रियादिति । लोका हि फलार्थं सेवमानाः सेवायामसक्ताश्चेन्न फलं प्राप्नुवन्ति भजनानुरूपं च प्राप्नुवन्ति नहि प्रभुस्तस्य क्लेशं मन्यते अन्यथा दुःखदे साधारणे देशे

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

काले च तान् सर्वान्न प्रवर्त्तयेत् यथा पुत्रं भगवांस्तु न तथा भक्तम अतो भगवानेव सेव्यः किञ्च स्वधर्ममप्यवेक्ष्य भक्तहितं करोतीत्याह । ऋतगिर इति । सत्यवाक् सत्यसङ्कल्पः सङ्ग्रामे च प्रपन्नानां तवास्मीति च यो वदेत् । कौन्तेय प्रतिजानीहीत्यादिवाक्यात् यो हि सेवकक्लेशं सहते स न मनसि शुद्धः यो वाचि न दृढः स वाचि तथा यस्तु समागतेऽवसरे मित्रमिव कार्यं न करोति शरीरतः स कायस्तथा एतत्त्रयं लौकिकं स्वतः कर्त्तव्यं तस्य ऋतं जानातीति तद्धर्मकरणे हेतुरुक्तः । दोषाभाव एते आत्मवत् पुत्रवच्च भक्ताः कायवाङ्मनोभिः विषयीकर्त्तव्या इति गुणाः प्रह्लादे सर्वापत्सु मनसा हितं कृतवान् वाचा गोपिकादिषु कायेनास्मास्विति एवं भावे भगवद्गुणे न कोऽपि सन्देहः कृतः ज्ञात्वा भावे प्रवाहकरणान्नोत्कर्षः स्यात्फलदातृत्वमाह । सर्वान् परेषामनिष्टं वा कर्तुं वाञ्छन्ति तदा न ददातीति ज्ञापयितुं सुहृद इति शुद्धान्तःकरणस्य स्वद्रोहं वा विचारयतः सर्वानेव कामान् ददातीति दाने हेतुर्भजनमित्याह । भजत इति । एकस्मिन्नपि प्रार्थिते अभितः सर्वतः प्रयच्छति न त्वन्येऽप्येतादृशा भवन्तीत्याह । आत्मानमपीति । अत्र भजनमेव हेतुः तेन तारतम्येन सर्वे सङ्गच्छते यः स्वात्मानं भगवते प्रयच्छति भगवानपि तथा तस्मै प्रयच्छतीति नन्वेतादृशमपि लोके क्वचित् सिद्धमिति चेत्तत्राह । यस्योपचयापचयौ न स्त इति । यत्सम्बन्धिनः सर्वस्यैवोपचयापचयाभावः उभयनिरूपणमुचितं चेदुक्तं तस्य नापचयं करोति अपचितं चेद्दुःखादिकं तत्कदाचिदपि नोपचितं करोति अथवा एवं रूपमेव सर्वेभ्यो भक्तेभ्यः प्रयच्छति ननु विषमं वस्त्वेव तथेति नेच्छापि तत्र प्रयोजिकेति धर्मिणि तौ धर्मौ निरूपितौ ॥ २६ ॥

एवं सर्वप्रकारेण स्तुत्वा किंचित्प्रार्थयते दिष्ट्या जनार्दनेति । पूर्वमपि भक्ताः परमापाततः त्वत्स्वरूपाज्ञानात् अद्य तु नोऽस्माभिरिह भवान् प्रतीतः अतो ज्ञाते कल्पतरौ अभिलषिते विलम्बो न युक्त इति प्रार्थनीय इति भावः । कथमेतावता काले न ज्ञातवान् कथमद्यैव ज्ञातवानित्याशङ्क्य हेतुद्वयमाह । दिष्ट्या जनार्दनेति । भाग्यमद्यैवोन्मुखं जनयतीति जनानामर्दयति इदानीमेवाज्ञानं नाशितवान् प्रसन्नो हि स्वधर्मानाविष्करोति सेवकधर्मादन्यतो भाग्यं मोहनाशश्च प्रकाशितवानित्यर्थः । आगमने प्रसादो निरूपितः साधनान्तरं व्यावर्त्तयति । योगेश्वरैरपि दुरापगतिरिति । योगवशीकरणादिकं स्वसामर्थ्यं न हि नियताः स्वधर्माः अन्येन बोधयितुं शक्यन्ते दुःखेन प्राप्या गतिर्यस्येति भगवदभिप्रायापरिज्ञानमुक्तं स्वाधीनं हि मार्थत्वा वाह्यवत्साधनीयं तदेकः संघातो । भगवता दत्ता इति तावन्मात्रे वक्तव्यता भवति नान्यत्रेति सुष्ठूक्तम् अलौकिकेनापि सामर्थ्येन भवति इत्याह । दुरापेति । प्रार्थनामाह । छिन्ध्याश्विति । सुतादिषु मोहरज्जुं छिन्धि यतस्त्वयैव सम्पादितमित्याह । भवदीयमायामिति । अन्ये छेदनं वारयति । आश्विति । अत्यन्तदृढमूले छिद्यमाने पुनरुद्गमः छेदके वैमनस्यं च भविष्यतीति ॥ २७ ॥

भगवतो ह्ययं भावः शास्त्ररहस्यसिद्धः यो हि यादृशः स तादृश एव कर्त्तव्यः भक्तिवशात् अन्यथाकरणेऽयुक्तता भवतीति भक्तिर्मध्यमा ज्ञानं यथा शृङ्गारलीला गोप्यैव तथा ऽवतारलीला गोप्यैव तां यः प्रकटीकुर्यात् स नाभिप्रेत इति विपरीतं वदेत् यथा गोपिकागीतेन गोपिकास्त्यक्ताः तथायमपि लीलार्थमुत्पादितः स्वरूपापरिज्ञानात् बहिर्मुखतया ज्ञानिनमात्मानं मन्यमानः तत्प्रार्थयते । अतोऽस्य सर्वाण्येव वचनान्यसम्बद्धानि । अतस्तन्निवारणार्थं भगवान् मोहयितुं प्रवृत्त इत्याह । इत्यर्चित इति । पूर्वोक्तेन प्रकारेणार्चितः सम्यक् स्तुतश्च भक्तश्चायं तथापि भगवानीश्वरः सर्वदुःखहर्त्ता च भक्तश्चायम् । अत उभयमभिप्रेत्य सस्मितं प्राह । स्मितो हि मन्दहासः अल्पमेव मोहितवान् । गीर्भिरपि सम्यक् मोहयन्निव जातः सम्यक्त्वं लीलौपयिकत्वेनान्यथा प्राकृते लीलामपि त्यजेत् ॥ २८ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

या वसतीः स एव त्वं प्रविष्टः यस्त्वं सर्ववेदादिमूर्त्तिः ॥ २५ ॥

त्वदपरं त्वत्तोऽन्यम् ऋतगिरः सत्यवाक्यात् कंसं हत्वा त्वद्गृहं यास्यामीति स्ववाक्यं सत्यं कृतमिति भावः । सुहृदः हितकारिणः येन दासस्य हितं स्यात्तत् त्वमेव ज्ञात्वा करोषीत्यर्थः। कृतज्ञात् कादाचित्कमपि यत्किञ्चिदपि भक्तेन विस्मृतमपि त्वद्भजनं कृतं त्वं जानास्येवेत्यर्थः । यो भवान् सुहृदः शोभनान्तःकरणाय निस्कामायेत्यर्थः । भजते भजनं कुर्वते जनाय अभिकामान् अभिवाञ्छितार्थान् सर्वानेव तेनाकामितानपि ददाति न च तावतोऽपि दत्त्वा निवर्त्तसे इत्याह । आत्मानं स्वमपि ददाति अत्र भवानित्यध्याहार्यं ननु स्वपर्यन्तदानं नाम महानपचयस्तत्राह । यस्य तव उपचयापचयौ न स्तः । कोटिब्रह्माण्डवर्त्तिद्रव्येषु कोटिसङ्ख्यब्रह्मादिभिस्तुभ्यमुपहृतेष्वपि तव न कोऽप्युपचयः । त्वया स्वभक्ताय स्वपर्यन्तवस्तुजातप्रदानेऽपि न कोऽप्यपचयः । अतर्क्यानन्तशक्तित्वादिति भावः ॥ २६ ॥

नोऽस्माभिः प्रतीतः प्रत्यक्षीकृतः ॥ २७ ॥

सम्मोहयन् स्वैश्वर्यज्ञानं पुष्णन् । इवेति सम्यगलुप्तापि ॥ ॥२८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

हे ईश ! अद्य नोऽस्माकं वसतयः गृहाः खलु निश्चितं भूमिभागाः बहुभाग्यवत्यः यतः हे अधोक्षज ! यो भवान् जगद्गुरुः यस्य तव पादशौचसलिलं गङ्गादि त्रीणि जगन्ति त्रीन् लोकान् पुनाति यो भगवान् सर्वदेवाः पितरश्च भूतानि च नृदेवाश्च मूर्तयो विभूतयः सर्वदेवादिषु मूर्तिस्तदङ्गुष्ठपरिमिता यस्य स तथाभूतो वा "अङ्गुष्ठमात्रं पुरुषं मध्ये आत्मनि संस्थितं तं ज्ञात्वामृत्युमत्येति नान्यः पन्था विमुक्तये" इति श्रुतेः एवं भूतो यः सः साक्षात् त्वं याः वसतीः प्रविष्टोऽसि ॥ २५ ॥

ऋता सत्या न मे भक्तः प्रणश्यतीत्यादिगीर्वाग् यस्य तस्मात् त्वत्तः अपरमन्यं शरणं पण्डितः सन् कः समीयात् गच्छेत् न कोऽपीत्यर्थः । यतः भजतोऽभिकामान् सर्वान् सम्पूर्णान् किं बहुना यस्योपचयापचयौ वृद्धिह्रासौ न स्तस्तमात्मानं देहमपि ददाति ॥ २६—२८ ॥

श्रीभगवानुवाच ।

त्वं नो गुरुः पितृव्यश्च श्लाघ्यो बन्धुश्च नित्यदा ।
वयं तु रक्ष्याः पोष्याश्च अनुकम्प्याः प्रजा हि वः ॥ २९ ॥
भवद्विधा महाभागा निषेव्या अर्हसत्तमाः ।
श्रेयस्कामैर्नृभिर्नित्यं देवाः स्वार्था न साधवः ॥ ३० ॥
नह्यम्मयानि तीर्थानि न देवा मृच्छिलामयाः ।
ते पुनन्त्युरुकालेन दर्शनादेव साधवः ॥ ३१ ॥
स भवान् सुहृदां वै नः श्रेयान् श्रेयश्चिकीर्षया ।
जिज्ञासार्थं पाण्डवानां गच्छस्व त्वं गजाह्वयम् ॥ ३२ ॥

भाषा टीका ।

हे ईश ! आज हमारे घर सब पवित्र होगये और हम बड़े भागवान् होगये जिनके घरों में कि जगतके गुरु आपने प्रवेश किया है जो कि आप सर्व देवता पितर भूत राजा आदि के अंतर्यामी हो और जिन आपके चरणका प्रक्षालित जल तीनों लोकों को पवित्र करता है ॥ २५ ॥

पंडित होकर ऐसा कौन है कि जो आपसे दूसरे के शरण जायगा आपतो भक्तों को बड़ा प्रिय मानते हो और बडा आदर सत्य वाणी से बोलते हो सबके बड़े सुहृद हो और कृतज्ञ हो आप अपने को भजने वाले सुहृदों को सब मनोरथ देते हो और आत्माको भी देते हो और आपके प्रभावकी कभी वृद्धि या ह्रास भी नहीं होती है ॥ २६ ॥

हे जनार्दन ! आपकी गति तो योगेश्वरोंको भी बडी दुर्लभ है और देवताओं को भी दुर्लभ है हमको जो आप प्रघट भये हो सो बडा मंगल है सो अब आप हमारी पुत्र भार्या धन बंधु घर देहादिकों की मोहरूपी बंधन डोरी है सो आपकी माया है इसको जल्दी छेदन करदो ॥ २७ ॥

श्रीशुकदेवजी बोले इस प्रकार से भक्तिसे पूजित होने पर तथा स्तुति करने पर हरि भगवान् मंदहास से वचनों से मोहते सरीके अक्रूरजी से बोलते भये ॥ २८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

वो युष्माकं प्रजाः पुत्रा हि वयमिति ॥ २९ ॥

ननु नृभिर्देवाः सेव्या इति प्रसिद्धं तत्राऽऽह । देवा इति । स्वार्थाः स्वकार्यसाधनपराः साधवस्तु केवलं परानुग्रहपराः परमार्थतस्तु साधव एव देवा इति त एव सेव्या इत्यर्थः ॥ ३० ॥

तर्हि मृच्छिलादिमयाः किं देवादयो नैवेत्यत आह । नहीति । अम्मयानि तीर्थानि मृन्मयाः शिलामयाश्च देवा न भवन्तीति न अपि तु भवन्त्येव तथाऽपि साधूनां तेषाञ्च महदन्तरमित्याह । ते पुनन्तीति ॥ ३१ ॥

किञ्चिच्चिकीर्षयन्प्रागोदिति । यदुक्तं तत्कार्यमादिशति । स इति नः सुहृदां मध्ये भवान् श्रेष्ठोऽतः पाण्डवानां श्रेयश्चिकीर्षया गजाह्वयं गच्छस्व गच्छेति यद्वा स्वेति पृथक्पदम् हे स्व आत्मीयेत्यर्थः ॥ ३२ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी।

नोऽस्माकमिति विनयेनात्मनः साधारण्यापादनार्थं श्रीबल-देवाद्यपेक्षया । गुरुरुपदेष्टा बन्धुश्च हिताचरणेन । तत्र श्लाघ्यः परमोत्तमत्वात् किम्वास्य सर्वेरप्यनुषङ्गः । नित्यदेत्यस्य पर-णान्वयः । नित्यमित्यर्थः । आपद्भ्यो रक्ष्याः भोजनादिना पोष्याः सदुपदेशादिनानुकम्प्याश्च हि यतो वः प्रजा वयम् ॥ २९ ॥

अतो महत्तमत्वाच्च विशेषतोऽस्माकं त्वमेव सेव्य इत्याशये-नाह । भवद्विधा इति । किं पुनः साक्षाद्भवन्त इत्यर्थः । अतो देवेभ्योऽपि भवद्विधा महत्तमा इति भावः । नृभिर्नित्यं सम्य-ङ्नितरां सेव्याः । अतो महाभागाः महान् भागः परमभाग-वतत्वप्राप्तिहेतुर्भागो भाग्यं येषां ते महत्तमा इत्यर्थः । अतोऽ-र्हत्तमाः सेवायोग्यतमा इत्यर्थः । पाठान्तरे अर्हन्ते इति अर्हाः पूज्याः तेषु सत्तमाः नृभिरिति प्रायो मनुष्याणामेव श्रेयःसाधकत्वात् अत्र च स्वस्यापि पितृव्यतयोक्त्या यादवतया मनुष्यतामननात् श्रेयस्कामैरिति बहुत्वेन मुक्तिभगवद्भक्तिपर्यन्तानि श्रेयांसि गृह्यन्ते अतो भगवद्भागवतव्यतिरिक्तानां देवजातीनां न तावती शक्तिः स्वल्पफलदायकत्वेऽप्यस्ति दोषान्तरमित्याह । देवा इति । अतो देवेभ्योऽपि भवद्विधा देवत्वादिजातिनिरपेक्षतया महत्तमा इति साधवस्तितिक्षव इत्यारभ्य त एते साधवः साध्वीतिपर्यन्तेन लक्षिताः ॥ ३० ॥

अतो यदि देवाः साधारणाः सेवितुं साक्षाल्लभ्यन्ते तदापि न साम्यं साक्षात्तु दुर्लभा एव ततः प्रतिमारूपेण यत् सेव्यन्ते तत्र तु तदपेक्षयातिनिकर्ष इति वक्तुं प्रसङ्गतस्तीर्थानामपि साधारणानां तमाह । नहीति । ते तत्तद्रूपतीर्थदेवाः एकशेष-त्वेऽपि नपुंसकत्वाभाव आर्षः । पुनन्ति चित्तमलतः शोधयन्ति तद्दर्शनादेवेति प्रथमक्षणदर्शन एवेदं तुल्यते द्वितीयक्षणादौ तु नेति भावः ॥ ३१ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी।

एतावता यद्विवक्षितं तदाह। स साधुत्वेनोक्तमाहात्म्यः विशेषतश्च नोऽस्माकं सुहृदो यादवास्तेषां मध्ये किम्वा सुहृदां ज्ञातीनां नो मध्ये वै प्रसिद्धौ श्रेयश्चिकीर्षया पाण्डवानां या विज्ञासा धृतराष्ट्राश्रये ते कथमवतिष्ठन्त इति पर्यालोचनं तदर्थम्॥ ३२॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्।

अर्हत्तमाः उत्कृष्टतमाः देवा इन्द्रादयः स्वप्रयोजनपराः नतु साधवः ते परोपकारपराः॥ ३०—३३॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

उक्तिमेवाह। त्वमिति सप्तभिः। त्वं नोऽस्माकं गुरुर्हितकृत पितृव्यः पितुर्भ्राता अनेन पूज्यत्वमुक्तं श्लाघ्यो बन्धुश्च नतु कंसादि वांशन्यबन्धुर्नाप्युपेक्ष्यः अपि तु प्रशस्यबन्धुरनेनान्योऽन्यप्रीतिविषयत्वमुक्तं त्वमेवं विधः वयं तु रक्ष्यास्त्वयेति शेषः। गुरुत्वाद्धितोपदेशेनाहिताद्रक्ष्याः पोष्याः पितृव्यत्वात् अनुकम्प्या मद्विषयकप्रीत्याश्रयत्वाद्दयनीयाः वो युष्माकं प्रजाः पुत्रा वयमित्यर्थः। अतो न वयं पूज्याः किन्तु त्वमेवेति भावः॥ २९॥

न केवलमस्माकमेव यूयं पूज्या अपि तु सर्वेषामपीति सहेतुकमाह। भवद्विधा इति। भवादृशा भागवता अत एवार्हत्तमाः उत्कृष्टतमाः अत एवात्मविशुद्धिरूपश्रेयस्कामैः सर्वैर्मानवैर्नित्यं संनिषेव्याः॥ ३०॥

नन्वेवमपि श्रेयस्कामैर्गङ्गादिपुण्यनदीजलानां मृच्छिलामयभगवत्प्रतिमानाम् एव निषेव्यतायाः पावित्र्यावहत्वादित्यत आह। नहीति। अम्मयानि जलमयानि गङ्गादीनि तीर्थानि न भवद्विधा इव पावनकराणि पुनन्तीत्यस्यापकर्षो वा न तथा पुनन्तीत्यर्थः। तथा मृच्छिलामया देवाः श्रीभगवत्प्रतिमाश्च न यथा भवद्विधाः पुनन्ति किं तु प्रकारान्तरेण पुनन्तीत्यर्थः। अभिप्रेतं वैषम्यं विशदयति। त इति। तानि च ते च पुंशेष आर्षः अम्मयानि देवाश्च उरुकालेन स्नानपानपरिचर्यादिसहचरितेन दीर्घेण कालेन पुनन्ति साधवो भवद्विधास्तु दर्शनादेव पुनन्ति अत्र केचिदेवं व्याचक्षते किं देवादयो न सेव्या एवेत्यत आह। नहीति। अम्मयानि तीर्थानि मृच्छिलामयाश्च देवा न भवन्ति न अपि तु भवन्त्येवेत्यर्थः। तथापि साधूनां तेषां च महदन्तरम् इत्याह। ते पुनन्तीति। तन्निन्त्यं देवाः स्वार्था न साधव इत्यनेनैवासेव्यत्वस्योक्तत्वात् पुनरसेव्यत्वाशङ्कापरिहारयोरयुक्तत्वात्सेव्यत्वापादकपवित्रत्वापादकत्वतदभावयोरेव संशयोदयात् अत एव ते पुनन्त्युरुकालेनेति पवित्रताकरत्वतारतम्योक्तिः सङ्गच्छते किंचत्र त्रयाणां चातीर्थत्वादेवत्वाविशङ्कायां हि नञ्द्वयं प्रकृतमर्थं सूचयतीति न्यायेन तीर्थत्वदेवत्वस्थिरीकरणोपपत्तिः तदा ह्येवमाशङ्कनीयं तर्हि किमम्मयानि न तीर्थानि न मृच्छिलामयाः किं न देवा एवेति न च पूर्वग्रन्थादियं शङ्कोदेति अतो यथोक्त एवार्थः॥ ३१॥

किञ्चिच्चिकीर्षया प्रागादिति यदुक्तं तत्कार्यमादिशति। स इति स उक्तविधो भवान् नोऽस्माकं ये सुहृदस्तेषां मध्ये श्रेयानतो नः श्रेयः कर्तुमिच्छया पाण्डवानां जिज्ञासार्थं सुखदुःखविचारार्थं हास्तिनापुरं गच्छ॥ ३२॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

अर्हाणां पूज्यानां मध्ये श्रेष्ठाः देवाः स्वार्थाः स्वप्रयोजनरता आत्मार्चकेभ्योऽर्चनादितृप्तिलक्षणप्रयोजनं प्राप्य फलानां दातारः नतु सर्वसमा इत्यर्थः। साधवः सर्वतुल्याः न स्वार्थपरायणाः परार्थैकनिष्ठा इत्यर्थः। समा स्त्रीवत्सरे धातुसर्वतुल्येषु वाच्यवदिति यादवः॥ ३०॥

देवा अपि हि अम्मयादिशब्दवाच्या न भवन्ति तत्र सन्निहितत्वात् तासां देवशब्दवाच्यत्वमिति भावेनाह। नहीति। अम्मयानि जलमयानि तीर्थशब्दवाच्यानि न भवन्ति किन्तु तत्संहितानि दैवतानि किमत इति तत्राह। त इति। ते उरुकालेन कृतया सेवया॥ ३१॥

पाण्डवानां वृत्तिजिज्ञासार्थं किञ्चिच्चिकीर्षयेत्यस्य विवरणमेतत् गजेन समं आह्वयो यस्य स तथा हास्तिनपुरमित्यर्थः॥ ३२॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

श्रेयस्कामैरिति। बहुत्वेन मुक्तिभगवद्भक्तिपर्यन्तानि श्रेयांसि गृह्यन्ते अतो देवजातीनां न तावती शक्तिः स्वल्पफलदायकत्वेऽप्यस्ति दोषान्तरमित्याह। देवा इति॥ ३०॥

अतो यदि देवाः सेवितुं साक्षाल्लभ्यन्ते तदापि न साम्यं साक्षात्तु दुर्लभा एव ततः प्रतिमारूपेण यत्सेव्यन्ते तत्र तु तदपेक्षया त्वतिनिकर्ष इति वक्तुं प्रसङ्गतस्तीर्थानामपि तमाह। नहीति। पुनन्ति चित्तमलतः शोधयन्ति॥ ३१—३६॥

श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी।

भगवान् लौकिकवैदिकविविधशास्त्रप्रकारेण तं मोहयन्नाह। त्वं नो गुरुरिति त्रिभिः। हितोपदेशगुरुः प्रायेण धनुषोऽभ्यासं तं कारितवानिति लक्ष्यते। अवश्यं केनचिल्लोकन्यायेन धनुःशिक्षणीयम्। अन्यश्चात्रार्थे गुरुर्नोक्तः भगवांश्च सत्यमेव वदतीत्यर्थादयं नो गुरुः न इति बलभद्रादीनामभिप्रायेण बालाभ्यासं कारयति पितृव्यः स्पष्टश्चकाराद्धितकारी न ह्यन्यः अन्यत्र क्वापि सतः स्वगृहे संमानयति श्लाघ्यः महत्त्वेन प्रसिद्धः पितृव्यादीनां सापत्न्याभाववत् भ्रातृव्यत्वात् अन्यथात्वाशङ्क्याह। बन्धुश्चेत्यिदेति। सर्वदा बन्धुकृत्यमेव करोति एवं चकारेण सहपञ्चधर्मास्तस्मिन्निरूपिताः ततोऽन्यथा पञ्चधर्मान् स्वास्मिन्निरूपयति। वयं त्विति। तुशब्दः पूर्वसम्बन्धेन तुल्यतां वारयति। गुरुस्तु रक्षकः भगवता साधनेषु दत्तेष्वपि बुद्ध्यभावे रक्षासम्भवाद्वयं रक्ष्याः पितरः पोषकाः पुत्राः पोष्याश्चकारान्न वयं भवद्धितकारिणः किन्तु भवन्त एव

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

अर्थाद्दयापात्रमित्युक्तं भवति । अनुकम्प्याः श्लाघ्या हि नानुकम्प्याः सर्वदा हिताचरणं पतिभिः कर्तव्यं वो युष्माकमिति वसुदेवादींस्तेनकीकृत्य निरूपयति । अन्यथा स्तुतित्वं ज्ञायेत ॥ २९ ॥

एवं लौकिकोत्कर्षमुक्त्वा प्रवृत्तिप्रकारेण वैदेहिकोत्कर्षमाह । भवद्विधा इति । यदि सर्वप्रकारेणोत्कृष्टास्ते सर्वैरुपास्याः । भवद्विधा इति । तेषामुत्कर्षो निरूपितो यादृशास्तत्रापि महाभागाः परमभाग्ययुक्ता इति तेषां संपन्निरूपिता तत्राप्यर्हत्तमाः उत्तमा ये उपकारकर्तारः समृद्धाः सर्वे सम्प्रतिपन्नास्ते सर्वैरुपास्या इत्यर्थः । तत्रापि श्रेयस्कामैः अनेन स्वार्थमेवोपासनमुक्तं दृष्टार्थत्वं च निरूपितम् । नृभिरिति । मनुष्याधिकारो निरूपितः । तेनास्माकमिदमावश्यकमित्यर्थः । ननु शास्त्रे देवा एव सेव्या न त्वन्य इति चेत्तत्राह । देवाः स्वार्थाः स्वार्थं ज्ञात्वैव हितं कुर्वन्ति । साधवस्तु नैवम् । अतो देवभजनापेक्षयापि साधुभजनमेवोत्तमं किञ्च निवृत्तिमार्गे तीर्थानि तीर्थस्थानानि तदपेक्षयाप्येत एव सेव्या इत्यर्थः ॥ ३० ॥

नह्यम्मयानि तीर्थानीति । तीर्थेषु स्नात्वा तदधिष्ठातृदेवतापूजनं कर्तव्यं तदा तीर्थं कृतं भवति तदुभयमप्यप्रयोजकमित्याह । नह्यम्मयानीति । तीर्थशब्देन जलाभिमानिनीदेवतोच्यते सा चिन्मयी देवता च चिदानन्दमयीत्येव शास्त्रमर्यादा अम्मयानि तु तीर्थानि न भवन्ति देवा अपि मृच्छिलामया न भवन्ति । स्थानस्य देवतापक्षे मृन्मयत्वं प्रतिमाया देवतात्वपक्षे तु शिलामयत्वमुभयमपि लोकप्रसिद्धं निवार्यते शास्त्रप्रामाण्यात् अन्यथा शास्त्रमनुवादकं संदप्रमाणं भवेत् किञ्च अत एव साधनोपदेष्टारः भक्तिप्रवर्तका वा दर्शनमात्रेणैव ज्ञानभक्त्योः साधितत्वात् फलतोऽप्युत्कर्षः ॥ ३१ ॥

एवं स्तुत्वा सम्मोहमुत्पाद्य स्वाभिलषितं करिष्यतीति अभिप्राय किञ्चिदाज्ञापयति । स भावनिति त्रिभिः । तेषु त्रिविधं हि कार्यं कर्तव्यं मोक्षः सम्पादनीयः भक्तिर्वा पाण्डवेषु राज्यं वा देयं शत्रवश्च मारणीया इति सः सर्वथोपकारकर्त्ता भवान् तत्रापि सुहृदां भगिनीभागिनेयानां वै निश्चयेनेति तेऽवश्यं पालनीया इति पुरुषस्य पितृवर्गो वा रक्षको भवति तत्रापि तत्र पितृवर्गो न तेषां रक्षकः पितुर्निवृत्तत्वादन्येषां प्रतिकूलत्वादिति वक्ष्यति अत एव वयमेव सुहृदः अस्माकं मध्ये त्वं च श्रेयान् अतः श्रेयश्चिकीर्षया हिताचरणार्थं गजेन समाहूयं हास्तिना पुरं गच्छ अनेन प्रसिद्ध्या तत्र गमनं न निन्दितं भवति गुप्तस्थानेषु न तिष्ठन्तीत्यर्थः ॥ ३२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

प्रजाः पुत्रतुल्याः । एवं व्यवहारदृष्ट्या । त्वमस्माकमादरणीय एव परमार्थदृष्ट्या तु त्वं परमवैष्णवत्वात् पूज्य एवेत्याह । भवद्विधा इति । अर्हन्त इत्यर्हाः पूज्यास्तेषु सत्तमाः । ननु नृभिर्देवाः सेव्या इति प्रसिद्धिस्तत्राह । देवाः खलु स्वार्थाः स्वकार्यसाधनपराः । नतु तथा साधवः । ते तु परानुग्रहकातरा एवेति भावः ॥ २९ ॥ ३० ॥

अम्मयानि तीर्थानि नहीति शिरश्चालने नञ् अपि तु एवं देवा अपि तु भवन्त्येव एव देवा अपि किन्तु साधूनां तेभ्यो महदन्तरमित्याह । ते इति । एकशेषे पुंस्त्वमार्षं दर्शनादपि ॥ ३१ ॥

अतः पितृव्यत्वेनास्मत्प्रियंकरत्वात् साधुत्वेन परोपकारकत्वाच्च इदं त्वया कर्त्तव्यमित्याह । स इति । गच्छस्व गच्छस्वेति सम्बोधनं वा ॥ ३२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

वो युष्माकम् ॥ २९ ॥

देवाः स्वार्थाः स्वः स्वकीयः अर्थ एव येषां नतु परमात्मा इत्येवमर्थप्रियाः साधवस्तु नार्थप्रियाः किन्तु परमात्मप्रियाः ॥ ३० ॥

अम्मयानि तीर्थानि दर्शनान्न पुनन्ति मृच्छिलामया भूप्रदेशाः क्षेत्राणि च दर्शनान्न देवाश्च दर्शनान्न पुनन्ति किन्तु ते सर्वे उरुकालेन सेविताः पुनन्ति साधवस्तु दर्शनादेव भगवच्चरणस्पृष्टाः मृदादिप्रदेशाः अम्मयानि तीर्थानि चात्र प्रक्षेजनार्हाणि "धन्या अहो अमी आलयः गोविन्दाङ्घ्रिसरोजरेणवः यान् ब्रह्मेशौ रमादेवी दध्युर्मूर्ध्न्यघनुत्तये यत्पादनिः सृतसरित्प्रवरोदकेन तीर्थेन मूर्ध्न्यधिकृतेन शिवः शिवोऽभू"दित्याद्युक्तेः ॥ ३१ ॥

हे स । अक्रूर नः सुहृदां मध्ये भवान् श्रेयान् श्रेष्ठोऽतः पाण्डवानां श्रेयश्चिकीर्षया जिज्ञासार्थं तेषां रहस्यजिज्ञासार्थं च हास्तिनापुरं गच्छ ॥ ३२ ॥

भाषा टीका ।

श्रीभगवान् बोले हे अक्रूरजी आप सर्वदा हमारे गुरु हौ काका हौ बन्धु हौ सब प्रकार से श्लाघा करने योग्य हौ हम तो आप से रक्षित होने योग्य हैं और पोष्य हैं अनुकंपा योग्य हैं और आपके प्रजा हैं ॥ २९ ॥

आपके सरी के भागवत तो सेवित होने योग हैं श्रेष्ठ पुरुष हैं कल्याणार्थि पुरुषों के सदा सेव्य हैं देवता तो स्वार्थ साधक होते हैं साधु पुरुष ऐसे नहीं होते हैं ॥ ३० ॥

जल मय तीर्थ तथा मूर्ति मय देव तो भक्ति भाव साधन से फल देने वाले हैं अधिक दिन सेव्य हैं और साधु तो दर्शन मात्र ही से फल देने वाले हैं ॥ ३१ ॥

सो आप हम सुहृदों के श्रेष्ठ हौ हमारे कल्याण करने की इच्छा से पांडवों की व्यवस्था जानने के वास्ते हस्तिनापुर को जाओ ॥ ३२ ॥

पितर्युपरते बालाः सह मात्रा सुदुःखिताः ।
आनीताः स्वपुरं राज्ञा वसन्त इति शुश्रुम ॥ ३३ ॥
तेषु राजाम्बिकापुत्रो भ्रातृपुत्रेषु दीनधीः ।
समो न वर्तते नूनं दुष्पुत्रवशगोऽन्धदृक् ॥ ३४ ॥
गच्छ जानीहि तद्वृत्तमधुना साध्वसाधु वा ।
विज्ञाय तद्विधास्यामो यथा शं सुहृदां भवेत् ॥ ३५ ॥
इत्यक्रूरं समादिश्य भगवान् हरिरीश्वरः ।
सङ्कर्षणोद्धवाभ्यां वै ततः स्वभवनं ययौ ॥ ३६ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे
पूर्वार्धे अक्रूरगृहगमनं नाम
अष्टचत्वारिंशोऽध्यायः ॥ ४८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

राज्ञा धृतराष्ट्रेण वसन्ते निवसन्ति शुश्रुम श्रुतवन्तो वयम् ॥ ३३ ॥

दुष्टा ये स्वपुत्राः दुर्योधनादयस्तद्वशेन गच्छतीति तथा यतोऽन्धदृगन्धनेत्रः ॥ ३४—३६ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
अष्टचत्वारिंशोऽध्यायः ॥ ४८ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

जिज्ञास्यमेव सकारणं सप्रयोजनञ्चाह । पितरीति त्रिभिः । उपरते शान्ते इति तादृशादरणीयजनेष्वश्लीलवचनानर्हता ख्यापनाय, बाला इत्यानयनसमयापेक्षया । राज्ञेत्यन्धस्यापि तस्याधुना दैवाद्राजत्वप्राप्तिश्च जातेति सूचितं शुश्रुमेति लौकिकलीलामाधुर्यं अग्रे नूनमिति च ॥ ३३ ॥

नूनं वितर्के समो न वर्त्तते तत् कुतः । अम्बिकापुत्रः पाण्डोर्वैमात्रेयत्वादित्यर्थः । हेत्वन्तरं दुष्पुत्रवशगः तत् कुतः दीनधीः क्षुद्रबुद्धिः तदपि कुतः । अन्धदृक् तदादीनां सामुद्रिके बहुदोषस्मरणात् । अधुनैव गच्छ तस्य राज्ञो वृत्तं साधु वा भवत्यसाधु वेति जानीहीत्यर्थः । तत्तथा । भगवान् समग्रैश्वर्यादिपूर्णोऽपि हरिः मनसैव दुष्टसंहारसमर्थोऽपि ईश्वरः सर्वनियन्तापि । इति पूर्वोक्तानुनयप्रकारेणैव सम्यक् पुरस्कारपूर्वकं आदिश्य ततोऽक्रूरगृहात् सङ्कर्षणोद्धवाभ्यां सहेति न त्वनुव्रजनार्थमक्रूरेणापीति तत्प्रस्थापनत्वरा दर्शिता स्वेति तस्मिन् भवने तदनन्तरं स्वेच्छामयविलासः सूचितः । वै सम्बोधने तच्च लीलामाधुर्यानुभववैशिष्ट्याय ॥ ३४—३६ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे
श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिण्याम्
अष्टचत्वारिंशोऽध्यायः ॥ ४८ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

अम्बिकापुत्रः धृतराष्ट्रः अन्धदृक् अन्धः ॥ ३४—३६ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे
श्रीसुदर्शनसूरिकृतशुकपक्षीये
अष्टचत्वारिंशोऽध्यायः ॥ ४८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

पितरि पाण्डावुपरते स्वर्गं गते सति बाला अत एवातिदुःखिताः राज्ञा धृतराष्ट्रेण स्वपुरं प्रत्यानीताः सन्तस्तत्राधुना वसन्तीति शुश्रुम ॥ ३३ ॥

अम्बिकापुत्रो धृतराष्ट्रः राजा भ्रातृपुत्रेषु युधिष्ठिरादिषु विषयभूतेषु दीना कृपणा धीर्यस्य तथाभूतः समो न वर्तते नूनं निश्चितं तत्र हेतुः दुष्पुत्रो दुर्योधनः तद्वशगः तत्रापि हेतुरन्धदृगज्ञः ॥ ४४ ॥

अतस्त्वं गच्छ साध्वसाधु वा तेषां पाण्डवानां वृत्तं वर्तमनमवस्थानमिति यावत् जानीहि तद्वृत्तं विज्ञाय ततः सुहृदां पाण्डवानां शं सुखं यथा भवेत्तथा विधास्यामः करिष्यामः ॥ ३५ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

इतीति । इत्थं समादिश्याज्ञाप्य ततः सङ्कर्षणोद्धवाभ्यां सह स्वगृहं गतवान् ॥ ३६ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
अष्टचत्वारिंशोऽध्यायः ॥ ४८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

शतशृङ्गगिरिनिवासिभिः ऋषिभिरानीता राज्ञा सह वसन्ते वसन्ति स्वमहिमानमाच्छाद्येति शेषः इत्यत आत्मनेपदम् ॥ ३३ ॥

तत्र हेतुर्ह्यन्धदृगिति तत्त्वज्ञानशून्यत्वात् ॥ ३४ ॥

तद्विधास्यामः तथा करिष्यामः शं सुखम् ॥ ३५—३६ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम् ।
सप्तचत्वारिंशोऽध्यायः ॥ ४७ ॥ ४८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे
अष्टचत्वारिंशोऽध्यायः ॥ ४८ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

का जिज्ञासेत्याकाङ्क्षायामाह । पितर्युपरत इति । पाण्डौ संस्थिते बाला एव ते च बहवश्च मात्रा सह स्थिता इति स्तनन्धयप्रायां इत्यवस्थाया दयापात्रत्वमुक्तम् । अतिदुःखिता इति दयायाः साधारणो हेतुः त्वदीयानां पालकत्वमस्ति नवेति वचनार्थं परिग्रहो निरूप्यते । आनीताः स्वपुरमिति । ते चेच्छत्रवः सुतरामेवानर्थपर्यवसायित्वं स्वस्थाने स्थापिता इति तत्रापि राज्ञा अनेन तेषां राजत्वाभावो निरूपितः ॥ ३३ ॥

किं च न केवलं ते वसन्ते किन्तु उपद्रुता इत्यपि शङ्कातो ऽयमम्बिकापुत्रः तेषु प्रसिद्धेष्वपि निष्ठुरेष्वपि भ्रातृपुत्रेषु विनीतेषु समो न वर्तते तत्र हेतुः दीना धीर्यस्येति बुद्धिस्तु दरिद्रो हि दुर्गतः सर्वमेव कर्तुं समर्थः निषिद्धं विहितं त्वशक्तः आगन्तुकदोषमाह । दुष्पुत्रवशग इति । दुष्टः सहजः कलित्वात् दुर्योधनो हि कलेरवतार इति । अत एव कालस्य प्राबल्यात् तद्वशगः पुत्रत्वात् मोहेनापि तद्वशगो जातः स्वीविचारसामर्थ्याभावायाह । अन्धदृगिति सहिजात्यन्धः शब्देनैव व्यवहरति प्रियमेव शब्दं सर्वो मन्यते पुत्रशब्दश्च प्रियः ॥ ३४ ॥

तर्हि किं कर्तव्यमित्याकाङ्क्षायामाह । गच्छ जानीहीति । एकवचनेन सेनाद्यभावः सूचितः युद्धार्थं न गन्तव्यं किंत्वधुना तेषां साधुमङ्गळमस्ति असाध्वमङ्गलं वा अनिष्टमस्ति वेत्यनादरे नो भयं वा ज्ञानस्य कुतोपयोग इत्याकाङ्क्षायामाह । विज्ञायेति । तदनुरूपम् विधास्यामः प्रकारजिज्ञासायामाह । यथा शमिति । सुहृदां बन्धूनां येनैव प्रकारेण शं भवेत् स एव प्रकारः कर्तव्य इत्येतत्सर्वं जिज्ञासानन्तरं कर्तव्यम् अन्यथा कृतं न सुखपर्यवसायि भवतीति अतो जिज्ञासार्थमेव गच्छ नत्वन्यत्किञ्चित्कर्तव्यमिति भावः । मोहितस्यायं गुणः यदधिकमपि करिष्यति अत एव धृतराष्ट्रोऽपि तेन निर्भर्त्सितः ॥ ३५ ॥

एतावतैव कार्यं भविष्यतीत्यभिज्ञाय भगवान् स्वगृहं गत इत्याह । इत्यक्रूरं समादिश्येति । आज्ञासिद्धौ भगवत्त्वं हेतुः आज्ञापने हरित्वं स्वत आगमने ईश्वरत्वं स्तुत्वा स्वापेक्षयाप्याधिक्यमुपपाद्येदानीं च सेवकार्थं दूतत्वं च कारितवानितीश्वरचर्या संकर्षणोद्धवयोरन्यतरस्य वा गमनं भविष्यतीत्याशङ्क्याह । संकर्षणोद्धवाभ्यामिति । निर्गमन एव सह भावः स्वभवनगमने तु नायं निर्बन्ध इति ज्ञापयितुं तत इत्युक्तं तस्मात् स्थानात् तदनन्तरं चकार्यान्तरावृत्त्यर्थं स्वस्य भवनं ययौ प्रापणकथनेन मध्येऽपि कार्यान्तरं व्यावर्तितम् ॥ ३६ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे
श्रीमद्वल्लभदीक्षितविरचितायां सुबोधिन्याम्
पञ्चचत्वारिंशाध्यायार्थविवरणम् ॥ ४५ ॥ ४८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

राज्ञा धृतराष्ट्रेण वसन्ते वसन्ति ॥ ३३—३६ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
अष्टचत्वारिंशकोऽयं दशमेऽजनि सङ्गतः ॥ ४८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

स्वपुरमानीताः शतशृङ्गाख्यपर्वतान्मुनिभिरिति शेषः राज्ञा धृतराष्ट्रेण गृहीताः इति शेषः । वसन्ते तत्रैव निवसन्तीति शुश्रम श्रुतवन्तो वयमित्यर्थः । तेषां पर्वते जन्म तत्रैव पितुर्मृत्युः तत आगमनादिकमादिपर्वणि द्रष्टव्यम् ॥ ३३ ॥

दुष्पुत्राणां दुष्टानां दुर्योधनादिपुत्राणां वशेन गच्छतीति तथा ॥ ३४ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
अष्टचत्वारिंशाध्यायार्थप्रकाशः ॥ ४८ ॥

भाषा टीका ।

पिता पांडुजी के चले जाने के पीछे माता के सहित पांचों युधिष्ठिरादिबालकों को धृतराष्ट्र राजा ले आया तिस पीछे वे उहां रहते हैं ऐसा सुनते हैं ॥ ३३ ॥

भाषा टीका ।

उनके ऊपर धृतराष्ट्र राजा भाइ के पुत्र होने परभी कुत्सित बुद्धि होने से खोटे पुत्र दुर्योधन के वश होने से समबुद्धि नहीं रखता है क्योंकि अंधा है ॥ २४ ॥

आप जाकर भली या बुरी उसकी चालको जान कर आओ फिर जानकर उस उपाय को करेंगे जिससे सुहृदों का भला होगा ॥ ३५ ॥

हरि भगवान् ईश्वर इस प्रकार से अक्रूरजी को आज्ञा देकर बलदेवजी तथा उद्धवजी के सहित अपने गृहको जाते भये ॥ ३६ ॥

इति श्रीभागवत दशमस्कंध पूर्वार्धे
अठतालीस में अध्याय की
भाषा टीका समाप्त ॥ ४८ ॥

इति श्रीमद्भागवते दशमस्कन्धे पूर्वार्धे अष्टचत्वारिंशोऽध्यायः समाप्तः ॥ ४८ ॥

एकोनपञ्चाशोऽध्यायः ॥

श्रीशुक उवाच ।

स गत्वा हास्तिनपुरं पौरवेन्द्रयशोऽङ्कितम् ।
ददर्श तत्राम्बिकेयं सभीष्मं विदुरं पृथाम् ॥ १ ॥
सहपुत्रञ्च वाल्हीकं भारद्वाजं सगौतमम् ।
कर्णं सुयोधनं द्रौणिं पाण्डवान् सुहृदोऽपरान् ॥ २ ॥
यथावदुपसङ्गम्य बन्धुभिर्गान्दिनीसुतः ।
सम्पृष्टस्तैः सुहृद्वार्तां स्वयं चापृच्छदव्ययम् ॥ ३ ॥
उवास कतिचिन्मासान् राज्ञो वृत्तविवित्सया ।
दुष्प्रजस्याल्पसारस्य खलच्छन्दानुवर्तिनः ॥ ४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

ऊनपञ्चाशत्तमे तु गत्वाक्रूरोऽगजाह्वयम् ।
राज्ञः स्वभ्रातृपुत्रेषु बुद्ध्वा वैषम्यमागमत् ॥
पौरवेन्द्राणां यशोभिस्तत्कृतदेवब्राह्मणायतनादिभिरङ्कितम् ॥ १ ॥

बाह्लीकपुत्रः सोमदत्तः भारद्वाजो द्रोणः गौतमः कृपः ॥ २ ॥

अव्ययं कुशलम् ॥ ३ ॥

दुष्प्रजस्यासत्पुत्रस्याल्पसारस्य मन्दधृतेः खलानां कर्णादीनां छन्दमिच्छामनुवर्तितुं शीलं यस्येति तथा तस्य ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

स गत्वेति युग्मकम् । प्रथमं राज्ञो दर्शनयोग्यं ततः कुलश्रेष्ठत्वात् श्रीभीष्मस्य तद्दिने तु तयोरेकत्र स्थितिरासीदिति सभीष्ममित्युक्तं ततः आत्मीयत्वात् श्रीविदुरस्य ततस्तत्सङ्गेन स्वभगिन्याः पृथायाः ॥ १ ॥

ततः कुलवृद्धत्वाद्बाह्लीकस्य ततः पाण्डवान्वेषणे तदुपाध्यायस्य भारद्वाजस्य ततस्तत्सहचारित्वेन गौतमस्य ततः सहाध्यायित्वेन कर्णादीनां सर्वेषामेव । बालकानामिति तथा पाठक्रमः तत्र पाण्डवानां पश्चाद्भावः स्वस्य मध्यस्थख्यापनेन धर्मोपदेशाय पश्चान्मिलनात् प्रथमश्चशब्दोऽनुक्तसमुच्चये सर्वत्र योज्यः द्वितीयस्तूक्त्यर्थे ब्राह्मणस्यापि भरद्वाजस्य क्षत्रियमध्यपातात् सगौतममिति क्वचित् पाठः अपरान् शकुन्यादीन् ॥ २ ॥

यथावद्वृद्धादीन् प्रणामादिना उपसङ्गम्य स्नेहाधिक्येन मिलित्वा सुहृदां यादवानां वार्त्तां सम्यक् यथाविध्यातिथ्यपूर्वकं सस्नेहं पृष्टः ॥ ३ ॥

कतिचिन्मासानिति । बहुदिनवासात्तस्य कौटिल्यातिशयो व्यञ्जितः वृत्तमेव कारणद्वारा सूचयति । दुष्प्रजस्येति ॥ ४ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

वृत्तविवित्सया वृत्तं वेदितुमिच्छया ॥ १-५ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अथैवं प्रेषितोऽक्रूरः सम्विज्ञातसुहृद्वृत्तान्तः पुनरागतः तद्भगवते न्यवेदयदित्याहैकोनपञ्चाशत्तमेन । स गत्वेत्यादिना । सोऽक्रूरः कौरवेन्द्राणां कुरुवंशोद्भवानां यशोभिः यशः सूचकदेवब्राह्मणाद्यायतनादिभिरङ्कितं हास्तिनपुरं गत्वा तत्र भीष्मेण सहितमाम्बिकेयं धृतराष्ट्रं विदुरादींश्च ददर्शेति द्वयोरेव सम्बन्धः तत्र पृथा कुन्ती ॥ १ ॥

वाल्हीकपुत्रः सोमदत्तः गौतमः कृपाचार्यः भारद्वाजो द्रोणः द्रौणिर्द्रोणपुत्रोऽश्वत्थामा अपरान् सुहृदः ज्ञातीन् इत्यर्थः ॥ २ ॥

यथावदिति । गान्दिनीसुतोऽक्रूरः यथायोग्यम्बन्धुभिः सह युधिष्ठिरादिभिः साकं समुपेत्य तैर्बन्धुभिः सह समेत्य सम्पृष्टस्वकुशलः स्वयमपि सुहृदामव्ययं कुशलं पप्रच्छ ॥ ३ ॥

किञ्च उवासेति । ततो राज्ञो धृतराष्ट्रस्य वृत्तपरिशीलनार्थं कतिचिन्मासानुषितवान् । कथम्भूतस्य राज्ञः दुष्टाः प्रजाः दुर्यो-

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

धनादयः पुत्रा यस्य असिजभाव आर्षः अल्पसारस्य मन्दः सारो धृतिर्यस्य अत एव खलान् कर्णादीननुवर्त्तितुं शीलमस्येति तथा तस्य ॥ ४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

योग्यानां भगवति हरौ स्वत एव भक्तिः प्रकाश्यत इति व्यनक्त्यस्मिन्नध्याये तत्रादावक्रूरस्य धृतराष्ट्रादिदर्शनं वक्ति । स गत्वेति ॥ १ ॥

(बाह्लीकं कुरुवंश्यं कञ्चनवृद्धं राजानं शन्तनोर्भ्रातरं भारद्वाजं भरद्वाजस्यापत्यं द्रोणं सगौतमं सकृपम् ॥ २ ॥

तैर्भीष्मादिभिः सुहृद्वार्तां प्रति सम्पृष्टः अभूदिति शेषः अक्रूरः स्वयं च तेषामव्ययमनामयं पृष्टवान् ॥ ३ ॥

वृत्तविवित्सया स्वपुत्रेषु वृत्तं वर्तनं समं विषमं चेति ज्ञातुमिच्छया अल्पमन्वाय्यं सारं यस्य स तथा तस्य तत्र हेतुः खलच्छन्दानुवर्तिन इति खलानां पुत्राणां छन्दमिच्छामनुवर्तितुं शीलमस्यास्तीति तस्य ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

जगदीश्वरमपि कृष्णं स्वजनं निजबन्धुतयानुस्मृत्य १—३१ ॥

श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी ।

षट्चत्वारिंशके ऽध्याये सात्त्विकानां निरूप्यते ।
सान्त्वनं चान्यमुखतो निरोधो मद्यधिकारतः ॥
भगवत्प्रेषितोऽक्रूरः कृत्वा सान्त्वनपूर्वतः ।
ज्ञानेन तत्प्रतीकारं मत्वा तच्चोक्तवान् स्वयम् ॥
पाण्डवैर्ज्ञापिताशेषे विचारे कुशलो यतः ।
अतः स्थित्वा गतिं बुद्ध्वा स्वशक्तिं ज्ञातवांस्ततः ॥

अन्यथा भगवत्कार्यं निरोधो न भविष्यति । प्रथमं भगवत्कार्यं कृतवानित्याह । स गत्वेति षड्भिः । स अक्रूरः स्वतो भगवदाज्ञया च विशिष्टो हास्तिनपुरं हस्तिन् शब्दादपि रूढत्वाभावाय तेन निर्वृतमिति ज्ञापनार्थं बहुलेन गन्तव्यं तथापि स्वभावत उत्तममित्याह । पौरवेन्द्रश्रियोऽङ्कितमिति । पौरवेन्द्राणां श्रिया अङ्कितमिति मुख्यत्वात् प्रथमतो राजदर्शनम् अम्बिकायाः पुत्रो धृतराष्ट्रः धृतं राष्ट्रं येनेति व्युत्पत्तिः सम्भविष्यतीति तन्निषेधार्थं मातृनाम्ना व्यपदिष्टः राजस्थान एव भीष्मं दृष्टवान् विदुरं पृथामिति ज्ञापको ज्ञाप्यश्च निरूपितः ॥ १ ॥

सहपुत्रमिति । बाल्हीकः शन्तनोर्भ्राता । तत्पुत्रा भूरिश्रवादयः भरद्वाजो द्रोणः गौतमः कृपः कर्णदुर्योधनाश्वत्थामानः । एते महारथाः गणिताः षट् सहपुत्रत्वेन ससहाया अपि गणिताः ततोऽग्रे तेषां निवारणसमर्था इति ज्ञापयितुं पाण्डवाः गणिताः लोकन्यायेन सर्वबन्धुप्रियकृदिति ज्ञापयितुं सुहृदः अपरांश्च दृष्टवानित्युक्तम् ॥ २ ॥

यथावदिति । ततो यथायोग्यं नमस्कारादिप्रकारेणोपगमनम् अस्यापि माहात्म्यं मातृपुरमाहृतैः मथुरास्थवार्त्तां सम्यक् पृष्टः वसन् स्वयं च तेषामव्ययमपृच्छत चकारेण वार्त्तां समागतैवाव्ययमिति व्ययोऽत्र कस्यचित्परित्यागः अव्ययं यथा भवति तथा सर्वानेव पृष्टवान् आपाततो वृत्तान्तज्ञानं न भवतीति स्वतो ज्ञानार्थं स्थितवान् वर्त्तमानस्यैव ज्ञानं भवतीति ज्ञानं श्रुतवान भविष्यज्ज्ञानार्थं प्रबोधितवानिति संग्रहः ॥ ३ ॥

तत्र प्रथमं स्थितिमाह । उवासेति । कतिचिन्मासानिति निरन्तरं यावत्तत्परिज्ञानं भवति मासत्रयं स्थितवानिति लक्ष्यते मासे हि नूतना दिवसा आवर्त्तन्ते त्रयो हि पदार्था ज्ञातव्याः धृतराष्ट्रकाः स्वदोषाः पुत्रादिमोहकृता दोषाः संसर्गदोषाश्चेति एते नैमित्तिका अपि भवन्तीति मासपर्यन्तं निरन्तरपरिज्ञानार्थं स्थितिः निरन्तरं परिज्ञाने त्रयाणां संश्लेषेण गुणदोषव्यवस्थापकानां प्रत्येकं व्यभिचारात् परिज्ञानं न भवतीति एकैकस्य परिज्ञानार्थं तदीयगुणदोषनिर्द्धारार्थं मासपर्यन्तं स्थितिः एवं दोषत्रये मासत्रयमिति शीघ्रापरिज्ञाने राजत्वं हेतुः राजमन्त्रणं गूढं भवतीति दोषानाह । दुष्टाः प्रजाः पुत्रा अल्पः सारो विवेकधैर्यादिकं यस्य खलाः शकुनिप्रभृतयः तेषां छन्दो वृत्तं तदनुवर्त्तनशीलश्च ॥ ४ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी

ऊनपञ्चाशत्तमेऽगादक्रूरो हास्तिनापुरम् ।
भ्रातुष्पुत्रेषु वैषम्यं राज्ञो ज्ञात्वागमत्ततः ॥

पौरवेन्द्राणां यशोभिर्यशोद्योतकैस्तत्कृतदेवब्राह्मणायतनादिभिरङ्कितम् आम्बिकेयं धृतराष्ट्रं सहपुत्रं सोमदत्तसहितं भारद्वाजं द्रोणं गौतमं कृपम् ॥ १ ॥ २ ॥

अव्ययं कुशलम् ॥ ३ ॥

खलानां कर्णादीनां छन्दमिच्छामनुवर्तितुं शीलं यस्य तथा तस्य ॥ ४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ॥

एकोनपञ्चाशत्तमेऽक्रूरो हास्तिनपुरं गत्वा सुहृद्वृत्तान्तं ज्ञात्वा श्रीमथुरां पुनः प्राप्य तद्वृत्तान्तं श्रीरामकृष्णाभ्यां न्यवेदयदित्याह । स गत्वेति । पौरवेन्द्राणां पुरुवंश्यानां नरेन्द्राणां यशोभिः यशःसूचकैस्तत्कृतदेवायतनादिभिरङ्कितम् आम्बिकेयं धृतराष्ट्रम् ॥ १ ॥ पुत्रेण सोमदत्तेन सहितम् गौतमेन कृपेण सहितं भारद्वाजं द्रोणम् अपरान् भूरिश्रवःप्रभृतीन् ॥ २ ॥

अव्ययं कुशलम् ॥ ३ ॥

दुष्टाः प्रजाः दुर्योधनदुःशासनाद्याः यस्य तस्य अल्पसारस्य स्वल्पधर्मरुचेः खलानां शकुनिकर्णादीनां छन्दमिच्छामनुवर्तितुं शीलमस्येति ॥ ४ ॥

तेज ओजो बलं वीर्यं प्रश्रयादींश्च सद्गुणान् ।
प्रजानुरागं पार्थेषु न सहद्भिश्चिकीर्षितम् ॥ ५ ॥
कृतं च धार्तराष्ट्रैर्यद्गरदानाद्यपेशलम् ।
आचख्यौ सर्वमेवास्मै पृथा विदुर एव च ॥ ६ ॥
पृथा तु भ्रातरं प्राप्तमक्रूरमुपसृत्य तम् ।
उवाच जन्मनिलयं स्मरन्त्यश्रुकलेक्षणा ॥ ७ ॥
अपि स्मरन्ति नः सौम्य ! पितरौ भ्रातरश्च मे ।
भगिन्यो भ्रातृपुत्राश्च जामयः सख्य एव च ॥ ८ ॥

भाषा टीका।

श्रीशुकदेवजी बोले अक्रूरजीने हस्तिनापुर में जाकर देखा तो वह पुर कौरव राजोंकी संपत्ति से भरा है उहां पर उनने धृतराष्ट्र को भीष्म विदुर कुन्ती इन सबों को देखा ॥ १ ॥

सोमदत्तपुत्र के सहित वाल्हीक राजाको द्रोणको कृपाचार्यको कर्णको सुयोधनको अश्वत्थामाको पांडवों को तथा और भी सुहृदों को देखा ॥ २ ॥

गांदिनी के पुत्र अक्रूरजी मर्यादा पूर्वक सबके साथ मिले इन सबों ने उनसे सुहृदों की वातें पूछीं फिर आपभी सबका कुशल पूछते भये ॥ ३ ॥

फिर राजाके वृत्तांत को जानने के वास्ते कई एक महिना उहां पर निवास करते भये जो कि राजा खोटे पुत्र वाला है थोडी बुद्धि वाला है खळों के मत में चलता है ॥ ४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

तेजः प्रभावः ओजः शस्त्रादिनैपुणं वीर्यं शौर्यम् न सहद्भिरसहमानैः चिकीर्षितमितं उपरि कर्तुमिष्टम् ॥ ५ ॥

गरस्य विषस्य दानादि अपेशलमन्याय्यम् तेज ओजइत्यादि सर्वं कथयामास ॥ ६ ॥

तत्कथनात्पूर्वतरं पृथाया वृत्तमाह । पृथा त्विति । अश्रूणां कला लेशा ययोस्ते ईक्षणे यस्याः सा ॥ ७ ॥

अपि किम् जामयः कुलस्त्रियः ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी।

तेज इति युग्मकम् । आदिशब्दाल्लज्जाधैर्यादयः गरस्य दानं श्रीभीमाय आदिशब्दाज्जलनिक्षेपादि कृतं चिकीर्षितं तु लाक्षागृहादि ॥ ५ ॥

किमुत पृथा यतः पितृव्यत्वेन उभयत्र समो विदुर एव सोऽपीत्यर्थः। अन्यैस्तु तत्र तेज ओज इत्यादिकमिति सर्वमित्यस्यैव व्याख्या ॥ ६ ॥

श्रीभगवद्भक्तिविशेषेण कुन्त्या वृत्तं विचार्याह । पृथेति । अत एवान्यतो विशेषात्तुशब्दः प्राप्तं स्वगृहे समागतं सन्तं तं श्रीभगवद्भक्तवरत्वेन ख्यातम् अश्रूणि कलयतः निरन्तरं मुञ्चत इत्यश्रुकले ईक्षणे यस्याः सा ॥ ७ ॥

नोऽस्मानिति पुत्राद्यपेक्षया सौम्य ! हे शान्तप्रकृते इति भवादृशां बन्धुवात्सल्यसाधुत्वादिति भावः । पितरौ शूरतत्पत्न्यौ जामयः श्रीदेवक्यादयः सख्यः समशीला अन्याः ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

तेज इत्यादि । पार्थेषु प्रजानामनुरागं येषां तेजआदिगुणाश्चासहमानैर्धार्तराष्ट्रैर्दुर्योधनादिभिर्यत्कृतं विषप्रदानादिकमपेशलं कठिनं दुष्टं कर्म यच्च चिकीर्षितमग्रे करणीयं तत्सर्वमस्मै अक्रूराय पृथा विदुरश्चाचख्यौ इति द्वयोरेकान्वयः तत्र तेजः पराभिभवसामर्थ्यम् ओजः परैरनभिभूतत्वं बलं शारीरं धातुषं च वीर्यं शौर्य्यं तच्च युद्धे स्वगृहे इव प्रवेशसामर्थ्यम् ॥ ५ ॥ ६ ॥

तत्र पृथाया विशेषमाह । पृथा त्विति । तत्र पृथा तु तदाख्यानात् पूर्वमेव समागतं भ्रातरमक्रूरमुपसृत्य समुपेत्य जन्मनिलयं जन्म भवनं स्मरन्ती अश्रूणां कला लेशा ययोस्ते ईक्षणे यस्याः सा तमक्रूरं प्रत्युवाच ॥ ७ ॥

उक्तिमेवाह । अपीति षड्भिः । हे सौम्य ! अक्रूर मे पित्रादयः नोऽस्मान्स्मन्त्यपि स्मरन्ति किम् तत्र जामयः कुलस्त्रियः सख्यः सहचर्य्यः ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

तेजो ज्योतिर्लक्षणा दीप्तिः ओजः पराभिभवलक्षणं सामर्थ्यं बलं शारीरं रूपं वा वीर्यं पराक्रमः ॥ ५ ॥ ६ ॥

जन्मनिलयं जन्मगृहम् ॥ ७ ॥

जामयः भ्रातृवर्गभार्याः ॥ ८ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी।

तत्कृतं समीचीनं मन्यत इत्यर्थपूजार्थपरिज्ञानमाह । तेज इति द्वाभ्याम् । तेजः कान्तिः ओज इन्द्रियशक्तिः बलं देहस्य वीर्यं पराक्रमः वीररसाभिनिवेशकृत् एते क्षत्रियोत्कृष्टत्वप्रतिपादकधर्माः

भ्रात्रेयो भगवान् कृष्णः शरण्यो भक्तवत्सलः ।
पैतृष्वस्रेयान् स्मरति रामश्चाम्बुरुहेक्षणः ॥ ९ ॥
सपत्नमध्ये शोचन्तीं वृकाणां हरिणीमिव ।
सान्त्वयिष्यति मां वाक्यैः पितृहीनांश्च बालकान् ॥ १० ॥
कृष्ण ! कृष्ण ! महायोगिन् ! विश्वात्मन् विश्वभावन ! ।
प्रपन्नां पाहि गोविन्द ! शिशुभिश्चावसीदतीम् ॥ ११ ॥
नान्यत्तव पदाम्भोजात् पश्यामि शरणं नृणाम् ।
बिभ्यतां मृत्युसंसारादीश्वरस्यापवर्गिकात् ॥ १२ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

सद्गुणानाह । प्रश्रयादीनिति । विनयाश्रयो हि सात्त्विकधर्मास्तेन स्वभावतस्ते जीवा उद्धर्त्तव्या इत्युक्तं दोषे हेत्वन्तरमप्याह । पार्थेषु युधिष्ठिरादिषु प्रजानुरागं च त्रेधा हि मात्सर्यमुत्पन्नं त्रिदोषात्मकं सत् अचिकित्स्यमिति तत्कृतं फलमाह । न सहद्भिश्चिकीर्षितमिति ॥ ५ ॥

सर्वथा मारणं कृतं तु गरदानं भीमाय विषमोदकाः प्रदत्ता इति स च पातालं गत्वा समागत इति च अतिशब्देन बहुधा भीममारणार्थमुद्यमोऽपि प्रदर्शितः अपेशलमसुन्दरं कदाचिदपमानादिकमपि कृतमिति वृत्तान्तसहितमेतत्सर्वं पृथा विदुरश्च स्वकीयत्वात् साधारणश्च सर्वमेवाचाख्यौ एकेन स्वरूपज्ञानमपरेण भावमिति चकाराल्लोकमुखतोऽप्येवं भूतार्थपरिज्ञाने भगवदीयत्वं हरेरिति ॥ ६ ॥

पृथाया भगवदीयत्वनिरूपणार्थं भगवति तस्यानवधानभावमाह । पृथा त्विति । यद्यप्येषा कुन्तिभोजाय दत्ता तथाप्युत्पन्ना शूरादेवेति पितृगृहं वसुदेवादयः एव भवन्ति वसुदेवो भ्रातेत्ययमपि भ्राता तुशब्दः तज्जिज्ञासाभिन्नप्रक्रमार्थं प्राप्तामिति तस्याळभ्यळाभो दर्शितः उपसृत्येति आचख्यौ सर्वमेवास्मै पृथेत्युक्तं वस्तुतस्तु पूर्वमेव समागमादनन्तरमेव भगवति भावः अत एव तुशब्दप्राप्तशब्दौ उपसृत्य समीपे समागत्य तं पर्यनुयुञ्जाना जन्मनिलयं जन्मगृहं पितृकुलमिति यावत् तत्स्मरन्ती लोकवदश्रुकलेक्षणा जाता एतत्कायिकं मानसिकं च निरूपितम् ॥ ७ ॥

वाचनिकं निरूपयति । अपि स्मरतीति । सौम्येति सम्यक् कथनार्थं सम्बोधनं नोऽस्मान् पाण्डवान् अपीति सम्भावनायां यतः पितरौ यतो भ्रातरः पित्रोर्वृद्धत्वेनाप्रयोजकता शङ्क्यतेति भ्रातृगृहगं स इति स्वस्य प्रियत्वं सूचितं यद्यपि भगिन्योऽत्र सन्ति तथापि पितृगृहं समायान्तीति तेषां स्मरणज्ञानसम्भावनम् अन्यस्मै दत्तेति शङ्कया कदाचिदस्मरणं तथा सति न निस्तार इति भावः । स्मरणे त्वाभजनसम्पत्तिः सिद्ध्यति न तथा दुःखं भवति भ्रातृपुत्राः वसुदेवसुदेवादिपुत्राः चकाराद्भगिनीपुत्राश्च जामयः कुलस्त्रियः पितृवंशाविवाहिता देवकीप्रभृतयः सख्यः स्वस्य तासां स्मरणमावश्यकमिति सर्वाश्च ताः सख्य एव चकारात् बालिकाश्च सम्पूर्णवंशस्य ममत्वेन दुःखमिति भावः ॥ ८ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

तेजः प्रभावः ओजः शास्त्रादिनैपुण्यं वीर्य्यं शौर्य्यम् अपेशलमन्याय्यम् ॥ ५ ॥ ६ ॥

तत्कथनात् पूर्वतरं पृथावृत्तमाह । पृथा त्विति ॥ ७ ॥

यामयः कुलस्त्रियः ॥ ८ ॥ ९ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

तथा पुत्रेषु प्रजायाः पौरजानपदजनतायाः अनुरागम् पार्थानां तेजआदिसद्गुणांश्च न सहद्भिः असहमानैः धार्तराष्ट्रैर्दुर्योधनादिभिर्यदपेशलं कठिनं विषदानादि कृतं यच्च चिकीर्षितमत उपरि कर्तुमिष्टं तत्सर्वम् अस्मै अक्रूराय पृथा विदुरश्च आचख्यौ इति द्वयोरन्वयः एवकारस्तेषां दुष्टान दुर्मन्त्रितं प्रायो ऽन्यो न ज्ञातवानिति सूचयति ॥ ५ ॥ ६ ॥

कृतचिकीर्षिततत्कर्मकथनात् पूर्वमक्रूरं समुपेत्य पृथया यदुक्तं तद्वर्णयति । पृथेति सप्तभिः । उपसृत्य समुपेत्य जन्मनिलयं जन्मभूमिं स्मरन्ती अश्रूणां कला लेशाः ययोस्ते ईक्षणे यस्याः सा तमक्रूरमुवाच ॥ ७ ॥

जामयः कुलस्त्रियः ॥ ८ ॥

भाषा टीका ।

और पांडवों के प्रभाव शस्त्रादि बल शरीरबल शूरता इनको आदि लेकर जो सद्गुण हैं तथा प्रजाओं में जो अनुराग है तिसको नहीं सहने वाले धृतराष्ट्र के पुत्रोंने विषदानादिक जो अयुक्तकार्य किये हैं इन सब बातोंको अक्रूरजी से कुंती तथा विदुरजी कहते भये ॥ ५ ॥ ६ ॥

कुंतीजी तौ अक्रूर भाइको आये हुये देख उनके पास जाकर जन्म भूमिको स्मरण करके नेत्रों में आंशु लाकर वचन बोलती भई ॥ ७ ॥

हे सौम्य ! अक्रूरजी मेरे पिता माता भाइ बहिन भाइके पुत्र और कुलस्त्री सखी ये सब भी मेरी कभी याद करते हैं कि नहीं ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

पैतृष्वस्रेयान्मत्पुत्रान् ॥ ९ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

शोचन्तीं मां वाक्यैः सान्त्वयिष्यति किम् ॥ १० ॥

हे महायोगिन् ! महान् योग उपायो मायाख्योऽस्यास्तीति हे विश्वात्मन् ! सर्वान्तर्यामिन् हे विश्वभावन ! विश्वपालक प्रपन्नां शरणागताम् अवसीदन्तीं क्लिश्यन्तीम् ॥ ११ ॥

आपवर्गिकान्मोक्षप्रदात् ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

तत्रैव विशेषतः पुनः पृच्छति । भ्रात्रेय इति । तादृशप्रश्ने निजयोग्यतोक्ता न ह्यासौ मम भ्रात्रेयोऽन्यसाधारणः किन्तु भगवान् तत्र शरण्यः रक्षितृवाचकेन शरणशब्देनात्र तद्धर्मो लक्ष्यते ततश्च तत्र साधुरित्यर्थः । सर्वात्मना यः शरणं शरण्यं गतो मुकुन्दमितिवत् तत्र प्रवृत्तौ हेतुः भक्तवत्सलः अत एव सम्भावयामीत्याह । स्मरति किमिति शेषः पैतृष्वस्रेयानिति स्नेहविशेषपात्रत्वेन स्मरणीयविशेषतां बोधयति अम्बुरुहेक्षण इति परमसौन्दर्यम् एवं दिदृक्षया तस्मिन् निजसहजवात्सल्यमपि ततः करिष्यमाणा निजरक्षाप्रार्थनापि तद्विलास एव क्षेमः ननु कामनामात्रेण विपदः सन्तु ताः शश्वदित्याद्युक्तेः विशेषणान्येतानि द्वयोरेव योग्यत्वात् रामस्य पश्चान्निर्देशस्तदनुगत्यैव तद्भावात् ॥ ९ ॥

ननु स्मरन्नेव मामत्र प्राहिणोदित्याशङ्क्याह । सपत्नेति । अनेनात्मनः परमार्तत्वं व्यञ्जितं वाक्यैः प्रियवचनैः पूर्ववत्तद्वचनशुश्रूषया ॥ १० ॥

ननु तत्रत्येषु स्वेषु निजकृत्यं समाधायाचिरादत्रागतः सान्त्वयिष्यत्येवेति चेत् अन्तरा यावत् तद्दर्शनामृतं लभेमहि तावत्तत्र स्थितोऽप्यसावस्माकं प्राणरक्षां कुर्यादिति परमसामर्थ्यं निरूपयन्ती परमार्त्या साक्षादिव तमेव सम्बोध्य त्रिभिः सकरुणं वदन्ती प्रागुपसन्नापद्रक्षां प्रार्थयते कृष्णेति पूर्वं मुख्यनाम्ना सम्बोधनं तत्र वीप्सया झटित्याभिमुख्याय तत्र तादृशसामर्थ्यव्यञ्जकं सम्बोधनं महायोगिन् हे परमोपाययुक्तेति नच त्वयि विज्ञापनापेक्षास्ति सर्वज्ञानादिप्रवर्त्तकत्वादित्याह । विश्वात्मन्निति । नच ज्ञात्वापि कथञ्चिदुदाससे जगत्पालकत्वादित्याह । विश्वभावनेति । तत्र च प्रपन्नवात्सल्यं दर्शयति । गोविन्द हे गोवर्द्धनोद्धारण प्रकाशिततन्नामन्निति नच तत्र विलम्बः कार्य इत्याह । शिशुभिः सह शत्रुसङ्कटे निरन्तरं दुःखं प्राप्नुवन्तीञ्चेति ॥ ११ ॥

नचैतदर्थमन्यः प्रार्थनीयः यतः सर्वदुःखमूलात् संसारादपि सर्वेषामपि त्वच्चरणमेव निस्तारकमिति मम निश्चय इत्याह । नेति । अन्यब्रह्मज्ञानादपि येऽन्येऽरविन्दाक्ष इत्याद्युक्तेः नृणां जीवानां मृत्युसंसारात् अनादिमृत्युपरम्पराप्राप्तेः नान्यत् पश्यामीत्यत्र हेतुमाह । ईश्वरस्येति । मदीयं महिमानञ्च परं ब्रह्मेति शब्दितं वेत्स्यस्यनुगृहीतं मे सम्प्रश्नैर्विवृतं हृदीत्यष्टमस्कन्धस्थश्रीमत्स्यदेववचनानुसारेण यो मामव्यभिचारेण भक्तियोगेन सेवते स गुणान् समतीत्यैतान् ब्रह्मभूयाय कल्पते । ब्रह्मणो हि प्रतिष्ठाहमित्यादि श्रीमद्भगवद्गीतानुसारेण च प्रसिद्धमहैश्वर्यस्येत्यर्थः । अत एवापवर्गिकात् तच्च तैर्व्याख्यातं यद्धेश्वरस्य महादेवस्यापि वृकासुरादिभवविविधभयतो मोक्षप्रदात् ॥ १२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

भ्रात्रेय इति । देहसम्बन्धेनाप्यात्मनां रक्षत्वख्यापनाय भ्रात्रेय इत्युक्तिः भ्रातुर्वसुदेवस्य पुत्रो भ्रात्रेयः शरणमुपायतामर्हतीति शरण्यः अनेन सम्बन्धातिक्रमनादृत्य शरणागतरक्षाशीलत्वमुक्तम् तदुपयुक्तगुणपूर्त्तिरुच्यते । भगवानिति । शरणागतानपि कदाचिद्दोषान्वेषणेन न रक्षेदित्याशङ्कां निराकुर्वन् व्याचष्टे । भक्तवत्सल इति । भक्तेषु दोषादर्शी पितृष्वसुः पितृभगिन्या ममापत्यरूपान् युधिष्ठिरादीन् स्मरति अपीति शेषोऽनुषङ्गो वा स्मरति किमित्यर्थः । तथाम्बुरुहे ईक्षणे यस्य स रामोऽपि स्मरति किम् तदीक्षणप्रसादमात्रेणैव निस्तापा वयं भविष्याम इत्यभिप्रायेण तदीक्षणयोरम्बुरुहोपमा ॥ ९ ॥

किञ्च सपत्नमध्य इति । वृकाणां मध्ये हरिणीमिव तथा शत्रूणां मध्ये शोचन्तीं मां पितृहीनान् बालकान् पुत्रांश्च वाक्यैः सान्त्वयिष्यति किम् ॥ १० ॥

एवमक्रूरं प्रति परोक्षमुक्त्वाथ सर्वान्तरात्मानं भगवन्तं बुद्ध्या सन्निधाप्य कार्पण्यनिवेदनपूर्वकमात्मोत्ररक्षां प्रार्थयते । कृष्ण कृष्णेति । हे महायोगिन् सर्वज्ञ हे सर्वान्तरात्मन् विश्वं भावयति स्वसक्तजनं सुखयुक्तं करोतीति तथा शिशुभिः पुत्रैः सहावसीदन्तीं क्लिश्यन्तीमधुना शरणागतां च मां पाहि ॥ ११ ॥

ननु ब्रह्मरुद्रादिषु प्रपत्तव्येषु सत्सु किं मामेव शरणं गच्छसीत्यत्राह नान्यदिति । मृत्युरूपात्संसाराद्बिभ्यतां ब्रह्मादीनामप्यपवर्गप्रदादीश्वरस्य तव पदाम्भोजादन्यन्नृणां शरणमिष्टसाधनं न पश्यामः ब्रह्मादीनामपि प्रपत्तृतुल्ययोगक्षेमत्वान्न प्रपत्तव्यतेति भावः ॥ १२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

पैतृष्वस्रेयान् पितृष्वसुः पुत्रान् पाण्डवान् ॥ ९ ॥

सपत्नमध्ये शत्रुमध्ये वृकाणां मध्ये स्थिताम् ॥ १० ॥

द्युमणेरुदयादुत्फुल्लया नलिन्या यथा तथा अक्रूरस्य दर्शनादुद्रेचितया भक्त्या विवशा विशेषप्रबुद्धभगवद्गुणा नित्यं तत्परा कुन्ती मनस्याविर्भूतं कृष्णं स्तौति । कृष्णेति । महानपरिच्छिन्नो योगो ज्ञानमुपायो वास्तीति तत्सम्बुद्धिः महायोगिन् महत्पूज्यविशालयोरिति यादवः । सर्वमाप्नोति धारयतीति सर्वात्मा हे सर्वात्मन् ! गोविन्द गवामिन्द्र ! ॥ ११ ॥

मृत्युवत् भयहेतोः संसारात् आपवर्गिकात् अपवर्गाख्यक्रियासाध्यफलप्राप्तेः साधकात् तदापादकाद्धा---

अपवर्गः क्रियासाध्यफलाप्तौ त्यागमोक्षयोरिति

वैजयन्ती ॥ १२ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

किञ्च स्मरन्त्वन्ये मा वा । भ्रात्रेय इति । भ्रात्रेयः कृष्णः स्मरति

नमः कृष्णाय शुद्धाय ब्रह्मणे परमात्मने ।
योगेश्वराय योगाय त्वामहं शरणं गता ॥ १३ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

न वेति पृच्छति प्रायेणेयं नन्दगृहे ममागत्य गतेति लक्ष्यते तदुपपादितं प्रथमस्कन्धे सा मां विमोहयतीत्यत्रातो भगवतो ऽनुभवात्स्मरणं पृच्छन्ती स्मरणे सम्बन्धमाह । पैतृष्वस्रेयानिति । पैतृष्वसुः पुत्रान् पाण्डवान् रामोऽपि स एव सम्बन्ध इति रामश्चेत्युक्तं चकाराद्भगवद्भक्ता उद्धवादयोऽपि अम्बुरुहेक्षण इति स्मरति चेत्तापं ज्ञात्वा समायास्यतीति लक्ष्यते दृष्ट्वैव तापदूरीकरणार्थम् ॥ ९ ॥

तदर्थं तापं निरूपयति । सपत्नमध्ये शोचन्तीमिति । व्यवहारे नाममात्रेण सम्बन्धिनः वस्तुतः शत्रवः नापकारमात्रं तेषां किन्तु सर्वनाशकत्वमिति दृष्टान्तमाह । वृकाणां मध्ये हरिणीमिति । प्रसङ्गादागमनं निवारयति । सान्त्वयिष्यतीति । प्रसङ्गादागतवाक्यानि न सर्वथा सान्त्वनसमर्थानि भवन्ति मामिति । पाण्डवास्तु भ्रातरो भवन्ति अहं पितृभगिनीति । उभयोर्विशेषाकारेण सान्त्वनं करिष्यति किं वाक्यैरर्थवद्भिः सुखेन सर्वान् स्थापयिष्यामीति । इह लोके परलोके च पितृहीनांश्चकारात् मातृहीनानपि कृष्णस्य विशेषणं भगवानित्युक्तत्वात् । अन्येषामवस्थादोषो भवति बालकानित्युक्तं स्वतः असमर्थान् ॥ १० ॥

एवं मनोरथमुक्त्वा तदानीमेव समागतं मन्यमाना संमुखस्था प्रार्थयते । कृष्ण कृष्णेति । आदरे वीप्सा अकस्मादागतवानस्वहमत्यत्र अत्र तव दृष्टिभ्रमो भविष्यतीत्याशङ्क्याह । महायोगिन्निति । तथापि किमेवमेतावद्दूरं सर्वपदपरित्यागेनागमनेनेति चेत्तत्राह । विश्वात्मन्निति । सर्वस्य भगवानात्मा आत्मना हि देहादेः प्रियं कर्तव्यं प्रयत्नस्य तदधीनत्वात् अतः सर्वथा आगमनं तथाप्यक्रूरवदेवागन्तव्यं किमिति विशेषाकारेणागतमिति चेत्तत्राह । विश्वभावनेति । विश्वमेवानुभावयतीति नह्यलौकिकाकरणे विश्वमनुभावितं भवति अलौकिकस्तुतावेवालौकिकानुभावो भवति एवं भगवन्तं सम्बोध्य समागमनं तत्प्रकारं चोक्त्वा प्रार्थयते । प्रपन्नां पाहीति । साधारणा अपि प्रपन्ना रक्षणीया भगवतः सम्बन्धो नापेक्षितः अतः प्रपत्तिरेव हेतुत्वेन निरूपिता अवसीदतीम् अवसादं प्राप्नुवतीमिति प्रपन्नामिति परिपालने हेतुः तत्रापि शिशुभिः सह लाक्षागृहदाहे वा भगवन्तमिव पश्यन्ती ॥ ११ ॥

ननु पुत्रा अपि तव समर्थाः पितरो भ्रातरश्च अतः किमिति विषादः क्रियत इत्याशङ्क्याह । नान्यत्तव पदाम्भोजादिति । मृत्युसंसाराद्बिभ्यतामन्यच्चरणमेव नास्ति मृत्योः संसाराच्च प्रतिजन्म मृत्योर्भयं तु संसारमेव भगवत एव निवर्त्तते उभयं स्वतन्त्रभक्त्यैव निवर्तत इति पदाम्भोजद्वयपदं ननु भगवन्तं परित्यज्य चरणात् कथं निवृत्तिरुच्यते इति चेत्तत्राह । ईश्वरस्येति । स हि चरणद्वारापि सर्वं कर्तुं समर्थः किञ्च ईश्वरत्वात् दुराराध्यत्वात् निर्विचिकित्सं फलार्थिनः प्रवृत्तिरपि कुण्ठिता भवेत् । चरणौ तु नियतौ अत एव नियतो भक्तिमार्गः फले फलावश्यंभावे ईश्वरभावस्तु अनियतः ईश्वरत्वान्मृत्युतिराकरणमापवर्गिकादपवर्गाधिपतेः संसारनिवृत्तिरियं संसारस्तु अपवर्गपर्यन्तो भवतीत्यापवर्गिकः मृत्युरपि तथा ॥ १२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

वृकाणाम् इत्यनन्तरं मध्ये इत्यध्याहार्यम् ॥ १० ॥

महायोगिन्निति । मथुरायां स्थितोऽपि ममैतां खेदोक्तिं शृणुष्वेति भावः । किञ्च विश्वात्मन्निति । मम हृद्यपि त्वं स्थितः शृणोष्येवेति भावः । विश्वभावनेति । विश्वमपि त्वं पालयसि मत्पालनं ते कोऽतिभार इति भावः । हे गोविन्द ! मम नेत्रगोचरीभव त्वामहं दृश्यासमिति भावः ॥ ११ ॥

आपवर्गिकात् अपवर्गदानार्हात् ॥ १२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

पैतृष्वस्रेयान् वसुदेवभागिनेयान् ॥ ९ ॥

सपत्नानां शत्रूणां धार्तराष्ट्रशकुन्यादीनां मध्ये सान्त्वयिष्यति किम् ॥ १० ॥

योगः सर्वकार्यनिष्पादनसामर्थ्यं यस्य तस्य संबोधने हे महायोगिन् ! अवसीदतीं क्लिश्यन्तीम् ॥ ११ ॥

आपवर्गिकात् सर्वक्लेशघ्नात् ॥ १२ ॥

भाषा टीका ।

भाइ के पुत्र भगवान् कृष्ण शरण रक्षक भक्तवत्सल मेरे पुत्र पांडवों को याद करते हैं क्या और भी कमल लोचन बलरामजी स्मरण करते हैं कि नहीं ॥ ९ ॥

वे कृष्ण कभी भेडहारों के बीच में जैसे हिरणी होवै तैसे शत्रुओं के बीच में शोचती हुई मोकों तथा पिता से हीन इन बालकों को कभी आकर समुझावेंगे क्या ॥ १० ॥

हे कृष्ण ! हे कृष्ण ! हे महायोगिन् ! हे विश्वात्मन् ! हे विश्वभावन ! हे गोविन्द ! बालकों सहित मैं दुखी हूं शरणागत हूं मेरी रक्षा करो ॥ ११ ॥

आपके चरणारविन्द से दूसरे किसीको मैं रक्षक नहीं देखती हूं सब मनुष्य तो मृत्यु संसार से डरते हैं आप ईश्वरहो आपका चरणतो मोक्ष देने वाला है ॥ १२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

शुद्धाय धर्मात्मने ब्रह्मणे ऽपरिच्छिन्नाय परमात्मने जीवसखाय योगेश्वरायाणिमादियुक्ताय योगाय ज्ञानात्मने ॥ १३ ॥

श्रीशुक उवाच ।

इत्यनुस्मृत्य स्वजनं कृष्णं च जगदीश्वरम् ।
प्रारुदद्दुःखिता राजन् ! भवतां प्रपितामही ॥ १४ ॥
समदुःखसुखोऽक्रूरो विदुरश्च महायशाः ।
सान्त्वयामासतुः कुन्तीं तत्पुत्रोत्पत्तिहेतुभिः ॥ १५ ॥
यास्यन्राजानमभ्येत्य विषमं पुत्रलालसम् ।
अवदत्सुहृदां मध्ये बन्धुभिः सौहृदोदितम् ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

प्रपितामही प्रपितामहः पाण्डुस्तस्य भार्या रुरोद ॥ १४ ॥

पृथया सह समं दुःखं सुखं च यस्य सः तस्याः पुत्राणामुत्पत्तिहेतुभिर्जनकैर्धर्मानिलेन्द्रादिभिस्तत्कथनैरित्यर्थः ॥ १५ ॥

बन्धुभिः रामकृष्णादिभिः सौहृदेनोदितमुक्तं यत्तदवददिति ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

निजाभीष्टयोग्यमेव तं प्रणमन्ती शरणं याति । नम इति । शुद्धायेति धर्मात्मतयाऽवश्यं शरणागतरक्षाभिप्रेता । ब्रह्मन् इत्यादि पदद्वयेन तत्र च सदा सर्वत्र सर्वरक्षा योग्यता योगेश्वरायेति तदर्थं स्वतः सर्वार्थपूर्णता योगायेति चान्यतो ज्ञानानपेक्षा यद्वा कृष्णाय स्वयं भगवते परिपूर्णभक्तीनां परिपूर्णैश्वर्यादियुक्तायेत्यर्थः । ब्रह्मणे निर्विशेषज्ञानिनामपि परिच्छिन्नतत्त्वज्ञानमात्ररूपाय परमात्मने अन्तर्यामित्वमात्रैश्वर्यज्ञानिनां तद्रूपाय त्रिष्वपि विशेषणं शुद्धाय मायास्पर्शरहिताय योगेश्वराय निजतथा तथाविर्भावानुभवोपायदात्रे शक्तिशक्तिमतोरभेदांशेन स्वयं तत्तद्रूपाय च तुभ्यमिति शेषः । अतो नासाध्यं तव किञ्चिदिति भावः । मतस्त्वामित्यादि ॥ १३ ॥

इत्येवं स्वजनं पित्रादिकं जगदीश्वरमिति जगदीशतया कृष्णं चानुस्मृत्य वारं वारं स्मृत्वा यद्वा च अपि स्वजनं बन्धुनां प्राप्तमपि कृष्णं जगदीश्वरतयानुस्मृत्य किम्वा जगदीश्वरमपि स्वजनं निजबन्धुतयानुस्मृत्य तदप्राप्त्या दुःखिता सती प्रकर्षेण सगद्गदेत्यादिनारुदत् भवतां प्रपितामहीति तस्यास्तादृशप्रणयवत्याः साक्षात् कृष्णपितृष्वसुः प्रपौत्रत्वेन तस्य भाग्यं सूचयन् हर्षं वर्द्धयति अत एव परमादरेण भवच्छब्दप्रयोगः तत्र बहुत्वञ्चातः प्रहर्षेण सम्बोधयति राजन्निति ॥ १४ ॥

चेति त्वर्थे विदुरस्तु महायशः स्वभावतः पाण्डवविषयकपक्षपातादिसत्ख्यातिर्यस्य सः तत्पुत्रेति तैर्व्याख्यातं तत्र देववरेभ्य उत्पन्नत्वात्तेषां कदाचिदप्यशुभं नास्तीत्येवं कथनैरित्यर्थः । अथवा तत्पुत्रोत्पत्तेर्हेतवः भूभारावतारार्थमवतीर्णस्य श्रीकृष्णस्य लीलामाहात्म्यानि तैः ॥ १५ ॥

पुत्रेषु तेषां राज्यादिसिद्ध्ये लालसा महामनोरथो यस्य तं सुहृदां भीष्मादीनां मध्य इति तस्य लज्जोत्पादनेन निजोक्तिग्राहणार्थम् ॥ १६ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

अपेशलम् अशुभम् अपीति पित्रादयः किं स्मरतीत्यर्थः ॥ ६—२८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

प्रपत्तिमपि यथावत्कर्तुमशक्नुवन्त्या मम भगवत्प्रसादोऽञ्जलिरेवेत्यभिप्रायेण प्रणमति । नम इति । शुद्धाय रागद्वेषादिरहिताय किञ्चित्स्वानुकूलमात्रापेक्षायेति यावत् अञ्जलिरेव तं प्रसादयितुमलमिति भावः । ब्रह्मणे स्वरूपेण गुणैश्च निरतिशयबृहते अनेन पूर्णस्य नास्माभिर्विधेयमन्यदपेक्षितमित्यभिप्रेतम् परमात्मने अन्तः प्रविश्य प्रशासनेन भर्त्रे त्वत्प्रशासनानुरूपमेवास्मत्प्रवृत्तिरित्यभिप्रेतम् योगेश्वराय तत्तदधिकार्यनुरूपमनेकधावस्थितन्यासात्मकयोगनिर्वाहकाय योगाय युज्यते सर्वात्मभिरिति योगस्तस्मै निरुपाधिकसर्वविधबन्धवे एवम्भूताय श्रीकृष्णाय स्वर्गापवर्गसुखहेतवे नमः केवलं नमनमेव करोमीत्यर्थः । त्वामुक्तविधमहं कृपणा शरणं गता शरणागतशब्दभागस्मीति भावः ॥ १३ ॥

इतीति । इदं शुकवचनम् हे राजन् ! भवतां प्रपितामहः पाण्डुः तस्य स्त्री कुन्ती इत्थं श्रीकृष्णं स्वजनं चानुस्मृत्य दुःखिता सती प्रारुदद्रुरोद ॥ १४ ॥

तदा समं दुःखं सुखं च यस्य सः कुन्त्या सहेति शेषः यद्वा बन्धुजनदुःखसुखदर्शनजमनोविकाररहितः ज्ञाननिष्ठत्वात् अक्रूरो विदुरश्च तस्याः पुत्राणामुत्पत्तिहेतुभिर्जनकैर्धर्मानिलेन्द्रादिभिः तत्कथनैरित्यर्थः । सत्पुत्रैरित्यादिपाठान्तरं तत्र सद्भिर्धर्मानुवर्त्तिभिः पुत्रैः तदुत्पत्तिहेतुभिश्च पूर्वोक्तैः कुन्तीं सान्त्वयामासतुः धर्मानुवर्त्तित्वाद्दिक्पालांशजत्वाद्भगवदभिमानविषयत्वाच्च न तेषामशुभमस्तीत्येवम्विधैरुपदेशैः सान्त्वयामासतुरित्यर्थः ॥ १५ ॥

यास्यन्निति । गमिष्यन्मथुरां प्रतीति शेषः । पुत्रलालसं पुत्रेष्वासक्तबुद्धिमत एव विषमं भ्रातृपुत्रेष्विति शेषः । विषमबुद्धिं राजानं धृतराष्ट्रमभ्येत्य बन्धुभिः श्रीकृष्णादिभिः यत्सौहृदेन कथितं तत्सुहृदां मध्येऽवोचत् ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

कृष्ण सीसायलोहेषु इत्यतः कृष्णशब्दस्य सीसायेऽपि वृत्तेस्तन्निरासार्थं शुद्धायेति । कतत् शुद्धमत्राह । ब्रह्मण इति । अस्याप्यनेकार्थवृत्तेर्न निर्णय इत्यतः परमात्मन इति । दुर्भगशरीरे वसतो हरेः कर्दम इव शुद्धत्वं कथं युज्यत इति तत्राह । योगेश्वरायेति । योगैश्वर्याद्धटत इत्यर्थः । ननु तर्हि योगैश्वर्यनिमित्तं शुद्धत्वं चेत्स्वतो नास्तीत्यायातमित्यत उक्तं योगायेति ज्ञानसंहताय : ज्ञानात्मत्वेनाप्राकृतत्वात्स्वाभाविकमित्यर्थः । ततः किमत्राह । त्वामिति ॥ १३ ॥

इति एवमादिगुणपूर्णम् ॥ १४ ॥

तस्याः पुत्राणां युधिष्ठिरादीनाम् उत्पत्तिहेतुभिः दुर्वाससोऽनुग्रहेण धर्मानिलेन्द्रसंयोगादिलक्षणैः ॥ १५ ॥

यास्यन् गन्तुमिच्छन् पुत्रलालसं पुत्रस्नेहकातरं बन्धुभिः सहितं सौहृदेदितं सुहृद्भावेन कथितम् ॥ १६ ॥ १७ ॥ १८ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

एतावत्प्रार्थनानन्तरमङ्गीकारेणेव तत्परितोषं कृत्वा तिरोधानकृते तादृशाय पुनर्नमस्करोति । नमः कृष्णायेति । नमस्कारे सम्बन्धस्य विरुद्धत्वात् यदैव चिकीर्षितः तदैव तिरोहितः कृष्णायेति सदानन्दाय अवतारत्वेऽपि धर्मा न बाधका इत्याह । शुद्धायेति अवतारसम्बन्धिधर्मैरस्पर्शात् अनेन कालान्ताः सर्वधर्मा एव निवारिताः नन्वागतस्य सर्वथेतरसम्बन्ध इति चेत्तत्राह । ब्रह्मण इति । जीवानामेवागतानां बन्धो न ब्रह्मणः ननु जीवोऽपि वस्तुतो ब्रह्म भवतीति को विशेष इति चेत्तत्राह । परमात्मन इति । परमश्चासावात्मा चेति । उत्कृष्ट आत्मा आत्मनामात्मा वा ननु तर्हि कथं मूलसमागमनं हत्वभावादशत्वे परिच्छेदे हि समागमनं सम्भवति तत्राह । योगेश्वरायेति । योगो ह्यलौकिककं कर्तुं शक्तः यत्र बुद्धिर्न प्रसरति तस्यापीश्वरः कथं स्वागमनमपि न सम्पादयेत् किञ्च योगस्यापि सामर्थ्यं भगवत एवेत्याह । योगायेति । भगवानेव योगः अतः सामर्थ्यस्य दृष्टत्वान्नानुपपन्नं किं चित् अतो यथा आगतोऽपि तद्धर्मैर्न लिप्यते सर्वत्र पूर्णोऽप्यागच्छति एवमस्मानपि पालयिष्यतीति निश्चित्याह । स्वामहं शरणङ्गतेति । शरणागमने परिपालनमावश्यकमिति ॥ १३ ॥

ततः किञ्जातमित्याकाङ्क्षायामाह । इत्यनुस्मृत्येति । स्वजनं पित्रादीन् कृष्णं चकाराद्बलभद्रं भगवद्गुणांश्च जगदीश्वरमिति सर्वे एव पाल्या इति बहिर्मुखाः तिरोधानात्पाक्षिकरक्षामाशङ्क्य प्रकर्षेणारुदत् वंशं दूरीकरिष्यति एवं परीक्षितं कथंचित्स्थापयिष्यतीत्येवं भवद्वैरी स्त्रियोऽपि भक्ता इति ज्ञापयितुमाह । भगवतां प्रपितामहीति । पितामही सुभद्रा कुन्ती तु प्रपितामही ॥ १४ ॥

भगवतः सान्त्वनं तु पाक्षिकं मन्यत इति भगवदीयैः सान्त्वनं क्रियत इत्याह । समदुःखसुख इति । तत्रार्थे अक्रूरस्य सान्त्वनमनुचितं मत्वाह । समे दुःख सुखे यस्येति यद्यपि जाते अनिष्टे इष्टे वा सुखं दुःखं समानं तथाप्ययमक्रूरः प्रसिद्धः पुरुष इति सान्त्वनमुचितमेव विदुरोऽपि तुल्यस्तथापि धर्मपक्ष इत्याह । महायशा इति । तत एव हि भवति नान्यथा सान्त्वयामासतुः ननु तद्दुःखं दृष्ट्वा स्वयं बद्धार्थं प्रवृत्तौ यतः कुन्ती कुन्तिभोजाय दत्ता तत्रापि स्वरक्षार्थं धर्मादयः प्रार्थिताः इत्यक्रूरविदुराभ्यां युद्धे कृते तत्प्रयत्नो व्यर्थो भवतीति तत्पुत्रोत्पत्तिहेतुभिर्द्धर्मादिभिः कृत्वा सान्त्वनमेव कृतवन्तौ न तु युद्धार्थं प्रवृत्ताविति युक्तम् ॥ १५ ॥

तथाप्यक्रूरः असहमानः वाक्ये न धिक्कारे कृते ययं विमतो भविष्यति तदा मारयिष्यामीति निश्चित्य तद्गृहे स्थितः तदधीनो भवतीति निर्गच्छन् राजसम्बोधनार्थं प्रवृत्त इति तदाह । यास्यन्निति । राजानं धृतराष्ट्रं राजत्वादवश्यं वक्तव्यः अन्यथा मर्यादातिक्रमो भवेत् अभित एत्येति । निःशङ्कं ननु राजा न वक्तव्यः सर्वप्राणिभिः यथा भगवान् तत्कथमुक्त वा नित्याशङ्क्याह । विषममिति । तत्र हेतुः पुत्रलालसमिति पुत्रो हि स्वयजीवन् पाण्डवान्न मन्यते अधुना किं पाण्डवा हन्तव्याः पुत्रो वेति विचारे दुष्टो हन्तव्य इति धर्मशास्त्रात् पुत्रस्यैव मारणं प्राप्तं तन्न करोति विषमः सहजो धर्मो विहितं धर्मं बाधते एतच्च राजाधिकारे निविष्टस्य बोधनमनुचितमिति भावः । तदपि नैकान्ते तथा सति लज्जा न भवेदतः सुहृदां मध्ये तस्मिन् विषमेऽप्यन्येषामविषमत्वात् न वचनं किञ्चिदभीष्टं तत्रापि बन्धुभिरुदितं वसुदेवादिभिः तत्रापि सौहृदादेवोदितं न तु विषमबुद्ध्या ॥ १६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

कृष्णाय भक्तैरुपास्यायेत्यर्थः । शुद्धाय दृश्यत्वेऽपि मायातीताय ब्रह्मणे ज्ञानिभिरुपास्याय परात्मने योगिभिरुपास्याय योगानां तत्तत्प्राप्त्युपायानां भक्त्यादीनामीश्वराय प्रदानसमर्थाय योगाय तत्तद्रूपाय स्वरूपाय च ॥ १३ ॥

प्रपितामही कुन्ती ॥ १४ ॥

तस्याः पुत्राणामुत्पत्तिहेतुभिर्जनकैर्धर्मानिलादिभिः एते धर्मांशाः केन नाशयितुं शक्या इत्यादि तत्प्रभावकथनैरित्यर्थः ॥ १५ ॥

सुहृदां भीष्मादीनां मध्ये स्थितं बन्धुभिर्विदुरादिभिः सहितं सौहृदोदितं सौहृदव्यञ्जकं वाक्यम् ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

शुद्धाय स्वभावतोऽपास्तसमस्तदोषाय ब्रह्मणे बृहत्स्वरूपगुणशक्तिराशये परमात्मने सर्वोपास्याय योगेश्वराय स्वप्राप्तिसाधनभूताय युज्यते इति योगस्तस्मै प्राप्यायेत्यर्थः ॥ १३ ॥

हे राजन् ! परीक्षित् भवतां प्रपितामहस्य पाण्डोर्भार्या ॥ १४॥

तस्याः पुत्राणामुत्पत्तिहेतुभिर्जनकैर्धर्मानिलेन्द्रनासत्यदस्रैस्तत्कथनैरित्यर्थः ॥ १५ ॥

राजानं धृतराष्ट्रं बन्धुभिः रामकृष्णादिभिः यत्सौहृदेनोदितं तदवदत् ॥ १६—१८ ॥

अक्रूर उवाच ।

भो भो वैचित्रवीर्य ! त्वं कुरूणां कीर्तिवर्द्धन ! ।
भ्रातर्युपरते पाण्डावधुनासनमास्थितः ॥ १७ ॥
धर्मेण पालयन्नुर्वीं प्रजाः शीलेन रञ्जयन् ।
वर्तमानः समः स्वेषु श्रेयःकीर्तिमवाप्स्यसि ॥ १८ ॥
अन्यथा त्वाचरँल्लोके गर्हितो यास्यसे तमः ।
तस्मात्समत्वे वर्तस्व पाण्डवेष्वात्मजेषु च ॥ १९ ॥
नेह चात्यन्तसम्वासः कर्हिचित्केनचित्सह ।
राजन् ! स्वेनापि देहेन किमु जायात्मजादिभिः ॥ २० ॥

भाषा टीका ।

आप श्रीकृष्ण शुद्ध स्वरूप ब्रह्म परमात्मा योगेश्वर हो आपके अर्थ नमस्कार है मैं आपके शरण प्राप्त हूं ॥ १३ ॥

श्रीशुकदेवजी बोले इस प्रकार से जगदीश्वर कृष्णका स्मरण करके हे राजन् ! तुमारी प्रपितामही दुःखित होकर बडे जोरसे रोने लगी ॥ १४ ॥

वडे यश वाले अक्रूर तथा विदुरजी दोनों समान दुःख सुखवाले होगये तौभी कुंतीजीको उसकी पुत्रों के उत्पत्ति की महिमा कर कर समझाते भये ॥ १५ ॥

जब विदुरजी जाने को तैयार भये तब अपने पुत्रों पर लालसा करने वाले विषम मति धृतराष्ट्र राजा से सुहृदों के मध्य में अपने बन्धुओं का जो कथन तिसको कथन करते भये ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका॥

भ्रातर्युपरत इति । पाण्डोः पुत्रेषु सत्सु राजासनं त्वमास्थित इति कटाक्षः ॥ १७ ॥

भवतु तथाप्येवं वर्त्तमानः श्रेयोऽवाप्स्यसीत्याह । धर्मेणेति ॥ १८ ॥

तमो नरकमिहैव महद्दुःखमिति भावः ॥ १९ ॥

नन्वात्मजानात्मजादिषु कथं समत्वं स्यात्तत्राह । नेह चेति । अत्यन्तं नित्यं संवासः सम्यक् स्थितिः ॥ २० ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

प्राक् सोल्लुण्ठं सामप्रायमाह । भो भो इति । वीप्साऽत्यन्ताभिमुख्यार्थम् । वाच्यार्थाप्रियत्वेन तस्य वैमुख्यसम्भवात् ॥ १७ ॥

शीलेन सद्वृत्तेन स्वेषु स्वपुत्रपाण्डवादिषु श्रेयः कुशलं कीर्त्तिश्च ॥ १८ ॥

अथ सस्मितं सपरिहासमिवाह । अन्यथेति । तमः महादुःखम् अत्र पुत्रवियोगादिजम् अमुत्र च नरकादिकमित्यर्थः ॥ १९ ॥

इह लोके चकारादमुष्मिंश्च लोके कर्हिचित्कदापि कस्यचिदिति पाठः क्वचित् हे राजन्निति राजत्वेऽपि तदपरिहार्यमिति भावः । स्वेन आत्मतया प्रतीतेनापि अतः पुत्रादिव्यवहारस्यानित्यत्वात्तत्रासक्तिं विहाय धर्मरक्षार्थं स्वेषु समतावर्त्तनमेव युक्तमिति भावः ॥ २० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

उक्तिमेवाह । भो भो इति नवभिः । हे वैचित्रवीर्य ! हे कुरूणां कीर्त्तिवर्द्धन एवंविधस्य तवेयं विषमा बुद्धिरनुचितेति सम्बोधनद्वयाभिप्रायः भ्रातरि पाण्डावुपरते सत्यधुना त्वं नृपासनमधिष्ठितवान् इतोऽप्यनुचितं नेति भावः ॥ १७ ॥

तदाह । धर्मेणेति । शीलेनावैषम्यादिस्वभावेन रञ्जयन् स्वस्मिन् तासामनुरागं जनयन्स्वेषु समो वर्त्तमानः अविषमः सन् श्रेयः कीर्त्तिं च प्राप्स्यसि ॥ १८ ॥

अन्यथा वैषम्यमाचरन् जनैर्निन्दितस्तततमो नरकं यास्यसि प्राप्स्यसि तस्मात्पाण्डवेषु युधिष्ठिरादिष्वात्मजेषु च विषये समत्वेन वर्त्तस्व ॥ १९ ॥

नन्वनपायिष्वात्मजेषु यावद्रक्षार्थमनुवर्त्तमानेषु भ्रातृपुत्रेषु च कथं साम्यं स्यादित्यत्राह । नेहेति । इह लोके कस्यचित्केनचित्साकमत्यन्तं सम्वासः नित्यं सम्यक् स्थितिर्नास्ति संयोगवियोगयोः कर्ममूलत्वेन यावत्कर्मैव तावदित्यर्थः । तदेव कैमुत्यनयेनाह । हे राजन् ! धृतराष्ट्र स्वेन स्वकीयेन देहेन सहापि नात्यन्तसम्वासः भार्यापुत्रादिषु सहात्यन्तसम्वासो नास्तीति किमु वक्तव्यमित्यर्थः ॥ २० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

तमोऽधं दुःखमित्यर्थः । पुत्रनाशेनेति शेषः । तमो राहुस्तमोऽन्धं चेति च दुःखेनोव्यसनंध्वधमिति च ॥ १९ ॥

सर्वस्यानित्यत्वात्कस्मिंश्चिदपि विशेषस्नेहो न कार्यः योग्यतामन्तरेणेति भावेनाह । नेहेति । इह लोके कस्य चित्केन

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

चित्सहात्यन्तसंवासो नास्त्येव जायात्मजादिभिः सह संवास-निदर्शनात्किंविशिष्य निषिध्यत इत्यत्र कैमुत्यमाह । स्वेनापीति ॥ २० ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

वचनान्याह नवभिः । भो भो इति । सर्वैर्भावैः सर्वविधात्युक्तानि वचनानीति आदौ रजःसत्त्वतमोभावेन लौकिकेन प्रबोधनं त्रिभिः अन्धत्वान्न पश्यतीति वाक्यद्वयं कस्बोधनं राष्ट्रं न बिभर्तीति न धृतराष्ट्रता प्रज्ञाचक्षुरिति चेदुच्यते तर्हि मर्मभेदो भवेत् तथा व्यासात्मज इत्यपि स्त्रीपुत्रादिसम्बन्धो हीनत्वप्रतिपादकः राजत्वं तु नास्तीति मन्यमानः कृत्रिमपितृनाम्ना सम्बोधयति वैचित्र्यवीर्येति । विचित्रवीर्यस्य क्षेत्रजः पुत्र इत्यर्थः त्वमित्येकवचनेन स्वजन्मानुसन्धीयतामिति द्योतितं किं च कुरूणां वंशे त्वमुत्पन्नः तत्कीर्तिवर्द्धनमुचितं वर्द्धनशब्देन छेदनमप्युच्यत इति कीर्तिच्छेदकस्त्वमित्यर्थादुक्तं भवति राजाधिकारार्थे पुत्र उत्पादनीय इति विचार्य प्रथममुत्पादितः ततश्चान्ध इति त्वं परित्यक्तः ततः पाण्डुरुत्पादितः तस्मिन्नुपरते आगत्याधुना आसनमास्थितः सिंहासने उपविष्टः अनेनायुक्तमेव करोषीति द्योतितम् ॥ १७ ॥

अङ्गीकृत्यापि सात्त्विकेन बोधनमाह । धर्मेणेति । धर्मेण पृथिवीपालनं कर्तव्यं तदा दृष्टादृष्टोपायेन पालिता भवति भगवता हि नामरूपप्रपञ्चौ निर्मितौ अतोऽन्यपरिपालनाय तदेकेन सहितं व्यक्तं भवति अतो धर्मेणैव सह पालनं कर्तव्यं केवलकरणत्वे योगिनामिवास्यापि पालनं भवेत् अनेन परलोकसुखमिह लोके तु राज्यादैहिकं सुखं कीर्तिजन्यं तु ततोऽप्यधिकमिति तत्साधनं बोधयति । प्रजाः शीलेन रञ्जयन्निति । शीलं सुस्वभावस्तेनैव प्रजा अनुरक्ता भवन्ति अन्यथा तु युक्तं दयं प्रयच्छन्ति बहिः कीर्तिसाधनमेतत् अतः कीर्तिसाधनमाह । वर्त्तमानः समः स्वेष्विति । सर्वेष्वेव बन्धुषु समो भवन् ततोऽन्यन्ताकीर्त्तिर्जनैश्च तदा राजा श्रेयः कीर्त्तिं च प्राप्स्यसि ॥ १८ ॥

अनङ्गीकारे तामसवचनमाह । अन्यथेति । उक्तप्रकारादन्यथा प्रकारेण भूपालनं प्रजाननुरागं विषमत्वं च कुर्वन् कीर्तिप्रतिनिधिं च प्राप्यमीत्याह । गर्हितो निन्दितः तमोऽन्धं तमः महद्दुःखं प्राप्स्यसीति अतो बाधवशादपि समो भवेत्याह । तस्मादिति । समत्वे समत्वार्थं वर्त्तस्व यथैव त्वं समो भवसि तथोपायं कुर्वित्यर्थः । वैषम्यस्थानमुद्घाटयति । पाण्डवेष्वात्मजेष्विति चकारात्तत्सम्बन्धिषु च ॥ १९ ॥

एवं लोकन्यायेन बोधक इति शास्त्रन्यायेनाह । समाभ्यां त्रिभिस्त्रिभिरुत्तरं बोधयति । नेह चेति । स्वार्थं हि सर्वेण कर्तव्यं तद्यथा स्वार्थः सिद्ध्यति तत्र कालो बाधक इति हि तमहितं बहिरङ्गस्थापनार्थं यत्नो न कर्त्तव्य इत्याह । इहास्मिँल्लोके अत्यन्तं सर्वदा केनापि सह संवासः कस्य चिदपि न अलौकिकबोधनं उग्रत्वेच बोधो न भवतीति कोमलवचनेन सम्बोधनं स्वे इ पदार्थं ममताद्पदेन नास्त्येव संवास इहापि

व्यभिचारदर्शनात्स्वदेहेन तु न व्यभिचारं पश्यतीति तत्राप्युपदिशति । स्वेनापि देहेनेति । पुत्रादीनामपि देहः स्वस्यैवेत्यपि शब्दं निरूप्य तान्निर्दिशति । किमु जायात्मजादिभिरिति । आदिशब्देन भ्रातृपित्रादयः ॥ २० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

भातर्य्युपरते इति । पाण्डोः पुत्रेषु सत्स्वपि त्वं राजासनमाश्रित इति कटाक्षः ॥ १७ ॥

भवतु तदाप्येवं वर्तस्वेत्याह । धर्मेणेति ॥ १८ ॥

तमो नरकम् ॥ १९ ॥

न च ते प्रिया अपि पुत्रा दुर्योधनादयश्चिरस्थायिन इत्याह । नेहेति ॥ २० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

तमः नरकम् ॥ १९ ॥

अत्यन्तं नित्यं संवासः सम्यक् स्थितिः ॥ २० ॥

भाषा टीका ।

अक्रूरजी बोले हे विचित्रवीर्य के पुत्र धृतराष्ट्रजी आप कुरुवंश की कीर्ति के बढाने वाले हो आपके भ्राता पांडु के चले जाने से इस वखत आप राज्यासन पर बैठे हो ॥ १७ ॥

सो धर्म से पृथिवी के पालन करने से शील स्वभाव द्वारा प्रजा के रंजन करने से अपने पुत्रादिकों में सम बुद्धि से रहने से आप यश और कीर्ति को प्राप्त होओगे ॥ १८ ॥

यदि अन्यथा आचरण करोगे तो लोक में गर्हित हो कर नरक या दुःख को प्राप्त होओगे तिस से पांडवों में तथा अपने पुत्रों में सम बुद्धि से वर्ताव करो ॥ १९ ॥

हे राजन् ! इस संसार में कभी भी किसी के साथ सदा संग नहीं रहता है अपने देह के साथ में भी नहीं रहता है तो स्त्री पुत्रादिकों का तो संग कैसे रहेगा ॥ २० ॥

एकः प्रसूयते जन्तुरेक एव प्रलीयते ।
एकोऽनुभुङ्क्ते सुकृतमेक एव च दुष्कृतम् ॥ २१ ॥
अधर्मोपचितं वित्तं हरन्त्यन्येऽल्पमेधसः ।
सम्भोजनीयापदेशैर्जलानीव जलौकसः ॥ २२ ॥
पुष्णाति यानधर्मेण स्वबुद्ध्या तमपण्डितम् ।
तेऽकृतार्थं प्रहिण्वन्ति प्राणा रायः सुतादयः ॥ २३ ॥
स्वयं किल्बिषमादाय तैस्त्यक्तो नार्थकोविदः ।
असिद्धार्थो विशत्यन्धं स्वधर्मविमुखस्तमः ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तत्र तावदुत्पत्तिमरणयोः सुखदुःखयोश्च केनापि साहित्यं नास्तीत्याह । एक इति ॥ २१ ॥

किञ्च यदा च सह संवसन्ति तदाऽपि क्लेशोपार्जितवित्तापहारितया पुत्रा नाम शत्रव एव ज्ञेया इत्याह । अधर्मेति । सम्भोजनीयाः पोष्याः पुत्रादय इति व्यपदेशैरल्पमेधसो मूढस्य वित्तं हरन्ति जलौकसो मत्स्यस्य जीवनभूतानि जलानि यथा तत्पुत्रा हरन्ति तद्वदिति ॥ २२ ॥

किञ्च यानेवं पुष्णाति ते धनमादाय मृता जीवन्तोऽपि वा तं परित्यजन्तीत्याह । पुष्णातीति । स्वबुद्ध्या स्वीया इत्यभिमानेन रायोऽर्थाः अकृतार्थमप्राप्तभोगम् ॥ २३ ॥

स पुनः पापैकपाथेयो नरकं विशतीत्याह । स्वयमिति । असिद्धार्थोऽपूर्णमनोरथः ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

प्रसूयते प्रसूतो भवतीति प्रमीयते मृत्युना हिंस्यते प्रम्रियत इत्यर्थः प्रलीयत इति पाठेऽपि स एवार्थः । युग्मद्वयेऽप्युत्तरत्रैव एवकारः सम्पदि न करोतु नाम कोऽपि बन्धुः साहाय्यं विपदि तु सर्वथा कुर्यात् तत्र च न करोतीत्यभिप्रायेण चशब्द उक्तसमुच्चयार्थः उभयत्र युग्मेऽपि योज्यः अनु तत्तत्पुत्रादिसहभावात् पश्चादेव मरणं जन्मान्तरञ्च लब्ध्वा पूर्वं पूर्वं कर्म भुङ्क्ते ॥ २१ ॥

अधर्मेण स्वधर्मातिक्रमेण निषिद्धाचरणेन च उपचितं स्वयं यत्नतः समुपार्जितमपि अन्ये पुत्रादयः अल्पमेधसो जनस्येति तत्तद्विचाराभावात् । जलान्यत्र क्षयिष्णूनि ज्ञेयानि बहुसङ्घट्टेन तेषां क्षयदौर्गन्ध्यापातात् महामत्स्यस्य पूर्वमेव मरणापत्तेः ॥ २२ ॥

तत्र पोषणं तस्यैव वर्द्धनं नतु तेन प्राणादिपोषणमिति लक्षणम् प्रहिण्वन्ति त्यजन्ति ॥ २३ ॥

अन्धं तमः महानरकं नार्थकोविदः धर्मार्थयोरनभिज्ञः न लोपाभाव आर्षः ॥ २४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एतदेव निदर्शयति । जन्तुः शरीरी एक एव प्रसूयते न त्वात्मजायादिभिः सहेति भावः । तथा एक एव प्रलीयते न हि म्रियमाणेन सह जायादयो म्रियन्त इति भावः । सुकृतदुष्कृतशब्दौ तत्फलभूतस्वर्गादिकसुखदुःखपरौ तद्भोगेऽपि न केनचित्साहित्यमिति भावः ॥ २१ ॥

किञ्च यदा च सह सम्वसन्ति तदा क्लेशोपार्जितवित्तापहारितया पुत्रा नाम शत्रव एव ज्ञेया इत्याह । अधर्मोपचितमिति । सम्भोजनीयाः पोष्याः पुत्रादय इति व्यपदेशैरल्पमेधसः मूढस्याधर्मेणोपार्जितं वित्तं हरन्ति यथा जलौकसो मत्स्यस्य जीवनभूतानि जलानि तत्पुत्रा हरन्ति तद्वत् ॥ २२ ॥

किञ्च पुष्णातीति स्वबुद्ध्या आत्मात्मीयबुद्ध्या यो यान् पुष्णाति ते प्राणा रायो धनानि सुतादयः इत्यादिशब्दग्राह्या भार्यादयः प्राणशब्दः शरीरोपलक्षकः तं पुष्णन्तमकृतार्थमप्राप्तभोगं कामानभुक्त्वैव मृतं प्रहिण्वन्ति त्यजन्ति ॥ २३ ॥

स्वयं त्वनर्थकोविदः स्वानर्थेष्वेव कुशलो न तु स्वहित इति भावः । प्राणादिभिस्त्यक्तः किल्बिषं तत्पोषणार्थं कृतं पापमादाय असिद्धार्थः अपरिपूर्णमनोरथः स्वधर्मविमुखः स्ववर्णाश्रमोचितधर्मरहितः हेतुगर्भमिदं तस्मादन्धंतमोऽन्धतामिस्राख्यं नरकं प्रविशति ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

इतोऽपि वैषम्यबुद्धिर्न कार्येत्याह । एक इति ॥ २१ ॥

अन्ये अल्पचेतसः दुर्बुद्धेरधर्मेण उपचितमर्जितं हरन्ति सम्भोजनीयापदेशैः सम्भोजनीयाः सह भोजनयोग्याः बन्धवः अपदेशैः कपटवचनैः ममैतेऽपेक्षणीया इति मिथ्याहेतुभिरित्यर्थः । जलानि हरन्तो जलसम्बन्धितया जलौकसः प्राणिनो यथा हरन्ति यद्वा जलौकसो यादोगणस्य विद्यमानानि जलानि यथान्ये हरन्ति ॥ २२ ॥

यः स्वबुद्ध्या ममत्वभ्रान्तबुद्ध्या अधर्मेणान्यायेन यान्पुष्णाति स्वत्वेनाभिमतास्ते प्राणादयस्त्वन्ते मरणसमये तमपण्डितम् अर्थं हिन्वन्ति त्यजन्ति "अग्निं वागप्येति वातं प्राण" इतिश्रुतेः कीदृशाः अकृतार्था अपूर्णस्वप्रयोजनाः यथा यो योऽधर्मेण यान् स्वीयबुद्ध्या

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

पुष्णाति ते प्राणादयः तमपण्डितं हिन्वन्तीति तच्च मरणं विदुरिति ॥ २३ ॥

पुनः स्वयं किङ्करोतीति तत्राह । स्वयमिति । नार्थकोविदः स्वप्रयोजनकुशलो न भवति ॥ २४ ॥

———

श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी ।

तत्र देहात्मनां भेदज्ञाने सत्येतद्भवतीति देहादात्मानं भिन्नतया निरूपयति । एकः प्रसूयत इति । आत्मनः पितृपुत्राभ्यामनुमेयौ भवाप्ययाविति न्यायेनानुभवपर्यन्तं निरूपयति । प्रसूयते मात्रा प्रलीयते भूमौ कालेन एवमाद्यन्तयोरेकत्वमुक्त्वा उपलक्षणन्यायेन सर्वस्यैव क्रियामयस्यैककर्तृत्वं निरूप्य ज्ञानपर्यवसायीति कर्मणा भोगोऽप्यैकस्यैवेत्याह । एकोऽनुभुङ्क्ते सुकृतमिति । सुकृतं पुण्यं कर्म तस्य फलं स्वर्गादि कार्यकारणयोर्भेदात्तथोच्यते कारणानन्तरमेव भोग इत्यनुशब्दार्थः सुखभोगे बहूनामपि समवायोऽस्तीति हास्यक्रीडादौ तथा दर्शनात् दुष्कृते एक एवेत्याह । चकारान्मिथः सङ्गेन कृतपापे मिथ एव भोग इति पक्षमङ्गीकरोति दुष्कृतं पापं सुकृतवद्व्याख्येयम् ॥ २८ ॥

सुखार्थं सुखसाधनार्थं वा पापं न कर्त्तव्यमित्याह । अधर्मोपचितमिति । अधर्मेण उपचितं पुष्टम् अर्थस्योत्पत्तिर्धर्मेणैव उपचयस्त्वधर्मेणापि भवति तथा सति प्रवृद्धो दोषः अन्य एव अधार्मिष्ठाः अधर्मप्रेरिता वा दैत्याः हरन्ति प्रतिरोधे सामर्थ्याभावमाह । सम्भोजनीयापदेशैरिति । सम्भोजनीयाः सम्बन्धिनः ज्ञातिलुब्धोऽपि सम्बन्धरक्षार्थं तान् भोजयति । अनपेक्षितं बहु वान्नयन्तीत्याशङ्क्य तस्मिन् हृते जीवनमेव यातीत्यत्र दृष्टान्तमाह । जलानीव जलौकस इति । जलौकसो मत्स्यादेः प्राणभूतमपि जलं कुल्याभिर्हरन्ति ज्ञानं चेत् भवेत् तद्द्वारा अन्यत्र गच्छेदज्ञानमात्रे जीवनरूपोऽयमर्थ इति ज्ञापयितुं दृष्टान्तः ॥ २२ ॥

पश्चादुपकरिष्यन्तीत्याशङ्क्याह । पुष्णातीति । अन्यमप्युपक्रम्य पर्यवसानेन पुत्रपरं निरूपयति । स्वबुद्ध्या स्वीया इति बुद्धिमात्रं वस्तुतः शत्रव एव अन्यथा उपकारमेव कुर्युः तेन बलात्कारेण तथा कुर्वन्तीति ज्ञापयितुमपाण्डितमित्युक्तं ननु लौकिकं वैदिकं नित्यं कर्म कर्तव्यमिति तदर्थं ते भोजिता इति चेत्तत्राह । अकृतार्थमिति । संभोजनं नाम पिशाचिभिक्षेति वाक्यात्तु तेषां दानं परलोकाय इह लोके भवत्युपकारः यदि ते उपकारं मन्येरन् तदपि नास्तीत्यकृतार्थतैव किं च अवसरे प्राप्ते प्रकर्षेण हिन्वन्ति संकटस्थाने सर्वार्थास्तं त्यजन्तीत्यर्थः तान् बाह्याभ्यन्तरांस्तुल्यतया निर्दिशति । प्राणा रायः सुतादय इति । आन्तराः बाह्याः मध्ये उभयोपयोगिनश्च आदिशब्देन सर्व एव बाह्या गृहीताः प्राणा इन्द्रियाणि आसन्यव्यतिरिक्ताः प्राणा आसन्यो हि सर्वान् पोषयति नतु तं कश्चन ननु अनुप्राणन्ति यं प्राणाः अण्डेषु पेशिष्वित्यादिवाक्यैः प्राणानामिन्द्रियाणां चामुक्तेर्वियोगो न श्रूयते मुक्तौ तु कृतार्थवचनं बाधितमिति चेत् सत्यं चर्षणीनां जीवानां सहगमनं न स्थितजानाम् अन्यथा पुरञ्जनोपाख्याने प्राणादिसहिते देहे जीवप्रवेशवचनं बाधितं स्यात् यथा प्रवेशस्तथा निर्गम इति प्रथमप्रवेशोऽयमिति चेत् नैनं वीरसूरपि नेष्यतीति वाक्यादस्तु वा तथा सति प्राणभूता राय इति व्याख्येयम् अर्थाद्बहिश्चराः प्राणा इत्यनेन सिद्धान्तद्वयं निरूपितम् उत्क्रमणे सहैव गमनमत्रैव परित्याग इति च यत् श्रुतौ द्वयमप्युक्तं तमुत्क्रामन्तं प्राणोऽनूत्क्रामति प्राणा उत्क्रामन्त्युताहोनेति प्रश्ने नेत्याह याज्ञवल्क्यः इहैव समवलीयन्ते प्राणा इति यतो मृतो ध्मातः शेत इति ब्रह्मैव सन् ब्रह्माप्येतीति तु आक्षेपान्तरम् अतः क्रममुक्तचैव ऊर्ध्वगमने च सद्यः सर्वोऽपि गच्छति जायस्व म्रियस्वेति पक्षशब्दो मुक्तौ च न गच्छतीति सिद्धान्त इति सर्वमविरुद्धम् अयुक्तत्वात् गच्छतीति युक्त एवास्य परित्यागः यथा यो वधार्थं नीयते स केवलो नीयते यो विवाहार्थं नीयते स ससामग्रीक इति ॥ २३ ॥

तदाह । स्वयं किल्विषमादायेति । तदुपार्जनपोषणाभ्यामुपार्जितं पापं गृहीत्वा तैः प्राणादिभिस्त्यक्तः अन्धं तमो विशति ऊर्ध्वगतौ तु न त्यजन्तीति ज्ञापयितुं नार्थकोविद इत्युक्तम् अन्यथा योगशास्त्रं व्यर्थं स्यात् "पूर्वाभ्यासेन तेनैव ह्रियते ह्यवशोऽपि स" इत्यादिवाक्यात् अतस्तादृशेन्द्रियाणां हिताचरणं युक्तं यदुक्तं नोचेत्प्रमत्तमसदिन्द्रियवाजिसूता इति तद्विषयैः संसारमात्रे प्रवेशनमुक्तं नतु हीनगतिः अत इन्द्रियाणां स्वभावभेदस्य दृष्टत्वात् निकृष्टैः कर्मभिर्नित्यं जन्तुः स्थावरतां यातीत्यादिवाक्यादपुनरावृत्त्यधोगमनमार्गे परित्याग एव मुक्तिवदावृत्त्यर्थमसिद्धार्थं इति भगवदिच्छया सद्यो मुक्तौ निरुद्धगोपिकावत्सहगमनं नास्तीत्यर्थकोविदत्वाभावेऽपि परित्यागोऽपि वर्तते इति व्यावर्तकं पदद्वयमपि मृग्यम् अन्धंतमो हि अपुनरावृत्तितमः प्रविशतीति श्रुतिरपि केवलेन्द्रियपोषका एव सम्भूतिमुपासत इति श्रुतिराह अविद्यामुपास इति च ज्ञानरहितं प्रमाणं बहिर्भूतं यत्कर्म लौकिकं निषिद्धं च तेन तम एव ज्ञानसहिते तु कर्म वैदिकं य एवास्मि स सत्यार्थमित्यादि श्रुतेः तस्य मोक्षफलत्वमेतज्ज्ञापयितुमाह । स्वधर्मविमुख इति । तस्मात् स्वधर्मानुसारेण भोगः कर्तव्यः धर्मो ज्ञानसहित इति धर्मसहितश्च भोग इति बुद्धिमांस्तादृश एव कुर्यादिति ॥ २४ ॥

———

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी

तत्र तावदुत्पत्तिमरणयोः सुखदुःखयोश्च न केनापि साहित्यमित्याह । एक इति ॥ २१ ॥

किञ्च यदा च सह वसन्ति तदापि क्लेशोपार्जितवित्तापहारितया पुत्रा नाम शत्रव एव ज्ञेया इत्याह । अधर्मेति । सम्भोजनीयाः पोष्याः वयं पुत्रादय इति व्यपदेशैरल्पधियो मूढस्य वित्तं हरन्ति जलौकसो मत्स्यस्य जीवनभूतानि जलानि यथा तत्पुत्रा हरन्ति तद्वत् ॥ २२ ॥

किञ्च स्वबुद्ध्या स्वीया इत्यभिमानेन यान् यः पुष्णाति ते प्राणादयस्तं मूर्खमकृतार्थमेव प्राहिण्वन्ति त्यजन्ति रायः अर्थाः ॥ २३ ॥ २४ ॥

———

तस्माल्लोकमिमं राजन् ! स्वप्नमायामनोरथम्।
वीक्ष्यायम्यात्मनात्मानं समः शान्तो भव प्रभो ! ॥ २५ ॥

धृतराष्ट्र उवाच ।

यथा वदति कल्याणीं वाचं दानपते ! भवान् ।
तथाऽनया न तृप्यामि मर्त्यः प्राप्य यथाऽमृतम् ॥ २६ ॥
तथाऽपि सूनृता सौम्य ! हृदि न स्थीयते चले ।
पुत्रानुरागविषमे विद्युत्सौदामनी यथा ॥ २७ ॥
ईश्वरस्य विधिं कोऽनु विधुनोत्यन्यथा पुमान् ।
भूमेर्भारावताराय योऽवतीर्णो यदोः कुले ॥ २८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

अधर्मोपचितं मृतस्य नरककारणं जीवतस्तु पोष्याः अपत्यादय इति व्यपदेशैः अन्ये हरन्ति अल्पमेधसः क्षुद्रबुद्धेः जलौकसो मीनस्य जीवनार्थानि जलानि तदपत्यादयो हरन्ति यथा तद्वत् ॥ २१ ॥ २२ ॥

अकृतार्थमलब्धफलम् प्राणशब्देन तद्धार्यो देहः रायः अर्थाः ॥२३॥ असिद्धार्थोऽनिष्पन्नप्रयोजनः ॥ २४ ॥

भाषा टीका।

सब जीव एक ही पैदा होता है एकही लय होता है एक ही सुकृत भोगता है एकही पाप भोगता है ॥ २१ ॥

अधर्म से बढे हुये दुर्बुद्धि के धनको दूसरे लोग हर लेते हैं सो अपने पालने योग्य है इस बुद्धि से दिया जाता है जैसे बडे मत्स्य के लज को छोटे मत्स्य भोगते है ॥ २२ ॥

अपने हैं इस बुद्धि से अधर्म के धनको देके उनको जो पुरुष पालता है उस मूर्ख को नहीं कृतार्थ होतेही वे प्राण-धन पुत्रादिक जल्दी ही छोड देते हैं ॥ २३ ॥

इस अनर्थ को नहीं जानने वाला वह पुरुष उनके छोड देने से आप ही सब पाप को लेकर मनोरथ पूर्ति न होकर स्वार्थ से विमुख होने से अंधं तम नरक को प्राप्त होता है ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

स्वप्नश्च माया च मनोरथश्च तत्तेन तुल्यम् आयम्य नियम्य शान्तः सन् समो भवेति ॥ २५ ॥

हे दानपते ! अक्रूर न तृप्याम्यलमिमिति न मन्ये ॥ २६ ॥

सूनृता प्रिया वाक् चलेऽस्थिरे हृदि न स्थीयते न तिष्ठतीत्यर्थः । सुदामा पर्वतस्तत्र भवा विद्युदिव तस्मिन् स्फटिकशिलामये सह सैवातिस्फुरिता विद्युद्यथा लीयते तद्वदित्यर्थः । यद्वा सुदामा माला तस्या इयं सौदामनी मालाकारेत्यर्थः ॥ २७ ॥

नन्वेवं जानतोऽपि कथमयं मोह इति चेदत आह । ईश्वरस्येति । विधिं विधानं मायामिति यावत् ॥ २८ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी।

वीक्ष्य दृढं ज्ञात्वा आत्मना बुद्ध्या आत्मानं मनः शान्तः लोभाद्युपरतः सन् समः स्वपुत्रेषु तुल्यभावो भव यद्वा समः सन् शान्तः सुखी भव अन्यथा दुःखमेवेति भावः । यद्वा भगवन्निष्ठबुद्धिर्भवेत्यर्थः । परेष्विव पाण्डवेषु स्नेहेनैव तादृशत्वसिद्धेः इत्ययमुपदेशसारः । तत्र च तव शक्तिरस्त्येवेति सम्बोधयति । प्रभो इति । इयं स्वोक्तग्रहणार्थं चातुरी तदेव राजत्वसिद्धिः अयमेव राज्ञो मुख्यधर्मश्चेत्यभिप्रायेणाह । हे राजन्निति ॥ २५ ॥

कदापि समो न भवितास्मीत्यन्तर्मनसि द्रढयित्वा शाठ्येन तद्दोषपरिहारार्थं प्रभो इत्यस्य प्रत्युत्तरतया निजस्वातन्त्र्यं निषेद्धुं तत्र श्रीकृष्णस्यैव च दोषं वक्तुं प्राक् तत्सन्तोषार्थं तदुक्तमभिनन्दति । यथेति । यथा यदभिप्रायेण तथा तदभिप्रायेणैव न त्वभिप्रायान्तरं बुद्ध्वेत्यर्थः । दानपत इति सदुपदेशदानाभिप्रायेण ॥ २६ ॥

न स्थीयते स्थिरा न भवति इत्यर्थः । कुतः चले चञ्चले यतः पुत्रेति सुदामा मेघः सुदामा भूधरे मेघे इति विश्वः तत्रत्या सौदामनी यथा मेघे सा स्थिरा न स्यादित्यर्थः । सौम्य हे शान्तप्रकृते निजसौशील्येन त्वया मयि क्रोधो न कार्य इति भावोऽपि सकपट एव ॥ २७ ॥

विधिं विधानेच्छां सा च मायाख्येति मत्वा तैस्तथा व्याख्यातं विधुनोति अतिक्रमितुं शक्नुयादित्यर्थः । अन्यथा मिथ्यान्यप्रकारिकां वा कुर्वेत्यर्थः । स च सम्प्रति विधानविशेषेच्छयात्रैव भूमाववतीर्ण इति सोत्प्रासं तन्मतमनुवदन्नाह । भूमेरिति । ततो भवद्भिरेव तत्र प्रयतितव्यमिति भावः ॥ २८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

उपदेशमुपसंहरति । तस्मादिति । हे राजन् ! तस्मात् त्वदुक्तरीत्या विधत्वादिमं देहतदनुबन्ध्यादिकं देहादिसर्वलोकम् अनित्यं स्वप्नं

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

मायामनोरथं चेति प्रत्येकं वेति वीक्ष्येत्यत्रान्वयः मनोरथमाश्चर्यं मनोरथं तमिवानित्यं वीक्ष्य ज्ञात्वा आत्मना बुद्ध्या आत्मानमायम्य नियम्य हे प्रभो समः सर्वत्र समबुद्धिः सन् शान्तः रागद्वेषादिनिर्मुक्तो भव हे प्रभो इति ज्ञानसामर्थ्यं सूच्यते ॥ २५ ॥

इत्थं प्रतिबोधितः प्राह धृतराष्ट्रः । यथेति चतुर्भिः । हे दानपते ज्ञानाधिप अत्युदार मूढमप्येवं ज्ञानेन सञ्जीवयिषोस्तवौदार्यमनितरसाधारणमिति सम्बोधनाभिप्रायः यदा भवान् कल्याणीं कल्याणावहां वाचं वदति तदानया वाचा न तृप्यामि इत्यभिप्रायेण यदातदाशब्दयोः प्रयोगः यथा मर्त्यो मरणशीलोऽमृतं प्राप्याशित्वा न तृप्यति तद्वन्निरतिशयहिता त्वद्वागिति भावः ॥२६॥

तथापीति । हे सौम्य यद्यपि भवतो वाक् सूनृता मधुरा हिता च तथापि तद्वचः हृदि न स्थीयते प्रतिष्ठितं न भवति तत्र हेतुं वदन् हृद्विशिनष्टि । पुत्रानुरागेण विषमे यथा सौदामिनी विद्युत् चञ्चल् सुदामा पर्वतः तेनैकदिक् तत्र भवा सौदामिनी सुदाम्नि हि स्फटिकाशिलामये स्फुरिता तडित्तथैव लीयते तद्वदित्यर्थः । यद्वा सुदामा माला तन्मयी सौदामिनीति ॥ २७ ॥

नन्वेवं जानतोऽपि कथमयं मोह इत्यतआह। ईश्वरस्येति। को वा पुमान् नेश्वरस्य विधिं चिकीर्षितमन्यथा विधुनोति अन्यथा करोति कोऽसावीश्वर इत्यत आह । भूमेरिति । यो यदोः कुले भूमेर्भारस्य मत्पुत्रतदनुबन्धिरूपस्यावतारायावतीर्णः मत्पुत्रसञ्जिहीर्षात्मकभगवच्चिकीर्षानुगुणमेव तन्मायोन्मोहितमन्मनीषा प्रवर्त्तते इति भावः ॥ २८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

किमन्येन बहूपन्यासेन प्रकृते किमागतमिति तत्राह । तस्मादिति । लोकं शरीरं स्वप्नेति लुप्तोपमा स्वप्नवत् मायावत् इन्द्रजालवत् मनोराज्यविजृम्भितवदन्यत्र स्वनिमित्तं स्वप्नस्य स्वाधीनत्वप्रतीतेस्तदर्थं मायामनोरथमित्युक्तम् आत्मना मनसा आत्मानं परमात्मानं भजन् शान्तो भगवदेकनिष्ठः स्वपरबुद्धिं विहायात्मजेषु पाण्डुपुत्रेषु च समो भवेत्यन्वयः ॥ २५ ॥

अनया वाचा न तृप्यामि अलम्बुद्धिं न प्राप्नोमि अमृतं देवान्नम्—

> अमृतं व्योम्नि देवान्ने यज्ञशेषे रसायने ।
> अयाचिते जले ह्यग्नौ मोक्षणे हेम्नि गोरसे ॥
> क्लीबेना त्वमरस्त्री तु गुडूच्यामघाभिक्षयोरिति ।

च ॥ २६ ॥

सूनृता वाक् सुदाम्नः पर्वताद्व्यज्यमाना सौदामनी विद्युत् विद्युल्लता यद्वा विशेषण द्योति प्रकाशत इति विद्युत् तादृशी सौदामनी क्षणप्रभा यथा अस्थिरा तथेति ॥ २७ ॥

विधिमाज्ञां विधुनोति अन्यथा करोति अनेकार्थत्वाद्धातूनाम् ॥ २८ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

तस्माल्लोकमिममिति । कालानुसारेण कर्त्तव्यमिति लोको

निन्द्यते स्वप्नमायामनोरथत्वेन स्वप्नस्तामसः माया राजसी मनोरथः सात्त्विकस्तथोत्कर्षापकर्षावन्नमपि जगत् न चिरकालावस्थायीति तदनुरोधे न तु न पुरुषार्थो नाशनीयः उत्पत्तौ संसिद्धायां मरणेऽपि सिद्धे पूर्वं पश्चाच्च नानेन संघातेन सह स्थितः स्थास्यतीति सिद्धत्वात् स्वप्नादितुल्यत्वं युक्तमेव अनेनोत्कृष्टमिदं राजशरीरमित्यपि परिहृतम् एतं वीक्ष्य पूर्वोक्तप्रकारेणात्मनैवात्मानं संघातव्यतिरिक्तं ज्ञात्वा देहसम्बन्धिष्वप्युदासीनो भवेत्याह । सम इति । नन्वेवं पर्यालोचना कथं भविष्यतीत्याशङ्कायामाह । शान्तो भवेति । नन्वेवमुपाये कथं न सर्वे भवन्तीत्याशङ्क्याह । प्रभो इति । त्वं समर्थः विवेकी नत्वन्ये अविवेकिनः॥२५॥

एवमुपदिष्टे ज्ञाने सन्तुष्टः सन् धृतराष्ट्र उत्तरमाह । यथा वदसीत्यादि- एवंव्यासेनाप्येतादृशमुक्तं भीष्मेणान्यैश्च तत्तदुपदिष्टं ज्ञानं क्षणमात्रमेव तिष्ठति पश्चादन्यथैव प्रवर्त्तते पुनरुपदिष्टे पश्चात्तापसहितं ज्ञानं भवति तदपि न भवतीति न तिष्ठतीति पुनरन्यथैव प्रवर्तते एवमनेकपर्यायेऽस्मन्मनसोऽयमेव स्वभाव इति निश्चित्य पश्चात्तापो निवृत्तस्ततः प्रभृतिज्ञानमपि मन्यते वैषम्यमपि करोतीमं सिद्धान्तम् अतो न जानातीति तं प्रतिबोधयति तदास्यानिष्टं भवेत् यदि पुत्रनाशं नाङ्गीकुर्यात्तदा स्वस्य दोषो भवेत् परं स्वयं कर्तुं न शक्तः नाप्यन्यः किं त्वीश्वर एवेति तस्याभिप्रेतम् अनेनास्य युद्धोद्यमोऽपि निवारितः हे दानपते दानाध्यक्ष धर्मशास्त्रेऽयमेव निपुण इति अनेन त्वं धर्ममेव जानासि नतु कालं स्वभावमीश्वरेच्छां वा परं यद्वदसि तत्कल्याणीमेव वाचं वदसि सत्यां मनोहरां च सत्यं ब्रूयात्प्रियं ब्रूयादिति स्मृतेः यतस्त्वं दानपतिरिति अद्यापि तव वचनश्रवणे श्रद्धा वर्त्तत इत्याह । तथानयेति । तथाभूतयानया वाण्या न तृप्यामि अलमिति न मन्ये स्वस्य तद्वाक्यमपेक्षितमिति ज्ञापयितुं दृष्टान्तमाह । मर्त्यः मरणधर्मामृतं प्राप्य न तृप्यतीति ॥ २६ ॥

यथा गङ्गायां सज्वरोऽपि श्रद्धावान् गङ्गास्नाने न तृप्यते परं तस्य शरीरं न सहते तथा मम इत्याह । तथापीति । सूनृता सत्यरूपा सतां मनसि यद्यपि तिष्ठति मनसो हि भार्या सा तथापि चञ्चले मनसि वेश्यारते भर्त्तरीव हृदि चञ्चले सति न स्थीयते चाञ्चल्यमात्रे तदनुगुणकार्यकर्तरि तिष्ठदपि तदपि नास्तीत्याह । पुत्रानुरागविषम इति । पुत्रानुरागेण विषमं जातं यथा जलप्रवाहेण भूमिर्निम्नोन्नता भवति यथा मालाकारा विद्युत् क्षणमपि न तिष्ठति दण्डाकारा तु क्षणं दृश्यतेऽपि अत उक्तं विद्युत्सौदामनी यथेति सौदामनी विद्युदिति प्रत्येकसमुदायाभ्यां विद्युद्वाचकम् ॥ २७ ॥

तर्हि यत्नः कथं क्रियते चित्तवृत्तिनिरोधस्य विद्यमानत्वादिति चेत्तत्राह । ईश्वरस्येति । ईश्वरेण कश्चनप्रकारो विहितः एवं प्रकारेणैवैतत् कर्तव्यमिति तत्कोऽन्यथा कर्तुं शक्तः एतद्विज्ञानमावापोद्वापाभ्यां परिश्रमेण भवति तस्मिन् कृते ज्ञापने न काप्यनुपपत्तिः एवं ज्ञात्वा को वा पुमान् विवेकी समर्थोऽपि ईश्वरविचारितं प्रकारं विशेषेण धुनोत्यपि दूरीकरोति कम्पितं वा करोति नन्वीश्वर उदासीनो नादत्ते कस्यचित्पापं नचैव सुकृतं विभुरिति वाक्यात् अज्ञानेनैव तथाचित्तं जायते नत्वीश्वरस्तथा करोतीति चेत्तत्राह । भूमेर्भारावतारायेति । भगवान् भूभारहरणार्थमवतीर्णः अन्यथावतारमेव न कुर्यादतो न ज्ञायते भगवता अन्यप्रकारो विचारित इति नन्वेतदपि नाङ्गीकर्त्तव्यं वाक्यविरोधात् अतोऽवतारस्य प्रयोजनान्तरमनवरणं वा कल्पनी-

यो दुर्विमर्शपथया निजमाययेदं सृष्ट्वा गुणान् विभजते तदनुप्रविष्टः ।
तस्मै नमो दुरवबोधविहारतन्त्रसंसारचक्रगतये परमेश्वराय ॥ २९ ॥

श्रीशुक उवाच ।

इत्यभिप्रेत्य नृपतेरभिप्रायं स यादवः ।
सुहृद्भिः समनुज्ञातः पुनर्यदुपुरीमगात् ॥ ३० ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

यस्मिन्निति चेन्न तथा सति शास्त्रवैफल्यात् सर्वमुक्तिर्वा प्रसज्यते अतोऽधिकारपरं शास्त्रमित्यपि पक्षे यथा सर्वगुणसंपत्तिर्मम तथा न कस्यापीति सर्वेषामनाश्वास एव स्यात् अतो व्यभिचारादीश्वरेच्छा स्वतन्त्रेति वक्तव्यम् एवमपि शास्त्रवैफल्यमिति चेत् सत्यं न सर्वत्र शास्त्रं प्रमाणं किन्तु क्वचिदेव यत्रेश्वरेच्छा यथोक्तसाधनेऽप्यजननात् अतः सर्वत्र शास्त्रमेव प्रमाणं यदि शास्त्रानुसारेणापि कदाचिन्न भवेत तदेश्वरविधिरिति कल्प्यते यथा मण्यादिप्रतिबन्धे दाहाभावाच्छक्तिः सा अग्नौ मणौ वेत्यत्र वयमुदासीनास्तथा तादृशस्थले ईश्वरेच्छा नियामिकेति ज्ञातव्यम् ईश्वरत्वादेव न पर्यनुयोगः लोके च महाराजाज्ञादिषु सामान्यविशेषभावः अयमेव सर्वतो निरुपद्रवेऽपि देशे कस्यचिदुपद्रवो महाराजेच्छया भवतीति नचैतावता सामान्याज्ञाया निष्कण्टकं राज्यं विरुध्यते अतो निमित्तभूतानस्मदादीन्न मर्यादायां स्थापयतीति युक्तमेव ज्ञातेऽपि शास्त्रे वैषम्यम् अन्यथा भगवान् न यदोः कुले अवतीर्णो भवेत् ॥ २८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

आस्थैर्यत्वात् स्वप्नादितुल्यम् आयम्य नियम्य ॥ २५ ॥

अभिज्ञम्मन्योऽयमक्रूरो मामपि तत्त्वमुपदेष्टुं प्रगल्भते किमहमिदं न जानामीत्यन्तर्मदपूर्णोऽपि महागाम्भीर्यं प्रकाशयन् बहिर्महासाधुरिवाह । यथेति । दानपते इति । मथुरायामन्नदानेन यथा बुभुक्षूंस्तर्पयसि तथैवात्र हस्तिनापुरे अनभिज्ञं मां ज्ञानदानेन तर्पयसीति भावः ॥ २६ ॥

सूनृता प्रियवाक् न स्थीयते न तिष्ठति सुदामा मेघः । "सुदामा भूधरे मेघे" इति विश्वः तत्र भवा सौदामनी चपले मेघे चपला विद्युदिवेत्यर्थः ॥ २७ ॥

विधिं विधानम् अन्यथेति प्रकारान्तरेणापि को नु क्षिपुनोति न कोऽपीत्यर्थः । अत्र प्रमाणं त्वमेव एतावतापि शिक्षणेन मां विवेकं ग्राहयितुं नैवाशक इति भावः । स ईश्वरः सम्प्रति युष्मद्गृहे वसते इत्याह । भूमेरिति । तेन तत्र गत्वा स एव निवेदितो यत्सम विधेयं स नैव प्रेरयेदिति भावः ॥ २८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

न केवलं देहादय एव प्रदिष्टवन्त्यतो ऽनित्या इति सर्वोऽयं लोको ऽनित्य इत्याह । तस्मादिति । स्वप्नमायामनोरथं तत्तुल्यमनित्यम् स्वप्नादीनां द्वन्द्वैक्यम् स्वप्नवत् मायामनोरथवत् इमं प्राकृतलोकमनित्यं वीक्ष्य आत्मानं मनः आयम्य नियम्य शान्तः सन् समो भवेत्यर्थः ॥ २५—२६ ॥

सूनृता प्रिया वाक् हृदि न स्थीयते हृत्संलग्ना न भवति यथा सुदामा माला तस्या इयं सौदामिनी खे न संस्थीयते सुलग्ना न भवति तद्वत् ॥ २७ ॥

विधिं विधानम् ॥ २८ ॥

भाषा टीका ।

हे राजन् ! हे प्रभो जिस हेतु से स्वप्न के सदृश के भगवन्माया मनोरथरूप इस संसार को जान कर बुद्धि मनको वश करके शांत चित्त से सम बुद्धि वाले हो जाओ ॥ २५ ॥

धृतराष्ट्रजी बोले हे दानपति अक्रूरजी जैसे आप इस कल्याण वाली वाणी को कहते हो तैसेही इस वाणी से मैं तृप्त नहीं होता हूं जैसे कि मरने वाला पुरुष अमृत को प्राप्त होकर तृप्त नहीं होता है ॥ २६ ॥

हे सौम्य ! तथापि सुंदर यह आपकी वाणी मेरे पुत्रों के अनुराग से विषम भये चलायमान इस हृदय में नहीं ठहरती है जैसे कि सुदामा पर्वतकी विजुली अस्थिर है तैसे ॥ २७ ॥

ईश्वर के विधानको कौन पुरुष अन्यथा करने वाला है जिन भगवान् ने कि पृथिवी के भारको उतारने के वास्ते यदु कुल मे अवतार लिया है ॥ २८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अतस्तमेव नमस्यति । य इति । दुर्विमर्शपथया अखिलदुर्वसायेया गुणान् कर्माणि तत्फलानि च विभजते विविच्य ददाति दुरवबोधो यो विहारस्तस्य क्रीडा स एव तन्त्रं प्रधानं मुख्यं कारणं यस्य संसारचक्रस्यात एव तस्य गतिर्यस्मात्तस्मै नम इति ॥ २९ ॥

शशंस रामकृष्णाभ्यां धृतराष्ट्रविचेष्टितम् ।
पाण्डवान् प्रति कौरव्य ! यदर्थं प्रेषितः स्वयम् ॥ ३१ ॥

इति श्रीमद्भागवते महापुराणे अष्टादशसाहस्र्यां पारमहंस्यां संहितायां वैयासिक्यां दशमस्कन्धे पूर्वार्धे एकोनपञ्चाशत्तमोऽध्यायः ॥ ४९ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अभिप्रेत्य ज्ञात्वा ॥ ३० ॥ ३१ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे श्रीधरस्वामिकृतभावार्थदीपिकायाम् एकोनपञ्चाशत्तमोऽध्यायः ॥ ४९ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

अस्माभिस्तु बहिरङ्गैः परम स्वतन्त्रोऽसौ तदर्थं दूरतो नमस्कार्य एवेत्याह । य इति । तैर्व्याख्यातं तत्रावतारिकायाँ निज-वैषम्यहानेच्छाहेतोरिवेति शेषः । अवितर्क्यमार्गयेति । ज्ञानातीतप्रवृत्तिकत्वात् परिहर्तुमशक्ययेत्यर्थः । नचोच्चनीचसुखदुःखविसर्गे तस्य च वैषम्यमित्याह । कर्माणीति । कर्माणि पूर्वकर्मानुसारेण विधिनिषेधलक्षणानि शास्त्रमुखेन व्यवस्थापयति सुखदुःखानि चोत्पादयतीत्यर्थः । नचैवं तस्यैश्वर्यं कर्माधीनमित्याह । दुरवबोधेति । अनादित्वादनन्तानि जीवानां नानाकर्माणि तद्विहारेच्छानुसारेणैवोद्यन्ते इति भावः । अतः परमेश्वराय वशीकृतसर्वत्वेन तन्नाम्ने इति ॥ २९ ॥ इतीदृशं वैषम्यपरित्यागलक्षणं नृपतेरिति समत्वेन श्रीयुधिष्ठिरराजत्वे स्वराजत्वहानिशङ्कयेति भावः । सुहृद्भिः पाण्डवादिभिः ॥ ३० ॥ पाण्डवान् प्रति विचेष्टितमिति अन्तःक्रौर्यबहिर्मार्दवाभ्यां विविधं चेष्टितं तदर्थं यद्विचेष्टितज्ञानार्थं प्रेषितः ताभ्यामेव हे कौरव्येति त्वत्पूर्वजानां कुरूणां क्षयकारणं तदेव तच्च त्वया ज्ञायत एवेति भावः ॥ ३१ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिण्याम् एकोनपञ्चाशत्तमोऽध्यायः ॥ ४९ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

दुर्विमर्शपथया इतरैर्ज्ञातुमशक्यप्रकारया मायया प्रकृत्या गुणान् सत्त्वादीन् विभजते ब्रह्मादिष्वित्यर्थः । अन्यैर्दुरवबोधः ईश्वरस्य विहारः क्रीडा तादृशविहारतन्त्रात्मिकसंसार चक्रगतिप्रवर्तनायेत्यर्थः ॥ २९—३१ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे श्रीसुदर्शनसूरिकृतशुकपक्षीये एकोनपञ्चाशत्तमोऽध्यायः ॥ ४९ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

युक्तश्चैतत् दुरवबोधमायत्वात् सर्वनियन्तृत्वाच्चेत्यभिप्रयन् केवलं तमेवेश्वरं प्रणमति । य इति । य ईश्वरः दुर्विमर्शपथया इतरैर्ज्ञातुमशक्यप्रकारया स्वप्रकृत्या इदं ब्रह्मादि तनुजालं सृष्ट्वा तनुषु चतुर्मुखादि तनुषु प्रविष्टः तत्तत्स्वाधिष्ठातृजीवान्तरात्मतया प्रविष्टः तत्सृष्ट्वा तदेवानुप्राविशदिति वस्तुस्थित्यर्थोऽत्रानुप्रवेश उक्तः गुणान् शब्दादिविषयान् विभजते ब्रह्मादिभ्य इति शेषः । प्रतिनियतान् शब्दादीनेभ्यो विभज्य प्रयच्छतीत्यर्थः । अन्यैर्दुरवबोध ईश्वरस्य विहारः क्रीडा तादृशविहारतन्त्रात्मिका संसारचक्रगतिर्यस्मात्तस्मै सर्वोत्कृष्टायेश्वराय नमः ॥ २९ ॥ इतीति । स याद्वोऽक्रूरः नृपतेर्धृतराष्ट्रस्याभिप्रायमभिप्रेत्य ज्ञात्वा सुहृद्भिः पाण्डवादिभिः सम्यगनुज्ञातः पुनर्मथुरामाजगाम ॥ ३० ॥ शशंसेति । हे कौरव्य पाण्डवान्प्रति यद्धृतराष्ट्रस्य विचेष्टितं कृतं विषप्रदानादि यत्तस्य चेष्टितस्य विज्ञानार्थमेव स्वयं भगवता प्रेषितस्तत्सर्वं कृष्णरामाभ्यां शशंस कथयामास ॥ ३१ ॥

इति श्रीवत्सान्वयपयःपारावारराकासुधाकरस्य श्रीशैलगुरोः सुतेन तच्चरणसेवासमधिगतश्रीमद्भागवतार्थहृदयेन श्रीवीरराघवविदुषा विलिखितायां श्रीमद्भागवतचन्द्रचन्द्रिकायां दशमस्कन्धपूर्वार्धव्याख्यायामेकोनपञ्चाशत्तमोऽध्यायः ॥ ४९ ॥

शुभम् ।

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

दुर्विमर्शपथया दुर्विज्ञेयमार्गया दुरवबोधः दुर्ज्ञेयः विहारः सृष्ट्यादिव्यापारलक्षणा क्रिया तस्य तन्त्रधीना संसारचक्रगतिः संसारवृत्तिः प्रकारो यस्य स तथा तस्मै ॥ २९ ॥

इत्यभिप्रेत्येति ज्ञात्वा ॥ ३० — ३१ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम् अष्टचत्वारिंशोऽध्यायः ॥ ४८ ॥ ४९ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे

एकोनपञ्चाशत्तमोऽध्यायः ॥ ४९ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

एवं भगवन्माहात्म्यं स्मृत्वा भगवन्तं नमस्यति । यो दुर्विमर्शेति । पूर्णो भगवान् कथमवतीर्णः किमर्थं वा अवतीर्ण इति सन्देहं वारयन् नमस्यति दुःखेनापि विमर्शो विचारो न यस्येति एतादृशः पन्था यस्य मन्त्रादिवदन्यसामर्थ्यपक्षं व्यावर्त्तयति । निजेति । भगवद्धर्माणामपि जिज्ञासा अशक्या यथा मर्यादामार्गस्यापि तत्र भगवतो विमर्शं को वा करिष्यति—

अलौकिकास्तु ये भावा न तांस्तर्केण योजयेत् ।

इति निषेधश्च एतादृश्या मायया लोके कपटत्वेन प्रसिद्धयापीदं प्रसिद्धं जगत् सृष्ट्वा तत्र स्वयं सत्यस्वरूपः प्रविष्टः गुणान् सत्त्वादीन् उच्चनीचभावेन भजते पृथक्करोति यस्या मार्ग एव न ज्ञायते तया किं कश्चित् कर्तुं समर्थः मायासृष्टं वा कश्चित्प्रवेष्टुं प्रविश्य वा तुल्ये उच्चनीचतां सम्पादयितुम् अतो महानुभावो भगवानिति तस्मै नमः किञ्च श्रुतौ काण्डद्वये पञ्चरात्रे इतिहासपुराणेषु च सहस्रधा सृष्टिर्निरूपिता अतः केन साधनेन कथमेव करोतीति दुरवबोधो विहारतन्त्रः क्रीडापरिकरो यस्य संसारस्यः तस्य चक्रं तस्यापि गतिर्यस्मात् तत्र वा गतिर्यस्येति भगवतः संसारः अहंताममतात्मकः न लौकिकवत् इच्छया सर्वं जायते इत्यतो लीलार्थमित्यध्यवसीयते भगवतोऽवताराः भगवच्छास्त्रं भगवदीयाः पुरुषाः पदार्थाश्च तेषां साधारणोपयोगाभावात् किमर्थं करणमिति नाशङ्कनीयं दुरवबोधत्वादेव ॥ २९ ॥

अतो भगवतः कार्यं जगत् भगवल्लीलावैष्णवप्रकारश्चेति उभयोर्दुर्ज्ञेयत्वात् परम एवेश्वरो भगवानीश्वरादेवालौकिकात् परमेश्वर उभयालौकिक इत्यनेन भगवतः संसारोऽयं भवदादयोऽस्मदादयश्च तदिच्छयैव प्रवर्त्तितुं योग्याः न तु स्वेच्छयेति उपदेशो वा ज्ञानं वा न विचारणीयमिति तूष्णीं सर्वैः स्थातव्यमित्यभिप्रायं बुद्ध्वा ततो निर्गत इत्याह । इत्यभिप्रेत्य नृपतेरभिप्रायमिति । तस्य तद्वाक्यानङ्गीकारहेतुद्वयमाह । नृपतेरिति स यादव इति । राजवाक्यमङ्गीकर्त्तव्यं यदुवंशो भगवदवतारात् यादवैश्च सुतरां तदङ्गीकर्त्तव्यं तदुत्कर्ष एवोक्त इति ततोऽत्रापि लौकिकन्यायेन सुहृद्भिर्भीष्मादिभिः सम्यगनुज्ञातो यदुपुरीं मथुरामगात् ॥ ३० ॥

स्वयं केवलमाज्ञाकारी न स्वतन्त्र इति ज्ञापयितुं रामकृष्णयोः स्थाने शशंस धृतराष्ट्रस्य विशेषेण चेष्टितं पाण्डवान् प्रति मारणपर्यन्तमुद्योगं ननु, सतामेतदयुक्तमिति चेत्तत्राह । यदर्थं स्वयं प्रेषित इति । अधिकारिणा नायं दोषः कौरव्येति विश्वासार्थं स्वयं प्रेषित इत्यन्यद्वारापि कथनं व्यावर्त्तितम् अनेन पूर्वार्धान्तप्रकरणेनाग्रे भगवतैव कर्तव्यमिति ज्ञापितम् एतावत्पर्यन्तं न साक्षाद्भगवता किञ्चित् कृतं किन्त्वन्यानुरोधेनैवेति अतो भगवतो लीलाद्वयमन्यानुरोधेन करणं स्वतः करणमिति भगवतो भक्तानुरोधो निरूपितः

इत्येवं भगवल्लीला भक्तविश्वासदायिनी ।
निरूपितातियत्नेन कृष्णपादाम्बुजाश्रया ॥
सर्वेषु पुष्टहृदयेषु निवेदयामि मार्गो यदा—
भगवतो भवतामभीष्टः ।
भक्तिप्रकारसहितो हरिभावयुक्तो ज्ञेयस्तदा—
विवृतिरेव सदा विचिन्त्या ॥
दशमस्कन्धविवृतिः पूर्वार्धे सुनिरूपिता ।
कृष्णपादाम्बुजे न्यस्ता श्रीपुष्पाञ्जलिरुज्ज्वलः ॥ ३१ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे

श्रीमद्वल्लभदीक्षितविरचितायां सुबोधिन्याम्

षट्चत्वारिंशाध्यायविवरणम् ॥ ४६ ॥ ४६ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

अतस्तमेव नमस्यति । य इति । दुर्विमर्शपथया दुर्वितर्क्यमार्गया गुणान् विभजते शान्तघोरमूढरूपत्वेन विभक्तान् करोति दुरवबोधं दुर्गमं विहारतन्त्रं लीलासिद्धान्तो यस्य संसारचक्रादस्मात् गतिरुद्धारो यस्मात् स च स च तस्मै धृतराष्ट्रं प्रबोधयेति त्वां मत्प्रबोधार्थं प्रेरयति मा प्रबुध्यस्वेत्यबोधार्थं माञ्च प्रेरयतीत्येवं विषमा तस्य लीला अतोऽस्य सिद्धान्तं को जानीयादिति भावः । नच त्वन्तु संसारचक्रे पतित एवेत्यपि वाच्यं ममापि तस्मादेव गतिर्भाविनीति भावः ॥ २९ ॥

अभिप्रायं वैषम्यापरित्यागरूपमभिप्रेत्य ज्ञात्वा ॥ ३०।३१ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।

ऊनपञ्चाशत्तमोऽत्र दशमेऽजनि सङ्गतः ॥ ४९ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

दुर्विमर्शपथया दुर्बोधमार्गया निजमायया "मायान्तु प्रकृतिं विन्द्यान्मायिनं तु महेश्वर"मिति श्रुत्युक्तया निजस्य सर्वेश्वरस्य मायया इदं विश्वं सृष्ट्वा तदनुप्रविष्टः सन् गुणनिबन्धनानि त्रिविधानि कर्माणि तत्फलानि च विभजते त्रिभज्य ददाति पूर्वपूर्वसृष्ट्यनुरोधेन जीवेभ्य इति शेषः। दुरवबोधो भगवद्विहारः क्रीडा स तन्त्रं मुख्यं कारणं यस्य संसारचक्रस्य तस्य गतिर्यस्मात्तस्मै नमः ॥ २९ ।

नृपतेर्धृतराष्ट्रस्य अभिप्रेत्य अवधार्य ॥ ३० ॥ ३१ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे

एकोनपञ्चाशाध्यायार्थप्रकाशः ॥ ४९ ॥

भाषा टीका।

जो परमेश्वर अचिन्तनीय मार्ग वाली अपनी माया से इस जगत्को सृज कर फिर उस में प्रवेश करके तीनों गुणों का विभाग करते हैं ऐसे किसी के नहीं जानने योग्य विहार ही प्रधान जिस में ऐसे संसार चक्रकी गति करने वाले उन श्रीकृष्ण के अर्थ नमस्कार है ॥ २९ ॥

श्रीशुकदेवजी बोले वे यादव अक्रूरजी उस धृतराष्ट्र राजा के इस अभिप्रायको जान कर और सब बंधुओं से विदा मांग कर फिर मथुरापुर को जाते भये ॥ ३० ॥

हे कौरव्य! परीक्षित्‌जी श्रीकृष्ण तथा बलरामजी के प्रति जिस कार्य को आप भेजे थे सो पांडवों के विषै धृतराष्ट्र की जैसी चेष्टा है तिसको सब कहते भये ॥ ३१ ॥

इति श्रीभागवत दशमस्कंध पूर्वार्ध

उनञ्चास में अध्याय की

भाषा टीका समाप्त ॥ ४९ ॥

इति श्रीमद्भागवते दशमस्कन्धे पूर्वार्धे एकोनपञ्चाशोऽध्यायः समाप्तः ॥ ४९ ॥

दशमस्कन्धे पूर्वार्धं समाप्तम्।

॥ श्रीः॥

विज्ञापनम् ।

परपक्षगिरिवज्रः ।

अयि विचक्षणाः ! अद्यातिप्रहर्षसमयो वरीवर्त्ति अहं तत्रभवद्भ्यो भवद्भ्योऽद्भुतग्रन्थं निवेदयामि यद्ग्रन्थान्वेषणे सहस्राणि विद्वांसोऽकार्षुः चातकास्स्वातिबिन्दूनिव, तथा ऽपि तद्ग्रन्थदर्शनमपि दुर्लभमभूत् तत्पाठनविचारणादि तु दूरापास्तमेवासीत् तमेव ग्रन्थमत्यानन्देन समस्तभारतवासिनां श्रीमतां सेवायां निवेदयामि यं ग्रन्थं 'शारीरकहार्दसंचयनामकं' कथयन्ति, केचित्तु परपक्षगिरिवज्राख्यम् अध्यासगिरिवज्राख्यमपि ब्रुवन्ति, एष ग्रन्थो वेदान्तिनां शिरोधार्यो ऽस्ति, किञ्च सर्वमनीषिणामेतत्सुविदितमस्ति, निगमकल्पतरो रसमयफलं वेदान्तशास्त्रमेवास्ति, यद्यपि वेदान्तशास्त्रस्य स्वस्वसिद्धान्तानामनुकूला अनेके ग्रन्था मुद्रितास्सन्ति, तथापीदृशः को ऽपि ग्रन्थोऽद्यावधि न मुद्रितो ऽस्ति, यद्ग्रन्थावलोकनेनैव सर्वे सिद्धान्तज्ञानं भवति, एतस्मिन् ग्रन्थेऽद्भुतचमत्कारोऽस्ति एतदवलोकनेनैव सर्वशास्त्रसिद्धान्तज्ञानपूर्वकसत्यासत्यविचारो भवति, अन्यवेदान्तग्रन्थस्यावलोकनावश्यकता ऽपि न भवति, सर्वेषां विपश्चितामेतद् ग्रन्थावलोकनेन पूर्णानन्दावाप्तिर्भवति, एष च ग्रन्थो विदुषां पठनपाठनादिषु प्रचारणीयो ऽस्ति, किम्बहुलेखनेनैतद्ग्रन्थावलोकयितॄणां ब्रह्मानन्दास्वादसमुद्रस्तरङ्गित इव भवति, एतद्ग्रन्थावलोकनेन विद्वन्मण्डल्यां वाग्विलासे सङ्कोचः कदा ऽपि न भवति, एष च ग्रन्थो निम्नलिखितप्रकरणैर्विभूषितो ऽस्ति, एतस्मिन् ग्रन्थे चत्वारो ऽध्यायास्सन्ति, तत्र प्रथमे ऽध्याये विषयसम्बन्धगिरिनिपात–प्रयोजनाधिकारिगिरिनिपात–अध्यासगिर्यधिष्ठानगिरिनिपातादीनि महाविस्तीर्णानि त्रयोविंशतिः प्रकरणानि सन्ति. द्वितीये चाध्याये जिज्ञास्योपपत्तिगिरिनिपातादीनि दश प्रकरणानि सन्ति तृतीयेऽध्याये साङ्ख्यगिरिनिपातादीनि दश प्रकरणानि सन्ति चतुर्थेऽध्याये जीवन्मुक्तिगिरिनिपातो ऽस्ति, एवं चत्वारिंशत्प्रकरणैर्विभूषितो ऽष्टसहस्रश्लोकसंख्यापरिमितो ग्रन्थोऽस्तीति विज्ञेयं मनीषिभिरिति शम् ॥ मूल्यम् रौप्यकपञ्चकम् ५)

पूज्यपादश्रीविश्वनाथचक्रवर्तिविरचितम्

श्रीकृष्णभावनामृतम् ।

श्रीकृष्णभावनामृतम् श्रीकृष्णचन्द्राष्टकालिकसेवानिरूपणपरम् क्रीडानिकुञ्जस्थ किङ्करीशुकशारिकादीनां परस्परसेवानिरूपणपर सुस्पष्टपद्यात्मकं महाकाव्यम् तदनुगुणामिताक्षरसंस्कृतटीकया समलङ्कृतम्, मूल्यम् रौप्यकत्रयम् ३)

श्रीमद्भागवत संबन्धीय नियमावली ।

इतने बड़े परिश्रम और अध्यवसाय पर भी सर्व साधारण के सुलभ संग्रह के अर्थ पूर्ण ग्रंथ का मूल्य केवल ५०) रुपया अग्रिम रखा गया है राजा महाराजा और समान्य मनुष्यों के सन्मान रक्षाके लिये उनसे केवल १००) रु० मात्र लिया जायगा डाकमहसूल २४) रु० अलग पड़ेगा यह भागवत दशटीकोपेत है ।

असमर्थ ग्राहकों से चार किस्तों में रुपया लिया जायगा—प्रथम किस्त १२) रु० पञ्चमस्कन्ध तक, द्वितीय किस्त १२) षष्ठस्कन्ध तक, तृतीय किस्त १२) सप्तमस्कन्ध तक, चतुर्थ किस्त १४) दशमस्कन्ध तक और डाक महसूल २४) द्वादशस्कन्ध तक लियाजायगा।

श्रीजगन्नाथवल्लभनाटकम् ।

इह खलु जगति विद्यास्थानेष्वनेकेषु पठनीयेषु सत्स्वपि शास्त्रान्तराणां सहिष्णुवेद्यत्वेन सूक्ष्ममतिवेद्यत्वेन च तेष्वल्पजनादरणीयेषु जातेषु इदानीं स्थूलमतिवेद्यत्वेन सुकुमारवेद्यत्वेन च काव्यनाटकादीन्येव मनुष्याणां समययापनयोग्यानि तानि च भगवद्विषयकाणि चेद्भुक्तिमुक्तिप्रदानीति विचार्येदानीं जगन्नाथवल्लभनाटकं सर्वजनसौकर्यायप्रकाशितम् इदं च नाटकं श्रीराधाकृष्णरहस्यक्रीडा विषये प्रतापरुद्रनृपतितोषार्थं रामानन्दराय कविना निर्मितम्. अत्र च पञ्चाङ्काः सान्ति तत्र प्रथमेऽङ्के नटनटीसूत्रधाराणां संवादपूर्वकप्रस्तावनानन्तरं श्रीराधाकृष्णमदनिका विदूषकाणां वृत्तान्तैः पूर्वरागनिरूपणम्१द्वितीये च भावपरीक्षादिनिरूपणम्२तृतीये भावप्रकाशादिनिरूपणम्३चतुर्थे श्रीराधिकाया अभिसरणक्रियानिरूपणम् ४ पञ्चमे श्रीराधाकृष्णयोः सङ्गमनिरूपणम् अस्मिन् ग्रन्थे मध्ये मध्ये गीतगोविन्दवद्रागपद्यान्यपि विद्यन्ते॥ मूल्यम् द्वादश आणकाः ॥।)

वेदान्तसारः ।

भो भो वेदवेदान्तसकलशास्त्रपारावारपारङ्गताः !

विदितमेव भवतां श्रीमद्वैयासिकसूत्रार्थयाथात्म्यप्रतिपादको बालानामपि वेदान्तार्थसंशयनिवारणको वेदान्तसारो नाम ग्रन्थरत्नम्. स चेदानीं सुललितैर्नागराक्षरैरपूर्वतया मुद्रितस्सन् जाज्वलीति. अतस्सर्वेऽप्येतद्ग्रन्थरत्नं केवलेन सार्धरूपकमूल्येन गृहीत्वा मनोनयनानन्दं प्राप्नुवन्तु भवन्तः। अस्य मू० १)

श्रीश्रीनिम्बार्कदर्शनम्--भो भोः परिनिष्ठितविद्वांसः! अस्मन्मुद्रणालये यद्यावधि काप्यमुद्रितम् भाष्यत्रयोपेतम् 'श्रीमन्निम्बार्कदर्शनम्' समग्रं सम्मुद्रितं तत्त्वर्यैतां महणोत्सुकैः सप्तमुद्री-मूल्येन, पञ्चावधिकेन लभ्येत इति विदन्तु मू० ७)

श्रीमद्भागवत कार्यालय—श्रीदेवकीनन्दन प्रेस
श्रीवृन्दावन—जिला मथुरा । } विद्वज्जन कृपाकाङ्क्षी—श्रीनित्यस्वरूप ब्रह्मचारी ।